॥ श्री ॥

चौखम्बा संस्कृत ग्रन्थमाला

ग्रन्थ संख्या ९३

शब्दकल्पद्रुमः

स्यार-राजा-राधाकान्तदेव-बाहादुरेण

विरचित

श्रीवरदाप्रसाद-वसुना तदनुजेन श्रीहरिचरण-वसुना च

अशेषशास्त्रविशारदकोविदवृन्दसाहाय्येन सपरिवर्द्धित ।

चतुर्थो भाग.

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी
मुद्रक : विद्याविलास प्रेस, वाराणसी
संस्करण : तृतीय, सं० २०२४ वि०
मूल्य : सम्पूर्ण ग्रन्थ १–५ भाग रु० १५०–००

पोस्ट आफिस 'चौखम्बा', पोस्ट बाक्स नं० ८
वाराणसी-१ (उ० प्र०)
भारतवर्ष
फोन नं० ३१४८

THE
CHOWKHAMBA SANSKRIT SERIES
WORK NO. 93

SHABDA-KALPADRUM

OR

AN ENCYCLOPÆDIC DICTIONARY OF SANSKRIT WORDS ARRANGED IN ALPHABETICAL ORDER GIVING THE ETYMOLOGICAL ORIGIN OF THE WORDS ACCORDING TO PANINI THEIR GENDER VARIOUS MEANINGS AND SYNONYMS AND ILLUSTRATING THEIR SYNTACTICAL USAGE AND CONNOTATION WITH QUOTATIONS DRAWN FROM VARIOUS AUTHORITATIVE SOURCES SUCH AS VEDAS VEDANTA NYAYA, OTHER DARSHANAS PURANITIHAS MUSIC ART ASTRONOMY TANTRA RHETORICS AND PROSODY AND MEDICINE ETC.

BY

RAJA RADHA KANTA DEVA

PART FOUR

THE
CHOWKHAMBA SANSKRIT SERIES OFFICE
POST BOX 8, VARANASI-1

Publisher The Chowkhamba Sanskrit Series Office, Varanasi
Printer Vidya Vilas Press, Varanasi
Edition Third, 1967
Price 1-5 Vols Complete Rs 150-00

Oriental and Foreign Book-Sellers and Publishers
P O Chowkhamba, Post Box 8,
Varanasi-1 (India)
1967
Phone 3115

शब्दकल्पद्रुमः

चतुर्थकाण्डम् ।

य, यकारः । स च व्यञ्जनवर्णविशेषः । अस्योच्चारणस्थानं तालु । (यदुक्तं सिद्धान्तकौमुद्याम् । "इचुयशानां तालु ।" तथा च शिक्षायाम् । १७ ।
"कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू ।")
तस्य स्वरूपं यथा,—
"यकारं शृणु चार्व्वङ्गि ! चतुष्कोणमयं सदा ।
पलालधूमसङ्काशं स्वयं परमकुण्डली ॥
पञ्चप्राणमयं वर्णं पञ्चदेवमयं सदा ।
त्रिशक्तिसहितं वर्णं त्रिविन्दुसहितं तथा ।
प्रणमामि सदा वर्णं मूर्त्तिमन्मोक्षमव्ययम् ॥"
इति कामधेनुतन्त्रे ५ पटलः ॥
वर्णोद्धारतन्त्रे(?) ... मस्य लेखनप्रकारो यथा,—
"ऊर्द्ध्वादि क्रमतो रेखा चतुष्कोणमयी शुभा ।
नारायणेशविधयस्तासु तिष्ठन्ति नित्यशः ॥
मात्रा कुण्डलिनी ज्ञेया ध्यानमस्य प्रचक्षते ॥"
तस्य ध्यानं यथा,—
"धूम्रवर्णां महारौद्रीं चतुर्भुजां रक्तलोचनाम् ।
रक्ताम्बरपरीधानां नानालङ्कारभूषिताम् ।
महामोक्षप्रदां नित्यामष्टसिद्धिप्रदायिनीम् ।
एवं ध्यात्वा यकारन्तु तन्मन्त्रं दशधा जपेत् ॥" ॥
तन्त्रान्तरमन्यो यथा —
"त्रिशक्तिसहितं वर्णं त्रिविन्दुसहितं सदा ।
प्रणमामि सदा वर्णं शक्तिमान्मोक्षमव्ययम् ॥"
इति वर्णोद्धारतन्त्रम् ॥
अस्य नामानि यथा,—
"यो वायुर्धूम्रको वायुर्ज्वलति पुरुषोत्तमः ।
युगान्तः श्वसनः शीघ्रो धूमार्च्चिः प्राणिसेवकः ।
महाभमो चटी लोला वायुवेगी यशस्करी ।
सङ्कटः चपा बाणो हृदयं कपिलाप्रभा ।
आग्नेयो वामकण्ठाग्नो लोमो पार्श्वं प्रमा सुखम् ।
सत्त्वः सर्व्वेश्वरी धूम्रवासुकी सुखदेश्वरी ।
क्षमात्मा मलयो माता ह्लादिनी भङ्गिनायकः ।
वैनमः शोषको मोक्षो वनितामध्यवेदिनी ।
मेदः सोमः पतिनामा यामदा प्राणसङ्गकः ॥"
इति नानातन्त्रशास्त्रम् ॥

(धातुवर्ज्जविशेष । स तु दिवादिगणस्थपकः । तथा च कविकल्पद्रुमे । "दिवादौ युजादिकः ।"
छन्दःशास्त्रोक्तगणविशेषः । तथा च छन्दोमञ्जर्याम् ।
"आदिगुरुः पुरुरादिलघुर्यः ।"
अस्य साङ्केतिकचिह्नं यथा, ।ऽऽ ,
काव्यादौ अस्य प्रथमप्रयोगे जन्योलाभः फलम् ।
यथा, वृत्तरत्नाकरटीकायाम् ।
"यो वक्ष्यौ दत्त दाहं यशगमय अशौभः सुखं यच्छ वेदम् ॥")
यः, पुं, (याति यातीति । या गतौ + कः ।) वायुः ।
यशः । योगः । यानम् । याता । इति शब्दरत्नावली । सर्व्वनाम । यच्छब्दार्थे इति यावत् ।
इति विश्वः ॥
यकः, त्रि, य । ये इति भाषा । यच्छब्दस्य टेरत्वे टेः पूर्व्वं अकागमेन निष्पन्नः । ("अव्ययसर्व्वनाम्नामकच् प्राक् टेः ।" ५ । ३ । ७१ । इति पाणिनिसूत्रम् । यथा, ऋग्वेदे । ८।२१।१८ ।
"चित्र इद्राजा राजका इदन्यके यके सरस्वतीमनु ॥")
यकृत्, क्ली, (यम + "शकेर्ऋतिन् ।" उणा० ४ । ५८ । इत्यत्र "शाकृञ्यकात् यमे कश्च ।" इत्युक्त्वादत्तोक्त्या ऋतिन् कश्च च कः ।) कुक्षेर्दक्षिणभागस्थमांसखण्डम् । तत्पर्य्यायः । कालखण्डम् २ । इत्यमरः । २ । ६ । ६६ ॥ कालखञ्जम् ३ कालेयम् ४ कालकम् ५ । इति हेमचन्द्रः ॥ करण्डः ६ महाधातुः ७ । इति रभसः ॥ (यथा, ऋग्वेदे । १ । १६१ । ३ ।
"यकृन्मतस्नाभ्यां स्वाहा प्लाशिभ्यो विवृहामि ते ।"
"यकृत् हृदयशरीरे वर्त्तमानः कालमांसविशेषो यकृत् तस्मात् ।" इति तद्भाष्ये सायणः ॥)
अथ शरीरावयवविशिष्टस्य यकृतः स्वरूपमाह ।
"अधो दक्षिणतश्चापि हृदयाद्यकृतः स्थितिः ।
तत्तु रञ्जकपित्तस्य स्थानं शोणितजं मतम् ॥"
अथ यकृद्रोगमाह ॥
"प्लीहामयस्य हेत्वादि समस्तं यकृदामये ।
किन्तु स्थितिस्तयोर्ज्ञेया वामदक्षिणपार्श्वयोः ॥"
अथ यकृद्रोगचिकित्सा ।
"प्लीहोदिता क्रिया सर्व्वा यकृत्यपि समाचरेत् ।
कार्य्यश्च दक्षिणे बाहौ तत्र शोणितमोक्षणम् ॥
क्षारश्च विड्गतस्याभ्यां पूतिकस्याम्बुनिःसृतम् ।
पिबेत् प्रातर्यवक्षारं यकृत्प्लीहप्रशान्तये ॥"
इति भावप्रकाशः ॥
(तथा च ।
"वातेनोदीरितं रक्तं कफेन च घनीकृतम् ।
पित्तेन पाकतां प्राप्तं त्रिदोषसंश्रितं यकृत् ॥
अधश्च तस्य वक्ष्यामि तेन तस्यापि कल्पयेत् ।
चीयते तेन मनुजो ज्वरास्तु प्रवर्त्तते ॥
वमिश्च मलयोशारी वृक्षाधः स्वचर्म्मश्रमः ।
दाहोऽरुचिस्तृषामन्दो कर्ण्ठे दाहः शिरो व्यथा ॥
कुम्भूकस्य प्रतिश्यायः शोषः कटुकास्यता ।
धमन्यो हृदि शूलञ्च शिरानाडः प्रजायते ॥
हृदये मथ्यते नाथ उदरं ग्रथ्यते भृशम् ।
एतैश्चिह्नैर्विजानीयात् यकृत् कोष्ठे च वर्द्धितम् ॥"
अथास्य चिकित्सा ।
"शिलाजीवथवीतर्ष्णं विषा
कासरो च तुलसी च चिलिका ।
क्वाथ एव हृदयामयापहः
याति शूलसहितश्च यकृत् ॥
क्षीरालीकायोषसकैल्पनापि
दूराभुनात्यिगतज्वरकम्पः ।
रात्रौ समायो कुसुमं समङ्गा
क्वाथः यकृत्प्लीहदरात् ज्वरञ्च ॥"
इति हारीते चिकित्सितस्थाने चतुर्थेऽध्याये ।
"प्लीहवद्धिकरान् यानीन् दुर्म्मादूयकृत्यपि यथम् ॥"
इति वाग्भटे चिकित्सितस्थाने द्वादशेऽध्याये ।)
यकृद्दात्रिका, स्त्री (यकृत् इवात्मा यकृदं सखा ।
बहुब्रीहौ कः । टापि अत इत्वम् ।) वैन मात्रिका । इति शब्दचन्द्रिका ॥

यक्षवैरी, [न्] पुं (यक्षाणां वैरी नाशक ।) रोहितकवृक्ष । यथा,—
"प्लीहघ्नो दाडिमच्छदो यक्षवैरी बलच्छदः ।"
इति शब्दचन्द्रिका ।

यक्ष क ङ अर्चि । इति कविकल्पद्रुमः । (चुरा०-आत्म० सक० सेट् ।) क ङ, यक्षयते । अर्चि पूजायाम् । इति दुर्गादासः ।

यक्ष, पुं, (यक्ष्यते पूज्यते इति । यक्ष+घञ् । यद्वा, ई लक्ष्मीमक्षोतीति । यक्ष+अच् ।) गुह्यकभेदः । गुह्यकेश्वरः । इति मेदिनी । षे, १९ । इन्द्रभवनम् । धनदपदः । इति पारस्करः ।
यक्षस्वरूपं यथा,—
आजानुलम्बितकरा कुबेरवरकिङ्करा ।
मेघवर्णधरकरा गजवाकारसमाश्च ।
विशालकारवदना पिङ्गलाक्षा महोदरा ।
स्फटिका रत्नसमाश्च दीर्घस्कन्धाश्च कथम् ।"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे १७ अध्याय ।
यक्षगणो यथा,—
"प्रचेतस सुता यक्षा येषां नामानि मे शृणु ।
केवलो हरिकेशश्च कपिल काञ्चनस्तथा ।
मेघमाली च यक्षाणां गण एष उदाहृत ॥"
तस्य उत्पत्तिर्यथा —
"धातुश्चक्षुर्मोक्षस्तस्मिन् यक्षे च ये ।
यदुपक्षुत्क्षमेव तस्माद्यक्षो भवत्ययम् ॥"
इति वह्निपुराणे काश्यपीयवंशे ।
(अपरा निरुक्तिर्यथा, विष्णुपुराणे ।१।५।४१।
"भैव भो रक्ष्यतामेव यैरुक्तं राक्षसास्तु ते ।
ऊचु खादाम इत्यन्ये ये ते यक्षास्तु यक्षणात् ॥"
पुं, स्त्री, पूजा । यथा, ऋग्वेदे । ७ । ६१ । ५ ।
"अमूरा विश्वा वृषणा विमा वां
न यासु चित्रं ददृशे न यक्षम् ॥"
"न यत्र न पूजा दृश्यते ।" इति तद्भाष्ये
सायण । तथाच अथर्ववेदे ।११ । २ । २४ ।
"तव यक्षं पशुपते अप्स्व न्त ।")

यक्षकर्दम, पुं (यक्षप्रियः कर्दम ।) कर्पूरागुरु कस्तूरीकक्कोलानां मिश्रिततुल्यभागः । इत्यमर । २ । ६ । १३३ । "कर्पूरादिभिर्गन्धद्रव्यैः समभागैः साधितोऽनुलेपनभेदो यक्षकर्दम उच्यते । यक्षप्रियः कर्दमो यक्षकर्दमः ।
'कुङ्कुमागुरुकस्तूरीकर्पूर चन्दनानि ।
महासुगन्धमित्युक्तं नामतो यक्षकर्दमः ।'
इति धन्वन्तरिः ।
अन्यत्रापि ।
कर्पूरागुरुकस्तूरीकक्कोलघुसृणानि च ।
एकीकृतमिदं सर्वं यक्षकर्दम इष्यते ॥"
इति तट्टीकायां भरतः ।

यक्षतरु पुं, (यक्षप्रियो यक्षाधिष्ठितो वा तरु । शाकपार्थिवादिवत् समास ।) वटवृक्ष । इति राजनिर्घण्टः । (विवरणमस्य वटशब्दे ज्ञातव्यम् ।)

यक्षधूप पुं (यक्षप्रियो धूप ।) सर्जरसः । धूनकधूप । इति वैद्यक । धूना इति भाषा । इति मेदिनी । इति भरत । तत्पर्याय । सर्जरस २ कराल ३ सर्वरस ४ बहुरूप ५ । इत्यमर । २ । ६ । १२७ । राल ६ धूनक ७ वह्निवल्लभ ८ । इति रभस । शालसार ९ शालज १० कालनिर्यास ११ अग्न्य १२ । इति रत्नमाला । (अस्य पर्यायाणाम् यथा,—
"राळस्तु शालनिर्यासस्तथा सर्जरस स्मृत ।
देवधूपो यक्षधूपस्तथा सर्जरसश्च स ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ।
एतेन माधवपूजननिषेधो देवीपूजा चोक्ता यथा कालिकापुराणे ६८ अध्याये ।
"न यक्षधूपं वितरेत् माधवाय कदाचन ।"
"यक्षधूपेन वा देवीं महामायां प्रपूजयेत् ॥")
सरलद्रवद्रव । टार्पिन तैल इति भाषा । तत्पर्याय । पायस २ श्रीवास ३ सरलद्रव ४ । इति हेमचन्द्र । ३ । १११ ।

यक्षरस पुं (यक्षप्रियो रस । शाकपार्थिववत् समास ।) पुष्पमधुम् । तत्पर्याय । मध्वासव २ । इति त्रिकाण्डशेष ।

यक्षराज पुं (यक्षाणां राजा । "राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९१ । इति समासान्त टच् ।) कुबेर । इति शब्दरत्नावली । (यथा, महाभारते । ५ । १९४ । ९९ ।
"इच्छा भगवान्देवो यक्षराज सुपूजित ।
प्रययौ सहितो यक्षैर्निमेषान्तरचारिभि ॥")

यक्षराट्, [ज्] पुं, (यक्षेषु राजते इति । राज+"सत्सूद्विषद्रुहेति ।" ३ । २ । ६१ । इति क्विप् ।) कुबेर । (यथा, भागवते । ८ । १८ । १७ ।
"तस्मै इन्दुपतीताय यक्षराट् पात्रिकाम-दात् ॥"
यक्षराजनगरम् । मणिभद्र । यथा, महाभारते । ३ । ६४ । १२७ ।
"तथा नो यक्षराजश्च मणिभद्र प्रसीदतु ।"॥)
यक्षा इव सत्वा राजन्तेऽत्र । राज+क्विप् ।) रङ्गमहल । इति मेदिनी । जे, ११ ।

यक्षराट्पुरी, स्त्री, (यक्षराज पुरी ।) अलका । सा च कैलासपर्वतस्थितकुबेरपुरी । इति जटाधर ।

यक्षरात्रि, स्त्री, (यक्षप्रिया यक्षाणां वा रात्रि ।) कार्त्तिकी पूर्णिमा । तत्पर्याय । दीपाली २ । इति त्रिकाण्डशेष ।

यक्षसाधन, स्त्री, (यक्षाणां साधनम् ।) यक्षो पासना । यथा, वाराहीतन्त्रे ।
"यक्षाणां यक्षिणीनाञ्च चेटानामपि साधनम् ।
भूतवेतालगाम्बर्वं मारणोच्चाटनादि च ।
अधोऽमरमतेष्वेवं साधने देविक हितम् ॥"

यक्षामलक, स्त्री, (यक्षाणामामलकम् ।) पिण्डखर्जूरम् । इति शब्दमाला ।

यक्षावास, पुं (यक्षाणामावासो वासस्थानम् ।) वटवृक्ष । इति राजनिर्घण्ट ।

यक्षिणी स्त्री, (यक्ष पूजा अस्त्यस्या । यक्ष+इनि । ङीप् ।) कुबेरपत्नी । इति शब्दरत्नावली । यक्षभार्या च । (यथा, कथासरित्सागरे । १ । १७८ ।
"सोऽपि गुह्यानु विचरन् भ्रान्तः पुत्र तमभ्ययात् ।
अद्यापि मा तथा पुत्र । मम शिक्षा हि यक्षिणी ॥")

यक्षी, स्त्री, (यक्षस्य भार्या । यक्ष+पुंयोगादिति ङीष् ।) कुबेरपत्नी । इति शब्दरत्नावली । (यक्षभार्या । यथा महाभारते । ३ । ६४ । ११७ ।
"यक्षी वा राक्षसी वापि उताहोऽसि वरा
स्त्रियः ।
सर्वथा कुरु मे स्वस्ति रक्षस्वास्मा-
निन्दिते ॥")

यक्षोडुम्बरक, स्त्री, (यक्षप्रियमुडुम्बरम् । तत स्वार्थे कन् ।) अश्वत्थफलम् । इति त्रिकाण्डशेष ।

यक्ष्मघ्नी स्त्री (यक्ष्माणं हन्ति । हन्+"अमनुष्यकर्तृके च ।" ३ । २ । ५३ । इति टक् । ततो ङीप् ।) द्राक्षा । इति शब्दमाला ॥

यक्ष्मा, [न्] पुं (यक्ष+"सातिभ्यां मनिन्मनिणौ ।" इति । उणा० ४ । १५० । इत्यत्र उत्तरसूत्रोक्ता मनिन्प्रत्ययेन साधु ।) रोगविशेष । तत्पर्याय । क्षय २ शोष ३ । इत्यमर । २ । ६ । ५१ ॥ राजयक्ष्मा ४ रोगराट् ५ । अथ राजयक्ष्माधिकार । "अथ राजयक्ष्मणो निदानं पूर्वरूपञ्च निदानमाह ।
'वेगरोधात् क्षयाच्चैव साहसाद्विषमाशनात् ।
त्रिदोषो जायते यक्ष्मा गदो हेतुचतुष्टयात् ॥
वेगोऽत्र वातमूत्रपुरीषाणाम् ।
'वातश्लेष्मपुरीषाणि निरुणद्धि यदा नर ।
इति चरकवचनात् ।
क्षयात् शोषकोऽभीनेति क्षय तैजसाद्वाराद्यात् अग्नेर्व्याप्तो धातुक्षयहेतव स्वयमुक्तोऽभिप्रेत । साहसात् बलवता सह युद्धादिना । विषमाशनात् बहु स्तोकमकाले वा भुक्त तत् विषमाशनम् । तस्मात् । त्रिदोष सान्निपातिक । हेतुचतुष्टयात् अन्येऽपि हेतव हेतुचतुष्टय एवान्तर्भवन्ति । यक्ष्मण पर्याया राजयक्ष्म क्षयशोषा ।॥ यक्ष्मादीनां शब्दानां निरुक्ति माह ।
'येनो व्याधिमतां यस्मात् व्याधिर्येन यक्षते ।
स यक्ष्मा प्रोच्यते लोके शब्दशास्त्रविशारदै ॥
यक्षते पूज्यते ।
'राज्ञश्चन्द्रमसो यस्मादभूदेष किलामय ।
तस्मात्तं राजयक्ष्मेति केचिदाहुर्मनीषिण ॥
क्रियाक्षयकरत्वाच्च क्षय इत्युच्यते पुनः ।
संशोषणाद्रसादीनां शोष इत्यभिधीयते ॥'
संप्राप्तिमाह ।
'कफप्रधानैर्दोषैस्तु रुद्धेषु रसवर्त्मसु ।
अतिव्यवायिनो वापि क्षीणे रेतस्यनन्तरा ।
क्षीयन्ते धातव सर्वे तत शुष्यति मानव ॥
अवलम्बनेऽसौ रसवर्त्म बहिः आयन्ता
सर्वे धातव क्षीयन्ते ततो मानव शुष्यति ।

कारणभूतस्य रसस्य क्षये कार्य्याणां रक्तादीनामनुक्रमेण क्षीयमाणत्वात् ॥ * ॥ मार्गावरोधे रसक्षयहेतुमाह चरकः ।
'रसस्रोतःसु रुद्धेषु स्वस्थानस्थो विदह्यते ।
स ऊर्द्धं कासवेगेन बहुरूपः प्रवर्त्तते ॥
स्वस्थानस्य हृदयस्य । कासं विनापि रसक्षयो भवति मार्गावरोधकुपितवातेन रसस्य शोषणात् । उक्तञ्च ।
'वायोर्द्धातुक्षयात् कोपो मार्गस्यावरणेन च ।
अनुलोमक्षयं दृष्ट्वा प्रतिलोमक्षयावहः ॥
अनुलोमक्षयं दर्शयित्वा प्रतिलोमक्षयमप्याह । अतिव्यवायिनो वा रेतसि क्षीणे प्रतिलोमक्रमेण उत्तरोत्तराः सर्व्वे धातवो रसपर्य्यन्ताः क्षीयन्ते । तद्यथा । शुक्रे क्षीणे मज्जा क्षीयते मज्जनि क्षीणेऽस्थि क्षीयते । एवं पूर्व्वं पूर्व्वं क्षीयते । ननु कार्य्यस्य शुक्रस्य क्षये कथं कारणभूतानां मज्जादीनां क्षयः । उच्यते । शुक्रक्षयाद्वायुः कुप्यति । यदुक्तम् ।
'वायोर्धातुक्षयात् कोपो मार्गस्यावरणेन चेति ।
स वायुः प्रातिलोम्यक्रमेण मज्जादीन् सर्व्वान् धातून् संशोषयति । ततस्तदनन्तरं मानवः शुष्यति ॥ * ॥ पूर्व्वरूपमाह ।

'श्वासाङ्गसादकफसंस्रवतालुशोष-
वम्यग्निसादमदपीनसकासनिद्राः ।
शोषे भविष्यति भवन्ति स चापि जन्तुः
शुक्लेक्षणो भवति मांसपरो रिरंसुः ॥
स्वप्नेषु काकशुकशल्लकिनीलकण्ठ-
गृध्रास्तथैव कपयः कृकलासकाश्च ।
तं वाहयन्ति स नदीर्विजलाश्च पश्येत्
शुष्कांस्तरून् पवनधूमदवार्द्दितांश्च ॥ * ॥

यक्ष्मणो लक्षणमाह ।
'अंसपार्श्वाभितापश्च सन्तापः करपादयोः ।
ज्वरः सर्व्वाङ्गगश्चेति लक्षणं राजयक्ष्मणः ।
अंसयोः पार्श्वयोः अभितापः पीडा अत्र सकलधातुक्षयपूर्व्वकः सकलशरीरशोषोऽपि बोद्धव्यः । क्षीयन्ते धातवः सर्व्वे ततः शुष्यति मानव इति संप्राप्तेः । एवं षड्रूपे एकादशरूपे च बोद्धव्यम् । एतानि त्रीणि लक्षणानि प्रायोभावित्वेन चरकेणोक्तानि । सुश्रुतेन यक्ष्मणि षट्लक्षणान्युक्तानि ।
'भक्तद्वेषो ज्वरः श्वासः कासः शोणितदर्शनम् ।
स्वरभेदश्च जायेत षड्रूपे राजयक्ष्मणि ॥ * ॥
उल्वणतया दोषाणां भेदादेकादश लक्षणान्याह ।
'स्वरभेदोऽनिलाच्छूलं सङ्कोचश्चांसपार्श्वयोः ।
ज्वरो दाहोऽतिसारश्च पित्ताद्रक्तस्य चागमः ॥
शिरसः परिपूर्णत्वमभक्तच्छन्द एव च ।
कासः कण्ठस्य चोद्ध्वंसो विज्ञेयः कफकोपतः ।
अनिलादुल्वणात् एवं पित्तात् कफाच्च । यत आह सुश्रुतः ।
'एक एव मतः शोषः सन्निपातात्मको गदः ।
उद्रेकात्तत्र लिङ्गानि दोषाणां निपतन्ति च ।

असाध्यमप्याह ।
'एकादशभिरेभिर्वा षड्भिर्वापि समन्वितम् ।
त्रिभिर्वा पीडितं लिङ्गैर्ज्वरकासासृगामयैः ।
जह्याच्छोषार्दितं जन्तुमिच्छन् सुविपुलं यशः ॥'
तत्र विशेषमाह ।
सर्व्वैरर्द्धैस्त्रिभिर्व्वापि लिङ्गैर्मांसबलक्षये ।
युक्तो वर्ज्यश्चिकित्स्यस्तु सर्व्वरूपोऽप्यतोऽन्यथा ।
सर्व्वैर्लिङ्गैरेकादशभिः । अर्द्धैः षड्भिः त्रिभिः ज्वरकासरुधिरवमनैः । अतोऽन्यथा मांसे बले सति सर्व्वरूपोऽपि प्रत्याख्याय चिकित्स्यः ।
'महाशनं क्षीयमाणमतीसारनिपीडितम् ।
शूनमुष्कोदरञ्चैव यक्ष्मिणं परिवर्ज्जयेत् ॥
महाशनं क्षीयमाणमित्येकमसाध्यलक्षणम् । अतीसारनिपीडितमिति द्वितीयम् । यत उक्तम् ।
'मलायत्तं बलं पुंसां शुक्रायत्तन्तु जीवनम् ।
तस्माद्यत्नेन संरक्षेद्यक्ष्मिणो मलरेतसी ॥
शूनमुष्कोदरमिति तृतीयम् ॥ * ॥ अरिष्टमाह ।
'शुक्लाक्षमन्नद्वेष्टारमूर्द्ध्वश्वासनिपीडितम् ।
कृच्छ्रेण बहु मेहन्तं यक्ष्मा हन्तीह मानवम् ।
मेहन्तं मूत्रं त्यजन्तम् । शुक्लाक्षत्वादीनि एकैकशोऽरिष्टलक्षणानि ॥ * ॥ अवधिमाह ।
'परं दिनसहस्रन्तु यदि जीवति मानवः ।
सुभिषग्भिरुपक्रान्तस्तरुणः शोषपीडितः ॥
शोषपीडितो मानवस्तरुणो भवति । सुभिषग्भिरुपक्रान्तो भवति । तदा परं दिनसहस्रम् । द्वितीयदिनसहस्रं यदि जीवति तत्र जीवनविकल्पः उक्तः । एतेन शोषपीडितो मानवस्तरुणो भवति । सद्वैद्यचिकित्स्यो भवति । तदा प्रथमदिनसहस्रं जीवेदेव इत्युक्त्वा चिकित्सामाह ।
'ज्वरानुबन्धरहितं बलवन्तं क्रियासहम् ।
उपक्रमेदात्मवन्तं दीप्ताग्निमकृशं नरम् ॥
आत्मवन्तं यत्नवन्तं धृतिमन्तं वा ॥ * ॥
अथ निदानविशेषे शोषविशेषानाह ।
'व्यवायशोकवार्द्धक्यव्यायामाध्वप्रशोषितान् ।
व्रणोरःक्षतसंज्ञौ च शोषिणौ लक्षणैः शृणु ॥
व्रणोरःक्षतसंज्ञौ शोषिणौ । व्रणशोषी उरःक्षतशोषी च ॥ * ॥ तत्र व्यवायशोषिणो लक्षणमाह ।
'व्यवायशोषी शुक्रस्य क्षयलिङ्गैरुपद्रुतः ।
पाण्डुदेहो यथापूर्व्वं क्षीयन्ते चास्य धातवः ॥
शुक्रस्य क्षयलिङ्गैः सुश्रुतोक्तैः । तानि यथा शुक्रक्षये मेढ्रवृषणयोर्वेदना अशक्तिर्मैथुने चिराद्वा प्रसेकः प्रसेके चाल्पशुक्रदर्शनमिति । यथापूर्व्वं क्षीयन्ते चास्य धातवः प्रथमं शुक्रं क्षीयते पश्चात् शुक्रक्षयजनितवायुना मज्जादयोऽपि धातवो यथापूर्व्वं क्षीयन्ते ॥ * ॥ शोकशोषिणो लक्षणमाह ।
'प्रध्यानशीलः स्रस्ताङ्गः शोकशोष्यपि तादृशः ।
विना शुक्रक्षयकृतैर्व्विकारैरुपलक्षितः ॥'

प्रध्यानशीलः यस्याभावेन शोको जनितस्तद्ध्यानपरः । स्रस्ताङ्गः शिथिलाङ्गः । तादृशः व्यवायशोषिसदृशः । तेन शुक्रादिसर्व्वधातुक्षययुक्तो भवति । परं शुक्रक्षयकृतैर्विकारैर्मेढ्रवृषणवेदनादिभिर्व्वर्ज्जितो भवति । आधिस्वभावात् ॥ * ॥ जराशोषिणो लक्षणमाह ।
'जराशोषी कृशो मन्दवीर्य्यबुद्धिबलेन्द्रियः ।
कम्पनोऽरुचिमान् भिन्नकांस्यपात्रहतस्वरः ॥
ष्ठीवति श्लेष्मणा हीनं गौरवारुचिपीडितः ।
संप्रस्रुतास्यनासाक्षः शुष्करूक्षमलच्छविः ॥
मन्दप्रमन्द स्वल्पाय । शुष्करूक्षमलच्छविः शुष्करूक्षे मलच्छवी यस्य सः ॥ * ॥ अध्वशोषिणो लक्षणमाह ।
'अध्वप्रशोषी स्रस्ताङ्गः सम्भृष्टपरुषच्छविः ।
प्रसुप्तगात्रावयवः शुष्कक्लोमगलाननः ॥
सम्भृष्टस्येव परुषा छविरस्य सः । प्रसुप्तगात्रावयवः प्रसुप्तः स्पर्शाज्ञः । क्लोम तिलकं पिपासास्थानम् ॥ * ॥ व्यायामशोषिणो लक्षणमाह ।
'व्यायामशोषी भूयिष्ठमेभिरेव समन्वितः ।
लिङ्गैरुरःक्षतकृतैः संयुक्तश्च क्षतं विना ॥
एभिरेव स्रस्ताङ्गत्वादिभिरध्वशोषिणो लक्षणैरेव । भूयिष्ठं अत्यर्थम् ॥ * ॥ व्रणशोषमाह ।
'रक्तक्षयाद्वेदनाभिस्तथैवाहारयन्त्रणात् ।
व्रणितस्य भवेच्छोषो यः सोऽसाध्यश्च स स्मृतः ।
उरःक्षतस्य निदानमाह ।
'धनुषायस्यतोऽत्यर्थं भारमुद्वहतो गुरुम् ।
युध्यमानस्य बलिभिः पततो विषमोच्चतः ॥
वृषं हयं वा धावन्तं दम्यं चान्यं निगृह्णतः ।
शिलाकाष्ठाश्मनिर्घातान् क्षिपतो निघ्नतः परान् ॥
अधीयानस्य चात्युच्चैर्दूरं वा व्रजतो द्रुतम् ।
महानदीं वा तरतो हयैर्वा सह धावतः ॥
सहसोत्पततो दूरं तूर्णं चातिप्रनृत्यतः ।
तथान्यैः कर्म्मभिः क्रूरैर्भृशमभ्याहतस्य वा ।
स्त्रीषु चातिप्रसक्तस्य रूक्षाल्पप्रमिताशिनः ।
विघट्टे वक्षसि व्याधिर्बलवान् समुदीर्य्यते ॥
आयास आयासं कुर्व्वतः । दम्यं युवादिकम् । अन्यं गजोष्ट्रादिकम् । शिला दीर्घपाषाणः अश्मा प्रस्तरखण्डः । निर्घातोऽभिघातः । व्याधिः उरःक्षताख्यः ॥ * ॥ उरःक्षतस्य लक्षणमाह ।
'उरो विरुज्यतेऽत्यर्थं भिद्यते च विभज्यते ।
शूलं भवति तत्पादं शुष्यमङ्गं प्रवेपते ।
प्रपीड्येते तत पार्श्वे शुष्यत्यङ्गं प्रकम्पते ।
क्रमाद्वीर्य्यं बलं वर्णो रुचिरग्निश्च हीयते ।
ज्वरो व्यथा मनोदैन्यं विड्भेदोऽग्निवधस्तथा ॥
दुष्टः श्यावः सुदुर्गन्धः पीतो विग्रथितो बहुः ।
कासमानस्य चाभीक्ष्णं कफः सासृक् प्रवर्त्तते ॥
स क्षतः ष्ठीवतोऽत्यर्थं तथा शुक्रौजसोः क्षयात् ।
अव्यक्तं लक्षणं तस्य पूर्व्वरूपमिति स्मृतम् ।
विरुज्यते पीड्यते । भिद्यते विदार्य्यत इव ।

विभज्यते द्विधा क्रियते इत्यर्थः । स द्वधा । उरःक्षतवान् । क्षयेऽपि क्षीयते क्षीणो भवति । न केवलं साहसकर्मादेव क्षीणो भवति । तथा शुक्रौजसोः क्षयात् । अतिस्त्रीसेवनादिना शुक्रौजसोः क्षयादपि क्षीणो भवति ॥ उरःक्षतस्य विशिष्टलक्षणमाह ।

'उरोरुक् शोणितच्छर्दिः कासो वैशेषिकः क्षते । क्षीणे सरक्तमूत्रत्वं पार्श्वपृष्ठकटिग्रहः ॥'

क्षते उरःक्षतवति । उरोरुक् शोणितच्छर्दिः कासो वैशेषिकः विशेषतो भवन्त्येव । तस्मिन्नेव क्षीणे क्षतवति साहसकर्मशुक्रौजसां क्षयात् क्षीणे सरक्तमूत्रत्वं पार्श्वपृष्ठकटिग्रहश्च भवति ॥

निदानविशेषविशेषोरःक्षतस्य लक्षणविशेषमाह ।

'प्रजारोधात् क्षयाच्चैव कोष्ठात् प्रतिमलात्तथा । शरीरस्वस्थानप्रपाके नि च्यावो वाति पूतिकः ॥'

क्षयात् धातुक्षयशोषादिभ्यश्चादित कोष्ठात् प्रतिमलात् कोष्ठात् प्रतिमलवातेन प्रतिलोम मलात् पूतिकः पूतिगन्धः ॥ ० ॥ उरःक्षतस्य साध्यासाध्यलक्षणमाह ।

'नवो जितस्य रोगस्य साध्यो भवतो मतः । परिसंवत्सरो याप्यः सर्वलिङ्गं तु वर्जयेत् ॥ ० ॥

अथ राजयक्ष्मचिकित्सा ।

'बलिनो बहुदोषस्य तस्य कर्माणि कारयेत् । अभ्यङ्ग चोद्वर्त्तनस्य तत्रैव स्नानादिभोजनम् ॥ भक्षयेत् मत्स्य पूर्वा शुक्रानवत्तु भोजनम् । तस्मादनुबन्धेन वर्द्धयेत् यक्ष्माणो मलरेतसी ॥ शालिषष्टिकगोधूमयवमुद्गादयो हिताः' । मद्यानि जाङ्गला पक्षिमृगा शस्ता विशो

विष्क ॥

'सपिप्पलीकं सयवं सकुलत्थं सनागरम् । दाडिमामलकोपेतं स्निग्धमाजं रसं पिबेत् ॥ तेन षड्विनिवर्त्तन्ते विकाराः पीनसादयः ॥ रसतो द्विगुणं मांसं सर्वतोऽष्टगुणं जलम् । मानमस्य संस्कृतस्याल्पं षड्गुणो यूष उच्यते ॥

तद्यथा । यवमन १ कुलत्थमन १ छागमांस मन ३ जलमन ३० पिप्पल १५ तत् पचमिति कृते षड्गुणयूषम् । तत्र कर्षमितं सैन्धवं देयं सोदकं किञ्चित् च देयम् । पिप्पली नागरं च पृथक् माषमितं शुक्तोदकं देयम् । दाडिमामलकाभ्यामलं वाच्यम् । षड्गुणयूष ॥ ० ॥

'ककुभत्वक् नागबला वानरीबीज पिष्टकं पयसा ।

घृतं मधुसितायुक्तं पिबेत् यक्ष्मादिकामहरम् ॥ छागमांसं पयश्छागं छागं सर्पिश्च नागरम् । छागोपसेवा शयनं छागमध्ये तु यक्ष्मनुत् ॥ मधुनाद्यविडङ्गाम्रं बहुबीजलताभवा । हन्ति यक्ष्माणमत्युग्रं शीघ्रमावा हिताहितम् ॥ नाम्ना शुक्रमावोदकम् ।

'शर्करामधुसंयुक्तं नवनीतं लिहन् क्षयी । क्षीराशी लभते पुष्टिमतुल्ये चाज्यमाक्षिके । विलोमभागमावीरोऽपि सर्पिषस्तु शालेय । अभ्यागतं हिमुक्तितप्तं दत्ता मधुनभक्ष ॥

लेहयेदामरोगार्त्तं कासश्वासक्षयातुरम् । पार्श्वशूलिनमत्यग्निं सुप्तनिष्ठं सपित्तलम् । हस्तपादाङ्गदाहे च ज्वरे रक्ते तथोर्ध्वगे ॥ सितोपला सिता । वहुला सूक्ष्मैला । इति सितोपलादिलेह ॥ ० ॥

'जातीफलं विडङ्गानि चित्रकं तगरं तिलाः । तालीसं चन्दनं शुण्ठी लवङ्गमुपकुञ्चिका ॥ कर्पूरश्चाभया धात्री मरीचं पिप्पली तुगा । चूर्णानि समभागानि भागधातुविशतिकचतुर्गुणा । सर्वाणि सम भङ्गाया सिता सर्वसमा मता ॥ चूर्णमेतत् क्षयं कासं श्वासं च ग्रहणीगदम् । अरोचकं प्रतिश्यायं तथा चाग्निमन्दताम् । एतान् रोगान् निहन्त्येव तमसिन्धमिवार्यमा ॥ वाजरोगाधिकारोक्तं तैलं लाक्षादि योजयेत् । अभ्यङ्गे यक्ष्मिणो नित्यं हतवैद्योपदेशतः ॥

इति जातीफलाद्यचूर्णम् ॥ ० ॥

'वासकस्य रसप्रस्थ शर्कराकुडवान्वितः । पिप्पली द्विपलं तावत् सर्पिषश्च पचेत् शनैः ॥ तस्मिन् लेहत्वमायाते शीते क्षौद्रपलाष्टकम् । दत्त्वावतारयेद्वैद्यो लीढो लेहोऽयमुत्तमः ॥ निहन्ति राजयक्ष्माणं कासं श्वासं च दारुणम् । पार्श्वशूलं च हृच्छूलं रक्तपित्तं ज्वरं तथा ॥'

इति वासावलेहः ॥ ० ॥

अथ व्यवायादिजन्यक्षयचिकित्सा । तत्र व्यवायशोषचिकित्सा ।

'व्यवायशोषिणं क्षीररसमांसाज्यभोजनैः । हृद्यैर्मधुरैः स्निग्धैर्जीवनीयैरुपाचरेत् ॥' रसा मांसरसाः हृद्यैर्हितैः ॥ ० ॥ शोकशोषचिकित्सा ।

'हर्षणाश्वासनैः क्षीरैः स्निग्धैर्मधुरशीतलैः । दीपनैर्लघुभिश्चान्नैः शोकशोषमुपाचरेत् ॥ ० ॥

व्यायामशोषचिकित्सा ।

'व्यायामशोषिणं स्निग्धैः क्षतक्षयहितैर्हिमैः । उपाचरेज्जीवनीयैर्विधिना श्लैष्मिकेण तु ॥ ० ॥

अध्वशोषचिकित्सा ।

'आसनसुखैर्दिवास्वप्नैः शीतैर्मधुरबृंहणैः । अन्नमांसरसाद्यैरध्वशोषमुपाचरेत् ॥ ० ॥

व्रणशोषचिकित्सा ।

'व्रणशोषं जयेत् स्निग्धैर्दीपनैः स्वादुशीतलैः । ईषदम्लैरनुष्णैश्च यूषमांसरसादिभिः' ॥ ० ॥

अथोरःक्षतचिकित्सा ।

'बलाश्वगन्धा श्रीपर्णी बहुपुत्री पुनर्नवा । पयसा नित्यमभ्यस्ताः शमयन्ति क्षतक्षयम् ॥' श्रीपर्णी गम्भारी । बहुपुत्री शतावरी । इति बलादिचूर्णम् ॥ ० ॥

'एला पत्रत्वचो भागाः पिप्पल्यर्द्धपलं तथा । सितामधुकखर्जूरमृद्वीकाश्च पलोन्मिताः ॥ संचूर्ण्य मधुना युक्ता वटिकाः संप्रकल्पयेत् । अक्षमात्रां ततश्चैकां भक्षयेच्च दिने दिने ॥ कासं श्वासं ज्वरं कासं च हिक्कां वमिं

भ्रमम् ।

रक्तष्ठीवं मदं तृष्णां शोषं पार्श्वशूलमरोचकम् । प्लीहानमानवातं च रक्तपित्तं स्वरक्षयम् । एलादिगुटिका हन्ति वृष्या सन्तर्पणी परा ॥ द्राक्षायाः प्रस्थमेकं तु मधुकस्य पलाष्टकम् । पचेत् पादके शुद्धे पात्रेऽथ तेन तु ॥ पलिकं मधुकद्राक्षे पिष्टे कल्कार्थसाधनम् । प्रस्थं सर्पिषः प्रस्थं पचेत् क्षीरे चतुर्गुणे ॥ सिद्धे शीते पलान्यष्टौ शर्करायाः प्रदापयेत् । एतद्राक्षादिकं सर्पिः सर्वरोगे प्रशस्यते ॥ वातपित्तज्वरश्वासविस्फोटकहलीमकान् । प्रदर रक्तपित्तं च हन्यात् क्षयमपस्मरम् ॥'

इति द्राक्षादिघृतम् ॥ ० ॥

'क्षीरे धात्रीविदारीक्षुस्वरसैश्च तथा रसैः । पचेत् घृतं पलमर्धं मधुरैः कर्षसम्मितैः ॥ द्राक्षादिचन्दनोशीरशर्करोत्पलपद्मकैः । खर्जूरमधुकल्काकाश्मरीफलशर्करैः ॥ प्रस्थार्द्धं मधुनः शीते शर्करार्द्धतुलान्वितम् । पलार्द्धकाच्च मरिचं लोमजावनकेशरम् ॥ विनीय तच्च संलिह्याच्छ्वासकासी निशः सुवर्ण्णितः । अमृतप्राशमित्येतन्निभ्यां परिकीर्त्तितम् ॥ क्षीरमांसाशिनो हन्ति रक्तपित्तक्षतक्षयम् । तृष्णारुचिश्वासकासच्छर्दिमूर्च्छाभ्रमदाहम् । स्वरभेदज्वरांश्च बलं क्षीरोदितवर्द्धनम् ॥

इति अमृतप्राशावलेहः ॥ ० ॥

'यद्द्रव्यं तस्य शोणितमज्जादि हितं लघु । अश्वयान निषेवणात् सततोत्थि सुरादिभिः ॥

शोक त्रिष क्रोधमदप्रमाद
श्चेदुदारान् विषयान् भजेत ।
तथा द्विजातीन्विद्यान् गुरूंश्च
पापश्च पुण्या प्रजपादिभिश्च ॥ ० ॥

अथ राजयक्ष्मणि रसाः । अमृतेश्वरो रसो राजयक्ष्मणि रसेन्द्रचिन्तामणौ ।

रसभस्मामृताकान्तं लौहं मधुघृतान्वितम् । अमृतेश्वरनामायं गुञ्जैको राजयक्ष्मजित् ॥

इति अमृतेश्वरो रसः ॥

रसभस्म मारितो रसः । अमृतसत्त्व गुडूचीसत्त्वम् । लौहं मारितम् ॥ ० ॥

'अथोऽत्र मारितात् सुतात् एकोऽपि भैम भवन' ।

एकोऽपि मन्तारङ्गात् द्विधा समांश तालकम् । सर्वं मातुलुङ्गरसाद्येन मर्द्दं विचूर्णयेत् ॥ वराटी पूरयेत्तेन छागीक्षीरेण टङ्कणम् । पिष्टा तेन मुखं बद्धा नभाण्डे ताश्च पुटयेत् ॥ ततो लघुपुटे पक्वा चूर्णयेत् स्वाङ्गशीतलम् । रसो राजमृगाङ्कोऽयं चतुर्गुञ्जः क्षयापहः ॥ मरिचैर्घृतसंयुक्ता कफाभिरक्षमिष्टया । मधुना वाथवा चापि दद्यादेव रस भिषक् ॥ अनेन नश्यति क्षिप्रं राजरोगमदपापम ।

इति राजमृगाङ्को रसो राजयक्ष्मणि रसेन्द्रचिन्तामणौ ॥ ० ॥

'सूतभस्म त्रिधा मत्स्य कुर्यात् पश्चैव स्वर्णकम् । तयो समं मौक्तिकं च मर्द्दयेत् कन्यकारसे ॥ त्रिदशमातृसे मौक्तं तालकाभ्यां विमर्दयेत् ।

आच्छादितेऽम्बुपत्रेण स्थाप्यं यामयुगं ततः ।
घर्म्मरात्रौ भवेत पश्चाद्द्वीरात्रात्तदुद्धरेत् ।
सचूर्ण्य गालयेद्वस्त्रे सत्त्वं वारितरं भवेत् ॥
त्रिकटुत्रिफलैलाभिर्जातीफललवङ्गकैः ।
नवभागोन्मितैरेतैः समं सत्त्वं रसो भवेत् ॥
निष्कद्वयमितं निघ्नं मधुना सह लेहयेत् ।
अयमग्निरसो नाम्ना क्षयकासापहः परः ।
इति अग्निरसः शार्ङ्गधरे ॥"
इति भावप्रकाशस्य मध्यखण्डे द्वितीयभागे राजयक्ष्माधिकारः ॥ * ॥ (अथास्य पौराणिक विवरणं यथा —
"त्रयीकला कथयताद्विधिभिर्वै शुभा कथा ।
कामधर्म्मयुक्ता यौराज्ञी ध्रियन्ते प्रति ॥
रोहिण्यामतिसक्तस्य शरीरं नाशुरक्षत ।
आहारमाल्पतामिन्दोर्देहः स्वेदपरिक्षयात् ॥
दुहितृणामसम्भोगाच्चुकोपाथ प्रजापतिः ।
क्रोधो निश्वासरूपेण मूर्त्तिमानि स्तो मुखात् ॥
प्रजापतेर्हि दुहितृदारविंशतिमशुभान् ।
भार्य्यार्थं प्रतिजग्राह न च सर्व्वास्ववर्त्तत ॥
गुरुणा समवध्यात भार्य्यास्वसमवर्त्तिनम् ।
रजोऽन्यमवर्ण्णं दीनं यक्ष्मा शशिनमाविशत् ॥
सोऽभिभूतोऽतिगुरुणा गुरुक्रोधेन निष्प्रभः ।
देवदेवर्षिसहितो जगाम शरणं गुरुम् ॥
अथ चन्द्रमसः शुद्धां मतिं बुद्ध्वा प्रजापतिः ।
प्रसादं कृतवान् सोमस्ततोऽश्विभ्यां चिकित्सितः ॥
स विमुक्तग्रहश्चन्द्रो विरराज विशेषतः ।
तेजसा वर्द्धितोऽश्विभ्यां शुद्धं सत्त्वमवाप च ॥
क्रोधो यक्ष्मा ज्वरो रोग एकोऽर्थो दुःखसंज्ञितः ।
यस्मात् स राज्ञः प्रागासीद्राजयक्ष्मा ततो मतः ॥
स यक्ष्मा हुङ्कृतोऽश्विभ्यां मानुषं लोकमागतः ।
लब्ध्वा चतुर्व्विधं हेतुं समाविशति मानवान् ॥
अयथाबलमारम्भं वेगसन्धारणं क्षयम् ।
यक्ष्मणः कारणं विद्यात् चतुर्थं विषमाशनम् ॥"
अस्य विशेषहेतुर्यथा,—
"युद्धाध्ययनभाराध्वलङ्घनप्लवनादिभिः ।
पतनैरभिघातैर्वा साहसैर्वा तथापरैः ॥
अयथाबलमारम्भैर्जन्तोरुरसि विक्षते ।
वायुः प्रकुपितो दोषावुदीर्य्योभौ विधावति ॥"
तथास्य रूपादिकं यथा —
"स शिरः स्थः शिरः शूलं करोति मन्यमाश्रितः ।
कण्ठोद्ध्वंसञ्च कासञ्च स्वरभेदमरोचकम् ॥
पार्श्वशूलञ्च पार्श्वस्थो वर्च्चोभेदं गुदे स्थितः ।
जृम्भां ज्वरञ्च सन्धिस्थ उरःस्थश्चोरसो रुजम् ॥
क्षवथूरःस्थो रक्तं कासमानः कफानुगम् ।
जर्ज्जरेणोरसा कृच्छ्रमूर्द्ध्वमुक्तो निरस्यति ॥
इति साहसिकं यक्ष्मा रूपैरेतैः प्रपद्यते ।
एकादशभिराक्रान्तो भवेत्तस्मात्तु साहसम् ॥
ह्रीमत्त्वाद्वा घृणित्वाद्वा भयाद्वा वेगमागतम् ।
वातमूत्रपुरीषाणां निगृह्णाति यदा नरः ॥
तदा वेगप्रतीघातात् कफपित्ते समीरयन् ।
ऊर्द्ध्वं तिर्य्यगधः कुर्य्याद्विकारान् कुपितोऽनिलः ॥
प्रतिश्यायञ्च कासञ्च स्वरभेदमरोचकम् ।
पार्श्वशूलं शिरःशूलं ज्वरमंसावमर्द्दनम् ॥
अङ्गमर्द्दं मुहुश्छर्द्दिं वर्च्चोभेदं त्रिलक्षणम् ।
रूपाण्येकादशैतानि यक्ष्मा येष्वधि महान् ॥"
इति चरके चिकित्सास्थाने अष्टमेऽध्याये ॥
अस्य चिकित्सा यथा,—
"काञ्चनं रससिन्दूरं मौक्तिकं लौहमभ्रकम् ।
विद्रुमं स्वर्णमाक्षीकं तारं ताम्रञ्च वङ्गकम् ॥
कस्तूरिका लवङ्गञ्च जातिकोषैलबालुका ।
प्रत्येकं बिन्दुमात्रञ्च सर्व्वं मर्द्द्यं प्रयत्नतः ॥
कन्याभीरेण समर्द्द्य भृङ्गराजरसेन च ।
अजाक्षीरेण संभाव्य प्रत्येकं दिवसत्रयम् ॥
चतुर्गुञ्जाप्रमाणेन वटिकां कारयेद्भिषक् ।
अनुपानं प्रदातव्यं यथादोषानुसारतः ॥
नानारोगप्रशमनं सर्व्वोपद्रवसंयुतम् ।
पाण्डुं हन्ति तथा कासं यक्ष्माणं श्वासमेव च ॥
प्रमेहान् विंशतिञ्चैव दोषत्रयसमुत्थितान् ।
सर्व्वान् रोगान् निहन्त्याशु भास्करस्तिमिरं यथा ॥"
इति हेमरत्नाकरभवटी ॥
"शिलाजतुमधुव्योषताप्यलौहरजांसि च ।
क्षीरेणालोड्य तस्यायु यक्ष्मा क्षयमवाप्नुयात् ॥"
इति शिलाजत्वादिलौहम् ॥ * ॥
इति वैद्यकरसेन्द्रसारसंग्रहे राजयक्ष्माधिकारे ॥ * ॥)

यच्छत्, [त्] त्रि, दानकर्त्ता । उपरमकर्त्ता । दाणधातोर्यमधातोश्च शतृप्रत्ययेन निष्पन्नः ॥

यज, ऐ ञ यौ देवार्च्चादानसङ्गतौ । इति कविकल्पद्रुमः ॥ (भ्वा उभ -सक अनिट ।) ऐ, इज्यात् । ञ, यजति यजते विष्णुं सुधीः पूजयतीत्यर्थः । पशुना रुद्रं यजति पशुं रुद्राय ददातीत्यर्थः । यजति सर्व्वं वसु सता सह सङ्गं करोतीत्यर्थः । औ, यष्टा । इति दुर्गादासः ॥

यजत, पुं (यजतीति । यज + "भृमृदृशियजिपर्विपच्यमितमिनमिहर्य्येभ्योऽतच् ।" उणा ३।११० । इति अतच् ।) ऋत्विक् । इति सिद्धान्तकौमुदी ॥ (ऋत्विविशेषः । स तु ऋग्वेदस्य ५ म १०।१८ । सूक्तस्य ऋषिः । त्रि, यष्टव्यः । यथा ऋग्वेदे । १ । १८ । ३ ।
"अनुपूर्व्वो यजतो विश्वधा यः ।"
"यजतो यष्टव्यः ।" इति तद्भाष्ये सायनः ॥
तथा च तत्रैव । २ । ५ । ७ ।
"यथा विद्वाँ अरं करद्विश्वेभ्यो यजतेभ्यः ।"
"यजतेभ्यः सर्व्वेभ्यो यजनीयेभ्यो देवेभ्यः ।" इति तद्भाष्ये सायनः ॥)

यजति, पुं, (यज + बाहुलकात् अति ।) यागः । यथा,—
"यजतिषु येयजामहं कुर्य्यान्नानुयाजेषु ।"
इति मलमासतत्त्वधृता श्रुतिः ॥

यजत्र, पुं (यजतीति । यज + "अमिनक्षियजिवधिपतिभ्योऽत्रन् ।" उणा ३ । १०५ । इति अत्रन् ।) अग्निहोत्री । इत्युणादिकोषः ॥ (यजनशीले, त्रि । यथा ऋग्वेदे । ७।५२।१२ ।
"पिता च तन्नो महान् यजत्रो
विश्वेदेवाः समनसो जुषन्त ॥"
"यजत्रः यजनशीलः ।" इति तद्भाष्ये सायनः ॥)

यजन्, [त्] पुं, यागकर्त्ता । यजधातोः शतृप्रत्ययेन निष्पन्नः ॥

यजन, क्ली (इज्यते इति । यज + ल्युट् ।) यागः । (यथा, महाभारते । ७ । ५३ । १७ ।
"यस्य सेन्द्रामरगणा बृहस्पतिपुरोगमाः ।
देवा विश्वसृजः सर्व्वे यजनार्थे समागताः ॥"
तत्तु ब्राह्मणस्य षट्कर्म्मान्तर्गतकर्म्मविशेषः यथा, मानवे १ अध्याये ।
"अध्यापनमध्ययनं यजनं याजनं तथा ।
दानं प्रतिग्रहञ्चैव ब्राह्मणानामकल्पयत् ॥"
अस्य लक्षणं यथा । पशुक्षीराज्यपुरोडाशसोमौषधिप्रभृतिभिर्हविर्भिः खदिरपलाशाश्वत्थन्यग्रोधोडुम्बरप्रभृतिभिः समिद्भिः स्रुक्स्रुवोदूखलमुषलकुशास्तरणयूपदारुचमसोपयाज्ञपवित्रभाजनादिभिर्यज्ञीयकरणैर्ऋत्विक्होमाध्वर्य्युब्रह्मादिभिरृत्विग्भिः काम्यनैमित्तिकादिपक्षाद्यपूर्व्वकाणां यथोक्तदक्षिणानां समापनं यजनम् । इति श्राद्धविवेकधृतदेवलवचनम् ॥ (इज्यतेऽस्मिन्निति । यज + अधिकरणे ल्युट् । यज्ञस्थानम् । यथा श्रीमद्भागवते । ४ । ४ । ६ ।
"ब्रह्मर्षिय काश्यपदमवर्म्मोभिः
निरस्तभाक्त यजनं समाविशत् ॥"
"यजनं यज्ञस्थानम् ।" इति तट्टीकायां श्रीधरस्वामी ॥)

यजन्तः पुं यागकर्त्ता । यजधातोर्झच्प्रत्ययेन निष्पन्नः । इति सिद्धान्तकौमुदी ॥

यजमान, पुं,(यजतीति । यज + शानच ।) अध्वरे ब्रतिष्ठा । तत्पर्य्यायः । व्रती २ यष्टा ३ । इत्यमरः ।२।७।८ ॥ (यथा, श्रीमद्भागवते । ३।१६।८ ।
"यातु तथाप्ति यजमानहर्विषि रावे
श्रीन्दृष्तसुतमन्नू कुशहस्तरेवेन ॥")
"अध्वरादिषु यजमाने । अध्वरे यागविधये मम इदमन्यान्याय यथार्थं कर्म्म कुरु इति भर्त्तिं यामादेशकौ यायजामो यज्ञादिष्वध्वरवाच्यरथः । ततस्त्रेणिजादिभारयं विदहेऽन्तरात्मो इत्थं । यजते इति शानच । प्राग्ये यजमानः । स ब्रतो सोमयागविति अध्वरे यजमानः सन् दीक्षितः उच्यते अध्वरानुपचारात् । दीक्ष मौञ्ज्याऽन्योपनयननियमव्रतादेशेषु सः दीक्षा प्रयुक्तो वा ।" इति भरतः ॥

यजाक, त्रि, (यजतीति । यज् दाने + आकन् ।) दानकर्त्ता । इत्युणादिकोषः ॥

यजि, पुं (यजतीति । यज + "सर्व्वधातुभ्य इन् ।" उणा ४।११७। इति इन् ।) यष्टा । इत्युणादिकोषः ॥

यजु [स्] क्ली, (इज्यतेऽनेनेति । यज + "अर्त्ति पृवपियजितनि" इति उस् । उणा० २ । ११८ । इति उसि ।) वेदविशेषः । इत्यमरः । १ । ६ । ३ ॥ "इज्यतेऽनेनेति यजुः । यजेर्णो देवार्चादानसङ्गतौ । यजुषि इति उस् ।" इति भरतः ॥ ॥ अपि च । यजुरादौ जैमिनिः । पठेद्वा यजुः शब्दः । पठेति अक्षराणामभिन्नि मन्त्राणि तस्य प्रमाणजालं प्रविश्य पठित नानाभिर्विच्छेद रहितं तत् यजुरिति । इति तिथ्यादितत्त्वम् ॥ यजुर्वेदस्य षडशीतिर्भेदा भवन्ति । तत्र चरका नाम द्वादश भेदा भवन्ति । चरका १ आह्वरका २ कठा ३ प्राच्यकठा ४ कपिष्ठलकठा ५ औपमन्यवा ६ आट्टालकठा ७ चारायणीया ८ वारायणीया ९ वार्त्तान्तवेया १० श्वेताश्वतरा ११ मैत्रायणीयाश्चेति १२ । तत्र मैत्रायणीया नाम सप्त भेदा भवन्ति । मानवा १ दुन्दुभा २ चैकेया ३ वाराहा ४ हारिद्रवेया ५ श्यामा ६ श्यामायनीयाश्चेति ७ । तेषामध्ययनमष्टौ ग्रन्थम् । यजुःसहस्राण्यधीत्य शाखापारो भवति । तान्येव द्विगुणान्यधीत्य पदपारो भवति । तान्येव त्रिगुणान्यधीत्य क्रमपारो भवति । षडङ्गान्यधीत्य षडङ्गविद्भवति । शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति षडङ्गानि । तत्र प्रातिशाख्यौ मैत्रायणी निगद्य । तत्र वाजसनेया नाम सप्तदश भेदा भवन्ति । जाबाला १ बौधेया २ काण्वा ३ माध्यन्दिना ४ शापेया ५ तापायनीया ६ कापाला ७ पौण्ड्रवत्सा ८ आवटिका ९ परमावटिका १० पाराशर्या ११ वैधेया १२ वैनेया १३ औधेया १४ गालवा १५ वैजवा १६ कात्यायनीयाश्चेति १७ । प्रतिपन्नमनुपन्नं छन्दो भाषा धर्म्मो मीमांसा न्यायस्तर्क इत्युपाङ्गानि भवन्ति । उपज्योतिषम् १ आङ्गलक्षणम् २ प्रतिज्ञा ३ अनुवाक्यम् ४ परिसंख्या ५ चरणव्यूहम् ६ श्राद्धकल्पः ७ प्रवराध्यायश्च ८ शाखम् ९ क्रतु १० संख्या ११ ऋग्गम १२ यमम् १३ मानान् १४ चौधकम् १५ प्रणव १६ उक्थानि १७ कूर्म्मलक्षणम् १८ । इत्यष्टादश परिशिष्टानि ।

"द्वे सहस्रे शते न्यूने मन्त्रे वाजसनेयके ।
इत्युक्तं परिसंख्यातमेतत् सकलं यजुस्तथम् ।
यत्राधिकं परिसंख्यातं ब्राह्मणञ्च चतुर्गुणम् ।
आरम्भात् वेदानां मन्त्रब्राह्मणपूर्व्वकम् ।
वेदमध्याय एतेषां शेषाणां तु समारभेत् ॥"

तत्र तैत्तिरीयका नाम द्विभेदा भवन्ति । औख्या खाण्डिकेयाश्चेति । तत्र खाण्डिकेया नाम पञ्च भेदा भवन्ति । आपस्तम्बी १ बौधायनी २ सत्याषाढी ३ हिरण्यकेशी ४ औधेयाश्चेति ५ । तत्र कठानामुपगानविशेषः । चतुश्चत्वारिंशदुपग्रन्थान् ।

"मन्त्रब्राह्मणयोर्वेदस्त्रिगुणं यत्र पठ्यते ।
यजुर्वेदः स विज्ञेयोऽन्ये शाखान्तराः स्मृताः ॥"

यजुर्वेदस्य धनुर्वेद उपवेदः । यजुर्वेदस्य भारद्वाजगोत्रम् । रुद्रदैवत्यम् । त्रैष्टुभं छन्दः । यजुर्वेदः सत्त्वम् । दीर्घः । कपालो । ताम्रवर्णः । कमलनयनः । आदित्यवर्च्चसः । पञ्चारत्निमात्रः । अस्य ध्यानम् ।

"वन्दे रौद्रं त्रैष्टुभं ताम्रवर्णं
भारद्वाजं कमलनेत्रं कपालम् ।
यजुर्वेदं शोभमानं च वर्णं
कापालीनं पञ्चपारत्निमात्रम् ॥"

य इदं वेदस्य रूपं गोत्रं प्रमाणं छन्दो वर्णं कथयति स विद्यां लभते स विद्यां लभते । अध्यनमन्ति पदपारो भवति । अध्यनमन्ति ग्रन्थपारो भवति । अव्रती व्रती भवति । अप्रयतः प्रयतो भवति । अब्रह्मचारी ब्रह्मचारी भवति । जातिस्मरो जायते । इति चरणव्यूहम् ॥ (वाक्यसमभिन्नो मन्त्रविशेषः । इति केचित् ।)

यजुर्व्वेदः, पुं (यजुरेव वेदः । यजुषां वेद इति वा ।) वेदविशेषः । तस्याधिपतिर्यथा —
"ऋग्वेदाधिपतिर्जीवः सामवेदाधिपः कुजः ।
यजुर्व्वेदाधिपः शुक्रः शशिजोऽथर्व्ववेदराट् ॥"
इति ज्योतिषम् ॥

अस्य वक्ता वैशम्पायनः । स तु व्यासस्य शिष्य आसीत् । यथा,—
'ऋग्वेदश्रावकं पैलं जग्राह स महामुनिः ।
यजुर्व्वेदप्रवक्तारं वैशम्पायनमेव च ॥
जैमिनिं सामवेदस्य श्रावकं सोऽन्वपद्यत ।
तथैवाथर्व्ववेदस्य सुमन्तुमृषिसत्तमम् ॥
एक आसीद्यजुर्व्वेदस्तं चतुर्धा व्यकल्पयत् ।
चातुर्होत्रमभूद्यस्मिंस्तेन यज्ञमथाकरोत् ॥
आध्वर्य्यवं यजुर्भिस्तु ऋग्भिर्होत्रं द्विजोत्तमाः ।
उद्गात्रं सामभिश्चक्रे ब्रह्मत्वञ्चाप्यथर्व्वभिः ॥
ततः स ऋच उद्धृत्य ऋग्वेदं कृतवान् प्रभुः ।
यजूंषि च यजुर्व्वेदं सामवेदञ्च सामभिः ॥
एकविंशतिभेदेन ऋग्वेदं कृतवान् पुरा ।
शाखानान्तु शतेनाथ यजुर्व्वेदमथाकरोत् ॥
सामवेदं सहस्रेण शाखानाञ्च बिभेद सः ।
अथर्व्वाणमथो वेदं बिभेद नवकेन तु ॥"
इति कौर्म्मे ४९ अध्यायः ॥

यज्ञः, पुं इज्यते हविर्दीयतेऽत्र । (इज्यन्ते देवता अत्र इति वा । यज + "यजयाचयतविच्छप्रच्छरक्षो नङ् ।" ३।३।९० । इति नङ् ।) यागः । तत्पर्य्यायः । यज्ञः १ अध्वरः २ यागः ३ सप्ततन्तुः ४ मखः ५ क्रतुः ६ । इत्यमरः ।२।७।१३। इष्टिः ८ इष्टम् ९ वितानम् १० मन्युः ११ आहवः १२ सवनम् १३ हवः १४ अभिषवः १५ होमः १६ हवनम् १७ महः १८ । इति शब्दरत्नावली ॥ स त्रिविधः । सात्त्विको राजसिकस्तामसिकश्च । सात्त्विकयज्ञो यथा —
"अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते ।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥"

राजसिकयज्ञो यथा,—
"अभिसन्धाय तु फलं दम्भार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ । तं यज्ञं विद्धि राजसम् ॥"
तामसिकयज्ञो यथा,—
'विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥"
इति श्रीभगवद्गीतायाम् १७ अध्यायः ॥ ॥
स च नानाविधः । यथा,—
"द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥"
इति श्रीभगवद्गीतायाम् ४ अध्यायः ॥ ॥
पञ्च यज्ञा यथा,—
अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥"
इति मात्स्ये ११९ अध्यायः ॥ ॥
(तथाच मनुः । ४ । २१—२२ ।
'ऋषियज्ञं देवयज्ञं भूतयज्ञञ्च सर्व्वदा ।
नृयज्ञं पितृयज्ञञ्च यथाशक्ति न हापयेत् ॥
एतानेके महायज्ञान् यज्ञशास्त्रविदो जनाः ।
अनीहमानाः सततमिन्द्रियेष्वेव जुह्वति ॥"
अपरमपि यज्ञा उक्ता यथा शिवपुराणे वायुसंहितायामुत्तरभागे । १८ । ८९—१६ ।
"कर्म्मयज्ञस्तपोयज्ञो जपयज्ञस्तदुत्तरः ।
ध्यानयज्ञो ज्ञानयज्ञः पञ्च यज्ञाः प्रकीर्त्तिताः ॥
कर्म्मयज्ञरताः केचित्तपोयज्ञरताः परे ।
जपयज्ञरताश्चान्ये ध्यानयज्ञरतास्तथा ॥
ज्ञानयज्ञरताश्चान्ये विशिष्टाश्चोत्तरोत्तरम् ।
कर्म्मयज्ञो द्विधा प्रोक्तः कामाकामविभेदतः ॥
कामात् कामी नरो भुक्त्वा कामासक्तः पुनर्भवेत् ।
अकामो रुद्रभवने भोगान् भुक्त्वा ततश्च्युतः ॥
तपोयज्ञरतो भूत्वा जायते नात्र संशयः ।
तपस्वी च पुनस्तस्मिन् भोगान् भुक्त्वा ततश्च्युतः ॥
जपध्यानरतो भूत्वा जायते भुवि मानवः ।
जपध्यानरतो मर्त्त्यस्तद्वैशिष्ट्यवशादिह ॥
ज्ञानं लब्ध्वा चिरादेव शिवसायुज्यमाप्नुयात् ।
तस्मात्मुक्तौ शिवाज्ञप्तः कर्म्मयज्ञोऽपि देहिनाम् ॥
अकामः कामसंयुक्तो बन्धायैव भविष्यति ।
तस्मात् पञ्चसु यज्ञेषु ध्यानज्ञानपरो भवेत् ॥
ध्यानं ज्ञानञ्च यस्यास्ति तीर्णस्तेन भवार्णवः ।
हिंसादिदोषनिर्मुक्तो विशुद्धचित्तसाधनः ।
ध्यानयज्ञः परस्तस्मादपवर्गफलप्रदः ।
बहिः कर्म्मकरा यद्वन्नाशीयफलभागिनः ॥
दृष्टा नरेन्द्रभवने तद्वदत्रापि कर्म्मिणः ।
ध्यानिनां हि वपुः सूक्ष्मं भवेत् प्रत्यक्षमैश्वरम् ॥
तथैव कर्म्मिणां स्थूलं मृत्काष्ठाद्यैः प्रकल्पितम् ।
ध्यानयज्ञरतास्तस्माद्देवान् पाषाणमृन्मयान् ।
नात्यन्तं प्रतिपद्यन्ते शिवयाथात्म्यवेदनात् ।
आत्मस्थं यः शिवं त्यक्त्वा बहिरभ्यर्च्चयेन्नरः ।
हस्तस्थं फलमुत्सृज्य लिहेत् कूर्परमात्मनः ।
ज्ञानात् ध्यानं भवेत् ध्यानात् ज्ञानं भूयः प्रवर्त्तते ।
तदुभाभ्यां भवेन्मुक्तिस्तस्मात् ध्यानरतो भवेत् ।
द्वादशान्ते तथा मूर्ध्नि ललाटे भ्रूयुगान्तरे ।

मालाग्नौ वा ललाटे वा कन्धरे हृदये तथा ।
नाभौ वा शान्तस्थाने यज्ञाविष्टेन चेतसा ॥
बहिर्भागोपचारेण देवं ध्यात्वैव पूजयेत् ।
अथवा पूजयेन्नित्यं लिङ्गे वा पुस्तकेऽपि वा ॥
वह्नौ वा स्थण्डिले वाथ भक्त्या वित्तानुसारतः ।
अथवाभ्यर्हितैश्चैव पूजयेत् परमेश्वरम् ।
अनभ्यागत पूजाविधिं कुर्व्वीत वा न वा ॥")
यज्ञोत्पत्तिर्यथा,—

ऋषय ऊचुः ।

"कथं यज्ञवराहस्य देहो यज्ञत्वमाप्तवान् ।
चेतात्वमगमन् पुत्त्रा वराहस्य कथं त्रयः ।
तन्नोऽद्य श्रोष्यमाणानां कथयस्व महामते ॥

श्रीमार्कण्डेय उवाच ।

शृणुध्वं द्विजशार्दूला यत् पृष्टोऽहं महाद्भुतम् ।
यज्ञेषु देवास्तिष्ठन्ति यज्ञे सर्व्वं प्रतिष्ठितम् ॥
यज्ञेन ध्रियते पृथ्वी यज्ञस्तारयति प्रजाः ।
अन्नेन भूता जीवन्ति पर्ज्जन्यादन्नसम्भवः ॥
पर्ज्जन्यो जायते यज्ञात् सर्व्वं यज्ञमयं ततः ।
स यज्ञोऽभूद्वराहस्य कायात् शम्भुविदारितात् ॥
यथाह कथये तद्वः शृणुध्वमवहिता द्विजाः ।
विदारिते वराहस्य काये भर्गेण तत्क्षणात् ॥
ब्रह्मविष्णुशिवा देवाः सर्व्वैश्च प्रमथैः सह ।
निन्युर्जलात् समुद्धृत्य तच्छरीरं नभः प्रति ॥
तद्विभिन्नं शरीरन्तं विष्णुचक्रेण खण्डशः ।
तस्याङ्गसन्धयो यज्ञा जातास्ते वै पृथक् पृथक् ॥
यस्माद्यश्च ये यज्ञास्तान् शृणुत महर्षयः ।
भ्रूनासासन्धिना जातो ज्योतिष्टोमो महाध्वरः ॥
हनुश्रवणसन्ध्योस्तु वह्निष्टोमो व्यजायत ।
चक्षुर्भ्रुवोः सन्धिना तु व्रात्यष्टोमो व्यजायत ॥
प्राणपौनर्भवष्टोमस्तस्य पोत्रोष्ठसन्धिना ।
वृहत्ष्टोममहत्ष्टोमौ जिह्वामूलादजायत ॥
अतिरात्रः सवैराजमधो जिह्वान्तरादभूत् ॥
अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ।
एते तर्पणपर्यन्तं नित्ययज्ञाश्च सर्व्वशः ।
कण्ठसन्धेः समुत्पन्ना लिङ्गाद्यो विधयस्तथा ॥
वाजिमेधो महामेधो नरमेधस्तथैव च ।
प्राणिहिंसाकरा येऽन्ये ते जाताः पादसन्धितः ॥
राजसूयोऽथ कारीषो वाजपेयस्तथैव च ॥
पृष्ठसन्धौ समुत्पन्ना ग्रहयज्ञास्तथैव च ॥
प्रतिष्ठोत्सर्गयज्ञाश्च दानश्राद्धादयस्तथा ।
हृत्सन्धितः समुत्पन्नाः सावित्रीयज्ञ एव च ।
सर्व्वेषां साधका यज्ञाः प्रायश्चित्तकराश्च ये ।
ते मेढ्रसन्धितो जाता यज्ञास्तस्य महात्मनः ॥
रक्षःसत्रं सर्पसत्रं सर्व्वमेवाभिचारिकम् ।
गोमेधो वृक्षयागश्च खुरेभ्यः समभवन्निमे ॥
मायेष्टिः परमेष्टिश्च सौम्यनिर्भौमसम्भवः ।
लाङ्गूलसन्धौ सञ्जाता अग्निष्टोमस्तथैव च ।
नैमित्तिकाश्च ये यज्ञाः शक्राश्चाद्याः प्रकीर्त्तिताः ।
लाङ्गूलसन्धौ ते जातास्तथा ह्यग्न्याधानिकम् ॥
तीर्थप्रयोगसामीप्यसङ्घट्टस्तथा ।
ऋक्सामाथर्व्वणाश्चैव नाभिसन्धेः समुद्गताः ॥
अग्न्युत्कर्षं चैनयज्ञः पश्चभागोऽस्थिपोतजः ।
लिङ्गसन्धानसंस्थैरयज्ञा जाताश्च जानुनि ॥
एवमष्टाधिकं जातं सहस्रं द्विजसत्तमाः ॥
यज्ञानां सततं लोका यैर्भाव्यन्तेऽधुनापि च ।
तुण्डस्य पोत्रात् सञ्जाता नासिकायाः स्रुवोऽभवत् ॥
अन्ये स्रुक्स्रुवभेदा ये ते जाताः पोत्रनासयोः ।
ग्रीवाभागेन तस्याभूत् प्राग्वंशो मुनिसत्तमाः ॥
इष्टापूर्त्तं यज्ञधर्म्मौ जातौ श्रवणरन्ध्रतः ।
दंष्ट्राभ्यो ह्यभवन् यूपाः कुशा रोमाणि चाभवन् ॥
उद्गाता च तथाध्वर्युर्होता समिध एव च ।
अपरश्चित्वशामाङ्गपश्चात्पादेषु सङ्गताः ॥
पुरोडाशाः सचरवो जाता मस्तिष्कसञ्चयात् ।
कर्म्मेन्द्रियगणाज्जाता यज्ञकेतुस्तथा खुरात् ॥
मध्यभागोऽभवद्वेदी मेढ्रात् कुण्डमजायत ।
रेतोधारास्तथैवाज्यं स्वधामन्त्राः समुद्गताः ॥
यज्ञालयं पृष्ठभागात् हृत्पद्मात् यज्ञ एव च ।
तदात्मा यज्ञपुरुषः सूक्ष्मः कण्ठात् समुद्गतः ॥
एवं यावन्ति यज्ञानां भाण्डानि च हवींषि च ।
तानि यज्ञवराहस्य शरीरादेव चाभवन् ।
एवं यज्ञवराहस्य शरीरं यज्ञतामगात् ।
यद्रूपेण सकलमाप्यायितुमिदं जगत् ॥
एवं विधाय यज्ञांस्तु ब्रह्मविष्णुमहेश्वराः ।
सुवृत्तं कनकं घोरमासंस्तु यज्ञतत्पराः ॥
ततस्तेषां शरीराणि विश्लेष्य पृथक् पृथक् ।
चिदैवाग्निशरीराणि यथासम्भुसवायुभिः ॥
सुवृत्तस्य शरीरन्तु यथासम्भुप्रवायुना ।
स्वयमेव जगत्स्रष्टा दक्षिणाग्निस्ततोऽभवत् ॥
कनकस्य शरीरन्तु भापयामास केशवः ।
ततोऽभूद्गार्हपत्याग्निः पचनैतान्नभोजनः ॥
घोरस्य तु वपुः शम्भुर्भापयामास वै स्वयम् ।
तत आहवनीयोऽग्निस्तत्क्षणात् समजायत ॥
एतैस्त्रिभिर्जगत् व्याप्तं निखिलं सकलं जगत् ।
एतत् यत्र सदा नित्यं तिष्ठति द्विजसत्तमाः ।
समस्ता देवतास्तत्र धर्म्मोऽनुचरैः सह ॥
एतद्भद्रं पवित्रमेतदेव जयात्मकम् ।
एतत् यज्ञविधिज्ञानमेतत् पुण्यकरं परम् ॥
यस्मिन् जनपदे चैते कुर्व्वन्त्यध्वरत्रयम् ।
तस्मिन् जनपदे नित्यं चतुर्व्वर्गो विवर्द्धते ।
एतद्वः कथितं सर्व्वं यत् पृष्टं द्विजसत्तमाः ।
यथा यज्ञवराहस्य देहो यज्ञत्वमाप्तवान् ।
तथा च तस्य पुत्त्राणां देवाग्नित्वमथागमत् ॥"

इति कालिकापुराणे ३० अध्यायः ॥*॥

ब्रह्मण आदियज्ञा यथा,—

पुलस्त्य उवाच ।

"पूर्व्वमेव मया प्रोक्तं यत् स्वायम्भुवो मनुः ।
जातः परमधर्म्मात्मा प्रजापतिः स्वयम् ॥
तदा प्रजापतिः पूर्व्वं ऋत्विक्सम्पद्योजयत् ।
मनुः ! त्वमेव मत्कार्य्यं स्वल्पं यदि कुरु द्रुतम् ।
स्वयं तु पुष्करं गत्वा कृत्वा यज्ञं विधानतः ।
ब्रह्मोद्गाता होताध्वर्युश्चत्वारो यज्ञवाहकाः ।
एकैकस्य त्रयश्चान्ये परिवाराः स्वयं स्मृताः ॥
एते वै षोडश प्रोक्ता ऋत्विजो वेदचिन्तकाः ।
शतानि त्रीणि षड्भिश्च यज्ञा दृष्टाः स्वयम्भुवा ॥

भीष्म उवाच ।

यज्ञस्य लक्षणं विप्र ! समासेन वद साम्प्रतम् ॥

पुलस्त्य उवाच ।

मन्वन्तरे व्यतीते तु यज्ञस्यावश्यकोऽभवत् ।
दक्षिणा मध्यमा दत्ता प्राची होतुस्तु,दक्षिणा ॥
अध्वर्य्यवे प्रतीची तु उद्गातुश्चोत्तरा तथा ।
त्रैलोक्यं सकलं ब्रह्मा ददौ तेषान्तु दक्षिणाम् ॥
धेनूनाञ्च शतं साष्टं दासञ्च यज्ञसिद्धये ।
अध्वर्य्यूणां सहस्राणि स्वेच्छया नानियष्यति ॥"

इति पाद्मे सृष्टिखण्डे ३१ अध्यायः ॥*॥

ब्राह्मणादीनां स्वधर्म्मयज्ञा यथा —
"आरम्भयज्ञाः क्षत्राः स्युर्हविर्यज्ञा विशः स्मृताः ।
परिचारयज्ञाः शूद्रास्तु जपयज्ञास्तु ब्राह्मणाः ॥"

इति मात्स्ये ११८ अध्यायः ॥*॥

हिंसायज्ञस्य अधर्म्मजनकत्वं यथा,—
"तथा विश्वभुगिन्द्रस्तु यज्ञं प्रावर्त्तयत् प्रभुः ।
दैवतैः सह संहृत्य सर्व्वसाधनसम्भृतम् ॥
तस्याश्वमेधे वितते समाजग्मुर्महर्षयः ।
महर्षयश्च तान् दृष्ट्वा दीनान् पशुगणांस्तदा ॥
विश्वभुजन्ते पप्रच्छुः कोऽयं यज्ञविधिस्तव ।
अधर्म्मो बलवानेष हिंसाधर्म्मेप्सया तव ॥
न नः पशुवधस्त्विष्टस्तव यज्ञे सुरोत्तम ! ।
अधर्म्मो धर्म्मघाताय प्रारब्धः पशुभिस्त्वया ॥
नायं धर्म्मो ह्यधर्म्मोऽयं न हिंसा धर्म्म उच्यते ।
आगमेन भवान् धर्म्मं प्रकरोतु यदीच्छति ॥
विधिदृष्टेन यज्ञेन धर्म्मेणाव्ययहेतुना ।
एवं विश्वभुगिन्द्रस्तु ऋषिभिस्तत्त्वदर्शिभिः ।
उक्तो न प्रतिजग्राह मानमोहसमन्वितः ॥
तेषां विवादः सुमहान् जज्ञे इन्द्रमहर्षिणाम् ।
जङ्गमैः स्थावरैः केन यष्टव्यमिति चोच्यते ॥
ते तु खिन्ना विवादेन तत्त्वयुक्ता महर्षयः ।
सन्धाय साकमिन्द्रेण पप्रच्छुः खचरं वसुम् ॥

ऋषय ऊचुः ।

महाप्राज्ञ कथं दृष्टस्त्वया यज्ञविधिर्नृप ! ।
उत्तानपाद ! प्रब्रूहि संशयं नो नुद प्रभो ! ॥

सूत उवाच ।

श्रुत्वा वाक्यं वसुस्तेषामविचार्य्य बलाबलम् ।
वेदशास्त्रमनुस्मृत्य यज्ञतत्त्वमुवाच ह ॥
यष्टव्यं पशुभिर्मेध्यैरथ मूलफलैरपि ।
हिंसा स्वभावो यज्ञस्य इति मे दर्शनागमः ॥
एवं तत्रोत्तरात्ते तु दुष्टात्मा न ततो भिया ।
अवाप भाविनं दृष्ट्वा तमसा छन्नवस्तदा ॥
इत्युक्तमात्रो नृपतिः प्रविवेश रसातलम् ।
धर्म्मादौ संशयच्छेत्ता राजा वसुरधो गतः ॥

तस्मात्त्वं साध्यो लोकेन बहुभोगापि तद्गाय ।
तस्मात्त्वं प्रिया यज्ञस्य मद्दृष्टसविधि पुरा ॥”
इति मात्स्ये ११६ अध्यायः ॥
तद्देवतानिरूपणाय । यज्ञ २ अध्वर ३ मेध ४ विश्व ५ नार्य ६ सवनम् ७ होत्रा ८ इष्टि ९ देवताता १० मख ११ विष्णु १२ इन्दु १३ प्रजापति १४ धर्म्म १५ । इति पञ्चदश यज्ञनामानि । इति वैदनिघण्टौ । ३ । १७ ॥
(विष्णुः । यथा, महाभारते ।१३।१४९।११७।
“यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ॥”)
यज्ञकृत्, त्रि, (यज्ञं करोतीति । कृ + क्विप् ।) यागकर्त्ता । (यथा, श्रीमद्भागवते ।४।४।७।
“तामागतां तत्र न कश्चनाद्रियद्
विमानितां यज्ञकृतो भयाज्जनः ।
ऋते स्वसॄर्वै जननीञ्च सादराः
प्रेमाश्रुकण्ठ्यः परिषस्वजुर्मुदा ॥”
पुं, विष्णुः । यथा महाभारते । १३ । १४९ । ११८ ।
“यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाधनः ॥”)
यज्ञपशुः, पुं, (यज्ञार्थं पशुः ।) घोटकः । इति शब्दमाला ॥ (यथा, श्रीमद्भागवते । ४ । १९ । ११ ।
“चरमेणाश्वमेधेन यजमाने यजुष्पतिम् ।
वैन्ये यज्ञपशुं स्पर्द्धन्नपोवाह तिरोहितः ॥”)
छागश्च ॥
यज्ञपुरुषः, पुं, (यज्ञरूपी पुरुषः ।) विष्णुः । इति हेमचन्द्रः । २ । १३ ॥ (यथा, श्रीमद्भागवते । २ । ७ । ११ ।
“मत्स्ये समाप्य भगवान् हयशीर्ष्यथासौ
साक्षात् स यज्ञपुरुषस्तपनीयवर्णः ।
छन्दोमयो मखमयोऽखिलदेवतात्मा
वाचो बभूवुरुशतीः श्वसतोऽस्य नस्तः ॥”)
यज्ञभाजनम्, क्ली (यज्ञस्य भाजनम् ।) यज्ञपात्रम् । इति जटाधरः ॥
यज्ञभूषणः, पुं (यज्ञं भूषयतीति । भूष + णिच् + ल्युः ।) श्वेतदर्भः । इति राजनिर्घण्टः ॥ (कुशमात्रम् । यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ।
“कुशो दर्भस्तथा बर्हिः सूच्यग्रो यज्ञभूषणः ।
ततोऽन्यो दीर्घपत्रः स्यात् क्षुरपत्रस्तथैव च ॥”)
यज्ञयोग्यः पुं, (यज्ञे योग्यः उचितः ।) उडुम्बरवृक्षः । इति राजनिर्घण्टः ॥ यागार्हे, त्रि ॥
यज्ञवल्ली स्त्री (यज्ञस्य वल्ली ।) सोमवल्ली । इति राजनिर्घण्टः ॥ (गुणादयोऽस्याः सोमलताशब्दे ज्ञातव्याः ॥)
यज्ञवाटः, पुं, (यज्ञस्य वाटो मण्डपम् ।) यज्ञस्थानम् । इति हेमचन्द्रः ॥ (यथा श्रीमद्भागवते । ९ । ६४ । ३३ ।
“दृष्ट्वा मुनिपत्न्यस्ता यज्ञवाटं पुनर्गताः ।
ते चानसूयवः स्वाभिः स्त्रीभिः सत्रमपारयन् ॥”)
यज्ञवृक्षः पुं (यज्ञस्य वृक्षः ।) वटीवृक्षः । इति राजनिर्घण्टः ॥ (विकङ्कतः । तत्पर्य्यायो यथा,
“विकङ्कतः स्रुवावृक्षो ग्रन्थिलः स्वादुकण्टकः ।
स एव यज्ञवृक्षश्च कण्टकी व्याघ्रपादपि ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
यज्ञश्रेष्ठा स्त्री, (यज्ञे श्रेष्ठा ।) सोमवल्ली । इति राजनिर्घण्टः ॥
यज्ञसाधनः पुं (यज्ञं साधयतीति । सिध + णिच् + ल्युः ।) विष्णुः । इति महाभारते तस्य सहस्रनामस्तोत्रम् । १३ । १४९ । ११८ ॥ (यज्ञसाधके, त्रि । यथा, ऋग्वेदे । १।१४२।३।
“पुरुप्रियस्तुरिर्यज्ञसाधनः ।”
“यज्ञसाधनः यज्ञसाधकः यज्ञाधीनत्वात् यज्ञस्य ।”
इति तद्भाष्ये सायणः ॥)
यज्ञसारः पुं, (यज्ञे सारः उत्कृष्टः ।) यज्ञोडुम्बरवृक्षः । इति राजनिर्घण्टः ॥
यज्ञसूत्रम्, क्ली, (यज्ञे धृतं सूत्रम् ।) यज्ञोपवीतम् । यथा —
“पवित्रं यज्ञसूत्रञ्च यज्ञोपवीतमित्यपि ।
यज्ञसूत्रं तदुपवीतं स्यात् दक्षिणे भुजे ॥
उद्धृते वामबाहौ तु प्राचीनावीतमप्यदः ।
निवीतन्तु तदेव स्यात् कण्ठलम्बित लम्बितम् ॥”
इति जटाधरः ॥
तस्य प्रमाणं यथा,—
“ऊर्द्ध्वन्तु त्रिवृतं सूत्रं सधवानिर्म्मितं शनैः ।
तन्तुत्रयमधोवृत्तं यज्ञसूत्रं विदुर्बुधाः ॥
त्रिगुणं तद्ग्रन्थियुक्तं वेदप्रवरसम्मितम् ।
शिरोधरान्नाभिमध्यात् पृष्ठार्द्धपरिमाणकम् ॥
यजुर्व्विदां नाभिमितं सामगानामयं विधिः ।
वामस्कन्धेन विधृतं यज्ञसूत्रं बलप्रदम् ॥”
इति वह्निपुराणे ४ अध्यायः ॥
अस्य धारणे मन्त्रो यथा —
“यज्ञोपवीतमसि यज्ञस्य त्वोपवीतेनोपनह्यामि ।”
इति संस्कारतत्त्वधृतमन्त्रभाष्यम् ॥
मन्त्रान्तरम्,—
“यज्ञोपवीतं परमं पवित्रं
बृहस्पतेर्यत् सहजं पुरस्तात् ।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं
यज्ञोपवीतं बलमस्तु तेजः ॥”
इति पशुपतिः ॥
युगभेदे तत्सूत्रनियमो यथा —
“सत्ये स्वर्णमयं सूत्रं त्रेतायां राजतं तथा ।
द्वापरे ताम्रजं प्रोक्तं कलौ कार्पासकम्भवम् ॥”
इति हलायुधमार्त्तण्डः ॥
अन्यच्च ।
“यज्ञार्थं धार्यते सूत्रं यज्ञं ब्रह्मप्रयमित्यतः ।
स्वर्णं रौप्यं ताम्रजञ्च पट्टं कार्पासकादिकम् ॥
त्यागाख्यं गुरुं प्राप्तो यथालब्धं निधाय च ।
यज्ञसूत्रं परित्यजेद्भूमशक्तिक्रियात्मकम् ॥
न तत्र नियमो यस्मात् यज्ञसूत्रमयं बुधाः ॥”
इति हलादियस्मृतिः ॥
यज्ञस्थानं क्ली, (यज्ञस्य स्थानम् ।) यज्ञवाटः । इति जटाधरः ॥
यज्ञाङ्गः पुं, (यज्ञ अङ्गति प्राप्नोतीति । अगि + अच् ।) उडुम्बरः । इत्यमरः । २ । ४ । २२ ॥ (अस्य पर्य्यायो यथा,—
“यज्ञाङ्गो ब्रह्मवृक्षश्च हेमदुग्धोऽप्युडुम्बरः ॥”
इति वैद्यकरत्नमालायाम् ॥
“उडुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
खदिरवृक्षः । इति राजनिर्घण्टः ॥ आम्रातकवृक्षः । इति शब्दचन्द्रिका ॥ (यज्ञ एव अङ्गं यस्य । विष्णुः । यथा महाभारते ।१३।१४९।११७ ।
“भूर्भुवःस्वस्तरुस्तारः सविता प्रपितामहः ।
यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ॥”॥ यज्ञस्याङ्गमिति ।) यागावयवे यज्ञसाधने च क्ली ॥ (यथा, कुमारसम्भवे । १ । १७ ।
“यज्ञाङ्गयोनित्वमवेक्ष्य यस्य
सारं धरित्रीधरणक्षमञ्च ॥”)
यज्ञाङ्गा, स्त्री (यज्ञमङ्गति प्राप्नोति या । अगि + अच् । टाप् ।) सोमवल्ली । इति राजनिर्घण्टः ॥ (विवृतिरस्याः सोमवल्लीशब्दे ज्ञातव्या ॥)
यज्ञान्तः पुं, (यज्ञस्य अन्तोऽवसानं यस्मिन् ।) अवभृथः । इति हेमचन्द्रः । ३ । ४९८ ॥ यागशेषश्च ॥ (यथा, महाभारते । १३ । १४९ । ११८ ।
“यज्ञान्तकृद्यज्ञगुह्यमन्नमन्नाद एव च ॥”)
यज्ञारिः, पुं (यज्ञस्य दक्षयज्ञस्य अरिर्नाशकः ।) शिवः । इति धनञ्जयः ॥ रावणश्च ॥
यज्ञिकः, पुं, पलाशवृक्षः । इति जटाधरः ॥ (अनुकम्पितो यज्ञदत्तः । “बह्वचो मनुष्यनाम्नष्ठज्वा ।” ५ । ३ । ७८ । इति ठच् । “ठाजादावूर्द्ध्वं द्वितीयादचः ।” ५।३।८३। इति प्रकृतेर्द्वितीयादच ऊर्द्ध्वस्य लोपः । यज्ञदत्तकः । इति काशिका ॥)
यज्ञियः त्रि, (यज्ञमर्हतीति । यज्ञ + “यज्ञर्त्विग्भ्यां घखञौ ।” ५।१।७१। इति घः ।) यज्ञकर्म्मार्हः । इत्यमरः ।२।७।१०॥ (यथा, हरिवंशे । २९ । १६ ।
“ततो यज्ञविभागो हि यज्ञियैर्हि हृतं पुरा ॥”)
यज्ञाय हितम् । इति मुग्धबोधव्याकरणम् ॥ (यथा, मनुः । २ । २३ ।
“कृष्णसारस्तु चरति मृगो यत्र स्वभावतः ।
स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्ततः परः ॥”)
यज्ञियः पुं (यज्ञाय हितः । यज्ञ + घ ।) द्वापरयुगम् । इति त्रिकाण्डशेषः ॥ (खदिरवृक्षः । तत्पर्य्यायो यथा,—
“खदिरो रक्तसारश्च गायत्री दन्तधावनः ।
कण्टकी बालपत्रश्च बहुशल्यश्च यज्ञियः ॥”
इति भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ॥
पलाशः । तत्पर्य्यायो यथा —
“पलाशः किंशुकः पर्णो यज्ञियो रक्तपुष्पकः ।
क्षारश्रेष्ठो वातहरो ब्रह्मवृक्षः समिद्वरः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

यज्ञियदेश, पुं (यज्ञियश्चासौ देशश्चेति।) यागकरणोपयुक्तदेशः। यथा, मनुः।२।२३।
"कृष्णसारस्तु चरति मृगो यत्र स्वभावतः।
स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्ततः परः॥"
यज्ञियशाला, स्त्री (यज्ञिया शाला।) यागमण्डपम्। इति जटाधरः॥
यज्ञीय, पुं, (यज्ञे भव इति। यज्ञ+"गहादिभ्यश्च।" ४।२।१३८। इति छः।) उडुम्बरवृक्षः। इति राजनिर्घण्टः॥ यागसम्बन्धिनि, त्रि। (यथा महाभारते। ३।१२४।६।
"प्रशस्तोऽहमिह यज्ञीये सर्व्वकामसमृद्धिमत्।
कारयामास शर्य्यातिर्यज्ञायतनमुत्तमम्॥")
यज्ञीयब्रह्मपादप, पुं (यज्ञीयश्चासौ ब्रह्मपादपश्चेति।) विकङ्कतवृक्षः। इति राजनिर्घण्टः॥
यज्ञेश्वर, पुं, (यज्ञानामीश्वरः।) विष्णुः। यथा,
"यज्ञेश्वरो हव्यसमस्तकव्य-
भोक्ताव्ययात्मा हरिरीश्वरोऽत्र।
तत्सन्निधानादपयान्तु सद्यो
रक्षांस्यशेषाण्यसुराश्च सर्व्वे॥"
इति श्राद्धतत्त्वम्॥
यज्ञेष्ट क्ली, (यज्ञे इष्टम्।) दीर्घरोहिषकतृणम्। इति राजनिर्घण्टः॥
यज्ञोडुम्बर, पुं, (यज्ञोचित उडुम्बरः।) उडुम्बरवृक्षः। यज्ञडुमुर इति भाषा। तत्पर्य्यायः। हेमदुग्धी २ यज्ञफल ३ यज्ञाङ्ग ४ हेमदुग्धक ५ उडुम्बर ६ जन्तुफल ७। इति शब्दरत्नावली। अस्य गुणा यथा भावप्रकाशे।
"उडुम्बरो हिमो रूक्षो गुरुः पित्तकफास्रजित्।
मधुरस्तुवरो वर्ण्यो व्रणशोधनरोपणः॥"
यज्ञोपवीतं क्ली, (यज्ञाय उपवीतम्।) यज्ञसूत्रम्। पैता इति भाषा। तत्पर्य्यायः। पवित्रम् २ ब्रह्मसूत्रम् ३ द्विजायनी ४। इति त्रिकाण्डशेषः॥ तस्य विवरणं यथा। उपवीतमाह गोभिलः। यज्ञोपवीतं कुरुते सूत्रं वस्त्रं वा अपि वा कुशरज्जुमेव। यज्ञोपवीतं विशिष्टविन्यासधारणकर्म्मैतया कुरुते। किन्तु सूत्रम्। तच्च विशेषयति छन्दोगपरिशिष्टम्।
"ऊर्द्ध्वन्तु त्रिवृतं कार्य्यं तन्तुत्रयमधोवृतम्।
त्रिवृतञ्चोपवीतं स्यात्तस्यैको ग्रन्थिरिष्यते॥"
वामावर्त्तवलितं तन्तुत्रयं त्रिगुणं कृत्वा दक्षिणावर्त्तवलितं कार्य्यं एवं त्रिवृतं त्रिवृतं उपवीतं स्यात्। एको ग्रन्थिरिति नानात्वनिषेधार्थम्। तथा बौधायनः।
"कौषं क्षौमं त्रिवृतं यज्ञोपवीतमाभावे॥"
कौषं क्रिमिकोषोद्भवं पट्टसूत्रादिमयमित्यर्थः। क्षौमं कार्पासोद्भवम्। तथा मनुः।
"कार्पासमुपवीतं स्यात् विप्रस्योर्द्ध्ववृतं त्रिवृत्।
शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम्॥"
त्रिवृद्वृतमित्युक्तत्वात् मनुवचनेऽपि त्रिवृत्त्वञ्च त्रिवृत्त्वेन विधेयम्। यत्तु पैठीनसिवचनम्। कार्पासमुपवीतं षट्तन्तु त्रिवृतं ब्राह्मणस्य। क्षौमं राजन्यस्य। आविकं वैश्यस्य। तत्र तन्त्वसम्भवे षट्तन्तुविधायकम्। नवतन्तुत्वमप्याह देवलः।
"यज्ञोपवीतं कुर्व्वीत सूत्राणि नव तन्तवः।
एकेन ग्रन्थिना तन्तुर्द्विगुणस्त्रिगुणोऽथवा॥"
एकेन ग्रन्थिना युक्त इति शेषः। द्विगुणस्त्रिगुणोऽथवेति। तन्तुकेन द्विसवस्त्रिसवो वा कर्त्तव्यः। द्विसवत्वं त्रिसवत्वाभावे। गोभिले वाशब्दो विकल्पार्थः। अपिशब्दो वस्त्रकुशरज्ज्वोः सूत्रानुकल्पत्वप्रदर्शनार्थः। एवकारस्त्रिवृत्त्वव्यवच्छेदार्थः। द्वितीयो वाशब्दः अनुक्तमौञ्ज्यादिसमुच्चयार्थः। तथा निगमपरिशिष्टम्। वाससा यज्ञोपवीतानि कुरुते तदभावे त्रिवृता सूत्रेण। कुशशणवालप्रतिसररज्जुभिर्वा। वालोऽत्र गोवालः। यथा देवलः।
"कार्पासक्षौमगोवालशणवल्कतृणोद्भवम्।
सदा सम्भवतो धार्य्यमुपवीतं द्विजातिभिः॥"
तदभाव इति करणाद्वस्त्राभावे कुशरज्जुभिरिति बोद्धव्यम्। इति श्राद्धविवेकः॥ *॥ अथोपनयनदिनम्। तत्र गर्भाष्टमेऽब्दे ब्राह्मणस्योपनयनं प्रशस्तम्। क्षत्रियस्य गर्भैकादशे। गर्भद्वादशे वैश्यस्य प्रशस्तम्। अत्रासामर्थ्ये ब्राह्मणस्य षोड़शवर्षपर्य्यन्तमेव। क्षत्रियस्य द्वाविंशतिवर्षपर्य्यन्तम्। वैश्यस्य चतुर्व्विंशतिवर्षपर्य्यन्तं तदनुष्ठानकालः। तत्र मासाः माघफाल्गुनचैत्रवैशाखज्यैष्ठाषाढ़ा विहिताः। तत्र तिथयः द्वितीयैकादशीद्वादशीपञ्चमीदशमी तृतीया विहिताः। तत्र वाराः बृहस्पतिशुक्रबौधाः प्रशस्ताः। सामगानां मङ्गलवारोऽपि। तत्र नक्षत्राणि। स्वाती ज्येष्ठा धनिष्ठा अश्विनी अनुराधा हस्ता रेवती पुष्या चित्रा श्रवणा मृगशिरः शतभिषा पूर्व्वफल्गुनी उत्तरफल्गुनी पूर्व्वभाद्रपदा उत्तरभाद्रपदा रोहिणी पूर्व्वाषाढ़ा। तत्र लग्नानि वृषमिथुनतुलाधनुर्मीनकन्यकानि। तत्र पक्षः शुक्लः। तच्चन्द्रादिशोभने अनध्यायादीन् परित्यज्य कर्त्तव्यम्। इति ज्योतिस्तत्त्वमतम्॥ *॥ अथोपनयनम्। तत्र गोभिलः। गर्भाष्टमेषु ब्राह्मणमुपनयेत् गर्भैकादशेषु क्षत्रियं गर्भे द्वादशेषु वैश्यम्। आषोड़शात् ब्राह्मणस्यानतीतः कालो भवति आद्वाविंशात् क्षत्रियस्य आचतुर्व्विंशात् वैश्यस्य। अत ऊर्द्ध्वं पतितसावित्रीका भवन्ति। नैतानुपनयेयुर्नाध्यापयेयुर्न चैभिर्व्विवाहयेयुः। आषोड़शादिष्वभिविधावाङ्। तथा च विष्णुधर्म्मोत्तरम्।
"षोड़शाब्दो हि विप्रस्य राजन्यस्य द्विविंशतिः।
विंशतिः सचतुर्थी च वैश्यस्य परिकीर्त्तिता॥
सावित्री नातिवर्त्तेत अत ऊर्द्ध्वं निवर्त्तते॥"
अत्र षोड़शवर्षाद्युपनयनयोग्यता प्रतीयते।
"पतिता यस्य सावित्री दश वर्षाणि पञ्च च।
ब्राह्मणस्य विशेषेण तथा राजन्यवैश्ययोः॥
प्रायश्चित्तं भवेदेषां प्रोवाच वदतां वरः॥"
इति यमवचनेन तदग्रहता प्रतीयते अथयोग्य अकरणाभ्यामविरुद्धता। तथा च मात्स्यः।
"व्रतबन्धविवाहे च वत्सरपरिगणनमाहुराचार्य्याः।
आधानपूर्व्वकमेके प्रसूतिपूर्व्वं परास्ते तु॥"
यत्तु द्विजानामित्युपक्रम्य पैठीनसिवचनम्। द्वादशषोड़शविंशतिचतुर्व्विंशतीनां अवरुद्धकाला भवन्ति। तदादशवर्षादुपरि ब्राह्मणादीनां महाव्याहृतिहोमप्रायश्चित्ताय षोड़शवर्षोपरि गुरु प्रायश्चित्तमिति। तथा च शङ्खलिखितौ। व्रात्य चान्द्रायणं चरेत् गोप्रदानञ्च कुर्य्यात्। चान्द्रायणाशक्तौ धेनुत्रयं तन्मूल्यं वा सार्द्धद्वाविंशति कार्षापणाः गोमूल्यं कार्षापणा एकः त्रिनिष्का सार्द्धयोर्व्विंशतिकार्षापणा देयाः। पितृमातृरहितस्य त्रिसन्ध्य दैवोपनयनादिना पतितसावित्रीकस्य वा विषये तु मनुविष्णू।
"येषां द्विजानां सावित्री नानूच्येत यथाविधि।
तांश्चारयित्वा त्रीन् कृच्छ्रान् यथाविध्युपनाययेत्॥"
कृच्छ्रं प्राजापत्यम्। तदशक्तौ धेनुत्रयं तन्मूल्यं वा नव कार्षापणाः। अत्र प्रायश्चित्तप्रकाश नैतानित्यादि। तत्र बहुवचनं तत्कर्म्मसङ्गिनां प्रायश्चित्तप्रदर्शनार्थम्। तथा च स्मृत्यन्तरम्।
"ब्राह्मणाध्यस्य शुद्धाय कृच्छ्रपादेन शुध्यति।
यज्ञोपनयने ब्राह्मान् त्रिभिः कृच्छ्रैः स शुध्यति॥"
शुभकर्म्मभीमपराक्रमचिन्तामण्योः।
"स्वातीशक्रधनाश्विमित्रकरभे पौष्णेऽप्यदितिभा चरि
त्रिष्वेतोयपतौ भगेऽदितिसुते मासद्वये वाजरे।
केन्द्रस्थे भृगुजेऽङ्गिरः सुतयुते चन्द्रे च तारे शुभे
कर्त्तव्यं व्रतकर्म्म मङ्गलतिथौ वारा सिताङ्केज्यकाः॥"
अदितिसुत उत्तरफल्गुनी। वाजरः पूर्व्वाषाढ़ा। दीपिकायाम्।
"जीवार्केन्दुकुजा हरिप्रचरणविभाकरे चोत्तरस्थे
स्वाध्याये पैत्र्यवर्ज्यमिन्दुसुभरे चोरिमे शान्ती च।
शुक्रार्केन्दुपचये रविमदनतिथौ सौम्ययाम्याष्टमेषु
यो जीवाज्ञातिचारोऽर्कसितगुरुदिने ब्राह्मशुद्धो व्रतं स्यात्॥"
रविमदनतिथिः सप्तमी त्रयोदशी। बृहस्पतेः शुभगृहयोः। तत्त्वचिन्तामणौ।
"माघे शुक्रमघाषाढ़े फाल्गुने च दृढ़व्रतः।
चैत्रे भवति मेधावी वैशाखे कोविदो भवेत्।
ज्यैष्ठे यज्ञपतिश्च आषाढ़े क्रतुभाजनः।
द्विविधस्तेषु राजिः स्याद्विद्वान् निधिश्च क्रमम्॥"
राजमार्त्तण्डः।
"पुनर्व्वसौ कृतो विप्रः पुनःसंस्कारमर्हति॥"
आश्वलायनः। उदगयने आपूर्य्यमाणपक्षे कल्याणे नक्षत्रे चूड़ोपनयनगोदानविवाहाः। विवाह सार्व्वकालिक इत्येके। आपूर्य्यमाणपक्षे शुक्लपक्षे। इत्यादि।

"स्मृतिपुराणमध्यायान् सप्तमीञ्च चतुर्दशीम् ।
चतुर्थीमाघमासस्य द्वितीयां परिवर्ज्जयेत् ॥"
श्रीपतिव्यवहारसमुच्चये ।
"कार्त्तिकस्याश्विनस्यापि फाल्गुनाषाढयो-
रपि ।
कृष्णपक्षे द्वितीयायामनध्याय विदुर्बुधाः ॥"
शुनकः ।
"चैत्रकृष्णद्वितीयायां त्रिष्वष्टकासु च ।
मार्गे च फाल्गुने चैव आषाढे कार्त्तिके तथा ॥
चतुर्थीमाघमासस्य द्वितीयां परिवर्ज्जयेत् ।
नाकालवृष्टौ कुर्व्वीत प्रसन्नस्य शुभक्रियाम् ॥"
उपनयने उत्तरायणशुक्लपक्षयोर्विधानात् कार्त्ति कान्तौ कृष्णपक्षे च द्वितीयानिषेधः पुनः संस्कारमर्हति इत्युक्तप्रायश्चित्तरूपोपनयनपरः । वैश्योपनयनपरश्च । तथा च गर्गः ।
'विप्रस्य क्षत्रियस्यापि मौञ्जी स्यादुत्तरायणे ।
दक्षिणे च विशां कार्य्या नानध्याये न सङ्क्रमे ।
अनध्यायेऽपि कुर्व्वीत यस्य नैमित्तिकं भवेत् ।"
अपिना दक्षिणायनकृष्णपक्षयोः समुच्चयः । नैमित्तिकं प्रायश्चित्तरूपम् । चैत्रशुक्लतृतीया आषाढशुक्लसप्तमी मन्वन्तरादित्वेन निषिद्धा । वैशाखशुक्लतृतीया युगादित्वेन निषिद्धा । षष्ठ्यामश्विरगभार्ग्यौ रिक्तासु बहुदोषभाक् । सामगानां कृष्णपक्षेऽप्युपनयनम् । शाखाधिपबलात् । यथा च ।
"शाखाधिपे बलिनि जन्मगतेऽथवास्मिन्
वारेऽस्य चोपनयनं कथितं द्विजानाम् ।
नीचस्थितेऽरिगृहगेऽथ पराजिते वा
नीचैर्गतावुपनय स्मृतिकर्म्महीनः ॥"
अस्य शाखाधिपस्य । ज्योतिश्चिन्तामणौ ।
"जन्मोदये जन्मसु तारकासु
मासेऽथवा जन्मनि जन्मभे वा ।
व्रतेन विप्रो न बहुश्रुतोऽपि
विद्याविशेषैः प्रथितः पृथिव्याम् ॥
अस्तं गते दैत्यगुरौ गुरौ वा
चन्द्रेऽपि वा पापयुतेऽप्ययुक्ते ।
प्रलीयतेऽसौ दिवसे प्रमाद
प्रयाति दैवैरपि रक्षितो यः ॥"
एतद् यस्मै । व्रतेन उपनयनेन । इति संस्कारतत्त्वम् ॥

यज्यु त्रि (यजतीति । यज+'यजिमनिशुन्धिदसिजनिभ्यो युच् ।' उणा० ३ । २० । इति युच् ।) यज्युर्व्वेज्यकर्त्ता याजकः । इत्युणादिकोषः । यजमानः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (यथा, ऋग्वेदे । १ । २१ । १२ ।
"त्वमग्ने यज्यवे पायुरन्तरोऽनिषङ्गाय ।"
"हे अग्ने त्वं यज्यवे यज्ञोपेतमनुष्याय पायुः पालकः ।" इति तद्भाष्ये सायनः ॥)

यज्वा [न्] पुं, (यज+"सुयजोर्ङ्वनिप् ।" ३ । २ । १०३ । इति ङ्वनिप् ।) विधिना इष्टवान् । वेदविधानेन कृतयागः । इत्यमरः । २ । ७ । ८ ॥ (यथा, नैषधचरिते । १ । २८ ।
"राजा स यज्वा विबुधव्रजत्रा
कृत्वाध्वराज्योपमयैव राज्यम् ।
भुङ्क्ते श्रितश्रोत्रियसात्कृतश्रीः
पूर्व्वं त्वहो शेषमशेषमन्त्यम् ॥")

यज्वपति पुं, चन्द्रः । इति त्रिकाण्डशेषः ॥

यत, ई ङ यत्ने । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् । अनिट्निष्ठ० ।) ई, यत्तः । ङ यतते पठितुं शिष्यः । इति दुर्गादासः ॥

यत क खेदोपस्कारयोः । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) खेद इह ताडनम् । क यातयति पुत्रं पिता ताडयतीत्यर्थः । यातयति वृक्षं वह्निः उपस्करोति इत्यर्थः । निर् प्रत्यर्पणे । प्रत्यर्पणं परावर्त्तनम् । निर्यातयति धान्येन माषान् लोकः धान्यं दत्त्वा माषान् गृह्णाति इत्यर्थः । इति दुर्गादासः ॥

यतः व्य, हेतुः । यस्मात् । इत्यमरः । ३ । ४ । ६ ॥ (यथा, उत्तररामचरिते ।
"अत्र स्थिता तृणमदाद् बहुशो यदेभ्य
सीता ततो हरिणकैर्न विमुच्यते स्म ।")

यत्, [द्] त्रि (यतति सर्व्वं पदार्थं सह सङ्गतो भवतीति । यत+"त्यजितनियजिभ्यो डित् ।" उणा० १ । १३२ । इति अदि डित् ।) बुद्धिस्थत्वोपलक्षितधर्म्मावच्छिन्नम् । इति न्यायमतसिद्धान्तकौमुद्यादिटीका । ये इति भाषा । (एकत्रिंशद्विभक्तिषु पुंलिङ्गे तस्य रूपाणि यथा, यः १ यौ २ ये ३ । प्रथमा । यम् ४ यौ ५ यान् ६ । द्वितीया । येन ७ याभ्याम् ८ यैः ९ । तृतीया । यस्मै १० याभ्याम् ११ येभ्यः १२ । चतुर्थी । यस्मात् १३ याभ्याम् १४ येभ्यः १५ । पञ्चमी । यस्य १६ ययोः १७ येषाम् १८ । षष्ठी । यस्मिन् १९ ययोः २० येषु २१ । सप्तमी । ० । स्त्रीलिङ्गे तस्य रूपाणि यथा, या १ ये २ याः ३ । प्रथमा । याम् ४ ये ५ याः ६ । द्वितीया । यया ७ याभ्याम् ८ याभिः ९ । तृतीया । यस्यै १० याभ्याम् ११ याभ्यः १२ । चतुर्थी । यस्याः १३ याभ्याम् १४ याभ्यः १५ । पञ्चमी । यस्याः १६ ययोः १७ यासाम् १८ । षष्ठी । यस्याम् १९ ययोः २० यासु २१ । सप्तमी । ० । क्लीवलिङ्गे तस्य रूपाणि । यत् १ ये २ यानि ३ । प्रथमा । यत् ४ ये ५ यानि ६ । द्वितीया । शेषं पुंवत् ॥)

यतः व्य (यद्+"पञ्चम्यास्तसिल् ।" ५ । ३ । ७ । इति तसिल् । "तद्धितश्चासर्व्वविभक्तिः ।" १ । १ । ३८ । इति तसिल्प्रत्ययान्तस्याव्ययत्वम् ।) हेतुः । यस्मात् । इत्यमरः । ३ । ४ । ६ ॥ (यथा मनुः । २ । ११७ ।
"लौकिकं वैदिकं वापि तथाध्यात्मिकमेव च ।
आददीत यतो ज्ञानं तं पूर्व्वमभिवादयेत् ॥'
यद्+"इतराभ्योऽपि दृश्यन्ते ।" ५ । ३ । १४ । इति तसिलप्रत्ययेन । येन । यथा, भागवते । २ । ५ । २ ।
"यद्रूपं यदधिष्ठानं यतः सृष्टमिदं प्रभो ।"
येभ्यः । यथा भागवते । १ । १५ । २१ ।
"तद्वै धनुस्त इषवः स रथो हयास्ते
सोऽहं रथी नृपतयो यत आनमन्ति ॥"
यत्र । यथा, अभिज्ञानशकुन्तले ।
"यतो यतः षट्चरणोऽभिवर्त्तते
ततस्ततः प्रेरितवामलोचना ॥")

यतम, त्रि (यद्+"वा बहूनां जातिपरिप्रश्ने डतमच् ।" ५ । ३ । ९३ । इति डतमच् ।) बहूनां मध्ये निर्द्धारित एकः । यो मध्ये यः । यच्छब्दात् डतमप्रत्ययेन निष्पन्नः । इति मुग्धबोधव्याकरणम् ॥ ("यतमो भवतां कठः ।" इति काशिका ॥)

यतर, त्रि (यद्+"किंयत्तदो निर्द्धारणे द्वयोरेकस्य डतरच् ।" ५ । ३ । ९२ । इति डतरच् ।) द्वयोर्मध्ये निर्द्धारित एकः । अनयोर्मध्ये यः । यच्छब्दात् डतरप्रत्ययेन निष्पन्नः । इति मुग्धबोधव्याकरणम् ॥ (यथा ऋग्वेदे । ७ । १०४ । १२ ।
'तयोर्यत् सत्यं यतरदृजीयस्तदित् सोमोऽवति
हन्त्यासत् ॥')

यति त्रि, बहुवचनान्तयावच्छब्दार्थकः । यतगुलि इति भाषा । यच्छब्दात् परिमाणार्थे डतिप्रत्ययेन निष्पन्नम् । इति मुग्धबोधव्याकरणम् ॥ (यथा ऋग्वेदे । १ । १५ । १३ ।
"त्वं वेत्थ यति ते जातवेदः ।"
"यति ते यावन्तो भवन्ति ।" इति तद्भाष्ये सायनः ॥)

यति, पुं (यतते चेष्टते मोक्षायेति । यत+"सर्व्वधातुभ्य इन् ।" उणा० ४ । ११७ । इति इन् ।) निर्जितेन्द्रियग्रामः । तत्पर्य्यायः । यती २ । इत्यमरः । २ । ७ । ४४ ॥ भिक्षुः ३ सन्न्यासी ४ कर्म्मन्दी ५ रक्तवसनः ६ परिव्राजकः ७ तापसः ८ पाराशरी ९ परिकाङ्क्षी १० मस्करी ११ पारिरक्षकः १२ । इति हेमचन्द्रः । निकारः । विरतिः । इति तस्य नानार्थे ॥ तस्य वाराणस्यां वासो यथा,—
"अष्टौ मासान् विहारः स्याद्यतीनां संयतात्म-
नाम् ।
एकत्र चतुरो मासानब्दं वा निवसेत् पुनः ॥
अविमुक्ते प्रविष्टानां विहारस्तु न विद्यते ।
यतिभिर्मोक्षकामैश्च अविमुक्तं निषेव्यते ॥"
इति मात्स्ये अविमुक्तमाहात्म्ये १८९ अध्यायः ॥
यतिधर्म्मो यथा,—
'अलाबु दारुपात्रञ्च मृण्मयं वैदलं तथा ।
एतानि यतिपात्राणि मनुः स्वायम्भुवोऽब्रवीत् ॥
एककालं चरेद्भैक्ष्यं न प्रसज्जेत विस्तरे ।
भैक्ष्ये प्रसक्तो हि यतिर्विषयेष्वपि सज्जति ॥
विधूमे सन्नमुसले व्यङ्गारे भुक्तवज्जने ।
वृत्ते शरावसम्पाते भिक्षां नित्यं यतिश्चरेत् ॥
अलाभे न विषादी स्याल्लाभे चैव न हर्षयेत् ।
प्राणयात्रिकमात्रः स्यान्मात्रासङ्गाद्विनिर्गतः ॥
अभिपूजितलाभांस्तु जुगुप्सेतैव सर्व्वशः ।
अभिपूजितलाभैश्च यतिर्मुक्तोऽपि बध्यते ॥

अल्पान्नाभ्यवहारेण रहःस्थानासनेन च ।
ह्रियमाणानि विषयैरिन्द्रियाणि निवर्त्तयेत् ॥
इन्द्रियाणां निरोधेन रागद्वेषक्षयेण च ।
अहिंसया च भूतानाममृतत्वाय कल्पते ॥
अवेक्षेत गतीर्नॄणां कर्म्मदोषसमुद्भवाः ।
निरये चैव पतनं यातनाश्च यमक्षये ॥
विप्रयोगं प्रियैश्चैव संयोगञ्च तथाप्रियैः ।
जरया चाभिभवनं व्याधिभिश्चोपपीडनम् ॥
देहादुत्क्रमणञ्चास्मात् पुनर्गर्भे च सम्भवम् ।
योनिकोटिसहस्रेषु सृतीश्चास्यान्तरात्मनः ॥
अधर्म्मप्रभवञ्चैव दुःखयोगं शरीरिणाम् ।
धर्म्मार्थप्रभवञ्चैव सुखसंयोगमक्षयम् ॥
सूक्ष्मताञ्चान्ववेक्षेत योगेन परमात्मनः ।
देहेषु च समुत्पत्तिमुत्तमेष्वधमेषु च ॥
दूषितोऽपि चरेद्धर्म्मं यत्र तत्राश्रमे रतः ।
समः सर्व्वेषु भूतेषु न लिङ्गं धर्म्मकारणम् ॥
फलं कतकवृक्षस्य यद्यप्यम्बुप्रसादकम् ।
न नामग्रहणादेव तस्य वारि प्रसीदति ॥
संरक्षणार्थं जन्तूनां रात्रावहनि वा सदा ।
शरीरस्यात्यये चैव समीक्ष्य वसुधां चरेत् ॥
अह्ना रात्र्या च यान् जन्तून् हिनस्त्यज्ञानतो यतिः ।
तेषां स्नात्वा विशुद्ध्यर्थं प्राणायामान् समाचरेत् ॥
प्राणायामा ब्राह्मणस्य त्रयोऽपि विधिवत् कृताः ।
व्याहृतिप्रणवैर्युक्ता विज्ञेयं परमं तपः ॥
दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः ।
तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात् ॥
प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्विषम् ।
प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान् ॥
उच्चावचेषु भूतेषु दुर्ज्ञेयामकृतात्मभिः ।
ध्यानयोगेन सम्पश्येद्गतिमस्यान्तरात्मनः ॥
सम्यग्दर्शनसम्पन्नः कर्म्मभिर्न निबध्यते ।
दर्शनेन विहीनस्तु संसारं प्रतिपद्यते ॥
अहिंसयेन्द्रियासङ्गैर्वैदिकैश्चैव कर्म्मभिः ।
तपसश्चरणैश्चोग्रैः साधयन्तीह तत्पदम् ॥
अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनम् ।
चर्म्मावनद्धं दुर्गन्धिपूर्णं मूत्रपुरीषयोः ॥
जराशोकसमाविष्टं रोगायतनमातुरम् ।
रजस्वलमनित्यञ्च भूतावासमिमं त्यजेत् ॥
नदीकूलं यथा वृक्षो वृक्षं वा शकुनिर्यथा ।
तथा त्यजन्निमं देहं कृच्छ्राद्ग्राहाद्विमुच्यते ॥
प्रियेषु स्वेषु सुकृतमप्रियेषु च दुष्कृतम् ।
विसृज्य ध्यानयोगेन ब्रह्माभ्येति सनातनम् ॥
यदा भावेन भवति सर्व्वभावेषु निःस्पृहः ।
तदा सुखमवाप्नोति प्रेत्य चेह च शाश्वतम् ॥
अनेन विधिना सर्व्वांस्त्यक्त्वा सङ्गान् शनैः शनैः ।
सर्व्वद्वन्द्वविनिर्म्मुक्तो ब्रह्मण्येवावतिष्ठते ॥
ध्यानिकं सर्व्वमेवैतद्यदेतदभिशब्दितम् ।
न ह्यनध्यात्मवित् कश्चित् क्रियाफलमुपाश्नुते ॥
अधियज्ञं ब्रह्म जपेदाधिदैविकमेव च ।
आध्यात्मिकञ्च सततं वेदान्ताभिहितञ्च यत् ॥
इदं शरणमज्ञानामिदमेव विजानताम् ।
इदमन्विच्छतां स्वर्गमिदमानन्त्यमिच्छताम् ॥
अनेन क्रमयोगेन परिव्रजति यो द्विजः ।
स विधूयेह पाप्मानं परं ब्रह्माधिगच्छति ॥”

इति मानवे ६ अध्यायः ॥

(ब्रह्मणः पुत्त्रविशेषः । यथा, श्रीमद्भागवते । ४ । ८ । १ ।
“सनकाद्या नारदश्च ऋभुर्हंसोऽरुणिर्यतिः ।
नैते गृहान् ब्रह्मसुता ह्यावसन्नूर्द्ध्वरेतसः ॥”
नहुषपुत्त्रः । यथा, महाभारते । १ । ७५ । ३० ।
“यतिं ययातिं संयातिमायातिमयतिं ध्रुवम् ।
नहुषो जनयामास षट्सुतान् प्रियवाससि ॥”
विश्वामित्रपुत्त्रः । यथा, महाभारते । १३ । ४ । ५७ ।
“आराणिर्नाचिकश्चैव चाम्पेयोज्जयनौ तथा ।
नवतन्तुर्वककनखः सयनो यतिरेव च ॥”
त्रि, कर्म्मसूपरतोऽयष्टा । यथा, ऋग्वेदे । ८ । ३ । ९ ।
“येना यतिभ्यो भृगवे धने हिते
येन प्रस्कण्वमाविथ ॥”
“येन सुवीर्य्येण यतिभ्यः कर्म्मसूपरतेभ्योऽयष्टृभ्यो जनेभ्यः सकाशात् धनमाहृत्य भृगवे महर्षये प्रयच्छसि ।” इति तद्भाष्ये सायणः ॥)

यतिः, स्त्री, (यम्यते रसनानेति । यम् + “स्त्रियां क्तिन् ।” ३ । ३ । ९४ । इति क्तिन् । “अनुदात्तोपदेशवनतितनोत्यादीनामिति ।” ६ । ४ । ३७ । इति मकारलोपः ।) पाठविच्छेदः । इति मेदिनी । ते, ४६ ॥ जिह्वेष्टविश्रामस्थानम् । यथा,—
‘यतिर्जिह्वेष्टविश्रामस्थानं कविभिरुच्यते ।
सा विच्छेदविरामाद्यैः पदैर्वाच्या निजेच्छया ॥
क्वचिच्छन्दस्यार्ध्ये यतिरभिहिता पूर्व्वकविभिः
यदाम्नि सा शोभां व्रजति पदमध्येऽप्यलति च ।
पुनर्जन्वैवाशो न्तरविहितसन्धि श्रयति तौ
यथा लक्ष्मीं पुण्यात्तुलमहिमा मां करुणया ॥
श्रीनमाऽच्यसुध्यास्तु नेच्छन्ति सुगधो यतिम् ।
इत्यादि भङ्गः समस्थे गुरुमें पुरुषोत्तमः ॥’

इति छन्दोमञ्जरी । १ । १६—१८ ॥

(नियम्यते इति । यम् + क्तिन् । यतते चेष्टते ब्रह्मप्राप्त्यर्थं इति वा । यत + “सर्व्वधातुभ्य इन् ।” उणा० ४ । ११७ । इति इन् ।) विधवा । रागः । सन्धिः । इति शब्दरत्नावली ॥ वाद्याङ्गप्रबन्धविशेषः । यथा —
“यतिरोधाप्रवाहश्च गजरो रूपकं ध्रुवम् ।
गलपः सारिणौ च नान्दी कथितस्तथा ।
प्रबन्धस्य वन्दनस्य प्रबन्धा द्वादश स्मृताः ॥’
यथा ह यातः । इत्युक्तताड्यां यतिः । इति सङ्गीतदामोदरः ॥ (सा त्रिविधा । यथा मार्कण्डेयपुराणे । २३ । ५३ ।
‘चतुर्विधं पदं तालं त्रिप्रकारं लयत्रयम् ।
यतित्रयं तथा तोद्यं मया दत्तं चतुर्विधम् ॥”)

यतिचान्द्रायणं, क्ली, (यतिभिरनुष्ठेयं चान्द्रायणम् ।) व्रतविशेषः । यथा —
“अष्टावष्टौ समश्नीयात् पिण्डान् मध्यन्दिने स्थितः ।
नियतात्मा हविष्याशी यतिचान्द्रायणं चरन् ॥”

इति मानवे ११ अध्यायः ॥

यतिचान्द्रायणे पादोनधेनुचतुष्टयं तत्प्रत्याम्नायः सपादैकादशकार्षापणाः । इति प्रायश्चित्तविवेकः ॥

यतिनी, स्त्री, (यतः संयमोऽस्या अस्तीति । यत + इनिः । स्त्रियां ङीप् ।) विधवा । यथा,—
“विधवा नाणिका रण्डा विश्वस्ता यतिनी
यतिः ॥”

इति शब्दरत्नावली ॥

यतिमैथुनं, क्ली, (यतीनां दुष्टयतीनामिव गोपनीयं मैथुनम् ।) यतिगोप्यरतिः । तत्पर्य्यायः । खञ्जनरतम् २ । इति त्रिकाण्डशेषः ॥

यती, स्त्री, (यतिः । कृदिकारादक्तिनः इति स्त्रियां ङीष् ।) विधवा । इति शब्दरत्नावली ॥

यती [न्] पुं, (यतः संयमोऽस्यास्तीति । यत + इनि ।) यतिः । जितेन्द्रियः । इत्यमरः । २ । ७ । ४४ ॥ (यथा, मुग्धबोधे कारकप्रकरणे ।
“दत्त्वा दधि श्रावकमेतदर्थिका
शुश्रूषवश्च यतिभिः सुदर्शनम् ।”)

यतुका, यतूका } स्त्री, (यत + बाहुलकात् ऊकः पक्षे उकः । स्त्रियां टाप् ।) वृक्षविशेषः । यथा,—
“रजनी स्यात् यतुका यतूका जननीति च ॥”

इति शब्दरत्नावली ॥

यत्नः, पुं, (यत + “यजयाचयतविच्छप्रच्छरक्षो नङ् ।” ३ । ३ । ९० । इति नङ् ।) रूपादिचतुर्व्विंशतिगुणान्तर्गतगुणविशेषः । स च त्रिविधः । प्रवृत्तिः १ निवृत्तिः २ जीवनयोनिः ३ । यथा,—
“प्रवृत्तिश्च निवृत्तिश्च तथा जीवनयोनिकः ।
एवं प्रयत्नस्त्रिविधस्तान्त्रिकैः परिकीर्त्तितम् ॥”
तेषां कारणं यथा —
“चिकीर्षा कृतिसाध्येष्टसाधनत्वमतिस्तथा ।
उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत् ॥
निवृत्तिस्तु भवेद्द्वेषाद्द्विष्टसाधनताधियः ।
यत्नो जीवनयोनिस्तु सर्व्वदातीन्द्रियो भवेत् ।
शरीरे प्राणसञ्चारे कारणं तत् प्रकीर्त्तितम् ॥”

इति भाषापरिच्छेदः ॥

उद्योगः । यथा,—
‘उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
र्दैवेन देयमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ॥”

इति हितोपदेशः ॥

यत्नवान् [त्] त्रि, यत्नविशिष्टः । यत्नशब्दात् मतुप्प्रत्ययेन निष्पन्नः । (यथा हरिवंशे । ८६ । ८ ।
“कंसेनापि समाज्ञप्तश्चाणूरः पुरुषस्तु ।
योद्धव्यं यत्नः कर्त्तव्यस्तथा यत्नवता त्विति ॥”)

यत्र, व्य, यस्मिन् । इति कविकल्पद्रुमः ॥ (पुरा परं भ्रम इट ।) इत्यव्ययादिवर्गः, ९ क, यत्पदि सर्व्वेद वर्णं वाहुलिकः । यत्र

इत्यनेनैवेष्टसिद्धे इत्युक्ताको वेदेषूचारणभेदार्थं ।
इति दुर्गादासः ।

यत्र, व यस्मिन् । येखाने इति भाषा । यच्छब्दात् सप्तम्यास्त्रल्प्रत्ययेन निष्पन्नम् । इति सिद्धान्तकौमुदी । (यथा, श्रीमद्भगवद्गीतायाम् ।
"यत्र यत्र मनो देही धारयेत् सकलं धिया ।
स्नेहाद्द्वेषाद्भयाद्वापि याति तत्तत्सरूपताम् ॥")

यथा व सादृश्यम् । साम्यम् । तत्पर्य्यायः । वत् २ वा ३ तथा ४ एव ५ एवम् ६ । इत्यमरः । ३ । ४ । ९ । (यथा, उत्तररामचरिते । २ । ४ ।
"वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे न च खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति च ।
भवति च तयोर्भूयान् भेदः फलं प्रति तद्यथा प्रभवति शुचिर्बिम्बोद्ग्राहे मणिर्न मृदां चयः ॥")

यथाकामी [न्] त्रि (यथा कामयते इति । कामि + णिनि । यद्वा, काममनतिक्रम्य प्रवृत्तिरस्यास्तीति । यथाकाम + अत इनिठनाविति इनिः ।) स्वेच्छाचारी । तत्पर्य्यायः । अपावृतः २ स्वच्छन्दः ३ स्वैरी ४ अपावृत ५ स्वतन्त्रः ६ निरवग्रहः ७ । इति हेमचन्द्रः । ३ । ९८ । नियन्त्रणः ८ । इति जटाधरः । (यथा, याज्ञवल्क्यसंहितायाम् । १ । ८१ ।
"यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन् ।
स्वदारनिरतश्चैव स्त्रियो रक्ष्या यतः स्मृताः ॥")

यथाक्रम, व,क्ली क्रमानुरूपम् । क्रममनतिक्रम्येति व्याकरणम् । (यथा, रघुवंशे । ६ । १० ।
"यथाक्रमं पुंसवनादिकाः क्रिया धृतेश्च धीरः सदृशीर्व्यधत्त सः ॥")
अपि च ।
"यथाक्रमेण पुत्रस्य कार्य्या प्रेतक्रिया सदा ।
भर्त्तापत्नीशाः पारि एकोद्दिष्टविधानतः ॥"
इति आह्निकतत्त्वम् ।

यथाजात, त्रि, (यथा न जातः इति यथा जातः । जातोऽपि पुमान् अजात इव प्रतीयते विद्यया शौर्य्येण वा न केनापि विदितत्वात् ।) मूर्खः । इत्यमरः । ३ । १ । ४८ । नीचः । इति जटाधरः ।

यथातथं, व, क्ली, (यथा वर्त्तते तथानतिक्रम्य इति अनतिवृत्तौ अव्ययीभावः । अव्ययीभावश्च । २ । ४ । १८ । इति नपुंसकत्वम् । "ह्रस्वो नपुंसके प्रातिपदिकस्य ।' १ । २ । ४७ । इति ह्रस्वः । "नाव्ययीभावादतोऽम्त्वपञ्चम्याः ।" २ । ४ । ८३ । इति प्रथमाविभक्तेरमादेशः ।) यथार्थम् । इति शब्दरत्नावली । (यथा, श्रीमद्भागवते । ६ । ९ । ४१ ।
"येन त्वधायगमो भावा स्वधायतमोमयाः ।
गुणनामक्रियारूपैर्विभाव्यन्ते यथातथम् ॥")

यथापूर्ब्बं, व, क्ली, (पूर्ब्बमनतिक्रम्य इत्यव्ययीभावः ।) पूर्ब्बनिर्दिष्टप्रकारानुरूपम् । यथा,—
"मन्त्रतामो प्रतिष्ठायां प्रासादो प्रतिमासु च ।
यथापूर्ब्बं यथा भावः सर्व्वदोषो न विद्यते ॥"
इति तिथ्यादितत्त्वधृतकालिकापुराणवचनम् ।

यथासुखीन, त्रि (यथासुख + "यथामुखसंमुखस्य दर्शनः खः ।" ५ । २ । ६ । इति खः ।) सुखप्रतिबिम्बाश्रयः । मुखस्य सदृशं यथामुखं प्रतिबिम्बं निमित्तत्वात् सादृश्येऽव्ययीभावः । यथामुखं दर्शनः यथामुखीनः । इति सिद्धान्तकौमुदी । अपि च ।
"ततोऽभीयमाणोऽसौ हेमरत्नमयो मृगः ।
यथामुखीनः सीताया: पुप्लुवे बहु लोभयन् ॥"
इति भट्टिः ।
मुखस्य सदृशं यथामुखं दर्पणादिस्थप्रतिबिम्बं तत्पश्यति । सादृश्येऽव्ययीभावः । इति भरतः । निर्म्मलत्वात् सीतायाः अयतो यथामुखीनः प्रतिबिम्बाश्रय इव भूत्वा पुप्लुवे भ्रमति स्म इव अन्यकोमो दर्शकः । इति जयमङ्गलः ।

यथायथ व क्ली, ("यथास्वे यथायथम् ।" ८ । १ । १४ । योऽयमात्मा यथात्मीयं तद्यथायथम् । तस्मिन् यथाप्रत्यक्षं द्विरुक्तं क्लीवत्वं च निपात्यते । यथायथं यावा यथास्वभावमित्यर्थः यथात्मीयमितिवेति । इति सिद्धान्तकौमुदी ।) यथास्वम् । इत्यमरः । ३ । ४ । १५ । (यथारूपम् । यथा श्रीमद्भागवते । १ । १८ । १९ ।
"तथोपाकूय गोपालान् तत्र प्राह विहारवित् ।
हे गोपा, विहरिष्यामो द्वन्द्वीभूय यथायथम् ॥"
"यथायथं यथोद्देशादनुरूपम् ।" इति तट्टीकायां श्रीधरस्वामी । यथा च,—
"विद्वमयत्नमस्वत्वात् व्याधीनां तद्यथायथम् ॥"
इति वाग्भटे निदानस्थाने प्रथमेऽध्याये ।
"यथायथ यस्य व्याधेस्तदप सदेवायत्तम् ।"
इति तट्टीकायां विजयरक्षितः ।)

यथार्थं व, क्ली, यथातथम् । इत्यमरः । ३ । ४ । १५ । 'ई अव्यभिचारिणि । अर्थमनतिक्रान्तं यथार्थं यथास्वरूपं यथातथं उभयत्र अव्ययीभावः । यथार्थमेवेदम् । यथातथं वक्ति सभासु विद्वान् ।"
इति भरतः । तत्पर्य्यायः ।
"सत्यं सम्यक् समीचीनमृतं तथ्यं यथातथम् ।
यथास्थितश्च सद्भूतेऽलीके तु वितथानृते ॥"
इति हेमचन्द्रः ।
(यथा, महाभारते । १३ । ६ । १८ ।
"तत्त्वापन्नं किञ्चित् सति कर्म्मणि सिध्यति ।
सुकृतं दुष्कृतं कर्म्म न यथार्थं प्रपद्यते ॥")

यथार्हं, व, क्ली, (अर्हं योग्यमनतिक्रम्य इत्यव्ययीभावः ।) यथायोग्यम् । यथा —
"कृत्वा तु तौ यथान्यायं यथार्हेणैव संविदम् ।
उपविष्टौ कथाः काश्चिच्चक्रतुर्म्मिथिपार्थिवौ ॥"
इति रवीभारतम् ।

यथार्हवर्ण, पुं (यथार्हं यथायोग्यं वर्णयतीति । वर्ण + अण् ।) चरः । इत्यमरः । २ । ८ । १२ ।
यथायोग्यमधुर इत्यं ज्ञातिकः ।

यथाशक्ति, व क्ली शक्त्यनुसारेण । शक्तिमनतिक्रम्य । इति मुग्धबोधव्याकरणम् । (यथा, श्रीमद्भागवते । ६ । १२ । १६ ।
"यज मां विविधैर्यज्ञैः इन्द्रायुधभुव कवे ।
घटमानं यथाशक्ति तव प्राणिहर्षीणां ॥")

यथाशास्त्र व, क्ली, शास्त्रानुसारेण । शास्त्रमनतिक्रम्य । यथा, मलमासतत्त्वे ।
"यथाशास्त्रञ्च निर्णीतो यथाव्याधि चिकित्सितः ।
न शम याति यो व्याधिः स ज्ञेयः कर्म्मजो बुधैः ॥"

यथास्थितं, त्रि, सत्यम् । इति हेमचन्द्रः । ३ । १ । ७८ ।

यथास्व, व, क्ली (स्वमनतिक्रम्येत्यव्ययीभावः ।) यथायथम् । इत्यमरः । (यथा, सुश्रुते चिकित्सास्थाने ८ अध्याये ।
"अन्य ततोऽङ्कुरन्नात परिषेकश्च दर्पिता ।
तृतीये दिवसे मुक्ता यथास्वं शोधयेद्व्रणम् ॥")

यथेप्सितं व क्ली, (ईप्सितमनतिक्रम्येति ।) यथावाञ्छितम् । (यथा, भट्टिकाव्ये । २ । २८ ।
"तान् प्रयत्नादीक्ष्य राघवोऽपि
यथेप्सितं प्रस्तुतकर्म्म धर्म्म्यम् ।
तपो महद्भिर्भवतां प्रतापि
संरक्ष्यतां गोऽरिसमिन्धनेषु ॥")
तत्पर्य्यायः । कामम् २ प्रकामम् ३ पर्य्याप्तम् ४ निकामम् ५ इष्टम् ६ । इत्यमरः । ३ । ४ । १७ ।
अट इष्टानतिक्रमे स्वच्छन्दप्रवृत्तौ कामादीनि प्रायः क्रियाविशेषणानि क्रियाविशेषणत्वात् क्लीवत्वमेषाम् । ईप्सितस्यानतिक्रमो यथेप्सितमित्यव्ययीभावः । इति भरतः ।

यथेष्टं, व, क्ली इष्टमनतिक्रम्य । यथेप्सितम् । यथा —
"कुर्य्युर्यथेष्टं तत् सर्व्वमीशास्ते स्वधनस्य वै ॥"
इति दायभागः ।

यथेष्टचारी, [न्] पुं, (यथेष्टं चरतीति । चर + णिनि ।) पक्षी । इति शब्दचन्द्रिका ।

यथेष्टाचरण, त्रि, (यथेष्टं आचरणं यस्य ।) यथेष्टाचारी । यथा,—
"क्रियाहीनस्य मूर्खस्य महारोगिण एव च ।
यथेष्टाचरणस्याहुर्मरणान्तमशौचकम् ॥"
यथेष्टाचरणस्य पूर्त्तवेष्टाद्यकर्तुः । इति शुद्धितत्त्वम् ।

यथेष्टाचारी [न्] पुं, स्वेच्छाचारी । यथेष्टमाचरितुं शीलमस्य इत्यर्थे इष्टप्रत्ययेन निष्पन्नः ।

यथोचितं, व, क्ली, (उचितमनतिक्रम्येति ।) यथायोग्यम् । यथाप्राप्तम् । यथा । "भेजे धर्म्मो यथोचितात् ।" इत्यमरः । २ । ८ । २१ । (यथा च श्रीमद्भागवते । ४ । २९ । ५ ।
"कर्म्माणि च यथाकालं यथादेशं यथाबलम् ।
यथोचितं यथावित्तमकरोद्ब्रह्मसात्कृतम् ॥"
त्रि, यथोचितमस्यास्तीति । अर्श आद्यच् । यथार्हः । यथा मार्कण्डेये । १६ । १८ ।
"दयमाम्यापिता सम्यक्सभाजैर्यथोचितैः ।
इच्छा तानमुपक्षोभी मद्यांसु मृगादिविहाये ॥")

यथोदित, त्रि, (उदितं कथितमनतिक्रम्य इत्यव्ययीभावः।) यथोक्तम्। यथा,—
"यथोदितान्ते पितृभिः कुरु दारपरिग्रहम्।"
इति मार्कण्डेयपुराणे रुचिस्तोत्रम्॥

यदा, अ, (यस्मिन् काले इति। यद्+"सर्वैकान्यकियत्तदः काले दा।" ५।३।१५। इति दा।) यस्मिन् काले। यथा,—
"यदा यदा सतां हानिर्वेदमार्गानुसारिणाम्।
तदा तदा कलेर्वृद्धिरनुमेया विचक्षणैः॥"
इति तिथ्यादितत्त्वधृतवचनम्॥

यदि, अ, पक्षान्तरम्। सम्भावना। तत्पर्यायः। चेत् २ यद्यपि ३। यथा,—
"यद्येकस्मिन्विपुलान् भोगान् चन्द्रसूर्यग्रहोपमान्।
प्रातःस्नायी भवेन्नित्यं द्वौ माघौ माघफाल्गुनौ॥"
इति मलमासतत्त्वम्॥
"अपि चेत् सुदुराचारो भजते मामनन्यभाक्।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः॥"
इति श्रीभगवद्गीता॥
"यद्यप्यल्पतरसम्भारः स्यात्तदपि यज्ञेनैव कुर्यात् इति। यद्यपीति निपातसमुदायो यद्यर्थे।" इति तिथ्यादितत्त्वम्॥

यदीय, त्रि, (यस्येदमिति। यद्+"वृद्धाच्छः।" ४।२।११४। इति छः।) यत्सम्बन्धि। यथा
"यदीयहलतो विलोक्य विपदं
कलिन्दतनया यशोहृतगतिः।
विलासविपिनं विवेश सहसा
करोतु कुशलं हली स जगताम्॥"
इति छन्दोमञ्जर्यां द्वितीयस्तवकः॥

यदुः, पुं, (यजतीति। यज+उः। पृषोदरादित्वात् जस्थाने दकारः।) देवयान्यां जातो ययातेर्ज्येष्ठपुत्रः। तस्य वंशे पितृशापात् राजा चक्रवर्त्ती नासीत्। तद्वंशे द्वापरयुगस्यान्ते श्रीकृष्णोऽवतीर्णः। इति श्रीभागवतमतम्॥
तस्य मातुलकन्याविवाहकारणं यथा,—
"जरां प्राप्य ययातिस्तु स्वपुरं प्राप्य चैव हि।
पुत्रं ज्येष्ठं वरिष्ठञ्च यदुमित्यब्रवीदिदम्॥
त्वं यदो! प्रतिपद्यस्व पाप्मानं जरया सह।
यौवनेन त्वदीयेन चरेयं विषयानहम्॥
पूर्णे वर्षसहस्रे तु पुनस्ते यौवनं त्वहम्।
दत्त्वा स्वं प्रतिपत्स्यामि पाप्मानं जरया सह॥
यदुरुवाच।
सितश्मश्रुधरो दीनो जरया शिथिलीकृतः।
वलीसन्ततगात्रश्च दुर्दर्शो दुर्बलः कृशः॥
अशक्तः कार्यकरणे परिभूतश्च यौवनैः।
सहोपजीविभिश्चैव तां जरां नैव कामये॥
सन्ति ते बहवः पुत्रा मत्तः प्रियतरा नृप!।
जरां ग्रहीतुं धर्मज्ञ! पुत्रमन्यं वृणीष्व वै॥
ययातिरुवाच।
यो मे त्वं हृदयाज्जातो वयः स्वं न प्रयच्छसि।
पापाज्जातुकमस्मात् प्रजा वै ते भविष्यति॥"
इति मात्स्ये ३१ अध्यायः॥ * ॥
(वसुदेवात्मजः। यथा, हरिवंशे। ८९।१२।
"तस्यैव सुमहत्तस्य पुत्रकामस्य धीमतः।
मधुमत्यां सुतो जज्ञे यदुर्नाम महायशाः॥")

यदुनाथः, पुं, (यदूनां नाथः।) श्रीकृष्णः। इति हेमचन्द्रः। २।१३३॥

यदुपतिः, पुं, (यदूनां पतिः।) श्रीकृष्णः। यथा—
"यदुपतिः क्व गतो मथुरापुरी
रघुपतिः क्व गतोत्तरकोशलाम्।
इति विचिन्त्य कुरुष्व मनः स्थिरं
न सदिदं जगदित्यवधारय॥"
इति रूपसनातनगोस्वामिनौ॥

यदृच्छा, स्त्री, स्वातन्त्र्यम्। तत्पर्यायः। स्वैरिता २। इत्यमरः। ३।२।१। स्वैरिता ३। इति तट्टीका॥ (यथा गीतायाम्। २।३२।
"यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम्।
सुखिनः क्षत्रियाः पार्थ! लभन्ते युद्धमीदृशम्॥")

यद्यपि, अ, यदि। यथा। "यद्यप्यल्पतरसम्भारः स्यात्तदपि यज्ञेनैव कुर्यात्। यद्यपीति निपातसमुदायो यद्यर्थे। अपि च। यद्यपि उभयं चिकीर्षेन्नैव प्रक्षाल्य इति तेनैव कल्पेन क्षमसुतरामन्नं मोदकं क्षमकं दधि वा प्रक्षाप्य निधाय तेनैव प्रक्षाल्यान्यदद्यात्।" इति तिथ्यादितत्त्वम्॥

यद्वा, स्त्री बुद्धिः। इति सङ्क्षिप्तसारोणादिवृत्तिः॥ पक्षान्तरञ्च॥

यन्ता, [ऋ] पुं (यम्+तृच्।) सारथिः। (यथा, रघौ। ७।४१।
"प्रहारमूर्च्छापगमे रथस्था
यन्तॄनुपालभ्य निवर्तिताश्वान्।
यैः सादिता लक्षितपूर्वकेतून्
तानेव सामर्षतया निजघ्नुः॥)
हस्तिपकः। इत्यमरः। ३।३।५८॥ (यथा माघे। ५।४२।
"सिक्तोऽपि सानुमयमाकलनाय यन्त्रा
नीतेन वन्यकरिदानकृताधिवासः।
नाभाजि केवलमभाजि गजेन शाखी
नान्यस्य गन्धमपि मानभृतः सहन्ते॥")
विरतिकारके, त्रि॥

यन्त्रं, क्ली, (यन्त्र्यतेऽनेनेति। यम+"गुधृवीपचिवचियमिसदिक्षदिभ्यस्त्रः।" उणा ४।१६७। इति त्रः।) देवाद्यधिष्ठानम्। (यथा देवीभागवते। ३।२६।२१।
"अर्चाभावे तथा यन्त्रं नवार्णमन्त्रसंयुतम्।
स्थापयेत् पीठपूजार्थं कलशं तत्र चापरम्॥")
पात्रविशेषः। नियन्त्रणम्। इति हेमचन्द्रः॥ अधियन्त्रम्। इति महाभारतटीकायां नीलकण्ठः। बालान् यन्त्रक इत्यादि भाषा॥ * ॥ कारणम्। यथा —
"यन्त्रस्य गुणदोषौ न विचार्यौ मनुष्यवत्।
अहं यन्त्रं भवान् यन्त्री न मे दोषा न मे गुणाः॥"
इति महाभारतम्॥
दारुयन्त्रादि। कल इति भाषा। यथा —
"ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन! तिष्ठति।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया॥"
इति श्रीभगवद्गीतायाम्। १८। ६१।
अस्यार्थः। "सर्वभूतानां हृद्देशे ईश्वरोऽन्तर्यामी तिष्ठति। किं कुर्वन् सर्वाणि भूतानि मायया निजशक्त्या भ्रामयंस्तत्तत्कर्मसु प्रवर्त्तयन् यथा दारुयन्त्रमारूढानि कृत्रिमाणि भूतानि सूत्रधारो लोके भ्रामयति तद्वदिति। यद्वा यन्त्राणि शरीराणि आरूढानि भूतानि देहाभिमानिनो जीवान् भ्रामयन्निव।" इति श्रीधरस्वामी॥
अथ पूजाधारयन्त्रम्। तत्र नारदीये।
"आपोऽग्निर्हृदयं चक्र विष्णोश्चैवसुद्वयम्।
यन्त्रञ्च प्रतिमास्थानमर्च्चने सर्वदा हरेः॥"
गौतमीये।
"शालग्रामे मणौ यन्त्रे प्रतिमामण्डलेषु च।
नित्यं पूजा हरेः कार्या न तु केवलभूतले॥"
योगिनीतन्त्रे।
"लिङ्गस्थां पूजयेद्देवीं पुस्तकस्थां तथैव च।
मण्डलस्थां महामायां यन्त्रस्थां प्रतिमासु च।
जलस्थां वा शिलास्थां वा पूजयेत् परमेश्वरीम्॥"
एतत् कर्म यन्त्राभावे। कौलावलीये।
"अथापराजितापुष्पं जवापुष्पञ्च विद्यते।
करवीरं शुक्लरक्तं द्रोणं वा यत्र तिष्ठति।
तत्र देवी वसेन्नित्यं तद्यन्त्रं चक्रिकार्चनम्॥"
एतत् यन्त्रयन्त्राभावे। तथा च।
"यन्त्रं मन्त्रमयं प्रोक्तं मन्त्रात्मा देवतैव हि।
देहात्मनोर्यथा भेदो यन्त्रदेवतयोस्तथा॥"
तथा।
"आदौ निखिदयन्त्रराजं देवतायाश्च निग्रहम्।
कामक्रोधादिदोषोत्थसर्वदुःखनियन्त्रणात्।
यन्त्रमित्याहुरेतस्मिन् देवः प्रीणाति पूजितः।
विना यन्त्रेण पूजायां देवता न प्रसीदति।
दुःखनिर्यन्त्रणाद्यन्त्रमित्याहुस्तत्त्ववेदिनः॥"
इति यन्त्रपूजाप्राधान्यम्॥ * ॥
अथ नानायन्त्राणि। तत्रादौ सर्वेश्वरीयन्त्रम्। शारदायाम्।
"आविश्यार्दाविमत्तानुन्यस्त मायादिकं
चापरं
कोष्ठिमध्यमभूत् परेत विनिर्खेददावमत्कद्वयम्।
अथपूजापरवेटकयुत कपवरान् कोमाय
वामगे
आविस्रेन्द्रनाधिपादिगुणम् पक्षिदयान्तम्
परम्।
कोष्ठिमध्युमाकमामघविनी शुमखरान्तमन्ता
मार्णं नैमरमां दवेत् विविक्तेमार्णं वियत्त्रि-
क्रमात्।
नि पामाकुष्टदैटिन्तच विविभिर्लीतं क्रमाद्-
युग्मकात्
षट्स्वेव षटेन षड्वसुमेनावेदिन तद्वहिः॥"
षटामयमिदं यन्त्र मणिना कीर्त्तितं महत्।
प्राग्मीयत्रिकल्पकामप्रभोन्दिराङ्कुशः।
प्रथमोऽदायरो मन्त्रस्य वामिनि रक्षिणि।
स्वाहान्तोऽदायरः वहिरयर म"रक्षोर्लिङ्गः।

यन्त्रं

ह्रीं गौरि रुद्रदयिते योगेश्वरि हुम्फट ।
द्विठान्त षोडशार्णोऽयं मन्त्र चक्रिवदीरित ॥”
इति घटार्गलयन्त्रम् ॥०॥
“तारं हुं विलिखेत् धरीजकुहरे साध्याभिधानान्वितं
मन्त्राणान् वसुपत्रकाम् मनुदलेष्वालिख्य तद्बाह्यत ।
मायया त्रिः परिवेष्टितं घटगतं यन्त्रमस्त्र मन्त्र
यन्त्र मन्त्रकरं मदादिभयहृत्सम्मोहनं कीर्तिदम् ।”
इति अरितायन्त्रम् । ० ।
“षट् भानुदलान्वितं प्रविलिखेत् सत्कर्णिकायां पुनः
तारं शक्तिगबीजसाध्यसहितं तद्बीजरेखं क्रमात् ।
अदिग्यासयुतमभयान् युगलशो वर्णान् पुनः पत्रगान्
मन्त्राणान् युगशो विधाय विलिखेदन्त्य सन्त्यं दले ।”
मन्त्रस्तु । [ललितम् ।
“उत्तिष्ठ पुरुषि किं स्वपिषि भयं मे समुप
यदि शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा ।
गाङ्कार्णेन समीरं भूपुरद्वयमध्यगाम् ।
यन्त्रं विन्ध्यवासिन्या प्रोक्तं सर्वसमृद्धिदम् ।
रत्नाकर विशेषेण पुत्रभूम्यादिकारणम् ।
राज्यद भ्रष्टराज्यानां यशस्व यशमिच्छताम् ।
सुताधिनीनां सुतदं रोगिणां रोगशान्तिदम् ।
बहुना किमिहोक्तेन यन्त्रं यत् कामदा मयि ॥”
इति यन्दुर्गायन्त्रम् ॥०॥
अथ लक्ष्मीयन्त्रम् ।
“षेगाभिलिखितसाध्यनाममनुगाश्री श्रीशक्तिमारान्वितं
किञ्जल्केषु दिनेशपत्रविलसत्मन्त्राक्षरं तद्बहिः ।
यन्त्र अष्टदलेऽष्ट वर्णलसत्वासयुग्मं धरा-
बिम्बाभ्यां वनकृत्रया लसितया यन्त्र लिखेद्वेष्टितम् ।
भूपुरद्वयकोणेषु स्रष्टौ लेख्यौ पुनः पुनः ।
महालक्ष्मीयन्त्रमिदं सर्वैश्वर्यफलप्रदम् ।
अपरं स्तम्भनं सम्यगापद्विनिवारणम् ।
बहुना किमिहोक्तेन परमसाम विद्यते ॥”०।
अथ त्रिपुरभैरवीयन्त्रम् । [लिखो
“मध्यार्द्धं नवयोनिषु प्रविलिखेन्नैर्ऋतानि वर्णा
गायत्रा पुनरष्टपत्रविवरेष्वालिख्य लिप्या वृतम् ।
भूबिम्बद्वितयेन मन्त्रयुगा कोणेषु संवेष्टितं
यन्त्र त्रैपुरमीरितं त्रिभुवनसंक्षोभक श्रीप्रदम् ।’
गायत्री तु ।
“सम्पदं त्रिपुरादेवि विद्महे कामेश्वरि ।
उक्ता कामेश्वरि धीमहि ।
बम्भ्रम्यं प्रवदेत् भूवलय क्लिन्ने प्रचोदयात् ।
मायस्तथा समाख्याता त्रैपुरी सर्वसिद्धिदा ।”
यन्त्रान्तरम् ।
“षट्‌कोणद्वयमान्तरत्नमदने मायां लिखेद्वाग्भवं
षट्कोणेष्वथ सन्धिषु प्रविलिखेत् हुं स्वार मायावृतम् ।
खौवीजेन समीरितं त्रिभुवनप्रक्षोभक त्रैपुर
यन्त्र पञ्चमनोभवाख्यकमिदं सौन्दर्यसम्पत्करम् ।”
इति त्रिपुरायन्त्रम् ॥०॥
अथ श्रीविद्यायन्त्रम् ।
“विशेष धारणं यन्त्रं प्रपञ्चात् कथयामि ते ।
रेफद्वयान्तयोर्मध्ये द्वयोर्नामाभिधालकम् ।
साध्यनाम द्वितीयान्तं तयोर्हि विलिखेत् सदम् ।
तथैव मातृका सर्वां विलिखेच्चक्रवालवत् ।
पञ्चगव्याप्लुतेनैव मन्त्रेण परिवेष्टयेत् ॥
तत्र प्राण प्रतिष्ठाप्य विद्यामष्टोत्तर शतम् ।
सम्पूज्य प्रणवेनास देवीध्यानपरायण ।
द्विजो मध्यगतं कृत्वा रक्तसूत्रेण वा पुन ।
करे धृत्वा समाश्लिष्य हृदये च्यौष सञ्जपम् ।
कण्ठे धन लभेद्वामे स्वभाव सम्पर्णं भवेत् ।
शिखायां मोक्षमाप्नोति तस्माद्यत्नेन धार-
येत् ।”०।
अथ गणेशयन्त्रम् ।
“बीजं षट्कोणमध्ये स्फुरन्मन्त्रपुरे तारगं दिक्षु लक्ष्मी
मायाकन्दर्पभूमीस्वरद्वयपुटैस्त्वालिखेद्बीज षट्कम् ।
तद्बहिर्बिम्बपद्ममस्तान् मनुदलकमथो मूलमन्त्रस्य वर्णान्
शिष्टान् पत्रेषु विद्वान् विलिखतु युगशश्चान्त्य मन्त्रं दलाग्रे ।
ध्यायेत् विधिभि क्रमोत्क्रमवशात् मायाकुलाभ्यामपि
भूबिम्बद्वितयेन वेष्टितमिदं यन्त्रं गणाधीशितु ।
साधाङ्कुङ्कुमरोचनाक्षगमनै भूर्जोदरे वेष्टितं वा
संलिख्याभिबध्नन् क्षमेत सकलं सम्पादनीयाभिधम् ।
उक्तं महागणपतेर्विधानं सुरपूजितम् ।
सर्वसिद्धिकरं पुंसां समस्तपुरुषार्थदम् ।”०।
अथ श्रीरामयन्त्रम् ।
“तारं मध्ये विलिखतु मनुं षट्सु कोणेषु सन्धि-
ष्वङ्ग मायां स्मरमपि लिखेत् कोणमध्येषु पश्चात् ।
किञ्जल्केषु स्वरगणमथो पत्रमध्येषु माला-
मन्त्रस्यार्णान् युगशमितान् पत्रमत्र पश्चात् ।
दमाद्यदेव सवदा कादिषड्भेव भूपुरे ।
दिग्विदिक्षु लिखेद्बीजं नरसिंहवराहयोः ।
नमो भगवते रामाय रघुनन्दनम् ।
रक्षोघ्नविशदायाग्ने मधुरादि समारयेत् ।
प्रसन्नवदनायेति पश्चादमिततेजसे ।
बलाय पश्चाद्रामाय विष्णवे सदनन्तरम् ।
प्रणवादिनमोऽन्तोऽयं मालामन्त्र प्रकीर्तित ॥”

अथ नृसिंहयन्त्रम् ।
“बीजं साध्ययमन्वित प्रविलिखेत् कर्णेऽष्टपत्रेन्वयो
गत्वाशान् श्रुतिशो विभज्य विलिखेल्लिप्या बहिर्वेष्टयेत् ।
बाह्ये कोणगबीजवह्निवसुधाबीजद्वयेनाश्रितं
यन्त्र क्षुद्रविषग्रहामयरिपुप्रध्वंसनं श्रीप्रदम् ।”०।
अथ गोपालयन्त्रम् । [वह्न्यं
“पिष्ट मूलेन बीज दहनपुरयुगे कोणराजत्
कर्णात् पद्म दशाक्षस्तुतिदलमथ कामबीजेन बीतम् ।
पद्म किञ्जल्कसंस्थस्वरविलसितदलश्रीमनुं
बीजमार्णं
किञ्जल्कपद्मवाह्य विलसितमनुरक्षेभिताभद
मवात् ।
मायाङ्कुशाभ्यामावीत चौवीपुरयुगाश्रितम् ।
अष्टाचरैव लसितं मन्त्र गोपालदैवतम् ।
धर्मार्थकामफलदं सर्वरक्षाकरं स्तुतम् ।
पद्माक्षको वराक्षौ मनुबिन्दुविभूषित ।
विकटीजमिदं प्रोक्तं सर्वसिद्धिकरं परम् ।
हारं ह्यायाय तदन्तं यशुर्ना मनुरीरित ।
गोपीजनान्ते प्रदद्यात् वल्लभायाग्निवल्लभा ।
अथ दशाक्षरो मन्त्रो इत्यष्टदशाक्षर ।
प्रथमं हृदय हत्य देवकपुत्र तत परम् ।
ताहश देवकीपुत्र हुं षट्स्वाहासमन्वितम् ।
षोडशाक्षरमन्त्रोऽयं गोविन्दस्य महात्मनः ।
पिष्ट इतिपदैश्चौर्णं नमो भगवते सत ।
नन्दपुत्राय बालादिवपुषे श्यामलाय च ।
गोपीजनपदस्यान्ते वल्लभाय द्विठावधि ।
अनुष्टुप् मन्त्र व्याख्यातो गोपालस्य महात्मने ।
अनङ्ग श्यामगोविन्दौ द्वेष्यावशावरो मनु ।”
इति गोपालयन्त्रम् । ० ।
अथ गोपालस्य यन्त्रान्तरम् ।
“प्राक् प्रथक दशिकोदक विविधदभिविलिखेत्
स्मरसाध्ययुक्त
कोणोदयार्कपुक्त मलयुगयुगं मध्यपूर्वं
तन्नाम् ।
षोडशाथान् पुरस्तान्मनुदलविवरेष्वर्घ
लिखित्वा
तद्बाह्ये द्वादशार्णैः स्वरमपरिवृतं दशकोणस्थ
यन्त्रम् ।
सं सुतो देव देवेन स वेदे यदतो वनम् ।
स यतो स्तुतो ख्यातं सं स्यातो देवकीसुतम् ।
लिखित भूर्जपत्रादौ यन्त्रमेतद्यथाविधि ।
बिभृत बाहुना नित्य सर्वकामफलप्रदम् ।
यद्यप्यष्टपत्रके लिखितं साधु साधितम् ।
गोप्यानि विलसेद्देवत् अथो हरिभवेत् सदा ।”०।
अथ शिवयन्त्रम् । तथादौ षट्कोणमष्ट
कृत्वा तदन्त साध्यनामयुक्त प्रासादबीजं
विलिख्य षट्कोणेषु प्रणवपुटितपञ्चाक्षराणि
विलिख्य विवरेषु षडङ्गमन्त्रान् तद्बहि अष्ट
दलानि विरचय्य तद्गेषु ॐ ईशानाय नमः
ॐ तत्पुरुषाय नमः ॐ अघोराय नमः

ॐ सद्योजाताय नमः ॐ वामदेवाय नमः ।
इति पञ्चमन्त्रान् प्रागादिक्रमेण लिखेत् । तद्बहिरष्टदलानि दर्शयित्वा तद्दलेषु मातृकावर्णान् लिखेत् । तद्बहिर्वृत्तं भ्रमकेण वेष्टयेत् । एतद्यन्त्रं जपहोमादिना सम्पूज्य धारयेत् । आयुरारोग्यैश्वर्यादिसिद्धिर्भवति ॥ ● ॥ अथ मृत्युञ्जयस्य यन्त्रम् ।
"मध्ये साध्याक्षराढ्यं भुवनमभिविलिखेत्साध्यमं दिग्दलेषु
कोणेष्वन्त्यं मनोज्ञत् त्रितिभुवनमथो दिक्षु चन्द्रं विदिक्षु ।
टान्तं यन्त्रं तदुक्तं सकलभयहरं चैकभूताभयघ्नं
व्याधिव्यामोहदुःखप्रशमनमुदितं श्रीप्रदं कीर्त्तिदायि ।" ● ।
अथ कालीयन्त्रम् । यामले ।
"आदौ बीजं समाप्य प्रथमवसुपदे तदवि चाष्टकोणे
पूर्वाद्यं चाष्टबीजं वरतु वसुदलद्वन्द्वके बीजषट्कम् ।
विन्यस्य तत् स्वराढ्यं वसुदलविवरे मायया बीजषट्क
कूर्चाभ्यामेव बीजं चितिमयचतुर्युग्मयोरन्तरे यक्षराणम् ।
देवीबीजद्वयं तत् प्रतिदिशमपरं शक्तिबीजद्वयं तत्
कोणे कोणे लिखेद्यन्त्रमिति च शुभं प्रभुरस्यापि विष्णोः ।"
अथ शालिकादौ ताराधारणयन्त्रम् । तदुक्तं पितृकारिके ।
"योनियुग्मे लिखेन्मन्त्री हेमशलाकया ।
बीजहीनान् दीर्घवर्णान् षट्कोणे विलिखेत्ततः ।
अष्टपत्रेष्वष्टवर्णान् तद्बहिर्भूपुरद्वयम् ।
अथवा भूर्जे च विलिख्य साधकोत्तम ।
स्वर्णपट्टे भूर्जे वा रूप्ये चाथवा शुभे ।
विलिखेद्द्विमलैरन्या गन्धाष्टकसमन्वितम् ।
दूर्वाकाण्डेन वा लेख्यं कुशमूलेन वा पुनः ॥"
एकवीराकल्पे ।
"वेष्टितं पीतवस्त्रेण जतुना परिवेष्टयेत् ।
धारयेत् पट्टसूत्रेण त्रिसूत्रं कण्ठभूषणम् ।
स्त्रीणां वामभुजे चैव मन्येषां दक्षिणे भुजे ।
वन्ध्यापि लभते पुत्रं निर्धनो धनवान् भवेत् ।
दश दशा पुरा बध्वा ब्रह्मायैं गौतमादिभिः ।
भौमर्षे पार्थिवैश्चान्यैः सम्पत्ते जयकाङ्क्षिभिः ॥"
अथ प्रयोगः । योनियुग्मे षट्कोणे । तत्र मध्ये हेमशलाकादिना भूर्जपत्रादौ कुङ्कुमरोचनारक्तचन्दनजटामांसीभिः समाहृतं विधाय पञ्चक्तिक्रमेण मन्त्रमुक्तं लिखित्वा तत्र दृष्ट्यारेण मध्ये अमुकस्य दशां कुरु कुरु अमुकीं शुभपुत्रमुत्पादयेति वा अमुं मां कुरु कुरु इत्यादि वा साध्यसहितं लिखित्वा षट्कोणे बीजहीनान् दीर्घवर्णान् आ ई ऊ ऐ औ अः इत्येकैकं लिखेत् । तदुक्तम् ।
"स्वराणां मध्यगं यच्च तच्चतुष्कं नपुंसकमिति ।"
अष्टपत्रेष्वष्टवर्णान् । ऐ ह्रीं ॐ ऐ ह्रीं फट् स्वाहेति लिखेत् । तदुक्तम् ।
"वाग्भवं कामदेवीञ्च तारकं वाग्भवं तथा ।
लज्जा चाद्यमन्त्राणि वह्निजायावधिमनुः ।
अष्टाक्षरी मनुः प्रोक्तो मन्त्राणां सार ईरितः ।"
अथ यन्त्रलिखनद्रव्यम् ।
"काश्मीररोचनालाक्षागौरमदचन्दनैः ।
विलिखेद्द्विमलैरन्या यन्त्राण्येतानि देशिकः ।
भूमिपृष्ठे ग्रन्थपृष्ठे यन्त्रं निर्माल्यवर्जितम् ।
शिरोभिः सहितं मन्त्री यन्त्रमेव च धारयेत् ।
सौवर्णे राजते ताम्रे भूर्जे वा सम्यगालिखेत् ।
अथवा ताम्रपट्टे वा गुटिकां कृत्य धारयेत् ।
यावज्जीवं सुवर्णं स्यात् रौप्यं विंशतिवार्षिकम् ।
भूर्जे द्वादश वर्षाणि वदन्ति ताम्रपट्टके ।"
इति तन्त्रसारः ॥ ● ॥
अन्यत् कालिकापुराणे ७०।७५।७८ अध्यायेषु द्रष्टव्यम् ॥ ● ॥ अथ यन्त्रसंस्कारः । यामले अत्रतन्त्रे ।
"स्नात्वा संकल्पयेन्मन्त्री गुरोरर्चनमाचरेत् ।
पञ्चगव्यं ततः कृत्वा शिवमन्त्रेण मन्त्रितम् ।
तत्र यन्त्रं क्षिपेन्मन्त्री प्रणवेन समाकुलम् ।
तदुद्धृत्य ततो यन्त्रं स्थापयेत् स्वर्णपात्रके ।
पञ्चामृतेन दुग्धेन शीतलेन जलेन च ।
चन्दनेन सुगन्धेन कस्तूरीकुङ्कुमेन च ।
पयोदधिघृतक्षौद्रशर्कराद्यैरनुक्रमात् ।
तीर्थपात्रान्तरे कुर्य्यात् पञ्चामृतविधिं बुधः ।
घाटके कलशैर्दिव्यैर्मदभिर्वारिपूरितैः ।
कषायजलसम्पन्नैः कारयेत् स्नानमुत्तमम् ।
स्नानं समाप्य तां देवीं स्थापयेत् स्वर्णपीठके ।
यन्त्रराजाय विद्महे महायन्त्राय धीमहि तन्नो यन्त्रं प्रचोदयात् ।
स्पृष्ट्वा यन्त्रं कुशाग्रेण गायत्र्या चाभिमन्त्रयेत् ।
अष्टोत्तरशतं देवि । देवताभावसिद्धये ।
प्राणप्रतिष्ठां ततः कृत्वा यन्त्रे देवतां यजेत् ।
तत्रावाह्य महादेवीं जीवन्यासञ्च कारयेत् ।
उपचारैः षोडशभिर्मांसमद्यादिभिः सदा ।
पञ्चतत्त्वसमायुक्तैर्देवीं तत्र समर्चयेत् ।
षडङ्गादिकं दद्यात् यथाकुलाचारमेव च ।
अगुरु चामरं छत्रं यथायोग्यं महेश्वरि ।
सर्व्वमेतत् प्रयत्नेन दद्यान्मन्त्रविद्वरः ।
ततो जपेत् सहस्रञ्च मन्त्रसिद्धिविवृद्धये ।
दक्षिणां तत्र दत्त्वा प्रणमेद्यन्त्रराजकम् ।
अष्टोत्तरशतं हुत्वा सम्पातास्य विनिःक्षिपेत् ।
होमकर्मण्यशक्तश्चेत् द्विगुणं जपमाचरेत् ।
धेनुमेकां समानीय स्वर्णमुद्रादलङ्कृताम् ।
गुरवे दक्षिणां दद्यात् ततो देव्या विसर्जनम् ।"
अस्य प्रयोगः । स्नातनित्यक्रियः स्वस्तिवाचनपूर्व्वकं सङ्कल्पं कुर्य्यात् । अद्येत्यादि अमुकगोत्रः श्रीअमुकदेवशर्म्मा अमुकदेवतायाः प्रीत्यर्थं अमुकयन्त्रसंस्कारमहं करिष्ये । इति संकल्प्य पञ्चगव्यमानीय ह्रौमिति मन्त्रेणाष्टोत्तरशतं अभिमन्त्र्य प्रणवेन यन्त्रं तत्र क्षिपेत् । तत उत्तोल्य स्थापयेत् । ततः शीतलजलचन्दनगन्धकस्तूरीकुङ्कुमैः स्नापयित्वा पञ्चगव्यमानीय ह्रौमिति मन्त्रेणाष्टोत्तरशतमभिमन्त्र्य प्रणवेन पूर्व्ववत् शोधयित्वा स्नापयेत् । तत्र क्रमः । प्रथमं क्षीरेण स्नापयित्वा धूपं दद्यात् । एवं दध्ना घृतेन मधुना शर्करया च । ततोऽष्टभिः कलशैः कुङ्कुमगोरोचनाचन्दनमिश्रितैस्तोयैः स्नापयेत् । सर्व्वत्र प्रणवमन्त्रेण ततो यन्त्रमुत्तोल्य कुशाग्रेण तत् स्पृष्ट्वा यन्त्रराजाय विद्महे महायन्त्राय धीमहि तन्नो यन्त्रं प्रचोदयात् । इत्यष्टोत्तरशतमभिमन्त्र्य प्राणप्रतिष्ठां कुर्य्यात् । अस्य प्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुःसामानि छन्दांसि चैतन्यं देवता प्राणप्रतिष्ठायां विनियोगः । तद्यथा । आं ह्रीं क्रों य र ल व श ष स हों हंसः अमुकदेवतायाः प्राणा इह प्राणाः । एवं आमित्यादि अमुकदेवताया जीव इह स्थितः । एवं आमित्यादि अमुकदेवतायाः सर्व्वेन्द्रियाणि । एवं आमित्यादि अमुकदेवताया वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा । इति प्राणान् प्रतिष्ठाप्य तत्र प्रकृतदेवतामावाह्य षोडशोपचारैः पञ्चोपचारैर्वा पूजयेत् । ततः षडङ्गादिकं दत्त्वा अष्टोत्तरशतं जपं प्रकुर्व्वन् बलिं दद्यात् । ततोऽष्टोत्तरशतहोमं कृत्वा सम्पाताहुतिसम्पातं दद्यात् । होमाभावे द्विगुणजपः कार्य्यः । ततो दक्षिणां दत्त्वा अच्छिद्रावधारणं कुर्य्यात् । इति तन्त्रसारः ॥ ● ॥ औषधपाकाद्यर्थयन्त्रादि यथा —
"भाण्डे वितस्तिगम्भीरे मध्ये निहितकूपिके ।
कूपिकाकण्ठपर्य्यन्तं वालुकाभिश्च पूरिते ।
भेषजं कूपिकासंस्थं वह्निना यत्र पच्यते ।
वालुकायन्त्रमेतद्धि यन्त्रतन्त्रबुधैः स्मृतम् ।"
इति वालुकायन्त्रम् ।
"निबद्धमौषधं सूत्रे भूर्जे नीरपूर्णभाण्डके ।
दत्तपोट्टलिकां काष्ठे दृढं बद्धा गुणेन हि ।
सन्धानपूर्णे कुम्भान्तः स्थापनमवस्थितम् ।
अधस्तात् ज्वालयेदग्निं तदुक्तकर्मणे हि ।
दोलायन्त्रमिदं प्रोक्तं स्वेदनाख्यं तदेव हि ।"
अन्यार्थं कालिकादि । इति दोलायन्त्रम् ॥ ● ॥
"स्थाल्युपरिस्थिते वस्त्रे बद्धे स्वेद्यं विधाय च ।
पिधाय पच्यते यत्र तद्यन्त्रं स्वेदनं स्मृतम् ।"
इति स्वेदनयन्त्रम् ।
"अधःस्थाल्यां रसं क्षिप्त्वा निदध्यात्तदनूपरि ।
स्थालीमन्यां तु सम्यक् निरुध्य मृत्स्नया ।
ऊर्द्ध्वस्थाल्यां जलं क्षिप्त्वा चुल्ल्यामारोप्य यत्नतः ।
अधस्तात् ज्वालयेदग्निं यावत् प्रहरपञ्चकम् ।
स्वाङ्गशीतं ततो यन्त्रादुद्धरेदौषधमुत्तमम् ।
विद्याधराभिधं यन्त्रमेतत्तज्ज्ञैरुदाहृतम् ।"
इति विद्याधरयन्त्रम् ।
"वालुकाद्यं समदाहं गर्त्ते भूधरपालिका ।

ह्रीं गौरि रुद्रदयिते योगेश्वरि सकर्मेपट ।
हिठान्त षोडशार्णोऽयं मन्त्र सद्भिरुदीरितः ॥"
इति घटार्गलयन्त्रम् ॥ ॥
"तारे हूं विलिखेत् सरोजकुहरे साध्याभिधानान्वित
मन्त्राणान् वसुधच्छदाग् वसुदलेष्वालिख्य तद्वाह्यत ।
मूल्या चि परिवेष्टित घटगत भूपुरमका मन
यन्त्र वशकर यशादिभयक्षुद्रघ्नमीमर्द कीर्तितम् ।"
इति नारितायन्त्रम् ॥ ॥
"पद्म भानुदलान्वितं प्रविलिखेत् तत्कर्णिकायां पुन
स्तारं शक्तिमबीजसाध्यसहित तत्केशरेषु क्रमात् ।
मन्त्र्यामनुमन्त्रथान् युगलशो वर्णान् पुन पत्रगान्
मन्त्राणान् युगशो विधाय विलिखेदस्य तदग्रे दृषे ।"
मन्त्रस्तु । [शिवम् ।
"उत्तिष्ठ पुरुषि कि स्वपिषि भयं मे समुपस्थित यदि शक्यमशक्य वा तन्मे भगवति शमय स्वाहा ।
मातृकार्णैन सवीत भूपुरत्रयमध्यगम् ।
यन्त्रञ्च विन्ध्यवासिन्या प्राक्त सर्वसमृद्धिदम् ।
इच्चारि विशर्थिय क्षुद्रभूतान्निनाशनम् ।
राज्यं भ्रष्टराज्यानां वश्यद वश्यमिच्छताम् ।
सुतार्थिनीनां सुतद रोगिणां रोगशान्तिदम् ।
बहुना किमिहोक्तेन यत्तं यत् कामनो मथि ।"
इति वनदुर्गायन्त्रम् ॥ ॥
अथ लक्ष्मीयन्त्रम् ।
'वेदान्नित्यसाध्यनामयुगलं श्रीशक्ति मायान्वित
किञ्जल्केषु दिनेशपत्रविलसन्मन्त्राक्षरं तद्बहि ।
पद्म षट्कमथोपरि व्यलसत्प्रभायुग्म धरा-
बिम्बाभ्यां वसुकृतया लरितया यन्त्र लिखेद् वेष्टितम् ।
भूपुरत्रयकोणेषु दशौ लेख्यौ पुनः पुनः ।
महालक्ष्मीयन्त्रमिद सर्वैश्वर्यफलप्रदम् ।
सर्वदु स्वप्रशमनं सर्वापद्विनिवारकम् ।
बहुना किमिहोक्तेन परमस्यात्र विद्यते ।"
अथ त्रिपुरभैरवीयन्त्रम् । [त्रियो
"मध्याद्य नवयोनिषु प्रविलिखेद्वीजानि वर्णा नाथया भुवरदलनविरन्यालिख्य लिप्या हृतम् ।
भूबिम्बद्वितयेन मन्त्रपयुजा कोणेषु सवेष्टित
यन्त्र त्रैपुरमीरित त्रिभुवनप्रक्षोभण श्रीप्रदम् ।'
मायया तु ।
"मन्त्रार्थं त्रिपुरादेवि विद्या पञ्चदशाक्षरैः ।
उक्ता कामेश्वरीपद प्रपञ्चय भौमादि ।
सर्वेषु च प्रसद्भूतकाम सिद्धि प्रयोजयात् ।
मायमन्त्रा समाख्याता त्रैपुरी समधिष्ठिता ।"
यन्त्रान्तरम् ।
"षट्कोणेषु समुद्यमान्तरचमदने माया लिखेद्राजभयं
षट्कोणेष्वथ बध्निषु प्रविलिखेत् हू कार मावेष्टितम् ।
श्रीबीजेन समीरितं त्रिभुवनप्रक्षोभण त्रैपुर
यन्त्र पद्ममनोभवात्मकमिदं सौन्दर्यसम्पत्करम् ।"
इति त्रिपुरायन्त्रम् ॥ ॥
अथ श्रीविद्यायन्त्रम् ।
"विधेय धारण यन्त्रं यस्माज्ञात् कथयामि ते ।
रेफवकारयोर्मध्ये देवीनामभिधानकम् ।
साध्यनाम द्वितीयान्त तस्योर्द्ध विलिखेच्छुभम् ।
तस्यैव मातृका सर्वा विलिखेच्चक्रवाहत ।
पत्रगधाष्टकेनैव क्रमेण परिवेष्टयेत् ।
तत्र प्राण प्रतिष्ठाप्य विद्यामष्टोत्तर शतम् ।
जप्त्वा पूजा प्रणवेनार्चे देवीध्यानपरायणः ।
देव्यो मध्यगतं कृत्वा रक्तसूत्रेण वा पुनः ।
करे धृत्वा जगद्वश्यं हृदये श्रीश वल्लभम् ।
कण्ठे धन समृद्धार्थं दक्षिण बाहुर्न भवेत ।
शिखायां मोक्षमाप्नोति तस्माद्यत्नेन धारयेत् ।"
अथ गणेशयन्त्रम् ।
"बीज षट्कोणमध्ये स्फुरदनलपुरे तारगं दिक्षु लक्ष्मी
मायाकन्दर्पभूमीस्मरशरधपुटैर्वालिखेद्वीजषट्कम् ।
तद्बहिर्वृत्तमस्मात् वसुदलकमले मूलमन्त्रस्य वर्णान्
द्विद्वान् पत्रेषु विद्वान् विलिखतु गुणशस्तान्त्य मन्त्रे पत्राग्रे ।
आवीत लिपिभिः क्रमोत्क्रमवशात् माया-कुशाभ्यामपि
भूबिम्बद्वितयेन वेष्टितमिद यन्त्रं गणाधीशितुः ।
लाक्षाकुङ्कुमरोचनाम्बुमम्भूर्जोदरे वेष्टि वा
संलिख्याभिवहन् जमित सकलं संप्रापनीयां श्रियम् ।
उक्त महागणपतेर्विधान गुरुपूजितम् ।
सर्वसिद्धिकर पुंसां समस्तपुरुषार्थदम् ।"
अथ श्रीरामयन्त्रम् ।
"तार मध्ये विलिखतु मनु षट्सु कोणेषु शक्ति
म्बह्नि माया पारमपि लिखेत् कोणमध्येषु पश्चात् ।
किञ्जल्केषु स्वरगणमतो पत्रमध्येषु माला-
मन्त्रस्यार्णान् गुणगुणमितानष्टमे पञ्चवर्णान् ।
दशाक्षरेण भवेत्का कादिवर्णैश्च भूपुरे ।
दिक्षिदिक्षु लिखेच्छेषौ नरसिंहवराहयोः ।
नमो भगवते भूपाश्चतुर्थ्यां रघुनन्दनम् ।
रक्षोघ्नविशदायान्ते मधुराद्य समीरयेत् ।
प्रसन्नवदनायेति पश्चादमिततेजसे ।
बलाय पश्चाद्रामाय विष्णवे तदनन्तरम् ।
प्रणवादिनमोऽन्तोऽयं मालामन्त्र प्रकीर्तित ।"
अथ नृसिंहयन्त्रम् ।
"बीज साध्यसमन्वित प्रविलिखेन्नाध्येऽष्टपत्रेषु यो
मन्त्रार्णान् युगशो निभज्य विलिखेत् क्ष्मा बहिर्वेष्टयेत् ।
बाह्ये कोणगतौ नृसिंहमनुषायोद्दृवोष्टत
यन्त्रं क्षुद्रविषघ्नकामपरिपुष्टप्रसन्न श्रीप्रदम् ।"
अथ गोपालयन्त्रम् । [षट्कं
"पिष्ठ मन्त्रेण बीज दशनपुरयुगे कोणराजत्
कुर्यात् पद्म दशाक्षस्फुरितदशदल कामबीजेन बीतम् ।
पद्म किञ्जल्कसंस्थस्वरविकसितदलप्रोज्ज्वलत् षोडशार्णं
किञ्जल्कषडक्षरा विंशतिसुगदलैश्चापि तावद्वर्णान् ।
मायाङ्कुशाभ्यामावीत श्रीबीजपुरसमाश्रित ।
अष्टाक्षरेण लसित मन्त्र गोपालदैवतम् ।
धर्मार्थकामफलद सर्वरक्षाकर स्मृतम् ।
प्रणामको धराश्रयो मनुबिन्दुविभूषित ।
पिण्डबीजमिदं प्रोक्तं सर्वसिद्धिकर परम् ।
तार लक्ष्याय ठद्वन्द्व षडर्णो मनुरीरित ।
गोपीजनान्ते प्रदद्याल्लभायायिवल्लभा ।
अथ दशाक्षरो मन्त्रो द्वादशस्वरमद ।
प्रथम हृदय लक्ष्म द्वेन्तसुता तत परम् ।
तादृश देवकीपुत्र हू फटस्वाहाधमन्वितम् ।
षोडशाक्षरमन्त्रोऽयं गोविन्दस्य जगत्पते ।
पिण्ड रतिमरीरुर्व्व नमो भगवते तत ।
नन्दपुत्राय बालादिवपुषे श्यामलाय च ।
गोपीजनपदस्यान्ते वल्लभाय द्विठावधि ।
अनुष्टुप् मन्त्र आख्यातो गोपालस्य जगत्पते ।
अथाह लक्ष्मगोविन्दौ द्वेन्तावदाधरो मनु ।"
इति गोपालयन्त्रम् ॥ ॥
अथ गोपालस्य यन्त्रान्तरम् ।
"प्राक् प्रकल्प दशिकोदक विविधदलभिलिखेत् अष्टरेखावृत्तं
कोणोपकूलयुक्त वलयसुगयुत मध्यपूर्णे तन्नाम् ।
बीजस्यार्णान् पुरस्तादशपदविदरत्नवर्ण लिखित्वा
तद्वाह्ये द्वादशार्णं दशपरिवेत दक्कोणेषु पत्रम् ।
सं सुको देव देवेत त वेदे नरसो नगम् ।
त वनो वनुगो स्थावं न श्यातो देवकीसुतम् ।
लिखित भूर्जपत्रादौ यन्त्रमेतद्यथाविधि ।
विधृत बाहुना नित्य सर्वकामफलप्रदम् ।
यथाप्रत्ययफलक लिखित साधु साधितम् ।
गोस्थाने निखनेन्मन्त्री तदा गोपालता भवेत् ।"
अथ शिवयन्त्रम् । तथाहि षट्कोणमध्ये तथा तदन्त साध्यनामयुक्त प्रासादबीज लिख्य षट्कोणेषु प्रणवयुक्तपञ्चाक्षर विलिख्य विवरेषु षडङ्गमन्त्रान् तदहिः अष्टदलानि विरचय्य तदग्रेषु ॐ देवायाय नमः ॐ तत्पुरुषाय नमः ॐ अघोराय नमः

ॐ सद्योजाताय नमः ॐ वामदेवाय नमः ।
इति पञ्चमन्त्रान् प्रागादिक्रमेण लिखेत् ।
तद्बहिरष्टदलानि रचयित्वा तद्दलेषु मातृका
वर्णान् लिखेत् । तद्बहिर्वृत्तं त्र्यम्बकेण वेष्टयेत् ।
एतद्यन्त्रं जपहोमादिना सम्पूज्य धारयेत् ।
आयुरारोग्यैश्वर्यादिसिद्धिर्भवति । ● । अथ
त्र्यम्बकस्य यन्त्रम् ।
"मध्ये साध्याक्षराढ्यं भुवनमभिविलिखेत्प्राग्वदष्टसु
दिग्दलेषु
कोणेष्वन्त्यं मनोस्तत् त्रितिभुवनमथो दिक्षु
चन्द्र विन्दुम् ।
टान्तं यन्त्रं तदुक्तं सकलभयहरं चेडभूतापमृत्यु
व्याधिव्यामोहदुःखप्रशमनमुदितं श्रीप्रदं
कीर्त्तिदायि ॥"●।
अथ काकीयन्त्रम् । यामले ।
"आद्य वीजं स्वसाध्य प्रथमचतुर्दले तदपि
चाष्टकोणे
पूर्व्वाद्य चाष्टवीज तदनु वसुयवहन्दके
वीजषट्कम् ।
विन्यस्य तत् स्वराढ्य वसुदलविवरे चाद्यया
वीजषट्क
कूर्च्चाभ्यामेव वीजं त्रितियवयुगयोरन्तरे
यन्त्रराजम् ।
देवीवीजत्रय तत् प्रतिदिशमपरं शक्तिवीज-
द्वय तत्
कोणे कोणे लिखेद्दुर्य्यखिजगति च गुप्त
प्राङ्गरत्नामि विष्णो ॥"
अथ शालिग्रामादौ धाराधारणयन्त्रम् । तदुक्त
पितृकारीये ।
"योनियुग्मे लिखेत्तत्र मन्त्री हैमशलाकया ।
जीवहीनान् दीर्घवर्णान् षट्कोणे विलिखेत्ततः ।
षट्पञ्चस्वरवर्णान् तद्वहिर्भूपुरद्वयम् ।
अष्टदल भूपुरे च विलिख्य साधकोत्तम ॥
सुवर्णपट्टे भूर्ज्जे वा रूप्ये ताम्रेऽथ सुव्रते ।
विलिखेद्यन्त्रमेतद्वा गन्धाष्टकसमन्वितम् ॥
दूर्व्वाकाण्डेन वाथाढ्य कुशमूलेन वा पुनः ॥"
एकवीराकल्पे ।
"वेष्टितं पीतवस्त्रेण अमुना परिवेष्टयेत् ॥
कर्णयोर्वा महासत्त्वे त्रिसूत्री कण्ठभूषणम् ।
कोणो वामभुजे चैवमन्येषां दक्षिणे भुजे ।
वन्ध्यापि लभते पुत्रं निधनो धनवान् भवेत् ॥
इमां रक्षां पुरा वध्वा ब्रह्माद्यं गौतमादिभिः ।
श्रेयसे पाथिवैश्चान्यै सधामे जयकाङ्क्षिभिः ॥"
अस्यार्थः । योनियुग्मे षट्कोणे । तस्य मध्ये
हैमशलाकादिना भूर्ज्जपत्रादौ कुङ्कुमरोचना
रक्तचन्दनघटागोरोचना समांशं विधाय षट्कोण
क्रमेण मूलमन्त्र लिखित्वा तस्य मध्यस्थारेण
मध्ये अमुकस्य रक्षां कुरु कुरु अमुकोऽयं शुभ
पुत्रमुत्पादयेति वा धनं धान्य कुरु कुरु
इत्यादि वा साध्यसहित विलिख्य षट्कोणे
जीवभिन्नान् दीर्घवर्णान् आ ई ऊ ऐ औ अः
इत्येवं लिखेत् । तदुक्तम् ।
"स्वराणां मध्यगं यच्च तच्चतुष्कं नपुंसकमिति ।"
षट्पञ्चस्वरवर्णान् । ऐ ह्रीं ॐ ऐ ह्रीं फट्
स्वाहेति लिखेत् । तदुक्तम् ।
"वाग्भवं कुलदेवीच तारकं वाग्भवं तथा ।
हृल्लेखा चास्त्रमन्त्रान्ते वह्निजायावधिर्मनुः ।
षडक्षरो मनुः प्रोक्तो मन्त्राणां सार ईरितः ॥"
अथ यन्त्रलिखनद्रव्यम् ।
"काश्मीररोचनालाक्षागोमदचन्दनैः ।
विलिखेद्यन्त्रमेतत्तु यन्त्राण्येतानि देशिकः ।
भूर्ज्जपट्टे ताम्रपट्टे यन्त्रं विम्वाद्यलङ्कृतम् ।
शिरोर्द्धे ग्राहित मन्त्री यन्त्रं तेन च धारयेत् ॥
सौवर्णे राजते पात्रे भूर्ज्जे वा सम्यगालिखेत् ।
अथवा ताम्रपट्टे वा गुटिकां तस्य धारयेत् ॥
यावज्जीवं सुवर्णे स्यात् रौप्ये विंशतिवार्षिकम् ।
भूर्ज्जे द्वादश वर्षाणि तदर्द्धं ताम्रपट्टके ॥"
इति तन्त्रसारः । ● ।
अन्यत् कालिकापुराणे ७७।७८।७९ अध्यायेषु
द्रष्टव्यम् । ● । अथ यन्त्रसंस्कारः । यामले
ज्वरतन्त्रे ।
"स्नात्वा संकल्पयेन्मन्त्री गुरोरर्च्चनमाचरेत् ।
पञ्चगव्य ततः कृत्वा शिवमन्त्रेण मन्त्रितम् ।
तत्र यन्त्रं विनिक्षिप्य प्रणवेन समाकुलम् ।
समुद्धृत्य ततश्च स्थापयेत् स्वर्णपात्रके ।
पञ्चामृतेन दुग्धेन शीतलेन जलेन च ।
चन्दनेन सुगन्धेन कस्तूरीकुङ्कुमेन च ।
पयोदधिघृतक्षौद्रशर्कराद्यैरनुक्रमात् ।
तोयसयान्तरे कुर्य्यात् स्नपनविधिं बुधः ।
हाटके कलसैर्द्दिव्यैरष्टभिर्व्वारिपूरितैः ।
कषायजलसम्पूर्णैः कारयेत् स्नानमुत्तमम् ।
स्नानं समाप्य तां देवीं स्थापयेत् स्वर्णपीठके ।
यन्त्रराजाय विद्महे महायन्त्राय धीमहि तन्नो
यन्त्रं प्रचोदयात् ।
स्पृष्ट्वा यन्त्रं कुशाग्रेण गायत्र्या चाभिमन्त्रयेत् ।
अष्टोत्तरशत देवि । देवताभावसिद्धये ।
आत्मशुद्धिं ततः कृत्वा यन्त्रे तद्देवतां यजेत् ।
तत्रावाह्य महादेवीं जीवन्यासञ्च कारयेत् ।
उपचारैः षोडशभिर्म्मधुपर्कादिभिः सदा ।
मधुताम्बूलनैवेद्यैर्देवीं तत्र समर्च्चयेत् ।
षट्छागादिकं दद्यात् वस्त्रालङ्कारमेव च ।
अगुरु चामरं घण्टां यथायोग्यं महेश्वरि ! ।
सर्व्वमेतत् प्रयत्नेन दद्यान्नामविधौ रतः ।
ततो जपेत् सहस्रञ्च मन्त्रविधिसिद्धये ।
बलिन्यासं ततः कृत्वा प्रणमेच्चक्ररूपकम् ।
अष्टोत्तरशतं हुत्वा सम्पाताज्यं विधिं त्रिपेत् ।
होमकर्म्मण्यशक्तश्चेत् द्विगुणं जपमाचरेत् ।
धेनुमेकां समानीय स्वर्णशृङ्गाद्यलङ्कृताम् ।
गुरवे दक्षिणां दद्यात् ततो देवीं विसर्ज्जयेत् ॥"
अस्य प्रयोगः । कृतनित्यक्रिय शालिग्रामचक्र
पूर्व्वक सङ्कल्प कुर्य्यात् । अद्येत्यादि अमुक
गोत्र श्रीअमुकदेवशर्म्मा अमुकदेवताया
पूजार्थं अमुकयन्त्रसंस्कारमहं करिष्ये । इति
संकल्प्य पञ्चगव्यमानीय ह्रीमितिमन्त्रेणाष्टोत्तर
शतं अभिमन्त्र्य प्रणवेन यन्त्रं तत्र निषेत ।
तत उत्तोल्य स्थापयेत् । ततः शीतलजलचन्दन-
गन्धकस्तूरीकुङ्कुमैः स्नापयित्वा पञ्चगव्यमानेन
ह्रीमिति मन्त्रेणाष्टोत्तरशतमभिमन्त्र्य प्रणवेन
पूर्व्ववत् शोधयित्वा स्नापयेत् । तत्र क्रमः ।
प्रथमं क्षीरेण स्नापयित्वा धूपं दद्यात् । एवं
दध्ना घृतेन मधुना शर्करया च । ततोऽष्टभिः
कलसैः कुङ्कुमगोरोचनाचन्दनमिश्रितैस्तोयैः
स्नापयेत् । सर्व्वत्र स्नानं मूलमन्त्रेण ततो
यन्त्रमुत्तोल्य कुशाग्रेण तत् स्पृष्ट्वा यन्त्रराजाय
विद्महे महायन्त्राय धीमहि तन्नो यन्त्रः प्रचो-
दयात् । इत्यष्टोत्तरशतमभिमन्त्र्य प्राणप्रतिष्ठां
कुर्य्यात् । अस्य प्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णु-
महेश्वरा ऋषयः ऋग्यजुःसामानि छन्दांसि
चैतन्यं देवता प्राणप्रतिष्ठायां विनियोगः ।
तद्यथा । आं ह्रीं क्रों य र ल व श ष स हौं
हं सः अमुकदेवतायाः प्राणा इह प्राणाः ।
एवं आमित्यादि अमुकदेवताया जीव इह
स्थितः । एवं आमित्यादि अमुकदेवतायाः सर्व्वे
न्द्रियाणि । एवं आमित्यादि अमुकदेवताया
वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं
तिष्ठन्तु स्वाहा । इति प्राणान् प्रतिष्ठाप्य तत्र
प्रकृतदेवतामावाह्य षोडशोपचारैः पञ्चोप-
चारैर्व्वा पूजयेत् । ततः षट्छागादिकं दत्त्वा
अष्टोत्तरशत जपं प्रकुर्व्वन् बलिं दद्यात् ।
ततोऽष्टोत्तरशतहोमं कृत्वा प्रणामाञ्जलिसम्पात
दद्यात् । होमाभावे द्विगुणजपः कार्य्यः । ततो
दक्षिणां दत्त्वा अच्छिद्रावधारणं कुर्य्यात् ।
इति तन्त्रसारः । ● । औषधपाकाद्यर्थयन्त्राणि
यथा —
"भाण्डे वितस्तिगम्भीरे मध्ये निहितकूपिके ।
कूपिकाकण्ठपर्य्यन्तं वालुकाभिश्च पूरिते ।
भेषजं कूपिकासंस्थं वह्निना यत्र पच्यते ।
वालुकायन्त्रमेतद्धि यन्त्रतत्त्वज्ञैः स्मृतम् ॥"
इति वालुकायन्त्रम् ।
"विवद्धमौषधं सूत भूर्ज्जे त्रिगुणवाससि ।
रसपोटलिकां वाढं दृढं बद्धा गुणेन हि ।
सन्धानपूर्णे कुम्भान्तः स्थापयेदवलम्बितम् ।
अधस्तात् ज्वालयेदग्निं यथादुक्तकदेव हि ।
दोलायन्त्रमिदं प्रोक्तं स्वेदनाख्यं तदेव हि ॥"
सन्धानं काञ्जिकादि । इति दोलायन्त्रम् । ● ।
"वालुकाद्यौषधैः वह्नौ स्वेदं विधाय च ।
पिधाय पच्यते यत्र तद्यन्त्रं स्वेदनं स्मृतम् ॥"
इति स्वेदयन्त्रम् ।
"अधःस्थाल्यां रसं क्षिप्त्वा निदध्यात्तस्य चोपरि ।
स्थालीं जलभृतां सम्यक् निरुध्य मृत्स्नया ।
ऊर्द्ध्वस्थाल्यां जलं क्षिप्त्वा चुल्यामारोप्य यत्नतः ।
अधस्ताज्ज्वालयेदग्निं यावत् प्रहरपञ्चकम् ।
स्वाङ्गशीतं तथा यन्त्रादुद्धरेत् तावकं शुभम् ।
विद्याधराभिधं यन्त्रमेतत्तज्ज्ञैरुदाहृतम् ॥"
इति विद्याधरयन्त्रम् ।
"वालुकासु समस्ताङ्गं मर्ते

दीप्तोपले मृद्धस्याद्यन्त्रं भूधरनामकम् ॥"

इति भूधरयन्त्रम् ।

"यन्त्र डमरवच्च स्यात्तत् स्याज्जोर्ध्वमिति स्मृतेः ।"

इति डमरुयन्त्रम् । इति भावप्रकाशः ॥ (तथाच ।

"अन्धमूषा तु कर्त्तव्या गोस्तनाकारसन्निभा ।
ईषच्छिद्रान्विता मध्ये गम्भीरामारयोषिता ॥"

इति अन्धमूषायन्त्रम् ॥

"द्वौ भागौ तु मदुग्धस्य एकावल्मीकमृत्तिका ।
लौहकिट्टस्य भागैकं श्वेतपाषाणभागिकम् ॥
नरकेशसमं किञ्चित् छागीदुग्धेन पेषयेत् ।
यामद्वयं दृढं मर्द्यं तेन मूषां सुसम्पुटाम् ॥
शोषयित्वा रसं क्षिप्त्वा तत्कल्कैः सन्धिलेपयेत् ।
रौद्रमूषा समाख्याता सम्यक्पारदबन्धिका ॥"

इति मूषायन्त्रम् ॥ ● ॥

"वालुकापूरितं भाण्डं तन्मध्ये सूतकं क्षिपेत् ।
रुन्ध्वा मल्लागमनेन भाण्डं बादेय रोधयेत् ॥
निम्ना मल्लकवृत्ते सन्धिं साधयेत्खटिकादिना ।
वालुकायन्त्रमेतद्धि योजयेद्रसकर्म्मणि ॥"

इति वालुकायन्त्रम् ।

"निर्धूमकाष्ठ काचकूप्यां निधायेत् स्वल्पभाण्डके ।
निर्धूमकस्तथा पचेत् भाण्ड वकयन्त्रमिति स्मृतम् ॥'

इति वकयन्त्रम् ॥

"कङ्काष्ठ सम्पुटाकारं तन्मध्ये रसवस्थितम् ।
कवचीयन्त्रमेतद्धि रसाग्निदग्धसाधनम् ॥"

इति कवचीयन्त्रम् ॥ ० ॥

इति वैद्यकरसेन्द्रसारसंग्रहे जारणाधिकारे ॥

चिकित्सोपयन्यपरयन्त्रविवृतिर्यथा —

"यन्त्रशतमेकोत्तरमत्र हस्तमेव प्रधानतम यन्त्राणामवगच्छ । किं कारणम् । यस्माद्धस्ता द्वते यन्त्राणामप्रवृत्तिरेव तदधीनत्वाद्यन्त्रकर्म्मणाम् । तत्र मनःशरीराबाधकराणि शल्यानि तेषामाहरणोपाया यन्त्राणि । तानि षट्प्रकाराणि । तद्यथा । स्वस्तिकयन्त्राणि । सन्दंशयन्त्राणि । तालयन्त्राणि । नाडीयन्त्राणि । शलाकायन्त्राणि । उपयन्त्राणि चेति ।

तत्र चतुर्व्विंशतिः स्वस्तिकयन्त्राणि । द्वे सन्दंशयन्त्रे । द्वे एव तालयन्त्रे । विंशतिर्नाड्यः । अष्टाविंशतिः शलाकाः । पञ्चविंशतिरुपयन्त्राणि । तानि प्रायशो लौहानि भवन्ति तत्प्रतिरूपकाणि वा तदलाभे । तत्र नानाप्रकाराणां व्यालानां मृगपक्षिणां मुखैर्मुखानि यन्त्राणां प्रायशः सदृशानि तस्मात् तत्सारूप्यादागमादुपदेशादन्ययन्त्रदर्शनाद्युक्तितश्च कारयेत् ।
समाहितानि यन्त्राणि खरश्लक्ष्णमुखानि च ।
सुदृढानि सुरूपाणि सुग्रहाणि च कारयेत् ॥

तत्र स्वस्तिकयन्त्राण्यष्टादशाङ्गुलप्रमाणानि सिंहव्याघ्रवृकतरक्ष्वृक्षद्वीपिमार्जारशृगालमृगैर्वारुककाककङ्कुररकुलचासभासशशघात्युलूकचिल्लिश्येनगृध्रक्रौञ्चभृङ्गराजाञ्जलिकर्णावभञ्जननन्दीमुखमुखानि मसूराकृतिभिः कीलैरवबद्धानि मूलेऽङ्कुशवदावृत्तवारङ्गाण्यस्थिविदष्टशल्योद्धरणार्थमुपदिश्यन्ते ॥ सनिग्रहोऽनिग्रहश्च सन्दंशौ षोडशाङ्गुलौ भवतस्तौ त्वङ्मांससिरास्नायुगतशल्योद्धरणार्थमुपदिश्येते ।

तालयन्त्रे द्वादशाङ्गुले मत्स्यतालुवदेकतालकं द्वितालकञ्च कर्णनासानाडीशल्यानामाहरणार्थम् ।

नाडीयन्त्राण्यप्यनेकप्रकाराण्यनेकप्रयोजनान्येकतोमुखान्युभयतोमुखानि च तानि स्रोतोगतशल्योद्धरणार्थं रोगदर्शनार्थमाचूषणार्थं क्रियासौकर्यार्थञ्चेति तानि स्रोतोद्वारपरिणाहानि यथायोगपरिणाहदैर्घ्याणि च ।

भगन्दरार्शोव्रणबस्त्युत्तरबस्तिमूत्रवृद्धिदकोदरधूमनिरुद्धप्रकाशसन्निरुद्धगुदयन्त्राण्यलाबुयन्त्राणि चोपरिष्टाद्वक्ष्यामः ।

शलाकायन्त्राण्यपि नानाप्रकाराणि नानाप्रयोजनानि यथायोगपरिणाहदैर्घ्याणि च तेषां गण्डूपदसर्पफणशरपुङ्खबडिशमुखे द्वे द्वे एषणव्यूहनचालनाहरणार्थमुपदिश्येते । मसूरदलमात्रमुखे द्वे किञ्चिदानताग्रे स्रोतोगतशल्योद्धरणार्थम् । षट्कार्पासकृतोष्णीषाणि प्रमार्जनक्रियासु । त्रीणि दर्व्याकृतीनि खल्लमुखानि क्षारौषधप्रणिधानार्थम् । त्रीण्यन्यानि जाम्बववदनानि त्रीण्यङ्कुशवदनानि षडेवाग्निकर्मस्वभिप्रेतानि । नासार्बुदहरणार्थमेकं कोलास्थिदलमात्रमुखं तीक्ष्णौष्ठम् । अञ्जनार्थमेकं कलायपरिमण्डलमुभयतो मुकुलाग्रम् । मूत्रमार्गविशोधनार्थमेकं मालतीपुष्पवृन्ताग्रप्रमाणपरिमण्डलमिति ।

उपयन्त्राण्यपि रज्जुवेणिकापट्टचर्मान्तवल्कललतावस्त्राष्ठीलाश्ममुद्गरपाणिपादतलाङ्गुलिजिह्वादन्तनखमुखबालाश्वकटकशाखाष्ठीवनप्रवाहणहर्षायस्कान्तमयानि क्षाराग्निभेषजानि चेति ।

एतानि देहे सर्व्वस्मिन् देहस्यावयवे तथा ।
सन्धौ कोष्ठे धमन्याञ्च यथायोगं प्रयोजयेत् ॥

यन्त्रकर्म्माणि तु निर्घातनपूरणबन्धनव्यूहनवर्त्तनचालनविवर्त्तनविवरणपीडनमार्गविशोधनविकर्षणाहरणाञ्छनोन्नमनविनमनभञ्जनोन्मथनाचूषणैषणदारणर्जुकरणप्रक्षालनप्रधमनप्रमार्जनानि चतुर्विंशतिः ॥

अनुबुद्ध्या चापि विभजेद्यन्त्रकर्म्माणि बुद्धिमान् ।
असंख्येयविकल्पत्वाच्छल्यानामिति निश्चयः ॥

तत्रातिस्थूलमसारमतिदीर्घमतिह्रस्वमग्राहि विषमग्राहि वक्रं शिथिलमत्युन्नतं मृदुकीलं मृदुमुखं मृदुपाशमिति द्वादश यन्त्रदोषाः ।

एतैर्दोषैर्विनिर्मुक्तं यन्त्रमष्टादशाङ्गुलम् ।
प्रशस्तं भिषजा ज्ञेयं तद्धि कर्म्मसु योजयेत् ॥
कङ्क विहङ्गसाटोषु कुट कङ्कसमादिभिः ।
निहरेत्तु मखे मुखा मुखनिश्चयेषु ॥

विसर्पति साध्ववगाहते च
शल्यं निगृह्योद्धरति च यस्मात् ।
यन्त्रेष्वतः कङ्कमुखं प्रधानं
स्थानेषु सर्व्वेष्वधिकारि चैव ॥"

इति सुश्रुते सूत्रस्थाने सप्तमेऽध्याये ॥०॥

गोलाध्यायोक्तयन्त्राणि यथा,—

"अथ यन्त्राध्यायो व्याख्यायते । तत्रादौ तदारम्भप्रयोजनमाह ।

दिनगतकालावयवा ज्ञातुमशक्या यतो विना यन्त्रैः ।
वक्ष्ये यन्त्राणि ततः स्फुटानि संक्षेपतः कतिचित् ॥
गोलो नाडीवलयं यष्टिः शङ्कुर्घटी चक्रम् ।
चापं तुर्यं फलकं धीरेकं पारमार्थिकं यन्त्रम् ॥"

"अथ प्रथमं गोलयन्त्रमाह ।

अभ्यस्तगारविधिर्वं चितिभे कृत्वा कुर्य उक्तम् ।
नाडीवृत्ते बिन्दुं कृत्वा प्रकाश्य अक्षतं छितिचम् ॥
रविचिह्नस्य छाया पतति कुमध्ये यथा तथा विद्धे ।
उद्गोले कुजबिन्दोर्मध्ये नाड्यो द्युयाताः स्युः ॥"

"अथ नाडीवलयमाह ।

अथवृत्ते कुजवद्वे तत्र पायो स्वगोलवत्रिकाल्प ।
भूमेः ध्रुवयष्टिस्यं चक्र कृत्वा निवेशयेत्तद्वत्र ।
यष्ट्यग्रदीभागाहृदयेऽर्कं स्यस्य नाडिका ज्ञेया ।
इष्टच्छायाग्रमाणरेखा तत्र प्रमाणाच ॥
क्रान्तिविदाधारेण तुलाभिसूत्रकोलकेऽत्र धृतेः ।
अथवा कीलच्छायामलमपि सुवता नाड्यः ॥"

घटिकायन्त्रगणनादिक घटीयन्त्रस्ये दृष्टम् ।

"अथ शङ्कुमाह । [शङ्कु ।

समतलमस्तकपरिधिर्भ्रमसिद्धो दन्तिदन्तजः
तच्छायातः प्रोक्तं ज्ञानं दिग्देशकालानाम् ॥"

इति शङ्कुयन्त्रम् ।

अथ चक्रमाह ।

चक्रं चक्रांशाङ्कं परिधौ छिद्रसदृशादिकाधारम् ।
धाम्नि निभं आधारात् कल्प्या भार्धेऽत्र खाङ्काः ।
तन्मध्ये सुधार्धं छिद्राभिमुखं सुखमिव धार्यम् ।
भूवेधत्तमाभारत्वाच्छायया यत्र ।
तत्प्राक्क्रान्त्याक्ष कला उन्नतलवसंज्ञुप्तोन्नतं सुरचम् ।
सुदलोन्नतांशमत्र नाड्यः सूक्ष्माः परे प्रोक्ताः ॥"

"अथ धीयन्त्रमाह ।

"दैवज्ञमुख्यानिमानव्यानां
स्थलदृष्टं निमितं यथा स्यात् ।
दूरेऽन्तरेऽस्त्रिभुजस्थे वा
तथात्र यन्त्रं सुधिया प्रकाश्यम् ॥
नैमिसूक्ष्माग्रमसौ वयस्विनं
तैस्थ धिषणस्य च योगतारम् ।
मेरुक्षुद्योरथवुद्योस्तु मध्ये
येऽपि घा स्थिता मनुजकौ तु लग्ने ॥
प्रज्ञक स्थिते भेऽथ पुरःस्थिते ते
यन्त्रे पुर स्यात् लवरम्यसत्त्वम् ॥"

"अथ चापं तुर्यगोलं चाह ।

दलीकृत चक्रमिति चापं
कोदण्डखण्डं खलु तुर्यगोलम् ॥"

"अथ फलकयन्त्रमाह ।
दृग्ज्याज्ञोऽस्य स्फुटकालज्ञ
सुखेन साध्येऽत्रितं मयाल ।
यन्त्रोऽस्युकोणोऽखिलस्य सारं
स्फुट प्रवक्ष्ये फलकाख्ययन्त्रम् ।"
"इदानीं यन्त्रलक्षणमाह ।
कर्णैश्च चतुरस्रक सुफलकं स्वाङ्गुल ८ कुलै
विस्तृतं
विस्ताराद्विगुणा १८ यतं सुगणकेनायाममध्ये
तथा ।
आधार प्रथमछ्लादिघटिते कार्या च
रेखा तत
आधारादवलम्बसूत्रसदृशी या लम्बरेखोच्यते ।
लम्ब नवत्य ८ कुलकैर्विभज्य
प्रत्यङ्कुल तिर्यगत प्रसाध्य ।
स्वाणि समायतरूपरेखा
जीवाभिधाना सुधिया विधेया ।
आधारतोऽथ सगुणा ३ कुलेषु
स्यालम्बयोगे सुषिरच सूक्ष्मम् ।
स्तम्भमात्रा सुषिरे शलाका
क्षेप्याक्षयत्या स्तु या प्रकल्प्या ।
षष्ट्यङ्कुलव्यासमतश्च स्मृत्
क्ला सुरत परिधौ तदङ्कम् ।
षष्ट्या घटीभि भगणांश ३६ कैश
प्रत्यङ्क चाभ्युपलैश्च निभिः ।
अथ तरस्या तनुपट्टिकैका
षष्ट्यङ्कुला दीर्घतया तयाङ्गा ।"
"इदानीं यन्त्रोपकरणमाह ।
यत् फलके सूत्रवर पथाच्च
तत्रोक्त १८ चत् स्वाधरम्निक्षिपेच्च ।"
"इदानीं यष्टिसाधनमाह ।
वेदा ४ भवा ११ धिजयो १७ धृतिया १८
विश्वे १३ च बाणा ५ स्यकणेनिघ्ना ।
अर्कोद्धृता स्यु क्रमशः खदेशे
राशित्रयस्यापि हि लम्बकानि ।
ते क्रान्तिपाताद्दारश्रभुषण्या
मध्याह्नभाद्भावयवेन युक्ता ।
दिगन्ती क्रमाद्भवतीह यदि
या पट्टिकायां सुषिरात् प्रदयात् ।"
"इदानीं यष्टिप्रयोजनमाह ।
चार्थे तथा फलकयन्त्रमिदं यथेव
तत्पार्श्वयोजगति तुल्यमिमस्य तेन ।
छायाग्रमा स्पृशति तत्परिधौ यमश्च
मन्त्रांशके गणितता तदथ प्रकल्प्य ।
अथ प्रोक्ता रविभवगतौ पट्टिका न्यस्य तस्माद्
यदेरण्याद्युपरि भवकेऽथच गोलक्रमेण ।
यन्त्राद्यकवरदयुक्तभ या ज्या तयाथ
क्षिप्ते पर्ने तत्रघटिका स्युगता यन्त्रकाख्या ।'
"अथ यष्टियन्त्रमाह ।
बिम्बादिबिम्बमार्द्ध इत्थ कृत्वा दिग्भिर्दं तत्र ।
दत्वायां प्राक् पश्चाद्वृत्तयत्र तन्मध्ये ।
तत्परिधौ षष्ट्यंशं षष्टिषट्द्युविहान केन्द्रे ।

विष्याङ्कुला निधेया यष्ट्याग्रायान्तर यावत् ।
तावत्या मौर्या यद्द्वितीयवृत्ते धनुभवेत् तत्र ।
दिनगतशेषा नाड्य प्राक् पश्चात् स्तु क्रमेणै-
वम् ।"
"इदानीं धीयन्त्रं विवक्षुरादौ तत्प्रशंसामाह ।
अथ किमु पृथुतन्त्रैर्धीमतो भूरियन्त्रै
स्वकरकलितयष्टेर्दत्तमूलाग्रदृष्टे ।
न तदविदितमानं वस्तु यद्दृश्यमान
दिवि भुवि च जलस्थ प्रोच्यतेऽथ स्थलस्थम् ।
अत्र प्रश्न ।
वंशस्य मूल प्रविलोक्य चाग्रं
तत्स्वान्तरं तस्य समुच्छ्रयच ।
यो वेत्ति यष्ट्यैव करस्थयासौ
धीयन्त्रवेदी वद किं न वेत्ति ।"
"अथ यष्ट्या ध्रुववेधेन पलभामाह ।
यष्ट्यग्रमूलयष्ट्या विदृष्ट्वा ध्रुवमग्रमूलयोरुभौ ।
बाहुलम्बान्तरभूर्लम्बोच्छ्रायान्तरं कोटि ।
कोटिद्वादशगुणिता बाहुविभक्ता पलप्रभा
ज्ञेया ।'
"इदानीं वंशादिवेधमाह ।
विदृष्ट्वैव वंशतलं दृगुच्छ्रायमाहतादशो ।
कोष्ठा लब्ध ज्ञेय स्ववंशमध्ये मध्यमानम् ।
विद्धायो वंशाग्रं भूमान कोटिघ्नम भक्तम् ।
दोष्णा वंशोच्छ्रायो दृगुच्छ्रायेण सयुतो ज्ञेय ।
उदाहरणम् ।
पञ्चघ्नकाङ्कुला १३५ यष्टिरदर्शि दृगुच्छ्रय ।
भटकराशकधी दो कोटि अमरशाङ्कुला ।
अग्रवेधे रवीषा ११६ गो कोटिस्तुरगकुञ्जरा ।
वंशस्य तस्य तन्मान चान्तर्वंशान्तर वद ।"
"अथ केनप्यावेधेनाह ।
अग्र विध्वोभस्य पृथक्पृथक्परिस्पृश्य तद्विद्वान् ।
निजभुजभक्ते कोटी तदन्तरहृतो हमौचाविद्धेन
भूमिर्वंशौपान्तरं पृथक् पृथक् पूर्ववच्छेयम् ।
अत्र प्रश्न ।
स्वस्थस्य यद्वाग्निभियह्निहतस्याग्रमथाव यष्टेः ।
वंशस्य प्रयुक्तस्य यस्य सम्यग् वेधे समालोक्यते ।
अप्येव समवस्थितो यदि वदस्वस्वान्तर चोच्छ्रयं
मध्ये यन्त्रविदां वरिष्ठपदवीं यातोऽसि धीयन्त्र
वित् ।
उदाहरणम् ।
दृश्यष्टोऽव्यंशेन वंशाग्र विध्यता सुध ।
दृगुत्तुङ्गभरोऽथाप्ययष्ट्या स्वाङ्गाङ्कुल करे ।
निविष्टेन तथा कोटिरङ्कुलं वेधयोरपि ।
आलम्बान्तरं सूहि वंशोच्छ्रायश्च वेधवित् ।"
"अथ जलान्तर्वेधमाह ।
एवं तोयेऽप्योक्ता तत्र द्युतिवजोऽपि भवति ।
किंवा यष्ट्या कोटी दृगुच्छ्रायो जलान्तरे
ग्राह्य ।
अत्र प्रश्न ।
दूरस्थस्य न दूरगस्य यदि वाऽदृश्यस्य दृष्टस्य वा
वंशस्य प्रतिबिम्बितस्य सलिले दृश्याग्रमात्र करे ।
यद्येव समवस्थितो यदि वदस्वस्वान्तरं चोच्छ्रयं

स्तौ सर्वतीत्रमनीन्द्रियप्रमतुरुपयेन मत्ये भुवि ।
उदाहरणम् ।
दृष्टा येन यष्टिना कोटिघाङ्कुल चतुरङ्कुल ।
ऊर्ध्वउद्गोपविष्टेन बाहुरेकादशाङ्कुल ।
कोटिरष्टाङ्कुला तोये वंशाग्र विद्धता सखे ।
चारुवक्त्रौ दृगुच्छ्रायौ वंशौचान्तर च ।"
"किंवा यष्ट्याग्रस्योत्ताहरणम् ।
यष्टेद्वैरमात् स्वस्थाङ्कुलान्यथवा क्रमात् ।
आलम्बतोयान्तरं दृष्ट्वा वंशौच चान्तर वद ।"
"अथ स्वयंवहमाह ।
लघुदारुजमयपङ्क्ति समसुषिराराः समान्तरा
नेम्याम् ।
किञ्चिद्वक्रानोऽथा सुषिरस्यार्धे पृथक् तासाम् ।
रसपूर्णं तच्चक्रं हाधारात्तस्थित स्वयं भ्रमति ।'
"अथान्यदाह ।
उत्कीर्य नेमिमथवा परितो मन्नेन खलयम् ।
तदुपरि तालदलाद्य कृत्वा सुषिरे रसं क्षिपेत्
तावत् ।
यावदसैकपार्श्वं जिह्मजल गच्छतो याति ।
पिहितच्छिद्रं तदितच्चक्र भ्रमति स्वयं चक्रा
क्रमम् ।"
"अथान्यदाह ।
ताम्रादिमयस्याङ्कुशरूपनलस्याम्बुपूर्णस्य ।
एक कुण्डजलान्तर्द्वितीयमग्रं त्वधोमुखं च
बहि ।
युगपन्मुक्तं चेत् क नलेन कुण्डाद्बहि पतति ।
नेम्यां बद्ध्वा घटिकाचक्र जलयन्त्रवत् तथा
धार्यम् ।
नलकप्च्युतसलिल पतति यथा तद्धनीमध्ये ।
भ्रमति ततस्तत् सतत पूर्णघटीभि समाकृष्टम् ।
चक्रच्युत तदुदक कुण्डे याति प्रणालिकया ।"
"इदानीमन्येषां स्वयंवहयुक्तमाह ।
यद्धीरन्ध्रनलं सत् शाखिपात् स्वयंवहं यान्त्यम् ।
चतुरत्वमत्कारकरो युक्तियन्त्र नहि गाम्या ।
एवं बहुधा यन्त्र स्वयंवहं कुहकविद्या भवति ।
नेद गोलाभिनया पूर्वोक्तलाभयाप्युक्तम् ।"
इति सिद्धान्तशिरोमणौ गोले यन्त्राध्याय ।)
यन्त्रकं,क्ली,यन्त्रगृहम् ।(कुन्दम् । इति हेमचन्द्र ।
३।५०३ ।) कुंद इति भाषा । यन्त्रे काष्ठमने
नेति यन्त्रधातोरप्रत्ययेन यन्त्र तत स्वार्थे कप्रत्य
येन निष्पन्नम् । (यथा मनुस्मृतौ । ४ । ९ ।
"कार्यो गोपविकारश्च यथामानेन यन्त्रकम् ।
न कुर्यात् यन्त्रकेनच तेन छिद्राणि हि प्रभ ।"
यन्त्रयति वध्नाति पितृप्रवृत्तीनीति । यन्त्रि +
ण्वुल । पितृभर्तृनिर्मातरि,त्रि । यथा,रामा
यणे । २ । ८ । १ ।
"अकर्माभिरता क्रूरा प्रमदा यन्त्रकाख्यया ।"
"यन्त्रका बन्धनानादियन्त्रकाकर्त्री ।" इति
तट्टीका ।)
यन्त्रगृहं, क्ली (यन्त्रस्य गृहम् ।) तैलिकशाला ।
इति हेमचन्द्र । ४ । ६१ । कोलिघर इति
भाषा ।

यन्त्रगोल, पुं, कलायविशेषः । इति शब्दचन्द्रिका ॥ मटर् इति भाषा ॥

यन्त्रण, क्ली, (यन्त्र + ल्युट् ।) रक्षणम् । बन्धनम् । (यथा, सुश्रुते सूत्रस्थाने षष्ठाध्याये । "यन्त्रणमत ऊर्द्ध्वमधस्तिर्य्यक् ।") नियमनम् । इति मेदिनी । णे, ७१ ॥ (यथा, सुश्रुते उत्तरतन्त्रे ४१ अध्याये ।
'रक्तक्षयाद्वेदनाभिस्तथैवाहारयन्त्रणात् ।
अखिलस्य भवेच्छोषः स चासाध्यतमः स्मृतः ॥")

यन्त्रणा, स्त्री, (यन्त्रि + "ण्यासश्रन्थो युच् ।" ३ । ३ । १०७ । इति युच् । टाप् ।) पीडा । यथा, नैषधे । ४ । १ ।
"मदनतापभरेण विदीर्य्य नो
यदुरभाजि हृदा दमयन्त्यः ।
निविडपीनकुचद्वययन्त्रणा
तदपराधमधात् प्रतिबध्नती ॥"
(पीडाशब्देऽस्या विशेषो विषयः ॥)

यन्त्रपेषणी, स्त्री, (पिष्यतेऽनयेति । पिष् । करणे ल्युट् । ङीप् । यन्त्रेण पेषणी ।) पेषणयन्त्रम् । इति जटाधरः ॥ जाँता इति भाषा ॥

यन्त्रिका, स्त्री, (यन्त्रयति छलकौतुकात् पीडयतीति । यन्त्रि + ण्वुल् । टापि अत इत्वम् ।) पत्न्याः कनिष्ठा भगिनी । यथा, हैमचन्द्रे ।
"कनिष्ठा श्यालिका श्याली यन्त्रिका केलिकुञ्चिका ॥"

यन्त्रित, त्रि, (यन्त्रि + क्तः ।) बद्धः । इति धरणिः ॥ (यथा देवीभागवते । ३ । १० । १० ।
"ते भृत्या धमदूर्त्ताश्च बलादाकृष्य यन्त्रिताम् ।
वेगमाना तूर्णं प्राप्य सुरभिं बाष्पलोचना ॥")

यन्त्री [न्] त्रि यन्त्रविशिष्टः । यन्त्रशब्दादस्त्यर्थे इन्प्रत्ययेन निष्पन्नः ॥ (यन्त्रयति बध्नातीति । यन्त्रि बन्धने + णिनि । बन्धनकारकः । यथा रामायणे । १ । १ । ७६ ।
"यन्त्रिणोऽस्त्रमावाय्य ब्रह्मा पैतामहाद् वरात् ।
मर्षयन् राक्षसान् वीरो यन्त्रिणस्तान् यदृच्छया ॥")

यभ औ मैथुने । इति कविकल्पद्रुमः ॥ (भ्वा-पर-अक-अनिट् ।) औ, अयाप्सीत् । यभति युवा । इति दुर्गादासः ॥

यम, औ उ विरतौ । इति कविकल्पद्रुमः ॥ (भ्वा-पर-अक०-अनिट् । क्त्वावेट् ।) औ, अयंसीत् । उ, यमित्वा यत्वा । विरतिर्निवृत्तिः । यच्छति पापात् साधुः । इति दुर्गादासः ॥

यम, ञ मि परिवेषणे । तदभावे । इति कविकल्पद्रुमः ॥ (चुरा-पर-सक०-सेट् ।) ञ, मि, यमयति यामयति । परिवेषणं चन्द्रादेर्वेष्टनम् । वेष्टनमित्यन्ये । विरहाभावाद्विषय इत्यन्ये इति रमानाथः । केचित्तु परिवेषण एवाय मित्याहुः । यमयत्यन्नं द्विजाय सुधीः । अन्ये तु नियामयति संयामयति इत्याहुः । अन्ये तु अपरिवेषण एवार्थे मामुनन्ति । 'नियमयति विमार्गप्रस्थितानात्तदण्डः' । इति शाकुन्तलम् । परिवेषणे तु याममयन्न द्विजाय सुधीः इत्याहुः । केचित्तु उभयस्य प्रामाणिकत्वादुभयत्र विकल्पं मामनामधात्वनुबन्ध कृतः । इति दुर्गादासः ॥

यम, पुं, (यमयति नियमयति जीवानां फलाफलमिति । यम् + अच् ।) दक्षिणदिक्पालः । तत्पर्य्यायः । धर्म्मराजः २ पितृपतिः ३ समवर्त्ती ४ परेतराट् ५ कृतान्तः ६ यमुनाभ्राता ७ शमनः ८ यमराट् ९ कालः १० दण्डधरः ११ श्राद्धदेवः १२ वैवस्वतः १३ अन्तकः १४ । इत्यमरः । १ । १ । ६१ ॥ धर्म्मः १५ धर्म्मराट् १६ जीवितेशः १७ महिषध्वजः १८ जीमूतः १९ दण्डधारः २० कीनाशः २१ दमः २२ महिषवाहनः २३ शीर्णपादः २४ भीमशासनः २५ काद्रः २६ हरिः २७ । इति शब्दरत्नावली ॥ कर्म्मकरः २८ । इति जटाधरः ॥ * ॥ चतुर्दश यमतर्पणं यथा,—
"यां कांचित् सरितं प्राप्य कृष्णपक्षे चतुर्द्दशीम् ।
यमुनायां विशेषेण नियतस्तर्पयेद्यमान् ॥
यमाय धर्म्मराजाय मृत्यवे चान्तकाय च ।
वैवस्वताय कालाय सर्व्वभूतक्षयाय च ॥
औडुम्बराय दध्नाय नीलाय परमेष्ठिने ।
वृकोदराय चित्राय चित्रगुप्ताय वै नमः ॥
एकैकस्य तिलैर्मिश्रांस्त्रींस्त्रीन् दद्यात् जलाञ्जलीन् ।
संवत्सरकृतं पापं तत्क्षणादेव नश्यति ॥"
इति तिथ्यादितत्त्वधृतब्रह्मपुराणवचनम् ॥ तस्योत्पत्तिर्यथा,—
"संज्ञा च रविणा दृष्टा निमीलयति लोचने ।
यतस्ततः सरोषोऽर्कः संज्ञां निष्ठुरमब्रवीत् ॥
मयि दृष्टे यदा यस्मात् कुरुषे नेत्रसंयमम् ।
तस्माज्जनिष्यसे मूढे ! प्रजासंयमनं यमम् ॥"
मार्कण्डेय उवाच ।
"ततस्तस्यास्तु स जज्ञे भर्त्तुशापेन तेन वै ।
यमश्च यमुना चेयं प्रख्याता सुमहानदी ॥"
इति मार्कण्डेयपुराणे वैवस्वतमन्वन्तरे ७७ अः ॥ पुण्यात्मनां यमस्य तस्य रूपं यथा,—
"तानागतांस्ततो दृष्ट्वा नरान् धर्म्मपरायणान् ।
भास्करिः प्रीतिमान् साक्षाद्रूपं नारायणो भवेत् ॥
चतुर्ब्बाहुः श्यामवर्णः प्रफुल्लकमलेक्षणः ।
शङ्खचक्रगदापद्मधारी गरुडवाहनः ॥
स्वर्णयज्ञोपवीती च सस्मितवदनाम्बुजः ।
किरीटी कुण्डली चैव वनमालाविभूषितः ॥"
पापिनां यमस्य तस्य रूपं यथा,—
"त्रिशद्योजनदीर्घाङ्गो वापीजलदलोचनः ।
धूम्रवर्णो महातीव्रः प्रलयाम्बोधरध्वनिः ॥
ज्वालाधिरोमवोमा च ज्वलदग्निशिखाधरः ।
नानाशस्त्रधुरः कृष्णो धर्म्मितमहाविषः ॥
दुरीक्षितः कर्म्मचिन्ता सर्व्वोपममहाबलिः ।
प्रचण्डमहिषारूढः संदष्टाग्रमस्तकः ॥
दण्डहस्तो धर्म्मराजो भ्रुकुटीकुटिलाननः ॥"
इति पाद्मे क्रियायोगसारे १५ अध्यायः ॥

अस्याधिकारो यथा,—
"प्रोवाच धर्म्मं यदहं ब्रवीमि
कार्य्यं मया तत् खलु धर्म्मराज ! ॥
ब्रह्मोवाच ।
ये मानवाः पुण्डरीकाक्षे कर्म्मणा मनसा गिरा ।
स्वकर्म्मनिरता दान्ता न नियम्या हि ते सदा ॥
श्रद्धया संपूजितो यैस्तु यैः कृष्णः सम्प्रपूजितः ।
यैश्च नित्यं स्मृतः कृष्णो न ते त्वद्विषयोपगाः ॥
नमः कृष्णाच्युतानन्त वासुदेवेत्युदीरितम् ।
यैर्भावभावितैर्नित्यं न ते त्वद्विषयोपगाः ॥
दाम इदङ्गिनैर्यस्तु मधुसूदन प्रीयतामिति ।
यज्ञैश्च ये परेशं न ते त्वद्विषयोपगाः ॥
उत्तिष्ठन्ति स्वपन्तश्च प्रस्खलन्तश्च ये नराः ।
ये स्मरन्ति जगन्नाथं न ते त्वद्विषयोपगाः ॥
धर्म्मवाक्यांस्तु ये शक्त्या उपकर्त्तुं चरन्ति च ।
तद्भावभाविता ये च न ते त्वद्विषयोपगाः ॥
स एव धाता सर्व्वस्य तन्नियोगकरो भवान् ।
यमसंयमने यस्य योऽप्यनुसंयमको हरिः ॥"
इति वह्निपुराणे नरकवर्णनाध्यायः ॥
अपि च ।
माधव उवाच ।
"यत् कृत्वा शमयेत् पुण्यं धर्म्मार्थकीर्तिवर्द्धनम् ।
प्रमाणं त्वं हि लोकानां सर्व्वं मे ब्रूहि तद्
यम ! ॥"
यम उवाच ।
यमो यम इति श्रुत्वा वृथा भुद्दितवैश्च ये ।
आत्मा च यमितो येन न तस्यैव यमः स्मृतः ॥
आनृशंस्यं क्षमा सत्यमहिंसा दम आर्जवम् ।
ध्यानं प्रसादो माधुर्य्यं सन्तोषश्च यमा दश ॥
यमैश्च नियमैश्चैव यः करोत्यात्मसंयमम् ।
स याति तु मां याति परं ब्रह्म सनातनम् ॥"
इति वह्नेर्यमदग्निप्रोक्ताख्यानम् ॥ * ॥
सावित्रीकृतं यमाष्टकं स्तोत्रं यथा,—
सावित्र्युवाच ।
"तपसा धर्म्ममाराध्य पुष्करे भास्करः पुरा ।
धर्म्मांशं यं सुतं प्राप धर्म्मराजं नमाम्यहम् ॥ १ ॥
समता सर्व्वभूतेषु यस्य सर्व्वस्य साक्षिणः ।
अतो यन्नाम शमनमिति तं प्रणमाम्यहम् ॥ २ ॥
येनान्तश्च कृतो विश्वे सर्व्वेषां जीविनां परम् ।
कर्म्मानुरूपकाले च तं कृतान्तं नमाम्यहम् ॥ ३ ॥
बिभर्त्ति दण्डं दण्डाय पापिनां शुद्धिहेतवे ।
नमामि तं दण्डधरं यः शास्ता सर्व्वजीविनाम् ॥ ४ ॥
विश्वं च कलयत्येव यः सर्व्वायुश्च सन्ततम् ।
अतीव दुर्निवार्य्यञ्च तं कालं प्रणमाम्यहम् ॥ ५ ॥
तपस्वी वैष्णवो धर्म्मी संयमी विजितेन्द्रियः ।
जीविनां कर्म्मफलदस्तं यमं प्रणमाम्यहम् ॥ ६ ॥
स्वात्मारामश्च सर्व्वज्ञो मित्रं पुण्यकृतां भवेत् ।
पापिनां क्लेशदो यस्तं पुण्यमित्रं नमाम्यहम् ॥ ७ ॥
यज्जन्म ब्रह्मणो वंशे ज्वलन्तं ब्रह्मतेजसा ।
यो ध्यायति परं ब्रह्म तमीशं प्रणमाम्यहम् ॥ ८ ॥
इत्युक्त्वा सा च सावित्री प्रणनाम यमं मुने ।
यमस्तां विष्णुभजनं कर्म्मपाकमुवाच ह ॥

इदं यमाष्टकं नित्यं प्रातरुत्थाय यः पठेत् ।
यमात्तस्य भयं नास्ति सर्व्वपापात् प्रमुच्यते ॥
महापापी यदि पठेत् नित्यं भक्त्या च नारद ।
यमः करोति तं शुद्धं कायव्यूहेन निश्चितम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २६ अध्यायः ॥ १ ॥
पारिभाषिकयमदृष्टा यथा,—
"कामिकस्य दिवास्वप्नरात्रिजागरणस्य च ।
यमस्य दृष्टा एते अल्पाहारी स जीवति ॥"
इति वैद्यकम् ॥ ७ ॥
("पङ्कमज्जवसातैलघृतगन्धाश्च ये नराः ।
स्वप्नगन्धाश्च ये यान्ति गन्धास्ते यमालयम् ॥
मूकाः ललाटमायान्ति यान्ति नासान्ति वायसाः ।
येषां वापि रतिर्नास्ति यातास्ते यमालयम् ॥"
इति सुश्रुते सूत्रस्थाने ११ अध्यायः ॥
अस्य प्रापद्दन्तान्तः प्राप्तान्तरदन्तान्तश्च यम
राजशब्दे द्रष्टव्यम् । ७ ।) शरीरसाधना
पेक्षनित्यकर्म्म । इत्यमरः । २ । ७ । ४९ ॥
"उपायान्तरनिरपेक्षं शरीरमात्रसाध्यं नित्य
यावज्जीवमवश्यकार्य्यं यत्कर्म्म सत्यास्तेयादि तद्
यमः । यमेरल् ।
'अहिंसा सत्यवचनं ब्रह्मचर्य्यमकल्कता ।
अस्तेयमिति पञ्चैते यमाश्चैव व्रतानि च ॥
इति मनुः ।" इति तट्टीकायां भरतः ॥
स च अष्टाङ्गयोगान्तर्गताङ्गविशेषः । स तु
दशविधो यथा,—
"ब्रह्मचर्य्यं दया क्षान्तिर्ध्यानं सत्यमकल्कता ।
अहिंसास्तेयमाधुर्य्ये दमश्चेते यमाः स्मृताः ॥"
इति गारुडे १०८ अध्यायः ॥ ७ ॥
स च पञ्चविधो यथा,—
"अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यापरिग्रहौ ।
यमाः पञ्च च नियमाः शौचं द्विविधमीरितम् ॥"
इति तत्रैव २३ अध्यायः ॥
"अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहा यमाः ।"
इति पातञ्जले साधनपादे ।३ । यच्छति नियच्छति
इन्द्रियग्राममनेनेति । यम+अप् ।)
संयमः । यथा अमरः । ३ । २ । १८ ।
"वियामो वियमो यामो यमः संयामसंयमौ ।"
काकः । शनिः । इति मेदिनी । मे २६ ।
(विष्णुः । यथा, महाभारते ।१३।१४९।२ ।
"अतीन्द्रः संग्रहः सर्गो धृतात्मा नियमो यमः ॥"
"अन्तयच्छतीति यमः ।" इति तद्भाष्ये शङ्करा
चार्य्यः ।)
यम, त्रि, (यच्छति एकस्य गर्भाशये निरतो
भवतीति । यम्+अच् ।) यमजः । इति
मेदिनी । मे, २६ ॥ तयोर्ज्येष्ठत्वनिरूपणं यथा,
"बहिर्गर्भस्य चाभिख्यादुयमयोः पूर्व्वजन्मतः ।
यस्य जातस्य यमयोः पश्यन्ति प्रथमं सुखम् ।
सन्तानं पितरश्चैव तस्मिन् ज्येष्ठं प्रतिष्ठितम् ॥
जन्मप्राधान्यात् ज्येष्ठः यमयोः न तु निषेक
प्राधान्यात् जन्मप्राधान्यशब्दैः सहदयमपाप
व्यात् ।" इति उद्वाहतत्त्वम् । (यथा —
"सोऽयं नर्म्मायुना भिन्नौ द्वौ जीवौ कृपमाणसौ ।
यमाविवाभिधीयेते धर्म्मेतरपुरःसरौ ।"
इति सुश्रुते शारीरस्थाने द्वितीयेऽध्याये ।
अनयोरेकस्य इतरापरस्य चैत्रसाकपनिरुत्त
माह ।
"कर्म्मात्मकत्वाद्विषमांशभेदात्
युक्तास्तु इद्धिमुपैति कुक्षौ ।
एकोऽधिको न्यूनतरो द्वितीय
एवं यमेऽप्यभ्यधिको विशेषः ॥"
इति चरके शारीरस्थाने द्वितीयेऽध्याये ।)
यमक, क्ली, (यमं युग्मभावं कायति प्राप्नोतीति ।
कै+कः ।) शब्दालङ्कारः । तस्य लक्षणादि
यथा,—
"सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः ।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते ॥
अत्र द्वयोरपि पदयोः क्वचित् सार्थकत्वं
क्वचिन्निरर्थकत्वं क्वचिदेकस्य सार्थकत्वमपरस्य
निरर्थकत्वमत उक्तं सत्यर्थे इति । तेनैव
क्रमेणेति दमो मोदः इत्यादेर्विभक्तविषयत्वं
सूचितम् । एतच्च पदपादार्द्धश्लोकावृत्तित्वेन
पादाद्यावृत्तेश्चानेकविधतया प्रभूततमभेद
मिति दिङ्मात्रमुदाह्रियते ।
नवपलाशपलाशवनं पुरः
स्फुटपरागपरागतपङ्कजम् ।
मृदुलतान्तलतान्तमलोकयत्
स सुरभिं सुरभिं सुमनोभरैः ॥
इति माघः । ६ । २ ।
अत्र पराग इति पलाशपलाशेति सुरभि
सुरभिमित्यत्र च द्वयोः सार्थकत्वम् । लतान्त
लतान्तेत्यत्र प्रथमस्य निरर्थकत्वं परागपरागे
त्यत्र द्वितीयस्य एवमन्यत्राप्यनुसर्त्तव्यम् । यम
कादौ भवेदैक्यं डलोर्व्वबोर्लरोस्तथा । इत्युक्त
नयात् । भुजलतां जडतामबलाजन इत्यत्र
न यमकत्वहानिः ।" इति साहित्यदर्पणे दशम
परिच्छेदः । १ । (यमकालङ्कारस्तु युग्मपाद
यमकायुग्मपादयमकाद्यन्तयमक पादमध्ययमक-
पादान्तयमक पादादियमक पादादिमध्ययमक
पादाद्यन्तयमक मध्यान्तयमक काञ्चीयमकाभे
यमकचक्रवालयमकयुग्मयमकमहायमकमिथुन
यमकान्तयमकविपथयमकसमुद्गयमकसर्व्वयमक
यमकावलीभेदात् बहुविधः । तत्तल्लक्षणोदाह
रणानि भट्टिकाव्ये दशमसर्गे यमकचक्रे काव्या
दर्शे दशमपरिच्छेदे च द्रष्टव्यम् । युद्धविशेषः ।
यथा, महाभारते । ४ । ३५ । ४२ ।
"ततो विराटस्य सुतः सव्यमावृत्य वाजिनः ।
यमकं मण्डलं कृत्वा तान् योधान् प्रत्यवारयत् ॥"
"यमकं युद्धको विरोधकं मण्डलं कृत्वा ।" इति
तट्टीकायां नीलकण्ठः । अस्त्रम् । यथा महा
भारते । २ । १९ । ८ ।
"मण्डलानि विचित्राणि यमकानीतराणि च ।
सव्यानि च विचित्राणि दर्शयामास धर्म्मवित् ॥"
"यमकानि अस्त्राणि ।" इति तट्टीकायां नील
कण्ठः ।) त्रि, यमजः । इति मेदिनी । के १३२ ।
यमकः, पुं, (यम्+भावे अप् । स्वार्थे कन् ।)
संयमः । इति मेदिनी । के, १३२ ।
यमकालिन्दी, स्त्री, (यमः कालिन्दी च सुतः सुता
च यस्याः ।) संज्ञा । सा च सूर्य्यपत्नी । इति
शब्दरत्नावली ।
यमकीटः, पुं, (यमरूपकः कीटः ।) घुघुरनामा
कीटः । इति त्रिकाण्डशेषः ।
यमकोटि, स्त्री, लङ्कायाः पूर्व्वे पृथिव्याश्चतुर्भागे
देशविशेषः । यथा,—
'लङ्का कुमध्ये यमकोटिरस्याः
प्राक्पश्चिमे रोमकपत्तनञ्च ।
अधस्ततः सिद्धपुरं सुमेरुः
सौम्येऽथ याम्ये वडवानलश्च ।
कुवृत्तपादान्तरितानि तानि
स्थानानि षड्गोलविदो वदन्ति ।"
इति सिद्धान्तशिरोमणिः ।
यमघण्टः, पुं, (यमं घण्टयतीति । घण्ट+
अण् ।) योगविशेषः । यथा,—
"द्वे मघापूर्व्वफल्गुन्यौ पुष्याश्लेषा च सन्धयो ।
ज्येष्ठानुराधा भरणी चाश्विनी कृत्तिकाहरे ।
हस्तार्द्रा चन्द्रभे मूला पूर्व्वाषाढा च रेवती ।
जीवे स्वातिभाद्रश्च शुक्रादि स्वातिरोहिणी ।
शनिवारे शतभिषा श्रवणा यमघण्टकः ॥"
इति सारसंग्रहः ।
अपि च ।
"घण्टोऽवश्यपशुतो सद्ददयतिश्ने सौम्यवार-
ऽर्य्यमापि ।"
अस्य वर्ज्यकालनिर्णयो यथा,—
"यमघण्टे रवेर्द्दौ मध्यौ द्वादश नाडिका ।
अन्येषां चापयोगानां मध्याह्नात् परतः शुभम् ॥"
अस्य दोषा यथा —
"एभिर्जातो न जीवेत यदि शक्रसमो भवेत् ।
विवाहे विधवा नारी यात्रायां मरणं भवेत् ॥
निष्फलं शास्त्रविद्यादि विद्यारम्भे च मूर्खता ।
गृहप्रवेशे भङ्गः स्याच्चूडायां मरणं ध्रुवम् ॥
आयदाने धर्म्मं नास्ति व्रतदाने च निष्फलम् ।
शुभकर्म्माणि सर्व्वाणि नैव कुर्य्याद्विचक्षणः ॥"
इति ज्योतिस्तत्त्वम् ।
रविवारे १० । ११ । सोमवारे ८ । ९ । मङ्गल
वारे १७ । १८ । १ । २ । बुधवारे १३ । ६ ।
बृहस्पतिवारे २९ । ३ । २६ । २७ । शुक्र
वारे १९ । ३ । शनिवारे २४ । २२ । इति
यमघण्टयोगः ।
यमजः, त्रि, (यमौ यमकं सन् जायते इति ।
जन्+डः ।) एकदैकगर्भजातयमजनाव-
द्वयम् । यथा मेदिनी । मे २६ ।
"यमोऽन्तकेऽन्तौ यमजे ना काके दमने द्वयौ ।"
(यथा च कथासरित्सागरे । ५३ । ८९ ।
"अथालपत्सोऽपि पुरोधा आहूतं प्राप्य
सोमदत्तः ।
वेदाध्ययनविचारात् शिष्याविष्टकौ
यमजौ ।")

अस्य ज्येष्ठत्व यमग्रब्दे द्रष्टव्यम्। (अन्यविशेषे पुं, यथा, भट्टौ। ६। १५२।
"एकेनाक्ष्णा क्षीणेन भिन्नेन च विहीनता ।
यमज शालिन विद्यात् सामर्थ्यं वामना-
क्षिणम् ।")

यमदग्नि पुं (यमत् हुतमधर्मशील प्रज्ज्वलितो ऽग्निरिव । पृषोदरादित्वात् साधु ।) ऋषिर्मुनिः । स तु परशुरामपिता । इति भरतद्विरूपकोष । (विवृतिरस्य जमदग्निशब्दे द्रष्टव्या ।)

यमदूत, पुं, (यमस्य दूतः ।) यमस्य चरः । यथा,—
"यमदूतपिशाचाद्यैर्यत् परास्त्रभयाप्लुते ।
बह्निरोपधयोऽप्यत्र समास्त्र परिवर्जयेत् ॥"
इति वाग्भटे शारीरस्थाने पञ्चमेऽध्याये ॥)
धर्म्म उवाच ।
"क एष विकटाकारा पापसुप्रचोदय ।
दंष्ट्राकरालवक्त्रा अङ्गारसदृशप्रभा ॥
एव सर्व्वे महाघोरा ज्वलत्पावकलोचना ।
कृता तथापि दुष्टाकमिव कथं सुदुर्गति ॥"
यमदूता ऊचुः ।
यमदूता वयं सर्व्वे यमाज्ञाकारिणः सदा ।
त्वद्दर्शनोऽपि विनाशाय समयाम कालतो
वय ॥"
इति पद्मपुराणे क्रियायोगसारे ६ अध्याय ॥

यमदूतक, पुं, (यमस्य दूत इवेति कन् ।) काकः । इति शब्दरत्नावली । (यमदूत + स्वार्थे कन् ।) यमदूतश्च ॥

यमदूतिका, स्त्री, (यमस्य दूतिकेव ।) तिन्तिडी वृक्ष । (यथा —
"जीर्णं शोषं हन्ति प्राणान् हन्ति समीरणं ।
क्रिमाशयं चारभूमौ प्रायशो यमदूतिका ॥"
इत्युद्भटः ।)

यमदेवता, स्त्री, (यमो देवता अधिष्ठात्री यस्याः ।) भरणीनक्षत्रम् । इति हेमचन्द्र । २ । २९ ॥

यमद्रुम पुं (यम इव भयप्रदो द्रुमः ।) शाल्मलि वृक्ष । इति राजनिर्घण्टः ॥ (विवरणमस्य शाल्मलिशब्दे ज्ञातव्यम् ॥)

यमद्वितीया, स्त्री, (यमप्रिया द्वितीया इति मध्यपदलोपिकर्म्मधारय ।) कार्त्तिकशुक्लद्वितीया । भ्रातृद्वितीया इति ख्याता । तत्कृत्यं यथा, लिङ्गपुराणे ।
"कार्त्तिके तु द्वितीयायां शुक्लायां भ्रातृपूजनम् ।
या न कुर्य्याद्विनश्यन्ति भ्रातरः सप्तजन्मनि ॥"
तस्या इति शेषः । महाभारते ।
"कार्त्तिके शुक्लपक्षस्य द्वितीयायां युधिष्ठिर ! ।
यमो यमुनया पूर्व्वं भोजितः स्वगृहे स्वयम् ।
तस्माज्जगत्यत्र नाथ ! न भोक्तव्यमतो बुधै ॥
यत्नेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनम् ।
दानानि च प्रदेयानि भगिनीभ्यो विधिवत ॥"
अन्यत्र ।
"यमञ्च चित्रगुप्तञ्च यमदूतांश्च पूजयेत् ।
अर्घ्यश्चात्र प्रदातव्यो यमाय सहजद्वयै ॥"
सहजद्वयैर्भगिनीभ्रातृभि । अर्घ्यमन्त्र ।
"एह्येहि मार्त्तण्डज पाशहस्त
यमान्तकालोकधरामरेश ।
भ्रातृद्वितीयाकृतदेवपूजां
गृहाण चार्घ्यं भगवन्नमस्ते ॥
धर्म्मराज नमस्तुभ्यं नमस्ते यमुनाग्रज ।
पाहि मां किङ्करैः सार्द्धं सूर्य्यपुत्र नमोऽस्तु ते ॥"
यमुनाञ्च सम्पूज्य नमस्कुर्य्यात् ।
"यमस्वसर्नमस्तेऽस्तु यमुने लोकपूजिते ।
वरदा भव मे नित्यं सूर्य्यपुत्रि नमोऽस्तु ते ॥"
अन्नं दत्त्वा पठेत् ।
"भ्रातस्तवानुजाताहं भुङ्क्ष्व भक्तमिदं शुभम् ।
प्रीतये यमराजस्य यमुनाया विशेषत ॥"
ज्येष्ठा चेत् तदा तवाग्रजाताहमिति वदेत् । अत्र भोक्तव्यं पुष्टिवर्द्धनं इति विधिवशाभिधानकुल-क्रमागता भोजननियमस्य प्राधान्यात्तस्य मुख्य-कालोऽविभक्तदिनपञ्चमांशो ग्राह्य । यथा दक्ष ।
"पञ्चमे च तथा भागे संविभागो यथार्हत ।
पितृदेवमनुष्याणां कीटानाञ्चोपदिश्यते ॥
संविभागं तत कृत्वा गृहस्थ शेषभुग्भवेत् ।
इतिहासपुराणाद्यै षष्ठञ्च सप्तमं नयेत् ॥"
संविभागो विभज्यान्नस्य प्रतिपादनम् । देवोऽत्र वैश्वदेवसम्बन्धी । पञ्चमांशानामि तु ।
"न शक्नोतीह यश्चेह कालद्वयमनाचरेत् ।
कालिन्दी कालिताय कालसन्ध्यावसीयत ॥"
इति मद्वलपर्ध्यन्तसर्व्वादस्तिकालोऽपि ग्राह्य । साहिच ज्ञप्ति । अत्र भोजनस्य रात्रावपि लक्षणम् ।
"सुनिभिर्दिवसं प्रोक्तं विप्राणां सहचारिणी
नित्यम् ।
अहनि च तथा तमस्विन्या सार्द्धप्रहरयामकम् ॥"
इति छान्दोग्यमन्त्रेण नियमितत्वाद्भोजनकालस्य विधेरेव प्राप्तत्वात् न सामान्यशास्त्रप्राप्तम् । अतिक्रम्योदासीनवृत्ति । अत्राप्यपनय भ्राता-नाम् । प्रतिपच्चीतरद्वितीयायां तत्रिषेधात् । यथा च रामार्च्चिके ।
"प्रे को वे वा द्वितीयाख्या प्रतिपच्ची यदि तु या ।
या तु कोजागरे याति चैत्राख्याः परापि च ॥
चातुर्मास्ये मखाद्धि च द्वितीया या भवेत्तिथि ।
सदाचेतासमभ्याय पुराणे परिकीर्त्तित ॥"
ज्योतिषे । तथा यमद्वितीयायां सायाह्ने मरणं भवेत् । इति तिथ्यादितत्त्वम् ॥ * ॥ अस्याव्रत विधानं यथा,—
नारद उवाच ।
"भगवन् ! प्रष्टुमिच्छामि सामर्थ्यं विनया
न्वित ।
सद्व्रत सृष्टि मे स्वामिन् । कस्य मैत्र न पश्यति ॥
अक्षयं कीर्त्तिमायुष्यं शोभनं व्रतमुत्तमम् ।
प्रसादं कुरु मे स्वामिन् । यथाहं तत् करोमि
भो ॥
ब्रह्मोवाच ।
यदि पृच्छसि विप्रेन्द्र व्रतानां व्रतमुत्तमम् ।
व्रतं यमद्वितीयाख्यं ब्रह्म शं यमुनाख्यम् ।
कार्त्तिके मासि शुक्लायां द्वितीयायां मुनीश्वर ॥
कर्त्तव्य तद्विधानेन सर्व्वपापविनाशनम् ।
ब्राह्मे मुहूर्त्ते चोत्थाय चिन्तयेन्मनसो विभुम् ।
स्नानं कृत्वा विधं चार्थं दत्त्वा यमपूजनम् ॥
तत शुक्लाम्बरधर शुक्लमाल्यानुलेपन ।
तत्तत्किरीटिनो धृत कुण्डलाङ्गदभूषित ।
विधिं विष्णुं बकं स(?)ञ्चाप्यौदुम्बरे द्रुमे ।
मध्ये सम्प्रदश्य तत्र पूजयेत् सुसमाहित ॥
चन्दनागुरुकर्पूरकुङ्कुमैर्बहुविधैस्तथा ॥
पुष्पैर्धूपैश्च नैवेद्यैर्नारिकेलादिभिः फलै ॥
वरदाने वरदां पीठां तुल्यमथाशिखीम् ।
ध्यायेत् शुक्लाम्बरधरा चन्द्राद्यर्द्धशिखाम् ।
ततो वस्तुविनाशार्थे धान्यद्वारे सपक्षिणीम् ।
विप्राय वेदविदुषे माल्यं दद्यात् सदक्षिणाम् ॥
अपमृत्युविनाशाय धर्म्मराजं विनारिकाम् ।
चिन्त्य सुन्दरीमीरीं दीर्घां धेनुं सवत्सां सुव्रताम् ॥
इति वाक्यविचारेण धेनुं दद्याद्विचारत ।
कुलीनाय सुशीलाय रोगहीनार्हणाय वै ।
तद्भावे चौदुम्ब मयख शाब्दिरणकम् ।
औदुम्बरविधानेन सम्प्रदद्याद्विचालये ।
तस्मात्सुखानि विप्रेन्द्र ! विप्राय कटुमाक्षो ।
दद्यात् कार्त्तिकशुक्लायां द्वितीयायां विधानत ॥
भ्रातृनिर्द्दिष्टात् तथा गृहात् सम्पूज्य चाभिवादयेत् ।
नारिकेलादिदानेन तोषयेत् स्वकान्यपि ॥
तत चौदनसम्पन्ना भगिनी धामवज्जले ॥
तस्या गृहे समागत्य अद्भ्यामपि रोगनाशयेत् ।
भद्रे भगिनि ! शुभगे त्वदङ्घ्रिपर्थीवदे ।
येष मन्त्रः नमस्कृतां गतोऽहं तवाश्रयम् ॥
इति श्रुत्वा भगिन्यादि भोज्य विनयाज्ञितम् ।
अर्घ्यादिसहितस्म पूजन क्रियते सदा ॥
अद्य भ्रातृमते आवत भो तथैव बान्धव ।
भोजनं भोज्य सर्व्वैः सद्गुणे कुलदीपक ॥
कार्त्तिके शुक्लपक्षस्य द्वितीयायां षशोदर ।
यमो यमुनया पूर्व्वं भोजित स्वयमर्चित ।
अस्मिन् दिने यमेनापि पूजिता भगिनी शुभा ॥
यदपरा चैत्रमास सो न शुक्ले
यमद्वितीयादिनमेव कर्म्म ।
स पापिनं कर्म्महरा प्रयुच्य
संसारमार्गे रटपान्ति विप ॥
तस्माद्धाता स्वगृहे भोजनं मासि कार्त्तिके ।
शुक्लायाञ्च द्वितीयायां सर्व्वेभ्योऽपि भो द्विज ॥
वर्षे वर्षे च कर्त्तव्य शाश्वती आयुषि चिर ।
तत सम्पूज्य सुमते भगिन्यै सुविधानत ॥
वस्त्राद्यलङ्कारदानादिदानसत्कारमादरात् ।
ग्रन्थाल्लिखितादू च प्रदद्याद्यत्नतः सुधी ॥
न चायेर्थे प्रयच्छन्ति नमस्कृत्य क्षमापयेत् ।
यश्चा प्रतिष्ठ्य कल्पोपदेशानुक्रमसत्करा ।
रक्षादधामसत्कारैर्भोज्यैः पुष्टिवर्द्धनैः ।
करोत्येव वरो विहाय बाधि सम्पदाम् ।

अपमृत्युं न चाप्नोति सत्यं सत्यं हि नान्यथा ॥
यैर्भगिन्यः सुवासिन्यो वस्त्रालङ्कारतोषिताः ।
न तेषां वत्सरं यावत् कलहो न रिपोर्भयम् ॥
धन्यं यशस्यमायुष्यं धर्मकामार्थसाधनम् ।
व्याख्यातं सकलं पुण्यं सरहस्यं मयानघ ॥
यस्यां तिथौ यमुनया यमराजदेवः
सम्भोजितो निजकरात् स्वसृसौहृदेन ।
तस्यां स्वसुः करतलादिह यो भुनक्ति
प्राप्नोति वित्तमतुलं स चिरायुरेव ॥"

इति पाद्मे उत्तरखण्डे १२५ अध्यायः ॥

यमधार, पुं (यमौ युग्मीभूतौ धारौ यस्य । यद्वा, यमवत् विनाशिका धारा यस्य ।) पार्श्वद्वय-धारायुक्तास्त्रविशेषः । किरीच काटार इत्यादि भाषा ॥

यमनं, क्ली, (यम् + भावे ल्युट् ।) बन्धनम् । उपरतिः । इति मेदिनी । ने, १११ ॥ (उद्यम । यथा, हरिवंशे भविष्यपर्व्वणि । १६ । ४८ ।
"सुवर्णमनमासीत् यतस्त्वं यामनाह्वया ।
मत्प्रभुर्निरोधयति यमवद् यतिष्यसि ॥")

यमन, पुं (यमयति नियमयतीति । यम् + ल्यु ।) यमः । इति मेदिनी । ने, १११ ॥ (यमयति ग्रामं यतीन्द्रियग्राममिति । संयमकर्त्तरि, त्रि । यथा, माजसनेयसंहितायाम् । ८ । २२ ।
"यन्ताऽसि यमनो ध्रुवोऽसि धरुणः ।"
"यमनः स्वयं संयमनकर्त्ता भवसि ।" इति तद्भाष्ये महीधरः । नियमकारिणि च त्रि । यथा, तत्रैव । १४ । २२ ।
"यन्त्री राड् यन्त्र्यसि यमनी ध्रुवासि धरित्री ।"
"यमनी सर्व्वेषां नियमकारिण्यसि ।" इति तद्भाष्ये महीधरः ।)

यमनिका, स्त्री, (यच्छति व्याप्नोतीति । यम् + ल्युट् । कन् । टाप् ।) यवनिका । इत्यमरटीकायां रामाश्रमः । कानात् इति भाषा ॥

यमपत्नी, स्त्री, (यमस्य पत्नी ।) यमस्य भार्य्या । यमस्य द्वे भार्य्ये । धूमोर्णा १ विजया २ । इति जटाधरः ॥

यमप्रियः, पुं, (प्रीयातीति । प्री + क । यमस्य प्रियः ।) वटवृक्षः । इति शब्दरत्नावली ॥

यमभगिनी, स्त्री (यमस्य भगिनी स्वसा ।) यमुना । इति हेमचन्द्रः । ४ । १४९ ॥

यमराज, पुं (यमश्चासौ राजा चेति । "राजाहः सखिभ्यष्टच् ।" ५।४।९१ । इति टच् ।) यमः । इति हेमचन्द्रः । २।९८ ॥ अस्य पुर्य्यादि यथा,
"पुरी संयमनी तस्य विचारभूस्तु वैधकः ।
भार्य्या धूमोर्णा चैव विजया प्रिये ।
विचारभूमिका सौधि संज्ञाया कालपूरुषः ॥"

इति जटाधरः ॥ * ॥

स च विमात्रा छायया शप्तः । (यथा, मार्कण्डेये । ७७ । २५—२९ ।
'छायासंज्ञा स्वपत्येषु यथा स्वेष्वतिवत्सला ।
तथा न संज्ञाकन्यायां पुत्रयोश्चाप्यवर्त्तत ॥
लालनाद्युपभोगेषु विशेषमनुवासरम् ।
मनुस्तत्क्षान्तवानस्या यमस्तस्या न चक्षमे ॥
ताडनाय च वै कोपात् पादस्तेन समुद्यतः ।
तस्याः पुनः क्षान्तिमता न तु देहे निपातितः ॥
ततः शशाप तं कोपात् छायासंज्ञा यमं द्विज ।
किञ्चित् प्रस्फुरमाणौष्ठी विचलत्पाणिपल्लवा ॥
पितुः पत्नीममर्य्यादं यन्मां तर्ज्जयसे पदा ।
भुवि तस्मादयं पादस्तवाद्यैव पतिष्यति ॥")
तच्छापान्तं यथा,—
"स्वरूपधारिणीं चैनामागिनाय निजाश्रमम् ।
संज्ञां भार्य्यां प्रीतिमतीं भास्करो वारितस्करः ॥
तत्र पूर्व्वसुतो योऽस्याः सोऽभूद्वैवस्वतो मनुः ।
द्वितीयस्तु यमः शापाद्धर्म्मदृष्टिरभूत् सुतः ॥
क्रिमयो मांसमादाय पादतोऽस्य महीतलम् ।
पतिष्यन्तीति शापान्तं तस्य चक्रे पिता स्वयम् ॥
धर्म्मदृष्टिर्यतश्चासौ समो मित्रे तथाहिते ।
ततो नियोगं तं याम्ये चकार तिमिरापहः ॥
यमुना च नदी चक्रे कलिन्दान्तरवाहिनी ॥"

इति मार्कण्डेयपुराणे वैवस्वतमन्वन्तरे । ७८ । २५—२९ ॥

यमराट्, [ज्] पुं (प्राणिसंयमनात् यमश्चासौ किङ्करादिषु राजते यमेन संयमेन राजते इति वा । राज + क्विप् । इत्यमरटीकायां रघुनाथः ।) यमः । इत्यमरः । १ । १ । ६१ ॥

यमलं, क्ली, (यमं लातीति । ला + क ।) युग्मम् । इति हेमचन्द्रः । ६ । ६ ॥ (त्रि, यमजः । यथा, देवीभागवते । १ । १८ । ५ ।
"सुमिथानमयौ जातौ यमलौ द्वौ मनोहरौ ।
तौ जातौ वै किशोराव धनुर्बाणधरौ किल ॥")

यमलच्छद, पुं (यमलं यमं च्छदमस्य । बहुव्रीहौ कप् ।) अश्मन्तकवृक्षः । कोविदारवृक्षः । इति राजनिर्घण्टः ॥

यमलार्ज्जुनहा, [न्] पुं (यमलार्ज्जुनौ हतवान् इति । हन् + क्विप् ।) श्रीकृष्णः । इति हेमचन्द्रः ॥

यमलार्ज्जुनौ पुं, (यमलौ च तावर्ज्जुनौ चेति कर्म्मधारयः ।) गोकुलस्थार्ज्जुनवृक्षद्वयम् । तौ कुवेरपुत्रौ नलकूवरमणिग्रीवौ । नारदशापात् वृक्षतां गतौ श्रीकृष्णेन उद्धारितौ । यथा,—
"यन्मौ कोशपालस्य पुत्रौ भूत्वा तमोगुणौ ।
न विदाथ यमात्मानं विमानौ च सदुर्मदौ ॥
अतोऽर्हत स्थावरतां स्यातां नैवं यथा पुनः ।
स्मृतिः स्यान्मत्प्रसादेन तत्रापि मदनुग्रहात् ॥
वासुदेवस्य सान्निध्यं लब्ध्वा दिव्यशरच्छते ।
वृत्ते स्वर्लोकतां भूयो लब्धभक्ती भविष्यथः ॥

श्रीशुक उवाच ।

स एवमुक्त्वा देवर्षिर्गतो नारायणाश्रमम् ।
नलकूवरमणिग्रीवावासतुर्यमलार्ज्जुनौ ॥
ऋषेर्भागवतमुख्यस्य सत्यं कर्त्तुं वचो हरिः ।
जगाम शनकैस्तत्र यत्रास्तां यमलार्ज्जुनौ ॥
देवर्षिर्मे प्रियतमो यदिमौ धनदात्मजौ ।
तत्तथा साधयिष्यामि यद्गीतं तन्महात्मना ॥
इत्यन्तरेणार्ज्जुनयोः कृष्णस्तु यमयोर्ययौ ।
आत्मनिर्वेशमात्रेण तिर्य्यग्गतमुलूखलम् ॥
बालेन निष्कर्षतान्वगुलूखलं तत्
दामोदरेण तरसोत्कलिताङ्घ्रिबन्धौ ।
निष्पेततुः परमविक्रमितातिवेप-
स्कन्धप्रवालविटपौ कृतचण्डशब्दौ ॥
तत्र श्रिया परमया ककुभः स्फुरन्तौ
सिद्धावुपेत्य कुजयोरिव जातवेदाः ।
कृष्णं प्रणम्य शिरसाखिललोकनाथं
बद्धाञ्जली विरजसाविदमूचतुः स्म ॥
वाणी गुणानुकथने श्रवणौ कथायां
हस्तौ च कर्म्मसु मनस्तव पादयोर्नः ।
स्मृत्यां शिरस्तव निवासजगत्प्रणामे
दृष्टिः सतां दर्शनेऽस्तु भवत्तनूनाम् ॥

श्रीभगवानुवाच ।

तद्गच्छतं मत्परमौ नलकूवर सादनम् ।
सञ्जातो मयि भावो वामीप्सितः परमोऽभवः ॥

श्रीशुक उवाच ।

इत्युक्तौ तौ परिक्रम्य प्रणम्य च पुनः पुनः ।
बद्धोलूखलमामन्त्र्य जग्मतुर्दिशमुत्तराम् ॥"

इति श्रीभागवते १० स्कन्धे १० अध्यायः ॥

यमली स्त्री, (यमल + स्त्रियां ङीष् ।) चोलिकाख्ययुग्मम् । इति मेदिनी । ले, १२६ ॥ चोटी घाटीपर्य्याये हेमचन्द्रेण गदिता चैव चोटिका ॥

यमवाहनः, पुं (यमस्य वाहनम् ।) महिषः । इति हेमचन्द्रः । ४ । ३३० ॥ (तथास्य पर्य्यायः ।
"महिषो घोटकारिः स्यात् कासरश्च रजस्वलः ।
लोलकण्ठः सक्थकायो सुलायो यमवाहनः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

यमव्रतं, क्ली, (यमस्य धर्म्मराजस्येव व्रतम् ।) राजधर्म्मविशेषः । स तु पक्षपातं विना प्राणिनां शासनरूपः । इति पुराणम् ॥

यमस्वसा, [ऋ] स्त्री (यमस्य स्वसा भगिनी ।) यमुना । दुर्गा । इति मेदिनी । सौ ६० ॥ (यमुना हरिवंशे भविष्यपर्व्वणि । १८ । ४ ।
"तथा च विजया च त्वं तुष्टिः पुष्टिः क्षमा दया ।
ज्येष्ठा यमस्य भगिनी नीलकौशेयवासिनी ॥")

यमानिका स्त्री (यमानी + स्वार्थे कन् ।) यमानी । तत्पर्य्यायः । ब्रह्मदर्भा १ उग्रगन्धा २ ब्रह्मदर्भा ३ । इत्यमरः । २ । ४ । १४९ ॥
"यमानिं ब्रह्मदर्भाम् । यमानी द्विविधा एका

शैलयवानी वा यवमोदा इत्येव ख्याता। यवदा यमानी इत्येव ख्याता अविद्यत्वात् यवोदयीति इभृतिः। केचित्तु यवमोदादिश्य यवयमान्यां प्रकरभादिश्य यमान्यामित्याहुः। उग्रगन्धाजमोदाख्या ख्याता चैवयमानिका इति। 'यमानी दीप्यको दीप्यो भूतिकश्च यमानिका। इति च रत्नः। यच्छति विरमति निवर्त्तते अग्निमान्द्यमनया यमानी। यमौ उ विरतौ मान्तीति कनट् ईप च यमानी स्वार्थे के यमानिका यमानी यवमधगपचमनयेत्या। यवानीति च पाठः पच्यते मथ्या इति केचित्।" इति भरतः॥ ● ॥ अस्या गुणाः। कृमिशूलनाशित्वम्। रूक्षत्वम्। पित्ताधिकारित्वम्। वातकफशूलाध्मानघ्नत्वञ्च। इति राजवल्लभः॥

यमानी, स्त्री (यच्छति विरमति निवर्त्तते अग्निमान्द्यमनयेति। यम + करणे ल्युट्। ङीष्। पृषोदरादित्वात् साधुः।) यमानिका। इति शब्दरत्नावली। (पर्य्यायो यथा,
"यमानी दीपको दीप्यो भूतिकश्च यमानिका॥"
इति वैद्यकरत्नमालायाम्॥)

यमान्तकः, पुं (यमस्यान्तकः। मृत्युञ्जयत्वादेवास्य तथात्वम्।) शिवः। इति शब्दरत्नावली। (यमश्च अन्तकश्च तौ इति विग्रहे। वैवस्वत कालौ। यथा, महाभारते। ७।१०।१५।
"तेऽप्यस्त्रसमूहाय यमया तस्थिरे युधि।
यमान्तकसमं क्रोधे प्रिया वैश्रवणोपमम्॥"
"यमो वैवस्वत अन्तकः कालः।" इति तट्टीकायां नीलकण्ठः॥)

यमी, स्त्री यमुनानदी। इति त्रिकाण्डशेषः। (यथा, श्रीमद्भागवते। ८।१३।९।
"तृतीयां वडवामेके तासां संज्ञासुतास्त्रयः।
यमो यमी श्राद्धदेवश्छायायाश्च सुतान् शृणु॥")

यमुना, स्त्री, (यमयतीति। यमि + "अजियमि शीङ्भ्यश्च।" उणा० ३।६१। इति उनन्। टाप्।) दुर्गा। यथा —
"ऋक्षाणि क्रूरपक्षाणि मङ्गलानि शुभानि च।
ददाति वीक्षितान् लोके तेन सा धर्म्मसम्भवा।
यमुनामप्रमाणा लोके देवी विभावरी।
यमस्य भगिनी जाता यमुना तेन सा मता॥"
इति देवीपुराणे ४५ अध्यायः॥ ● ॥ यच्छति विरमति गङ्गायामिति। नदीविशेषः। सा तु हिमालयपश्चिमदेशादि गेभ्यः प्रयागे गङ्गायां मिलिता। तत्पर्य्यायः। कालिन्दी २ सूर्य्यतनया ३ शमनस्वसा ४। इत्यमरः।१।१०।३२। तपनतनूजा ५ कलिन्दकन्या ६ यमस्वसा ७ श्यामा ८ तापी ९ कलिन्दनन्दिनी १० यमनी ११ यमी १२। इति शब्दरत्नावली। कलिन्दशैलजा १३ सूर्य्यसुता १४। इति जटाधरः॥ (यथा,—
"गङ्गा सरस्वती नीचगङ्गा सरयूः शची।
वैणा इरावती भीमा चन्द्रभागा पूर्णवाहिनी॥"
इति भारते प्रथमे खण्डे षष्ठेऽध्याये॥)

अस्या जलगुणाः। पित्तदाहवमनश्रमापहत्वम्। स्वादुत्वम्। पाचनजनकत्वम्। पावनत्वम्। वह्निदीपनकरत्वम्। रोचनत्वम्। बलप्रदत्वञ्च। इति राजनिर्घण्टः॥ ● ॥ सा यमस्य भगिनी। यथा —
"सावर्णिर्जज्ञे तु तपो घोरं चकार ह।
अद्यापि भविता लोके मनुः सावर्णिकेऽन्तरे।
भ्राता शनैश्चरश्चास्य ग्रहत्वं स तु लब्धवान्।
तयोर्यवीयसी या तु यमजा यमुना स्मृता।
अभवत् सा सरिच्छ्रेष्ठा यमुना लोकपावनी॥"
इति वह्निपुराणे धामरोपाख्यानम्॥ ● ॥ सा च वृन्दावने सुषुम्नाख्या परा शक्तिः। यथा,
श्रीभगवानुवाच।
"इदं वृन्दावनं रम्यं मम धामैव केवलम्।
अत्र ये पशवः पक्षिमृगाः कीटा नराधमाः।
ये वसन्ति ममाधिष्ण्ये मृता यान्ति ममालयम्।
अत्र या गोपकन्याश्च निवसन्ति ममालये।
योगिन्यस्तास्तु एवं हि मम सेवा परायणाः।
पञ्चयोजनमेवं हि वनं मे देहरूपकम्।
कालिन्दीयं सुषुम्नाख्या परमामृतवाहिनी॥"
इति पाद्मे पातालखण्डे ७ अध्यायः॥ ● ॥ अस्या जलस्य श्यामवर्णत्वकारणं यथा,—
पुलस्त्य उवाच।
"यदा दक्षसुता ब्रह्मन्! सती याता यमक्षयम्।
विनाश्य दक्षयज्ञं तं विचचार त्रिलोचनः।
ततो वृषध्वजं दृष्ट्वा कन्दर्पः कुसुमायुधः।
अपत्नीकं तदास्त्रेण उन्मादेनाभ्यताडयत्।
ततो हरः शरेणाथ उन्मादेनाभिताडितः।
विचचार तदारण्यं काननानि सरांसि च।
स्मरन् सतीं महादेवस्तथोन्मादेन ताडितः।
न शर्म्म लेभे देवेशो बाणविद्ध इव द्विपः।
ततः पपात देवेशः कालिन्दीसरितं मुने।
निमग्ने शङ्करे चापि दग्धा श्यामत्वमागता।
तदाप्रभृति कालिन्द्या भृङ्गाञ्जननिभं जलम्॥"
इति वामने ६ अध्यायः॥ ● ॥
ज्यैष्ठशुक्लद्वादश्यादिष्वस्यां स्नानविशेषफलं यथा,—
"ज्यैष्ठमूलमसद्वादश्यां स्नात्वा वै यमुनाम्भसि।
मथुरायां हरिं दृष्ट्वा प्राप्नोति परमां गतिम्।
यमुनासलिले स्नातः पुरुषो मुनिसत्तम!।
ज्यैष्ठामूलामले पक्षे द्वादश्यामुपवासकृत्।
समभ्यर्च्याच्युतं सम्यक् मथुरायां समाहितः।
अश्वमेधस्य यज्ञस्य प्राप्नोत्यविकलं फलम्।
ज्यैष्ठामले सिते पक्षे समभ्यर्च्य जनार्द्दनम्।
धन्यो न पिण्डनिर्वापं यमुनायां प्रदास्यति॥"
इति विष्णुपुराणे ६ अंशे ८ अध्यायः॥

यमुनाजनकः, पुं (यमुनाया जनकः।) सूर्य्यः। इति हेमचन्द्रः। २।८॥

यमुनाभिद् [द्] पुं, (यमुनां भिनत्तीति। भिद् + क्विप्।) बलदेवः। इति हेमचन्द्रः। २।१३८॥ (एतद्वृत्तान्तस्तु यथा, हरिवंशे। १०२। ११—२६।
"स पूर्वोक्तमनाद्यैश्च कृष्टे यस्य महानदीम्।
चकर्ष यमुनां रामो युवतीं वनितामिव।
सा विह्वलजलस्रोता ह्रदप्रस्थितसञ्चया।
व्यावर्त्तत नदी भीता हलमार्गानुसारिणी।
लाङ्गलाकृष्टमार्गा सा वेगगा वक्रगामिनी।
संकर्षणभयत्रस्ता योषिदाकुलतां गता॥")

यमुनाभ्राता, [तृ] पुं, (यमुनाया भ्राता।) यमः। इत्यमरः। १।१।६१॥

यमेरुका स्त्री, (यमं ईरयति प्रेरयतीति। ईर + बाहुलकात् उक। टाप्।) दक्का। इति त्रिकाण्डशेषः॥

ययातिः, पुं, नहुषराजपुत्त्रः। तत्पर्य्यायः। नाहुषिः २। इति त्रिकाण्डशेषः। नाहुषः ३। इति जटाधरः। तस्योपाख्यानं यथा —
"नहुषस्य प्रवक्ष्यामि पुत्त्रान् सप्तैव धार्म्मिकान्।
यतिर्ययातिः संयातिरायातिः पञ्चमोऽयतिः।
आयातिर्म्मेघयातिश्च यतेस्ते वंशवर्द्धनाः।
ययातिरभवद्राजा धर्म्मैकशरणस्तदा।
शर्म्मिष्ठा तस्य भार्य्याभूत् दुहिता वृषपर्व्वणः।
भार्गवस्यात्मजा तद्वद्देवयानी च सुव्रता।
ययातेर्देवयान्यान्तु पुत्त्रावजनयत् शुभौ।
यदुश्च तुर्व्वसुश्चैव शक्रविष्णू इवापरौ।
तस्मादेव तु राजर्षेः शर्म्मिष्ठा वार्षपर्व्वणी।
द्रुह्युञ्चानुञ्च पूरुञ्च त्रीन् कुमारानजीजनत्।
ततः काले च कस्मिंश्चिद्देवयानी शुचिस्मिता।
ययातिसहिता राजन् जगाम रहितं वनम्।
ददर्श च तदा तत्र कुमारान् देवरूपिणः।
क्रीडमानान् सुविस्रब्धान् विस्मिता चेदमब्रवीत्।
किन्नामधेयं गोत्रं वः पुत्त्रकाः! ब्राह्मणः पिता।
विब्रूत मे यथातथ्यं श्रोतुमिच्छामि तं ह्यहम्।
तेऽदर्शयन् प्रदेशिन्या तमेव नृपसत्तमम्।
श्रुत्वा च सहसा देवी शर्म्मिष्ठामिदमब्रवीत्।
ममाधीना सती कस्मादकार्षीर्विप्रियं मम।
शर्म्मिष्ठोवाच।
यदा त्वया वृतो राजा वृत एव तदा मया।
अतो हि मे पूज्यतमो राजर्षिः किं न वेत्थ तत्।
शौनक उवाच।
श्रुत्वा तस्यास्ततो वाक्यं देवयान्यब्रवीदिदम्।
राजन्नाद्येह वत्स्यामि विप्रियं मे त्वया कृतम्।
अचिरादेव सम्प्राप्ता काव्यस्योशनसोऽन्तिके।
देवयान्युवाच।
शर्म्मिष्ठयातिवृत्तास्मि दुहित्रा वृषपर्व्वणः।
त्रयोऽस्यां जनिताः पुत्त्रा राज्ञानेन ययातिना।
दुर्भगाया मम द्वौ तु पुत्त्रौ तात! ब्रवीमि ते।
शुक्र उवाच।
धर्म्मज्ञः सन् महाराज! योऽधर्म्ममकृथाः प्रियम्।
तस्माज्जरा त्वामचिराद्धर्षयिष्यति दुर्जया।
ययातिरुवाच।
ऋतुकामां स्त्रियं यस्तु गम्यां रहसि याचितः।
नोपैति स च धर्म्मेषु भ्रूणहेत्युच्यते बुधैः।

अधर्मभयवित्रस्तः शर्मिष्ठामुपगम्य ताम् ।
अतृप्तो यौवनस्याहं देवयान्या भृगूद्वह ! ।
प्रसादं कुरु मे ब्रह्मन् जरेयं मा विशेत माम् ।
शुक्र उवाच ।
नाहं मृषा ब्रवीम्येतत् जरां प्राप्तोऽसि भूमिप ! ।
जरां त्वेतां त्वमन्यस्मिन् संक्रामय यदीच्छसि ।
यो दास्यति वयः पुत्रो यः स ते राजा भविष्यति ।"
इति मात्स्ये ३२ अध्यायः ॥ * ॥
शौनक उवाच ।
"जरां प्राप्य ययातिस्तु स्वपुरं प्राप्य चैव हि ।
पुत्रं ज्येष्ठं वरिष्ठञ्च यदुमित्यब्रवीद्वचः ॥
त्वं यदो ! प्रतिपद्यस्व पाप्मानं जरया सह ।
यौवनेन त्वदीयेन चरेयं विषयानहम् ॥
पूर्णे वर्षसहस्रे तु पुनस्ते यौवनं त्वहम् ।
दत्त्वा स्वम्प्रतिपत्स्यामि पाप्मानं जरया सह ॥
यदुरुवाच ।
सन्ति ते बहवः पुत्रा मत्तः प्रियतरा नृप ! ।
जरां ग्रहीतुं धर्मज्ञ ! पुत्रमन्यं वृणीष्व वै ।
ययातिरुवाच ।
यो मे त्वं हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
मातामहकुलमस्मात् दुष्प्रजा ते भविष्यति ।
तुर्वसो ! प्रतिपद्यस्व पाप्मानं जरया सह ।
यौवनेन चरेयं वै विषयांस्तव पुत्रक ! ॥
तुर्वसुरुवाच ।
न कामये जरां तात ! कामभोगप्रणाशिनीम् ।
बलरूपान्तकरणीं बुद्धिमानविनाशिनीम् ॥
ययातिरुवाच ।
यस्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
तस्मात् प्रजा समुच्छेदं तुर्वसो ! तव यास्यति ॥
द्रुह्यो ! त्वं प्रतिपद्यस्व वर्णरूपविनाशिनीम् ।
जरां वर्षसहस्राणि यौवनं स्वं प्रयच्छ च ॥
द्रुह्युरुवाच ।
न गजं न रथं नाश्वं जीर्णो भुङ्क्ते न च स्त्रियम् ।
वाग्भङ्गश्चास्य भवति तां जरां ते न कामये ॥
ययातिरुवाच ।
यस्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
तस्माद्द्रुह्यो ! प्रियः कामो न ते सम्पत्स्यते क्वचित् ॥
अनो ! त्वं प्रतिपद्यस्व पाप्मानं जरया सह ।
एकं वर्षसहस्रन्तु चरेयं यौवनेन ते ॥
अनुरुवाच ।
जीर्णः शिशुवदादत्ते कालेऽन्नमशुचिर्यथा ।
न जुहोति च कालेऽग्निं तां जरां नैव कामये ॥
ययातिरुवाच ।
यस्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
जरादोषस्त्वयोक्तो मे तस्मात्त्वं प्रतिपत्स्यसे ॥
पूरो ! मे त्वं प्रियः पुत्रः त्वं वरीयान् भविष्यसि ।
जरावलीप्रभवः प्राप्तः पलितञ्च ममोपरि ॥
पूरो ! त्वं प्रतिपद्यस्व पाप्मानं जरया सह ।
किञ्चित्कालं चरेयं वै विषयान् वयसा तव ॥
पूर्णे वर्षसहस्रे तु प्रतिदास्यामि यौवनम् ।
स्वञ्चैव प्रतिपत्स्यामि पाप्मानं जरया सह ॥
शौनक उवाच ।
एवमुक्तः प्रत्युवाच पूरुः पितरमञ्जसा ।
यथात्थ त्वं महाराज ! तत् करिष्यामि ते वचः ॥
ययातिरुवाच ।
पूरो ! प्रीतोऽस्मि ते वत्स प्रीतश्चेदं ददामि ते ।
सर्वकामसमृद्धा ते प्रजा राज्ये भविष्यति ॥"
इति मात्स्ये ३३ अध्यायः ॥ * ॥
शौनक उवाच ।
"पौरवेणाथ वयसा ययातिर्नहुषात्मजः ।
प्रीतियुक्तो नरश्रेष्ठश्चचार विषयान् सुखी ॥
पूर्णं मत्वा ततः कालं पूरुं पुत्रमुवाच ह ।
पूरो ! प्रीतोऽस्मि भद्रं ते गृहाणेदं स्वयौवनम् ॥
राज्यञ्चापि गृहाणेदं यत् त्वयोपहृतं पुरा ॥
शौनक उवाच ।
एवं स नाहुषो राजा ययातिः पुत्रमीप्सितम् ।
राज्येऽभिषिच्य मुदितो वानप्रस्थोऽभवन्मुनिः ॥
उषित्वा वनवासं स ब्राह्मणैः सह संश्रितः ।
फलमूलाशनो दान्तो यथा स्वर्गमितो गतः ॥"
इति मात्स्ये ३५ अध्यायः ॥ * ॥

ययी, पुं (यायते प्राप्यते भक्तैरिति । या + "यापोः किद्द्वे च" । उणा० ४ । १५८ । इति इः द्वित्वञ्च ।) महादेवः । इत्युणादिकोषः ॥ १।६५० ॥ (यातिहृष्टं गच्छतीति । अच् । इत्युज्ज्वलदत्तः ॥)

ययुः, पुं (यातीति । या + "यो द्वे च ।" उणा० १ । २२ । इति उः द्वित्वञ्च । यजत्यनेनेति । यज + उ । पृषोदरादित्वात् जस्य यत्वमित्यमरटीकायां रघुनाथः ।) अश्वमेधीयाश्वः । सामान्यघोटकः । इति मेदिनी । ये ४० ॥

यवः, पुं (यूयते मिश्र्यते इति । यु मिश्रणे + अप् ।) स्वनामख्यातशूकधान्यम् । तत्पर्य्यायः । सितशूकः २ । इत्यमरः । २ । ९ । १५ ॥ तीक्ष्णशूकः ३ । इति शब्दरत्नावली ॥ मेध्यः ४ दिव्यः ५ अक्षतः ६ कञ्चुकी ७ धान्यराजः ८ तीक्ष्णशूकः ९ तुरगप्रियः १० शक्तुः ११ महेष्टः १२ पवित्रधान्यम् १३ । तस्य गुणाः । कषायत्वम् । मधुरत्वम् । सुशीतलत्वम् । प्रमेहपित्तकफापहारकत्वञ्च । अमूकक्षयघ्नगुणाः । बलप्रदत्वम् । रूक्षत्वम् । वृष्यत्वम् बहुवीर्य्यपुष्टिदत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"यवः कषायमधुरो बहुवातशकृद्गुरुः ।
रूक्षः स्थैर्य्यकरः शीतो मूत्रमेदःकफापहः ॥"
इति राजवल्लभः ॥ * ॥
(अपि च ।
"यवः कषायो मधुरो हिमश्च
कटुर्विपाके कफपित्तहारी ।
व्रणेषु पथ्यस्तिलवच्च नित्यं
प्रबद्धमूत्रो बहुवातवर्च्चाः ॥
स्थैर्य्याग्निमेधास्वरवर्णकृच्च
स पिच्छिलः स्थूलविलेखनश्च ।
मेदोमरुत्तृड्हरणोऽतिरूक्षः
प्रसादनः शोणितपित्तयोश्च ॥
एभिर्गुणैर्हीनतरास्तु किञ्चिद्-
विद्याद्यवेभ्योऽतियवान् विधिज्ञः ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ।
"रूक्षः शीतो गुरुः स्वादुर्बहुवातशकृद्यवः ।
स्थैर्य्यकृत् स कषायस्तु बल्यः श्लेष्मविकारनुत् ॥
रूक्षः कषायानुरसो मधुरः कफपित्तहा ।
मेदःकृमिविषघ्नश्च बल्यो वेणुयवः स्मृतः ॥"
इति चरके सूत्रस्थाने २७ अध्याये ।
"कथिताख्याभिधानेऽपि प्रक्रियन्ते यथा यवपदस्य कङ्गुप्रभृतौ म्लेच्छानां दीर्घशूके च आर्य्याणां प्रयोगादेकमात्रशक्तेः परिच्छेत्तुमशक्यत्वात् नानार्थत्वस्य चान्याय्यत्वात् यवमयश्चरुर्भवतीति श्रुतौ यवपदस्यार्थसन्देहे ।
'वसन्ते सर्व्वशस्यानां जायते पत्रशातनम् ।
मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः ॥'
इति विध्यर्थवाक्यशेषात् प्रवर्त्तमानाज्ज्ञातप्रकारे दीर्घशूक एव यवपदस्य शक्तिग्रहः ।" इति शब्दशक्तिप्रकाशिकायां नैमित्तिकव्याख्यायाम् ॥ * ॥ हविष्ये यवानामेव मुख्यत्वम् । यथा —
"हविष्येषु यवा मुख्यास्तदनु व्रीहयः स्मृताः ।
माषकोद्रवगौरादि सर्व्वालाभेऽपि वर्जयेत् ॥"
इति कात्यायनसंहिता । ८ । १ ॥
नवयवागमे वैदवश्य श्राद्धं कार्य्यमकरणे प्रत्यवायश्रवणात् । यथा —
"नवसस्यमेवोद्भूतं दृष्ट्वा प्राप्तलोकमे ।
इच्छाश्राद्धानि कुर्व्वीत नवसस्यागमे तथा ॥"
इति विष्णुपुराणात् नवमाख्यबहुतरवचनेषु नवान्नश्राद्धमत्रैव निमित्तावधारणात् ।
"अमावस्यातिथौ योऽकृत्वा भागी पौर्णमस्यां लभ्य
सद्योऽग्नौ मौहितयवाकौ च ।
एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः ।
श्राद्धमेतेष्वकुर्व्वाणो नरकं प्रतिपद्यते ॥"
इति श्राद्धतत्त्वे नवान्नश्राद्धे ॥)
परिमाणविशेषः । स तु चतुर्थांशमानरूपः । इति शुभङ्करः । षट्सर्षपपरिमाणात्मकश्च । यथा —
"जालान्तरगते भानौ यत्सूक्ष्मं दृश्यते रजः ।
तैश्चतुर्भिर्भवेल्लिक्षा लिक्षाषड्भिश्च सर्षपः ।
षट्सर्षपैर्यवस्त्वेको गुञ्जैका तु यवैस्त्रिभिः ॥"
इति शब्दचन्द्रिका ॥ * ॥
अङ्गुलिस्थयवाकाररेखाविशेषः । यथा,—
"तर्ज्जनीमध्यपर्व्वस्थो यवो धनप्रदो भवेत् ।
मध्यमायां यवश्चैवाङ्गुष्ठेऽप्यूर्ध्वगस्तथा ॥"
अपि च सामुद्रके ।
"मध्यमायां यदि यवो दृश्यते च शुभोदयः ।
तदाश्चर्य्यं धनं प्राप्नोत्यतुलं कुशले भवे ।
अङ्गुष्ठेऽपि च मध्यस्थे यवपूर्णश्च दृश्यते ।
तदा विमानसंयोगाल्लभते ध्रुवम् ॥"
(पुंल्लिङ्गः । यथा वाजसनेयसंहितायाम् । १३ । ३१ । "इडवि प्रतानु वत प्रवा पक्षम्वर्मा यवः श्रावयन्ताधिपतय आसन् ।" "यथा पूर्व्वं प्रथा यवसा यवरयसा ।" इति तट्टीकायां महीधरः ।)

यवक, पुं (यवप्रकारः। यव+"स्थूलादिभ्यः प्रकारवचने कन्।"५।४।३। इति कन्।) यव। इत्यमरटीकायां रामाश्रमः॥ (यथा,—
"यवका हायनाः पांशुवाप्यनैषधकादयः।
शालीनां शालयः कुर्वन्त्यनुकारं गुणैर्गुणैः॥"
इति चरके सूत्रस्थाने २७ अध्याये॥)

यवक्य त्रि, (यवकानां भवनं क्षेत्रमिति। यवक+"यवयवकषष्टिकाद्यत्।" ५। २। ३। इति यत्।) यवकभवोचितक्षेत्रम्। इत्यमरः। २। ९। ७॥

यवक्षारः पुं (यवजातः क्षारः। शाकपार्थिववत् समासः।) क्षारविशेषः। यथा —
"नवसारयवक्षारस्फटिकादिव एव काचवत्
यतौ।
वक्तुम् माल्य चार्वं सहि महामहकसाम॥"
इति रत्नावली॥

तत्पर्य्यायः। यवाग्रज २ पाक्यम् ३। इत्यमरः। २।९।१०८॥ यवसारः ४ यवशूक ५ क्षारकः ६ रेचक ७ यवनालजः ८। इति शब्दरत्नावली॥ पाक्यशूकः ९ क्षारः १० शस्यं ११ शौल्योद्भव १२ यवनालज १३ इति रत्नमाला॥ यवजः १४ यवशूकज १५ यवाह्व १६ यवापत्यम् १७। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। कफवातोदरार्त्तिनाशित्वम्। आमशूलाध्मानकण्ठानुशलविष-दोषहरत्वम्। सरत्वञ्च। इति राजनिर्घण्टः॥ अर्शःश्वासगुल्मपाण्डुप्लीहानाहयकृदामनाशित्वञ्च। इति राजवल्लभः॥ (तथा च।
"शाक्यः क्षारो यवक्षारो यवशूको यवाग्रजः।
यवक्षारो लघुः स्निग्धः सुसूक्ष्मो वह्निदीपनः॥
निहन्ति शूलवातामश्लेष्मश्वासगलामयान्।
पाण्ड्वर्शोग्रहणीगुल्मानाहप्लीहहृदामयान्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

यवचोरः, पुं, (यवानां चौरः।) यवचूर्णम्। तत्पर्य्यायः। चिपिट २। इति हेमचन्द्रः॥

यवाशः, पुं (यूनो गजः स्फोटकः। पृषोदरादित्वात् साधुः।) व्रणभेदः। इति शब्दरत्नावली॥ यवस्फोटा इति भाषा॥

यवज, पुं, (यवाज्जायते इति। जन्+ड।) यवक्षारः। इति रत्नमाला॥ (यथास्य पर्य्याय।
"शाक्यशूको यवक्षारो यवशूको यवाग्रजः।
क्षारश्चोद्गारश्चोत्तरसो यवजो यवनालजः॥"
इति वैद्यकरत्नमालायाम्॥)
यवानी। इति राजनिर्घण्टः॥

यवजीदरी, स्त्री (यवजादुद्भवोऽस्य।) तवक्षीरम्। इति राजनिर्घण्टः॥

यवतिक्ता, स्त्री, लताविशेषः। शङ्खिनीति यस्याः इति च ख्याता। (यथा सुश्रुते सूत्रस्थाने ४५ अः।
"यवतिक्तातैलं सर्व्वदोषप्रशमनमीषत्तिक्तम्।
अग्निदीपनं मेध्यं पथ्यं रसायनञ्च॥")
तत्पर्य्यायः। महातिक्ता २ तृणपाम्बिलिनी ३ नाकुली ४ नेत्रमीला ५ शाङ्खिनी ६ पत्रवल्ली ७ तक्तुली ८ अक्षपीडा ९ सूक्ष्मपुष्पी १० यशस्विनी ११ माहेश्वरी १२ तिक्तपर्णा १३ यासी १४ तिक्ता १५। अस्या गुणाः। अतितिक्तत्वम्। दीपनत्वम्। रुचिकारित्वम्। कृमिकुष्ठविषव्याधिदोषनाशित्वम्। रेचनत्वञ्च। इति राजनिर्घण्टः॥

यवतैल क्ली (यवनिर्म्मितं तैलम्।) यवचूर्णादिप्रस्तुततैलविशेषः। तत्प्रकार गुणश्चाह।
"यवचूर्णार्द्धकुडवं प्रक्षिप्याग्निवलेन तु।
तैलप्रस्थं प्रयत्नेन पाचितं साधितो भवेत्।
ज्वरदाहमहापित्तप्रशमनाय प्रशस्यकम्॥"
इति शब्दकोषः॥

यवद्वीप, पुं, (यवनामा द्वीपः इति मध्यपद-लोपिकर्म्मधारयः।) उपद्वीपविशेषः। यावा इति भाषा। यथा,—
"यत्नवन्तो यवद्वीपं सप्तराज्योपशोभितम्।
सुवर्णरूप्यकं द्वीपं सुवर्णाकरमण्डितम्॥"
इति वाल्मीकीये रामायणे किष्किन्ध्याकाण्डे ४० सर्गे॥ "अत्र यद्वं यत्नवन्तो भूत्वा सप्तराज्योपशोभितं यवद्वीपं तथा सुवर्णद्वीपं विचिनुतेति शेषः। सुवर्णाकरमण्डितमिति सुवर्णं कुर्व्वन्ति ये तैः शोभितम्।" इति रामायणतिलकनामटीका॥

यवन, पुं, देशविशेषः। (यथा, माघे। १०। ४३।
"तान् दस्यून् शातयन्ति स्म म्लेच्छप्रायान् स्वकान् भटः।
शकैकान् कुकुरान् रौमान् बर्व्वरान् यवनान्
खशान्॥")
वेगः। वेगाधिकाश्वः। इति मेदिनी॥ गोधूमः। गर्जरस्थम्। तुरुष्कः। इति राजनिर्घण्टः॥ (यौति मिश्रीभवतीति। यु+"सुयुरुवृञो युच।" उणा २। ७४। इति युच्।) जातिविशेषः। इति शब्दरत्नावली॥ स तु यवनदेशोद्भवयातिराजपुत्रतुर्व्वसुवंश्यः। यथा —
"यदोस्तु जाता यदवस्तुर्व्वसोर्यवनाः सुताः।
द्रुह्योस्तु तनया भोजा अनोस्तु म्लेच्छजातयः।
पूरोस्तु पौरवो वंशो यत्र जातोऽसि पार्थिव॥"
इति मात्स्ये ३४ अध्यायः॥

सगरराजेनैषां सर्व्वशिरोमुण्डनं धर्म्मधर्म्मरोहित्यञ्च कृतं ते चात्मधर्म्मपरित्यागात् म्लेच्छतां ययुरिति विष्णुपुराणोक्तत्वात् यवनं भीतम् मालेच्छदेशोद्भवजातिवाचकः। यवनशब्दस्य यकारस्तालव्यादिरिति रघुनन्दनभट्टाचार्य्येण लिखितम्॥ अयं स्त्रीयाम् सर्व्वधर्म्मादिविवर्ज्जित-इत्यपि। यथा,—
"सगरस्तां प्रतिज्ञाञ्च गुरोर्वाक्यं निशम्य च।
धर्म्मं जघान तेषां वै वेषान्यत्वं चकार च॥
अर्द्धं शकानां शिरसो मुण्डयित्वा व्यसर्ज्जयत्।
यवनानां शिरः सर्व्वं काम्बोजानां तथैव च॥
पारदा मुक्तकेशाश्च पह्लवाः श्मश्रुधारिणः।
निःस्वाध्यायवषट्काराः कृतास्तेन महात्मना॥
शका यवनकाम्बोजाः पारदाः पह्लवास्तथा।
कोलिसर्पा समहिषा दार्व्वाश्चोलाः सकेरलाः॥
सर्व्वे ते क्षत्रियगणा धर्म्मस्तेषां निराकृतः।
वशिष्ठवचनाद्राजन् सगरेण महात्मना।

प्रकारं शकदेशोद्भवानां चक्रियाणां एवं तत्र जातीयानामिति। अत्र यवनशब्दस्यादेर्योऽन्तःस्थवर्गीयतीयाद्यः। यवनो देशविशेषादिति विकारबोधकाभिधानदर्शनात्। तेषां म्लेच्छत्वमप्युक्तं विष्णुपुराणे। तथा हि तान् यवनादीन् प्रकम्य। ते चात्मधर्म्मपरित्यागात् म्लेच्छतां ययुरिति। बौधायनः।
"गोमांसखादको यश्च विरुद्धं बहु भाषते।
सर्व्वाचारविहीनश्च म्लेच्छ इत्यभिधीयते॥"
इति प्रायश्चित्ततत्त्वम्॥
यवनादीनां राज्यकालो यथा —
"अष्ट गर्द्दभिनश्चापि शकाश्चाष्टादश स्मृताः।
यवनाष्टौ भविष्यन्ति तुषाराश्च चतुर्द्दश॥
अष्टौ ते यवना राज्यं वर्षाणां परिसङ्ख्यया।
भोक्ष्यन्तीति मतश्च वेऽपि गर्द्दभिनः स्मृताः॥
शतानि त्रीणि वर्षाणां अशीतीनि शतानि वै।
शकानां राज्यकालं खाहविष्या निबधी
मत॥
शतस्यार्द्धं चतुर्याति वर्षाणां राज्यभागिनः।
मवसानां सुताः काला भविष्यं भोक्ष्यन्ति वै
महीम्॥
सप्तसप्तति चाष्टौ तथाशी म्लेच्छधर्म्मणः।
भोक्ष्यन्ति राज्यं प्रायेण भविष्ये तद्धि भारतम्॥
शतानि त्रीणि वर्षाणां पौण्ड्रा राज्यधुर
स्मृताः।
अधुना पार्व्वतेयास्तु वै द्वे परिसङ्ख्यया॥
शतान्यर्द्धमथ तथा राज्यं भोक्ष्यन्ति ते नृपाः।
यवनांश्चैव वर्षाणि दशात्तीयाश्च स्मृताः॥
तेषु च्छन्नेषु कालेषु तत किलकिला नराः।
भविष्यन्तीह यवना धर्म्मतः कामतोऽर्थतः॥
तैर्विमिश्रा जनपदा आर्य्या म्लेच्छाश्च सर्व्वशः।
विपर्य्ययेण वर्त्तन्ते क्षयिष्यन्ति वै प्रजाः॥
लुब्धानिक्षत्रचैव गवितारश्च दा कृषा।
तेषां व्यतीते पर्य्याये बहुपत्नुप्रजाश्च दा॥
रात्रौ च अपरयुञ्जन्ति कालेन महता नरः।
कल्किना व्याहृताः सर्व्वे आर्य्या म्लेच्छाश्च
सर्व्वशः॥
अधार्म्मिकाश्च ये सर्व्वे पापस्थाश्चैव सर्व्वशः।
तुष्टे कृपतिशब्दे वै यन्धारित्रे च वै कली॥"
इति मत्स्यपुराणे ९८ अध्यायः॥
राशिविशेषः। यथा,—
"आस दिनं तूषयते वसिष्ठ
याटौ च मयौ यवनो दधारश।
अक्षादयमाथ किल भागुरिक
इत्ये विवादे तुरवमवेद॥"
इति तिथ्यादितत्त्वम्॥ ७॥
कालयवनोत्पत्तिर्यथा —
पराशर उवाच।
"गार्ग्यं गोष्ठे द्विजं श्यालः षण्ढ इत्युक्तवान् द्विज।
यदूनां सन्निधौ सर्व्वे जहसुर्यादवास्तदा॥
ततः कोपसमाविष्टो दक्षिणापथमेत्य सः।
सुतमिच्छंस्तपस्तेपे यदुचक्रभयावहम्॥

आराधयन्महादेवं सोऽयचूर्णमभक्षयत्।
ददौ वरञ्च तुष्टोऽस्मै वर्षे द्वादशमे हरः ॥
सन्तोषयामास च तं यवनेशो ह्यनात्मजः।
तद्योषित्सङ्गमाच्चास्य पुत्रोऽभूदलिसन्निभः ॥
तं कालयवनं नाम राज्ये स्वे यवनेश्वरः।
अभिषिच्य वनं यातो वज्राग्रकठिनोरसम् ॥
स तु वीर्य्यमदोन्मत्तः पृथिव्यां बलिनो नृपान्।
पप्रच्छ नारदस्तस्मै कथयामास यादवान् ॥
म्लेच्छकोटिसहस्राणां सहस्रैः सोऽभिसंवृतः।
गजाश्वरथसम्पन्नैश्चकार परमोद्यमम् ॥
प्रययौ चाव्यवच्छिन्नं छिन्नयानो दिने दिने।
यादवान् प्रति सामर्षो मैत्रेय मथुरां पुरीम् ॥
कृष्णोऽपि चिन्तयामास क्षपितं यादवं कुलम्।
यवनेन रणे गम्यं मागधस्य भविष्यति ॥
मागधस्य बलं क्षीणं स कालयवनो बली।
हन्ता तदिदमायातं यदूनां व्यसनं द्विधा ॥
तस्माद्दुर्गं करिष्यामि यदूनामतिदुर्जयम्।
स्त्रियोऽपि यत्र युध्येयुः किं पुनर्वृष्णिपुङ्गवाः ॥"
"इति सञ्चिन्त्य गोविन्दो योजनानि महोदधिम्।
ययाचे द्वादश पुरीं द्वारकां तत्र निर्म्ममे ॥
मथुरावासिनो लोकांस्तत्रानीय जनार्द्दनः।
आसन्ने कालयवने मथुराञ्च स्वयं ययौ ॥
बहिरावासिते सैन्ये मथुराया निरायुधः।
निर्जगाम स गोविन्दो ददर्श यवनश्च तम् ॥
स ज्ञात्वा वासुदेवं तं बाहुप्रहरणो नृपः।
अनुयातो महायोगिचेतोभिः प्राप्यते न यः ॥
तेनानुयातः कृष्णोऽपि प्रविवेश महागुहाम्।
यत्र शेते महावीर्य्यो मुचुकुन्दो नरेश्वरः ॥
सोऽपि प्रविष्टो यवनो दृष्ट्वा शय्यागतं नरम्।
पादेन ताडयामास कृष्णं मत्वा स दुर्म्मतिः ॥
दृष्टमात्रश्च तेनासौ जज्वाल यवनोऽग्निना।
तत्क्रोधजेन मैत्रेय भस्मीभूतश्च तत्क्षणात् ॥"
इति विष्णुपुराणे ५ अंशे २३ अध्यायः ॥

यवन त्रि, (यौतीति । यु + "जुचङ्क्रम्येति।" ३। २। १५० । इति युच् ।) वेगी । इति मेदिनी । ने, १११ ॥ (यथा नैषधचरिते । १ । ६५ ।
"सममेव समाक्रमन्द्वयं
द्विपदेन्द्रो यवनाध्वपार्थिवं
प्रकाशरूपा मनुजेशमन्वयुः ।")

यवनद्विष्ट पुं (यवनैर्द्विष्टः । विद्धप्रियत्वात् तथात्वम् ।) गुग्गुलुः । इति राजनिर्घण्टः ॥

यवनप्रिय क्ली (यवनानां प्रियम् ।) मरिचम् । इति हेमचन्द्रः । ३ । ४८ ॥ (विवरणमस्य मरिचशब्दे ज्ञातव्यम् ॥)

यवनाचार्य्य पुं (यवनो नामाचार्य्यः ।) ज्योतिःशास्त्रकर्त्तृमुनिविशेषः । इति वराहमिहिरः ॥

यवनानी, स्त्री (यवनानां लिपि । "यवनाल्लिप्याम् ।" ४ । १ । ४९ । इति वार्त्तिकोक्त्या ङीष् आनुगागमश्च ।) यवनस्य लिपिः । इति मुग्धबोधटीकायां दुर्गादासः ॥

यवनारि, पुं (यवनानामरिः । यवनं कालयवनं अरिर्वेत्तीति वा ।) श्रीकृष्णः । इति त्रिकाण्डशेषः ।

यवनाल पुं, (यवानां नाला इव नाला यस्य ।) धान्यविशेषः । देधान् इति भाषा । तत्पर्य्यायः । योनालः २ जूर्णाह्वयः ३ देवधान्यम् ४ जोन्नाला ५ बीजपुष्पिका ६ । इति हेमचन्द्रः । ४ । २४४ ॥ (यथा, सुश्रुते उत्तरतन्त्रे १५ अध्याये ।
"यवनालस्य चूर्णेन त्रिकटोर्लवणस्य च ।
छेदयित्वा ततः पश्चाद्धीयात् कुशलो भिषक् ॥")

यवनालज, पुं (यवानां नालेभ्यो जायते इति । जन् + डः ।) यवक्षारः । इति हेमचन्द्रः । ४ । ९ ॥ (यथा वैद्यकरत्नमालायाम् ।
"पाक्यो ह्यक्षो ह्यारसो यवजो यवनालजः ॥")

यवनिका स्त्री (युनात्याच्छादयत्यनया । यु + ल्युट् । ङीप् । स्वार्थे कन् । टाप् ।) जवनिका । रङ्गमरटीका । कानात् इति भाषा । (यथा, भागवते । १ । ८ । १९ ।
"मायायवनिकाच्छन्नमज्ञाधोक्षजमव्ययम् ।
न लक्ष्यसे मूढदृशा नटो नाट्यधरो यथा ॥")

यवनी, स्त्री, (यूयते पच्यते सुखमनया । यु + ल्युट् । ङीप् ।) यवानीनामकौषधिभेदः । इति मेदिनी । ने, ११२ ॥ (यवनस्य स्त्रीति । यवन + ङीष् ।) यवनभार्य्या । (यथा, रघुः । ४ । ६१ ।
"यवनीमुखपद्मानां सेहे मधुमदं न सः ।
बालातपमिवाब्जानामकालजलदोदयः ॥")

यवनेष्ट क्ली (यवनानां इष्टम् ।) सीसकम् । इति हेमचन्द्रः । ४ । १०० ॥ मरीचम् । रक्तलशुनम् । इति राजनिर्घण्टः ॥

यवनेष्ट पुं (यवनानामिष्टः ।) लशुनः । राजपलाण्डुः । निम्बः । पलाण्डुः । इति राजनिर्घण्टः ॥ (तथास्य पर्य्यायः ।
"पलाण्डुर्यवनेष्टश्च दुर्गन्धो मुखदूषकः ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

यवप्रख्या, स्त्री (यव इति प्रख्या यस्याः ।) क्षुद्ररोगविशेषः । तल्लक्षणं यथा, भावप्रकाशे ।
"यवाकारा सुकठिना ग्रथिता मांससंश्रिता ।
पीडका श्लेष्मवाताभ्यां यवप्रख्येति सोच्यते ॥"
यवाकारा मध्ये स्थूला प्रान्ते तन्वी । तच्चिकित्सा यथा,—
"यवप्रख्यां यवप्रख्यां पूर्व्वं स्वेदैरुपाचरेत् ।
मनःशिलादेवदारुकुष्ठकल्कैः प्रलेपयेत् ।
पक्वां व्रणविधानेन यथोक्तेन प्रसाधयेत् ॥"

यवफल, पुं (यववत् फलमस्य ।) वंशः । इत्यमरः । २ । ४ । १६१ ॥ जटामांसी । कुटजः । इति मेदिनी । ले १६२ ॥ (अस्य पर्य्यायो यथा
"कुटजः कुटजः कौटो वत्सको गिरिमल्लिका ।
कालिङ्गः शक्रशाखी च मल्लिकापुष्प इत्यपि ।
इन्द्रो यवफलः प्रोक्तो वृक्षकः पाण्डुरद्रुमः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥)
पलाण्डुः । इति शब्दरत्नावली ॥

यवमध्य क्ली, (यवस्य मध्यं यत्र ।) चान्द्रायणभेदः । यथा —
"पिपीलिकामध्यं यवमध्यञ्च चान्द्रायणं प्रोक्तं यतिचान्द्रायणं तथा ।
यवमध्यं तथा प्रोक्तं तथा पिपीलिकाकृति ॥"
इति प्रायश्चित्ततत्त्वम् ॥
(पुं यवभेदः । यथा, शतपथब्राह्मणे । १०।६।१।९।
"यवमध्यः पञ्चरात्रो भवति ॥"
यवाकारमध्ये, त्रि । यथा, सुश्रुते चिकित्सास्थाने १ अध्याये ।
"शराविन्यलज्जाश्च यवमध्याश्चयापरे ।
एवंप्रकाराः ह्यल्पी भवन्त्यागन्तवो व्रणाः ॥")

यवमय, त्रि, (यवस्य विकारोऽवयवो वा । यव + "नित्यं वृद्धशरादिभ्यः ।" ४।३।१४४ । इति मयट् ।) यवनिर्म्मितः । यवशब्दात् मयट् प्रत्ययेन निष्पन्नः ॥ (यथा, शतपथब्राह्मणे ।२। २ । ३ । १३ ।
"अर्कपलाशाभ्यां यवमयमपूपं कृत्वा यथा हविर्यज्ञस्य न भवति तन्निदधाति ॥")

यवलास, पुं (यवात् लासो यस्य ।) यवक्षारः । इति शब्दरत्नावली ॥ (विशेषोऽस्य यवक्षारशब्दे ज्ञातव्यः ॥)

यवशूक, पुं, (यवानां शूकः कारणत्वेनास्त्यस्य । अर्शआद्यच् ।) यवक्षारः । इति त्रिकाण्डशेषः ॥ (यथास्य पर्य्यायः ।
"यावशूको यवक्षारो यवशूको यवाग्रजः ।
पाक्योऽत्र ह्यक्षो ह्यारसो यवजो यवनालजः ॥"
इति वैद्यकरत्नमालायाम् ॥)

यवशूकज, पुं (यवशूकात् जायते इति । जन् + डः ।) यवक्षारः । इति राजनिर्घण्टः ॥ (विवरणमस्य यवक्षारशब्दे ज्ञातव्यम् ॥)

यवस, क्ली, (यौतीति । यु + "वहियुभ्यां णित् ।" उणा ३ । ११८ । इत्यसच् । बाहुलकत्वात् न वृद्धिः ।) तृणम् । घासः । इत्यमरः ।२।४।१६७॥ (यथा, मनौ । ७ । ७५ ।
"तत्स्यादायुधसम्पन्नं धनधान्येन वाहनैः ।
ब्राह्मणैः शिल्पिभिर्यन्त्रैर्यवसेनोदकेन च ॥")

यवसुर, स्त्री, (यवनिर्म्मिता सुरा । "सुराश्वा-च्छायाशालानिशा स्त्रियाम् ।" सिद्धान्तकौमुद्यां नपुंसकाधिकारे १२ । इति क्लीबत्वम् ।) यव आससुरा । इति सिद्धान्तकौमुदी ॥

यवागू, स्त्री (यूयते मिश्र्यते इति । यु + "यवतेरगुच् ।" उणा ४ । ८१ । इति आगूच् ।) बहुद्रवसिद्धतण्डुलादिद्रवविशेषः । याउ इति भाषा । तत्पर्य्यायः । उष्णिका २ श्राणा ३ विलेपी ४ तरला ५ । इत्यमरः । २ । ९ । ४९ ॥ "यूयते मिश्र्यते याचते तु न मिश्र्यते वाधौति नाम गुरुः । औष्ण्येन हिनस्ति ज्वरादिरोगमिति उष्णिका उष्ण च इति पूर्व्ववत् कन् । श्राणा पच्यते स्म श्राणा । मा च माऊं च शृताचोत्ति णः । लिम्पति विलेपी लिपी ज्ञ च हेरे मनाग्भावात् । तरति क्रीप् । तरति तरलो त तरोऽस्मिन् तरल मुग्ध भावात् च ।

"अत्र यवगुणे सार्थं विशेषो न चतुर्गुणे ।
मधुच्चतुर्गुणे यवागू षड्गुणेऽम्भसि ॥
इति वैद्यकोक्तो भेदः इह ज्ञातव्यः ।" इति तट्टीकायां भरतः ॥ अस्या गुणाः ।
"यवागूर्ज्वरघ्नाग्नी लघ्वी वस्तिविशोधनी ।
अतीसारे ज्वरे दाहे हिता वह्निप्रदीपनी ।"
इति राजवल्लभः ।
(अथास्या गुणा चरके ।
"क्षुद्बोधनी वस्तिकरी यवागू
सम्पाचनी दोषमलाशयानाम् ।
सन्तर्पणी धातु बलेन्द्रियाणां
युक्ता भवेत् सा ज्वररोगिणाञ्च ।
भागैकञ्च यवानाञ्च षड्भागेन जलं क्षिपेत् ।
विमर्द्य पिण्डीभूतञ्च विपचेच्च यथाक्रमम् ।
धान्यकस्य समांशानि पिप्पली चैव तत्समम् ।
संयुक्ता विपचेत् किञ्चित् सा यवागूर्निगद्यते ॥
यवागूस्तु पथ्यकारी लघ्वी वातविनाशनी ।
श्लेष्ममारुतसंयुक्ता यवागूः श्लेष्मदुर्ज्जरा ।"
इति हारीते प्रथमस्थाने १२ अध्याये ।
"यवागूः षड्गुणजले सिद्धा स्याद्विरला घना ।
यवागूर्ग्राहिणी बल्या तर्पणी वातनाशिनी ।"
इति मध्यखण्डे द्वितीयेऽध्याये शार्ङ्गधरेणोक्तम् ।)

यवाग्रज, पुं (यवाग्रात् जायते इति । जन्+डः ।) यवक्षारः । इत्यमरः । २ । ९ । १०८ ॥ (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"पाक्य क्षारो यवक्षारो यावशूको यवाग्रजः ।")
यवानी । इति राजनिर्घण्टः ॥

यवान', त्रि, (यवेन वेगेन अनिति जीवतीति । अन्+अच् ।) वेगी । इति मेदिनी । ने, १११ ॥

यवानिका, } स्त्री, (दुष्टो यवः । "यवाद्दोषे ।"
यवानी, } ४ । १ । ४९ । इत्यस्य वार्त्तिकोक्त्या ङीष् आनुगागमश्च । पक्षे स्वार्थे कन् ।) योयाधिर' । योयानि इति भाषा । तत्पर्य्यायः । दीप्यकः २ दीप्यः ३ यवसाह्वः ४ यवानः ५ दीपनी ६ उग्रगन्धा ७ वातारिः ८ भूकदम्बकः ९ मदनः १० दीपनीयः ११ शूलहन्त्री १२ यवानिका १३ उग्रा १४ तीव्रगन्धा १५ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । वातार्त्तिश्लेष्मगुल्माध्मानक्रिमिहारित्वम् । दीपनत्वञ्च । इति राजनिर्घण्टः ॥ अपि च । अथ यवान्या नामगुणाः ।
"यवानिकोग्रगन्धा च ब्रह्मदर्भाजमोदिका ।
सैवोक्ता दीप्यका दीप्या तथा स्याद्यवसाह्वया ॥
यवानी पाचनी रुच्या तीक्ष्णोष्णा कटुका लघुः ।
दीपनी च तथा तिक्ता पित्तला शुक्रशूलहृत् ।
वातश्लेष्मोदरानाहगुल्मप्लीहक्रिमिप्रणुत् ॥
अथ अजमोदाया नामानि गुणाश्च ।
अजमोदा खराह्वा च मयूरो दीप्यकस्तथा ।
तथा ब्रह्मकुशा प्रोक्ता कारवी लोचमस्तका ॥
अजमोदा कटुस्तीक्ष्णा दीपनी कफवातनुत् ।
उष्णा विदाहिनी हृद्या वृष्या बलकरी लघुः ॥
नेत्रामयकृमिच्छर्द्दिहिक्कावस्तिरुजो हरेत् ॥
अथ खुरासानीयवानीनामगुणाः ।
पारसीकयवानी तु यवानीसदृशी गुणैः ।
विशेषात् पाचनी रुच्या ग्राहिणी मादिनी गुरुः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

यवाग्रजा, स्त्री, (यवस्याग्रमिव । तस्मात् जाता-त्वम् ।) यवक्षारः । इति राजनिर्घण्टः ॥

यवाह्वज स्त्री, (यवाह्वाभ्यां जायते इति । जन्+डः ।) सौवीरम् । इति राजनिर्घण्टः ॥

यवास', पुं, (यौतीति । यु+"कृतभ्यसीति ।" उणा० ४ । ६ । इत्यादिना आसः ।) दुरालभा । यथा,—
"यासो यवासो दुःस्पर्शो धन्वयासो दुरालभा ।"
इति रत्नमाला ।
खदिरभेदः । यथा,—
"कण्टकी वायसवश्च यवासः खदिरच्छाया ।"
इति शब्दमाला ॥
यवासा इति ख्याता कण्टकीक्षुपविशेष । तत्पर्य्यायः । यास २ बहुकण्टक ३ अधक ४ सूक्ष्मदला ५ रोदनिका ६ कच्छुरा ७ बालपत्र ८ विषघ्न ९ कण्टकालुक १० तिक्तशिखा ११ गान्धारी १२ अनन्ता १३ । अस्य गुणाः । मधुरतिक्तत्वम् । शीतत्वम् । पित्तार्त्तिदाहनाशित्वम् । बलन्दीपनकारित्वम् । तृष्णाकफच्छर्दिविसर्पविनाशित्वञ्च । इति राजनिर्घण्टः ।

यवासक, पुं, (यवास+स्वार्थे कन् ।) दुरालभा । इति शब्दरत्नावली ॥ (यथा, सुश्रुते उत्तरतन्त्रे ३९ अध्याये ।
"यवकाथं कषायं पाश्वशूलाभयास्वति ।
गुडूचीविश्ववालाब्दत्रायमाणायवासके ॥")

यवासशर्करा, स्त्री, (यवासेन तदर्थेन कृता शर्करा । शाकपार्थिववत् समासः ।) यवासरसघटित शर्करा । तत्पर्य्यायः । सुधामोदक २ मोदक ३ तवराज ४ खण्डसार ५ खण्डज ६ खण्डमोदक ७ । अस्या गुणाः । अतिमधुरत्वम् । पित्तश्रमदाहापहत्वम् । रुच्यत्वम् । विदाहमूर्च्छातिभ्रान्तिनाशित्वम् । सरत्वञ्च । इति राजनिर्घण्टः । (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"यवासशर्करा मधुरकषाया तिक्तानुरसा श्लेष्महरी सरा चेति ॥")

यवासा, स्त्री, (यवास+टाप् ।) गुच्छादिनीभवम् । इति राजनिर्घण्टः ॥

यवाह्व पुं, (यवमाह्वयति स्पर्द्धतेऽक्षारत्वादिति । आ+ह्वे+क ।) यवक्षारः । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते चिकित्सितस्थाने २० अध्याये ।
"यवाह्वमौरिकोक्तिये माद्यैश्च प्रशस्यते ।"
गुडादिभिर्विशेषोऽस्य पक्वक्षारकम्हि विशेष ।)

यविष्ठः, त्रि, (अतिशयेन युवा इति । युवन्+इष्ठन् । "स्थूलदूरेति" यणादिलोपगुणौ ।) अतिशययुवा । (यथा, ऋग्वेदे । १ । ११० । २ ।
"योषा मे अस्य वक्षो यविष्ठ ।")
कनिष्ठभ्रातरि, पुं । इति हेमचन्द्रः । ३ । ११६ ॥ (भ्रात्रपि । यथा, भागवते । ३ । १ । ५ ।
"भ्रातुर्यविष्ठस्य सुतान् विबन्धून्
प्रवेश्य लाक्षाभवने ददाह ।")

यवीयस्, [स्] त्रि (अतिशयेन युवा । युवन् + "द्विवचनविभज्योपपदे तरबीयसुनौ ।" ५ । ३ । ५७ । इति ईयसुन् ।) कनिष्ठः । (यथा, मनौ । ९ । १२० ।
"ज्यायसो दीयितो भ्राता यवीयानपि यो भवेत् ।"
अतिशययुवा । इति मेदिनी । से, ६१ ॥

यवीया, स्त्री, (यवेभ्य उचितमिति । यव+ख ।) सौवीरकम् । इति राजनिर्घण्टः ॥

यव्य, त्रि, (यवानां भवनं क्षेत्रम् । यव+"यवयवकषष्टिकाद् यत् ।" ५ । २ । ३ । इति यत् ।) यवादिभवनोचितक्षेत्रम् । तत्पर्य्यायः । यवक्यम् २ षष्टिक्यम् ३ । इत्यमरः । २ । ९ । ७ ॥ यवोचितम् ४ यवकोचितम् ५ । इति शब्दरत्नावली । (यवेभ्यो हितम् । यव+"खलयवमाषतिलवृषब्रह्मणश्च ।" ५ । १ । ७ । इति यत् । यवहितः । इति व्याकरणम् ।)

यव्य, पुं, (यवेभ्यो हितः । यव+यत् ।) मासः । यथा,—
"यव्यद्यं आयत्याम्भि ऊर्म्मा मासो दशमा ।
तासु स्नानं न कुर्व्वीत वर्ज्जयित्वा समुद्रगाः ।"
इति प्रायश्चित्ततत्त्वे कात्यायनवचनम् ॥
(स्त्री, नदीविशेषः । यथा, ऋग्वेदे । ८ । ९८ । ८ ।
"वायन्ता यव्यानिर्म्मद्धानि भूरमाणि ।"
"यव्याभिः नदीभिः । अथवा यव्या इति नदीनामसु पाठात् ।" इति तद्भाष्ये सायनः ॥)

यशः, [स्] क्ली, (अश्नुते व्याप्नोतीति । अश्+"अशेर्देवने युट् च ।" उणा० ४ । १९० । इत्यसुन् युट् च ।) ख्यातिः । तत्पर्य्यायः । कीर्त्तिः २ समज्ञा ३ । इत्यमरः । १ । ६ । ११ ॥ समाज्ञा ४ कीर्त्तना ५ अभिख्यानम् ६ आज्ञा ७ समाख्या ८ । इति शब्दरत्नावली ॥
"दानाभिप्रभवा कीर्त्तिः शौर्य्यादिप्रभवं यशः ।"
इति माधवी ॥
अतएव यशःकीर्त्त्योर्भेदस्तथापि सामान्यात् यशः कीर्त्तिपरिच्छेदो जीवनादिर्न जीवति । इति कस्यचित् प्रयोगः । जीवतः ख्यातिर्यशो मृतस्य ख्यातिः कीर्त्तिरिति केचित् । तन्न चारु कीर्त्तिर्यस्य स जीवतीति प्रयोगदर्शनात् ।" इत्यमरटीकायां भरतः ॥ कीर्त्तिशब्दे दोषो यथा —
"बलिश्च महतीं कीर्त्तिं यशःकीर्त्तिं आप्तवान् ।
स ह्यात्म इति ख्यातश्चानुकम्पस्य निश्चयः ॥
आत्मभूर्यदि लोकेऽपि यावद्दिव्याब्दयुगम् ।
कीर्त्तिर्हि धर्म्मरूपेण भविता यावत् तत्र ॥
तावत्स्वर्गे वसेद् यावत् स्थिता लोके विमलेति ।
तस्य कर्म्मकरं चक्र यत्र तत्र सुरेशितुः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४८ अध्यायः ॥

(ज्ञानम् । यथा, ऋग्वेदे । ४ । ५२ । ११ ।
"वय स्याम यशसो जनेषु ।"
"यशस कीर्त्तेरन्नस्य वा ।" इति तद्भाष्ये सायणः । त्रि, यशस्वी । यथा, ऋग्वेदे । ८ । ७८ । ५ ।
"अभिन्न यथा वस्तुनोर्षो प्रयच्छते ।"
"स यथा यशस्यपि भवति ।" इति तद्भाष्ये सायणः ।)

यशःपटह, पुं, (यशःख्यापक पटहः । शाकपार्थिव वत् समासः ।) ढक्का । इत्यमरः । १ । ७ । ६ ।

यशःशेषः, त्रि, (यश एव शेषोऽस्य ।) मृत । इति हेमचन्द्रः । ३ । ३८ । (यथा, कथासरित् सागरे । ८१ । ४४ ।
"तत्र क्रमेण तेनैव सारस्वरभरोदयः ।
यशोवर्द्धेश्च प्रययौ स यशःशेषतां नृपः ।")
मरणे, पुं ।

यशदं, क्ली, धातुविशेषः । दस्ता इति भाषा । यथा
"यशदं रङ्गसदृशं रीतिहेतुश्च तन्मतम् ।
यशदं तुवर तिक्तं शीतलं कफपित्तहृत् ।
चक्षुष्यं परमं मेहान् पाण्डुं श्वासञ्च नाशयेत् ।"
इति भावप्रकाशः ।

यशस्कर, त्रि कीर्त्तिकारक । सुख्यातिजनक । यशस्करोति य इत्यर्थे ("दिवा विभानिशाप्रभाभास्कारान्तानन्तादिबहुनान्दीकिलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्यत्तद्धनुररुष्षु ।" ३।२।२१ ।) इति टप्रत्ययेन निष्पन्नः । यशस्करी विद्या इति व्याकरणम् । (यथा, मनौ । ८ । ३८३ ।
"एतैर्व्रतैर्नियच्छन्तो राजा पापान् स्वविषये स्वके ।
प्राप्नोत्यस्मिन् यशो लोके प्रेत्य चैव यशस्करः ।"
विष्णुदेवविशेषि, स्त्री । यथा, मार्कण्डेये ६२ अ ।
"विदर्भे पुण्यतीर्थायां वासुदेवाग्रे विष्णुः ।
यशस्कर विमानायां साक्षिप्यां कृतालयम् ।"
सोमावतीपुर्या जाति ब्राह्मणविशेषे, पुं । यथा, कथासरित्सागरे । १ ४ । १८ ।
"तस्यां यशस्करो नाम विद्वानाद्यो बहुश्रुतः ।
ब्राह्मणोऽभूदभूतस्य पत्नी भेद्यवेति च ।")

यशस्या, स्त्री, (यशसे हिता । यशस्+यत् ।) जीवन्ती । ऋद्धिनामौषधिः । इति राजनिर्घण्टः ।

यशस्वान्, [त्] त्रि (यशोऽस्यास्ति । यशस्+मतुप् । मस्य व ।) कीर्त्तिविशिष्टः । इति व्याकरणम् । (यथा, अथर्ववेदे । ६ । ५८ । २ ।
"यशश्री द्यावापृथिवीयोर्यशसान्
यशाय ओषधीषु यशस्वती ।")

यशस्विनी, स्त्री, (यशस्विन्+ङीप् ।) वनकार्पासी । इति शब्दरत्नावली । यवतिक्ता । महाज्योतिष्मती । इति राजनिर्घण्टः । (वनगङ्गा । यथा, कथासरित्सागरे । ७१।२५७ ।
"अथ यशस्वती नाम राजवैद्यात्मोचितं ।
भार्य्या बभ्रुवाहस्य विराजेदामलामया ।"
गङ्गा । यथा, काशीखण्डे गङ्गासहस्रनामकथने । २९ । १३१ ।
"यशस्विनी यशोदा च योग्या युक्तात्मसेविता ।")

यशस्वी, [न्] त्रि, (यशोऽस्यास्तीति । यशस्+ "अस्मायामेधास्रजो विनिः ।" ५ । २ । १२१ । इति विनिः ।) यशोविशिष्टः । कीर्त्तिमान् । इति व्याकरणम् । (यथा, मनौ । ९ । ३३४ ।
"विप्राणां वेदविदुषां गृहस्थानां यशस्विनाम् ।
शुश्रूषैव तु शूद्रस्य धर्म्मो नैःश्रेयसः परः ।")

यशोद, पुं (यशो ददातीति । दा+क ।) पारदः । इति राजनिर्घण्टः । (क्लीवेऽपि दृश्यते । यथा वाराही ।
"सुवर्णं रजतं ताम्रं रङ्गं यशोदमेव च ।
शीसं लौहञ्च सप्तैते धातवो गिरिसम्भवाः ।")
यशोदातरि, त्रि ।

यशोदा, स्त्री,(यशो ददातीति । दा+क । टाप् ।) नन्दपत्नी । यथा, श्रीभागवते १० स्कन्धे ।
"नन्दः किमकरोद्ब्रह्मन् श्रेय एवं महोदयम् ।
यशोदा वा महाभागा पपौ यस्याः स्तनं
हरिः ।"
(दिलीपमाता । यथा, हरिवंशे । १८ । ६० ।
"तेषान्तु मानसी कन्या यशोदा नाम विश्रुता ।
पत्नी सा विश्वमहतः स्नुषा वै वृद्धशर्म्मणः ।
राजर्षेर्जननी चापि दिलीपस्य महात्मनः ।"
यशोदातरि, त्रि । यथा तैत्तिरीयसंहिता याम् । ४ । ४ । ६ । २ ।
"यशोदा त्वा यशसि तेजोदां त्वा तेजसीति ।")

यष्टा, [ऋ] पुं (यजते इति । यज+तृच ।) याग कर्त्ता । तत्पर्य्यायः । यजमानः २ । इत्यमरः ।४। ७ । ८ । (यथा, मार्कण्डेये । १२ । २ ।
"स दानशीलो यष्टा च यज्ञानामभवन्नृपः ।")

यष्टि, पुं, (इज्यते इति । यज्+बाहुलकात् तिः । इति उणादिवृत्तौ उज्ज्वलदत्तः ।४।१७९।) ध्वजदण्डः । इति विश्वशब्दरत्नावल्यौ । शस्त्र दण्डः । इति मेदिनी । टे २६ ।

यष्टि, पुं, स्त्री, (यजति सङ्गच्छते । यज्+तिः ।) तन्तुः । इति शब्दमाला । हारलता । (हारः यष्टिः । यथा रघौ । १३ । ५४ ।
"क्वचित्प्रभालेपिभिरिन्द्रनीलै-
र्मुक्तामयी यष्टिरिवानुविद्धा ।
अन्यत्र माला सितपङ्कजाना-
मिन्दीवरैरुत्खचितान्तरेव ।"
"यष्टि हारावलिः ।" इति मल्लिनाथः ॥ ० ।)
भार्गी । मधुका । शस्त्रम् । इति मेदिनी । टे,२६ । शिवस्य पर्य्यायः । दण्डः २ । लगुडः १ इति हेमचन्द्रः । ३ । ४४८ । तद्धारणं यथा, वह्निपुराणे ।
"यष्टिं ये तु प्रयच्छन्ति मेकलानि शुद्धेषु ।
तेषान्तु विपुला पुंसां सन्तानो भोजयन्ति ।"
(स्त्री, शाखा । यथा, कुमारे । ६ । २ ।
"चूतयष्टिरिवाभ्याशे मधौ परभृतोन्मुखी ।"
"चूतयष्टि चूतशाखा इव ।" इति तत्र मल्लिनाथः । यष्टिमधु । तत्पर्य्यायः । यथा
"यष्ट्याह्वं मधुकं यष्टि
यष्टिमधु खलेपाता अजातिरखा पुरा ।"
इति वैद्यकरत्नमालायाम् ।)

यष्टिक, पुं, (यष्टिरिव । कन् ।) जलकुक्कुट । इति शब्दरत्नावली । (यष्टि+स्वार्थे कन् ।) दण्डश्च ।

यष्टिका स्त्री, (यष्टि+स्वार्थे कन् । टाप् ।) हार-भेदः । यथा —
"यष्टिका दण्डिका चैव तिलका सारिकेत्यपि ।"
इति जटाधरः ।
वापी । यथा,—
"पल्वल दीर्घिका वापी यष्टिका भीमगोधिका ।"
इति त्रिकाण्डशेषः ।
यष्टिमधुका । यथा,—
"अथ यष्टीमधुक स्यात्मधुयष्टी तु यष्टिका ।"
इति शब्दरत्नावली ।
लगुडः । यथा,—
"अथ शक्तिश्च शस्त्री च यष्टिर्मुद्गरो च यष्टिका ।
दण्ड काण्डोऽपि लगुड मल्लो दण्डको-
ऽपि च ।"
इति शब्दरत्नावली ।

यष्टिग्रह, पुं (यष्टिं गृह्णातीति । यष्टि+ग्रह+ "शक्तिलाङ्गलाङ्कुशयष्टितोमरेति ।" ३ । २ । ९ । इत्यस्य वार्त्ति अच् ।) यष्टिधारकः । लगुड ग्राही । इति मुग्धबोधटीकायां दुर्गादासः ।

यष्टिमधु क्ली, (यष्ट्यां मधु माधुर्य्यमस्य ।) यष्टि-मधुका । इति हलायुधः । (यथास्य पर्य्याय ।
"यष्ट्याह्वं मधुकं यष्टि शीतलं मधुयष्टिका ।
यष्टिमधु खलेपाता अजातिरखा पुरा ।"
इति वैद्यकरत्नमालायाम् ।)

यष्टिमधुका, स्त्री, (यष्टिमधुवत् कायतीति । कै+ क ।) यष्टिमधु । तत्पर्य्यायः । क्लीतकम् २ मधु कम् ३ मधुयष्टिका ४ । इत्यमरः । २।४।१ ९ ।
यष्ट्याह्वम् ५ यष्टि ६ खलेपाता यष्टिमधु ७ अजजा चैतु अतिरसा ८ । इति रत्नमाला ।
अपि च ।
"यष्टीमधु तथा यष्टीमधुक क्लीतकं तथा ।
अन्यत्क्लीतनक तत्तु भवेत्तोये मधूलिका ।"
अस्या गुणाः ।
"यष्टी हिमा गुरु स्वाद्वी चक्षुष्या बलवर्ण
कृत् ।
सुस्निग्धा शुक्रला केश्या स्वर्य्या पित्तानिला-
स्रजित् ।
व्रणशोथविषच्छर्दितृष्णाग्लानिक्षयापहा ।"
इति भावप्रकाशः ।

यष्टी, स्त्री, (यष्टि+"कृदिकारादक्तिनः ।" इति ङीष ।) यष्टिमधु । इति भावप्रकाशः । (यथास्याः पर्य्यायः ।
"यष्टी यष्ट्याह्वयं प्रोक्तं मधुकं मधुयष्टिका ।"
इति शार्ङ्गधरे ३०८ अध्यायः ।
तथास्या गुणाः । भावप्रकाशस्य पूर्व्वखण्डे १ ।
"यष्टी हिमा गुरु स्वाद्वी चक्षुष्या बलवर्ण
कृत् ।

चरुमध्ये दक्षिणावर्त्तेन भ्रामयित्वा तमपि तन्नैवाग्नौ क्षिपेत्। तत आधाराज्यभागान्तं कर्म्म कुर्य्यात्॥ ७॥ अग्निदिग्भागे प्रोक्षणी-पात्रस्याग्रभागमन्तरं पवित्रान्तर्हिते ॐ सूर्य्याय त्वा जुष्टं निर्व्वपामीति मौल्याद्यन्तमष्टि प्रक्षिप्य ॐ सूर्य्याय त्वा जुष्टं प्रोक्षामीति प्रक्षीतावशेषेण प्रोक्षयेत्। एवं सोमाय त्वा इत्यादि। तत निष्ठिक्षदर्व्विविधिवदधिक तूष्णीं तया कृत्वा पवित्राच्छित कृत्वा पूर्व्ववद्दो-हीमहव्याणिने उदुस्वर्ब्ब निधाय तत उपस्थ मौल्याद्यन्तम प्रक्षिप्य सुपर्णेनावस्थ सर्व्वैव निस्तुषीकृत्य प्रक्षोभ्य च प्रक्षाल्य पवित्र-चरुस्थाल्यां प्रक्षिप्य तदेव स्थापयित्वा उदीच्यां दक्षिणभागे ॐ सोमाय स्वाहेति होमपर्य्यन्तं कुर्य्यात्। तत ग्रहाणां कर्म्मणि अग्नेः स वरद नामाग्नीति नाम कृत्वा।

ॐ पिङ्गभ्रूश्मश्रुकेशाक्ष पीनाङ्गजठरोऽरुण।
छागस्थ साक्षसूत्रोऽग्ने सप्तार्च्चि शक्तिधा-
रक॥

इत्यादिरूपाणीयं ध्यात्वा ॐ वरदनामाग्ने इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इत्यावाह्य पाद्यादिना पूजयेत्॥ ७॥ पौष्टिककर्म्मणि तु वरदनामाग्नि। ग्रहहोमे चाग्नी नाम गोभिल।

शान्तिके वरुणो नाम पिङ्गल होम उच्यते।
धूमकेतुस्तथा भौमे जठरोऽग्निर्व्वुधे स्मृत।
वृहस्पतौ शिखी नाम शुक्रे भवति हाटक।
शनैश्चरे महातेजा राहौ चैव हुताशन।
केतुष्व रोहितोऽग्नि स्यादिति वह्निविनिर्णय॥

तत तद्धोमविधिमानेन चरुणा सूर्य्यादि-ग्रहेभ्य प्रत्येकाहुतिं दद्यात्॥ ७॥ अथ मन्त्रा। सूर्य्यस्य आकृष्णेनेतिमन्त्रस्य हिरण्यस्तूपाङ्गिरा ऋषिस्त्रिष्टुप् छन्द सविता देवता आदित्यस्य पूजाहोमकर्म्मणि विनियोग। ॐ आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्त्यञ्च हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् स्वाहा। इद सूर्य्याय इति देवतोद्देश कामगोतरे कार्य्ये॥ १॥ सोमस्य इमन्देवेति मन्त्रस्य वरुण ऋषिर्व्विराट्छन्द सोमो देवता सोमस्य पूजाहोमकर्म्मणि विनियोग। ॐ इमन्देवा असपत्नं सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय। इममत्तुष्य पुत्त्रममुष्यै पुत्त्रमस्यै विशे स्वाहा। इदं सोमाय॥ २॥ मङ्गलस्य अग्निर्मूर्द्धेति मन्त्रस्य विरूप आङ्गिरस ऋषिर्गायत्री छन्दोऽग्नि-र्देवता मङ्गलस्य पूजाहोमकर्म्मणि विनियोग। ॐ अग्निर्मूर्द्धा दिव ककुत्पति पृथिव्या अयम्। अपां रेतांसि जिन्वति स्वाहा। इद मङ्गलाय॥ ३॥ बुधस्य उद्बुध्यस्वेति मन्त्रस्य परमेष्ठी ऋषिस्त्रिष्टुप् छन्दोऽग्निर्द्देवता बुधस्य पूजाहोमकर्म्मणि विनियोग। ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्त्ते संसृजेथामयञ्च। अस्मिन् सधस्थे अध्युत्तरस्मिन् विश्वेदेवा यजमानश्च सीदत स्वाहा। इदं बुधाय॥ ४॥ वृहस्पते अति यदर्य्य इतिमन्त्रस्य गृत्समद ऋषिस्त्रिष्टुप् छन्दो ब्रह्मा देवता जीवस्य पूजाहोमकर्म्मणि विनियोग। ॐ वृहस्पते अति यदर्य्योऽर्हाद्द्युमद्विभाति क्रतुमज्जनेषु। यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रं स्वाहा। इद वृहस्पतये॥ ५॥ शुक्रस्य अन्नात् परिस्रुत इति मन्त्रस्य प्रजापतिरृषिरतिजगती छन्दोऽश्विसरस्वतीन्द्रा देवता शुक्रस्य पूजाहोमकर्म्मणि विनियोग। ॐ अन्नात् परिस्रुतो रसं ब्रह्मणा व्यपिबत् क्षत्रं पय सोमं प्रजापति। ऋतेन सत्यमिन्द्रिय विपानं शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु स्वाहा। इदं शुक्राय॥ ६॥ शनैश्चरस्य शन्नो देवीरितिमन्त्रस्य दध्यङ्ङाथर्व्वण ऋषिर्गायत्री छन्द आपो देवता शनैश्चरस्य पूजाहोमकर्म्मणि विनियोग। ॐ शन्नो देवीरभीष्टये आपो भवन्तु पीतये शंयोरभिस्रवन्तु न स्वाहा। इद शनैश्चराय॥ ७॥ राहो काण्डात् काण्डा दिति मन्त्रस्य अग्निरृषिरनुष्टुप् छन्दो दूर्व्वा देवता राहो पूजाहोमकर्म्मणि विनियोग। ॐ काण्डात् काण्डात् प्ररोहन्ती परुष परुष परि। एवा नो दूर्व्वे प्रतनु सहस्रेण शतेन च स्वाहा। इद राहवे॥ ८॥ केतूनां केतु कृण्वन्निति मन्त्रस्य मधुच्छन्द ऋषिर्गायत्री छन्दोऽग्निर्द्देवता केतूनां पूजाहोमकर्म्मणि विनियोग। ॐ केतुं कृण्वन् केतवे पेशो मर्य्या अपेशसे। समुषद्भिरजायथा स्वाहा। इदं केतुभ्य॥ ९॥ ततो मधुघृताक्तां घृताक्तां क्षीराक्तां वा प्रादेशप्रमाणां आर्द्रामक्षतसमिध माहाय ॐ आकृष्णेन इत्यादिमन्त्रेण सूर्य्यादि होतरव्य अष्टाविंशतिमष्टौ वा अष्टाष्टा। ग्रहा यस्यातिपीडाकरास्तेषां अष्टोत्तर शतञ्च जुहुयात्॥ ७॥ समिधमाह याज्ञ-वल्क्य।

अर्कं पलाश खदिरश्चापामार्गोऽथ पिप्पल।
उडुम्बर शमी दूर्व्वा कुशाश्च समिध क्रमात्॥
होमो ग्रहादिपूजायां शतमष्टोत्तरं भवेत्।
अष्टाविंशतिरष्टौ वा यथाशक्ति विधीयते॥
अतिपीडाकरो यस्तु तस्य यत्नेन पूजयेत्॥

तत होमावसानं उदीच्य कर्म्म कुर्य्यात। ततो गुडौदनादीन् ब्राह्मणान् भोजयेत्। तद्द्रव्याणि भोज्यामन्नानि वा दद्यात्। भोजना-सामर्थ्ये तद्द्रव्याणि सार्व्वभा प्रतिपादयेत्। ततो मधुक्षुद्रायोऽग्निमन्त्रैर्द्दक्षिणां दद्यात्।

धेनु शङ्खस्तथानडुत् हेम वासो हयस्तथा।
कृष्णा गौरायसं छाग एता वै दक्षिणा

क्रमात्॥

तत्र।

कपिले सर्व्वदेवानां पूजनीयासि रोहिणी।
तीर्थदेवमयी यस्मादत शान्तिं प्रयच्छ मे॥

इति पठित्वा ॐ अद्येत्यादि सवत्सकृतैतद्‌ग्रहयज्ञ कर्म्मण प्रतिष्ठार्थं दक्षिणां कपिलां धेनुं नानादेवताकां अमुकगोत्राय अमुकदेवशर्म्मणे ब्राह्मणाय अहमिमां तुभ्यमहं सम्प्रददे। अस्मात्
धेनुं ददामीति ब्रूयात्। कपिलाभावे गोमात्रं वा। तदभावे काञ्चनम्। तदभावे रजतादिकं वा दद्यात्। काञ्चनादिकन्तु सङ्कल्प्य दक्षिणा भावेऽपि दद्यात्॥ १॥ एवम्।

पुण्यस्त्वं शङ्खपुण्यानां मङ्गलानाञ्च मङ्गलम्।
विष्णुना विधृतो नित्यमत शान्तिं प्रयच्छ मे॥

इत्युच्चार्य्य पूर्व्वोक्तक्रमेण सोमयज्ञे शङ्खं दद्यात्॥ २॥

ॐ धर्म्मस्त्वं वृषरूपेण जगदानन्दकारक।
अष्टमूर्त्तेरधिष्ठानमत शान्तिं प्रयच्छ मे॥

इत्युच्चार्य्य मङ्गलयज्ञे वृषं दद्यात्॥ ३॥

ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसो।
अनन्तपुण्यफलदमत शान्तिं प्रयच्छ मे॥

इत्युच्चार्य्य बुधयज्ञे काञ्चनं दद्यात्॥ ४॥

ॐ पीतवस्त्रयुगं यस्माद्वासुदेवस्य वल्लभम्।
प्रदानात्तस्य मे विष्णुरत शान्तिं प्रयच्छ मे॥

इत्युच्चार्य्य गुरुयज्ञे पीतवस्त्रयुगं दद्यात् तद् भावेऽन्यवस्त्रयोयुगमपि दद्यात्॥ ५॥

ॐ विश्वस्त्वमश्वरूपेण यस्मादमृतसम्भव।
चन्द्रार्कवाहनो नित्यमत शान्तिं प्रयच्छ मे॥

इत्युच्चार्य्य शुक्रयज्ञे अश्वं दद्यात्॥ ६॥

ॐ यस्मात्त्वं पृथिवी सर्व्वा धेनु केशवसन्निभा।
सर्व्वपापहरा नित्यमत शान्तिं प्रयच्छ मे॥

इत्युच्चार्य्य शनैश्चरयज्ञे कृष्णां धेनुं अभावे वा दद्यात्॥ ७॥

ॐ यस्मादायसकर्म्माणि तवाधीनानि सर्व्वदा।
लाङ्गलाद्यायुधादीनि तत शान्तिं प्रयच्छ मे॥

इत्युच्चार्य्य राहुयज्ञे लौहं दद्यात्॥ ८॥

ॐ यस्मात्त्वं सर्व्वयज्ञानां मङ्गलाय मत
स्थित।
यानं विभावसोर्न्नित्यमत शान्तिं प्रयच्छ मे॥

इत्युच्चार्य्य केतुयज्ञे छागं दद्यात्॥ ९॥ दक्षिणान्तं शान्तिकुम्भजलेन अभिषेका शान्तिं कुर्य्यात्। तत कृताञ्जलि।

ॐ ग्रहदेवमयो यस्मात् धर्म्मो यज्ञोऽनार्थी तथा
स्मृत।
यमुना वरुणश्चापि दक्षिणार्थी सपूजिता॥

इति विष्णुधर्म्मोत्तरीयं पठित्वा ग्रहान् विसर्जयेत्। दक्षिणा च प्रदातव्या भक्तायाच विप्राय शान्तिमिति याज्ञवल्क्यवचनात्।” इति रघुनन्दनभट्टाचार्य्यविरचितग्रहयागप्रयोग समाप्त॥

याच, ट ड ऋ च याचने। इति कविकल्पद्रुम॥ (भ्वा उभ द्विक सेट्।) याच्ञमानमिति रामार्थं दशरथम्। ट, याचथु। ड याचि-त्वमम्। ऋ, अययाचत्। च याचति याचते दृष तिव। यद्यप्यर्थं नेत्रकोऽपि याचति तिव गुरुतो विष। इति दुर्गादास॥

याचक, त्रि (याचते इति। याच्+ण्वुल्।) याच्ञाकर्त्ता। तत्पर्य्याय। वनीयक १ याचनक २ मार्गण ३ अर्थी ४। इत्यमर॥

३।१।६६। वनीपकः ६ भिक्षुः ७ भिक्षाकरः ८। इति शब्दरत्नावली। तस्य लघुत्वं यथा,—

"तृणादपि लघुस्तूलस्तूलादपि च याचकः।
वायुना किं न नीतोऽसौ किन्मामयं प्रार्थयेत्॥ (?)" इति प्राचीनाः॥

अपि च।

"कुब्जस्य कीटघातस्य वातान्निष्कासितस्य च।
शिशिरे कम्पमानस्य वर जन्म न याचितम्॥
अनन्तविद्यं याचित्वा विष्णुर्वामनतां गतः।
कोऽन्योऽधिकतरस्तस्य योऽर्थी याति न लाघवम्॥"

इति गारुडे नीतिसारे ११५ अध्यायः॥

याचत्, [त्] त्रि, (याचतीति। याच+शतृ।) याचकः। यथा,—

"शुक्लश्च स्वरो दीनो गात्रस्वेदो महद्भयम्।
मरणे यानि चिह्नानि तानि चिह्नानि याचतः॥"

इति गारुडे नीतिसारे ११५ अध्यायः।

याचन, क्ली (याच+भावे ल्युट्।) याचना। (यथा, नैषधे। ५। ११२।

"भीमजायाचनयाचे
यूयमेव गुरवः करणीयाः॥")

याचनक, त्रि (याचन+स्वार्थे कन्।) याचकः। इत्यमरः। ३।१।४९। (यथा मनौ। ३।१५३।
"आगारदाही गरदः कुण्डाशी सोमविक्रयी।" ?)

याचना, स्त्री, (याच+स्वार्थे णिच्+युच्। टाप्।) याच्ञा। इत्यमरः। २।७।३२। (यथा, रामायणे। २।२७।२६।

"नयस्व मां साधु कुरुष्व याचनाम्॥")

याचमान, त्रि, (याचते इति। याच+शानच्।) याचकः। यथा,—

"कथोपशीलभावस्य याचमानस्य मानिनः।
यथोभौ विषयोराधौ तु पुरोऽपि मरणे रत्न॥"

इति वररुचिः॥

अपि च।

"द्विजेभ्यो याचमानेभ्यो यजमानः प्रयच्छति।
स याति धाम्यताम् लोकान् येभ्यो नावर्त्तते पुनः॥
अदित्यसदृशाभ्यो यच्छत्यपि यथेप्सितम्।
याऽनुमन्तापि भवति निरये प्रतिषेधकः॥"

इति वह्निपुराणे वामनप्रादुर्भावो नामाध्यायः॥

याचित, क्ली, (याच+क्त।) याचनवृत्तिः। तत्पर्य्यायः। मृतम् २। यथा,—

"द्वे याचितायाचितयोर्यथासंख्यं मृतामृते॥"

इत्यमरः। २।७।३२॥

"द्वे। याचनवृत्तिर्मरणमिव दुःखजनकत्वात् मृतम्। अयाचितं अमृतमिव अमृतम्। याचितायाचितयोर्भावे कर्मणि वा क्त।" इति भरतः॥ प्रार्थितवस्तुनि त्रि। (यथा देवीभागवते। ३।२८।६७।

"पिता वै याचितः पूर्व्वं मया वै त्वत्कृते
ध्रुवं॥")

याचितक, क्ली (याचितेन निर्वृत्तम्। याचित+"अपमित्ययाचिताभ्यां कक्कनौ।" ४।४।२१। इति कन्।) याच्ञाप्राप्तम्। इत्यमरः। २।९।४॥

"याच्ञया। अलङ्कारादिवस्तु तत् याचितकम्। कार्य्यानन्तरं वस्तुस्वामी यत् पुनर्ददाति तदित्यर्थः। स चिरेण प्राप्तमिति ठन् कादिति च।" इति भरतः॥

याच्ञा, स्त्री (याचनमिति। याच+"यजयाचयतविच्छप्रच्छरक्षो नङ्।" ३।३।९०। इति नङ्।) याचनम्। तत्पर्य्यायः। अभिशस्तिः २ याचना ३ अर्थना ४ भिक्षा ५ अदना ६। इत्यमरः। २।७।३२॥ लालसा ७। इति जटाधरः॥ (यथा, भागवते। ८।७।१७।

"त्यायात् गुणैरवरजोऽप्यदितेः सुतानां
लोकान् विचक्रम इमान् यदथाधियज्ञः।
क्ष्मां वामनेन जगृहे त्रिपदच्छलेन
याच्ञामृते पथि चरन् प्रभुभिर्न चाल्यः॥")

तद्वैदिकपर्य्यायाः। ईमहे १ यामि २ मन्महे ३ दद्धि ४ शग्धि ५ पूर्द्धि ६ मिमिड्ढि ७ मिमीढि ८ रिरिड्ढि ९ रिरीहि १० पीपरत् ११ यन्तारः १२ यन्धि १३ इषुध्यति १४ मदेमहि १५ मनामहे १६ मायते १७। इति सप्तदश याच्ञाकर्म्माणि। इति वेदनिघण्टौ ३ अः॥

याजः, पुं अन्नम्। इति हेमचन्द्रः। ३।५९। (ऋत्विक्। यथा, महाभारते। १।१६६।७।

"याजोपयाजौ ब्रह्मर्षी शाम्यन्तौ परमेष्ठिनौ।
संहिताध्ययने युक्तौ गोत्रतश्चापि काश्यपौ॥")

याजक, पुं, (यजतीति। यज+ण्वुल्।) याज्ञिकः। राज्ञो गजः। इति मेदिनी। के १४२॥ मत्तहस्ती। इति जटाधरः॥ ऋत्विक्। यथा,

"अधीयाना धर्मार्था ऋत्विजो याजकाश्च ते॥"

इत्यमरः। २।७।१७॥

"यजमानेन धनैर्व्वार्य्यन्ते वृताः दक्षिणा इत्यन्ये इत्याय त्रियन्ते प्रार्थ्यन्ते च अधीयप्रभृतयस्ते ऋत्विजो याजकाश्च कथ्यन्ते। अपि इत्यर्थान्ते दीयन्ते अमी इत्यौ त्रि स ट स्तौ नि भाष्यीति इ मनीयादित्वाद्यलोपः। ऋत्विक्प्रशोलकेऽध्वर्युरुद्गातृप्रतिप्रस्थाता यो कुरु यजन्ति। याज्या इति कृत्यणोऽदिति ण्यत् ऋत्विग्दधृगादौ तु व इति साधुत्वनिर्देशात् अभ्यन्तुधातोर्न कुय त्वौ यजन्ति ऋत्विजः क्विप्। यजन्ति याजकाः वुञ्।" इति भरतः॥ ०॥ बहुयाजकयाजनयाजकयोर्निन्दा यथा,—

"यजमानास्तु षट् प्रोक्ता वर्णाभिलम्बित्वथिभिः।
आदौ राजभृतस्तेषां द्वितीयः क्रयविक्रयी॥
तृतीयो बहुयाज्यः स्यात्तुर्यो ग्रामयाजकः।
पञ्चमस्तु भृतकोऽग्रो ग्रामस्य नगरस्य च॥
अनाश्रितश्च यः पूर्व्वां सादितायेन मन्दि
माम्॥

नोपासीत द्विजः सन्ध्यां स षष्ठो याजकः
स्मृतः॥"

इत्याह्निकतत्त्वे सन्ध्योपासनम्॥

अपि च।

"शूद्रसम्बोधिताया नो ग्रामयाजीति कीर्त्तितः।
शूद्रपाकोपजीवी यः सूपकारः प्रकीर्त्तितः॥
सन्ध्यापूजाविहीनश्च प्रमत्तः पतितः स्मृतः।
एते महापातकिनः कुम्भीपाकं प्रयान्ति ते॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः॥

याजन, क्ली, (याज्यते इति। यज+णिच्+ल्युट्।) यागक्रियाकारणम्। याग कराओ इति भाषा। तत्तु ब्राह्मणस्य षट्कर्म्मान्तर्गतकर्म्मविशेषः। यथा,—

"अध्यापनमध्ययनं यजनं याजनं तथा।
दानं प्रतिग्रहश्चैव ब्राह्मणानामकल्पयत्॥"

इति मानवे १ अध्यायः॥

याजि, पुं, (यज+"यजियपिसिरचिभ्य इञ्।" उणा ४।१२४। इति इञ्।) यज्ञः। इति संक्षिप्तसारोणादिवृत्तिः॥ यागकर्त्ता। इत्युणादिकोषः॥

याजुष त्रि (यजुष इदमिति। यजुष्+अण्।) यजुर्वेदसम्बन्धि। इति सिद्धान्तकौमुदी॥

याज्ञवल्क्य पुं, (वल्कयतीति। वल्क+अच्। यज्ञस्य वल्को वक्ता। तस्य गोत्रापत्यम्। यज्ञवल्क+"गर्गादिभ्यो यञ्।"४।१।१०५। इति यञ्।) धर्म्मशास्त्रप्रयोजकमुनिविशेषः। तत्पर्य्यायः। ब्रह्मरातिः २ योगीन्द्रः ३। इति हेमचन्द्रः॥ योगीश्वरः ४। इति मिताक्षरा॥ (महर्षिरयं याज्ञवल्क्यः सर्व्वेषां शुक्लयजुर्व्वेद प्रापयाम्। तथाहि ब्रह्मपरम्परया प्राप्य वेद व्यासो मन्वन्तरेषु मनुष्यान् विविक्त तेषु तपापरः चतुरो वर्ग चतुष्टयम् चतुरो वेदान् पैलवैशम्पायनजैमिनिसुमन्तुभ्यः क्रमादुपदिदेश ते च शिष्येभ्यः। तत्र शाखिभ्यो वैशम्पायनो याज्ञवल्क्यादिभ्यः शिष्येभ्यो यजुर्व्वेदमध्यापयत्। तत्र दैवात् केनापि हेतुना क्रुद्धो गुरुः शिष्यं याज्ञवल्क्यं त्वयाधीतं परित्यजेति आज्ञापयामास। याज्ञवल्क्योऽपि योगबलेन अधीतयजुर्विद्यां मूर्त्तिमतीं विधाय वाम। ताः तित्तिरयो भूत्वा यजूंष्यभक्षयन्। तानि यजूंषि शुद्धानि तैत्तिरीयाणि जातानि। ततो वैराग्योऽतिदुःखितो याज्ञवल्क्यः सूर्य्यमाराध्य शुक्लानि यजूंषि प्राप्तवान् तानि च वाजसनेयकाण्वमाध्यन्दिनादीन् पञ्चदशशिष्यानध्यापयामास। इत्यादि भागवते द्वादशस्कन्धे ६ अध्याये।

"वेदाश्च चतुरो वेदविद्भिः कृतविभागशः।
व्यासादनिकान् गन्धर्व्वान् चतुरो वेदविद्यया॥
पुराणाध्यायवन् तांस्तु शक्त्यैव वक्तवेदिनाम्,
ते तु धर्म्मोपदेशात् स्मृत्यैव कमादिमः॥
ते सम्प्रदाय प्राप्तान्नापि वेदेष्वनन्ते।

चतुर्युगेष्वथ व्यस्ता द्वापरादौ महर्षिभिः ।
क्षीणायुषः क्षीणसत्त्वान् दुर्मेधान् वीक्ष्य कालतः ।
वेदान् ब्रह्मर्षयो व्यस्यन् हृदिस्थाच्युतचोदिताः ।
अस्मिन्नप्यन्तरे ब्रह्मन् भगवान् लोकभावनः ।
ब्रह्मेशाद्यैर्लोकपालैर्याचितो धर्म्मगुप्तये ।
पराशरात् सत्यवत्यामंशांशकलया विभुः ।
अवतीर्णो महाभाग वेदं चक्रे चतुर्विधम् ।
ऋगथर्व्वयजुःसाम्नां राशीनुद्धृत्य वर्गशः ।
चतस्रः संहिताश्चक्रे मन्त्रैर्मणिगणा इव ।
तासां स चतुरः शिष्यानुपाहूय महामतिः ।
एकैकां संहितां ब्रह्मन्नेकैकस्मै ददौ विभुः ।
पैलाय संहितामाद्यां बह्वृचाख्यामुवाच ह ।
वैशम्पायनसंज्ञाय निगदाख्यं यजुर्गणम् ।
साम्नां जैमिनये प्राह तथा छन्दोगसंहिताम् ।
अथर्व्वाङ्गिरसीं नाम स्वशिष्याय सुमन्तवे ॥"
"वैशम्पायनशिष्या वै चरकाध्वर्य्यवोऽभवन् ।
यच्चेरुर्ब्रह्महत्यांहःक्षपणं स्वगुरोर्व्रतम् ।
याज्ञवल्क्यश्च तच्छिष्य आहाहो भगवन् कियत् ।
चरितेनाल्पसाराणां चरिष्येऽहं सुदुश्चरम् ।
इत्युक्तो गुरुरप्याह कुपितो याह्यलं त्वया ।
विप्रावमन्त्रा शिष्येण मदधीतं त्यजाश्विति ।
देवरातसुतः सोऽपि छर्द्दित्वा यजुषां गणम् ।
ततो गतोऽथ मुनयो ददृशुस्तान् यजुर्गणान् ।
यजूंषि तित्तिरा भूत्वा तल्लोलुपतयाददुः ।
तैत्तिरीया इति यजुःशाखा आसन् सुपेशलाः ।
याज्ञवल्क्यस्ततो ब्रह्मंश्छन्दांस्यधि गवेषयन् ।
गुरोरविद्यमानानि सूपतस्थेऽर्कमीश्वरम् ॥"
"एवं स्तुतः स भगवान् वाजिरूपधरो रविः ।
यजूंष्ययातयामानि मुनयेऽदात् प्रसादितः ।
यजुर्भिरकरोच्छाखा दश पञ्च शतैर्विभुः ।
जगृहुर्वाजसन्यस्ताः काण्वमाध्यन्दिनादयः ॥"
अयमेव महर्षिर्मिथिलायां एव आश्रमम् प्रथितिमि ऋषिभिः अभ्यर्थ्यमानः धर्म्मशास्त्रमादिष्ट आचारव्यवहारप्रायश्चित्ताख्यकाण्डत्रयात्मकं धर्म्मशास्त्रं प्रणीय तेभ्यः कथितवान्। यदुक्तं याज्ञवल्क्यसंहितायां प्रथमाध्याये।
"योगीश्वरं याज्ञवल्क्यं सम्पूज्य मुनयोऽब्रुवन् ।
वर्णाश्रमेतराणां नो ब्रूहि धर्म्मानशेषतः ।
मिथिलास्थः स योगीन्द्रः क्षणं ध्यात्वाब्रवीन्मुनीन् ॥")
क्ली उपनिषद्विशेषः। यथा, मुक्तिकोपनिषदि।
"मोचावततापनं तथा याज्ञवल्क्यं वराहकम् ॥")
याज्ञसेनी, स्त्री, यज्ञसेनस्य अपत्यम्। (यज्ञसेन+अण्। ङीप्।) पाञ्चाली द्रौपदी। इति हेमचन्द्रः। ३। १७१। (यथा, महाभारते। ३। ३। ५९।
"याज्ञसेनीं पुरस्कृत्य पाण्डवाय प्रययुः ॥"
अस्या विवरणं द्रौपदीशब्दे द्रष्टव्यम्।)
याज्ञिकः, पुं, (यज्ञमर्हति यज्ञाय हितो वा। यज्ञ+ठञ्।) इत्यमरः। (यज्ञं तदधीते वेद वा। यज्ञ+ठक्।) याजकः। यज्ञकर्त्ता। इति शब्दरत्नावली। (यथा भागवते। ११। १०। २६।
"इष्ट्वेह देवता यज्ञैः स्वर्लोकं याति याज्ञिकः ॥")
दर्भशिरः। पलाशः। अश्वत्थः। इति राजनिर्घण्टः॥
याज्ञिक्यं, क्ली, (याज्ञिकानां धर्म्मः आम्नायो वा। याज्ञिक+"छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः।" ४। ३। १२९। इति ञ्यः।) यज्ञः। इति सिद्धान्तकौमुदी॥
याज्यं, क्ली, (इज्यते इति। यज+ण्यत्। "यजयाचरुचप्रवचर्चश्च।" ७। ३। ६६। इति कुत्वनिषेधः।) यागकाष्ठसमिधादि। इति सिद्धान्तकौमुदी। यजनीये, त्रि। (यथा, मनौ। ८। ३१७।
"अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्य्यापचारिणी। गुरौ शिष्यश्च याज्यश्च स्तेनो राजनि किल्बिषम् ॥"
शिष्यः। याजकार्थे। यथा, देवीभागवते। १। १८। ९।
"याज्योऽसि जनकस्त्वं च धीमत्सुतो नराधिप। विदेहो लोकविदितः याति राज्यमकण्टकम् ॥")
याज्या, स्त्री (यजत्यनया। यज+ण्यत्+टाप्।) ऋक्। इति मुग्धबोधव्याकरणम्॥ (गङ्गा। यथा काशीखण्डे गङ्गासहस्रनामकीर्त्तने। २९। १४२।
"योगसिद्धिप्रदा याज्या यज्ञेशपरिपूजिता ॥")
यात च, आख्यातप्रत्ययविशेषः। स च विधिलिङः परस्मैपदप्रथमपुरुषैकवचनम्। स तु विध्याद्यर्थक आशीर्वादार्थकश्च। इति व्याकरणम्। मुग्धबोधमते विध्याद्यर्थे यासु लोपः। आशीरर्थे टोषश्च॥
यातं, क्ली, (या+क्त।) निषादिनां यातकर्म्म। इति हेमचन्द्रः। ४। २९०। पुस्तकान्तरे यत्र मिति पाठः॥ यथा,—
"अपदस्थस्य रुद्धस्य यातमङ्कुशवारणम्।
निषादिनां यातकर्म्म या(या)त चोलम् तदयम् ॥"
यातः, त्रि, गतः। याधातोः क्तप्रत्ययेन निष्पन्नः॥ (यथा मनुः। ४। १७८।
"येनास्य पितरो याता येन याताः पितामहाः। तेन यायात् सतां मार्गं तेन गच्छन्न रिष्यति ॥")
यातना, स्त्री, (यत्+णिच्+"ण्यासश्रन्थो युच्।" ३। ३। १०७। इति युच्। टाप्।) तीव्रवेदना। तत्पर्य्यायः। कारणा २ तीव्रवेदना ३। इत्यमरः। १। ८। १। अतिव्यथा ४। इति शब्दरत्नावली॥ (यथा, भागवते। ७। १। ३१।
"हिरण्यकशिपुः पुत्रं प्रह्लादं केशवप्रियम्। जिघांसुरकरोन्नाना यातना मृत्युहेतवे ॥")
नरकव्यथा। इति केचिदिति भरतः॥
यातयामं, त्रि, (यातो गतो यामः उपभोगकालो वीर्य्यं वा यस्य।) जीर्णम्। (यथा, भट्टिकाव्ये। १। १८।
"तं भीतवारमोञ्जुष्य रावणः प्रबभाषत। यातयामं विचिन्त्यासु न रामं यदि मन्यसे ॥")
परित्यक्तम्। इत्यमरः। ३। १। १०६। उपभुक्तम्। इति मेदिनी। मे, ४२। (पर्य्युषितम्। यथा, गीतायाम्। १७। १०।
"यातयामं गतरसं पूतिपर्य्युषितञ्च यत्। उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥"
गतरसः। यथा, ताण्ड्यमहाब्राह्मणे। ५। १। ६।
"ब्रह्मवादिनो वदन्ति यातयामानि कतराण्ययातयामानि इति ते अयातयामेति वक्तव्यम् ॥"
"यातयामं गतरसम् ।" इति भाष्यम्।)
याता, [तृ] स्त्री (यतते ऽन्योन्यमिति यातेति। यत्+"ऋन्।" उणा २। ९८। इति ऋन्।) पतिभ्रातृपत्नी। इत्यमरः। २। ६। ३१। जा इति भाषा। (यथा साहित्यदर्पणे। ३। ८८।
"स्वामी निश्वसितेऽप्यसूयति मनोजिघ्रः सपत्नीजनः
श्वश्रूरिङ्गितदैवतं नयनयोरीहालिहो यातरः ॥")
या+तृच्। गमनकर्त्तरि, त्रि। (यथा, बृहत्संहितायाम्। ११। १२।
"उल्का शुभदा पुरतो दिवाकरविनिःसृता [यातुः ॥"
सारथ्यादि। यथा मनौ। ८। २९०।
"यानस्य चैव यातुश्च यानस्वामिन एव च। दशातिवर्त्तनान्याहुः शेषे दण्डो विधीयते ॥"
"यातुः सारथ्यादेः ।" इति कुल्लूकः। हन्ता। यथा, ऋग्वेदे। १। ३२। १४।
"अहेर्यातारं कमपश्य इन्द्र ।"
"यातारं हन्तारम् ।" इति तद्भाष्ये सायनः।)
यातायातं, क्ली, गमनागमनम्। यथा,—
"एते धान्यदमन्दमन्दरगिरिप्रायाणकूपवान् निम्नाश्च क्रमशाक्रतिमानतः पातालिका यान्त्रा च।
यन्त्रं चक्रवदाकुलं घटमालिकाभिर्भ्यां यातायातमतन्त्रितं जलनिधेर्भोमानपि निम्ना भवति ॥"
इति श्रीभागवते १२ स्कन्धे ११ अध्यायः।
यातिकः, पुं, (यातं गमनं प्रयोजनमस्येति। यात+ठञ्।) पान्थः। इति शब्दरत्नावली॥
यातु, क्ली, (वर्त्मगामन्तं यातीति। या+"कमिमनिजनीति।" उणा १। ७२। इति तुः।) राक्षसः। इत्यमरः। १। १। ६१। (यथा,—
"यातु यातुधानानां प्रबल वरदायकी ।"
इत्यमरटीकायां रघुनाथचक्रवर्त्ती॥
(पुंलिङ्गेऽपि दृश्यते। यथा, ऋग्वेदे। ७। २१। ५।
"न यातव इन्द्र जूजुवुर्नः ।"
"यातवो राक्षसाः ।" इति तद्भाष्ये सायनः।)
यातु, पुं (यजमानं याति अपहरतीति। या+"कमिमनिजनिभाभायादिभ्यश्च।" उणा १। ७२। इति तुः।) वायुः। पथिकः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः। कालः। इति संक्षिप्तसारोणादिवृत्तिः॥ (स्त्री, यातना। यथा, ऋग्वेदे। ८। ६०। २०।
"मा नो रक्ष आवेशीदाघृणीवसो मा यातुर्यातुमावताम् ॥"

"यातुर्यातना पीडा।" इति तट्टीकायां भरतः। कर्म्मैः नाशकरी हिंसा। यथा, तत्रैव। ५। १२। २।
"शाह यातु भवता न ह्ययेन मृतदु प्रमाथ्य-
वधश्च दृष्टा।"
"यातु कर्म्मणो नाशकरीं हिंसाम्।" इति तट्टीकायां भरतः।)

यातु, त्रि, यातीति। या + "कमिमनीति।" उणा० १। ७३। इति तुः।) गन्ता। इत्यु-णादिकोषः। क्रियापदं चेत् गच्छतु।

यातुघ्न, पुं, (यातु हन्तीति। हन् + "अमनुष्य-कर्तृके च।" ३। २। ५३। इति टक्।) गुग्गुलुः। इति राजनिर्घण्टः।

यातुधान, पुं, (यातूनि रक्षांसि दधाति पुष्णातीति। धा + बहुलमन्यत्रापीति युच्। स्वनाति पीडकत्वात्तथात्वम्।) राक्षसः। इत्यमरः। १। १। ६१। (यथा भट्टिकाव्ये। २। ३८।
"दाक्षिण्यदिष्टां तमसा विलीने-
ष्वद्यातुधानैर्विपिनेषु प्रथमत्।")

यात्रक, पुं, (यातीवेति। यात्र + स्वार्थे कन्।) याज्यः। इति शब्दरत्नावली।

यात्य, त्रि, यतितव्यम्। यतनीयम्। यतधातोः कर्म्मणि ण्यप्रत्ययेन निष्पन्नम्।

यात्रा, स्त्री, (या + "हुयामाश्रुभसिभ्यस्त्रन्।" उणा० ४। १६७। इति त्रन्। टाप्।) विजिगीषोः प्रयाणम्। तत्पर्य्यायः। गमनम् १ अभिनिर्याणम् २ प्रस्थानम् ३ गमनम् ४ गमः ५। इत्यमरः। २। ८। ९५। प्रस्थितिः ७ यानम् ८ प्रावनम् ९। इति शब्दरत्नावली। यापनम्। (यथा, भागवते। १०। ८६। २५।
"यात्रामात्रं त्वहरहर्दैवादुपनमत्युत।")
उत्सवः। इति मेदिनी। रे ७८। (यथा, कथासरित्सागरे। १०। ८०।
"यात्रासुपवने हृष्टुं जगाम सखिभिः सह।")
व्यवहारः। यथा, गीतायाम्। ३। ८।
"शरीरयात्रापि च ते न प्रसिद्ध्येदकर्म्मणः।"
"शरीरयात्रा देहव्यवहारः।" इति तत्र नीलकण्ठः।) उपायः। इति विश्वः। ०। अथ यात्रा-दिनम्। आत्मीयचैर्य्येतरमासेषु दूरयात्रा कर्त्तव्या। पूर्ब्बस्यां दिशि रविशुक्रवारस्य प्राशस्त्यम्। दक्षिणस्यां मङ्गलवारस्य प्राशस्त्यम्। पश्चिमायां सोमशनिवारस्य प्राशस्त्यम्। उत्तरस्यां बृहस्पतिवारस्य प्राशस्त्यम्। पूर्ब्बस्यां दिशि सोमशनिवारे न गन्तव्यम्। दक्षिणस्यां बृहस्पतिवारे केचिन्मते बुधवारे च न गन्तव्यम्। पश्चिमायां रविशुक्रवारे। एवं उत्तरस्यां बुधमङ्गलवारे न गन्तव्यम्। द्वितीया तृतीया सप्तमी पञ्चमी दशमी एकादशी त्रयोदशी च एता यात्रायां प्रशस्ताः। अथोत्तमनक्षत्राणि। अश्विनी अनुराधा रेवती मृगशिरा मूला पुनर्व्वसु पुष्या हस्ता ज्येष्ठा। मध्यमनक्षत्राणि। रोहिणी पूर्ब्बात्रय चित्रा स्वाती शतभिषा श्रवणा धनिष्ठा। अधमनक्षत्राणि। उत्तरात्रय विशाखा मघा आर्द्रा भरणी कृत्तिका अश्लेषा। तत्र नक्षत्रशूलकथनम्। ज्येष्ठायाञ्च पूर्ब्बदिग्गमनं निषिद्धम्। एवं पूर्ब्बभाद्रपदे अश्विन्याञ्च दक्षिणदिग्गमनं पुष्ये रोहिण्याञ्च पश्चिमदिग्गमनं उत्तरफल्गुन्यां हस्तायाञ्च उत्तरदिग्गमनं निषिद्धम्। तथानुक्तकरणानि। गरं वणिजं विष्टिः। शकुनमपि केचिच्छस्तं मन्यन्ते। अथ उत्तमलग्नानि। सिंहवृषकुम्भकन्यामिथुनानि। तत्र योगिनीनिर्णयः। प्रतिपदि नवम्याञ्च प्राच्यां योगिनी। तृतीयायाम् एकादश्याञ्चाग्निकोणे। पञ्चम्यां त्रयोदश्याञ्च दक्षिणे। द्वादश्यां चतुर्थ्याञ्च नैरृतकोणे। षष्ठ्यां चतुर्द्दश्याञ्च पश्चिमे। सप्तम्यां पूर्णिमायाञ्च वायुकोणे। द्वितीयायां दशम्याञ्च उत्तरदिशि। अष्टम्याममावास्यायाञ्च ईशानकोणे। तां दक्षिणे सम्मुखे च त्यक्त्वा न गन्तव्यम्। पापयोगभद्रावसानमासदग्धादिषु यात्रा न कर्त्तव्या। वारवेलाकालवेलाकुलिकवेलासु अदाग्निषु च यात्रा न कर्त्तव्या। दिरागमनादिनवपद्मसम्मदे दग्धम्। ०। अथ नौयात्राप्रवेश-निर्णयः। तत्र तिथयः। अमावस्याष्टमीचतुर्द्दशीविवर्जिताः। तत्र नक्षत्राणि। रोहिणी पूर्ब्बफल्गुनी पूर्ब्बाषाढा पूर्ब्बभाद्रपत् उत्तरफल्गुनी उत्तराषाढा उत्तरभाद्रपत् श्रवणा भरणी चित्रा एतद्व्यतिरिक्तानि। योगाः। व्यतीपातभिन्नाः। वाराः। क्रूर-भिन्नाः। ०। अथ नौकायात्रा। तत्र विहितनक्षत्राणि। अश्विनीहस्तापुष्यमृगशिराः पूर्ब्बफल्गुनी पूर्ब्बाषाढा पूर्ब्बभाद्रपदनुराधाधनिष्ठा श्रवणाः। वाराः शुभग्रहाणाम्। तत्र चन्द्रशोभनम्। तत्र शोभनचन्द्रः। तारा च शोभना विहिता। इति ज्योतिस्तत्त्वम्। ०।

अथ यात्रायां शुभजनकदर्शनादि यथा,—
"विप्राग्न्यश्वप्रयुक्ता हयमधुरगजा दक्षिणावर्त्तवह्नि
दिव्यस्त्रीपूर्णकुम्भा द्विजनृपगणिकाः पुष्पमाला
पताका।
सद्योमांसं घृतं वा दधि मधु रजतं काञ्चनं
शुक्लधान्यं
दृष्ट्वा श्रुत्वा पठित्वा फलमिह लभते मानवो
गन्तुकामः॥"
इति समयप्रदीपः।

तथाशुभजनकदर्शनं यथा,—
"सम्मुखे रजकं पश्चात् क्षुरिकं यदि पश्यति।
न गन्तव्यं तदा तस्मात् तैलवाद्यपयोऽशुभम्॥
अन्यो मुञ्चति गौः काकी भ्रूतः वा क्रुध्यते नरः।
यात्राम् यात्रा न कर्त्तव्या शोकं पश्यति यान्त नरः॥"
इति ज्योतिःसारः।

यात्राकाले विशेषदर्शनफलं यथा,—
"नकुलं हरिणं वानरं शूकरं चाष
अजुर्णो मणिश्चैव यात्रायां दक्षिणे शुभाः।
निषङ्गा गृधो वायसश्चैव रोदिषमरा।
अनुलोमदर्शनाद्याश्च यात्रायां वामके शुभाः।
वैश्यस्त्रीपूर्णकुम्भादौ यात्रायां दर्शनं शुभम्।"
यात्राकाले अशुभदर्शनं यथा,—
"कार्पासौषधतैलञ्च पङ्काङ्गारभुजङ्गमाः।
मुक्तकेशी रक्तमाल्यं नग्नाद्यशुभलक्षणम्॥" ०।
यात्राकाले क्षुतायाः फलं यथा—
"क्षुतायां सन्मुखे स्थाने लभेत् पूर्ब्बे महाधनम्।
आग्नेये शोकसन्तापौ दक्षिणे हानिमाप्नुयात्॥
नैरृते शोकसन्तापौ मिष्टान्नञ्चैव पश्चिमे।
अन्नं प्राप्नोति वायव्ये उत्तरे कलहो भवेत्।
ईशाने मरणं प्रोक्तं प्रोक्तं क्षुतायाः फलम्॥"
अथ यात्रायां दिग्विशेषे विशेषनक्षत्राणि।
"कृत्तिकादौ तु पूर्ब्बस्य सप्त ऋक्षाणि ये प्रयेत्।
मघादौ दक्षिणे गच्छेदनुराधादि पश्चिमे॥
प्रशस्ता चोत्तरे यात्रा धनिष्ठादिषु सप्तसु।
अश्विनीरेवतीचित्राधनिष्ठा सर्व्वतस्तथा।
मृगाश्विचित्रापुष्याश्च सर्व्वदिक्षु शुभा सदा॥"
यात्रान्ते लग्नादिषु ग्रहस्थितिफलं यथा—
"कन्याप्रदाने यात्रायां प्रतिष्ठादिषु कर्म्मसु।
शुक्रचन्द्रौ च लग्नस्थौ शुभदौ च द्वितीयगौ॥
शशिमशुक्रजीवाश्च राहौ चाप तृतीयके।
भौममन्दशशाङ्काका बुध भेदचतुर्थके॥
शुक्रजीवौ पञ्चमे च केतौ षष्ठेऽर्कराहुतौ।
मन्दार्केन्दुकुजा षष्ठे गुरुचन्द्रौ च सप्तमे॥
शुक्रश्चाष्टमे केतौ नवमस्थौ गुरुः शुभः।
अर्कात्रिपन्ना दशमे एकादशेऽखिला यथा॥
बुधोऽपि द्वादशे चैव मार्गेषु सुखदो भवेत्॥"
इति मार्कण्डे ६। ६१ अध्यायौ। ०।
अथ राजयात्रा।
"इदानीं सर्व्वधर्म्मज्ञ धर्म्मशास्त्रविशारद।
यात्राकालविधानं मे कथयस्व महीपते॥
यदा मन्येत नृपतिराक्रन्देन बलीयसा।
पार्ष्णिग्राहाभिभूतोऽरिस्तदा यात्रां प्रयोजयेत्॥
पोषाश्वत्था प्रभूताश्च प्रभूतञ्च बलं मम।
मूलरक्षासमर्थोऽस्मि तदा यात्रां प्रयोजयेत्॥
अशुद्धपार्ष्णिर्नृपतिस्तु यात्रां प्रयोजयेत्।
पार्ष्णिग्राहाधिकं सैन्यं मूले निधाय वा व्रजेत्॥
चैत्रे वा मार्गशीर्षे वा यात्रां यायान्नराधिप।
चैत्रे पश्यति नैदाघं हन्ति पुष्टिञ्च शारदीम्॥
एतदेव विपर्य्यस्तं मार्गशीर्षे नराधिप।
शत्रोर्म्मा व्यसने यायात् काले च तु सुदुर्लभः॥
दिव्यान्तरीक्षक्षितिजैरुत्पातैः पीडितं परम्।
षडृक्षपीडाभिहतं पीडितञ्च तथा ग्रहैः॥
ज्वलन्तीव तथोल्का दिशं यस्य प्रपद्यते।
भूकम्पोल्का दिशं याति याञ्च केतुः प्रदृश्यते॥
विद्विष्टञ्च बलेद्युक्तं स भाषावाद्यथाधिप।
सम्भवन्तीव तथा दुर्भिक्षपीडितम्॥
सम्भूतान्तरकोपञ्च क्षिप्रं यायादरिं नृपः।
यूकामाक्षिकबहुलं बहुपङ्कं तथाविलम्॥
नास्तिकं भिन्नमर्य्यादं तथामङ्गलवादिनम्।
अपेतप्रकृतिञ्चैव निरायं तथा वदेत्॥
विद्विष्टनायकं सैन्यं तथा भिन्नं परस्परम्।
व्यसनासक्तमनसं वर्जं राजाभियोजयेत्॥

नैमित्तिकानुत्पातांश्च स्फुरणादीनि यच्च च ।
दुःस्वप्नांश्चापि यत्नेन चक्रराडभियोजयेत् ॥
उत्साहबलसम्पन्नश्चातुरङ्गबलस्तथा ।
शुद्धदृष्ट्वेना राजा परानभिमुखो व्रजेत् ॥
शरीरस्फुरणे धन्ये तथा दुःस्वप्ननाशने ।
निमित्ते शकुने धन्ये जाते शत्रुपुरं व्रजेत् ॥
ऋक्षेषु चरेषु शुद्धेषु यथेष्टद्विगुणेषु च ।
प्रयाणे च शुभे जाते परान् यायान्नराधिप ॥
एवन्तु दैवसम्पन्नस्तथा पौरुषसंयुतः ।
देशकालोपपन्नाञ्च यात्रां यायान्नराधिप ॥
उलूकस्य निशि स्यात्तु न च तस्य दिवा वधे ।
सर्वे देशश्च कालश्च ज्ञात्वा यात्रां प्रयोजयेत् ॥
पदातिनागबहुलां सेनां प्रावृषि योजयेत् ।
हेमन्ते शिशिरे चैव रथवाजिसमाकुलाम् ॥
खरोष्ट्रबहुलां सेनां तथा ग्रीष्मे नराधिप ।
चतुरङ्गबलोपेतां वसन्ते वा शरद्यथ ॥
सेना पदातिबहुला यस्य स्यात् पृथिवीपते ।
अभियोज्यो भवेत्तेन शत्रुर्विषमसंस्थितः ॥
गम्ये वृक्षावृते देशे स्थितं शत्रुं तथैव च ।
किञ्चित्पङ्के तथा यायाद्बहुनागो नराधिप ॥
रथाश्वबहुलो यायात् शत्रुं समस्थलस्थितम् ।
तदाश्रयन्तो बहुलास्तथा राजाभिपूजयेत् ॥
खरोष्ट्रबहुलो राजा शत्रुं बन्धनसंस्थितम् ।
बलयुक्तोऽपि योऽन्यः स्याद्भिमान् प्रावृषि भूभुजा ॥
हिमपातयुते देशे स्थितं गाढ़ाभियोजयेत् ।
यवसन्तौ घर्मश्च कालौ यायाद्वसन्तौ ॥

विज्ञाय राजा विजयैषणार्थी
दैवं त्रिकालज्ञ तथैव बुद्धा ।
प्रायात् परं कालविदां मतेन
सचिवैः सार्द्धं विजयाभिलिप्सुः ॥"

इति मात्स्ये २२१ अध्यायः ॥ ॥

यात्राकाले मङ्गलदर्शनानि यथा,—
"पौर्णमास्यां महायात्रा लाङ्गला च प्रसादी ।
तेनैव सार्द्धं गमनात् बभूव मङ्गलोत्सुकः ॥
ददर्श मङ्गलं रामः शुभाय जयसूचकम् ।
बुबुधे मनसा सर्वं विजयं वैरिघातनम् ॥
यात्राकाले च पुरतः शृणुष्व यद्वदामि मुने ।
दक्षिणस्य प्रान्तरे च मत्तगजाभिवन्दनम् ॥
आकाशवाणीं सद्गीतां घण्टाभेरीध्वनिं च ।
करोत्तं तत्र चकार मेघमन्द्रं जयावहम् ॥
चकार यात्रां भगवान् दृष्ट्वा वैविध्यं शुभम् ।
ददर्श पुरतो विप्रवृन्दैर्वामाभियुक्तान् ॥
सम्पन्नदीप विधवां पतिपुत्रवतीं सतीम् ।
पुरो ददर्श सीरांश्च नानाभूषणभूषिताम् ॥
दिव्यं शिवां पूर्णकुम्भं चान्यच्च मङ्गलार्थिना ।
गजेन्द्रं ददर्श रामेशो नानामङ्गलसूचकम् ॥
हंसचारं मत्तचिह्नं सुरभीं सवत्सां दिव्याम् ।
चमरीं राजहंसञ्च चक्रवाकं शुकं पिकम् ॥
मयूरं खञ्जनञ्चैव शङ्खचिलपक्षिणम् ।
मार्जारं वक्ताकाश्च सारसं चामरं चरम् ॥
श्वेताश्वं दक्षिणावर्त्तं शङ्खं चर्मरञ्च शुभम् ।
कपोतादि बलीवर्दं मत्स्यं दधि दुग्धकम् ॥
माणिक्यं रजतं मुक्तां मणीन्द्रञ्च प्रवालकम् ।
दधि क्षीरं शुक्लधान्यं शुक्लपुष्पञ्च कुङ्कुमम् ॥
शुक्लवस्त्रं पताकाञ्च दर्पणं श्वेतचामरम् ।
धेनुं सवत्सां छागञ्च दर्पणं भूमिपं तथा ॥
कुम्भञ्च दीपयानाञ्चाप्यमलं पायसं तथा ।
शालग्रामं पद्मपत्रं स्वस्तिकं घृतं मधु ॥
माल्यादिकं हविश्चैव सिद्धान्नं तण्डुलादिकम् ।
मेघाच्छन्नस्य च रवेरन्यच्चन्द्रमण्डलम् ॥
कस्तूरीं चन्दनं तोयं हरिद्रां सौभाग्यतिलकाम् ।
सिन्दूरं सर्षपं दूर्वां विप्रबालकबालिकाम् ॥
स्वर्णं मेघाञ्च भ्रमरं कर्पूरं पीतवाससम् ।
गोमयं गोपुरीषञ्च गोधूलिं गोष्पदाङ्कितम् ॥
गोष्ठं गवां वर्त्म रम्यं गोशालां गोस्थलीं शुभाम् ।
भूषणं देवप्रतिमां ज्वलदग्निं मनोहरम् ॥
ताम्रं स्फटिकं रौप्यञ्च सिन्दूरं माल्यचन्दनम् ।
गन्धञ्च हीरकं रत्नं दर्शं दक्षिणे शुभम् ॥
शुश्राव कामोदरावं प्राप विप्राशिषं शुभम् ।
दृष्ट्वैवं मङ्गलं यात्रां प्रययौ च मुदान्वितः ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३१ अध्यायः ॥०॥

यात्राकाले अमङ्गलदर्शनानि यथा,—
"राजा जगाम समरं हृदयेन विदूयता ।
सार्द्धं सैन्यगणैश्चैव भ्रातृभिः सेवकैः सह ॥
ददर्शामङ्गलं राजा पुरो वर्त्मनि वर्त्मनि ।
ययौ तथापि समरं न जगाम गृहं पुनः ॥
मुक्तकेशीं छिन्ननासां रुदतीं च दिगम्बरीम् ।
छिन्नवस्त्रपरीधानामपरां विधवामपि ॥
क्रुद्धरूपां योनिदुष्टां व्याधियुक्ताञ्च कुट्टनीम् ।
पतिपुत्रविहीनाञ्च डाकिनीं पुंश्चलीमपि ॥
कुम्भकारं तैलकारं व्याधं सर्पोपजीविनम् ।
कुचैलमपि सन्न्यासं मलकाषायवासिनम् ॥
महाशिल्पिनमेव कन्याविक्रयिणं तथा ।
चितां दग्धशवं भस्म निर्वाणाङ्गारमेव च ॥
अश्मानकं सर्वं गोधाञ्च शशकं विषम् ।
आहयाचकं विलोचं गौणं नीराश्रया ॥
देवलं ग्रामयाजञ्च शूद्रश्राद्धान्नभोजिनम् ।
शूद्राणां याजकं शूद्रयाजकं ग्रामयाजकम् ॥
कृत्रिमपुत्तलिकाञ्चैव शवयानञ्च कारिणम् ।
शून्यकुम्भं पूर्णकुम्भं तैलं लवणमस्थि च ॥
कार्पासं कच्छपं चूर्णं कुक्कुरं वह्निकारिणम् ।
रुधिरञ्च महानागं कुञ्जरं भस्म रसम् ॥
कपर्द्दकञ्च चौरञ्च छिन्नकेशं नखं मलम् ।
कराडञ्च विनापदं विषपत्रादिकं जलम् ॥
अमङ्गलं मदमत्तं वदन्तं शोकवादिनम् ।
मिथ्यासाक्षिप्रदातारं चौरञ्च परघातिनम् ॥
दुष्टस्त्रीपतिद्रुग्नं च पुंश्चल्यन्नभोजिनम् ।
देवगुरुविप्राणां वस्तुविक्रयकारिणम् ॥
दत्तापहारकं दस्युं हिंस्रं सूचकं खलम् ।
पितृमातृविरक्तञ्च ब्रह्मनिन्दकवादिनम् ॥
असत्यञ्च शठञ्च न्यासापहारिकं नरम् ।
मित्रद्रुहं मित्रघ्नं च विश्वासघातिनम् ॥
स्वर्णस्त्रीचौरञ्च चिह्नकं आखुचारकम् ।
कौलालं गजचैव आहदीनिकं दिव्यम् ॥
मनोपवासशीलञ्च दीनादीन भक्षकम् ।
गलितव्याधियुक्तञ्च गुरुतल्पगमेव च ॥
पूयं विभिन्नलिङ्गञ्च सुरामत्तं सुरां तथा ।
विष्ठा चर्म्म च रुधिरं मक्षिकं गर्दभं तथा ॥
मूत्रं पुरीषं श्मशानं चाण्डालं शववाहिनम् ।
अश्मापात रक्तवृष्टिं वातञ्च धूमपातकम् ॥
शृङ्खं शूकरं सर्पं शिवं कङ्कञ्च मल्लुकम् ।
मार्जारं शुष्ककाष्ठञ्च वायसं गर्दभं वृथा ॥
अपद्रावितकाष्ठञ्च तन्त्रमन्त्रोपजीविनम् ।
वैद्यञ्च रक्तपुष्पञ्चैवौषधञ्जनमेव च ॥
कुमारीं मलशालिनां विप्रनाशञ्च दाहकम् ।
दुर्गन्धवातं दुःशब्दं राजा समाप वर्त्मनि ॥
मनश्च कुत्सितं प्राप क्षुभिताश्च विरञ्जनम् ।
यात्रामङ्गलरूपञ्च दृष्ट्वा राजा बभूव ह ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३६ अध्यायः ॥

श्रीकृष्णस्य मथुरायात्रा यथा,—
"राधिकायाश्च प्रत्यूषे सुमात्रा गोपिकासु च ।
पुष्पचन्दनतल्पे च शयानासु गतोऽस्मि ते ॥
रात्रीप्रहरेऽतीते निशायाश्च शुभक्षणे ।
शुभनक्षत्रयोगे चापन्नयोगसमन्विते ॥
सौम्यग्रहाभिदृष्टे कले सौम्यग्रहविलोकिते ।
पापग्रहसमाधानाद्धदृष्टेमार्गेविर्जिते ॥
यशोदा बोधयामास कारयामास मङ्गलम् ।
स्नापयामास गङ्गायां हरिं स्वयम् ॥
माल्यं निधापयामास राधिकामप्यभोजयत् ।
उत्तस्थौ विष्णुर्भगवान् माता मनोरथवत् ॥
प्रयात्ता मातृगणैस्तदा सोऽपि च राधया ।
उदाय संस्कृते स्नात्वा विप्रे चन्दनादिभिः ॥
धनरत्नसमूहं संस्कृत पयसादिभिः ।
नाना द्रव्यं पूर्णकुम्भं वह्निं विप्र धरणिमयी ।
पतिपुत्रवतीं दीप दर्पणं पुण्यकारां ॥
दूर्वा गोरोचनं पुष्पं वामं चिनं शुभम् ।
शुक्लधान्यं च यहीनां च प्रदी मस्तकोपरि ॥
घृतं दधि माक्षीकं रजतं काञ्चनं दधि ।
चन्दनं दर्पणं कृत्वा पुष्पमाला गले ददौ ॥
गुरुवर्गं ब्राह्मणञ्च वन्दयामास भक्तितः ।
शङ्खध्वनि वेन्धा गीतं मङ्गलादिकम् ॥
विप्राशीर्वचनं सर्वं शुश्राव परमादरम् ।
यात्रामङ्गलस्तवञ्च शुश्राव मङ्गलवरम् ॥
निषिद्धं दक्षिणं मार्गं दक्षिणं व्याघ्रादिवादकम् ।
विहाय कान्तिनाम मार्गे मध्यमार्गं हरिः ॥
विधाय वायुदिक्च यात्रां चकार सः ।
ततो ययौ मन्दगतो मन्दगः प्राङ्गणं परम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७१ अध्यायः ॥

अथ यात्राशुद्धिः । तत्र समयः ।
"यात्रायां विदिशं ज्ञात्वा दैवात् नैकारे यद्यवस्तथा ।
प्रोक्तं चाश्वपदे चार्द्रौ विकारो वाप विजयः ।
यद्यपि लेखया राज्ञी तस्य विजय यात्री ॥
यात्राक्षणिकमध्या शुभैकदृष्टाग्रहा मते ॥
मन्त्री कृत्तौ दस्त्रविकर्षो मित्रार्थ्या
प्रत्युत वैश्यस्तैर्जाति एकतोऽर्थे ।
अश्विनी रेवती ज्येष्ठा तथा पुष्यपुनर्वसू ।

मैत्रं मृगशिरो मूला याम्यायामुत्तमा स्मृता ।
भरणी कृत्तिकार्द्रा च विशाखा चोत्तरात्रयम् ।
मघा मूलपतिश्चैव यात्रायां मरणप्रदाः ॥
पूर्वे कुबेरे दहने विशाटे
यमे जलेशे पवने महेशे ।
व्याघ्यं नरस्य प्रतिपन्नक्षमेथ
युग्म तिथीनां प्रवदन्ति तज्ज्ञाः ।
स्यात् चतुर्थे याममहत्त्वयाय
यत्नाद्भवेत् सर्व्वशुभाय पुंसाम् ॥
रव्य शुक्र कुजो राहुर्मन्दचन्द्रौ गुरुर्बुध ।
चपल योगमध्ये यात्रा एकतो मरण ध्रुवम् ॥
पूर्व्वेन्द्र दक्षिणे यानमाह
रोहिण्यां तथार्यमाख्याश्च मूलम् ।
काम यायात् साम्परायेषु कार्य्ये-
ष्वन्यदापि प्रेक्ष मूलानि भानि ॥"
अथ तिथिमूलम् ।
"षष्ठाष्टमी चतुर्थी च नवमी द्वादशी तथा ।
चतुर्दशी कृष्णपक्षाख्या यात्रायामशुभप्रदा ॥
प्रायो यत्र धनञ्जयुर्दशाप यथा
याया शुभा सविष्टज परिशुध्य लग्नम् ।
धर्म्मयमा शुभपक्ष जयन्ति सौम्या-
स्त्रिकारिषष्ठमरारिगुरु जिगीषो ॥
नाकालवर्षविद्युत्स्तनितेष्विह कथञ्चिदपि यानम् ।
आपत्प्रावृत् दिव्यान्तरीक्षभौमेष्वघोत्पाते ॥"
तत्र क्रम ।
"राज्ञो यात्राविधि वक्ष्ये जिगीषूणां यरायणीम् ।
नीराजनाविधि कृत्वा सैनिकाश्चाभयेतत ।
यथान्यात् स्याद्याविति यात्राक्रमो मत ॥"
तत्र नीराजनाविधि ।
"अगस्त्येऽभ्युदिते शुक्ले पक्षे पूर्व्वे शुभप्रदे ।
अश्वनीराजन कुर्य्यात् यथोक्तविधिना तमे ॥
उदीच्यां पश्चिमे भागे प्रागुदग्या वा शुभे दिने ।
गजनीराजन कुर्य्यात् महीपालो जिगीषवान् ॥
दक्षिणस्मिन् रवौ कुर्य्यात् पत्तिनीराजनाविधिम् ।
नौकानीराजन कुर्य्यात् दक्षिणायां प्रतिष्ठति ॥
यथैवायेव यात्रानां विजयादशमीतिथिम् ।
चचारीनाथ सर्व्वेषां प्रकोत्थाने नीराजनम् ॥
हयस्य नवदशस्य तथा सिंहासनस्य च ।
यहस्य नवरत्नापि महाविप्रवर्त्तक्रमे ॥
आक्रमो युवराजस्य महिष्या मन्त्रिणान्यथा ।
जन्मादिवसे राजा कुर्य्यान्नीराजनाविधिम् ॥
अभिषेकादिवं प्रोक्तमेषां जन्मादिन मया ॥"
तद्यथा,—
"अश्वानां भास्करो देवो रैवन्तमिति संज्ञया ।
गजानां देवता ब्रह्म पत्तीनां कालिका मता ॥
नौकानां वरुणो देवो यानानान्तु धनञ्जय ।
अश्वानां देवता रामो यम खड्गस्य पूज्यते ॥
अथान्यां वहमान पूज्यो हृदयस्थितिरिति क्रमात् ।
तान् पूजयित्वा विधिवद्देवतान्नीराजयेन्नृप ॥
शारदमहिषे पुष्टैश्चामरच्छत्रध्वजादिभूषणैः ।
हामकेमहिषदिशुखे पुरुषैस्त्रिदिशुषैश्चापरैरपि
काभि ॥

अथ वा यद्यभ्युदिते नीराजयेद्राजा ।
द्वादशवाहे रुचिरे शाकोपाङ्गैरसोऽहँसद्योषे ।
तस्मान्नृतो याम्येगजयुग्मनीराजन सम्भवति ।
छागजयुग्म वृषभयुग्म युग्मञ्च मेषाणाम् ॥
तुरगा दश क्षुद्राङ्गा चाश्वा पञ्च द्विपश्चैक ।
भल्लुका चि कुक्कुराश्चैकैका पत्तिसप्तकम् ॥
नौकाशतक चाङ्ग नवद्वयक कायमादिभि
र्वेष्टितम् ।
वेष्टुयुक्तमपि अन्तगा नौकानीराजने राज्ञाम् ॥
यदा द्विपद यान सर्व्वथाभिध्यते तुरगे ।
शुम्भावत्सरवसितैर्योग्याङ्गैर्योग्यवर्णैश्च ॥
चन्द्राभिधातुभि कुर्य्याद्गजनीराजनाविधिम् ।
गजाश्वनरनौकाभिर्विशुद्धाभिश्च योत्तरम् ।
इत्येनीनाविधैरस्त्रैर्धातुभिर्वसनैस्तथा ॥
सिंहासनेष योग्येश्च कुर्य्यान्नीराजनाविधिम् ।
यद्गनीराजनार्थेवं नरस्तस्य निगद्यते ॥
अभि स्वरे प्रगालेश याम्येवैकयोदृते ।
पुर नीराजयेद्राजा चिरमुन्नतिदैवते ॥
वा दशाश्वस्तदर्थैन नरश्चैव तदर्द्धत ।
यात्रादीनां नयेदेक इत्र नानाविधमया ॥
अश्वाधि धातवश्चैव वस्त्राणि च फलानि च ।
वसवा सालजाश्चैव जलजाश्चैव जन्तव ।
नवपद्माय कुर्य्यादा प्रोक्ता यत्र घटास्तथा ।
योग्यवासुवहहूता नौकासक्तनयनाया ॥
निवदेद्यमित सर्व्वं रजत ताम्रमेव वा ।
आजनीराजने दद्यादुपरिष्टाच्चिरं स्थितिम् ॥
अश्वेनीनाविधे कुर्य्याद्युवराजनीराजनम् ।
अलङ्कारैश्च विविधैर्हयीभीराजन मतम् ॥
मन्त्रिनीराजन राज्ञा हर्षेणेव समाचरेत् ।
अमात्यानां सैनिकानां विप्राणां मन्त्रिणान्तथा ॥
वधूनीराजन कुर्य्यादिति भीमस्य सम्मतम् ।
नीराजनाया यत्नेन न पश्चिम पुन स्थितौ ।
धनहत परिश्रम्य कुर्य्यान्नीराजनाविधिम् ॥
स्वदेशा परराष्ट्रे गहने वा वनेऽपि वा ।
देवग्रैश्वदीनेभ्य प्रयच्छेदा यथायथम् ॥
इति सक्षेपत प्रोक्तो मया नीराजनाविधि ।
अनेन विधिना राजा सुचिर सुखमश्नुते ॥"
तथा हि गर्ग ।
"नीराजना महीन्द्राणां निघ्नन्ति विपरीऽखिला ।
सैव सम्यक राज्ञो वर्षेष्वेव सयत ॥
नीराजनाबन्धिताना न भय विद्यते क्वचित् ।
नीराजनाविहीनानां वर्षेषु सर्व्वसम्पद ॥"
तथा च वात्स्य ।
"ये भूमिपाला प्रतिवत्सरान्ता
कुर्व्वन्ति नीराजनकर्म्म सम्यक् ।
तेषां न लक्ष्मी चपलत्वमेति
धाम्यायलक्ष्मी करगैव तेषाम् ॥
एवं नीराजन कृत्वा राजा प्रस्थानमाचरेत् ॥"
इति नीराजनाविधि ॥ ० ॥

अथ यात्रा ।
"गुर्व्वादिग्रहसम्पन्न यातु यात्राजिगीषया ।
यदि यज्ञात् प्रकोपो न यदि राष्ट्रे न कण्टका ।
यायात्राय यायाद्वा पार्ष्णिग्राहेण शत्रुणा ।
राज्ञानुक्तो विनिघ्नन्ति काकान्
काकोऽप्युलूकान् रजनीक्षपाये ।
इति स्वकाल समुन्नीक्ष्य यायात
काले फलन्तीह समीहितानि ॥
प्रवलस्यबलोपेत दुर्भिक्षान्निप्रपीडितम् ।
सम्भूतान्तरकोपेत न यायात् पृथिवीपति ॥
निजदेशानुकूल्ये हि प्रातिकूल्ये परस्य च ।
यायान्नृपो यतो देवं बलमतत् पर मतम् ॥"
अन्यच्च तु ।
"विराटहि विषमाटे विषदिग्धे निरामये ।
विपक्षे जयमिच्छन्ति राजानो विजिगीषव ॥"
इति युक्तिकल्पतरु ॥
युद्धयात्रायामशुभलक्षणं यथा —
"सत्य निगच्छतो गच्छत याचोऽस्ति सुखनो
ऽभवत् ।
भवे यदीह कापोत श्येना श्यामा च
दृश्यते ॥
पिङ्गला वधुगोधा च शूकरी कपर्दी तथा ।
गजवाजरसेनाश्रधिरितिक्रियाश्च वामन ॥
पथ विभिन्दती सर्प कुम्भोदकं यथार्म्मत ।
वराह वानरो जम्बो मार्जारो मृतमेदम ॥
तैलतक्रकपर्दयुक्ताभ्यक्तादिदर्शनम् ।
वाम्यौजनवक्ररूकघृतयामयकज दर्शन ॥
तुषकार्पासलवणानां निन्दितानाञ्च दर्शनम् ।
रक्तामरधरो मुक्त पङ्कामिव तथा यथा ॥
ललाट मुक्तकेशाय उल्कापातभ्रमादया ।
दिशां दाहमहीकम्पा सरव कलुष नभ ॥
निर्घातचलिपते भानुनन्दा प्रतिसूर्याश्चरा ।
उत्पादकं महाकूप हृदय दीर्घिकासु च ॥
अकालविकृति पुष्पफलानामन्यभूतदा ।
प्रीत उष्णविपर्यासा मेघनादाश्च दारुणा ॥
आरण्यजन्ता ग्रामेषु ग्राम्याऽरण्यवासिन ।
क्रोधसमथमदाश्च प्रमत्ताश्च पिपीलिका ॥
अन्याश्च मदन्ती सेना गजाश्वाश्च तथैव च ।
एते च पुरप्राकारे विपमन्धुत्पतन्ति च ॥
दुगन्ध प्राकटो वायुर्नीहारो घोरा हतप्रभा ।
घटम्भूतानुपाताति गजा अश्वा प्रपञ्चिते ।
भवक्रमनगताकाना स्फुटन दर्पभिन्दनम् ।
कलङ्कमपि चक्रं च गता दुन्दुभिरेव च ॥
स्वातवातूटनश्चापि नारायणाय कृपणा ।
गदानां हृदरागाश्च द्योनिता छत्रभिन्दना ॥
शुम्भारोहणवाक्याक्षपालश्चैव च ।
प्रतिमाचलितं भेदो ग्लन्यायाय चलनम् ॥
मद्यां राजभमारोह जीवाय बलमता ।
क्रोधती चाविच्छामारि द्रव्याणि विशुद्धोमलम् ।
वाद्यानां घातन मुहे विक्षिप्ता बहला प्रभा ।
मधिकारमुखचूडङ्कुमोषाग्न्युद्गमम् ॥
विलोका न वर्षेऽपि लघून स्फुटती ध्रुव ॥
एवंविधान् तथान्यानाप् दृष्टान् घोरेषु वाप्य ।
मनस्य भारद पोऽथ विनैर्विहन हिन ॥"
इत्यादि देवदत्तं भारद्वाजाय ॥

अथ द्वादश यात्रा ।
"ज्यैष्ठ्यां यात्रां नाथ कलिकल्मषनाशनम् ।
द्वादशयात्रास्याति वक्ति श्रीरघुनन्दनः ।"
तथाच द्वादशयात्राकालस्य मूलोपादेयत्वात्
अत्रैव ते लिख्यन्ते । तद्यथा स्कन्दपुराणे ।
इन्द्रद्युम्न उवाच ।
"वैशाखादिषु मासेषु यात्रापूजाविधिं मुने ।
श्रोतुमिच्छामि देवेशि यथावद्वक्तुमर्हसि ॥
जैमिनिरुवाच ।
वैशाखादिषु मासेषु देवदेवस्य शार्ङ्गिणः ।
या या द्वादश यात्राः स्युस्ता हि वच्मि ते
शृणु ॥
वैशाखे चान्दनी यात्रा ज्यैष्ठे स्नापनमीरिता ।
आषाढ़े रथयात्रा स्यात् श्रावणे शयनी तथा ।
भाद्रे दक्षिणपार्श्वीया आश्विने वामपार्श्विका ।
उत्थानी कार्त्तिके मासि द्वादशी मार्गशीर्षके ।
पौषे पुष्याभिषेकः स्यात् माघे शाल्योदनी तथा ।
फाल्गुने दोलयात्रा स्याच्चैत्रे मदनभञ्जिका ।
एकैका सुविदा सर्वा धर्मकामार्थदायिका ।"
अथ यात्राविधिः । स्कान्दे ।
"वैशाखस्य सिते पक्षे तृतीयाक्षयसंज्ञिता ।
तत्र मां लेपयेद्गन्धलेपनैरतिशोभनैः ॥
वैशाखस्यासिते पक्षे तृतीया पापनाशिनी ।
प्रथमा विष्णुना चैव यात्रा पञ्चदशैर्युता ।
य पश्यति तृतीयायां सख्य चन्दनभूषितम् ।
वैशाखस्य सिते पक्षे स यात्यच्युतमन्दिरम् ।
वैशाखे जयशब्देन पूजयित्वा तदा हरिम् ।
नानावाद्योपनिवेदैर्नैवेद्यैः कस्तूरीभिश्च ।
वस्त्रैर्नानाविधैश्चैव तथा नानोपचारकैः ।
गन्धोदकमगवार्थं तृतीयादौ विलेपयेत् ।
वैशाखस्य तृतीयायां चन्दनेन विलिप्य च ।
लेपनं सकले कुर्यात् सकले वा स्वशक्तितः ।
चन्दनागुरुकर्पूरैः कुङ्कुमरोचना ।
अनामायी तदा चैव विष्णोर्मन्त्रादिकं विदुः ।
सर्वैर्मन्त्रैश्चन्दनाद्यैश्च विष्णोर्गात्राणि लेपयेत् ।
एतत्र गुरुधीमान् कुर्याल्लेपनकर्मणि ॥"१ ।
अथ स्नानयात्रा । स्कन्दपुराणे ।
"ज्यैष्ठ्यामवयातनीयवान् पूर्वं जगदीश्वरम् ।
तथाच यापय नाथं महाकार्यविधानतः ।
तस्मै प्राणश्रवणाके सखका खलितश्च माम् ।
रामं सुभद्रां सुवाक्य मम लोकमवाप्नुयात् ।"
तथा ।
"मासि ज्येष्ठे तु संप्राप्ते नक्षत्रे शक्रदैवते ।
पौर्णमास्यां हरे स्नानं सर्वकामफलप्रदम् ।
सर्वतीर्थमयः कूपस्तत्राले निर्मलः शुचिः ।
तदा भोगवती तत्र प्रत्यक्षा भवति द्विजाः ।
तस्मात् ज्येष्ठ्यां चतुर्दश्यां सोमार्के कल्यनेत्रके ।
आनयेत्ति तदा जलं सततं न कुम्भगुरुम् ।
अष्टाहरेद्धरे स्नानहोमं परमाद्भुतम् ।
उषसो वै न चोद्दिष्टं नमस्कृत्य शुचिर्भवेत् ।
अम्बुधौ चक्रतीर्थोञ्जलयात्रा प्रतिष्ठिता ।
ज्येष्ठायां भगवन्तो वै स्नापितो सुराधिपा ।
न हि भगवान् मन्त्रजाप्यं यात्रायां यतमानसः ।
ज्येष्ठे च स्नानं कुर्यात् श्रीविष्णोर्जलशायिनः ।
देवन्दिवस दुरितं पञ्चमासचतुष्टयम् ।
नवकल्पान् दशाब्दानि यात्रायां मङ्गलानि च ।
सकलैश्वर्यदायाद्युक्तस्नानानि च ।
कोटिकोटिसहस्राणि पुण्यपापानि यानि च ।
सर्वाण्येव प्रणश्यन्ति पौर्णमास्यां च वासरे ।
पुष्पवस्त्रसमायुक्ते यावद्यात्रा तथैव च ।
नारिकेलोदकेनाथ तथा तालफलाम्बुना ।
पञ्चामृतैः शीततोयैः कर्पूरवासितैः ।
पयोदधि शुद्धेन तथा पुष्पोदकेन च ।
स्नापयित्वा जगन्नाथं पूजयेत् परमेश्वरम् ।
ॐ घं सहस्राये नमः इति मण्डलाद्यं विनिर्दिशेत् ।
य एवं कुरुते विद्वान् यात्रायां चापि शुचिः ।
सर्वपापैः प्रमुच्येत विष्णुलोकं च गच्छति ।
चतुर्दश्यां हि मञ्चं कारयित्वा सुशोभनम् ।
सुगन्धिधूपधूपितं चन्द्रातपसमुच्छ्रितम् ।
एवं मञ्चं प्रतिष्ठाप्य जगन्नाथं निवेशयेत् ।
सुवासितं जलपूर्णं घटकं तत्र न्यसेत् ।
जयशब्दैश्च स्तुतिभिर्गीतवाद्यैर्नरेश्वर ।
जयस्व राम कृष्णेति जयभद्रेति चोदिते ।
गीयते मन्त्रवेदज्ञैर्विप्रैर्वेदादिभिः ।"
अथ रथयात्रा । स्कन्दपुराणे ।
"गुण्डिचाख्यां महायात्रां प्रकुर्वीत विधानतः ॥
आषाढ़स्य सिते पक्षे द्वितीया पुष्यसंयुता ।
तस्यां रथे समारोप्य रामं मां भद्रया सह ।
यात्रोत्सवं प्रकुर्वाद प्रीणयेच्च द्विजान् बहून् ।
अथवाऽपि तिथौ कार्या सदा सा प्रीतये मम ।
तस्मात् महीतलीरे मम यात्रा भविष्यति ।
अष्टमे दिवसे कुर्यात् रथात् मास्यभिपूजयेत् ।
कल्याणमवदीपोद्भव प्रीत सर्वाहिनात् ।
दक्षिणाभिमुखी यात्रा विष्णोरेषा सुदुर्लभा ।
यथा पूर्वा तथा चेयं तैः हे सुखसम्पत्तिदा ।
अष्टौ विरचेत्याद्यं तन्त्रेण तु पार्श्वभिः ।"
इतिवत् लिखिता यात्राक्षे धीमन्तः ।
"तिथिरेकैव दिवसव्यापिनी कीर्त्तिता ।"
इति विष्णुधर्मोत्तरात् ।
यत्तु ।
"आषाढ़स्य सिते पक्षे भवा वा पुष्यसंयुता ।
यात्रोत्सवं प्रकुर्वीत यात्रायां पुष्य एव हि ।"
इति ईश्वरसंहितायां वचनान्तरम् ।
तद्वैकल्पिकपौष्यादिविधायकम् । यानि ।
"आषाढ़स्य द्वितीयायां रथं कुर्याद्विधिवत् ।
आषाढ़स्यैकादश्यां शयनोत्सवमाचरेत् ।
यात्रा यदि हि अशक्ता यात्रान्तरमपेक्षते ।
अथ अर्धे विष्णोरेषा स्नानेन कुम्भकात् ।
आरम्भ सर्वपापानि सर्वे सर्वे प्रयेरणी ।
रथेष्वेव हरिं तं महावेदमनोहरे ।
ये पश्यन्ति सदा भक्त्या यात्रायां हरे पदे ।
सर्वे यान्ति ध्रुवं यान्ति प्रतिमार्ग द्विजोत्तमाः ।
यात्रा नैव यत्रो विष्णोरुत्सवः यात्रावकाश ।
रथयात्रैव यात्रायां सुतेभ्यश्च पुण्यार्थिनः ।
महावेदी सज्जन त रथस्य पुरुषोत्तमम् ।
सम्भाव्य शुभवाद्य कृत्वा सुखिनं यात्रया ।
आषाढ़स्य सिते पक्षे द्वितीये विष्णो शुभदे ।
प्रतिष्ठाप्य सन्नद्धेन विधिना पूर्ववद्विजाः ।
रथं नरो हरेः कुर्यात् सारथं सुपरिष्कृतम् ।
भूषयेद्विविधैर्भक्त्या पताकाहारमालिकैः ।
अरक्षयत्रावेण भेरीढक्कादयस्तथा ।
घटवर्णकयुक्ताच मालया ध्वजशया ।
वैश्या धौतवस्त्रपाट्या समानहारभूषिता ।
अश्वाश्च वस्त्रकलश पताकाधिष्ठितान्तरा ।
गरुडश्च तत्र कुर्यात् रत्नचन्द्रमसिष्टिकम् ।
रोचनार्थं पीतरेणु कुङ्कुमाद्यैः विभूषितम् ।
चक्रं पृष्ठरत्नध्वज सर्वालङ्कारभूषितम् ।
दृष्ट्वा यदा यत्नं कुर्यात् यदुवाद्यविनिर्मितम् ।
छत्रचामर कृष्णाच्छादितो साधुलक्षणम् ।
सारथिं वालिनच्चैव वर्णं बलसुदान्वितम् ।
श्वेतकेसैः क्रमेणाश्वैर्नौजवैः सुशोभनम् ।
दृष्ट्वा सुखहितं तत्र रथं देवस्य च ।
आवश्योदयवेलायां देवं तस्मात् प्रपूजयेत् ।
ब्राह्मणैर्मन्त्रैः वाद्यैः वनितैश्च समन्विते ।
विमानवर्तैर्भद्रैश्च यात्रायां च सुताश्रितैः ।
तत्र चतुर्दशैर्वैश्च सुमधोभिरचावितम् ।
पथि श्रीभगवन्नारि प्रपठन्ति द्विजातयः ।
दैत्यजत्रुगणाद्याश्च वैष्णवा वदन्ति च ।
जितन्ते इति मन्त्रं वै कीचित् पुष्पे वदन्ति च ।
सतनामयुक्ताश्च कीर्तिं कार्यं सदा नृप ।
सर्वदोभाग्यदेशेषु कामायुरिकारत ।
सम्यायनी सुमधुरं गीतिन्यविचयान्तरे ।
एवं प्रतीतो समये कृत्वा रामपुरःसरम् ।
यतन्ति विप्रा महाय चाभिनय विमलया ।
हरे पूजा जगन्नाथं भ्रामयित्वा रथेन च ।
रामं भद्राच सम्यच रथमध्ये निवेशयेत् ।
पूजयेदुपचारैस्तैः महाभाग्ययुतः ।
रथस्थायां जगन्नाथं कृष्णकान्तं प्रयोजयेत् ।
तद्वेश्यन्धकारसमुद्धरेद्वै पापवर्जितम् ।
यथागुरादिकृतैः सर्वशास्त्रानर्थं वनम् ।
ये प्रकारं प्रकुर्वन्ति तेऽपि मोक्षभागिनः ।
अनुगच्छन्ति ये कृष्णं ते वैकुण्ठगामिनः ।
देवैः स्तुवन्ति वैष्णवाः पतन्ति मोक्षमापिनः ।
इतिहासपुराणाद्यैः स्तोत्रैश्चापि सुर्वजनैः ।
स्तुवन्ति कृष्णदेवार्थं ये वै विमलचेतसः ।
ते वै नयन्ति पापानि जयशब्दैः स्तुवन्ति ये ।
कर्त्तव्यं कुरुते चापि नावकाश महोत्तमाः ।
वैष्णवोत्तमवर्णश्च पुष्टि प्राप्यमवं हरम् ।
नामानि कीर्त्तयन्ति च ते यान्ति परमां गतिम् ।
जयस्व रामकृष्णेति जयभद्रेति वा वदेत् ।
न आत्मनो यात्रोत्सव च च देवमायुपदात् ।
वामदेवमन्वे कृष्णे सर्ववेदोपदेशकैः ।
रथस्थापि स्थिता यो वै वीक्षेत् पुरुषोत्तमम् ।
सर्वोत्तमाद्योः सर्वाभिर्वन्ध्यमयेबोधितात् ।
सर्वाणि तु भोगान्वितात् वाञ्छितं पूर्वजन्मम् ।

याति परतरो लोके महावेदीमहोत्सवात् ।
सर्व्वपापहरो योगः सर्व्वतीर्थफलप्रदः ।
तमुद्दिश्य ये तत्र दानं ददति वै नराः ।
यत्किञ्चिदण्वपि मेरुदानेन तत्समम् ॥
गुण्डिकामण्डपे यान्तं मदालस्य सहायनम् ।
तथातपश्रान्तगात्राय दर्पणेऽभिषेचयेत् ।
पश्चाच्छीतैः शीततोयैः पुष्पकर्पूरवासितैः ।
नारिकेलजलेनाथ तथा तालफलाम्बुना ॥
इक्षोरसेन मुद्गेन तथा पुष्पोदकेन च ।
सर्व्वाङ्गमनुलिप्येच्च चन्दनेन्दुमदद्रवैः ।
सुगन्धिमाल्याभरणैश्चोचिते सुशोभने ।
चामरैश्च जलाभैश्च शीतलैर्व्यजनैस्तथा ।
वीजयेत् पुण्डरीकाक्षं सुभद्रां बलमेव च ।
सिताभिः पानकैश्चैव तथा खण्डविकारकैः ।
कर्पूरैर्नारिकेलैश्च नानारम्भाफलादिभिः ।
तथा क्षीरविकारैश्च पक्वैरिक्षुभिस्तथा ।
वासितैः शीततोयैश्च गन्धताम्बूलपत्रकैः ।
सकर्पूरफलाढ्यैः पूजयेत् परमेश्वरम् ।
रथमध्यस्थितं देवत्रयं ये पुरुषर्षभाः ।
पश्यन्ति प्रकुर्व्वन्ति चिन्तन्तु श्रम एव च ।
ततोऽपराह्णे देवेशं दक्षिणाभिमुखीकृतम् ।
शनैः शनैर्व्वीथिषु मध्यकाले च मध्यमे ।
एवं व्रजति देवेशे सर्व्वथास्तं गतोऽभवत् ।
दीपकानां सहस्राणि ज्वालितानि करैस्तदा ।
मण्डपे वासयेद्देवान् गुण्डिकाख्ये मनोहरे ।
चारुचन्द्रातपे चारुमाल्यचामरभूषिते ।
पूजयित्वा जगन्नाथं तोषयेत् गीतनृत्यकैः ।
उपहारादिभिस्तत्र यथाशक्ति जनार्द्दनम् ।
सप्ताहं ये प्रपश्यन्ति गुण्डिकामण्डपे स्थितम् ।
साधं रामं सुभद्राञ्च विष्णुसायुज्यमाप्नुयात् ।
दिवा तद्दर्शनं पुण्यं रात्रौ दशगुणं भवेत् ।
यत्किञ्चित् क्रियते कर्म्म कोटिकोटिगुणं भवेत् ।
सर्व्वं मेरुसमं दानं सर्व्वं चाश्वसमा क्रिया ।
महावेद्यां गते कृष्णे योगोऽयं खलु दुर्लभः ।
ब्रह्मादयादयो योगाः स्कन्देन परिभाषिताः ।
महावेद्याख्ययोगस्य कलां नार्हन्ति षोडशीम् ।
यदापि च ध्रुवं कृत्वा दक्षिणाभिमुखानुगाम् ।
दक्षिणाभिमुखी यात्रा विष्णोरेषा प्रकीर्त्तिता ।
कार्य्या प्रयत्नतः सा हि भुक्तिमुक्तिप्रदा भवेत् ।
दक्षिणाभिमुखं यान्तं कृष्णं पश्यन्ति ये नराः ।
न तेषां पुनरावृत्तिः सत्यमेतन्न संशयः ।
प्रदक्षिणे यदन्तेता यात्रां नवदिनात्मिकाम् ।
तथा संकीर्त्तनादेव निर्म्मुक्तो जायते नरः ।
नास्तीव महायात्रा यो यथा कर्त्तुमिच्छति ।
सोऽपि विष्णुप्रभावेन वैकुण्ठभवनं व्रजेत् ।
चतुर्द्दश समुद्धृत्य पापावलिसमन्विताम् ।"४।
अथ शयनयात्रा । स्कान्दे ।
"आषाढे शुक्लद्वादश्यां कुर्य्यात् शयनमहोत्सवम् ।
मध्ये रचयेत्तत्र शयनागारमुत्तमम् ।
दशस्य पुरतः शय्यां दन्तादिनिर्म्मितोपरि ।
आस्तीर्य्य मृदुवस्त्रादि मृदुपीनोत्तरच्छदाम् ।
कर्पूरधूलिविलिप्तां चारुचन्द्रातपां शुभाम् ।
पुष्पगन्धयुतां सुखारोहां चन्दनाङ्किताम् ।
साधुदारां शुभां स्निग्धां नानाविधोपधाभिताम् ।
एवं स्थापयन् कृत्वा निशीथे स्नापयेद्विभुम् ।
सम्पूज्य भावयेद्देवं तेषां लक्ष्म्यादिभिः सह ।
एह्येहीति च सम्प्रार्थ्य स्वापार्थं परमेश्वरम् ।
नयेच्छय्यागृहद्वारं वादयेत् घटिकात्रयम् ।
पश्चात्ते स्थापयेतान्तु पृथक्पल्यङ्कताधिके ।
सुगन्धिचन्दनैर्लिप्तान् वस्त्रालङ्कारकान्तिभिः ।
पूजयित्वा यथान्यायं प्राञ्जलिर्मन्त्रमुच्चरेत् ।"
अनाहन्य इत्यादि ।
"सुदृढं कारयेद्द्वारं विष्णोः शयनवेश्मनः ।
स्नापयित्वा जगन्नाथं लभते सुखमुत्तमम् ।"५।
अथ पार्श्वपरिवर्त्तनयात्रा ।
"अथ ते सम्प्रवक्ष्यामि पार्श्वस्य परिवर्त्तनम् ।
नभस्यविमले पक्षे सर्व्वार्थे हरिवासरे ।
विष्णोः शयनवद्द्वारं शनैर्गत्वा प्रविश्य च ।
नमस्कृत्य जगन्नाथं पर्य्यङ्कस्थायिनं तदा ।
स्ववामं शनैर्द्वारं पूजयेदुपचारकैः ।
प्रणम्य भक्त्या तत्पादौ स्नापयेदुत्तरामुखम् ।"
मन्त्रमेनं पठेत् ।
"ॐ देवदेव ! जगन्नाथ ! कल्याण परिकल्पय ।
परिवर्त्तमिदं धर्म्मं यथा स्थावरजङ्गमम् ।
यत् दृष्ट्वा चेतरैरेव जायतेऽश्वप्रयुतिभिः ।
जगद्धिताय सुप्तोऽसि पार्श्वेन परिवर्त्तय ।
परिवर्त्तनकालोऽयं जगतः पालनाय वै ।
सदयश्चोऽयं प्रकोऽपि ध्वजे तिष्ठतु खगाधिपः ।
इह लक्ष्म्यादनस्य विसृज मह्यं सम्पदम् ।
मर्त्यां जन प्रापयति प्रजापालनहेतुकम् ।
इति सम्प्रार्थ्य देवेशं विनयात्तोषयेत्ततः ।
व्यजनैश्चामरैश्चैव वीजयेत् परमेश्वरम् ।
सुगन्धिचन्दनैरस्य सर्व्वाङ्गं परिलेपयेत् ।
स्वादूनि भक्ष्यभोज्यानि पायसादीनि दापयेत् ।
शय्यागृहद्वारि विभोः शनैर्गत्वा निवेदयेत् ।
देवमुद्दिश्य यत् कुर्य्यात् सर्व्वमक्षयतां व्रजेत् ।
पार्श्वे च व्यावर्त्तिते उपवासपरो भवेत् ।"
एवं चाश्विनशुक्लैकादश्यां पूर्व्वोक्तविधानेन दीपावल्यां वामपार्श्वपरिवर्त्तनं कार्य्यम् ।
मतान्तरे ।
"शुभे चैत्रादिके मासि महामायां प्रपूजयेत् ।
गौरवीं रावतीं मातां विष्णुमायां महेश्वरीम् ।
शिवा चैव न कर्त्तव्या कदाचिद्विष्णुपूजके ।"६।
अथोत्थानयात्रा ।
"एकादश्यान्तु कार्त्तिक्यां शुक्लायां हरिबोधनी ।
तस्यादुत्थापयेत् कृत्वा पूजयित्वा जगद्गुरुम् ।
पूर्व्ववत् पूजयित्वा तु प्रार्थनं समुच्चरेत् ।"
मन्त्रः ।
"ॐ उत्तिष्ठ देवदेवेश ! त्रैलोक्ये जगत्पते ! ।
चोदयेत् सकलं देव ! प्रसाद तव मायया ।
प्रबुद्ध्यस्व हरीकाच ! श्रीधर ! प्रभवेव वै ।
त्वया तव जगदिदं यत्तां सम्प्रेष्यति ।
ये ते कार्त्त क्रिया कर्म्मा प्रवर्त्तन्ते ततो ध्रुवम् ।
एवुत्थाप्य जगन्नाथं वेदघोषादिभिः स्वनैः ।
जयशब्दैस्तथा देवं नयेद्गर्भमण्डपम् ।
तैलेनाभ्यज्य तोयेन स्नापयेत् पुरुषोत्तमम् ।
पश्चात्तैर्नारिकेलस्थैः पयसैस्तथा ।
सुगन्धामलकेनाथ यवकल्केन लेपयेत् ।
चर्चयेत्तुलसीचूर्णैर्लेपयेद्गात्रचन्दनैः ।
पुष्पवासिततोयैश्च कुङ्कुमोदकैस्तथा ।
स्नापयित्वार्चयेत् पादं बहुधूपोपपादितम् ।
महोपचारैः संपूज्य विष्णुं नीराजयेत्ततः ।
कृताञ्जलिपुटो भूत्वा प्रार्थयेत् परया मुदा ।"७।
अथ प्रावरणयात्रा ।
"मार्गशीर्षे सिते पक्षे कुर्य्यात् प्रावरणोत्सवम् ।
कृत्वा दृष्ट्वा नरो भक्त्या वैष्णवं लोकमाप्नुयात् ।
षष्ठ्योऽधिवासं कुर्व्वीत पञ्चम्यां विधिकर्म्म-
वित् ।
प्रभाते मङ्गलं कुर्य्यात् मृगमदद्रवान्वितम् ।
दिक्पालान् पूजयेद्दिक्षु क्षेत्रपालं सभाधिपम् ।
चक्रध्वजौ च वीथ्यां चतुर्दिक्षु प्रपूजयेत् ।
तन्मध्ये स्थापयेद्देवं वादयेदुच्चवादिभिः ।
पूजयित्वा जगन्नाथं गन्धतैलेन दीपकम् ।
दत्त्वा कृष्णाय भक्त्या तु गीतवाद्यैर्मनोरमाम् ।
प्रातः प्रपूजयेद्देवं नानाद्रव्यैः सुशोभनैः ।
वस्त्रैर्बहुभिर्दिव्यैर्वासोभिः परिवेष्टयेत् ।
सुखदमथ सर्व्वाङ्गे शीतप्रावरकैर्हितैः ।
दूर्व्वाक्षतैः प्रपूज्याथ कुर्य्यान्नीराजनं विभोः ।
भगवन्तं समुद्दिश्य माषभक्ष्यं प्रदापयेत् ।
गुरवेऽथान्यदेवेभ्यो दीनानाथेभ्य एव च ।
शीतप्रावरणं दद्यात् वस्त्रं परमया मुदा ।
ददाति भगवान् प्रीतस्तस्मै वरमनुत्तमम् ।"८।
अथ पुष्यस्नानयात्रा ।
"पुष्यस्नानोत्सवं वक्ष्ये यथोक्तं ब्रह्मणा पुरा ।
पुष्यर्क्षेण च संयुक्ता पौर्णमासी यदा भवेत् ।
पौषे मासि तु तत् कुर्य्यात् पुष्यस्नानोत्सवं परे ।
चतुर्द्दश्यां निशायान्तु कुम्भानामधिवासनम् ।
रात्रौ जागरणं कृत्वा प्रातर्व्वाद्यैः प्रबोधयेत् ।
सर्व्वविघ्नविदेभ्यश्च दत्त्वा बलिं क्रमात् ।
जुहुयात् पूजयित्वा तु तरणिं पुरुषोत्तमम् ।
पूजयेदुपचारैस्तु आदर्शे प्रतिबिम्बितम् ।
ततः पुरुषसूक्तेन कुम्भास्तानभिमन्त्रयेत् ।
क्रमात् देवस्य शिरसि स्नापयेद्विधिवत्ततः ।"
उत्तरचरम् ।
"ततः पश्चात्तथैवेह वासुदेवं च वाचयेत् ।
पश्चात् पुनः पुनश्चैव उपचारैः प्रपूजयेत् ।
दूर्व्वाङ्कुराद्यैः स्तुतिभिर्वाद्यैः सम्पूज्य वैभवम् ।
नमस्कारैर्विचित्रैश्च कर्पूराद्यैः सुगन्धकैः ।
नीराजयेत् समस्तार्थं कर्पूरदीपवर्त्तिभिः ।
ततः प्रदक्षिणं कृत्वा दण्डवत् प्रणमेत् सुधीः ।
पुष्यस्नानोत्सवं पुण्यं ये पश्यन्ति नरोत्तमाः ।
सर्व्वकामसमायुक्तास्ते यान्ति परमं पदम् ।"९।
अथ मदनयात्रा ।
"चैत्रशुक्लत्रयोदश्यां मदनस्य महोत्सवम् ।
वटाग्रे पूर्व्वदिवसे नवे शाखि सुभूमिम् ।
प्राकारपूर्व्वदेशे तु कार्य्यमावाहयेत् ।"

तथा च माघे।
"संक्रान्तौ माघमासस्य माघिवासिततत्तुलात्।
निवेद्य विष्णु भक्त्या इमं मन्त्रमुदीरयेत्॥
मयि तुष्टे जगत् सर्व्वमपि प्रमविष्यति।
इदं धर्म्मं जगन्नाथ। प्रकृतो विष्णो शुभम्॥
मासमयान् शोधयेत् भक्त्या इन्द्रदेवपुरःस्थितान्।"
आषाढे भगवद्भक्तानित्यादि॥
"तथैव वाससा वेष्ट्य कृष्णोपचपुष्पके।
पुष्पैस्तामभिसन्धाय मन्त्रमामभिरभ्यर्च्य॥
पुनः प्रभाते इन्द्रेय मणिदेवस्य पश्चवे।
सम्यगलङ्कारमाकोष्य पूजयित्वा यथाविधि॥
नीराजयित्वा देवेशं वसुभागविभाविताम्।
आलोक्य पाकपानेषु मधुखण्डाद्यभिपूरिताम्।
पदक्रियं आपयेद्देवं गन्धपुष्पाक्षतान्वितान्।
तपूर्णं पायसं ततो दद्यादै पक्वपायसे।
इममर्थं कायपिदच विष्णो प्रियतरं परम्॥
ॐ कोवर्णं सर्व्वमूलानां यतश्च जगद्गुरो॥
तस्मात् प्राणिनो कृते त्वयैव वनिता प्रभो॥
लोकानुग्रहकायाय ममोत्था विश्वपिपयम्॥
तव प्रीत्यै हृतानेतान् गृहाण परमेश्वर॥
मयि तुष्टे जगत् सर्व्वमपि प्रभविष्यति।
भाद्रमासाद्यमासाद्य घटकाद्रा दिवौकसाम्।
आप्यायता भविष्यन्ति तेनैवाप्यायितं जगत्।
इदं धर्मं जगन्नाथ। तस्मात् परात्परम्॥
इति यथाय देवेशं प्रार्थिताद् विनिवेदयेत्॥"१०॥
अथ दोलयात्रा।
"फाल्गुने मासि कुर्व्वीत दोलारोहणमुत्तमम्।
यत्र क्रीडति गोविन्दो लोकानुग्रहकाय वै॥
प्रथमो देवदेवस्य गोविन्दाख्यान् कारयेत्।
चलमूर्त्तं प्रकुर्व्वीत यथाशक्ति अथापि वा॥
मासगम्या पूर्णतो विमाधगुदयां विमागुरे।
मण्डपस्थं प्रकुर्व्वीत दोलमण्डपपूर्व्वम्॥"
माघे।
"पौषमासे समारभ्य यस्मात्र समाय
येत्॥"११॥
अथ सम्पद्भञ्जिका यात्रा।
"वार्षिकी समायातु यात्रा मरकमञ्जि
काम्।
वहरी सतायां दशायां प्रोसाति पुरुषोत्तमः।
चैवशुक्लचतुर्द्दश्यामाचरेत् यत्नतः।
इहलोके विरचितं सकलं साधिवासितं॥"१२॥
इति यात्रातत्त्वम्॥
ऐवा षोड़शप्रकारोऽस्य। यथा—
"वैशाखे मदयात्रा च चन्दनागुरुकल्पना।
ज्यैष्ठे महास्नानयात्रा अम्बुवाचीप्रियकम्॥
आषाढ़े रथयात्रा च विमद्दिनवासिनी यदा।
श्रावणे शयनयात्रा च शयनोत्थानाद्दे।
भाद्रे यात्रा पूजयात्रा पक्षियात्रा विषमम्॥
आश्विने च महापूजा यात्रा महाविजयदशा॥
कार्त्तिके दीपयात्रा च भवानन्दायदी॥
पौषे च पुष्करयात्रा भगवन्मुद्राक्षके।
माघे माघे महाईशौ इत्यस्ते च चतुर्दशौ।

दोलाकेलि फाल्गुने च चैत्रे यात्रा चतुर्दशी।
दूर्ष्यात्रा दोलयात्रा यात्रकौ षोलयात्मिका।
एवं यात्रा मया प्रोक्ता षोड़शी भवमोचनी॥"
इति रुद्रेश्वरतन्त्रे ५४ पटलः॥
(रोगिदर्शनार्थं भिषजो यात्राविवरणम्। यथा
"इदानीं निर्गमे पुंसः प्रवेशे वा गृहस्य च।
शुभाशुभानि सर्व्वाणि वक्ष्यामि शकुनानि च॥
दध्ना गवो द्विजमयूरकालमरोदा
व्याघ्रः प्रकुम्भस्तक पितपक्षपुरः।
पुष्पान्विता च युवती गर्भिता च कन्या
यौव सुखाय गमनो प्रतिभ्रमन्ति॥
नटाश्वाभो भाषकारीतपक्षौ
भारद्वाजोऽरिकिष्टुपक्षोदयश्च।
एते श्रेष्ठा दक्षिणे वाम वामे
चैतावैषौ निगमे संवरे च॥
सर्पोलूकौ वानर शूकरश्च
गोधाश्वम शकलादः ग्रामश्च।
एते दिशाचिगमे वा प्रवेशे
कार्य्याघातो नोपकारेषु दृष्टाः॥
श्वगो वा पिङ्गलो वापि प्रशस्ता दक्षिणे सदा।
निगमे वा प्रवेशे च नपि चैषा शुभान्वयका॥
एको वा श्रौतं वा पञ्च सप्त वा नवसङ्ख्यया।
आम्बकाच मृगानाम् ख्याता शान्ति प्रचिन्तिता॥
शिखिस्वपतगगोधाराभौ शृगालो
शुकपिकपोतौ पालकौ शूकरी वा।
तरगविहगराशी मण्डकाद्यमिव ऋ
वर्णि प्रकुलवता वामतो निगमे च॥
तित्तिरि कुररं क्रौञ्च सारसाभासशूकराः।
वामे तु शुभदा च निगमे कार्य्यसिद्धये॥
काको दक्षिणतः श्रेष्ठो निगमे शुभदायकः।
प्रवेशे गर्दभः श्रेष्ठो वामगः सुखदायकः॥
वामको द्विजकोऽपि शकटो
कीर्त्तनच गदित न सुखाय।
न शुभदायका श्रमो भवेत्
सपगोधाखलकाश्चविरोधिका॥
दर्पेण विलसत प्रवदन्ति
शब्दरीटमराजिद्रव्यराणाम्।
वामगः शुभकरा प्रवन्ति
दार्मीवाटरदाटकक्रमश्च॥
इति शुभाशुभशकुनानि॥"
इति हारीते द्वितीयस्थाने पञ्चमोऽध्यायः॥०॥
तथा च।
"इयताद्दयताप्रागां गुप्तावां मपि चन्द्रमा।
नैशन्तौ प्रतिलामलङ्ग्नोनाम्भादिपरकाया।
अङ्गमीतोऽश्रुकच हसन्निव्यानिव सुख।
दरीकाहाभिरमगज दर्शवासय सज्जित।
पटाम्बुदाश्चि मन्त्र हिरण्मय पूजित।
विद्युद्दन्तकेषु मैत्रमन्दस्वरेण च॥
राजविनाशिधारेषु बहुमन्दप्रसादे।
एवं चाधिविदैव विमनगुदयादेत्॥
नवैराकुलवाकरमाक्रन्दर्शितमया।
इत्याशीर्वात्पुरीयानां सन्यो वै सदभीप्सितं॥

प्रतिविहृत तथा भव यत्नं स्वदितपादनद्।
दौर्म्मनस्यञ्च वैशस्य यात्रायां न प्रशस्यते॥"
इति सुश्रुते सूत्रस्थाने २९ अध्यायः॥)
यादईशः पुं, (यादसां जलजन्तूनां वा
ईशः।) समुद्रः। इति हेमचन्द्रः। ४। १४९॥
यादः, [स्] क्ली, (याति वेगेनेति। या + असुन्।
बाहुलकात् दागमश्च।) जलजन्तुः। इत्यमरः।
१।१०।२०॥ (यथा, भगवद्गीतायाम्। १०। २९।
"अनन्तश्चास्मि नागानां वरुणो यादसा-
महम्॥"
जलम्। इति निघण्टुः। १। १२॥)
यादःपतिः पुं, (यादसां पतिः।) समुद्रः। इत्य-
मरः। १।१०।१९॥ वरुणः। इत्यमरटीका॥
यादवः, पुं (यदोरपत्यम्। यदु + अण्।)
श्रीकृष्णः। इति शब्दरत्नावली॥ (यथा भग-
वद्गीतायाम्। ११। ४१।
"सखेति मत्वा प्रसभं यदुक्तं
हे कृष्ण! हे यादव! हे सखेति।
अजानता महिमानं तवेदं
मया प्रमादात् प्रणयेन वापि॥")
यदुवंशोद्भवमात्रे यदुकुलजे च। यथा,—
"यथातिर्नहुषपुत्रस्य यदोर्वंशं वदस्व मे॥"
इत्युपक्रम्य।
"मायया ह्यन्यो राजन् यादवानिर्वदितम्॥"
इति श्रीभागवते ९ स्कन्धे २३ अध्यायः॥
(यदुसम्बन्धिनि, त्रि। यथा, भागवते। ११।१।२।
"अथोऽवनतु गतोऽप्यगतं हि भारं
यद्यादवं कुलमहो अविषह्यमास्ते॥")
यादवी, स्त्री (यदोरियमिति। यदु + अण्। ङीप्।)
दुर्गा। इति शिवाकल्पद्रुमः॥ (यदुवंशीयस्त्री
सामान्ये। यथा, महाभारते। १। ९५। १९।
"प्राचीन्वान् खल्वश्मकीमुपयेमे यादवीं तस्यां
संयत्रं जनयामास॥")
यादसांनाथः, पुं (यादसां जलजन्तूनां नाथः।
षष्ठ्या अलुक्।) वरुणः। इति हलायुधः॥
यादसाम्पतिः, पुं (यादसां जलजन्तूनां पतिः।
षष्ठ्या अलुक्।) समुद्रः। इत्यमरः। १।१।१२॥
वरुणः। इति मेदिनी। ते ५१२॥ (यथा,
देवीभागवते। ९। ८। ११।
"अश्विनौ वसवश्चाद्य कुबेरो यादसाम्पतिः॥"
क्वचित् विशिष्टतापि। यथा, मार्कण्डेये। ५४। १२।
"यादसाम्पतये दैवं वरुण यादसाम्पतिम्॥")
यादृक् [श्] त्रि, (य इव दृश्यते। दृश् + "त्यदा-
दिषु दृशोऽनालोचने कञ्च।" ३।२।६०। इति
चकारात् क्विन्। "आ सर्व्वनाम्नः।" ६।३।९१।
इत्याकारादेशः।) य इव दृश्यते यः। इति
मुग्धबोधव्याकरणम्। येमन इति भाषा।
(यथा, भागवते। ३। २९। ३३।
"आद्यमूले यथानेव इतिकाद्यमहनम्।
कदाचिदपत्यन्तेन महद् भाजनामपि॥")
यादृश, त्रि, (य इव दृश्यते यो यमिव पश्यति वा।
यद् + "दृशि" स्याद् दशाः।" ३।२।६०। इति

वार्त्तिकोक्तिः च । "व्यासर्व्वनाम्नः ।"६।३।८१। इत्यत्र "दृशे चेति वक्तव्यम् ।" इत्यात्वम् ।) य इव दृश्यते सः । इति मुग्धबोधव्याकरणम् ॥ येमन इति भाषा ॥

यादृश , त्रि, (य इव दृश्यते । दृश + "त्यदादिषु दृश इति ।"३।२।६० । इति कञ् । "व्यासर्व्व नाम्नः ।" ६।३।८१ । इत्याकारादेश ।) य इव दृश्यते सः । इति मुग्धबोधव्याकरणम् ॥ येमन इति भाषा । (यथा मनुः । ४ । २५४ ।
"यादृशोऽस्य भवेदात्मा यादृशञ्च चिकीर्षितम् ।
यथा चोपचरेदेनं तथात्मानं निवेदयेत् ॥"
स्त्रियां यादृशी ॥)

यादोनाथः पुं (यादसां नाथः ।) वरुणः । इति राजनिर्घण्टः ॥ (वरुणः । इति यादसां नाथशब्ददर्शनात् ॥)

यादोनिवासः, पुं (यादसां निवासः ।) समुद्रः । इति हेमचन्द्रः । ४ । १३५ ॥

यानं, क्ली (या + ल्युट् । अर्द्धर्चादित्वात् पुंलिङ्गमपि ।) राज्ञां षडुपायादिषड्गुणान्तर्गतगुणविशेषः । तत्तु उपचितशक्तेः शत्रुमण्डलराष्ट्रस्योपरि शत्रोरारुह्यगमनं यात्रा । इति भरतः ॥ (यथा, देवीभागवते । ५ । ४ । ११ ।
"यानमप्यधुना नैव कर्त्तव्यं सहसा पुनः ॥")
यात्यनेनेति । या + ल्युट् ।) हस्त्यश्वरथदोलादि । तत्पर्य्यायः । वाहनम् २ युग्यम् ३ पत्रम् ४ धोरणम् ५ । इत्यमरः ।२।८।५८॥ विमानम् ६ चक्रम् ७ यापनम् ८ शतिमिश्रकम् ९ । इति शब्दरत्नावली ॥ (यथा, मनुः । १ । ६४ ६५ ।
"शिल्पेन व्यवहारेण शूद्रापत्यैश्च केवलैः ।
गोभिरश्वैश्च यानैश्च कृष्या राजोपसेवया ॥
अयाज्ययाजनैश्चैव नास्तिक्येन च कर्म्मणाम् ।
कुलान्याशु विनश्यन्ति यानि हीनानि मन्त्रतः ॥")
अथ चतुष्पदयानोद्देशः ।

"ये भद्रजात्यादिविभेदतोऽमी
मया निरुक्ता इह वाजिमुख्याः ।
दिशानया सर्व्वचतुष्पदानां
भेदो विधेयो विदुषादरेण ॥
तथा यथान्यादिकपोषणेन
यानेन वा दोषगुणौ भवेताम् ।
तथा तथैवान्यचतुष्पदानां
प्रकीर्त्तितौ दोषगुणौ बुधेन ॥
परमयानमपोषणमेव वा
परमिवान्यशरीरमपोषणम् ।
न खलु दोषयुतं च चतुष्पा-
त्स्पृशति पश्यति शोभनचेतनः ॥
सुराविन्दुर्यथा हन्ति पयोघटशतं यथा ।
तथा सर्व्वं दूषयति दोषदुष्टचतुष्पदः ॥"
इति चतुष्पदयानोद्देशः ॥ ० ॥
अथ द्विपद्यानोद्देशः ।
"मानुषैः पक्षिभिर्व्वापि तथान्यैर्द्विपदैरपि ।
यानं स्याद्द्विपदं नाम तस्य भेदो ह्यनेकधा ॥
सामान्यञ्च विशेषञ्च तस्य भेदो द्विधा भवेत् ॥"

तत्र सामान्यं यथा —
"यानं यद्द्विपदाभ्यां तत् महीलाञ्छिकमुच्यते ।
चतुर्भिर्युक्तियुक्तैरष्टधातुगुणान्वितैः ।
दोलेति कथ्यते तेषां नियमोऽयं प्रदर्श्यते ॥"
तत्र सरयः ।
"उपेन्द्रमूलादितिवाजिवर्णे
शक्रेन्दुताराक्तिथियोगलग्ने ।
हरिश्चमापुष्यमाश्ववर्षे
दोलादिकारोहणमादिमिष्टम् ॥
हस्तकाष्ठस्य नियमे नियमश्चान्यदस्त्वतः ।
कनकं रजतं ताम्रं लौहं धातुचतुष्टयम् ।
चतुर्विंधाभास्त्विह श्लाघ्नीतां यथाक्रमम् ।
सुराणामसुराणाञ्च चातुर्व्वर्ण्यसुदात्तनम् ॥
विहस्तसम्मितो मध्ये तदर्द्धं पार्श्वयोरयो ।
विजया नाम दोलेयं विजयाय महीक्षिताम् ॥
विजया मङ्गला क्रूरा शिवा शोभा शुभा क्रमात् ।
वितस्त्यैकैकसंहृष्टा दोला षट् स्युः सुखाप्रदाः ॥
कुम्भश्च पद्मकोषश्च शङ्खः पर्व्वत एव च ।
चतुर्विधानां दोलानां कल्याणाय चतुष्टयम् ॥
हंसः केकी शुको भृङ्गश्चतुष्टयमिदं क्रमात् ।
कुम्भाद्यग्रे निधातव्यं चतुर्विधमहीक्षिताम् ॥
अत्रापि वक्रविन्यासो विधेयो नवदण्डवत् ॥"
भोजस्तु ।
"गजं प्रस्थानदोलायां रणदोलासु केशरी ।
हंसो भ्रमणदोलायां क्रीडादोलासु षट्पदः ॥
भुजङ्गमः प्रसुराब्धे वृषभो दानकर्म्मणि ।
दोलोपर्य्युपरि न्यस्तो वहुभिर्म्मिश्रसाधनम् ॥
यद्भ्रदण्डं यानं स्यात्तत् पर्य्यङ्कमिति स्मृतम् ।
त्रिहस्तसम्मितो यानस्तदर्द्धपरिणाहवान् ।
पर्य्यङ्कः सेवनामाय भवेत् सर्व्वार्थसाधकः ।
सेनो मङ्गलयोस्तु सर्व्वदारुक्ते यथाक्रमम् ।
वितस्त्यैकैकसंहृष्टा यथा चाष्टन सङ्गिनः ॥
मणिधातुगुणादीनां नियमः पूर्व्ववन्मतः ।
विशेषमथ वक्ष्यामि पर्य्यङ्कस्य यथाक्रमम् ॥
शुक्तिश्च शङ्खपद्मश्च व्याघ्रसिंहस्तथैव च ।
चम्पादिकजातानां पर्य्यङ्के स्थपेत् क्रमात् ॥
पद्मशङ्खमत्स्याश्चामिहंसकोकनदान् क्रमात् ।
आदित्यादिदशानां सन्निकपेन विन्यसेत् ॥
महीन्द्राणां विशेषेण स्थिरमानेन शस्यते ।
निर्म्माणे युक्तिरत्नाञ्च राज्यभोगसुखप्रदा ॥
तदेवाच्छादनयुक्तं खट्वायानमिति स्मृतम् ।
अस्यापि पूर्व्ववन्मानमधिष्ठानादिनिश्चयः ॥
विशेषचर्य्योच्छ्राय परिधानादर्शनम् ।
तदेव वैशिष्ट्यं पोठयानमिति स्मृतम् ॥
तस्य भेदो द्विधा दण्डकाण्डकप्रभेदतः ।
मानादिकं पूर्व्ववदस्य विशेषाञ्चतुरस्रता ॥
एवमन्यानि मिश्राणि यानानि विविधानि च ।
सामान्याख्यानि यानीयात् शिल्पिभिर्निर्म्मितानि वै ॥
मनोहरत्वं वहुता बृहत्त्वं गुणलक्षणम् ।
प्रोक्तं द्विपदयानानां महच्च भोजभूभुजा ॥
इति सामान्यद्विपदयानलक्षणम् ॥"

इति युक्तिकल्पतरुः ॥ ० ॥ विशेषद्विपदयानन्तु चतुर्दोलशब्दे निष्पदयानोद्देशस्तु नौकाशब्दे द्रष्टव्यम् ॥ (फलप्राप्तिहेतौ त्रि । यथा, ऋग्वेदे । १ । ११ । २ ।
"तमूनपात् पथ ऋतस्य यानान्
मध्वा समञ्जन् स्वदया सुजिह्व ॥"
"यानान् फलप्राप्तिहेतून् पथो मार्गान् ।" इति तद्भाष्ये सायणः । या + भावे ल्युट् । गतिः । यथा, वाभटे शारीरस्थाने षष्ठेऽध्याये ।
"यानं खरोष्ट्रमाजारकपिशार्द्दूलशूकरैः ।
यस्य प्रेतैः सृगालैश्च स स्वप्नैर्मृत्यते मुखे ॥")

यानपात्रं, क्ली, (यानसाधनं पात्रम् । शाकपार्थिववत् समासः ।) निष्पदयानविशेषः । जाहाज इति भाषा । तत्पर्य्यायः । वहित्रकम् २ बोहित्थम् ३ वहनम् ४ पोतः ५ । इति हेमचन्द्रः । ३ । ५४८ ॥ समुद्रयानम् ६ । इति गरुडपुराणम् ॥ (यथा हरिवंशे ॥ १६५।६४॥
"समुच्छ्रिते सिते पोते यानपात्रेक्षचैव च ।
नौभिश्च भिन्निकाभिश्च शुशुभे वरुणालयः ॥")

यानमुखं, क्ली (यानस्य मुखम् पुरोभागः ।) रथादेः पुरोभागः । तत्पर्य्यायः । धूः २ । इत्यमरः । २ । ८ । ५५ ॥

यापनं, क्ली (या + णिच् + ल्युट् ।) वर्त्तनम् । कालक्षेपणम् ॥ (यथा कामन्दकीये ॥१०।३१॥
"पूर्व्वसेनापतिर्भीत्या कालयापनमाश्रितः ॥") निरसनम् । इति मेदिनी । ने, ११२ ॥ (यापयतीति । या + णिच् + ल्युः । प्रापके, त्रि । यथा, भागवते । १ । २२ । ३१ ।
"अयातयामास्तस्यासन् यामाः स्वान्तर
यापनाः ॥")

यामा, स्त्री, जटा । इति भूरिप्रयोगः ॥

याप्यः, त्रि, (यापि + यत् ।) अधमः । निन्दितः । इत्यमरः ।३।१।५४॥ (यथा बृहत्संहितायाम् । १८ । २९ ।
"यदशुभमशुभेऽब्दे मासजं तच्च वाच्यं
शुभफलमपि चैवं याप्यमन्योऽन्यतायाम् ॥")
यापनीयः । (यथा, सुश्रुते निदानस्थाने प्रथमे अध्याये ।
"प्रोषित तदवार्थं स्यात् याप्यं संवत्सरोषित
तत् ॥")
रोगभेदकाश्वादि । इति मेदिनी । ये, ३८ ॥ व्याधिविशेषः । यथा,—
"साध्या याप्या असाध्याश्च व्याधयस्त्रिविधाः
स्मृताः ।
सुखसाध्यः कष्टसाध्यो द्विविधः साध्य उच्यते ॥
याप्यलक्षणमाह ।
यापनीयस्तु तं विद्यात् क्रियां धारयते हिताम् ।
क्रियायान्तु निवृत्तायां सद्यो यश्च विनश्यति ॥
प्राप्ता क्रिया धारयति सुखिनं याप्यमातुरम् ।
प्रपतिष्यदिवागारं स्तम्भो यत्नेन धारित ॥
साध्या याप्यत्वमायान्ति याप्याश्चासाध्यतां तथा ।
घ्नन्ति प्राणानसाध्यास्तु नराणामक्रियावताम् ॥

अच्छिद्रायतनी विच्छिन्नारचितासाम ।" इति
भावप्रकाशः ।
याप्ययानं, क्ली, (याप्यं अधमं यानम् ।) शिबिका ।
इत्यमरः । २ । ८ । ५३ ।
यामः, पुं, (यम्यते इति । यम+घञ् ।) संयमः । यथा । द्वाभ्यां योगविभिर्धे यमः । इति मुग्धबोधे वोपदेवः । ८३६ । (यथा, भागवते । ८ । १८ । ६ ।
"पीत्वा पयस्तप्तं वै ह मोदीर्यं यामकोविदम् ।
स एकोऽभवदन्तात्मा वर्णीनां इतिहासेन ।
देवे कामपरस्यान्तः व्याकाम भावप्रभवः ॥")
यामः पुं, (याति यायते वा । या+"अर्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन् ।" उणा० १।१४ । इति मन् । यम्+घञ् वा ।) दिवारात्र्योश्चतुर्थांशो भागः । तत्पर्यायः । प्रहरः २ । इत्यमरः । १।४।६ ॥ (यथा मनौ । ७ । १४५ ।
"उत्थाय पश्चिमे यामे कृतशौचः समाहितः ।
हुताग्निर्ब्राह्मणांश्चार्च्य प्रविशेत् स शुभां
सभाम् ॥")
संयमः । इति मेदिनी । मे, ९३ ॥ (गमनम् ।
यथा, ऋग्वेदे । १ । ३८ । ३ ।
"क्वो वो विश्वानि सौभगा यामेषु युञ्जते ।"
"यामेषु गमनेषु ।" इति तद्भाष्ये सायणः ॥ गमनसाधनं । यथा ऋग्वेदे । ७ । ६९ । ३ ।
"स्वश्वा यशसा यातमर्वाग्
यामो वभूयाद्युरणो वो अत्र ॥"
"यामो गमनसाधनं च रथः ।" इति सायणः ॥
देवगणविशेषः । यथा, मार्कण्डेयपुराणे । ५० । १८ ।
"यदद्य दक्षिणायान्तु पुत्रा द्वादश जज्ञिरे ।
यामा इति समाख्याता देवाः स्वायम्भुवेऽन्तरे ॥")
यामघोषः, पुं, (यामे प्रतियामे घोषः शब्दोऽस्य ।
प्रतिप्रहरं शब्दकारित्वादस्य तथात्वम् ।)
कुक्कुटः । इति शब्दमाला ॥
यामघोषा, स्त्री (यामे यामे घोषोऽस्याः । यामान् प्रहरान् घोषति शब्दायते इति वा । घुष+अच् । टाप् ।) कांस्यविशेषः । घड़ी इति भाषा ।
तत्पर्यायः । घटी २ घटिका ३ यामनाली ४ अतिवर्त्तका ५ दण्डढक्का ६ । इति त्रिकाण्डशेषः ॥
यामनाली,, स्त्री, (यामस्य नालीव ।) यामघोषा । इति त्रिकाण्डशेषः ॥
यामनेमि, पुं इन्द्रः । इति त्रिकाण्डशेषः ॥
यामलं क्ली, युगलम् । इति हेमचन्द्रः । ६ । ६० ।
तन्त्रशास्त्रविशेषः । तस्य लक्षणं यथा —
"सृष्टिश्च ज्योतिषाख्यानं नित्यकृत्यप्रदीपनम् ।
क्रमसूत्रं वर्णभेदो जातिभेदस्तथैव च ।
युगधर्मश्च संख्यातो यामलस्याष्टलक्षणम् ॥"
तत्तु षड्विधम् । आदियामलम् १ ब्रह्मयामलम् २ विष्णुयामलम् ३ रुद्रयामलम् ४ गणेशयामलम् ५ आदित्ययामलम् ६ । इति वाराहीतन्त्रम् । एषां श्लोकसंख्या तत्तद्ग्रन्थे द्रष्टव्या ॥

यामवती, स्त्री (यामाः प्रहराः सन्त्यस्यामिति ।
याम+मतुप् । मस्य वः ङीप् ।) रात्रिः । इति
राजनिर्घण्टः ॥
यामाता [तृ] पुं (जामाता पृषोदरादित्वात् ।
जस्य यः ।) जामाता । दुहितुः पतिः । इत्य-
मरटीका शब्दरत्नावली च । यामातुर्विष्णु-
तुल्यत्वं तस्य गृहे कन्यादातुर्भोजननिषेधात्
प्राक् भोजननिषेधश्च यथा, कालमाधवधृत-
पुराणम् ।
"विष्णुर्यामातरं मत्वा तस्य मन्युं न कारयेत् ।
अप्रजायान्तु कन्यायां नाश्नीयात्तस्य वै गृहे ॥"
इत्युद्वाहतत्त्वम् ।
यामार्द्धं, क्ली, (यामस्यार्द्धम् ।) प्रहरस्यार्द्धम् ।
तस्याधिपा यथा —
"वारेशात् षष्ठमाद्येषु राश्यर्द्धो यस्य भक्षणात् ।
अधिपाः सूर्यवारेण यमार्द्धे भवन्ति हि ॥
रवौ र्वन्द्रभृगुज्ञाचन्द्रशिशुरवयो विधिः ।
रविशुक्रमराभौमशनीज्यबुधभास्कराः ॥
दिने तृतीया परेषां तथा चान्याचतुर्थेश्वराः ॥
पापस्थे भवेदिष्टं शुभस्थे शुभ भवेत् ।
शुभपक्षस्य दृष्टे तु कर्मारम्भाच्छुभं भवेत् ।
आरम्भात् पापस्थे तु कर्म विघ्नकरं भवेत् ॥
पश्चाद्यामस्येव प्राग्दृष्ट्वा यत्नुदाहृत ।
घट घट परीक्ष्य दृष्ट्वा च भवो रात्रौ मताश्रया ।
यामार्द्धाधिपश्चात्मो द्वितीयस्तु तदृग्न ।
तदर्द्धानि तृतीयं स्यात्तन्द्वौ तु तुरीयकं ॥
अर्द्धाभावे तु राहुः स्यात्तन्द्वो वसुधरक ॥
भयाङ्कस्य परिणामाद्दिवारात्राधिपा यथा ॥"
इति ज्योतिस्तत्त्वम् ॥
यामि, स्त्री, (याति कुलात् कुलान्तरमिति ।
या+बाहुलकात् मि ।) भगिनी । कुलस्त्री ।
इत्यमरः । २ । ६ । १३१ ॥ "स्वसा भगिनी ।
कुलस्त्री कुलवधूः । सवने संयमे यामो यामि-
स्तत्कुलस्त्रियाः रिक्षणं स्यादो स्मृतः । जामिस्तु
कुटिले जिन्दे यामि स्वसृकुलस्त्रियोरिति
जवर्गतृतीयादौ रभसः" इति भरतमुकुटौ । यथा
जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः ।
इति मनौ । ३ । ५८ । यामि बाहुलकादिभ्यः । यत्र
अत्र भरते बाहुलकान्मि जामिरिति । अन-
न्यादौ वा यावधि धातुर्वोध्यः ।" इति रामा-
श्रमः ॥ (यथा, मनौ । ३ । १८ ।
"जामयोऽत्रैतो गोऽरि वेन्द्रदेवाय यामया ॥")
यामिनी । इति शब्दरत्नावली ॥ अभ्येष्टपत्नी ।
तस्या कन्या नानापुत्री । यथा,—
"अरुन्धती वसुर्यामिर्लम्बा भानुर्मरुत्वती ।
सङ्कल्पा च मुहूर्त्ता च साध्या विश्वा च यामया ।
धर्मपत्न्यो दश त्वेतास्तासु पुत्रानि मे शृणु ।
समाख्यातेव देवीभ्यो यामरीती तु यामिका ॥"
इति वह्निपुराणे कश्यपवंशवर्णनं ॥
यामिकभटः, पुं (यामे यामे नियुक्तः । याम+
ठक् । स चासौ भटश्चेति ।) प्रहरिकः । चौकी-
दार इति भाषा । यथा, —

"अष्टावस्थाभिर्भ्रष्टान्यधनस्य प्रभवेदिष्टयत्ने
कार्ये चापद्रुपद्यामिकभटप्राज्ञकोशादये ।
कर्त्तव्यात्तु दृष्ट्वाचामूर्ध्वभावद्दोपदक्षा तुरा
दायाद्यादि भवमुक्ति । तत्र मर्षं भर्ष
धोविदाम् ॥"
इति कवाट ॥
यामित्रं, क्ली, लग्नात् सप्तमराशिः । यथा —
"शीतांशुं प्रथमं चैव यामित्रं सप्तमं स्मृतम् ।
शुभ दूर्बं तथाङ्काश्च भद्रबोध विद्मालिरम् ॥"
यामित्रवेधो यथा,—
"पापात् सप्तम इयो यदि भवेत् पापेन
युक्तोऽथवा
सर्वेषां तु विवर्जेत्तु यामित्रदोषोऽस्य कथ्यते ।
याबायां विपदो गृहे गुणवधः चौरस्तु रोगेऽपि
भवी
उद्वाहे विधवा सतै तु मरणं शूलश्च पुंस्त्वेऽपि ।
रविमन्दकुजाश्चार्का स्वगाङ्गात् सप्तमं क्षयम् ।
विवाहयात्रायुद्धेषु वर्जनीयप्रवेशने ॥"
इति भावित्रवेध । ० ।
अस्य प्रतिप्रसवो यथा ।
"लग्नत्रिकोणविनमन्दिरगोऽथ पूर्णो
मित्रस्वधोत्थपदगोऽथ तदीक्षितो वा ।
यामित्रवेधविहितान् सकलान् हि दोषान्
दोषाकरः शमयतेद्विविध विधत्ते ॥"
इति ज्योतिस्तत्त्वम् ॥
यामिनी, स्त्री, (यामाः सन्त्यस्याम् । याम+इनि ।
ङीप् ।) रात्रिः ॥ (यथा, महाभारते । १ । ११ । ११ ।
"ततः प्रथमयामिन्यां पुत्रो मधुसूदन ।
यामार्द्धे याति दिवा यामिन्यां यदृश्यत ॥")
हरिद्रा । इत्यमरः । २ । ९ । ४१ ॥ (कश्यपपत्नी ।
यथा, भागवते । ६ । ६ । २१ ।
"तार्क्ष्यस्य विनता कद्रूः पतङ्गी यामिनीति च ।
पतङ्ग्यसूत पतगान् यामिनी शलभानथ ॥"
प्रह्लादस्य द्वितीया तनया । यथा कथासरित्-
सागरे । ४६ । ९९ ।
"प्रह्लादो यामिनी नाम द्वितीया तनया सुतौ ॥")
यामिनीपतिः पुं, (यामिन्याः पतिः ।) चन्द्रः ।
इति शब्दरत्नावली ॥ (यथा भागवते । ३ ।
११ । ९९ ।
"यदुपतिर्द्विरदराजविहारो
यामिनीपतिरिवैष दिनान्ते ।
मुदितवक्त्र उपयाति दुरन्तं
मोचयन् व्रजगवां दिनतापम् ॥")
कर्पूरम् । इत्यमरः ॥
यामी, स्त्री, (यमस्येयम् । यमो देवताऽस्या इति
वा । यम+अण् । ङीप् ।) दक्षिणदिक् । इति
राजनिर्घण्टः ॥ (यथा, ज्योतिषे ।
"————यामी दूरे न कर्त्तव्या ।"
यामि+ङीष् ।) कुलस्त्री । इति शब्दरत्ना-
वली ॥ (यथा मनौ । ४ । १८ ।
"मातापितृभ्यां जामीभिर्भ्रात्रा पुत्रेण भार्यया ।
दुहित्रा दासवर्गेण विवादं न समाचरेत् ॥"

धर्म्मपत्नी । यथा, विष्णुपुराणे ।२।१५।१ ५।
"यक्ष्मती सर्व्वाणी सङ्गा भानुमती तथा ।
सङ्कल्पा च मुहूर्त्ता च साध्या विश्वा च
ता दश ॥")

यामुनं क्ली (यमुनायां भवम् । यमुना+अण् । यमुनाया इदमित्यण् वा ।) स्रोतोऽञ्जनम् । इत्यमरः । २।८।१०० ॥ (अस्य पर्य्यायो यथा —
"अञ्जनं यामुनञ्चापि कापोताञ्जनमित्यपि ।
तत्तु स्रोतोऽञ्जनं कृष्णं सौवीरं श्वेतमीरितम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पुं जनपदभेदः । यथा, भागवते । ३।१।२४ ।
"कुरुजाङ्गलपाञ्चालान् सूरसेनान् स यामुनान् ।
ब्रह्मावर्त्तं कुरुक्षेत्रं मत्स्यान् सारस्वतानथ ॥"
पर्व्वतविशेषः । यथा, रामायणे । ४।४।२१ ।
"कालिन्दीं यमुनां रम्यां यामुनञ्च महा-
गिरिम् ।"
तीर्थभेदः । यथा, महाभारते । ३ । ८४ । ४९ ।
"यमुनाप्रभवं गत्वा समुपस्पृश्य यामुनम् ।
अश्वमेधफलं लब्ध्वा स्वर्गलोके महीयते ॥")
यमुनासन्निधिनि, त्रि । (यथा, प्रायश्चित्ततत्त्वे ।
"त्रिभिः सारस्वतं तोयं सप्तभिस्तच यामुनम् ।
नार्म्मदं दशभिर्मासैर्गाङ्गं पर्व्वणि शोध्यति ॥")

यामुनेष्टक, क्ली (यामुनमिष्टकम् ।) सीसकम् । इति जटाधरः ॥ (विशेषोऽस्य सीसकशब्दे विज्ञेयः ॥)

यामेय, पुं, भागिनेयः । यामिः स्वसृकुलस्त्रियोरित्युज्ज्वलदत्तात् यामेरपत्यमित्यर्थे ढक्-(ढक्) प्रत्ययनिष्पन्नः ॥ (याम्या धर्म्मपत्न्या अपत्यमिति । यामिपुत्त्रः । यथा, भागवते । ६।६।६ ।
"ककुभः सङ्कटस्तस्य कीकटस्तनयो यतः ।
भुवो दुर्गाणि यामेयः स्वर्गो नन्दिस्ततोऽभवत् ॥")

याम्य, पुं, (यामी दिशास्योऽस्य । यामी+यत् ।) अगस्त्यमुनिः । चन्दनद्रुमः । इति मेदिनी । ये, ४८ ॥ (यमस्यायमिति । यम+ष्य । यमदूतः । यथा, मार्कण्डेये । ११ । ३ ।
"तप्यमानस्य याम्यैश्च नरकेषु च मातरः ।
पूयस्य गर्भो जन्माय मरणे नरकस्तथा ॥")

याम्या, स्त्री (यमस्येयं यमो देवतास्या इति वा । यम+"यमाच्चेति वक्तव्यम् ।" ४।१।८५ । इति वार्त्तिकोक्त्या ण्य । टाप् ।) दक्षिणदिक् । (यथा, रामायणे । २ । १३ । २६ ।
"प्रयत्नं तु महीपालो जलपूरितमञ्जलिम् ।
दिशं याम्यामभिमुखो रुदन् वचनमब्रवीत् ॥")
भरणीनक्षत्रम् । इति मेदिनी । ये, ४८ ॥ (यमसम्बन्धिनि त्रि । यथा, महाभारते ।२।८।१ ।
"कथयिष्ये सभां याम्यां युधिष्ठिर ! निबोध ताम् ।
वैवस्वतस्य यां पार्थ ! विश्वकर्म्मा चकार ह ॥")

याम्यायन, क्ली (याम्याया अयनं याम्यं अयनमिति वा ।) दक्षिणायनम् । यथा, मलमासतत्त्वे ।
"याम्यायने हरौ सुप्ते सर्व्वकर्म्माणि वर्जयेत् ॥"

याम्योद्भूत, पुं (याम्याया उद्भूतः ।) चीताकवृक्षः । इति राजनिर्घण्टः ॥

यायजूक, पुं, (पुनः पुनर्यजति । यज+यङ् । "यजजपदशां यङः ।" ३ । २ । १६६ । इति ऊक ।) पुनः पुनर्यागकर्त्ता । तत्पर्य्यायः । इज्याशीलः । इत्यमरः । २ । ७ । ८ ॥ (यथा, रामायणे । २ । ७२ । १५ ।
"या गतिः सर्व्वभूतानां तां गतिं ते पिता गतः ।
राजा महात्मा तेजस्वी यायजूकः सतां गतिः ॥")

यायावर, पुं, (पुनः पुनरतिशयेन वा याति देशाद्देशान्तरं गच्छतीति । या+यङ् । "यश्च यङः ।" ३।२।१७६ । इति वरच् ।) अश्वमेधीयाश्वः । इति जटाधरः । जरत्कारुमुनिः । इति त्रिकाण्डशेषः । (ऋषीणां गणविशेषः । यथा, महाभारते । १२ । २६३ । १७ ।
"तान् प्रत्यक्षधर्म्माणस्तथा यायावरा गताः ।"
जरत्कारुमुनिरेवैतद्गणीयः । यथा, महाभारते । १ । १३ । ११ ।
"जरत्कारुरिति ख्यात ऊर्द्ध्वरेता महातपाः ।
यायावराणां प्रवरो धर्म्मज्ञः संशितव्रतः ॥")
त्रि, पुनः पुनर्गमनशीलः । यथा,—
"यायावराः पुष्पफलेन चान्ये
प्रापर्च्चुरर्थ्यां जगदर्च्चनीयम् ॥"
इति भट्टिः । २ । २ ॥
(स्त्री, यायावरा । यथा, भागवते ।७।११।१९ ।
"वार्त्ता विचित्रा शालीनयायावरशिलोञ्छनम् ।
विप्रवृत्तिश्चतुर्द्धेयं श्रेयसी चोत्तरोत्तरा ॥"
"यायावरं प्रत्यहं धान्ययाच्ञा ।" इति तत्र श्रीधरस्वामी ॥)

याव, पुं, (यौति युयते वा । यु+अच् अप् वा । तत प्रज्ञाद्यण् ।) अलक्तः । इत्यमरः । २ । ६ । १२५ ॥ (तथास्य पर्य्यायः ।
"लाक्षा पलङ्कषालक्तो यावो द्रुमामयो जतु ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
यथा, नैषधे । २२ । ४६ ।
"ततस्तदीयाधरयावयोगा
दुदेति बिम्बादयविम्ब एव ॥"
यव एव । स्वार्थेऽण् । यावः । यथा, तैत्तिरीयसंहितायाम् । ४ । ३ । ८ । २ ।
"यावानां भागोऽस्य यावानामाधिपत्यमिति ॥")

यावक, पुं, (यव एव याव स इवेति इवार्थे कन् । यद्वा, याव एव । याव+"यावादिभ्यः कन् ।" ५ । ४ । २९ । इति स्वार्थे कन् ।) कुल्माषः । इत्यमरः । २ । ९ । १९ ॥ "द्वे चीरोशाणे । कुलत्थ इत्यन्ये माषातसिपक्वे चाचोरेव तुष धौति ख्याते । इति सुभूतिः । यव इव शुक्ल इति यवकः इवार्थे कः । यवक एव यावकः स्वार्थे अण् । कुत्सितं माषति परिमाति कुल्माषः माषीय ई परिमाणे परीकाणे चण् मनीषादित्वात् साधुः । कुल्माषो इन्द्रयवकारयान् मद्भुयवकारयोश्च । कुल्माषो इन्द्रयवेति इन्द्रयव इत्यन्ये इति मधुः । कुल्माषो यावके पुंसि काञ्चिके तु नपुंसकमिति शब्दार्णवे इत्यथ ।" इति भरतः ॥

"यवकः स्यात्तु कुल्माषः कुल्माषो यावकोऽपि च ।
चीरवाणे यष्टिके वा कुलत्थे काश्मीरदेशजे ।
शालिधान्येषु चत्वार इति केचित् प्रचक्षते ॥"
इति शब्दरत्नावली ॥
यावानम् । इति हेमचन्द्रः । (यथा, मनौ ।११।१२६ ।
"संकरापात्रकृत्यासु मासं शोधनमैन्दवम् ।
मलिनीकरणीयेषु तप्तः स्याद्यावकैस्त्र्यहम् ॥")
अलक्तकः । इति शब्दरत्नावली । (यथा किराते । ५ । ३८ ।
"इह सनियमयोः सुरापगाया-
मुषसि सयावकसव्यपादरेखा ।
कथयति शिवयोः शरीरयोगं
विषमपदा पदवी विवर्त्तनेषु ॥")

यावज्जीव, म क्ली, (यावत् जीवतीति । जीव+"यावति विन्दजीवोः ।" ३ । ४ । ३० । इति णमुल् ।) यावदायु । जीवनपर्य्यन्तम् । यथा,
"यावज्जीवमहं मौनी ब्रह्मचारी च मे पिता ।
माता च मम बन्ध्यासीदपुत्रश्च पिता मम ॥"
इति व्याहतशब्दटीकायां भरतः ॥

यावत्, अ (यद्+डावतु ।) साकल्यम् । अवधिः । मानम् । अवधारणम् । इत्यमरः । ३ । ४ । १५ ॥ "साकल्ये निरवशेषे । यथा । यावद्दत्तं तावद्भुक्तं । अवधौ मर्य्यादायाम् । मूलात् शाखां यावत् प्रकाण्डः । माने प्रमाणम् । यावद्दृशाणि तावन्निघ्नन्ति । अवधारणे नियतापरिच्छेदे । इयतो भाव इयत्ता परिमाणं तस्य परिच्छेदो निश्चयः । यथा यावत् पात्रं तावन्नाल्पानामन्त्रयस्व । यावत्कार्य्यं वि-ऽवधारणे प्रशंसायां परिच्छेदे मानाधिकारसम्भ्रमे पक्षान्तरे चेति मेदिनी ।" इति भरतः ॥ (यत्परिमाणमस्य इत्यर्थे । यद्+"यत्तदेतेभ्यः परिमाणे वतुप् ।" ५ । २ । ३९ । इति वतुप् । "आ सर्व्वनाम्नः ।" ६ । ३ । ९१ । इत्यात्वम् ।) यत्परिमिते, त्रि । तत्र यावान् यावती यावत् इति रूपत्रयं भवति । अव्ययात् निपातनात् प्रत्ययनिष्पन्नः । इति तद्धितपादे बोपदेवः ॥ (यथा, भागवते । २ । ९ । ३१ ।
"यावानहं यथा भावो यद्रूपगुणकर्म्मकः ।
तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् ॥"
यथाच मनुः । ८ । १११ ।
"यावती सम्भवेद्वृद्धिस्तावतीं दातुमर्हति ॥"
तथाच याज्ञवल्क्यः । २ । २६१ ।
"यावत् सस्यं विनश्येत्तु तावत् स्यात् क्षेत्रिणः फलम् ॥")

यावतिथ, त्रि, (यावतां पूरणः । यावत्+"तस्य पूरणे डट् ।" ५।२।४८ । इति डट् । "वतोरिथुक् ।" ५।२।५३ । इति इथुगागमः ।) यावत्परिमाणम् । इति मुग्धबोधव्याकरणम् ॥ (यथा, मनुः । १ । २० ।
"आद्याद्यस्य गुणन्त्वेषामवाप्नोति परः परः ।
यो यो यावतिथश्चैषां स स तावद्गुणः स्मृतः ॥")

यावन:, पुं, (यवने यवनदेशे भव:। यवन+अण्।) सिल्हकगन्धद्रव्यम्। इत्यमर:।२।६।१२८॥ (सिह्लकशब्देऽस्य विवृतिर्ज्ञातव्या॥)

यावनाल: पुं, (यवनाल एव। यवनाल+स्वार्थे अण्।) धान्यविशेष:। जोयार इति भाषा। तत्पर्याय:। यवनाल: २ शिखरी ३ वृत्ततण्डुल: ४ दीर्घनाल: ५ दीर्घशर: ६ क्षेत्रेक्षु: ७ इक्षुपत्रक: ८। तस्य गुणा:। मधुरत्वम्। शीतलत्वम्। त्रिदोषशमनत्वम्। गुरुत्वम्। पथ्यत्वम्। रुच्यत्वम्। अर्शोव्रणगुल्मनाशित्वञ्च। इति राजनिर्घण्ट:॥

यावनालशर:, पुं, (यावनाल इव शर:।) शरभेद:। जोन्हरी इति हिन्दी भाषा। तत्पर्याय:। मधौल: २ इक्षुपत्र: ३ नालिकाशर: ४ शरपत्र: ५। अस्य गुणा:। ईषन्मधुरत्वम्। रुच्यत्वम्। शीतलत्वम्। पित्तज्वरनाशित्वम्। पशूनामबलप्रदत्वञ्च। इति राजनिर्घण्ट:॥

यावनाली, स्त्री, (यवनालस्य विकार:। यवनाल+अण्। ततो ङीप्।) यावनालशर्करा। तत्पर्याय:। हिमोत्था २ हिमानी ३ शिलाशर्करा ४ शुभ्रशर्करिका ५ सुधा ६ सुभा ७ जलविन्दुजा ८। अस्या गुणा:। शैत्यत्वम्। रुच्यत्वम्। तिक्तत्वम्। अतिपिच्छिलत्वम्। वातघ्नत्वम्। श्रमहरत्वम्। दाहपित्तापहारित्वञ्च। इति राजनिर्घण्ट:॥

यावशूक, पुं (यवशूक एव। यवशूक+स्वार्थे अण्। यद्वा, यावस्य यवस्य शूक आरम्भकोऽस्य इति। अण्।) यवक्षार:। इति रत्नमाला॥ (यथा, सुश्रुते चिकित्सितस्थाने १ अध्याये।
"पौतं पीतं तिलं पैष्टं यावशूकं सचन्दनम्।
सकदल्यादि च पत्रादि क्षौद्रयुक्तं प्रदापयेत्॥")

यावक: पुं (यूयते इति। यु+"वहियुभ्यां णित्।" उणा० ३।१८। इति क्वन्। तस्य णित्वम्। यद्वा, यवानां विकार:। यवक+"तस्य विकार:।" ४।३।१३०। इत्यण्।) यावकयवक:। इति सिद्धान्तकौमुदी॥

याव्य, त्रि, (यूयते इति। यु+"आसुयुवपिरपि लपित्रपिचमश्च।" ३।१।१२६। इति ण्यत्।) मिश्रणीयम्। यूयते यत्। इति मुग्धबोधव्याकरणम्॥

याशोधरेय, पुं, (यशोधराया अपत्यं पुमान्। यशोधरा+ढक्।) राहुलनामक:। इति हेमचन्द्र:॥

याष्टीक, पुं (यष्टि: प्रहरणमस्य। यष्टि+"शक्तियष्ट्योरीकक्।" ४।४।५९। इति ईकक्।) यष्टिधारी योद्धा। ठेङ्गेरा इति भाषा। तत्पर्याय:। यष्टिहेतिक: २। इत्यमर:।२।८।७०॥ (यथा राजतरङ्गिण्याम्। ६।२१।
"याष्टीकस्य इव शिरो दत्त्वा याष्टीकार्तिनम्।
हरे चतुर याष्टीकास्तत्र तत्र यथायथम्॥")

यास:, पुं, (यस+घञ्।) दुरालभा। इत्यमर:।२।४।९१॥ (यथा—
"यासो यवासो दु:स्पर्शो धन्वयास: कुनाशक:।
दुरालभा दुरालम्भा समुद्रान्ता च रोदिनी॥
गान्धारी कच्छुरानन्ता कषाया हरविग्रहा।
यास: स्वादु: सरस्तिक्तस्तुवर: शीतलो लघु:॥
कफमेदोमदभ्रान्तिपित्तासृक्कुष्ठकासजित्।
तृष्णाविसर्पवातास्रवमिज्वरहर: पर:॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

यासा, स्त्री, (यास: प्रयत्नोऽस्त्यस्या: इति अर्श आद्यच्। टाप्।) मदनशलाकापक्षी। इति शब्दमाला॥

यु, क ङ निन्दने। इति कविकल्पद्रुम:॥ (चुरा०-आत्म०-सक० सेट्।) क ङ यावयते। इति दुर्गादास:॥ ("यावयते वाचा वृद्धम्।" इति मनोरमा॥)

यु ञ ग बन्धे। इति कविकल्पद्रुम:॥ (क्र्या० उभ० सक० सेट्।) ञ ग, युनाति यो बन्धोऽपि न दैन्यबन्धकोऽनर्गलेति हलायुध:। इति दुर्गादास:॥

यु, ल मिश्रणे। अमिश्रणे। इति कविकल्पद्रुम:॥ (अदा० पर० सक० सेट्।) ल, यौति। मिश्रणे यथा,—
"यौति स्रावे कुमक्षोभि सम्पक्कादेहयो:॥"
इति हलायुध:॥
अमिश्रणे समवायसमाधि। अयुतसिद्धानामिति मिलितसिद्धानामित्यर्थ:। इति दुर्गादास:॥

युक्, [ज्] त्रि, (युनक्ति समाधत्ते इति। युजो ह समाधौ+क्विन्।) समाधिमान्। इति मुग्धबोधव्याकरणम्॥ (युज्यते परस्परमिति।) युग्मम्। इति शब्दरत्नावली॥ (यथा, मनु:। ३।२७७।
"युक्षु कुर्व्वन् दिवर्क्षेषु सर्व्वान् कामान् समश्नुते।
अयुक्षु तु पितॄन् सर्व्वान् प्रजां प्राप्नोति पुष्कलाम्॥")

युक्त ष, निन्दा। युज क ह भिर्भे इत्यस्मात् क्तिप्रत्ययेन निष्पन्नम्। (इत्यभिधानम्॥)

युक्त, त्रि, (युज्यते स्म इति। युज+क्त।) न्याय्यम्। तत्तु न्याय्यादिवाचकम्। इत्यमर:। ३।१।२४। (यथा शाकुन्तले। १ अङ्के।
"अन्य हृद्य दूरीकृते युक्तरूपमिदं त्वया।
युक्तेन युक्तेनेति चतुष्टयमाप्नुहि॥")
अन्वयसूतम्। मिलितमिश्रितम्। इति मेदिनी। ते, ४०। (यथा आनन्दलहर्य्याम्। १।
"शिव: शक्त्या युक्तो यदि भवति शक्त: प्रभवितुं
न चेदेवं देवो न खलु कुशल: स्पन्दितुमपि।
अतस्त्वामाराध्यां हरिहरविरिञ्च्यादिभिरपि
प्रणन्तुं स्तोतुं वा कथमकृतपुण्य: प्रभवति॥")

युक्तं, क्ली, (युज्+क्त।) कलकलयुक्तम्। इति मेदिनी। ते, ४०॥

युक्त:, पुं (युज्यते स्म योगेनेति। युज+क्त।) अभ्यस्तयोग:। यथा,—
"योगस्थो द्विविध: प्रोक्तो युक्तयुञ्जानभेदत:।
युक्तस्य सर्व्वदा भानं चिन्तासहकृतोऽपर:॥"
इति भाषापरिच्छेदे। ६६॥
तत्र युक्तस्य यथा, श्रीगीतायाम्। ६।८।
"ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रिय:।
युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चन:॥"
"योगारूढस्य लक्षणं स्वेच्छया योगस्य सम्यगङ्गीकृतं तेन ज्ञानेनौपदेशिकं विज्ञानमपरोक्षानुभव: ताभ्यां तृप्तो निराकाङ्क्ष आत्मा चित्तं यस्य। अत: कूटस्थो निर्व्विकार:। अतएव विजितानीन्द्रियाणि येन। अतएव समानि लोष्टादीनि यस्य। अन्यलक्षणात्तु योगारूढ एवं-विधो योगीन्द्रियान्तर्युक्तो योगारूढ इत्युच्यते।" इति श्रीधरस्वामी॥
(रैवतमनो: पुत्र:। यथा हरिवंशे। ७।२९।
"अथ पुत्रास्तस्य विशेषात् शृणु मे नृप।
धृतिमानव्ययो युक्तस्तत्त्वदर्शी निरुत्सुक:॥")

युक्तरथा, स्त्री, (युक्त: रथोऽस्या:।) रास्ना। इत्यमरभरतौ। २।४।१२०। कौटा आमनकी इति भाषा। (तत्पर्याय:।
"रास्ना युक्तरसा रसा सुवहा रसना रसा।
एलापर्णी च सुरसा सुगन्धा श्रेयसी तथा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

युक्ता, स्त्री (युक्त+टाप्।) छन्दोविशेष:। इति रत्नमाला। पलाशी इति भाषा॥

युक्ति:, स्त्री, (युज्यते इति। युज+क्तिन्।) न्याय:। इति मेदिनी। ते, ३०। (यथा, पञ्चतन्त्रे। ३।१६९।
"सद्य तद्वचन युक्ता धर्मोद्युक्तिसमन्वितम्।
उपगम्य ततोऽश्रुत्य कपोत: प्राह लुब्धकम्॥")
लोकव्यवहार:। इति व्यवहारमातृका॥
"धर्म्मशास्त्रविरोधे तु युक्तियुक्तो विधि: स्मृत:॥"
इति स्मृति:॥
अनुमानम्। यथा —
"युक्तिप्रत्यक्षमाप्त्या अर्थनैवाद्देवेत्।
युक्तिरनुमानम्।
अनुमानेन निर्णीय न प्राप्ते प्रत्यक्षत:।
रक्तकमलमिति निश्चयम्। अत एव युक्ति:।
आरम्भ।
उत्तार्ष्योऽपि दृष्टो यत्र प्रत्यक्षाश्च घातक:।
लैङ्गिकैर्मिश्रहेतुश्च पुमर्थ पारदारिके॥
कूटानवादिविधानन दैवतोत्था अदोषत:।
तथा कुकारदस्य स्वच्छेन्ना प्रकीर्तित:॥
प्रत्यक्षचिह्नैर्विज्ञेयो दण्डपारुष्यकारक:।
अग्न्यादिगणना दृष्टि पारुष्ये तु परीक्षणम्॥
प्रत्यक्षचिह्नैर्विभूतिसन्धर्मातोपि। पारुष्ये
वाक्पारुष्ये। प्रत्य। कोप्रकाशनचौर इति।
नारद:।
अभोक्ता निःक्रमाणोऽपि प्रतिभूत्याद्याक्रमः।
विषयु ऋतुकालो वा दलोन्नतिके समाचरेत्॥
यदा अविधिवादेऽपि ऋतुकालो वा
न च ते कार्ये पारस्योपि पूर्वपूर्वस्त्वपराधोपि

न तद्वाक्यं प्रतिवदन्ति तदोत्तरकालमनेनाभ्युपगतोऽयमर्थ इत्यवधार्य्य समयपत्रिकायां दापयेन्नियमं ।' इति व्यवहारतत्त्वम् ॥ * ॥ नाट्यालङ्कारविशेषः । तस्य लक्षणम् । यथा ।"युक्तिरर्थावधारणम् । उदाहरणं यथा —

यच्चामरमपास्य नास्ति लक्ष्मी
र्भयमिति युक्तमितोऽन्यतः प्रयातुम् ।
अथ मरणमवश्यमेव जन्तोः
किमिति मुधा मलिनं यशः कुरुध्वम् ॥

इति वेणीसंहारे ।" इति साहित्यदर्पणम् ॥ (उपायः । यथा, कथासरित्सागरे । १८ । ५६ ।
"तत्र प्रज्ञाधना देशान्निर्वास्यैतावचिरात् यथा ।
तौ पुत्रौ चिन्तयेर्युक्तिं त्वमन्योऽन्यार्हभि सह ॥"
भोगः । यथा, सूर्य्यसिद्धान्ते । ७ । २४ ।
"विषर्द्धकर्णयुक्त्यासक्ते द्विराशिन्यया हता ।
स्फुटा खकर्णखित्यासा भमयुर्मानलिप्तिका ॥"
प्रमाणविशेषः । तद्यथा,—
"यत्रासां तन्त्रयुक्तीनां किं प्रयोजनमित्युच्यते वाक्ययोजनमर्थयोजनञ्च ।"

अपवादिप्रयुक्तानां वाक्यानां प्रतिषेधनम् ।
स्ववाक्यसिद्धिरपि च क्रियते तन्त्रयुक्तितः ॥
व्यक्ता नोक्ताश्च ये ह्यर्था लीना ये चाप्यनिर्म्मलाः ।
लेशोक्ता ये क्वचित्तन्त्रे तेषाञ्चापि प्रसाधनम् ॥
यथाम्बुजवनस्यार्कः प्रदीपो वेश्मनो यथा ।
प्रबोधस्य प्रकाशार्थास्तथा तन्त्रस्य युक्तयः ॥"

इति सुश्रुते उत्तरतन्त्रे ६५ अध्यायः ॥)

युग इ वर्ज्जने । इति कविकल्पद्रुमः ॥ (भ्वा-पर-सक-सेट ।) चम्प स्यादिः । इ, युङ्गते । इति दुर्गादासः ॥

युगं क्ली, (युज्यते इति । युज + घञ् । कुत्वम् । न गुणः । "युजेर्घञन्तस्य निपातनाद्गुणस्य विषिद्धविषये च निपातनसिद्धमिष्यते । कालविशेषे रथाद्युपकरणे च युगशब्दस्य प्रयोगोऽस्य योग एव भवति ।" इति काशिका । ६ । ३ । ११६ ।) युग्मम् । (यथा शिशुपालवधे । ९ । ७२ ।

"उपनेतुमुन्नतिमतेव दिवं
कुचयोर्युगेन तरसा कलिताम् ।
रभसोत्थितामुपगतः सहसा
परिरभ्य कश्चन वधूमवधत् ॥")

कृतादिकालचतुष्टयम् । (यथा, गीतायाम् । ४ । ८ ।
"परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्म्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥")
वृद्धिनामौषधम् । हस्तचतुष्कम् । इति मेदिनी । गे १८ ॥ (यथा, मार्कण्डेये । ४९ । ३८ ।
"द्वे वितस्ती तथा हस्तो ब्राह्मतीर्थादिवेष्टनम् ।
चतुर्हस्तं धनुर्दण्डो नाडिका युगमेव च ॥")
देवानां द्वादशसहस्रवत्सरेण चतुर्युगं भवति । मनुष्यमानेन चतुर्युगपरिमाणं विंशतिसहस्राधिकत्रिचत्वारिंशल्लक्षम् । तत्र सत्ययुगस्य मानम् १७२८ वर्षाः । त्रेतायुगस्य १२९६ वर्षाः । द्वापरयुगस्य ८६४०० वर्षाः । कलियुगस्य ४३२ वर्षाः । इति श्रीभागवतमतम् ॥
तेषां भारतवर्षेऽस्तित्व विवरणं यथा,—

"चत्वारि भारते वर्षे युगानि कवयोऽब्रुवन् ।
कृतं त्रेता द्वापरञ्च कलिश्चेति चतुर्युगम् ॥
पूर्व्वं कृतयुगं नाम ततस्त्रेता विधीयते ।
द्वापरञ्च कलिश्चैव युगानि परिकल्पयन् ॥
चत्वार्य्याहुः सहस्राणि वर्षाणान्तु कृतं युगम् ।
तस्य तावत् शती सन्ध्या सन्ध्यांशश्च तथाविधः ॥
इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु ।
एकापायेन वर्त्तन्ते सहस्राणि शतानि च ॥
त्रेता त्रीणि सहस्राणि युगसंख्याविदो विदुः ।
तस्यापि त्रिशती सन्ध्या सन्ध्यांशः सन्ध्यया समः ॥
द्वे सहस्रे द्वापरे तु सन्ध्यांशौ तु चतुःशती ।
सहस्रमेकं वर्षाणां न्यि कलौ प्रकीर्त्तितम् ॥
द्वे शते च तथान्ये वै सन्ध्यांशश्च मनीषिभिः ।
एषा द्वादशसाहस्री युगसंख्या तु कल्पिता ॥
कृतं त्रेता द्वापरञ्च कलिश्चेति चतुर्युगम् ।
तत्र संवत्सराः सृष्टा मानुषास्तान्निबोधत ॥
चत्वारिंशत्तथा त्रीणि कृतं युगमथोच्यते ।
विंशतिश्च सहस्राणि कालो ज्ञेयश्चतुर्युगः ॥
पृथक्त्वेनेह वक्ष्यामि युगानि तु निबोधत ।
नियुतानि दश द्वे च पञ्च चैवात्र संख्यया ॥
अष्टाविंशसहस्राणि कृतं युगमथोच्यते ।
अयुतन्तु तथा पूर्णं द्वे चान्ये नियुते पुनः ॥
षट्त्रिंशच्च सहस्राणि संख्यातानि तु संख्यया ।
त्रेतायुगस्य संख्यैषा मानुषेण तु कीर्त्तिता ॥
अष्टौ शतसहस्राणि वर्षाणां मानुषाणि तु ।
चतुःषष्टिसहस्राणि वर्षाणां द्वापरं युगम् ॥
चत्वारि नियुतानि स्युर्वर्षाणान्तु चतुर्थकम् ।
द्वात्रिंशच्च तथान्यानि सहस्राणि तु संख्यया ॥
एतत् कलियुगं प्रोक्तं मानुषेण प्रमाणतः ।
एषा चतुर्युगावस्था मानुषेण प्रकीर्त्तिता ॥
चतुर्युगस्य संख्याता सन्ध्या सन्ध्यांशकेन च ।
एषा चतुर्युगाख्या तु साधिका त्वेकसप्ततिः ।
कृतत्रेतादियुक्ता सा मन्वन्तरमुच्यते ॥"

इति मात्स्ये ११८ अध्यायः ॥ * ॥

युगधर्म्मो यथा —
"ध्यानं परं कृतयुगे त्रेतायां ज्ञानमुच्यते ।
द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे ॥
ब्रह्मा कृतयुगे देवस्त्रेतायां भगवान् रविः ।
द्वापरे दैवतं विष्णुः कलौ देवो महेश्वरः ॥
ब्रह्मा विष्णुस्तथा सूर्य्यः सर्व्व एव कलिष्वपि ।
पूज्यते भगवान् रुद्रश्चतुर्ष्वपि पिनाकधृक् ॥
आद्ये कृतयुगे धर्म्मश्चतुष्पादः सनातनः ।
त्रेतायुगे त्रिपादः स्याद्द्विपादो द्वापरे स्थितः ।
त्रिपादहीनस्तिष्ये तु सत्तामात्रेण तिष्ठति ॥"

इति कूर्म्मपुराणे युगधर्म्मकीर्त्तनं नाम २८ अध्यायः ॥ * ॥ युगावतारो यथा —

"कृते युगे परं ज्ञानं कपिलादिस्वरूपधृक् ।
ददाति सर्व्वभूतात्मा सर्व्वभूतहिते रतः ॥
चक्रवर्त्तिस्वरूपेण त्रेतायामपि स प्रभुः ।
दुष्टानां निग्रहं कुर्व्वन् परिपाति जगत्त्रयम् ॥
वेदमेकं चतुर्भेदं कृत्वा शाखाशतैर्विभुः ।
करोति बहुलं भूयो वेदव्यासस्वरूपधृक् ॥
वेदांस्तु द्वापरे व्यस्य कलेरन्ते पुनर्हरिः ।
कल्किस्वरूपी दुर्वृत्तान् मार्गे स्थापयति प्रभुः ॥
एवमेव जगत् सर्व्वं परिपाति करोति च ।
हन्ति चान्तेष्वनन्तात्मा नास्त्यस्माद्व्यतिरेकि यत् ॥"

इति विष्णुपुराणे ३ अंशे २ अध्यायः ॥ * ॥

युगधर्म्मान्तरं यथा —

जैमिनिरुवाच ।

"कलौ युगे महाभाग ! समायाते सुदारुणे ।
भविष्यन्ति जनाः सर्व्वे कीदृशास्तद्वदस्व मे ॥

व्यास उवाच ।

यौक्तिक, पुं, (युक्तिं करोतीति । युक्ति + ठञ् ।) नर्म्मसचिवः । इति शब्दरत्नावली ॥ युक्तियुक्ते त्रि ॥

यौगक, त्रि, (योगस्यायमिति । योग + अण् + स्वार्थे कन् ।) योगसम्बन्धी । इति सिद्धान्तकौमुदी ॥

यौगिक, त्रि, (योगाय प्रभवतीति । योग + "योगाद्यच्च ।" ५ । १ । १०२ । इति ठञ् ।) प्रकृतिप्रत्ययोगलभ्यार्थवाचकः । यथा । योगाय प्रभवति । इति योग्यं यौगिकं । इति सिद्धान्तकौमुदी ॥ "योगरूढाश्च रूढाश्च यौगिकाश्चेति ते त्रिधा । आदितेयादिशब्दा यौगिकास्तेऽतिदेवतामीति दृश्यमानेन केवलं योगाय एव ।" इत्यलङ्कारकौस्तुभे २ किरणः ॥ ॥
("यौगिकं नाम लक्षयति विभजते च ।
'योगलभ्यार्थमात्रस्य बोधकं नाम यौगिकम् ।
समासस्तद्धितान्तञ्च कृदन्तञ्चेति तत्त्रिधा ॥'
यन्नाम स्वान्तर्निविष्टशब्दानां योगलभ्यस्यैव शाब्दान्वयबोधं प्रति हेतुत्वाधाराय तादृशार्थे यौगिकम् । योगरूढन्तु लक्ष्यपादिपदं योगार्थावच्छिन्नस्य रूढ्यर्थस्य बोधकं न तु तन्मात्रस्य । तच्च यौगिकं त्रिविधं समास तद्धितान्त कृदन्तभेदेन । यद्यपि समास इव टकशब्दाभावाद्भूयान्यस्य प्रकृत्या प्रत्ययस्यान्वयबोधकतया यौगिक एव । तथापि रूढ्यर्थस्यैव विशिष्टार्थे नाम लक्ष्यपदादौ वासुदेवादौ मधुपादौ च योगरूढिरितिप्रसङ्गः । तादृशो भवन्तु मृदेवादौ दोषादे कोश-वाचिनि तादृशं नाम यौगिकमेव अन्यथा तु स्त्रीत्वादिमति तत्तदर्थे रूढ्येव नानो विभागस्य व्याघातः । यौगिकेषु समासं लक्षयति ।
'शाब्दस्य महावाक्यस्यावान्तरवाक्यादिविशेषकः ।
शाब्दार्थस्य धीहेतुः स समासस्तदर्थकः ॥'
शाब्दमहावाक्यान्तरवाक्यत्वादि ज्ञापकस्य शाब्दार्थावच्छिन्नविषयताशालिबोधि हेतुत्वाद्दृश तद्वाच्य तथाविधार्थे समासः । पाचकादिकन्तु पाककर्त्तार्थक वाक्यमपि तद्घटकात्मिकनाम लभ्यताद्दृशार्थकत्वविरहान्न महावाक्यम् । प्रत्ययमात्रावच्छिन्नप्रत्ययार्थस्यान्वयबोधे प्रयोज्यत्वं वा प्रकृते वाक्यस्य महत्त्वं वाच्यम् । तेन उपकुम्भादौ भावाभिमतः नीलघटत्वमभिमत्नी नीलघटत्वादिभागेऽतिप्रसङ्गः । चौरपार्थीत्यादिकन्तु प्रत्ययमात्रावच्छिन्नतदर्थस्यान्वयबोधे समर्थोऽपि न प्रत्ययमात्रावच्छिन्नस्य तत्र पाक धीकसामान्यस्याप्रत्ययात् । राज्ञः पुरुषत्वमित्यादितो राजन्येव पुरुषभावः प्रतीयते न तु राज पुरुषस्य भावः तद्धितान्तो प्रत्ययमात्रान्वित स्वार्थवाचकत्वादसौ राज पुरुषत्वादिभागे न प्रसङ्गः । पाचपाचमित्यादिरूपमन्तभागस्तु स्वार्थावच्छिन्नस्य धात्वर्थावच्छिन्नान्वयबोधको न तु स्त्र्यादिप्रत्ययार्थस्य प्रथमावृत्त्यादौ समासत्वप दैर्घ्यादिशब्दसंस्कारप्रयोजको गौण ॥"

● ● ● ● ● ●

"यौगिकेषु क्रमप्राप्तं तद्धितान्तं नाम लक्षयति ।
यन्नाम तद्धितं यत्र यत्क्रम सन्निदर्शकम् ।
यद्द्वय यमक्रम तत्र तद्धितान्तं निगद्यते ॥
यद्यपि नामोत्तरतद्धितत्व तद्धितोत्तरनामत्व वा प्रत्येकं बहुगुडो नादेयादौ दाक्षिरित्यादौ चाव्यापकमेव तद्धितान्तं नास्ति तथापि यादृश नाम यत्र तद्धितं यादृशानुपूर्व्यवच्छिन्न यदा दृश्यापस्यान्वयबोधि समर्थं तादृशानुपूर्व्यवच्छिन्न तद्द्वयमपि तादृशार्थे तद्धितान्तं नामैव व्यवतिष्ठते इत्यादिकन्तु नामैव न प्रागेव तु तद्धितान्तं तस्यापि जन्यत्वे च शब्दशक्ति प्रवेति पठनीयं टाबादेरपि तद्धितत्वोपगमात् इत्याकाङ्क्षोदयादर्थ्यमिदं इति वदन्ति ।
कृदन्तं नाम लक्षयति ।
यद्धात्वन्वितत्वार्थबोधे च तदन्तं भवेत् ।
तद्धातूत्तरं तत् सत् कृदन्तं नाम तादृशम् ॥
यद्धात्वर्थान्वितस्वार्थान्वयबोधं प्रति यादृशानुपूर्व्यवच्छिन्नस्य यत्प्रत्ययो विषयः कारणं तद्धातूत्तरं तत् सदेव तादृशानुपूर्व्यवच्छिन्नं कृदन्तं नाम । यथा पाठकपाचकादि तद्धात्वर्थेनान्वितस्य स्वार्थकर्त्त्रादेः कर्म्मतादान्वयबोधं प्रति हि नोपादाने तादृशानुपूर्व्यवच्छिन्नं कृदन्त नामैव । चैत्रेण पाचकस्य गन्तव्यमित्यादौ धात्वर्थे क्रियाकारणत्वादिक बोधयदपि तद्धातिक नामधात्वर्थविषयत्वाविशिष्ट- त्वितत्वादविषयतायां स्वयमेव नामत्व मितत्वापाकमेव भावकनाम च सन्नापकत्व दूरादित्तमेव ।" इति शब्दशक्तिप्रकाशिका ॥

अगुरु । तत्पर्य्यायो यथा,—
"अयोगुरु अगुरुश्चैव यौगिको लोहकाम्भि ॥" इति गारुडे २५ अध्यायः ॥)

यौवनप्रासिक, त्रि (यौवनप्रास गच्छतीति । यौवनप्रास + "क्रोशशतयोजनशतयोरुपसंख्यानम् ।" ५ । १ । ७४ । इत्यस्य वार्त्ति इति । ठञ् ।) यौवनप्रासगमनकर्त्ता । इति सिद्धान्तकौमुदी ॥ (यौवनप्रासादभिगमनमर्हतीति वाक्ये यौवन प्रासाभिगमनकर्त्ता । इति काशिका ॥)

यौवनिक, त्रि, (यौवनं गच्छतीति । यौवन + "यौवनं गच्छति ।" ५ । १ । ७४ । इति ठञ् ।) एकयौवनगमनकर्त्ता । इति सिद्धान्तकौमुदी ॥

यौट ऋ सम्बन्धे । इति कविकल्पद्रुमः ॥ (भ्वा° पर° सक° सेट् ।) ऋदुपधकारी । ऋ, अयुयौटत् । यौटति काष्ठं तथा । इति दुर्गादासः ॥

यौड ऋ सम्बन्धे । इति कविकल्पद्रुमः ॥ (भ्वा° पर° सक° सेट् ।) ऋदुपधकारी । ऋ, अयुयौडत् । यौडति काष्ठं तथा । इति दुर्गादासः ॥

यौतकं क्ली, (युतकयोर्वधूवरयोरिदम् । युतक + अण् । युतकमेवेति । स्वार्थे अण् वा ।) यौतुकम् । इति जटाधरशब्दरत्नावली । २ । ८ । २८ ॥ (यथा मनुः । ९ । १३१ ।
"मातुस्तु यौतकं यत् स्यात् कुमारीभाग एव स ॥"
अस्य विशेषविवरणन्तु यौतुकशब्दे द्रष्टव्यम् ॥)

यौतव, क्ली परिमाणम् । इत्यमरः । २ । ९ । ८५ ॥

यौतुक क्ली, यौतकम् । विवाहकाले दम्पत्योर्लब्धधनम् । उपचारात् अत्रप्राप्तादिधनादनन्तरकालमपि । युतकं यौनिसम्बन्धं तत्र भवमिति यौतकम् । युतयोर्वधूवरयोरिदमिति वा क्वचित् यौतकम् । पालकप्रकारमध्यमपि । यौतकं यौतुकं च तत् । इति वाचस्पतिः । यौत कादि तु यद्देयं स दायो हरणञ्च तदित्यमर टीकायां भरतः ॥ ॥ (अस्य यौतकधनस्याधिकारक्रमो यथा,—
"अत दुहितृमात्राधिकारार्थं गौतमवचनम् ।
'स्त्रीधनं दुहितृणामप्रत्तानामप्रतिष्ठितानाञ्च ।'
अत्र नारदश्च ।
'मातुर्दुहितरोऽभावे दुहितॄणां तदन्वयः ।'
अत्र कात्यायनस्यापि ।
'दुहितॄणामभावे तु रिक्थं पुत्रेषु तद्भवेत् ।'
अत्र याज्ञवल्क्यः ।
'मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेऽन्वयः ।'
तानि पुत्रस्त्रीदेयवचनविरोधेन यौतकधन मात्रविषयाणि । अतएव मनुः । ९ । १३१ ।
मातुस्तु यौतकं यत् स्यात् कुमारीभाग एव सः ।
यौतक पारिणेयधनम् । यु मिश्रणे इति धातो- र्युत इति पदम् । मिश्रणञ्च स्त्रीपुंसयोरेकशरीरे- रता तत्र विवाहादेव । अतः किमिति स्त्रीविवाहकालेऽपि तदभावात् स्त्रीविवाहस्य यौतकम् । तच्च परित्यक्त- वत्स जीवत् दुहितृषु न पुत्राणाम् । तदेव

[illegible]

[illegible]

[illegible]

मध्यविन्दोर्दुहितरं विन्दुमत्यामधान्नृप ।
पुरुकुत्समम्बरीषं मुचुकुन्दञ्च योगिनम् ।
तेषां स्वसारः पञ्चाशत् सौभरिं वव्रिरे पतिम् ॥"
इति श्रीभागवते ९ स्कन्धे ६ अध्याय ॥

यौवनाश्वक, पुं, (यौवनाश्व+स्वार्थे कन् ।) मान्धातृराज । इति जटाधर ॥

यौष्माक त्रि (युष्मद्+अण् । 'तस्मिन्नणि च युष्माकास्माकौ ।" ४ । ३ । २ । इति युष्मदो युष्माकादेश ।) युष्मत्सम्बन्धि । युष्माकमिदमित्यर्थे ष्णप्रत्ययेन निष्पन्नम् । इति मुग्धबोधव्याकरणम् ॥ (यथा कथासरित्सागरे । ११९ । २५ ।
"इत्याद्यस्मासु जल्पत्सु मिलितेष्वथ सत्स्वलम् ।
विद्याधरो धूमशिखो यौष्माकोऽभ्यागमद्द्विष ॥")

यौष्माकीण त्रि (युष्मद्+"युष्मदस्मदोरन्यतरस्यां खञ्च ।"४।३।१। इति खञ् । तस्मिन्नणि चेति । ४ । ३ । २ । इति युष्माकादेश ।) युष्मत्सम्बन्धि, युष्माकमिदमित्यर्थे ष्णीन् प्रत्ययेन निष्पन्नम् । इति मुग्धबोधव्याकरणम् ॥ युष्मच्छब्दे अलिखितत्वान्त्यसरवस्था गौणयुष्मच्छब्दप्रयोगोऽत्र लिख्यते । युष्मदस्मदोर्मुख्यत्वे गौणत्वे च विभक्तिद्वयो स्वरूपमप्रदर्श्यात तेषु परेषु त्वाद्ययुवयुष्मत्तुभ्यमह्यन्मम्मा स्युरेव । त्वमादेरन्यत्र युष्मदस्मदोर्मुख्यत्वे एकवचने परे त्वमादौ द्विवचने परे युवावौ बहुवचने परे स्वरूपेणावस्थानम्, गौणत्वे तु परविभक्तिमनादृत्य युष्मदस्मदोरेकत्वे त्वमादौ द्वित्वे युवावौ बहुत्वे स्वरूपेणावस्थानमिति ॥ ● ॥ यथा त्वामतिक्रान्ता अतित्वं अतित्वौ अतियूयम् । अतित्वां अतित्वौ अतित्वान् । अतित्वया अतित्वाभ्यां अतित्वाभि । अतितुभ्य अतित्वाभ्यां अतित्वभ्यम् । अतित्वत् अतित्वाभ्यां अतित्वत् । अतितव अतित्वयो अतित्वयाम् । अतित्वयि अतित्वयो अतित्वासु ॥ ● ॥ युवामतिक्रान्ता अतित्वं अतियुवां अतियूयम् । अतियुवां अतियुवां अतियुवान् । अतियुवया अतियुवाभ्यां अतियुवाभि । अतितुभ्य अतियुवाभ्यां अतियुवभ्यम् । अतियुवत् अतियुवाभ्यां अतियुवत् । अतितव अतियुवयो अतियुवयाम् । अतियुवयि अतियुवयो अतियुवासु ॥ ● ॥ युष्मानतिक्रान्ता अतित्वं अतियुष्मां अतियूयम् । अतियुष्मां अतियुष्मां अतियुष्मान् । अतियुष्मया अतियुष्माभ्यां अतियुष्माभि । अतितुभ्य अतियुष्माभ्यां अतियुष्मभ्यम् । अतियुष्मत् अतियुष्माभ्यां अतियुष्मत् । अतितव अतियुष्मयो अतियुष्मयाम् । अतियुष्मयि अतियुष्मयो अतियुष्मासु ॥ ● ॥ मामतिक्रान्ता अहम् अतिमां अतिवयम् । अतिमां अतिमां अतिमान् । अतिमया अतिमाभ्यां अतिमाभि । अतिमह्य अतिमाभ्यां अतिमभ्यम् । अतिमत् अतिमाभ्यां अतिमत् । अतिमम अतिमयो अतिमयाम् । अतिमयि अतिमयो अतिमासु ॥ ● ॥ आवामतिक्रान्ता अहम् अत्यावां अतिवयम् । अत्यावां अत्यावां अत्यावान् । अत्यावया अत्यावाभ्यां अत्यावाभि । अतिमह्य अत्यावाभ्यां अत्यावभ्यम् । अत्यावत् अत्यावाभ्यां अत्यावत् । अतिमम अत्यावयो अत्यावयाम् । अत्यावयि अत्यावयो अत्यावासु ॥ ● ॥ अस्मानतिक्रान्ता अहम् अत्यस्मां अतिवयम् । अत्यस्मां अत्यस्मां अत्यस्मान् । अत्यस्मया अत्यस्माभ्यां अत्यस्माभि । अतिमह्य अत्यस्माभ्यां अत्यस्मभ्यम् । अत्यस्मत् अत्यस्माभ्यां अत्यस्मत् । अतिमम अत्यस्मयो अत्यस्मयाम् । अत्यस्मयि अत्यस्मयो अत्यस्मासु । इति दुर्गादास ॥

र

र रेफ । यथा । रेफात् कारतकारौ रादेफ । इति कलापसन्धिप्रथारव्याकरणे । रेफान्त कारश्च । रकार । इति प्रक्रियाकौमुदी । स तु सप्तविंशव्यञ्जनवर्ण । तस्योच्चारणस्थानं मूर्द्धा । इति मुग्धबोधव्याकरणम् ॥ ● ॥ (तथा च शिक्षायाम् । १७ ।
"ऋटुरषाणां मूर्द्धा स्युः
स्मृता ॥")

तस्य स्वरूप यथा,—
"रेफञ्च चञ्चलापाङ्गि । कुण्डलीत्रयसंयुतम् ।
रक्तविद्युल्लताकारं पञ्चदेवात्मकं सदा ।
पञ्चप्राणमयं वर्णं त्रिबिन्दुसहितं सदा ॥"
इति कामधेनुतन्त्रे ६ पटल ॥ ● ॥

तस्य लेखनप्रकारो यथा —
"दक्षत कुण्डली रेखा वामादूर्द्ध्वगतात्मध ।
पुनर्दक्षगता सैषा तलोऽधोगता चोदृत ॥
भवानी शङ्करो वह्निस्तासु तिष्ठन्ति नित्यश ।
अद्धमात्रा ब्रह्मरूपा मेदाशक्ति प्रकीर्त्तिता ॥"
अपि च ।
"ऊर्द्धाधःक्रमतो रेखा त्रिकोणाधोगता च या ।
त्रिचिरोऽस्य कैशवश्च तासु तिष्ठन्ति नित्यश ।
ऊर्द्ध्वस्थिता तु या मात्रा सा शक्ति परि-
कीर्त्तिता ।
तस्य मध्यगता रेखा वह्निरूपा च या मता ।
निर्गुणोऽसौ स्मृत वर्णो न कस्यचित् गुणो भवेत् ॥"
अस्य ध्यानं यथा,—
"लसज्जिह्वा महारौद्रीं रक्ताक्षीं रक्तलोचनाम् ।
रक्तवर्णाम्बरधरां रक्तपुष्पोपशोभिताम् ।
रक्तमाल्याम्बरधरां रक्तालङ्कारभूषिताम् ।
महामोक्षप्रदां नित्यां चतुर्वर्गप्रदायिकाम् ।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥"
तन्नामानि यथा —
"त्रिपदरिक्ता दीर्घा । आकाशरिक्तायुगम् ।
धर्मेद्धिवोमेधं वर्णं यतात् ब्रह्मात्मकम् ॥"
इति वर्णोद्धारतन्त्रम् ॥ ● ॥

तस्य नामानि यथा,—
"रो रक्त क्रोधिनी रेफ पावकस्तेजसो मत ।
प्रकाशाद्यगो दीप्तो रक्तकृष्णापरं यधो ॥
भुजङ्गेशो मति सूर्यो धातुरक्त प्रकाशक ।
आपको रेवतीदाम कुण्डलो वह्निमण्डलम् ॥
उग्ररेखा स्थूलदन्तो वेदकण्ठपता पुरा ।
प्रकृति सुगतो ब्रह्मशब्दश्च गायको धनम् ॥
श्रीकण्ठ उग्रा हृदय सूक्ष्मो त्रिपुरसुन्दरी ।
सबिन्दुर्योनिगो ज्वाला श्रीशैलो विश्वतो
मुखी ॥"
इति नानातन्त्रशास्त्राणि ॥

(छन्द शास्त्रोक्तगणविशेष । यथा, छन्दो मञ्जर्याम् । १ । ८ । "र लमध्य ।" लघुमध्यो र भवति । तस्येदं सांकेतिकं चिह्नम् ऽ।ऽ पद्यादौ अस्यापरस्य प्रयोगे दाहो भवति । यदुक्तं वृत्तरत्नाकरटीकायाम् ।
"मा लक्ष्मीं रक्षु दाहं यशवमय लघौ स्वसुख
मस्तु खेदम् ॥"
धात्वनुबन्धविशेष । यथा कविकल्पद्रुमे ।
"———————षो बधान् र वैदिक ।"
"वैदिको वेदेष्वेव प्रयुक्तो न तु भाषाया
निबन्ध । यथा, गाति स्तुतौ जगाति ।")

र पुं (राति कर्त्तुं गतच्छीति । रा+ड ।) पावक । तीक्ष्णे । इति मेदिनी । रे, १ ॥ कामवह्नि । इति शब्दरत्नावली ॥

रक्त [स्] क्ली, (रमते येन रति । रम्+ "रमेश्च ।" उणा ४ । २१२ । इति असुन् । हुगागमश्च धातो । "अविरविभ्यामसुन् इति असो रक्ष । इति धातुप्रदीप ।" रक्षु अश्लमत्व ।) वेग । इत्यमर । १ । १ । ६० ॥ (यथा, रघुवंशे । ३ । ३४ ।
"अथ मधोयाज | बभ मखेन
प्रयुक्तमपश्चमितो हया स्याम् ।
न यापोऽनूवनर्द्दक्तिरश्च
त्रिवोचये गच्छति मारतस्य ॥"
महादेव । यथा, महाभारते । १३ । ८ । १६ ।
"हरिनेत्राय मुण्डाय लघायोत्तरणाय च ।
भास्कराय सुतीर्थाय देवदेवाय रंहसे ॥"
विष्णु । यथा महाभारते हरिवंशपर्व्वणि २५२ । १८ ।
"नमस्कृत्य सुरेशाय तस्मै देवाय रंहसे ।
प्रधाता प्रागदिर्शं पूर्वां त्रिदृशं कृतवाय
नम ॥")

रक, क आदे । आप्ने । इति कविकल्पद्रुम ॥ स्वादि रकोपादनम् । क राकयति मोदकं बालक । इति दुर्गादास ॥

रक्त क्ली (रज्यते अनुरज्यतेऽनेन । रञ्ज्+क्त ।) कुङ्कुमम् । ताम्रम् । (अस्य पर्य्यायो यथा,—
"रक्तं शिरोरुहं शोणितं तथा गुणसुकुमारम् ।"
इति वैद्यकरत्नमालायाम् ।)
प्राचीनामलकम् । इति मेदिनी । ते, ३७ ॥ पद्मकम् । (अस्य पर्य्यायो यथा,—

"[illegible] ।"

ইতি [illegible] ।)

[illegible] । ইতি [illegible] ।

([illegible] যথা,—

"[illegible] ।"

ইতি [illegible] ।)

([illegible] যথা,—

"[illegible] ।"

ইতি [illegible] ।)

[illegible] ১ [illegible] ২ [illegible] ৩ [illegible] ৪ [illegible] ৫ । [illegible] ৬ [illegible] ৭ [illegible] ৮ [illegible] ৯ [illegible] ১০ [illegible] ১১ [illegible] ১২ [illegible] ১৩ । ইতি [illegible] ১৪ [illegible] ১৫ [illegible] ১৬ [illegible] ১৭ । ইতি [illegible] ।

"[illegible] ।"

[illegible]

"[illegible] ।"

ইতি [illegible] ।)

[illegible]

"[illegible] ।"

"[illegible] ।"

ইতি [illegible] ।)

[illegible]

"[illegible] ।"

[illegible]

"[illegible] ।"

ইতি [illegible] ।)

[illegible]

"[illegible] ।"

[illegible]

"[illegible] ।"

[illegible]

रक्तकन्द पुं (रक्तः रक्तवर्णः कन्दः नवाङ्कुरो यस्य ।) प्रवालम् । इति त्रिकाण्डशेषः ॥ (गुणादयोऽस्य प्रवालशब्दे ज्ञेयाः ॥)

रक्तकमल क्ली, (रक्तं रक्तवर्णं कमलम् ।) रक्तवर्णोत्पलम् । तत्पर्य्यायः । कोकनदम् २ रक्ताम्भोजम् ३ अरुणकमलम् ४ शोणपद्मम् ५ रक्तोत्पलम् ६ अरविन्दम् ७ रविप्रियम् ८ रक्तवारिजम् ९ । (रक्तकमलम् १ । इति पाद्मोत्तरखण्डे ११ अध्यायः ।) अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । मधुरत्वम् । शिशिरत्वम् । रक्तदोषहरत्वम् । पित्तकफवातशमनत्वम् । सन्तर्पणकारित्वम् । वृष्यत्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः ।

सितन्तु सितपद्मं पुण्डरीकमिति स्मृतम् ।
रक्तं कोकनदं ज्ञेयं नीलमिन्दीवरं स्मृतम् ॥
धवलं कमलं शीतं मधुरं कफपित्तजित् ।
तस्मादल्पगुणं किञ्चिदन्यद्रक्तोत्पलादिकम् ॥'

इति भावप्रकाशः ॥

रक्तकम्बल, क्ली (कम्बलं जलमाच्छादनत्वेनास्त्यस्येति । अर्श आद्यच् । रक्तं रक्तवर्णं कम्बलमुत्पलमिति ।) रक्तोत्पलम् । यथा,—

"चन्दनागुरुकर्पूरकुङ्कुमैश्च सुगन्धिभिः ।
कमले कुमुदे पद्मे कह्लारे रक्तकम्बले ॥
फलैर्धूपैरपूपैश्च शोभनैर्गुडमिश्रितैः ।
अर्च्चयेद्गिरिजानाथं सर्व्वेषु द्विजसत्तम ॥"

इति पाद्मोत्तरखण्डे ११ अध्यायः ।

रक्तकरवीरक पुं (करवीर+स्वार्थे कन् । ततो रक्तः रक्तवर्णः करवीरकः ।) लोहितवर्णकरवीरपुष्पवृक्षः । लाल कनेल इति हिन्दी भाषा । तत्पर्य्यायः । रक्तप्रसवः २ गणेशकुसुमः ३ चण्डीकुसुमः ४ क्रूरः ५ भूतद्रावी ६ रविप्रियः ७ । अस्य गुणाः । कटुत्वम् । तीक्ष्णत्वम् । विशोधनत्वम् । त्वग्दोषकण्डूतिकुष्ठविस्फोटव्रणहरत्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः ।

"करवीरः श्वेतपुष्पः शतकुम्भोऽश्वमारकः ।
द्वितीयो रक्तपुष्पश्च चण्डातो लगुडस्तथा ॥
करवीरद्वयं तिक्तं कषायं कटुकञ्च तत् ।
व्रणलाघवकृन्नेत्रकोपकुष्ठव्रणापहम् ।
वीर्य्योष्णं कृमिकण्डूघ्नं भक्षितं विषवन्मतम् ॥"

इति भावप्रकाशः ॥

रक्तकाञ्चन पुं (रक्तः रक्तवर्णः काञ्चनः ।) स्वनामख्यातपुष्पवृक्षविशेषः । तत्पर्य्यायः । विरलः २ चमरिकः ३ । इति शब्दरत्नावली ॥ काञ्चनारः ४ ताम्रपुष्पः ५ कुद्दारः ६ । इति जटाधरः ॥

रक्तकाण्डा स्त्री (रक्तः रक्तवर्णः काण्डः दण्डो यस्याः ।) रक्तपुनर्नवा । इति राजनिर्घण्टः ॥ (विवरणमस्याः रक्तपुनर्नवाशब्दे विज्ञेयम् ॥)

रक्तकाष्ठ, क्ली (रक्तं काष्ठं यस्य ।) पत्तङ्गम् । इति राजनिर्घण्टः ॥ लोहितचन्दनञ्च ॥

रक्तकुमुद क्ली (रक्तं रक्तवर्णं कुमुदम् ।) रक्तकैरवम् । इति जटाधरः ॥

रक्तकुसुम, पुं (रक्तानि रक्तवर्णानि कुसुमानि यस्य ।) पारिभद्रः । धन्वनद्रुमः । इति राजनिर्घण्टः ॥

रक्तकेशर पुं (रक्ताः केशराः किञ्जल्काः यस्य ।) पारिभद्रः । इति रत्नमाला ॥

रक्तकैरव, क्ली, (रक्तं रक्तवर्णं कैरवम् ।) रक्तकुमुदम् । इति जटाधरः ॥ (यथास्य पर्य्यायः ।

"[illegible] हल्लक रक्तकैरवम् ।"

इति वैद्यकरत्नमाला ॥)

रक्तकोकनद क्ली, (रक्तं रक्तवर्णं कोकनदम् ।) रक्तोत्पलम् । इति जटाधरः ॥ (विवृतिरस्य रक्तोत्पलशब्दे ज्ञातव्या ॥)

रक्तखदिर पुं (रक्तः रक्तवर्णः खदिरः ।) रक्तवर्णखदिरवृक्षः । तत्पर्य्यायः । रक्तसारः २ सुसारः ३ ताम्रसारकः ४ बहुशल्यः ५ याज्ञिकः ६ कुष्ठनाशनः ७ यूपद्रुमः ८ अम्लखदिरः ९ च । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कषायत्वम् । गुरुत्वम् । तिक्तत्वम् । आमवातास्रपित्तव्रणभूतज्वरनाशित्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाश्च ।

"खदिरो रक्तसारश्च गायत्री दन्तधावनः ।
कण्टकी बालपत्रश्च बहुशल्यश्च यज्ञियः ॥
खदिरः शीतलो दन्त्यः कण्डूकासारुचिप्रणुत् ।
तिक्तः कषायो मेदोघ्नः कृमिमेहज्वरव्रणान् ।
श्वित्रशोथामपित्तास्रपाण्डुकुष्ठकफान् हरेत् ॥"

इति भावप्रकाशः ॥

रक्तगन्धक, क्ली, (रक्तं रक्तवर्णं गन्धकम् ।) बोलम् । इति राजनिर्घण्टः ॥

रक्तगुल्म पुं (रक्तजो गुल्मः इति मध्यपदलोपी कर्म्मधारयः ।) स्त्रीणां रक्तजगुल्मरोगः । तस्यौषधं यथा —

"तिलयष्टीत्रिकटुकं चूर्णं पीतं हरेच्चिरम् ।
तिलक्वाथेन संयुक्तं रक्तगुल्मं स्त्रिया वरः ॥"

इति गारुडे १९६ अध्यायः ॥

(तथास्य निदानादिकं यथा —
"शोणितगुल्मस्तु खलु स्त्रिया एव भवति न पुरुषस्य गर्भकोष्ठार्त्तवागमनवैशेष्यात् । पारतन्त्र्यादवैशारद्यात् सततमुपचारानुरोधाद्वेगानुदीरयन्त्या आमगर्भे वाप्यचिरात् पतिते तथाप्यचिरप्रजाताया ऋतौ वा वातप्रकोपणान्यासेवमानाया वातः प्रकोपमापद्यते । स प्रकुपितो योन्या मुखमनुप्रविश्यार्त्तवमुपरुणद्धि मासि मासि तदार्त्तवमुपरुध्यमानं कुक्षिं वर्द्धयति । तस्याः शूलकासातीसारच्छर्द्यरोचकाविपाकाङ्गमर्दनिद्रालस्यस्तैमित्यकफप्रसेकाः समुपजायन्ते स्तनयोश्च स्तन्यमोष्ठयोः स्तनमण्डलयोश्च कार्ष्ण्यं ग्लानिश्चक्षुषोर्मूर्च्छा दोहदः श्वयथुः पादयोरीषच्चोद्गमो रोमराज्या योन्याश्चाटालत्वमपि च योन्या दौर्गन्ध्यमास्रावश्चोपजायते । केवलश्चास्या गुल्मः स्पन्दते तामगर्भिणीं गर्भिणीमित्याहुर्मूढाः ।" इति चरके निदानस्थाने तृतीयेऽध्याये ॥ तथा च ।

"न स्पन्दते नोदरमेति वृद्धिं
भवन्ति लिङ्गानि च गर्भिणीनाम् ।
तं गर्भकालातिगमे चिकित्स्य-
मसृग्भवं गुल्ममुशन्ति तज्ज्ञाः ॥"

इति सुश्रुते उत्तरतन्त्रे ४२ अध्यायः ॥

तथा च । रक्तगुल्मस्तु स्त्रिया एव प्रजायते ।
यथा —

"ऋतौ वा नवसूता वा यदि वा योनिरोगिणी ।
सेवते वातलानि स्त्री क्रुद्धस्तस्याः समीरणः ॥
निरुणद्ध्यार्त्तवं योन्यां प्रतिमासमवस्थितम् ।
कुक्षिं करोति तद्गर्भलिङ्गमाविष्करोति च ॥
हृल्लासदौहृदस्तन्यदर्शनं क्षामतादिकम् ।
क्रमेण वायुसंसर्गात् पित्तयोनितया च तत् ॥
शोणितं कुरुते तस्या वातपित्तोत्थगुल्मजान् ।
रुक्स्तम्भदाहातीसारतृड्ज्वरादीनुपद्रवान् ॥
गर्भाशये च सुतरां शूलं दुष्टासृगाश्रये ।
योन्याश्च स्रावगन्धश्च तोदस्पन्दनवेदनाः ॥
न चाङ्गैर्गर्भवद्गुल्मः स्फुरत्यपि तु शूलवान् ।
पिण्डीभूतः स एवास्याः कदाचित् स्पन्दते
चिरात् ॥
न चास्या वर्द्धते कुक्षिर्गुल्म एव तु वर्द्धते ।
स्वदोषसंश्रयो गुल्मः सर्व्वो भवति तेन स ॥
मासं चिरेण भवति नैव वा———— ॥"

इति वाभटे निदानस्थाने एकादशेऽध्याये ॥ ०॥

तथास्य चिकित्सा ।

"रक्तगुल्मे न च पाचनम्
न छिद्रपार्श्वं कटिपाटनञ्च ।
न चैव मर्म्मस्थमदृश्यञ्च
न वा कफेनोन्नमनं हितञ्च ॥
रोधाम्बुना [illegible] समङ्गा
क्वाथोऽप्यनलपथ्य घृतप्रयुक्तम् ।
गुल्मं च रक्तमपि चाप निहन्ति घोरं
कृष्णिदरञ्च विनिहन्ति च कुष्ठरोगम् ॥
क्षीरपाकं प्रदातव्यं घृतक्षीरवर्त्तनाश्रितम् ।
रक्तगुल्मविनाशाय यत्किञ्चित्क्रियतेऽपि वा ॥
न छिद्रस्तु घटा न चोष्णं न विदाहि च ।
रक्ते चलते दुष्टे भोजनानि लघूनि च ॥"

इति हारीते चिकित्सितस्थाने चतुर्थेऽध्याये ॥)

अन्यत् गुल्मशब्दे द्रष्टव्यम् ॥ ० ॥

रक्तघ, पुं (रक्तं हन्तीति । हन्+"अमनुष्यकर्त्तृके च ।" ३ । २ । ५३ । इति टक् ।) रोहितकवृक्षः । इति जटाधरः ॥ (रोहितकशब्देऽस्य विवृतिर्ज्ञेया ॥)

रक्तघ्नी स्त्री (रक्तं हन्ति । हन्+टक् । ङीप् ।) दूर्व्वाविशेषः । गाँडिया दूर्वा इति भाषा । यथा

"[illegible] गण्डोल्या रक्तघ्नी रक्तपित्तहा ।"

इति शब्दचन्द्रिका ॥

रक्तचन्दन, क्ली (रक्तं रक्तवर्णं चन्दनम् ।) रक्तवर्णचन्दनकाष्ठम् । (यथा रामायणे ४ । १३ । ५ ।

"[illegible] रक्तचन्दनबिन्दुभिः ।
[illegible] विचरन्ति याम् ॥")

तत्पर्य्यायः । तिलपर्णी २ पत्राङ्गम् ३ रक्त

[illegible]

रक्तपित्तहा, स्त्री, (रक्तपित्तं हन्तीति । हन्+ड । स्त्रियां टाप् ।) रक्तश्री । इति शब्दचन्द्रिका ॥ गेँठिया दूर्ब्बा इति भाषा ॥ (विवृतिरस्या रक्तश्रीशब्दे ज्ञातव्या ॥)

रक्तपुनर्नवा, स्त्री, (रक्ता रक्तवर्णा पुनर्नवा ।) रक्तवर्णपुनर्नवाशाक । तत्पर्य्यायः । क्रूरा २ मण्डलपत्रिका ३ रक्तकाण्डा ४ वर्षकेतुः ५ लोहिता ६ रक्तपत्रिका ७ वैशाखी ८ रक्तवर्षाभूः ९ शोथघ्नी १० पुष्पिका ११ विकस्वरा १२ विषघ्नी १३ प्रावृषेण्या १४ सारिणी १५ वर्षाभव १६ शोथहृत् १७ भौमः १८ पुनर्भवः १९ नवः २० नवा २१ । अस्या गुणाः । तिक्तत्वम् । सारकत्वम् । शोथरक्तप्रदरदोषपाण्डुपित्तनाशित्वञ्च । इति राजनिर्घण्टः ॥

रक्तपुष्पः, पुं, (रक्तं पुष्पमस्य ।) करवीरः । इति जटाधरः ॥ (अस्य पर्य्यायो यथा —
"करवीरः श्वेतपुष्पः शतकुम्भोऽश्वमारकः ।
द्वितीयो रक्तपुष्पश्च चण्डातो लगुडस्तथा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
रोहितवृक्षः । इति शब्दमाला ॥ रक्तकाञ्चनवृक्षः । दाडिमवृक्षः । पद्मवृक्षः । इति रत्नमाला ॥ बन्धूकवृक्षः । पुन्नागवृक्षः । इति राजनिर्घण्टः ॥ (रक्तवर्णपुष्पविशिष्टे, त्रि ।) यथा, बृहत्संहितायाम् । १५ । १० ।
"इन्द्राग्निदैवते रक्तपुष्पफलशाखिनः सतिलमुद्गाः ।
कार्पासमाषचणकाः पुरन्दरहुताशभक्ताश्च ॥")

रक्तपुष्पकः, पुं, (रक्तं पुष्पमस्य । कप् ।) पलाशवृक्षः । (अस्य पर्य्यायो यथा —
"पलाशः किंशुकः पर्णो याज्ञिको रक्तपुष्पकः ।
क्षारश्रेष्ठो वातहरो ब्रह्मवृक्षः समिद्वरः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
रोहितकवृक्षः । इति जटाधरः ॥ पर्पटः । शाल्मलिवृक्षः । इति राजनिर्घण्टः ॥

रक्तपुष्पा, स्त्री, (रक्तं पुष्पं यस्याः ।) शाल्मलिवृक्षः । इति जटाधरः ॥ (अस्याः पर्य्यायो यथा,—
"शाल्मलिस्तु भवेन्मोचा पिच्छिला पूरणीति च ।
रक्तपुष्पा स्थिरायुश्च कण्टकाढ्या च तूलिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पुनर्नवा । तत्पर्य्यायो यथा,—
"पुनर्नवा वराख्या रक्तपुष्पा शिवाटिका ॥"
सिन्दूरी । तत्पर्य्यायो यथा,—
"सिन्दूरी रक्तबीजा च रक्तपुष्पा सुकोमला ॥"
इति भावप्रकाशः ॥)

रक्तपुष्पिका, स्त्री, (रक्तपुष्पा+कन् । टापि अत इत्वम् ।) लज्जालुः । इति शब्दचन्द्रिका ॥ रक्तपुनर्नवा । भूपाटलि । इति राजनिर्घण्टः ॥

रक्तपुष्पी, स्त्री, (रक्तं पुष्पं यस्याः । ङीष् ।) पाटलीवृक्षः । इति जटाधरः ॥ जवा । आवर्त्तकीलता । नागदमनी । वकवृक्षः । रुहकाली । इति राजनिर्घण्टः ॥ (धातकी । तत्पर्य्यायो यथा —
"धातकी रक्तपुष्पी स्यात् कुञ्जरा मद्यवासिनी ॥"
इति वैद्यकरत्नमालायाम् ॥)

रक्तपूरकं, क्ली, (रक्तं पूरयतीति । पूर+ण्वुल् ।) वृक्षाम्लम् । इति राजनिर्घण्टः ॥ (विवरणमस्य वृक्षाम्लशब्दे ज्ञातव्यम् ॥)

रक्तप्रसवः पुं, (रक्तं रक्तवर्णं प्रसवं पुष्पमस्य ।) रक्तकरवीरः । रक्ताम्लानः । इति राजनिर्घण्टः ॥

रक्तफलः, पुं, (रक्तं लोहितवर्णं फलमस्य ।) वटवृक्षः । इति जटाधरः ॥ (अस्य पर्य्यायो यथा,—
"वटो रक्तफलः शृङ्गी न्यग्रोधः स्कन्धजो ध्रुवः ।
क्षीरी वैश्रवणो वासो बहुपादो वनस्पतिः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रक्तफला, स्त्री, (रक्तं पक्वदशायां लोहितवर्णं फलमस्याः ।) बिम्बिका । इत्यमरः । २ । ४ । १३९ ॥ (अस्याः पर्य्यायो यथा —
"तुण्डी रक्तफला बिम्बी तुण्डिकेरी च बिम्बिका ॥"
इति वैद्यकरत्नमालायाम् ॥)
स्वर्णवल्ली । इति राजनिर्घण्टः ॥ (अस्याः पर्य्यायो यथा,—
"स्वर्णवल्ली रक्तफला काकायुः काकवल्लरी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रक्तफेनजः पुं, (रक्तफेनात् जायते इति । जन्+ड ।) वामपार्श्वस्थक्लोम । तत्पर्य्यायः । पुप्फुसः २ । इति हेमचन्द्रः । ३ । २६९ ॥

रक्तबिन्दुः, पुं, (रक्तानां बिन्दुः ।) रक्तकणा । यथा,—
"रक्तबिन्दुर्यदा भूमौ पतत्यस्य शरीरतः ।
समुत्पतति मेदिन्यास्तत्प्रमाणस्तदासुरः ॥"
इति मार्कण्डेये देवीमाहात्म्यम् ॥)

रक्तबीजः, पुं, (रक्तवर्णं बीजमस्य ।) दाडिमः । इति राजनिर्घण्टः ॥ (अरिष्टकवृक्ष । रीठा इति ख्यातः । तत्पर्य्यायो यथा,—
"अरिष्टकस्तु माङ्गल्यः कृष्णवर्णोऽर्थसाधनः ।
रक्तबीजः पीतफेनः फेनिलो गर्भपातनः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
रक्तं शोणितं बीजं कारणमस्य ।) असुरविशेषः । स च शुम्भनिशुम्भसेनापतिः देव्या हतश्च । यथा,—
"पलायनपरान् दृष्ट्वा दैत्यान् मातृभिरर्द्दितान् ।
योद्धुमभ्याययौ क्रुद्धो रक्तबीजो महासुरः ॥
रक्तबिन्दुर्यदा भूमौ पतत्यस्य शरीरतः ।
समुत्पतति मेदिन्यास्तत्प्रमाणस्तदासुरः ॥
युयुधे स गदापाणिरिन्द्रशक्त्या महासुरः ।
ततश्चैन्द्री स्ववज्रेण रक्तबीजमताडयत् ॥
कुलिशेनाहतस्याशु तस्य सुस्राव शोणितम् ।
समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः ॥
यावन्तः पतितास्तस्य शरीराद्रक्तबिन्दवः ।
तावन्तः पुरुषा जातास्तद्वीर्य्यबलविक्रमाः ॥
तथापतस्य बहुधा दलितस्यारिभिर्भुवि ।
पपात यो वै रक्तौघस्तेनासञ्छतशोऽसुराः ॥
तैश्चासुरासृक्सम्भूतैरसुरैः सकलं जगत् ।
व्याप्तमासीत्ततो देवा भयमाजग्मुरुत्तमम् ॥
तान् विषण्णान् सुरान् दृष्ट्वा चण्डिका प्राह सत्वरा ।
उवाच कालीं चामुण्डे विस्तरं वदनं कुरु ॥
मच्छस्त्रपातसम्भूतान् रक्तबिन्दून् महासुरान् ।
रक्तबिन्दोः प्रतीच्छ त्वं वक्त्रेणानेन वेगिता ॥
भक्षयन्ती चर रणे तदुत्पन्नान् महासुरान् ।
एवमेष क्षयं दैत्यः क्षीणरक्तो गमिष्यति ॥
भक्ष्यमाणास्त्वया चोग्रा न चोत्पत्स्यन्ति चापरे ।
इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तम् ॥
मुखेन काली जगृहे रक्तबीजस्य शोणितम् ।
तस्याहतस्य देहात्तु बहु सुस्राव शोणितम् ॥
यतस्ततस्तद्वक्त्रेण चामुण्डा सम्प्रतीच्छति ।
मुखे समुद्गता येऽस्या रक्तपातान्महासुराः ।
तांश्चखादाथ चामुण्डा पपौ तस्य च शोणितम् ॥
देवी शूलेन वज्रेण बाणैरसिभिरृष्टिभिः ।
जघान रक्तबीजं तं चामुण्डापीतशोणितम् ॥
स पपात महीपृष्ठे शस्त्रसङ्घसमाहतः ।
नीरक्तश्च महीपाल रक्तबीजो महासुरः ॥
ततस्ते हर्षमतुलमवापुस्त्रिदशा नृप ।
तेषां मातृगणो जातो ननर्त्तासृङ्मदोद्धतः ॥"
इति मार्कण्डेये देवीमाहात्म्यम् ॥
(महिषासुरपिता दानवो रम्भ एव जन्मान्तरे रक्तबीजो जातः । यथा, देवीभागवते । ५ । २ । ४४—४८ ।
"हतं रम्भं समानीय पश्चात्ते परमं प्रियम् ।
चितायां रोपयामासुस्तस्य देहस्य शुद्धये ॥
महिषी सा पतिं दृष्ट्वा चितायां रोपितं तदा ।
प्रवेष्टुं सा मतिं चक्रे पतिना सह पावकम् ॥
वार्य्यमाणापि सा तैश्च प्रविवेश हुताशनम् ।
ज्वालामालाकुलं साध्वी पतिमादाय वल्लभम् ॥
महिषस्तु चितामध्यात् समुत्पन्नो महाबलः ।
रम्भोऽप्यन्यद्वपुः कृत्वा निःसृतः पुत्रवत्सलः ॥
रक्तबीजोऽप्यसौ जातो महिषोऽपि महाबलः ।
अभिषिक्तस्तु राज्येऽसौ कृपादिरसुरोत्तमैः ॥
एवं स महिषो जातो रक्तबीजश्च वीर्य्यवान् ।
अवध्यस्तु सुरैर्दैत्यैर्मानवैश्च नृपोत्तम ॥")

रक्तबीजका, स्त्री, (रक्तानि रक्तवर्णानि बीजान्यस्याः । कन् + टाप् ।) वटरोहकः । इति राजनिर्घण्टः ॥

रक्तमञ्जरः, पुं, (रक्ता रक्तवर्णा मञ्जरी । सा विद्यते अस्येति । "अर्शआदिभ्य अच् ।" ५ । २ । १२७ । इत्यच् ।) हिज्जलवृक्षः । इति त्रिकाण्डशेषः ॥ (वृक्षोऽयं निचुलशब्दे ज्ञातव्यः ॥)

रक्तमल्लः, पुं, (रक्तो रक्तवर्णो मल्लः ।) रक्तवर्णो मत्स्यविशेषः । यथा —
"भो रक्ताक्षो बा'नदेर्नां च चाण्ने
बा'नक्षुद्रो रक्तमल्ल च दूत ।
प्रीतो रक्षः इ'रक्तैरेवोत्थे
बाहं भक्ते हित रोचनकः ॥"
इति राजनिर्घण्टः ॥

[illegible]

रक्तशीर्षक, पुं, (रक्तं रक्तवर्णं शीर्षं अग्रमस्य। कन्।) सरलद्रवः। इति रत्नमाला।

रक्तशृङ्गिकं, क्ली, विषम्। इति राजनिर्घण्टः।

रक्तसंज्ञं, क्ली (रक्तमिति संज्ञास्य।) कुङ्कुमम्। इति त्रिकाण्डशेषः। (गुणादयोऽस्य कुङ्कुमशब्दे विज्ञेयाः।)

रक्तसन्दंशिका स्त्री (रक्ताय रक्तपानाय सम्यक् दशतीति। दन्श+ण्वुल्। टापि अत इत्वञ्च।) जलौका। इति राजनिर्घण्टः।

रक्तसन्ध्यक, क्ली, ("रक्तं सन्ध्येवेति रघुनाथः। रक्तात् सन्धीन् ध्यायति गच्छति प्राप्नोतीति। कः। इति रायमुकुटभरतमल्लिकौ।") रक्तकह्लारम्। तत्पर्य्यायः। हल्लकम् २। इत्यमरः। १।१ ।३६।

रक्तसरोरुह, क्ली, (रक्तं सरोरुहम्।) रक्तपद्मम्। इत्यमरः। १।१०।४१।

रक्तसर्षप, पुं (रक्तवर्णः सर्षपः।) राजिका। इति राजनिर्घण्टः।

रक्तसहा स्त्री (रक्तं सहते इति। सह+अच्+टाप्।) रक्ताम्लानः। इति राजनिर्घण्टः।

रक्तसार, क्ली, (रक्तवर्णः सारोऽस्य।) रक्तचन्दनम्। (यथास्य पर्य्यायः।
"रक्तचन्दनमाख्यातं रक्ताङ्गं क्षुद्रचन्दनम्।
तिलपर्णं रक्तसारं तत्प्रवालफलं स्मृतम्॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥) पत्तङ्गम्। इति राजनिर्घण्टः। (अस्य पर्य्यायो यथा,—
"पत्तङ्गं रक्तसारञ्च सुरङ्गं रञ्जनं तथा।
पट्टरञ्जकमाख्यातं पत्तूरञ्च कुचन्दनम्॥")
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

रक्तसार, पुं, (रक्तः सारो यस्य।) अम्लवेतसः। रक्तखदिरः। इति राजनिर्घण्टः। (अस्य पर्य्यायो यथा,—
"खदिरो रक्तसारश्च गायत्री दन्तधावनः।
कण्टकी बालपत्रश्च बहुशल्यश्च यज्ञियः॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥ रक्तं सारो यस्येति। शोणितसारयुक्ते, त्रि। यथा, बृहत्संहितायाम्। ६८। ८७।
"ताल्वोष्ठदन्तपालीजिह्वानेत्रान्तपायुकरचरणैः।
रक्तैस्तु रक्तसारा बहुसुखधनदारपुत्रयुताः॥")

रक्तसौगन्धिकं क्ली (रक्तवर्णं सौगन्धिकम्।) रक्तकह्लारम्। इति जटाधरः।

रक्तस्राव पुं, (रक्तं स्रावयतीति। स्रु+णिच्+अच्।) वेतसाम्लः। इति जटाधरः। (रक्तस्य स्रावः।) रक्तपतनम्। (यथा बृहत्संहितायाम्। ८०। ११।
"वक्रो नैरृतभागे रक्तस्रावोऽथ शस्त्रकोपश्च।
अपरादिषमवर्गं विषमे धर्मकारभयम्॥")

रक्तस्रवा स्त्री (रक्ता रक्तीभूता स्रवा यस्य।) राजिकाविशेषः। इति हलायुधः।

रक्ता स्त्री, (रक्त+टाप्।) गुञ्जा। (अस्याः पर्य्यायो यथा —
"रक्ता सा काकचिञ्ची स्यात् काकणन्ती च रक्तिका।
काकादनी काकपीलुः सा स्मृता काकवल्लरी॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥) लाक्षा। मञ्जिष्ठा। उष्ट्रकाण्डी। इति राजनिर्घण्टः।

रक्ताकार पुं, (रक्तवर्ण आकारः अवयवोऽस्य।) प्रवालः। इति राजनिर्घण्टः। (विशेषोऽस्य प्रवालशब्दे विज्ञेयः।)

रक्ताक्तं क्ली, (रक्तेन रक्तवर्णेन अक्तं व्याप्तम्।) रक्तचन्दनम्। इति जटाधरः। शोणितमिश्रिते त्रि।

रक्ताक्ष, पुं, (रक्ते लोहिते अक्षिणी यस्य। "अक्ष्णोऽदर्शनात्।" ५।४।७६। इति अच्।) महिषः। पारावतः। चकोरः। क्रूरः। इति मेदिनी। षे ४४। सारसः। इति राजनिर्घण्टः। (अब्दविशेषः। यथा, बृहत्संहितायाम्। ८। ५१।
"रक्ताक्षमब्दं कथितं तृतीयं
यस्मिन् भयं दंष्ट्रिकृतं गदाश्च॥")
रक्तवर्णचक्षुर्युक्ते त्रि। (यथा, रामायणे। २। ८८। १९।
"कथमिन्दीवरश्यामो रक्ताक्षः प्रियदर्शनः।
सुखभागी न दुःखार्हः शयितो भुवि राघवः॥"
अयञ्च यदा तच्छीयुक्तो भवेत्। यथा, ज्योतिस्सारे।
"न शीघ्रयाति रक्ताक्षि नाथं कनकपिङ्गलम्।
न दीर्घबाहुमैश्वर्यं न सौख्यं प्रचण्डकुशम्॥")

रक्ताङ्ग, क्ली, (रक्तवर्णमङ्गमस्य।) विद्रुमम्। कुङ्कुमम्। इति मेदिनी। गे ४८। (रक्तचन्दनम्। यथा, भावप्रकाशे पूर्ब्बखण्डे प्रथमे भागे।
"रक्तचन्दनमाख्यातं रक्ताङ्गं क्षुद्रचन्दनम्।
तिलपर्णं रक्तसारं तत्प्रवालफलं स्मृतम्॥")

रक्ताङ्ग, पुं, (रक्तमङ्गं यस्य।) मत्कुणः। कम्पिल्लः। इति मेदिनी। गे ४०। (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम्।
"कम्पिल्लकस्तु रक्ताङ्गो गुण्डारोचनिकेति च॥"
"कम्पिल्लः कर्कशश्चन्द्रो रक्ताङ्गो रोचनोऽपि च॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमभागे॥) प्रवालः। मङ्गलः। इति राजनिर्घण्टः। मण्डलम्। इति शब्दरत्नावली। (नागविशेषः। यथा महाभारते। १। ५७। १०।
"अभयो वैणवासाम पिच्छारकमहाहनू।
रक्ताङ्गः शर्वसारङ्गः समृद्धपटवासकौ॥")

रक्ताङ्गी स्त्री (रक्ताङ्ग+ङीष्।) जीवन्ती। इति मेदिनी। गे, ३८। मञ्जिष्ठा। इति भावप्रकाशः।

रक्तातिसार, पुं (रक्तस्य अत्यर्थं सरणम्। सृ+घञ्।) रोगविशेषः। "तस्य लक्षणमाह।
पित्तकृन्तु यदात्यर्थं द्रव्याणि भुङ्क्ते।
तदोपजायते शीघ्रं रक्तातीसार उल्बणः॥'
तस्य चिकित्सा।
'वत्सकफलमाद्रं दाडिमफलसममात्रकम्।
समतुषजलपक्वमाज्यं विपचेद्दाडिमफलिते तोये॥
अष्टमभागं शेषं काथं मधुना पिबेत् पुरुषः।
रक्तातिसारशूलान्यतिप्रबलं नाशयेन्नियतम्॥
इति कुटजदाडिमक्वाथः॥ ०॥
शीतृणनवनीतञ्च मधुना सितया सह।
लीढ़ं रक्तातिसारे तु ग्राहकं परमं मतम्॥
इति नवनीतावलेहः॥ ०॥
पीतं मधुसिताज्युक्तं चन्दनं तण्डुलाम्बुना।
रक्तातिसारजिद्रक्तपित्ततृड्दाहमेहनुत्॥
चन्दनमथ श्वेतम्। इति चन्दनकल्कः॥" इति भावप्रकाशः॥ (तथा च।
"यस्तु रक्तसुविरेचने शोणिताश्मनिरिच्यते।
रक्तातिसार इति विख्यातो वैद्यैर्महामतिभिः॥
धन्वमांसरसस्तस्य च बालकं बालबिल्वकम्।
बलाभागवला चेति क्वाथो रक्तातिसारिणाम्॥
दाडिमञ्च कपित्थञ्च पद्मानन्ताजपल्लवान्।
पिष्ट्वा देया मस्तुयुक्ता रक्तातिसारवारणा॥
गुडेन पक्वं दातव्यं पिष्टं रक्तातिसारिणे।
मधुभिः मधुयुक्ता वा दध्ना रक्तातिसारजा॥
पङ्ककातिविषायवराभया
पैचितञ्च मधुमस्तुसंयुतम्।
लेह एव मधुना च मानुषे
रक्तवाहमति वारयत्यपि॥
कुटजत्वक् च पाठा च बिल्वं विश्वञ्च धातकी।
मधुना सहितं चूर्णं देयं रक्तातिसारिणाम्॥
इति रक्तातिसारः॥" इति हारीते चिकित्सितस्थाने तृतीयेऽध्याये॥)

रक्ताधार पुं (रक्तस्याधारः।) चर्म्म। इति राजनिर्घण्टः।

रक्तापहं, क्ली, (रक्तमपहन्तीति। हन्+ड।) बोलम्। इति राजनिर्घण्टः।

रक्तापामार्ग, पुं (रक्तश्च अपामार्गः।) रक्तवर्णापामार्गक्षुपः। राङ्गा आपाङ् इति बङ्गभाषा। लाल चिरचिरी इति हिन्दी भाषा। तत्पर्य्यायः। क्षुद्रापामार्गः २ आघटकः ३ दुर्ग्रहिका ४ रक्तबिन्दुः ५ वशीरिका ६। अस्य गुणाः। शीतलम्। कटुत्वम्। कफवातव्रणकण्डुविषापहम्। वर्च्चोबन्धकत्वम्। वाजिकारित्वञ्च। इति राजनिर्घण्टः। तत्पर्य्यायगुणाः। अथ श्वेतचिरचिरा।
"दक्षोऽथ शिखरी किणिही खराहुम्भीमार्गाऽपि च।
प्रत्यक्पर्णी केशपर्णी कथिता कपिप्पली॥
अपामार्गोऽपरो वामनोऽपि वक्रारिद्र्म।
कथितः पूर्वदन्तविषहन् कपितो हृक्योंऽपि॥
अपामार्गस्य तु बीजं स्वाद्यं रवि च दुर्जरम्।
विश्वति वामनं कफवातविषघ्नम्॥"
इति भावप्रकाशः॥

रक्ताम्बर, क्ली (रक्तं रञ्जितमम्बरम्।) काषायवस्त्रम्। यथा,—

[illegible]

[illegible]

[illegible]

राजिका। इति राजनिर्घण्टः॥ रक्तिका परिमाणञ्च॥

रक्तेक्षु, पुं (रक्तो रक्तवर्ण इक्षुः।) रक्तवर्णेक्षुः। लाल आक इति भाषा। तत्पर्य्यायः। रक्तपत्र २ शोण ३ लोहित ४ उत्कट ५ मधुर ६ कृष्णक्षुर ७ लोहितेक्षुः ८। अस्य गुणाः। मधुरत्वम्। पाके शीतलत्वम्। वृद्ध्यम्। पित्तदाहहरत्वम्। वृष्यत्वम्। वैशद्यविवद्धनत्वञ्च। इति राजनिर्घण्टः॥

रक्तैरण्ड, पुं, (रक्तवर्ण एरण्डः।) वृक्षविशेषः। लाल भेरण्डा इति भाषा॥ तत्पर्य्यायः। व्याघ्र २ हस्तिकर्ण ३ रुबु ४ उरुबूक ५ नाग कर्ण ६ चञ्चु ७ उत्तानपत्रक ८ करपर्ण ९ पाचन १० स्निग्ध ११ व्याघ्रदल १२ रक्तक १३ चित्रबीज १४ हस्त्येरण्ड १५। अस्य गुणाः। भ्रमपुनरुक्तमारुतरक्तार्त्तिमान्द्याग्नि श्वासज्वरारोचकनाशित्वम्। लघुत्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।

"शुक्ल एरण्ड आमण्डश्चित्रो गन्धर्व्वहस्तकः।
पञ्चाङ्गुलो वर्द्धमानो दीर्घदण्डो व्यडम्बकः॥
रक्तोऽपरो रुबूकः स्याद्रुबूको व्याघ्रस्तथा।
व्याघ्रपुच्छश्च वातारिश्चञ्चुरुत्तानपत्रकः॥
एरण्डयुग्मं मधुरमुष्णं गुरु विनाशयेत्।
शूलशोथकटीवस्तिशिरःपीडोदरज्वरान्॥
ब्रध्नश्वासकफानाहकासकुष्ठाममारुतान्।
एरण्डपत्रं वातघ्नं कफक्रिमिविनाशनम्।
मूत्रकृच्छ्रहरञ्चापि पित्तरक्तप्रकोपणम्॥
वाताग्रपल्लवं गुल्मवस्तिशूलहरं परम्।
कफवातक्रिमीन् हन्ति वृद्धिं सप्तविधामपि॥
एरण्डफलमत्युष्णं गुल्मशूलानिलापहम्।
यकृत्प्लीहोदरार्शोघ्नं कटुकं दीपनं परम्।
तद्वन्मज्जा च विड्भेदी वातश्लेष्मोदरापहः॥"
इति भावप्रकाशः॥

रक्तैलाक, पुं, (रक्त रक्तवर्ण एलाक।) इन्द्र वारुणी। इति राजनिर्घण्टः॥ (विशेषो ऽस्येन्द्रवारुणीशब्दे विज्ञेयः॥)

रक्तोत्पल, क्ली, (रक्तं रक्तवर्णमुत्पलम्।) रक्तपद्मम्। तत्पर्य्यायः। रक्तसरोरुहम् २ कोकनदम् ३। इत्यमरः। १। १०। ४२॥ (यथा, ऋतुसंहारे। २८। ८।
"बिम्बाधरं स्फुटवरैव मौक्तिकं कुङ्कुमं कुड्मलैव।
रक्तोत्पलेन रात्रौ मधौ शीतांशुप्रदीप्ते॥"
तथास्य गुणाः।
"धवल कमलं शीतं मधुरं कफपित्तजित्।
तस्मादल्पगुणं किञ्चिदन्यद्रक्तोत्पलादिकम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

रक्तोत्पल, पुं, (रक्तोत्पलमिव पुष्पमस्यास्ति। अर्शआद्यच्।) शाल्मलिवृक्षः। इति राजनिर्घण्टः॥

रक्तोत्पलाभ, पुं, (रक्तोत्पलस्य आभेव आभा यस्य।) मोचरसः। इति जटाधरः। तद्गुणे, त्रि।

रक्तोपल, क्ली, (रक्तमुपलम्।) गैरिकम्। इति हारावली। ११५॥ (गुणान्योऽस्य गैरिकशब्दे ज्ञेयाः॥)

रक्ष नि पालने। इति कविकल्पद्रुमः॥ (भ्वा पर सक सेट।) नि, रक्षितोऽस्ति। इति दुर्गादासः॥

रक्षः, [स्] क्ली, (रक्ष्यतेऽस्मादिति। रक्ष + "सर्व्वधातुभ्योऽसुन्।" उणा ४। १८८। इति असुन्।) राक्षसः। इत्यमरः। १। १। ६२॥ तद्विशेषो यथा,—
"दृष्ट्वा तु विकृतान् यज्ञानवायान् रोगिणस्तथा
रक्षा न जायते यस्य स रक्षः इति मे मतिः॥"
इत्याग्नेये यमर्षिकोपाख्याननामाध्यायः॥
रक्षोघ्नौषध यथा,—
मनुरुवाच।
"रक्षोघ्नानि विषघ्नानि यानि धार्य्याणि भूभुजा।
अगदानि समाचक्ष्व तानि धर्म्मभृतां वर॥
मत्स्य उवाच।
यष्टिका रोहिणी चैव रक्तमाला महौषधी।
तथामलकवन्दाकं या च चित्रपटोलिका॥
काकोली क्षीरकाकोली पीलुपर्णी तथैव च।
शिंशुमी वृश्चिकाली च महामाषा शतावरी॥
तथा गजपदी च स्यात् कुमारिका तथा।
स्याते चोवृपर्णी या च महाभूमिलता च या।
उन्मादिनी सोमराजी सर्व्वरत्नानि पार्थिव।
विशेषान्मरकताद्यम् कीटपक्षविशेषतः॥
जीवजाताश्च मणयः सर्व्वे धार्य्या विशेषतः।
रक्षोघ्नाश्च यमघ्नाश्च तथा वैतालनाशनाः॥"
इति मात्स्ये २१९ अध्यायः॥

रक्षःसभ, क्ली, (रक्षसां राक्षसानां सभा। क्लीवत्वमभिधानात्।) रक्षःसमूहः। इत्यमरः। २। ५। २१॥

रक्षक, त्रि (रक्षतीति। रक्ष + ण्वुल्।) रक्षाकर्त्ता। यथा,—
"गोरक्षं सहदेवश्च नकुलो ह्यश्वरक्षकः।
वैराटे कृष्णदासो वरानां मातृकक्रम॥"
इति पुराणम्॥

रक्षणं क्ली (रक्ष + भावे ल्युट्।) रक्षा। यथा,
"इति प्रणयबद्धाभिर्गोपीभिः कृतरक्षणम्।
पाययित्वा स्तनं माता सन्न्यवेशयदात्मजम्॥"
इति श्रीभागवते १० स्कन्धे ६ अध्यायः॥

रक्षपाल, पुं, गलकण्डुरोगः। इति शब्दरत्नावली। क्वचित् पुस्तके रक्षोरोगोऽपि पाठः॥

रक्षणि:, स्त्री, त्रायमाणा लता। इति राजनिर्घण्टः॥

रक्षा, स्त्री, (रक्षणमिति। रक्ष + "गुरोश्च हलः।" ३। ३। १०३। इति अः। स्त्रियां टाप्।) रक्षणम्। (यथा कुमारे। २। २८।
"सवितुर्द्दीधितिस्तोकाथा रक्षा सुदर्शनस्तथा॥")
भस्म। इति मेदिनी। ष, १६॥ भस्म। इति शब्दरत्नावली॥ गर्भादिरक्षा रक्षा यथा,—
"रक्षां विदधिरे सम्यक् गोपुच्छभ्रमणादिभिः।
गोमूत्रेण स्नापयित्वा पुनर्गोरजसार्भकम्॥
रक्षां च चक्रुः शकृता द्वादशाङ्गेषु नामभिः।
गोप्यः संस्पृष्टसलिला अङ्गेषु करयोः पृथक्॥
न्यस्यात्मन्यथ बालस्य बीजन्यासमकुर्व्वत॥
अव्यादजोऽङ्घ्रिमणिमांस्तव जान्वथोरू
यज्ञोऽच्युतः कटितटं जठरं हयास्यः।
हृत् केशवस्त्वदुर ईश इनस्तु कण्ठं
विष्णुर्भुजं मुखमुरुक्रम ईश्वरः कम्॥
चक्र्यग्रतः सहगदो हरिरस्तु पश्चात्
त्वत्पार्श्वयोर्धनुरसी मधुहाजनश्च।
कोणेषु शङ्ख उरुगाय उपर्य्युपेन्द्र-
स्तार्क्ष्यः क्षितौ हलधरः पुरुषः समन्तात्॥
इन्द्रियाणि हृषीकेशः प्राणान् नारायणोऽवतु।
श्वेतद्वीपपतिश्चित्तं मनो योगेश्वरोऽवतु॥
पृश्निगर्भस्तु ते बुद्धिमात्मानं भगवान् परः।
क्रीडन्तं पातु गोविन्दः शयानं पातु माधवः॥
व्रजन्तमव्याद्वैकुण्ठ आसीनं त्वां श्रियः पतिः।
भुञ्जानं यज्ञभुक् पातु सर्व्वग्रहभयङ्करः॥
डाकिन्यो यातुधान्यश्च कुष्माण्डा येऽर्भकग्रहाः।
भूतप्रेतपिशाचाश्च यक्षरक्षोविनायकाः॥
कोटरा रेवती ज्येष्ठा पूतना मातृकादयः।
उन्मादा ये ह्यपस्मारा देहप्राणेन्द्रियद्रुहः॥
स्वप्नदृष्टा महोत्पाता वृद्धबालग्रहाश्च ये।
सर्व्वे नश्यन्तु ते विष्णोर्नामग्रहणभीरवः॥"
इति श्रीभागवते १० स्कन्धे ६ अध्यायः॥
अथ पौर्णमास्यां रक्षाबन्धनम्। राखी बान्धा इति भाषा। यथा—
"पौर्णमास्यां हरे रक्षाबन्धनं विधिपूर्व्वकम्।
प्रवरालङ्कारमाल्यैः कैश्चिदिच्छन्ति साधवः॥"
तत्र महान्धिवह्नावे तामतिक्रम्यैव कुर्य्यात्।
तथा च स्कन्दपुराणे।
"भद्रायां द्वे न कर्त्तव्ये श्रावणी फाल्गुनी तथा।
श्रावणी नृपतिं हन्ति ग्रामान् दहति फाल्गुनी॥"
विधिश्च भविष्योत्तरे।
"उपाकर्म्मणि चैवोत्सर्जनीयापेन तथैवम्।
ततोऽपराह्णसमये रक्षापोट्टलिकां शुभाम्॥
कारयेदक्षतैः शस्तैः सिद्धार्थैर्हेमभूषिताम्।
वस्त्रैर्विचित्रैः कार्पासैः क्षौमैर्वा मलवर्ज्जितैः॥
विचित्रं ग्रथितं कृत्वा स्थापयेद्भाजनोपरि।
उपलिप्ते गृहमध्ये दत्तचतुष्के न्यसेच्छुभं पीठम्॥
तस्योपविष्टो राजा आमात्यैः सहितः शुचिः।
ततः पुरोधा नृपते रक्षां बध्नीत मन्त्रेण॥
येन बद्धो बली राजा दानवेन्द्रो महाबलः।
तेन त्वां प्रतिबध्नामि रक्षे मा चल मा चल॥"
देवीपुराणे। यदा यत्र राजपदा दिक्षु तत्रैव भूतानीका भवन्ति मात्रा तदा शङ्खादि सस्त मारदाया दुद्दुभ करीद्रिदेवाभ्य।
"श्रावणे पौर्णमास्यां तु गृहे शान्ति मन्त्रे।
कर्त्तव्यो रक्षाबन्धो विप्रान् सम्पूज्य दाप्तिम॥
कर्त्तव्यं द्वि,प्रपा च तु दीपबाल्यमाचरेत्॥"

८।९।१८। इति काशिकोक्त्या अस्य रत्वम्। रघुशब्दस्य रत्वम्।) सूर्य्यवंशीयदिलीपराजपुत्त्रः। स तु अयोध्याधिपतिः। श्रीरामचन्द्रस्य प्रपितामहः। यथा, रघुः। ३। १८।

"स जातकर्म्मण्यखिले तपस्विना
तपोवनादेत्य पुरोधसा कृते।
दिलीपसूनुर्म्मणिराकरोद्भवः
प्रयुक्तसंस्कार इवाधिकं बभौ॥"

तन्नामव्युत्पत्तिर्यथा —

"श्रुतस्य यायादयमन्तमर्भक-
स्तथा परेषां युधि चेति पार्थिवः।
अवेक्ष्य धातोर्गमनार्थमर्थवि-
च्चकार नाम्ना रघुमात्मसम्भवम्॥"

इति रघुवंशे महाकाव्ये। ३। २१॥

(अस्य पिता दिलीपः माता सुदक्षिणा। अयं हि अश्वमेधयज्ञीयपितस्य पितुर्यज्ञीयाश्वरक्षि नियुक्तस्तत्सहारिणं देवराजं जितवान्। अथ बहुकालं राज्यसुखमनुभूय विश्वजिन्नामाध्वरे सर्व्वं वित्तं ब्राह्मणसात् कृतवानपि गुरुदक्षिणार्थिना वरतन्तुशिष्येण कौत्सेनाभ्यर्थितः कुबेरं विजित्य धनान्याहृत्य तस्मै प्रदत्तवान्। अथ अजमात्मजं यौवराज्येऽभिषिच्य विगतविषयाभिलाषो योगसमाधिना भगवत्सायुज्यमाप्तवान्। तथा च रघुवंशे। ८ सर्गे।

"अथ वीक्ष्य रघुः प्रतिष्ठितं
प्रकृतिष्वात्मजमात्मवत्तया।
विषयेषु विनाशधर्म्मसु
त्रिदिवस्थेष्वपि निःस्पृहोऽभवत्॥"

"अथ काश्चिदजव्यपेक्षया
गमयित्वा समदर्शनः समाः।
तमसः परमापदव्ययं
पुरुषं योगसमाधिना रघुः॥" ●॥

भीमादिवदेकदेशग्रहणे रघुवंशकाव्यम्। यथा

"रघुरपि काव्यं तदपि च पाठ्यं
तस्य च टीका सापि च पाठ्या॥"

एवं "रघौ काव्ये पदे पदे॥" इत्याद्युक्तौ॥ अपि च।

"रङ्घतीति। रघ्रा प्रधुः। तेन 'रघ्रा प्रकृतिरङ्घात्। इति रघुः।" इति उणादिवृत्तौ उज्ज्वलदत्तः। १। १५६॥ ●॥ रघुवंशीयमात्रम्। तत्र बहुवचनान्तः। यथा, रघुवंशे। १। ९।

"रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन्॥"

लङ्घति द्रुतं गच्छतीति। शीघ्रगामिनि, त्रि। यथा ऋग्वेदे। ५। १०। १२।

"अश्वो न वाजी रघुरज्यमानः।"

"रघुः शीघ्रगामी।" इति तद्भाष्ये सायणः।")

रघुकारः, पुं (रघुं तन्नामकं काव्यं करोतीति। कृ + "कर्म्मण्यण्।" ३। २। १। इति अण्।) कालिदासः। इति त्रिकाण्डशेषः॥ (यथा, आर्य्यासप्तशत्याम्। ३५।

"पूर्व्वैर्विभिन्नवर्णा गुणाढ्यभवभूतिबाणरघुकारैः।
वाग्देवीं भक्तता मम धन्य यास्यन्तु को दोषः॥"

यथा च।

"सीमन्तिनी च नलिनी च कुमुद्वती च
चन्द्रप्रभा च रघुकारवचस्वती च।
कान्तेन्दुभिता हिमहता रविरश्मितप्ता
मेघावृता जडधियाभिहता न भाति॥"

रुद्रटः॥)

रघुनन्दनः, पुं, (रघून् रघुवंशसम्भूतान् नन्दयतीति। नन्दि + ल्युः।) श्रीरामः। इति शब्दरत्नावली॥ (यथा रामायणे। १। ५९। १९।

"ततो वशिष्ठो भगवान् कथान्ते रघुनन्दन।
विश्वामित्रमिदं वाक्यमुवाच प्रहसन्निव॥"

वङ्गदेशीयनवद्वीपनिवासी स्मार्त्तः पण्डितविशेषः। स च प्राचीनस्मृतिसंग्रहकर्त्ता। मलमासतत्त्वाद्यष्टाविंशतितत्त्वप्रणेता बन्द्यघटीयश्रीहरिहरभट्टाचार्य्यात्मजः। यथा,—

"प्रणम्य सच्चिदानन्दं परमात्मानमीश्वरम्।
सतीनाथो स्मृतितत्त्वं वक्ति श्रीरघुनन्दनः।
मलिम्लुचे दायभागे संस्कारे शुद्धिनिर्णये।
प्रायश्चित्ते विवाहे च तिथौ जन्माष्टमीव्रते।
दुर्गोत्सवे व्यवहारे एकादश्यादिनिर्णये।
तड़ागभवनोत्सर्गे वृषोत्सर्गव्रते मते।
प्रतिष्ठायां परीक्षायां ज्योतिषे वास्तुयागके।
दीक्षायामाह्निके कृत्ये श्रीपुरुषोत्तमे।
सामश्राद्धे यजुःश्राद्धे शूद्रकृत्यविचारणे।
एवमष्टाविंशतिस्थाने तत्त्वं वक्ष्यामि यत्नतः॥"

इति मलमासतत्त्वम्॥

अपरः पण्डितविशेषः। स च वर्द्धमानप्रदेशान्तर्गतमाकन्दग्रामनिवासी। राढीयश्रेणीकोद्भवः किशोरीमोहनगोस्वामिसूनुः श्रीमन्नित्यानन्दवंशीयगोस्वामी। भागवतसिद्धान्तमञ्जर्य्यादि कृष्णछन्दोमञ्जरीटीकाव्याख्यानकौमुदीकामरश्च पवनप्रभवो बहवो ग्रन्थास्तत्प्रणीताः सन्ति॥)

रघुनाथः, पुं (रघूणां नाथः। सुप्सुपेति समासः।) श्रीरामः। इति शब्दरत्नावली॥ (यथा रघुः। ११। ५६।

"रघुनाथोऽप्यगस्त्येन मार्गसन्दर्शितात्मना।
महौजसा संयुयुजे शरत्काल इवेन्दुना॥")

रघुपतिः, पुं, (रघूणां पतिः।) श्रीरामः। यथा

"यदुपते क्व गता मथुरा पुरी
रघुपते क्व गतोत्तरकोशला।
इति विचिन्त्य कुरुष्व मनः स्थिरं
न सदिदं जगदित्यवधारय॥"

इति रूपगोस्वामी॥

(केचित् पण्डितानां नाम। यथा रघुनाथशिरोमणिः अयन्तु नैयायिकः माथुरोपाध्याय तत्त्वचिन्तामण्यादेष्टीकाकारः। रघुनाथ चक्रवर्त्ती अयममरकोषस्य टीकाकारः। रघुनाथ तर्कवागीशः। रघुनाथ वाचस्पतिः। रघुनाथ दासगोस्वामी। अयं हि श्रीचैतन्यदेवस्य शिष्यस्त्यागीशः। अयमस्त्यादिभक्तिग्रन्थप्रणेता। अयं खलु श्रीचैतन्यदेवस्य सदो- सरसिजाक्षिपर कायस्थकुलभूषण सपुराण स्थितिलाभवृन्दावनितरीते राधाकुण्डे सर्व्वदैव विहाय ध्यानमागमत्। तत्समाधिरघुनाथ तत्रैवास्ते ह्येवं स्थापि बहुभिर्दृश्यते॥)

रघुवंशः, पुं, क्ली, (रघोर्वंशः वर्णनीयत्वेनास्त्यत्र यस्मिन्। यद्वा रघूणां वंशमधिकृत्य कृतमिति अण् लुक् च।) कालिदासकृतरघुराजान्वयवर्णनमहाकाव्यग्रन्थविशेषः। यथा,—

"रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन्।
तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः॥"

इति रघुवंशे महाकाव्ये। १। ९॥

(अथ हि अवनीपजातो वंशः। अथ दिलीपादारभ्य अग्निवर्णपर्य्यन्तं वस्तु वर्णितम्। पुं रघोर्वंशः। यथा,—

"जयति रघुवंशतिलकः कौशल्यानन्दवर्द्धनो
रामः॥"

इति रामायणम्॥)

रघुवंशतिलकः, पुं (रघुवंशे तिलक इव शोभाजनकत्वात्।) श्रीरामः। यथा,—

"जयति रघुवंशतिलकः कौशल्याहृदयनन्दनो
रामः।
दशवदननिधनकारी दाशरथिः पुण्डरीकाक्षः॥"

इति रामायणम्॥

रघुवरः, त्रि, (रघुषु वरः श्रेष्ठः।) रघुवंशीयश्रेष्ठः। यथा, रामायणे।

"रामं लक्ष्मणपूर्व्वजं रघुवरं सीतापतिं सुन्दरं
काकुत्स्थं करुणामयं गुणनिधिं विप्रप्रियं
धार्म्मिकम्॥"

रघूद्वहः, पुं (उद्वहतीति। उत् + वह् + अच्। रघूणां उद्वहः रघुवंशधारकः।) श्रीरामः। इति शब्दरत्नावली॥

रङ्कः, पुं (रमते तुष्यतीति। रम् + "बाहुलकात् रमेरपि कः।" इति कः। उज्ज्वलदत्तः। ३। ४०।) कृपणः। मन्दः। इति मेदिनी। के, ११॥

रङ्कुः, पुं (रमते इति। रम् + बाहुलकात् कुः।) मृगविशेषः। इत्यमरः। २। ५। १०॥ स तु प्रवरशृङ्गाकृतिः। इति राजनिर्घण्टः॥

रङ्गं क्ली पुं (रज्यतेऽनेनेति। रञ्ज + घञ्। रज्यते अस्मिन्। रञ्ज + अधिकरणे घञ् वा।) धातुविशेषः। रांग इति भाषा। तत्पर्य्यायः। वङ्गः २ नागम् ३ आपुषम् ४ वङ्गम् ५ मधुरम् ६ हिमम् ७ गुरुपत्रम् ८ पिच्चटम् ९ पूतिगन्धम् १०। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। हिमत्वम्। कषायत्वम्। लवणत्वम्। मेहघ्नत्वम्। कृमिनाशकत्वम्। कान्तिकरत्वम्। रसायनत्वम्। तद्दोषो यथा —

"वीर्य्यं मदं वपु क्षयं किलासकुष्ठं विषम्।
सुचपलं कार्श्यं वातरोगादिकम्।
दुरङ्गे निजकरोति विधिं बहुधा
दुर्नामं गुरुं तथ निर्दग्धं न शुद्धं भवेत्॥"

इति राजनिर्घण्टः॥

स सर्व्वदोषरहितः सुखं वत्सरं वसेदिति ।”
अथ तद्दिननिर्णयार्थं उपाकर्म्माग्निनिर्णयः क्रियते । यदाह स्मृत्यन्तरे ।
“उपाकर्म्म तु कुर्व्वन्ति ते सामगयजुर्व्विदः ।
ग्रहणक्रान्तियुक्तेषु हस्तश्रवणपर्व्वसु ॥”
तथा च । सामवेदिनां भाद्रस्य हस्तायुक्तस्य ऋग्वेदिनां श्रावणस्य श्रवणयुक्तस्य यजुर्व्वेदिनां श्रावणी पूर्णिमोपाकर्म्मकालः । उपक्रमकल्पिता कौमेर्नष्टस्य कर्म्म उपाकर्म्म । अथ करणाभावे भाद्रे श्रावणेऽपि विधेयम् ।
“अस्तगोऽपि च यत्र स्मिन् मासि न हि भवन्ति तेन् ।
सदा भाद्रपदे मासि श्रावणेऽपि तदिष्यते ॥”
इति बह्वृचपरिशिष्टवचनात् ।
श्रावणपञ्चम्यनुकल्पः । तथाह गर्गः ।
‘यदि स्यात् श्रावणं पर्व्व ग्रहसंक्रान्तिदूषितम् ।
स्यादुपाकरणं शुक्लपञ्चम्यां श्रावणस्य च ॥” इति ।
अत्र भूतविद्धा पूर्णिमा च निषिद्धा । तथा च कालिकापुराणे ।
“चतुर्द्दश्यां यदा पूर्णा आसुरौ मधुकैटभौ ।
वेदान् श्रीकृष्णस्य प्रबोधकौ जग्मतुः श्रुतौ ॥
तत्ता तावसुरौ देव पातालतलवासिनौ ।
आहृता ता श्रुतीश्चक्रे हरो लोकगुरुः स्वयम् ॥
स प्राप्तवान् श्रुतीर्ब्रह्मा पर्व्वण्यौदयिके पुनः ।
अतो भूतयुते सम्यक्तोपाकरणमिष्यते ।
आसुरं वर्ज्जयेत् कालं वेदोपकरणस्य तु ॥”
बाधोऽपि ।
“श्रवणेन तु यत् कर्म्म उत्तराषाढसंयुतम् ।
संवत्सरकृतोऽध्यायस्तत्क्षणादेव नश्यति ॥
धनिष्ठासंयुतं कुर्य्याच्छ्रावणं कर्म्म यद्भवेत् ।
तत् कर्म्म सफलं विद्यादुपाकरणसंज्ञितम् ॥”
इति श्रीहरिभक्तिविलासे १९ विलासः ।
(रक्षाकर्म्म यथा । उदकुम्भावृतो यथोक्ता घोषयन् रक्षाकर्म्म कुर्य्यात् तद्यथा ।
“लक्ष्म्या प्रतिपाद्यार्थं तथा रक्षोभयस्य च ।
रक्षाकर्म्म करिष्यामि ब्रह्मा तदनुमन्यताम् ॥
नागाः पिशाचा गन्धर्व्वाः पितरो यक्षराक्षसाः ।
अभिद्रवन्ति ये ये त्वां ब्रह्माद्या घ्नन्तु तान् सदा ॥
पृथिव्यामन्तरीक्षे च ये चरन्ति निशाचराः ।
दिक्षु वास्तुनिवासाश्च पान्तु त्वां ते नमस्कृताः ॥
पान्तु त्वां मुनयो ब्राह्म्यो दिव्या राजर्षयस्तथा ।
पर्व्वताश्चैव नद्यश्च सर्व्वाः सर्व्वेऽपि सागराः ॥
अग्नी रक्षतु ते जिह्वां प्राणान् वायुस्तथैव च ।
सोमो व्यानमपानन्ते पर्ज्जन्यः परिरक्षतु ॥
उदानं विद्युतः पान्तु समानं स्तनयित्नवः ।
बलमिन्द्रो बलपतिर्मनुर्मन्ये मतिन्तथा ॥
कामांस्ते पान्तु गन्धर्व्वाः सत्वमिन्द्रोऽभिरक्षतु ।
प्रज्ञान्ते वरुणो राजा समुद्रो नाभिमण्डलम् ॥
चक्षुः सूर्य्यो दिशः श्रोत्रे चन्द्रमाः पातु ते मनः ।
नक्षत्राणि सदा रूपं छायां पान्तु निशास्तव ॥
रेतस्त्वाप्याययन्त्वापो रोमाण्योषधयस्तथा ।
आकाशं खानि ते पातु देहन्तव वसुन्धरा ॥
वैश्वानरः शिरः पातु विष्णुस्तव पराक्रमम् ।
पौरुषं पुरुषश्रेष्ठो ब्रह्मत्वानं ध्रुवो भ्रुवौ ॥
एता देहे विशेषेण तव नित्या हि देवताः ।
एतास्त्वां सततं पान्तु दीर्घमायुरवाप्नुहि ॥
स्वस्ति ते भगवान् ब्रह्मा स्वस्ति देवाश्च कुर्व्वताम् ।
स्वस्ति ते चन्द्रसूर्य्यौ च स्वस्ति नारदपर्व्वतौ ॥
स्वस्त्यग्निश्चैव वायुश्च स्वस्ति देवाः सहेन्द्रगाः ।
पितामहकृता रक्षा स्वस्त्यायुर्व्वर्द्धतां तव ॥
ईतयस्ते प्रशाम्यन्तु सदा भव गतव्यथः ॥”
इति वाच्या ।
एतैर्व्वेदानुगैर्म्मन्त्रैः कृत्वा व्याधिविनाशनैः ।
मयैवं कृतरक्षस्त्वं दीर्घमायुरवाप्नुहि ॥”
इति सुश्रुते कल्पस्थाने पञ्चमेऽध्याये ॥)

रक्षापत्र, पुं (रक्षार्थं पत्रमस्य ।) भूर्ज्जवृक्षः । इति राजनिर्घण्टः । भूर्ज्जेऽपि, क्ली ।

रक्षिका, स्त्री, (रक्षैव । रक्षा + स्वार्थे कन् । टापि अत इत्वम् ।) रक्षा । यथा,—
“अनेन विधिना यस्तु रक्षिकाबन्धमाचरेत् ।
स सर्व्वदोषरहितः सुखं वत्सरं वसेत् ॥”
इति हरिभक्तिविलासे १४ विलासः ॥

रक्षित, त्रि (रक्ष + क्त ।) कृतरक्षणम् । तत्पर्य्यायः । त्रातम् २ त्राणम् ३ अवितम् ४ गोपायितम् ५ गुप्तम् ६ । इत्यमरः । ३ । १ । १०६ ॥ (यथा, मनुः । ११ । २३ ।
“कल्पयित्वास्य वृत्तिञ्च रक्षेदेनं समन्ततः ।
राजा हि धर्म्मषड्भागं तस्मात् प्राप्नोति रक्षितात् ॥”
स्त्री, भावे क्त । रक्षा । * । स्त्रियां टाप् । अप्सरोविशेषः । यथा, महाभारते । १ । ६५ । ५० ।
“अलम्बुषा मिश्रकेशी विद्युत्पर्णा तिलोत्तमा ।
अरुणा रक्षिता चैव रम्भा तद्वन्मनोरमा ॥”)

रक्षिता, [ऋ] त्रि, (रक्षतीति । रक्ष + तृच् ।) रक्षाकर्त्ता । यथा,—
“आयव्ययज्ञो लोकज्ञो देशोत्पत्तिविशारदः ।
कृताकृतज्ञो भृत्यानां ज्ञेयः स्यादेव रक्षिता ॥”
इति मात्स्ये १८९ अध्यायः ॥

रक्षिवर्ग, पुं, (रक्षिणां वर्गः समूहः ।) राजाद्ध्यक्षकः । तत्पर्य्यायः । अनीकस्थः २ । इत्यमरः । २ । ८ । ६ ॥

रक्षोघ्न, क्ली (रक्षो राक्षसं हन्तीति । हन् + टक् ।) काञ्जिकम् । इति हेमचन्द्रः । हिङ्गु । इति राजनिर्घण्टः ॥

रक्षोघ्न पुं, (रक्षो हन्तीति । हन् + टक् ।) भल्लातकवृक्षः । इति त्रिकाण्डशेषः । श्वेतसर्षपः । इति रत्नमाला । रक्षोघ्नमन्त्रो यथा,—
“स्थाने हृषीकेश तव प्रकीर्त्त्या
जगत् प्रहृष्यत्यनुरज्यते च ।
रक्षांसि भीतानि दिशो द्रवन्ति
सर्व्वे नमस्यन्ति च सिद्धसङ्घाः ॥”
इति भगवद्गीतायाम् । ११ । ३६ ॥
“स्थाने युक्तमित्यर्थः । हे हृषीकेश सर्व्वेन्द्रियप्रवर्त्तक यतस्त्वमेवमद्भुतप्रभावो भक्तवत्सलश्च ततस्तव प्रकीर्त्त्या प्रकृष्टया कीर्त्त्या निरतिशयप्राप्तोदयस्य कीर्त्तनेन अत्र जगत् न केवलमहमेव प्रहृष्यामि किन्तु सर्व्वमेव जगत् आर्त्तिमदभाव रक्षोविरोधि प्रहृष्यति प्रकृष्टं हर्षमाप्नोति इति यत् तत् स्थाने युक्तमित्यर्थः । तथा सर्व्वं जगत् अनुरज्यते च प्रीतिमुपैति इति च यत्तदपि युक्तमेव । तथा रक्षांसि भीतानि सन्ति दिशो द्रवन्ति सर्व्वासु दिक्षु पलायन्त इति यत्तदपि युक्तमेव । तथा सर्व्वेषां सिद्धानां कपिलादीनां सङ्घा नमस्यन्ति चेति यत्तदपि युक्तमेव । सर्व्वत्र तव प्रकीर्त्त्या इत्यन्वयः स्थाने इत्यस्य च । अयं श्लोको रक्षोघ्नमन्त्रत्वेन मन्त्रशास्त्रे प्रसिद्धः ।” इति तट्टीकायां मधुसूदनसरस्वती ॥ (रक्षोविनाशकृत्, त्रि । यथा सुश्रुते । १ । ५ । “वेश्मनो रक्षोघ्नैर्धूपैर्धूपयेद्रक्षोघ्नैश्च मन्त्रै रक्षां कुर्व्वीत ।”)

रक्षोघ्नी स्त्री, (रक्षो हन्तीति । हन् + टक् । ङीप् ।) वचा । इति रत्नमाला ।

रक्षोजननी स्त्री, (रक्षसां जननीव ।) रात्रिः । इति त्रिकाण्डशेषः । शब्दमाला च ॥

रक्षोहा, [न्] पुं, (रक्षो हन्तीति । हन् + क्विप् ।) गुग्गुलु । इति राजनिर्घण्टः ॥ (ऋषिविशेषः । स तु ऋग्वेदस्य १० मण्डलस्य १६२ सूक्तस्य ऋषिः ।) राक्षसहन्तरि, त्रि । यथा, ऋग्वेदे । १० । ८७ । ६ ।
‘विप्र न उच्यते मिथश्चोदा मीवचातनः ।”
“रक्षोहा रक्षोहन्ता ।” इति तद्भाष्ये सायणः ।)

रक्ष्य, पुं (रक्ष + “पदयाचमदविक्षयवरसो मत् ।” ३ । ३ । ९८ । इति मत् ।) पालनम् । इत्यमरः । ३ । ५ । ८ ॥

रख, सर्पणे । इति कविकल्पद्रुमः ॥ (भ्वा० पर० सक० सेट् ।) रखति । इति दुर्गादासः ॥

रखि, इ गत्यर्थे । इति कविकल्पद्रुमः ॥ (भ्वा० पर० सक० सेट् ।) इ, रङ्खति । इति दुर्गादासः ॥

रगि, इ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा० पर० सक० सेट् ।) इ, रङ्गति । इति दुर्गादासः ॥

रग, क स्वादे आपने । इति कविकल्पद्रुमः ॥ (चुरा० पर० -सक० अक० च सेट् ।) क, रागयति । इति दुर्गादासः ॥

रग म घ शङ्के । इति कविकल्पद्रुमः ॥ (भ्वा० पर० अक० सेट् ।) म, रगयति । घ, अरगीत् । शङ्कू शङ्का । रगति लोको शुपस्नेभ्यः । इति दुर्गादासः ॥

रघि, इ क भासि । इति कविकल्पद्रुमः ॥ (चुरा० पर० अक० सेट् ।) इ क, रङ्घयति । भाति दीप्तौ । इति दुर्गादासः ॥

रघि, इ ङ गमने । इति कविकल्पद्रुमः ॥ (भ्वा० आत्म० सक० सेट् ।) इ, रङ्घते । ङ, रघते । इति दुर्गादासः ॥

रघु, पुं (लङ्घति ज्ञानसीमां प्राप्नोतीति । लघि + “लङ्घिबंह्योर्नलोपश्च ।” उणा० १ । ३० । इति कुः नलोपश्च । “[illegible] रघुमारद्व इति बल्लवम् ।”

८।२।१८। इति काशिकोक्त्या अस्य रत्वम्। रघुवज्वलदत्तः।) सूर्य्यवंशीयदिलीपराजपुत्रः। स तु अयोध्याधिपतिः। श्रीरामचन्द्रस्य प्रपितामहः। यथा, रघुः। ३।१८।

"स जातकर्म्मण्यखिले तपस्विना
तपोवनादेत्य पुरोधसा कृते।
दिलीपसूनुर्म्मणिराकरोद्भवः
प्रयुक्तसंस्कार इवाधिकं बभौ॥"

तन्नामव्युत्पत्तिर्यथा —

"श्रुतस्य यायादयमन्तमर्भक-
स्तथा परेषां युधि चेति पार्थिवः।
अवेक्ष्य धातोर्गमनार्थमर्थवि-
च्चकार नाम्ना रघुमात्मसम्भवम्॥"

इति रघुवंशे महाकाव्ये। ३।२१॥

(अस्य पिता दिलीपः माता सुदक्षिणा। अयं हि अश्वमेधयज्ञदीक्षितस्य पितुरश्वीयाश्वरक्षणे नियुक्तस्तमश्वहारिणं देवराजं जितवान्। अथ बहुकालं राज्यसुखमनुभूय विश्वजिन्नामाध्वरे सर्व्वं वित्तं ब्राह्मणसात् कृतवानपि गुरुदक्षिणार्थिना वरतन्तुशिष्येण कौत्सेनाभ्यर्थितः कुबेरं विजित्य धनान्याहृत्य तस्मै प्रदत्तवान्। अथ अजमात्मजं यौवराज्येऽभिषिच्य विगतविषयाभिलाषो योगसमाधिना भगवत्सायुज्यमाप्तवान्। तथा च रघुवंशे। ८ सर्गे।

"अथ वीक्ष्य रघुः प्रतिष्ठितं
प्रकृतिष्वात्मजमात्मवत्तया।
विषयेषु विनाशधर्म्मसु
त्रिदिवस्थेष्वपि निःस्पृहोऽभवत्॥"
"अथ काश्चिदजव्यपेक्षया
गमयित्वा समदर्शनः समाः।
तमसः परमापदव्ययं
पुरुषं योगसमाधिना रघुः॥" ०।

श्रीमाधवदेवकृदेशपदवी रघुवंशकाव्यम्। यथा

"रघुरपि काव्यं तदपि च पाठ्यम्
तस्य च टीका साऽपि च पाठ्या॥"

एवं "रघौ काव्यपदे पदे॥" इत्युद्भटौ। अपि च।

"रङ्घयतीति। राजा प्रभुः। येन 'राजा प्रकृतिरञ्जनात्। इति रघुः।" इति उणादिवृत्तौ उज्ज्वलदत्तः। १। २९। ०। रघुवंशीयमात्रम्। तत्र बहुवचनान्तः। यथा, रघुवंशे। १।९।

"रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन्॥"

लङ्घति द्रुतं गच्छतीति। शीघ्रगामिनि त्रि। यथा ऋग्वेदे। ५।२।१४।

"अश्वो न वाजी रघुरज्यमानः।"
"रघुः शीघ्रगामी।" इति तद्भाष्ये सायणः॥)

रघुकार, पुं (रघुं तदाख्यं काव्यं करोतीति। कृ+"कर्म्मण्यण्।" ३।२।१। इति अण्।) कालिदासः। इति त्रिकाण्डशेषः। (यथा, आर्य्यासप्तशत्याम्। ३५।

"पूर्व्वैर्विभिन्नवर्णां गुणाढ्यभवभूतिवाणरघुकारैः।

वागदेवीं भजतो मम सन्तु पदस्य को दोषः॥"

यथा च।

"सौमित्रिर्नो च भक्तो च कुमुदती च
चन्द्रप्रभा च रघुकारसरस्वती च।
कान्तोनभिज्ञा हिमवता रविरश्मितप्ता
मेघावृता कदलिकाभिहता न भाति॥"

उद्भटः।)

रघुनन्दन, पुं, (रघून् रघुवंशप्रभूतान् नन्दयतीति। नन्दि+ल्युः।) श्रीरामः। इति शब्दरत्नावली॥ (यथा रामायणे। १।१९।१२।

"ततो वसिष्ठो भगवान् कथान्ते रघुनन्दन।
विश्वामित्रमिदं वाक्यमुवाच प्रहसन्निव॥"

वङ्गदेशीयनवद्वीपनिवासी स्मार्त्तपण्डितविशेषः। स च प्राचीनस्मृतिसंग्रहकर्त्ता। मलमासतत्त्वाद्यष्टाविंशतितत्त्वप्रणेता वन्द्यघटीयश्रीहरिहरभट्टाचार्य्यात्मजः। यथा,—

"प्रणम्य सच्चिदानन्दं परमात्मानमीश्वरम्।
सुधीनां स्मृतितत्त्वं वक्ति श्रीरघुनन्दनः।
मलिम्लुचे दायभागे संस्कारे शुद्धिनिर्णये।
प्रायश्चित्ते विवाहे च तिथौ जन्माष्टमीव्रते।
दुर्गोत्सवे व्यवहारे एकादश्यादिनिर्णये।
तडागभवनोत्सर्गे वृषोत्सर्गव्रते मठे।
प्रतिष्ठायां परीक्षायां ज्योतिषे वास्तुयागके।
दीक्षायामाह्निके कृत्ये क्षेत्रे श्रीपुरुषोत्तमे।
सामश्राद्धे यजुःश्राद्धे शूद्रकृत्यविचारके।
इत्यष्टाविंशतिस्थाने तत्त्वं वक्ष्यामि यत्नतः॥"

इति मलमासतत्त्वम्॥

अपरः पण्डितविशेषः। स च वर्द्धमानप्रदेशान्तर्गतमाकन्दग्रामनिवासिनः राढीयश्रेणीस्थकिशोरीमोहनगोस्वामिनस्तु श्रीमन्नित्यानन्दवंशीयगोस्वामी। भागवतसिद्धान्तमञ्जर्य्यादिग्रन्थच्छन्दोमञ्जरीटीकाव्याख्यानकौमुदीनामकाः प्रभृतयो बहवो ग्रन्थास्तत्प्रणीताः सन्ति।)

रघुनाथ, पुं (रघूणां नाथः। सुमृदिमान् यथा भावः।) श्रीरामः। इति शब्दरत्नावली॥ (यथा रघुः। ११।१३।

"रघुनाथोऽप्यगस्त्येन मार्गसन्दर्शितात्मना।
महौजसा संयुयुजे शरत्काल इवेन्दुना॥")

रघुपति, पुं, (रघूणां पतिः।) श्रीरामः। यथा

"यदुपतेः क्व गता मथुरा पुरी
रघुपतेः क्व गतोत्तरकोशला।
इति विचिन्त्य कुरुष्व मनः स्थिरं
न सदिदं जगदित्यवधारय॥"

इति रूपगोस्वामी॥

(केषाञ्चित् पण्डितानां नाम। यथा, रघुनाथशिरोमणिः अयन्तु नैयायिकः माणिक्योपाध्यायकृततत्त्वचिन्तामणिटीकाकारः। रघुनाथचक्रवर्त्ती अयममरकोषस्य टीकाकारः। रघुनाथतर्कवागीशः। रघुनाथसरस्वती। रघुनाथदासगोस्वामी। अयं हि श्रीचैतन्यदेवस्य प्रियभक्त आसीत्। अत्रास्त्यादिग्रन्थप्रणेता। अयं प्रभुश्रीचैतन्यचन्द्रस्य पदौ हरिदासाचार्य्यः आयस्त्रकुलभूषण मथुरायां वृन्दावनगिरितटे राधाकुण्डे मनोऽभिनिविश्य समाधिमागमत्। तत्समाधिरद्यापि तत्रैवाद्वैते दृश्यतेऽद्यापि बहुभिर्दृश्यते।)

रघुवंश, पुं, क्ली, (रघोर्वंशः अन्वयः तच्चरितानि यत्र। यथा रघूणां वंशमधिकृत्य कृतमिति अण् लुक् च।) कालिदासकृतरघुराजान्वयवर्णनमहाकाव्यग्रन्थविशेषः। यथा,—

"रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन्।
तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः॥"

इति रघुवंशे महाकाव्ये। १।९॥

(अयं हि ऊनविंशतिसर्गात्मको ग्रन्थः। अत्र दिलीपादारभ्य अग्निवर्णपर्य्यन्तं वस्तु वर्णितम्।) पुं रघोर्वंशः। यथा,—

"जयति रघुवंशतिलकः कौशल्यानन्दिवर्द्धनो
रामः॥"

इति रामायणम्।)

रघुवंशतिलक, पुं (रघुवंशे तिलक इव शोभाजनकत्वात्।) श्रीरामः। यथा,—

"जयति रघुवंशतिलकः कौशल्यानन्दिवर्द्धनो
रामः।
दशवदननिधनकारी दाशरथिः पुण्डरीकाक्षः॥"

इति रामायणम्॥

रघुवर, त्रि, (रघुषु वरः श्रेष्ठः।) रघुवंशीयश्रेष्ठः। यथा, रामायणे।

"रामं लक्ष्मणपूर्व्वजं रघुवरं सीतापतिं सुन्दरं
काकुत्स्थं करुणामयं गुणनिधिं विप्रप्रियं
धार्म्मिकम्॥"

रघूद्वह, पुं (उद्वहतीति। उत्+वह+अच्। रघूणां उद्वहः रघोभारधारकः।) श्रीरामः। इति शब्दरत्नावली॥

रङ्क, पुं, (रमते गुप्यतीति। रम्+"बाहुलकात् रमेरपि कः।" इति कः। उज्ज्वलदत्तः। ३।४।) कृपणः। मन्दः। इति मेदिनी। के, ११॥

रङ्कु पुं (रमते इति। रम्+बाहुलकात् कुः।) मृगविशेषः। इत्यमरः। २।५।१०॥ स तु पृषतहरिणः। इति राजनिर्घण्टः॥

रङ्ग क्ली पुं (रज्यतेऽनेनेति। रञ्ज+घञ्। रज्यतेऽस्मिन्निति। रञ्ज+अधिकरणे घञ् वा।) धातुविशेषः। राङ् इति भाषा। तत्पर्य्यायः। मृदु १ त्रपुषम् २ आपूषम् ३ नागम् ४ मधुरम् ५ हिमम् ६ कुरूप्यम् ७ पिच्चटम् ९ पूतिगन्धम् १०। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। हिमत्वम्। कषायत्वम्। लवणत्वम्। मेहघ्नत्वम्। कृमिवातरोगदमनम्। कान्तिकरत्वम्। रेचकत्वञ्च। तद्विशेषो यथा,—

"खुरं मिश्रकञ्चेति द्विविधं रङ्गमुच्यते।
शुभ्रं खुरकं तत्र मिश्रकं श्यामशुभ्रकम्।
सुरसं स्निग्धमृदुलं लघु शीतं प्रचक्षते।
उत्तमं खुरकं तत्र मिश्रकं न प्रशस्यते॥"

इति राजनिर्घण्टः॥

वङ्गस्य शोधमाह ।

"वङ्गो विधत्ते खलु मुष्टियोग
स्तथा रूपकञ्च क्रिलासगुल्मौ ।
कुष्ठानि नूनं किल वातरोग
पाण्डुं प्रमेहञ्च भगन्दरञ्च ॥
विशोधितं रङ्गविकारहन्तृ
पापञ्च रुक्क्षाणि कफज्वरञ्च ।
मेहाश्मरीविद्रधिगुल्मरोगान्
नानाऽपि कुर्यात् कथितान् विकारान् ॥"

तस्य शोधनमभिधीयते ।

"वङ्गनागौ प्रतप्तौ च गलितौ तौ निषेचयेत् ।
त्रिधा त्रिधा विशुद्धिः स्यात्तद्विशुद्धेऽपि च
त्रिधा ।
तैलतक्रकाञ्जिकगोमूत्रकुलत्थक्वाथेषु प्रत्येकं त्रिधा
त्रिधा । ततोऽर्कदुग्धे त्रिधा ॥ * ॥

अथ वङ्गस्य मारणविधि ।

"मृत्पात्रे द्राविते वङ्गे चिञ्चाश्वत्थत्वचो रजः ।
क्षिप्त्वा वङ्गचतुर्थांशमयोदर्व्या प्रचालयेत् ॥"
(चिञ्चा अम्लिका । तन्त्रडूलम् । अयोदर्वी कर
छुली ।

'ततो द्वियाममात्रेण वङ्गं भस्म प्रजायते ।
अथ भस्मसमं तालं क्षिप्त्वाम्लेन विमर्द्दयेत् ॥
ततो गजपुटे पक्त्वा पुनरम्लेन मर्द्दयेत् ।
तालेन दशमांशेन याममेकं ततः पुटेत् ।
एवं दशपुटैः पक्वं वङ्गं भवति मारितम् ॥"

अथ मारितस्य वङ्गस्य गुणाः ।

"वङ्गं लघु सरं रूक्षं कुष्ठमेहकफक्रिमीन् ।
निहन्ति पाण्डुं सश्वासं नेत्र्यमीषत्तु पित्तलम् ॥
सिंहो गजौघन्तु यथा निहन्ति
तथैव वङ्गोऽखिलमेहवर्गम् ।
देहस्य सौख्यं प्रबलेन्द्रियत्वं
नरस्य पुष्टिं विदधाति नूनम् ॥
इति भावप्रकाशः ॥

(अपाच ।

"वङ्गं तिक्ताम्लकं रूक्षं किञ्चिद्वातप्रकोपणम् ।
मेदःश्लेष्मामयघ्नञ्च क्रिमिघ्नं मेहनाशनम् ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे
जारणमारणाधिकारे ॥)

रङ्ग, पुं, (रञ्ज + घञ् ।) रागः । (यथा, महा
भारते । ५ । ३६ । १० ।
"यथा यथा रङ्गवश प्रयाति
तथा च वैर्वा बहुमभ्युपैति ॥")
नृत्यम् । (यथा विष्णुपुराणे । ५ । ६ । २० ।
"रङ्गोपजीवी कैवर्त्तः कुम्भाड्यो नरदक्षणाः ।
सुचीमाद्विविकश्चैव चर्म्मकारो च यो द्विजः ॥"
रज्यति अत्यासक्ति मनोऽत्र । रञ्ज + अधि
करणे घञ् ।) रणभूमिः । इति मेदिनी । गे
७९ । (यथा श्रीमद्भागवते । १० । ३३ । १७ ।
"इत्थीर्ज्जा परुषवसतिं विदितो रङ्गं गत
सानुजः ॥")
नाट्यस्थानम् । इति हेमचन्द्रः । (यथा
मन्दरादिकप्रकरणे । १ ।

"इदं रङ्गमनेनेन कलाकारेणोपस्थिता ।
वस्त्रगायक्लिन्नत्वेन प्रस्तरेष्वप्ययाचिता ॥"
सत्वमया गात्रस्थानस्थितो जनः । यथा, अभि
ज्ञानशकुन्तले १ प्रस्तावनायाम् ।
"सूत्रधारः । आर्य्ये ! साधु गीतम् । अहो
रागापहृतचित्तवृत्तिरालिखित इव विभाति
सर्वतो रङ्गः । तदिदानीं कतमं प्रयोगमाश्रित्यै
नमाराधयाम ।" रागमार्गः । यथा, देवी
भागवते । ७ । ३९ । ३ ।
"अयतामिं तदा रङ्गे तौ मार्य्यौ पुष्पधन्वनः ॥")
टङ्कणः । क्षारविशेषः । इति राजनिर्घण्टः ॥

रङ्गकाष्ठ, क्ली, (रङ्गं रञ्जनं काष्ठमस्य ।) पत्त
ङ्गम् । इति राजनिर्घण्टः ॥

रङ्गज, क्ली, (रङ्गात् जायते इति । जन् + ड ।)
सिन्दूरम् । इति रत्नमाला ॥

रङ्गजीवक, पुं, (रङ्गेण रञ्जनकार्य्येण जीवतीति ।
जीव् + ण्वुल् ।) चित्रकारः । इति शब्द
रत्नावली ॥ भाष्यकारश्च ॥

रङ्गद, पुं, (रङ्गं ददाति छिनत्तीति । दो + क ।)
टङ्कणः । क्षारविशेषः । इति राजनिर्घण्टः ॥

रङ्गदा, स्त्री, (रङ्गद + टाप् ।) स्फटी । इति
राजनिर्घण्टः ॥ (तथास्याः पर्य्यायः ।
"स्फटी च स्फटिका प्रोक्ता श्वेता शुभ्रा च रङ्गदा ।
रङ्गदृढा रङ्गदा च दृढा रङ्गापि कथ्यते ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रङ्गदायक, क्ली, (रङ्गस्य दायकम् ।) कङ्कुष्ठम् ।
इति राजनिर्घण्टः ॥

रङ्गदृढा, स्त्री, (रङ्गेषु दृढा ।) स्फटी । इति
राजनिर्घण्टः ॥

रङ्गपत्री, स्त्री, (रङ्गं रङ्गार्थं पत्रमस्याः । ङीष् ।)
नीलीवृक्षः । इति राजनिर्घण्टः ॥

रङ्गपुष्पी, स्त्री, (रङ्गं रञ्जनं पुष्पमस्याः ।)
नीलीवृक्षः । इति राजनिर्घण्टः ॥

रङ्गबीज, क्ली, (रङ्गं बीजं उत्पत्तिकारणमस्य ।)
रूप्यम् । इति शब्दरत्नावली ॥

रङ्गभूतिः, स्त्री, (रङ्गस्य रागस्य गीतादेः भूतिः
प्रभावः ।) कोजागरपूर्णिमा । इति शब्द
रत्नावली ॥

रङ्गभूमिः, स्त्री, (रङ्गस्य भूमिः ।) मल्लभूमिः । इति
शब्दरत्नावली ॥ (यथा, महाभारते । १ । १३४ । ८ ।
"अथपुष्टे समाजे च तस्मिन् बहुतो वरः ।
रङ्गभूमौ सुविपुलं शास्त्रदृष्टं यथाविधि ॥"
रङ्गभूमिविवरणं यथा, आर्य्यावर्त्ते । ७ । ११ । १२ ।
"मान्दी सुकठिनाश्चैव पाषाणैरवसंयुताम् ।
सुवकाष्ठसमायुक्तां रङ्गभूमिन्तु कल्पयेत् ॥
समाप विपुलाश्चैव विधिवत् पांशुवर्ज्जिताम् ।
एकान्ते निर्जने रम्ये रङ्गभूमिन्तु कारयेत् ॥")
नाट्यभूमिश्च ॥

रङ्गसखी, स्त्री, (रङ्गाय रागाय सखी ।) वीणा ।
इति शब्दरत्नावली ॥

रङ्गमाणिक्य, क्ली, (रङ्गं रञ्जितं माणिक्यम् ।)
माणिक्यभेदम् । इति राजनिर्घण्टः ॥

रङ्गमाता [ऋ] स्त्री, (रङ्गस्य माता जनिका ।)
कुट्टनी । लाक्षा । इति मेदिनी । ते, ७१५ ॥

रङ्गमातृका, स्त्री, (रङ्गमातृ + स्वार्थे कन् । टाप् ।)
लाक्षा । इति त्रिकाण्डशेषः ॥

रङ्गलासिनी, स्त्री, (रङ्गेण रागेण लसितुं शील
मस्याः इति । लस + णिनि ।) शेफालिका ।
इति शब्दचन्द्रिका ॥

रङ्गशाला, स्त्री, (रङ्गस्य शाला ।) नाट्यगृहम् ।
इति शब्दरत्नावली ॥ नाचघर इति भाषा ॥

रङ्गाङ्गा, स्त्री, (रङ्गः रङ्गार्थमङ्गमस्याः ।) स्फटी ।
इति राजनिर्घण्टः ॥

रङ्गाजीव, पुं, (रङ्गेः हरितालादिद्रव्याजीव
तीति । जीव् + अच् । यद्वा, रङ्ग आजी
वोऽस्य ।) चित्रकरः । इत्यमरः । २ । १० । ७ ।
नटः । इति हेमचन्द्रः । ३ । ५८५ ॥

रङ्गावतारक, पुं, (रङ्गे अन्यैतभवेन अवतर
तीति । वृ + ण्वुल् । यद्वा रङ्ग नृत्यादिकम्
अवतारयतीति । तृ + णिच् + ण्वुल् ।) रङ्गाव
तारी । तत्पर्य्यायः । शैलूषः २ भरतः ३ सर्व
वेशी ४ भरतपुत्रकः ५ धार्मीपुत्रः ६ रङ्ग
जीवः ७ जायाजीवः ८ नटः ९ शुभाशी १०
शैलाली ११ । इति हेमचन्द्रः ॥ नृत्यगीतव्या
जीवनयाद्रादिना वस्त्रग्रहणतया प्रसिद्धः । इति
प्रायश्चित्तविवेकः ॥ नटगायकव्यतिरिक्तरङ्गाव
तारजीवी । इति कुल्लूकभट्टः ॥ तस्यान्नभक्षणे
प्रायश्चित्तं यथा,—
"रजकस्याभिशस्तस्य च शुद्धीत कदाचन ।
वैणकोटावपानस्य तथा धूर्त्तस्य कामतः ॥"
रङ्गपक्षस्य,—
"कर्म्मारस्य निषादस्य रङ्गावतारकस्य च ।
सुवर्णकर्त्तुर्वेणस्य शस्त्रविक्रयिणस्तथा ॥"
इत्याद्युक्त्वा—
"य एतेऽन्ये त्वभोज्यान्नाः क्रमशः परिकीर्त्तिताः ।
तेषां त्वगस्थिरोमाणि वदन्त्यन्नं मनीषिणः ॥
भुक्त्वातोऽन्यतमस्यान्नममत्या क्षपणं त्र्यहम् ।
मत्या भुक्त्वा चरेत् कृच्छ्रं रेतोविण्मूत्रमेव च ॥"
इति मानवे ४ अध्यायः ॥

रङ्गावतारी, [न्] पुं (रङ्गमवतरतीति । तृ +
णिनि ।) नटः । इति जटाधरः ॥ (यथा,
याज्ञवल्क्यसंहितायाम् । २ । ४९ ।
"गोपशौण्डिकशैलूषरजकव्याधयोषिताम् ।
रङ्गावतारिपाषण्डिकूटशल्लिकवेश्मिषा ॥")

रङ्गारि, पुं, (रङ्गस्य तदाश्रयाणां अरिरिव ।)
करवीरः । इति रत्नमाला ॥

रङ्गिणी, स्त्री (रङ्गोऽस्त्यस्याः इति । रङ्ग +
इनि । स्त्रियां ङीप् ।) शतमूली । इति
जटाधरः ॥ कैवर्त्तिका । इति राजनिर्घण्टः ॥
रङ्गविशिष्टे त्रि ॥

रङ्कु, [स] स्त्री, (रंहति गच्छति इति । रंह
+ "अविरविभ्यामसुन्" । इति असुन् । उणा
दिसूत्रम् । ४ । २१६ ।) रंहः । वेगः । इति
भरतद्विरूपकोषः ॥ (यथा, रघुवंशे । ७९ ।

"रच यथो सुराणां जगदुपकृतये नित्ययुक्तस्य यस्य ॥")

, तु क सज्याम् । इति कविकल्पद्रुमः ।
(आत्म चुरा पर० सक० सेट् ।) रचयति ।
इति दुर्गादासः ।

नं, क्ली, (रचि+भावे ल्युट् ।) निर्म्माणम् ।
ग्रन्थनम् । यथा, जयदेवे । १ । ४ ।
वाचः पल्लवयत्युमापतिधरः सन्दर्भशुद्धिं गिरां
जानीते जयदेव एव शरणः श्लाघ्यो दुरूहद्रुते ।
शृङ्गारोत्तरसत्प्रमेयरचनैराचार्य्यगोवर्द्धन-
स्पर्द्धी कोऽपि न विश्रुतः श्रुतिधरो धोयी कवि-
क्ष्मापतिः ॥"

ना, स्त्री, (रच्यते इति । रच+णिच्+"ण्यास-
श्रन्थो युच् ।" ३ । ३ । १०७ । इति युच् ।)
कुसुमप्रकारादेः यथावत्स्थापनेन रचनम् । तत्-
पर्य्यायः । परिस्पन्दः २ । इत्यमरः । २ । ६ ।
१३० ॥ परिस्पन्दः ३ । इति भरतः ॥ (यथा,
साहित्यदर्पणे । ३ । १४८ ।
"भूषाणामर्द्धरचना वृथा विश्रमणेक्षणम् ।
रहस्याख्यानमीषच्च विक्षेपो दयितान्तिके ॥")
यथाक्रमेण स्थापनम् । तत्पर्य्यायः । निवेशः २
स्थितिः ३ । इति हेमचन्द्रः । ३ । ४११ ॥
(यथा, महाभारते । ८ । ४६ । १० ।
"मध्ये व्यूहस्य रचनामकुर्व्वन्त यथागतम् ।")
निर्म्मितिः । कृतिः । यथा,—
"यथाधारचमत्कारकारिणी रचना हि
निर्म्मितिः ॥" इत्यलङ्कारकौस्तुभे १ किरणः ।
तत्पर्य्यायः । सन्दर्भः २ गुम्फः ३ ग्रन्थनम् ४ ।
ग्रथनम् ५ । इति हेमचन्द्रः । ६ । ११० ॥
(उद्यमः । यथा, श्रीमद्भागवते । ३ । ९ । १० ।
"दैवाहतार्थरचना ऋषयोऽपि देव
युष्मत्प्रसङ्गविमुखा इह संसरन्ति ॥"
"दैवेनाहता खण्डिता प्रतिहता अर्थानां
रचना उद्यमो येषाम् ।" इति तट्टी-
कायां श्रीधरस्वामी ॥ रचयतीति । रचि+युच् ।
टाप् । विश्वकर्म्मणो भार्य्या । यथा, श्रीमद्भाग-
वते । ६ । ६ । ४४ ।
"त्वष्टुर्दैत्यात्मजा भार्य्या रचना नाम कन्यका ।
सन्निवेशस्तयोर्जज्ञे विश्वरूपश्च वीर्य्यवान् ॥")

चित, त्रि, कृत । रचधातोः कर्म्मणि क्तप्रत्य-
येन निष्पन्नः । यथा —
"शिरः पद्मश्रेणीरचितचरणाम्भोरुहबलेः
स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदम् ॥"
इति पुष्पदन्तकृतस्तुतिः ॥

न, क्ली, (रज्यतेऽनेन । रञ्ज+अच् । निपा-
तनात् सिद्धम् ।) स्त्रीकुसुमम् । इति शब्द-
रत्नावली ॥

क, पुं (रञ्जयतीति । रञ्ज+अच् । निपातना-
न्नलोपः ।) परागः । (यथा, श्री रामायणे ।
३ । ७८ । २९ ।
"पद्मपुष्परजोभिश्च पद्माकरविनिःसृतः ।
निपात इव शीतात्मा वातीति मनोरमः ॥")

रेणुः । ("अर्घ्यं पादरजोपमा ।" इति
उज्ज्वलदत्तः । ४ । २१६ ।) गुणविशेषः ।
आर्त्तवम् । इति नानार्थे शब्दरत्नावली ॥
(स्कन्दस्य सैनाविशेषः । यथा महाभारते ।
९ । ४५ । ७१ ।
"दक्षबाहुः सुबाहुश्च रजः कोकिलकस्तथा ।"
विरजपुत्रः । यथा, विष्णुपुराणे । २ । १ । ४ ।
"स्वधा स्वदुःख विरजो रजसश्चाप्यभूत्सुतः ।"
वसिष्ठपुत्रः ऋषिभेदः । यथा, विष्णुपुराणे ।
१ । १० । १३ ।
"ऊर्ज्जायान्तु वसिष्ठस्य सप्ताजायन्त वै सुताः ।
रजो गात्रोर्द्ध्वबाहुश्च सवनश्चानघस्तथा ॥")

रज [स्] क्ली, (रज्यते रजतीति । रञ्ज+"भू-
रञ्जिभ्यां कित् ।" उणा ४ । २१६ । इत्यसुन् ।)
स्त्रीणां मासि मासि योनिनिःसृतरक्तम् । तत्-
पर्य्यायः । पुष्पम् २ आर्त्तवम् ३ । इत्यमरः ।
२ । ६ । २१ ॥ ऋतु ४ कुसुमम् ५ रजः ६ ।
इति शब्दरत्नावली ॥ (यथा मनौ ।५।१०८।
"रजसा स्त्री मनोदुष्टा सन्न्यासेन द्विजोत्तमः ॥"
अस्य लक्षणं यथा,—
"रञ्जितास्तेजसा त्वापः शरीरस्थेन देहिनाम् ।
अव्यापन्नाः प्रसन्नेन रक्तमित्यभिधीयते ॥
रसादेव स्त्रिया रक्तं रजःसंज्ञं प्रवर्त्तते ।
तद्वर्षाद्द्वादशादूर्द्ध्वं याति पञ्चाशतः क्षयम् ॥"
"नारीणां रजसि चोपचीयमाने शनैः शनैः
स्तनगर्भाशययोन्यभिवृद्धिर्भवति ।" इति सुश्रुते
सूत्रस्थाने १४ अध्यायः ॥
"मासि मासि रजः स्त्रीणां रसजं स्रवति त्र्यहम् ।
वत्सराद्द्वादशादूर्द्ध्वं याति पञ्चाशतः क्षयम् ॥"
इति वाभटे शारीरस्थाने प्रथमेऽध्याये ॥)
प्रकृतेर्गुणविशेषः । तत्तु रागद्वेषात्मकं दुःख-
हेतुः । रजोऽन्तः पुंलिङ्गोऽपि । यथा —
"रजोऽपि रजसा साकं स्त्रीपुष्पगुणधूलिषु ॥"
इत्यमरदत्तः इति भरतः ॥
महाभारतमते तु रजसो गुणाः । तद्यथा
काम क्रोध लोभ मान दर्पाः । इति मोक्ष-
धर्म्मः ॥
"तृष्णा क्रोधोऽभिसंरम्भो राजसास्ते गुणाः
स्मृताः ॥"
अभिसंरम्भो हिंसाभिनिवेशः । इत्याश्वमेधिक-
पर्व्व । अपि च ।
"काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥"
इति श्रीभगवद्गीतायाम् । ३ अध्यायः ॥
अपि च ।
"सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥"
"रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ।
तन्निबध्नाति कौन्तेय ! कर्म्मसङ्गेन देहिनम् ॥"
"सत्त्वं सुखे सञ्जयति रजः कर्म्मणि भारत ।
ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत ॥
रजस्तमश्चाभिभूय सत्त्वं भवति भारत ।
रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ॥"
"लोभः प्रवृत्तिरारम्भः कर्म्मणामशमः स्पृहा ।
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ॥"
"कर्म्मणः सुकृतस्याहुः सात्त्विकं निर्म्मलं फलम् ।
रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ॥
सत्त्वात् सञ्जायते ज्ञानं रजसो लोभ एव च ।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥
ऊर्द्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥"
इति श्रीभगवद्गीतायाम् । १४ अध्यायः ॥
"सत्त्वं रजस्तम इति दृश्यन्ते पुरुषे गुणाः ।
कालसञ्चोदितास्तेऽपि परिवर्त्तन्त आत्मनि ॥
प्रभवन्ति यदा सत्त्वे मनोबुद्धीन्द्रियाणि च ।
तदा कृतयुगं विद्याज्ज्ञाने तपसि यद्रुचिः ॥
यदा कर्म्मसु काम्येषु भक्तिर्यशसि देहिनाम् ।
तदा त्रेता रजोवृत्तिरिति जानीहि धीमन ॥
यदा लोभस्त्वसन्तोषो मानो दम्भोऽथ मत्सरः ।
कर्म्मणाञ्चापि काम्यानां द्वापरं तद्रजस्तमः ॥
यदा मायानृतं तन्द्री निद्रा हिंसाविषादनम् ।
शोकमोहभयं दैन्यं स कलिस्तु तदा स्मृतः ॥"
इति गारुडे २२७ अध्यायः ॥
परागः । इति मेदिनी । से ३२ ॥ (यथा,
भागवते । ४ । २४ । २२ ।
"पद्मकोषरजो दिक्षु विकिरत्पवनोत्सवम् ॥")
रेणुः । अस्य पर्य्यायः धूलिशब्दे द्रष्टव्यः ॥
(यथा, माघे । २ । ४६ ।
"पादाहतं यदुत्थाय मूर्द्धानमधिरोहति ।
स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः ॥")
निषिद्धानिषिद्धरजो यथा,—
"आयुःश्रायो न शिवं तथा सम्मार्जनीरजः ।
तथाश्वरथयानानां सर्वाङ्गेषु रजः शुभम् ॥
अशुभञ्च विजानीयात् खरोष्ट्राजाविकस्य च ।
गवां रजो धान्यरजः पुत्रस्याङ्गभवं रजः ॥
एतद्रजो महापुण्यं महापातकनाशनम् ।
अजारजः खररजो यत्तु सम्मार्जनीरजः ॥
एतद्रजो महापापं महाकिल्बिषकारणम् ॥"
इति गारुडे ११४ अध्यायः ॥
(रात्रिः । इति निघण्टुः । १ । ७ ॥ उदकम् ।
यथा ऋग्वेदे । १ । ३६ । १ ।
"त्रिपर्चिरोधस्वमनुज रजोनिमितो दिव
आनासु धरुणा ॥"
'रज उदकम् । इति तद्भाष्ये सायणः ॥
भुवनम् । यथा, तत्रैव । १ । ५२ । ४ ।
"यद्द्यावि ते रजसि विश्वे ये भुवानि कम
स्पर्द्धमानि ॥"
"रजसि लोके ।" इति तद्भाष्ये सायणः ॥
ज्योतिः । यथा तत्रैव । १० । ३१ । ६ ।
"दोग्ध्र वाचि दिवाणि रोचना विजानिवाति
रजसा पुरुषः ॥"
"रजसा चन्द्रेणेव ज्योतिषा । विद्युद्रूपेण
वह्नि इव ह्यावाप आधारः दर्शयन्
लोकान् ॥" इति तद्भाष्ये सायणः ॥)

रजःशय, पुं (रजसि शेते। शी + "अधिकरणे शेतेः।" ३।२।१५। इति अच्।) कुक्कुरः। इति शब्दमाला। (धूलिशायिनि त्रि। रजतमयी। यथा वाजसनेयसंहितायाम्। ५। ८।
"या तेऽग्ने रजःशया तनूर्वर्षिष्ठा।"
"रजःशया रजतमयीति।" इत्याह महीधरः।)

रजःसारथि पुं (रजसां सारथिरिव।) वायुः। इति शब्दरत्नावली।

रजक पुं (रजति निर्णेजनेन श्वेतिमानमापादयति वस्त्रादीनामिति। रञ्ज + "कृतिकर्म्मणि रञ्जिभ्य परिगणनं कर्त्तव्यम्।" ३।१।१४५। इति ष्वुन्।) वस्त्ररञ्जकजातिविशेषः। धोबा इति भाषा। (यथा भागवते। १०।४१।३२।
"रजकं कञ्चिदायान्तं रङ्गकारं गदाग्रजः।
दृष्ट्वायाचत वासांसि धौतान्युत्तमानि च।")
स च तीवरगर्भात् धीवराज्जातः। इति ब्रह्मवैवर्त्तपुराणम्। तत्पर्य्यायः। निर्णेजकः २। इत्यमरः। २।१०।१०॥ धावकः ३ वस्त्रकोलकः ४। इति शब्दरत्नावली। धावकः ५। इति हेमचन्द्रः। ३।५।७८। रजकस्य वस्त्रनिर्णेजनप्रकारो यथा,—
"शाल्मलेः फलके श्लक्ष्णे निर्णिज्यान्नेजकः शनैः।
अन्योऽन्यथा हि कुर्व्वीत दण्ड्यः स्यात् साहसमा-
त्मकम्।"
इति मात्स्ये २ १ अध्यायः।
(रजकान्नभक्षणप्रायश्चित्तं यथाह आपस्तम्बः।
"रजके चैव शैलूषे वेणुचर्म्मोपजीविनि।
एतेषां यस्तु भुञ्जीत द्विजश्चान्द्रायणं चरेत्।"
इति प्रायश्चित्तविवेकः। त्रिनिर्णेजकमात्रे।)
शुकः। इति विश्वः।

रजकी स्त्री रजकपत्नी। रजकजाती अकप्रत्ययान्तादपि ङी विधा। इति मुग्धबोधव्याकरणम्। (यथा, आर्य्यासप्तशत्याम्। ३०२।
"पटपट इव रजकीभिर्मलिनो मुग्धापि विहृत
ताभिः।
आयतदृशैव विना वचनम्। हतोऽसि कुल
टाभिः।")

रजत, क्ली, (रजति प्रियं भवति रज्यते इति वा। रञ्ज + "पृषिरञ्जिभ्यां कित्।" उणा०। ३।११०। इति अतच् किच्चायम्।) रूप्यम्। इत्यमरः। २।९।९६॥ दुर्व्वर्णम्। श्वेतम्। धौतिकम्। तारम्। शुद्धम्। श्वेतम्। (अस्य उत्पत्तिर्यथा, मात्स्ये १२१। २१।
"रजःप्रकाशरजसं प्राकृतं पावनात्मकम्।
तस्यापरेण रजतो महानद्यो गिरिः स्मृतः।")
रक्तम्। इति हेमचन्द्रः। ४।१०९। शुक्लवर्णविशिष्टे त्रि। इत्यमरटीकायां भरतः। निष्कार्थे रजतपात्रादीनां प्रशस्तानि यथा
"श्राद्धे रजतं तात पितृणां पात्रमुच्यते।
रजतस्य कथा वापि दर्शनं दानमेव वा।
राजतैर्भाजनैरेषामथवा रजतान्वितैः।

वार्य्यपि श्रद्धया दत्तमक्षयायोपकल्पते।
तथार्घ्यपिण्डभोज्यादौ पितॄणां राजतं मतम्।
शिववेत्रोद्भवं यस्मादतस्तत् पितृवल्लभम्।
अमङ्गलं तद्यत्नेन देवकार्य्येषु वर्जितम्।"
इति मात्स्ये १७ अध्यायः।

रजतद्युति पुं (रजतस्येव द्युतिरस्य।) हनूमान्। इति शब्दरत्नावली।

रजतप्रस्थः, पुं, (रजतस्येव तस्य शुभ्रो वा प्रस्थः सानुरस्य।) कैलासपर्व्वतः। इति त्रिकाण्डशेषः।

रजताचल पुं, (रजतप्रधानोऽचल इव। शाक पार्थिवादिवत् समासः।) रौप्यपर्व्वतः। तस्य परिमाणं दानविधिश्च यथा,—
"राजतो नवमस्तद्वदचलः परिकीर्त्तितः।
वक्ष्ये विधानमेतेषां यथावदनुपूर्व्वशः।
अतः परं प्रवक्ष्यामि रौप्याचलमनुत्तमम्।
यत्प्रदानान्नरो याति सोमलोकं द्विजोत्तम।
दशभिः पलसाहस्रैरुत्तमो रजताचलः।
पञ्चभिर्मध्यमः प्रोक्तस्तदर्द्धेनाधमः स्मृतः।
अशक्तो विंशतेरूर्द्ध्वं कारयेत् शक्तितः सदा।
विष्कम्भपर्व्वतांस्तद्वत् तुरीयांशेन कल्पयेत्।
पूर्व्ववद्राजतान् कुर्य्यान्मन्दरादीन् विधानतः।"
पूर्व्ववत् रजाचलवत्।
"कलधौतमयांस्तत्र लोकेशान् रचयेद्बुधः।
ब्रह्मविष्णुरकाः कार्य्या नितम्बोऽत्र हिरण्मयः।
राजतं स्याद्यदन्येषां सर्व्वं तदिह काञ्चनम्।
शेषञ्च पूर्व्ववत् कुर्य्यात् होमजागरणादिकम्।
प्रदद्यात्तु प्रभाते तु गुरवे रौप्यपर्व्वतम्।
विष्कम्भशैलानृत्विग्भ्यः पूज्य वस्त्रविभूषणैः।
इमं मन्त्रं पठन् दद्यादर्भपाणिर्विमत्सरः।
पितॄणां वल्लभं यस्मात् विष्णोर्म्मा शङ्करस्य च।
रजत पाहि तस्मान्नः शोकसंसारसागरात्।
इत्थं निवेद्य यो दद्याद्रजताचलमुत्तमम्।
गवामयुतदानस्य फलं प्राप्नोति मानवः।
सोमलोके गन्धर्व्वैः किन्नराप्सरसाङ्गणैः।
पूज्यमानो वसेद्विद्वान् यावदाभूतसंप्लवम्।"
इति मात्स्ये ९ अध्यायः।
(कैलासपर्व्वतः। यथा, महाविष्णोर्भक्तौ।
"रजताचलमध्ये तु कुबेरेश्वर ईरितः।")

रजताद्रिः, पुं (रजतमयस्तद्वत् शुभ्रो वा अद्रिः। शाकपार्थिववत् समासः।) कैलासपर्व्वतः। इति हेमचन्द्रः। ४।९४।

रजनं, क्ली, (रज्यत इति। रञ्ज + "रञ्जेः क्युन्।" उणा० २।७९। इति क्युन्। "रजकरजन रजःसूपसंख्यानम्।" ६।४।२४। इति वार्त्तिकोक्तेर्नलोपः।) रागः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः। (यथा, महाभारते। ८।५२।९।
"यथा वा वाससी शुद्धे महारजनरञ्जिते।
बिभ्रतः पुरुषौ श्यामौ तथा तावत्र केशवौ।")
चर्म्मविशेषे पुं। यथा, तैत्तिरीयसंहितायाम्। २।१।८।१।

"रजनो वै कौशेयं शत्रुमित आसांवत्सरम्
अमयात्।")

रजनि, स्त्री (रजन्ति लोका यत्र। रञ्ज + बाहुलकादनिः। इत्युज्ज्वलदत्तः। २।१०१।) रात्रिः। इत्यमरटीका। (यथा, कथासरित्सागरे। १८। १४५।
"रजन्यै श्वापदं वयस्य प्राप्तायां रजनौ च ताम्।
आमन्त्र्य विप्रान् प्रययौ सावरार्य च निर्ययौ।")

रजनी, स्त्री (रजनि + कृदिकारादक्तिन इति ङीष्।) रात्रिः। (यथा, महाभारते। १। १८। २९
"या सुप्ता रजनी नाथ मिष्टं स्वादु भाविनी।
पिपासार्त्ता मातर राज्ञि। इदं वचनमब्रवीत्।")
हरिद्रा। (अस्याः पर्य्यायो यथा—
"हरिद्रा पीतिका गौरी काञ्चनी रजनी निशा।
मेहघ्नी रञ्जनी पीता वर्णिनी रात्रिनामिका।"
इति वैद्यकरत्नमालायाम्।
यथा, भट्टौ। १२। ३८।
"अञ्जा सुराचेर्भ्रदिम कुराचेत्
गह्वरं गौरमिह रजन्या।
चन्द्रांशुपूर्णामतिपुष्पितेव
तैलाक्तया सुप्तमोहिताचि।")
नीलिका। इत्यमरः। २।४।११६। (यथा, सुश्रुतसंहितायाम्। ४४।९।
"नमरुक्ताद्गमरजनीशङ्खपुष्पाविमन्दाश्च।")
जौलिका। इति मेदिनी। नि १२६। (रात्रौ दीपनशीलेऽपि। यथा, भागवते। ३।५।१०।
"अनुमतो शिवीवाली सरस्वती कुहूः रजनी सन्ध्या राकेति।")

रजनीकर, पुं (रजनीं करोतीति। कृ + ट।) चन्द्रः। इति शब्दरत्नावली। (यथा, भागवते। ४।२८।३४।
"हित्वा गृहान् सुतान् भोगान् वैदर्भी मदिरे
क्षणा।
अन्वधावत पाञ्चाल्यं ज्योत्स्नेव रजनीकरम्।")

रजनीगन्धा, स्त्री, (रजन्यां गन्धोऽस्याः। रात्रौ विकाशात् तथात्वम्।) स्वनामख्यातश्वेतवर्णपुष्पविशेषः। इति लोकप्रसिद्धिः।

रजनीचर, पुं (रजन्यां चरतीति। चर + "चरेष्टः।" ३।२।१६। इति टः।) राक्षसः। इति शब्दरत्नावली। (यथा, रामायणे। ७।५।४।
"स तथा सह युद्धेन वराह रजनीचर।"
तथा च।
"क्रोधोऽप्रमादी रजनीचराणां
व्याहारसीनां शरीरमेदम्।
गर्भे चरेदुर्व्वहि तेन मातु-
रश्वाविवास न चरेद्धरीव।"
इति चरके शारीरस्थाने द्वितीयेऽध्याये।)
चौरः। यामिकभटः। (रात्रिविचारके त्रि। यथा, हरिवंशे। ८२। १८।
"सायन्तनाश राक्षाः प्राप्ता रजनीचरम्।")

रजनीजल, क्ली (रजन्या जलम्।) नीहारः। इति हारावली। १८।

रजनीपुष्प, पुं (रजन्या हरिद्राया पुष्पमिव पुष्पमस्य।) पूतिकरञ्ज। इति राजनिर्घण्टः। (पूतिकरञ्जशब्देऽस्य विवरणं ज्ञातव्यम्।)

रजनीमुख क्ली (रजन्या मुखम्।) प्रदोषः। इत्यमरः। १।४।६। (यथा राजतरङ्गिण्याम्। ४। ४११।

"तत्र प्रयाणं धवले यज्ञाते रजनीमुखे।
भाविनाशस्य भूपाल प्रयाणेऽस्य विघ्नं या॥")

रजनीहासा, स्त्री, (रजन्या हासो विकाशो यस्याः।) शेफालिकापुष्पम्। इति शब्दरत्नावली।

रजषाड्, पुं, (रज्यतेऽस्मिन्निति। रञ्ज+ "असाड् सहिमन्दिभ्यां शधिरञ्जिभ्यां तु किरन्ते रषश्च।' इत्युणादिकोषटीकान्तर्गतोक्त्या असाङ्प्रत्ययः।) मेघः। चित्तम्। इत्युणादिकोषः। १। १७४।

रजस्वल, पुं (रजोऽस्त्यस्येति। रजस्+ "रजःकृष्यासुतिपरिषदो वलच्।" ५। २। ११२। इति वलच्।) महिषः। इति मेदिनी। ले, १६४। (अस्य पर्य्यायो यथा,—
"महिषो घोटकारिः स्यात् कासरश्च रजस्वलः।
पीनस्कन्धः कृष्णकायोऽपि लुलापो यमवाहनः॥'
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे।)

त्रि रजोयुक्तः। यथा भागवते। ७। १४। १२।
"न प्रयाति धरोपस्थे कार्येभ्यो यत्नसानुनि।
रजस्वलैस्तनूदेशैर्निगूढामलतेजसम्॥"

रजोगुणयुक्तः। गूढयासु। यथा मनुः। ६। ७७।
"जराशोकसमाविष्टं रोगायतनमातुरम्।
रजस्वलमनित्यञ्च भूतावासमिमं त्यजेत्॥")

रजस्वला स्त्री (रजोऽस्त्यस्याः। रज कृष्यासुतीति।" ५। २। ११२। इति वलच्। टाप्।) रजोयुक्ता। तत्पर्य्यायः। स्त्रीधर्म्मिणी २ अवी ३ आत्रेयी ४ मलिनी ५ पुष्पवती ६ ऋतुमती ७ उदक्या ८। इत्यमरः। २। ६। २०। दूरा ९ पुष्पहासा १०। इति शब्दरत्नावली। पुष्पिता ११ अवीरा १२ विवर्णा १३ निष्कर्षी १४। इति जटाधरः। स्नाता १५ पांशुला १६। इति राजनिर्घण्टः।०। अथ रजस्वलास्पर्शप्रायश्चित्तम्। "काश्यपः।

रजस्वला तु संस्पृष्टा ब्राह्मण्या ब्राह्मणी यदि।
एकरात्रं निराहारा पञ्चगव्येन शुध्यति॥
रजस्वला तु संस्पृष्टा राजन्या ब्राह्मणी तु या।
त्रिरात्रेण विशुद्धिः स्यात् व्यासस्य वचनं यथा॥
रजस्वला तु संस्पृष्टा वैश्यया ब्राह्मणी च या।
पञ्चरात्रं निराहारा पञ्चगव्येन शुध्यति॥
रजस्वला तु संस्पृष्टा शूद्रया ब्राह्मणी यदि।
षड्रात्रेण विशुद्धेत् ब्राह्मणी कामकारतः॥
अकामतश्चरेदर्द्धं ब्राह्मणी सर्व्ववर्णतः॥
अनेन रजस्वलायां ब्राह्मण्या सवर्णादिस्पर्शे एकरात्रोपवासादि पञ्चगव्यपानं कामतः। अकामतस्तदर्द्धम्। शातातपः। सवर्णस्पर्शे त्रिरात्रमपरवर्णस्य रात्रेरर्द्धं ...

अकामतस्तदर्द्धम्। एतत् चतुर्थाहात् प्राक् कर्त्तव्यम्।

'चाण्डालेन श्वपाकेन संस्पृष्टा चेद्रजस्वला।
अतिक्रम्य तान्यहानि प्रायश्चित्तं समाचरेत्॥
त्रिरात्रमुपवासः स्यात् पञ्चगव्येन शुध्यति।
तां निशान्तु अतिक्रम्य स्नानाञ्चैव तु कारयेत्॥
इति वचनान्तरदर्शनात् एतत् कामतः।
अत्र न्निभेदोऽपि नास्ति। अज्ञाने हारीतः।
'पतितान्त्यश्वपाकैश्च संस्पृष्टा स्त्री रजस्वला।
तान्यहानि व्यतिक्रम्य प्रायश्चित्तं समाचरेत्॥
प्रथमेऽह्नि त्रिरात्रं तु द्वितीये द्व्यहमाचरेत्।
अहोरात्रं तृतीयेऽह्नि चतुर्थे नक्तमाचरेत्॥
चतुर्थेऽहनीति शुद्धिस्नानात् पूर्व्वम्। आपः।
'रजस्वला यदा स्पृष्टा श्वजम्बुकरासभैः क्वचित्।
निराहारा भवेत्तावत् यावत् स्नात्वा शुध्यति॥
अत्रापि द्व्यहादिभेदोऽवगन्तव्यः। वृद्धशातातपः।
'रजस्वले तु ये नार्य्यावन्योन्यं स्पृशतो यदि।
सवर्णे पञ्चगव्यन्तु ब्रह्मकूर्च्चमतः परम्॥
पञ्चगव्यपानं सवर्णयोः। तेनोपवासः। ब्रह्मकूर्च्चमाह जावालः।
अहोरात्रोषितो भूत्वा पौर्णमास्यां विशेषतः।
पञ्चगव्यं पिबेत् प्रातर्ब्रह्मकूर्च्चविधिः स्मृतः॥
तन्मध्ये पुराणेक दातव्यम्।" इति प्रायश्चित्ततत्त्वम्।०। अन्यच्च।
शुद्धा भर्त्तुश्चतुर्थेऽह्नि अशुद्धा दैवपैत्रयोः।
दैवे कर्म्मणि पैत्रे च पञ्चमेऽहनि शुध्यति॥
इति शुद्धितत्त्वम्॥

तस्यां गमने पापं यथा,—
"प्रथमे न्न्हि कान्तां यो हि गच्छेद्रजस्वलाम्।
ब्रह्महत्याचतुर्थांश लभते नात्र संशयः॥
स पुमान् हि कर्माणां न्हैं पैत्रे च कर्म्मणि।
अधमः स च सर्व्वेषां निन्दितश्चाप्यस्कर॥
द्वितीयदिवसे भार्य्यां यो व्रजेच्च रजस्वलाम्।
कामतः परिपूर्णां च ब्रह्महत्यां लभेद्ध्रुवम्॥
नाशौचे नाधिकारी पितृविप्रसुरार्च्चने।
असंस्पृश्योऽधमश्च स्यात् न्यायविधाविर्जितम्॥
तृतीयन्दिवसे भार्य्यां यो हि गच्छेद्रजस्वलाम्।
स गते ब्रह्महत्याश्च लभते नात्र संशयः॥
पूर्व्ववत् पतितः सोऽपि न चार्हः सर्व्वकर्म्मसु।
अस्पृश्यो चतुर्थेऽह्नि न गन्तव्यो विचक्षणः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११ अध्यायः।
अपि च।
"अपूर्व्वे ऋतुकाले तु यो गच्छेद्रजस्वलाम्।
रेतसा पितरस्तस्य एकमेव मासम्॥
एकन्तु पुरुषा यान्ति द्वितीयां कामोहिताः।
तृतीये वा चतुर्थीं च तदा स पुरुषाधमः॥
ऋतुकाले तु सम्प्राप्ते विषयं भोग्यं रजसि।
ऋतुकालाभिगामी यो स्वदारार्थे कामतः॥
न तस्य ऋणं [illegible] मोहात् संसारात् दुरत्ययात्।
अतो अतो भवत्की प्राप्नोति दुरत्ययम्॥"
इति वाराहे दुष्करभोजनः कर्म्मादानः॥

(अपि च।
"रजस्वलाप्रयोगमननेत्ररकनाशनम्।
रजस्वलाबीरामध ग्रूष्वल्लप्रध भरवम्।
अमत्वात्मथ दिवसे यस्य मृगबोलते॥"
तथा च।
"रजस्वलामकामाञ्च मलिनामप्रियामथा।
वर्णवृद्धां वयोवृद्धां तथा चाधिप्रपीडिताम्॥
हीनाङ्गीं गर्भिणीं द्वेष्यां योनिदोषसमन्विताम्।
सगोत्रां गुरुपत्नीञ्च तथा प्रव्रजितामपि॥
सन्ध्यापर्व्वस्वगम्याश्च नोपेयात् प्रमदां नरः॥
रजस्वलां प्राप्नुवतो नरस्यानियतात्मनः।
दृष्ट्यायुस्तेजसां हानिः रधर्म्मश्च ततो भवेत्॥"
इति सुश्रुते चिकित्सितस्थाने २४ अध्यायः॥)

रजि, पुं, चन्द्रवंशीयराजविशेषः। यथा। "पुरू-रवसो ज्येष्ठपुत्रस्यायुर्नामा। स राहोर्दुहितरमुपयेमे। तस्यां पञ्च पुत्रानुत्पादयामास। नहुषक्षत्रवृद्धरम्भरजिअनेनसः। रजेश्च पञ्च पुत्रशतान्यतुलवीर्य्यसाराण्यासन्।" इति विष्णुपुराणे ४ अंशे। ८। ९। अध्यायौ। (राज्यम्। कन्याविशेषे, स्त्री। यथा, ऋग्वेदे। ६। २६। ६।
"त्वं रजिं पिठीनसे दशस्यन् षष्टिं सहस्रा
शच्या सचाहन्॥"
"रजि एतन्नाम्नी कन्या वा राज्यं वा।" इति तद्भाष्ये सायणः। रज्जुः। यथा ऋग्वेदे। १०। १। १२। "रजिष्ठया रज्या पश्च आ गोस्तूतूर्षति पर्य्यग्रं दुवस्युः॥"
"रजिष्ठया ऋजुतमया रज्वा रज्ज्वा।" इति तद्भाष्ये सायणः॥)

रजोबल, क्ली (रज इव बलमि यस्योनीति। बल+अच्।) अन्धकारः। इति त्रिकाण्डशेषः॥

रजोरस क्ली, अन्धकारः। इति शब्दरत्नावली॥

रजोहर पुं (रजो हरतीति। हृ+"हरतेरनुद्यमनेऽच्।" ३। २। ९। इति अच्।) रजकः। इति शब्दमाला॥

रज्जु स्त्री (सृज्यते रज्यते इति। सृज्+"सृजेरसुम् च।" उणा। १। १६। इति उः। असुमागमश्च। धातुसकारलोपश्च। आगम-सकारस्य जश्त्वम्। रकारः। तस्यापि गुणम्। जकारः। रज्जुश्चेन। अन्यानिपातिभ्यार अन्धारेनामिति कथयात् न जट।) वन्धनसाधनद्रव्यः। न्डी इति भाषा। तत्पर्य्यायः। शुल्बम् २ वराटकः ३ वटी ४ गुणः ५। इत्यमरः। २। १०। २७। गुणः ६। इति भरतधृतरत्नकोषः। शुल्वम् ७ शुल्बा ८ शुल्बा ९ शुल्वी १० दाम ११ वटा १२ वराटकः १३ वटीगुणः १४। इति टीकान्तरम्॥ (यथा कामन्दकीये राजो दशा, मनौ। ११। १६८।
"वासोवल्कोत्कोरजोजीर्णं [illegible] च।
पञ्चकादिधीयाश्च रज्वादेर्यार्थ वच॥")
देवी। इति मेदिनी। जे १४। (अस्याः विवरणं यथा सुश्रुते शारीरस्थाने पञ्चमाध्याये।
"रज्ज्वस्तिस्रः पञ्चभिः॥")

रञ्जक, स्त्री, (रञ्जयतीति । रन्ज + णिच् + ण्वुल् ।) हिङ्गुलम् । इति राजनिर्घण्टः । (गुणाऽन्योऽस्य हिङ्गुलशब्दे विज्ञेयाः ।)

रञ्जक, पुं, (रञ्जयतीति । रन्ज + णिच् + ण्वुल् ।) कम्पिल्लकः । इति राजनिघण्टुः । पीतिचन्दकं । वस्त्रादिरागकरः च । (अस्य मते भोजनं निषिद्धं यथा, मनौ । ४ । २१६ ।
"चक्रनो पौलिकागाव चैलनिर्णेजकस्य च ।
रञ्जकस्य नृशंसस्य यस्य चोपपतिर्गृहे ।"
नाधादिषु पित्त । पित्तान्तर्गतान्यतिविशेष । यथा,—
"यत्तु यकृत्प्लीह्नोः पित्तं तस्मिन् रञ्जकोऽग्निरिति संज्ञा सरसस्य रागकृदुक्तः ।" इति सुश्रुते सूत्रस्थाने २१ अध्याये ।)

रञ्जन, स्त्री, (रज्यतेऽनेनेति । रन्ज + करणे ल्युट् ।) रक्तचन्दनम् । इति मेदिनी । ने,११५ । (अस्य पर्यायो यथा —
"पत्राङ्गं रक्तसारञ्च सुरङ्गं रञ्जनन्तथा ।
पट्टरञ्जनमाख्यातं पत्तूरञ्च कुचन्दनम् ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ।)
हिङ्गुलम् । इति राजनिर्घण्टः । (रञ्ज + णिच् । भावे ल्युट् । प्रीतिजननम् । यथा रघौ । ४ । १२ ।
"तथैव सोऽभूदन्वर्था राजा प्रकृतिरञ्जनात् ॥")

रञ्जन पुं, (रञ्जयतीति । रन्ज + णिच् + ल्यु ।) रागजनकः । इति मेदिनी । ने, ११५ । मुञ्जतृणम् । इति राजनिघण्टः ।

रञ्जनक, पुं (रञ्जन + कन् ।) कट्फलः । इति राजनिर्घण्टः । (गुणादिविषयोऽस्य कट्फलशब्दे विज्ञेयः ।)

रञ्जनद्रु, पुं, (रञ्जयतीति । रन्ज + णिच् + ल्यु । रञ्जनश्चासौ द्रुश्चेति ।) अश्मन्तकः । अस्य माछ इति भाषा ।

रञ्जनी, स्त्री, (रञ्जन + ङीप् ।) गुञ्जारोचनिका । नीली । (अस्याः पर्यायो यथा —
"नीली तु नीलिनी तूली कालदोला च नीलिका ।
रञ्जनी श्रीफली तुत्था ग्रामीणा मधुपर्णिका ।
क्लीतका कालकेशी च नीलपुष्पा च सा स्मृता ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ।)
मञ्जिष्ठा । इति मेदिनी । ने ११५ । जतुका । इति शब्दचन्द्रिका । हरिद्रा । (अस्याः पर्यायो यथा,—
"हरिद्रा पीतिका गौरी काञ्चनी रजनी निशा ।
मेहघ्नी रञ्जनी पीता वर्णिनी रात्रिनामिका ॥"
इति वैद्यकरत्नमालायाम् ।)
पर्पटी । इति राजनिघण्टः ।

रट वाचि । इति कविकल्पद्रुमः । (भ्वा० पर० सक० सेट् ।) रटति । इति दुर्गादासः ।

रटन्ती स्त्री (रट्यते पुण्यवद्भिरिति कथ्यते इति । रट + बहुलवचनात् झच् । ङीप् ।) माघकृष्ण माघीयकृष्णचतुर्दशी । तत्र अरुणोदयकाले स्नानं कर्त्तव्यम् । यथा । यम ।

"माघे मास्यसिते पक्षे रटन्त्याख्या चतुर्द्दशी ।
तस्यामुपर्युदयात्कालात् स्नात्वा सन्तर्प्य यमम् ॥"
उदयव्याप्यारुणोदयवेलायाम् ।
"अरुणोदयवेलायां माघे मासि कृष्णचतुर्द्दशी ।
सम्पादयेत्तत्काले तु नरः स्नात्वा महाफलम् ।
स्नात्वा यममुद्दिश्य तु यमात् सर्वपापैः प्रमुच्यते ॥"
अत तिथिक्षयप्रमाणात् गौणचान्द्रादङ्गत् । अत्रा सूर्योदयकाल एव स्नानं पूर्व्वोक्तचतुर्द्दशीत्यम् तत्परम् । अत्र उदयोदयकालेऽपि सूर्योदयवेलायां अरुणोदयेऽभ्युदिते इति इतरार्थे भणितं आश्रयात् तत् अमृतकरभागधृतमतीत्यर्थोऽस्य इति दत्तः राज्ञा सुकल्पनया अवलोकनमिति । इति तिथ्यादितत्त्वम् ।
किञ्च ।
"अरुणोदयवेलायां माघे स्नानं कुर्यात् सरित्सु वै ।
प्रातश्चक्रतं पापं तत्क्षणादेव नश्यति ।
रटन्ती नाम विख्याता सर्वपापहरा तिथिः ॥"
इति मत्स्यसूक्ते ५५ पटलः ।
क्वचित् पुस्तके सरित्स्विति स्थाने शङ्करार्चने इति पाठः । ० । तत्र श्यामापूजाविषयका —
"माघे मास्यसिते पक्षे रटन्त्याख्या चतुर्द्दशी ।
तस्यां सम्पूजयेत्तारां महाविभवविस्तरैः ।
चक्रवर्त्ती महाराजो भवत्येव न संशयः ॥"
इति श्यामीतन्त्रे ७ पटलः ।
अपि च ।
"माघे मास्यसिते पक्षे रटन्त्याख्या चतुर्द्दशी ।
तस्यां कालिकापूजा सर्व्वविघ्नोपशान्तये ॥"
इति कालिकापुराणम् । ० ।
अपरञ्च ।
"माघे मास्यसिते पक्षे रटन्त्याख्या चतुर्द्दशी ।
तस्यां प्रदोषसमये पूजयेत्कुलमालिनीम् ॥"
इत्याचार्यचूडामणिग्रन्थतत्तन्त्रसारधृतवचनम् । अस्य श्यामाशब्दे द्रष्टव्यम् ।

रटितं त्रि, कथितम् । रटधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नम् । (भावे क्त ।) कथनमात्रे, क्ली । (यथा राजतरङ्गिण्याम् । २ । १०४ ।
"ससुररिरविनि पद पदे
च प्रतिमटती पदरञ्जनेङ्गमाने ।
अमहत रटितैश्च ककरोटी
परिनालिनी गमनीक्षितिपालानाम् ॥")

रठ भाषणे । इति कविकल्पद्रुमः । (भ्वा० पर० सक० सेट् ।) भाषणं कथनम् । रठति । इति दुर्गादासः ।

रण, गतौ । इति कविकल्पद्रुमः । (भ्वा० पर० सक० सेट् ।) रणति । रति शब्दे । इति दुर्गादासः ।

रण, म शब्दे । इति कविकल्पद्रुमः । (भ्वा० पर० सक० सेट् ।) म रणयति । इति दुर्गादासः ।

रण, क्ली पुं (रणन्ति शब्दायन्तेऽत्रेति । रण + घञर्थे कः । "प्रियसाची बभाषेव रणम् ।" इति कालिकोक्तौ अप्प ।) युद्धम् । इत्यमरः । २ । ८ । १०४ । (यथा,

मनौ । ७ । ८७ ।
"न कूटैरायुधैर्हन्याद्युध्यमानो रणे रिपून् ।
न कर्णिभिर्नापि दिग्धैर्नाग्निज्वलिततेजनैः ॥"
रमणम् । यथा, ऋग्वेदे । ८ । १० । १० ।
"प्राचिनो प्रापि पूजनार्थं रणाय ते सुत ।"
"रणाय रमणाय ।" इति तद्भाष्ये सायनः ।
रमणीय, त्रि । यथा, तत्रैव । १ । १६६ । ११ ।
"एककोपायनो वीराः रणाय यद्य स्वधावते च सुदा ।"
"रणाय रमणीयाय ।" इति तद्भाष्ये सायनः ।)

रण, पुं (रण + अप् ।) शब्दः । क्वणः । इति मेदिनी । गतिः । इति शब्दरत्नावली ।

रणतूर्य, क्ली, (रणस्य तूर्यम् ।) युद्धवाद्यम् । तत्पर्यायः । संग्रामपटहः २ आनकदिण्डिमः ३ । इति त्रिकाण्डशेषः ।

रणप्रिय, स्त्री, (रणे प्रियम् ।) उशीरम् । इति राजनिर्घण्टः ।

रणप्रिय, पुं (रणः प्रियोऽस्य । तत्र अवलोकनार्थं तत्परत्वम् ।) श्येनपक्षी । इति राजनिघण्टः । (विष्णुः । यथा महाभारते । १३ । १४९ । ८८ ।
"धन्यो धनेशो धर्म्मप्रियः प्रीतः कृतज्ञो रणप्रियः ।"
युद्धप्रियमात्रे, त्रि । यथा, कामन्दकीये । ८ । ११ ।
"रणप्रियं यात्रहितं सामन्ताभिमान्यम् ।
विजिगीषुधर्मकामाय क्रुद्धो मार्गो विना
स्तिया ॥")

रणमत्त, पुं (रणे रणं प्राप्य वा मत्तः ।) हस्ती । इति शब्दमाला ।

रणमुष्टि, पुं विषमुष्टिवृक्षः । इति राजनिघण्टः ।

रणरङ्ग पुं (रणेषु रङ्गो मत्तः ।) रणकारक इत्यर्थः । तत्पर्यायः । प्रतिमः २ । इति तारावली । २०२ ।

रणरणी, स्त्री, उद्वेगनम् । इति त्रिकाण्डशेषः ।

रणरण पुं, (रणरण इति शब्दोऽस्त्यस्येति । अत आदित्यादेः ।) मशकः । इति त्रिकाण्डशेषः । (रणे रणं शब्दो यस्य । रणरणेषु । मोहे, त्रि । यथा,—
"अवाप करणो रणो रणरणो रणो रणो
राघवो
भूमा येन रमा रमा रणरमा रामा रमा
या रमा ।
वर्णीमानन्यो रणो रणरणो रणो रणो येरणो
त्रिभुविनुरमौमरमौमरमौरामौरमौ
गौरामः ॥"
रसमुद्रः ।)

रणरणक पुं उत्कण्ठा । इति हेमचन्द्रः । २ । २२८ । (यथा उत्तररामचरिते प्रथमाङ्के ।
"अतो मे देव रणरणकारिणी चित्रदर्शना
दिदृक्षानरणा ऐका आपोऽपि करोति ।")

रणसङ्कुल, क्ली (रणस्य सङ्कुलम् ।) युद्धम् । इत्यमरः । २ । ८ । १ ।

रणसहाय, पुं (रणस्य सहायः ।) कड़म्बो । इति राजनिघण्टः ।

रक्त, त्रि (रम्+"अमन्तात् ड।" उणा १।११३। इति ड।) अहृचमानविच्छिन्नाय
यव। धर्ष। इति यन्त्रिमणारीमादिरुति॥
रण्डक, पुं, (रण्ड इवेति। रण्ड+कन्।) अफल
द्रुम। इति शब्दचन्द्रिका॥
रण्डा, स्त्री (रमन्तेऽनेनेति। रम्+"अमन्तात्
ड।" उणा १।११३। इति ड। टाप्।)
मूषिकपर्णी। इत्यमर। २।४।८८। (यथा,
"इक्षुणात सम्पर्क सूत पालिधारयमहितम्।
रण्डाद्योषितशम्यच तैलैव कण्वमौत्तलम्॥"
इति वैद्यकरसेन्द्रसारसंग्रहे हृद्रोगनाशरसे।)
विधवा। राँड इति भाषा। यथा। तिष्ठत
रण्डा विकर्मस्येभ्य स्वच्छन्द चलत्यपि।
इति अग्निपुराणे लिङ्गलपाद॥
रण्डाश्रमी [न्] पुं, (रण्डो विफल आश्रम
यस्य। रण्डाश्रम+इनि।) अष्टचत्वा
रिंशद्वर्षोपरि भार्याविहीन। यथा, भवि
ष्यपुराणम्।
"चत्वारिंशद्वत्सराणां सार्द्धानाथ परे यदि।
स्त्रिया वियुज्यते कश्चित् स तु रण्डाश्रमी मत॥"
इत्युद्वाहतत्त्वम्॥
रतं क्ली, (रमणमिति। रम्+भावे क्त।)
मैथुनम्। इत्यमर। २।७।५७। (यथा,
आर्य्यासप्तशत्याम्। ५४९।
"विपरीतमपि रतं न कोर्णे मया दयाद्युक्त
मिदम्।
तटतटमिव मम हृदय कदलमपि वेगतो
हरति॥"
तत्तु द्विविधम्। यथा कामशास्त्रम्।
"बाह्यमाभ्यन्तरश्चेति द्विविधं रतमुच्यते।
तत्राद्यं चुम्बनाश्लेषनखदन्तक्षतादिकम्॥
द्वितीयं सुरतं साक्षात्मभावादरेण कल्पितम्॥")
गुह्यम्। इति मेदिनी। ते, ४८। अनुरक्ते त्रि।
(यथा, राजतरङ्गिण्याम्। ३।५५।
"नतुलागुणनिर्भिन्ना सद्विपक्षस्तुतो रता॥"
नियुक्त। यथा, मनु। २।२९९।
"बालवृद्धौ जीवेद्दुःखावमान्य समाचरेत्।
तैलेन विप्र शुभदो कुर्यात् प्रियहिते रत॥")
रतकील पुं, (रतौ मैथुने कीलति परस्परं संबध्ना
तीति। कील+क।) कुक्कुर। इति हेम
चन्द्र। ४।३४६। (रतस्य कील।) सुरत
काङ्क्षया।
रतकूजित, क्ली, (रतस्य कूजितम्।) मैथुन
कालीनशब्द। तत्पर्य्याय। मणितम् २। इति
हेमचन्द्र॥
रतगुरु, पुं, (रतस्य रतौ वा गुरु।) पति।
इति त्रिकाण्डशेष। ६।४४॥
रतज्वर, पुं (रतेन ज्वरोऽस्य।) काक।
इति त्रिकाण्डशेष॥
रततापी [न्] पुं (रतौ तपति प्रतिदिन कामी
इति। तप+णिनि।) विदूषक। इति शब्द
माला॥
रतताली, स्त्री, (रतौ ताल प्रतिष्ठास्या। ङीष्।)
कुट्टनी। इति त्रिकाण्डशेष॥
रतनारीच, पुं, (रतौ नार्य्यो चिनोतीति।
चि+ड।) नारीणां प्रीतिकार। कुक्कुर।
स्मर। इति मेदिनी। चे, २९। विट।
इति शब्दमाला॥
रतनिधि पुं (रतमेव निधिवत् गोप्यं यस्य।)
खञ्जन। इति शब्दरत्नावली॥
रतहिण्डक पुं, (रतस्य आहिण्डक। पीठादिभावेति
कप।) दिवस। सुरसागमम्। अष्टमङ्गलम्।
इति मेदिनी। के, २९॥
रतबन्ध, पुं, (रतेन बन्धोऽस्य। रत बन्ध इव कर
दायकं यस्येति वा।) कुक्कुर। इति हेम
चन्द्र। ४।३४६॥
रतयायी [न्] पुं (रतेन याति तद्रूकरोत्याक्रम
मिति। या+णिनि।) कुक्कुर। इति हेम
चन्द्र। ४।३४६॥
रतहिण्डक, पुं, (रतौ रतार्थं वा हिण्डते इति।
हिण्ड+ण्वुल्।) स्त्रीचौर। इति त्रिकाण्ड
शेष। लम्पट। लोचा इति भाषा। तत्
पर्य्याय। विट २ धनीक ३ पल्लव ४
नायक ५ भुजङ्ग ६ षुभक ७ षिङ्ग ८
भट्ट ९ नारीतरङ्गक १० छलिक ११
रतनारीच १२ कमक १३ रतताली १४
कटार १५ कामी १६ खेटो १७ नागर १८
दासीप्रिय १९ कुक्कुट २०। इति शब्द
माला॥
रताङ्क, पुं, (रतायमङ्क इव।) कुक्कुर।
इति हेमचन्द्र। ४।३४६॥
रताम्बी, स्त्री, (रतौ अम्बीव।) कुट्टनी।
इति त्रिकाण्डशेष॥
रतामद पुं, (रतौ रतकाले आमदोऽस्य।)
कुक्कुर। इति शब्दमाला॥
रतायनी स्त्री, (रतमेवायनं जीवनमतिर्यस्या।)
वेश्या। इति शब्दमाला॥
रतार्थिनी स्त्री, (रतमर्थयत इति। अर्थ+णिनि।
ङीप्।) मैथुनाभिलाषिणी। इति जटाधर॥
रति स्त्री (रमन्तेऽनया इति। रम्+क्तिन्।)
कामदेवपत्नी। (अस्या कामविलासिता,
कथासरित्सागरे प्रकीर्तिता। ४।८।
"अतो भयाति सर्वेषां भवनानीव कामिनाम्।
तमाश्रम सम्प्राप्य प्रवरान्ति सवीहिका॥
तस्य पुत्रा दामराजानि कामस्य कामिनी रता।
बभूवानीव ललिता सर्व्वेषां प्राणधारिणी।
रतिरभूत् सर्व्वेषां सौ दृष्टा सरिता सतीम्।
रतीति नैव तन्नाम प्रवरान्ति मनीषिण॥")
तस्य उत्पत्तिः कामकारण कामदबोधक यथा
दक्ष उवाच।
"मद्देहजेयं कन्दर्प मद्रूपगुणशालिनी।
एनां गृहाण भार्य्यार्थे भवत सदृशो गुणै॥
एषा तव महातेजा सर्व्वदा सहचारिणी।
भविष्यति यथाकाम धर्म्मतो वशवर्त्तिनी॥"
मार्कण्डेय उवाच।
इत्युक्ता प्रददौ दक्षो देहस्वेदाम्भसोद्भवाम्।
कन्दर्पायाग्रत कृत्वा नाम कृत्वा रतीति
ताम्॥
तां वीक्ष्य मदनो रामां रत्याख्यां सुमनोहराम्।
आत्मीयेनेव विद्धोऽसौ मुमोह रतिरञ्जित॥"
इति कालिकापुराणे ३ अध्याय॥
अनुराग। (यथा भागवते। १।२।८।
"नोत्पादयेद् यदि रतिं श्रम एव हि केव
लम्॥")
रतम्। (यथा कुमारसम्भवे। ८।१८।
"कामिनीं प्रथमयौवनान्विता
मन्दरागमृदुमौक्तिकस्तनाम्।
उन्नतानीं मदनलम्पा या रति
सा न याप्यभवनेऽस्ति मे मति॥")
गुह्यम्। इति मेदिनी। ते। ४८। (अप्सरो
विशेष। यथा, महाभारते। १३।१९।४५।
"विद्युता प्रशमी दान्ता विद्योता रतिरेव च।
एताश्चान्याश्च वै बह्व्य प्रनृत्ताप्सरस शुभा॥"
प्रीति। यथा रामायणे। १।१८।२४।
"तेषां केतुरिव ज्येष्ठो रामो रतिकर पितु॥"
'रति प्रीति।' इति तट्टीकायां रामानुज॥)
रतिबन्धा यथा,—
"न भवन्ति यदा नार्य्यस्तुष्टा बाह्यरते मता।
नानाविधैस्तदा बन्धै रमयेत् कामिनीं प्रिय॥
पद्मासनो नागपाशो लतावेष्टोऽर्द्धसम्पुट।
कुलिशं सुन्दरश्चैव तथा केशर एव च॥
हिल्लोलो नरसिंहोऽपि विपरीतस्तथापर।
क्षुब्धो वै धेनुकश्चैवमुत्कण्ठस्तु तत परम्।
सिंहासनो रतिनागो विद्याधरस्तु षोडश॥"
इति रतिमञ्जरी॥
एतेषां लक्षणानि तत्तच्छब्दे द्रष्टव्यानि॥
रतिकुहरं क्ली, (रत्या कुहरम्।) योनि।
इति त्रिकाण्डशेष॥
रतिक्रिया, स्त्री, (रत्या क्रिया।) मैथुनम्।
तत्पर्य्याय। संवेशनम् २। इति त्रिकाण्डशेष॥
(यथा कामन्दकीये नीतिसारे। ७।५२।
अपि दोषोपचरणं योषित्सु सकर्म्मभि।
प्रमादिर्यं सहितो काले प्रसक्तं रतिक्रिया॥")
रतिगृहं, क्ली, (रत्या गृहम्।) योनि। इति
त्रिकाण्डशेष। रमणमन्दिरञ्च। (यथा कुमार
सम्भवे। ५४।१६।
"पताकाभिर्नामिनं पाल्यादुकं दुर्गन्धदा
काव॥
निचयन प्रायक राजमार्गमध्यमयन॥")
रतिनाग पुं रतिबन्धविशेष।
तस्य लक्षणं यथा—
"योनौ वदत्पृष्ठं कामुक कामिनी यदि।
रतिनाग समाख्यात कामिनीनां मनोहर॥"
इति रतिमञ्जरी॥
रतिपति, पुं (रत्या पति।) कामदेव। इत्य
मर। (यथा, महाभारते आदिपर्व्वणि। १।

"पञ्चात्रियव्रणाश्रितो रतिपतिर्न्यस्य रत्नोत्सवे ।
शिक्षया धमनैर्घर्वै धनुरिषून् पौष्याम् वदन्
मम च ।")
ईश्वरविशेषस्यस्त्रीणां स्थानविशेषे तस्याविभावो
यथा,—
"वाचि श्रीमाधुरीणां कनककलशदृश्याविमीनां
कटाक्षे
न्ते गौडाङ्गनानां सुललितवचने चोतुकाल
प्रेयसीनाम् ।
तैलङ्गीनां नितम्बे सकलधनस्तनौ कैरलीकेश
पाशे
काश्मीरीणां कटौ च स्फुरति रतिपतिर्गुर्जरीणां
जगद्गु ।"
इति साहित्यदर्पणम् ।
रतिपाशक, पुं, (रतेः पाश इव । ततः स्वार्थे कन् ।)
रतिबन्धविशेषः । यथा —
"पीडयेद्दूरयुग्मेन कामुको यदि सुन्दरीम् ।
रतिपाशस्तथाख्यात कामिनीनां सुखावहः ।"
इति स्मरदीपिका ।
रतिप्रिय, पुं (रतेः प्रियः ।) कामदेवः । इति
शब्दरत्नावली । सुरतप्रियश्च । (स्त्री, शक्ति
विशेषः । यथा, देवीभागवते । ७ । ३० । ६८ ।
"गोमन्ते गोमती प्रोक्ता मन्दारे रति
प्रिया ।")
रतिमदा स्त्री (रतेर्मदो यस्याः ।) अप्सरः ।
यथा —
"घृताची स्याद्रतिमदा चारुदत्ता सुमध्यमा ।"
इति त्रिकाण्डशेषः ।
रतिमन्दिर क्ली (रतेर्मन्दिरमिव ।) योनिः ।
इति जटाधरः । मैथुनगृहम् । यथा —
"अधारि रतिमन्दिरावधि सखीकर्णावधि
व्याहृतं
चेतः कान्तसमीपवासावधि परन्यासावधि
प्रेक्षितम् ।
हास्यं चाधरपल्लवावधि महामानोऽपि
मौनावधि
चक्षुः कावधि कावधि कुचभुवौ प्रमुखं पर
श्रवणम् ।"
इति रसमञ्जरी ।
रतिमित्र पुं (रतौ मित्रमिव इव ।) रतिबन्ध
विशेषः । तस्य लक्षणं यथा —
"वातयेदूरुयुग्मे च कामुकं यदि कामुकी ।
रतिमित्रस्तदाख्यात कामिनीनां सुखावहः ।"
इति रतिमञ्जरी ।
रतिरमण पुं (रत्याः रमणः ।) कामदेवः । इति
त्रिकाण्डशेषः ।
रतिवृद्ध, क्ली, (रतिं वर्द्धयतीति । वृधि + क्त ।)
विधुवनम् । इति हारावली । ६ ।
रतिसुन्दरा स्त्री (रतौ सुन्दरा ।) चित्रलेखा ।
इति शब्दचन्द्रिका । (विशेषोऽस्याः रति
भाषा ।

रतिसुन्दर, पुं (रतौ सुन्दरः सुखावहः ।)
रतिबन्धविशेषः । तस्य लक्षणं यथा,—
"नारीपदद्वयं कामी धारयेद्धृत्य यत्नतः ।
धृतकण्ठो रमेत् कामी बन्धः स्याद्रतिसुन्दरः ।"
इति रतिमञ्जरी स्मरदीपिका च ।
रत्नू स्त्री (ऋच्छति इति । ऋगतौ बहुल
मौणादिक + "ऋतेरम् च ।" उणा १ । ८४ ।
इति क्रू । अम् च ।) देवजननी । अश्वमाता ।
इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ।
रत्नाकर, पुं, (रत उद्धति प्रापयतीति । उत +
वह + अच् ।) कोकिलः । इति शब्दमाला ।
रत्न, क्ली (रमयति आनन्दयतीति । रम् + णिच् +
"रमेस्त च ।" उणा ३ । १४ । इति न
तकारश्चान्तादेशः ।) माणिक्यादि । मुक्तादि ।
तत्पर्यायः । मणिः २ । रत्नसारः ३ । (यथा,
कुमारे । ५ । ४५ ।
"न रत्नमन्विष्यति मृग्यते हि तत् ।")
स्वजातिश्रेष्ठः । इति मेदिनी । (यथा,
शाकुन्तले । ५ । ४५ ।
"लोके रत्नानि पाण्डवस्य शीलयन्तो दिगादिशम् ।")
माणिक्यम् । वज्रम् । इति राजनिर्घण्टः ॥ *
अथ रत्नोत्पत्तिकारणम् । यथा,—
सूत उवाच ।
"बलनामा दैत्यो रत्नानां कलो नामासुरोऽभवत् ।
इन्द्राद्या निर्जितास्तेन निर्जेतुं तैर्न शक्यते ।
वरव्याजेन पशुतां याचितः स सुरेन्द्रकैः ।
बलो ददौ स्वपशुतामतिसत्त्वो मखे हतः ।
प्रशुवन् विधिना कर्म्मो स्ववाक्यापरिपालितः ।
बलो लोकोपकाराय देवानां हितकाम्यया ।
तस्य सत्त्वविशुद्धस्य सुविशुद्धेन कर्म्मणा ।
कायस्यावयवा सर्व्वे रत्नबीजत्वमाययुः ।
देवानामथ यक्षाणां सिद्धानां पवनाशिनाम् ।
रत्नबीजमथं यत्र सुमहानभवत्तदा ।" *
अथ तस्याकरस्थानानि यथा,—
"तेषान्तु पततां वेगाद्विमानेन विहायसा ।
यद्यत् पपात रत्नानां बीजं क्वचन किञ्चन ।
महोदधौ सरिति वा पर्व्वते काननेऽपि वा ।
तत्तदाकरतां यातं स्थानमाधेयगौरवात् ।
तेषु रक्षोविषव्यालव्याधिघ्नान्यघहानि च ।
प्रादुर्भवन्ति रत्नानि तथैव विगुणानि च ।
वज्रमुक्तामणयः सपद्मरागाः समरकताः
प्रोक्ताः ।
अपि चेन्द्रनीलमणिवरवैदूर्य्याश्च पुष्परागाश्च ।
कर्केतनं सपुलकं रुधिराख्यसमन्वितं तथा
स्फटिकम् ।
विद्रुममणिश्च यत्नादुद्दिष्टं संग्रहे तज्ज्ञैः ॥ *
आकारवर्णौ प्रथमं गुणदोषौ तत्फलं परीक्षा
च ।
मूल्यञ्च रत्नकुशलैर्विज्ञेयं सर्व्वशास्त्राणाम् ।
कुनृपैश्चापवाणां सदि चोपहतेऽपि च ।
दोषैश्चाप्युपसृष्टानि योजनानि सुखप्रदम् ।
दोषैर्यावविरुद्धानां रत्नानां इन्दिरोपमा ।

धारणं यस्य यो वापि कार्य्यं नियमपूर्व्वकम् ।
मान्नला कुशलाश्चापि रत्नभाजः परीक्षकाः ।
त एव मन्त्रमात्राणां वैणारः परिकीर्त्तिताः ।"
इति गारुडे ६८ अध्यायः ॥
विशेषरत्नपरीक्षा तत्तच्छब्दे द्रष्टव्या ॥ * ॥ चतु
र्दश महारत्नानि यथा । धनञ्जयविषये
तत्त्वं च प्रथमिन्द्रचतुर्दशमहारत्नस्वामी
भवत् । चतुर्दश महान्ति रत्नानि यस्य च ।
रत्नानि तु समानितिष्ठानि धर्मसहितानि ।
"चक्रं रथो मणिः खड्गश्चर्म्म रत्नञ्च पञ्चमम् ।
केतुर्निधिश्च सप्तैवमप्राणानि प्रचक्षते ।
भार्य्या पुरोहितश्चैव सेनानी रथकृच्च यः ।
पत्त्यश्वौ कलभश्चेति प्राणिनः सप्त कीर्त्तिताः ।
चतुर्दशेतानि रत्नानि सर्व्वेषां चक्रवर्त्तिना
मिति । इति विष्णुपुराणे ४ अंशे १२ अध्याय
टीका च ॥ (अथ रत्नस्य निरुक्तिः ।
"धनार्थिनो जनाः सर्व्वे रमन्तेऽस्मिन्नतीव यत् ।
ततो रत्नमिति प्रोक्तं शब्दशास्त्रविशारदैः ।"
अथ रत्नस्य नामानि सङ्ख्यानिरूपणञ्च ।
यथा,—
"रत्नं क्लीवे मणिः पुंसि स्त्रियामपि निगद्यते ।
तत्तु पाषाणभेदोऽस्ति मुक्तादि च तदुच्यते ।"
अथ रत्नानां निरूपणम् ।
"रत्नं गारुत्मतं पुष्परागो माणिक्यमेव च ।
इन्द्रनीलश्च गोमेदस्तथा वैदूर्य्यमित्यपि ।
मौक्तिकं विद्रुमश्चेति रत्नान्युक्तानि वै नव ।
रत्न हीरा । गारुत्मत पान्ना । माणिक्य पद्म
राग । इन्द्रनील नीला ।
विष्णुधर्म्मोत्तरेऽपि नवरत्ननिरूपणम् ।
मुक्ताफलं हीरकञ्च वैदूर्य्यं पद्मरागकम् ।
पुष्परागञ्च गोमेदं नीलं गारुत्मतन्तथा ।
प्रवालयुक्तान्येतानि महारत्नानि वै नव ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
रत्नकन्दल, पुं, (रत्नानां कन्दलो नवाङ्कुर इव ।)
प्रवालम् । इति शब्दरत्नावली ।
रत्नकूट पुं (रत्नस्य कूटो यत्र ।) पर्व्वत
विशेषः । इति शब्दरत्नावली । (स्त्री द्वीप
विशेषः । यथा, कथासरित्सागरे । ५४ । ६ ।
"अस्ति द्वीपवरं मध्ये रत्नकूटाख्यमम्बुधेः ।
तत्रप्रतिष्ठितो भक्त्या भगवान् हरिरब्धिना ।")
रत्नगर्भ पुं (रत्नानि गर्भे मध्ये यस्य अधिकारे
यस्य ।) कुबेरः । इति त्रिकाण्डशेषः । (रत्नानि
गर्भेऽस्य ।) समुद्रः । इति राजनिर्घण्टः ।
रत्नगर्भा स्त्री (रत्नानि गर्भे मध्येऽस्याः ।)
पृथिवी । इति हेमचन्द्रः । ४ । २ । उपचारात्
मुक्तागर्भवती च ।
रत्नदीर्घ, क्ली (रत्नैरञ्चितं दीपम् । शाकपार्थिववत्
समासः ।) रत्नविनिर्म्मितदीपम् । यथा —
"विचित्रवस्त्राभरणैर्मण्डितं बालशुक्रविराजिताम् ।
चतुर्भुजां महादेवीं कामकोटिप्रभाम् तथा ।
प्रवालपद्मपाणिपङ्कजविराजिताम् ।
रत्नप्रदीपमाला शोभितां परिशोभिताम् । —

तारान्द्रैमणिगणै र्विचित्रां भवसुन्दरीम् ।
त्रिवलीवलयोपेतनाभिनालम्बलिनीम् ॥
रत्नद्वीपे महाद्वीपे सिंहासनसमन्विते ।
प्रफुल्लकमलारूढ़ां ध्यायेत्तां भवगेहिनीम् ॥"
इति तन्त्रसारे जगद्धात्रीध्यानम् ॥

रत्नधेनु, स्त्री (रत्ननिर्म्मिता धेनुः ।) महादानविशेषः । यथा,—
मत्स्य उवाच ।
"अथातः सम्प्रवक्ष्यामि महादानमनुत्तमम् ।
रत्नधेनुरिति ख्यातं गोलोकफलदं नृणाम् ॥
पुण्यं दिनमथासाद्य तुलापुरुषदानवत् ।
लोकेशावाहनं कृत्वा ततो धेनुं प्रकल्पयेत् ॥
भूमौ कृष्णाजिनं कृत्वा लवणद्रोणसंयुतम् ।
धेनुं रत्नमयीं कुर्य्यात् सङ्कल्प्य विधिपूर्ब्बकम् ।
स्थापयेत् पद्मरागाणामेकाशीतिं मुखे बुधः ।
पुष्परागशतं तद्वद्घोणायां परिकल्पयेत् ॥
ललाटे हैमतिलकं मुक्ताफलशतं दृशोः ।
भ्रूयुगे विद्रुमशतं शुक्ती कर्णद्वये स्मृते ॥
काञ्चनानि तु शृङ्गाणि शिरो वज्रशतात्मकम् ।
ग्रीवायां नेत्रपटलं गोमेदकसमन्वितम् ॥
इन्द्रनीलशतं पृष्ठे वैदूर्य्यशतपार्श्वकौ ।
स्फाटिकैरुदरं कार्य्यं सौगन्धिकशतान्वितम् हृदि ॥
खुरा हेममया कार्य्याः पुच्छं मुक्तावलीमयम् ।
सूर्य्यकान्तेन्दुकान्तौ च घ्राणे कर्पूरचन्दने ॥
कुङ्कुमानि च रोमाणि रौप्यं नाभिञ्च कारयेत् ।
गारुत्मतशतं तद्वदपानेषु परिकल्पयेत् ॥
तथान्यानि च रत्नानि स्थापयेत् सर्व्वसन्धिषु ।
कुर्य्याच्छर्करया जिह्वां गोमयञ्च गुड़ात्मकम् ॥
गोमूत्रमाज्येन तथा दधि दुग्धं स्वरूपतः ।
पुच्छाग्रे चामरं दद्यात् समीपे ताम्रदोहनम् ॥
कुण्डलानि च हैमानि भूषणानि च शक्तितः ।
कारयेदेवमेवन्तु चतुर्थांशेन वत्सकम् ॥
तथान्यानि च सर्व्वाणि पादांशेनानुमानतः ।
नानाफलानि सर्व्वाणि पञ्चवर्णवितानकम् ॥
एवं विरचनं कृत्वा तद्वद्धोमाधिवासनम् ।
ऋत्विग्भ्यो दक्षिणां दत्त्वा धेनुमामन्त्रयेत्ततः ।
गुड़धेनुवदावाह्य इदञ्चोदाहरेत्ततः ॥
त्वं सर्व्वदेवगणधाम यतः पठन्ति
रुद्रेन्द्रविष्णुकमलासनवासुदेवाः ।
तस्मात् समस्तभुवनत्रयदेहयुक्ता
मां पाहि देवि भवसागरपीड्यमानम् ॥
आमन्त्र्य धेनुमभितः परिवर्त्य भक्त्या
दद्याद्द्विजाय गुरवे जलपूर्ब्बकं ताम् ।
यः पुण्यमाप्य दिनमत्र कृतोपवासः
पापैर्विमुक्ततनुरेति पदं मुरारेः ।
इति सकलविधिज्ञो रत्नधेनुप्रदानं
वितरति च विमानं प्राप्य देदीप्यमानम् ।
कलिकलुषविमुक्तो बन्धुभिः पुत्त्रपौत्त्रैः
स हि मदनसरूपः स्थानमभ्येति शम्भोः ॥"
इति मात्स्ये महापुराणे महादानानुकीर्त्तने रत्नधेनुप्रदानिको नाम २८२ अध्यायः ॥

रत्ननिधि, पुं समुद्रः । इति त्रिकाण्डशेषः ॥

रत्नपारायण, क्ली (परायणमेव । स्वार्थे ष्यञ् । रत्नस्य पारायणम् ।) सर्व्वरत्नस्थानम् । यथा —
"बहुदीपद्रुमा चैमा पर्व्वताधित्यका पुरी ।
रत्नपारायण नाम्ना लक्ष्मीति मम मैथिलि ॥"
इति भट्टिः ॥

रत्नप्रभा, स्त्री, (रत्नानां प्रभा यत्र ।) निम्नानां नरकविशेषः । यथा,—
"रत्नशर्करावालुकापङ्कधूमतमःप्रभाः ।
महातमःप्रभा चेत्यधोऽधो नरकभूमयः ॥"
इति हेमचन्द्रः ॥

रत्नमुख्य क्ली, (रत्नेषु मुख्यम् ।) हीरकम् । इति हेमचन्द्रः ॥

रत्नराट [ज] क्ली, (रत्नेषु राजते इति । राज + क्विप् ।) माणिक्यम् । इति राजनिर्घण्टः । रत्नश्रेष्ठञ्च ॥

रत्नवती, स्त्री (रत्नानि सन्त्यस्यामिति । रत्न + मतुप् । मस्य वः । उगित्वात् ङीप् ।) पृथिवी । इति शब्दमाला ॥ (राज्ञो वीरकेतोः कन्या । यथा, कथासरित्सागरे । ८८ । ६ ।
"नन्दयन्त्यभिधानायां पत्न्यां तस्योदपद्यत ।
सुता रत्नवती नाम दैवताराधनार्जिता ॥")

रत्नयुक्त, त्रि । (यथा, रघु । ६ । ४ ।
"परार्द्ध्यवर्णास्तरणोपपन्न
मासेदिवान् रत्नवदासनं सः ॥"
फलदातरि च त्रि । यथा ऋग्वेदे । १ । २८ । ५ ।
"धारयन्तममृतस्य कारवम् ।"
"रत्नवत् रत्नशब्देन स्वर्गादिलक्षणमुत्तमं फलमभिधीयते तद्युक्तं फलप्रदम् ।" इति तद्भाष्ये सायनः ॥)

रत्नवृक्ष क्ली, (रत्नानि वहति प्रीणयतीति । वह + "अन्येभ्योऽपि दृश्यते ।" ३ । २ । १५४ । इति उकञ् ।) पुष्पकरथः । इति शब्दरत्नावली ॥
रत्नशलाकीय, त्रि ॥

रत्नसानु, पुं (रत्नानि सानौ प्रस्थे यस्य ।) सुमेरुपर्व्वतः । इत्यमरः । १ । १ । ५२ ॥

रत्नसू, स्त्री, (रत्नानि सूते इति । सू प्रसवे + क्विप् ।) पृथिवी । इति हेमचन्द्रः । ४ । ३ ॥ (यथा राजतरङ्गिण्याम् । १ । ३२ ।
"त्रिलोक्यां रत्नसूः श्लाघ्या तस्यां धनपतेर्हरित् ।
तत्र गौरीगुरुः शैलो यत्राप्यस्य मण्डलम् ॥"
रत्नसुवर्णकारिन्, त्रि । यथा रघु । १ । ६५ ।
"न मामवति सद्वीपा रत्नसूरपि मेदिनी ॥")

रत्नाकर पुं (रत्नानामाकर उत्पत्तिस्थानम् ।) समुद्रः । इत्यमरः । १ । १० । २ ॥ (यथा महाभारते । १ । २१ । २९ ।
"इत्थं समाधिज्ञ महोर्म्मिमन्तं
रत्नाकरं पश्यत्यानय ख ॥")
रत्नोत्पत्तिस्थानञ्च । (अन्नाकरादावपि विशेषे । यथा राघवपाण्डवीयटीकायाम् ।
"मा स्म धनुषि चमार गाधो रत्नाकरा दर्दि ।
इतीव च हर्षे, धाता कविरत्नाकरोऽभवत् ॥"
स तु अभिनायापर्णिका वक्रोक्तिपञ्चाशिका हरविजयादिग्रन्थप्रणेता । अस्तभानुः शङ्कुविद्याधिपत्यमरणामाप कवि काश्मीरेऽपि अवन्तिवर्म्मणो राज्यकाले सम्भवत । तदा च राजतरङ्गिण्याम् । ५ । ३४ ।
"मुक्ताकणः शिवस्वामी कविरानन्दवर्द्धनः ।
प्रथां रत्नाकरश्चागात् साम्राज्येऽवन्तिवर्म्मणः ॥"
अवन्तिवर्म्मराज्यकालस्तु ७७७ शकाब्दादारभ्य ८०६ शकाब्दपर्य्यन्तमासीदिनतत्कालीन एवायं कविरिति ज्ञायते । रत्नाकरप्रणीत हरविजयाभिध पञ्चाशत्सर्गात्मक महाकाव्यं काश्मीरेषु प्रसिद्धमस्ति ॥)

रत्नाङ्ग पुं (रत्नानामङ्गमिव अङ्गं यस्मिन् ।) विद्रुमः । इति शब्दरत्नावली ॥ (रत्नानामङ्ग ।) रत्नचिह्नञ्च ॥

रत्नाचल, पुं, (रत्ननिर्म्मितः अचलः । शाकपार्थिववत् समासः ।) दानार्थमक्षिप्तपर्व्वतः । यथा,—
"अतः परं प्रवक्ष्यामि रत्नाचलमनुत्तमम् ।
मुक्ताफलसहस्रेण पर्व्वतः स्यादनुत्तमः ॥
मध्यमः पञ्चशतिकस्त्रिशतेनाधमः स्मृतः ।
चतुर्थांशेन विष्कम्भाः पर्व्वताः स्युः समन्ततः ॥
पूर्ब्बेण वज्रगोमेदैर्दक्षिणेनेन्द्रनीलकैः ।
पुष्परागयुतैः कार्य्यो विद्वद्भिर्गन्धमादनः ॥
वैदूर्य्यविद्रुमैः पश्चात् सम्मिश्रो विमलाचलः ।
पद्मरागैः ससौवर्णैरुत्तरेण तु विन्यसेत् ॥
धान्यपर्व्वतवत् सर्व्वमत्रापि परिकल्पयेत् ।
तद्वदावाहनं कृत्वा वृक्षान् देवांश्च काञ्चनान् ॥
पूजयेत् पुष्पवारिभ्यः प्रभाते चाथ पूर्ब्बवत् ।
पूर्ब्बवद्गुरुऋत्विग्भ्य इममन्त्रमुदीरयेत् ॥
यथा देवगणाः सर्व्वे सर्व्वरत्नेष्ववस्थिताः ।
त्वञ्च रत्नमयो नित्यमतः पाहि महाचल ॥
यस्माद्रत्नप्रदानेन तुष्टिं प्रकुरुते हरिः ।
सदा रत्नप्रदानेन तस्मान्नः पाहि पर्व्वत ॥
अनेन विधिना यस्तु दद्याद्रत्नमहागिरिम् ।
स याति वैष्णवं लोकममरेश्वरपूजितः ॥
यावत् कल्पशतं साग्रं वसेदिह नराधिप ।
रूपारोग्यगुणोपेतः सप्तद्वीपाधिपो भवेत् ॥
ब्रह्महत्यादिकं किञ्चिद्यदत्रामुत्र वा कृतम् ।
तत् सर्व्वं नाशमायाति गिरिर्वज्रहतो यथा ॥"
इति मात्स्ये ९ अध्यायः ॥

रत्नाभरण क्ली (रत्नस्य प्रचुराभरणम् ।) मणिमयालङ्करणम् । तत्पर्य्यायः जड़ावा गहना इति भाषा ॥ तस्य धारणगुणाः ।
"धर्म्यं यशस्यमायुष्यं श्रीमत्प्रमदसम्मतम् ।
हर्षणं कार्म्मणञ्चैव रत्नाभरणधारणम् ॥"
इति राजवल्लभः ॥

रत्नि, पुं (ऋच्छति प्राप्नोतीति । ऋ + "ऋतन्यञ्जि" उणा० ४ । २ । इति कनिन् ।) बद्धमुष्टिहस्तः । इत्यमरः । २ । ६ । ८६ ॥ मुट्टम् बांध इति भाषा ॥ कनिष्ठी

रथारूढो रथस्थे। इति भरतः॥ (यथा, महाभारते। ८। ७४। २०।
"अदूरविभ्रंशकामाकृष्टोरस्य मृदुस्वेद॥")
रथम्, क्ली, (रतिरघम्।) योनिः। इति शब्दरत्नावली॥
रथ, पुं (रमतेऽनेनात्र वा। रम् + "हनिकुषिनीरमिकाशिभ्यः क्थन्।" उणा० २।२। इति क्थन्। अनुनासिकलोपश्च।) यानम्। (यथा, गीतायाम्।
"आत्मानं रथिनं विद्धि शरीरं रथमेव च॥")
चरणः। वेतसवृक्षः। इति मेदिनी॥ (अस्य पर्यायो यथा,—
"वेतसो वञ्जुलः प्रोक्तो वानीरो मधुलस्तथा। अभ्रपुष्पश्च विदुलो रथः शीतश्च कीर्त्तितः॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)
तिनिशवृक्षः। इति राजनिर्घण्टः॥ अथ विविधयुद्धाद्ययानम्। तत्पर्य्यायः। शताङ्गः २ स्यन्दनः ३। इत्यमरः। २। ८। ५१॥ स्यन्दनमानम्। रथनयः॥ (यथा मनुः। ८। २९५।
"स चेत्तु पथि संरुद्धः पशुभिर्वा रथेन वा। प्रमापयेत् प्राणभृतस्तत्र दण्डोऽविचारितः॥")
तद्वारा भ्रमणगुणाः।
"स्वप्नचरणेनादैश्रमघ्नं वातकोपनम्। त्रिदोषकरगम्भीरो मध्य वह्निविवर्द्धनम्॥"
इति राजवल्लभः॥ * ॥
रथविशेषाणां नामानि यथा,—
"युद्धार्थे चक्रवद्याने शताङ्गः स्यन्दनो रथः। क्रीडार्थे पुष्यरथो देवार्थेषु मरुद्रथः। योग्यो रथो वैनयिकोऽभ्यरथः परियानिकः। कर्णीरथः प्रवहणं डयनं रथगर्भकः। अनस्तु शकटोऽथ स्यात् गन्त्री कम्बलिवाह्यकम्। अथ कम्बलवस्त्राद्यैः परिवीते रथे। नवात्कम्बलेन स्यात् नवीनः पाण्डुकम्बली। स तु द्वैपो वैयाघ्रश्च यो द्वीपिचर्मणा वृतः॥"
इति हेमचन्द्रः॥
गोलोकस्थ रथो यथा —
"प्रदत्तं विश्वकर्म्मभिर्निर्मितम् सुशोभनम्। लक्षकान् योजनोच्चा तु चतुर्योजनविस्तृतः॥ रत्नेन्द्रसारनिर्माणं सहस्रचक्रसंयुतम्। ...
रत्नदर्पणसंयुक्तं रत्नाभरणभूषितम्। रत्नकुम्भनिरङ्कुशं ...
श्वेतचामरसंयुक्तं वह्निशुद्धांशुकान्वितम्। पारिजातप्रसूनानां मालाजालविराजितम्।
... मनोयायि मनोहरम्। वेष्टितं चारुचित्रेण नानाचित्रविभूषितैः।
... रत्नकुम्भाग्रभागिते। ... समन्तात् ...
... नैवेद्यैरुपशोभिते। ...
... तत्र रथं परम्। रत्नसारेण निर्मितं कल्पकाननिर्मितम्।
विश्वमाया इति यथा ... मनोहरम्।
मधुराभिः ... ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १८ अध्यायः॥
देव्या रथयात्रा यथा,—
ब्रह्मोवाच।
"भूयश्च सम्प्रवक्ष्यामि देव्याराधनमुत्तमम्। यत् कृत्वा सर्वकामानां प्राप्तिसिद्धिर्भविष्यति॥ दशिन्द्रमासमध्ये ... सुशोभने। विचित्रमहारत्नाद्यैर्मणिभिः समशोभिते॥ रथमत्र कारयेद्दिव्यं सप्तभौमं मनोहरम्। कुसुमस्वर्णरत्नाढ्यमत्यन्तशोभितम्॥ घण्टाकिङ्किणिजालाढ्यं चामरैः कटकान्वितम्। पताकाध्वजशोभाढ्यं रथश्चैवमशोभितम्॥ तं रथं पूजयेत्तत्र चारुकुसुममालिके। पारिजातप्रसूनैश्च चम्पकैः सचन्दनैः॥ कुसुमभूषिते कृत्वा देवीं तत्र निवेशयेत्। प्रतिमां शोभनां तत्र मत्स्यान् ... कुमारीम्॥ पूजयेद्रथविन्यस्तां सर्वमङ्गलमङ्गलाम्। दुर्गा कात्यायनी देवी वरदा विन्ध्यवासिनी॥ निशुम्भशुम्भमथनी महिषासुरघातिनी। प्रसीदन्तु सदा मेऽस्तु यच्च यो वाञ्छितं शुभम्॥ अनेन वह्निपूर्वेण नमस्कारस्तवेन च। पूजयित्वा ततो देवी समस्तावरणात्मके॥ पञ्चमी सप्तमी पूर्वा नवम्येकादशीषु च। तृतीयाश्विन्यामश्विनीपुष्पयुक्तासु च॥ मघाद्यन्त्यादशीसंयुक्तामश्वयुक्तासु च। तत्र सकलपरिवार्य सम्यग्रथेविनिर्मितम्॥ शैलं वा मार्ज्जनं वापि कृत्वा वस्तुविचारितम्। धर्मे वसनपूर्णं वस्त्रशोभासमन्वितम्॥ पुरं च कारयेत्तत्र यथादृष्टां प्रचक्षिरे। महाध्वजपताकाभिर्महाशोभिः समन्विताम्॥ सर्वाश्च प्रावकैर्देवी समलङ्कृत्य पूजयेत्। एवमादि तत्र सर्वे सर्वाङ्गेषु समाचरन्॥ भूयो देवालयं तस्य समेत्य त्रानेन तत्र च। रथ मां विभूतिभ्यो यति यत्र वदा प्रियम्॥ सामग्रीतस्य यदि। सर्वकामाद्यवाप्नुयात्। अनेन विधानेन सर्वकामान् प्रयच्छति। एवं कृत्वा यदि तत्र तथा देवीरथं चरेत्। विश्वदेवभवभोगि तु समस्ते समशोभिताम्। ततस्तां पूजयेद्देवीं हैमवत्यैव साम्बवे। सकलैश्च सहसैव मन्दिरं समुपरिते। समन्ततः कलशैः ... रथ घन्टे। स्थापयेदेकमेकैव रत्नकेशरेण ते। देवमञ्चमध्ये सर्वशब्दध्वनिमन्त्रे। वेदध्वनिसमन्वितैः शङ्खादितूर्यनिर्घोषैः। स्थापयित्वा ततो देवीं विमर्द्दोपवने शुभे। सोमवासिनी पट्टदेविका विशोभिते। सर्व्वैरदिव्यवस्त्रैः मत्स्यैः मांसैः। सर्वमाल्यानुलेपनैर्वस्त्रैरलङ्कृत्य। प्रवेशयेद्रथेनैव प्रवेशे कलशे धरेत्। तथा कर्पूरधूपैश्च चन्दने कुङ्कुमेन च। सौरभेयाजनसम्बन्धैः नैवेद्यैः पूजयेत्।
हेमवेलादिभिर्मालैर्दिव्ये रत्नमालैरनेकधा। वासोभिः सुमनोभिश्च पुष्पधूपैः स्रगुत्तमैः। मण्डपेन तथा कन्या द्विजातीनां पूजितान्। भक्षभोज्यान्नपानेन तत्र सर्वान् प्रतोषयेत्। भोजयित्वा च प्रायेण इति मे पौराणिकाः। रथे कृत्वा तथा देवीं पुनरेव स्वयं वयेत्। मङ्गलाख्यं मङ्गलाभिर्मङ्गलाभिः स्वने। प्रासादैः सर्वं पुष्पधूपैर्विलेपने। प्रविश्य माल्यै कथाभिः स्तोत्रैर्मङ्गलवाद्यैः। सन्निधाय यथा पीठं कृत्वा पदं प्रयत्निरे। पुरस्थोऽपि यदि ग्रामी राष्ट्रीयो राष्ट्रे यदि। कारयेत् तथा तत्र सर्वदा विचारयन्। अश्वमेधस्तथा चाप्रियाम् प्राप्नुयाद्विपुलम्। अनन्तता विशोकस्था सर्वाः ... । अकालकौमुदी तत्र रथयात्रां तु कारयेत्। सर्वदा सर्वदेवेषु मधुराद्यैः प्रतिष्ठिता। रथयात्रा यदा तत्र सुरैः सर्वैः सदा कृता। तथा किन्नरगन्धर्वैः यक्षराक्षसविद्याधरैः। रथयात्राप्रभावेण मोदन्ते दिवि देवताः। प्राप्नोति रथयात्रायां दर्शनं स्मरणं नरः। एष्यो दिव्यविमानस्था रथयात्राप्रभावतः। लोकस्थे विविधैर्भोगैः सर्व्वातङ्कविवर्ज्जिताः। तथा समाप्य देवेन रथयात्राकरो भवेत्। प्रियावासु प्रियदारस्तु पदमेव समाचरेत्॥
अगस्त्य उवाच।
रथयात्रायां पुण्यं ममको वालकस्य तु। पूर्वं यत् कथितं तात तत्रो सर्वं समासतः। कामिनो नाम मन्देवो दशोमद्वादशात्तमम्। न भवेत् प्रजनमानादपि भक्तिमान् तुरङ्गम॥ स तत्र यातः सौभाग्यं पुत्रपौत्रसमन्विताम्। समीपे नाम सर्वत्र रक्षेत् स प्रवीरकः॥ स्वदेशे हते राज्ये पुरा प्रजापालितः। वसत्स पुत्रप्रासितस्य च सामुदाः। युद्धे ग्रामे कृता तेन तथा मुला च विषतोः। सुखदायदर्वासुदरयुदरैः सिरसिस्मृतिः शुभा॥"
इति देवीपुराणे रथयात्राविधानाध्यायः
२८ अध्यायः॥*॥ सप्तराज्ञो रथा यथा —
"योजनानां सहस्राणि भास्करस्य रथो नव। ईषादण्डस्तथैवास्य द्विगुणो मुनिसत्तम॥ सार्द्धकोटिस्तथा सप्त नियुतान्यधिकानि तु। योजनानां तु तस्याक्षस्तत्र चक्रं प्रतिष्ठितम्॥ त्रिनाभिमतिपञ्चारे षण्नेमिन्यक्षयात्मके। संवत्सरमयं कृत्स्नं कालचक्रं प्रतिष्ठितम्॥ चत्वारिंशत्सहस्राणि द्वितीयोऽक्षो विवस्वतः। पञ्चान्यानि तु सार्द्धानि स्यन्दनस्य द्विजोत्तम॥ अक्षप्रमाणमुभयोः प्रमाणं तद्युगार्द्धयोः। ह्रस्वोऽक्षस्तद्युगार्द्धञ्च ध्रुवाधारं रथस्य वै। द्वितीयेऽक्षे तु तच्चक्रं संस्थितं मानसाचले॥ हयाश्च सप्त छन्दांसि तेषां नामानि मे शृणु। गायत्री च बृहत्युष्णिक् जगती पङ्क्तिरेव च। अनुष्टुप् त्रिष्टुबित्युक्ताश्छन्दांसि हरयो रवेः॥"
इति विष्णुपुराणे २ अंशे ८ अध्यायः॥

'रथस्त्रिचक्रः सोमस्य कुन्दाभास्तस्य वाजिनः ।
वामदक्षिणतो युक्ता दश तेन निशाकरः ।
वीथ्याश्रयाणि चरति नक्षत्राणि रविर्यथा ॥२॥
सोमपुत्रस्य चाष्टाभिर्वाजिभिर्वायुवेगिभिः ।
वारिजैः स्यन्दनो युक्तस्तेनासौ याति सर्व्वतः ॥३॥
शुक्रस्य भूमिजैरश्वैः स्यन्दनो दशभिर्वृतः ॥४॥
अष्टाभिश्चाथ भौमस्य रथो हैमः सुशोभनः ॥५॥
बृहस्पतेरथाष्टाश्वः स्यन्दनो हेमनिर्म्मितः ॥६॥
रथस्तमोमयोऽष्टाश्वो मन्दस्यायसनिर्म्मितः ॥७॥
स्वर्भानोर्भास्करारेश्च तथा षड्भिर्हयैर्वृतः ॥८।९॥
एते महाग्रहाणां वै समाख्याता रथा नव ।
सर्व्वे ध्रुवे महाभागा निबद्धा वायुरश्मिभिः ॥
ग्रहर्क्षताराधिष्ण्यानि ध्रुवे बद्धान्यशेषतः ।
भ्रमन्ति भ्रामयन्त्येनं सर्व्वाण्यनिलरश्मिभिः ॥"
इति कौर्म्मे ४ अध्यायः ॥ * ॥
श्रीजगन्नाथदेवस्य रथ यात्राशब्दे द्रष्टव्यः ॥ * ॥
(त्रिपुरदहनार्थं महेश्वरादिष्टा देवा येन प्रकारेण तद्रथं निर्म्मितवन्तस्तदाह । मात्स्ये । १३३ । १३—७१ ।
"त्रिनेत्र एवमुक्तस्तु देवैः शक्रपुरोगमैः ।
उवाच देवान् देवेशो वरदो वृषवाहनः ॥
अपगच्छतु वो देवा महद्दानवजं भयम् ।
तदहं त्रिपुरं धक्ष्ये क्रियतां यद्ब्रवीमि तत् ॥
यदीच्छथ मया दग्धुं तत् पुरं सहदानवम् ।
रथमौपयिकं मह्यं सज्जयध्वं किमास्यते ॥
दिग्वाससा तथोक्तास्ते सपितामहकाः सुराः ।
तथेत्युक्त्वा महादेवं चक्रुस्ते रथमुत्तमम् ॥
धरां कूबरकौ द्वौ तु रुद्रपार्श्वचरावुभौ ।
अधिष्ठानं शिरो मेरोरक्षो मन्दर एव च ॥
चक्रुश्चन्द्रञ्च सूर्य्यञ्च चक्रे काञ्चनराजते ।
कृष्णपक्षं शुक्लपक्षं पक्षद्वयमयीश्वराः ॥
रथनेमिद्वयं चक्रुर्देवा ब्रह्मपुरःसराः ।
आदिद्वयं पद्मयक्षं यक्षलेताश्च देवताः ॥
कम्बलाश्वतराभ्याञ्च नागाभ्यां समवेष्टितम् ।
भार्गवश्चाङ्गिराश्चैव बुधोऽङ्गारक एव च ॥
शनैश्चरस्तथा चात्र सर्व्वे ते देवसत्तमाः ।
वरूथं गगनं चक्रुश्चारुरूपं रथस्य ते ॥
कृतं द्विजिह्वनयनं त्रिवेणुं शातकौम्भिकम् ।
मणिमुक्तेन्द्रनीलैश्च वृतं ह्यष्टमुखैः सुरैः ॥
गङ्गा सिन्धुः शतद्रुश्च चन्द्रभागा इरावती ।
वितस्ता च विपाशा च यमुना गण्डकी तथा ॥
सरस्वती देविका च तथा च सरयूरपि ।
एताः सरिद्वराः सर्व्वा वेणुसंज्ञाः कृता रथे ॥
धृतराष्ट्राश्च ये नागास्ते च वेण्वात्मकाः कृताः ।
वासुकेः कुलजा ये च ये च रैवतवंशजाः ॥
ते सर्व्वे दर्पसम्पूर्णाश्चापतूणमभूमगाः ।
अवतस्थुः शरा भूत्वा नानाजातिप्रभाननाः ॥
सुरसा सरमा कद्रूर्विनता शुचिरेव च ।
तृषा बुभुक्षा सर्व्वोग्रा मृत्युः सर्व्वशमस्तथा ॥
ब्रह्मवध्या च गोवध्या बालवध्या प्रजाभयाः ।
गदा भूत्वा शक्तयश्च तदा देवरथेऽभ्ययुः ॥
युगं कृतयुगञ्चात्र चातुर्होत्रप्रयोजकाः ।
चतुर्वर्णाः सलीलाश्च बभूवुः स्वर्णकुण्डलाः ।
तद्युगं युगसङ्काशं रथशीर्षे प्रतिष्ठितम् ।
धृतराष्ट्रेण नागेन बद्धं बलवता महत् ॥
ऋग्वेदः सामवेदश्च यजुर्व्वेदस्तथापरः ।
वेदाश्चत्वार एवैते चत्वारस्तुरगा भवन् ॥
अन्नदानपुरोगाणि यानि दानानि कानिचित् ।
तान्यासन् वाजिनां तेषां भूषणानि सहस्रशः ॥
पद्मद्वयं तक्षकश्च कर्कोटक-धनञ्जयौ ।
नागा बभूवुरेवैते हयानां वालबन्धनाः ॥
ओङ्कारप्रभवास्ता वा मन्त्रयज्ञक्रतुक्रियाः ।
उपद्रवाः प्रतीकाराः पशुबन्धेष्टयस्तथा ॥
यज्ञोपवाह्यान्येतानि तस्मिन् लोकरथे शुभे ।
मणिमुक्ताप्रवालैस्तु भूषितानि सहस्रशः ॥
प्रतोदोङ्कार एवासीत् तदग्रञ्च वषट्कृतम् ।
सिनीवाली कुहू राका तथा चानुमती शुभा ॥
योक्त्राण्यासंस्तुरङ्गाणामपसर्पैकविग्रहाः ।
कृष्णान्यथ च पीतानि श्वेतमाञ्जिष्ठकानि च ।
अवदाताः पताकास्तु बभूवुः पवनेरिताः ॥
ऋतुभिश्च कृतं षड्भिर्धनुः संवत्सरोऽभवत् ।
अजरा ज्याभवच्चापि साम्बिका धनुषो दृढा ॥
कालो हि भगवान् रुद्रस्तञ्च संवत्सरं विदुः ।
तस्मादुमा कालरात्रिर्धनुषो ज्याऽजराभवत् ॥
सगर्भं त्रिपुरं येन दग्धवान् स त्रिलोचनः ।
स इषुर्व्विष्णुसोमाग्नित्रिदैवतमयोऽभवत् ॥
आननं ह्यग्निरभवच्छल्यं सोमस्तमोनुदः ।
तेजसः समवायोऽथ इषोस्तेजो रथाङ्गधृक् ॥
तस्मिंश्च वीर्य्यवृद्ध्यर्थं वासुकिर्नागपार्थिवः ।
तेजःसंवसनाय वै मुमोचातिविषो विषम् ॥
कृत्वा देवा रथञ्चापि दिव्यं दिव्यप्रभावतः ।
लोकाधिपतिमभ्येत्य इदं वचनमब्रुवन् ॥
सज्जितोऽयं रथोऽस्माभिस्तव दानवशत्रुजित् ।
इदमापत्परित्राणं देवान् सेन्द्रपुरोगमान् ॥
तं मेरुशिखराकारं त्रैलोक्यरथमुत्तमम् ।
प्रशस्य देवान् साध्विति रथं पश्यति शङ्करः ॥
सुदृष्ट्वा रथं साधु साध्वित्युक्त्वा मुहुर्मुहुः ।
उवाच चेन्द्रानमरानमराधिपतिः स्वयम् ॥
यादृशोऽयं रथः क्लृप्तो युष्माभिर्मम सत्तमाः ।
ईदृशो रथसम्पत्त्या यन्ता शीघ्रं विधीयताम् ॥
इत्युक्ता देवदेवेन देवा विद्धा इवेषुभिः ।
अवापुर्महतीं चिन्तां कथं कार्य्यमिति ब्रुवन् ॥
महादेवस्य देवेभ्यः को नाम सदृशो भवेत् ।
मुक्त्वा चक्रायुधं देवं सोऽप्यस्य इषुमाश्रितः ॥
धुरि युक्ता इवोक्षाणो घटन्त इव पर्व्वते ।
निःश्वसन्तः सुराः सर्व्वे कथमेतदिति ब्रुवन् ॥
अहं सारथिरित्युक्त्वा जग्राहाश्वांस्ततः प्रभुः ॥
ततो देवैः सगन्धर्व्वैः सिंहनादो महान् कृतः ।
प्रतोदहस्तं सम्प्रेक्ष्य ब्रह्माणं सूततां गतम् ॥
भगवानपि विश्वेशो रथस्थे वै पितामहे ।
उद्यतः स एवं युक्त्वा आरोह रथं हरः ।
आरोहति रथं देवे ह्यश्वा हरभरातुराः ।
जानुभिः पतिता भूमौ रजोग्रासञ्च चक्रिरे ।
देवो दृष्ट्वाथ वेदाश्वानभीषुधरवान् भवान् ।
उज्जहार पितृमानान् सुपुत्र इव दुःखितान् ।
ततः सिंहरवो भूयो बभूव रथभैरवः ।
जयशब्दश्च देवानां सम्बभूवार्णवोपमः ॥
तदोङ्कारमयं गृह्य प्रतोदं वरदः प्रभुः ।
स्वयम्भुः प्रययौ वाहाननुमन्त्र्य यथाजवम् ।
ग्रसमाना इवाकाशं मुष्णन्त इव मेदिनीम् ।
मुखेभ्यः ससृजुः श्वासानुच्छ्वसन्त इवोरगाः ॥
स्वयम्भुवा चोद्यमानाश्चोदितेन कपर्द्दिना ।
व्रजन्ति ते हया जवात् क्षयकाल इवानिलाः ॥
ध्वजोच्छ्रयविनिर्म्माणे ध्वजयष्टिमनुत्तमाम् ।
आक्रम्य नन्दी वृषभस्तस्थौ तस्मिञ्छिवेच्छया ॥
भार्गवाङ्गिरसौ देवौ दण्डहस्तौ रविप्रभौ ।
रथचक्रे तु रक्षेते रुद्रस्य प्रियकाङ्क्षिणौ ॥
शेषश्च भगवान् नागः अनन्तोऽनलकरोऽरि-
हाम् ।
शरहस्तो रथं याति शयनं ब्रह्मणस्तदा ।
यमस्तूर्णं समास्थाय महिषञ्चातिदारुणम् ।
द्रविणाधिपतिर्व्यालं सुराणामधिपो द्विपम् ।
मयूरं शतचन्द्रञ्च कूजन्तं किन्नरं यथा ।
गुह आस्थाय वरदो जुगोप स्वरथं पितुः ।
नन्दीश्वरश्च भगवान् शूलमादाय दीप्तिमत् ।
पृष्ठतश्चापि पार्श्वाभ्यां लोकस्य नयनद्युतिः ।
प्रमथाश्चाग्निसङ्काशाः सादित्याला इवाचलाः ।
अनुजग्मू रथं शर्व्वं नक्रा इव महार्णवम् ॥

भृगुभरद्वाजवसिष्ठगौतमाः
क्रतुः पुलस्त्यः पुलहस्तपोधनाः ।
मरीचिरत्रिर्भगवानथाङ्गिराः
पराशरागस्त्यमुखा महर्षयः ॥
हरमजितमजं प्रतुष्टुवु-
र्व्वचनैर्व्विचित्रविभूषणैः ।
रथस्त्रिपुरे सकाञ्चनाचलो
व्रजति सपक्ष इवाद्रिरम्बरे ॥
करिगिरिरविमेघसन्निभाः
सजलपयोदनिनादनादिनः ।
प्रमथगणाः परिवार्य्य देवगुप्तं
रथमभितः प्रययुः सदर्पयुक्ताः ॥
मकरतिमितिमिङ्गिलावृतः
प्रलय इवातिसमुद्धतोऽर्णवः ।
व्रजति रथवरोऽतिभास्वरो
ह्यशनिनिपातपयोदनिःस्वनः ॥"७१॥)

अथ ज्योतिर्विदाभरणे रथकर्म्माह ।
"सोमर्क्षमृदुक्षिप्रचरेषु
स्वन्द्वात्तिथिविधिमवाप्य ।
श्रेयकृद्रथविधानमथो
वाजिराजिरिति वाजिभिरद्य ॥"
अथ रथक्रमाह ।
"जन्मर्क्षवरकोष्ठपरस्थे
इन्दुवर्जमखिले गगनस्थे ।
चक्रपार्श्वनिगमभ्रमणञ्च
दाविमध्यमक वकन्यावथम् ।
चक्रमिश्रादि वक्रचिन्हा-
कूरोऽरि च शयोऽय रत्नहि ॥"

न स्वीयचक्रतिरस्करधाम्नी
भैमिरिह्मनसो मनु गर्भे ॥"
अथ शुक्रग्रगणवतां रथक्रमम् ।
"पुष्ये पुनर्वसुज्येष्ठानुराधा रेवती हयौ ।
मघासु'श्विभि श्रवणमिलन रोहिण्योत्तरे ।
शाक सौम्येन सौम्यविक्रमे रथकर्मा मत् ॥"
अथ ज्योतिः शास्त्रे रथचक्रम् ।
"रथाकार लिखित्वा च भानुभादौ विलोकयेत् ।
रथाग्र त्रीणि रथाक्षि हादशानि प्रज्ञापयेत् ॥
सन्नि स्थुल्यन्ते च यक्षे वत्स्यनि मदस्तमम् ।
रथाग्रे च महोत्सवार्त मथि चैव सुखवरम् ॥"
रथाग्रेषु ज्योतिर्विदश्मधराग्रेय सुखा शुभा दिशः ॥ ० ॥ अस्यार्थः । अथाधस्तात् धीरा रथ्यानां रथाग्रो ज्योतिर्भी सम्पूर्ण विधाय कार्येसाह्य कथयन्ति । किन्तु तावद्यानि ज्ञानि पुनर्वसु मघया धनिष्ठा श्रवणमिषा रथानि । मध्यमानि स्वातिरा रेवती चित्रा अनुराधा एतानि । अशुभ यानि हस्ता अश्विनी पुष्या अभिजित एतानि । निष्फलान्युक्तानि ज्येष्ठा श्री मघा मरु रोहिणी हस्तेषु मध्येषु । पुन केषु धनिष्ठासु हस्तःसर्व तेन तत्र धर्मामानेषु । अनो शुभप्रदानां ग्रुणु धारेषु । पुन कथितुं धातुराशिवर्ति शुभपक्षरायिधृत्य अङ्कि लभे जनि । पुन के वर्षा वो यमम ज्ञात्वा अतु अतुर्थं तथा सप्तम एतन्नवमो साधुभि शुभपक्षेरिति । अथ रथचक्रे गणनाप्रकारम् । उच्यते । उत्पत्ति एतस्य करं कियर्थ कोर्थं वाम पूर्वे एकाभक्षीयनभागपरद यस्य तत्र नक्षत्रेति तस्मात् अथ तु सूर्य कालवन्धात् अवश नक्षत्र नमस्तक तस्मादात् अधमान्मारभ्य आदिमध्ये मध्य भागमध्ये सुखिता भवान्मर्थ भवत्र देव ज्ञात्वोत्तरीय हिमार्थं वामावर्त दक्षमार्गे नवभिभागैः स्थिरमिति मात्रा । पुन किंभूत श्वभागान्निविनश्य वामभागेन वाप्रभाग इति । अथास्य फलम् । अत्र शुक्रस्य स्थापि अथमानर्थमान चन्द्रपद्मे कर्तृत्व पुष्ट भवति । क्रूरेष्वपि शुभयदाते वन मानवपक्षे अन्तो जनि मरण भवति । रथाङ्गे चक्रपुरो जयो भवति । अग्निभे यन्ति गतमध्ये अथचूर्णि रथदर्शन भवति । अन्तरक्षो मध्यवर्धानन्तरपक्षे भोग-भगो भवति । अर्थ स्वभागानन्तरपक्षे रथ शुभ भवति । अत्र विचित्रमिति । अन्यत् सुगमम् ॥

रथक पुं (रथ इव प्रतिकृति । कन् ।) मन्दिरावयविशेषः । यथा —
"अष्टकोणेन मण्डपं रथकान्तु विश्रमः ।
चतुरङ्गेऽभागेन रथकोश्च कल्पयेत् ॥
सत्तमेन वा कुर्यात् रथकानान्तु विस्तरम् ।
हामचन्द्र मात्रनीयैः रथकेशिकेन वरा ॥"
इति शैलहिर्भासिककार्ये ॥ विधान ॥

रथकट्या स्त्री (रथानां समूह इति । "खल गजादिभ्यो यन् ।" इति मुग्धबोधसूत्रेण यन् । टाप् ।) रथसमूहः । तत्पर्य्यायः । रथव्रजः २ । इत्यमरः । २ । ८ । ५५ ॥ (रथ कट्या । इति पाणिनि । ४ । २ । ५१ ।)

रथकरः, पुं, (करोतीति । कृ+अच् । रथानां करः ।) रथकारः । इति शब्दरत्नावली ॥

रथकारः, पुं (रथं करोतीति । कृ+अण् ।) रथनिर्म्माणकर्त्ता । छुतार इति भाषा । स तु करण्यां माहिष्याज्जातः । (यथा वाजसनेयसंहितायाम् । ३० । ६ ।
"कौलालं प्रमाण कुमारोपुत्रं
मेधायै रथकारं धैर्य्याय तक्षाणम् ॥"
"रथकारं माहिष्येण करण्यां जातम् ।" इति तद्भाष्ये महीधरः ॥) तत्पर्य्यायः । तक्षा २ वर्द्धकिः ३ त्वष्टा ४ काष्ठतट् ५ । इत्यमरः ॥ सूत्रधारः ६ तक्षकः ७ रथकृत् ८ काष्ठतक्षकः ९ । इति शब्दरत्नावली ॥

रथकुटुम्बी [न्] पुं, (रथं कुटुम्बयितुं धारयितुं शीलमस्य । णिनि । यद्वा, रथ एव कुटुम्बम् । तदस्यास्तीति । इनि ।) सारथिः । इत्यमरः । २ । ८ । ६० ॥

रथक्रान्त, पुं, (रथस्य क्रान्तं आक्रमणं यस्य ।) तालविशेषः । यथा,—
"अश्वक्रान्तो रथक्रान्तो विष्णुक्रान्तो मताः परे ।
सूर्य्यक्रान्तो विष्णुक्रान्तो भक्तिभावप्रपञ्चकः ।
इति पञ्चमहीपानां भक्ता ब्रह्मक्रान्तका ॥"
इति सङ्गीतरत्नाकरः ॥

रथगर्भक पुं (रथो गर्भोऽस्य ।) स्कन्धवाह्ययानम् । सदस्य । तत्पर्य्यायः । कर्णीरथः २ प्रवहणम् ३ डयनम् ४ । इति हेमचन्द्रः ॥

रथगुप्तिः स्त्री, परप्रहाराभिघातरक्षार्थं रथस्य चर्म्मादिकवरणादिरचना । रथस्य गुप्तिः काष्ठादिभ्यो रक्षणावरणम् । तत्पर्य्यायः । वरूथः २ । इत्यमरः भरतश्च ॥

रथगोपन स्त्री (रथस्य गोपनं शस्त्रादिभ्यो रक्षणावरणम् ।) रथगुप्तिः । इति हलायुधः ॥

रथचरण पुं (रथस्य चरण इव तदाकारत्वात् ।) चक्रवाकपक्षी । इति शब्दरत्नावली ॥ (पुं, क्ली, रथस्य चरणः ।) रथचक्रम् । यथा,—
"रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो
रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति ।"
इति महिम्नस्तोत्रम् ॥

रथद्रुः, पुं (रथनामा द्रुः । यद्वा, रथस्य द्रुमः । तदर्थकाष्ठत्वात् ।) तिनिशवृक्षः । इत्यमरः । २ । ४ । २६ ॥ (तथास्य पर्य्यायः ।
"तिनिशः स्यन्दनो नेमी रथद्रुर्वञ्जुलस्तथा ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रथनाद त्रि रथेन तरति च । इति मुग्धबोधव्याकरणम् ॥ (अस्त्रविशेषे, पुं । यथा, महाभारते । ५ । १९—२३ ।
"रथतरस्य चक्रस्य श्यामाम'प्रवदन्त तत् ।
पार्श्विका मारस्य दक्षम वामास्तु मम ।
एवं समाहरात्यस्य चरितं वत्सरं पुरा ।
तद्रथाद्वरदयावद्यवद्रथैरनुवन्तीत ॥"
रथेन तरतीति तॄ+"संज्ञायां भृतॄवृजिधारिसहितपिदमः ।" ३ । २ । ४६ । इति खच् । मुम् च । अथ पुरुषपितामहम् । सामविशेषः । यथा, ऋग्वेदे । १ । १६४ । २५ ।
"जगता सिन्धुं दिव्यस्तभायद्रथन्तरे सूर्य्यं पर्य्यपश्यत् ॥"
"रथन्तरे एतदासीत वापि ।" इति तद्भाष्ये सायनः । स्त्रियां ङीप् । रथन्तरी । वीरस्य ईलितस्य भार्य्या । यथा महाभारते । १ । ९४ । १७ ।
"रथन्तर्य्यां सुतान् पञ्च पञ्चभूतोपमांस्ततः ।
ईलिनो जनयामास दुष्मन्तप्रभृतीन् नृपान् ॥")

रथपर्य्याय, पुं, (रथ पर्य्यायो यस्य ।) वेत रथः । इति शब्दचन्द्रिका ॥ (विवरणमस्य वेतसशब्दे विज्ञेयम् ॥)

रथपाद, पुं, (रथस्य पाद ।) चक्रम् । इति हेमचन्द्रः ॥

रथया, स्त्री, नदीविशेषः । इति शब्दरत्नावली ॥

रथयात्रा स्त्री, (रथेन भगवतो यात्रा ।) आषाढशुक्लद्वितीयायां श्रीजगन्नाथस्य रथारोपणरूपोत्सवः । यथा, स्कन्दपुराणे ।
"आषाढस्य सिते पक्षे द्वितीया पुष्यसंयुता ।
तस्यां रथे समारोप्य रामं मां भद्रया सह ।
यात्रोत्सवं प्रवर्त्त्याथ प्रीणयेच्च द्विजान् बहून् ।
तथा ।
ऋक्षाभावेऽपि तिथौ कार्य्या सदा सा प्रीतये मम ।
सौ जननाथम् । सा यात्रा ।" इति तिथ्यादितत्त्वम् ॥
"मास मैत्रपन्नो विज्ञोत्सवात् ह्याद्यकान् ।
रथयात्रेव यात्राणां सर्वत्राह प्रवर्त्तते ।"
इति यात्रातत्त्वम् ॥
अन्यत् यात्राशब्दे द्रष्टव्यम् ॥

रथाङ्ग क्ली (रथस्याङ्गम् ।) चक्रम् । इत्यमरः ॥ (यथा, रघु । ७ । ४१ ।
"रथो रथाङ्गध्वनिना विजज्ञे
विलोलघण्टाक्वणितेन नागः ॥"
रथावयवमात्रम् । यथा, महाभारते । ११ । ८६ । ११ ।
"अश्वे पताकास्वपि रथकक्ष्येषु च ।
अश्वेषु च रथाङ्गेषु च शरीरे न चास्ततः ।"
सुदर्शनचक्रम् । यथा माघे । १ । २१ ।
"रथाङ्गपाणेः पटलेन रोचिषा
मृषित्विषः संवलिता विरेजिरे ॥")

रथाङ्ग, पुं, चक्रवाकपक्षी । इत्यमरः । (यथा नैषधे । १८ । ११ ।
"विरहपाण्डिमा बहुलाक्ष्मलिप्तिश्च
तिर बहुपदी वामयोर रथाङ्गविहङ्गमः ॥")

रथाङ्गपाणि, पुं, (रथाङ्गं सुदर्शनचक्रं पाणौ यस्य ।) विष्णुः । इति हलायुधः । (यथा, भागवते । १ । ३ । ३८ ।
"सवेद धातुः पदवीं परस्य
दुरन्तवीर्य्यस्य रथाङ्गपाणेः ॥")
रथाङ्गी, स्त्री, (रथस्याङ्गमिवाकृतिर्यस्याः । रथाङ्ग+ङीष् ।) ऋद्धिः । इति राजनिर्घण्टः ॥
रथाकार, पुं क्लीवमेद । इत्यग्निपुराणम् । (रथ न्यार इत्यपि पाठः ।)
रथाभ्र, पुं, वेतसवृक्ष । इति शब्दरत्नावली ॥
रथाभ्रपुष्प, पुं, (रथाभ्रस्य पुष्पमिव पुष्पमस्य ।) वेतसः । इत्यमरटीकायां भरतः ॥
रथारोही, [न्] पुं, (रथं आरोहतीति । आ+रुह+णिनि ।) रथस्थयुद्धकर्त्ता । इति हेमचन्द्रः ॥
रथिक, पुं, (रथोऽस्यास्तीति । रथ+ठन् ।) रथी । इत्यमरः । २ । ८ । ७६ ॥ (यथा, बृहत्संहितायाम् । १५ । ११ ।
"हन्ति तस्करकुञ्जर-
रथिकमहामात्रधीधनसपत्नान् ॥")
तिनिशवृक्ष । इति राजनिर्घण्टः ॥ (रथेन चरतीति । रथ+"पर्पादिभ्यः ष्ठन् ।" ४ । ४ । १० । इति ष्ठन् । रथचारिणि, त्रि । इति सिद्धान्तकौमुदी ॥)
रथिन, पुं (रथस्य इन प्रभुः । शकन्ध्वादि त्वात्साधुः ।) रथी । इत्यमरः । २।८।७६ ॥
रथिर पुं (रथोऽस्यास्तीति । रथ+"मेधा रथाभ्यामिरन्निरचौ वक्तव्यौ ।" ५ । २ । १ ९। इत्यस्य वार्त्तिकोक्त्या इरच् ।) रथी । इति शब्दरत्नावली ॥ (यथा, ऋग्वेदे । ३ । १ । १७ ।
"अनुदेवान्‌ रथिरो यासि साधन् ॥"
"रथिरः रथी ।" इति तद्भाष्ये सायणः ॥)
रथी, [न्] पुं (रथोऽस्यास्तीति । रथ्+इनि ।) रथस्वामी राजादि । तत्पर्य्यायः । रथिक २ रथिन ३ । इत्यमरः । २ । ८ । ७६ ॥ रथा रोही ४ रथी ५ रथिर ६ । इति हेमचन्द्रः ॥ रथस्वामी ७ सारथ ८ । इति शब्दरत्नावली ॥ स्यन्दनारोह ९ । इति जटाधरः ॥ (यथा रघुः । ७ । ३७ ।
"पत्तिः पदातिं रथिनं रथेश-
स्तुरङ्गसादी तुरगाधिरूढम् ॥")
रथ्य, पुं, (रथं वहतीति । रथ+"तद्वहति रथयुगप्रासङ्गम् ।" ४ । ४ । ७६ । इति यत् ।) रथस्य वोढा घोटकः । इत्यमरः । २ । ८ । ४६ ॥ रथाश्व । इति हेमचन्द्रः ॥ (रथस्य नेता । यथा, ऋग्वेदे । ८ । २१ । ६ ।
"बभूर्व रथ्य वयं दधाना नेतारमिद्वि ।"
"रथ्य रथस्य नेतारम् ।" इति तद्भाष्ये सायण । रथसम्बन्धिनि त्रि । यथा, ऋग्वेदे । २ । ११ । ७ ।
"नहि न रथ्यो अवधीतिमवत्रा ।"
"रथ्याः रथसम्बन्धी अग्निर्ने वर्षयन्नीरोऽच

रत ।" इति तद्भाष्ये सायणः । रथस्येदमिति । "रथाद् यत ।" ४ । ३ । १२१ । इति यत् ।) क्ली चक्रम् । (युगम् । इति काशिका ।
रथ्या, स्त्री (रथानां समूहः । रथ+"खलगो रथात् ।" ४ । २ । ५० । इति यत् ।) रथ समूह । तत्पर्य्याय । रथकड्या (ट्या) २ रथ व्रज ३ । अभ्यन्तरमार्गः । गाछ इति भाषा । तत्पर्य्याय । प्रतोली २ विशिखा ३ । इत्यमरः ॥ आवर्त्मनी । इति मेदिनी ॥ (रथाय हिता । रथ—"रथाद्यत् ।" ४ । ३ । १२१ । इति यत् । यद्वा रथं वहतीति । "तद्वहतीति ।" ४ । ४ । ७६ । इति यत् ।) पन्थाः । (यथा, महा भारते । १ । १४१ । ६ ।
"पानागारेषु रथ्यासु सर्व्वतीर्थेषु चाप्यथ ।
चत्वरेषु च कूपेषु पर्व्वतेषु वनेषु च ॥")
चत्वरम् । इति हेमचन्द्रः ॥
रद, उत्खनने । इति कविकल्पद्रुमः ॥ (भ्वा पर सक सेट ।) रेफादिः । उत्खातमुन्-खननमिति गोविन्दभट्टः । रदति भूमिं शूकरः । इति दुर्गादासः ॥
रद, पुं, (रदतीति । रद विलेखने+पचाद्यच् ।) दन्तः । (यथा, आर्य्यासप्तशत्याम् । ४८ ।
"भ्रमसि प्रकटयसि रद
करं प्रधारयसि हन्यमपि श्वयथि ।
भिदमाजं तव कुञ्जर
कीर्त्तं न कुरुषेऽसि चतुराणां ॥")
विलेखनम् । इति मेदिनी । दे, १४ । शुभद दन्तलक्षणं यथा,—
"विवर्द्धनश्चैवाथ दन्ताः स्निग्धा घना
शुभाः ।
तीक्ष्णा दष्ट्राः घनाः श्वेता निम्ना रक्ता घना
शुभाः ॥"
स्त्रीदन्तलक्षणं यथा,—
"कुन्दपुष्पसमा दन्ता भाषितं कोकिलासमम् ।
दाक्षिण्ययुक्तममठ हंसमन्दगमानकम् ।
सावा समा समपुटा कोषाणु वर्त्तिता शुभा ।
करालविषमा दन्ताः शोकाय च भयाय च ।
चौर्य्याय ह्रस्वदन्ताश्च दीर्घा मृत्युश्च जायते ।"
इति गारुडे ६६ अध्याय ॥०॥
दन्तकाष्ठस्य शुचित्वं यथा,—
"दन्तवद्दन्तलग्नेषु जिह्वास्पर्शेऽशुचिर्भवेत् ।"
इति कौर्म्मे उपविभागे १५ अध्याय ॥०॥
"दन्तलग्नमसंहार्य्यं लेपं मन्येत दन्तवत् ।
न तत्र बहुशः कुर्य्याद्यत्नमुद्धरणे पुनः ।
भवेदशौचमत्यर्थं तृणवेधाद्व्रणे कृते ।"
इति प्रायश्चित्ततत्त्वधृतवचनम् ॥
रदच्छद, पुं (रदानां छद आच्छादक ।) ओष्ठ । इति हेमचन्द्रः ॥
रदन, पुं (रदतीऽनेनेति । रद+करणे ल्युट् । रदतीति । रद्+ल्यु ।) दन्त । इत्यमरः । ७ । ६ । ८९ ॥ (यथा, हरिवंशे । ११ । ७० ।

"रदनै पद्मवर्णाभ्रैः करेणु शिरसा तदा ।
ऐरावतो गजपतिरावभाव मदस्रवा ॥"
रद्+भावे ल्युट् ।) उत्खनने, क्ली ॥
रदनच्छद, पुं (रदनानां छद आच्छादक ।) ओष्ठ । अधर । इत्यमरः । २।६।९० ॥ तस्य शुभाशुभलक्षणं यथा,—
"मांसलैश्च घनोपेता अवक्रैरधरैश्च या ।
बिम्बोपमैश्च स्फुटितैरोष्ठै कपोतैश्च शोभिते ।
विवर्द्धनश्चैवाथ दन्ता स्निग्धा घना शुभा ।"
इति गारुडे ६६ अध्याय ॥
रदनी, [न्] पुं, (रदनौ प्रशस्तदन्तावस्य स्त इति । रदन+इनि ।) हस्ती । इति राज-निर्घण्टः ॥
रदी, [न्] पुं, (रदौ प्रशस्तदन्तावस्य स्त इति । रद+इनि ।) हस्ती । इति हलायुध ॥
रध, य ऊ ऌ हिंसने । पाके । इति कविकल्पद्रुमः ॥ (दिवा पर सक वेट ।) य, रध्यति । ऊ, रधिष्यति रत्स्यति । ऌ, अरधत् । इति दुर्गा दास ॥
रञ्ज, म श्री ञ } रागे । इति कविकल्पद्रुम ॥
रन्ज, य म श्री ञ } (भ्वा दिवा च उभ पक्षे नलोपादिकेषु चाद्यतौ चास्ति अनिट् ।) य ञ रज्यति रज्यते । म, रजयति अश्वान् मृगरमयाद्यथ रञ्जयति पुत्रं पिता । श्री, रक्ता । ञ, रजति रजते । रागो वर्णा-न्तरोत्पादनमासक्तिश्च । इति दुर्गादास ॥
रन्तिदेव, पुं (रमते इति । रम+बाहुलका तिच् । रन्तिश्चासौ देवश्चेति ।) विष्णु । चन्द्र-वंशीयनृपविशेष । स तु सांकृतिपुत्र । इति मेदिनी । वे, ६२ । (यथा, भागवते ।९।२१।२।
"गुरुश्च रन्तिदेवश्च संकृतेः पाण्डुनन्दन ।
रन्तिदेवस्य महिमा इहामुत्र च गीयते ॥"
अयं हि याज्ञिको राजाग्रगण्य इति पुराणेषु श्रूयते । एतद्यज्ञहतगोचर्म्मरसैरेव चर्म्मण्वती नदी जाता । यथा, महाभारते । ३ । २ ७ । ८—९ ।
"राज्ञो महानसे पूर्वं रन्तिदेवस्य वै द्विज ।
द्वे सहस्रे तु वध्येते पशूनामन्वहं तदा ।
अहन्यहनि वध्येते द्वे सहस्रे गवां तथा ।
समांसं ददतो ह्यन्नं रन्तिदेवस्य नित्यशः ।
अतुला कीर्त्तिरभवत् नृपस्य द्विजसत्तम ।।"
तत्रैव स्थले । १२ । ५८ । १५६—१६८ ।
"जनातिथ्य च साङ्कृत्यं सर्वं तं प्रदिदाहनम् ।
यस्याहरन्ता मखार्थं रन्तिदेवे महाधनम् ।
महानदी चर्म्मराशेरुत्क्लेदात् सुस्रुवे यतः ।
ततश्चर्म्मण्वतीत्येवं विख्याता सा महानदी ।
ब्राह्मणेभ्यो ददौ निष्कान् सदसि प्रतते नृपः ।
तुभ्यं निष्कं तुभ्यं निष्कमिति क्रोशन्ति वै द्विजाः
सहस्रं तुभ्यमित्युक्त्वा ब्राह्मणान् संप्रपद्यते ।
अन्वाहार्य्योपकरणं द्रव्योपकरणं च यत् ।
घटाः पात्र्यः कटाहानि स्थाल्यश्च पिठराणि च ।
नासीत् किञ्चिदसौवर्णं रन्तिदेवस्य धीमतः ।

चाहती रन्ध्रदेशस्य यो रात्रिमवगद् गवी।
व्याप्तस्तस्य मतं माद्य चक्रवाकि च विंशति॥
तत्र क्व इत्ता कोर्त्रंगं प्रभवेदविरुद्धता।
धन्भूर्विद्वनभौर्व्वे माहमांश यथा पुरा॥")
कुक्कुर। इति शब्दरत्नावली॥

रन्ध्रु, स्त्री (रन्ध्रं अवेति। रम्+रुन्।) नद्यां। नदी। इति मेदिनी। रे, ६८॥

रन्धन, क्ली, पाक। रन्धयतोभावेऽनटप्रत्ययेन निष्पन्नम्। यथा रन्धनाय स्थाली। इति र्व्विश्वप्रकाशाकरम्। (रध+ल्युट्। णामके, त्रि। यथा, भागवते। ३।१०।२८।
"यत्तु सर्व्वंभ्रौ च्वर्व्वे सम्बुद्धानादमन्न।॥"
"ृ अमदः,अन। अमृतनायन॥" इति तद्दीकायां श्रीधर॥)

रन्धि, स्त्री, (रध+क्ति।) अन्नरन्धनस्थानम्। तच्च पाकालये स्थापनविधिर्यथा —
"चतुर्विंशे पाकशालारे सार्द्धं वा धामवर्त्तते।
स्थापयेद्गृहवास्तु बहु विप्राह पाकशालारे॥
मत्र चपावके स्थाप्यं च स्थाप्यं पाकशालारे॥
तत्र वाराहवत्स्थाप्यं मांश मांसकं रक्तम्।
स्थापयेदाज्ये दैवे पार्श्वे चोदैव काष्ठके।
यथादिग्वर्दिवं मार्गे स्थाप्यं काष्ठामकोष्ठके।
पश्चात् मिष्टं मध्यं स्थाप्यं चोदीच्य वायवे॥
धारयेत् समस्तं चौरं यांचिते वाम वायवे।
पार्श्वेय पायसं तत्र मत्स्यमेषेव धारयेत्॥
काष्ठे स्फाटिके वाम वैदूर्यादिर्विचित्रिते।
धारयेत् धर्म्मदा पार्श्वे रत्नपाकचन्द्रकान्॥
उत्तरपार्श्वारे स्थाप्यं तद्वद्य तद्गुणपाद्यम्।
धर्म्मदा सुरसं कुद्यमयथा दीपकारकम्॥"
इति श्वपाकप्रमाणे पाकराजेश्वर॥

रन्ध्र, क्ली, (रन्ध्यति छिद्रयतीति। रध+बाहुलकात् रक।) छिद्रम्। (यथा, रघुः। १८।२१।
"रन्ध्रान्वेषणदक्षाणां द्विषामामिषतां ययौ॥")
छिद्रम्। इति मेदिनी॥ (यथा, रघौ।११।८५।
"स्थूलते तथा बाध्या रन्ध्रात् वटोमवाद्भुत।
प्राणद्वारमिव व्योम्नि प्रभामण्डलमुद्ययौ॥"
मनुष्यशरीरस्थरन्ध्राणि यथा —
"नासानयनकर्णानां द्वे द्वे रन्ध्रे प्रकीर्तिते।
मेहनपायुवक्त्राणामेकैकं रन्ध्रमुच्यते।
दशमं मस्तके प्रोक्तं रन्ध्राणीति नृणां विदुः॥
स्त्रीणामेतानि त्रीणि च कन्या मातरौ स्तनौ।
स्तन्यादीनामिह चान्यानि स्मरानि मधि चापि
नाम्॥"
इति प्रायश्चित्ते पूर्व्वकाण्डे पञ्चमेऽध्याये।
दोष। यथा, महाभारते।१२।१२८।११।
"रन्ध्रमन्वेषणावध्यां ज्ञात्वोद्दिश्य रविमाम्।
वैराग्य चोदित एवं प्रतो महात्मना॥")

रन्ध्रवंश पुं (रन्ध्रं बहुलं कठरं यस्य।) वायकवंश। इति राजनिर्घण्टः॥

रन्ध्रबभ्रु, पुं (रन्ध्रं गर्त्ते बभ्रुरिव पक्षः।) चतुरक। इति त्रिकाण्डशेषः॥

रन्ध्रवंश, पुं (रन्ध्रविशिष्टो वंशः।) छिद्रयुक्तवंशः। बाँशी इति भाषा। तत्पर्यायः। वंशकार १ कीचकाख्य २ मस्कर ३ वाद्यवंश ४ सुषिराख्य ५। अस्य गुणा।
"वंशो लघुः कषायश्च तिक्तश्चिक्कणश्च
शीतल।
मूत्रकृच्छ्रप्रमेहार्शः पित्तदाहास्रनाशनः॥
त्रिविधो रन्ध्रवंशस्तु कीचकोऽपि च नासक।
कथितस्तु मध्ये तु गुल्मी गुल्मनाशन॥"
इति राजनिर्घण्टः॥

रप, वदे। इति कविकल्पद्रुमः। (भ्वा पर-सक सेट।) रपति। वदे कथनम्। इति दुर्गादास॥

रफ सम्बाम्। वधे। इति कविकल्पद्रुमः। (भ्वा॰ पर-सक॰-सेट।) रफति। इति दुर्गादास॥

रफि, इ सम्बाम्। वधे। इति कविकल्पद्रुमः। (भ्वा॰ पर-सक॰ सेट।) इ, रम्फति। इति दुर्गादास॥

रबि, इ सम्बाम्। इति कविकल्पद्रुमः। (भ्वा पर सक॰ सेट।) इ, रम्बति। इति दुर्गादास॥

रबि, इ ङ शब्दे। इति कविकल्पद्रुमः। (भ्वा पर॰ अक॰ सेट।)

रभः, पुं, शब्दः। रबयतामीभावेऽच्प्रत्ययेन निष्पन्नः। (यथा, राघवपाण्डवीयम्।१।१८।
"धूमवाहायुधे भद्र इव निहतशीघ्रच।
प्रयुद्ध प्रख्यात न यत्नवद्भैरवान् रवान्॥")

रभि, इ ङ शब्दे। इति कविकल्पद्रुमः। (भ्वा आत्म॰ अक॰ सेट।) इ, रम्भते। ङ, रम्भते। इति दुर्गादास॥

रभ ओ ङ रामस्ये। इति कविकल्पद्रुमः। (भ्वा आत्म॰ अक अनिट।) रामस्यमुत्सुकीभाव। निर्ग्रिवाता प्रवर्त्तितेति गोविन्दभट्ट। ओ, रब्धा। ङ रभते साधु पुण्ये। आरभ्योऽयं मारभे। प्रारब्धं परिसुमारभते शिष्य। इति दुर्गादास॥

रभसः, पुं (रभणमिति। रभ+"अततिपचि तमिसरिभ्यश्चौति।" उणा॰ ३।११७। इति असच्।) वेग। (यथा, माघे।८।४२।
"रभसोच्छ्वसितासुखरेण करेण
परिरम्भकल्प वद्भमवधत्॥")
हर्ष। इति मेदिनी। से ११। (प्रेमोत्साह। यथा, गीतगोविन्दे। १।४।
"मन्ये रमणेषभमो दादिकरतु तदवेत॥"
"रभसस्य प्रियोत्साहस्य।" इति तट्टीकायां बालबोधिनी॥) औत्सुक्य। यथा माघे।११।१८।
"प्रमदमदननादोदयोर्वशोऽत्रभवरामा
रमणरभसखेदेर्खरविद्वे रताः॥"
कम्प। यथा, भागवते।११।१८।
"अभ्यरद्भा चार गन्धमनाति
निद्रित चरणं शाखाम॥")
पौर्व्वापर्य्यविचारः। रभसंक। औत्सुक्यमिति

अतिवृद्ध। त्रियामा रभसा च इष्यते। इति उणा। (यथा किरातार्जुनीये।२।१।
"अथ वचसि तु मेघमहोदधी
रभसया तु दिगन्तनिरीक्षया।
मधुभयौ च हिमालयसङ्क्षित
वसुदिनं तु निनाहयितु यम॥")
(यथा महाभारते।१।३१।१।
"कर्णेनौ मम पुत्राणां न एव क्रूरविक्रम।
बलाप्तौ विपतीपश्च सख्योऽपि रभस वरा॥"
मत्वार्। इति विश्वः। १।२।)
यन्तु रभसगुणयोगात्मता आदिमान् ध्रुव जवे तद्वति वर्तते तदा वाच्यलिङ्गता स्यात्। इति सिद्धान्तचन्द्रे भरत।
मनामस्यात अभिधानचिन्तामणि॥

रम, च इ ञ ओ क्रीडे। इति कविकल्पद्रुमः। (भ्वा आत्म अक अनिट। ग्राहेट।) रेमाते। उ, रमिता। रन्ता। ञ रमते। अ, रामं रम। ओ रन्ता। इति दुर्गादास॥

रम, पुं, (रमते इति। रम्+पचाद्यच्।) कान्त। (यथा किरातार्जुनीये।८।९।
"निविशुद्धकाधिपरमे परमे॥")
रक्ताशोकवृक्ष। कामदेव। इति मेदिनी। मे, २५। रमणम्। रमणाभ्योऽत्रभावेऽपप्रत्ययेन निष्पन्नम्॥

रमक, पुं, (रमते इति। रम्+"रमेस्त्व वा।" उणा ३।३३। इति वुन्।) कान्त। इत्युणादिकोष॥

रमठ, क्ली, (रम+अठन्।) हिङ्गु। इत्युणादिकोष। (जनपदविशेषे पुं। तद्देशवासिनि, त्रि। यथा, महाभारते।६।११।२०।
"आयुधान् रमठान् हूणान् शोरम्भादय
तथैव॥")

रमठध्वनि, पुं (रमठ इति शब्देन ध्वनति कथ्यते इति। ध्वन्+इन्।) हिङ्गु। इति शब्दचन्द्रिका॥

रमणं, क्ली (रमयतीति। रम्+णिच्+ल्यु।) पटोलमूलम्। इति मेदिनी। जघनम्। इति हेमचन्द्र। (रम्+भावे ल्युट्।) मैथुनम्। तत्पर्य्याय। व्यवायपर्य्यायकम् २ ग्राम्यधर्म्म ३ सुरतम् ४ रतम् ५ अप्रकोप ६ निधुवनम् ७ मैथुनम् ८ रति ९ व्यवायम् १० संवेशनम् ११ क्रीडारत्नम् १२ संप्रयोगम् १३ विलासम् १४ योषित्प्रसङ्गम् १५ अभिमानितम् १६। इति शब्दरत्नावली। (यथा, माघे।११।१८।
"विरत कमलकम्पेऽत्यत् मधुमाला-
सुरभितमकरन्द मन्दमन्दनि वात।
प्रमदमदनमादादुद्यतोऽहमरमा-
रमणरभसखेदस्विन्नविश्वकर्ता॥")
क्रीडनम्। इति रमणाभिधरसमात्। (यथा भागवते।१०।२।११।
"रात्रेष्विव क्रीडनरमणाय्यैर्दक्षपूजकान्।"
"क्रीडनं रमणान् रमणा इत्यादि।" इति तत्र

स्वामी। वनविशेषः। यथा, हरिवंशे।१५५।२१।
"भाति चैत्ररथस्येव नन्दनस्य वनं महत्।
रमणं भावनं चैव वेणुमन्ते समन्ततः॥")
रमणः, पुं, (रमते रमयतीति वा। रम्+णिच् वा+ल्यु।) पतिः। (यथा कुमारे।४।२१।
"वचनीयमिदं व्यवस्थितं
रमण! त्वामनुयामि यद्यपि॥"
रमयति स्त्रीपुरुषयोर्मनः करणमिति। रम्+णिच्+ल्यु।) कामदेवः। इति मेदिनी। णे, ७२॥ गर्दभः। इति हेमचन्द्रः।३।१८१॥ वृषणः। इति शब्दचन्द्रिका॥ महारिष्टः। इति राजनिर्घण्टः॥ (वरवसुपुत्राणामन्यतमः। यथा, मात्स्ये।५।२४।
"कल्याणिन्यां ततः प्राणो रमणः शिशिरोऽपि च
मनोहरा धरात् पुत्रानवापाय हरेः सुता॥"
रमणीये त्रि। यथा, भागवते।४।६।१।
"रमणं विहरन्तीनां रमणं सिद्धयोषिताम्॥")
रमणकं, क्ली, (रमन्ते लोका अत्र। रम्+ल्युट्। संज्ञायां कन्।) जम्बुद्वीपान्तर्गतवर्षविशेषः। स तु रम्यकवर्षः। यथा,—
"इलमेवोत्तरे नीलं पर्व्वतानि च तपोधन।
कुरुवर्षं त्रिशृङ्गात् प्रद्युम्नावधि स्मृतम्॥
हिरण्मयं ततो वर्षं श्वेतावधि निगद्यते।
रम्यकञ्च ततो वर्षं नीलकण्ठावधि स्मृतम्॥"
अपि च।
शिव उवाच।
"दक्षिणेन तु श्वेतस्य निषधस्योत्तरेण तु।
वर्षं रमणकं नाम जायन्ते तत्र मानवाः॥
शुक्लाभिजनसम्पन्नाः सर्व्वे सुप्रियदर्शनाः।
दशवर्षसहस्राणि शतानि दश पञ्च च।
जीवन्ति ते महाभाग नित्यं मुदितमानसाः॥"
इति मात्स्ये भूलक्षे १८। २२८ अध्यायौ॥
(अस्य रम्यकमन्दे ह्रस्वम्। वीतिहोत्रस्य पुत्रभेदः। यथा, भागवते।५।१।३१।
"तद्वीपस्याधिपतिः प्रैयव्रतो वीतिहोत्रो नाम तस्यात्मजौ रमणकधातकिनामानौ वर्षपती नियुज्य स्वयं पूर्व्वजवद्भगवत्कर्म्मशील एवास्ते॥")
रमणा स्त्री, रमणी। इत्यमरटीका॥ (पीठस्थशक्तिविशेषः। यथा देवीभागवते।७।३०।६०।
"रमणा रामतीर्थे तु यमुनायां मृगावती॥")
रमणी, स्त्री, (रमतेऽनयेति। रम्+ल्युट्। ङीप्।) नारी। इति मेदिनी। णे, ७२॥ उत्तमस्त्रीविशेषः। या चतुर्णोपचारेण सौभाग्येन कान्तं रमयति सा। इत्यमरभरतौ॥ (यथा, कथासरित्सागरे।५२।४१३।
"रागेण रमणीयुक्तः प्रजानां रतकौतुकः॥")
बालाभेदः। यथा,—
"बाला च रमणी रामा रम्भा कामकलापि
च॥"
इति शब्दचन्द्रिका॥
रमणीयं त्रि (रम्+अनीयर्।) सुन्दरम्। इत्यमरटीका॥ (यथा, गीतगोविन्दे।१।११।
"विलसति दिशु दशो दिक्पतिकमनीयम्
एधमुखमौलिवलि रमणीयम्॥")
रमण्य त्रि, (रम्+"अरण्योच।" उणा० ३। ११। इति यप्रत्ययः। रमणीयम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥)
रमतिः, पुं, (रमतेऽस्मिन् इति। रम्+"रमेर्नित्।" उणा० ४। ६२। इति अतिप्रत्ययः। नित्।) नायकः। स्वर्गः। इति मेदिनी। ते, १४६॥ काकः। इति शब्दरत्नावली॥ कालः। कामदेवः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥
रमा, स्त्री, (रमयतीति। रम्+णिच्+अच्। टाप् च।) लक्ष्मीः। इति मेदिनी। मे, २५॥ (यथा, भागवते।३।१६।२१।
"एष प्रसन्नवरदो रमयात्मशक्त्या
यद्यत् करिष्यति गृहीतगुणावतारः॥"
यथा च।
"रमा यत्र गता तत्र यत्र गाव तत्र गो रमा।
ये यत्र विमो नास्ति सा च सा च स च
अपि॥"
इत्युद्भटः॥)
धृष्टद्युम्नराजकन्या। सा कल्किदेवेन विवाहिता। यथा —
"ततः धृष्टद्युम्नो राजा शुद्धादाहूय पुत्रकाम्।
सुधात्मजायाः मतिं श्रुत्वा रमां प्रादात् स
कल्कये॥"
इति कल्किपुराणे २५ अध्यायः॥
शोभा। इति राजनिर्घण्टः॥ (गङ्गा। यथा, काशीखण्डे।२८।१४५।
"रेवती रतिसम्पन्ना रत्नगर्भा रमा रतिः॥"
रमाधवः, पुं (रमाया लक्ष्म्या धवः पतिरिति।) श्रीकृष्णः। यथा। रमाधव पुण्यो माधवस्मात्। रत्नपदपद्ये कर्णटीका॥
रमानाथ पुं, श्रीकृष्णः। रमा लक्ष्मीस्तस्या नाथः स्वामी। इति [illegible]॥
रमापतिः, पुं, (रमायाः पतिः।) श्रीकृष्णः। यथा मुग्धबोधव्याकरणे।
"मुकुन्दस्याच्युतमिदमिदं यातं रमापतेः।
ब्रह्ममेतद्भगवत्कृष्णनुपुर्णोऽयो हितव॥"
(यथा च देवीभागवते।१।५।८।
"रमा भार बहुभ्यो वा निमामाय रमा
पतिः॥")
रमाप्रियं, क्ली, (रमायाः प्रियम्।) पद्मम्। इति शब्दचन्द्रिका॥
रमावेष्टः, पुं (रमया वेष्ट्यतेऽसौ। वेष्ट+घञ्।) श्रीवासः। इति राजनिर्घण्टः॥
रमिता त्रि, (रम्+णिच्+क्त। टाप्।) रतिप्राप्ता। यथा,—
"ललितलतिकामधुरतिसुरसविलुलितविपिनलता।
हरिदियुता रतिमुदिता परिरमिता भ्रमर
मिता॥"
इति छन्दोमञ्जरी॥
"भ्रमयुवतिर्गोपवधूः सुरहितुर्वा श्रीकृष्णेन परिरमिता सती भ्रमरः हर्षं रता गता। किम्भूता। ललितमति ललिता शोभा गतिर्येषां ता तथा। पुनः किम्भूता सरसविलुलितविपिनगता पल्लवास्पदशुभगता। किम्भूतेन रतिसुखाय रतौ मञ्जरे शृण्वा उपाध्यायेन। अयमभिप्रायः। अयं रतिकुशलो नायिकाय रतिमध्यापयति।" इति टीका॥
रमेश्वरः, पुं (रमायाः लक्ष्म्याः ईश्वरः पतिरिति वा।) विष्णुः। यथा,—
"श्रीराम राघव रमेश्वर रावणारे
भूतेश मन्मथरिपो प्रमथाधिनाथ।
चाणूरमर्द्दन हृषीकपते मुरारे
साम्ब्या भटा च इति सन्ततमामनन्ति॥"
इति काशीखण्डे हरिहरस्तोत्रम्॥
रम्भः, पुं, (रम्भते रागमुत्पादयति कर्म्मनेनेति। रभि+कर्म्मणि घञ्।) वेणुः। (रम्भते उद्यमशीलो भवति निरन्तरमुदरभरणायेति भावः। रभि+अच्।) वानरविशेषः। इति मेदिनी। भे, ७॥ महिषासुरपिता। यथा,—
श्रीधौम्य उवाच।
"आराधितो महादेवो रम्भेण सुरवैरिणा।
पिरोक्ष स च शुभीतस्तपसा तस्य शङ्करः॥
अथ तुष्टो महादेवः प्रत्यक्षं रमालसवान्।
प्रीतोऽस्मि ते वरं रम्भ वरयस्व यथेप्सितम्॥
एतच्छ्रुत्वा प्रभुवाच रम्भस्तं वृषभध्वजम्।
अपुत्रोऽहं महादेव यदि ते मद्यनुग्रहः॥
मम जन्मनि पुत्रो भवान् भवतु शङ्कर।
एतच्छ्रुत्वा देवेन प्रभुवाच वृषध्वजः॥
भवानेवराष्ट्रित ते भविष्यामि सुतस्तव।
इत्युक्त्वा स महादेवस्तत्रैवान्तरधीयत॥
रम्भोऽपि यातः स्वगृहं हर्षोत्फुल्लविलोचनः।
अथि मन्दत् स रम्भोऽथ रम्भा महिषीं
शुभाम्॥
त्रिहायणीं चित्ररूपां सुन्दरीं चारुहासिनीम्।
स तां दृष्ट्वा महिषीं रम्भः कामेन मोहितः॥
रेमे ताज्ज मनोभव च तदा चकार सुरतोत्सवम्।
तयोः प्रवृत्ते सुरते सा तदा तत्र वै तदा॥
दधार महिषी गर्भं तदाभूद्यमहिषासुरः॥"
इति कालिकापुराणे ११ अध्यायः॥
(अयं एव जन्मान्तरे रक्तबीजो जातः। एतद्विवरणं यथा देवीभागवते।५।२।७ ९।
व्यास उवाच।
"दनो पुत्रौ महाराज! विख्यातौ क्षिति
मण्डले।
रम्भश्चैव करम्भश्च द्वावास्तां दानवोत्तमौ।
तावपुत्रौ महाराज! पुत्रार्थं तेपतुस्तपः।
बहून् वर्षगणान् कामं पुण्ये पञ्चनदे जले।
करम्भस्तु जले मग्नश्चकार परमं तपः।
वृक्षं रसालवटं प्राप्य स रम्भोऽग्निमसेवत।
पञ्चाग्निसाधनासक्तः स रम्भस्तु बभूव ह।
ज्ञात्वा मघोनेन्द्र'मदद्वयं रावणौ द'च॥

तस्या सत्वरदे तत्र याचयन्त पञ्चार च ।
तावत्तु वरमार्गं तदा पश्यन्ति मादवी ।
निजधाम च तं दृष्ट्वा करम्भ द्रुपदात्मज ।
आगत्य निवसन् श्रुत्वा रम्भा कोपं प्रदर्शन ।
सप्तर्षीन् पावके कौतुमेवाल्पिमा करेण च ।
केशपाशं मद्गोलात् मायेन कोपसंयुत ।
दग्धमिव करेण महीमा मृत्युमुत्तमम् ।
हित्वा स्त्रीत्वं तथा यक्षीत्वा प्रतिबोधित ।
उक्तश्च देव सर्वोऽपि महीणं हि तु निस्पृहि ।
यास्यामि तत्र पाश्वा बध मां करुणा तत ।
वर वरय भद्रे ते यन्मे मनसि वर्तते ।
मा विषय व्यतीतात्र किञ्चि कार्यं भविष्यति ।
माय उवाच ।
तच्छ्रुत्वा वचनं रम्भा मायकस्य सुभाषितम् ।
सर्वोऽमदोऽपश्यो रम्भापञ्चा कियत्कालपदम् ।
यदि तुष्टोऽसि देवेश । देहि मे वाञ्छित वरम् ।
येनोत्पत्तिरतो यूयं मा यस्य परतत्वार्दित ।
कथितं सर्वत्र न स्यादि त्वदानममानके ।
कामरूपी महावीर्यं सर्वलोकाभिवन्दित ।
माषकस्तं तथेत्याह दास्यामि तवेप्सितम् ।
पुत्रकाम महाभाग । मत्कोऽहिरमात्मना ।
मत्तो विना तु रम्भ । तं प्रसन्ना करिष्यति ।
माय उवाच ।
तस्यां पुत्रो महाभाग । भविष्यति बलाधिक ।
रम्भासो बहिना रम्भो वचनं विगतज्वरम् ।
श्रुत्वा प्रययौ प्रयतो दर्षं तं दानवोत्तम ।
गच्छ परिवृतं सार्थं रम्भायैव विमानितम् ।
दृष्ट्वा पङ्के तदा भार्यं महिष्या दानवोत्तम ।
मत्तायां रूपपूर्णायां चित्रायं च मोहितम् ।
सा प्रसारामहं करणा कामसन्ती सुरान्विता ।
रम्भोऽपि रमनं चक्रे भविताय्योक्ति ।
सा तु सभवती जाता महिषी तस्य वीर्यत ।
तां गृहीत्वाय पाताल प्रविवेश मनोहरम् ।
महिषेणथ तां दृष्ट्वा प्रियामनुगतां किल ।
कदाचित् महिषरायेन कामार्तेनानुपातयन् ।
अवमानय न तत्र रायन बहुधारतम् ।
करुणार्थं बभामय मदित्व यमनाङ्करम् ।
कोऽपि न निषयातान् प्रदानां कामतोऽमिलिव ।
शाद्वितर्थ तीक्ष्णाग्नां प्रदात्वां धरणी च हमम् ।
भूमौ पपात मरेण ममार च विमर्दित ।
पत्नौ भर्तरि सा दीना मधार्ता विवृता भवम् ।
सा वैधार्तं वटं प्राय्य वनाय प्रवशं गता ।
रक्षतस्तु मनवाय महिषं कामपीड़ित ।
कामपादस्तु तां चापी बलवीर्यमदोद्धत ।
पतनी सा सर्वं दीना हृता बलैरमधातुरा ।
शायनायाय तं दीना बधामनु समावृत ।
हृष्टं महाश्चवीर्यं प्रताप्यां च महाचिता ।
महीव महिषमर्दं ददाग बलवीलये ।
अर्णं दग्धं दग्धवेय वशायां परम प्रियम् ।
चितायां रोषमायात्तनाच दैत्या महति ।
अपिवेषी सा दर्पं तु हृता चितायां रोषित तदा ।
यदेत सा दर्प तथा परीता बह भारवत् ।

याभिमत्यामपि यते या प्रविवेश हुताशनम् ।
व्याभामामाकुर्वं पावकौ पतिमादाय यत्नभम् ।
महिषस्तु चितामध्यात् बहुलक्ष्मी महाबल ।
रम्भोऽप्यपश्यत् रम्भा निष्पत्त पुत्रवत्सल ।
रक्तबीजोऽप्यशौ पातो महिषोऽपि महाबल ।
अभिषिक्तस्तु राज्येऽसौ दयादिरसुरोत्तमै ।
एवं स महिषो जातो रक्तबीजश्च वीर्यवान् ।
अवध्यस्तु सुरैर्देवैर्मानवैश्च नृपोत्तम ।”)
रम्भा, स्त्री, (रभि + अच् । टाप् ।) कदली । (यथा, नैषधे । २ । १०।
“तदनन्तरमुद्गते सुन्दरी
किन्तु रम्भा परिरम्भिता परम् ।”)
अप्सरोविशेष । इति मेदिनी । भे, ७ । (यथा, महाभारते । १ । ६६ । ५ ।
“अनया रचिता चैव रम्भा तद्वनमोरमा ।”)
गौरी । इति शब्दरत्नावली । (सा तु षोडश मूर्त्तीनामन्यतमा । यथा, देवीभागवते । ७ । ३ । ९८ ।
गौरी प्रोक्ता कान्यकुब्जे रम्भा तु मलया-चले ।”)
वेणुः । इति हेमचन्द्रः । ४ । ३९ । वेश्या । इति धरणि ।
रम्भातृतीया, स्त्री, (रम्भाख्या तृतीया ।) व्रत-विशेषकाल । यथा —
ब्रह्मोवाच ।
“रम्भातृतीयां वक्ष्ये च सौभाग्यसुतादिदाम् ।
मार्गशीर्षे सिते पक्षे ह्युपोष्याथाम्युपोषित ।
गौरीं सम्पूज्य पुष्पैश्च कुशोदक करम्भभुक् ।
कन्यादो गिरिसुता प्रीय मदनकेय वै ।
कर्पूराद भ्रमरो मलयवाजनकाकहम् ।
माघे सुभद्रे चन्द्रादि धूपाद्यैः मल्लकमद ।
श्रीभीमस्तं रम्भाख्य चालनुर्वै माससी यजेत् ।
फाल्गुने गौरा रम्भाख्य गोपाय यच्छुचिम् ।
चैत्रमासी दशमेके नार्यो काम्यरूपद ।
देवि प्रसाद रम्भाख्य तथा वीरुषी यजेत् ।
वैशाखे पूर्णिमारेण यमौ कामौ वदक ।
ज्येष्ठे वारामर्षी मर्दनं समयेत् शाक ।
आषाढ़ाख्य तन्मार्ग आसाढ़े आस्यसौं यजेत् ।
निराशो विचरन्नेव घोरादश ।
श्रीकृष्णं रम्भाख्य समर्था भाद्रे निजम् ।
रम्भाख्य नवेर्धरा धीरां सुलभां यजेत् ।
मर्दैवत्नैर्वसन्तै मनोरामी सुभाषित ।
रामचन्द्रीमाकर्षये अपाढ़मैव कौशलम् ।
प्रागश्वैवायि बैतै कृष्णं कार्तिके यजेत् ।
मार्गतुर्थे पपाय तमदनाख्यो यजेत् ।
पुरोपचार पर्णान्ते कनौत्यान् त्रिनान् यजेत् ।
समाप्तेषर्वं माघे वस्त्रे तु तुष्टे विषम् ।
गमरत्नाख्यमरदे दानौ च सत्त्वापन ।
सौभाग्यादेरन् प्राप्नुयात् सर्वमाप्नुयात् ।”
इति गारुडे १२० अध्याय । ७ ।
अन्यच्च । “अथ तृतीया । सा चतुर्थीयुता रम्भाख्यीयरवेदैव याह्या ।

‘रम्भाख्यौ यत्नेन तथा तु तृतीया सुधिकार ।
वर्षेषु धर्मकार्येषु मवयुता प्रशस्यते ।’
इति ब्रह्मवैवर्त्तात् ।
तत्र तृतीयायां रम्भाव्रतम् । भविष्योत्तरे ।
‘शृणुष्व भद्रे यत्नेन रम्भाख्यं व्रतमुत्तमम् ।
ज्येष्ठे शुक्लतृतीयायां स्नातनियमतत्परा ।’
रम्भाक्रमिति रम्भया कृतमिति रम्भाव्रतम् ।”
इति तिथ्यादितत्त्वम् ।
रम्भोरुः, स्त्री, रम्भे इव ऊरू यस्याः सा । इति व्याकरणम् । (यथा रघौ । ६ । ३५ ।
“अनेन यूना सह पार्थिवेन
रम्भोरु ! कच्चिन्मनसो रुचिस्ते ।”)
रम्यं, क्ली, (रम + “पोरदुपधात् यत् ।” ३ । १ । ९८ । इति यत् ।) पलोककालम् । इति मेदिनी । प्रधानधातु । इति जटाधर ।
रम्यः, पुं, (रम्यते अनेनेति । रम + यत् ।) चम्पक वृक्ष । इति मेदिनी । बकवृक्ष । इति शब्द-चन्द्रिका ।
रम्य, त्रि (रम + यत् ।) मनोज्ञ । इति मेदिनी । (यथा, मनौ । ७ । ६९ ।
“रम्यमानतसामन्तं स्वाजीव्यं देशमावसेत् ।”)
चम्पक । इति जटाधर ।
रम्यकं, क्ली, (रम्यते अनेनेति । रम + यत् । तत स्वार्थे कन् वा ।) वर्षविशेष । इति जटाधर । तस्य विवरणं यथा,—
“इलावृत्त तु मेरोस्तु चैतस्य चोत्तरेण च ।
नाम्ना रम्यकं नाम यावन्तीं तत्र मानवा ।
मतिप्रधाना विमला जरादुर्गन्धवर्जिता ।
तत्रापि सुमहान् वृक्षो न्यग्रोधो रोहित-
स्तत ।
तत्फलरसपानादेव जीवन्ति वर्षसहस्रम् ।”
इति वराहपुराणे कश्मीरवासाख्याय ।
(तथाच देवीभागवते । ८ । ६ । १९—३१ ।
“रम्यके नाम वर्षे च मूर्त्तिं मत्स्यमयां प्रभोः ।
मात्स्यां दैवतरैर्मन्त्री मनुः भौति निरन्तरम् ।
मनुरुवाच ।
ॐ नमो भगवते मुख्यतमाय नमः सत्त्वाय
प्राणायौजसे बलाय महामत्स्याय नमः ।
अन्तर्बहिश्चाखिललोकपालकै-
रदृष्टरूपो विचरस्युरुस्वन ।
स ईश्वरस्त्वं य इदं वशेऽनयत्
नाम्ना यथा दारमयीं नरः स्त्रियम् ।
यं लोकपाला किल मत्सरज्वरा
हित्वा यतन्तोऽपि पृथक् समेत्य च ।
पातुं न शेकुर्द्विपदश्चतुष्पद
सरीसृपं स्थाणु यदत्र दृश्यते ।
भवान् युगान्तार्णव ऊर्मिमालिनि
क्षोणीमिमामोषधिवीरुधां निधिम् ।
मया सहोरु क्रमतेऽज ओजसा
तस्मै जगत्प्राणगणात्मने नमः ।
एवं स्तौति च देवेशं मनुः पार्थिवसत्तमः ।
मत्स्यावतारं देवेशं संशयच्छेदकारकम् ।

ध्यानयोगेन देवस्य निर्धूताशेषकल्मष ।
आस्ते परिचरन् भक्त्या महाभागवतोत्तम ॥”
तथाच माघे । ११९ । ३ ॥ वैष्णवे । ५।२।११॥
भक्ताके च । ८ । ११ । ७ ॥ द्रष्टव्यम् ॥) पटोल मूलम् । इति विश्वाभ्ययेष ॥ (यथा, सुश्रुते । १ । ४८ अध्याये ।
“कम्पिल्लकरम्यकपाटलापूगहरीतकीत्यादय ॥”
पुं, आग्निध्रपुत्रभेद । एतन्नामानुसारेणैव रम्यक वर्षोऽभवत् । यथा भागवते । ५ । २ । १९ ।
“तस्यामु ह वा आत्मजान् स राजवर्य आग्नीध्रो नाभिकिंपुरुषहरिवर्षेलावृतरम्यकहिरण्मय कुरुभद्राश्वकेतुमालसंज्ञान् नवपुत्रानजनयत् ॥”)
रम्यपुष्प , पुं, (रम्य रमणीय पुष्पमस्य ।) शाल्मलिवृक्ष । इति राजनिर्घण्ट ॥ (शाल्मलि शब्देऽस्य गुणादयो ज्ञेया ॥)
रम्यफल, पुं, (रम्य फलमस्य ।) कारस्करवृक्ष । इति राजनिर्घण्ट ॥
रम्या स्त्री, (रमतेऽस्यामिति । रम+“पोर दुपधात् यत् ।” ३ । १ । ९८ । इति यत् । टाप च ।) रात्रि । इति मेदिनी ॥ स्थल पद्मिनी । इति राजनिर्घण्ट ॥ (नद्या । यथा, काशीखण्डे नद्यादसनामकीर्त्तने । २९ । १११ ।
“रेवती रतिदा रम्या रत्नगर्भा रमा रति ॥”)
रम्र पुं, (रम्+स्फायादित्वात् रक् ।) कामदेव । शोभा । इत्युणादिकोष । २ । २३ ॥
रय इ गतौ । इति कविकल्पद्रुम ॥ (भ्वा आत्म - सक सेट ।) इ, रयते । इति दुर्गादास ॥
रय , पुं (रयते गच्छतीति । रय+“पुंसि संज्ञायां घ प्रायेण ।” ३ । ३ । ११८ । इति घ । रीयते गच्छतीति वा । री गतौ+पचाद्यच साधुरिति ।) वेग । इत्यमर ।१।१।६७ ॥ प्रवाह । यथा,—
“प्रवाह पूररोघ स्यादेको धारा रयस्तु स ॥”
इति हेमचन्द्र ॥
(यथा, महाभारते । २ । १७ । ६ ।
“कपमत्त न सन्धेन रयश्चेव बलीयसा ॥”
पुरूरवस पुत्रभेद । यथा, भागवते ।९।१५।१।
“ऐलस्य चोर्वशीगर्भात् षडासन्नात्मजा नृप ।
आयु श्रुतायु सत्यायू रयोऽथ विजयो जय ॥”)
रराटी, स्त्री (ललाट+रलयोरैक्यात् लस्य रत्वम् । ततो ङीप् ।) ललाट । इति पुराणम् ॥ (यथा, भागवते । ३ । १ । ३८ ।
“तयो रराटी विदुराधिपुत्र
मध्वन्न पीडोऽपि वक्षस्योऽयं ॥”)
रलक , पुं, (“रलयो रन् क्षिप्यगुणाविकत्वोपि रन् रचना तां लाति क रलकात स्वार्थे कन् ।” इत्यमरटीकायाम् रघुनाथचक्रवर्त्ती ।) कम्बल । इत्यमर ॥ मत्स्य । इति सुभूति ॥ कदलीविशेष । इति मुकुट ॥
रव, र रवे । इति कविकल्पद्रुम ॥ (भ्वा पर सक सेट ।) र, रवति । इति दुर्गादास ॥

रव पुं, (रूयते इति । रु शब्दे+भावे अप ।) शब्द । इत्यमर ॥ (यथा, रघु । ८ । ६६ ।
मधुरविश्यमवाधिकपाहदे
सरदरी रवरोदितकेशरी ।”)
रवण स्त्री, (रौतीति । रु+युच ।) कांस्यम् । इति हेमचन्द्र ॥ (रु+भावे ल्युट ।) रवण ॥
रवथ , पुं (रौतीति । रु+“शुधूरुश्रिभ्यो युच ।” उणा० २ । ७४ । इति युच ।) उष्ट्र । इति हेमचन्द्र ॥ (यथा, माघे । १२ । ९ ।
“उत्थातुमिच्छन् विधृत पुरोबला-
न्निधीयमाने भरभाजि यन्त्रके ।
अर्द्धोज्झितोद्गारविमिश्रमर्मरस्वर
स्वनाम निन्ये रवण स्फुटार्थताम् ॥”)
कोकिल । इति सिद्धान्तकौमुद्यामुणादिवृत्ति ॥
रवण त्रि, (रु+युच ।) शब्दन । तीक्ष्ण । भण्डक । चपल । इति शब्दरत्नावली ॥
रवथ, पुं, (रु+“शीङ्शपिरुगमिवञ्चिजीविप्राणिभ्योऽथ ।” उणा ३ । ११३ । इति अथप्रत्यय ।) कोकिल । इत्युणादिकोष ॥
रवि , पुं, (रूयते स्तूयते इति । रु+“अच इ ।” उणा ४ । १३८ । इति इ ।) सूर्य्य । अर्क वृक्ष । इत्यमर ॥ तत्पर्य्यायस्य भोगादि दिन चार रूपम् । यथा,—
“रवौ वर्ज्यं मधु मद्य बीजे मांस इव तथा ।”
इत्यादिवारवैशेषकथने धर्मप्रदीप ॥
तत्र निषिद्धानि यथा —
“मांसमामिषमत्स्यञ्च मसूर निम्बपत्रकम् ।
भक्षयेद्यो रवेर्वारे षष्ठजन्माप्युत्तम ॥
आर्द्रक मधु मत्स्यञ्च भक्षयेद्यो रवेर्दिने ।
सप्तजन्म भवेद्रोगी जन्मजन्म दरिद्रता ॥
निम्बं मांस मसूरञ्च तिलतैलं कांस्यमादकम् ।
भक्षयेद्यो रवेर्वारे षष्ठजन्माप्युत्तम ॥”
इति कर्म्मलोचनम् ॥ * ॥
रविग्रहस्य रक्तवर्णमनिश्चितत्व । अथ पूर्व्वदिक्पुरुषसत्त्वप्रधानाग्निकगुणकटुरसप्रिय तामवतारपक्षप्रगीतिसौताम्रकालिङ्गदेशा नामधिपति । काश्यपगोत्र । द्वादशाङ्गुल शरीर । सप्ताश्वरथ । पूर्व्वाभिमुख । सपद्म वाहन । शिवाधिदैवत । वह्निप्रत्यधिदैवतश्च । इति ग्रहयागतत्त्वादय ॥ * ॥ अस्य स्तुतिर्यथा,
“अवलोकितात्मनो लोकानुग्रहात् कर्म पार
मनाम् ॥
अचिरात् प्रचोदित अयमात् स रवि स्तुत ॥”
इति मात्स्ये ९ । १ अध्याय ॥ * ॥
अस्य भार्यापत्यादि यथा,—
“मरीचे कश्यपो जज्ञे तस्मादस्य विमानम् ।
तस्य भार्याभवत् संज्ञा त्वष्टुर्दुहिता प्रजापते ॥
स्वीयरूपाणि दारिद्र । संज्ञायां मार्त्तण्ड
त्रिधि
आदित्यो जनयामास कन्याञ्चैका शुभोत्तमाम् ।
वैवस्वत मनुश्चैव यमश्च यमुना तत ॥
सायिते मनसं रूपं सोढु नाश नियन्तं ।

मायामयीं सतञ्छायां सवर्णां निर्म्ममे छलं ॥
सम्मोवाच ततञ्छायां सवर्णां शृणु मे वच ।
अहं यास्यामि भद्रे त्वं पितुस्तु भवनञ्च मे ।
भवने वस कल्याणि । निर्विशङ्कं समाहिता ।
मनुरेष यमश्चैव यमुनाख्यमवत्सकौ ।
आपत्सु सद्व्रा द्रष्टव्यमेतद्रोषम तथा ॥
न वक्तव्यमिदं वृत्तं त्वया यत्नो कदाचन ।
इत्याकर्ण्याथ सा त्वाष्ट्री देवी छाया जगाद
ताम् ॥
आकचग्रहणाञ्चेवमाशापाञ्च कदाचन ।
आख्यास्यामि चरित्रं ते याहि देवि । यथासुखम् ॥
इति छायां समादिश्य स ज्ञाता पितुरालयम् ।
उवाच पितर देवी वामासुखादथ क्षमा ॥
शैत सोढुमहं तात । स्वामिनस्तु महात्मन ।
तामिमुख पुत्रीयात्वौ भर्त्तु सकाशाय कन्यकाम् ॥
सदा येय याथ वा स्थानादिति वा परिचिन्त्य च ।
अगम्यहठयवा भूता चरन्ती पोवरान् कुरून् ॥
तपस्तेपे च सा तीव्र पतिमाग्राय पैतामि ।
मन्यमानोऽथ तां संज्ञां सवर्णां तथा रवि ॥
सावर्णिं जनयामास मनुमेव स्मृतोपमे ।
शनैश्चरं द्वितीयञ्च सुतां भद्रां तपोधिकाम् ॥
सवर्णा स्वेष्वपत्येषु आपन्नात् स्नेहभावत ।
चकाराभ्यधिकं स्नेहं न तदा पूर्व्वजेषु सा ॥
विरमायोत्त तां भार्य्यां उवाच कुपिता वच ।
अपि भाविनि वाक्येन समेष्वपि सुतेष्वया ॥
विशेषेणाधिक स्नेह सावर्ण्यादिषु तान् प्रति ।
मानयसे तन्न साय भाषते परिदृश्यते ॥
तत शशाप शनि छाया यमं प्रसभ च ।
यथा हत तथा तस्य तुतोष भगवान् रवि ॥
विरामय न प्राप्य जगाम अट्टशिलाम् ।
तदापि च यथान्याय सान्त्वयित्वा आत्मजम् ।
निरगुणाम कोपेन प्राणर्षेन तदा तदा ॥
सदोवाच ।
तथातितेजसो भीता प्राप्तोत्तरकुरून् वने ।
वडवारूपमास्थाय यदा चरति मानवे ।
तदा हि तां भवाप्य समायां तात मा वद ॥
सम्मादृष्टोऽथ सविता मनोत्तरकुरून् प्रति ।
स चाश्वरूपिणीं तत्र सुविन समताडयत् ॥
मरमाणा च सविता परपुरुषशङ्कया ।
सा ततिरवमत् प्राह नासिकाभ्यां विवस्वत ।
देवौ तस्मादजायेतामश्विनौ भिषजां वरौ ॥”
इति मार्क्कण्डेये ११ अध्याय ॥
(अस्यान्यद्वृत्तं गरुडपुराणे द्रष्टव्यम् ।)
रविकान्त , पुं (रविणा रविकरसंयोगेन कान्त कमनीय ।) सूर्य्यकान्तमणि । इति राज-निर्घण्ट ॥
रविचक्र, क्ली (रवेश्चक्रम् ।) नराकारचक्रविशेष । यथा —
“लिखेत् रविचक्रन्तु आकारो नरवर्णिम ।
अधस्तर्षिर्भवेद् दुर्वासनारी चौ न संशय ।
मध्य त्रि दशलक्षणेन स्तुतिकेषु ।
रवौ सप्तमे तु रवौ च सर्वतोऽपि ।

कुरुते प्राणि हि रसा अविकृता यथा रसायन आहार इति गदित प्राक् । अयन्तेषां वीर्यवत्त्वे हि रसाः । यथा मधुरामलकस्या वातं प्रशमयन्ति । अनुमानाच्च रसेन अनुमीयते द्रव्य यथा मधुरमिति । अविकल्पाच्च अवि कल्पं वेदो यथा हिविहिण्यादि मधुरमो-षधीदिति । तत्कारणा प्रपार्थ रसेषु गुणत्वा ।" इति च सुश्रुते सूत्रस्थाने ४२ अध्याये ।

तथा च, वाग्भटे १० अध्याये ।

"क्ष्माम्भोऽग्नि क्ष्माम्बुतेज खवाय्वग्न्यनिल गोऽनिलैः ।
द्वयोल्बणैः क्रमाद्भूतैर्मधुरादिरसोद्भवः ॥
तेषां विद्याद्रसं स्वादुं यो वक्त्रमनुलिम्पति ।
आस्वाद्यमानो देहस्य ह्लादनोऽक्षप्रसादनः ॥
प्रियः पिपीलिकादीनामम्लः क्षालयते मुखम् ।
हर्षणो रोमदन्तानामक्षिभ्रुवनिकोचनः ॥
लवणः स्यन्दयत्यास्यं कपोलगलदाहकृत् ।
तिक्तो विशदयत्यास्यं रसनं प्रतिहन्ति च ॥
उद्वेजयति जिह्वाग्रं कुर्वंश्चिमिचिमां कटुः ।
स्रावयत्यक्षिनासास्यं कपोलौ दहतीव च ॥
कषायो जडयेज्जिह्वां कण्ठस्रोतोविबन्धकृत् ।
रसानामिति रूपाणि कर्माणि मधुरो रसः ॥
आजन्मसात्म्यात् कुरुते धातूनां प्रबलं बलम् ।
बालवृद्धक्षतक्षीणवर्णकेशेन्द्रियौजसाम् ॥
प्रशस्तो बृंहणः कण्ठ्यः स्तन्यसन्धानकृद्गुरुः ।
आयुष्यो जीवनः स्निग्धः पित्तानिलविषापहः ॥
कुरुतेऽत्युपयोगेन स मेदःश्लेष्मजान् गदान् ।
स्थौल्याग्निसादसंन्यासमेहगण्डार्बुदादिकान् ॥
अम्लोऽग्निदीप्तिकृत् स्निग्धो हृद्यः पाचनरोचनः ।
उष्णवीर्यो हिमस्पर्शः प्रीणनः क्लेदनो लघुः ॥
करोति कफपित्तास्रं मूढवातानुलोमनः ।
सोऽत्यभ्यस्तस्तनोः कुर्याच्छैथिल्यं तिमिरं भ्रमम् ॥
कण्डूपाण्डुत्ववीसर्पशोफविस्फोटतृड्ज्वरान् ।
लवणः स्तम्भसङ्घातबन्धविध्मापनोऽग्निकृत् ॥
स्नेहनः स्वेदनस्तीक्ष्णो रोचनश्छेदभेदकृत् ।
सोऽतियुक्तोऽस्रपवनं खलतिं पलितं वलिम् ॥
तृट्कुष्ठविषवीसर्पान् जनयेत् क्षपयेद्बलम् ।
तिक्तः स्वयमरोचिष्णुररुचिं कृमितृड्विषम् ॥
कुष्ठमूर्च्छाज्वरोत्क्लेशदाहपित्तकफान् जयेत् ।
क्लेदमेदोवसामज्जशकृन्मूत्रोपशोषणः ॥
लघुर्मेध्यो हिमो रूक्षः स्तन्यकण्ठविशोधनः ।
धातुक्षयानिलव्याधीनतियोगात् करोति सः ॥
कटुर्गलामयोदर्दकुष्ठालसकशोफजित् ।
व्रणावसादनः स्नेहमेदःक्लेदोपशोषणः ॥
दीपनः पाचनो रुच्यः शोधनोऽन्नस्य शोषणः ।
छिनत्ति बन्धान् स्रोतांसि विवृणोति कफापहः ॥
कुरुते सोऽतियोगेन तृष्णां शुक्रबलक्षयम् ।
मूर्च्छामाकुञ्चनं कम्पं कटिपृष्ठादिषु व्यथाम् ॥
कषायः पित्तकफहा गुरुरस्रविशोधनः ।
पीडनो रोपणः शीतः क्लेदमेदोविशोषणः ॥
आमसंस्तम्भनो ग्राही रूक्षोऽतित्वक्प्रसादनः ।
करोति शीलितः सोऽति विष्टम्भाध्मानहृद्रुजः ॥
तृट्कार्श्यपौरुषभ्रंशस्रोतोरोधमलग्रहान् ।
घृतहैमगुडाक्षोटमोचचोचपरूषकम् ।
अभीरुवीरापनसराजादनबलात्रयम् ॥
मेदे चतस्रः पर्ण्यौ जीवन्ती जीवकर्षभौ ।
मधूकं मधुकं बिम्बी विदारी श्रावणीयुगम् ॥
क्षीरशुक्ला तुगाक्षीरी क्षीरिण्यौ काश्मरी सहे ।
क्षीरेक्षुगोक्षुरक्षौद्रद्राक्षादिर्मधुरो गणः ॥
अम्लो धात्रीफलाम्लीकामातुलुङ्गाम्लवेतसम् ।
दाडिमं रजतं तक्रं चुक्रं पालेवतं दधि ॥
आम्रमाम्रातकं भव्यं कपित्थं करमर्दकम् ।
वरं सौवर्चलं सिन्धु गडमौद्भिदमेव च ॥
रोमकं पांशुजं सीसं क्षारश्च लवणो गणः ।
तिक्तः पटोली त्रायन्ती वालकोशीरचन्दनम् ॥
भूनिम्बनिम्बकटुकातगरागुरुवत्सकम् ।
नक्तमालद्विरजनीमुस्तमूर्वाटरूषकम् ॥
पाठापामार्गकांस्यायोगुडूचीधन्वयासकम् ।
पञ्चमूलं महद्व्याघ्र्यौ विशालातिविषा वचा ॥
कटुको हिङ्गुमरिचकृमिजित्पञ्चकोलकम् ।
कुठेराद्या हरिन्मेहा पित्तं मूत्रमरुष्करम् ॥
वरा कषायोऽभयाम्बु शिरीषः खदिरो मधु ।
कदम्बोदुम्बरं मुक्ताप्रवालाञ्जनगैरिकम् ॥
बालं कपित्थं खर्जूरं बिसपद्मोत्पलादि च ।
मधुरं श्लेष्मलं प्रायो जीर्णाच्छालियवादृते ॥
मुद्गाद्गोधूमतः क्षौद्रात्सिताया जाङ्गलामिषात् ।
प्रायोऽम्लं पित्तजननं दाडिमामलकादृते ॥
अपथ्यं लवणं प्रायश्चक्षुषोऽन्यत्र सैन्धवात् ।
तिक्तं कटु च भूयिष्ठमवृष्यं वातकोपनम् ॥
ऋतेऽमृतापटोलीभ्यां शुण्ठीकृष्णारसोनतः ।
कषायं प्रायशः शीतं स्तम्भनं चाभयामृते ॥
रसाः कट्वम्ललवणा वीर्येणोष्णा यथोत्तरम् ।
तिक्तः कषायो मधुरस्तद्वदेव च शीतलाः ॥
तिक्तः कटुः कषायश्च रूक्षा बद्धमलास्तथा ।
पट्वम्लमधुराः स्निग्धाः सृष्टविण्मूत्रमारुताः ॥
पटोः कषायस्तस्माच्च मधुरः परमं गुरुः ।
लघुरम्लः कटुस्तस्मात्तस्मादपि च तिक्तकः ॥
संयोगाः सप्तपञ्चाशत्कल्पना तु त्रिषष्टिधा ।
रसानां यौगिकत्वेन यथास्थूलं विभज्यते ॥
एकैकहीनास्तान् पञ्च दश च द्वित्रिकान् रसान् ।
त्रीन् द्व्येकयोग्यान् ... तत्र षट्स्वेकश इति षट् ॥
चतुष्कतो रस आद्यगुरोऽन्त्य पटु यतः ।
पञ्चकेऽयमधिको मधुर एव हिते ॥
सकलैर्द्वयादिग्रहणादुक्ताश्च प्रचुरः ।

> कटककटः पट च पटकरस्तु
> अनुरिक्ते षटरसकारी ।
> मेदाम्लकादितिहिते
> सर्वे षड्भ्यादिति विदिति ।
> त्रि रसानुपाती रसमेदः
> प्रायाम्लवर्तिकरकता च ।
> अम्लेति प्रतयो ज्ञानी
> दोषभेदकरादवनोन्ध्या ॥"

अथ षड्गुणाः ।

"मधुरः शीतलो स्निग्धो गुरुः वृष्यः पित्तघ्नः
रसायनो गुरुः स्निग्धः प्रीणनो बलकृत् ।
आयु स्तन्यकरो वर्ण्यः कण्ठ्योऽस्रकेशशोधनः
कफ़ो वर्धनो गुरुः प्रीणनो वृंहणः ।
वातघ्नः शरीरश्च स्नेहनो रक्तमांसप्रदः ।
मेदस्थौल्य घ्नः वातघ्नः कटुश्च ।
लवणः सैन्धवोऽस्य पाचनो रोचनो रसः ।
स्निग्धो वह्निकरः स्वादुः हृद्यश्च शोधनोऽपि
कटुस्तीक्ष्णोष्णरुच्यादिदीपनो वहिशोधनः ।
पथ्यतीक्ष्णो लघु श्लेष्मादिकफनाशकः ।
लघुः शोधो दीपनः पित्तकर श्लेष्मघ्नश्च पटु ।
तिक्तः पित्तकफहरो विषकुष्ठज्वरापहः ।
शोधनः पाचनो रुच्यः शुक्रमेदो लघुः ।
कषायः शीतलो ग्राही स्तम्भनो रोपणो गुरुः ।
कफपित्तविनाशी रूक्ष शीतो वर्णनाः ।
शीतवीर्यं पित्तघ्ना ग्राही कफनाशकरो गुरुः ।
उष्णं पित्तकरो वीर्यं वातघ्नं कटु ।
शीतवीर्ये मधुरं मधुरं रसपाकयोः ।
तथोरस्य कटुश्चापि तथोष्णं कटुके तथा ।
कटुतिक्तकषायाणां विपाकः प्रायशः कटुः ।
अम्लोऽम्लं पच्यते स्वादुर्मधुरं लवणं तथा ।
कटुर्विपाके गुरुणो वह्निवातवातघ्नः लघुः ।
स्वादुरेव पच्यमानो विपाके श्लेष्मकृत् ।
पाचितोऽसौ वृद्धिर्दिग्धपित्तशुक्रहृत् ॥"
अपरञ्च ।
"कटुतिक्तकषायाश्च शोषयन्ति शरीरकम् ।
कट्वम्लकषाया पित्तं मधुलवणा कफम् ।
वातपित्तानि लवणाम्लमधुराद्याः प्रकोपिता ।
षड्रसो मधुरो श्रेष्ठो रसो धातुविवर्धनः ।
स्रोतसामशोधयति वह्निवर्धनपाचकः ।"
रसप्रदीपकम् ।)
मायमतेऽपि ।
"रसस्तु रसनाग्राह्यो मधुरादिरनेकधा ।
सहकारी रसज्ञाया नित्यतादि च पूर्ववत् ॥"
इति भाषापरिच्छेदः ।
"रसश्चायि । अङ्गकारीनि रसनायां रसः कारणजमिति । पूर्ववदिति च मधुररसस्य रसं जित्वा अपि अन्ये गुणादि रसोऽपि द्वयम् ।" इति सिद्धान्तमुक्तावली । ४ । अतीतकथा शिक्षा । तस्यैव । इतिकः १, औरसम ३ । मधुर ४ वनौकस ५ मनोहर ६ स्त स्नारः ७ चन्द्रमाद्वया च । इति रावणिरेखः । व्याघ्रारोद्भव ८ नेत्र काह १ मध्य पक्ष ११ अष्टदशानाक १२ आदित्य १३ वसुपद १४ हीनदश १५ अभियन्तार १६ इति पैत्रका । तद्व विवरिणोको —
"तनु मध्यो रसनाभुद्र्यां वनपशुमुख रसः ।
षड्रस वर्णाद दैव रसनेति रसः स्मृत ।"
अतः शब्दकल्पद्रुमः ।
"रसनामश्च तुषस्य चार निष्ठिको रस मधुर तिक्त शीत स्वाद लवणो कटुः"

सारः । यथा गुडमधूकपुष्पवकुलत्वगादिरसीमकाम्भि सारो मदिरा । तस्य स्थानमाह ।
"सर्व्वदेहचरस्यापि रसस्य हृदयं स्थलम् ।
समानमरुता पूर्व्वं यस्य हृदये हृत ॥"
तस्य कर्म्माण्याह ।
"आद्यस्य प्रथमो भौमो धातून् सर्व्वानयं रसः ।
पुष्णाति तद्वत् स्वीयैश्चाप्नोति च तनुं गुणैः ॥"
गुणैः प्रीतस्निग्धपोषकत्वैः ।
"मन्दवह्निविदग्धस्तु कटुर्व्वाम्लो भवेदयम् ।
स कुर्य्याद्बहुलान् रोगान् विषत्वञ्च करोत्यपि ॥"
इति भावप्रकाशः ॥

(तथाच । "तत्र पाञ्चभौतिकस्य चतुर्व्विधस्य षड्रसस्य द्विविधवीर्य्यस्याष्टविधवीर्य्यस्य वानेकगुणस्योपयुक्तस्याहारस्य सम्यक् परिणतस्य यस्तेजोभूतः सारः परमसूक्ष्मः स रस इत्युच्यते । तस्य च हृदयं स्थानं स हृदयाच्चतुर्व्विंशति धमनीरनुप्रविश्योर्द्ध्वगा दश दश चाधोगामिनी चतस्रस्तिर्य्यग्गाः कृत्स्नं शरीरमहरहस्तर्पयति वर्द्धयति धारयति यापयति जीवयति चादृष्टहेतुकेन कर्म्मणा । तस्य शरीरमनुधावतोऽनुमानाद्गतिरुपलक्षयितव्या क्षयवृद्धिवैकृतैः । तस्मिन् सर्व्वशरीरावयवदोषधातुमलाशयानुसारिणि रसे जिज्ञासा किमयं सौम्यस्तैजस इति । अत्रोच्यते स खलु द्रवानुसारी स्नेहनजीवनतर्पणधारणादिभिर्व्विशेषैः सौम्य इत्यवगम्यते ।" इति च सुश्रुते सूत्रस्थाने चतुर्द्दशेऽध्याये ॥ ० ॥)

रागः, पुं (रञ्जयतीति रञ्ज्यतेऽनेन वा। रञ्ज
+भावे करणे वा घञ्। "घञि च भ-
करणयोः।" ६। ४। २७। इति नलोपः।)
मात्सर्यम्। लोहितादि। (यथा, कुमारे।
१। ६०।
"रागेण बालारुणकोमलेन
चूतप्रवालोष्ठमलञ्चकार।")
क्लेशादि। अनुराग। (यथा, मार्कण्डेय
पुराणे। २०।
"तातस्येह हि मे प्रेमविशाराधनस्य
मधुरस्य।
कथ दव कामिनीनां कचोलेन विनैव वैराग।")
मात्सर्यादि। हर। इति मैदिनी। चन्द्र।
वर्ण। इति शब्दरत्नावली। मात्सर्यादि।
(यथा, कुमारे। ३। ६८।
"तमिमं कुरु दक्षिणेतरं
चरणं निर्मितरागमेहि मे।")
इच्छामिलि। इष्टम्। इति भावार्थके
प्राप्ता। प्रीति। यथा —
"वीतरागभयक्रोधा मन्मया मामुपाश्रिताः।"
इति भगवद्गीतायां श्रीकृष्णवाक्यम्।
तस्य लक्षण यथा,—
"सुखमध्यर्थ विशे सुखनीवै दन्ते।
मनस्तु प्रवर्धिनकरोति स राग इति कीर्त्तितः।"
इति पातञ्जलभाष्ये।
(अभिमन्तव्यविषयाभिलाषः। स तु पञ्चम न
तेन। यथा,—
"कर्त्तव्यमिदमेवेष्टाभिधितेति रम
सीमा। रागो मनमहिषदाभिलाष।" इति
विद्युत्प्रभावतीकायां भागवत। ४। २६।
"सुखानुशयी रागः।" इति पातञ्जल। रागः
प्राप्तोऽभिनया यथा। भरतेन
च राग वदति। ते तु रागाश्च यथा।
भैरव १ कौशिक २ हिन्दोल ३ दीपक ४
श्रीराग ५ मेघ ६। हनुमन्मतानुसारी पञ्च
मेते रागाः। कल्लिनाथविरचितोऽपि
षड्विधे वर रागाः। कलौ तत्र
सतो पुष्पा रवेर्मध्ये। शार्ङ्ग
जोवदन्ति बहुराग तथा। श्रीराग १
वसन्त २ भैरव ३ मैरव ४ मेघ ५ न
टनारायण ६। इति सङ्गीतदर्पणम्।
तेषु रागाः शुचिर्वर्णसातादि।
"मेघ श्री च हिन्दोल मरविश्व इति वदन्
गे रागा इति वदन्ति दुर्गितदम्भमिति।
सोऽपि मेधाश्चैव वसन्तकैः।
वैशेषिकवाञ्छन सुखि विहिता।
रागेषु मेध्यु वर्णसहस्रा नक्त्रे वहुना।

कालक्रमेण तथापि ह्रास एव तु दृश्यते ।
केचिदर्थान्ति ये रागा सर्व्वे सन्तीति निश्चितम् ।
मेरोरुत्तरत पूर्व्वे पश्चिमे दक्षिणे तथा ।
समुद्रकच्छे ये देशास्तथाभीरा प्रचारया ॥"
तथा च । अङ्गवङ्गकलिङ्गतैलङ्गभूलिङ्गद्राविड़-
सौराष्ट्रयूपकङ्कणलाङ्गचोलकेरकौरकाश्मीरगाभी-
रवाहीरसिन्धुमालवमगधविदर्भमलयद्रो-
दयगाठमालवकाश्मरमरुपञ्चचोलोत्कलकु-
न्तलशिंहलहरिकेलकेरलकोशलपञ्चालमल्ल-
भक्षचोलविदर्भवान्तिकश्रामगुर्जरासगुर्जरकालञ्जर
गौड़हरिकोङ्कणबैदिकाश्वीपाञ्चालकीरादय
चरश्रीवरवरसौकान्यकुब्जकामरूपदरिगाभ
सिदभद्रमैटभाटकीकटदवेङ्गटकणगाटभोटक
घाटकरघाटकर्णाटकुन्तिकापलिककर्मकाम
काम्बोजकभोजकाम्बोजसौनुस्तारविहारवली
चारवाणगोह्यविदेहबाह्लीकपञ्चरौकचिरात्र
नादिदेशेषु रागा प्रचरन्तीति ।
'यस्य श्रवणमात्रेण रज्यन्ते सकला प्रजा ।
सर्व्वानुरञ्जनाद्धेतोस्तेन राग इति स्मृत ॥"*॥
अथ रागा ।
"आदौ मालवरागेन्द्रस्ततो मल्लारसंज्ञित ।
श्रीरागश्च तत पश्चाद्वसन्तस्तदनन्तरम् ।
हिन्दोलश्चाथ कर्णाट एते रागा षडेव तु ॥६॥
षट्त्रिंशद्रागिणी तत्र क्रमश कथिता मया ।
धानशी मालशी चैव रामकिरी च सिन्धुड़ा ।
आशावरी भैरवी च मालवस्य प्रिया इमा ॥६
वेलावली च पुरवी कानड़ा माधवी तथा ।
कोड़ा केदारिका चापि मल्लारदयिता इमा ॥६
गान्धारी शुभगा चैव गौरी कौमारिका तथा ।
वेलोयारी च वैरागी श्रीरागस्य प्रिया इमा ॥६
तुड़ी च पञ्चमी चैव ललिता पटमञ्जरी ।
गुर्ज्जरी च विभासा च वसन्तस्य प्रिया इमा ॥६
मायूरी दीपिका चैव देशकारी च पाहिड़ा ।
वराड़ी मोरहाटी च हिन्दोलस्य प्रिया
इमा ॥६॥
नाटिका चाथ भूपाली रामकेली गड़ा तथा ।
कामोदा चापि कल्याणी कर्णाटस्य प्रिया
इमा ॥११६॥

अथ कालनियम ।

"विभासा ललिता चैव कामोदा पटमञ्जरी ।
रामकेरी रामकेली धनाशारी च गुर्ज्जरी ।
देशकारी च शुभगा पञ्चमी च गड़ा तुड़ी ।
भैरवी चाथ कौमारी रागिण्यो दश पञ्च च ।
एता पूर्व्वाह्नकाले तु गीयन्ते गायनोत्तमै ।
वराड़ी मालवी कोड़ा वैरागी चाथ धानशी ।
वेलावली मोरहाटी शस्ता रागाश्रित ।
गेया मध्याह्नकाले तु यथा भरतभाषितम् ।
गान्धारी दीपिका चैव कल्याणी पुरवी तथा ।
कानड़ा सारना चैव गौरी केदारवाहिड़ा ।
मायूरी मालवी नाटी भूपाली सिन्धुड़ा तथा ।
आशावरी ताच रागिण्य प्रगाय ना चतुरम् ।
इत्येता देशभूपाला रागात्स्वरान्तरं ।
प्रदोषे चार्द्धरात्रे च रजन्यां गानगोचरा ।
दशदण्डात् परं रात्रौ सर्व्वेषां गानमीरितम् ।
मेघमल्लाररागस्य गान वर्षासु सर्व्वदा ।
श्रीपञ्चम्यां समारभ्य यावत् कर्क्कोत्सवं हरे ।
तावद्वसन्तरागस्य गानमुक्तं मनीषिभि ।
पक्षोत्थान समारभ्य यावद्गोमखोत्सवम् ।
गीयते तद्गुणैर्व मालवो या मनोहरा ।
सर्व्वेषामिह रागाणां रागिणीनाञ्च सर्व्वश ।
रङ्गभूमौ नृपाज्ञायां कालदोषो न विद्यते ।
रात्रावालापयेद्रागी तत्कालस्तदनन्तरम् ।
नाट्यशाली प्रगात्मा नृपाज्ञायां न दूषणम् ।
रागा षड्च रागिण्य षट्त्रिंशच्चाङ्क-
विग्रहा ।
आगता शम्भुवदनात् सत्त्वाय वसुधातले ॥"*॥
अथ ध्यानम् ।

"विनम्रगीर्वाणविलम्बमान
शुकश्रुति कुक्कुटगात् प्रमत्त ।
कण्ठेतमाला प्रविशन् प्रदोषे
मालाधरो मालवरागराज ॥१॥
नीलोत्पल कर्णपुरी वहन्ती
श्यामा सुकेशी च सुमध्यभागा ।
दूरप्रवासात् सुरम्यवक्त्रा
सा धानसी मद्गुणचारुनेत्रा ॥२॥
करे धृता चारुचयुमरम्या
रतक्षतचात विलोकयन्ती ।
कण्ठस्थरम्भौक्तिकरम्यहारा
सा मालशी शंकयिता विचित्रा ॥२॥
प्रतप्तचामीकरचारुवक्त्रा
कर्णावतंस कमल वहन्ती ।
पुष्प वह पुष्पमदैरपारा
चन्द्रानना रामकिरी प्रदिष्टा ॥३॥
मणीन्द्रनीलद्युतिरम्यकाञ्ची
प्रचारयन्ती कपिलाम्बरम् ।
विचित्रनाभरणा सुकेशी
सा सिन्धुड़ा कान्तसमीपवर्त्तिनी ॥४॥
अपाङ्गलद्युतिविभ्रमाक्षा
स्तनद्वयम करयोर्दधाना ।
पीनोन्नताद्यान्तिरामवर्णा
रामावरी रम्यविद्या विरम्या ॥५॥
सरोवरस्था स्फटिकस्य मन्दिरे
सरोरुहे मन्दुमेर्धयन्ती ।
तालप्रयोगप्रतिबद्धगीते
गौरीतनुर्भैरविका सगीतम् ॥"६॥
अथ मल्लार ।

"विकारशीलोऽनिलकाल्पदेव
कालादियो धार्म्मिकमर्च्चनुत ।
कामातुर चित्रकरेशु मध्ये
मल्लाररागं प्रियतम् सुवेश ॥१॥
कर्पूरनीलपद्मकल्पानिकुञ्जे
स्वच्छन्दं कान्तसमागमाय ।
वेलावली चन्द्रवती यथे सा
रात्रि हि यथामरका विरक्ता ॥१॥
एष तु कान्तप्रियमावचन्द्र
रम्य वदन्तौ कुचकुम्भयुग्मे ।
दूर्व्वादलश्यामतनु सकामा
सुराधये सा पुरवी विरक्ता ॥२॥
अशोकवृक्षस्य तले विषण्णा
वियोगिनी बाष्पकणाचिताङ्गी ।
विभूषिताङ्गी कटिचेव बाला
सा कानड़ा हैमवतीव तन्वी ॥३॥
संशय यत्र गते दयाता
प्रकृतमाला दयितैव बाला ।
गौरी सकाशाञ्चनसुस्मिताक्षा
सा सुन्दरी माधविका निकुञ्जे ॥४॥
शुकश्यामी वादयति प्रभर्त्तु-
र्गानायनमभ्यस्यति सम्पुटेन ।
सदैव तासा विरहा च माला
कोड़ा कला तामसी मता सा ॥५॥
श्यामा सहृष्णीयवशी सुदेहा
विप्रप्रकम्पप्रियवारिविन्दु ।
विलोकयन्ती तिमिरोज्ज्वलान्ते
केदारिका रत्नपरीवर्त्ती ॥"६॥
अथ श्रीराग ।

"लीलाविहारेण वनान्तराले
चिन्वन् प्रसूनानि वधूसहाय ।
विलासवेशो धृतिदिव्यमूर्त्ति
श्रीराग एष प्रथित पृथिव्याम् ॥१॥
सन्ध्यासुकाले सहमध्यदेशे
प्रकाशयन्ती च पिनाकहस्तम् ।
धारामरावासुविदिव्यविताम्
गान्धारिका गम्यपथं विभर्त्ति ॥१॥
रत्नभरा हृदिश्यारकौत्तुभ
विन्दती कविकोविदकौतुकम् ।
शुकविनाथनभावतगोचरा
भ्रमती सुभगा बहुरागयुता ॥२॥
पुष्पोद्यते वार्म्मावतिकायै
कोकूज्यैः कौकिलाकाकलीव ।
रामा श्यामा बहुगुणाचार्य श्रीमा
गौरी गौरी गौरवास्कन्दिता ॥३॥
अङ्गुलिकाया स्फुटकौतुरीभि
प्रवालमृदग्धा रत्नोद्भिन्नहारम् ।
चन्द्राय कार्त्तिक मम यथन्ती
कौमारिका कामवशा वहन्ती ॥४॥
गौरीपादाम्भोजनमच्चयन्ती
गन्धैकृत मध्यगता दयाना ।
सामारक्तोपाथमेधेलमावे-
वैलावारी वहने कालिदेवम् ॥५॥
प्रभातवन्ती चन्द्रकञ्जे प्रत्याय कालभूना ।
मालतीकुसुमस्मिभिर्रागौ रागिणी शुभा"६
अथ वसन्त ।

"शुक्लाम्बुदैर्वि बलारम्भो
विचित्रमाधावक्षेवरा ।
कैशोरकः कामदेवप्रदेवी
वसन्तरागो वृश्चिक ॥१॥

[illegible]

वा पञ्चमी पञ्चमवीरवेणी ॥४॥

[illegible]

अथ हिन्दोल ।

[illegible]

अथ कर्णाट ।

[illegible]

अथ रागाणामन्योन्य [illegible]

[illegible]

अथ रागरागिणी [illegible]

[illegible]

अथ रागवेला ।

[illegible]

इति रागवेला ।

अथ कलाः ।

[illegible]

रागद्रा, [illegible]

रागपुष्प, पुं, (रागविशिष्टं रक्तवर्णं पुष्पं यस्य ।) बन्धूकः । रक्ताम्लानः । इति राजनिर्घण्टः ॥

रागपुष्पी, स्त्री (रागयुक्तं पुष्पं यस्याः । ङीष् ।) जवा । इति राजनिर्घण्टः ॥ (गुणादयोऽस्य जवाशब्दे ज्ञातव्याः ॥)

रागप्रसव, पुं, (रागयुक्तो रक्तवर्णः प्रसवः पुष्पं यस्य ।) बन्धूकः । रक्ताम्लानः । इति राजनिर्घण्टः ॥

रागभुक् [ज्] पुं, (रागेण भुज्यते इति । भुज + क्विप् ।) माणिक्यम् । इति राजनिर्घण्टः । कस्मिंश्चित् पुस्तके रागबन्धः इति पाठोऽपि विद्यते ॥

रागरज्जु पुं, (रागो रज्जुरिव यस्य । नायकयोः परस्परानुरागबद्धत्वात्तथात्वम् ।) कामदेवः । इति शब्दरत्नावली ॥

रागलता, स्त्री, (रागस्य जनिका लतेव ।) कामदेवपत्नी । इति जटाधरः ॥

रागवृन्त, पुं, (रागस्य वृन्त इव ।) कामदेवः । इति शब्दमाला ॥

रागषाडव, पुं, दाडिमद्राक्षायुक्तमुद्गयूषः । अस्य गुणाः । रुचिकारित्वम् । लघुपाकित्वम् । वातपित्तकफाविरोधित्वञ्च । इति राजवल्लभः ॥ (यथा, सुश्रुते । १ । ४६ अध्याये कृतान्नवर्गे ।

"सैव पथ्यतमश्चापि मुद्गयूषः कृताकृतः ।
स तु दाडिममृद्वीकायुक्तः स्याद्रागषाडवः ।
रुचिष्यो लघुपाकश्च दोषाणामविरोधकृत् ॥"

तथास्य गुणाः ।

"लघवो वृष्या हृद्याः दीपनरोचना ।
हृष्याः... रागषाडवाः ॥"

इति च सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)

रागसूत्र, क्ली, (रागयुक्तं रक्तवर्णं सूत्रम् ।) तुलासूत्रम् । पट्टसूत्रम् । इति मेदिनी । रे, ९८ ॥

रागाङ्गी स्त्री, (रागविशिष्टमङ्गं यस्याः । ङीष् ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥

रागाढ्या, स्त्री, (रागेण आढ्या ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥

रागान्ध, त्रि, आर्या दत्त्वा रागविशुद्धः । यथा,

"आर्यां वक्रतां दत्त्वा यो यदि निपुणो जनः ।
स कोरकोऽपि रागान्धो रागस्तु रागदः ॥"

इति शब्दमाला ॥

रागायुध, पुं (रागेषु विषयवासनासु आयुधमिव ।) गुह । इति त्रिकाण्डशेषः ॥

रागिणी, स्त्री, (रागोऽस्त्यस्या इति । राग + इनि । ङीप् ।) विदग्धा नारी । इति जटाधरः । मेनकायाः ज्येष्ठकन्या । यथा,—

"रागिणी नाम संजाता ज्येष्ठा मेनासुता शुभे ।
सुभाङ्गी पद्मपत्राक्षी नीलकुञ्चितमूर्द्धजा ॥"

इति वामनपुराणे ४८ अध्यायः ॥

जयश्रीनाम्नी पत्नी । इति पुराणम् ॥ षड् रागाणां पत्न्यः । इति सङ्गीतशास्त्रम् ॥ या तु स्वरमध्ये भरतमते च षिरिन्धनकारा । सोमेश्वरमते कल्लिनाथमते च षट्त्रिंशत्प्रकारा । आसां विवरणं रागशब्दे द्रष्टव्यम् ।

रागी, [न्] त्रि, (रञ्ज + "घिनुण् ।" ३ । २ । १४१ । इति तच्छीलादिषु घिनुण् । यद्वा, रागोऽस्त्यस्येति । राग + इनि ।) अनुरक्तः । (यथा, मार्कण्डेये । २१ । ४९ ।

"त्वय्यस्या हृदयं रागि भर्त्ता त्वाज्यो भविष्यति ।
यावज्जीवमसौ दुःखं सुरम्या नान्यथा वच ॥")

कामुकः । इति विश्वः । रक्तः । इति मेदिनी । (विषयानुरागयुक्तः । स च द्विविधः । यथा देवीभागवते । १ । १० । १७—१८ । ३१ ।

"द्विविधः सर्वलोकेषु सर्वत्र द्विविधो जनः ।
रागी चैव विरागी च तयोश्चित्त द्विधा पुनः ।
विरागी त्रिविधः काम ज्ञातोऽज्ञातश्च मध्यमः ।
रागी च द्विविधः प्रोक्तो मूर्खश्च चतुरस्तथा ॥"
'रागो यस्यास्ति संसारे स रागीत्युच्यते ध्रुवम् ।
दुःखं बहुविधं तस्य सुखञ्च विविधं पुनः ॥"

रक्तवर्णविशिष्टः । यथा, कथासरित्सागरे । २१ । ९ ।

"ईर्ष्याकषायमभावेऽपि गङ्गुरभुवि रागिणि ।
न सुखं तनयो राज्ञोऽस्तद्विलिप्तमिमाययौ ॥")

पुं, द्रव्याविशेषः । तत्पर्यायः । आम्लनः २ बकुलरक्तविषः ३ गुच्छकविषः ४ । अस्य गुणाः । तिक्तत्वम् । मधुरत्वम् । कषायत्वम् । शीतत्वम् । पित्तासनाशित्वम् । बल्यत्वञ्च । इति राजनिर्घण्टः ॥

राघ, ऋ ङ शक्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ऋ, अरराघत् । ङ, राघते । शक्तिः सामर्थ्यम् । इति दुर्गादासः ॥

राघव, पुं, (रघोरपत्यमिति । रघु + अण् ।) रामचन्द्रः । (यथा, रघुः । १२ । १२ ।

"राघवापरता तत्र राघवं मरतानुरा ।
अभिषेकं निराधार्या माजोर मलयद्रुमम् ॥"

अजः । यथा रघुः । ८ । १६ ।

"यतिपार्थिवलिङ्गधारिणौ
ददृशाते रघुराघवौ जनैः ॥"

दशरथः । यथा, रामायणे । २ । ६३ । ११ ।

"बालमप्रतिरूपं तु महर्षेस्तस्य राघव ।
विलपन्तं धर्मात्मा कौसल्यामिदमब्रवीत् ॥"

रघुवंशीयमात्रम् । यथा, तत्रैव । २।६३।२५ ।

"अपि स्वप्न कृत न तन्नादवर्णां कृतो भवान् ॥")

समुद्र-महामत्स्यविशेषः । इति मेदिनी । वे, ३८ ॥ (यथा नैषधे प्रथमपादे दुर्गसिंहः ।

"अस्ति मत्स्यस्तिमिर्नाम शतयोजनविस्तृतः ।
तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति राघवः ॥")

राघवायण, क्ली, (राघवस्य रामस्य चरिताश्रितमयनं शास्त्रम् ।) रामायणम् । यथा—

"इतिहासपुराणानि राघवायणभारतम् ।
समापिरहितान्येव सन्ति तानि शुभानि वै ॥"

इति पद्मपुराणे पातालखण्डे ...

राङ्कव, पुं, हयकम्बल । इति शब्दरत्नावली ॥ ८१ ॥

राङ्कवं क्ली (रङ्कोर्भवम् । रङ्कु + "रङ्कोरमनुष्येऽण् च ।" ४ । २ । १०० । इति अण् ।) मृगलोमजातवस्त्रादि । तत्पर्यायः । मृगरोमजम् २ । इत्यमरः । २ । ६ । ११६ । रङ्कुर्मृगभेदः तस्य लोमभिः कृतमपि पाण्डवोऽपि भवति इति केचित् मेषादिलोमजमपि कम्बलादि राङ्कवम् । इति तट्टीकायां भरतः ॥ (यथा महाभारते । २ । ५ । २२ ।

"कौषेयं राङ्कवञ्चैव पट्टजं कीटजन्तथा ।"

पुं, गौः । इति कालिका । राङ्कवास्तृतः, त्रि । यथा, महाभारते । ९ । ४४ । ८६ ।

"कौषेयास्तरणनिभैर्भद्रैर्राङ्कवैरपि ॥")

राङ्गण, क्ली, दुग्धविशेषः । रङ्गम् इति भाषा । अस्य गुणाः । रक्तपित्तनाशित्वम् । इति वैद्यकम् ॥

राज, ऋ ञ ट दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वा-उभ-अक-सेट् ।) ऋ, अरराजत् । ञ, राजति राजते । ट, रेजतुः । इति दुर्गादासः ॥

राजकं क्ली, (राज्ञां समूहः । राजन् + "गोत्रोक्षोष्ट्रोरभ्रराजेति ।" ४।२।३९ । इति वुञ् ।) नृपसमूहः । इत्यमरः । २ । ८ । ४ । यथा, मार्कण्डेये । १०९ । ६ ।

"युद्धदुर्मदतो यासीत् तस्मिन् राजन्यपीडितः ।
राजकं सकलं चोर्व्यां मोहयामास मो जन ॥"

राजन् + स्वार्थे कन् ।) राजनि, पुं । (यथा हरिवंशे भविष्यपर्वणि । २३ । ९ ।

"तथाह तिष्ठ हन्ता चाष्ठौ राज्ञामि राजक ।"

राज् + ण्वुल् ।) दीप्तिकारके, त्रि ॥

राजकदम्ब पुं (कदम्बानां राजा । राजदन्तादित्वात् परनिपातः ।) कदम्बविशेषः । यथा—

"कादम्बं प्रावृषेण्यो नीपो धूलीकदम्बकः ।
कदम्बप्रियको राजकदम्बोऽप्यपरोऽपि च ॥"

इति जटाधरः ॥

राजकन्या स्त्री, (राज्ञः कन्येव ।) केतकीपुष्पम् । इति राजनिर्घण्टः । नृपसुता च । (यथा माघे । ९ । ६ । ३९ ।

"इन्द्रं च राजकन्याभिरेकं पश्चादमा वदः ॥")

राजकर्कटी स्त्री, चीनाकर्कटी । इति राजनिर्घण्टः ॥

राजकलिन्द, पुं (कलिन्दानां राजा । राजदन्तादित्वात् परनिपातः ।) मतकुणः । इति राजनिर्घण्टः ॥

राजकीय, त्रि, (राज्ञ इदम् । राजन् + "राज्ञः कच ।" ४ । २ । १४० । इति छः ककारश्चान्तादेशः ।) राजसम्बन्धी । राजकर्त्तृकं दत्तं भोगाधिकारादि च । (यथा, कथासरित्सागरे । ६९ । २२८ ।

"तत्तदर्थं राज्ञो च राजकीयं नवौ धनौ ॥")

राजकुमार पुं (राज्ञः कुमारः ।) राजपुत्रः । तस्य लक्षणादि यथा,—

"कुमारे स्मृतिमान्सदैव क्रूरवद्रक्तोत्सुकः ।

[illegible]

[illegible]

[illegible]

तदात्वे तत्काले।
"यदा प्रहृष्टा मन्येत सर्व्वास्तु प्रकृतीर्भृशम्।
अत्युच्छ्रितं तथात्मानं तदा कुर्व्वीत विग्रहम्॥
यदा मन्येत भावेन हृष्टं पुष्टं बलं स्वकम्।
परस्य विपरीतञ्च तदा यायाद्रिपुं प्रति॥
यदा तु स्यात् परिक्षीणो वाहनेन बलेन च।
तदासीत प्रयत्नेन शनकैः सान्त्वयन्नरीन्॥
मन्येतारिं यदा राजा सर्व्वथा बलवत्तरम्।
तदा द्विधा बलं कृत्वा साधयेत् कार्य्यमात्मनः॥
यदा परबलानान्तु गमनीयतमो भवेत्।
तदा तु संश्रयेत् क्षिप्रं धार्म्मिकं बलिनं नृपम्॥
निग्रहं प्रकृतीनाञ्च कुर्य्याद्योऽरिबलस्य च।
उपसेवेत तं नित्यं सर्व्वयत्नैर्गुरुं यथा॥
यदि तत्रापि सम्पश्येद्दोषं संश्रयकारितम्।
सुयुद्धमेव तत्रापि निर्व्विशङ्कः समाचरेत्॥
सर्व्वोपायैस्तथा कुर्य्यान्नीतिज्ञः पृथिवीपतिः।
यथास्याभ्यधिका न स्युर्म्मित्रोदासीनशत्रवः॥
आयतिं सर्व्वकार्य्याणां तदात्वञ्च विचारयेत्।
अतीतानाञ्च सर्व्वेषां गुणदोषौ च तत्त्वतः॥
आयत्यां गुणदोषज्ञस्तदात्वे क्षिप्रनिश्चयः।
अतीते कार्य्यशेषज्ञः शत्रुभिर्नाभिभूयते॥
यथैनं नाभिसन्दध्युर्म्मित्रोदासीनशत्रवः।
तथा सर्व्वं संविदध्यादेष सामासिको नयः॥
यदा तु यानमातिष्ठेदरिराष्ट्रं प्रति प्रभुः।
तदानेन विधानेन यायादरिपुरं शनैः॥
मार्गशीर्षे शुभे मासि यायाद्यात्रां महीपतिः।
फाल्गुनं वाथ चैत्रं वा मासौ प्रति यथाबलम्॥
अन्येष्वपि तु कालेषु यदा पश्येद्ध्रुवं जयम्।
तदा यायाद्विगृह्यैव व्यसने चोत्थिते रिपोः॥
कृत्वा विधानं मूले तु यात्रिकञ्च यथाविधि।
उपगृह्यास्पदञ्चैव चारान् सम्यग्विधाय च॥
संशोध्य त्रिविधं मार्गं षड्विधञ्च बलं स्वकम्।
साम्परायिककल्पेन यायादरिपुरं शनैः॥
शत्रुसेविनि मित्रे च गूढे युक्ततरो भवेत्।
गतप्रत्यागते चैव स हि कष्टतरो रिपुः॥
दण्डव्यूहेन तन्मार्गं यायात्तु शकटेन वा।
वराहमकराभ्यां वा सूच्या वा गरुडेन वा॥
यतश्च भयमाशङ्केत्ततो विस्तारयेद्बलम्।
पद्मेन चैव व्यूहेन निविशेत सदा स्वयम्॥
सेनापतिबलाध्यक्षौ सर्व्वदिक्षु निवेशयेत्।
यतश्च भयमाशङ्केत् प्राचीं तां कल्पयेद्दिशम्॥
गुल्मांश्च स्थापयेदाप्तान् कृतसंज्ञान् समन्ततः।
स्थाने युद्धे च कुशलानभीरूनविकारिणः॥ ० ॥
संहतान् योधयेदल्पान् कामं विस्तारयेद्बहून्।
सूच्या वज्रेण चैवैतान् व्यूहेन व्यूह्य योधयेत्॥
स्यन्दनाश्वैः समे युध्येदनूपे नौद्विपैस्तथा।
वृक्षगुल्मावृते चापैरसिचर्म्मायुधैः स्थले॥
कुरुक्षेत्रांश्च मत्स्यांश्च पञ्चालान् शूरसेनजान्।
दीर्घान् लघूंश्चैव नरानग्रानीकेषु योधयेत्॥
प्रहर्षयेद्बलं व्यूह्य तांश्च सम्यक् परीक्षयेत्।
चेष्टाश्चैव विजानीयादरीन् योधयतामपि॥
उपरुध्यारिमासीत राष्ट्रं चास्योपपीडयेत्।
दूषयेच्चास्य सततं यवसान्नोदकेन्धनम्॥
भिन्द्याच्चैव तडागानि प्राकारपरिखास्तथा।
समवस्कन्दयेच्चैनं रात्रौ वित्रासयेत्तथा॥
उपजप्यानुपजपेद्बुध्येतैव च तत्कृतम्।
युक्ते च दैवे युध्येत जयप्रेप्सुरपेतभीः॥
साम्ना दानेन भेदेन समस्तैरथवा पृथक्।
विजेतुं प्रयतेतारीन्न युद्धेन कदाचन॥
अनित्यो विजयो यस्माद्दृश्यते युध्यमानयोः।
पराजयश्च संग्रामे तस्माद्युद्धं विवर्ज्जयेत्॥
त्रयाणामप्युपायानां पूर्व्वोक्तानामसम्भवे।
तथा युध्येत सम्पन्नो विजयेत रिपून् यथा॥ ० ॥
जित्वा सम्पूजयेद्देवान् ब्राह्मणांश्चैव धार्म्मिकान्।
प्रदद्यात् परिहारांश्च ख्यापयेदभयानि च॥
सर्व्वेषान्तु विदित्वैषां समासेन चिकीर्षितम्।
स्थापयेत्तत्र तद्वंश्यं कुर्य्याच्च समयक्रियाम्॥
प्रमाणानि च कुर्व्वीत तेषां धर्म्म्यान् यथोदितान्।
रत्नैश्च पूजयेदेनं प्रधानपुरुषैः सह॥
आदानमप्रियकरं दानञ्च प्रियकारकम्।
अभीप्सितानामर्थानां काले युक्तं प्रशस्यते॥
सर्व्वं कर्म्मेदमायत्तं विधाने दैवमानुषे।
तयोर्द्दैवमचिन्त्यन्तु मानुषे विद्यते क्रिया॥
सह वापि व्रजेद्युक्तः सन्धिं कृत्वा प्रयत्नतः।
मित्रं हिरण्यं भूमिं वा सम्पश्यंस्त्रिविधं फलम्॥
पार्ष्णिग्राहञ्च सम्प्रेक्ष्य तथाक्रन्दञ्च मण्डले।
मित्रादथाप्यमित्राद्वा यात्राफलमवाप्नुयात्॥"
आक्रन्दः पार्ष्णिग्राहस्य नियामको राजा।
"हिरण्यभूमिसम्प्राप्त्या पार्थिवो न तथैधते।
यथा मित्रं ध्रुवं लब्ध्वा कृशमप्यायतिक्षमम्॥ ० ॥
धर्म्मज्ञञ्च कृतज्ञञ्च तुष्टप्रकृतिमेव च।
अनुरक्तं स्थिरारम्भं लघुमित्रं प्रशस्यते॥
प्राज्ञं कुलीनं शूरञ्च दक्षं दातारमेव च।
कृतज्ञं धृतिमन्तञ्च कष्टमाहुररिं बुधाः॥
आर्य्यता पुरुषज्ञानं शौर्य्यं करुणवेदिता।
स्थौललक्ष्यञ्च सततमुदासीनगुणोदयः॥"
स्थौललक्ष्यं बहुप्रदत्वम्।
"क्षेम्यां सस्यप्रदां नित्यं पशुवृद्धिकरीमपि।
परित्यजेन्नृपो भूमिमात्मार्थमविचारयन्॥
आपदर्थं धनं रक्षेद्दारान् रक्षेद्धनैरपि।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि॥
सह सर्व्वाः समुत्पन्नाः प्रसमीक्ष्यापदो भृशम्।
संयुक्तांश्च वियुक्तांश्च सर्व्वोपायान् सृजेद्बुधः॥
उपेतारमुपेयञ्च सर्व्वोपायांश्च कृत्स्नशः।
एतत्त्रयं समाश्रित्य प्रयतेतार्थसिद्धये॥"
उपेतारं आत्मानम्। उपेयं प्राप्यम्॥ ० ॥
"एवं सर्व्वमिदं राजा सह सम्मन्त्र्य मन्त्रिभिः।
व्यायम्याप्लुत्य मध्याह्ने भोक्तुमन्तःपुरं विशेत्॥
तत्रात्मभूतैः कालज्ञैरहार्य्यैः परिचारकैः।
सुपरीक्षितमन्नाद्यमद्यान्मन्त्रैर्विषापहैः॥
विषघ्नैरगदैश्चास्य सर्व्वद्रव्याणि योजयेत्।
विषघ्नानि च रत्नानि नियतो धारयेत् सदा॥
परीक्षिताः स्त्रियश्चैनं व्यजनोदकधूपनैः।
वेशाभरणसंशुद्धाः स्पृशेयुः सुसमाहिताः॥
एवं प्रयत्नं कुर्व्वीत यानशय्यासनाशने।
स्नाने प्रसाधने चैव सर्व्वालङ्कारकेषु च॥
भुक्तवान् विहरेच्चैव स्त्रीभिरन्तःपुरे सह।
विहृत्य तु यथाकालं पुनः कार्य्याणि चिन्तयेत्॥
अलङ्कृतश्च सम्पश्येदायुधीयं पुनर्ज्जनम्।
वाहनानि च सर्व्वाणि शस्त्राण्याभरणानि च॥
सन्ध्याञ्चोपास्य शृणुयादन्तर्व्वेश्मनि शस्त्रभृत्।
रहस्याख्यायिनाञ्चैव प्रणिधीनाञ्च चेष्टितम्॥
गत्वा कक्षान्तरं त्वन्यत् समनुज्ञाप्य तं जनम्।
प्रविशेद्भोजनार्थञ्च स्त्रीवृतोऽन्तःपुरं पुनः॥
तत्र भुक्त्वा पुनः किञ्चित्तूर्य्यघोषैः प्रहर्षितः।
संविशेत्तु यथाकालमुत्तिष्ठेच्च गतक्लमः॥
एतद्विधानमातिष्ठेदरोगः पृथिवीपतिः।
अस्वस्थः सर्व्वमेतत्तु भृत्येषु विनियोजयेत्॥"
इति मानवे ७ अध्यायः॥ ० ॥
कालिकापुराणोक्तराजधर्म्मः ८५। ८६ अध्याययो द्रष्टव्यः। महाभारतोक्तराजधर्म्मः शान्तिपर्व्वणि द्रष्टव्यः। पद्मपुराणोक्तराजधर्म्मः स्वर्गखण्डे १६८ अध्याये द्रष्टव्यः॥

राजधानक, क्ली, (धीयतेऽस्मिन्निति। धा + ल्युट्। ततः कन्। राज्ञो धानकं नगरम्।) राजपुरम्। इति शब्दरत्नावली॥

राजधानी, स्त्री, (धीयतेऽस्यामिति। धा + अधिकरणे ल्युट्। ङीप्। राज्ञो धानी नगरी।) राजधानिका। तत्पर्य्यायः। कोट्टः २ राजधानकम् ३। इति शब्दरत्नावली॥ स्कन्धावारः ४। इति हेमचन्द्रः॥ (यथा, रघुः। २। ७०।
"तौ दम्पती स्वां प्रति राजधानीं
प्रस्थापयामास वशी वसिष्ठः॥")

राजधान्य, क्ली, (राजप्रियं धान्यम्।) श्यामाकः। इति राजनिर्घण्टः॥ (यथा, बृहत्संहितायाम्। ११। १४।
"क्षारे भुवनमविरामवेणुशाल्यन्नसमन्वितश्रीकं।
[illegible] राजधान्यानि॥")

राजपुत्रक, पुं (पुत्रक इव राजा। राजदन्तादित्वात् परनिपातः।) हरपुत्रकः। तत्पर्य्यायः। राजघूर्णः २ महाबकः ३ शिखीपुत्रकः ४ भाण्डः ५ राजबकः ६। इति राजनिर्घण्टः॥ अस्य गुणाः पुत्रकशब्दे द्रष्टव्याः॥

राजनामा [न्] पुं, (राज्ञो नाम नाम यस्य।) पटोलः। इति राजनिर्घण्टः॥

राजनीति, स्त्री, (राज्ञां नीतिः।) राज्ञां नयः। यथा चाणक्यदर्पणप्रथम श्लोकः।
"नानाशास्त्रोद्धृतं वक्ष्ये राजनीतिसमुच्चयम्।
सर्व्वबीजमिदं शास्त्रं चाणक्यं सारसंग्रहम्॥"
अपि च,—
"[illegible]
[illegible]
[illegible]
[illegible]

[illegible]

[illegible]

[illegible]

यन्त्रमुक्ते पाणिमुक्ते अमुक्ते मुक्तधारिते ।
अस्त्राचार्य्यो निरुद्वेगः कुलपुत्रो विशिष्यते ॥
दृढः कुलोद्गतो दक्षः पितृपैतामहः शुचिः ।
राज्ञामन्तःपुराध्यक्षो विनीतश्च तथेष्यते ॥
एवं सप्ताधिकारेषु पुरुषाः सप्त तेऽपरे ।
पञ्च ग्रन्थाधिकरणाः पुरुषाः सप्त तेऽपरम् ॥
अन्ये पुरुषाः कार्य्या राज्ञा सर्व्वेषु कर्म्मसु ।
स्थापनाचातितत्त्वज्ञः सततं प्रतिजागरा ॥
राज्ञः स्यादायुधागारे दक्षः कर्म्मसु चोद्यतः ।
कर्म्माण्यपरिमेयानि राज्ञो भृगुकुलोद्वह ॥
उत्तमाधममध्यानि बुद्ध्वा कर्म्माणि पार्थिवः ।
उत्तमाधममध्येषु पुरुषेषु नियोजयेत् ॥
नरकर्म्मविपर्य्यासाद्राजा नाशमवाप्नुयात् ।
नियोगं पौरुषं भक्तिं श्रुतं शौर्य्यं कुलं नयम् ॥
ज्ञात्वा वृत्तिर्व्विधातव्या पुरुषाणां यथोचिता ।
पुरुषान्तरविज्ञाने तत्त्वसारनिबन्धनात् ॥
बहुभिर्म्मन्त्रयेत् कामं राजा मन्त्रं पृथक् पृथक् ।
मन्त्रिणामपि नो कुर्य्यान्मन्त्री मन्त्रप्रकाशनम् ॥
क्वचित् कस्यचिद्विश्वासो भवतीह सदा नृणाम् ।
निश्चयश्च सदा मन्त्रे कार्य्य एकेन सूरिणा ॥
भवेद्वा निश्चयावाप्तिः परबुद्ध्युपजीवनात् ।
एकस्यैव महीभर्त्तुर्भूयः कार्य्यो विनिश्चयः ॥
ब्राह्मणान् पर्य्युपासीत त्रयीं शास्त्रसुनिश्चिताम् ।
नासच्छास्त्रवतो मूढांस्ते हि लोकस्य कण्टकाः ॥
वृद्धांश्च नित्यं सेवेत विप्रान् वेदविदः शुचीन् ।
तेभ्यो हि शिक्षेद्विनयं विनीतात्मा हि नित्यशः ॥
समग्रां वशगां कुर्य्यात् पृथिवीं नात्र संशयः ।
बहवोऽविनयाद्भ्रष्टा राजानः सपरिच्छदाः ॥
वनस्था अपि राज्यानि विनयात् प्रतिपेदिरे ।
त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिञ्च शाश्वतीम् ।
आन्वीक्षिकीञ्चात्मविद्यां वार्त्तारम्भांश्च लोकतः ।
इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम् ।
जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः ।
यजेत राजा क्रतुभिर्व्विविधैराप्तदक्षिणैः ।
धर्म्मार्थञ्चैव विप्रेभ्यो दद्याद्भोगान् धनानि च ॥
सांवत्सरिकमाप्तैश्च राष्ट्रादाहारयेद्बलिम् ।
स्यात् स्वाध्यायपरो लोके वर्त्तेत पितृवन्नृषु ॥
आवृत्तानां गुरुकुलाद्विप्राणां पूजको भवेत् ।
नृपाणामक्षयो ह्येष निधिर्ब्राह्मो विधीयते ॥
तं न स्तेना नचामित्रा हरन्ति न च नश्यति ।
तस्माद्राज्ञा निधातव्यो ब्राह्मणेष्वक्षयो निधिः ॥
समोत्तमाधमै राजा त्वाहूतः पालयन् प्रजाः ।
न निवर्त्तेत संग्रामात् क्षात्रधर्म्ममनुस्मरन् ॥
संग्रामेष्वनिवर्त्तित्वं प्रजानां परिपालनम् ।
शुश्रूषा ब्राह्मणानाञ्च राज्ञां निःश्रेयसं परम् ॥
कृपणानाथवृद्धानां विधवानाञ्च योषिताम् ।
योगक्षेमञ्च वृत्तिञ्च तथैव परिकल्पयेत् ॥
वर्णाश्रमव्यवस्थानं तथा कार्य्यं विशेषतः ।
स्वधर्म्मप्रच्युतान् राजा स्वधर्म्मे स्थापयेत्तथा ॥
आश्रमे च तथा कार्य्यं तैलभाजनभोजनम् ।
स्वयमेवानयेद्राजा सत्कृतान्नावमानयेत् ॥
तापसे सर्व्वकार्य्याणि राज्यमात्मानमेव च ।
निवेदयेत् प्रयत्नेन देववच्चिरमर्च्चयेत् ॥
द्वे प्रज्ञे वेदितव्ये च ऋज्वी वक्रा च मानवैः ।
वक्रां ज्ञात्वा न सेवेत प्रतिबाधेत चागताम् ॥
नास्य छिद्रं परो विद्याद्विद्याच्छिद्रं परस्य तु ।
गूहेत् कूर्म्म इवाङ्गानि रक्षेद्विवरमात्मनः ॥
न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् ।
विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ॥
विश्वासयेच्चाप्यपरं तत्त्वभूतेन हेतुना ।
बकवच्चिन्तयेदर्थान् सिंहवच्च पराक्रमेत् ॥
वृकवच्चावलुम्पेत शशवच्च विनिष्पतेत् ।
दृढप्रहारी च भवेत्तथा शूकरवन्नृप ॥
चित्राकारश्च शिखिवद्दृढभक्तस्तथा श्ववत् ।
भवेच्च मधुराभाषी तथा कोकिलवन्नृप ॥
काकशङ्की भवेन्नित्यमज्ञातवसतिं वसेत् ।
नापरीक्षितपूर्व्वञ्च भोजनं शयनं स्पृशेत् ॥
वस्त्रं पुष्पमलङ्कारं यच्चान्यन्मनुजोत्तम ।
न गाहेज्जनसम्बाधं न चाज्ञातजलाशयम् ॥
अपरीक्षितपूर्व्वञ्च पुरुषैराप्तकारिभिः ।
नारोहेत् कुञ्जरं व्यालं नादान्तं तुरगं तथा ॥
नाविज्ञातां स्त्रियं गच्छेन्नैव देवोत्सवे वसेत् ।
नरेन्द्रलक्ष्म्या धर्म्मज्ञ त्राता यत्नो भवेन्नृप ।
सद्वृत्ताश्च तथा पुष्टा सततं प्रतिमानिताः ॥
राज्ञा सहायाः कर्त्तव्याः पृथिवीं जेतुमिच्छता ।
यथार्हञ्चाप्यथ भृतान् राजा कर्म्मसु योजयेत् ।
धर्म्मिष्ठान् धर्म्मकार्य्येषु शूरान् संग्रामकर्म्मसु ॥
निपुणानर्थकृत्येषु सर्व्वत्र च तथा शुचीन् ।
स्त्रीषु षण्ढान् नियुञ्जीत तीक्ष्णान् दारुणकर्म्मसु ॥
धर्म्मे चार्थे च कामे च भये च रविनन्दन ।
राजा यथार्हं कुर्य्यादुपधाभिः परीक्षणम् ॥
समतीतोपधान् भृत्यान् कुर्य्याद्धस्तिवनेचरान् ।
तत्पादान्वेषणे यत्तानध्यक्षांश्चैव कारयेत् ॥
एवमादीनि कर्म्माणि नृपैः कार्य्याणि भार्गव ।
सर्व्वथा नैष्यते राज्ञस्तीक्ष्णोपकरणस्य च ॥
पापकानि च कर्म्माणि यानि राज्ञो नृपोत्तम ।
सन्त्यानि न कुर्व्वन्ति सन्ताप्यान् विभयान्नृप ।
नेष्यते पृथिवीशानां तीक्ष्णोपकरणक्रिया ।
यस्मिन् कर्म्मणि यस्य स्यात् विशेषेण च कौशलम् ।
तस्मिन् कर्म्मणि तं राजा परीक्ष्य विनियोजयेत् ॥
पितृपैतामहान् भृत्यान् सर्व्वकर्म्मसु योजयेत् ।
विना दायादकृत्येषु परीक्ष्य तत्समाश्रयान् ।
नियुञ्जीत महाभाग तस्य ते हितकारिणः ॥
परराजगृहात् प्राप्तान् जनसंग्रहकाम्यया ।
दुष्टान् वाप्यदुष्टान् वा संश्रयीत प्रयत्नतः ॥
दुष्टं विज्ञाय विश्वासं न कुर्य्यात्तस्य भूमिपः ।
वृत्तिं तस्यापि वर्त्तेत जनसंग्रहकाम्यया ॥
राजा देशान्तरं प्राप्तं पुरुषं पूजयेद्भृशम् ।
ममायं देशराजेति बहुमानेन चिन्तयन् ॥
निरस्तोऽपि परैर्यो वै राजा विज्ञाय विग्रहम् ।
दुर्ल्लभं पुरुषं कुर्य्यात् निर्दुःखं सावधानतः ॥
कामितार्थं स्वकं राज्ये राजानं कारयेद्बुधः ।
कोऽपि दृष्टपरे देहे प्राप्तं कोशं विचारयेत् ।
धनाढ्यानशैशवज्ञान् नियुञ्जीत सदा नरान् ।
अलङ्कारविदिनः सौम्यांस्तथा ज्ञातान् परस्परम् ॥
वणिजो मन्त्रकुशलान् सांवत्सरचिकित्सकान् ।
तथा प्रव्रजिताकारान् चारान् राजा नियोजयेत् ॥
नैकस्य राजा श्रद्दध्याच्चारस्यापि च भाषितम् ।
द्वयोः सम्बन्धमाज्ञाय श्रद्दध्यान्नृपतिस्ततः ॥
परस्परस्याविदितौ यदि स्यातां चरावुभौ ।
तस्माद्राजा प्रयत्नेन गूढांश्चारान्नियोजयेत् ॥
राज्यस्य मूलमेतावद्या राज्ञश्चारदृष्टिता ।
चाराणामपि यत्नेन राज्ञा कार्य्यं परीक्षणम् ॥
विरज्यन्ति यथा जना विज्ञेयं तन्महीक्षिता ।
अनुरागात् कथं लोके कर्म्म कार्य्यं महीक्षिता ॥
लोकरागापरागौ च भवतस्तु गुणागुणात् ।
सर्व्वं राज्ञो चरायत्तं तेषु यत्नपरो भवेत् ॥
कर्म्मणा केन मे लोके जनः सर्व्वोऽनुरज्यते ।
विरज्यते केन तथा विज्ञेयं तन्महीक्षिता ॥
विरागजनकं लोके वर्ज्जनीयं विशेषतः ॥

जनानुरागप्रभवा हि लक्ष्मी
राज्ञां मता भार्गववंशचन्द्र ।
तस्मात् प्रयत्नेन नरेन्द्रमुख्यैः
कार्य्योऽनुरागो भुवि मानवस्य ॥”

इति मात्स्ये २१५ अध्यायः ॥ ॥

अपरञ्च ।

रामोवाच ।

“स्वदेशे भूपतेर्धर्म्मास्त्वत्र वक्तुं यदि क्षमते ।
तस्मात् समागतो यामि महाभाग विशाम्पते ॥
पृथिवी वेश्मनो यस्मात् वरा निवसता नृप ।
नाराधयति यो लोकं बहुमतं पालयेत् ॥
नाराधयेद्यो राजा मनुष्यो न चराचरम् ।
अतस्तु नृप यत्नेन सर्व्वां कीर्त्तिं समाचरेत् ॥
कीर्त्तिप्रधानो नृपो यस्तु विपत्तिष्वपि सत्तमः ।
चिरं तपति पृथिवीं कण्टकैः परिवर्जितः ॥
यशो न रक्षति कीर्त्तिभूपालाच्च दुरात्मभिः ।
अधर्म्मैरपि देवैश्च भवनाच्च वर्जयेत् ॥
आद्यन्तेन यशो नित्यं विमलं तथा सम्पदा ।
कीर्त्तिं यस्तु रक्षति राजा विनीतो धर्म्मेण हि ॥
आरभेत महीं गुप्तः सर्व्वदा नृप ।
समाधौ गुणदोषाणां कीर्त्तिमेकतमो न हि ॥
तनौ गौरी विमलाश्च बहवा अक्रोधिनः ।
राजविद्या विसृजन्ति क्रोधवत्यारभेत् ॥
ब्राह्मणान् सर्व्वथैव वेदाश्च शास्त्रविदः ।
पुरा महात्मनिष्ठान्न हिंस्यात् नराधिप ।
स्पर्शयेत्तत्र वेदवेत्तृन् पुरोहितम् ।
मानिता नित्यं स्यात् हितवेदान् ग्राम न
भाव ॥
राजन् विप्रा दोषा पुरा अवगच्छता ।
अतो भूपा भवन्ति तथा पूजितेभ्योऽनय ।
दैवज्ञ वस्तु राजा याति पुरस्कृतम् ।
दीर्घ्योऽपि सदा कुर्य्यात् तथा वैद्यो विचक्षणः ।
स्वर्ग्गं प्राप्यते वै च भूपालः प्रतिपालितः ।
हिरण्यं विसर्ज्जयेत् विप्रेभ्यो गोधनं तथा ॥

त्रिंशद्दिवा महीपाला सावर्णा यथा तथा ।
तथा सवर्णे दैवेन राजसमितिषु पतिः ।
एकाग्रा राजर्षे तु तव देवि राज्ञा सुमता ।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

दैत्य ।

[illegible]

राजन्वती, स्त्री, (राजन्वान् प्रशस्तो राजा अस्त्यस्याः ।) ... इति शब्दरत्नावली । ... यथा रघुः । ६ । २२ ।

"... राजन्वतीमाहुरनेन भूमिम् ।")

राजन्वान्, त्रि, (राजा ... अस्यास्तीति मतुप् । "राजन्वान् सौराज्ये ।" ५ । २ । १२० इति निपातनात् साधुः ।)

[illegible]

राजपट्ट, पुं, (राजा पट्टः ।) ... इति हेमचन्द्रः ।

[illegible]

राजपर्णी स्त्री, ... इति राजनिर्घण्टः ।

राजपलाण्डु पुं (पलाण्डूनां राजा । राजदन्तादित्वात् परनिपातः ।) रक्तपलाण्डुः । ... इति राजनिर्घण्टः ।

राजपीलु पुं, (राजेव पीलुः ।) महापीलु-वृक्षः । इति राजनिर्घण्टः ।

राजपुत्र पुं, (राज्ञः पुत्रः ।) बुधग्रहः । इति ... यथा —

[illegible]

यदैषां विजयं कृत्वा कार्य्यं भक्ष्यस्य तत ।
कृत्वा भक्ष्यस्य सर्व्वं राजा जनपदं जयेत् ॥
कृत्वा तु विजयं तेषां प्रभूतं बाह्यांस्ततो जयेत् ।
बाह्याश्च त्रिविधा ज्ञेयास्तुल्याभ्यन्तरकृत्रिमाः ॥
गुरवस्ते यथापूर्व्वं तेषु यत्नपरो भवेत् ।
पितृपैतामहं मित्रममित्रञ्च तथा रिपोः ।
कृत्रिमञ्च महाभाग मित्रं त्रिविधमुच्यते ।
तथापि च गुरुः पूर्व्वं भवेत्तथापि चादृतः ॥
स्वाम्यमात्यौ जनपदो दुर्गं सैन्यं तथैव च ।
कोषो मित्रञ्च धर्म्मज्ञ सप्ताङ्गं राज्यमुच्यते ॥
सप्ताङ्गस्यापि राज्यस्य मूलं स्वामी प्रकीर्त्तितः ।
तन्मूलत्वात्तथाङ्गानां राजा रक्ष्यः प्रयत्नतः ॥
षडङ्गरक्षा कर्त्तव्या तथा तेन प्रयत्नतः ।
अङ्गेभ्यो यस्त्वथैकस्य द्रोहमाचरतेऽल्पधीः ।
वधस्तस्य तु कर्त्तव्यः शीघ्रमेव महीक्षिता ॥
न राज्ञा मृदुना भाव्यं मृदुर्हि परिभूयते ।
न भाव्यं दारुणेनापि तीक्ष्णादुद्विजते जनः ॥
काले मृदुर्यो भवति काले भवति दारुणः ।
राजा लोकद्वयापेक्षी तस्य लोकद्वयं भवेत् ॥
भृत्यैः सह महीपाल परिहासं विवर्ज्जयेत् ।
भृत्याः परिभवन्तीह नृपं हर्षवशं गतम् ॥
व्यसनानि च सर्व्वाणि भूपतिः परिवर्ज्जयेत् ।
लोकसंग्रहणार्थाय कृतकव्यसनो भवेत् ॥
शौण्डीरस्य नरेन्द्रस्य नित्यमुदित्तचेतसः ।
जना विरागमायान्ति सदा दुःसेव्यभावतः ॥
स्मितपूर्व्वाभिभाषी स्यात् सर्व्वस्यैव महीपतिः ।
वध्येष्वपि महाभाग भ्रुकुटीं न समाचरेत् ॥
भाव्यं धर्म्मभृतां श्रेष्ठ स्थूललक्ष्येण भूभुजा ।
स्थूललक्ष्यस्य वशगा सर्व्वा भवति मेदिनी ॥
अदीर्घसूत्रश्च भवेत् सर्व्वकर्म्मसु पार्थिवः ।
दीर्घसूत्रस्य नृपतेः कर्म्महानिर्ध्रुवं भवेत् ॥
रागे दर्पे च माने च द्रोहे पापे च कर्म्मणि ।
अप्रिये चैव कर्त्तव्ये दीर्घसूत्रः प्रशस्यते ॥
राज्ञा संवृतमन्त्रेण सदा भाव्यं द्विजोत्तम ।
तस्यासंवृतमन्त्रस्य ज्ञेया सर्व्वापदो ध्रुवाः ॥
कृतान्येव तु कार्य्याणि ज्ञायन्ते यस्य भूपतेः ।
नारब्धानि महाभाग तस्य स्याद्वसुधा वशे ॥
मन्त्रमूलं सदा राज्यं तस्मान्मन्त्रः सुरक्षितम् ।
कर्त्तव्यः पृथिवीपालैर्मन्त्रभेदभयात् सदा ॥
मन्त्रवित् साधितो मन्त्रः सम्पत्तीनां सुखावहः ।
मन्त्रच्छलेन बहवो विनष्टाः पृथिवीक्षितः ॥
आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च ।
नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः ॥
यस्य कुशलस्य वशे सर्व्वा वसुन्धरा ।
भवतीह महीभर्त्तुः सदा पार्थिवनन्दन ॥
नैकस्तु मन्त्रयेन्मन्त्रं न राजा बहुभिः सह ।
नारोहेद्विषमां नावं नापरीक्षितनाविकाम् ॥
ये चास्य भूमिं जयतो भवेयुः परिपन्थिनः ।
तानानयेद्वशं सर्व्वान् सामादिभिरुपक्रमैः ॥
यथा न स्यात् कृशीभावः प्रजानामनवेक्षया ।
तथा राज्ञा प्रकर्त्तव्यं स्वराष्ट्रं परिरक्षता ॥
मोहाद्राजा स्वराष्ट्रं यः कर्षयत्यनवेक्षया ।
सोऽचिराद्भ्रश्यते राज्याज्जीविताच्च सबान्धवः ॥
भृतो वत्सो जातबलः कर्म्मयोग्यो यथा भवेत् ।
तथा राष्ट्रं महाभाग भृतं कर्म्मसहं भवेत् ॥
यो राष्ट्रमनुगृह्णाति राज्यं स परिरक्षति ।
संजातमुपजीवन् स विन्दते स महत् फलम् ॥
राष्ट्राद्धिरण्यं धान्यञ्च महीं राजा सुरक्षिताम् ।
महता तु प्रयत्नेन स्वराष्ट्रस्य च रक्षिता ॥
नित्यं स्वेभ्यः परेभ्यश्च यथा माता यथा पिता ।
गोपितानि सदा कुर्य्यात् स विभागी प्रियाणि च ॥
अप्राप्तमुपयोक्तव्यं फलं तेभ्यस्तथैव च ।
धर्म्मकर्म्मेदमायत्तं विधाने दैवमानुषे ।
तयोर्दैवमचिन्त्यं हि पौरुषे विद्यते क्रिया ॥
एवं महीं पालयतोऽस्य भर्त्तु-
र्लोकानुरागः परमो भवेच्च ।
लोकानुरागप्रभवा च लक्ष्मी-
र्लक्ष्मीवतश्चैव परा च कीर्त्तिः ॥"
इति मात्स्ये २ अध्यायः ।

राजपुत्रिका स्त्री, (राजपुत्री + स्वार्थे कन् ।) शरारिपक्षी । शराली इति भाषा । यथा —
"शरारिराटिराडिश्च आडिस्तु राजपुत्रिका ।" इति जटाधरः ।
राजकन्या च । (यथा, हरिवंशे । ९९ । ३६ ।
"उत्पादयामास ततः पुत्रं वै राजपुत्रिका ।")

राजपुत्री, स्त्री (राज्ञः पुत्रीव ।) कटुतुम्बी । रेणुका । जाती । राजरीतिः । छुछुन्दरी । इति राजनिर्घण्टः । मालती । यथा,—
"अतिमुक्तश्चारुजातिर्मालती सुमना अपि ।
राजपुत्री मनोज्ञा——।" इति जटाधरः ।
राजकन्या च । (यथा महाभारते ।१।७३।११।
"सुव्यक्तं राजपुत्री त्वं यथा कल्याणि भाषसे । भार्य्या मे भव सुश्रोणि ब्रूहि किं करवाणि ते ॥")

राजपुष्पः पुं (पुष्पाणां राजा । राजदन्तादित्वात् परनिपातः ।) नागकेशरपुष्पम् । यथा,—
"चाम्पेयः केशरो नागकेशरः काञ्चनाह्वयः ।
महीधो राजपुष्पश्च फलकः करपालकः ।"
इति शब्दचन्द्रिका ।

राजपुष्पी, स्त्री (राजाधिप पुष्पमस्याः । ङीष् ।) करुणीवृक्षः । इति राजनिर्घण्टः ।

राजप्रिया स्त्री (राज्ञः प्रिया ।) करुणीवृक्षः । इति राजनिर्घण्टः ।

राजफणिज्झकः, पुं (राजते इति । राज + अच् । राजो रोचिष्णुः फणिज्झकः ।) नारङ्गवृक्षः । इति शब्दमाला ।

राजफलं, क्ली, (राजाभिधेयं फलम् ।) पटोलम् । इति त्रिकाण्डशेषः ।

राजफला स्त्री (राजाभिधेयं फलमस्याः ।) जम्बूः । इति राजनिर्घण्टः ।

राजबदरं क्ली (राज्ञो बदरमिव [illegible] ।) लवणम् । [illegible] । इति मेदिनी ।

राजबदरः, पुं (बदराणां राजा । राजदन्तादित्वात् परनिपातः ।) उत्तमकोलः । तत्पर्य्यायः । नृपेष्टः २ नृपबदरः ३ राजबदरम् ४ पृथुकोलः ५ तनुबीजः ६ मधुरफलः ७ राजकोलः ८ । अस्य गुणाः । सुमधुरत्वम् । शिशिरत्वम् । दाहार्त्तिपित्तवातहरत्वम् । वृष्यत्वम् । वीर्य्यवृद्धिकरत्वम् । शोषश्रमशान्तिकरत्वञ्च । इति राजनिर्घण्टः ॥

राजबीजी, [न्] त्रि, (राजा बीजी कारणं यस्य ।) राजवंश्यः । इत्यमरः । २ । ८ । २ ॥

राजभद्रिका स्त्री, राजपुत्रीपक्षी । यथा —
"गाभटीर पङ्कीरो राजपुत्री राजभद्रिका ।" इति जटाधरः ।

राजभद्रकः पुं कुङ्कुमम् । निम्बः । इति राजनिर्घण्टः । पारिभद्रकः । इति [illegible] ।

राजभूयं, क्ली (राज्ञो भावः । राजन् + भू + क्यप् ।) राजत्वम् । यथा —
"स्वाद्वन्नभूयं सकलं प्रजानामुन्मिषति ।
देवभूयानि [illegible] । इत्यमरकोषव्याख्या ।

राजभोग्यं, क्ली (राज्ञा भोक्तुं योग्यम् । भुज + ण्यत् । कुत्वम् ।) जातीकोषम् । पियालवृक्षे पुं । इति शब्दचन्द्रिका ॥

राजमल्लकः पुं (मल्लकानां राजा । राजदन्तादित्वात् परनिपातः ।) हस्तिकः । बड़ बेट इति भाषा । तत्पर्य्यायः । महामल्लकः २ पीताङ्गः ३ पीतमल्लकः ४ वर्णीयः ५ मत्स्यराजः ६ । इति राजनिर्घण्टः ।

राजमाषः पुं राज्ञो माषः । [illegible] इति भाषा । तत्पर्य्यायः । [illegible] २ [illegible] ३ । इति त्रिकाण्डशेषः ।

राजमार्गः, पुं (राज्ञो मार्गः ।) राजपथः । तद्विवरणं यथा —
"राजमार्गे [illegible] ।
[illegible] ।"
इति [illegible] ।
अपि च ।
"[illegible]" इति [illegible] ।
([illegible] । ८ । १८० ।
"[illegible] राजमार्गे [illegible] ।
[illegible] ।")
[illegible] । यथा, [illegible] । ११ । १ ।

विवेकिनो महीपाला पालयन्ति यथा प्रजाः ।
तथा तानपि देवश्च पालयत्यनिशं हरिः ॥
प्रजानां पालनं दान देहेऽपि राज्ञां शुभावहे ।
इत्थं ये वर्ज्जिता भूपास्ते विज्ञेया नृपाधमाः ॥
दुष्टानां शासनञ्चैव शिष्टानां प्रतिपालनम् ।
प्रकुर्व्वन्तो महीपालाश्चिरं नन्दन्ति भूतले ॥
न्यायेनोपार्ज्जितं वित्तं यत्नात्संरक्षणीयमिति ।
निश्चिन्तो हि महीपालो विपत्तौ न हि निस्तरेत् ॥
नृपा कल्याणमिच्छन्तो निजराज्यप्रभाशुभम् ।
यतन्ते नित्य विप्रेन्द्र ! बलदाचारचञ्चुराः ।
परचक्रभयं यावत् नायाति निश्चयेद्भयम् ।
आगते तु भये भूप आचरन्निर्भयो यथा ॥
शास्तौ वापि च मित्रे वा पुत्रे वापि च मन्त्रिणि ।
कुर्य्यान्मुखेन गाम्भीर्य्यं मनसा प्रेम केवलम् ॥
मन्त्रिणो घातयन्त्युग्राः प्रजाश्च भ्रातरस्तथा ।
गाम्भीर्य्यहीनं भूपालं मन्यन्ते न हि भूपवत् ॥
तिष्ठन्ति प्रथमं दूरे वसन्ति पुरतस्तदा ।
लोका श्रियं यच्छन्ति ह्यगाम्भीर्य्यभूपतेः ।
रक्षेन्मन्त्रिणो राजा चिरं राज्यमिच्छता ।
कर्त्तव्या सकले राज्ये रक्षको नैव भूसुर ।
धनवस्त्रस्त्रहीनानां भक्तानां सम्पद् हरेत् ।
तस्यां सम्पदि भूपालो भक्तमन्यं नियोजयेत् ॥
स्त्रीजितो जीविजितो राजा गीतवाद्यरतः सदा ।
चतुरङ्गबलैर्हीनः कथया विघ्नं प्रजेत् ॥
आचारयद्धः सम्यक् खड्गावयप्रतिपालनम् ।
गाम्भीर्य्यञ्चेति भूपानां कथ्यानि द्विजोत्तम ॥
स कथं नृपतिर्यस्तु प्रतापेन विवर्ज्जितः ।
स कथं नृपतिर्येन न जिता परमेदिनी ॥
जितायां परमेदिन्यां यावत् पादप्रवेशनम् ।
प्रतिपादेऽश्वमेधस्य फलं प्राप्नोति मानवः ॥
मरुभूमिक्रमाकाङ्क्षी स्थले वा नृपतिर्युधि ।
सदा गच्छेत् परं धाम विमुक्तः सर्व्वपातकैः ॥
युधि प्राप्तजयो राजा प्राप्नोति परमं महः ।
स साहसप्राप्तवृद्धिर्व्वैरिसम्पल्लभेत ।
ब्राह्मणस्य ब्रह्मघ्नस्य पलायनपरायणम् ।
मोहात् युधि यो हन्यात् स भूपो यात्यधो गतिम् ॥
पलायनपरो युद्धे हन्तव्यो न द्विजोत्तम ! ।
तावुभावपि तिष्ठेतां नरकेऽब्दशतं सदा ॥
युधि सम्मुखमायान्तं योद्धा हन्यान्न महीसुर ।
तिष्ठेतां तावपि स्वर्गे यावच्चन्द्रदिवाकरौ ।
मद्भनाच्च किमुक्तेन मन्येयादृश्यते यथा ।
प्रजापालनजन्मानां कदाचिन्नावसीदति ॥"
इति पाद्मे क्रियायोगसारे ९ अध्यायः ॥

राजनील क्ली मरकतमणिः । इति शब्दरत्नावली ॥

राजन्य, पुं (राज्ञोऽपत्यमिति । राजन्+ "राजश्वशुराद्यत् ।" ४ । १ । १३७ । इति यत् ।) क्षत्रियः । इत्यमरः ॥ (यथा, ऋग्वेदे । १० । ९० । १२ ।
"ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥")

राजन्य, पुं (राजति दीप्यते इति । राज + "राजेरन्य ।" उणा ३ । १०० । इति अन्य ।) अग्निः । इत्युणादिकोषः ॥ क्षीरिकावृक्षः । इति जटाधरः ॥

राजन्यकं, क्ली, (राजन्यानां क्षत्रियाणां समूहः । राजन्य + "गोत्रोक्षोष्ट्रोरभ्रराजराजन्येति ।" ४ । २ । ३९ । इति वुञ् ।) क्षत्रियसमूहः । इत्यमरः ॥ (यथा रघुः । ७ । ५६ ।
"रथी निषङ्गी कवची धनुष्मान्
दृप्तः स राजन्यकमेकवीरः ।
निवारयामास महावराहः
कल्पक्षयोद्वृत्तमिवार्णवाम्भः ॥"
राजन्यानां विषयो देशो वा पुं । इति काशिका ॥ अत्र "राजन्यादिभ्यो वुञ् ।" ४ । २ । ५३ । इति वुञ्प्रत्ययः ।)

राजन्वान् त्रि, (राजा अस्यास्मिन्निति वा । राजन् + प्रशस्तायां मतुप् । "राजन्वान् सौराज्ये ।" ८ । २ । १४ । इति निपातनात् नलोपाभावः ।) सुराजयुक्तदेशः । इत्यमरः ॥ "प्रजापालनाभिज्ञधर्म्मपरायणराजयुक्तो देशः राजन्वान् राजा विद्यतेऽस्येति भूमादिषु प्रशस्तायां वा । यदुक्तं तन्त्रान्तरे ।
'भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने ।
सम्बन्धेऽस्ति विवक्षायां भवन्ति मतुबादयः' ॥ इति
स्मृतेः प्रशस्ये भूमादयाऽप्यस्ति अर्थात् अर्थात् लभ्यन्त एव । निपातनान्नलोपाभावः । न सौराज्ये राज्ञो नस्य लुक् नाति इति परे । सुराज्ञि धर्म्मपरत्वात् शोभना राजानोऽस्येति भाषायां मतुरिति वा निषेधः । ईशो लोकोप लक्षक सुराज्ञि लोके दृश्यते ।" इति तट्टीकायां भरतः ॥ (यथा रघुः । ६ । २२ ।
"कामं नृपाः सन्तु सहस्रशोऽन्ये
राजन्वतीमाहुरनेन भूमिम् ।
नक्षत्रताराग्रहसङ्कुलापि
ज्योतिष्मती चन्द्रमसैव रात्रिः ॥")

राजपटोल, पुं (पटोलानां राजा । परनिपातः ।) मधुरपटोलः । इति रत्नमाला ॥

राजपटोली, स्त्री, (राजप्रिया पटोली ।) मधुरपटोली । इति राजनिर्घण्टः ॥

राजपट्ट, पुं, (राजप्रियः पट्ट इव ।) मणिविशेषः । तत्पर्य्यायः । विराटकः २ । इति त्रिकाण्डशेषः ॥

राजपट्टिका, स्त्री चातकपक्षी । इति हारावली ॥

राजपथ पुं (राज्ञां पन्थाः । "ऋक्पूरब्धूः पथामानक्षे ।" ५ । ४ । ७४ । इति अ ।) राजमार्गः । तस्य लक्षणं यथा,—
"धनूंषि दश विस्तीर्णः श्रीमान् राजपथः कृतः ।
नृवाजिरथनागानामसम्बाधः सुसञ्चरः ॥"
इति देवीपुराणम् ॥
(यथा, कुमारसम्भवे । ७ । ६३ ।
"तावत्पताकाकुलमिन्दुमौलि
रुत्तोरणं राजपथं प्रपेदे ॥")

राजपर्णी स्त्री, प्रसारिणी लता । इति राजनिर्घण्टः ॥

राजपलाण्डु, पुं (पलाण्डूनां राजा । राजदन्तादित्वात् परनिपातः ।) रक्तवर्णपलाण्डुः । लाल पेँयाज इति भाषा । तत्पर्य्यायः । यवनेष्टः २ नृपाह्वयः ३ राजप्रियः ४ महाकन्दः ५ दीर्घपत्रः ६ रोचकः ७ नृपेष्टः ८ नृपकन्दः ९ महाकन्दः १० नृपप्रियः ११ रक्तकन्दः १२ राजेष्टः १३ । अस्य गुणाः । शिशिरत्वम् । पित्तकफकारित्वम् । दीपनत्वम् । वह्निकारकत्वञ्च । इति राजनिर्घण्टः ॥

राजपीलु पुं, (राजप्रियः पीलुः ।) महापीलुवृक्षः । इति राजनिर्घण्टः ॥

राजपुत्र पुं (राज्ञः क्षत्रियस्य पुत्रः ।) बुधग्रहः । इति शब्दरत्नावली । महाराजचूतः । इति राजनिर्घण्टः । वर्णसङ्करजातिविशेषः । रजपुत इति भाषा ॥ यथा —
"वैश्यादम्बष्ठकन्यायां राजपुत्रस्य सम्भवः ॥"
इति पराशरपद्धतिः ।
करणकन्यायां क्षत्रियाज्जातश्च । इति पुराणम् ॥ नृपात्मजः । तत्पर्य्यायः । युवराजः २ कुमारः ३ भर्त्तृदारकः ४ । इत्यमरः ॥ (यथा,—
"राजपुत्र ! चिरं जीव मा जीव मुनिपुत्रक ! ।
जीव वा मर वा साधो ! व्याध मा जीव मा मर ॥"
इत्युद्भटः ॥)
तस्य रक्षणं यथा,—
"राजपुत्रस्य रक्षा च कर्त्तव्या पृथिवीक्षिता ।
आचार्य्यश्चास्य कर्त्तव्यो नियुक्तैव रक्षकम् ।
धर्म्मकामार्थशास्त्राणि धनुर्वेदञ्च शिक्षयेत् ।
रथे च कुञ्जरे चैव व्यायामं कारयेत् सदा ।
शिल्पानि शिक्षयेच्चैव नाप्तैर्मिथ्याप्रियं वदेत् ।
गुप्ताचारमयुक्तस्तु यस्य कर्त्तुं क्षमापतेः ।
बन्धनं तस्य कर्त्तव्यं गुप्ते देशे सुखान्वितम् ॥
अविनीतकुमारं हि कुलमाशु विशीर्य्यति ।
अधिकारेषु सर्व्वेषु विनीतं हि नियोजयेत् ।
आदौ स्वल्पे ततः पश्चात् क्रमेणाथ महत्स्वपि ॥
मृगयापानमक्षांश्च वर्ज्जयेत् पृथिवीपतिः ।
एतानासेवमानास्तु विनष्टाः पृथिवीक्षितः ॥
बहवो नृपशार्दूल तेषां सङ्ख्या न विद्यते ।
वृथाटनं दिवास्वप्नं विशेषेण विवर्ज्जयेत् ।
वाक्पारुष्यं न कर्त्तव्यं दण्डपारुष्यमेव च ।
परोक्षनिन्दा च तथा वर्ज्जनीया महीक्षिता ।
अर्थस्य दूषणं राजा द्विप्रकारं विवर्ज्जयेत् ।
अर्थानां दूषणञ्चैव तथा चार्थेषु दूषणम् ।
प्राकाराणां समुच्छेदो दुर्गादीनामसत्क्रिया ।
अर्थानां दूषणं प्रोक्तं विप्रकीर्णत्वमेव च ।
अदेशकाले यद्दानमपात्रे दानमेव च ।
अर्थेषु दूषणं प्रोक्तमसत्कर्म्मप्रवर्त्तनम् ।
कामं क्रोधं मदं मानं लोभं दर्पञ्च वर्ज्जयेत् ।
एतत्समादिकर्म्मा वा स्वयं पृथिवीपतिः ।

एतेषां विजयं ज्ञात्वा कार्य्यं भृत्यजयं ततः ।
ज्ञात्वा भृत्यजयं सर्व्वं राजा जनपदं जयेत् ।
ज्ञात्वा तु विजयं तेषां शत्रून् बाह्यांस्ततो जयेत् ।
बाह्याश्च त्रिविधा ज्ञेयास्तुल्याभ्यन्तरकृत्रिमाः ।
गुरवस्ते यथापूर्व्वं तेषु यत्नपरो भवेत् ।
पितृपैतामहं मित्रममित्रञ्च तथा रिपोः ।
कृत्रिमञ्च महाभाग मित्रं त्रिविधमुच्यते ।
तथापि च गुरुः पूर्व्वं भवेत्तत्रापि चादृतः ।
स्वाम्यमात्यौ जनपदो दुर्गं सैन्यं तथैव च ।
कोषो मित्रञ्च धर्म्मज्ञ सप्ताङ्गं राज्यमुच्यते ।
सप्ताङ्गस्यापि राज्यस्य मूलं स्वामी प्रकीर्त्तितः ।
तन्मूलत्वात्तथाङ्गानां राजा रक्ष्यः प्रयत्नतः ।
षडङ्गरक्षा कर्त्तव्या तथा तेन प्रयत्नतः ।
अङ्गेभ्यो यस्तथैकस्य द्रोहमाचरतेऽल्पधीः ।
वधस्तस्य तु कर्त्तव्यः शीघ्रमेव महीक्षिता ।
न राज्ञा मृदुना भाव्यं मृदुर्हि परिभूयते ।
न भाव्यं दारुणेनापि तीक्ष्णादुद्विजते जनः ।
काले मृदुर्यो भवति काले भवति दारुणः ।
राजा लोकद्वयापेक्षी तस्य लोकद्वयं भवेत् ।
भृत्यैः सह महीपाल परिहासं विवर्ज्जयेत् ।
भृत्याः परिभवन्तीह नृपं हर्षवशं गतम् ।
व्यसनानि च सर्व्वाणि भूपतिः परिवर्ज्जयेत् ।
लोकसंग्रहणार्थाय कृतकव्यसनो भवेत् ।
शौण्डीरस्य नरेन्द्रस्य नित्यमुद्धतचेतसः ।
जना विरागमायान्ति सदा दुःसेव्यभावतः ।
स्मितपूर्व्वाभिभाषी स्यात् सर्व्वस्यैव महीपतिः ।
बध्येष्वपि महाभाग भ्रुकुटीं न समाचरेत् ।
भाव्यं धर्म्मभृतां श्रेष्ठ स्थूललक्ष्येण भूभुजा ।
स्थूललक्ष्यस्य वशगा सर्व्वा भवति मेदिनी ।
अदीर्घसूत्रश्च भवेत् सर्व्वकर्म्मसु पार्थिव ।
दीर्घसूत्रस्य नृपतेः कर्म्महानिर्ध्रुवं भवेत् ।
रागे दर्पे च माने च द्रोहे पापे च कर्म्मणि ।
अप्रिये चैव कर्त्तव्ये दीर्घसूत्रः प्रशस्यते ।
राज्ञा संवृतमन्त्रेण सदा भाव्यं द्विजोत्तम ।
तस्यासंवृतमन्त्रस्य ज्ञेयाः सर्व्वापदो ध्रुवाः ।
कृतान्येव तु कार्य्याणि ज्ञायन्ते यस्य भूपतेः ।
नारब्धानि महाभाग तस्य स्याद्वसुधा वशे ।
मन्त्रमूलं सदा राज्यं तस्मान्मन्त्रः सुरक्षितः ।
कर्त्तव्यः पृथिवीपालैर्मन्त्रभेदभयात् सदा ।
मन्त्रवित् साधितो मन्त्रः सम्पदां सुखावहः ।
मन्त्रच्छलेन बहवो विनष्टाः पृथिवीक्षितः ।
आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च ।
नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः ।
नयस्य कुशलास्तस्य वशे सर्व्वा वसुन्धरा ।
भवतीह महाभाग सदा पार्थिवनन्दन ।
नैकस्तु मन्त्रयेन्मन्त्रं न राजा बहुभिः सह ।
नारोहेद्विषमां नावं नापरीक्षितवाजिनम् ।
ये चास्य भूमिं जयतो भवेयुः परिपन्थिनः ।
तानानयेद्वशं सर्व्वान् सामादिभिरुपक्रमैः ।
यथा न स्यात् कृशीभावः प्रजानामनवेक्षया ।
तथा राज्ञा प्रकर्त्तव्यं स्वराष्ट्रं परिरक्षता ।
मोहाद्राजा स्वराष्ट्रं यः कर्षयत्यनवेक्षया ।
सोऽचिराद्भ्रश्यते राज्यात् जीविताच्च सबान्धवः ।
भृतो वत्सो जातबलः कर्म्मयोग्यो यथा भवेत् ।
तथा राष्ट्रं महाभाग भृतं कर्म्मसहं भवेत् ।
यो राष्ट्रमनुगृह्णाति राज्यं स परिरक्षति ।
सञ्जातमुपजीवंस्तु विन्दते स महत् फलम् ।
राष्ट्राद्धिरण्यं धान्यञ्च महीं राजा सुरक्षिताम् ।
महता तु प्रयत्नेन स्वराष्ट्रस्य च रक्षिता ।
नित्यं स्वेभ्यः परेभ्यश्च यथा माता यथा पिता ।
गोपितानि सदा कुर्य्यात् स विभागी प्रियाणि च ।
अजस्रमुपयोक्तव्यं फलं तेभ्यस्तथैव च ।
धर्म्मकर्म्मसमायत्तं विधाने दैवमानुषे ।
तयोर्दैवमचिन्त्यं हि पौरुषे विद्यते क्रिया ॥
एवं महीं पालयतोऽस्य भर्त्तु-
र्लोकानुरागः परमो भवेच्च ।
लोकानुरागप्रभवा च लक्ष्मी-
र्लक्ष्मीवतश्चैव परा च कीर्त्तिः ॥"
इति मात्स्ये २२० अध्यायः ॥

राजपुत्रिका, स्त्री, (राजपुत्री + स्वार्थे कन् ।) शरारिपक्षी । शराली इति भाषा । यथा —
"शरारिराटिराडिश्च आडी राजपुत्रिका ।" इति जटाधरः ।
राजकन्या च । (यथा, हरिवंशे । २९ । ४६ ।
"उत्पादयामास ततः पुत्रं वै राजपुत्रिका ।")

राजपुत्री, स्त्री (राज्ञः पुत्रीव ।) कटुतुम्बी । रेणुका । जाती । राजरीतिः । छुछुन्दरी । इति राजनिर्घण्टः । मालती । यथा,—
"अतिसुरभिश्च जातिर्मालती सुमना अपि ।
राजपुत्री मनोज्ञा——।" इति जटाधरः ।
राजकन्या च । (यथा महाभारते । १ । ७३ । १६ ।
"सुव्यक्तं राजपुत्री त्वं यथा कल्याणि ! भाषसे ।
भार्य्या मे भव सुश्रोणि ! ब्रूहि किं करवाणि ते ॥")

राजपुत्रः पुं (पुत्राणां राजा । राजदन्तादित्वात् परनिपातः ।) [illegible] । यथा,—
"चाम्पेय [illegible] राजपुत्रः [illegible] ॥"
इति शब्दचन्द्रिका ।

राजपुष्पी, स्त्री (राजप्रियं पुष्पमस्याः । ङीप् ।) करुणीवृक्षः । इति राजनिर्घण्टः ।

राजप्रिया, स्त्री, (राज्ञः प्रिया ।) करुणीवृक्षः । इति राजनिर्घण्टः ।

राजबिल्वकः पुं (राजते इति । राज + अच् । राजो रोपितः बिल्वकः ।) नारङ्गवृक्षः । इति शब्दमाला ।

राजवर्त्तं क्ली, (राजाभिप्रेतं वर्त्तम् ।) [illegible] । इति त्रिकाण्डशेषः ।

राजवल्ली स्त्री (राजप्रियं वल्लमस्याः ।) जम्बूः । इति राजनिर्घण्टः ।

राजवर्त्तं क्ली (राज्ञो वर्त्तमिव [illegible] ।) रत्नविशेषम् । राजावर्त्तम् । इति हैमः ।

राजबदरः पुं, (बदराणां राजा । राजदन्तादित्वात् परनिपातः ।) उत्तमकोलिः । तत्पर्य्यायः । नृपमेढः २ नृपबदरः ३ राजवल्लभः ४ पृथुकोलः ५ तनुबीजः ६ मधुरफलः ७ राजकोलः ८ । अस्य गुणाः । सुमधुरत्वम् । स्निग्धत्वम् । दाहार्त्तिपित्तवातहरत्वम् । रुच्यत्वम् । वीर्य्यवृद्धिकरत्वम् । शीतत्वमल्पत्रिलत्वञ्च । इति राजनिर्घण्टः ॥

राजबीजी [न्] त्रि, (राजा बीजी कारणं यस्य ।) राजवंश्यः । इत्यमरः । २ । ७ । २ ॥

राजभङ्गिका, स्त्री, वायुभीपक्षी । यथा —
"शोभकौ॰ षड्कीरी वायुभी राजभङ्गिका ॥"
इति जटाधरः ॥

राजभद्रकः, पुं कृतम् । निम्बः । इति राजनिर्घण्टः । पारिभद्रः । इति शब्दपाठः ॥

राजभूयं, क्ली (राज्ञो भावः । राजन् + भू + क्यप् ।) राजत्वम् । यथा —
"स्यादूर्ध्वभूयं प्रकर्षं ब्रह्मभूयं [illegible] ।
दैवभूयादिकं तद्वत् ।" इत्यमरटीकायां भरतः ॥

राजभोग्यं, क्ली (राज्ञा भोक्तुं योग्यम् । भुज + ण्यत् । कुत्वञ्च ।) जातीकोषम् । शिवालद्रुमे पुं । इति शब्दचन्द्रिका ॥

राजमल्लकः पुं (मल्लकानां राजा । राजदन्तादित्वात् परनिपातः ।) हस्तिकः । बड बेट इति भाषा । तत्पर्य्यायः । महामल्लकः २ पीनाङ्गः ३ पीतमल्लकः ४ बकाशोकः ५ अमरादः ६ । इति राजनिर्घण्टः ॥

राजमल्लः, पुं राज्ञां मल्लः । राजार माल इति भाषा । तत्पर्य्यायः । उत्सिक्तः २ उद्धतः ३ । इति त्रिकाण्डशेषः ॥

राजमार्गः, पुं (राज्ञो मार्गः ।) राजपथः । महापथः यथा —
"राजमार्गे योऽध्रुक् यः करोति [illegible] ।
[illegible] महीतले ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे [illegible] अध्यायः ॥
अपि च ।
"[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] ॥"
इति [illegible] ॥
([illegible] । मनुः । ८ । [illegible] ।
"[illegible] राजमार्गं [illegible]
[illegible] ॥"
[illegible] । यथा [illegible] । १० । १ ॥

"ज्ञानविज्ञानसम्पन्नौ राजमार्गविशारदौ ।
शुशुभाते महात्मानौ राघवस्य दुरात्मना ॥")

राजमाष, पुं (माषाणां राजा श्रेष्ठत्वात् । राजदन्तादित्वात् परनिपातः ।) वर्वटः । बरबटी कड़ाइ इति भाषा । तत्पर्य्यायः । नीलमाषः २ नृपमाषः ३ नृपोचितः ४ । अस्य गुणाः । कफपित्तहरत्वम् । रुच्यत्वम् । वातकारित्वम् । स्तन्यदायकत्वञ्च । इति राजनिर्घण्टः । सारकत्वम् । शुक्राम्लपित्तहरत्वम् । सुस्वादुत्वम् । रूक्षत्वम् । कषायत्वम् । विशदत्वम् । लघुत्वञ्च । इति राजवल्लभः । अन्यच्च ।
"राजमाषो महामाषश्चपलश्च बलः स्मृतः ।
राजमाषो गुरुः स्वादुस्तुवरस्तर्पणो रसः ।
रूक्षो वातकरो वृष्यः स्तन्यो भूरिमलप्रदः ॥"
इति भावप्रकाशः ॥ * ॥
कालविशेषे अस्याभक्षणं यथा । वाराहे ।
"निष्पावान् राजमाषांश्च सुपि देवे जनार्द्दने ।
यो भक्षयति राजेन्द्र चाण्डालादधिको हि सः ॥
कार्त्तिके तु विशेषेण राजमाषांश्च वर्ज्जयेत् ।
निष्पावान् मुनिशार्द्दूल यावदाहूतनारकी ॥"
इति तिथ्यादितत्त्वम् ॥

राजमुद्ग पुं (मुद्गानां राजा । राजदन्तादित्वात् परनिपातः ।) मकुष्ठकः । इति हेमचन्द्रः । ४ । २४ ॥

राजयक्ष्मा [न्] पुं, (राज्ञश्चन्द्रस्य क्षयकारको यक्ष्मा । राजा व्याधौ यक्ष्मा चेति वा ।) क्षयरोगः । इति हेमचन्द्रः । अस्य पर्य्याय निदानौषधादयो यक्ष्मशब्दे द्रष्टव्याः ॥ * ॥
(अयं हि सर्व्वरोगाणामाकरः । यथा, माघे । २ । ९६ ।
"मायामि यन्त्राणोऽसौ नैषधेन्द्रियादिभिः ।
राजयक्ष्मेव रोगाणां समूहः स महीभृताम् ॥"
"तथाह वाग्भटः ।
अनेकरोगानुगतो बहुरोगपुरःसरः ।
राजयक्ष्मा क्षयः शोषो रोगराडिति च स्मृतः ॥
नक्षत्राणां द्विजानाञ्च राज्ञोऽभूद्यदयं पुरा ।
यच्च राजा च यक्ष्मा च राजयक्ष्मा ततो मतः ॥"
इति तट्टीकायां मल्लिनाथः ।)
महापातकजचिह्नमप्ययम् । यथा, शिवः ।
अथ नरकानुभूतदुःखानां तिर्य्यग्योनिगतानां मानुषे जन्मानि भवन्ति । कुष्ठी ब्रह्महा यक्ष्मी सुरापः श्यावदन्तकः सुवर्णहारी कुनखी गुरुतल्पगो दुश्चर्म्मा । इत्यादि कूर्म्मपुराणम् ॥
"क्रियान्तिकरु मनुजस्य महारोगिण एव च ।
यथेष्टाचरणाद्भूमरणमशौचकम् ॥"
महारोगिण माधरोगाद्वादशमहारोगाः ।
ते च उन्मादत्वग्दोषौ राजयक्ष्मा श्वासौ मधु-
मेहो भगन्दरः उदरोऽश्मरी इत्यष्टौ पाप
रोगाः वाग्भोक्ताः । इति शुद्धितत्त्वम् ॥ * ॥
तस्योत्पत्तिरुपाख्यानादि यथा —
"अथ लोपवतवाक्य इत्यस्य राजयक्ष्मण ।
विश्वकाम तस्य यक्ष्मा नायिकायादिभीषणः ।
दंष्ट्राकरालवदन कृष्णाङ्गारसमप्रभ ।
अतिदीर्घ स्वल्पकेश शुष्को धमनिसन्तत ।
अधोमुखो दन्तदन्त कास विभ्रम्य मन्ततम् ।
कुर्व्वाणो निम्ननेत्रश्च योषासम्भोगलोलुप ।
स चोवाच तदा दक्ष कुत्र स्थास्याम्यहं मुने ॥
किञ्च चाहं करिष्यामि तन्मे वद महामते ।
ततो दक्षस्तु त प्राह गच्छ यातु द्रुतं भवान् ।
सोममत्तु भवाद्रिश सोमे त्व तिष्ठ स्वेच्छया ।
मार्कण्डेय उवाच ।
इति तस्य वच श्रुत्वा दक्षस्याथ महात्मन ।
शनै शनैस्तत सोमसमीपाद्म न च द्रुतम् ।
असाद्य स तदा सोम वल्मीक पन्नगो यथा ।
प्रविवेशेन्दुहृन्ये क्षिद्र प्राप्य महामते ।
तस्मिन् प्रविष्टे कृन्ये दारुणी राजयक्ष्मणि ।
शुशोच चन्द्रस्तन्वीव विमर्शां प्राप्यवान्तत ।
उत्पन्न प्रथम यस्मात् क्षीणो राजयक्ष्मणो गत ।
राजयक्ष्मेति लोकेऽभिख्यातस्य ख्यातिरभून्
द्विजा ॥
ततस्तेनाभिभूतश्च यक्ष्मणा रोहिणीपति ।
क्षय जगामानुदिन ग्रीष्मे शुष्का नदी यथा ।
तथा चन्द्रे चीयमाने सर्व्वौषध्य क्षय गता ।
क्षय जातास्वोषधीषु न यज्ञ सम्प्रवर्त्तते ।
यज्ञाभावात्तु देवानामन्न धर्म्मं क्षय गतम् ।
धर्म्मक्षयाच्च ततो नष्टाश्चाम्बो दृष्टिर्न चाभवन् ।
वृष्ट्यभावे तु लोकानामाहारो चीयताङ्गत ।
दुर्भिक्षयमनोऽपीते सर्व्वलोके द्विजोत्तमा ।
दानधर्म्मादिक किञ्चिन्न लोकेषु प्रवर्त्तते ।
सत्वहीना प्रजा सर्व्वा लाभिलोपहतेन्द्रिया ।
पापमेव तदा चक्रुर धर्म्मन्धयसस्तथा ।
एतद्दृष्ट्वा तत्र मार्गे दिक्पाला सपुरन्दरा ।
जग्मुः सोम परं दृष्ट्वा धातारञ्च महात्मना ।
ततो दृष्ट्वा जगन् सर्व्वं व्याकुल दस्युपीडितम् ।
ब्रह्माणमग्रतः कृत्वा सर्व्वे शक्रपुरोगमा ।
उपगम्य लोकश्च प्रहार जगतां पतिम् ।
प्रणम्याथ यथायोग्यमुपविष्टास्तत सुरा ।
तान् समेतान्वानु प्रोक्त ब्रह्मा लोकपितामह ।
अभिभूतान् पर्व्वेव सुरतलविषयानिव ।
पप्रच्छ सुहत्सोष्ठश्च गुरुमिन्द्र कृतापनम् ।
ब्रह्मोवाच ।
स्वागत भो सुरगणा किमर्थं यूयमागता ।
दुःखोपहतदेहाश्च युष्मान् स्वार्थे वद्ये
निराधारान् निरातङ्कान् सुरान् सर्व्वांस्तु
कामगान् ।
नत्वा सविनय न्यस्तान् कथ पश्यामि दुःखि
तान् ।
यद्भूत दुष्करमिह युष्मान् वा यस्तु बाधते ।
तत् कथ्यतामशेषेण सिद्धिं चाप्यवधार्यताम् ।
मार्कण्डेय उवाच ।
ततो सहस्रनेत्र श्रोत्र सन्ध्याया च लोकहृत् ।
उवाचाग्रयुते तन्मे सुराणां दुःखकारणम् ।
यथा सर्व्वं जगत्कर्त्री येन वयमागता ।
यदस्माक तु राजेन ततो ग्लानिविधी वयम् ।
न कश्चित् स प्रवर्त्तेत यज्ञा लोकपितामह ।
देवा ऊचुः ।
निराधारा निरातङ्का प्रजा सर्व्वा क्षयं
गता ।
न च दानादिधर्म्माश्च न समाधि स्थितो भविष्ट ।
नैव वर्षति पर्ज्जन्य चौषधीयाभवन् क्षिति ।
चौषधी सर्व्वाक्षयौषध्य ग्रस्ता लोका क्षमा
कृता ॥
दस्युभि पीडिता विप्रा वेदवादाय कुर्व्वते ।
अन्यवैकल्पमाधाद्य म्रियन्ते बहव प्रजा ॥
सोमेषु यज्ञभागेषु भोगहीनास्तथा वयम् ।
दुर्ब्बलाश्च स्थिता क्षीणा नैव शान्ति लभामहे ।
रोहिण्या मन्दिरे चन्द्रो वक्षगतो चिर स्थित ।
क्षयरोगी स च क्षीणो व्योमृत्वाहीनश्च वर्त्तते ।
यदैवान्निष्यते दर्वेश्वरो नैषां पुर गत ।
कदाचिदपि देवानां समाजे या भवद्विधि ।
कदाचिद्रोहिणीं त्यक्त्वा नैव स च न गच्छति ।
यत्राप्यन्यो कोऽपि न भवेत्तदा चन्द्रो वशिभवेत् ।
ह्यस्ते स ससादीन कलामात्रावशेषित ।
इति सर्व्वत्र जाकेय तत्त सर्व्वविपर्य्यय ।
त दृष्ट्वा वाञ्छितोकास्तु वयं त्वां प्रत्यय गता ।
पातालाद्द्यावत्तत्याय काशब्रह्मादयोऽसुरा ।
नाकान् लोकेषु बाधन्ते तावत् याहि चाभ
यात् ।
तत्र प्रवर्त्तते कश्चाप्यगतां वा व्यतिक्रम ।
न जानीमस्तु तत् सर्व्वं विस्मये चापि कारणम् ।
मार्कण्डेय उवाच ।
एतत् सुराणां वचन निशम्य पितामह ।
श्रुत्वा क्षणमभिध्याय निजगाद सुरोत्तमान् ॥
ब्रह्मोवाच ।
श्रूयतां देवता सर्व्वा यदर्थं लोकविभ्रम ।
प्रवर्त्ततेऽधुना यत शान्तिस्तस्य भविष्यति ।
सोमो दक्षात्मजा कन्या सप्तविंशतिसम्मिता ।
अश्विन्याद्या वरयूथाचार्थं परिणीतवान् ।
परिणीय स ता सर्व्वा रोहिण्या सतत विधु ।
प्रवर्त्ततानुरागश्च न सर्व्वास्तु प्रवर्त्तत ।
अश्विन्याद्यास्तत कन्या दौर्भाग्यज्वरपीडिता ।
षड्विंशतिस्ततस्ता पितरं प्रणिता क्षणम् ।
प्रवर्त्तते निशानाथो रोहिण्यां रागतो यथा ।
तथा न तासु भजत तद्दक्षाय न्यवेदयन् ।
ततो दक्षो महाबुद्धि आज्ञा बहुश निद
मतिम् ।
बहुश्रुतमाभाष्य पुत्रीर्थेऽस्तुदरोष तम् ।
अनुदृश्य यथाकाम दृष्टेव सुमहात्मना ।
समं प्रवर्त्तिन तासु समर्थ त्वनथाम विधु ।
सममङ्गीकृत्य भाव तासु कर्त्तुं निशाम्बुषा ।
स जगाम तत स्थानं दक्षोऽपि सुनिवारण ।
गते दक्षे सुनिर्वेदे वैनब्य तासु चन्द्रमा ।
षड्वै न भार्य्या ता ग्रन्थ कुपिता पितरं
गता ॥
ततो दक्ष पुनश्चन्द्रमनुग्रह सुतागारे ।

समरुत्थि प्रतिश्राव्य वचनञ्चेदमब्रवीत् ।
न सम वर्त्तते चन्द्र सर्व्वास्वासु भवान् यदि ।
तत् प्रश्नो लह तुभ्यं ममाद् कुरु समञ्ज-
सम् ॥
ततो गते पुनर्द्दक्षे न सम वर्त्तते यदा ।
तासु चन्द्रस्तदा दक्ष पुनरागात्तु तत् कथा ॥
न ते वचः स कुरुते नैवासास प्रवर्त्तन ।
वय सप करिष्याम श्यास्यामश्च त्वदन्तिके ॥
तासामिति वच श्रुत्वा कुपितस्य तदा मुने ।
चयाय चन्द्रस्य मन प्रापायोतसुकतो गतम् ॥
प्रापायोद्युक्तमनस कुपितस्य महात्मन ।
चयो नाम महारोगो नासिकायाद्विनिर्गत ॥
प्रेषित स च चन्द्राय दक्षेन मुनिना तत ।
प्रविष्टोऽसौ तस्य देहे चयिनस्तेन चन्द्रमा ॥
चीणे चन्द्रे चयं याता ज्योत्स्ना तस्य महा-
त्मन ।
चीणास सर्व्वज्योत्स्नासु सर्व्वौषध्य चयं गता ॥
चाभ्यभावाल्लोकेऽस्मिन् यज्ञ न प्रवर्त्तते ।
यज्ञाभावाद्दनाहरिक्षत सर्व्वप्राणभ ॥
यज्ञभागापभोगेन दीनानां भवता तथा ।
दुर्बलाय वहुन्धन विकारथ स्वगोचरे ॥
इति च कथित सर्व्वं यथाभूल्लोकविप्लव ।
यथोपायेन तच्छान्तिस्तत्प्रशुभ्य सुरोत्तमा ॥”
इति कालिकापुराणे ५० अध्याय ॥ ● ॥
ब्रह्मोवाच ।
“गच्छन्तु भो सुरगणा दक्षस्य सदनं प्रति ।
स प्रसादय चन्द्रार्थं स च पूर्णो भवेद्यथा ॥
पूर्व्वं चन्द्रे जगत् सर्व्वं प्रशान्तिश्च भविष्यति ।
सुप्राकञ्च भवेत् शान्तिरोषधीनाञ्च सम्भव ॥
मार्कण्डेय उवाच ।
इति ब्रह्मवच श्रुत्वा देवा शक्रपुरोगमा ।
प्रययुर्द्दक्षसदनं दक्षमिवेशनम् ॥
यथान्यायमुपस्थाय सर्व्वे मुनिवर सुरा ।
प्रोचु प्रणामितं दक्षं प्रणम्य श्लक्ष्णया गिरा ॥
देवा ऊचु ।
प्रसीद दीप्तो ब्रह्मप्रभाव बहुद्युतिमान् ।
जहरस महायुक्ते चाहि न शोकसागरात् ॥
यद्य ब्रह्मर्षभ्रम्य दर्शितपरमात्मन ।
सर्वज्ञ परं ज्योतिर्विश्वरूपं मतोऽसि मे ॥
दक्षयाग सर्व्वजगतो प्रजापालनकारणात् ।
दक्षप्रजापतिर्देवि योगमूलगुणो यथम् ॥
दक्षाय सर्व्वजगतो दक्षाय कुशलात्मनाम् ।
दक्षायाक्लिष्टायास्तु नमस्तुभ्य महात्मने ॥
सततं चिन्त्यमानस्य योगिभिर्नियतात्मभि ।
धारस्य धारभूतस्य दक्षाय परमात्मने ॥
योगीन्द्रदर्याहन परात्मा परायण ।
चादन्यात्तु बहुधा तस्मै विश्वं नमो नम ॥
इति तेषां वच श्रुत्वा दक्षो मद्गुर्व्वा तदा ।
प्राह प्रणमत प्रममाभाष्य सुरान ॥
दक्ष उवाच ।
इन्द्र चन्द्र महाभाग भवतां दु खमागतम् ।
इत्येवं वद किमो बोद्धुमिच्छामम् तम् ॥

ममास्ति यदि कर्त्तव्य भवतां दु खहानये ।
तच्च यदि शक्नोमि करिष्यामि हितं ततम् ॥
मार्कण्डेय उवाच ।
तत श्रुत्वा वचन तस्य मतङ्गोऽन्हप्रिय ।
जगाद गौष्पति शक्रो वीतिदाषोऽथ त
सुरनम् ॥
चय यातो निशानाथस्त्वत्रिन् चीणे चयं गता ।
सर्व्वौषध्यो हिमश्चैव तद्दानिष्प्रदानित ॥
यज्ञे विनष्टे सकला प्रजा मुद्रमकातरा ।
हृदाभावात्फल स प्राप्य गताश्च काञ्चन ॥
चयोऽथ राजिवायस्य यज्ञ कामान् प्रवर्त्तते ।
स सर्व्वजगतो भक्ष्यमभावमुपस्थित ॥
नाधुना तत्रिभुवन यस्त्र सुखमनु किञ्चन ।
विप्रव यान्ति विप्रेन्द्र जगरा स्थावराचरा ॥
न यज्ञा सम्प्रवर्त्तन्ते न नमस्यन्ति तापसा ।
आहाराद्यन्तिरक्षीका प्रजा चीणा भया
सुरा ॥
एवं प्रहर्त्ति विप्रेन्द्र विप्रदेऽस्मान् रसातलान् ।
देवा न यावदुत्थाय वाधन्ते तावदुद्धर ॥
प्रसीद दक्ष सतत त पूरय तपोबलात् ।
पूर्णे चन्द्रे जगत् सर्व्वं प्रशान्तिश्च भविष्यति ॥
मार्कण्डेय उवाच ।
इति तेषां वच श्रुत्वा प्रजापतिसुतस्तदा ।
उवाच तान् सुरगणान् हृदयाच्छल्यमुद्धरन् ॥
दक्ष उवाच ।
यज्ञे वशी निशानाथो प्रहत प्रापकारणम् ।
न केनापि निपातेन मिथ्या कर्त्तुं तदुत्सहे ॥
किन्तु मद्वचन यत्नात्प्रेशास्येन यथा भवेत् ।
चन्द्रोऽपि यद्वत यत्नात् तदुपायमपश्यते ॥
तत्राप्युपायोऽस्ति मासार्द्धं यातु चन्द्रमा ।
चय वृद्धिञ्च मासार्द्धं चयं भार्यासु वर्त्तताम् ॥
तस्य तद्वचन श्रुत्वा त प्रसाद्य प्रजापतिम् ।
सर्व्वे सुरगणास्तत्र गता यत्रास्ति चन्द्रमा ॥
दक्षशक्ते तु वचने दक्षेण मुनिना हिता ।
चय चन्द्र समारोप्य भार्याभि सहित तदा ।
चन्द्रसे ब्रह्मसदन मुदिता सुरसत्तमा ॥
तत्र गत्वा महाभागा यथा दक्षेण भाषितम् ।
तत्सर्व्वं कथयामासुर्भवे परमात्मने ॥
ब्रह्मा दक्षवच श्रुत्वा देवानां वदन तदा ।
चन्द्रभाग महापीर्णं चनाम बहिर्न्न सुरे ॥
तत्र गत्वा सुरश्रेष्ठ प्रजानां हितकाम्यया ।
चापयामास श्रुप्रात्तु चन्द्रलोहितपुष्करे ॥
भूतमयमसचनाय पूर्व्वमेव पितामह ।
एतदर्थं चकाराथ वर पूर्व्वं चमानद ॥
तत्र चातस्य बोडन्त्र वीरोमन्त्र प्रजायते ।
चिरायुस्तत्र जन्म दक्षकोहितपुष्करे ॥
तत्र चातस्य चन्द्रस्य शरीरात् तनुमत मर ।
राजयक्ष्मा निजगाम दुर्द्धर्षो महोदर ॥
निष्क्रम्य राजयक्ष्मा तु ब्रह्माणं प्रणम्यतिम् ।
प्रणम्यार्थं निरुद्धेति च ब्रह्माणोऽरातये च ।
ब्रह्म यक्षोच कोऽसि । तत्र क्रम वदात्मन ।
विदेशयाद्यदर्थं में तदा ब्र वदतां दस ॥

मार्कण्डेय उवाच ।
ततो ब्रह्मापि त पृष्ट निरीक्ष्येन्दुशरीरजम् ।
आङ्गतैश्चैनानियुक्तो वोष्णवापि निशाकरम् ॥
दाभि सह तु दक्षीणां गिरौ निश्चिन्त्य वै
सुहृद् ।
चन्द्रन शान्तयामास शरीराद्राजयक्ष्मक ।
चन्द्रनात्मि च शाखासु तदपून तदा चक्षे ।
चीरोदस्य च विश्वेय मध्ये देवमि चोकत ॥
तस्मादपन्नसान्द्री कला चीणा पुराण
या ।
तासां क्याह चयमवाप्य चीरोदसागरात् ॥
कलामात्रावशिष्टस्य चन्द्रस्याद्राजयक्ष्मण ।
चीणा कला पञ्चदश या पूर्णमण्डलात्मिका ।
ता राजयक्ष्मणभयात्पूर्व्वीभूतास्तु भीषया ।
तैर्जोज्योत्स्नाकलाभिस्तु विवश यत् कला-
पते ।
शरीरं तत्रिवाभूतं ममस्ये राजयक्ष्मण ।
व्याधिपूर्णमभूत् ज्योत्स्ना भाषा राजादि
यक्ष्मणि ।
दवीभूता सुधा धर्म्मा गर्भे रोगस्य च भिषा ॥
दक्ष निक्षालयामास सुधां ब्रह्मा महात्मनाम् ।
तत ज्योत्स्ना सुधा ज्योति सर्व्वं तस्मात्
बहिर्गतम् ॥
चीरोदसागरे चिप्त तत्सर्व्वं विधिना तत ।
दक्षात् गिरौ परिक्षेप्य जय गत्वा इन तत ॥
ततोऽमृतानि प्रयाह्य कलायस्यानि वारिधे ।
ज्योत्स्नाख्यायाश्चकामास ब्रह्मा तत्सर्व्व
मिदम् ॥
चीरोदात्शिरमानञ्च चन्द्रभाग तदा विधि ।
देवमङ्घे कलापूर्णं सुधा ज्योत्स्ना मवेशित ॥
सम्माप्य तत्सर्व्वं ब्रह्मा देवानां मध्यतस्तत ।
जगाद राजयक्ष्माय मनुष्यादि विदेहमम् ॥
ब्रह्मोवाच ।
सर्व्वदा यो दिवा रात्रौ सन्ध्यायां वनिताञ्चरेत् ।
क्षणे सुरत मतिञ्च राजयक्ष्मन् भजस्व तम् ॥
प्रतिग्रहसमाज्ञापद्गुतो यो मैथुनं चरेत् ।
स ते वश्य मनुष्य चैवस्य तथाविध ॥
सन्ध्यायां चतुर्दशी या भवन्ति चतुर्थी दर्शे ।
या तेऽस्तु भार्या सतत भजस्वमनुष्यादि ।
चीणस्य भवतु ब्रह्म मनस्त्व विश्वे कुरु ।
इत्य भक्त यथाकार्य चन्द्रे त्वं विहरो भव ॥
मार्कण्डेय उवाच ।
एवं विसृष्टो विधिना राजयक्ष्मा महाकर ।
ममता सर्व्वदेवानामन्तर्हानं जगाम च ॥
चन्द्रमस्ते महारागे ब्रह्मा योग गमात् ।
चन्द्र कलयामास कलाश्चन्द्रोदिनम् ॥
तैव चीरोदजैतिव हर्षपूर्णं वाञ्छ ।
चन्द्रायोस्तु कलापूर्णं पूर्णितम्बा ततम् ।
स यो दक्षयापूर्णं पूर्णि तयो तदा ।
चन्द्रकला सर्व्वदेवा हृदयस्था दशात् ॥
यद चन्द्रकला पूर्णं प्रविशन् निर्ममन्दम् ।
पूर्णेनैव सुरानां सकलो वा वर्त्तने ॥

सोम उवाच ।
न स्यात पूर्व्ववद्ब्रह्मन् शरीरं मम सत्वत ।
न वीर्य्यं वा तथोत्साहो निशीदस्यगतस्य च ॥
भानुके पूर्व्ववच्छेदो विघ्नातु सुनरामहम् ।
यद्वाहीनस्वगुन्नि वर्त्तय कन गाकस्पन ॥
ब्रह्मोवाच ।
महाल्य यन्मया सोम यत्भूदब्रह्मस्य ।
पुन्न विशोको भवनस्तनुपूर्णमभवम हि ।
अपुवा भवनो न्दनम नि सारित मया ।
यदोमाह धान्तनष्टोनत्वा यक्षसा राज
यन्मया ॥
तपो प्रद्यानतरिंघो लक्ष्यो यन स्थित चन्द्र ।
स्थानपापाच सुधायाञ्च तेन ह्रीनो भवान्
चन्द्र ।
तनोऽङ्गमन्यया राजस्व योऽन्ति वाप्यतम् ।
यश्चोपाय विधास्यामि यथा शान्तिं लभिष्यसि ।
प्राचापन्न परोहात्रो वसनीय पुरोऽभवे ।
सेन्द्रस्ततोऽनु चाप्येव पद्य मत्येत मतौ ।
ततोऽनु भवनो भाग पूरोवायो मया कृत ।
तेन मार्गेण सुक्लेन नित्य चन्द्रतेन हि ।
पूर्व्वर्णं मधुयाहं स्थान पीय भविष्यति ।
यस्मात्मकलाकोय गौरीदस्य स्थितारुव ।
शरीरस्य यावन्ति ज्योत्स्नायाधापि ये कला ।
वृद्धिं यास्यन्ति सतत चीरसागरमध्यगा ॥
स्वारीविपिशान्तर प्राप्ते द्वितीय प्रमुदाक्षय ।
तृतीयो भविता विप्र प्रचयस्यचमास्वर ।
म प्रकृत्स्याभिनयान स्थाय दत्वा सुन्दरम् ।
करिष्यति त्रिभुवन नि शीक समुदादरम् ।
त्रिया चीन नमो लोक भविता लोकविश्रव ।
यथा नव चापात् सोम प्रदत्ता लोकविश्रव ॥
तस्मात्तुमयमायम कृताद्दे तु कृते युगे ।
भविष्यति स्यास्यति च यावद्युगचतुष्टयम् ॥
गनचतुर्थे सम्प्राप्ते मन्द्र द्वये गते युगे ।
चीरोद निर्मथिष्यन्ति शम्भुविष्णुरथ तथा ॥
मन्थानं मन्दर कृत्वा सर्पराज तथागुणम् ।
यज्ञभागेषु चोत्पन्न स्थानाय वय तत ।
मथिष्यन् यज्ञ देवे चीरोद सह दानवे ।
स्थूलरोगावमत्यन् यत् स्थितं चीरसागरे ।
तत्समस्य महाव्यामो हाथोभूर्न तथाचयम् ।
कर्म्मोद्भवार्थे तथा स्थानरोद तदा वयम् ।
योगस्याम भागवतो शरीरार्थे विघ्नो तव ।
निमन्त्र्य सागर पश्चात् समुद्राम्य महान्वनम् ।
तदा तव वपुस्तिनपूर्णं समाविश्यति ॥
सोमो चीत्यागुक कालमम्यथ सुधात्मकम् ।
हटाद्भुतस्थिके चाव भविष्यति वपुस्तव ॥
मार्कण्डेय उवाच ।
शुभाशुमैवमाभाष्य ब्रह्मा लोकपितामह ।
विधौ चयाय मासाङ्घ शङ्गये मनवामभूत् ॥
यथा दक्षेण शप्तं मासार्द्धं यातु चन्द्रमा ।
चय शोक च मासार्द्धे तत्र तथाकरोद्विधि ॥
तत शङ्गमया चन्द्र शुरन्देहा विभक्तवान् ।
विभज्य च सुरान् सर्व्वान् वसुधाशन्मद्भुतम् ॥
कलाः षोड़श चन्द्रस्य तत्रैका प्रमुखहर्द्धनि ।
तिष्ठत्यथाषधि यदा चय यातु चय विना ।
यद्येव यदि रोगेण मासार्द्ध न्यवाकयत ।
चयाय पौर्यन्ति चन्द्रो सोमप्राप्ति यदा भवेत् ।
किन्त्वस्य या कला शम्भौ व्यास्ता तस्माद् तां
प्रति ।
चतुर्द्दशकलावस्था प्रतिमासं सुरोत्तमा ॥
चतुर्द्दशकलास्तस्याश्चन्द्रस्यान्ति पिबन्तु वै ।
प्रतिपत्तिथिमारभ्य भवन्त्यचापतुर्द्दशीम् ।
तेजोभाया सूर्य्यविम्ब चतुर्द्दशतिथौ क्रमात् ।
प्रविशन्तु चयं स्वेषं कृष्णपत्ते विधाभवेत् ।
यातु यथा कलादर्शं हरिरूपत्वं प्रयायिता ।
तिष्ठतु प्रथमे भागे तिथौ तस्यां विभावते ॥
द्वितीये दश्भागे तु रोदिण्या यातु मन्दिरम् ।
तृतीये तु वरत्वशौ यास्या सम्भुनिमो विधु ॥
चतुर्थे वत्तपूर्व्वास्तिविभागे विभावसौ ।
सहस्र यातु चन्द्रोऽथ सविमरयपोटन ।
यावत्प्रायेन हि कला प्रयता चयमापुयात् ।
एवमेवे कृष्णपक्ष तावत्स्या प्रतिपत् भवेत् ॥
द्वितीयादा कृष्णपत्ते वृद्धिहासस्तथाविध ।
तिथौनां वृद्धिहेतुश्च शुक्ले कृष्णे तथा भवत ॥
तत पुन शुक्लपक्षे यावत् पूर्णा कलोदिता ।
वृद्धिमेति भवेत्तावत् प्रतिपत्तिथिरान्ति ॥
तदा द्वितीयभागस्य या ज्योत्स्ना परमाहनि ।
स्थितायां वै कलायान्तु गता सा पुनरेष्यति ।
शुक्लाभिस्तु भवत् पिवमन्त्र यद्दिने दिने ।
तद्द्वितीयान्तिथिभि पूवामाभि सदैव हि ।
सयसनुपत्तती चन्द्रो ज्योत्स्नायोगात् सुरो
त्तमा ।
यथा दिने दिने भाला चयं याति तथा
विधा ॥
वृद्धिं गच्छन्त्यनुदिनं शुक्लपक्षेऽन्वह तदा ।
तेजोभाग सूर्य्यविम्बात् पुनरेव समेष्यति ।
प्रयास्यति कृष्णपत्ते यथाभागक्रमगतया ।
ज्योत्स्नाचराग्निरचन्द्रात् प्रयात पुनरस्यति ।
तेजोभाग सूर्य्यविम्बान्त वत्स्यत चयम् ।
एवं वृद्धि शुक्लपक्षे सुधांशो सम्भविष्यति ।
पक्षयो शुक्लकृष्णस्य चन्द्रवृद्धिचयाद्भवेत् ।
यावत्कालेन यो भाग चयं वृद्धिञ्च यास्यति ।
तावत्कालमभिख्याय तिथि स्यास्यति वा पुन ।
चिरञ्च वृद्धियदि वा चयो वा
दूरञ्च वृद्धियदि वा चयो वा ।
द्वातिथीनां तु तदा चय स्या-
चिरात्तु वृद्धिस्थितिषु प्रवेशे ॥
एवं कथञ्च चन्द्रस्य विना न सम्भविष्यति ।
तस्मात् तयो प्रवृद्धार्थं चन्द्र दत्वान्तु दत्ता ॥
चयास्तन्नाय शुभान्ति कलाशिवोऽनुमाषत ।
अमावास्यापराह्णे तु पितृभी रोचिकाञ्चर्वे ।
तत्कलाच्यादनात् कथं वृद्धिं यास्यति चान्द्रमम् ।
तेन कर्म्मेण पितृदत्तानि शास्यन्ति वै परम् ।
श्रीमार्कण्डेय उवाच ।
तत सुरगणा सर्व्वे यथोक्त विधिना तथा ।
चन्द्रलोकहितायाय चन्द्रस्य चयवृद्धये ।
महादेवोऽपि चन्द्रार्द्धं स्वरूपं परमात्मन ।
चयाद्द दर्व्वविधिना शिरसाभ्युदितो भवत् ।
यतेश परमं नित्यमजमव्ययमव्ययम् ।
तनुस्वरूपाद्यकला प्राप्यतत् चय गता ।
प्रविशन्ति यदा ज्योतिरानन्दमपर परम् ।
योगिनान्तु तदा तेषां चित्त तल्लीनतां याति ॥
महादेवशिर सस्ये लीने चित्ते सुधानिधौ ।
चन्द्रधारा भवेत्तस्मिन्निर्वे वैदिको श्रुति ॥
एतज्ज्ञात्वा महादेव चयवृद्धा विना ततम् ।
हिताय सर्व्वलोकानां चयाद्व शिरसा विधुम् ।
चन्द्रज्योत्स्नाचमायोगाद्दोषध्यो यान्ति वृद्धये ।
सर्व्वौषधीषु वृद्धासु प्रवर्त्तन्ते ततोऽध्वरा ।
अध्वरेषु प्रवृत्तेषु स्वान् स्वान् भागांस्तु देवता ।
परिश्रान्ति पितृदत्तापा कथाति भूरि च ।
चम्नत प्रसया ह्यष्टं यद्देभ्य पुरातनम् ।
तेन तृप्यन्ति ह्योना ये चयभागेन देवता ।
यज्ञेनाप्यायिते तत्र ज्योत्स्नाभिवृद्धिमेति वै ।
यश्च्योतिषा विना भूत तच स्यात् चोत
अन्यथा ॥
यतोऽन्नतत्त्य यज्ञस्य चन्द्रमा कारणं चयम् ।
अतोऽस्य दक्षशापातु दत्वायं तापिकोविनम् ।
यद्यापि कृष्णपत्तेऽपि सुधा सपीयते हरे ।
तेन सूर्य्यं याति शम्भोश्चन्द्राद्दं ज्योत्स्नाकला तथा ।
पुनश्च शुक्लपक्षे तु शिवोऽदेति कला तत ।
ज्योत्स्नादिनीयो भागस्तु तेजोभागो द्वितीयक ।
चन्द्रेऽनुपश्चिरचन्द्रात् सूर्य्यविम्बाद्यथाक्रमम् ।
कला षोड़श चन्द्रस्य तत्रैका शम्भुशेखरे ।
सितासितावुभौ पक्षौ पितामाहरपक्षयौ ।
इति च सम्मान्यासं विभक्तचन्द्रमा यथा ।
सहस्रा पर्य्यतमेति तथा तथानुभागत ।
यज्ञभागे स्थिते यज्ञादेवाचमकरोद्विधुम् ।
कृष्णे स्थितेऽपि पितृषु सितवृद्धिपयौ यथा ।
इदं पुण्यतमाख्यान य शृणोति समाहर ।
राजयक्ष्मा तस्य कुले न कदाचिद्भविष्यति ।
यक्ष्मणा परिभूतो य शृणोति वचन त्विदं ।
अचिरात् यक्ष्मणा मुक्त स भवेन्नरसत्तम ।
इद स्वस्त्ययन पुण्यं गुह्यात् गुह्यतरं परम् ।
य शृणोति कथितं तत् स महापुण्यभाग
भवेत् ।"
इति कालिकापुराणे २१ अध्याय ॥

राजयोग्य, त्रि, (राज्ञो योग्य ।) राजार्हे । नृपोचित । यथा,—
"त्रिकोणकण्ठके सौम्ये पापे चोपचयस्थिते ।
राजयोग्या भवेन्नारी सुन्दरी कुलवर्द्धिनी ।"
इति जातकार्णवम् ॥

राजरङ्ग, क्ली, (राजयोग्यं रङ्गम् ।) रूप्यम् । इति शब्दरत्नावली ॥

राजराज, पुं, (राज्ञामपि राजा यज्ञाधिपत्यात् । "राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) कुवेर । इत्यमर । १ । १ । ६९ ॥ (यथा, किरातार्ज्जुनीये । ३ । ३१ ।

"दृष्टः सपदि चित्रं प्रिय प्रियार्ह
धाम स्म गमयति राजराजभक्तिं ।
कौतुकञ्च किमपि एषाहत प्रदधौ
सम्पत्ति भूयमरसि चि सदियोग ।")
सार्व्वभौम । (यथा, रामायणे ।४।८१।१३।
"प्रवाममिति च श्रुत्वा राजराजस्य धीमत ।
छित्वा पाशानि पाशाद्यो मारुतं पर्व्वपादयत् ।")
सुधाकर । इति मेदिनी । जे, २६ ।
राजरीति, स्त्री, पित्तलविशेष । तत्पर्य्याय । पाण्डुकौ २ राजपुत्री ३ महेश्वरी ४ ब्रह्माणी ५ ब्रह्मारीति ६ कपिला ७ पिङ्गला ८ । अस्या गुणा । तिक्तत्वम् । शीतलत्वम् । लवणत्वम् । शोधनत्वम् । पाण्डुवातक्रिमिप्लीहपित्तनाशित्वञ्च । इति राजनिर्घण्ट ।
राजर्षि पुं, (राजा ऋषिरिव मेहलात ।) जनपदाधिराज । इति त्रिकाण्डशेष । तस्य मात्म कलिनाशनम् । यथा,—
"कर्कोटकस्य नागस्य दमयन्त्या नलस्य च ।
ऋतुपर्णस्य राजर्षे: कीर्त्तनं कलिनाशनम् ।"
इति महाभारतम् ।
राजलक्ष्मा, [न्] पुं, (राज्ञो लक्ष्म चिह्नं यस्य ।) युधिष्ठिर । इति धनञ्जयकोष । (राजचिह्नयुक्ते, त्रि ।)
राजलक्ष्मी, स्त्री, (राज्ञो लक्ष्मी ।) राजश्री । यथा ज्योतिस्तत्त्वे ।
"मत्तप्रभावविपुलं प्रमदाविलास
भोगात्मजस्वपुष्पितदम्भलाभं ।
वस्त्राम्बलाभधनपूर्णमनोरथ स्यात्
शौरी दशा भवति निश्चलराजलक्ष्मी ।"
राजवंश्य, त्रि (राजवंशे भव । राजवंश + यत् ।) राजवंशोद्भव । तत्पर्य्याय । राजबीजी २ । इत्यमर । २ । ८ । २ ।
राजवर्त्म, [न्] क्ली (राज्ञो वर्त्म पन्था ।) राजपथ । तत्पर्य्याय । घण्टापथ २ संसरणम् ३ श्रीपथ ४ उपनिष्क्रमणम् ५ उपनिष्करम् ६ महापथ ७ । इति हेमचन्द्र । ४ । ५१ ।
राजवला स्त्री, (राजते शोभते इति । राज + अच् । राजा वला इति कर्म्मधारय ।) भद्रबला । इत्यमर । २ । ४ । १४९ । गन्धभादालिया इति भाषा ।
राजवल्लभ, पुं (राज्ञां वल्लभ ।) राजाम्र । राजाम्र । राजबदर । इति राजनिर्घण्ट । नारायणदासकविराजकृतद्रव्यगुणग्रन्थविशेष । यथा —
"श्रीनारायणदासेन कविराजेन धीमता ।
प्रतिसंक्रियते द्रव्यगुणोऽयं राजवल्लभ ।"
इति तस्य द्वितीयश्लोक ।
नृपप्रिये त्रि । (यथा, मार्कण्डेये । ११ । ३८ ।
"इत्याद्यो विधा येषे यत्सुमित्रो वशी ।
धाम दयाक्रियेण शो राजवल्लभमथ ।")
राजवल्ली स्त्री (राज्ञीव वल्ली ।) गोपवल्ली । इति रत्नमाला । ... इति भाषा ।

राजवान्, [त्] त्रि (राजास्यास्तीति । राजन् + मतुप् । मस्य व ।) राजसम्बन्धयुक्तदेश । यथा,—
"सुराज्ञि देशे राजन्वान् स्यात्ततोऽन्यत्र राजवान् ।"
इत्यमर । २ । १ । १३ ।
(नृपविशिष्टे । यथा, महाभारते ।५।१।७।
'इराज वा राजवती सभेय
यद्दीति शोभितमलेयपेता ।")
राजवाह पुं (राजानं वहतीति । वह + अण् ।) घोटक । इति शब्दचन्द्रिका ।
राजवाह्य, पुं (राज्ञो वाह्य ।) राजवाहक हस्ती । तत्पर्य्याय । उपवाह्य २ । इति हेमचन्द्र । जिनधकुञ्जर ३ । इति त्रिकाण्डशेष । राजवाह्येऽपि त्रि ।
राजवृक्ष, पुं, (वृक्षाणां राजा । राजदन्तादित्वात् परनिपात ।) आरग्वधवृक्ष । इत्यमर । पियालवृक्ष । इति मेदिनी । लङ्कास्थायी वृक्ष । इति शब्दचन्द्रिका । लङ्कासिज इति भाषा ।
राजशय पुं (राज शोभमान शय ।) मञ्च । इति शब्दमाला । माट इति भाषा ।
राजशफर पुं इलिशमत्स्य । इति हारावली ।
राजशय्या स्त्री (राज्ञ शय्या ।) राज्ञ शयनीयम् । तत्पर्य्याय । महाशय्या २ । इति हेमचन्द्र ।
राजशाक पुं (राजप्रिय शाक । शाकानां राजा इति वा ।) वास्तूकम् । इति राजनिर्घण्ट ।
राजशुक पुं (शुकानां राजा । राजदन्तादित्वात् परनिपात ।) पक्षिविशेष । राजा सुगा इति हिन्दी भाषा । तत्पर्य्याय । प्राज्ञ २ शतपत्र ३ नृपप्रिय ४ । इति राजनिर्घण्ट ।
राजशृङ्ग क्ली राजच्छत्रम् । तत्पर्य्याय । कनकदण्डकम् २ । इति त्रिकाण्डशेष ।
राजसद्म पुं मन्दुरगृहस्थ । इति हेमचन्द्र ।
राजस त्रि (रजसो भव । रजस् + अण् ।) रजोगुणोद्भव । तस्य लक्षणं यथा —
"आरम्भरुचिताधैर्य्यमसत्कार्य्यपरिग्रह ।
विषयोपसेवा चाजस्रं राजसं गुणलक्षणम् ।"
आरम्भरुचिता प्रकार्य्यकर्म्मारम्भशीलता ।
राजसलक्षणं यथा —
"येनास्मिन् कर्म्मणा लोके ख्यातिमिच्छति पुष्कलाम् ।
न च शोचत्यसम्पत्तौ तद्विज्ञेयन्तु राजसम् ।"
तस्याङ्गानि यथा —
"देवान् सात्त्विका यान्ति मनुष्यांश्च राजसा ।
तिर्य्यक्त्वं तामसा नित्यमित्येषा त्रिविधा गति ।"
तद्विकारा यथा —
"जाता ज्ञाता नटाश्चैव पुरुषा शस्त्रवृत्तय ।
द्यूतपानप्रसक्ताश्च जघन्या राजसी गति ।
राजान क्षत्रियाश्चैव राज्ञश्चैव पुरोहिता ।
वादयुद्धप्रधानाश्च मध्यमा राजसी गति ।

गन्धर्व्वा गुह्यका यक्षा विबुधानुचराश्च ये ।
तथैवाप्सरस सर्व्वा राजसीषूत्तमा गति ।"
इति वामने १० अध्याय ।
राजसाहारा यथा,—
"कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिन ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदा ।"
राजसयज्ञो यथा —
"अभिसन्धाय तु फलं दम्भार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ।"
राजसतपो यथा,—
"सत्कारमानपूजार्थं तपो दम्भेन चैव यत् ।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ।" ।
राजसदानं यथा,—
"यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुन ।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम् ।"
इति श्रीभगवद्गीतायाम् १७ अध्याय ।
राजसत्यागो यथा —
"दुःखमित्येव यत् कर्म्म कायक्लेशभयात् त्यजेत् ।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ।"
राजसज्ञानं यथा,—
"पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान् ।
वेत्ति सर्व्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ।"
राजसकर्म्म यथा,—
"यत्तु कामेप्सुना कर्म्म साहङ्कारेण वा पुन ।
क्रियते बहुलायासं तद्राजसमुदाहृतम् ।" ।
राजसकर्त्ता यथा —
"रागी कर्म्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचि ।
हर्षशोकान्वित कर्त्ता राजस परिकीर्त्तित ।"
राजसी बुद्धिर्यथा —
"यया धर्म्ममधर्म्मञ्च कार्य्यञ्चाकार्य्यमेव च ।
अयथावत् प्रजानाति बुद्धि सा पार्थ राजसी ।"
राजसी धृतिर्यथा —
"यया तु धर्म्मकामार्थान् धृत्या धारयते
ऽर्जुन ।
प्रसङ्गेन फलाकाङ्क्षी धृति सा पार्थ राजसी ।"
राजससुखं यथा —
"विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमम् ।
परिणामे विषमिव तत् सुखं राजसं स्मृतम् ।"
इति श्रीभगवद्गीतायाम् १८ अध्याय । ७ ।
राजसपुराणानि यथा,—
"ब्रह्माण्डं ब्रह्मवैवर्त्तं मार्कण्डेयं तथैव च ।
भविष्यं वामनं ब्राह्मं राजसानि निबोध मे ।" ।
राजसमनवो यथा —
"आदित्य ... राजसैश्च च ।
... राजसा ... ।"
इति पाद्मोत्तरखण्डे ११ अध्याय ।
राजसर्षप पुं (राजा सर्षप ।) राजिका । तत्पर्य्याय । क्षव २ । इत्यमर । २ । ९ । १७ । क्षुताभिजननम् ३ । एनाजन ४ । इति शब्द रत्नावली । तद्गुणा यथा —
"... राजसर्षपः ... ।

सर्व्वतोभद्रो गन्धावर्त्तादयोऽपि च ।
विच्छन्दक प्रभेदा हि भवन्तीश्वरसद्मनाम् ॥”
इत्यमर । २ । २ । १ ॥
राजसभा, स्त्री, राज्ञः सभा । (“सभा राजा मनुष्यपूर्व्वा ।” २ । ४ । २३ । इत्यत्र राज पर्य्यायस्यैव ग्रहणात् न क्लीवत्वम् ।) नृपति समाज । इत्यमर । ३ । ५ । ८ । (राजसभेति नपुंसकलिङ्गतोक्तिस्तु प्रामादिकी ॥)
राजसर्पः, पुं (सर्पाणां राजा । राजदन्तादि त्वात् परनिपात ।) सर्पविशेष । तत्पर्य्याय । भुजङ्गभोजी २ । इति हेमचन्द्र । ४ । ३७ ॥
राजसर्षप पुं, (सर्षपाणां राजा श्रेष्ठत्वात् । पर निपात ।) सर्षपविशेष । राजसर्षा इति भाषा । राइ इति कश्चित् । तत्पर्य्याय । क्षवका २ राजिका ३ खरी ४ क्षुतक ५ । क्षुतक इत्यत्र चुटक इति वा पाठ । इति रत्नमाला । क्षव ६ क्षुताभिजनन ७ । क्षुताभिजनन इत्यत्र क्षुधाभिजनन इति वा पाठ । इति हेमचन्द्र । लक्ष्मी ८ तीक्ष्ण कन्द ९ राजी १० मध्यमपादज ११ । अस्य गुणा । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । वात शूलगुल्मकण्डुकुष्ठव्रणनाशित्वम् । पित्तदाह प्रदत्वञ्च । इति राजनिघण्टः । (चतुर्व्विंशति त्रसरेणुपरिमित परिमाणविशेष । यथा, मनु । ८ । १३३ ।
“त्रसरेणवोऽष्टौ विज्ञेया लिक्षैका परिमाणत ।
ता राजसर्षपस्तिस्रस्ते त्रयो गौरसर्षप ॥”
‘त्रसेत्यादि । अष्टौ त्रसरेणवो लिक्षैका परि माणेन ज्ञेया तास्तिस्रो लिक्षा राजसर्षपो ज्ञेय । ते राजसर्षपास्त्रयो गौरसर्षपो ज्ञेय ॥” इति तट्टीकायां कुल्लूक ॥)
राजसायुज्य, क्ली, (राज्ञ सायुज्यम् ।) राजत्वम् । ‘सार्द्धभभूय मङ्गल ब्रह्मसायुज्यमिच्छसि ।
इन्द्रभूपान्नक तद्गृ———————— ॥”
इत्यमरदर्शनात् ॥
राजसारस, पुं (राज्ञ सारस इव । राज शोभायमानो सारस इव इति वा ।) मयूर । इति शब्दमाला ॥
राजसी, स्त्री (रजस इदमिति । रजस्+अण् । ङीप् ।) दुर्गा । इति शब्दरत्नावली ॥ रजो गुणसम्बन्धिनी च । (यथा, गीतायाम् ।
‘यया धर्म्ममधर्म्मञ्च कार्य्यञ्चाकार्य्यमेव च ।
अयथावत् प्रजानाति बुद्धिः सा पार्थ राजसी ॥”)
राजसूय, पुं (“राज्ञा लतात्मक सोम सूयते अत्र ।” इत्यमरटीका । सु+अधिकरणे क्यप् । “राज्ञा सोतव्य राजा वा इह सूयते ।” इति काशिका । “राजसूयसूर्य्येति ।” ३ । १ । ११४ । इति निपातनात् दीर्घ ।) राजकर्त्तृक यज्ञविशेष । तत्पर्य्याय । क्रतूत्तम २ क्रतु राज ३ क्रतूत्तम ४ । इति शब्दरत्नावली ॥ (अमरमते क्लीवलिङ्गोऽयम् । १ । ५ । ११ । यथा, महाभारते । १ । १५७ । १६ ।

“यस्मिन् च नरव्याघ्र निर्ज्जित्य पृथिवीमिमाम्
राजसूयाश्वमेधाद्यै क्रतुभिर्भूरिदक्षिणै ॥”
राजसूयमन्त्रादिकं वाजसनेयसंहितायाम् ९ अध्यायस्य ३५ कण्डिकामारभ्य १० अध्या यस्य ३० कण्डिकापर्य्यन्तं द्रष्टव्यम् । युधिष्ठिरस्य राजसूययज्ञविवरणन्तु महाभारते सभापर्व्वणि विशेषतो द्रष्टव्यम् ॥)
राजस्कन्ध, पुं, (राज शोभायमानो स्कन्धो यस्य ।) घोटक । इति त्रिकाण्डशेष ॥
राजस्व पुं क्ली (राज्ञे देयं स्वं धनम् ।) राज धनम् । राजकर । इति लोकप्रसिद्धम् ॥
राजस्वर्ण पुं, (स्वर्णानां धुस्तूराणां राजा । राजदन्तादित्वात् परनिपात ।) राजधुस्तू रक । इति राजनिघण्ट ॥
राजहंस, पुं, (हंसानां राजा श्रेष्ठत्वात् । राज दन्तादित्वात् परनिपात ।) चञ्चुचरण लोहितश्वेतवर्णहंस । इत्यमर । २ । ५ । २४ ॥ (यथा, कुमारे । १ । ३४ ।
“सा राजहंसैरिव सन्नताङ्गी
गतेषु लीलाञ्चितविक्रमेषु ।
व्यनीयत प्रत्युपदेशलुब्धै
रादित्सुभिर्नूपुरसिञ्जितानि ॥”)
कदम्ब । कलहंस । नृपोत्तम । इति मेदिनी ॥
राजहर्षण, क्ली (राजानमपि हर्षयतीति । हृष+णिच्+ल्यु ।) तगरपुष्पम् । इति राजनिघण्ट ।
राजहस्ती, [न्] पुं, (राज्ञो हस्ती ।) राज गज । तत्पर्य्याय । मारीच २ राजकुञ्जर ३ महोत्कट ४ । इति हारावली । ४९ ॥
राजहासक, पुं (राजानमपि हासयतीति । हस्+णिच्+ण्वुल् ।) मत्स्यविशेष । तत्- पर्य्याय । कातर १ कातल २ राजीव ३ । इति शब्दरत्नावली ॥
राजह्वक पुं, यक्ष । इति राजनिघण्ट । (अस्य शाकगुणा ।
“तथाहि शीतलञ्चापि लघुदोषाविरोधि च ।
राजह्वकशाकन्तु पटोलशाकवत् तथैवम् ॥”
इति सुश्रुते सूत्रस्थाने ४६ अध्याय ॥)
राजा, [न्] पुं (राजते शोभते इति । राज+ “कनिन् युवृषितक्षिराजीति ।” उणा १ । १५६ । इति कनिन् ।) प्रभु । नृपति । (यथा रघु । ४ । १२ ।
“यथा प्रह्लादनाच्चन्द्र प्रतापात् तपनो यथा ।
तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात् ॥”)
क्षत्रिय । (यथा, मनु । ७ । ३५ ।
“स्वे स्वे धर्म्मे निविष्टानां सर्व्वेषामनुपूर्व्वश ।
वर्णानामाश्रमाणाञ्च राजा सृष्टोऽभिरक्षिता ॥”)
चन्द्र । यक्ष । इन्द्र । इति मेदिनी ॥ उत्तर पदे स्थित श्रेष्ठार्थवाचक । अथ नृपते पर्य्याय । राट् २ पार्थिव ३ क्ष्माभृत् ४ नृप ५ भूप ६ महीक्षित ७ । इत्यमर ॥ नरपति ८ पार्थ ९ भूपति १० भूपाल ११ भूभृत १२ महीपति १३ नाभि १४ नाराट १५ भूमीन्द्र १६ नरेन्द्र १७ लोकाधिप १८ । इति शब्दरत्नावली ॥ प्रजेश्वर १९ भूमिप २० इन २१ इलाधर २२ अवनीपति २३ स्कन्द २४ क्षत्र २५ भूपाक २६ भूपति २७ । इति जटाधर ॥ ७ ॥ अस्य व्युत्पत्तिर्यथा,—
‘महता राजराज्येन पृथुर्वैन्य प्रतापवान् ।
सोऽभिषिक्तो महातेजा विधिवद्धर्म्मकोविदै ॥
पित्रापरञ्जितास्तस्य प्रजास्तेनानुरञ्जिता ।
अनुरागात्ततस्तस्य नाम राजेत्यभाषत ॥”
इति विष्णुपुराणे १ अंशे १३ अध्याय ॥
अपि च ।
“राजा राजसिक कर्म्म कुरुते कर्म्म राजस ।
राजान्याश्च राजसिकास्तेन राजा प्रकीर्त्तित ॥”
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४५ अध्याय ॥ ० ॥
तस्य धर्म्मपितृत्वं यथा —
प्रभुरुवाच ।
“अहो वत्स ! महाराज हे तात ! भयभञ्जन !
भयत्राता च राजा च सर्व्वेषां पालक पिता ।
भर्त्तैव महतोऽब्धस्य विश्व वर्णं कृतोऽपुना ।
यो राजा स पिता माता प्रजानामेव निश्चय ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १८ अध्याय ॥
पृथोरेवादौ राजा इति सञ्ज्ञा आसीत् । यथा,
“एवंविधैस्तथा सर्व्वैरभिषिक्तो महात्मना ।
राजाधिराजाधिकारे वै पृथुर्वैन्य प्रतापवान् ॥
तेन पित्रा प्रजा सर्व्वा कदा नैवानुरञ्जिता ।
तेनानुरञ्जिता सम्यक् सस्यैर्महात्मनेऽन्ते तत ।
अनुरागात्तस्य चैतस्य नाम राजेत्यभाषत ॥”
इति गारुडे भूमखण्डे २८ अध्याय ॥ ० ॥
अथ राजलक्षणम् ।
“सोऽपि लक्ष्मपतेर्वाक्य कृत्वाऽपि विप्रोदितम् ।
नरेन्द्रलक्षणोपेत चिन्तयामास नन्दनम् ॥
ततोऽस्य चन्द्रबिम्बाभं शुभ वर्ण्य सलक्षणम् ।
नीला केशा कृशिताश्च समा दीर्घाश्च- ष्णिता ॥
राजीवनेत्रयुगलो बिम्बोष्ठपुटकस्तथा ।
चतुर्द्दन्तचतुर्व्विंशद्दन्तोऽसौ दीर्घबाहुक ॥
चतुर्हस्तकरो मान्यपद्मरेखापदञ्च ।
शिरावपादो गम्भीर सम्पन्नक त्रिवलीधर ॥”
इति मार्कण्डेयपुराणे हरिश्चन्द्रोपाख्याना ध्याये ॥ ० ॥ अन्यच्च ।
“अर्क्कदिनो अदुतरौ करकोदराभौ ।
शिराशून्यौ ताम्रनखौ पादाङ्गुल्यौ शिरोज्- भितौ ।
कूर्म्मोन्नतौ गूढगुल्फौ सुपार्ष्णी नृपते स्तनौ ।
मद्गुलोमा समा जङ्घा तथा करिकरप्रभा ।
उरवो मानवस्त्वस्य दृढलोमाश्रया स्तन ॥
लोमगूढे नृपो ह्यष्टभिर्वैश्य समाश्रित ।
समाभ्यां निश्चितं प्रोक्तं षष्ठेन प्रजाम्बरम् ।
समाम्भस्ति रम्भश्रवा रूढाशिरा च नायका ।

एकद्वित्रिचतुःपञ्चवृद्धाराद्भिरेव च ।
दक्षिणावर्त्तवलितमुष्काभिश्च नृपाः स्मृताः ।
नृपाः पुष्पसुगन्धियुक्ता मधुगन्धे धनं बहु ।
मीनगन्धिक शुक्री स्याच्च सिन्दूरगन्धिक भूपतिः स्मृतः ।
भवेत् सिंहकटी राजा निःस्वः कपिकटिर्नरः ।
नृपाश्चोन्नतकक्षाः स्युर्निम्नकक्षा विषमकक्षकाः ।
वलिमध्यगता नाभिः शूलधारी करोति हि ।
अधो गवाढ्य कुर्य्याच्च नृपत्व पद्मकर्णिका ।
अनुद्धतैश्चुचुकैश्च भवन्ति सुभगा नराः ।
निःस्वा विषमदीर्घैश्च पीनोपचितकैर्नृपाः ।
समोन्नतञ्च हृदयमकम्प्यं मांसलं पृथु ।
नृपाणामधमानाञ्च खरलोम शिरालकम् ।
कम्बुग्रीवश्च नृपतिर्लम्बकण्ठोऽतिभक्षकः ।
आजानुलम्बिनौ बाहू वृत्तौ पीनौ नृपेश्वरे ।
मणिबन्धैर्निगूढैश्च सुश्लिष्टशुभसन्धिभिः ।
नृपा दीर्घे करच्छेदमध्यैर्धनवर्ज्जिताः ।
निम्नाश्चक्रतलैर्दरैश्च परतर्ककाः ।
ताम्रैर्नृपा धनाढ्याश्च अङ्गुष्ठे यवैस्तथा ।
यवाङ्गुलिश्च धनस्त्रियो रेखाश्च यस्य वै ।
नृपते करतला मणिबन्धे समुत्थिता ।
छत्राकारपदाक्षिविका गजपद्मोपमा नृपे ।
कुम्भाङ्कुशपताकाभा मृणालाभा नरेश्वरे ।
दामाभाश्च गवाढ्यानां स्वस्तिकाभा नृपेश्वरे ।
चक्रासितोमरधनुःकुन्ताभा नृपतेः करे ।
मोचवेच यत्नोपेता अवक्रैरधरैर्नृपाः ।
बिम्बोपमैश्च स्फुटितैरोष्ठैः रूक्षैश्च खण्डिते ।
शिखरैश्चनकैनाश्च दन्ताः स्निग्धा घना शुभाः ।
तीक्ष्णा दंष्ट्राः समा श्वेता जिह्वा रक्ता समा शुभा ।
श्लक्ष्णा दीर्घा च विज्ञेया तालु श्वेतं धनेश्वरे ।
कृष्णा च यस्य मम सम बोध्यश्च मृतम् ।
भूपानाममलं वक्त्रं विपरीतश्च दुःखिनाम् ।
शङ्कुकर्णाश्च राजानो रोमकर्णाः शतायुषः ।
नराः सिन्धावकर्णैश्च आत्मनिम्नोन्नतैश्च या ।
भोगिनश्चिपिटनाश आक्वी भाग्यवान् भवेत् ।
अश्लेष्मका सुपुटा च अवक्रा च नृपेश्वरे ।
वहतेश्च ललाटैश्च लपका उन्नतैश्च या ।
ललाटोपगतास्तिस्रो रेखा स्युः शतवर्षिणाम् ।
नृपश्च स्यादायतेऽभिरायुः पञ्चनवतिः ।
छत्राकारैः शिरोभिस्तु नृपा निम्नशिरा धनी ।
बहुनतचतुरस्रा इत्यः समस्तो नृप ।”
इति गारुडे नरलक्षणं नाम ६६ अध्यायः ।
अपि च ।
“पार्थिवस्य तु वक्ष्यामि भृत्यानाञ्चैव लक्षणम् ।
सर्व्वाणि यो महीपालः सर्व्वान् परीक्षयेत् ।
राज्यं पालयति नित्यं सदधर्म्मपरायणः ।
निर्ज्जित्य परसैन्यानि क्षितिं धर्म्मेण पालयेत् ।
पुष्पं पुष्पं विचिन्वीत मूलच्छेदं न कारयेत् ।
मालाकार इवारण्ये न यथाङ्गारकारकः ।
दुग्धो गौरव शब्देन विकारो न शक्यते ।
परराष्ट्रं महीपालः चारचक्षुश्च दूषयेत् ।
गोधनिन्द्यागु यो धेन्वा चौरार्थी लभते भयम् ।
एवं राष्ट्रमयोगेन पीड्यमानं न वर्द्धते ।
तस्मात् सर्व्वप्रयत्नेन पृथिवीमनुपालयेत् ।
पालकस्य भवेद्भूमिः कीर्त्तिरायुर्यशो बलम् ।
अभ्यर्च्य विष्णुं धर्म्मात्मा गोब्राह्मणहिते रतः ।
प्रजाः पालयितुं शक्तः पार्थिवो यो जितेन्द्रियः ।
ऐश्वर्य्यमतुलं प्राप्य राजा धर्म्मे मतिं चरेत् ।”
इति गारुडे १११ अध्यायः ॥ * ॥
सर्व्वाभिषिक्तराजानो यथा —
श्रीपराशर उवाच ।
“यदाभिषिक्तः स पृथुः पूर्व्वं राज्ये महर्षिभिः ।
ततः क्रमेण राज्यानि ददौ लोकपितामहः ।
नक्षत्रग्रहविप्राणां वीरुधां चाप्यशेषतः । २
सोमं राज्ये दधाद्ब्रह्मा यज्ञानां तपसामपि ।
राज्ञां वैश्रवणं राज्ये जलानां वरुणं तथा ।
आदित्यानां पतिं विष्णुं वसूनामथ पावकम् ।
प्रजापतीनां दक्षन्तु वासवं मरुतामपि ।
दैत्यानां दानवानाञ्च प्रह्लादमधिपं ददौ ।
पितॄणां धर्म्मराजानं यमं राज्येऽभ्यषेचयत् ।
ऐरावतं गजेन्द्राणामशेषाणां पतिं ददौ ।
पतत्रिणाञ्च गरुडं देवानामपि वासवम् ।
उच्चैःश्रवसमश्वानां वृषभन्तु गवामपि ।
शेषन्तु नागराजानं मृगाणां सिंहमीश्वरम् ।
वनस्पतीनां राजानं प्लक्षमेवाभ्यषेचयत् ।
एवं विभज्य राज्यानि दिशां पालाननन्तरम् ।
प्रजापतिपतिर्ब्रह्मा स्थापयामास सर्व्वतः ।
पूर्व्वस्यां दिशि राजानं वैराजस्य प्रजापतेः ।
दिशापालं सुधन्वानं सुतं वै सोऽभ्यषेचयत् ।
दक्षिणस्यां दिशि तथा कर्द्दमस्य प्रजापतेः ।
पुत्रं शङ्खपदं नाम राजानं सोऽभ्यषेचयत् ।
पश्चिमायां दिशि तथा रजसः पुत्रमच्युतम् ।
केतुमन्तं महात्मानं राजानमभिषिक्तवान् ।
तथा हिरण्यरोमाणं पर्ज्जन्यस्य प्रजापतेः ।
उदीच्यां दिशि दुर्द्धर्षं राजानमभिषिक्तवान् ।
तैरियं पृथिवी सर्व्वा सप्तद्वीपा सपत्तना ।
यथाप्रदेशमद्यापि धर्म्मेण प्रतिपाल्यते ।
एते सर्व्वे प्रवृत्तस्य स्थितौ विष्णोर्महात्मनः ।
विभूतिभूता राजानो ये चान्ये मुनिसत्तम ।
ये भविष्यन्ति ये भूताः सर्व्वभूतेश्वरा द्विज ।
ते सर्व्वे सर्व्वभूतस्य विष्णोरंशा द्विजोत्तम ।”
इति श्रीविष्णुपुराणे प्रथमेंऽशे २२ अध्यायः ॥ * ॥
सूत उवाच ।
“एवं यदाय सर्व्वाय स्थावराय चराय च ।
ब्रह्मा क्रमेण राज्यानि व्यादेष्टुमुपचक्रमे ।
द्विजानां वीरुधाञ्चैव नक्षत्राणां ग्रहस्य च ।
यज्ञानां तपसाञ्चैव सोमं राज्येऽभ्यषेचयत् ।
बृहस्पतिञ्च सर्व्वेषां ददावाङ्गिरसं पतिम् ।
भृगूणामाधिपत्ये च काव्यं राज्येऽभ्यषेचयत् ।
आदित्यानां तथा विष्णुं वसूनामथ पावकम् ।
प्रजापतीनां दक्षञ्च मरुतामथ वासवम् ।
दैत्यानामथ राजानं प्रह्लादं दितिनन्दनम् ।
नारायणन्तु साध्यानां रुद्राणां वृषभध्वजम् ।
व्याघ्राणामथ शार्दूलं गरुडं पततां वरम् ।
गन्धर्व्वाणां चित्ररथं नागानामथ वासुकिम् ।
सर्पाणां तक्षकञ्चैव भूतानाञ्च शरीरिणाम् ।
सर्व्वेषां दंष्ट्रिणाञ्चैव वर्णानाञ्चैव रुक्मकम् ।
सागराणां नदीनाञ्च मेघानां वर्षतश्च च ।
आदित्यानामन्यतमं पर्ज्जन्यमभिषिक्तवान् ।
सर्व्वाप्सरोगणानाञ्च कामदेवं तथा प्रभुम् ।
ऋतूनामधिमासानां दिवसानां तथैव च ।
पक्षाणाञ्च क्षपाणाञ्च मुहूर्त्ततिथिपर्व्वणाम् ।
कलाकाष्ठाप्रमाणानां गतेरयनयोस्तथा ।
गणितस्याथ योगस्य चक्रे संवत्सरं प्रभुम् ।
प्रजापतेर्विरजसः पूर्व्वस्यामभिषेचयत् ।
पुत्रं नाम्ना सुधन्वानं राजानञ्चाभ्यषेचयत् ।
यथाप्रदेशं राजानं दक्षिणस्यां प्रजापतेः ।
कर्द्दमस्य शङ्खपदं पुत्रं राज्येऽभिषिक्तवान् ।
पश्चिमस्यां दिशि तथा रजसः पुत्रमच्युतम् ।
केतुमन्तं महात्मानं राजानं सोऽभ्यषेचयत् ।
तथा हिरण्यरोमाणं पर्ज्जन्यस्य प्रजापतेः ।
दिशुत्तरस्यां पुत्रन्तु राजानमभ्यषेचयत् ।
मानुषाणामधिपतिं चक्रे वैवस्वतं मनुम् ।
तैरेव पृथिवी सर्व्वा सप्तद्वीपा सपत्तना ।
यथाप्रदेशमद्यापि धर्म्मेण परिपाल्यते ।
स्वायम्भुवेऽन्तरे पूर्व्वं ब्रह्मणा तेऽभिषेचिताः ।
मन्वादिलोकपालास्तु पुनर्म्मन्वन्तरेऽन्तरे ।
राज्येऽभिषिक्तस्तु पृथुः पूर्व्वं महर्षिभिः ।
मनुभिर्व्विधिना तद्वत् सोऽभिषिक्तः प्रतापवान् ।”
इत्यादि वह्निपुराणे वराहप्रादुर्भावनामाध्यायः ।
राजकर्त्तव्यकर्म्माणि यथा —
महादेव उवाच ।
“वत्स ! राजाभिषिक्तेन प्रजारञ्जनमादितः ।
कर्त्तव्यमविरोधेन स्वधर्म्मस्य महीभृता ।”
अविरोधेन धर्म्मस्याविरोधिना ।
“यथाग्नि परिमृज्य [illegible] वै ।
आत्मा [illegible] स्वकर्म्मविनिर्म्मितान् ।
अपदा [illegible] ।
तथा राजा [illegible] विवर्म्मणः ।
[illegible] ।
[illegible] प्रजानां ।
विनाशो न तु [illegible] राजा [illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।

निवर्त्तयेत्तथा कोषात् स्वधर्माद्दूरतोऽपि यः ।
हंसश्चैव तथा भीमो वाच्यो वार्य्यैर्विवर्द्धितम् ।
मायामायूर्य्य एव वर्त्तं पार्थिवः पुरञ्जयम् ।
धर्मिभिर्भूतैर्विनतैः सर्वं भवतीह महात्मना ।
दृष्ट्वा विपक्षमेवैतान् यजनेऽपि च महीपतिः ।
काककोकिलभृङ्गाणां बकव्यालशिखण्डिनाम् ।
हंसानां कोककुक्कुटानां शिक्षेत चरितं नृप ॥”
काकात् सर्वशङ्किता । कोकिलात् माधुर्य्यम् ।
भृङ्गात् प्रयोजनमात्रग्रहणम् । बकात् प्रभु
सन्धौ एकाग्रताम् । व्यालात् दुष्प्रसर्पितम् ।
शिखण्डिनश्चित्रता सदैव स्वकार्य्य प्रकृतौ राजा-
ज्ञानाश्रयणञ्च । हंसस्य सारग्राहित्वम् । कोक
कुक्कुटात् उत्थानम् ।
“कौशिकस्य क्रियां कुर्य्यात् विपक्षे मनुजेश्वर ।
चेष्टां पिपीलिकानाञ्च काले भूप प्रदर्शयेत् ॥”
कौशिकस्य उलूकस्य रात्रौ काकावस्कन्दनम् ।
पिपीलिकानां हेमन्तबहुल्यं सञ्चयनञ्च ।
“ज्ञेयाग्निविस्फुलिङ्गानां बीजचेष्टा च शाल्मलेः ।
चन्द्रसूर्य्यस्वरूपञ्च नीत्यर्थं पृथिवीक्षिता ॥”
अग्निविस्फुलिङ्गात् दूरात् दाहः । बीजाच्च
दयनिष्पादनम् । उष्णकाले चन्द्र सुखदायी
शीतकाले न । एवं सूर्य्यः शीते सुखदायी
उष्णकाले न । एवं कालानुसारेण सुखदुःख
दायित्वम् ।
“बन्धकात् मधुपरभत् शूलिना शुक्तिकौशिकाम् ।
प्रजा नृपेण चाद्येया तथा चण्डालयोषिता ॥”
बन्धकात् भिन्नत्वम् । मधुपात् कण्टकाद्यपर्ण
मिलनमुखता च । परभृतात् बलादि यभूत्
कोकिल । यथा परभृतोऽन्यपरिपालित न
सहते । शूलिना चार्थिनासनम् । शुक्तिकया
क्रमात् कालोपादानम् । चण्डालयोषिता
यौवनी कामशिरो नृपातिना स्वल्पिर्वीभवति ।
“शृगालवन्नीमानां गद्दापोऽपि महीपतिः ।
कुर्य्यात् यथा कुर्य्यीत महीपालनकर्मणि ॥
यथेन्द्रचतुरो मासान् वार्य्योघैरेव भूतलम् ।
आप्याययेत्तथा लाभान् परिचारैर्महीपतिः ॥’
परिचारैश्चरदानादिभिः ।
“मासानष्टौ यथा सूर्य्यस्तोयं हरति रश्मिभिः ।
सूक्ष्मेणैवाभ्युपायेन तथा शुल्कादिना नृप ॥
यथा यमः प्रियद्वेष्यौ प्राप्ते काले नियच्छति ।
तथा प्रियाप्रियौ राजा दुष्टादुष्टे समो भवेत् ॥
पूर्णेन्दुमालोक्य यथा प्रीतिमान् जायते नरः ।
एवं यत्र प्रजाः सर्वा निर्वृतास्तच्छशिव्रतम् ॥
मारुतः सर्वभूतेषु निगूढश्चरते यथा ।
एवं चरैश्चरेत् पौरामात्यादिबन्धुषु ॥
न लोभार्थैर्न कामार्थैर्नार्थैर्यस्य मानसम् ।
कष्टार्थैः कृष्टैः प्रभवान् स राजा स्वर्गमृच्छति ॥”
काभादित्यौषधैः ।
“उत्पथग्राहिणो मूढान् स्वधर्माच्चलितमनसः ।
यः करोति निजे धर्म्मे स राजा स्वर्गमृच्छति ॥”
उत्पथग्राहिणः पापिनः ।
“वर्णधर्म्मा न सीदन्ति यस्य राष्ट्रे तथाश्रमाः ।
राजन्यस्य सुखं तात परत्रेह च शाश्वतम् ॥
एतद्राज्ञः परं कार्य्यं तथैतद्वृद्धिकारकम् ।
स्वधर्म्मे स्थापनं नॄणां चाल्यते न कुबुद्धिभिः ॥
पालनेनैव भूतानां कृतकृत्यो महीपतिः ।
सम्यक् पालयिता भागं धर्म्मस्याप्नोति वै यतः ॥
एवमाचरते राजा चातुर्व्वर्ण्यस्य रक्षणे ।
स सुखी विहरत्येव शक्रस्यैति सलोकताम् ॥”
इति मार्कण्डेयपुराणे मदालसोपाख्याननामाध्याय
सटीकश्च ॥ * ॥ राजाभिषेकस्य विहित
नक्षत्राणि यथा,—
“पुष्याहुराधा ज्येष्ठा च रोहिणी चोत्तरात्रयम् ।
हस्ताश्विनी रेवती च नृपाभिषेकणोत्तमाः ॥”
इति ज्योतिःसारसंग्रहः ॥
अस्य विवरणं अभिषेकशब्दे द्रष्टव्यम् ॥ * ॥
राज्ञि वर्णनीयानि यथा —
“नृप कीर्तिप्रतापाज्ञादानावलिविवेकिताः ।
धर्म्मेष्वाज्ञासम्यग्ज्ञाता आनयज्ञता ॥
प्रजारागोऽरिशौर्य्यान्विताशोऽरिपुरशून्यताः ।
औदार्य्यं जैत्रयात्रा नीतिशौर्य्यं वर्णाद्भुतान्यपि ॥”
इति कविकल्पलतायाम् १स्तबके ४कुसुमम् ॥*॥
राजान्नभक्षणे दोषो यथा —
वाराह उवाच ।
“शुद्धा भागवता भूत्वा मम कर्म्मपरायणाः ।
ये तु भुञ्जन्ति राजान्नं लोभेन च भयेन च ॥
आयसाश्च हि मुञ्चन्ति राजान्नस्य वसुन्धरे ।
दशवर्षसहस्राणि पच्यन्ते नरके नराः ॥
भगवद्वचनं श्रुत्वा सा मही संशितव्रता ।
उवाच मधुरं वाक्यं सर्वलोकसुखावहम् ॥
धरण्युवाच ।
तस्य सर्वेण मे देव हृदयं हि व्यवस्थितम् ।
को नु भोगो हि राजान्नं सर्व्वे त्वं वक्तुमर्हसि ॥
ततो भूत्वा वच श्रुत्वा सर्व्वधर्म्मविदां वर ।
प्राह नारायणो वाक्यं धराकामा वसुन्धराम् ॥
वाराह उवाच ।
शृणु सुन्दरि ! तत्त्वेन गुह्यमेतदनिन्दिते ।
राजान्नन्तु न भोक्तव्यं शुभैर्भागवतैः सदा ॥
यद्यपि वसतीह राजा लोके प्रवणं ।
राजधनलाभसो चापि कुर्व्वन् कर्म्म सुदारुणम् ।
अपि वा गर्हितं तेन राजान्नस्य वसुन्धरे ।
एतत्सर्व्वोपायमाचरेत्र नु पै रांसी भुवि ॥
तत्रोऽहं सम्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
यथा राजान्नं भक्ष्यं वै शुभैर्भागवतैः शुभे ॥
स्थापयित्वा तु मां देवि विधिदृष्टेन कर्म्मणा ।
धनधान्यप्रदानानि राजा भागवतैरपि ॥
किन्तु भागवतोऽपि मम प्रापणत्वेन ।
शुद्धान्नन्तु वरारोहे न स पापेन लिप्यते ॥
एवं विज्ञाय सुश्रु धरणी प्रतिनन्दिता ।
वाराहरूपिणं देवं प्रत्युवाच महात्मा ॥”*॥
तत्रभोजनप्रायश्चित्तानि यथा —
धरण्युवाच ।
“राजान्नन्तु तथा शुद्धा शुद्धा भागवत शुचि ।
कर्म्मणा केन मुच्येत तन्मे ब्रूहि जनार्द्दन ॥
वाराह उवाच ।
शृणु तत्त्वेन मे देवि कथ्यमानं मयाऽनघे ।
तरन्ति मनुजा येन राजान्नलोपदूषणात् ॥
एवं चान्द्रायणं तथा तप्तकृच्छ्रं प्रयत्नतः ।
कुर्य्यात् सान्तपनं चैव येन मुच्यति किल्बिषात् ॥
शुद्धा वै राज्ञोऽन्नानि इदं कर्म्म समाचरेत् ।
न तस्यैवापराधोऽस्ति वसुधे वै वचो मम ॥
एवमेव न भोक्तव्यं राजान्नन्तु कदाचन ।
ममाज्ञ प्रियकामाय यो गच्छेत् परमां गतिम् ॥”
इत्यादि वाराहे राजान्नभक्षणप्रायश्चित्तनामा
ध्यायः ॥ * ॥ अपि च ।
‘राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसम्’
इत्याद्यभिधाय —
भुङ्क्ते चान्नमशुद्धमन्नमशुचेः पञ्चैतावत्रम् ।
मथ्य शुद्धा चरेत् कृच्छ्रं रेतो विण्मूत्रमेव च ॥”
इति प्रायश्चित्ततत्त्वम् ॥
(राजनम् । यथा, ऋग्वेदे । १ । ।१९ । ३ ।
“अहं शुनं यजमानस्य राजनि ।”
“अहं यजमानस्य राजनि राजमार्गे शुनं
अभयं भवति इति शेषः ।” इति तद्भाष्ये
सायणः ॥)

राजालय, पुं, (राजानं अलतीति । अल धातोः
गमने + “बहुलमन्यत्रापि ।” उणा० १ । ८८ ।
इति युच ।) शृगालवृक्षः । इति शब्दमाला ॥

राजादनं, क्ली, (राजभिरद्यते इति । अद भक्षणे
+ कर्म्मणि ल्युट् ।) क्षीरिका । पियालः ।
किंशुकः । इति मेदिनी । ने ९ ६ ॥ (यथा
सुश्रुते । १ । ४६ । चरकयोः ।
‘दाडिमामलकं क्षौद्रं खर्जूरं सपरूषकम् ।
राजादनं मातुलुङ्गं समवेतं प्रशस्यते ॥’
पुंलिङ्गोऽपि दृश्यते । तन्त्रे । २ । ३ । ४६ ।
वैद्यकशास्त्रे । ३ । ९ ८ । क्षीरिकार्थे पर्य्यायो
यथा,—
“राजादनः क्षीरवृक्षः पत्राद्यो राजप्रियः ॥”
इति वैद्यकरत्नमालायाम् ॥
किंशुकार्थे पर्य्यायो यथा —
‘पालाशेन यथासत्त्वं स्वाद्वम्लकषायः किंशुकः ।
राजादनो ब्रह्मवृक्षो याज्ञिकः सर्वोऽपरः ॥’)

राजानुजीवी, [न्] त्रि (राजानं अनुजीवी ।)
राजोपजीवी । तस्य कर्माणि यथा —
सञ्जय उवाच ।
“यथानुवर्त्तितव्यं स्यान्नृणां राजोपजीविना ।
तथा ते कथयिष्यामि निबोध गदतो मम ॥
आज्ञा सम्यगेवाज्ञा ग्राह्या राजस्य दक्षिणस्य ।
व्याधिस्य यथाकालं न वक्तव्यं तथा वच ॥
अनुकूलं प्रियं चास्य वक्तव्यं जनसंसदि ।
रहोगतस्य वक्तव्यमप्रियं यद्धितं भवेत् ॥
परार्थमस्य वक्तव्यं स्वार्थं पीतोऽपि मानव ।
स्वार्थं गुह्यमन्यथा च वक्तव्यं कदाचन ॥
कार्य्याभिधानं कर्त्तव्यं रक्षितव्यं यथाक्रमं ॥
न च हिंस्यं धनं किञ्चिन्नियुक्तेन च कुत्रचित् ।
नोपेक्ष्यं मायामस्य यथा राजा प्रियो भवेत् ।

राज्ञश्च न तथा कार्य्यं वेशभाषितचेष्टितम् ।
राजलीला न कर्त्तव्या तद्विद्विष्टं विवर्ज्जयेत् ।
राज्ञः समोऽधिको वा न कार्य्यो वेशो विजानता ।
द्यूतादिषु तथैवास्य कौशलन्तु प्रदर्शयेत् ।
प्रदर्श्य कौशलञ्चास्य राजानन्तु विशेषयेत् ॥
अन्तःपुरजनाध्यक्षैर्वैरदूतैः समागतैः ।
संसर्गं न व्रजेद्राजन् ! विना पार्थिवशासनम् ॥
निःस्नेहताञ्चावमानं प्रयत्नेन तु गोपयेत् ।
यच्च गुह्यं भवेद्राज्ञो न तल्लोके प्रकाशयेत् ॥
नृपेण श्रावितं यत् स्यादवाच्यं तन्नृपोत्तम ! ।
न तत् संश्रावयेल्लोके तदा राज्ञः प्रियो भवेत् ।
आज्ञाप्यमाने चान्यस्मिन् समुत्थाय त्वरान्वितः ।
अहं किं करवाणीति वाच्यो राजा विजानता ॥
कार्य्यावस्थाञ्च विज्ञाय कार्य्यमेव तथा भवेत् ।
सततं क्रियमाणेऽस्मिन् लाघवन्तु व्रजेद् ध्रुवम् ॥
राज्ञः प्रियाणि वाक्यानि न चात्यर्थं पुनः पुनः ।
न हास्यशीलश्च भवेन्न चापि भ्रुकुटीमुखः ॥
नातिवक्ता न निर्वक्ता न च मात्सरिकस्तथा ।
आत्मसम्भावितश्चैव न भवेत् कथञ्चन ॥
दुष्कृतानि नरेन्द्रस्य न तु सङ्कीर्त्तयेत् क्वचित् ।
वस्त्रमस्त्रमलङ्कारं राज्ञा दत्तञ्च धारयेत् ॥
औदार्य्येण न तद्देयमन्यस्मै भूतिमिच्छता ।
न चैवोपासने कार्य्यं दिवास्वप्नं न कारयेत् ॥
नानिर्द्दिष्टे तथा द्वारे प्रविशेत कदाचन ।
न च पश्येत्तु राजानमयोग्यासु च भूमिषु ।
राज्ञस्तु दक्षिणे पार्श्वे वामे चोपविशेत्तथा ।
पुरस्ताच्च तथा पश्चादासनन्तु विगर्हितम् ॥
जृम्भां निष्ठीवनं कासं कोपं पर्य्यस्तिकाश्रयम् ।
भ्रुकुटीं वातमुद्गारं तत्समीपे विवर्ज्जयेत् ॥
स्वयं तत्र न कुर्व्वीत स्वगुणाख्यापनं तथा ।
स्वगुणाख्यापने चैव परमेव प्रयोजयेत् ॥
हृदयं निर्म्मलं कृत्वा परां भक्तिमुपाश्रितैः ।
अनुजीविगणैर्भाव्यं नित्यं राज्ञामतन्द्रितैः ॥
शाठ्यं लौल्यञ्च पैशुन्यं नास्तिक्यं क्षुद्रतां तथा ।
चापल्यञ्च परित्याज्यं नित्यं राजानुजीविना ।
श्रुतेन विद्याशिल्पैश्च संयोज्यात्मानमात्मना ।
राजसेवां ततः कुर्य्याद्भूतये भूतिवर्द्धनीम् ॥
नमस्कार्य्याः सदा चास्य पुत्त्रवल्लभमन्त्रिणः ।
सचिवैश्चास्य विश्वासो न तु कार्य्यः कथञ्चन ॥
अपृष्टश्चास्य न ब्रूयात् कामं ब्रूयात्तथापदि ।
हितं पथ्यञ्च वचनं हिते यच्च सुनिश्चितम् ॥
चित्तञ्चैवास्य विज्ञेयं नित्यमेवानुजीविना ।
भर्त्तुराराधनं कुर्य्याच्चित्तज्ञो मानवः सदा ॥
रागापरागौ चैवास्य विज्ञेयौ भूतिमिच्छता ।
त्यजेद्विरक्तं रक्तात्तु वृत्तिन्तु कारयेत् ॥
विरक्तः कारयेन्नाशं विपक्षाभ्युदयं तथा ।
आशावर्द्धनकं कृत्वा फलनाशं करोति च ॥
अकोपोऽपि सकोपाभः प्रसन्नोऽपि च निष्फलः ।
वाक्यञ्च समदं वक्ति वृत्तिच्छेदं करोति च ॥
प्रदेशवाक्यमुदितो न सम्भावयतेऽन्यथा ।
आराधनासु सर्व्वासु सुप्तवच्च विचेष्टते ॥
कथासु दोषं क्षिपति वाक्यभङ्गं करोति च ।
लक्ष्यते विमुखश्चैव गुणसङ्कीर्त्तने कृते ॥
दृष्टिं क्षिपत्यथान्यत्र क्रियमाणे च कर्म्मणि ।
विरक्तलक्षणं ह्येतत् शृणु रक्तस्य लक्षणम् ॥
दृष्ट्वा प्रसन्नो भवति वाक्यं गृह्णाति चादरात् ।
कुशलादिपरिप्रश्नं सम्प्रयच्छति चासनम् ॥
विविक्तदर्शने चास्य रहस्ये च न शङ्कते ।
जायते हृष्टवदनः श्रुत्वा तस्य तु सत्कथाम् ॥
अप्रियाण्यपि वाक्यानि तदुक्तान्यभिनन्दति ।
उपायनञ्च गृह्णाति स्तोकमप्यादरात्तथा ॥
कथान्तरेषु स्मरति प्रहृष्टवदनस्तथा ।
इति रक्तस्य कर्त्तव्या सेवा रविकुलोद्वह ! ॥
आपत्सु न त्यजेत् पूर्व्वं विरक्तमपि सेवितम् ॥
मित्रं न चापत्सु तथा च भृत्यं
भजन्ति ये निर्गुणमप्रमेयम् ।
प्रयान्ति विघ्नेन च ते प्रयान्ति
सुरेन्द्रधामामरवन्दितं शुभम् ॥"
इति मत्स्यपुराणे राजधर्म्मे अनुजीविवृत्तिर्नाम २१६ अध्यायः ॥

राजादनी, स्त्री, (राजभिरद्यते या । अद् + कर्म्मणि ल्युट् । ङीप् ।) वृक्षविशेषः । क्षीरिकी इति भाषा । तत्पर्य्यायः । राजफलः २ क्षीरवृक्षः ३ नृपद्रुमः ४ निम्बबीजः ५ मधुफलः ६ कपीष्टः ७ माधवोद्भवः ८ क्षीरी ९ गुच्छफलः १० भूपेष्टः ११ राजवल्लभः १२ शीफलः १३ दृढस्कन्धः १४ क्षीरशुक्लः १५ । अस्या गुणाः । मधुरत्वम् । पित्तनाशित्वम् । गुरुत्वम् । तर्पणत्वम् । हृद्यत्वम् । स्थौल्यकरत्वम् । वृष्यत्वम् । सुस्निग्धत्वम् । मेहनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"क्षीरिकायाः फलं वृष्यं बल्यं स्निग्धं हिमं गुरु ।
तृष्णामूर्च्छामदभ्रान्तिक्षयदोषत्रयापहम् ॥"
इति भावप्रकाशः ॥

राजान्नं, क्ली, (राजयोग्यमन्नम् । अन्नानां राजा इति वा ।) आन्ध्रदेशोद्भवशालिविशेषः । तत्पर्य्यायः । नृपान्नम् २ राजाह्वम् ३ दीर्घशूकम् ४ धान्यश्रेष्ठम् ५ राजधान्यम् ६ रोचनम् ७ दीर्घशूकम् ८ । अस्य गुणाः । त्रिदोषघ्नत्वम् । सुस्निग्धत्वम् । मधुरत्वम् । लघुत्वम् । दीपनत्वम् । बलकारित्वम् । पथ्यत्वम् । कान्तिवीर्य्यवृद्धिदत्वञ्च । इति राजनिर्घण्टः ॥ (राज्ञः अन्नम् ।) राजस्वामिकमन्नम् । तद्भोजननिषेधप्रायश्चित्ते राजधर्म्मे द्रष्टव्ये । (राजान्नेन हि तेजोहानिर्भवति । यथा, मनुः । ४ । २१८ ।
"राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्च्चसम् ।
आयुः सुवर्णकारान्नं यशश्चर्म्मावकर्त्तिनः ॥")

राजाम्रः, पुं, (आम्राणां राजा श्रेष्ठत्वात् । राजदन्तादित्वात् परनिपातः ।) आम्रविशेषः । तत्पर्य्यायः । राजफलः २ कराम्रः ३ कोकिलोत्सवः ४ मधुरः ५ कोकिलानन्दः ६ कामेष्टः ७ नृपवल्लभः ८ । अस्य फलगुणाः । कोमलत्वम् । अम्लत्वम् । पित्तदाहकरत्वञ्च । सुपक्वस्य तस्य गुणाः । स्वादुत्वम् । मधुरत्वम् । पुष्टिवीर्य्यबलप्रदत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"राजाम्रस्तु भवेत्तत्र कामाङ्गो राजपुत्रकः ।
राजाम्रं तुवरं स्वादु विदग्धं शीतलं गुरु ।
वातिकृच्च विष्टम्भावबलकृत् कफपित्तनुत् ॥"
इति भावप्रकाशः ॥

राजाम्लः, पुं, (अम्लानां राजा श्रेष्ठत्वात् । राजदन्तादित्वात् परनिपातः ।) अम्लवेतसः । इति राजनिर्घण्टः ॥

राजार्कः, पुं, (अर्काणां राजा श्रेष्ठत्वात् ।) श्वेतार्कवृक्षः । सादा आकन्द इति भाषा । तत्पर्य्यायः । वसुकः २ अर्कः ३ मन्दारः ४ गणरूपकः ५ काष्ठीलः ६ सदापुष्पः ७ । इति राजनिर्घण्टः ॥ अलर्कः ८ प्रतापसः ९ । इति शब्दरत्नावली ॥

राजार्हं, क्ली, (राजानमर्हतीति । अर्ह + अच् ।) अगुरु । (अस्य पर्य्यायो यथा —
"अगुरु प्रवरं लोहं राजार्हं योगजं तथा ।
वंशिकं कृमिजञ्चापि कृमिजग्धमनार्य्यकम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
राजयोग्ये, त्रि । इति मेदिनी । हे, २१ ॥
(यथा श्रीरामायणे । १ । ९८ । १५ ।
"सन्देशमपरं मे जनकस्य श्रवणम् ।
राजार्हाणि च रत्नानि रत्नभाक्षो यशो ध्रुवम् ॥")

राजार्हा, स्त्री, (राज्ञोऽर्हा ।) जम्बूः । इति राजनिर्घण्टः ॥

राजालाबुः, स्त्री, (अलाबूनां राजा । राजदन्तादित्वात् परनिपातः ।) अलाबूभेदः । मिठा लाउ इति भाषा । तत्पर्य्यायः । महालाबुः २ मधुरालाबुः ३ महाफला ४ तुम्बः ५ भत्यालाबुः ६ वर्त्तालाबुः ७ मिष्टतुम्बी ८ । अस्याः फलगुणाः । हृद्यत्वम् । कफपित्तहरत्वम् । गुरुत्वञ्च । इति मदनविनोदः ॥

राजार्द्रकः, पुं, (आर्द्रकाणां राजा । एवं परनिपातः ।) महाकन्दः । इति हारावली । १ । १ ॥

राजावर्त्तः, पुं, (राजानं आवर्त्तयति । आ + वृत् + णिच् + अण् । यद्वा, राज्ञः शोभमान आवर्त्तो यत्र ।) उपरत्नभेदः । रेवटी इति हिन्दी भाषा । तत्पर्य्यायः । नृपावर्त्तः २ राजावर्त्तकः ३ आवर्त्तमणिः ४ आवर्त्तः ५ । अस्य गुणाः । कटुत्वम् । स्निग्धत्वम् । शिशिरत्वम् । पित्तघ्नत्वम् । [illegible] । इति राजनिर्घण्टः ॥ [illegible] । नृपावर्त्तः । विराटजः २ राजावर्त्तः ३ । इति हेमचन्द्रः । ४ । १३० ॥ (यथा कथासरित्सागरे । ४१ । ३६ ।
"राजावर्त्तविनिर्माणवर्णाकुट्टिमभूमिषु ॥"
तत्र च दृष्टः ।
"[illegible]

राजावर्त्तं प्रमेहघ्न छर्द्दिहिक्कानिवारणम् ।”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

राजाहिः, पुं (अहीनां राजा । राजदन्तादि-त्वात् परनिपातः ।) द्विमुखसर्पः । तत्पर्य्यायः । द्विमुखाहिः २ विमायासी ३ विषाशुष ४ । इति शब्दरत्नावली ॥ अहीरवि ५ । इति त्रिकाण्डशेषः ॥

राजि, स्त्री (राजते इति । राज+“वसिवपि-यजिराजीति ।” उणा ४ । १२४ । इति इञ् ।) श्रेणी । (यथा अध्यात्मरामायणम् । ६ । ५ ।
“उन्नयति रोमराजि स्तनयुग्मोनतलमेखलैव ।”)
रेखा । इति मेदिनी । ज, १४ ॥ (यथा, महाभारते । ७ । २९ । ६२ ।
“कलापपुष्पकास्तु श्वेतलोहितराजयः ।
इयमच्छ द्रुपदश्रेष्ठा चन्दुपुण्ड्रदुर्मदम् ।”
पुं, आयुप्रवर्त्तिः । मनु धृतराष्ट्रपौत्रः । यथा महाभारते । १ । ७५ । ८६ ।
‘सञ्जय प्रश्रुत्सर्वाय राजि गयमनघम् ।
अभावजो सुतानेतानायोः प्रजाम् प्रचष्टे ।’)

राजिका, स्त्री, (राजते या । राज+ण्वुल् । टापि अत इत्वम् ।) केदारः । राजसर्षपः । रेखा । इति मेदिनी । के, १४५ ॥ पङ्क्तिः । इति हेमचन्द्रः ॥ कृष्णसर्षपः । तत्पर्य्यायः । क्षवः २ क्षुताभिजननः ३ राजिका ४ आसुरी ५ । इत्यमरः । २ । ९ । १९ ॥ क्षुताभिजनः ६ असुरी ७ । इति तट्टीका ॥ रक्तवर्णसर्षपः । राइ इति भाषा । तत्पर्य्यायः । राजी २ आसुरी ३ रक्तिका ४ रक्तसर्षपः ५ तीक्ष्णगन्धा ६ मधूलिका ७ क्षवकः ८ क्षुतकः ९ क्षवः १० । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । वातशोणितगुल्मकफघ्नत्वम् । दोषपित्तप्रकोपत्वम् । तीक्ष्णगुणा । कौष्ठ्यत्वम् । पामाखर्जुकुष्ठादिहरत्वम् । किञ्चित्पित्तत्वम् । कृमिकण्डूत्वम् । मेध्यत्वम् । त्वग्दोषनाशित्वञ्च ॥ तस्य गुणाः । कटुत्वम् । उष्णत्वम् । क्षमिवातकफकण्ठामयघ्नत्वम् । दाहत्वम् । वह्निदीपनकारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
राजी तु राजिका तीक्ष्णगन्धा क्षुज्जनिकासुरी ।
क्षवः क्षुताभिजनकः कृमिघ्नः कृष्णसर्षपः ॥
राजिका कफपित्तघ्नी तीक्ष्णोष्णा रक्तपित्तकृत् ।
किञ्चिद्रूक्षाग्निदा कण्डूकुष्ठकोष्ठक्रिमीन् हरेत् ।
अतितीक्ष्णा विशेषेण तद्वत् कृष्णापि राजिका ।”
इति भावप्रकाशः ॥

राजिकाफल, पुं (राजिकाया फलमिव फलमस्य ।) गौरसर्षपः । इति राजनिर्घण्टः ॥

राजिफला, स्त्री (राजीभूतानि श्रेणिबद्धानि फलानि यस्याः ।) चीनाककटी । इति राजनिर्घण्टः ॥

राजिल, पुं (राजी रेखाऽस्त्यस्येति । राजि+सिध्मादित्वात् लच् । यद्वा राजिं लातीति । ला+क ।) डुण्डुभसर्पः । इत्यमरः । १ । ८ । ५ ॥ (यथा, रघु । १२ । ५० ।
“किं महोरगविसर्पिविक्रमो
राजिलेषु गरुडः प्रवर्त्तते ॥”)

राजी, स्त्री (राजि+कृदिकारादिति ङीष् ।) निरच्छिन्नपङ्क्तिः । इति शब्दरत्नावली ॥ (श्रेणि । यथा, माघे । ४ । ९ ।
“राजीवराजीवशलोलभृङ्ग-
मुष्णन्तमुष्णं ततिभिस्तरूणाम् ॥”)
राजिका । (अस्या गुणा यथा —
“राजी तु राजिका तीक्ष्णगन्धा क्षुज्जनिकासुरी ।
क्षवः क्षुताभिजनकः कृमिघ्नः कृष्णसर्षपः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥)
रक्तवर्णसर्षपः । इति राजनिर्घण्टः ॥

राजीफल, पुं, (राजीभूतानि श्रेणिबद्धानि फलानि यस्य ।) पटोलः । इति राजनिर्घण्टः ॥ (तथास्य पर्य्यायः ।
‘पटोलः कुलकस्तिक्तः पाण्डुकः कर्कशच्छदः ।
राजीफलः पाण्डुफलो राजेयश्चामृताफलः ।
बीजगर्भः प्रतीकश्च कुष्ठघ्नः कासमर्द्दनः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥)

राजीवं, क्ली (राजयः रेखाः सन्त्यस्येति । राजी+“अन्येभ्योऽपि दृश्यते ।” ५ । २ । १०९ । इत्यस्य वार्त्तिकोक्त्या वः ।) पद्मम् । इत्यमरः । १ । १० । ४१ ॥ (यथा कुमारे । ३ । ४५ ।
“उत्तानपाणिद्वयसन्निवेशात्
प्रफुल्लराजीवमिवाङ्कमध्ये ॥”)

राजीव, पुं (राजी अस्त्यस्येति । राजी+व ।) मत्स्यभेदः । (अस्य गुणा यथा,—
“राजीवस्तु श्लेष्मा राजीमिः परितो वृतः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)
हरिणभेदः । इति मेदिनी । वे, ४८ ॥ (यथा, मनुः । ५ । १६ ।
“पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः ।
राजीवान् सिंहतुण्डांश्च सशल्कांश्चैव सर्व्वशः ॥”)
हस्ती । इति त्रिकाण्डशेषः ॥ सारसपक्षी । इत्यमरः ॥ राजीवजीविनि, त्रि । इत्यजयः ॥

राजेन्द्रः, पुं, (राज्ञामिन्द्र इव श्रेष्ठत्वात् ।) सम्राट् दशगुणो राजा । यथा,—
“चतुर्विंशमकं जलमभिषारं त्रपञ्च च ।
यो राजा लक्षसाध्यं च एष मण्डलेश्वरः ।
तस्माद्दशगुणो राजा राजेन्द्रः परिकीर्त्तितः ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८६ अध्यायः ॥ (राजश्रेष्ठः । यथा, महाभारते । ३ । १४ । ४१ ।
“कर्म्मणैव राजेन्द्र । धर्म्मेण सुमहान् सत ।”)

राजोदेवनपत्रक, पुं (राजादेवन इति भाषा । तत्र पत्रम् ।) भूताङ्कुशवृक्षः । इति राजनिर्घण्टः ॥

राज्ञी, स्त्री (राज्ञः पत्नी । राजन्+ङीप् । यद्वा, राजते इति । राज+कनिन् । ततः स्त्रियां ङीप् ।) राजपत्नी । रानी इति भाषा ॥ (यथा, रघु । १ । ५७ ।
“तयोर्जगृहतुः पादान् राजा राज्ञी च मागधौ ।
तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिननन्दतुः ॥”)
सूर्य्यपत्नी । इति मेदिनी । ञे, २ ॥ राजपत्न्याः सर्व्वनामानि यथा,—
‘देवी सौभाग्यवत्यग्रमहिषी मुख्यभर्तृका ।
अपराधानुमन्यादिप्रतिसमावसादिका ॥
हर्षोद्रेकितलीलाभावभावसम्पादितका ॥
कपोलाधरमेखलाकटाक्षकन्धरा ।
राजवाक्कुलकरोत्तमाभौमध्यमलिङ्गम् ।
लीलालिङ्गोविलासोपभोग्यवरा भ्रमात् ॥”
इति कविकल्पलतायाम् १ स्तवके २ कुसुमम् ॥ सूर्य्यपत्न्याः प्रमाणान्तरं यथा,—
सूत उवाच ।
“विवस्वान् काश्यपात् पूर्व्वमदित्यामभवत् पुरा ।
तस्य पत्नीत्रयं तद्वत् संज्ञा राज्ञी प्रभा तथा ।
रैवतस्य सुता राज्ञी रेवन्तं सुषुवे सुतम् ।
प्रभा प्रभातं सुषुवे त्वाष्ट्री संज्ञा तथा मनुम् ।
यमश्च यमुना चैव यमलौ तु बभूवतुः ॥”
इति मात्स्ये ११ अध्यायः ।
कांस्यम् । इति हेमचन्द्रः ॥ नीली इति राजनिर्घण्टः ॥ * ॥ (प्रतीची दिक् । यथा, छान्दोग्योपनिषदि । ३ । १५ । २ । “तस्य प्राची दिक् जुहूर्नाम सहमाना नाम दक्षिणा राज्ञी नाम प्रतीची सुभूता नामोदीचीति ।” तथा राज्ञी नाम प्रतीची पश्चिमा दिक् राज्ञी राजा वरुणनाधिष्ठिता सन्ध्यारागयोगाद्वा ।’ इति शाङ्करभाष्यम् ॥)

राज्य, क्ली, (राज्ञो भावः कर्म्म वा । राजन्+“पत्यन्तपुरोहितादिभ्यो यक् ।” ५ । १ । १२८ इति यक् ।) राज्ञः इदम् । तत्पर्य्यायः । नीवृत् २ राष्ट्रम् ३ जनपदः ४ देशः ५ प्रदेशः ६ विषयः ७ राष्ट्रम् ८ उपवर्त्तनम् ९ । इति शब्दरत्नावली ॥ अमरमते नीवृज्जनपदौ आयवर्त्तकलिङ्गमगधकोशलादौ समुदायमेव स्यातां नामधेयम् । देशविषयौ जनपदादि च जनपदग्रामानगरादि । अपरे देशो जनपदविभागमात्रं च । सभाधिपतिर्वाग्दिविशि स्मृताधर्म्म । ग्रामान्तिकं मधामन्तरेषु । नीवृत् इव पर्य्यायकाणी । इत्यमरे । मतभेदप्रमाणम् । इति भरतः ॥ * ॥ तस्य सप्ताङ्गानि च यथा,—
“परस्परोपकारीदं सप्ताङ्गं राज्यमुच्यते ।
अमात्यराष्ट्रदुर्गाणि कोषो दण्डश्च पञ्चमः ।
एताः प्रकृतयस्तस्य विजिगीषोरुदाहृताः ।
एताः पञ्च तथा मित्रं सप्तमं पृथिवीपतिः ।
सप्तप्रकृतिकं राज्यमित्युवाच बृहस्पतिः ।
पारम्पर्य्येण तदङ्गं युक्ते शब्दवेदिनः ।
स्वाम्यमात्यः सुहृत् कोषो राष्ट्रं दुर्गं बलं तथा ।
पौरश्रेण्यश्च राज्याङ्गं प्रकृतिश्च भवेदिदम् ॥”
इति शब्दरत्नावली ॥
अपि च ।
“सप्ताङ्गस्येह राज्यस्य त्रातारमात्मनः परम् ।
प्रणश्यति सर्व्वथापि प्रजापालनवर्ज्जिते ॥”
इति हरिवंशम् ॥

राज्यक्ता, स्त्री (राज्या सर्षपेण यक्ता स्विन्ना ।) पिष्टराजिकादधिपक्वमिश्रितखण्डखाद्य खण्डादि । रायता इति भाषा । यथा,—
"सभूष्य निस्तिषेतक्रे भृष्टं जीरकहिङ्गु च ।
लवणानाञ्च षट्कान् सकलानपि मज्जयेत् ॥
शुक्लखण्डञ्च षट्को बलकृद्रोचनो गुरुः ।
विषमाग्निहरादीनि च श्लेष्मल पवनापह ।
राज्यक्तयाविरोधिण्या माषन्या तांस्तु भक्षयेत् ॥"
इति भावप्रकाशे कृतान्नवर्गे ॥

राज्याङ्ग, क्ली (राज्यस्य अङ्गम् ।) राज्यस्योपाय । तत्पर्य्याय । प्रकृति २ । तत्तु अष्टविध यथा । स्वामी १ अमात्य २ सुहृत् ३ कोष ४ राष्ट्रम् ५ दुर्गम् ६ बलम् ७ पौराणां श्रेणय ८ । इत्यमर । २ । ८ । १८ ॥ "स्वाम्यादय सप्त पुरश्रेणीक्रम्यैश्चयत राज्याङ्गप्रकृतिपदवाच्या । राज्य सप्ताङ्गम् । कस्यचिन्मते अष्टाङ्गमिर्भुजमपेव इष्यतम् । यदुक्त कामन्दकीये ।
स्वाम्यमात्यश्च राष्ट्रञ्च दुर्ग कोषो बल सुहृत् ।
परस्परोपकारीद सप्ताङ्ग राज्यमुच्यते ॥
पौरश्रेण्या सहाष्टाङ्गमपि राज्य प्रकीर्त्तितमिति । स्वाम्यादय सप्त परस्परोपकारित्वात् राज्यस्य अङ्गानि उपाया साधनानि राज्याङ्गानि यस्य कुर्व्वन्ति राज्यम् । प्रकृतय सप्तौकमात इत्युक्ते स्त्रि प्रकृति स्त्रियाम् । स्वामी राजा । अमात्यो मन्त्री । सुहृन्मित्रम् । स्वर्णादि भाण्डागार कोष । राष्ट्र जनपदस्थ भूमि । पर्व्वतादिदुर्गम पुर दुर्गम् । बल सैन्यम् । पौरश्रेणीवर्ग इति पुरसम्बन्धं प्राधान्यख्यापनाथम् ।" इति भरत ॥ ७ ॥ अपि च ।
"स्वाम्यमात्यो जनपदो दुर्ग दण्डस्तथैव च ।
कोषो मित्रञ्च धर्म्मज्ञ सप्ताङ्ग राज्यमुच्यते ॥
सप्ताङ्गस्यापि राज्यस्य मूल स्वामी प्रकीर्त्तित ।
तन्मूलत्वात्तथाङ्गानां राजा रक्ष्य प्रयत्नत ।
षडङ्गरक्षा कर्त्तव्या तथा तेन प्रयत्नत ।
अङ्गेभ्यो यस्तथैकस्य द्रोहमाचरतेऽल्पधी ।
वधस्तस्य तु कर्त्तव्य शीघ्रमेव महीक्षिता ॥"
इति मात्स्ये २२४ अध्याय ॥

राटि स्त्री, (राटयति परस्परमाक्रोशयत्यनेनेति । रट+णिच+इन् ।) युद्धम् । इति हेमचन्द्र । ३।४६२ ॥ (राटयतीति । रट भाषणे+स्वार्थे णिच्+इन् ।) शरारिपक्षी । इत्यमर । २ । ५ । ३५ ।

राटि स्त्री शरारिपक्षी । इत्यमर ।२।५।३५॥

राढ़क, पुं अश्वाभ्यन्तरेन्द्र । यथा —
"सन्धो मानवमीनौ च धनेस्नाभीवराढ़का ।"
इति ज्योतिस्तत्त्वम् ॥

राढ़ा, स्त्री, दस्त्र । शोभा । इति मेदिनी । ढे,२ ॥ इतीविदिक् । यथा ।
"गौड़ राष्ट्रमनुत्तम निरुपमा तत्रापि राढ़ा पुरी

भूरिश्रेष्ठिकनामधाम परमं तत्रोत्तमो न पिता ॥"
इत्यादि प्रबोधचन्द्रोदये दम्भवाक्यम् ॥

राढ़ीय, त्रि (राढ़ो निवासोऽस्य । राढ़+"वृद्धाच्छ ।" ४।२।११४। इति छ ।) राढ़देशोद्भव । यथा,—
"अपर्णाशाक्यमान दुह्यदमिति गीयते ।
राढ़ीयश्रीनिवासोक्त तन्मान स्थूलतोऽस्य तु ॥"
इति मलमासतत्त्वम् ॥

रात्र, क्ली ज्ञानम् । यथा,—
"रात्रञ्च ज्ञानवचन ज्ञान पञ्चविध स्मृतम् ।
तेनेद पञ्चरात्रञ्च प्रवदन्ति मनीषिण ॥"
इति नारदपञ्चरात्रे प्रथमरात्रे १ अध्याय ॥
(रात्रि । यथा, महाभारते । १२ ।१३६।११।
"प्रियप्रतिग्रहे चैव सद्य सूतकयोस्तथा ।
त्रीणि रात्राण्युपोषित्वा तेन पापाद्विमुच्यते ॥")

रात्रक, क्ली (रात्र ज्ञान तेन कायतीति । कै+क ।) पञ्चरात्रम् । इति मेदिनी । के १४६ ॥

रात्रक पुं एकवर्ष वेश्यागृहवासी । इति मेदिनी । के, १४६ ॥

रात्रि, स्त्री, राति ददाति कर्म्मभ्योऽवसर निद्रादि सुख वा । रा दाने+'राशदिभ्या त्रिप ।" उणा० ४ । ६७ । इति त्रिप ।) हरिद्रा । (यथा, सुश्रुते चिकित्सितस्थाने ९ अध्याये ।
"दार्व्वी कुष्ठ सुधा गोरिकन
रात्रिर्द्वाभ्यं चक्रमद्दस्य बीजम् ।
लक्षेकम्य तथ पिष्ट प्रयत्नो
दद्रुतो श्लक्ष्णकाद्योपयुक्त ॥")
एतद्दीयमर्थच्छिन्न सूर्य्यकिरणाभावच्छिन्नकाल । रात इति भाषा । तत्पर्य्याय । शर्व्वरी २ निशा ३ निशीथिनी ४ त्रियामा ५ क्षणदा ६ क्षपा ७ विभावरी ८ तमस्विनी ९ रजनी १० यामिनी ११ तमी १२ । इत्यमर ।१।४।४। वैयामा १३ घोरा १४ याम्या १५ शुद्धी १६ नक्तम् १७ दोषा १८ वासतेयी १९ तमा २० यमा २१ शताक्षी २२ चक्रिणी २३ निशीथ्या २४ चक्रभेदिनी २५ शार्व्वरी २६ श्यामा २७ वासुरा २८ निवद्दरी २९ । इति शब्दरत्नावली । उषा १ वासुरोषा ३१ निशीथ ३२ निट ३३ । इति जटाधर ॥ यामवती ३४ तारा ३५ भूषा ३६ ज्योतिष्मती ३७ तारकिणी ३८ कान्ती ३९ क्षपावती ४ । इति राजनिघण्ट ॥ ७ ॥ तस्या कारण यथा —
"यदा दिशु च भ्रमात् मेरोर्भूमेश्छादकोऽस्य ।
छायामवेक्ष्य रात्रि स्यात् तद्विपर्य्ययाद्दिनम् ॥"
इति ब्रह्मपुराणे स्वर्णरेखा नामाध्याय १०॥
विष्णुदैवत्यो रात्रियथा —
"सावित्र च मरीचाद्य विष्णुर्भ्यो तदहर्दिनम् ।
छन्दर्षे दिवं सौम्य युक्ते रात्रि प्रकीर्त्तिता ॥
वस्त्रैव ज्यादान्य दैवताद्य दिवारात्रम् ।
पलराशे दिवं सौम्यं रात्रिस्तु दक्षिणायने ॥"
इति ब्रह्मवैवर्ते प्रकृतिखण्डे २६ अध्याय ।

अथ रात्रिकृत्यम् । स्मृति ।
"पूर्व्वाहृविहित कर्म्म न कृत तत् प्रमादत ।
रात्रिस्तु प्रहर यावत् तत् कर्त्तव्य यथोक्तवत् ॥
नित्यानित्यानि कर्म्माणि प्रमादात् पतितानि च ।
शर्व्वर्य्या प्रथमे यामे तानि कुर्य्यादतन्द्रित ॥"
इति रत्नाकर ॥
याज्ञवल्क्याग्निरथौ ।
"उपास्य पश्चिमां सन्ध्यां हुत्वाग्नींस्तानुपास्य च ।
भृत्यै परिवृतो भुक्त्वा नातितृप्तोऽथ संविशेत् ॥
अग्निहोमोपासने सामिपरे । उपास्य वैति चकारो वैश्वदेवादिकं समुच्चिनोति । संविशेत स्वपेत् । तथा च विष्णुपुराणम् ।
"पुन पाकमुपादाय सायमप्यवनीपते ।
वैश्वदेवनिमित्त वै पत्न्या सार्द्ध बलि हरेत् ॥
अतिथिञ्चागत तत्र स्वशक्त्या पूजयेद्बुध ।
दिवातिथौ तु विमुखे गते यत् पातक भवेत् ।
तदेवाष्टगुण पुंसां सूर्य्योढ़े विमुखे गते ॥"
सूर्य्योढ़ सूर्य्ये अस्त गते सति । तथा,—
"तत्सम्पूज्यादिशेषेन्तु सुक्त्वा चाथ ततो गृही ।
गच्छेद्वस्फुटिता शय्यामपि दारुमयीं नृप ॥"
भोजने सायमिति याज्ञवल्क्यपरं प्राप्तुयात् । अथ रात्रौ शयनविधि । गति स्पर्शं सन्ध्या च न पानभोज्या सा च सूर्य्योदयात् पूर्व्वमुत्थानोभया । तथा च स्मृति ।
"भास्कराद्व्ययानि स्नानानिपातिकानि च ।
सूर्य्यादयोऽरियोगानि मध्यरात्रे वैश्यानि भाव्यम् ।
चार्क ।
"शुचौ देश विविक्ते च गोमयेनोपलेपिते ।
प्रागुदक्प्लवने चैव संविशेत्तु सदा बुध ॥
मङ्गल्य पूर्णकुम्भञ्च शिर स्थाने निधाय च ।
वैदिकैर्गारुडैर्मन्त्रै रक्षां कृत्वा स्वपेत्तत ॥"
गर्ग ।
"अगस्तिर्माधवश्चैव मुचुकुन्दो महाबल ।
कपिलो मुनिरास्तीक पञ्चैते सुखशायिन ॥"
मार्कण्डेयपुराणे ।
"प्राक्शिर शयने विद्यात् धनमायुश्च दक्षिणे ।
पश्चिमे प्रबला चिन्ता हानिमृत्युं तथोत्तरे ॥"
तथा ।
"नाधश्शायात्र विप्र कर्म्मापि सृतानि ।"
मार्कण्डेय ।
"शून्यालये श्मशाने च एकवृक्षे चतुष्पथे ।
महादेवगृहे चापि मातृवेश्मसु नो स्वपेत् ॥
यक्षनागायतने स्कन्दस्य भवने तथा ।
न चापि धान्यगोविप्रदेवगुर्व्वादिकोपरि ।
नाशुचिर्न च नग्नश्च न चोत्तरशिरास्तथा ।
नाकाशे सर्व्वशून्ये च न च चैत्यद्रुमे तथा ॥"
गरुडेऽपि तैल ॥ ७ ॥ अथ रात्रौ स्वप्नस्वप्रदर्शनम् । दृश्यन्त्व ।
"शोकहेतु भेदा कल्पिताह स्वप्नद च ॥
स्वप्नदर्शन रक्षाय सायकृत स्वपेत् ।"
कार्त्तवीर्य्यदतात्रेयकृष्णवर्णित ।

सन्निकर्षविधिना गच्छेत्। तत्र युग्मासु रात्रि-
ष्वपि पर्व्ववर्ज्जं ब्रह्मचार्य्येव भवति। अत्र प्रसादी
गच्छतो ब्रह्मचर्य्यस्खलनदोषो नास्ति इति
मिताक्षरा। विष्णुपुराणम्।
"अष्टमीममावास्यामपि पर्व्व चतुर्द्दशीम्।
मैथुनं नोपसेवेत शूद्रधीश्च मम प्रियाम्।"
हारीतः। "चतुर्थेऽहनि स्नातायां युग्मासु च
गर्भाधानवदुपेत ब्रह्मगर्भं सन्दधातीति।" अत्र
चतुर्थ्यां रात्रौ गर्भाधानमुक्तं तदयोनिरक्तो
बोध्यम्। रजस्युपरते साध्वी स्नानेन स्त्री रज-
स्वला। इति मनुवचनैकवाक्यत्वात्। साध्वी
गर्भाधानादिविहितकर्म्मयोग्यैव। स्नाता च
सद्य एव स्पर्शयेत्। इति तु दृष्टोपकारप्रतीतपरम्।
ऋतुकालेऽपि कामतोऽगमनमाह। विष्णुपुराणम्।
"स्तो नरकमभ्येति योषिदस्यापि चाश्रय।
परदाररति पुंसामुभयत्रापि भीतिदम्।
इति मत्वा स्वदारेषु ऋतुमत्सु बुधो व्रजेत्।
यथोक्तदोषहीनेषु सकामेष्वनृतावपि।"
पैठीनसिः। "स्नात्वा विश्वस्य चतुर्थ्यां पर्व्ववर्ज्जमन्य-
प्रति इदं ब्रह्मचर्य्यमिति यावत् स स्त्रिय उपा-
गृह्णीत वरं दास्यामि ततोऽस्याः स्तनीय प्रभ
स्तनाया प्रपद्यता स्त्रिय भक भूमिमेव यातय
चेतम्। आद्यो मघया तुष्टो वर प्रायच्छत भूमे
मित्यत्र इमा स्त्रियो हृतगर्भां प्रत्यो भवन्ति
कामेषु सभावत।" अमायो मैनम सभाव इति
यावत्। अन्यकाले कामावधूर्त्तो च। न तु प्रति
षिद्धपर्व्वाणि। तथा च गोतम। ऋतावुपेयात्
सर्व्वत्र वा प्रतिषिद्धवर्ज्जमिति। दुष्टकालमाह
ज्योतिषे।
"ज्येष्ठा मघा तथार्द्रा च रेवती हस्तिता
स्वाती।
अश्विनी च मूला च भरणी च शुभाः स्मृताः।"
इत्यत्र।
"स्त्री नारीं यो भार्य्यामृतुमती यस्तु गच्छति।
तुल्यासादृश्यया योनौ यत्र तिष्ठति।"
बौधायनोपसूत्रे गमनदोषाभिधानस्यानाया-
त्तिवत्। विष्णुः। नैवास्याः पत्नीं नेत्रं गच्छेत्
गच्छन् पत्नीं विदानुपपद्यतीति। इहुप्रासा
सन्।
"ऋतौ नोपेयात् भार्य्यां नामि अकाम्या
अपि।
प्रत्यक्षं विपद्येत न दारेष्वनुप्रमात्।"
ऋतुयाम् संकल्पादिकस्य यथाकम सन्ध्यायाः।
श्राद्धपर्व्वस्तु विविधमाह तु प्रवासिनो।
ऋतुस्नातां सदा दारान् परिहरेत् नार्थी
दिवामैथुनं प्रचेत् सौवास्तवीमाह दिवा
ह्यृदयेऽस्याः सर्व्वाहिन दिवसमैत्। प्रथा
कामत स्त्रियां भोगदोष सनु विशिष्यात्
प्रचेतसोऽप्येवाय सौनायतिको भवति यस्मात्
पतिष्ठाभाव प्रजया प्रतिष्ठेतेति। बौधस्त्री
निषेधे। तस्तु स्नातानां यच्छेदाय च्छिन्द्देराय
स्नाताचन्। येन प्रकारेण अप्रतिष्ठः प्रजा
उत्पन्नाः अप्राप्तप्रतिष्ठः सन् भवति तस्मात्
ऋतुस्नातायां यतितव्यमिति कल्पतरुः। एवञ्च
याज्ञवल्क्ये यदभिगमन प्राप्तकर्म्माद्युक्ततयाऽयन-
मात उक्तं मिताक्षरायां तद्धेयम्। मनुस्तु।
"शूद्रायां तु सवर्णेन मैथुनं योऽधिगच्छति।
यच्छान्न सह ते पुत्रा अधमा शूद्रवत्
स्थिताः।"
पराशरः।
"ऋतुस्नातां तु यो भार्य्यां सन्निधौ नोपगच्छति।
स गच्छेन्नरकं घोरं ब्रह्मघ्नेति तथोच्यते।"
सन्निधावित्यभिधानात् असन्निहितस्य गमना-
भावे न दोषः। पुत्रोत्पत्तिन अतस्तदभिगमन
नियममाह। कूर्म्मपुराणम्।
"ऋतुकालाभिगामी स्यात् यावत् पुत्रो न
जायते।
अजायकर्त्तव्ये हि पुत्रस्योत्पादनं प्रति।"
यतितव्यमिति शेषः। आपस्तम्बः।
"ऋतौ तु गर्भशङ्कित्वात् स्नानं मैथुनिन
स्मृतम्।
अनृतौ तु सदा कार्य्यं शौच मूत्रपुरीषवदिति।
द्वावेतावशुची स्यातां दम्पती शयनं गतौ।
शयनादुत्थिता नारी शुचि स्यादशुचि
पुमान्।
मैथुनस्य प्राक् मलमूत्रोत्सर्गं न कुर्य्यात्।
तैलाभ्यक्ते तथा वान्ते स्मश्रुकर्म्मणि मैथुने।
गन्धाचारं यदा कुर्य्याद्घोरात्रेण शुद्ध्यति।"
इति वचनात्।
पुत्रार्थिनो यदस्मर। सा यदि गर्भं नाद-
धीत सिंह्यिकायाः श्वेतपुष्प्याया उपोष्य
पुष्यनक्षत्रे मूलमुत्थाप्य चतुर्थेऽहनि स्नातायां
निशायामुदकेन पिष्ट्वा दक्षिणस्यां नासिकाया-
मासिञ्चति। इयमोषधी त्रायमाणा सह
माना सरस्वती। अस्या अहं बृहत्याः पुत्र
पितुरिव नाम जग्रभमिति इति। सा यदि
स्त्री ऋतुकालेऽपि स्ताभिगमना यदि गर्भं न
दधाति तदा उपोष्य पुष्ये नक्षत्रे श्वेतकण्ट-
कारिकामूलमुत्थाप्य चतुर्थेऽहनि ऋतुस्नातायां
रात्रौ जलसंपृक्तेन पिष्ट्वा दक्षिणनासापुटे
प्रति इयमोषधीरिति मन्त्रेण नस्यं दद्यात्
दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां गृहीत्वा प्राक्
शिर संविशाया इति शोभिककारकात्।
आयुर्वेदीये।
"पिप्पली शृङ्गवेरञ्च मरीचं नागकेशरम्।
आज्येन सह संयोज्य पिबेत् वन्ध्या प्रसूयते।"
मार्कण्डेयः।
"एवं गच्छन् स्त्रियं क्षामां मघां मूलाञ्च वर्ज्ज-
येत्।
सुस्थ इन्दौ सकृत् पुत्र लक्षण्यं जनयेत्
पुमान्।"
कामामात्राहारकोपवादिना। ब्रह्मवैवर्त्तम्।
अथ सम्भोगाधिकारतया प्रवासकरणका
नैव कुर्व्वीत न निर्गमादिहितकरणको निषिद्ध
कालाभिगमनमनन्तर दक्षिणपार्श्वे न कारयेत्।
पुत्रकामेन तु गर्भस्थितिरिति विशेषः। एवं।
"प्रदोषपश्चिमौ यामौ वेदाभ्यासेन तौ नयेत्।
यामद्वयं शयानस्तु ब्रह्मभूयाय कल्पते।"
इत्याह्निकतत्त्वम्॥ ॥
अथ रात्रिजागरणदोषगुणौ।
"रात्रौ जागरणं रूक्षं स्निग्धं प्रस्वपनं दिवा।
अरूक्षमनभिष्यन्दि त्वासीनप्रचलायितम्।
कफमेदोविषार्त्तानां रात्रौ जागरणं हितम्।
दिवा वा यदि वा रात्रौ निद्रा चात्मीयता
तु वै।
न तेषां स्वपतां दोषो जाग्रतां वा विधीयते।"
इति राजवल्लभः॥ ॥
रात्रौ कृष्णपूजा यथा। "अत्र।
रात्रावेव महापूजा कर्त्तव्या गौरवन्दिते।
न दिने सर्व्वथा कार्य्या ज्ञानवानिष शुक्रे।
मन्त्र पुन कृष्णपूजाविषयम्।
अष्टरात्रात् परं यत्र शुक्लपक्षेऽपि च।
या महारात्रिरुद्दिष्टा तद्गतमथवानु वै।"
इति तन्त्रसारः॥ ॥
अथ रात्रौ निषिद्धनिषिद्धे। छन्दोगपरिशिष्टम्।
'सुनिमित्तमयं प्रोक्तं विप्रायां गमकाभिर
विहतम्।
अहनि च तथा तमस्विन्यां षाड्गुणभर
यामाश।"
जावालिः।
'अत्र तु नियत पुण्याः कर्म्मानुष्ठानतो दिवा।
नक्तादिव्रतयोगे तु रात्रियोगो विधीयते।"
देवलः।
"राहुदर्शनसङ्क्रान्तिविवाहात्ययवृद्धिषु।
स्नानदानादिकं कुर्य्युर्निशि काम्यव्रतेषु च।"
ब्रह्माण्डपुराणम्।
"न रात्रौ प्राग्यं कुर्य्यात् राते वै दोषिकोपनात्।
तत्र निशाय वै कुर्य्यात् दिवा यत्नविधानम्।"
इति तिथ्यादितत्त्वम्॥ ॥
"एकभक्तेन नक्तेन तथैवायाचितेन च।
उपवासेन दानेन नैवाद्वादशिको भवेत्।"
स्कन्दपुराणम्।
"प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा।"
देवीपुराणम्।
"प्रदोषभोजनं यत्र स्नानमाकमुपाचरेत्।
अधिकार्म्मितयं प्रथमं चक्रमौ बहाचरेत्।"
एकादशीतत्त्वम्॥ ॥
देवलः।
"रात्रौ श्राद्धं न कुर्व्वीत राक्षसी कीर्त्तिता हि
सा।
सन्ध्ययोरुभयोश्चैव सूर्य्ये चैवाचिरोदिते।"
इति श्राद्धतत्त्वम्॥ ॥
विष्णुपुराणम्।
"प्रायश्चित्तं तथा सम्यगस्माहारादि संस्कृत।
नारायणमवाप्नोति सद्य कामवर्णं नरः।"
रात्रावग्निः स्नायाँ आत्मरो दीपवदमार।

यज्ञपुरायम्।
“दिवारात्रौ च सन्ध्यायां गङ्गायाञ्च प्रयत्नत ।
स्नात्वाश्वमेधजं पुण्यं गृहेऽप्युद्धृतसज्जले ॥”
रात्रिचराधिकारेऽपक्रम्य भारतपर्व्वणि ।
“अतो रात्रौ प्राप्नुवतो बलं यक्षविदो जना ।
मज्जयन्ति जनान् सर्व्वान् यज्ञस्थान् पुनतीनपि ॥”
तस्यार्थ्यनस्य प्रतिवचनम् ।
“समुद्रे हिमवत्पार्श्वे गङ्गायामस्थाय दुर्म्मते ।
रात्रावहनि सन्ध्यायां कस्य गुप्तं परिग्रह ॥”
इत्यादि ।
“महानिशा तु विज्ञेया मध्यस्थं प्रहरद्वयम् ।
तस्यां स्नानं न कुर्व्वीत काम्यनैमित्तिकादृते ॥”
अतएव कश्यप । न नक्तं स्नायात् इति बौधा यनवचनं रात्रिस्नानविषयम् । एवञ्च गङ्गा स्नानस्य निषादादिकर्त्तव्यताविशेषात् तत्र निमित्तादिविशेषस्यापि दिवारात्रिसम्बन्धि त्वाविशेष । इति प्रायश्चित्ततत्त्वम् ॥
(रात्रावाहारनियमो यथा,—
“रात्रौ च भोजनं कुर्य्यात् प्रथमप्रहरान्तरे ।
किञ्चिदूनं समश्नीयात् दुर्ज्जरं तत्र वर्ज्जयेत् ॥
शरीरे जायते नित्यं देहिनां सुरतस्पृहा ।
अजवाजाश्वमेदोवृद्धिं प्रियवतां तनौ ॥
नाबेति मीयते नारी यावद्वर्षाणि षोड़श ।
ततस्तु तरुणी ज्ञेया द्वात्रिंशत् वत्सरावधि ॥
तदूर्द्ध्वमधिरूढ़ा स्यात् पञ्चाशद्वत्सरावधि ।
वृद्धा तत्परतो ज्ञेया सुरतोत्सववर्ज्जिता ॥”
अधिरूढ़ा प्रौढ़ा ।
“निदाघशरदोर्बाला हिता विषयिणो मता ।
तरुणी शीतसमये प्रौढ़ा वर्षावसन्तयो ॥
हिनस्ति बाला सेव्यमाना नित्यं वर्द्धयते बलम् ।
तरुणी ह्रासयेच्छक्तिं प्रौढ़ोत्पादयते जराम् ॥
सद्यो मांसं नवान्नं च बाला स्त्री क्षीरभोजनम् ।
घृतमुष्णोदकं चैव सद्य प्राणकराणि षट् ॥
पूतिमांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि ।
प्रभाते मैथुनं निद्रा सद्य प्राणहराणि षट् ॥”
प्राणप्रसोऽत्र बलवाचक । बालार्कः अस्यारु ।
“वृद्धोऽपि तरुणीं गत्वा तरुणत्वमवाप्नुयात् ।
तरुणोऽधिकां स्त्रियं गत्वा तरुण स्थविरायते ॥
भाद्रपदे मध्वदरा वर्षैर्बलान्विता ।
शिशिरे पितशोधाय भवन्ति स्त्रीषु सक्तता ॥
हैमन्ते कामतः कामं वसन्ते ओजसो हि ते ।
प्रकामन्तु निषेवेत मैथुनं शिशिरागमे ॥
आहारवलसम्पन्नो यथाहृदविनिरावतो ॥”
इत्यादि ।
“निर्म्मिथ्यमिहनोभिर्हि अभेषात् प्रसरागम ।
बलेम्मुछ बलेषु पथात् पथाद्रसेषु ॥”
बलेवान् बहुत्वेन धर्म्मो पीढ़ ।
“रात्रे रात्रौ दिवा धीमान् वसन्ते तु दिवा-
पिछि ।
कर्म्मि वारिदच्छाने सरलात् वदेत् शर ॥
कर्म्मित्त् इतरा नारी कम्पयेच न पर्व्वसु ।
शोणिते चाहरात्रे च तथा सम्बदिनेऽपि च ॥
विहार भार्य्यया कुर्य्यात् दिवोऽविवर्ज्जते ।
रम्ये अथाश्रमावासे सुगन्धे सुसमाहते ॥
देशे गुरुजनावासे विवर्त्तेऽविमतान्तरे ।
भूयमाशे यथाहितुपयने न रमेत ना ॥
स्नातचन्दनलिप्ताङ्ग सुगन्धं सुमनोऽन्वित ।
भुक्तवृष्यं सुवसन सुवेश समलङ्कृत ॥
ताम्बूलवदन पत्न्यामनुरक्तोऽधिक स्मर ।
पुत्रार्थी पुरुषो नारीमुपगच्छेत् शुभे ।
अत्यादिक्तोऽपि क्षुधार्त्त अधवापि पिपा
सित ॥
बालो वृद्धोऽन्यवेगार्त्तस्त्यजेद्रोगी च मैथुनम् ॥”
रोगी मैथुनस्य बहुनीयरोगयुक्त ।
“भार्य्यां रूपगुणोपेतां तुल्यशीलां कुलोद्भवाम् ।
अभिकामोऽभिकामान्तु हृष्टो हृष्टामलङ्कृताम् ॥
सेवेत प्रमदां युक्त्या वाजीकरणबृंहित ।
रजस्वलामकामाञ्च मलिनामप्रियामपि ॥
वयवृद्धां वयोवृद्धां तथा व्याधिप्रपीड़िताम् ।
हीनाङ्गीं गर्भिणीं द्वेष्यां योनिरोगसमन्विताम् ॥
सगोत्रां गुरुपत्नीञ्च तथा प्रव्रजितामपि ॥
नाभिगच्छेत् पुमान्नारीं भूरिवैगुण्यमूहया ॥”
“प्रात सम्भवेत् चौरं भस्मैतद्धनरक्षकम् ।
नातो मांसरसं स्वप्नं सुरतान्ते हिता अमी ॥
भूरुद्धासन्ववेशकायपाकामवयव ।
अतिव्यवायाच्छायन्ते रोगाश्चाक्षेपकादय ॥
रात्रौ जागरणं रूक्षं स्निग्धं प्रस्वपनं दिवा ।
निद्रा तु सेविता काले धातुसाम्यमतन्द्रिताम् ॥
पुष्टिवर्णबलोत्साह वह्निदीप्तिं करोति च ॥”
इति भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ॥)
तत्पर्य्याय । शर्व्वरी १ निशा २ क्षणदा ३ क्षपा ४ त्रियामा ५ यामिनी ६ तमी ७ तमस्विनी ८ विभावरी ९ रजनी १० यामिनी ११ तमी १२ तमस्विनी १३ ज्योत्स्नी १४ निशीथिनी १५ श्यामा १६ विभावरी १७ दोषा १८ नक्तं १९ इरा २० क्षप २१ तमा २२ वसती २३ । इति शब्दरत्नावली । इति हेमचन्द्र ।
१ । ७ । (औषधीविशेष । यथा, माघ । ११२ । ८० ।
“तुलाकोटेर्दृष्टास्तु प्रतिपदं मता युक्ता ।
गौरी कुसुरतो चैव सम्बा रात्रिर्मोचका ॥”)

रात्रिकर, पुं (रात्रिं करोतीति । कृ+ट ।) चन्द्र । इति हेमचन्द्रे दिवाकरशब्ददर्शनात् । (कर्पूर । इत्यमर । २ । ६ । १३० ।)

रात्रिचर, पुं, (रात्रौ चरतीति । “चरेष्ट ।” ३।२।१६। इति ट । “रात्रे कृति विभाषा ।” ६।३।७२। इति पक्षे मुमभाव ।) राक्षस । इत्यमर । १।१।६१ । रात्रौ भ्रमणकर्त्तरि त्रि ।

रात्रिचरी, स्त्री, (रात्रिचर+स्त्रियां ङीष् ।) राक्षसी । यथा माघे । २ । ३१ ।
“न विमर्द्दं क्षणदा चरो
नाथं यत् रात्रिचरी कुरोदै ।
विषोदहेद्द नवाहराव
सं ताड़काख्या विषयादथ राम ॥”

रात्रिजल, स्त्री, (रात्रेर्जलम् ।) कुज्झटिका । इति शब्दमाला ।

रात्रिजागर, पुं (रात्रौ जागर्त्तीति । जागृ+ अच् ।) कुक्कुर । इति हेमचन्द्र । रात्रौ जागरणकर्त्तरि, त्रि ।

रात्रिजागरद, पुं, (रात्रौ जागरं जागरणं ददातीति । दा+क ।) मशक । इति राज निर्घण्ट ।

रात्रिचर पुं (रात्रौ चरतीति । चर्+ट । “रात्रे कृति विभाषा ।” ६।३।७२। इति मुम ।) राक्षस । इत्यमर । १।१।६१ । (स्त्रियां ङीप् । रात्रिचरी ।) रात्रौ गमनकर्त्तरि त्रि ।

रात्रिपुष्प, स्त्री, (रात्रौ पुष्प्यति विकाशते इति । पुष्प+अच् ।) उत्पलम् । इति राजनिर्घण्ट ।

रात्रिमट, पुं, (रात्रौ अटतीति । अट+अच् । “रात्रे कृति विभाषा ।” ६ । ३ । ७२ । इति मुम ।) राक्षस । इति त्रिकाण्डशेष । रात्रौ गमनकर्त्तरि, त्रि ।

रात्रिमणि, पु, (रात्रेर्मणिरिव ।) चन्द्र । इति धाराणशी । १६ ।

रात्रिवास, [स्] स्त्री (रात्रेर्वासो वस्त्रमिव ।) अन्धकार । इति शब्दमाला । रात्रौ प्रवर्त्तनीयपरिधेयवस्त्रम् । यथा । काशी खण्डे । उत्थाय सुखात्राय रात्रिवासकलाप्य प्रियाय वसनदक्षमनाप्यलिप्य नीतवर्ण शिशुर्व शरा भवकर नित्यमास्यानुवेषर्य स्वच्छाम्बरं स्नानमन्त्रितरत्नमन्त्र गुरुकाशख्यका नाशर्वं शुचं विभाय मानवोपचारैराराध्य प्रम स्तुर्य्यात् । इति तत्त्वसार । अपि च ।
“प्रवरस्नानकाले च रात्रिवासो त्यजेत् तदा ।
अन्नामर्दं कुर्य्यात्र स्नानैर्न जम्बुभोजनम् ॥”
इति कर्म्मलोचनम् ।

रात्रिविश्राम पुं (रात्रेर्विश्रामो यत्र ।) प्रभा तम् । इति शब्दमाला ।

रात्रिविश्लेषगामी, [न्] पुं, (रात्रौ विश्लेषं विश्लेषं गच्छतीति । गम्+णिनि ।) चक्र वाक । इति राजनिर्घण्ट ।

रात्रिवेद, पुं (रात्रिं रात्रिवेदिं वेदयति इति वेति । विद्+णिच्+अच् ।) कुक्कुट । इति शब्दरत्नावली ।

रात्रिवेदी, [न्] पुं, (रात्रिं रात्रिवेदं वेदयति करोतीति । रात्रि+विद्+णिच्+णिनि ।) कुक्कुट । इति त्रिकाण्डशेष ।

रात्रिहास, पुं (रात्रेर्हास इव शुभ्रत्वात् । रात्रौ हासो विकाशो यस्य इति वा ।) नीलोत्पलम् । इति शब्दरत्नावली ।

रात्रिहिण्डक, पुं (रात्रौ हिण्डते भ्रमति अन्तःपुर मध्ये अवश्यमिति । हिण्ड्+ण्वुल् ।) अन्तः पुररक्षक । इति शब्दरत्नावली ।

रात्री, स्त्री, (रात्रि+कृदिकारादिति ङीष् ।) निशा । इत्यमरटीकायां भरत । (यथा, ऋग्वेदे । १ । ११५ । १ ।

राधानामोच्चारणानन्तरं कृष्णनामोच्चारण-विधिर्यथा —

नारद उवाच ।

"आदौ राधां समुच्चार्य पश्चात् कृष्णं विदुर्बुधाः ।
निमित्तमस्य मां भक्त वद भक्तजनप्रिय ॥

श्रीनारायण उवाच ।

निमित्तमस्य त्रिविधं कथयामि निशामय ।
जगन्माता च प्रकृतिः पुरुषश्च जगत्पिता ॥
गरीयसीति जगतां माता शतगुणैः पितुः ।
राधाकृष्णेति गौरीशेत्येवं शब्दः श्रुतौ श्रुतः ॥
कृष्णराधेशगौरीति लोके न च कदा श्रुतः ।
प्रसीद रोहिणीचन्द्र गृहाणार्घ्यमिदं मम ॥
गृहाणार्घ्यं मया दत्तं संज्ञया सह भास्कर ।
प्रसीद कमलाकान्त गृहाण मम पूजनम् ॥
इति दृष्टं सामवेदे कौथुमे मुनिसत्तम ।
राशब्दोच्चारणादेव स्फीतो भवति माधवः ।
धाशब्दोच्चारतः पश्चाद्धावत्येव ससम्भ्रमः ॥
आदौ पुरुषमुच्चार्य पश्चात् प्रकृतिमुच्चरेत् ।
स भवेन्मातृगामी च वेदातिक्रमणे श्रुते ॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ५२ अध्यायः ।

तस्या निन्दायां दोषो यथा —

"ये वा द्विषन्ति निन्दन्ति पापिनश्च हसन्ति च ।
कृष्णप्राणाधिकां देवीं देवीं च राधिकां पराम् ॥
ब्रह्महत्याशतं ते च लभन्ते नात्र संशयः ।
तत्पापेन च पच्यन्ते कुम्भीपाके च रौरवे ॥
तत्रैव महाघोरे भ्रान्तिं कोटिं च वत्सरान् ।
चतुर्दशेन्द्रावच्छिन्नं तिष्ठन्ति सततं ध्रुवम् ॥
ततः परमधान्यानां नरके कोटियोनिषु ।
दिव्यं वर्षसहस्रञ्च विष्ठाकीटाश्च पापिनः ॥
पुरीषकीटा भविष्यन्ति कोटिशः शतजन्मसु ।
मलकीटाश्च भल्लातकाश्च पूर्वभवकाः ।
यदि च भारतवासायामिन्नाह कमलोद्भव ॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ८० अध्यायः ।

राधास्वरूपं यथा,—

यशोदोवाच ।

"हरौ च निश्चला भक्तिर्दास्यं वाञ्छितं मम ।
तव माधवं कुर्वन्ति का वा त्वं वक्तुमर्हसि ॥

राधिकोवाच ।

मद्भक्तिर्निश्चला ते च हरिदास्यं च दुर्लभम् ।
लभस्व सर्वमाप्ति कथयामि रहस्यकम् ॥
पुरा गर्गेण दत्तं च गोकुलं वटमण्डले ।
मया च कथिता सन्ती विशिष्टा ब्रह्मेश्वर ॥
अहमेव स्वयं राधा छाया रायाणकामिनी ।
रायाणः श्रीहरेरंशः पार्षदप्रवरो महान् ।
रासमण्डले शङ्खोद्भवानि यत्र गोमती ।
निष्कारणं निर्लिप्ता सा धात्री मायया च ॥
धात्री मातापि सदेवी मूलप्रकृतिरीश्वरी ।
तेन राधा समाख्याता हरिणा च पुरा बुधैः ॥
अहं श्रीदाममातेव वृषभानुसुतानुगा ।
स्वदेहतः विचेष्टा कथिता यत् पापकम् ।
वृषभानुश्च सम्पूर्णः पापदाग्नौ महान् ।
पितृणां मानसी कन्या मम माता कलावती ॥

अयोनिसम्भवा देवी मम माता च भारती ।
पुनः पाहि च पश्यामि वासामि गोष्ठे धनम् ॥
इति ते कथितं सर्वं गच्छ गच्छ व्रजेश्वरि ।
व्रजेश्वरेण सहिता ज्ञानिना ज्ञानिनां सति ॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ११० अध्यायः ।

राधामाधवयोरभेदो यथा,—

मार्कण्डेय उवाच ।

"किं वा ग्रन्थं करिष्यामि त्वां राधे मङ्गलां सताम् ।
गता ते विरहज्वाला श्रीदाम्नः शापमोक्षणे ।
सततं तस्मात् प्राप्य स्वयैव सति ते तथा ।
न क्षीणमायया ह्यस्याः प्रकृतिपुरुषयोर्यथा ॥
ये त्वां निन्दन्ति मूढात्मानस्तव श्यामापि मामपि ।
कुम्भीपाके च पच्यन्ते यावच्चन्द्रदिवाकरौ ॥
राधामाधवयोर्भेदं ये कुर्वन्ति नराधमाः ।
वंशहानिर्भवेत्तेषां पच्यन्ते नरके चिरम् ॥
यान्ति शूकरयोनिं च तिष्ठन्ति शतकं समाः ।
षष्टिं वर्षसहस्राणि विष्ठायां कृमयस्तथा ॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे १२१ अध्यायः ।

गोलोके तस्या आश्रमो यथा,—

"एतान् मनोरमान् दृष्ट्वा ते देवा गमनोन्मुखाः ।
जग्मुः श्रीमं कियद्दूरं ददृशुः सुन्दरं ततः ॥
आश्रमं राधिकायाश्च राधिकायाश्च नारद ।
देवाधिदेव्या गोपीनां वराया वरनिर्मितम् ॥
प्राणाधिकायाः कृष्णस्य रम्याद्रम्यं मनोहरम् ।
सर्वाग्निर्मयैर्मणिभिः श्रेष्ठैः विनिर्मितम् ॥
सुपारं वर्तुलाकारं षड्योजनप्रमाणकम् ।
शतमन्दिरसंयुक्तं ज्वलितं रत्नतेजसा ॥
अमूल्यरत्नसारायां परैर्नैरचितं वरम् ।
दुर्लङ्घ्याभिर्गभीराभिः परिखाभिः सुशोभितम् ॥
कल्पवृक्षैः परिवृतं पुष्पोद्यानशतान्तरम् ।
मणीन्द्रसारखचितप्राकारैः परिवेष्टितम् ॥
सप्तरत्नप्रकाशुक्तैः द्वारैरेव सुशोभितम् ।
संयुक्तं रत्नचित्रैश्च विचित्रैर्मङ्गलैर्युतैः ॥
प्रधानद्वारसप्तस्य क्रमशः क्रमशो मुने ।
सर्वेषोऽपि तत्स्थानं षोडशद्वारसंयुतम् ॥
दृष्ट्वा दृष्ट्वा च प्राकारं सप्तसमुच्छ्रितम् ।
मध्यरत्नकलशमण्डेः सुमनोहरम् ॥
सुन्दरैः तैलवर्णैः रम्यं परमं विस्मयं ययुः ।
तत्र प्रदक्षिणीकृत्य कियद्दूरं ययुर्मुदा ॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ४ अध्यायः ।

तस्या जन्मतिथिर्यथा,—

"भाद्रस्य शुक्लपक्षे तु हरिवासराष्टमी यदा ।
तस्यां परे तु या शुभ्रा तस्यां जाता हरिप्रिया ॥
वृषभानुपुरी नाम्ना सर्वरत्नमयी शुभा ।
सुमनसमिदाभ्यन्तरविचित्रमयवाङ्गणा ॥
खण्डितान्योन्यसौभाग्य रत्नसम्मोदना ।
विमलवसनाढ्या दर्शनीया चित्रविभूषिता ॥
चिदानन्दमयैश्चानन्दा च चिदानन्दप्रदायिनी ।
आनन्दकर्त्री माता च तिष्ठति सर्वदा ॥
दिव्यमाणिक्यसौख्यास्तरचित्रकाननरा ।
नानावैभवविधिनाढ्या प्रमदामोदवर्द्धिनी ॥

सर्वेश्वर्यसम्पन्ना राधा नाम्ना विनोदिनी ।
जगतां मोहिनी देवी सुन्दरसुन्दरीसुन्दरी ॥
पुरातनमतस्यैव न कथं मुनिसत्तम ॥

नारद उवाच ।

प्रणिपत्य महाभाग पृच्छामि त्वं विभुः ।
का लक्ष्मीः किं सुरवधूः सम्भवा, मया लोके ॥
विद्या किमनन्तरूपा चैतन्यश्रीः प्रकृतिः शिव ।
वेदकन्या देवकन्या मुनिकन्या वद ॥

सदाशिव उवाच ।

कोटिकोटिमहालक्ष्मीलक्ष्मीः का वा परा परा ।
निन्दिता यत्पदाम्भोजे कथिता मुनिसत्तम ॥
अपरं किं निगद्यामि कस्तुम नारद ।
श्रीराधारूपलावण्यगुणादीनां बहुमतम् ॥
तत्र यान्ति मायाया कोऽपि च ज्ञानि नारद ।
त्रैलोक्ये तु समर्थाश्चित्रं न मातु बहुमतम् ॥
तद्दिव्यरूपमाधुर्यं महाश्चर्यमनोहरम् ।
ब्रह्मनन्दसुतोऽपि त्वां वक्तुं नास्ति मे मनः ।
तस्य कमला राधा यस्याः सा नाथवती मता ।
एवं प्रवक्ष्याम्यामीश्वरी राधिका परा ॥

नारद उवाच ।

प्रभो श्रीराधिकानामसहस्रं वर्मितं परम् ।
तच्च श्रोतुमिच्छामि समस्तं भक्तवत्सल ॥
कथितं मे महाराज प्रभावं महोत्तमम् ।
ध्यानं वा कीदृशो पूजा स्तुतिश्चापि परत्र मे ॥
तत्सर्वं श्रोतुमिच्छामि कथयस्व मे सदाशिव ।
चर्या पूजाविधानञ्च विशिष्टमर्थं भव ॥
यत्र मन्त्रं स्तुतिश्चापि पूजनं वा निर्मितम् ।
पूजा किं विधानं च तत्पूजार्थे विधौ ॥

शिव उवाच ।

वृषभानुपुरे राजा वृषभानुर्महायशाः ।
महाकुलप्रसूतोऽसौ सर्वशास्त्रविशारदः ॥
महायशा धनी श्रीमान् विभाति वैभवः ।
वेदमन्त्रकृतं कृपीन सर्वदैव च ॥
तस्य भार्या महाभागा श्रीमती कीर्तिदाख्यया ।
रूपयौवनसम्पन्ना महाराजकुलोद्भवा ॥
महालक्ष्मीसदृशा या भद्रा परमसुन्दरी ।
महापतिव्रता कान्ता सर्वविद्यागुणान्विता ॥
तस्यां श्रीराधिका जाता श्रीमद्वृन्दावनेश्वरी ।
भाद्रे मासि सिताष्टम्यां मध्याह्ने कृष्णवल्लभी ॥
वेदागमपुराणादिप्रोक्ता या सर्वदा ।
यदा तत्रैव जाता श्रीमद्वृन्दावनेश्वरी ॥
अद्य मासे महाभाग पूजनं सर्वथा तथा ।
भाद्रे शुक्लाष्टमीं राधाजन्मदिनोत्सवम् ॥
अस्यैव मन्त्रं राधा जगदम्बपरायणम् ।
तत् सर्वं प्रवक्ष्यामि यथाशक्ति सुरासुरान् ॥
सर्वदा भक्तिपरैः श्रीराधाजन्ममन्दिरे ।
अन्नपानादिकञ्चकलाकालोरसादिभिः ॥
नानारत्नप्रचण्डैश्च विचित्रैः प्रावृतैः ।
सुवासितसुपुष्पैश्च पूर्णकुम्भैश्च ॥
मध्ये पञ्चवर्णैः पूर्णैः मण्डपं मनोहरम् ।
षोडशस्तम्भाकारं तत्र निर्माय यत्नतः ॥
दिवसे तु पञ्चमे पञ्चवर्णात्मिका क्रियाम् ।

श्रीगुरुमूर्त्तिं तथास्य ध्यानपाद्यादिभि क्रमात् ।
भक्त्या सह तथासीये प्रथ्याशुघारवस्तुभि ।
सङ्गत्य पूजयेद्भक्त्या तां सदा यतेन्द्रिय ।”
अथ ध्यानम् ।
“देवेन्दीवरकान्तिमञ्जुलतर श्रीमज्जगन्मोहनं
नित्याभिर्ललितादिभि परिवृतं सन्नीलपीता-
म्बरम् ।
नानाभूषणभूषणाङ्गमधुर कैशोररूप युगं
गान्धर्व्वाजनमयय सुललित नित्य प्ररम्य भजे ।
कुमान्निर्मिति ध्यात्वा मानसैरुपचारैः पुन ।
साक्षात् शैलादिमूर्त्तौ वा मनोरम्यां समर्च्चयेत् ।
ततो मन्त्रकपूजाञ्च तयो सम्मुरुत क्रमात् ।
कुर्य्यादन्ते प्रयत्नेन ध्यानपाद्यादिभि सदा ।
ललिता पश्चिमे पूज्या पीतवर्णदलेऽपरा ।
चन्द्रावली शुक्लदले तद्वामे पूजयेत सुधी ।
वायव्ये श्यामला देवीं कृष्णवर्णदलेऽर्च्चयेत् ।
तद्वामे चित्ररेखाख्या शुक्लवर्णदले तत ।
उत्तरे श्रीमती लभ्या रक्तवर्णदले तथा ।
तद्वामपार्श्वे चन्द्राख्या नीलवर्णदलेऽर्च्चयेत् ।
रक्तवर्णदलेऽभ्यर्च्या ईशाने श्रीहरिप्रिया ।
तस्या वामे शुक्लदले पूज्या मदनसुन्दरी ।
पीतवर्णदले पूर्व्वे विशाखामर्च्चयेत्तत ।
प्रियां तस्या वामपार्श्वे शुक्लवर्णदलेऽर्च्चयेत् ।
आग्नेय्यां श्यामवर्णा दले सख्या समर्च्चयेत ।
तद्वामे श्रीमधुमतीं शुक्लवर्णदलेऽर्च्चयेत् ।
पूजयेद्दक्षिणे पद्मां रक्तवर्णदले तथा ।
प्रियंरेखाञ्च तद्वामे नीलवर्णदलेऽर्च्चयेत् ।
पूजयेन्नैर्ऋते भद्रां रक्तवर्णदले तत ।
रसप्रियाञ्च तद्वामे शुक्लवर्णदलेऽर्च्चयेत् ॥ ० ॥
श्रीराधाप्रियसङ्गिनीं विधुमुखीं कृष्णप्रियां
प्रेयसीं
हेमाभां परिचारिणीं सुमधुरध्यानां सुवेशां
वराम् ।
मदनाभरणैर्मनोहरतनुं नित्यां जगन्मोहिनीं
वन्दे श्रीललितां कुरङ्गनयनीं पीताम्बरेणाव्र
ताम् ॥ १ ॥
श्यामां श्यामपरायणां वरतनुं चामीकराङ्ग
च्छटां
मञ्जीरैर्मधुरध्वनिं परिलसद्वक्त्राम्बुजां सुस्वराम् ।
नवनाभरणां सरोजनयनीं शुक्लांशुकेनावृतां
ध्यायेत् श्रीललितासखीं सुचिबुकां चन्द्रावलीं
सुस्मिताम् ॥ २ ॥
कान्त्या काञ्चनसन्निभां सुनयनां कृष्णाम्बरं
बिभ्रतीं
नानाभूषणमञ्जुलाञ्च सुदतीं माद्यत्प्रियां सुन्द
रीम् ।
श्रीकृष्णादिनिषेवितां प्रियसखीं भजे सदाहं
वरां
देवीं चारुविलासयानगमनां नित्यं भजे
श्यामलाम् ॥ ३ ॥
श्रीमच्चम्पकसमां दाडिमीबीजदन्तां
चित्रां

शुद्धस्वर्णरवैरकान्तिमतुलां शुभ्राम्बरैरावृताम् ।
सर्वाद्याभरणां सदा पुलकिनीं श्रीकृष्णभावेन वै
गायन्तीं मधुरस्वरैरविरतं श्रीचित्रलेखां
भजे ॥ ४ ॥
कनकनिभशरीरां बिभ्रतीं रक्तवस्त्रं
ललिततिलकनेत्रां चारुभूषाङ्गशोभाम् ।
सुमधुरपिकवाणीं चञ्चलाक्षीं सुवेशां
मधुरिपुनिजदासीं श्रीमतीं तां हि वन्दे ॥ ५ ॥
वृन्दावनेश्वरिनिजप्रियसौख्यदात्रीं
रम्यां सुनीलवसनां सुरवाद्यवन्द्याम् ।
नानाविभूषिततनुं स्फुरदिन्दुवक्त्रां
चन्द्रां भजे सकलरागमनोज्ञगानाम् ॥ ६ ॥
सुवर्णवर्णां शुकधारिणीं तां
सुधाङ्गयष्टिं मणिभूषणाङ्गीम् ।
हरिप्रियां मञ्जुलपद्मनेत्रां
भजेऽहमीशां कनकाङ्गशोभाम् ॥ ७ ॥
रत्नाङ्कनान्तिनीं सकलरागसमाधिनीं
सुचारुमणिकुण्डलां प्रवरपुष्पचन्दनाम् ।
सुरत्नवरभूषणां रुचिरशुभ्रपट्टाम्बरां
भजे मदनसुन्दरीं कनकवर्णदेहां शुभाम् ॥ ८ ॥
सुतानयां गीते भ्रमरकुलकण्ठीं सुचतुरां
चारन्त्यां विमलनिजनयनामिन्दुवदनाम् ।
विशाखां गौराङ्गीं कलितमुरलीं पीतवसनां
भजे श्यामां सखीं सकलगुणपूर्णां सुखमयीम् ॥ ९ ॥
सुचामीकराभूषणाढ्यां सुवस्त्रां
सुसङ्गीतविद्यासुधीरां वरेण्याम् ।
सुवंशीसुगानां सुरम्याङ्गशोभां
भजे श्रीप्रियां शुक्लवस्त्रां मनोज्ञाम् ॥ १० ॥
गान्धर्व्वां निकटाश्रितां सुनवयामयैक सदा
बिभ्रतीं
मञ्जुस्वनविभूषितां वरतनुं पादोज्ज्वलैः
वराम् ।
ध्यायेत कृष्णपदारविन्दमधुपीं कृष्णामरामा
कृतां
सङ्गीते मधुरस्वरामविरतं सेव्यां मनोहारि
णीम् ॥ ११ ॥
देहेऽरसमुमतीं तां तप्तचामीकराभां
विकचकमलवक्त्रां शुभ्रवस्त्रां दधानाम् ।
निजकुसुमसुमालां चारुवेशाङ्गभूषां
युगलचरणसेवातत्परामाश्रयेऽहम् ॥ १२ ॥
रमानूपुरदेहां विकचकुसुमश्रीलावण्य
रूपे
भद्रां सङ्गीतविद्यासुन्दरिकां नानमानादि
विद्याम् ।
माद्यद्वीणकमानां कनकविमलतनुं सर्वेन्द्र
देवीं
वन्दे मुदा सर्वदा प्रवरवर्णां बिभ्रतीं रत्न
भूषाम् ॥ १३ ॥
दाडिमीदन्तशोभां मदनरमणीं सुन्दरीं ।
रत्नाभरणदानाञ्च रत्नदिव्याङ्गनाम् ॥ १४ ॥
भजे श्रीहरिप्रियां सुमनसां कलादि
मानेश्वरीं

वन्देऽहं मधुरस्वरां परमिकां लावण्यसारा
न्विताम् ।
नानावर्णविभूषणां वरतनुं पट्टाम्बरेणावृतां
फुल्लेन्दीवरलोचनामविरतं ध्याये व्रजस्थो
चिनीम् ॥ १५ ॥
श्रीधर्म्म घनमेवर्च्च कनकं गात्रे सदा बिभ्रतीं
पीनाङ्गीं मधुरस्वरां सुललितां सत्यस्वभावान्विताम् ।
रासक्रीडनचर्च्चितां विभूषणवरैरङ्गे सदा शोभितां
ध्याये श्रीगुणशालिनीं परमिकां ज्ञानेश्वरीं
वराम् ॥ १६ ॥
राधाकृष्णपदारविन्दमधुपीं सद्भक्तिसंसाधिनीं
नानाभूषणभूषिताङ्गरुचिरां पट्टस्त्रिया
शुभाम् ।
ध्याये सन्ततकृष्णभावललितां केयूरहारान्वितां
सर्वाङ्गीं रसप्रियां सुरमयीं सर्वाङ्गशोभा
न्विताम् ॥ १७ ॥
मधुमत्तकोकिलभृङ्गगान ।
मधुपरीक्षकविदारिणीं च ।
कनकाभा शुभ्रसुवसना
भजे हरिदासङ्गमधुशोभाम् ॥ १८ ॥
एवं ध्यात्वा पूजयित्वा ललिताद्या यथाक्रमात् ।
पाद्यादिभि चोपचारैर्विधिवद्विलिखन्मुदा ।
अष्टौ ललिताद्यास्ता दत्वाम्यर्चितो शुभे ।
प्रवरादिसमोऽन्येन संप्रदायपरेण वै ।
ततस्ताश्च तु मन्त्रा पूज्यमाना विभिन्नैः ।”
इति पाद्मे उत्तरखण्डे श्रीराधाकृष्णमहोत्सव
कथनमाहात्म्यं नाम १६८ अध्याय ।
श्रीवाराह उवाच ।
“प्रह्लादेऽथ पूजयेद्रे समताश्रु रत्नैः ।
यत्र नाम्ना कथते नानाप्रतिमाधिष्ठ दत्तम् ।
इन्दुमुखी रमणा च सुभद्रा सुहासी तथा ।
मञ्जरी चन्द्रिका चारुचतुरा च सुवर्णा ।
मधुरा कलकण्ठा तथा मधुरभाषिणी ।
विलासिनी रमणी तथा कमललोचना ।
सुखदा चन्द्रकलिका रतिदा रसमञ्जरी ।
तथा सुमञ्जरी शोभा चम्पा चम्पकमालिनी ।
चन्द्रिनी मालती चारुी चन्द्रकान्ती सुमध्यमा ।
रम्भा भ्रमरगम्भीरा सुशीला च सुकेशिनी ।
कामकला सुधामुखी चित्रा च कौमुदिका ।
सुकप्रिया मधुकरी रसिका चारुमोहना ।
सुकोरकमा इन्दा मान्दोलिन्दा शुभा ।
चन्द्रमरा रञ्जका मन्दरा हासवती ।
मानकुमुदी नारायणी कुन्तलमाधवी ।
केशरी चित्ररेखा च नवकाञ्चनमा तथा ।
मन्दाकिनी चौडिनी च कोमलाङ्गी कुन्दवती ।
देवकुमारी मञ्जरी च कुञ्जरवती ।
कवेलमालिका कादम्बा च किङ्किणी ।
रसावती कुमुदा च कमला च मरन्दा ।
नित्योत्सवा च चारुहासा वसुधा, निरानन्दी ।
सुलक्षणा विनोदिनी सुभगा कौमुदिनी ।
चन्द्रकान्ती विचारजी श्रीदेवी रङ्गनन्दनी ।
देवदासीच रङ्गदेवी चन्द्रमुखी ।

कुसुम्भप्रिया च सानन्दा तथा कृष्णविलासिनी ।
चित्रांशुकी हारकण्ठी चित्रमध्या सुलोचना ।
नन्दिनी नन्दकलिका सुनन्दा नन्ददायिनी ।
कुन्दाभा च सुगौराङ्गी केलिलोला प्रियम्वदा ।
श्यामाराध्या श्याममध्या कामदा मानभञ्जिनी ।
विचित्रवसना रासक्रीडा मञ्जुकिङ्किणी ।
विलम्बरा मञ्जुनादा तथा रासविहारिणी ।
गीतवाद्यविधौ पूज्या यत्नात् भक्तावली तथ ।
ध्यानमात्रादिभि सम्यक्‌कारस्य च पूजके ।
शोभाभा मधुरस्वरा विधुरस्त्री गान्धर्वविद्या
रता ।
नानालङ्कारभूषिताङ्गमधुरा आभीरसुभ्रूलोचना
योगावसानुसारिणी वरतनु चिन्तामणि बिभ्रती
ध्यायेत् लक्षपरायणा सुचिपुना चन्द्रावली
सङ्कुलाम् ।
एवं राधाजन्मतिथौ कृष्णाष्टकलपूजनम् ।
कार्त्तिकेन वैष्णवान् धर्मान् यत्नेन परि
पूजयेत् ।
एवं राधाष्टपूजां तयोर्मैत्रकपूजनम् ।
प्रत्यब्दं यत्नत कुर्य्यात् कार्त्ते दामनकोत्सवे ।
स्थूलादिरिक्त इत्थं । न कर्णेन कदाचन ।
श्रीमत्कृष्णैकतानेनावतं हितेन धर्मिणा ।
नाचरेत् वैष्णवाचारान् राधाजन्ममहोत्सवे ।
माधवान् पतितान् चौलानत्यन्तमविभावयेत् ।
विना भागवताचारांश्च तत्र प्रवेशयेत् ।
गन्धपुष्पादिभिर्माल्यैश्चन्दनैश्चाधिवासिते ।
नानाविधाच्छभोजनैस्तु भक्तान् सम्यक् चार्चयेत् ।
ततस्तान् प्रयत्नेन भक्तवैष्णवादिभिस्तथा ।
ततश्च कृष्णपूजया कार्त्तौ नाम्नाच भोजयेत् ।
यदि भूमौ श्रीकृष्णस्य नामधेयभक्तिमान् ।
कार्त्तिकेन वैष्णवान् भक्त्या भोजयेत् पूजयेत्तथा ।
गन्धैर्वस्त्रैरभूषैर्मान्यैर्मलयजादिभि ।
समालोक्य स्वप्ने तत्र तत्र मनोहरम् ।
दिवा कुर्य्यात् प्रयत्नेन राधाभक्तिपरायण ।
महाप्रसादं गृह्णीत द्विजाग्नौ चाकोऽरकम् ।
पूर्वां सन्ध्यां विधाय कार्त्ते बाहुमायन्दिरेऽस्मिन् ।
राधां चाभरणं कुर्य्याद्राधाजन्मेति वा वदन् ।
पूजयेन्मूर्त्तिमाराध्य कल्पवर्षाधिवासनाम् ।
चन्द्रमाधवयोस्तत्र पुराणादिकीर्त्तनम् ।
कल्पयेत् यत्नेन नारीभिर्मानवे सह ।
य करोति नरो भक्त्या राधाजन्माष्टमीं शुभाम् ।
वदन्ति विबुधा सर्वे राधाभक्तोऽसि भूतले ।
घरे घरे राधा गोकुलस्था दिवानिशि ।
पूर्वदिशा विधानेन श्रीकृष्णवल्लभा तथा ।
सन्निधौ तदाख्ये राधाजन्माष्टमी शुभे ।
ततश्चोत्सवं सम्यक् परमानन्दतो भवेत् ।
दर्शयत् प्रकाश कृष्णस्तत्र हृदि विप्रवीणाम् ।
प्रत्यब्दमेव कुरुते राधाजन्ममहोत्सवम् ।
स दुर्लभया नारी राधाभक्तिपरायणा ।
भूत्वा वृन्दावने वासं श्रीराधासखिवल्लभी ।
व्रजवासी भवेत् सोऽपि राधाभक्तिपरायण ।
तस्याप्याप्रयोजनं सम्पन्नं यदि भवेत् ।
राधाराधेति यो ब्रूयात् स्मरेत् कुरुते नर ।
सर्वतीर्थेषु संस्कारात् सर्वविद्याप्रयत्नवान् ।
राधाराधेति कृष्णाप्तुराधाराधेति पूजयेत् ।
राधाराधेति यन्निष्ठा राधाराधेति जल्पति ।
वृन्दारण्ये महाभागा राधासहचरी भवेत् ।
जगती पृथिवी धन्या तत्र वृन्दावनं पुरी ।
तत्र धन्या सती राधा प्रिया या मुनिसत्तमे ।
तत्राग्नीन्द्रा महाराध्या दूरस्थ सिद्धे सुर ।
तां राधिकां यो भजते ईश्वरं स भविष्यति ।
तन्नामाख्यं कुरुष्वैव जपस्य सत्सुतमम् ।
अद्यापि महाभागा कुरु राधेति कीर्त्तनम् ।
राधेति कीर्त्तनं कुर्य्यात् सर्वेषु सह यो जन ।
तस्याभावाव न भवति नक्तु पिबोऽथ नैव च ।
न गङ्गा न गया निम्न न शिला च सरस्वती ।
कस्याचिदेव विद्यासा सर्वतापनप्रदा ।
सर्वतापहरा राधा सर्वसम्पत्प्रदायिनी पुन ।
कस्याचिदविद्या सखी भवतु सदालये ।
तत्त्वालये बसेत् लक्ष्मी राधया सह नारद ।
राधाकृष्णेति यत्नेन सदनद्वयनूतनम् ।
तद्गृहे देवमनधो कस्याचित्त चक्रदे ।
एतद्दत्त्वा श्रुत्वा नारदो मुनिसत्तम ।
प्रकाश पूजयामास गोलोकस्थो यथोदितम् ।
जन्मादमीतकथां य श्रुणोतीह मानव ।
श्रीराधाया सुखी मानी धनी सर्वगुणान्वित ।
जपेद्वै भक्तियुक्त पठेन्नाम्ना स्मरेन्नर ।
धनार्थी लभते धर्ममर्थार्थी लभते धनम् ।
कामार्थी लभते कामं मोक्षार्थी मोक्षमाप्नु
यात् ।
सर्वदा भक्तियुक्तः कार्त्तिकेयव सुधी ।
विरक्तो च तथा निष्कामो यत्र भक्तिमान्
भवेत् ।"
इति पाद्मे उत्तरखण्डे श्रीमहादेवनारदसंवादे
श्रीराधाजन्माष्टमीकथनमाहात्म्यं द्विचत्वारिंशोऽध्याय ।
(तन्मतान्तरप्रा उत्पत्त्यादिविवरणानि यथा,—
नारायणउवाच ।
"वासुदेव महाबाहो मा भयं कुरु पुत्रक ।
मथुरां गच्छ तातेति तव सिद्धिर्भविष्यति ।
गच्छ गच्छ महाबाहो यशोदाकमलाकर ।
पद्मिनी मम इत्थं हि राधा भविष्यति ।
इत्यादि मात्रकादन्य यत्न सम्प्राप्य वादिता ।
वासुदेव उवाच ।
प्रत्यु मातङ्गेन्द्रराजते चतुरम्बरन्यायिनि ।
त्वां विना परमेशानि । विद्यासिद्धिन जायते ।
पद्मिनी परमेशानि । शीघ्र दर्शय सुन्दरि ।
प्रसाद मम देवेशि । तदा भवति साधकम् ।
इति श्रुत्वा वचस्तस्य वासुदेवस्य तत्क्षणात् ।
आविरासीत्तदा देवी पद्मिनी परमाद्भुता ।
रक्तविद्युत्प्रभाकारा पद्मपत्रायतेक्षणा ।
स्फटिकं कोटिचन्द्रा वा चन्द्रोऽप्ययुतमन्विता ।
चन्द्रसूर्य्यानलमयी अलङ्कृता वरा ।
सर्वोत्तमगुणा देवी परमा परमापरम् ।
इत्यादी नर्देशानि । या इह परमापरा ।
कालिका या महाविद्या पद्मिनी इष्टदेवता ।
वासुदेवो महाबाहुर्दृष्ट्वा विस्मयमागत ।
पद्मिन्युवाच ।
तत्र गच्छ महाबाहो शीघ्रं हि भगवन् ! प्रभो ।
तथा सह महाबाहो कुरुष्वार्त्तं करोम्यहम् ।
वासुदेव उवाच ।
अद्य पद्मिनि मे वाक्यं यदा मे दर्शनं भवेत् ।
तपसा च देवेशि । अर्थं किया करोम्यहम् ।
पद्मिन्युवाच ।
तवापि दर्शनेष्ट मम जन्म भविष्यति ।
गोकुले मायुरे पीठे वृषभानुगृहे ध्रुवम् ।
दृश्य वाति महाबाहो मम संदर्शनेच्छया ।
कृष्णावतारयुक्ता या नाम्ना पञ्चतत्त्वका ।
साकारां तव दृश्यां यदा सा ज्योतिर्मन्यया ।
इत्युक्ता पद्मिनी या तु गुप्ता पूजिता तदा ।
अन्तर्धानं गतो गम्या सम्याता महती तथा ।
वासुदेवोऽपि तां दृष्ट्वा गोदाम्बिं प्रययौ ध्रुवम् ।
सम्यक् कालीपूजं दृश्यं महापीठं पुरातनम् ।
प्रययौ मायुरं पीठं पद्मिनी परमेश्वरी ।
यत्र कामाख्यान्नु महामायास्वरूपिणी ।
नारदाद्यैर्मुनिश्रेष्ठै पूजिता सस्तुता सदा ।
कामाख्या महामाया यमुनाकर्षाक्लिष्टा ।
यमुनाया जलं तत्र गत्वा कालीस्वरूपिणी ।
मधुवनसुतं दृश्य गुह्यपीठं महाप्रभम् ।
दृष्ट्वा तत्र तथा चिन्त्य पतिते समनोहरम् ।
कालिन्द्यानन्दादि सर्वत्र कामाख्या वरा ।
कालिन्दी कालिका माता जगती स्थित
कामदा ।
काराध्यामि महेशानि । दर्शयसुता वरा ।
सर्वप्रदनपत्ताननमोऽपि मायुरनामकम् ।
कैशल्ये महेशानि । यत् सर्वं सत्त्व स्थितम् ।
पद्मवर्षे महेशानि । केशपीठ मनोहरम् ।
केशवस्य महेशानि । यत्र मायुरनामकम् ।
यत्र कामाख्या माया महामाया जगन्मयी ।
यत्र वृन्दावनं पति । नानाप्रजिवमस्तिनम् ।
भक्तिस्तु परमेशानि । कलावैव च पालिनी ।
भक्तिं विना सर्वं वक्त न भाति सुदक्षरम् ।"
इति वासुदेवरहस्ये राधातन्त्रे प्रथम ।
देव्युवाच ।
"कथं मन्त्रा महादेवात्रात् किं पद्मिनी तदा ।
कस्य वा भवने सा तु माता का पद्मिनी वरा ।
तत् सर्वं परमेशान विस्तारात् वद शङ्कर ।
यदि नो कथ्यते देव त्यजामि तदा तनुम् ।
ईश्वर उवाच ।
पद्मिनी पद्मकन्या वा वृषभानुगृहे स्थिते ।
आविरासीत्तदा देवी सन्ध्यायां प्रथम स्थिता ।
चैत्रे मासि सिते पक्षे नवम्यां पुष्यऋक्षके ।
कालिन्दीजलकल्लोल नानापद्मसमाकुले ।
आविरासीत्तदा पद्मा सत्पादिमञ्जुलाविनी ।
निम्नोभृता तदा पद्मा स्थिता ब्रह्मसभां प्रति ।
कोटिचन्द्रप्रतीकाश स्थित मायासमन्वितम् ।
कुण्डलालङ्कृतां देवीं पद्मपत्रायताक्षणाम् ।

आविरासीत्तदा यत्र रङ्गिणी कुसुमप्रभा ।
तत्रादित्यसहस्राणां यत्र परमकामिनी ।
वृषभानुपुरं देवि ! कालिन्दीपारमेव च ।
नाम्ना यत्पुरं रम्यं चतुर्वर्गसमन्वितम् ॥
हिमज्योतिर्महेशानि । सहस्रादित्यसन्निभम् ।
तत्प्रसादात् परमेशानि गाढ़ध्यानविनाशनम् ॥
वृषभानुर्महात्मा स कालिन्दीतटमास्थितः ।
सदा वशी महाकामी सततं प्रणवेन सुधीः ॥
आविरासीन्महामाया तदा कात्यायनी परा ।
अद्य पुत्र महाबाहो वृषभानो महीधर ।
विद्धोऽपि पुत्रश्रेष्ठ वरं वरय साम्प्रतम् ॥
वृषभानुरुवाच ।
सिद्धोऽहं सततं देवि । त्वत्प्रसादात् सुरेश्वरि ।।
त्वत्प्रसादान्महामाये यथा मुक्तो भवाम्यहम् ।
त्वत्प्रसादान्महामाये असाध्यं नास्ति भूतले ।
आत्मनः सदृशाकारां कन्यामेकां प्रयच्छ मे ॥
तच्छ्रुत्वा परमेशानि । तदा कात्यायनी परा ।
मेघगम्भीरया वाचा प्राह वृषभानवे ।
तच्छृणुष्व महेशानि ! मदीयवचनं यथा ।
भक्त्या त्वदीययाऽस्तु तुष्टाहं त्वयि सुन्दर ।।
एतद्धि वचनं वत्स । सत्यं मत्वा सुपुण्यतः ।
इत्युक्त्वा सहसा सा च महामाया जगन्मयी ।
प्रददौ परमेशानि ! तस्मै डिम्बं मनोहरम् ।
वृषभानुर्महात्मा स तत्प्रसादाद्धृष्टमानसः ।
भार्या तस्य विशालाक्षी विशालकटिशोभिनी ।
रत्नमणिसमाभास्य रत्नपर्यङ्कमाश्रिता ।
तस्या हस्ते तदा भानुः प्रददौ डिम्बमोहनम् ।
तं दृष्ट्वा परमेशानि ! विस्मयं परमं गता ।
हस्ते कृत्वा तु डिम्बं वै निरीक्ष्य च पुनः पुनः ।
नानागन्धयुतं डिम्बं सर्वशक्तिसमन्वितम् ।
नानाज्योतिर्मयं डिम्बं तत्क्षणाच्च द्विधाभवत् ।
तत्रापश्यद्वराकान्तां पद्मिनीं ललनामादिनीम् ।
रत्नविद्युल्लताकारां सर्वसौभाग्यवर्द्धिनीम् ।
तां दृष्ट्वा परमेशानि सहसा विस्मयं गता ।
कीर्त्तिदोवाच ।
हे मातः पद्मिनीरूपे रूपं संहर संहर ।
नमस्तु परमेशानि ! स्वरूपं तत्क्षणात् प्रिये ! ।
इत्युक्ते सहसा देवी सामान्यं रूपमाश्रिता ।
तदा तु कीर्त्तिदा देवी रूपयुक्तां व्यलोकयत् ।
रङ्गिणी कुसुमाकारा रत्नविद्युत्समप्रभा ।
कन्योवाच ।
हे मातः कीर्त्तिदे भद्रे घोरपातकसुन्दरि ।
स्वर्गे देवि स्वर्गं दृष्टि तव कन्या भवाम्यहम् ॥
तच्छ्रुत्वा वचनं तस्याः पद्मिन्याः कमलेक्षणे ।
अवादयत् स्वयं तस्यै पद्मिन्यै ममान्तिके ।
चकार नाम तस्यास्तु भानुः कीर्त्तिदयान्वितः ।
रत्नविद्युत्प्रभां दृष्ट्वा धनं दत्वा सुपत्रिके ।
तस्यास्तु राधिका नाम सर्वलोकेषु गीयते ।
ईश्वर उवाच ।
दिने दिने महामाया वृषभानुपुरे शिवे ।।
एवं माथुरपीठे च चचार ब्रजवासिनी ।
तदा द्वापरे प्राप्ते कृष्णोऽभूत् कमलेक्षणः ।

महादेव उवाच ।
श्रूयतां सम्प्रवक्ष्यामि रहस्यं पद्मिनीमतम् ।
सम्प्राप्ते परमेशानि । द्वितीये वत्सरे सति ।
कुर्यादुपनयनं देवि । शिवलिङ्गप्रपूजनम् ।
प्रणवेन परमां विद्यां कामीं सप्ताक्षरविद्यिनीम् ।
पूजयेद्विविधैः पुष्पैर्गन्धैश्च सुमनोहरैः ।
नैवेद्यैर्विविधैर्भद्रे पूजयेत परमेश्वरीम् ॥
पद्मिन्युवाच ।
कात्यायनि महामाये महायोगिन्यधीश्वरि ।।
देहि देहि महामाये सिद्धिं सिद्धिमनुत्तमाम् ।
सिद्धिश्च वासुदेवस्य देहि मातर्नमोऽस्तु ते ।
त्वां विना ब्रह्म निःशब्दं निधनं सततं सदा ।
शरीरस्य हि कृष्णस्य छाया ज्योतिर्मयी सदा ।
विना देहं परं ब्रह्म प्रकृत्यधीश्वरीमिमाम् ।
अतएव महामाये महत्त्वं कारणं परा ।
एवं प्रार्थ्य महेशानि । सततं परमेश्वरीम् ।
सम्पूज्य परया भक्त्या लब्ध्वा चाथ तु माधवम् ।
वरं प्राप्य महेशानि कात्यायन्याः समीपतः ।
कात्यायन्युवाच ।
पद्मिनि शृणु महाभागे शीघ्रं प्राप्स्यसि केशवम् ।
इत्युक्त्वा परमेशानि । तत्रैवान्तरधीयत ।
कात्यायनी महामाया सदा वृन्दावनेश्वरी ।
वृषभानुसुता राधा सखीगणयुता सदा ।
वर्द्धमाना सदा राधा यथा चन्द्रकला प्रिये ।।
सर्वशृङ्गारवेशाढ्या स्फुरत्कमललोचना ।
सर्वालङ्कारसंयुक्ता साक्षाच्छ्रीरिव पार्वति ।
चचार गहनं घोरं पद्मिनी परसुन्दरी ।
या राधा परमेशानि । पद्मिनी परमेश्वरी ।
पद्मस्य वनमाश्रित्य सदा तिष्ठति कामिनी ।
अन्यत्सर्वं महेशानि । दृष्ट्वा चैवाम्बरान्विताम् ।
अस्मिन् सदृशाकारां राधामन्यां समस्य या ।
या सा तु लक्षिमा राधा वृषभानुसुता सदा ।
अयोनिसम्भवा साक्षात् पद्मिनी सा परात्परा ।
लक्ष्मी या महेशानि । तस्यास्तु चरितं
शृणु ।
वृषभानुर्महात्मा च तस्या वैवाहिकीं क्रियाम् ।
कारयामास यत्नेन सर्वार्थे तु सुन्दरि ।।
तस्यास्तु यौवनं देवि यावद्यावन्मनोहरम् ।
अत्युच्चं कृष्णरूपेण वेशं परमसुन्दरम् ।
चन्द्रस्तु चिटिका नाम्ना पतिर्माम्बोऽतिलम्पटः ।
ननान्दा कुटिलानाम्नी ननदी दुर्मुखी शिवे ।
तिलकं कारयामास करोषारिमवेदर ।
शोभनी रत्नादृष्टा हरिद्रुतप्रभाकरी ।
एवं दृष्ट्वा प्रनिश्चाय मद्वत् मन्त्रानयम् ।
स्वमत्तरावयवाय हृदयवादिर मनि ।
पुष्पज्योतिश्चयम बौमाग्रकदम्बी ।
चाप्ये चापरावरावित्र मदूर्ध्वे विमलङ्गे ।
मधुरमायुक्ता यत्र कृष्णामधुरी ।
वासो मेघाभर्दं नाम कुरुमन्दिरम् वरा ।
अथ सुन्दरमध्याम रमसन्द हरी निशम् ।
दुर्गाम्बा रमारादो गर्भ गर्भवसर ।
एतादृशवशरा देवी चरणबद्ध ।।

कन्दर्पकुशरी नाम कटिका पुष्पशालिका ।
स्वयस्तुसीनहिद्दली पुष्पा ख्याता ख्यातमना ।
गीता नदीतटे मध्य देहस्वयचञ्चली ।
मन्दारश्च यत् चौर रागोत्पन्नमन्दगौ
हासितश्च दर्पिता नित्य सप्रभा सद्यमप्यौ ।
सख्य ख्याता सदा महावादमपारगोसुता ।
गान्धर्वास्तु कलाकण्ठी सुकण्ठी पिककण्ठिका ।
कलावती रत्नोज्ज्वला गुणवचायास्य ख्याता ।
या विराशाहनामीतितासिन सुशना दर ।
वाग्यरूपा सुवि नामसखबयन्वपि ।
मालिका नर्मदा प्रेमवती कुसुमचवना ।
दिवाकीर्त्तिस्तनने तु सुगन्धारविनोदिनी ।
महिता रत्नवल्ली रत्नकेट किरीटिके ।
मालिनीस्वमहेश्वरी हन्तावन्दतराय ।
धनिष्ठा गुणचाता धर्मवेद्यगीहना ।
कामदा नामदा प्रेमदा सखीभावविभाक ।
लवङ्गमञ्जरी रागमञ्जरी गुणमञ्जरी ।
शुभाङ्गमञ्जुयमा सुप्रिया रतिमञ्जरी ।
रागलेखा कलाकेली भूरिदाद्याश्च नायिकाः ।
नान्दीमुखी विन्दुमुखी आद्या सर्वविधा
विदा ।
सुकुन्यतन्नया ख्याता ग्रामण्या च्छन्दकारकः ।
प्रतिरसनया सेवा राधायाश्चाद्भुत ।
मनःसखास्तु यत्रो मनि कोटिसंख्यकोऽपि हि ।
सर्वाङ्गसुभगौ सर्वमायुर्मतोरपिका ।
नीराधा त्रिपुरादुगो हुदामुरवामा ।
अवतीयुक्तोर्मा पूर्णा मर्दिताभवत ।
तस्या प्राणपराधारा यत्राङ्गीनिवसन ।
सेवा वा मारकादिभ्यश्च गोप्यहिवी ।
वृषभानु विना यस्या वृषभानुपिता महान् ।
रत्नगर्भा पिता ख्याता जननी कीर्त्तिदा सदा ।
उपाख्यो आर्या चतुर्भगवान् मद्रायाम ।
अथ सा भौरवर्णा कात्यायन्या प्रसादतः ।
पौर्णमासी भगवती सर्वसौभाग्यवर्धिनी ।
पितामहो महीभानुर्मातामहो मन ।
मातामहीपितामही सुमहादेवमहिषी ।
रत्नभानु सुभानुश्च भानुश्च भ्रातरः शिव ।
भद्रकीर्त्तिर्महाकीर्त्ति कीर्त्तिचन्द्रश्च मातुलः ।
तथा कीर्त्तिमती मातुमातुला विश्रुता ।
विशदचर्म वारो माहमहत्व तट ।
मातुली मेनकामेना षष्ठी धात्री च धर्मकी ।
दीराधा पूर्णवा भाग्य महानुभ्रता ।
परमेष्ठि कलिका च विराजिका ।
दि रवा चन्द्रवना दुर्दैवी दुर्दैवा ।
पुन्नेन्द्रश्चा च दर्वी च तथा सदा ।
विशदकं कुटिलादी दक्षिणी मालकृष्णा ।
मालवी चन्द्रविका मार्दवपद्मिना ।
मकुन्दा ददृश्चा चन्द्रका चन्द्रिका ।
मदना चन्दनविका चाण्डका काशृप ।
मधुरी च तथा ऐन्द्रमञ्जरी चन्द्रहासा ।
कन्दर्पसुन्दरी मञ्जुकेशी चाट ।
हस की वन कला बन्धुरा वैनहुर्गा ।

कादम्बरी शशिमुखी चन्द्ररेखा प्रियंवदा ।
मदोन्मादा मधुमती वासन्ती कलभाषिणी ।
रत्नवेणी मालवती कर्पूरतिलकादयः ।
एता वृन्दावनेश्वर्य्याः प्रायः सादृश्यमागताः ।
विशाखायास्तु कस्तूरी मनोज्ञा मणिमञ्जरी ।
सिन्दूरा चन्दनवती कौमुदी मुदितादयः ।
काम्यादिलताद्यास्ता विहारार्थे कृता इव ।
अथ तस्याः सखीवर्गे प्रेयस्यः परमाद्भुताः ।
वनादिख्यातसत्प्रेमसौन्दर्य्यभरभूषिताः ।
चन्द्रावली च पद्मा च श्यामा शैव्या च भद्रिका ।
तारा चित्रा च गन्धर्व्वी पालिका चन्द्रमालिका ।
मङ्गला विमला लीला भवनाची मनोरमा ।
कन्दर्पलता तथा मञ्जुभाषिणी मञ्जुमेखला ।
कुमुदा कैरवी पारी शारदाक्षी विशारदा ।
शङ्करी कुङ्कुमा कृष्णा सारङ्गी प्रविलासिनी ।
तारावली गुणवती सुमुखी केलिमञ्जरी ।
हारावली चकोराक्षी भारती कामिनीति च ।
आसां यूथानि शतशः ख्यातान्यन्यानि सुभ्रुवाम् ।
लक्षसंख्यास्तु कथिता यूथे यूथे वराङ्गनाः ।
सर्व्वास्तु वैष्णवी यूथे काम्या सर्व्वगुणोत्तमा ।
राधा चन्द्रावली भद्रा श्यामला पालिकादयः ।
लक्षसंख्याय या ख्याता मधुमाति विश्रुताः ।
कुञ्जस्थे च भवन्ती वै मुख्यपदे सुविश्रुताः ।
आसां राधा महेशानी कृष्णप्रकृतिपद्मिनी ।
तासु रमे महेशानि मम तस्य सुविश्रुते ।
इमाः वासुदेवस्य मम शिष्ट्रस्तु कारणम् ।
देव्युवाच ।
श्रो देव तावकी येन विसारावद ईश्वर ।
कथं सा पद्मिनी राधा सदा वृन्दावने स्थिता ।
किमर्थं मातरं भक्ता आत्मतुष्टा वद्य वा ।
पद्ममालिन्य देवत्र वृन्दावनविलासिनी ।
वदाध्याञ्च सर्व्वमपि समञ्चलं वद प्रभो ! ।"
इति वासुदेवरहस्ये राधातन्त्रे सप्तमं पटलं ।
ईश्वर उवाच ।
"या राधा जगदाराध्या पद्मिनी विष्णुवल्लभा ।
महामाया जगद्धात्री त्रिपुरा परमेश्वरी ।
तस्या दूती महेशानि पद्मिनी पद्मगन्धिनी ।
कृष्णस्य सुभगा तु पद्मिनी तस्य वल्लभा ।
वयमन्योन्यमेवादि सद्भावैः सुविश्रुते ।
वृन्दावनगता देवी पद्मिनी गन्धमालिनी ।
कृष्णा तु वसवार्थं हि राधासन्धा भव्य वा ।
पद्मस्थ समापित्र पद्मनाभकलेवरा ।
महामाया महामन्त्र प्रकृतिस्थ्ये वरे ।
अथ चन्द्रावली राधा वृषभानुसुते स्थिता ।
कुमारी पद्मनेत्र देवि पद्मिनी कमलप्रभी ।
तव कर्म्म पद्मिनीयं नाम्ना परमेश्वरि ।
राधिका प्रियदा लीला चन्द्रा सुपद्मिनी तथा ।
न पद्मैव पद्मेशानि चन्द्रमे सुविश्रुते ।
ध्यानमात्रे महेशानि वराभासां हि का कथा ।
यादृश त्वङ्ग कन्या पद्मिनी पद्ममालिका ।
त्रिपुराया महेशानि पद्मिनी मधुवादिनी ।"
इति वासुदेवरहस्ये राधातन्त्रे अष्टमं पटलः ।

अथास्याः सहस्रनामानि यथा,—
पाद्मे पार्व्वत्युवाच ।
"देवदेव जगन्नाथ भक्तानुग्रहकारक ।
यद्यस्ति मयि कारुण्यं यद्यस्ति मयि ते दया ।
यद्यत् त्वया प्रगदितं तत् सर्व्वं मे श्रुतं प्रभो ।
गुह्याद् गुह्यतरं यत्तु यत्ते मनसि वर्त्तते ।
त्वया न गदितं यत्तु यस्मै कस्मै कदाचन ।
तन्मां कथय देवेश सहस्रं नाम चोत्तमम् ।
श्रीराधाया महादेव्या गोप्या भक्तिप्रसाधनम् ।
ब्रह्माण्डकर्त्री हर्त्री सा कथं गोपीत्वमागता ।
महादेव उवाच ।
शृणु देवि ! विचित्रार्थां कथां पापहरां शुभाम् ।
नास्ति जन्मानि कर्म्माणि तस्या नूनं महेश्वरि ! ।
यदा हरिश्चरित्राणि कुरुते कार्य्यगौरवात् ।
तदा विधत्ते रूपाणि हरिसान्निध्यसाधिनी ।
तस्या गोपीत्वभावस्य कारणं गदितं पुरा ।
इदानीं शृणु देवेशि ! नाम्नां चैव सहस्रकम् ।
यन्मया कथितं नैव तन्त्रेष्वपि कदाचन ।
तव स्नेहात् प्रवक्ष्यामि भक्त्या धार्य्यं मुमुक्षुभिः ।
मम प्राणसमा विद्या भाव्यते मे त्वहर्निशम् ।
शृणुष्व गिरिजे नित्यं पठस्व च यथामति ।
यस्याः प्रसादात् कृष्णस्तु गोलोकेशः परः प्रभुः । * ।
अस्य नामसहस्रस्य ऋषिर्नारद एव च ।
देवी राधा परा प्रोक्ता चतुर्व्वर्गप्रसाधिनी ।
श्रीराधा राधिका कृष्णवल्लभा कृष्णसंयुता ।
वृन्दावनेश्वरी कृष्णप्रिया मदनमोहिनी ।
श्रीमती कृष्णकान्ता च कृष्णानन्दप्रदायिनी ।
यशस्विनी यशोगम्या यशोदानन्दवल्लभा ।
दामोदरप्रिया गोपी गोपानन्दकरी तथा ।
कृष्णाङ्गवासिनी हृद्या हरिकान्ता हरिप्रिया ।
प्रधाना गोपिका गोपकन्या त्रैलोक्यसुन्दरी ।
वृन्दावनविहारी च विकसितमुखाम्बुजा ।
गोकुलानन्दकर्त्री गोकुलानन्ददायिनी ।
गतिप्रदा गीतगम्या गमनागमनप्रिया ।
विष्णुप्रिया विष्णुकान्ता विष्णोरङ्गनिवासिनी ।
यशोदानन्दपत्नी च यशोदानन्दगेहिनी ।
कामारिकान्ता कामेशी कामलालसविग्रहा ।
जयप्रदा जया जीवा जीवानन्दप्रदायिनी ।
नन्दनन्दनपत्नी च वृषभानुसुता शिवा ।
गणाध्यक्षा गवाध्यक्षा गवां गतिरनुत्तमा ।
काञ्चनाभा हेमगात्री काञ्चनाङ्गदधारिणी ।
अशोका शोकरहिता विशोका शोकनाशिनी ।
गायत्री वेदमाता च वेदातीता विदुत्तमा ।
नीतिशास्त्रप्रिया नीतिगतिर्मतिरभीष्टदा ।
वेदप्रिया वेदगर्भा वेदमार्गप्रवर्द्धिनी ।
वेदगम्या वेदपरा विचित्रकनकोज्ज्वला ।
तथोज्ज्वलप्रदा नित्या तथैवोज्ज्वलगात्रिका ।
नन्दप्रिया नन्दसुता राधानन्दप्रदा शुभा ।
शुभाङ्गी विमलाङ्गी च विलासिन्यपराजिता ।
जननी जन्मशून्या च जन्ममृत्युजरापहा ।

गतिर्गतिमतां धात्री धात्रानन्दप्रदायिनी ।
जगन्नाथप्रिया शैलवासिनी हेमसुन्दरी ।
[illegible] विचित्रवासिनी विचित्ररूपिणी ।
निर्गुणा सुकुलीना च निष्कुलीना निराकुला ।
गोकुलान्तरगेहा च योगानन्दकरी तथा ।
वेणुगाना वेणुरतिर्वेणुवाद्यपरायणा ।
गोपालस्य प्रिया सौम्यरूपा सौम्यकुलोद्वहा ।
अतिसौम्यातिमोहा च गतिरिष्टा गतिप्रदा ।
गीर्व्वाणवन्द्या गीर्व्वाणा गीर्व्वाणगणसेविता ।
ललिता च विशोका च विशाखा चित्रमालिनी ।
जितेन्द्रिया शुद्धसत्त्वा कुलीना कुलदीपिका ।
दीपप्रिया दीपदात्री विमला विमलोदका ।
कान्तारवासिनी कृष्णा कृष्णचन्द्रप्रिया मतिः ।
अनुत्तरा दुःखहन्त्री दुःखकर्त्री कुलोद्वहा ।
मतिर्लक्ष्मीर्धृतिर्लज्जा कान्तिः पुष्टिः स्मृतिः क्षमा ।
क्षीरोदशायिनी देवी देवारिकुलमर्द्दिनी ।
वैष्णवी च महालक्ष्मीः कुलपूज्या कुलप्रिया ।
संहर्त्री सर्व्वदैत्यानां सावित्री वेदगामिनी ।
वेदातीता निरालम्बा निरालम्बगणप्रिया ।
निरालम्बजनैः पूज्या निरालोका निराश्रया ।
एकाङ्गी सर्व्वगा सेव्या ब्रह्मपत्नी सरस्वती ।
रासप्रिया रासगम्या रासाधिष्ठातृदेवता ।
रसिका रसिकानन्दा स्वयं रासेश्वरी परा ।
रासमण्डलमध्यस्था रासमण्डलशोभिता ।
रासमण्डलसेव्या च रासक्रीडामनोहरा ।
पुण्डरीकाक्षनिलया पुण्डरीकाक्षगेहिनी ।
पुण्डरीकाक्षसेव्या च पुण्डरीकाक्षवल्लभा ।
सर्व्वजीवेश्वरी सर्व्वजीववन्द्या परात्परा ।
प्रकृतिः शम्भुकान्ता च सदाशिवमनोहरा ।
क्षुत् पिपासा दया निद्रा भ्रान्तिः श्रान्तिः क्षमाकुला ।
वधूरूपा गोपपत्नी भारती सिद्धयोगिनी ।
सत्यरूपा नित्यरूपा नित्याङ्गी नित्यगेहिनी ।
स्थानदात्री तथा धात्री महालक्ष्मीः स्वयंप्रभा ।
सिन्धुकन्या स्थानदात्री द्वारकावासिनी तथा ।
बुद्धिः स्थितिः स्थानरूपा सर्व्वकारणकारणम् ।
भक्तप्रिया भक्तगम्या भक्तानन्दप्रदायिनी ।
भक्तकल्पद्रुमातीता तथातीतगुणा तथा ।
मनोऽधिष्ठातृदेवी च कृष्णप्रेमपरायणा ।
निरामया सौम्यदात्री तथा मदनमोहिनी ।
एकानंशा शिवा क्षेमा दुर्गा दुर्गतिनाशिनी ।
ईश्वरी सर्व्ववन्द्या च गोपनीया शुभङ्करी ।
पालिनी सर्व्वभूतानां तथा कामाङ्गहारिणी ।
सद्योमुक्तिप्रदा देवी वेदसारा परात्परा ।
हिमालयसुता सर्व्वा पार्व्वती गिरिजा सती ।
दक्षकन्या देवमाता मन्दलज्जा हरेस्तनुः ।
वृन्दारण्यप्रिया वृन्दा वृन्दावनविलासिनी ।
विलासिनी वैष्णवी च ब्रह्मलोकप्रतिष्ठिता ।
रुक्मिणी रेवती सत्यभामा जाम्बवती तथा ।
सुलक्ष्मणा मित्रविन्दा कालिन्दी जह्नुकन्यका ।

परिपूर्णा पूर्णतरा तथा प्रेमवती मतिः ।
अपूर्वा ब्रह्मरूपा च ब्रह्माण्डपरिपालिनी ॥
ब्रह्माण्डभाण्डमध्यस्था ब्रह्माण्डभाण्डरूपिणी ।
अण्डरूपाऽण्डमध्यस्था तथाऽण्डपरिपालिका ॥
अण्डबाह्याण्डसंहर्त्री सदाशिवहरिप्रिया ।
महाविष्णुप्रिया कल्पवृक्षरूपा निरन्तरा ॥
सारभूता स्थिरा गौरी गौराङ्गी शशिशेखरा ।
श्वेतचम्पकवर्णाभा शशिकोटिसमप्रभा ॥
मालतीमाल्यभूषाढ्या मालतीमाल्यधारिणी ।
कृष्णस्तुता कृष्णकान्ता वृन्दावनविलासिनी ॥
तुलस्यधिष्ठातृदेवी संसारार्णवपारदा ।
सारदा हारदा गोपनन्दिनी सर्वसिद्धिदा ॥
अतीतगमना गौरी परानुग्रहकारिणी ।
करुणार्णवसम्पूर्णा करुणार्णवधारिणी ॥
माधवी माधवमनोहारिणी श्यामवल्लभा ।
अन्धकारभयध्वस्ता मङ्गल्या मङ्गलप्रदा ॥
श्रीप्रभा श्रीप्रदा श्रीशा श्रीनिवासाच्युतप्रिया ।
श्रीरूपा श्रीहरा श्रीदा श्रीकामा श्रीस्वरूपिणी ॥
श्रीदामानन्ददात्री च श्रीदामेश्वरवल्लभा ।
श्रीनितम्बा श्रीगणेशा श्रीस्वरूपाश्रिता श्रुतिः ॥
श्रीक्रियारूपिणी श्रीला श्रीकृष्णभजनान्विता ।
श्रीराधा श्रीमती श्रेष्ठा श्रेष्ठरूपा श्रुतिप्रिया ॥
योगेशा योगमाता च योगातीता युगप्रिया ।
योगप्रिया योगगम्या योगिनीगणवन्दिता ॥
जवाकुसुमसङ्काशा दाडिमीकुसुमोपमा ।
नीलाम्बरधरा धीरा धैर्यरूपा धरा धृतिः ॥
रत्नसिंहासनस्था च रत्नकुण्डलभूषिता ।
रत्नालङ्कारसंयुक्ता रत्नमालाधरा परा ॥
रत्नेन्द्रसारहाराढ्या रत्नमालाविभूषिता ।
इन्द्रनीलमणिन्यस्तपादपद्मा शुभा शुचिः ॥
कार्त्तिकी पौर्णमासी च अमावस्या भयापहा ।
गोविन्दराजगृहिणी गोविन्दगणपूजिता ॥
गोविन्दार्पितचित्ता च गोपीगणसमन्विता ।
वैकुण्ठनाथगृहिणी गोविन्दपरमात्मिका ॥
गोवर्द्धनवासाढ्या तथा वैकुण्ठसुन्दरी ।
मातङ्गा रेवती सीता साध्वी पतिव्रता ॥
अपूर्वा सच्चिदानन्दरूपा कैवल्यसुन्दरी ।
कैवल्यदायिनी श्रेष्ठा गोपीनाथमनोहरा ॥
गोपीनाथेश्वरी चण्डी नायिका नयनान्विता ।
नायकी नायकप्रीता नायकानन्दरूपिणी ॥
शेषा शेषवती शेषरूपा चैव जगन्मयी ।
मायाजालात्मिका माया चन्द्रकान्ता तथा परा ॥
कुमारी यौवनानन्दा युवती गोपसुन्दरी ।
गोपमाता जानकी च जनकानन्दकारिणी ॥
कैलासवासिनी रम्भा वरनीरजसुन्दरा ।
कमलेश्वरी रासरमा रासरासेश्वरी रमा ॥
श्यामला चित्रलेखा च तथा भुवनमोहिनी ।
सुगोप्या गोपवनिता गोपराज्यप्रदा शुभा ॥
अनन्तरूपा माहेशी इन्द्रावरुणा शची ।
कौमारी नारसिंही च वाराही नवदुर्गिका ॥
चञ्चलाचञ्चला गौरा नारी भुवनसुन्दरी ।
रक्तदन्तरा रात्री रक्तरूपा गुणोत्तमा ॥

रतिरूपा रतिप्रीता रतिश्रेष्ठा रतिप्रदा ।
रतिनाथगेहस्था विरजा भुवनेश्वरी ॥
शङ्खास्त्रा हरेर्जाया जामातृकुलवन्दिता ।
बकुला बकुलामोदधारिणी यमुना जया ॥
विजया जयपत्नी च यमलार्जुनभञ्जिनी ।
वक्रेश्वरी वक्ररूपा वक्रवीक्षणशोभिता ॥
अपराजिता जगन्नाथा जगन्नाथेश्वरी यतिः ।
खेचरी खेचरसुता खेचरत्वप्रदायिनी ॥
विष्णुवक्षःस्थलस्था च विष्णुभावनतत्परा ।
चन्द्रकोटिसुगात्री च चन्द्राननमनोहरा ॥
सेवासेव्या शिवा क्षेमा तथा क्षेमङ्करी वधूः ।
यादवेन्द्रवधूः शैव्या शिवभक्ता शिवान्विता ॥
केवला निष्फला सूक्ष्मा महाभीमा भयप्रदा ।
जीमूतरूपा जैमूती जिता जिष्णुप्रमोदिनी ॥
गोपालवनिताभद्रा कृष्णेन्दुनिवासिनी ।
यामुनी यमुनाङ्गी च यमुनालोककारिणी ॥
कलिकल्मषभङ्गा च कलिकल्मषनाशिनी ।
कलिकल्मषरूपा च नित्यानन्दकरी कृपा ॥
कृपावती कुलवती कैलासाचलवासिनी ।
वामदेवी वामभागा गोविन्दप्रियकारिणी ॥
नगेन्द्रकन्या योगेशी योगिनी योगरूपिणी ।
योगसिद्धा सिद्धरूपा सिद्धक्षेत्रनिवासिनी ॥
क्षेत्राधिष्ठातृरूपा च क्षेत्रातीता कुलप्रदा ।
केशवानन्ददात्री च केशवानन्ददायिनी ॥
केशवा केशवप्रीता केशवी केशवप्रिया ।
रासक्रीडाकरी रासवासिनी राससुन्दरी ॥
गोकुलान्वितदेहा च गोकुलत्वप्रदायिनी ।
लवङ्गनाम्नी नारङ्गी नारङ्गकुलमण्डना ॥
एलालवङ्गकर्पूरमुखवासमुखान्विता ।
मुख्या मुख्यप्रदा मुख्यरूपा मुख्यनिवासिनी ॥
नारायणी कृपा राधा करुणा करुणामयी ।
कात्यायनी कृष्णाकर्षी गोकर्णी नागवाहिका ॥
धर्मिणी कौशिकी क्षेत्रवासिनी च जगन्मयी ।
जटिला कुटिला नीला नीलाम्बरधरा शुभा ॥
नितम्बिनी रूपवती युवती रूपयौवनी ।
विभावरी वैष्णवी च सङ्कटा कुटिलालका ॥
नारायणप्रिया शैला सृक्कणीपरिमोहिता ।
दृक्पातमोहिता प्रातराशिनी नवनीतिका ॥
नवीना नवनारी च नारङ्गफलशोभिता ।
हैमी हेममुखी चन्द्रमुखी शशिसुशोभना ॥
अर्द्धचन्द्रधरा चन्द्रवल्लभा रोहिणी तिमिः ।
तिमिङ्गिलकुलामोदमत्स्यरूपाङ्गहारिणी ॥
कारिणी सर्वभूतानां कार्यातीता किशोरिणी ।
किशोरवल्लभा केशकारिका कामकारिका ॥
कामेश्वरी कामकला कालिन्दीकूलदीपिका ।
कलिन्दतनयातीरवासिनी तीर्थगामिनी ॥
कामरूपाश्रया कुञ्जरागेश्वधारिणी ।
कृपा उदारानन्दा सर्वेशी कामरूपा ॥
नकारी दैवकी च निम्बादित्यकारिणी ।
निलरङ्गिन्दा लक्ष्मीमया निम्बनन्दनी ॥
नित्यार्चिता नित्यवृन्दावनेश्वरी ।
तुलसी नन्दिका चैव नन्दनानन्दकारिणी ॥

गजेन्द्रगामिनी श्यामलतानन्तलता तथा ।
गोविन्दलिप्सरूपा च गोविन्दानन्दकारिणी ॥
प्रेमप्रिया प्रेमरूपा प्रेमानन्दतरङ्गिणी ।
प्रेमहरा प्रेमदात्री प्रेमशक्तिमयी तथा ॥
कृष्णप्रेमवती धन्या कृष्णप्रेमतरङ्गिणी ।
प्रेमादर्शिनी सर्वेशा निजनतरङ्गिणी ॥
भावभावान्विता वीरा वृन्दावनप्रकाशिनी ।
कपिला सुकृता वेदपाठसमर्चिनी धनी ॥
कुटीरवासिनी धन्या धन्यरूपा धनेश्वरी ।
महाकन्दोदरा महानन्दिनी भवभाविनी ॥
संसारवाहिनी शैवा शैवमन्त्रप्रदायिनी ।
शिशिरा हिमरागाढ्या मेघश्यामसुन्दरी ॥
मनोरमा वैष्णवी वैशाढ्या वैरदारिणी ।
दयान्विता दयाधारा दयारूपा सुवेषिणी ॥
किशोरवर्षदा गौरचन्द्रानना कला ।
कलाधिनाथवदना कलानाथाधिरोहिणी ॥
विरागकुशला हेमपिङ्गला हेममण्डला ।
भाण्डीरतालवनगा कैवर्ती पीवरी शुकी ॥
शुकदेवगुणातीता शुकदेवप्रियापरा ।
विकचाम्बुजिनी कीरा कौशेयाम्बरधारिणी ॥
कीरावती कीररूपा जगद्गुणनिवारिका ।
सृष्टिस्थितिकरी संहारिणी संहारकारिणी ॥
केशशैवालधात्री च चन्द्रगात्रा सुकोमला ।
पद्माङ्गरागसंराजा विन्ध्याद्रिपरिवासिनी ॥
विन्ध्यालया श्यामसखी सखी संसारतारिणी ।
भूतिर्भविष्या भव्या च भव्यगात्रा भवातिगा ॥
भवनाशान्तकारिण्याकाशरूपा सुवेषिणी ।
रतिरङ्गपरित्यागा रतिवेगा रतिप्रदा ॥
तेजस्विनी तेजोरूपा कैवल्यपथदा शुभा ।
भक्तिहेतुर्मुक्तिहेतुलङ्घिनी लङ्घना यमा ॥
विज्ञानदेवा वैज्ञानी विज्ञानकुलकन्यका ।
विमानस्थवरा च विमानवरदीपिनी ॥
भक्तनीता मण्डलनिर्मिताभा भवात्मिनी ।
कामाङ्गहारिणी दिव्या दिगम्बरसुशो-
भिता ॥
विचित्राविचित्रा गोरम्भा च प्रकाशिता ।
कलाङ्गी हेमयुक्ता कलानन्दा सुरेश्वरी ॥
दुःखहन्त्री दुःखहरा वैरिवैरिनिबर्हिणी ।
कर्माङ्गानिविधात्री च कुलश्रीविहारिणी ॥
कलङ्का राजवन्द्या कलोपलानन्दिनी ।
सान्द्रलीला लता लक्ष्मी कमलासनेश्वरी ॥
कर्णाङ्कुन्दरी वक्रा वक्राम्बरमयी तथा ।
अङ्गिरा पुष्पमाला रविकुलविभूषणा ॥
दधिदुग्धोत्तमाढ्या दधिचास्वादशालिनी ।
दधिदुग्धलब्धदा दधिचूर्णविहारिणी ॥
ज्ञानदा योगकृष्णा रसिकेश्वरविहारिणी ।
किशोरराशी वैणिकी वेणुवाद्यसुखेश्वरा ॥
दर्भादर्भविहारा च वित्तानुकूला तथा ।
ब्रह्माण्डकेतुवर्णा वल्लभा वसुदा शुभा ॥
ब्रह्मवादिनी तृणदावनी ।
हरिकान्तारिणी कृष्णश्यामविहारिणी ॥
कर्मणां तस्मात् च हिरण्या गौरीश्वरा ।

षड्भावा विभावा च सुभगा सुरनायिका ।
प्रार्थिप्रा प्राणरूपा प्राणकान्तिप्रदायिका ॥
लब्धप्राणा लब्धरसा लब्धगोविन्दतत्परा ।
लब्धप्रेमवती लब्धभक्ता भक्तफलप्रदा ।
लब्धप्रेमप्रेमराज्या हरिभक्तिप्रदायिनी ॥
चैतन्यरूपा चैतन्यप्रिया चैतन्यदायिनी ।
उपरूपा प्रियक्रोडा लब्धक्रीडा वनेश्वरी ॥
वृन्दावनी महादुःखकालाग्निनाशिनी ।
चन्द्रवती चन्द्रवेशी चन्द्रप्रेमतरङ्गिणी ॥
समुद्रमथनोद्भूता समुद्रजलवासिका ।
पीयूषाधरपाना सुधा प्रेमरसात्मिका ॥
पूर्णानन्दमयी पूर्णा सौन्दर्यामृतवर्षिणी ।
सागरा सागरोद्भवा जगदानन्दकारिणी ॥
कान्तालिङ्गनपरा स्मराङ्गणसङ्गमा ।
कर्पूरचैतन्यो प्रियालक्षणतरङ्गिणी ॥
सौन्दर्यरत्नमाला च सिद्धसाधनमिश्रिता ।
मञ्जुला मोहनवर्गा मैत्रया गोपनायिनी ॥
रत्नमञ्जीरभूषाङ्गी रत्नभूषणभूषिता ।
कमलमालिका लब्धराधा प्राणविमोहना ॥
सत्यप्रदा सत्यवती सेवकानन्दनायिका ।
जगद्योनिर्जगद्वीजा विचित्रमणिभूषणा ॥
राधारमणकान्ता च राधाराधनरूपिणी ।
कैलासवासिनी लब्धप्राणपर्यस्तदायिनी ॥
ब्रह्मानन्दनिरता ब्रह्मभक्तजनाश्रिता ।
यावका यावकानन्दकारिणी यावकीनन्दना ॥
हरिभूषणभूषाढ्या नन्दयुक्ता प्रणामा ।
हैमीमालाधरा देवी सर्वसिद्धिप्रदायिनी ।
देवीरूपस्वरूपा च दीपदीपाम्बिकारणा ॥
आनन्दवर्धना च ब्रह्मानन्दविधायिनी ॥
पतिव्रता पतिप्राणा पतिमानन्दकारिणी ।
परिपालनकर्त्री च तथा त्रिलोकमोहिनी ॥
तथा चराचरमाता विश्वजनमोहिनी ।
विदुषी योगिनी विद्यावती विद्याविधायिनी ।
गान्धर्वी गानरूपा च गान्धर्वविधायिनी ।
सूक्ष्मप्राणस्थिता सूक्ष्मरूपा प्राणधारिणी ॥
कार्तिकव्रतकर्त्री च व्रतकारिणी सदा ।
स्वतन्त्रा चाद्यशक्ती त्रिदशानलवासिनी ॥
चतुःकोटिब्रह्माण्डकोटिविनाशिनी ।
कोटिकन्दर्पलावण्या कन्दर्पकोटिसुन्दरी ॥
कन्दर्पकोटिजननी कामबीजप्रदायिनी ।
कामशास्त्रविनोदा च कामशास्त्रप्रकाशिनी ॥
कामपुष्करिणी कामिन्यभिमानविनिर्जिता ।
कामिनी कामिनीभावस्वरूपा कामिनीश्वरी ॥
योगेश्वरी वराभयमुद्राधरा शुभप्रदा ।
वराभयार्चिता देवी श्रीराधाभक्तवत्सला ॥
लावण्यगुणा सौम्या शुभाङ्गी वरप्रदा ।
कुङ्कुमचन्दनवरादिदिग्धाङ्गी हारशोभिता ॥
किङ्किणी च नूपुरा वीणावादनतत्परा ।
विद्याधिविद्या माता च विद्याविद्याप्रदायिनी ।
आम्नायिकी विद्यावती शास्त्रविज्ञान-
कारिणी ।
नागेन्द्राणी नागमाता गोपालगोपनायिनी ॥

हरिभावमयी च हरिदिव्यरूपधरा ।
हरिप्राणा वरप्राणा शिवप्राणा शिवान्विता ॥
नरकार्णवसन्त्रीनरकार्णवनाशिनी ।
नरेश्वरी नराधीना नरपूज्या नराङ्गना ॥
यशोदानन्दिनीक्रीडा यशोदाक्रोडवासिनी,
यशोदानन्दनप्राणा यशोदानन्दनार्पणा ॥
कला कोमला काला कलावानन्ददायिनी ।
स्वर्गलक्ष्मीर्भूमिलक्ष्मीर्द्रौपदी पाण्डवप्रिया ॥
तथार्जुनसखी भौमी भीमा भैमी भयापहा ।
शिवाराध्या शिवा सौम्या सन्ध्यात्रयतरा तथा ॥
मानाधिपा मानमाला मानमानन्ददायिनी ।
दुग्धमन्थनकर्त्री दुग्धा दधिमन्थनतत्परा ॥
दधिभाण्डार्पिणी कृष्णक्रोधिनी नन्दनाङ्गना ।
घृतलिप्ता तक्रयुक्ता यमुनापारकौतुका ॥
विचित्रकथाका कृष्णहास्यभाषणतत्परा ।
गोपाङ्गनावेष्टिता च कृष्णसङ्गार्थिनी तथा ॥
रासयुक्ता रासरतिरासवासक्तवासना ।
हरिद्रा हरितान्तस्था हरारोपितयौवना ॥
निर्गुणा च निर्गुणा तथा स्वातन्त्र्यरसिका ।
सुवर्णा कथा चैव कृष्णभावातिहर्षिणी ॥
मीनाक्षी मञ्जी नाममात्रिणी नामधारिणी ।
मल्लिकामालिनी देवी हरिप्रेमधारिणी ॥
हरिप्राणप्रिया च हरिकौतुकनन्दना ।
गन्धर्वा हरिप्राणा यमुनाजलवासिनी ॥
सत्य प्रमा नित्याभी च चतुरा चातुरीमयी ।
तमिस्रा तपस्या च रौद्ररूपा यशोधिनी ।
कृष्णप्रिया कृष्णभक्ता कृष्णानन्दप्रदायिनी ।
कृष्णाप्रवासिनी कृष्णदासिनी भाविनी तथा ॥
कृष्णापरिहिता भक्ता भक्तभक्तप्रभञ्जिता ।
श्रीकृष्णरहिता दीना विरहिणी हरेः प्रिया ॥
मथुरा मधुरा राजगेहभावनभावना ।
श्रीकृष्णभावनामोदा तन्मोन्मादविधायिनी ॥
कृष्णार्थव्याकुला कृष्णसारचर्मधरा शुभा ।
अलकेश्वरपूज्या च कुबेरेश्वरवल्लभा ॥
धनधान्यविधात्री च जया माया जया जयी ।
प्रणवा प्रणवेशी च प्रणवार्थस्वरूपिणी ॥
ब्रह्मविष्णुशिवादीनां प्रेमार्थसाधना ।
राजलीलाविनी भूतप्रेतप्राणविनाशिनी ॥
वैकुण्ठपतिनाथी च शान्ती शाम्भवी धनप्रणवी ।
तत्त्वज्ञाता सतिप्राणा पतिप्राणविहारिणी ॥
अतिथिवाधिनी कन्याधिनी स्वरूपिणी ॥
इतीदं कथितं देवि ! राधानामसहस्रकम् ।
यः पठेत् पाठयेद्वापि तस्य तुष्यति माधवः ॥
किं तस्य यमुनाभिर्वा नदीभिः सर्वतः प्रिये ।
कुरुक्षेत्रादितीर्थेन तस्य मुक्तो सनातनः ॥
स्तोत्रस्यास्य प्रसादेन किं न सिध्यति भूतले ।
ब्राह्मणो ब्रह्मवर्चस्वी क्षत्रियो जगतीपतिः ।
वैश्यो निधिपतिर्भूयात् शूद्रो मुच्येत जन्मनः ॥
ब्रह्महत्या सुरापानं स्तेयादि गुरुतल्पगम् ।
सद्यो हरति देवेश ! यस्य पश्य न संशयः ॥
राधानामसहस्रस्य समानं नास्ति भूतले ।
स्वर्गे पाताले वापि गिरौ वा जलतोऽपि वा ॥

नास्ति पदं शुभं स्तोत्रं तीर्थं नास्ति परं स्मृतम् ।
एकादश्यां शुचिर्भूत्वा यः पठेत् सुसमाहितः ।
तस्य सर्वार्थसिद्धिः स्यात् शृणुयाद्वा सुदीर्घतः ।
द्वादश्यां पौर्णमास्यां वा तुलसीसन्निधौ शिवे ! ।
यः पठेत् शृणुयाद्वापि तस्य तत्तत् फलं शृणु ।
अश्वमेधं राजसूयं बार्हस्पत्यं तथाविधम् ॥
अतिरात्रं वाजपेयं अग्निष्टोमं तथा शुभम् ।
कृत्वा यत् फलमाप्नोति श्रुत्वा तत्फलमाप्नुयात् ॥
कार्तिके चाष्टमीं प्राप्य पठेद्वा शृणुयादपि ।
अयुतकल्पकोटीनां वैकुण्ठवासमाप्नुयात् ॥
ततश्च ब्रह्मभवनं शिवस्य भवनं पुनः ।
सुराधिनाथभवनं पुनर्याति सलोकताम् ॥
गङ्गातीरे समासाद्य यः पठेत् शृणुयादपि ।
विष्णोः सारूप्यम् याति सत्यं सत्यं सुरेश्वरि ! ॥
मम वक्त्रगिरेजाता पार्वतीवदनार्पिता ।
राधानामसहस्राख्या नदी त्रैलोक्यपावनी ॥
पठ्यते हि मया नित्यं भक्त्या शक्त्या यथोचितम् ।
मम प्राणसमं ह्येतत् तव भक्त्या प्रकाशितम् ॥
नाभक्ताय प्रदातव्यं पाषण्डाय कदाचन ।
नास्तिकाय विरागाय रागयुक्ताय सुन्दरि ! ॥
तथा देयं महास्तोत्रं हरिभक्ताय शङ्करि ! ।
वैष्णवेषु यथाशक्ति दातव्यं पुण्यमिच्छता ॥
राधानामसुधावारि मम वक्त्रसुधानिधेः ।
उद्धृतं हि त्वया यत्नात् यतः पापविनश्वरा

दर्शे ।
विशुद्धसत्त्वाय यथाधवाय
दिव्यस्य दैत्यान्दरताय भक्तितः ।
दात्रे यथार्थं शुभभक्तिमाधवे
राधाविहारस्थलदाय शम्भवे ।
हरिपादाब्जमधुपमनोभूताय माधवे ।
राधापादरजःप्राप्त्याभिवैष्णवाय च ॥
दद्यात् स्तोत्रं महापुण्यं हरिभक्तिप्रसाधनम् ।
जन्मान्तरं न तस्यास्ति राधाकृष्णपदाश्रितः ॥
मम प्राणा वैष्णवा हि तेषां रक्षार्थमेव हि ।
शूलं मया धार्यते हि नान्यथा भैरवार्थकम् ॥
हरिभक्तिविनाशाय शूलं संधार्यते मया ।
शृणु देवि यथार्थं मे गदितं सर्वसुन्दरि ! ॥
भक्तानां वै निमित्तं हि मया धार्यं शुभा
हितम् ।
कदापि नोच्यते देवि मया नामसहस्रकम् ।
किं परं त्वां प्रवक्ष्यामि प्राणतुल्यां सतीं प्रिये ।
भावे सर्वं राधिकाया मम वक्त्रे स्थितं हि ॥"
इति नारदपञ्चरात्रे राधिकानामसहस्रकथनं
नामाध्यायः ॥ (राधाकृष्णयोरभेदकथनं
यथा —
ईश्वर उवाच ।
"त्वं च मे कथितं देवि त्रिजगत्स्रष्टुः कथयामि ते ।
श्रीगौरी च परमेश्वरि धर्मं भक्तार्थ भावय ॥
देव्युवाच ।
त्रिपुरघ्नप्रसादेन पृच्छामि यत् तदीश्वर ।
वदस्व तत् देवेश राधाकान्तस्य तत्त्वं वै ॥
नारायणस्य सर्वादि रूपकादि कथयस्व ॥

बहूनि तव देवेश हृदये दय शुभत ।
अधुना परमेशान कथयस्व दयानिधे ॥
ईश्वर उवाच ।
पद्मिन्याः परमस्थानि रहस्यं नास्ति सुन्दरि ।
त्वयि सर्व्वं महेशानि कथितं परमेश्वरि ॥
किञ्चिन्मात्रमपीशानि नास्ति मे गोचरे प्रिये ।
यद्दृश्यसि महेशानि रहस्यं कथितं मया ॥
देव्युवाच ।
पद्मिन्याः परमेशान रहस्यं कथय प्रभो ।
यदि नो कथ्यते देव त्यजामि विग्रहं तदा ॥
ईश्वर उवाच ।
शृणु प्रिये वरारोहे सततं धैर्य्यं कथं तव ।
प्रौढ़त्वं यदि चार्व्वङ्गि रहस्यं कथयामि ते ॥
रहस्यं शृणु चार्व्वङ्गि स्तोत्रं परमदुर्लभम् ।
स्तोत्रं सहस्रनामाख्यं उपविद्यासु सम्मतम् ॥
उपविद्यासु देवेशि सर्व्वगुह्यं मनोहरम् ।
अतएव महेशानि पद्मिनीसम्मतं सदा ॥
एतत्तु पद्मिनीस्तोत्रमाश्चर्य्यं परमाद्भुतम् ।
यतश्च सर्व्वतत्त्वेषु तव भक्त्या प्रकाशितम् ॥
अस्य श्रीपद्मिनीसहस्रनामस्तोत्रस्य श्रीब्रह्म ऋषिर्म्महिषमर्द्दिन्यधिष्ठात्री देवता गायत्री छन्दो महाविद्यासिद्ध्यर्थे विनियोगः । ॐ ह्रीं ऐँ पद्मिन्यै राधिकायै । राधा रमणीरूपा नित्यमङ्गलवती वरपथ्या मङ्गला भामा रजोगुणा ।
रक्ताङ्गी रक्तपुष्पाभा राधा राधनदायिका ।
रम्भावती रम्यशीला रमणी रङ्गिणी रतिः ॥
रतिप्रिया रमणीया रसपूर्णा रसायना ।
रासमध्ये रासरूपा रासस्था रसोत्सुका ॥
रासवती रमोल्लासा रसिका रसभूषणा ।
रसमालाधरी रम्भा रत्नपुष्पपरिच्छदा ॥
कमला कल्पलतिका कुलाचलपरायणा ।
कामिनी कमला कुन्ती कलिकल्मषनाशिनी ।
कुलिना कुलवती कामी कामसन्दीपनी तथा ॥
कौमारी कमलानिता कामाक्षी कामरूपिणी ।
कामुकी कमुकी च कुलजा कुलपालिता ॥
कदम्बवर्णा कमलाङ्गी च कदम्बवनपरिच्छदा ।
कान्ता कामस्वरूपा च कामरूपा कलावती ॥
घोरा घनावती चैव घोरदुःखप्रणाशिनी ।
खड्गा खगा खगस्थानी खगवक्त्रविदारिणी ॥
गरिष्ठा गरिमा गङ्गा गया गोदावरी गतिः ।
गान्धारी गुणिनी गौरी गङ्गा गोकुलवासिनी ॥
गायत्री गायकुशला गुह्या गुह्यविलासिनी ।
घर्घरा घर्घरा घण्टा घनस्था घनवासिनी ॥
घृणा घृणावती घोरा घोरकल्मषनाशिनी ।
चन्द्रा चन्द्रप्रभा चैव चन्द्रलीलापरिच्छदा ॥
चन्द्ररूपा च चन्द्रास्या चपला चारुभूषणा ।
चतुरा चारुशोभा च चम्पा चन्द्रावली तथा ॥
चन्द्ररेखा चन्द्रमुखा चारुवेषा विमोहिनी ।
चन्द्रचन्द्रभूषाङ्गी चार्व्वङ्गी चन्द्रभूषणा ॥
चिन्मयी चित्ररूपा च चित्रमार्गविहारा सदा ।
छद्मरूपा छद्मवेशा चेतश्चञ्चलधारिणी ॥

छत्रातपा च छत्राङ्गी छत्रिणी छत्रपालिनी ।
छुरिकास्त्रधारीपा छद्मवेशविलासिनी ॥
छलीलतमरालीया छटीलतानिवासिता ।
जयन्ती च जगन्माता जननी जन्मदायिनी ॥
जया जैत्री च जरती जीवनी जगदात्मिका ।
जीवा जीवस्वरूपा च जगद्विध्वंसकारिणी ॥
जगन्निस्तारश्रेष्ठा जगद्धितसुखात्मकी ।
जगन्नन्दनजननी जयिनी जयाश्रया ॥
झङ्कारवादिनी झञ्झा झञ्झारनिभरावती ।
टङ्कारटङ्किनी टङ्का टङ्किना टङ्करूपिणी ॥
डमरा डम्बरा डम्बा डमडमा च डमरा ।
ढौकिताशेषनिर्घोषा ढलढलितलोचना ॥
तापिनी त्रिपथा तीर्थवासिनी त्रिदशेश्वरी ।
त्रिलोकजयी त्रैलोक्यतरणी तरणि तरुः ॥
तापघ्नी तपा तामा तपनीया तपावती ।
तापिनी त्रिपुरादेवी त्रिपुरानाशकारी तथा ॥
त्रिकला तारिणी तारा तारानायकमोहिनी ।
त्रैलोक्यगमना तीर्था तुहिना तुलिता तरा ॥
तृष्णा तरङ्गिणी तीर्था त्रिविक्रमविधारिणी ।
तमोमयी तामसी च तपस्या तपसः फला ॥
त्रैलोक्यव्यापिनी तुष्टा कविस्तुता स्तुता तथा ।
त्रैलोक्यमोहिनी तूर्णा त्रैलोक्यविभवप्रदा ॥
त्रिपर्णी च तथा तथ्या तिमिरध्वंसचन्द्रिका ।
तीव्ररूपा तत्त्वसारा त्रिपुरा त्रिपर्णिता ॥
त्रयी तन्वी तापहरा तपस्तापविनाशिनी ।
तडिद्वर्णितलावण्या तपिता मरुतिप्रिया ॥
तीव्रपापहरा तुल्या तुल्यपापतनूनपात् ।
दारिद्र्यनाशिनी दात्री दया देवी दयावती ॥
दिव्या दिव्यस्वरूपा च दीप्ताङ्गा दया दशा ।
दिव्यरूपा दिव्यमालिर्दैन्यपापप्रणाशिनी ॥
दुला च दुलरूपा च दन्दशूकविनाशिनी ।
दुर्न्निवारदमनीया च देवकार्य्यकरी सदा ॥
देवप्रिया देवमान्या देवा देवप्रिया तथा ।
दिक्पालमनोनाभी च दीप्ताढ्या दीर्घलोचना ॥
दुष्टदैत्यकामदुघा दोग्ध्री दुःखवर्जिता ।
दुग्धा दुग्धसमाभासा दिव्या दिव्यमतिर्म्मता ॥
दुःखहरी दीनशरणा दिव्या दैत्यविदारिणी ।
दुःसहा दमिता दामा दूरगा दूरवासिनी ॥
दुर्निवारा दयाधारा दुर्गमस्थानवासिनी ।
दुराधर्षा दुराधारा दाविनी दुःखसञ्जना ॥
दैत्यदुष्टहरी देवी अवादानपरिहरा ।
दुर्बुद्धिनाशिनी दक्षा दक्ष दानदायिनी ॥
दावदाघ्नी च दैत्यघ्नी दावाग्निविनाशिनी ।
दन्दरा दारिद्रहरा दरसन्दर्शशिता ॥
दीप्तनकरी दीर्घा दीर्घधर्मा दयावती ।
दाक्षिणी दक्षपौत्रीव दीर्घस्तम्भराञ्चिता ॥
दानार्चिता ब्रह्मरूपा ब्रह्मदेवसमा परा ।
दुरन्तपापसन्दाह्या च दात्री दयाधुरीन्धनी ॥
देवी दिव्या वल्लभी दान्ता दानवनन्दिता ।
दार्दिकारिन्दा दुर्गा दुर्गन्धनाशिनी ॥
धर्म्मदया धर्म्मभृता धैर्य्यदया धर्म्मईश्वरा ।
धुरन्धरा धुरन्धरी धर्म्मकामार्थमोक्षदा ॥

धर्म्मिणी धर्म्ममाता च धर्मदात्री धनुर्द्धरा ।
धात्री धैर्या धरा धर्म्मधारिणी धूतकल्मषी ॥
धनदा धर्म्मदा धन्या धन्यदा धान्यदा धवा ।
धन्या धनाधिरूपा च धरित्री धनपूरता ॥
धारणा धनरूपा च धर्म्मा धर्म्मप्रचारिणी ।
धर्म्मिणी धर्म्मराज्यस्था धर्म्मिष्ठामलकेशिनी ॥
धर्म्मप्रचारनिरता धर्म्मरूपा धुरन्धरी ।
धनुर्विद्याधरी धात्री धनुर्विद्याविशारदा ॥
निराभासा निरीहा च निर्म्मलहारशोभना ।
निर्म्माणपन्थी दात्री नन्दिनी नायकार्पिका ॥
नारायणी निखिली विश्वरूपप्रकाशिनी ।
नमस्या निरता नन्दनता नवनरूपिणी ॥
निर्म्मला निर्म्मलाभासा निरस्ता निरुपमा ।
नित्यानन्दमयी नित्यानित्या नतनिधिप्रदा ॥
निमिषा नीतिधैर्य्या च निर्म्मायपदनीजिका ।
निःशङ्का च निरातङ्का निराश्रितमहात्मना ॥
निर्म्मला नन्दनवनी निर्म्मलज्ञानवर्षिणी ।
निरन्तकुलसङ्गी नित्यानन्दस्वरूपिणी ॥
निमया निलयमाला निःशङ्कमलवर्जिता ।
निर्म्मोहमया निष्पापा नमस्कार्य्या निरञ्जना ॥
निशावती निरातङ्का निर्न्नेया निष्कलङ्किका ।
निरञ्जना निरीहा च निरहङ्कारदूरस्थिता ॥
पुण्यप्रदा पुण्यकरी पुण्यगर्भा पुरातनी ।
पुण्यरूपा पुण्यदया पुण्यशीला च पावनी ॥
पूता पवित्रा परमा परा पुण्यविभूषणा ।
पुण्यनाम्नी पुण्यधरा पुण्या पुण्यप्रकाशिनी ॥
पुण्यदेहा पुण्यवनी पूर्णिमा पूर्णचन्द्रमा ।
पौर्णमासी परा पद्मा पद्मदा पद्ममालिनी ॥
पद्मिनी पद्महस्ता च पद्ममालाधरा परा ।
पद्माक्षी पद्मा च परमानन्दनन्दिनी ॥
प्रकाशा परमाश्चर्य्या पद्मगर्भनिवासिनी ।
पावनी च तथा पूता पवित्रा परमात्मजा ॥
पद्मार्च्चिता पद्मवक्त्रा पद्ममाता पुरातनी ।
पद्मासनगता नित्या पद्मासनपरिच्छदा ॥
शुक्लपद्मासनगता रक्तपद्मावता सदा ।
पीतपद्मासनगता श्यामपद्मा मता सदा ॥
पत्रपेशासिनी चन्द्रवदनापरायणा ।
प्रकाशिनी प्रमदा च पूर्णचन्द्रा च पावनी ॥
फलदात्री फलधरा फलदा फलवर्द्धिनी ।
फुल्लेन्दीवरलोचना फुल्ला फुल्लारविन्दवर्णिनी ॥
बन्धनी वाहिनी वेला बहुस्याननालका ।
बिम्बमाला च बिम्बोष्ठी बिम्बा बिम्बरूपिका ॥
ब्रह्मदा ब्रह्मणी ब्राह्मी ब्रह्मदा विभवाञ्चिता ।
बहुधा बहुरूपा बली बदरी बदरीन्द्रिनी ॥
विशाला विशालाक्षी बहुसम्मतपरिवता ।
विचित्रा विभुकर्त्री वैकुण्ठी विभूषणा ॥
विनायकीया देवी विभूति वरदायिनी ।
वैदूर्यरत्ना वाणी वैदूर्यरत्नभूषणा ॥
विद्या विद्यावती वन्द्या वन्दनी वरदायिनी ।
वरदा विरूपा च वन्दिता च विश्वेश्वरी ॥
विद्याधरी वसन्ती विरहा विरहिणी ।
बोधदायिनी रम्या विरजी वसुन्धरा ॥

दुर्दर्शिमाश्रिनी विना प्रकाशरूपा परात्मना।
वासिनी ब्रह्मजननी ब्रह्मब्रह्मापवादिनी॥
ब्रह्मविष्णुस्वरूपा च यन्त विमर्दर्शिनी।
विभाविनी वासिनी च वासिका परिचारिका॥
विपत्तार्तिहरा देवी विनयव्रतचारिणी।
विपत्मोक्षकर्त्री विपश्चीवादनप्रदा॥
वैशवादनप्रदा दर्शी वैशद्युतिपरायणा।
वर्षोस्विनी वनकरी वनस्था विभवती॥
विभाभा विश्रिया चैव विकल्पपरिवर्जिता।
दुर्हिता दशनी देवी विधिविच्छिन्नप्रिया॥
विचित्राङ्गी विचित्राभा विरूपा विमलदर्शिनी।
विमला विनया वन्द्या वामदेवी वरप्रदा।
विमानी च विद्यालाक्षी विद्यार्थिसमानिनी।
भवा भोगवती भव्या भवानी भयवासिनी॥
भूतधात्री भयहर्त्री भक्तवत्सला भयापहा।
भक्तिदा भयदा मैत्री भक्तदुःखप्रणाशिनी॥
भागीरथी भाग्यवती भाग्यदा भक्तिभाविता।
भवप्रिया भूतशुद्धिर्भूतिदा भूतभूषणा॥
भोगवती भूतिमती भव्यरूपा भविष्यता।
भूरिदा भक्तिसुलभा भाग्यदृष्टिकरी सदा॥
भिक्षुमाता भिक्षुप्रिया भव्या भवाब्धितारिणी।
महामाया मातृप्रिया महानन्दा महोदरी॥
मातृर्मूर्तिमनोज्ञा च महामङ्गलदायिनी।
महापुण्या महाराज्ञी मैथुनप्रियलालसा॥
मनोज्ञा मानिनी मान्या मणिमाणिक्यधारिणी।
मुनिस्तुता मोक्षकरी मोक्षकर्त्री मनोत्कटा॥
मधुपानरता मत्ता मदाघूर्णितलोचना।
मधुपानप्रमत्ता च मधुलुब्धा मधुव्रता॥
माधवी मालिनी मान्या मनोरथपथाश्रिता।
मोहैश्वर्यप्रदात्री महामङ्गलभाषिता॥
महाप्रभावा महती मांसाक्षी मीनलोचना।
महाकान्तिस्वरूपा महाक्षी महती कला॥
सुमिष्टपा महास्तुता महिमाभिस्वभूषणा।
सुमावतीचित्राङ्गी सुमारत्नप्रसाधिका॥
महापातकराशिघ्नी मनोभवमदिनी।
महामाविभ्रमविभ्राणा महाभूषणभूषिता॥
मायाविनी मोहकर्त्री महाविद्याविधायिनी।
महाप्रेमा महाभूमिर्महामाया प्रिया सती॥
मनोहरी महोन्नामा महामणिविभूषिता।
महामाहस्ववासिनी महामङ्गलदायिनी॥
यमुनिनी यशोदा च यमुनातीरचारिणी।
योगसिद्धिकरी योग्या यमियर्त्तिनप्रिया॥
यशोदा यशस्प्रदा यशोदा यशस्करी।
योगयोगेश्वरी विद्या यामिनी योगमुद्रदा॥
योगयुक्ता यमादर्शनिर्दिष्टसेवाधारिणी।
यमुनावनदेवा च यमुनाजलहारिणी॥
यामिनी यमुना यान्या यमलोकनिवासिनी।
लीलालोकनिवासा च लोकपूज्यलोकमालिका॥
लोकाक्षी लोकमाता च लोकानन्ददायिनी।
लम्बोदरभुजर्दिवासी लोकालोकविधायिनी॥
लोहवर्णप्रभा च लवङ्गदलमालिता।
लोलालोला च लावण्या लतिका लक्ष्मीस्वरूपिणी॥

वासुदेवप्रिया वामा वशमानसमयप्रिया।
वासन्ती वसुदा वन्द्या वैकुण्ठपरायणा॥
वीणावादनरता च वीणाधारविभूषणा।
वेणुवादरता चैव वंशीनादविभूषणा॥
शुभा शुभरतिः शान्ता शैवषा शान्तिविग्रहा।
शीलना शीलिता शोभा शुभदा शुभदायिनी॥
शिवप्रिया शिवानन्दा शिवपूजापरायणा।
शिवस्तुता शिवसखी शिवसिद्धपरायणा॥
श्रीमती श्रीनिवासा च शुचिरूपा शुभव्रता।
शुद्धविद्याप्रकाशी शुभकर्त्री शुभाशया॥
शुभानन्दा शुचि शोषी शिवनिभपराषणा।
शोभनी शुभाङ्गी च शालिनी शिवकर्त्री॥
षड्गुणाढ्यपराक्रान्ता षडङ्गश्रुतिरूपिणी।
सत्या सुप्रभा सिद्धा सिद्धिसिद्धिप्रदायिनी॥
सौभाग्या सखी सखा सखिलाया सम्प्रिया।
सत्यप्रदा श्रुतिः स्तुत्या स्तवनीया स्तवप्रिया॥
सौमित्रा सौमित्रा सौम्या सौभाग्यदायिनी।
सम्प्रदाया स्वधा स्वाहा सर्वानन्दप्रमोदिनी॥
स्वर्गप्रिया सुदामा सर्वमानसदायिनी।
सम्यग्वादिनी राधा सौभाग्यवर्धिनी सती॥
हरप्रिया हिरण्याभा हरिकान्ता हिरण्मयी।
हंसरूपा हरिदासा हरिवर्णा सुनिर्मिता॥
क्षेमदा क्षामिता क्षेमा क्षुद्रपदार्थविधारिणी।
इत्येतद् ब्रह्म प्राह्णि नामचरणाङ्कितम्॥
स्तोत्रं सहस्रनामाख्यं सदरागवर्धनम्।
अनन्ता अनुरागवती आनन्दानन्ददायिनी॥
अनन्ता अशोका च अमला अक्षयानन्दा।
अनामयाकामकला अघोरिष्टा प्रिया॥
अचलगजवद्गुणा विक्षिप्तायापराजिता।
अनायासान्नमोहा आत्मसिद्धिपदप्रदायिनी॥
अणिमादिगुणाधारा अणिमादिकधारिणी।
अनिरुद्धा अनिन्दिता अहङ्कारा च धारिणी॥
अतिसाक्षिणी पूर्णा अन्योन्यममता।
अच्युता अनवच्छिन्ना अनुभवनिधारिणी॥
अमलनीरजाक्षा च अमलानन्ददायिनी।
अनन्तमहिमा माता अनन्तगुणशालिनी॥
अपर्णा अभया आद्या अना अक्षरकल्पिनी।
अविद्याजालशमनी अग्रजकन्दिनी॥
अद्वैतशिवदर्शी अद्वितीयगुणान्विता।
अक्षरा देवी अमलापावनदायिनी॥
अधिष्ठानदक्षा अदितिदेवमयी।
अघोरा अमला देवी अक्षानामित्रकरा॥
अनुपमसुरा देवी अभिराम रमोदिनी।
अश्वदर्शप्रिया अखण्डलकार्यकी॥
आरोग्यदात्री आनन्दा आपद्गतिनिवारिणी।
आदर्शरूपा आदरा अनन्तदा प्रिया॥
आत्माग्निनी च आशा आरम्भावस्थपदा।
इरावतीन्दिरा इन्दुमुखी इन्दिरा॥
इन्द्राक्षी चैव इन्द्राणी ईश्वरप्रदा।
इडा च इन्द्रा च इष्टा इष्टार्थदायिनी॥
इन्दिरा इन्द्राणी इन्दुहारिणी।
इन्द्रानीति इन्द्रा इन्द्रवर्णिनी इन्द्रदायिनी॥

ईश्वरी इष्टगमनी इष्टार्थप्रदायिनी॥
उतप्तहाटकाभूषा उत्तमाभरणान्विता।
उत्तमप्रीतिमया उत्तमोत्तमरूपिणी॥
उमा उषा उदारोदा नन्दिनी च मुनिप्रिया॥
ऊर्ध्वा ऊर्ध्वलिङ्गी च ऊर्ध्वगा च ऊर्जा॥
ऋतुधारा ऋद्धीशी ऋषिपात्रनिवासिनी।
ऋद्धिस्वस्त्रवता ऋद्धिकरत्वपथारिणी॥
लक्ष्मा लक्षिता ऐन्द्री लक्षणा लक्ष्मणाप्रियो
लघुप्रिया लम्बमाना लज्जानीलदमया॥
लघुलघ्वनूपा च लघुलाघवदायिनी।
एकशक्तिनिधर्मा एकैकाङ्गवासिनी॥
ऐश्वर्यैश्वर्यस्पर्शा च ऐन्द्री प्रियदीपिका।
ओजस्विनी ओषधी च ओंकारात्मरूपिणी॥
ओङ्कारजननी देवि ओङ्कारमन्त्रभाषिणी।
औदार्यप्रकटा भद्रे औषधीशधिया॥
अन्धदूता च अग्रणा अम्बा अम्बिका तथा।
अम्बुधात्री च अग्रणा अञ्जुलिप्राञ्जलिभिया॥
अनुभाजी अनुमति अभीष्टप्रदायिनी।
अत्यन्तकृपा भद्रे अलकामयकारा॥
अर्धपात्रा अवदानी च अवधानदा।
अतु नामामान भद्रे अकारादि वराने॥
अश्वमुन्दर शुद्ध निर्मिलमतमालिनी।
कुरङ्गा करदा कान्ता कर्मोन्नतिविधायिनी॥
कमला कल्पलतिका कल्पितकल्पदायिनी।
कमनीयरूपा कर्पूरपूरप्रिया॥
कदम्बकुसुमाभा मदा कामदेविका।
कालिन्दीतीरनिलया कला काम्यमालिका॥
कान्ता कोमलवा कन्या कन्दर्पदा मनोहरा।
गजगामिनी गजराधामा गति गोपचारिणी॥
गिरिसर्वगामिनी गङ्गा गङ्गे गङ्गाधारिका।
गोप्री गोपी विद्या गतिः गात्रदायिनी॥
गुणिपात्रचेतना गणपतिप्रियदिनी।
गारिन् कलानन्दा गङ्गाधराधिरोहिणी॥
गदगदाधरमयी गदा गर्विताश्रणी।
गुह्यानन्दनार्थिनी गन्धर्वपरप्रिया॥
गुडरूपा गुणवती गुरुर्बी भारतीहृषी।
महदीहरा न्या प्रार्थ्यरमणा प्रिया॥
चारुदर्शना चारु चाररूपी चारुदर्शिनी।
चन्द्रवदनाङ्गी चन्द्रधरा विरक्तिनी॥
चापल्यकराज चरा चलनादिगुप्तिनी।
चामीकरनिभा चरणाचीरमयुखा॥
रक्तचन्दनाङ्गी रक्ताङ्गी रक्तमालिका।
शुक्लचन्दनाङ्गी शुक्लाङ्गी शुक्ला कला॥
पीतचन्दनाङ्गी पीताङ्गी पीतमालिका।
कृष्णचन्दनाङ्गी कृष्णाङ्गी कृष्णमालिका॥
शुक्लवस्त्रपरीधाना शुक्लकौशेयिका।
रक्तवस्त्रपरीधाना रक्तकौशेयिका॥
पीतवस्त्रपरीधाना पीतकौशेयिका।
कृष्णवस्त्रपरीधाना कृष्णकौशेयी तथा॥
वृन्दावनेश्वरी राधा वृन्दावनविहारिणी।
चन्द्री वासिनी गोपी वंशी आनन्दिनी॥
नाथेनरंहसा भक्ता वन्या कल्पमादिनी।

त्रिपुरा त्रिपुरादेवी त्रिपुराम्बाकरी सदा ।
त्रिपुरासन्निकर्षस्था त्रिपुरापरिचारिका ।
त्रिपुरापुरवस्था तु या राधा मन्त्रिणी परा ॥
नानासौभाग्यसम्पन्ना नानाभरणभूषिता ।
स्तोत्रं सहस्रनामाख्यं कथितं तव भक्तितः ॥
एतत् स्तोत्रञ्च मन्त्रञ्च कवचञ्च वरानने ।
कल्पे कल्पे च रक्षामि प्रपठेद्यदि मानवः ॥
उपास्य राधिकां विद्यां केवलं कामधेनवीम् ।
बहुकालेन देवेशि उपविद्यापि सिध्यति ॥
मन्त्रिणी राधिका विद्या उपविद्यास्तु निश्चिता ।
महाविद्यां महेशानि उपास्य यतते स्वयम् ॥
प्रकटं परमेशानि राधामन्त्रेण सुन्दरि ।
कृष्ण नाम यदक्षापि प्रकटं यत्तु दृश्यते ॥
छायस्तु कालिकामाद्यात् राधाप्रकृतिमन्त्रिणी ।
हे कृष्ण राधे गोविन्द इत्युच्चार्य यजन्त ॥
यन्नासौ वैष्णवो देवि सत्यमेव प्रकाशते ।
गोविन्दो यस्तु देवेशि स्वयं त्रिपुरसुन्दरी ।
विना मन्त्रं विना होमं विना पूजां विना बलिम् ।
विना गन्धं विना पुष्पं विना नित्योदितां क्रियाम् ॥
प्राणायामं विना ध्यानं विना भूतविशोधनम् ।
विना जपं विना दानं येन राधा प्रसीदति ॥
राधासहस्रनामाख्यस्तोत्रमार्गेण पार्वति ।
यो जपेद्यस्य मन्त्रं राधिकामन्त्रमेव च ।
स पतेन्नरके घोरे यावदिन्द्राश्चतुर्दश ।
मुखा गुरुमुखाज्ज्ञात्वा वैष्णवो भक्तितत्परः ।
ततः पुरश्चरीं कुर्यादेकविंशतिवासरकम् ।
पूर्णाभिषेकविलम्बं ततो गुरुपदार्चनम् ॥
विना पूर्णाभिषेकञ्च भवाब्धौ पारमिच्छति ।
अधमस्तस्य दुःखैर्निरये पतनं भवेत् ॥
यत्र यत्र महेशानि यत्र यत्र सदाम्बिकम् ।
भवाब्धितरणे नास्ति विना पूर्णाभिषेचनम् ॥
नानागमपुराणानि वेदवेदाङ्गशास्त्रतः ।
मयोद्धृतं महेशानि सारं पूर्णाभिषेचनम् ॥
तस्मात् सर्वप्रयत्नेन कुर्यात् पूर्णाभिषेचनम् ।
कृत्वा पूर्णाभिषेकञ्च पठेत् राधास्तवं प्रिये ॥
सारपाठान्महेशानि स भवेद्ब्रह्मनन्दनः ।
स्तोत्रं सहस्रनामाख्यं यः पठेत् जपतो मनुम् ॥
राधाकृष्णस्य देवेशि तस्य पापफलं महत् ।
कुम्भीपाके स पच्येत यावदे ब्रह्मणः शतम् ॥
विष्णुमाता यथा मेधा भवेद्भागीरथी प्रिये ।
वैष्णवानां यथा शम्भुः प्रस्तोत्राणां यथा स्तवो ॥
पुरुषाणां यथा विष्णुर्नगानां यथा मेरुः ।
स्तवानाञ्च तथा मेरु राधास्तोत्रमिदं प्रिये ॥
अपूर्वादिक सद्गन्धर्वविद्यामात्रिकया ।
श्रीराधास्तोत्रपाठस्य कलां नार्हति षोडशीम् ॥"
इति नारदपञ्चरात्रे राधातन्त्रे राधिकाष्ट सहस्रनामस्तोत्रम् ॥ १० ॥) अथ राधाकवचम् ।

श्रीपार्वत्युवाच ।

"कैलासवासिन् भगवन् भक्तानुग्रहकारक ।
राधिकाकवचं पुण्यं कथयस्व मम प्रभो ॥
यद्यस्ति करुणा नाथ त्राहि मां दुःखतो भयात् ।
त्वमेव शरणं नाथ शूलपाणे पिनाकधृक् ॥

श्रीमहादेव उवाच ।

शृणुष्व गिरिजे तुभ्यं कवचं पूर्वसूचितम् ।
सर्वरक्षाकरं पुण्यं सर्वहत्याहरं परम् ॥
हरिभक्तिप्रदं साक्षात् भुक्तिमुक्तिप्रसाधनम् ।
त्रैलोक्याकर्षणं देवि हरिसान्निध्यकारकम् ॥
सर्वत्र जयदं देवि सर्वशत्रुभयापहम् ।
सर्वेषाञ्चैव भूतानां मनोवृत्तिहरं परम् ॥
चतुर्धा मुक्तिजनकं सदानन्दकरं परम् ।
राजसूयाश्वमेधानां यज्ञानां फलदायकम् ॥
इदं कवचमज्ञात्वा राधामन्त्रञ्च यो जपेत् ।
स नाप्नोति फलं तस्य विघ्नास्तस्य पदे पदे ॥
ऋषिरस्य महादेवो ऽनुष्टुप्छन्दः प्रकीर्तितम् ।
राधास्य देवता प्रोक्ता रां बीजं परिकीर्तितम् ॥
धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः ।
श्रीराधा मे शिरः पातु ललाटं राधिका तथा ॥
वृषभानुसुता दन्तान् चिबुकं गोपनन्दिनी ।
चन्द्रावली पातु गण्डं जिह्वां कृष्णप्रिया तथा ॥
कण्ठं पातु हरिप्राणा हृदयं विजया तथा ।
बाहू द्वौ चन्द्रवदना उदरं सुबलस्वसा ॥
कटिं योगान्विता पातु पादौ सौभद्रिका तथा ।
नखान् चन्द्रमुखी पातु गुल्फौ गोपालवल्लभा ॥
सुखं विधुमुखी पातु गोपी पादतलं तथा ।
शुभप्रदा पातु पृष्ठं कुक्षौ श्रीकान्तवल्लभा ।
गुह्यदेशं सदा पातु हरिणी पातु सर्वतः ॥
वाक्यं वाणी सदा पातु धनागारं धनेश्वरी ।
पूर्वां दिशं कृष्णरता कृष्णप्राणा च पश्चिमाम् ॥
उत्तरां हरिता पातु दक्षिणां वृषभानुजा ।
चन्द्रावली नैशमेव दिवा क्ष्वेडितमेखला ॥
सौभाग्यदा मध्यदिने सायाह्ने कामरूपिणी ।
रौद्री प्रातः पातु मां हि गोपिनी रजनीक्षये ॥
हेतुदा सङ्गवे पातु केतमाला दिवार्द्धके ।
शेषापराह्णसमये शमिता सर्वसन्धिषु ॥
योगिनी भोगसमये रतौ रतिप्रदा सदा ।
कामेशी कौतुके नित्यं योगे रत्नावली मम ॥
सर्वदा सर्वकार्येषु राधिका कृष्णमानसा ।
इत्येतत् कथितं देवि कवचं परमाद्भुतम् ॥
सर्वरक्षाकरं नाम महारक्षाकरं परम् ।
सर्वार्थसिद्धिस्तस्य स्यात् यद्यन्मनसि वर्तते ॥
राजद्वारे सभायाञ्च संग्रामे शत्रुसङ्कटे ।
प्राणार्थनाशसमये यः पठेत् प्रयतो नरः ।
तस्य सिद्धिर्भवेद्देवि न भयं विद्यते क्वचित् ॥
आराधिता राधिका च तेन सत्यं न संशयः ।
गङ्गास्नानात् हरेर्नामग्रहणात् यत् फलं लभेत् ॥
तत् फलं तस्य भवति यः पठेत् प्रयतः शुचिः ।
हरिद्रारोचनाचन्द्रमण्डितं हरिचन्दनम् ॥
कृत्वा लिखित्वा भूर्जे च धारयेत् मस्तके भुजे ।
कण्ठे वा देवदेवेशि स हरिर्नात्र संशयः ॥
कवचस्य प्रसादेन ब्रह्मा सृष्टिं स्थितिं हरिः ।
संहारञ्चाहं नियतं करोमि कुरुते तथा ॥
वैष्णवाय विशुद्धाय विरागगुणशालिने ।
दद्यात् कवचमव्यग्रमन्यथा नाशमाप्नुयात् ॥"
इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे वरदावे सर्वरक्षाकवचं समाप्तम् ॥ ७ ॥ (राधामन्त्रोक्त राधिकाकवचं यथा —

देव्युवाच ।

"देवदेव महादेव सृष्टिस्थित्यन्तकारक ।
राधिकाकवचं देव कथयस्व दयानिधे ॥

ईश्वर उवाच ।

शृणु देवि वरारोहे कवचं सर्वमोहनम् ।
गोपितं सर्वतन्त्रेषु इदानीं प्रकटीकृतम् ॥
या राधा त्रिपुरा दूती उपविद्या सदा तु सा ।
उपविद्याक्रमाद्देवि कवचं शृणु पार्वति ॥
अपूर्वविद्यापरस्य फलं सर्वसमृद्धिदम् ।
यस्य तस्य न वक्तव्यं कवचं गोपितं स्मृतम् ।
भक्तिहीनाय देवेशि द्विजनिन्दापराय च ।
न शून्याय प्रदातव्यं वक्तव्यं परमेश्वरि ॥
शिष्याय भक्तियुक्ताय शक्तिमन्त्रपराय च ।
वैष्णवाय विशुद्धाय गुरुभक्तिपराय च ।
वक्तव्यं परमेशानि मम वाक्यं न चान्यथा ॥
अस्य श्रीराधाविद्यामन्त्रकवचस्य गोविन्द ऋषिरनुष्टुप्छन्दः श्रीराधिका देवता मम विद्यासाधनमोक्षे विनियोगः ।
ॐ पूर्वे च पातु सा देवी वह्निशी शुभदायिनी ।
ह्रीं पश्चिमे पातु सदा सर्वकामप्रपूरणी ।
याम्यां ह्रीं कामदा पातु सर्वकामफलप्रदा ।
उत्तरे पातु भद्रा ह्रीं भद्रमुक्तिप्रदायिनी ।
ऊर्द्ध्वं पातु महादेवी श्रीं कृष्णं तथा पदान्विनी ।
अधश्च पातु मां देवी ऐं पातालतलवासिनी ॥
अधरे राधिका पातु ह्रीं पातु कण्ठं मम ।
स्तनौ पातु च नाभिं च ह्रीं त्रिपुरा च पुनः पुनः ।
सर्वत्र पातु मे देवी त्वरिता भुवनेश्वरी ।
ऐं ह्रीं राधिकायै क्लीं ह्रीं शिरः पातु मां सदा श्रीं श्रीं राधिकायै श्रीं श्रीं ललाटं रक्षतु मम। ह्रीं ह्रीं राधिकायै ह्रीं ह्रीं नासाग्रं रक्षतु मन्त्रिणी मन्त्ररूपिणी। ऐं ह्रीं राधिकायै ऐं ऐं वक्त्रं रक्षतु मम। श्रीं श्रीं ऐं ऐं राधिकायै ह्रीं ह्रीं ऐं ऐं श्रीं श्रीं ॐ वक्षःस्थलं मम रक्षतु। श्रीं राधिकायै श्रीं नाभिदेशं रक्षतु सदा मन्त्रिणी। ह्रीं राधिकायै ह्रीं कटिदेशं रक्षतु मम। ऐं राधिकायै ऐं कक्षद्वयं सदा रक्षतु मम। ह्रीं राधिकायै ह्रीं बाहुद्वयं सदा रक्षतु मम। ॐ ह्रीं राधिकायै ॐ ह्रीं रसनां सदा पातु कामदा। ह्रीं भुवनेश्वरी ललाटं पातु ह्रीं वाणी मे मुखमण्डलं सदा पातु। ह्रीं ह्रीं ह्रीं मन्त्रमन्त्रिणी ह्रीं ह्रीं मन्त्रमन्त्रिणी हृदयसंस्थिता करद्वयं रक्षतु सदा मम। ऐं ह्रीं ऐं मातङ्गी पृष्ठं सदा मम रक्षतु। ह्रीं ऐं ह्रीं जयन्ती पादपीठं सदा रक्षतु मम। श्रीं ऐं ॐ दुर्गा श्रीं ऐं श्रीं सर्वाङ्गं त्रिभुवन रक्षतु मम। ॐ ह्रीं ॐ हंसिनी हृदयं रक्षतु मम। ऐं ऐं ऐं कामाख्ये ऐं ऐं ऐं जङ्घाद्वयं रक्षतु मम। ह्रीं भैरवी सर्वाङ्गं रक्षतु मम। ह्रीं

अग्रपृष्ठे श्रीं पातु रक्षतु मम। ऐं श्रीं ऐं
जीवश्चव सदा पातु पृष्ठदेशं मम। ॐ सदा
दक्ष पातु सर्वाङ्गं मे ॐ नारायणः पातु
सर्वाङ्गं सदा मम।
ॐ ॐ कृष्णः पातु सदा गोपीश रुक्मिणीनाथ।
रुक्मिणी सत्यभामा च मैत्रा जाम्बवती तथा।
लक्ष्मणा मित्रवृन्दा च भद्रा नग्नजिता तथा।
एता सत्या पुनश्च प्राणेशाख्या सुलोचना।
रक्षेयुर्मां सदा नित्यं सततं शुभमङ्गला।
ॐ नारायणश्च गोविन्दः शिरः पातु सदैव मम।
सर्वाङ्गं मे सदा रक्षेत् केशवः श्रीपतिर्हरिः।
इतीदं कवचं भद्रे त्रैलोक्यमङ्गलं शुभम्।
संप्रश्ना परमेशानि उर्व्विवाद्य प्रदत्तम्।
य पठेत् पाठयेद्वापि सततं भक्तितत्परः।
निराहारी ब्रह्मचारी चतुर्थं वत्सरे सदा।
तन्त्रैव परमेशानि पद्मिनी बहुनामिषात।
यस्मै कथित देवि कवच श्रुति दुर्लभम्।
धनमन्त्रस्य कृता पठेत् वत्सरं यदि।
पद्मिनी ब्रह्मणापि तदेव नानाविधैरि।
अनेनैव विधानेन य पठेत् कवचं परम्।
विष्णुलोकमवाप्नोति मानवा वचनं मम।
संगोप्य पूज्यवेदितो महाविद्यो महाजन।
प्रकटार्थमिदं इति कवचं प्रपठेत् सदा।
महाविद्यां विना भद्रे य पठेत् कवचं प्रिये।
सदैव भक्तया भद्रे कुम्भीपाके वसेत् प्रिये।"
इति वासुदेवरहस्ये राधातन्त्रे एकविंशत्
पटल ।) अथ राधास्तोत्रम्।
"श्रीकृष्ण नाम स्तोत्र प्रपठेत् भक्तिपूर्वकम्।
राधा राधेश्वरी रम्या परमा च परात्परा।
राधोत्तमा तत्त्वकान्ता कृष्णवक्षःस्थलस्थिता।
कृष्णप्राणाधिदेवी च महाविष्णुप्रसूरपि।
सर्वेशा विष्णुमाया च सत्यामत्या सनातनी।
ब्रह्मस्वरूपा परमा निर्लिप्ता निर्गुणा परा।
वृन्दावनेश्वरी विरजा यमुनातटवासिनी।
गोपाङ्गनानां गोपी गोपीशा गोपमाङ्गला।
सानन्दा परमानन्दा नन्दनन्दनकामिनी।
वृषभानुसुता शान्ता कान्ता पूर्णतमा च।
काम्या कलावती कन्या तीर्थपूता सतीशुभा।
सप्तविंशति नामानि धर्मार्थानि शुभानि च।
सारभूतानि पुण्यानि सर्वनामसु नारद।
य पठेत् प्रयतः शुद्धो विष्णुभक्तो जितेन्द्रियः।
इह वै विमलो कीर्त्तिं अन्ते याति हरेः पदम्।
पुरैव न हरेर्दास्यं लभते नात्र संशयः।
अथो जन्मनि तत्रैव लोकेऽपि स्वभवेत् ध्रुवम्।
ग्रहपीडाभयात्स्मात मृत्युभ्यः प्रमुच्यते।
पद्मा कृष्णप्रिया चैव पठेत् त्रिसन्ध्यं सदा।
यो पठेत् कार्तिक्यां पूर्णिमायां मधुसूदनाद्यपि।
कोटिकल्पसहस्राणि सुखानि भवे तद्वद।
जातश्चात् वारुणमा यज्ञ स्नात्वा प्रमुदे।
प्रभोरपि भक्तेष वा पूजा विधाय भोजनी।
प्रभोरपि प्राणैष या सर्वत्रैव अर्पिता।
वाञ्छितं मुक्तं लभते च समस्त द्वय।"
इति नारदपञ्चरात्रे ज्ञानामृतसारे द्वितीय
रात्रौ शिवनारदसंवादे भक्तिज्ञानकथन
नैराधिकास्तोत्रं समाप्तम्।

राधाकान्त, पुं, (राधायाः कान्तः।) श्रीकृष्णः।
यथा,—
"गोलोके शिवश्च लक्ष्मी राधाकान्त सनातन।
गोपाङ्गनाभिर्युक्तो शिवशैलोपपाश्वे।"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १७ अध्याय।
राधातनय, पुं, (राधायाः पालनजात्तनयः।
तथा पालितत्वात् तथात्वम्।) कर्णः। इति
हेमचन्द्रे मर्त्यकाण्डे राधासुतशब्ददर्शनात्।
राधाभेदी, [न्] पुं (राधां लक्ष्यविशेषं भिन
त्तीति। भिद्+णिनि।) अर्जुनः। इति भूरि
प्रयोग।
राधावेधी, [न्] पुं, (राधां लक्ष्यविशेषं
विध्यतीति। विध+णिनि।) अर्जुनः। यथा,
"राधावेधी किरीटी च जिष्णुः श्वेतहयो नरः।
इन्द्रसुनुः गुडाकेश सुभद्रेश कपिध्वजः।
बीभत्सुः कृष्णसखश्च गाण्डीवं माद्रिसुत धनु।"
इति हेमचन्द्रः। ३। १०३।
राधासुत, पुं (राधायाः पालनजातः सुत।)
कर्ण। यथा—
"वैकर्त्तनो यामयनी च कर्णश्चम्पाधिपोऽङ्गराट्।
राधासुतो कर्णस्य कालपृष्ठम् तद्धनुः।"
इति हेमचन्द्रः। ३। १०५।
(यथा महाभारते। ८। ८६। ७।
"यस्य वीर्यं समाश्रित्य रथं कश्यप पाण्डव।
चेतसाचिन्तयामास पुत्रं राधासुतेन च।")
राधेय, पुं, (राधाया अपत्यमिति। राधा+
"स्त्रीभ्यो ढक्।" ४।१।१२०। इति ढक्।)
कर्णः। इति त्रिकाण्डशेषः। (यथा महा
भारते। १। १३६। ११।
"सम्यक्प्रहष्ठु राधेयो युद्ध यौवनमिवागतः।")
राध्य, त्रि (राध्यते इति। राध+"ऋहलोर्ण्यत्
स्वीते।" ३।१।१२४। इति ण्यत्।) आरा
धनीय। उपास्यो समाधि ध्यानप्रसाधन
विषय।
राम क्ली, (रम्यते अनेन। रम्+घञ्।) वास्त
कम्। कुष्ठम्। इति मेदिनी। मे ४६। तमाल
पत्रम्। इति राजनिघण्टः। (श्वेत तम।
यथा, ऋग्वेद। १ । ६४। ९।
"सुपर्णैर्ह्रिरक्षिरभिरूप्सः
वक्षःसुवर्णैरभिरामभङ्गात्।"
"राम कृष्णवर्णे मार्जार नाम अन्धकारसाम्ये
दोषगाढ पश्चिमूर्ध्व स्थितः।" इति सायण
भाष्यम्।)
राम, त्रि,(रमते इति। रम्+ण। रम्यतेऽनेनेति।
रम्+घञ् वा।) मनोज्ञ। (यथा रघुवंशे
भट्टिकाव्यम्। १८। ७।
"कृष्ण प्रमुदितो नवनाभिरामः
रामा रघोरपिरभ रमयन्ति रामान्।")
सित। असित। इति मेदिनी। मे ४०।
राम, पुं (रमते इति। रम क्रीडायाम्+
"ज्वलितिकसन्तेभ्यो ण।" ३।१।१४०।
इति णः।) परशुराम। स तु विष्णोः षष्ठ
अवतारविशेषः पुत्रश्च जमदग्न्यमपश्चैव
एकविंशतिवारान् पृथिवीं निःक्षत्रियाञ्चकार
रोम। (अयं एव सामानवर्त्ते यथा वर्णित
श्रीविष्णुपुत्रान् विवाह विष्णु बलदेवात्।
यदुनामं महाभारते। १।२।९—११।
श्रीनिवासाच।
"सकुर्म्ब मम भो विप्र कुरुतश्च कथा पुनः।
यज्ञानपञ्चकाख्यश्च श्रोतुमहैव तन्मम।
पौलस्त्याधवो धर्मो राम ब्रह्मचारीरः।
समस्तं मार्षिवं राम बलावामकषोदय।
स सर्वे धर्मशास्त्राद सर्वार्थनिवस्ति।
समन्तपञ्चके पञ्च चकार रौधिरान् हदान्।
स तेषु रुधिराम्भःसु हृदेषु क्रोधमूर्च्छितः।
पितृन् सन्तर्पयामास रुधिरेणेति नः श्रुतम्।
अथर्चीकादयोऽभ्येत्य पितरो राममब्रुवन्।
राम राम महाभाग प्रीताः स्मो भार्गव।
अनया पितृभक्त्या च विक्रमेण तव प्रभो।
वरं वृणीष्व भद्रं ते यमिच्छसि महाद्युते।
राम उवाच।
यदि मे पितरः प्रीता यद्यनुग्राह्यता मयि।
यच्च रोषाभिभूतेन क्षत्रमुत्सादितं मया।
अतश्च पापान्मुच्येऽहमेष मे प्रार्थितो वरः।
ह्रदाश्च तीर्थभूता मे भवेयुर्भुवि विश्रुताः।
एवं भविष्यतीत्येवं पितरस्तमथाब्रुवन्।
तं क्षमस्वेति निषिषिधुस्तत्र विरराम च।
तेषां समीपे यो देशो ह्रदानां रुधिराम्भसाम्।
समन्तपञ्चकमिति पुण्यं तत् परिकीर्त्तितम्।"
अस्याख्यायिका परशुरामशब्दे द्रष्टव्या।)
राघवः। श्रीरामचन्द्रः। स च पूर्णब्रह्म
अयोध्याधिपतिरघुवंशराजदशरथस्य पुत्रः
श्रेय रावणादिवधार्थमवतीर्णः। बलदेवः। स
तु वसुदेवस्य पितृदेवः सप्तमगर्भो रोहिण्याः
पुत्रश्च रामकृष्णयोः अंशावतारशब्दे।
(यथा, भागवते। १। ११। १७।
"विदन्ति प्रेममायाकं वासुदेवो महामनाः।
अक्रूरोप्युद्धवश्च रामश्चानुविष्णुः।")
अथ रामाः यथा —
"जमदग्निसुतश्चैव महाबाहुः प्रतापवान्।
भार्गवो राघवो गौरवकपा रामा प्रकीर्त्तिताः।"
इति वाह्निराज। ७।
वरुण। चौरक। ये मुनिः। इति मेदिनी।
मे, ४६। (रम्+भावे घञ्। रतिः। यथा,
भागवते। ७। ६। १९।
"अत्रैव तत्त्ववत् निलाक्षी
निविष्टो च मधुरराम।"
"मधुरमेव रामो रतिरस्य।" इति तत्र
श्रीधरस्वामी।) रामकृष्णस्य दर्शनं यथा—
"रामचन्द्रो विष्णुर्भवो महार्षिर्वरदश्च।
त्रिलोकाधीश्वरश्चैव विदेह राम दशकर।"

रमते रमया सार्द्धं तेन रामं विदुर्बुधाः ।
रमाया रमणस्थानं रामं रामविदो विदुः ॥
रा चेति लक्ष्मीवचनो मश्चापीश्वरवाचकः ।
लक्ष्मीपतिं गतिं रामं प्रवदन्ति मनीषिणः ॥
नाम्नां सहस्रं दिव्यानां स्मरणे यत् फलं लभेत् ।
तत् फलं लभते नूनं रामोच्चारणमात्रतः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११ अध्यायः ॥
(तथा च अध्यात्मरामायणे । १ । ३ । ४४ ।
"यस्मिन् रमन्ते मुनयो विद्यया ज्ञानविप्लवे ।
तं गुरुः प्राह रामेति रमणाद्राम इत्यपि ॥")
एतज्जन्मरामायणघटनाकालं विचार्य्य यदुक्तं रामानुजेन तदाह । "अत्र युद्धान्वेषणगमनायां कलकलोर्य्यौ । पूर्व्वं सुवेलारोहणदिने ।
[illegible] सर्व्वं सन्ध्यया प्रतिरञ्जितः ।
पूर्णचन्द्रप्रदीप्ता च क्षपा समतिवर्त्तते ॥
इत्युक्तिदिने चतुर्द्दशीपूर्णिमान्यतरदिति ध्येयम् । तत्र कृष्णप्रतिपदि युद्धारम्भस्तस्यामेव रात्रौ नागपाशबन्धतद्विमोचौ । द्वितीयायां धूम्राक्षवधः । तृतीयायां वज्रदंष्ट्रस्य । चतुर्थ्यामकम्पनस्य । पञ्चम्यां प्रहस्तस्य । षष्ठ्यां रावणभङ्गः । सप्तम्यां कुम्भकर्णवधः । अष्टम्यामतिकायादेः । नवम्यामिन्द्रजितो ब्रह्मास्त्रप्रयोगः । दशम्यां दिवा निकुम्भवधः । तद्रात्रौ मकराक्षवधः । एकादश्यादिद्वयोरग्रस्तान्निमित्तेन इन्द्रजिद्वधः । चतुर्द्दश्यां [illegible]वधः । अमायां रावणयुद्धारम्भस्तद्धारादि पञ्चम्यादिनानि सर्व्वं युद्धमिति । अत्रेदं वक्तव्यम् । केयं कृष्णप्रतिपत् माघकृष्णस्य वा चैत्रकृष्णस्य वा । नाद्यः चैत्रे पुष्यायामयोध्यातो वनं प्रति रामस्य प्रस्थानमिति अयोध्याकाण्डे । चैत्रे पुष्यम् [illegible] पञ्च एव तथापि नवम्यादिदिनद्वये एवेति ज्योतिषादौ । तत्र नवमीदिक्षालात् [illegible] दशम्येव तु पुष्यादृयोग्या । एवञ्च चैत्रशुक्लदशम्यां प्रस्थानम् । तत्र माघकृष्णामायां युद्धसमाप्तौ तदुत्तरपञ्चम्यां भरद्वाजाश्रमगमनम् ।
'पूर्णे चतुर्द्दशे वर्षे पञ्चम्यां लक्ष्मणाग्रजः ।
भरद्वाजाश्रमं प्राप्य ववन्दे नियतो मुनिम् ॥'
इति वचनबलात् । तत्र च न चतुर्द्दशवर्षसमाप्तिरिति भरतस्य प्रतिज्ञाहानिः । पूर्णे चतुर्द्दशे वर्षे इत्युक्तिरसङ्गतिश्च । द्वितीयस्तु [illegible] । चैत्र शुक्लपञ्चम्यां तथात्वेऽपि पञ्चदिनन्यूनत्वेऽपि तद्दोषतादवस्थ्येन । चतुर्दशदिनेऽपि न [illegible] [illegible] । अमान्तमानेन चैत्रशुक्लपञ्चम्यां [illegible] चतुर्द्दशवर्षेऽपि [illegible] चतुर्द्दशवर्षसमाप्तिर्दिनैःषोड्शभि [illegible] "मम माता चैया" इति भरतप्रतिज्ञा [illegible] । सा च प्रतिज्ञा चित्रकूटे रामदर्शनप्र[illegible] दत्तम् । एतेन चैत्रस्य [illegible] युद्धारम्भ[illegible] रावणवधार-
इति सौर्य्यक्तचैत्रशुक्लादित्यन्योऽपि परास्तः । पूर्णिमान्तमानेन तिथिवृद्धादशमासैर्न्यूनमान पञ्चदिनानां न्यूनत्वात् । अमान्तमानेन चैत्रकृष्णपक्षे बहुदिनाधिक्यम् । सावनमानेन षड्रात्रचित्रता दिनैर्न्यूनमाने तु तिथिवृद्धकाल तत्र षड्दिनाधिक्येन चतुर्द्दशवर्षाण्याचतुरश्रो अहोरात्रवृद्धा बहुन्निन्यूनतैव । किञ्च महाभारते युधिष्ठिरवनवासे त्रयोदशवर्षनित किञ्चित्कालादन्यागेव तेषां प्राकट्यं दुर्य्योधनेन लब्धमासौ एवं प्राकट्येन पुनस्तावत्पर्य्यन्तं पुनरतैनवासः कर्त्तव्यो भविष्यतीति भीष्मप्रयुक्ते भीष्मवाक्य विराटपर्व्वणि ।
पञ्चमे पञ्चमे वर्षे द्वौ मासावुपजायतः ।
एषामभ्यधिका मासाः पञ्च च द्वादश क्षपाः ॥
त्रयोदशानां वर्षाणामिति मे धीयते मतिः ।
सर्व्वं यथावच्चरितं यद्यदेभिः प्रतिश्रुतम् ॥
एवमेतद्ध्रुवं ज्ञात्वा ततो बीभत्सुरागतः ।
सर्व्वे चैव महात्मानः सर्व्वे धर्म्मार्थकोविदाः ।
येषां युधिष्ठिरो राजा कस्माद्धर्म्मेऽपराध्नुयुः ॥
इति । एवञ्चैकपञ्चवत्सरात्मकवृद्धादशमासैरेव पञ्चमासा । अधिकमासगणना चोचितैव । एवञ्चाधिकमासगणनायां धर्म्मोऽहानौ न्याय्यत्वे च स्थिते कथमामन्ताङ्गपेक्षेत । भरतो वा तत्र गच्छेत् । एवञ्चामान्तमानेन चतुर्द्दशी याञ्चिकक्षये । पूर्णिमान्तमानेन फाल्गुनकृष्णे षष्ठ्यां तत्समाप्तिर्ज्ञायाति । अन्यथा चैत्र शुक्लदशम्यामारब्धस्य वनवासस्य षष्ठ्यां चतुर्द्दशवर्षसमाप्तिः कथमप्युपपद्यते । तद्वने तु एकादशदिनन्यूनवर्षा मासानां चतुर्द्दशवर्षेषु वृद्धावुपपन्न एव सा । तथाच द्वादशपञ्चमासात् पर त्रयोदश किञ्चिद्गतीते अरण्यकाण्डोक्ता मारीचा पासपुकरन्दो रावणकृतसीतापहारः । ततश्चतुर्द्दशे किञ्चिद्गतीते रामस्य सुग्रीवमैत्रीप्रस्थानम् । यतो दशमो मासो द्वौ तु शिष्टौ प्लवङ्गमेति सीतोक्तिः श्रावणमासक्षयरेखादिदिक्ष कालगणना । तत्र पूर्णचन्द्रप्रदीप्ता चेति रामोक्त्या पौषशुक्लचतुर्द्दश्यां पूर्णिमायां वा त्रिकूटशिखरप्राप्तो रामस्य । किञ्च हनूमतो वहायते [illegible] सीतादर्शनकाले हिमवारणञ्च सीतायामिशिरस्थितिनो चैत्र वह्वरोऽसिति वाक्येन दौ मासौ रक्षितव्यौ मे योऽवधिस्ते मया कृत इति रावणवाक्येन मासद्वयानन्तरं वक्ष्यतो बृहस्पतिर्द्विदिन एवाज्ञेरे वक्ष्यते इति सिद्धान्तं सुन्दरकाण्डे । ततो मासद्वयानन्तरं रावणवधावश्यकत्वेन पौषपूर्णिमादेवी वध सम्भवेच्च । ततो दशदशदिनार्द्ध [illegible] पूर्णिकारिका मताः । ततो युद्धारम्भश्च तदारभ्य माघ कृष्णामावास्यान्तं चतुर्दशदिनं कृत्यं रावणस्य युद्धम् । ततो बहुदश [illegible] सीतारामदत्ता बद्धा [illegible] । ततुत्तरपञ्चम्यां दशाहानन्तरं पुष्पकारोहण-
इत्यादि । अतएव प्रवरसमस्तवरावणवधकात्मसीतावासम् । सीता भागरमणाभ्यामाला गौण्यद्व इत्यादिति । अतएव वर्षादिनवृद्धे बहून् रात्रीन् वसितेषु युद्धकनिषद्वदुर्गालाद् भिरद्वौ शैलौ नयौ प्रवरस्य इति लभ्यते । तत्र च ते सुमहान् कालः प्रयातस्य महात्मनः कुम्भकर्णस्यापि रावणोक्त्या नामतः प्रमाणा बहुशाखाधिकत्वप्रतीतश्चैवमेषा एव । किञ्च विनचैतत् प्राक । [illegible] नानीति इति कुम्भकर्णन्दति रावणात् पूर्व मन्त्रकरणोत्तर मध्ये मासद्वयाभावस्य प्रतीतिः । किञ्च । प्रवरसन [illegible] कृष्णप्रतिपत् । तस्या पूर्णिमोत्तरत्वेन सम्वत्सरान्ते चन्द्रघातमा तस्मिन् समपि रावणे इत्याद्युक्तिरसङ्गत्यापत्तेन शुक्लप्रतिपदाद्या । एवञ्चामान्तपञ्चमाषवृद्धिमित्याद्यन्तमसङ्गत्यापत्तिः । यत्तु अमायामेव रावणवध इति तत्तु न युक्तम् । इन्द्रजिद्वधोत्तरम् ।
'अभ्युत्थानं त्वमद्यैव कृष्णपक्षचतुर्दशीम् ।
कृत्वा निर्य्याह्यमावास्यां विजयाय बलैर्वृतः ॥'
इति रावणम्प्रति सुपार्श्वोक्त्या । चतुर्द्दश्यां रावणमेवितरत्नवधात्तदमायां विजयरावणैव रामलक्ष्मणयोर्द्वे रात्रौ लक्ष्मणस्य शक्ति पातोत्तरं रावणस्य पराजयेऽप्युक्तया तदा लक्ष्मणचिकित्सोत्तरं पुना रामरावणयुद्धस्य वाल्मीकिनैव वर्णितया सदनन्तरात् । किञ्च । आदित्यहृदयपाठादिना प्रेत अर्द्ध पर [illegible] कर्दमोर्द्दं सम्पोलनया रावणमरणोत्तरं छिन्नभ्राभ्रदर्शनाकर इत्युक्ता दिवा तद्यन्त्रोक्ता च [illegible] तद्यं प्रतिपातस्य तदनन्तरपौर्णमासनमारो यावसं रामारोभो प्रतिपातपक्ष्मा [illegible] प्रतीता च संविरोधात् । तथा चाह ।
'ततो भवेन्महद्युद्धं बहुलं रुधिरद्रवम् ।
सप्ताहं प्रथमं युद्धं मारिष्म प्रतिपद्यताम् ॥
प्रतिपदि [illegible] । इत्यादि ।
'ततो भवेन्महद्युद्धं [illegible] ततो ।
वधञ्च रावणस्याद्य रामाच्च परिसम्भव ॥
तत्र [illegible] । [illegible]
[illegible] रामस्यैव तदा । ततो [illegible]
[illegible] रावणं रामविजया च
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

द॰ बोधय दिनद्वयेन । स चोक्तिन कम्मकर्म्मसु ।
मन्मयापदे बोधनोरर षष्ठमयापदे दक्षय ।
यत्र तु बोधन कन्या रावौ भक्त्याधिगदय इत
यत । मन्वादिन कुम्भशानिग्रहमयन रावि
मध्ये बोधनतारात । रावणस्त्रिदशमहाराज
मन्मथया रावणस्त्रिकन्याभिमानयुत
[illegible] शिरा सहस्रो युक्तामभवत । इत्
[illegible] यथोक्तम यामदण्डकमेकस्या
मनुनराण । दुर्गा मातृमूर्त्तिमायाभिगदय ।
कृतार सकृत्योऽन्यस्त्रितार्थं स्यात्स्वयम् ।
यस्मात्सद् दिन्यं देवैरारोपि रम्या कमोत् ।
कुन्भगता समाजीना मर्थाभिधमक्षीघर ।
शक्यानिलयाप्रयाम तत्र यते समुत्थिता ।
अन्विदु कपिरादकुमा निष्मा बायुकोऽवधीत् ।
मर्दा लिङ्गि रघुश्रेष्ठा नधान मकरध्वजम् ।
मायामीनावधकर्त्ते मत्स्यनिदनसदृशि ।
तैन निद्राऽभयदान कामदी तन्मुखेन च ।
अधोन्यादि सौमित्रिन्निद्रिन बोधयद् भगौ ।
कधान प्रबोधेनार्दं रारभ्यानप देशुना ।
भन्विदु अन्विदु दिवंशु । यथानिकायपक्षय
शिशुरीन्याणकटाक्षकमदोऽन्यमहापार्श्वं
धनन्यम् । सत्यवपदननन्दनपालोहतुम
शतक्रतु । सर्वं महर्षिदेवै सर्वो यत ।
गुप्य करेटैव गदपाक्ति । अन्दि साम्भाम् ।
यतैनाकपनमहन्याम् । कन्तिपुष्पमन्वान् । तस्य
निधि कपौरावा नरमर्ते मायापौनायघ ।
तथा हरमौषपुष्पदामसास्य मधाहमोषतुष
सास्पलग्नात्न्वितय ।
'तनोऽदपीनाभयकपगुहरातो रथद्द ।
दशीऽय निर्मथी रावा पोत्तु रामेन मधुरे ।
चतुरेऽवने मार्ह मतिमिहं सहस्र ।
हस्यनामतपत्र कर्माभरभ्रुपित ।
महारयनौ रारादसरामिमधीं यदि ।
व्याप्तौ रत्नौ रावा जगत्रा देवदत्त ।
पोतु रघुररौमि मुहु कमहर्षीमि ।
तत्र पुत्र यमाभरहतनरागाय रत्नवान् ।
रामरावणयोर्वैव तथा शास्त्रिविशा मध ।
पालिवितेव मंजुषु पोत्रमं दत्ति रावण ।
कन्युका चारमन्भाय सौमित्रिश विषदनाम्
तथा स बायमानक धनु समान घटोनये ।
कुम्भना कौस्तोभूषावरानप्रधान् पुनः ।
तत् क्रुद्धो महात्मना रावणा रावणानय ।
अपन रावणान् सर्वान् हरै कालानलो
यमे ।
महान् उन्मात दत्ति नहूं नदि निशाकर ।
आसदायमर्य सदर्पकर्मैदानु सदसंद्रिमध ।
निद्रुर्निर्शमनत्र यात्र चौरम्बर्षं विमोक्षया ।
कदर्न यावरेमेघदानिनद्रादाजकं दिवौ ।
बुवकादय मेघपद्मा रावैव अद्य बौधितुर् ।
दिव्यं कन्दरवाहय रावणैर्वमौ वर्ष ।
इदं निर्मनसाभिवृद्धकर्मार्त्तिर्द ।
'तत्र सूर्यमहो दिग्म दम कुर्वयमशुरम् ।

रावणाय मघवैव प्रेषयामास मातिनात् ।
तमु मातलिनानीतमारह्य रथमुत्तमम् ।
कुम्भमाद्य तपसैवं दृष्ट्वा तेन दर्थया ।
तथा महाप्रसहोर रामरावणयोरभूत् ।
तत्राद्भुतमहोरात्र युद्धाच्चैरितिमौपम्यैरिति ।
तथा मातलिरामयमलिनीयमम् । एतच्च
तथ्यो महन । पद्मस कालिकापुराणे ।
'रावस्वापतद्वाप ये रावणस्य वधाय च ।
रामायैव महादेवी कृत्वा बोधिता पुरा ।
नमस्तु त्यक्तनिद्रा सा नन्दायामाश्विनेऽसिते ।
जगाम नगरीं लङ्कां यत्रासीद्राघव पुरा ।
आगत इति यैव । दशवासन राघवाणी
तदैव मानसिन्नावमसम् ।
'तत्र गत्वा महादेवी तदा तौ रामरावणौ ।
युद्धेन योजयामास स्वयमन्तर्हिताम्बिका ।
रावणानां वानराणां जगन्मा सा मांसशोणि
तम् ।
रामरावणयोर्युद्धं यावत् सा समवीक्षयत् ।
अतीत सप्तमे रात्रौ नवम्यां रावणं तत ।
रामेण घातयामास महामाया जगन्मयी ।
यावत्तथा सह देवी युद्धकेलिनुदेयत ।
तावत्तु सप्तरात्रानि वर्धिते वै सुपूजिता ।
निहते रावणे वीरे नवम्यां सकले सुरे ।
विशेषपूजां दुर्गायाश्चक्रे लोकपितामह ।
ततो सुरैरिमांप घटीन घोर ।
'रामरावणयोर्युद्धे मृत्युकालिक भौतिरम् ।
प्रतीपायात्तु पश्यत्या पूर्वेनिरदिति वित्तम् ।
आतिनित्रपुत्रोपनौ भीत रावण सकन्तु ।
प्रात्मय बायमानाप देव्यो वयनाद्वरे ।
प्रात्मपूर्वं अवस्थापनम् ।
'ततस्तु यवन लाय दृष्ट्वा पतिवा शुभाम् ।
निहत्य कर्म्म मानवधं यमगोधान वरि ।
दिवुकविनमधासामदनिमध्य ।
'सैदाजितधन्वा इवकाय रामं कमनुयमम् ।
सम्यच्य प्रयतो कार्यं सच हृदे प्रबोधनि ।
इति ब्रह्म पुरा तस्मै तत्रो आत्मानो कारे ।
तुरा बन्ते यदा युर्ग पतिवत्स नयेत तु ।
घयनो सप देवी रेखानो नागवाय दे ।
मायकपराकयकं पुरा बन्ते दक्षय ।
पतिबन्ध प्रतिमकयमाज्जिबन्ध । बकरधामा
चिय मघापि कलवकपाराव ।
'पतिवक्षा मोराणी हरकसादि रावय ।
तदैव आवते द्रुत तदैव विरहागम ।
रर्थ रावकरधानि रावणाली तथैव च ।
सर्वेषामपि भूमानि तेषु देवी प्रवर्तते ।
तां पूजसिन सुरा सर्वे वर्ष वीरपरा वा च ।
तदैव च परा सर्वे कृत्वा पुन॰
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

'स इव मानवार्न मनिवनसमर युद्धे ।
कथाय दुरन्यात्मा भूमिमाहसर्त्ता भुवं ।
कानिद्रायदयौ सर्वो अविर्धने न संजय ।
पतिवक्ष मैथैव भौमानि च सदृश । इ ॥
नष्टचन्ति रामोऽपि भविता तदाद्यो दिवं
इति सप्तपैदर्शी प्रथमविभागस्त्री राखौ च
प्रहतावामै । दिनि इति आपाठतदनव ।
दिनायपमा । पूर्वं प्रतिमकपमारदिनमुर्णे ।
प्रतिबद्धदुर्गा रामाद्धवत दति तु व सुम ।
चतुर्थसप्तमियतरु तो रामायणान्त्वा
दिग्महिमावधूती प्राक्वात रावण वधिर्देश्या
आतारे च प्रविष्टमानि दिव । कर्मोध
रामायणनिनि प्रविष्टमीत् ।
'राम यत्रत्रु बंदे बद्धरामेण मौद्धया ।
उपदेशे समीचार्ये रामचन्द्रमुखादपि ।
ग्रामविधिनि वर्ष बनवासमवायत् ।
अकारदक्ष तु वर्षाणि सोताराम्यत रायत ।
विराजमुखदाहारचर्कुसौधि कृताघन ।
प्रथमे चित्रकूटे तु रात्री वासमकारयत् ।
अथ अयोध्ये पंच पञ्चवटी सदापनाय ।
रामो विनयपालाय यरा भूमको बने ।
ततो मार्गि विरायतो सदुर्मे कुमर्मयने ।
रामचन्द्रो बिना सीतां अहार दशकनार
मासि मुखक्रनुदसानिनि पावनायम् ।
'मामचूड़ामणौनुह बदमी रावणात्मजी ।
वर्धायिदईरमे मासि भगवती बालिपु मास ।
द्वादशमा मदैन्याम पूर्वे कृतधौबन्ध ।
तदाविद्ये चीनाया दृष्टा हि नयन ।
हादशसौ निषयादये कथयान प्रपर कम ।
सखौ निमग्राथी सौतार्यां सिनाभावदन्
कथा ।
अध्यादिशियोद्धयो तमो सुचायमेन ।
पक्षा क्रमशुकानव वर्तिकाले लत्र ।
प्रावनीत्र पद्मदृष्टो पर प्रवेशिता परिं ।
इहिरा पुष्पकुणेन कपुण्य दसर्वन्न तथा ।
सौज्जमादौ मधिमायौ पुरयासाने भवे ।
सारवीकप्रतियत प्रयमा पथ पारं ।
मुदरायय कड़ोदिक्षयी नपुनकर्त ते ।
चतुर्थी प्रक्षिप्रानदान तुर्दिवीरैव ।
अदग्रुपदरसपूर्व्वा सहूर्त्ते विवशाभिनी ।
मर्थ सादें वडायात्री प्रध्याय रावण दु ।
चाचरे महोन्माद्ये तदानार अक्षरम् ।
सौनसुरधन निवारणैवा मादन्युरे ।
धनबाद सक्रीयत्र रत्नवद्रवम भुव ।
निमीलवयतुर्थी हि राजेन मथ सम ।
प्रमूह्यकपशान

शुक्लपक्षयो चैत्रप्रतिपदादये दिने।
माघे सितायां द्वादश्यां चैत्रशुक्ला सिता तु वै।
सारथ्येन कपीनान्तु वाराधारोपणक्षणम्।
अयोऽन्याष्टमी यावच्छुक्लायां दिवसैस्त्रिभिः।
रावणः सैन्यसन्नाह रक्षायोक्षादन तथा।
यथाश्वपाद्ररो दौत्र माघशुक्लादिवासरे।
माघशुक्लद्वितीयादिदिनै सप्तभिरेव तु।
रक्षसां वानराणाञ्च युद्धमासीत् सुदारुणम्।
माघशुक्लनवम्यान्तु रात्राविन्द्रजिता रणे।
रामलक्ष्मणयोर्नागपाशैर्बन्धो बभूव च।
नागपाशविमोक्षार्थं दशम्यां गरुडोऽभ्यगात्।
अनावकाशः कथितो दशम्यादिदिनद्वयम्।
द्वादश्यामाञ्जनेयेन धूम्राक्षस्य वधः कृतः।
त्रयोदश्यान्तु तेनैव निहतोऽकम्पनो रणे।
माघशुक्लचतुर्दश्यां यावत् कृष्णादिवासरम्।
त्रिभिर्दिनैः प्रहस्तस्य नीलेन विहितो वधः।
माघाधितद्वितीयायाश्चतुर्थ्यन्तैस्त्रिभिर्दिनैः।
रामेण तुमुले युद्धे रावणो द्रावितो रणात्।
पञ्चम्याश्चाष्टमी यावद्रावणेन प्रबोधितः।
कुम्भकर्णः ससुप्तस्तु तावद्युद्धचतुर्दिनम्।
कुम्भकर्णो दिनैः षड्भिर्नवम्याद्यैश्चतुर्दशीम्।
रामेण निहतो युद्धे बहुवानरभक्षकः।
अमावास्यादिने शोकाद्व्यवहारो बभूव च।
फाल्गुनादिप्रतिपदश्चतुर्थ्यन्तदिनैर्हताः।
नरान्तकप्रभृतयो निहता पञ्च राक्षसाः।
पञ्चम्याः सप्तमी यावदतिकायवधस्त्वभूत्।
अष्टम्या द्वादशी यावन्निहतो दिनपञ्चकात्।
निकुम्भकुम्भौ द्वावेव मकराक्षश्चतुर्दिनैः।
फाल्गुनस्य द्वितीयायां दर्शे प्रबल-
जितम्।
तृतीयायास्तु सप्तम्यां वरम पञ्चवासरात्।
औषधानयने अयात्क्षयोदयवारकः।
तत्र त्रयोदशी यावद्दिनैः षड्भिस्तु लक्ष्मणः।
अष्टम्येव हतो युद्धे निहतोऽभिचरन् क्रमात्।
चतुर्दश्यां दशग्रीवस्त्वदीक्षाविधि क्रमात्।
अमावास्यां ययौ वीरो युद्धाय दशकन्धरः।
चैत्रशुक्लप्रतिपदः पञ्चमी दिनपञ्चके।
रावणस्य प्रधानानां ध्वस्तामभवत् वधः।
चैत्रशुक्लाष्टमी यावत्स्यन्दनाश्वादिमारणम्।
चैत्रशुक्लनवम्यान्तु सौमित्रेः शक्तिभेदनम्।
शैलाद्रिमानयेनैव अस्मत्प्रयोगमारुतः।
दशम्यामवधारोऽभूद्रात्रौ युद्ध दशस्यतो।
एकादश्यान्तु रामाय रथो मातलिनार्पितः।
अष्टादशदिने रामो रणे तु रावणं वधीत्।
रामस्य सज्जसञ्च यावत् कृष्णचतुर्दशीम्।
माधवकृष्णद्वितीयायाचैत्रकृष्णचतुर्दशीम्।
अष्टादशीति द्वैर्युद्धं मध्ये पञ्चदशाहकम्।
अवहारा वंशामित्रयांत्रि दिवाःस्मृताः।
संस्कारो रावणादीनाममावास्यादिनेऽभवत्।
वैशाखादितिथौ रामः स्थैर्यं इहरावत।
अधिवासो द्वितीयायां लङ्काराज्ये विभीषणः।
सीताशुद्धिस्तृतीयायां देवेभ्यो वरलम्भनम्।

वैशाखस्य चतुर्थ्यान्तु रामः पुष्पकमास्थितः।
पूर्णे चतुर्दशे वर्षे पञ्चम्यां माधवस्य तु।
भरद्वाजाश्रमं रामः सगणः पुनरागमत्।
नन्दिग्रामे तु षष्ठ्यां वै भरतेन समागमः।
सप्तम्यामभिषिक्तोऽयोध्यायां रघूत्तमः।
जानकी रामसहिता राघवस्य निवेशने।
मनुमासान् स्थिता पञ्चदशवत्सरावधेरिति।
यत्तु पद्मोक्ते अविदितप्रामाण्यम्। कालिका-पुराणादिविरोधात्। इदं कल्पान्तरविषयमिति न युक्तम्। तद्विरोधादेव। तस्मात् क्रियाविरोधि पुराणेषु उपसंहार एव न्याय्यः। शाखान्तरोक्ताग्नीपसंहारवत्। यथा कुम्भकर्णवधोऽत्र रामेणोक्तो भारते लक्ष्मणेन तादृशि विषये न तु कल्पभेदेन व्यवस्था। अन्यविषये एव तु व्यक्तिभेदोक्ता इति बोध्यम्।" इति श्रीरामायणटीकायां युद्धकाण्डे ११० सर्ग।) तस्य परिपूर्णतमत्वं यथा —
"धर्मे चाष्टकला पुंसः सम्पत्तु भगवान् स्वयम्।
परिपूर्णतमो रामो ब्रह्मशापात् खविग्रहः।"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ११६ अध्यायः।
अथ श्रीराममन्त्रः।
"अनन्तोऽग्न्यासनः बिन्दुमौलि रामाय हृत्पदम्।
षडक्षरोऽयमादिष्टो भवतां कामदो मनुः।"*
तस्य तारकब्रह्मत्वं यथा,—
"सर्वेषां राममन्त्राणां मन्त्रराजः षडक्षरः।
तारकत्वं चैतुर्षं तैन पूजा प्रयच्छति।"
तन्त्रञ्च रां रामाय नमः। इति रामार्चनचन्द्रिकायाम्। षटकः। अस्य पूजाप्रयोगः। प्रातःकृत्यादि वैष्णवोक्तपीठन्यासान्तं कर्म विधाय अर्घ्यादिस्थापनं कुर्यात्। पीठादि ॐ कमठे आधारे नमः। हृदि माधवीनन्दन नमः। हृदि श्रीरामाय देवतायै नमः। ततः करान्यासौ। रां अङ्गुष्ठाभ्यां नमः। रीं तर्जनीभ्यां स्वाहा। रूं मध्यमाभ्यां वषट्। रैं अनामिकाभ्यां हुम्। रौं कनिष्ठाभ्यां वौषट्। रः करतलपृष्ठाभ्यां फट्। एवं हृदयादिषु। ततो मन्त्रन्यासः। ब्रह्मरन्ध्रे रां नमः। भ्रूमध्ये रा नमः। हृदि मां नमः। नाभौ य नमः। लिङ्गे न नमः। पादयोर्मः नमः। ततो ध्यानं महाराजादिषु विधाय ध्यानं ध्यायेत्।
"कालाम्भोधरकान्तिकान्तमनिशं वीरासनाध्या-
सितं
मुद्रां ज्ञानमयीं दधानमपरं हस्ताम्बुजं जानुनि।
सीतां पार्श्वगतां सरोरुहकरां विद्युन्निभां राघवं
पश्यन्तं मुकुटाङ्गदादिविविधाकल्पोज्ज्वलाङ्गं
भजे।"
इदं ध्यात्वा मानसैः सम्पूज्य शङ्खस्थापनं कुर्यात्। तत्र पीठपूजां विधाय दैव पीठपीठमध्ये पीठमनुं सम्पूज्य पुष्पाञ्जलि प्रदानान्तेऽङ्गुष्ठाद्यैः करादिषु विधाय सद्यःपूजामारभेत्। यथा देवस्य वामे श्री-सीतायै नमः। अग्रे ॐ शार्ङ्गाय नमः। इषिकणामध्याभ्यां ॐ शरेभ्यो नमः। ॐ चापाय नमः तच्छिङ्गे कैसरेषु अग्न्यादिकोणेषु मध्ये दिक्षु च रां हृदयाय नमः। इत्यादिना षडङ्गानि पूजयेत्। ततो दलेषु पूर्वादिदिक्षु ॐ हनुमते नमः। ॐ सुग्रीवाय नमः। ॐ भरताय नमः। ॐ विभीषणाय नमः। ॐ लक्ष्मणाय नमः। ॐ अङ्गदाय नमः। ॐ शत्रुघ्नाय नमः। ॐ जाम्बवते नमः। दलाग्रेषु ॐ धृष्टाय नमः। ॐ जयन्ताय नमः। ॐ विजयाय नमः। ॐ सुराष्ट्राय नमः। ॐ राष्ट्रवर्धनाय नमः। ॐ अकोपाय नमः। ॐ धर्मपालाय नमः। ॐ सुमन्त्राय नमः। तद्बहिरिन्द्रादीन् वज्रादींश्च पूजयेत्। ततो धूपादि-विसर्जनान्तं कर्म समापयेत्।*। अस्य पुरश्चरणं षड्लक्षजपः। तथा च।
"षड्लक्षं प्रजपेन्मन्त्रं दशांशं जुहुयाच्छुभे।
कुर्यादर्चितैर्योगी ब्राह्मणान् भोजयेत्ततः।"
अयं मन्त्रः षड्विधः। तथा च।
"ब्रह्मासम्पत्तिमायानङ्गश्रीनादाः पञ्चपूर्वकः।
षडक्षरः षड्विधः स्यात् चतुर्वर्गफलप्रदः।
ब्रह्मा सम्मोहनः प्रोक्तः ऋषिर्विनिश्चिती।
अगस्त्यः श्रीरामो प्रोक्तो मुनयोऽस्य क्रमादिमे।
अथवा कामदेवाख्यः विश्वामित्रौ मुनीश्वरौ।
छन्दो गायत्रीजगती श्रीरामश्चैव देवता।
ध्यानपूजादिकं सर्वं पूर्ववच्च समाचरेत्।"
तथा।
"वामबीजम्भः सं दोषं पूर्वादिकम्।
दशाक्षरोऽयं मन्त्रः स्यान्मुनिर्वर्षिर्विराट्।
छन्दस्तु देवता रामः सीतापाणिपरिग्रहः।
आद्यं बीजं हृदि शक्तिः कामेनाङ्गक्रिया मता।
शिरोललाटभ्रूमध्यतालुकर्णेषु हृद्यपि।
नाभ्यूरुजानुपादेषु दशार्णान् न्यसेन्मनोः।"*।
ततो ध्यानम्।
"अयोध्यानगरे चित्ररत्नसौवर्णमण्डपे।
मन्दारपुष्पैराबद्धवितानै तोरणान्विते।
सिंहासनसमारूढं पुष्पकोपरि राघवम्।
रक्षोभिर्हरिभिर्देवैर्दिव्ययानगतैः शुभैः।
संस्तूयमानं मुनिभिः सर्वतः परिसेवितम्।
सीतालङ्कृतवामाङ्गं लक्ष्मणेनोपसेवितम्।
श्यामं प्रसन्नवदनं सर्वाभरणभूषितम्।
ध्यायेत्रैलोक्यवरदमनन्तौ।"
अथवा सर्वं पूर्ववत्।*।
"वह्निनारायणैर्नाद्यो जड़ा वैश रम च।
हृदयो मन्त्रराजोऽयं सर्वाभीष्टप्रदः।
एकाक्षर मन्त्रदेवो नारदोऽस्य ऋषिः।
चतुर्थ्यां च दश यायात् षड्वर्गो दशाक्षरः।
ध्यायेन्नो पूर्व वक्त्रे वा षट्कोणे वा
स्त्रीमत:।"
तथा।
"ततस्तत्कालाञ्चन्द्रबिन्दुकर्णेषु षड्रस।
अन्यो मन्त्रराज अष्ट षड्भिरेकदशः।

रुद्रैर्बोधनमित्यर्थेन । स बोधित कुम्भकर्णम् ।
अष्टमसप्तमे बोधनीतः सप्तमसप्तमे इत्यर्थः ।
अत्र तु बोधनं षष्ठ्यां सायं सप्तम्यां चैतदपि इति
मतं । तदुत्थापने उत्थापनप्रयोगस्य रात्रि
मध्येऽप्यवसरात् । रावणमन्दिरगमनकाल
सन्ध्यातया रावणमन्दिरस्यातिभास्वरत्वेन
तत्रास्थितिरा सप्तम्यां पुनरागमनात् । इन्द्र
जितो निशायां यद्धोऽस्य यामद्वयेनैव तस्या
मतत्वात् । एतच्च भाग्यवृत्तिमायामेतदपि ।
जाते सम्यगतोऽस्मिन् रात्रिकाय दशास्यजम् ।
तदन्यामद्युतिमद्भिश्चालेव शूर्पौ कपीन् ।
हनूमता समानीतो महौषधमहीधर ।
तत्प्राणिनिलयप्रख्यान् सञ्च यतो समुत्थिता ।
अन्येद्युः कपिराट् कुम्भ निकुम्भ सायुधोऽवधीत् ।
मध्ये निशि रघुश्रेष्ठो जघान मकराक्षम् ।
मायासीतावधश्चक्रे शक्रजिद्दशमेऽहनि ।
तेन खिन्नोऽभवद्राम श्रान्तो लक्ष्मणेन च ।
त्रयोदश्यादि सौमित्रिस्त्रिदिनं योधयन् बली ।
जघान शक्रजेतारं रामस्याज्ञया वशी ।
अन्येद्यु अन्येद्यु निवृत्तेषु । अथासिताश्वयुज
त्रिप्रदोषकालकरात्रिक्रमहोन्द्रमहापार्श्वी
समन्वयम् । अन्यदमावस्यायामिन्द्रजितोऽप्युप
लक्षणम् । यतं यदभिहितं पत्नी यथ ।
पूर्वं क्रमेणैव गन्धात्ति । अमावस्यायाम् ।
पर्वगत्यगमनचन्द्रस्याम् । अन्येद्युर्नवम्याम् । तस्यां
निशि नवमीरात्रौ तत्त्वानि मायागौमाषघ ।
तत्र इत्यष्टमीचतुर्थ्यामारभ्य चयोदशीचतुर्थ
यामपर्यन्तमित्यर्थं निश्चय ।
ततोऽवधीन्मघवलश्चतुर्दश्यां दशहन्न ।
अमाऽथ निर्ययौ राजा योद्धुं रामेण संयुगे ।
चतुरङ्गबलैः सार्द्धं मन्त्रिभिर्दशकन्धर ।
छत्रचामरसंयुक्तः सर्वाभरणभूषित ।
महारथगतो द्वाराद्दशरात्रिम्यथौ बहि ।
आगतो रणभूमौ राजा नखाग्रो दैवकण्टक ।
योऽहं रघुनरेशेति गुश्रुवे कलहध्वनि ।
तत्र युद्धं समभवद्रामरावणयो रघ्वचाम् ।
रामरावणयोश्चैव तथा सौमित्रिणा च ।
शक्तिभिन्नेऽपि सङ्ग्रामे योऽभूत् प्रति रावण ।
वक्षसा धारयामास सौमित्रिस्त्रिदशत्रताम्
तया स बाध्यमान सन् पपात धरणीतले ।
हनूमता जीवितोऽभून्मौषधानयनात् पुन ।
तत क्रुद्धो महातेजा राघवो रावणान्तक ।
जघान राघवान् सर्वान् घोरे कालान्तको
यमे ।
अथाद्य प्रदुद्राव रक्षो लङ्कां प्रति निशाचर ।
जगद्दाहसमः यज्ञसिद्धिदान् स्वयं दिवम् ।
निकुम्भिला तत्र प्राप्य होमचक्रे निशीथया ।
ध्वस्ति वानरैर्यज्ञं निरुध्य रात्रिकं रिपो ।
पुनरुत्थाय पौलस्त्यो रामेण सह योधितुम् ।
निर्यं स्यन्दनमारुह्य राक्षसैर्निर्ययौ बहि ।
इत्थं निर्यौ समाश्विनशुक्लप्रतिपदि ।
'तत्र ग्रस्तमहोदिग्यदपक्षचत्तुनम् ।
राघवाय स्वहतेन प्रेषयामास भक्तिमान् ।
तत्र मातलिनानीतमारुह्य रथमनम् ।
स्तूयमानं सुरगणैर्युधि तेन रक्षसा ।
तदा युद्धमभूद्घोरं रामरावणयोर्महत् ।
सप्ताहिकमहायानं मुनिभिरतिभीषणैरिति ।
तथा मातलिरथागमनदिनेऽपि तत् । एतच्च
नवम्यां तद्युक्तं । तदुक्तं कालिकापुराणे ।
'रामस्यानुग्रहार्थाय वै रावणस्य वधाय च ।
रात्रावेव महादेवी ब्रह्मणा बोधिता पुरा ।
ततस्तु त्यक्तनिद्रा सा नन्दायामाश्विनेऽसिते ।
जगाम नगरीं लङ्कां यत्रासीद्राघव पुरा ।
इत्यादि इति शेष । इदमागमन रात्र्यन्ते
मध्ये मातलियागमनम् ।
'तत्र गत्वा महादेवी तदा तौ रामरावणौ ।
युद्धे योजयामास स्वयमन्तर्हिताम्बिका ।
रावणस्य बलारामौ जगन्माता महाद्भुत
तम् ।
रामरावणयोर्युद्धं सप्ताहं सा व्यवीवृधत् ।
अतीते सप्तमे रात्रे नवम्यां रावणं तत ।
रामेण घातयामास महामाया जगन्मयी ।
यावत्तयो स्वयं देवी युद्धकेलिमुदैक्षत ।
तावत्तु सप्तरात्राणि सर्वैर्देवैः सुपूजिता ।
निहते रावणे वीरे नवम्यां सकलैः सुरैः ।
विशेषपूजां दुर्गायाश्चक्रे लोकपितामहः ।
सकलैः सुरैरित्यस्य सहेति शेष ।
'रामरावणयोस्तु युद्धचापस्य नीतिदम् ।
इत्येतदशुभं लङ्कायां पूर्वोत्तरदिशि स्थितम् ।
स्वातिनक्षत्रसंयुक्तायां शीत सुरगण सह ।
प्रावृषं वारयामास देवशो वचनान्तरे ।
प्रावृषं भयप्राप्यर्थम् ।
'ततस्तु श्रवणे नाथ दशम्यां चण्डिकां शुभाम् ।
विसृज्य चक्रे प्रावृषं नलनीराजनं हरि ।
रिपुजनितभयप्राप्त्यर्थमित्यर्थ ।
'नीराजितबल शक्रस्तत्र रामं सलक्ष्मणम् ।
सम्भाष्य प्रययौ स्वर्गं सह देवैः शचीपति ।
इति इत्थं पुरा कल्पे रामो स्वायम्भुवेऽन्तरे ।
पुरा कल्पे यथा वृत्तं प्रतिकल्पं तथैव तु ।
प्रवर्त्तते स्वयं देवी दैत्यानां नाशनाय वै ।
स्वायम्भुवमन्वन्तरेऽपि पुरा कल्पे इत्यर्थ ।
प्रतिकल्पं प्रतिमन्वन्तरमित्यर्थ । अत एव यथा
न्येन यन्त्रापि कल्पपदवाचात् ।
'प्रतिकल्पं भवेद्रामो रावणश्चापि राक्षस ।
तथैव भावी युद्धं तथैव निरागम ।
एवं रामसहस्राणि रावणानां तथैव च ।
भविष्यन्ति भूतानि तेषु देवी प्रवर्त्तते ।
तां पूजयन्ति सुरा सर्वे वनं नीराजयन्ति च ।
तथैव च नरा सर्वे कुर्युः पूजां यथाविधि ।
बलनीराजनं राजा कुर्याद्वै बलवृद्धये । इति ।
इत्थं महाबोधिता महादेवी यथौ प्रविष्टा
सीतेव भागवन्तश्चित्रभीति प्रतिभाति । अत एव
ब्रह्मवैवर्त्ते प्रकृतेः प्रविभागे । प्रतिकल्प स्थितो
चरितं कीदृशमिति नारदप्रश्ने ब्रह्मवाक्यम् ।
'स एव भगवानेव प्रतिमन्वन्तरं सुत ।
वधाय दुष्टदैत्यानां भूमिभारहृतौ भुवि ।
कलिद्वापरयो सन्धौ भविष्यन्ति न संशय ।
प्रतिकल्पं त्वेवमेव भविष्यति न संशय ।" इति ।
सहस्रशो रामोऽपि भविता समयो दिने
इति ब्रह्मवैवर्त्ते प्रथमविभागस्थे रावां प्रति
इत्यर्थाचवे । दिने इति भावादेकवचनम् ।
दिनेष्वित्यर्थ । पूर्वं प्रतिमन्वन्तरमित्युक्तेः ।
प्रतिचतुर्युगं रामावतार इति तु न युक्तम् ।
चतुर्विंशतितमचतुर्युगे रामावतारस्तथा
विंशतितमचतुर्युगे स्थापितावतार इत्यपि पुरा
णान्तरे च प्रसिद्धत्वादिति दिक् । अधिकं
रामायणादिषु प्रसिद्धमेव ।
'रामः सप्तदशे वर्षे षष्ठमासमितिं गतान् ।
उपयेमे त्वयोध्यायां द्वादशाब्दाश्रवाय च ।
सप्तविंशतिमे वर्षे वनवासमकल्पयत् ।
अष्टादश तु वर्षाणि सीतायास्तु तदाभवत् ।
विराजादुरन्नाहारश्चतुर्थेऽह्नि महायन ।
पञ्चमे चित्रकूटे तु रामो वासमकारयत् ।
अथ त्रयोदशे वर्षे पञ्चवट्यां महामना ।
रामो विलम्बयामास सीता शूर्पणखा वने ।
ततो माघसितायाञ्च अष्टम्यां हृतवान् ।
रावणाश्च विना सीता जहार दशकन्धर ।
माघे शुक्लचतुर्दश्यामिति पाठान्तरम् ।
'मासमुक्तपञ्चमाद्यान्तु बद्धौ रावणालये ।
चम्पातिर्द्दशमे मास आचख्यौ वानरस्य तान् ।
एकादश्यां महेन्द्राद्रौ पुस्फुवे शतयोजनम् ।
तदा निशायां सीतायाः दर्शनं हि हनूमत ।
द्वादश्यां शिशपावृक्षे हनूमान् पर्यवस्थित ।
तस्यां निशायां सीतायां विश्वासाय ब्रवीत्
कथा ।
अथादिभिस्त्रयोदश्यां ततो युद्धमवर्त्तत ।
वधो चापकुमारस्य वनविभञ्जन तथा ।
कथाञ्चैव चतुर्दश्यां वह शक्रजिता कपि ।
वह्निना पुच्छयुक्तेन लङ्काया दहनं तथा ।
पौर्णमास्यां महेन्द्राद्रौ पुनरागमनं कपे ।
मार्गाश्विनप्रतिपदं पञ्चभिः पथि वासरै ।
पुनरागम्य षष्ठेऽह्नि भग्नं मधुवनं च तै ।
सप्तम्यां प्रत्यभिज्ञानदानं सर्वनिवेदनम् ।
अष्टम्युत्तरफल्गुन्यां मुहूर्त्ते विजयाभिधे ।
मध्य प्राप्ते सहस्रांशौ प्रस्थानं राघवस्य तु ।
बाहरे सप्तसंभाषौ स्कन्धावारनिवेशनम् ।
पौषशुक्लप्रतिपदस्तृतीया यावदम्बुधि ।
उपस्थानं ससैन्यस्य राघवस्य बभूव ह ।
विभीषणश्चतुर्थ्यां वै रामेण सह सङ्गत ।
समुद्रतरणार्थाय पञ्चम्यां मन्त्र उद्यम ।
प्रायोपवेशनं चक्रे रामो दिनचतुष्टयम् ।
समुद्रवरलाभश्च सेतूपायप्रकीर्त्तनम् ।
सेतोर्दशम्यामारम्भस्त्रयोदश्यां समापनम् ।
चतुर्दश्यां सुवेलाद्रौ राम सैन्यं न्यवेशयत् ।
पौर्णमास्यां द्वितीयायां त्रिदिनैः सैन्यतारणम् ।
तृतीयाद्या दशम्यन्तं सम्यो युद्धनिवेदने ।

शुक्लायाश्च चैत्रमासिरेकादशी दिने ।
माघे सितायां द्वादश्यां चैत्रकृष्णा हता तु मे ।
यादवेन कपीनाश्च यारामारोपवर्णनम् ।
चयोदश्याद्यमीं यावच्चतुर्थी दिवसैस्त्रिभि ॥
रावणः सैन्यसङ्घात रचायोद्यावन तथा ।
ययावधाङ्गदो दौत्य माघशुक्लादिवासरे ।
माघशुक्लद्वितीयादिदिने अष्टभिरेव तु ।
रचसां वानराणाञ्च युद्धमासीत् सुदारुणम् ।
माघशुक्लनवम्यान्तु रात्रौ निर्ज्जिता रथे ।
रामलक्ष्मणयोर्नागपाशैर्मोक्षो बभूव च ।
नागपाशविमोक्षार्थं दशम्यां गरुडोऽभ्यगात् ।
अथाविहार' कथितो दशम्यादिदिनद्वयम् ।
द्वादश्यामाञ्जनेयेन धूम्राक्षस्य वध' कृत ।
चयोदश्यान्तु तेनैव निहतोऽकम्पनो रथे ।
माघशुक्लचतुर्दश्यां यावत् कृष्णादिवासरम् ।
दिदिनैव प्रहस्तस्य नीलेन विहितोऽवध ।
माघासितद्वितीयायाश्चतुर्थ्यान्त्रिभिर्दिनै ।
रामेण तुमुले युद्धे रावणो द्रावितो रणात् ।
पञ्चम्याश्चाष्टमीं यावद्रावणेन प्रबोधित ।
कुम्भकर्णः स तु ततो नावदुद्यद्दचतुर्द्दिनम् ।
कुम्भकर्णो दिने षड्भिर्नवम्यास्तु चतुर्द्दशीम् ।
रामेण निहतो युद्धे बहुवानरभक्षक ।
अमावास्यादिने शोकादवहारो बभूव च ।
फाल्गुनादिप्रतिपदश्चतुर्थ्यन्तदिनैस्तत ।
नरान्तकप्रमुखा निहता' पञ्च राक्षसा' ।
पञ्चम्या सप्तमीं यावन्तिकायवधस्तदाहात् ।
अष्टम्या द्वादशीं यावन्निहतो दिनपञ्चकात् ।
निकुम्भकुम्भावुभौ मकराक्षश्चतुर्द्दिने ।
फाल्गुनस्य द्वितीयायां सर्व्वे दुर्ज्जिता
जितम् ।
तृतीयायास्तु सप्तम्यां हरय' पञ्चवासरात् ।
ओषध्यानयने व्यग्राहनुमानीदवारक ।
तत चयोदशीं यावद्दिने षड्भिस्तु सञ्चित् ।
लक्ष्मणेन हतो युद्धे विख्यातोऽभिचरत् क्रमात् ।
चतुर्द्दश्यां दशग्रीवश्चकारोत्साहमि क्रमात् ।
अमावास्यां ययौ वीरो युद्धाय दशकन्धर' ।
चैत्रशुक्लप्रतिपदः पञ्चमी दिनपञ्चके ।
रावणस्य प्रधानानां युद्धतामभवत् वध' ।
चैत्रशुक्लाष्टमी यावत् स्यन्दनाश्चादिमारणम् ।
चैत्रशुक्लनवम्यान्तु सौमित्रे शक्तिभेदनम् ।
कोपाविष्टाद्रमैनेव कन्दमाप्नेपावहन' ।
एवमाकस्थारोऽभूद्रामो युद्धं दुरासदो ।
दशकस्थास्तु रामाय रथो मातलिनानयी ।
अष्टादशदिने रामो द्वेधुर्थ रावणं वधीत् ।
द्वारम्भा' शुक्लपक्षस्य यावत् कृष्णचतुर्द्दशीम् ।
माघशुक्लद्वितीयायाश्चैत्रकृष्णचतुर्द्दशीम् ।
अष्टाशीतिर्दिनैर्युद्धं मध्ये पञ्चदशात्ययम् ।
युद्धावहार' पञ्चाशदिवसेन्दिवामध्यग ।
संस्कारो रावणादीनाममावास्यादिनेऽभवत् ।
वैशाखादितिथौ रामः चुवोच पुराराम' ।
अभिषिक्तो द्वितीयायां लङ्काराज्ये विभीषण ।
सीताशुद्धिकृतीयायां देवेभ्यो वरलम्भनम् ।

वैशाखस्य चतुर्थ्यान्तु रामः पुष्पकमाश्रितः ।
पूर्वं चतुर्दश वर्षे पञ्चम्यां माधवस्य तु ।
भरद्वाजाश्रमं रामः सगौत्रः पुनरागमत् ॥
नन्दिग्रामे तु षष्ठ्यां वै भरतेन समागमः ।
सप्तम्यामभिषिक्तोऽयोध्यायां रघूत्तम ॥
जानकी रामरहिता रावणस्य निवेशने ।
मधुमासान् स्थिता पञ्चदशवत्सरषुटीति ॥
यत्तु सर्व्वोषि अनिश्चितप्रामाण्यम् । कालिका-पुराणादिविरोधात् । इदं कल्पान्तरविषयमिति न युक्तम् । तद्विरोधादेव । तस्मात् क्रियाविरोधि पुराणेषु उपचार एव ग्राह्य । यासा न्तरोक्ताद्रोपचारवत् । यथा कुम्भकर्णवधो ऽत्र रामेणोक्तो भारते लक्ष्मणेन साक्षाद्विषये न तु कल्पभेदेन व्यवस्था । अन्यविषये एव तु अतिदेशोक्ता इति बोध्यम् ।" इति श्रीरामायण टीकायां लङ्काकाण्डे ११० सर्गः ।) तस्य परि पूर्णतमत्व यथा —
"सर्व्वे चांशकला पुंस' कृष्णस्तु भगवान्
स्वयम् ।
परिपूर्णतमो रामो मन्वन्तरात् ऋषिसत्तम ।"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११६ अध्याय' ।
अथ श्रीराममन्त्रा' ।
"अनन्तोऽग्न्यासन' शिन्दुश्चैव रामाय इत्यपि ।
षडक्षरोऽयमादिष्टो भक्तानां कामदो मनु ।"●
तस्य तारकत्वमक्षो यथा,—
"सर्व्वेषां राममन्त्राणां मन्त्रराज' षडक्षर' ।
तारकत्वस्य पैतृत्वं तैन पूना प्रपद्यते ।"
तत्मन्त्र रां रामाय स्वाहा । इति रामा चैनचन्द्रिकायाम् ॥ पटल' । अस्य पूजा प्रयोग' । प्रातःकृत्यादि वैष्णवोक्तपीठन्यासान्तं कर्म्म विधाय अर्घ्यादिस्थापनं कुर्य्यात् । शिरसि ॐ ब्रह्मणे ऋषये नम' । मुखे गायत्र्यै छन्दसे नम । हृदि श्रीरामाय देवतायै नम' । तत कराङ्गन्यासौ । रां अङ्गुष्ठाभ्यां नम' । रीं तर्ज्जनीभ्यां स्वाहा । रूं मध्यमाभ्यां वषट् । रैं अनामिकाभ्यां हुम् । रौं कनिष्ठाभ्यां वौषट् । रः करतलपृष्ठाभ्यां फट् । एवं हृदयादिषु । ततो मन्त्रन्यास' । ब्रह्मरन्ध्रे रां नम' । भ्रूमध्ये रा नम' । हृदि मां नम' । नाभौ य नम' । लिङ्गे न नम । पादयोर्मं नम' । ततो ध्यानं पञ्चोपचारैर्विधाय देवं ध्यायेत् ।
"कालाम्भोधरकान्तिकान्तमनिशं वीरासनाध्या
सिनं
मुद्रां ज्ञानमयीं दधानमपरं हस्ताम्बुजं जानुनि ।
सीतां पार्श्वगतां सरोरुहकरां विद्युन्निभां राघवं
पश्यन्तं मुकुटाङ्गदादिविविधकल्पोज्ज्वलाङ्गं
भजे ।"
एवं ध्यात्वा मानसैः संपूज्य शङ्खस्थापनं कुर्य्यात् । तत पीठपूजां विधाय पीठ शक्तीः पीठमध्ये ॐ विमलायै नम इत्याद्याः शक्तिनवकं पूज्य ॐ नमो भगवते विष्णवे सर्व्वभूतात्मने वासुदेवाय सर्व्वात्मसंयोगपद्मपीठात्मने नम इति पीठमन्त्रेण पीठं सम्पूज्य पुनर्ध्यात्वा मूलेन मूर्त्तिं प्रकल्प्य आवाहनादि पञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधाय आवरणपूजामारभेत् । तत्र देवस्य दक्षिणे श्रीं

सीतायै नम' । अग्रे ॐ शार्ङ्गाय नम । तदिक्षवामपार्श्वयोः ॐ शरेभ्यो नम' । ॐ चापाय नम' तद्दक्षिण पीठकेषु अन्यादिकोणेषु मध्ये दिक्षु च रां हृदयाय नम । इत्यादिना षडङ्गानि पूजयेत् । ततो पत्रेषु पूर्व्वादिदिक्षु ॐ हनुमते नम । ॐ सुग्रीवाय नम' । ॐ भरताय नम' । ॐ विभीषणाय नम । ॐ लक्ष्मणाय नम' । ॐ अङ्गदाय नम' । ॐ शत्रुघ्नाय नम' । ॐ जाम्बवते नम । दलाग्रेषु ॐ धृष्टाय नम । ॐ जयन्ताय नम' । ॐ विजयाय नम' । ॐ सुराष्ट्राय नम' । ॐ राष्ट्रवर्द्धनाय नम । ॐ अशोकाय नम' । ॐ धर्म्मपालाय नम । ॐ सुमन्त्राय नम । तद्बहिः इन्द्रादीन् वज्रादींश्च पूजयेत् । ततो धूपादि विसर्ज्जनान्तं कर्म्म समापयेत् ॥ ● ॥ अस्य पुरश्चरणं षड्लक्षजप । तथा च ।
"षड्लक्षं प्रजपेन्मन्त्रं दशांशं कमलै शुभै ।
जुहुयाद्विधिवद्वह्नौ ब्राह्मणान् भोजयेत्तत ।"
अयं मन्त्रः बहुविधः । तथा च ।
"श्रीकाममन्मथरमावाग्भवाद्यः षडक्षर' ।
षड्भेदः षड्विधः स्यात् चतुर्वर्गफलप्रदः ।
ब्रह्मा सम्मोहनः ऋषिश्छन्दो गायत्र्यमुच्यते ।
अमरश्च श्रीबीजश्च स्मृतो मुनयोऽस्य क्रमाद्दृषे ।
अथवा कामबीजादेर्विश्वामित्रो मुनिर्मतः ।
छन्दो गायत्रीमुदितं श्रीरामश्चैव देवता ।
ध्यानपूजादिकं सर्व्वं पूर्व्ववच्च समाचरेत् ।"
तथा ।
"तारबीजस्य होमाद्यं सर्व्वेषां पूर्व्ववत् स्मृतम् ।
रमापरोऽयं मन्त्रः स्यात् दिवस्तु चन्दिराट् ।
छन्दस्तु देवता रामः सीतापाविपरिग्रह ।
आद्यं बीजं स्थितः शक्तिः कामेनाङ्गक्रिया मता ।
शिरोललाटभ्रूमध्यतालुकण्ठेषु हृदये ।
नाभ्यूरुजानुपादेषु दशवर्णान् न्यसेत्ततो ।"●॥
ततो ध्यानम् ।
"अयोध्यानगरे दिव्यरत्नसिंहासनोपरि ।
मन्दारपुष्पैराबद्धविताने तोरणान्विते ।
सिंहासनसमारूढं पुष्पकोपरि राघवम् ।
रक्षोभिर्हरिभिर्देवैर्दिव्ययानगतै शुभै ।
संस्तूयमानं मुनिभिर्नम्रैश्च परिसेवितम् ।
सीतालङ्कृतवामाङ्गं लक्ष्मणेनोपसेवितम् ।
श्यामं प्रसन्नवदनं सर्व्वाभरणभूषितम् ।
ध्यायेत् कोटिकन्दर्पलावण्यमनस्तथा ।"
अन्यत् सर्व्वं पूर्व्ववत् ॥ ● ॥
"दाशरथाय विद्महे सीतावल्लभाय धीमहि । तन्नो रामः प्रचोदयात् ।
इत्येषा रामगायत्री सर्व्वकामदा ।
रोगादि नाशयेन्मन्त्रो जपेद्वा रामं ...
चतुर्थ्यां च द्वि स्यात् दर्पदं वाञ्छितप्रद ।
आचामो द्विं विश्वो वा अष्टोत्तरं वा
मन्त्रिणः ।"
तथा ।
"नमो रामचन्द्राय ... ।
... ।"

हृदयान्तमहामन्त्रो मन्त्रोऽयं चतुरक्षरः ।
रामाय हुम्फडन्तु प्रोक्तो मन्त्रः पञ्चाक्षरः परः ।
षडक्षरमाद्यकाद्ये प्रत्येकपूर्वको मनुः ।
लक्ष्मीवाक्कामकन्यादिव तारादिः स्यादनेकधा ।
तेन च राम । श्रीं राम । इत्यादि षडक्षरः ।
तथा लक्ष्मीवाक्कामतारादीनामन्यतमवर्णेनापि षडक्षरः । तेन श्रीं राम । ऐं राम । क्लीं राम इति ।
"वह्निस्थं प्रथमं विष्णोरर्द्धचन्द्रविभूषितम् ।
एकाक्षरो मनुः प्रोक्तो मन्त्रराजः सुरद्रुमः ॥
ब्रह्मा मुनिः स्याद्गायत्री छन्दो रामस्तु देवता ॥"● ।
एकाक्षरे तु द्वादशलक्षजपः पुरश्चरणम् । तथा च । भानुलक्षं जपेन्मन्त्रम् इति वचनात् अन्येषां षड्लक्षजप इति विशेषः । ध्यानपूजादिकं षडक्षरवत् । ● । अथ श्रीरामचन्द्रप्रयोगः ।
"जातीप्रसूनैर्जुहुयादिन्दिरावाप्तये नरः ।
जातीप्रसूनैर्जुहुयाच्छ्रन्नाभ सहस्रिते ॥
राजवश्याय कमलैर्धनधान्यादिसम्पदे ।
नीलोत्पलानां होमेन वश्येदखिलं जगत् ॥
बिल्वप्रसूनैर्जुहुयादिन्दिरावाप्तये नरः ।
दूर्वाहोमेन दीर्घायुर्भवेत्सततं निरामयः ॥
रक्तोत्पलहुताच्छ्रीमान् धनमाप्नोति वाञ्छितम् ।
मेधाकामेन होतव्यं पलाशकुसुमैर्नरैः ॥
सञ्जप्तमम्भः प्रपिबेत् कविर्भवति वत्सरात् ।
सर्वाभिचाराञ्छमयेत्सद्यो रोग्यनिबर्हणम् ॥"● ।
अथ श्रीरामचन्द्रस्तोत्रम् ।

श्रीहनूमानुवाच ।

"तिरश्चामपि राजेति समवायं समीयुषाम् ।
यथा सुग्रीवमुख्यानां यस्तमुग्रं नमाम्यहम् ॥
सकृदेव प्रपन्नाय विशिष्टामैरयत् श्रियम् ।
विभीषणायाब्धितटे यस्तं वीरं नमाम्यहम् ॥
यो महान् पूजितो व्यापी महाब्धेः करुणामृतम् ।
श्रुतं जटायुषा येन महाविष्णुं नमाम्यहम् ॥
तेजसाप्यायिता यस्य ज्वलन्ति ज्वलनादयः ।
प्रकाशते स्वतन्त्रो यस्तं ज्वलन्तं नमाम्यहम् ॥
सर्वतोमुखता येन लीलया दर्शिता रणे ।
राक्षसेश्वरयोधानां तं वन्दे सर्वतोमुखम् ॥
नृभावन्तु प्रपन्नानां हिनस्ति च यथा नृषु ।
सिंहः सत्त्वेष्विवोत्कृष्टस्तं नृसिंहं नमाम्यहम् ॥
यस्माद्बिभ्यति वाताद्याः सूर्यचन्द्रेन्द्रमृत्यवः ।
भियं भिनोति भक्तानां भीषणं तं नमाम्यहम् ॥
परस्य योग्यतापेक्षारहितो नित्यमङ्गलम् ।
ददात्येव निजौदार्याद्यस्तं भद्रं नमाम्यहम् ॥
यो मृत्युं निजदासानां मारयत्यखिलेष्टदः ।
तत्रोदाहृतयो यस्तं मृत्युमृत्युं नमाम्यहम् ॥
यत्पादपद्मप्रणतो भवेदुत्तमपूरुषः ।
तमीशं सर्वदेवानां नमनीयं नमाम्यहम् ॥
अहम्भावं समुत्सृज्य दास्येनैव रघूत्तमम् ।
भजेऽहं प्रत्यहं रामं ससीतं सहलक्ष्मणम् ॥
नित्यं श्रीरामभक्तस्य किङ्कराः यमकिङ्कराः ।
शिवमय्यो दिशस्तस्य सिद्धयस्तस्य दासिकाः ॥
इदं हनुमता प्रोक्तं मन्त्रराजात्मकं स्तवम् ।
पठेदनुदिनं यस्तु स रामे भक्तिमान् भवेत् ॥"
इति हनूमत्कल्पे मन्त्रराजात्मक श्रीरामचन्द्रस्तोत्रं समाप्तम् । ● । अथ श्रीरामचन्द्रस्याष्टोत्तरशतनाम ।

वेदव्यास उवाच ।

"शृणु गाङ्गेय वक्ष्यामि रामस्याद्भुतकर्मणः ।
नाम्नामष्टशतं पुण्यं त्रिषु लोकेषु विश्रुतम् ॥
नातः परतरं गुह्यं त्रिषु लोकेषु विद्यते ॥
कैलासशिखरे रम्ये नानारत्नविचित्रिते ।
एकाग्रमनसो भूत्वा विष्णुमाराध्य भक्तितः ॥
उपविष्टस्ततो भोक्तुं पार्वतीं शङ्करोऽब्रवीत् ।
पार्वत्येहि मया सार्द्धं भोक्तुं भुवनवन्दिते ॥
तमाह पार्वती देवी जप्त्वा नाम सहस्रकम् ।
ततो भोक्ष्यामहं देव भुज्यतां भगवन् प्रभो ॥
ततस्तां पार्वतीं प्राह प्रहसन् परमेश्वरः ॥
धन्यासि कृतपुण्यासि विष्णुभक्तासि पार्वति ।
दुर्लभा वैष्णवी भक्तिर्भाग्यहीनैर्गिरीश्वरि ॥
इत्यादीनि नामानि श्रुतानि मम पार्वति ।
मम प्रियतमेति रामनामाभिधानया ॥
रमन्ते योगिनोऽनन्ते नित्यानन्दे चिदात्मनि ।
इति रामपदेनासौ परं ब्रह्माभिधीयते ॥
राम रामेति रामेति रमे रामे मनोरमे ।
सहस्रनामभिस्तुल्यं रामनाम वरानने ॥
रामेत्युक्ता महादेवि भुङ्क्ष्व सार्द्धं मयाधुना ।
ततो रामेति नामोक्त्वा सह भुक्ता च पार्वती ॥
ततो भुक्त्वा महादेवी पतिना सह हर्षिता ।
पप्रच्छ श्रीमहादेवं प्रीतिप्रश्नमना तदा ॥
सहस्रनामभिस्तुल्यं रामनाम त्वयोदितम् ।
तस्यान्यान्यपि नामानि सन्ति चेद्वद शङ्कर ।
कथ्यतां मम देवेश तत्र मे प्रीतिरुत्तमा ॥

श्रीशङ्कर उवाच ।

शृणु नामानि वक्ष्यामि रामचन्द्रस्य पार्वति ।
लौकिका वैदिकाः शब्दा ये केचित् सन्ति पार्वति ॥
नामानि रामचन्द्रस्य सहस्रं तेषु चाधिकम् ।
तेषु चाष्टशतं हि नाम्नामष्टोत्तरं शतम् ॥
विष्णोरेकैकनामापि सर्ववेदाधिकं मतम् ।
तादृङ्नामसहस्रेषु रामनाम परं मतम् ॥
जपतः सर्ववेदांश्च सर्वमन्त्रांश्च पार्वति ।
तस्मात् कोटिगुणं पुण्यं रामनाम्नैव लभ्यते ॥
अस्य श्रीरामनामाष्टोत्तरशतनामस्तोत्रस्य ईश्वर ऋषिरनुष्टुप् छन्दः श्रीरामचन्द्रो देवता श्रीरामचन्द्रप्रीत्यर्थे जपे विनियोगः ।
श्रीरामो रामचन्द्रश्च रामभद्रश्च शाश्वतः ।
राजीवलोचनः श्रीमान् राजेन्द्रो रघुपुङ्गवः ॥
जानकीवल्लभो जैत्रो जितामित्रो जनार्दनः ।
विश्वामित्रप्रियो दान्तः शरणत्राणतत्परः ॥
वालिप्रमथनो वाग्मी सत्यवाक् सत्यविक्रमः ।
सत्यव्रतो व्रतधरः सदा हनुमदाश्रयः ॥
कौशल्येयः खरध्वंसी विराधवधपण्डितः ।
विभीषणपरित्राता दशग्रीवशिरोहरः ॥
सप्ततालप्रभेत्ता च हरकोदण्डखण्डनः ।
जामदग्न्यमहादर्पदलनस्ताडकान्तकः ॥
वेदान्तसारो वेदात्मा भवरोगस्य भेषजम् ।
दूषणत्रिशिरोहन्ता त्रिमूर्तिस्त्रिगुणात्मकः ॥
त्रिविक्रमस्त्रिलोकात्मा पुण्यचारित्रकीर्त्तनः ।
त्रिलोकरक्षको धन्वी दण्डकारण्यपुण्यकृत् ॥
अहल्याशापशमनः पितृभक्तो वरप्रदः ।
जितेन्द्रियो जितक्रोधो जितलोभो जगद्गुरुः ॥
ऋक्षवानरसंघाती चित्रकूटसमाश्रयः ।
जयन्तत्राणवरदः सुमित्रापुत्रसेवितः ॥
सर्वदेवाधिदेवश्च मृतवानरजीवनः ।
मायामारीचहन्ता च महाभागो महाभुजः ॥
सर्वदेवस्तुतः सौम्यो ब्रह्मण्यो मुनिसंस्तुतः ।
महायोगी महोदारः सुग्रीवेप्सितराज्यदः ॥
सर्वपुण्याधिकफलः स्मृतसर्वाघनाशनः ।
आदिपुरुषो महापुरुषः परमः पुरुषस्तथा ॥
पुण्योदयो दयासारः पुराणः पुरुषोत्तमः ।
स्मितवक्त्रो मितभाषी पूर्वभाषी च राघवः ॥
अनन्तगुणगम्भीरो धीरोदात्तगुणोत्तरः ।
मायामानुषचारित्रो महादेवाभिपूजितः ॥
सेतुकृत् जितवारीशः सर्वतीर्थमयो हरिः ।
श्यामाङ्गः सुन्दरः शूरः पीतवासा धनुर्द्धरः ॥
सर्वयज्ञाधिपो यज्ञी जरामरणवर्जितः ।
शिवलिङ्गप्रतिष्ठाता सर्वाघगणवर्जितः ॥
परमात्मा परं ब्रह्म सच्चिदानन्दविग्रहः ।
परं ज्योतिः परं धाम पराकाशः परात्परः ।
परेशः पारगः पारः सर्वदेवात्मकः शिवः ॥
इत्येतद्रामचन्द्रस्य नाम्नामष्टोत्तरं शतम् ।
गुह्याद्गुह्यतरं देवि तव प्रीत्या प्रकीर्त्तितम् ॥
यः पठेत् शृणुयाद्वापि भक्तियुक्तेन चेतसा ।
स सर्वैर्मुच्यते पापैः कल्पकोटिशतोद्भवैः ॥
जलानि स्थलतां यान्ति शत्रवो यान्ति मित्रताम् ।
राजानो दासतां यान्ति वह्नयो यान्ति शीतताम् ।
आनुकूल्यञ्च भूतानि सौख्यं यान्ति चलाः स्थिराः ।
अनुग्रहं ग्रहा यान्ति शान्तिमायान्त्युपद्रवाः ॥
पठतो भक्तिभावेन जन्तोर्गिरिसम्भवे ।
यः पठेत् परया भक्त्या तस्य नाम्ना जपोत्तमम् ॥
यद्यत् कामयते चित्ते तत्तदाप्नोति कीर्त्तनात् ।
यः पठेद्रामचन्द्रस्य नाम्नामष्टोत्तरं शतम् ।
अज्ञानेनापि कुर्वाणो न स पापैर्विलिप्यते ।
पुण्यकार्येषु सर्वेषु पठनात्फलमाप्नुयात् ॥
सर्ववेदेषु तीर्थेषु दानेषु च तपःसु च ।
तत्फलं कोटिगुणितं स्तवेनानेन लभ्यते ॥
पुष्करादिषु सर्वेषु पठन्नामशताष्टकम् ।
कल्पकोटिसहस्राणि कल्पकोटिशतानि च ॥
वैकुण्ठे वासमाप्नोति दशपूर्वैर्दशापरैः ।
रामं दूर्वादलश्यामं ध्यात्वा पीतवाससम् ॥
स्तुवन्ति नामभिर्दिव्यैर्न ते संसारिणो नराः ।

रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥
इमं मन्त्रं महेशानि । जपन्नेव दिवानिशम् ।
सर्व्वपापविनिर्म्मुक्तो विष्णुसायुज्यमाप्नुयात् ॥
इत्येतद्रामभद्रस्य माहात्म्यं वेदसम्मतम् ।
कथितं तव गाङ्गेय शतस्य वैष्णवोत्तम ॥
वन्दामहे महेशानं चण्डकोदण्डखण्डनम् ।
जानकीहृदयानन्दचन्दनं रघुनन्दनम् ॥"
इति पद्मपुराणे उमामहेश्वरसंवादे श्रीराम-
चन्द्राष्टोत्तरशतनामस्तोत्रं समाप्तम् ॥ * ॥
(अस्य विराधकृतस्तुतिकथनं यथा, अध्यात्मरामा-
यणे १ । ८ । १ —१४ ।
गन्धर्व्व उवाच ।
"श्रीरामचन्द्र मेऽद्य नमो रामातिसुभ्रमात् ।
श्यामलनामगायन्तं मनोवाचामगोचरम् ॥
रूपं ते रूपमयतः दैवतपरिवर्ज्जनम् ।
अपूर्वमिदं सर्व्वं ब्रह्म अक्षमनामकम् ॥
तत्कथं मां विनाशोपाद्व्यतिरिक्तं मम प्रभो ।
मुह्यमानायमयोरैक्यं जीव इत्यभिधीयते ॥
मुक्तादिभावो भवेतत्रापि निर्म्मियेऽखिलम् ।
आरोप्यतेऽज्ञानवशान्निर्व्विकारेऽखिलात्मनि ॥
हिरण्यगर्भस्ते सूक्ष्मं देहं स्थूलं विराट् स्मृतम् ।
भावनाविषयो राम सूक्ष्मं ते ध्यातृमङ्गलम् ।
भूतं भव्यं भविष्यच्च यत्रेदं दृश्यते जगत् ।
स्थूलेऽस्मिन् कोऽपि देहे ते महदादिभिरावृते ॥
सप्तभिश्चोत्तरगुणैर्वैराजो धारयाम्यहम् ।
तमेव सर्व्वकेवला लोकास्तेऽवयवाः स्मृताः ॥
पातालं ते पादमूलं पार्ष्णिस्तव महातलम् ।
रसातलं ते गुल्फौ तु तलातलमितीर्य्यते ॥
जानुनी सुतलं राम । ऊरू ते वितलं तथा ।
अतलञ्च महो राम । जघनं नाभिगं नभः ॥
उरःस्थलं ते ज्योतींषि ग्रीवा ते मह उच्यते ।
वदनं जनलोकस्ते तपस्ते शङ्खदेशगम् ।
सत्यलोको रघुश्रेष्ठ । शीर्षण्यास्ते सदा प्रभो ।
इन्द्रादयो लोकपाला बाहवस्ते दिशः श्रुती ।
अश्विनौ नासिके राम वक्त्रं तेऽग्निरुदाहृतः ॥
चक्षुस्ते सविता राम मनश्चन्द्र उदाहृतः ।
भ्रूभङ्ग एव कालस्ते बुद्धिस्ते वाक्पतिर्भवेत् ।
रुद्रोऽहङ्काररूपस्ते वाचश्छन्दांसि तेऽव्यय ।
यमस्ते दंष्ट्रदेशस्थो नक्षत्राणि द्विजालयः ॥
हासो मोहकरी माया सृष्टिस्तेऽपाङ्गमोक्षणम् ।
धर्म्मः पुरस्तेऽधर्म्मश्च पृष्ठभाग उदीरितः ॥
निमेषोन्मेषणे रात्रिर्दिवा चैव रघूत्तम ।
समुद्राः सप्त ते कुक्षिर्नाड्यो नद्यस्तव प्रभो ॥
रोमाणि वृक्षौषधयो रेतो वृष्टिस्तव प्रभो ।
महिमा ज्ञानशक्तिस्ते एवं स्थूलं वपुस्तव ।
यस्मिन् स्थूले ते मनः सन्धार्य्यते नरैः ।
अनायासेन मुक्तिः स्यादतोऽन्यन्नहि किञ्चन ।
अतोऽहं रामरूपं ते स्थूलमेवानुभावये ।
यस्मिन् ध्याते प्रेमरसः सरोमपुलको भवेत् ॥
तदैव मुक्तिः श्रीराम यदा ते स्थूलभावकः ।
तदप्यत्र वदे रामरूपं विचिन्तये ।
धनुर्बाणधरं श्यामं जटावल्कलभूषितम् ।
अपीच्यवयसं सीतां विचिन्वन्तं सलक्ष्मणम् ॥
इदमेव सदा मे स्यान्मानसे रघुनन्दन ।
सर्व्वज्ञः शङ्करः साक्षात् पार्व्वत्या सहितः सदा ।
तद्रूपमेव सततं ध्यायन्नास्ते रघूत्तम ।
मुमूर्षूणां सदा काश्यां तारकं ब्रह्मवाचकम् ॥
राम रामेत्युपदिशन् सदा सन्तुष्टमानसः ।
अतस्त्वं जानकीनाथ परमात्मा सुनिश्चितः ।
सर्व्वे ते मायया मूढास्त्वां न जानन्ति तत्त्वतः ।
नमस्ते रामभद्राय वेधसे परमात्मने ।
अयोध्याधिपते तुभ्यं नमः सौमित्रिसेवित ।
त्राहि त्राहि जगन्नाथ मां माया नावृणोतु
ते ॥" * ।)

अथ श्रीरामकवचम् ।
"ध्यात्वा नीलोत्पलश्यामं रामं राजीवलोच-
नम् ।
जानकीलक्ष्मणोपेतं जटामुकुटमण्डितम् ॥
सासितूणधनुर्ब्बाणपाणिं नक्तञ्चरान्तकम् ।
स्वलीलया जगत्त्रातुमाविर्भूतमजं विभुम् ॥
रामरक्षां पठेत् प्राज्ञः पापघ्नीं सर्व्वकाम-
दाम् ।"
अस्य श्रीरामचन्द्रकवचस्य बुधकौशिक ऋषि-
र्गायत्री छन्दः श्रीरामचन्द्रो देवता श्रीराम-
चन्द्रप्रीत्यर्थे जपे विनियोगः ।
ॐ शिरो मे राघवः पातु भालं दशरथा-
त्मजः ।
कौशल्येयो दृशौ पातु विश्वामित्रप्रियः श्रुती ॥
घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सलः ।
जिह्वां विद्यानिधिः पातु कण्ठं भरतवन्दितः ॥
स्कन्धौ दिव्यायुधः पातु भुजौ भग्नेशकार्म्मुकः ।
करौ सीतापतिः पातु हृदयं जामदग्न्यजित् ॥
मध्यं पातु कबन्धारिर्नाभिं सौमित्रिवन्दितः ।
पार्श्वौ कुलपतिः पातु कुक्षिमिक्ष्वाकुनन्दनः ॥
मध्यं पातु खरध्वंसी नाभिं जाम्बवदाश्रयः ।
गुह्यं जितेन्द्रियः पातु पृष्ठं पातु रघूद्वहः ॥
सुग्रीवेशः कटिं पातु सक्थिनी हनुमत्प्रभुः ।
ऊरू रघूत्तमः पातु रक्षःकुलविनाशकृत् ॥
जानुनी सेतुकृत् पातु जङ्घे दशमुखान्तकः ।
पादौ विभीषणश्रीदः पातु रामोऽखिलं वपुः ॥
एतां रामबलोपेतां रक्षां यः सुकृती पठेत् ।
स चिरायुः सुखी पुत्री विजयी विनयी भवेत् ।
पातालभूतलव्योमचारिणश्छद्मचारिणः ।
न द्रष्टुमपि शक्तास्ते रक्षितं रामनामभिः ॥
रामेति रामभद्रेति रामचन्द्रेति वा स्मरन् ।
नरो न लिप्यते पापैर्भुक्तिं मुक्तिञ्च विन्दति ॥
जगज्जैत्रैकमन्त्रेण रामनाम्नाभिरक्षितम् ।
यः कण्ठे धारयेत्तस्य करस्थाः सर्व्वसिद्धयः ॥
भूर्ज्जपत्रे लिखित्वेदं रक्षाबन्धनपूर्व्वकम् ।
रक्षा मे धारयेद्यस्तु सोऽपि च सर्व्वमाप्नुयात् ।
दधि राजकुले द्यूते विवादे तस्य जयो भवेत् ।
वाग्वश्या च वा नारी वन्ध्या वा पुत्रवती
भवेत् ।
वज्रपञ्जरनामेदं यो रामकवचं पठेत् ।
अव्याहताज्ञः सर्व्वत्र लभते जयमङ्गलम् ।
आदिष्टवान् यथा स्वप्ने रामरक्षामिमां
हरिः ।
तथा लिखितवान् प्रातः प्रबुद्धो बुधकौशिकः ।
धन्विनौ बद्धनिस्त्रिंशौ काकपक्षधरौ शुभौ ।
वीरौ मां पथि रक्षेतां ताविमौ रामलक्ष्मणौ ॥
तरुणौ रूपसम्पन्नौ सुकुमारौ महाबलौ ।
पुण्डरीकविशालाक्षौ चीरकृष्णाजिनाम्बरौ ॥
फलमूलाशिनौ दान्तौ तापसौ ब्रह्मचारिणौ ।
पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ ॥
शरण्यौ सर्व्वसत्त्वानां श्रेष्ठौ सर्व्वधनुष्मताम् ।
रक्षःकुलनिहन्तारौ त्रायेतां नो रघूत्तमौ ॥
आत्तसज्यधनुषाविषुस्पृशा-
वक्षयाशुगनिषङ्गसङ्गिनौ ।
रक्षणाय मम रामलक्ष्मणा-
वग्रतः पथि सदैव गच्छताम् ॥
सन्नद्धः कवची खड्गी चापबाणधरो युवा ।
गच्छन्मनोरथान्नश्च रामः पातु सलक्ष्मणः ॥
अग्रतस्तु स्थितो मे पृष्ठतो भरताग्रजः ।
पार्श्वयोस्तु धनुष्मन्तौ समरौ रामलक्ष्मणौ ॥
रामो दाशरथिः शूरो लक्ष्मणानुचरो बली ।
काकुत्स्थः पुरुषः पूर्णः कौशल्येयो रघूत्तमः ॥
वेदान्तवेद्यो यज्ञेशः पुराणपुरुषोत्तमः ।
जानकीवल्लभः श्रीमानप्रमेयपराक्रमः ॥
आपदामपहर्त्तारं दातारं सर्व्वसम्पदाम् ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्य-
हम् ॥
दक्षिणे लक्ष्मणो यस्य वामतो जानकी शुभा ।
पुरतो मारुतिर्यस्य तं नमामि रघूत्तमम् ॥
एतानि मम नामानि प्रातरुत्थाय यः पठेत् ।
अश्वमेधायुतं पुण्यं स प्राप्नोति न संशयः ॥"
इति पद्मपुराणे वज्रपञ्जरनामकं श्रीराम-
कवचम् । इति तन्त्रसारः ॥
रामकरी स्त्री, रामकली रागिणी । इति सङ्गीत-
ग्रन्थः ॥ (क्वचित् रामकिरीत्यपि पाठः । यथा,
सङ्गीतदर्पणे रागाध्याये ।
अथ रामकिरी ।
"सद्भूषणाढ्या कनकाभदेहा रामकिरी स्यात् ।
तच्चया प्रथमा दृष्टा कथिता वा बहुधा ॥
शिरस्त्रयाणा सीता वेणिं धमनाथा ।
विविधा वा पटी च वा सम्पूर्णा षाड्वी ॥"
अन्यच्च ।
"हेमप्रभा भास्वरभूषणा च
नीलं निचोलं दधती च रामा ।
कान्तं समीपे वरसञ्चयन्ती
मानोन्नता रामकिरी मतेयम् ॥"
उदाहरणम् ।
स रि ग म प ध नि स । सम्पूर्णा ।
अथवा
स ग म प नि स । औडुवा ।

अथवा
स रि ग म ध नि स। गाड़वा।
इति रागमाला।)
अस्य अन्यत् विवरणं रागशब्दे द्रष्टव्यम्।

रामकर्पूरक, पुं, (रामो रमणीयः कर्पूरः। ततः स्वार्थे संज्ञायां वा कन्।) कामख्यात तृणम्। यथा,—
"सौगन्धिकञ्च सौगन्ध्यं रामकर्पूरकं तथा।"
इति शब्दरत्नावली।

रामगिरिः, पुं, (रामाश्रितो गिरिः। रामो रमणीयो गिरिर्वा।) पर्व्वतविशेषः। चित्रकूटपर्व्वतः। इति केचित्। यथा,—
"कश्चित् कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः
शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्त्तुः।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्य्याश्रमेषु॥"
इति मेघदूते १।

रामचन्द्रः, पुं, (रामश्चन्द्र इवाह्लादकत्वात्।) श्रीरामः। इति शब्दरत्नावली। (अच्युतभट्टसुतः रामचन्द्राख्यः कविविशेषः। स तु अयोध्यानगरे वैराग्यशृङ्गारापेक्षयोपेतं शतश्लोकं रसिकरञ्जनं नाम काव्यं प्रणीतवान्। तस्यादिमश्लोको यथा,—
"शुभारम्भेऽन्भे महितमतिभिर्म्भ्रितमतं
सलिलाभ्रे रम्भे घनघनकुचकुम्भे परिचितम्।
अनालम्बे लम्बे पथि पदविलम्बेऽमितसुखं
समालम्बे कम्बेरमदनमये नितसुखम्॥"
एतट्टीकान्तिमश्लोको यथा,—
'शृङ्गारवैराग्यरत अयच
विद्यायोध्यानगरे वसन्।
अस्मिन् विदग्धारञ्जनकाव्ये
श्रीरामचन्द्रोऽकृत च तस्य टीकाम्॥
श्रीरामचन्द्रकविना काव्यमिदं यदपि विरचितं कौशलया।
रसिकानामपि रतये शृङ्गारार्थोऽपि कथ्यतेऽत्र॥"
एतत्कविप्रणीतानि रोमावलीशतकप्रभृतीन्यन्यान्यपि काव्यानि दृश्यन्ते।)

रामच्छर्दनक, पुं, (रामं मनोज्ञं छर्दयति। छर्दि+ण्वु। स्वार्थे कन्।) मदनवृक्षः। इति भावप्रकाशः। क्वचित् पुस्तके रामाच्छदनक इति च पाठः। (गुणादयोऽस्य मदनशब्दे विज्ञेयाः।)

रामजननी, स्त्री, (रामस्य जननी।) बलदेवमाता। यथा,—
"रोहिणी रामजननी रोहिणिश्च बलप्रसूः।"
इति शब्दरत्नावली।
कौशल्या। रेणुका च।

रामठं, क्ली, (रम्यतेऽनेनेति। रम+"रमेर्वृद्धिश्च।" उणा० १।१०१। इति अठः वृद्धिश्च धातोः।) हिङ्गु। इत्यमरः। १।१।११। (यथा, सुश्रुते। ५।१।
"तत्र मध्याह्ने कुष्ठं रामठं सर्व्वं मधु।
कुर्य्यात् शिरोविरेचनौषधैश्च प्रलेपनम्॥")

रामठः, पुं, (रम्+अठ। वृद्धिश्च।) अङ्कोटवृक्षः। इति रत्नमाला। (जनपदविशेषः। यथा, बृहत्संहितायाम्। १०।५।
"रोमकपारतरामठवैकिरातकश्मीरांश्च।"
तद्देशवासिनश्च। यथा, महाभारते। २।३२।१२।
"रामठान् हारहूणांश्च प्रतीच्याश्चैव ये नृपाः।
तान् सर्व्वान् स वशे चक्रे शासनादेव पाण्डवः॥")

रामठी, स्त्री, (रामठ+स्त्रियां ङीष्।) नाड़ीहिङ्गु। इति राजनिर्घण्टः॥

रामण, पुं, गिरिनिम्बः। तिन्दुकः। इति राजनिर्घण्टः॥

रामणीयक, त्रि, रमणीयम्। इत्यमरटीका। (यथा, महाभारते। १।२६।८।
"रामणीयकमागच्छन्नाभा सह सुवङ्गमा।"
रामणीयकं रमणीयं द्वीपमिति शेषः।)
क्ली, रमणीयस्य भावः कर्म्म वा। रमणीय+"योपधाद्गुरूपोत्तमाद्वुञ्।" ५।१।१३२। इति वुञ्। रमणीयत्वम्। यथा, किराते। १।३८।
"पुरोपनीतं नृप! रामणीयकं
द्विजातिशेषेण यदेतदन्धसा।
तदद्य ते वन्यफलाशिनः परं
परैति कार्श्यं यशसा समं वपुः॥")

रामतरुणी, स्त्री, (रामा मनोहरा तरुणीव।) तरुणीपुष्पम्। इति राजनिर्घण्टः। सेउती इति भाषा।

रामदूत, पुं, (रामस्य दूतः।) हनूमान्। इति शब्दरत्नावली।

रामदूती, स्त्री, (रामस्य दूतीव। विष्णुप्रियत्वात्।) तुलसीविशेषः। तत्पर्य्यायः। पर्णपुष्पी २ विशल्या ३ नागदन्तिका ४ कालवल्ली ५ चम्पपर्णी ६ मरुव्याहा ७ पत्रिपुष्पिका ८। इति शब्दचन्द्रिका।

रामनवमी, स्त्री, (रामस्य जन्मतिथिरूपा नवमी। मध्यपदलोपिकर्म्मधारयः।) चैत्रशुक्लनवमी। सा च श्रीरामचन्द्रस्य जन्मतिथिः। यथा,—
"अगस्त्यसंहितायाम्।
'चैत्रे मासि नवम्यान्तु जातो रामः स्वयं हरिः।
पुनर्व्वसुऋक्षसंयुक्ता सा तिथिः सर्व्वकामदा॥
पुनर्व्वसुऋक्षयोगः स्वल्पोऽपि यदि लभ्यते।
चैत्रशुक्लनवम्यान्तु सा तिथिः सर्व्वकामदा॥
श्रीरामनवमी प्रोक्ता कोटिसूर्य्यग्रहाधिका।
तस्मिन् दिने महापुण्ये राममुद्दिश्य भक्तितः।
यत्किञ्चित् क्रियते कर्म्म तद्भवक्षयकारकम्॥
उपोषणं जागरणं पितृनुद्दिश्य तर्पणम्।
तस्मिन् दिने तु कर्त्तव्यं ब्रह्मप्राप्तिमभीप्सुभिः॥
चैत्रवर्षं पापहरम्।
मेषं पूषणि संप्राप्ते लग्ने च कर्कटाह्वये।
आविरासीत् सकलया कौशल्यायां परः पुमान्॥
अत्र मेषस्थसूर्य्ये चान्द्रचैत्रस्यैव ग्रहणात् तिथिलाभश्च। तथा।
तस्मिन् दिने महापुण्ये राममुद्दिश्य भक्तितः।
यथैकान्ते स्वामीनो यावत् स्याद्दशमीदिनम्।
तेनैव स्यात् पुरश्चर्य्या दशम्यां भोजयेद्द्विजान्।
भक्ष्यभोज्यैर्बहुविधैर्दद्याच्च दक्षिणाम्।
एवं कृते भवेत्तेन सद्यो रामः प्रसीदति॥
तथा।
'चैत्रशुक्ला तु नवमी पुनर्व्वसुयुता यदि।
सैव मध्याह्नयोगेन महापुण्यतमा भवेत्॥
नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः।
उपोषणं नवम्यान्तु दशम्यामेव पारणम्॥'
एतद्वचनद्वयं कालमाधवीयेऽपि। किन्तु सैव पुण्या इत्यत्र महापुण्येति पाठः। शुद्धेति अपवादात् सर्व्वत्र शुद्धायामेवादरो न विद्धायामिति। अतएवाष्टमीविद्धा नवमी सर्व्वथापि नोपोष्या। इति माधवाचार्य्यः। सैव तादृशेन तु विद्धा। यत्र तु परदिने एकादश्यां न्यूना पारणयोग्या तदा दशमीयुक्ता नवम्युपोष्या। वैष्णवैर्विष्णुपरायणैरिति विशेषणात्। अवैष्णवैस्तु अष्टमीविद्धैव ग्राह्या। यदा तु पूर्व्वदिने अष्टमीविद्धा नवमी परत्र दशमीयुक्ता नवमी एकादशीदिने च न पारणयोग्या दशमी तत्र नक्षत्रयोगायोगेऽष्टमीविद्धैव ग्राह्या। परदिने दशम्यामेव पारणमिति नियमात्। तथा च रामार्चनचन्द्रिकायाम्।
'दशम्यादिषु वृद्धिश्चेत् त्याज्या विद्धैव वैष्णवैः।
तदन्येषान्तु सर्व्वेषां मतं तथैव निश्चितम्॥
दशम्यामेव शब्देन दशमीं नैव लङ्घयेत्।
निश्चित्यैव विचार्य्यैव नवमीव्रतमाचरेत्॥'
इति कालिकाश्रमागस्त्यसंहिताव्याख्यानम्। वस्तुतस्तु दशमीपारणपक्षे सर्व्वैरेवाष्टमीविद्धा नोपोष्या। विष्णुपरायणैरिति तु विष्णुपरायणस्यैव भक्तिस्थमित्युपदेशपरं न तु कर्त्तृविशेषणम्। अगस्त्येनावैष्णवस्य विद्धोपवासानुदेशात्। कर्त्तृभेदे विधिद्वयवाक्यभेदापत्तेश्च। अत एव माधवाचार्य्येण सामान्यत एव विद्धा निषिद्धा। अगस्त्यसंहितायामस्य नित्यत्वमाह।
'प्राप्ते श्रीरामनवमीदिने मर्त्यो विमूढधीः।
उपोषणं न कुरुते कुम्भीपाकेषु पच्यते॥
यस्तु रामनवम्यान्तु भुङ्क्ते मोहाद्विमूढधीः।
कुम्भीपाकेषु घोरेषु पच्यते नात्र संशयः॥'
अत्र मत्स्य रघुनाथात् भरमाणवाधिकारः।
एवञ्च।
'कुर्य्याद्रामनवम्यां य उपोषणमतन्द्रितः।
मातुर्गर्भमवाप्नोति नैव रामो भवेत् स्वयम्॥
तस्मात् सर्व्वात्मना सर्व्वे कुर्य्युर्वै नवमीव्रतम्।
शुध्यन्ति पातकैः सर्व्वैर्यान्ति ब्रह्म सनातनम्॥'
इति वचनोक्तं प्राग्वत्सर्व्वोपोषणफलमपायात् विहम्। अगस्त्यसंहितायाम्।
'प्राणायामविधायाथ तुलसीदलवल्लिता।
पूजा श्रीरामचन्द्रस्य कोटिकोटिगुणाधिका॥'

तत्रानुष्ठानमगस्त्यसंहितायां यदिदं विस्तरेण ।
कृतप्रातःस्नानादिः ।
उपोष्य नवमीन्त्वद्य यामेष्वष्टसु राघव ।
तेन प्रीतो भव त्वं भो संसारात्त्राहि मां हरे ॥
इति निवेद्य ।
'कामबाण विभाताभमिन्द्रनीलसमप्रभम् ।
दधिकर्णं दशरथं पुत्रवियोगकातरम् ॥
पृष्ठतो लक्ष्मणं दद्यात् सच्छत्रं कनकप्रभम् ।
पार्श्वे भरतशत्रुघ्नौ तालवृन्तकराबुभौ ।
अग्रे व्यग्रं हनूमन्तं रामानुग्रहकाङ्क्षिणम् ॥
एवं ध्यात्वा श्रीरामं पूजयेत् । आवाहनमन्त्रः ।
'रमोऽसि च यतस्वेव मैत्रलो वरदोऽनिल ।
कुरु दैवो ममात्रादिदिकपाला आपतन्तु ते ॥
अधिरक्षत । कौशल्यां पूजयेत् । मन्त्रस्तु ।
'रामस्य जननी चासि राममयमिदं जगत् ।
अतस्त्वां पूजयिष्यामि लोकमातर्नमोऽस्तु ते ॥
तथा ।
'नमो दशरथायेति पूजयेत् पितरं ततः ।
ततोऽनुज्ञाप्य देवेशं परिवारान् समर्चयेत् ।
पूर्व्वादिकोणकोणेषु हृदयादीनि च क्रमात् ॥
हृदयादीनि यथा । रां हृदयाय नमः । रीं शिरसे स्वाहा । रूं शिखायै वषट् । रैं कवचाय हुम् । रौं नेत्राभ्यां वौषट् । रः अस्त्राय फट् । तथा,—
'हनूमन्तं सुग्रीवं भरतं सविभीषणम् ।
लक्ष्मणाङ्गदशत्रुघ्नं जाम्बवन्तं दशादिशु ॥
धृष्टिं जयन्तं विजयं सुराष्ट्रं राष्ट्रवर्द्धनम् ।
अकोपं धर्म्मपालञ्च सुमन्त्रं पूजयेत्ततः ।
इन्द्रादीन् लोकपालांश्च तदस्त्राणि तदग्रतः ॥
लोकपाला इन्द्रादयो दश । तदस्त्राणि वज्रशक्तिदण्डखड्गपाशाङ्कुशगदाशूलपद्मचक्राणि ।
मध्याह्ने जन्म भावयेत् ।
'उच्चस्थे ग्रहपञ्चके सुरगुरौ सेन्दौ नवम्यां तिथौ
लग्ने कर्क्कटके पुनर्व्वसुदिने मेषं गते पूषणि ।
निर्द्दग्धुं निखिलाः पलाशसमिधो मेध्यादयोध्यारणे-
राविर्भूतमभूदपूर्व्वविभवं यत्किञ्चिदेकं महः ॥
पश्चाद्दा राघवार्घ्यम् ।
'मन्त्रेण दापयेदर्घ्यं दशाश्वमात्मनि ।
वस्त्रानुपूर्व्वं मरीचा प्रयततमम् ।
अमोघरघुनाथैर्युतञ्च गुणलोहितः ॥
मन्त्रस्तु ।
'दशाननवधार्थाय धर्म्मसंस्थापनाय च ।
दानवानां विनाशाय दैत्यानां निधनाय च ।
परित्राणाय साधूनां रामो जातः स्वयं हरिः ।
गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितो मम ॥
इत्याद्यपि पूजयित्वा रामं यामेष्वताभिरत ।
पूजयेद्विधिवद्भक्त्या दिवारात्रं महोत्सवैः ॥
गन्ध वर्त्तिः । सुप्रभातां नवम्यन्तां दिवारात्रम् । विद्वांस्तु दशाहदोहिते दशमी पारणीया न चेत् तदा नवमीना-

योगेऽपि अष्टमीविद्धायाम् । पारणीयापि चेत् तदा अष्टमीविद्धा कृत्वा परेऽहनि उपवासः ।"
इति तिथ्यादितत्त्वम् ॥

रामपूग, पुं (रामो रमणीयः पूगः ।) गुवाकविशेषः । तत्पर्य्यायः । कामीनः २ सुनिपूगः ३ सुरेभट ४ । इति त्रिकाण्डशेषः ॥

रामबाण, पुं (रामस्य बाण इव अमोघत्वात् ।) औषधविशेषः । यथा । रसेन्द्रचिन्तामणौ ।
"पारदामृतलवङ्गगन्धकं
भागयुग्ममरिचेन मिश्रितम् ।
तत्र जातिफलमर्द्धभागिकं
तिन्तिडीफलरसेन मर्द्दितम् ॥
वह्निमान्द्यदशकण्ठनाशनो
रामबाण इति विश्रुतो रसः ।
संग्रहग्रहणीकुम्भकर्णकं
मामवातखरदूषणं जयेत् ॥
दीयते तु चणकप्रमाणतः
सद्य एव जठराग्निदीपनः ।
रोचकं कफकुलान्तकारकं
श्वासकासवमिशूलनाशनः ॥"
पारभाग १ विषभाग १ लवङ्गभाग १ गन्धकभाग १ मरिचभाग ८ जायफलभाग २ ।
रामबाणो रसोऽजीर्णे । इति भावप्रकाशः ॥ (शरविशेषः । इति राजनिर्घण्टः । रामशरश्च ।)

रामभद्रः पुं, (राम एव भद्रो मङ्गलजनकत्वात् ।) श्रीरामः । इति शब्दरत्नावली ॥ (यथा कथासरित्सागरे । ३४ । २२६ ।
"लोकस्य सर्व्वदा रक्षणानुरागादेव हि पुरा ।
रामभद्रेण शुद्धापि त्यक्ता देवी न जानकी ॥")

रामलवण, क्ली, (रामं रमणीयं लवणम् ।) शाम्भरिलवणम् । तत्पर्य्यायः । रोमकम् २ पाथोधिकरसम्भवम् ३ । इति रत्नमाला ॥

रामवल्लभं, क्ली, (रामं रमणीयं वल्लभञ्च ।) त्वचम् । इति राजनिर्घण्टः ॥ (रामस्य वल्लभम् ।) रामप्रिये, त्रि ॥

रामशीला, स्त्री, (रामा रमणीया शीला ।) शीलाविशेषः । यथा, शब्दरत्नावली ॥
"कृष्णो च कृष्णपीतीका शीला हनुमदारतो ।
सारस्वती दैविकला रामशीला प्रकीर्त्तिता ॥"

रामशर, पुं, (रामस्य शर इव ।) शरभेदः । तत्पर्य्यायः । रामकाण्डः २ रामबाणः ३ रामेषुः ४ अपर्नेरसः ५ दीर्घः ६ इक्षुदर्भः ७ । तस्य गुणाः । ईषदुष्णत्वम् । कटुरसत्वम् । रुचे मधुरम् । कषायत्वम् । पित्तकारित्वम् । कफवातनाशित्वञ्च । इति राजनिर्घण्टः ॥ (रामबाणस्य वाच्योऽपि ।)

रामशीतला स्त्री आरामशीतला । इति राजनिर्घण्टः ॥

रामसख, पुं, (रामस्य सखा । "राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) सुग्रीवः । इति शब्दरत्नावली ॥

रामसेनक, पुं, भूनिम्बः । (अस्य पर्य्यायो यथा —
"किराततिक्तः कैरातः कटुतिक्तः किरातकः ।
काण्डतिक्तो नार्य्यतिक्तो भूनिम्बो रामसेनकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
कट्फलः । इति राजनिर्घण्टः ॥

रामा, स्त्री (रमते रमयतीति वा । रम + ज्वलादिभ्यो णः । टाप् । रमतेऽनयेति करणे घञ् वा ।) उत्तमस्त्रीविशेषः । इत्यमरः । २ । ६ । ४ ॥ गौरकान्ती रमते रामा । इति भरतः ॥ (यथा भागवते । ४ । २६ । २६ ।
"विभज्य नवधात्मानं मानवीं सुरतोत्सुकाम् ।
रामां निरमयन् रेमे वर्षपूगान् मुहूर्त्तवत् ॥")
शोभा । (यथा, रघुः । ९ । ३८ ।
"स स्फुटवनलक्ष्मीकुसुमपूर्णं
मधाचयमकाररथ सहितः ।
रामापरिभोगविहारवाधं
शैलाविशेषं सुरतं चकार ॥")
हिङ्गु । नदी । इति मेदिनी ॥ हिङ्गुलम् । इति शब्दरत्नावली ॥ श्वेतकण्टकारी । गृहकन्या । आरामशीतला । अशोकः । गोरोचना । इति राजनिर्घण्टः ॥ वाला । गैरिकम् । इति शब्दचन्द्रिका ॥

रामायणं, क्ली, (रामस्य चरितान्वितं अयनं शास्त्रम् ।) रामेण रावणवधायनम् । इति त्रिकाण्डशेषः ॥ तच्च शतकोटिश्लोकम् । यथा । स्कान्दे पातालखण्डे अयोध्यामाहात्म्ये तदन्त तीर्थमाहात्म्यमध्ये ॥
"प्राप्तोऽस्मि कुरु यद्गच्छ प्राचेतसमहामुनिम् ।
प्रोवाच वचनं ब्रह्मा तथामन्त्र सुरान् प्रति ।
न विवादः स वै रामो ब्रह्मणा भर्त्समानः ।
तस्य वर्णमेव सुरोत्तमा मे प्रसादति ।
दृष्ट्वा ते बलात्तु ब्रह्मणोक्तं तदाप्रभृ ।
तत संपूर्णमायाद रामं शतकोटिभिः ॥"
कोटिभिः शतकोटिभिः । अस्ति रघुनाथस्य शतकोटिप्रविस्तरमिदन्तथापि । तत्र संक्षिप्तं ब्रह्मलोके स्थितम् । इह तु कृष्णपक्षीयवरा चतुर्विंशतिसाहस्रीमितम् । इति रामायणटीकायां रामाभिरामः ॥ ० ॥ यथा हि ।
"प्राप्तराज्यस्य रामस्य वाल्मीकिर्भगवान् ऋषिः ।
चकार चरितं कृत्स्नं विचित्रपदमर्थवत् ॥
चतुर्विंशत्सहस्राणि श्लोकानामुक्तवान् ऋषिः ।
तथा सर्गशतान् पञ्च षट्काण्डानि तथोत्तरम् ॥"
इति रामायणे बालकाण्डे ४ सर्गे ॥ अध्यात्मरामायणे यथा,—
"रामायणमिदं पुण्यं सारं सारं रत्नाकरम् ।
त्रिपुरान्तकमन्त्रं महेशेन स्वयम्भुवा ।
मरीचिं कथयामास दीक्षाचार्यं मनु तथा ।
यत्र रामायणं तीर्थमिदं रामस्य वर्णनम् ।
इक्ष्वाकुवंशजो जातो रामो दशरथो नृपः ।
तत्र दुष्टान् वधार्थं च सत्सङ्गरक्षणाय च ।
श्रीदत्तात्रेयमुनये भारतं वेदव्यासवत् ।
एते वदन्तु रामार्थं ब्रह्मणा इन्द्रदेवता ।

रामो भक्त्या पितुर्मातुर्विश्वामित्रादस्त्रमवाप्तवान् ।
अस्त्रग्रामं गतो यज्ञे ताड़कां प्रजघान च ॥
विश्वामित्रस्य यज्ञे तु सुबाहुं व्यवधीद्बली ।
जनकस्य क्रतुं गत्वा उपयेमेऽथ जानकीम् ।
ऊर्म्मिलां लक्ष्मणो वीरो भरतो माण्डवीं सुताम् ।
शत्रुघ्नो वै कीर्त्तिमतीं कुशध्वजसुते च द्वे ॥
पित्राग्निभिरयोध्यायां गत्वा रामादयः स्थिताः ।
युधाजिन्मातुलश्च शत्रुघ्नभरतौ गतौ ॥
गतयोर्नृपवर्य्येण राज्यं दातुं समुद्यतम् ।
रामाय ज्येष्ठपुत्राय कैकेय्या प्रार्थितस्तदा ।
चतुर्द्दशसमा वासो वने रामस्य वाञ्छितः ॥
रामः पितृहितार्थन्तु लक्ष्मणेन च सीतया ।
राज्यञ्च तृणवत्त्यक्त्वा शृङ्गवेरपुरं गतः ।
रथं त्यक्त्वा प्रयागञ्च चित्रकूटगिरिं गतः ॥
रामस्य तु वियोगेन राजा स्वर्गं समाश्रितः ।
संस्कृत्य भरतश्चागात् रामं मातृजनान्वितः ॥
अयोध्याञ्च समागम्य राज्यं कुरु महामते ।
स नैच्छत् पादुके दत्त्वा राज्याय भरताय तु ॥
विसर्ज्जितोऽथ भरतो रामराज्यमपालयत् ।
नन्दिग्रामे स्थितो भक्त्या ह्ययोध्यां नाविशद्व्रती ।
रामोऽपि चित्रकूटाच्च अत्रेराश्रममाययौ ।
नत्वा सुतीक्ष्णं चागस्त्यं दण्डकारण्यमागतः ॥
तत्र शूर्पणखा नाम राक्षसी खादितुमागता ।
निकृत्य कर्णौ नासे च रामेणाथ पराहता ॥
तत्प्रेरितः खरश्चागाद्दूषणत्रिशिरास्तथा ।
चतुर्द्दशसहस्रेण रक्षसाञ्च बलेन च ॥
रामोऽपि प्रेषयामास बाणैर्यमपुरञ्च तान् ।
राक्षसा प्रेरितोऽभ्यागात् रावणो हरणाय हि ।
मृगरूपं च मारीचं कृत्वाग्रेऽथ त्रिदण्डधृक् ।
सीतया प्रेरितो रामो मारीचं प्रजघान च ॥
म्रियमाणः स च प्राह हा सीते लक्ष्मणेति च ।
सीतोक्तो लक्ष्मणोऽप्यागाद्रामश्चाशु ददर्श तम् ।
उवाच राक्षसी माया नूनं सीता हृतेति सा ।
रावणोऽन्तरमासाद्य अङ्कमादाय जानकीम् ।
जटायुषं विनिर्भिद्य ययौ लङ्कां ततो बली ।
अशोकवृक्षच्छायायां रक्षितां तामधारयत् ।
आगम्य रामः शून्यञ्च पर्णशालां ददर्श च ।
शोकं कृत्वाथ जानक्या मार्गणं कृतवान् प्रभुः ।
जटायुषञ्च संस्कृत्य तदुक्तो दक्षिणां दिशम् ।
गत्वा सख्यं ततश्चक्रे सुग्रीवेण च राघवः ॥
सप्ततालान् विनिर्भिद्य शरेणानतपर्व्वणा ।
बालिनञ्च विनिर्भिद्य किष्किन्ध्यायां हरीश्वरम् ।
सुग्रीवं कृतवान् रामो ऋष्यमूके स्वयं स्थितः ।
सुग्रीवः प्रेषयामास वानरान् पर्व्वतोपमान् ॥
सीताया मार्गणं कर्त्तुं पूर्व्वादौ समहाबलान् ।
प्रतीच्युत्तरां प्राचीं दिशं गत्वा समागताः ।
दक्षिणाञ्च दिशं ये च मार्गयन्तोऽथ जानकीम् ।
वनानि पर्व्वतान् द्वीपान् नदीनां पुलिनानि च ।
जानकीं ते ह्यपश्यन्तो मर्त्तुं कृतनिश्चयाः ।
सम्पातिवचनात् ज्ञात्वा हनूमान् कपिकुञ्जरः ।
शतयोजनविस्तीर्णं पुप्लुवे मकरालयम् ।
अपश्यज्जानकीं तत्र अशोकवनिकास्थिताम् ।
भक्षिता राक्षसीभिश्च रावणेन च रक्षसा ।
भव भार्य्येति वदता चिन्तयन्तीञ्च राघवम् ॥
अङ्गुलीयं कपिर्दत्त्वा सीतां वीक्ष्यमभाषत ।
रामस्य दूतोऽहं शोकं मा कुरु मैथिलि ।
अभिज्ञानञ्च मे देहि येन रामः स्मरिष्यति ।
तत् श्रुत्वा प्रददौ सीता वेणीरत्नं हनूमते ।
यथा रामो नयेत् शीघ्रं तथा वाच्यं त्वया मते ।
तथेत्युक्त्वा तु हनुमान् वनं दिव्यं बभञ्ज तत् ॥
हत्वाक्षं राक्षसांश्चान्यान् बन्धनं स्वयमागतः ।
बन्धैर्विमुक्तितो वायोर्दृष्ट्वा रावणमब्रवीत् ॥
रामदूतोऽस्मि हनुमान् देहि रामाय मैथिलीम् ।
एतत् श्रुत्वा प्रकुपितो दीपयामास पुच्छकम् ॥
कपिर्ज्ज्वलितलाङ्गूलो लङ्कागेहान् समदाहत ।
दग्ध्वा लङ्कां समायातो रामपार्श्वं स वानरः ।
जग्ध्वा फलं मधुवने दृष्टा सीतेत्यवेदयत् ।
मणिरत्नञ्च रामाय रामो लङ्कां ययौ पुरीम् ॥
सुग्रीवः सहनुमानङ्गदाद्यैः सलक्ष्मणः ।
विभीषणोऽपि सम्प्राप्तः शरणं राघवं प्रति ॥
लङ्कैश्वर्य्येऽभ्यषिञ्चच्च रामस्तं रावणानुजम् ।
रामो नलेन सेतुञ्च कृत्वाब्धौ चोत्तरायतम् ॥
सुवेलाचलमारुह्य पुरीं लङ्कां ददर्श च ।
अथ ते वानरा वीरा नीलाङ्गदनलादयः ॥
धूम्रधूम्राक्षधूम्रेन्द्रा जाम्बवत्प्रमुखास्तदा ।
मैन्दद्विविदमुख्यास्ते पुरीं लङ्कां बभञ्जिरे ।
राक्षसांश्च महाकायान् कालाञ्जनचयोपमान् ।
रामः सलक्ष्मणो हत्वा सकपिः सर्व्वराक्षसान् ।
विद्युज्जिह्वञ्च धूम्राक्षं देवान्तकनरान्तकौ ।
महोदरमहापार्श्वावतिकायं महाबलम् ।
कुम्भं निकुम्भं मत्तञ्च मकराक्षं ह्यकम्पनम् ।
प्रहस्तं वीरमुन्मत्तं कुम्भकर्णं महाबलम् ।
रावणिं लक्ष्मणश्छित्वा ह्यस्त्राद्यै राघवो बली ।
निकृत्य बाहुं वक्षांसि रावणञ्च न्यपातयत् ॥
सीतां शुद्धां गृहीत्वाथ विमाने पुष्पके स्थितः ।
सवानरः समायातो ह्ययोध्याख्यं पुरम् ॥
तत्र राज्यं चकाराथ पुत्रवत् पालयन् प्रजाः ।
दशाश्वमेधानाहृत्य गयाशिरसि पातनम् ॥
पितॄणां विधिवत् कृत्वा दत्त्वा दानानि राघवः ।
पुत्रौ कुशलवौ दृष्ट्वा तौ च राज्येऽभ्यषेचयत् ॥
एकादशसहस्राणि रामो राज्यमकारयत् ।
शत्रुघ्नो लवणं हत्वा शैलूषं भरतः स्थितः ॥
अगस्त्यादीन् मुनीन् नत्वा श्रुत्वोत्पत्तिञ्च रक्षसाम् ।
स्वर्गं गतो जनैः साकमयोध्यावैकुण्ठनायकः ॥"

इति गारुड़े १४३ अध्यायः ॥ ० ॥

एतदतिरिक्तं वाल्मीकिप्रणीतं पञ्चविंशतिसहस्रं युक्तं सप्तकाण्डात्मकं सीताचरित्रकथनपूर्व्वकं रावणवधकाव्यमादृतोत्तरकाण्डमस्ति । तत्र प्रथमसर्गीयश्लोका यथा —
"तमसातीरविचरं कर्मैकं तपसां गुरुम् ।
सततं प्रथमं स्मारं वाल्मीकिं ऋषिपुङ्गवम् ॥
विचरायन्तो भूत्वा भारद्वाजो महाद्युतिः ।
प्रपञ्चसकलं ख्यातं शताग्रत्रिपुटो बहोः ।
रामायणमितिख्यातं शतकोटिप्रविस्तरम् ।
प्रणीतं भवता यच्च सत्यलोके प्रतिष्ठितम् ॥
शृणोति मनुजा नित्यं श्रद्धया नियतं सुरे ।
सप्तविंशतिसाहस्रं रामायणमिदं भुवि ।
तदाकर्णितमस्माभिः साधवीयं महात्मने ॥
शतकोटिप्रविस्तारे रामायणमहार्णवे ।
किं गीतमिह सत्यादि तन्मे कथय सुव्रत ।
आकर्ण्येदमिदं प्राह भरद्वाजस्य वै मुनिः ।
इत्थमवक्षयत् सर्व्वं सकारं शतकोटिकम् ॥
श्रीमित्युक्त्वा मुनिः शिष्यं गौतमं वदतां वरः ।
भारद्वाज चिरं जीव साधु ज्ञापितमद्य मे ॥
शतकोटिप्रविस्तारे रामायणमहार्णवे ।
रामस्य चरितं सर्व्वमाश्चर्यं समुदीरितम् ॥
पञ्चविंशतिसाहस्रं श्लोके यत् प्रतिष्ठितम् ।
इदं हि सहस्रं रामचरितं वर्णितं मया ।
सीतामाहात्म्यसारं यत् विशेषात्तत्र नोक्तवान् ।
प्रधानमहितो मया काकुत्स्थचरितं महत् ।
सीतायाः मूलभूतायाः प्रकृतेश्चरितं वद ॥"
इत्याद्यार्षे रामायणे वाल्मीकीये अद्भुतोत्तरकाण्डे आदिकाव्ये प्रथमः सर्गः ॥ ॥ अन्यत् तथाच पुराणोपोत्तरखण्डमतैकस्थितमाध्यात्मिकहरपार्व्वतीसंवादरूपाध्यात्मरामायणमस्ति । तत्र अध्यात्मबालकाण्डे यथा सप्तैव प्रश्नशेषाः षट्शतनियतश्लोकाः सोमवराहृयाम् १ । अध्यात्मरामचरिते अयोध्याकाण्डे नवानां सर्गाणां सप्तशतानि श्लोकाः पुण्यशोभप्रदाः २ । काण्डेऽरण्येऽध्यात्माख्ये सर्गा दिव्यपरिमिताः पञ्चशतानि श्लोकाः पापहरा पाल्तीयोक्ता ३ । श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे किष्किन्ध्याकाण्डे नव सर्गाः पञ्चशतानि श्लोकाः दुरितहराः पञ्चपञ्चाशत् ४ । सुन्दरकाण्डे सर्गाः पञ्चाध्यात्मिकसम्मिते मोक्षार्थीषि शतानि श्लोकास्त्रिपुरघाता हराः ५ । काण्डे युद्धाख्ये सप्त षोडश श्लोकशङ्कोर्षाः सर्गाः शतश्लोका महत्सङ्कलया पुण्याः ६ । अध्यात्मोत्तरकाण्डे सर्गा नव संख्याः प्रमिताः सहस्रशतश्लोकाः ७ । पुराणसङ्ख्याञ्च पुरा हरेणोक्ता ।
"पार्व्वत्यै परमेश्वरेण गदितं ह्यध्यात्मरामायणं काण्डैः सप्तभिरन्वितं त्रिशुभदं सर्गैस्तु वर्णितम् ।
श्रोतव्यं प्रयतेन सर्व्वदा सुखानि चत्वारि वः
समाप्यैव समापनं स्तुतिपदं कष्टानि यान्ति यत् ।"

अध्यात्मरामायणम् ॥ ० ॥

अपरं रामचरित्रकथनरूपमोघसंवादरूपं महारामायणमस्ति । तत्र प्रथमाङ्के अवातिष्ठन्नरहरावतौ । तत्र पादमश्लोको यथा,—

श्रीवाल्मीकिरुवाच ।
"उपशमप्रकरणान्तरमिदं शृणु ।
तन्निर्वाणप्रकरणं ज्ञातं निर्वाणदायि यत् ॥ १ ॥
च इमं प्रश्नयामिन्नं विधिं रामवशिष्ठयोः ।
धर्म्मविज्ञोऽपि सत्कान्मुच्यते ब्रह्म सम्भवति ॥ २ ॥
उत्तरार्द्धे षोड़शोत्तरद्विशततमः । तथा तत्त्वगीता यथा,—
श्रीराम उवाच ।
"मैत्र्यमैत्रात् सत्यमायामायात् तत् पतति दीपितः ।
कथमेतदतो ब्रह्मन् सम्भवत्याशु कौतुकं ॥ १ ॥
यत् सर्व्वं शान्तमिदं ब्रह्म तज्जजामिति च स्फुटम् ।
श्रुत्वा तुरीयेति वाक्यं सर्व्वं ब्रह्माक्षये मम ॥" २ ॥
अस्यादौ वैराग्यप्रकरणस्य । द्वितीयो मुमुक्षु प्रकरणस्य । तृतीय उत्पत्तिप्रकरणस्य । चतुर्थः स्थिति प्रकरणस्य । पञ्चम उपशमप्रकरणस्य । षष्ठप्रकरणे निर्वाणप्रकरणस्य । पूर्व्वार्द्धे श्लोकसंख्या ११६० । उत्तरार्द्धे श्लोकसंख्या ९६८० । इति श्रीमहारामायणे निर्वाणप्रकरणे वाल्मीकीये मोक्षोपाये देवदूतोक्ते द्वात्रिंशत्साहस्र्यां संहितायां वाशिष्ठे महारामायणे उत्तरार्द्धे षोड़शोत्तरद्विशततमः सर्गः ।

रामाविष्टकाम, पुं, (रामाकामाभिष्टमस्य कामोऽभिलाषो यस्मात् ।) रक्ताम्लानः । इति राजनिर्घण्टः ।

रामाधरोपम, पुं (रामाधरोष्ठयोः कोमलयोः उपमा यस्य ।) बन्धूकः । इति राजनिर्घण्टः ।

रामिल, पुं रमणम् । कामः । इति मेदिनी । ले १२० ।

राम्भ, पुं, (रम्भाया विकारः । रम्भ+"पलाशादिभ्यो वा ।" ४ । ३ । १४१ । इत्यण् ।) ब्रह्मचारिणो दण्डः । रम्भो वेणुः तस्य विकारः । इत्यमरभरतौ । २ । ७ । ४५ ।

राय, स्त्री, पीड़ा । इति कश्चित् शब्दरत्नावली ।

रायभाटी, स्त्री, नदीस्रोतोविशेषः । नालीयाङ् इति भाषा । यथा,—
"पूर्णेऽपि पापमहारो रायभाटी समाहरे ।"
इति शब्दमाला ।

राल, पुं, शालवृक्षनिर्यासः । धुना इति भाषा । तत्पर्य्यायः । सर्ज्जरस २ राल ३ कलक ४ बोहर ५ शालनिर्यास ६ देवेष्ट ७ धूपक ८ बहुरूप ९ भवदेव १० शालनिर्यासक ११ सुरभि १२ यक्षधूप १३ धूप १४ अग्निवल्लभ १५ सर्ज १६ सर्जरस १७ । अस्य गुणाः । शिशिरत्वम् । तिक्तत्वम् । कषायत्वम् । स्तम्भनत्वम् । वातपित्तश्लेष्मव्रणकण्ड्वामयनाशित्वम् । अस्य धारणेऽप्युक्तं । ग्रहराक्षसनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"रालस्तु सर्ज्जनिर्यासस्तथा कथ्यते स्यात् ।
देवधूपो यक्षधूपस्तथा सर्ज्जरसश्च सः ।
रालो हिमो गुरुस्तिक्तः कषायो ग्राहको हरेत् ।
दोषास्रस्वेदवीसर्पज्वरव्रणविपादिकाः ।
ग्रहभग्नाग्निदग्धांश्च शूलातीसारनाशनः ॥"
इति भावप्रकाशः ।

रालकार्य्य, पुं, (रालस्य सालरसस्य कार्य्यं यस्य ।) शालवृक्षः । इति राजनिर्घण्टः ।

राव, पुं, (रवणमिति । रु शब्दे+भावे घञ् ।) शब्दः । इति शब्दरत्नावली । (यथा, महाभारते । १ । २१ । १८ ।
"गम्भीरं तिमिमकरोग्रसंकुलं तं
गर्ज्जन्तं जलचररावरौद्रनादैः ।
विस्तीर्णं ददृशतुरम्बरप्रकाशं
तेऽगाधं निधिमुरुमम्भसामनन्तम् ॥")

रावण, पुं, (रवणस्यापत्यमिति । रवण+"शिवादिभ्योऽण् ।" ४ । १ । ११२ । इति अण् । यद्वा, रावयति भीषयति सर्व्वानिति । रु+णिच्+ल्यु ।) लङ्काधिपतिः । तत्पर्य्यायः । पौलस्त्य २ रक्षः ३ लङ्केश ४ दशकन्धर ५ । इति हेमचन्द्रः । दशकण्ठ ६ निकषात्मज ७ राक्षसेन्द्र ८ पङ्क्तिग्रीव ९ १० दशानन ११ । इति शब्दरत्नावली । लङ्कापति १२ दशास्य १३ । इति जटाधरः । (अस्य निरुक्तिर्यथा, रामायणे ।
"यस्माल्लोकत्रयं चैतद्रावितं भयमागतम् ।
तस्मात्त्वं रावणो नाम नाम्ना वीरो भविष्यसि ॥")

तस्योत्पत्तिर्यथा —
राम उवाच ।
"मानवस्य नरेन्द्रस्य आसीत् पुत्रो दमः किल ।
बलमस्य रायादस्य विश्रुतिरिति श्रुतः ।
तस्य कन्या इड़विड़ा रूपेणाप्रतिमा भुवि ।
पुलस्त्याय च राजर्षिस्तां कन्यां प्रददावपि ।
ऋषिरैड़विड़ो यस्यां विश्रवाः समपद्यत ।
तस्य पत्न्यश्चतस्रश्च पुलस्त्यकुलवर्द्धनाः ।
बृहस्पतेः सुता देववर्णिनी ।
विवाहं सुमहाकाय सुतमीर्णं महाद्भुतम् ।
चतुर्दंष्ट्रं हरिश्मश्रु मधुकवर्णिकोविदम् ।
पिङ्गलं नाम कन्याया पिता तम्यावधीतत ।
कुम्भयोनिः कुम्भस्तोऽयं शरीराद्दैत्यसम्भवे ।
कुम्भरात्रौ च जाता तेन वै च कुबेरक ।
कथं कुबेरो वनदुर्विभुत सम्भवम् ।
रावणं कुम्भकर्णञ्च कन्यां शूर्पणखां तथा ।
विभीषणं चतुर्थञ्च कैकस्यजनयत् सुतम् ।
मधुकर्णी दशग्रीव विंशतो रक्तमस्तक ।
चतुष्पादिः श्मश्रुको महाकायो महाबल ।
व्याघ्रदंष्ट्रविभो महर्षिवर्णप्रदीप्त एव च ।
विश्रवोरावण क्रूर च रावण इति स्मृत ।
हिरण्यकशिपुश्चासीत् स राजा पूर्ब्बजन्मनि ।
चतुर्युगानां राजा तु बभूव स रावणः ।
ता सप्तजीवो वर्षौ संख्या स कला
हिमे ।
विभुमाषेकस्य"

कटिमेव सहयानि यस्या हि च रावणः ।
देवतानां विपक्षाच घोरं तथा प्रयामनम्
कैलाशगी चतुर्थाद्वि रावणनाम्ना यथा ।
रामं दाशरथिं प्राप्य समरे पञ्चमीविशत् ॥"
इति वह्निपुराणे वाराहप्रादुर्भावनामाध्यायः ।

रावणगङ्गा, स्त्री, (रावणेन कृता गङ्गा ।) सिंहल देशस्थनदीविशेषः । यथा,—
सूत उवाच ।
"दिवाकरस्य महामहिषे
महासुरश्रोणिमदेनोत्थम् ।
यथागमधीत्य चरितं प्रतस्थे
निशिप्रयोगेन समक्षवेन ॥
सैषा सुराणां कमरेभकर्ण
वीर्य्याद्बधेपोहसमासवेन ।
सङ्कासिपस्याश्चर्यं चकेय
सभागुणैव प्रथम विहङ्गम् ॥
तत् सिंहलीयाबलिनस्त्रियस्य
विमोभितामासमहारतायाम् ।
पूगद्रुमास्कन्धटगथायां
समीपं सर्वं वरिद्रुमालाम् ॥
तत प्रभृति सा गङ्गा तुल्यतुल्यवलोरसा ।
नाम्ना रावणगङ्गेति प्रथिमामनुपागता ॥
ये तु रावणगङ्गायां प्राप्ता कुबेरप्रभृत्ता ।
मयूरानां कन रात्रि विधाचा सहसंस्थापितः ॥"
इति गारुडे ७ अध्यायः ।

रावणारि, पुं, (रावणस्य अरिः शत्रुः ।) श्रीरामः । इति जटाधरः । (यथा,—
"वन्दे लोकाभिरामं रघुकुलतिलकं राघवं
रावणारिम् ॥"
इति महानाटकम् ।)

रावणिः, पुं (रावणस्यापत्यमिति । रावण+"अत इञ् ।" ४ । १ । ९५ । इति इञ् ।) रावणपुत्रः । स च इन्द्रजित् । यथा —
"रावणिः शक्रजिन्मेघनादो मन्दोदरीसुतः ।"
इति हेमचन्द्रः । ३ । ३७० ।
(यथा महाभारते । ३ । २८८ । १७ ।
"रावणिस्तु महावीर्य्य विद्युन्माली सारथेः ।
ततो दृढतरं शक्रमायोजयविक्रमः ॥"
रावणकुम्भकर्णौ । यथा भट्टि । १३ । ४८ ।
"तत्राग्रान्विने दरथा हृदये वर्ण्यमाना ।
साधूदयाम्बुजा वर्णे रावणस्य सुरद्वयम् ॥")

राष, च ह शब्दे । इति कविकल्पद्रुमः । (भ्वा-पर-सक-सेट् ।) रकाराद्यन्त इति केचित् । राष्णी शब्दे । वृन्दिकी इष्ट रावणान्त अष्टात्र वर्णौ रूप रूपा । इतिसूत्रं कुर्व्वन्नेव । च, अराराष्टे । ष, राष्टे । इति दुर्गादासः ।

राशि पुं (राशते इति । राश शब्दे+इन् । यद्वा अश् व्याप्तौ । अश् धातो+"अशि-रशिभ्यो रकारस्य नुट् च ।" उणा । ४ । १३३ । इति इन् रकारागमश्च ।) तत्पर्य्यायः । पुञ्जः । पुञ्ज २ उत्कर ३ कूट ४ ।

ऽन्मरे । २ । ५ । ३२ । मनुष्य ५ धमा न्यार ६ । इति जटाधरः । अश्नुते व्याप्नोति इति राशिः । अशू ङ व्याप्तिसङ्घातयोरित्यस्मात् व्याप्नोति इत्यत्र निपातनादिशागमः । इति भरतः ॥ * ॥ (यथा, शकुन्तलायाम् १ अङ्के । "न खलु न खलु बाणः सन्निपात्योऽयमस्मिन् मृदुनि मृगशरीरे तूलराशाविवाग्निः ॥") ज्योतिःशास्त्रः द्वादशांशः । तस्योत्पत्तिर्यथा,—

अथ यदा भगवत्कौ ब्रह्मावह्वाररम्भन् ।
मनसश्चन्द्रमा जज्ञे सूर्योऽक्ष्णोस्तेजसां निधिः ॥
मनस स्व ततो वायुरग्निरापो धरा क्रमात् ।
गुणैकवृद्धा पञ्चैव महाभूतानि जज्ञिरे ॥
अग्नीषोमौ भास्करेन्दू ततस्त्वङ्गारकादयः ।
तेजोभूखाम्बुवातेभ्यः क्रमशः पञ्च जज्ञिरे ॥
पुनर्द्वादशधात्मानं विभेजे राशिसंज्ञकम् ।
नक्षत्ररूपिणं भूयः सप्तविंशात्मकं वशी ॥"

इति सूर्यसिद्धान्ते गोलाध्यायः ॥ * ॥

तस्य स्थानं यथा,—

"विषुवत्क्रान्तिवलयोः सम्पाते प्रथमाश्रितात् ।
तत्पूर्वभागस्थिता राशयः क्रान्तिवृत्तस्य पूर्वदिक्क्रमात् ॥"

इति सूर्यसिद्धान्तगोलाध्यायः ॥ * ॥

अथ राश्यादिनिर्णयः ।

"मेषवृषमिथुनकर्कटसिंहाः कन्या तुलाथ वृश्चिकभम् ।
धनुरथ मकरः कुम्भो मीन इति च राशयः कथिताः ॥"

इति राशिकथनम् ॥ * ॥

"अश्विन्या सह भरणी कृत्तिकापादश्च कीर्त्तितो मेषः ।१।
वृषभः कृत्तिकाशेषं रोहिण्यर्द्धञ्च मृगशिरसः ।२।
मृगशिरसोऽर्द्धं चार्द्रा पुनर्वसोस्त्रिपादो मिथुनम् ।३।
पादः पुनर्वसोरन्त्यः पुष्योऽश्लेषा च कर्कटः ।४।
सिंहोऽथ मघा पूर्वफल्गुनी पाद उत्तरायाः ।५।
तच्छेषं हस्ता चित्रार्द्धञ्च कन्याख्यः ।६।
तौलिनि चित्रार्द्धं स्वाती विशाखायाः पादत्रयम् ।७।
अलिनि विशाखा पादस्तथानुराधान्विता ज्येष्ठा ।८।
मूलं पूर्वाषाढ़ा प्रथमश्चाप्युत्तराषाढ़ा धन्वी ।९।
मकरस्तत्परिशेषः श्रवणा चार्द्धं धनिष्ठायाः ।१०।
धनिष्ठार्द्धं शतभिषा पूर्वभाद्रपदांशत्रयं कुम्भः ।११।
पूर्वभाद्रपदाशेषश्चोत्तरा रेवती मीनः ॥"१२।

इति राशिनक्षत्रभेदकथनम् ॥ * ॥

"राशिनामानि च चैषं भवन्ति प्रवदाम च ।
मेषादीनाम् पर्यायं लोकादेव विनिर्णयेत् ॥"

इति राशिपर्यायकथनम् ॥ * ॥

"क्रियताबुरिजितुमकुलीरलेयपाथेयजूककौर्प्याख्याः ।
तौक्षिक आकोकेरो हृद्रोगश्चान्त्यभं चेत्थम् ॥"

इति मेषादीनां विशेषनामकथनम् ॥ * ॥

"अरुणसितहरितपाटलपाण्डुविचित्राः सितेतरपिशङ्गौ ।
पिङ्गलकर्बुरबभ्रुमलिना रुचयो यथासंख्यम् ॥"

इति मेषादीनां वर्णभेदकथनम् ॥ * ॥

"मत्स्यौ घटी नृमिथुनं सगदं सवीणं
चापी नरोऽश्वजघनो मकरो मृगास्यः ।
तौली ससस्यदहना प्लवगा च कन्या
शेषाः स्वनामसदृशाः स्वचराश्च सर्वे ॥"

अश्वजघनोऽश्वाकारजघनो नरः अश्वारूढ़ इति यावत् । उत्तरे चतुश्चरणत्वकथनात् ।

राश्यधिष्ठातृदेवताकथनम् ॥ * ॥

"क्रूरोऽथ सौम्यः पुरुषोऽङ्गना च
ओजोऽथ युग्मं विषमः समश्च ।
चरस्थिरद्व्यात्मकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः ॥"

इति राशीनां क्रूरसौम्यादिविवेकः ॥ * ॥

दैवज्ञमनोहरे ।

"पुंयश्च पुंस्वरश्चैव आधानाख्यस्तथैव च ।
सुखा हस्ता भवन्त्येते नित्यं द्वादश राशयः ॥"

इति पुंस्यादिविवेकः ॥ * ॥

"मिथुनतुलाघटकन्या द्विपादाख्यास्तथापूर्व्वं भागश्च ।
स्यातद्धनुराद्यमार्द्धं चतुष्पदाख्यानां धनुषः ॥"

इति द्विपच्चतुष्पदराशिकथनम् ॥ * ॥

"कर्कटवृश्चिकमीना मकरान्त्यार्द्धञ्च कीट सञ्ज्ञा स्युः ।
वृश्चिकराशिर्मुनिभिः सरीसृपश्चैव निर्दिष्टः ॥"

इति कीटसरीसृपराशिकथनम् ॥ * ॥

"द्विपदचतुष्पदाः सर्व्वे सिंह विहाय चतुष्पदाः ।
सलिलनिलया भवन्ति राशयः सरीसृपजातयः ॥
स्वगृहादितसंस्थे तिष्ठन्तीते विहाय सरीसृपान् ।
अकथितसंज्ञाः सर्व्वे स्वस्थानचराः ॥"

सरीसृपजातय इति बहुवचनात् कीटस्यापि परिग्रहः । राशीनां ग्राम्यवन्यकथनम् ॥ * ॥

"ग्राम्या मिथुनतुलाकौर्प्याविघटा सिंहाद्य पश्चिमौ ।
मकरादिमार्द्धचिंरी वन्यौ दिवसेऽजवृषभौ च ।
जलजौ कर्कटमीनौ मकरान्त्यार्द्धञ्च विकृमतीकुम्भः ॥"

इति ग्राम्यारण्यजलचरराशिकथनम् ॥ * ॥

"वृषाजिसिंहोऽलिघटा मिथुनमृगः कर्कटश्च ह्रस्वाश्च समाः ।
वृश्चिककन्यास्त्रस्तथिधनी दीर्घाः समाख्याताः ॥"

इति राशीनां ह्रस्वदीर्घकथनम् ॥ * ॥

"प्रागादिककुभां नाथा यथाक्रमं प्रदक्षिणम् ।
मेषाद्या राशयो वेदाधिराज्ञतिपरिक्रमात् ॥"

इति दिगधिपकथनम् ॥ * ॥

"कुजशुक्रबुधेन्दुरवीन्दुसुतासितभौमसुरान् ।
सौरार्किभानुस्त्वेषां चैत्रादि स्तृश्यास्य ॥"

इति गृहाधां दैवकथनम् ॥ * ॥

"अजो गोपतिर्युग्मश्च कर्किश्चान्धिकस्त्रावषा ।
नियामध्या स्तुतानेते निवासाख्ये दिगाश्रयाः ॥
नियामध्या विनिर्भुक्ता स्थला एतोऽप्याश्रया ।
शेषाः ग्रीवादिया स्थले मीनश्चोभयचरः ॥"

इति निशादिवाबलकथनम् ॥ * ॥

"रविमांसं निशानाथः सपादद्विवत्सरम् ।
पक्षश्च भूमिपुत्रो बुधोऽष्टादशवासरान् ॥
वर्षमेकं सुराचार्य्यश्चाष्टाविंशन्दिनं भृगुः ।
शनिः सार्द्धद्वयं वर्षं स्वभानुः सार्द्धवत्सरम् ॥
एवं प्रमाणात् गच्छन्ति राशिं ग्रहाः सदा ॥"

इति राशिभोगकथनम् ।

इति ज्योतिस्तत्त्वम् ॥ * ॥ द्वादशराश्यात्मकशिवरूपं यथा,—

पुलस्त्य उवाच ।

"स्वरूपं त्रिपुरघ्नस्य वदिष्ये कामरूपिणः ।
अश्विनी भरणी चैव कृत्तिकाप्रथमांशकम् ।
मेषस्तु हि विजानीयात् त्रुवचेश्वराद्दाहतम् ।
आग्नेयांशास्त्रयो ब्रह्मन् प्राजापत्यं कवेर्गृहम् ।
सौम्यार्द्धं वृषनामेदं वदनं परिकीर्त्तितम् ।
मृगार्द्धमार्द्रादित्यांशास्त्रयः सौम्यपते शिरः ।
मिथुनं भुजयोस्तस्य गगनस्थस्य शूलिनः ।
आदित्यांशश्च पुष्यश्च आश्लेषा शशिनो गृहम् ।
राशिः कर्कटको नाम पार्श्वे मखविनाशिनः ।
पित्र्यर्क्षं भगदैवत्य उत्तरांशश्च केशरी ।
सूर्य्यक्षेत्रं विभोर्ब्रह्मन् हृदयं परिकीर्त्तितम् ।
उत्तरांशास्त्रयः पाणिश्चित्रार्द्धं कन्यका स्मृता ।
सोमपुत्रस्य सद्मैतद्द्वितीयं जठरं विभोः ।
चित्रांशद्वितयं स्वाती विशाखायांशकत्रयम् ।
द्वितीयं शुक्रसद्मं तु नाभिसंश्रिता ।
विशाखांशमनुराधा ज्येष्ठा भौमसद्म विदुः ।
द्वितीयं वृश्चिको राशिर्मेढ्रं कामरूपिणः ।
मूलं पूर्वोत्तरांशश्च देवाचार्य्यस्य वै गृहम् ।
उरुयुगलमीशस्य अमरेशैः प्रगीयते ।
उत्तरांशास्त्रयो ऋक्षं श्रवणं मकरो मुने ।
धनिष्ठार्द्धं शनिक्षेत्रं जानुनी परिकीर्त्तिते ।
धनिष्ठार्द्धं शतभिषा प्रौष्ठपद्यांशकत्रयम् ।
सौरं सद्मापरमिदं कुम्भो जङ्घे च विश्रुते ।
प्रौष्ठपद्यांशमेकन्तु उत्तरा रेवती तथा ।
द्वितीयं जीवसद्मैतं मीनस्तु चरणावुभौ ॥" ॥ * ॥

राशीनां नक्षत्रपादि यथा,—

नारद उवाच ।

"राशयः कथिता ब्रह्मन् ! त्वया द्वादश वै मम ।
तेषां विशेषतो ब्रूहि लक्षणानि सलक्षण ॥"

पुलस्त्य उवाच ।

लक्षणं तव वक्ष्यामि राशीनां शृणु नारद ।
याहशा यत्र सञ्चारा यस्मिन् स्थाने वसन्ति हि ।
अजाविकसमेताश्च धान्यरत्नाकरादिषु ।
नवशाद्वलसञ्छन्नो वसुधायाञ्च सर्व्वतः ।
नित्यं चरति पुष्पेषु सस्या भुविमेदि च ।
मेषः स्थानमस्येवं धान्यादिकाकरादिषु ।

गृह यद्गृहत्त्वेषु चरती गोकुलादिषु ।
तस्याधिवासभूमिस्तु तथैवत्यधरात्रया ॥
चोगुणयो मम मदग्रयामदपरिस्रवे ।
गोबावाद्यर्द्धिग्रुज गौतमर्मकशिल्पिषु ॥
स्थित प्रोक्ता रतिशिल्प विहारोऽभवितरत्र तु ।
मिथुन नाम विख्यात राशिर्द्वधात्मक स्मृत ॥
कर्कि कुलीरेव सम सलिलस्थ प्रकीर्तित ।
केदारवापीपुलिनविविक्तावनिरेव च ॥
सिंहस्तु पर्वतारण्यदुर्गकन्दरभूमिषु ।
वसते व्याधपल्लीषु गह्वरेषु गुहासु च ॥
या हि प्रदीपककरा नावारूढा च कन्यका ।
चरते स्त्रीरतिस्थाने वसति सदनेषु च ॥
तुलामादिश्य पुरुषो वीथ्यापणविचारक ।
नगराध्वनि शालासु वसते तत्र नारद ॥
सश्वभ्रवल्मीकचारी वृश्चिको वृश्चिकाकृति ।
विषगोमयकीटोपलादिषु संस्थित ॥
धनुस्तुरङ्गजघनो दीप्यमानो धनुर्द्धर ।
वाजिशूरोऽस्त्रविद्वीर स्थायी गुह्वलादिषु ॥
मृगास्यो मकरो मन्त्र । वृषस्कन्ध इत्यादि ।
मकरोऽसौ वनचारी वसते च सदोऽम्बुधौ ॥
रिक्तकुम्भश्च पुरुष स्कन्धधारी जलाप्लुत ।
द्यूतशालाचर कुम्भसायी शौण्डिकगृहग ॥
मीनद्वयमथासक्तौ मीनस्तीर्थाम्बुसञ्चर ।
वसते पुण्यदेशेषु देवब्राह्मणसूचक ॥
लक्षणं गदितं तुभ्यं मयाद्यैर्वा महात्मने ।
न कस्यचिन्मयाख्येय गुह्यमेतत् पुरातनम् ॥
एतत्प्रया ते कथित सुरर्षे
यथा विशेष प्रथमाय यष्टि ।
पुण्य पुराण परमं पवित्र
सत्प्रसन्तो पापहर शिवश्च ॥"

इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे पञ्चमोऽध्याय ॥

राशिचक्र क्ली (राशीनां चक्रम् ।) मेषादि द्वादशराशीनाम्परिमण्डलम् । तस्य नामान्तर भचक्र ज्योतिश्चक्रञ्च । यथा,—
"क्रान्तिवृत्तिर्भज्योतिश्चक्र क्षितिजवासुराम् ।
तन्मध्ये भवत्यादिर्भैर्वसुचराङ्कित ॥"

इति दीपिका ॥ * ॥

तद्विवरणं यथा —
"भचक्र ध्रुवयोर्बद्धमाक्षिप्त प्रवहानिलै ।
पर्येत्यजस्र तन्नद्धा ग्रहकक्षा यथाक्रमम् ॥
उपरिष्टात्सर्वेषा मध्यतोऽधस्ताच स्थितस्य च ।
मध्ये भक्षा ज्योतिषां भागा महान्तोऽल्पकाश्च
स्मृता ॥
भान्येवाल्पेन भागेन स्वल्पेनाल्पप्रमाणिता ।
तत्र कालेन महता मण्डले भ्रमति भ्रमन् ॥
अल्पाया तु वसुन् भुङ्क्ते भमण्डल शीघ्र
राशिभि ।
महता क्षणमात्रेण मन्द भ्रमणमिष्यते ।
अल्पान्तरस्य मण्डलस्य शीघ्रतया दिवसाधिपा ।
चन्द्रोऽधिकतरस्तु मण्डला मन्दबोधिता ।
चन्द्रमेव ग्रहता साधारणा मध्ये स्मृता ।

चोरेषा त्र्यधिकतया ऽधोऽथ क्रमशस्तथा ।
भवेदूकमा सौरस्योद्धमर्ध चरितादितम् ।
सर्वोपरिष्टात् भ्रमति योजनैस्तैर्भमण्डलम् ॥"
तत्र कक्षाक्रमाद् ।
"मध्याक्रमधो परिधिर्यामकक्षाभिधीयते ।
तत्कक्षोऽथस्त भानामधोऽधः क्रमशस्तथा ॥
मन्दामरेज्यभूपुत्रसूर्यशुक्रेन्दुजन्दव ।
परिभ्रमन्त्यधोऽधः स्था सिद्धविद्याधरा घना ॥"

इति सूर्यसिद्धान्त ॥ * ॥

ग्रहचयचक्रस्थयोगे फलविशेषज्ञापक राशिचक्र यथा,—
"राशिचक्र प्रवक्ष्यामि शृणुष्व हिमकान्तया ॥
रविर्भौमस्तथा सौम्यश्चैव चक्रे समागते ।
जलपातो भवेत् तत्रासिद्धुर्भ विज्ञयामये ॥
रविर्जीवस्तथा शुक्रश्चैव चक्रे समागते ।
वायुपातो भवेत् तत्रासिद्धुर्भ विज्ञयामये ॥
रविर्जीवस्तथा भौमश्चैव चक्रे समागते ।
अग्निपातो भवेत् तत्रासिद्धुर्भ महायामये ॥
रविर्भौमस्तथा राहुश्चैव चक्रे समागते ।
कोद्रपातो भवेत् तत्रासिद्धुर्भ महायामये ॥
रवौ राहुस्तथा केतुश्चैव चक्रे समागते ।
पाषाणपातोऽपि भवेद्धुर्भ भानुयामये ॥"
इति नरपतिजयचर्यायां शुभाशुभचक्रे राशिचक्रम् ॥ * ॥ जातकराशिचक्रम् । यथा,—
"तत्रादित्यप्रभृतिग्रह राशिचक्रे व्यवस्थितम् ।
तत्र शुद्धाख्यमतया अवश्यामि यथा यथा ॥"

इति पञ्चस्वरा ॥ * ॥

मलमासोक्तराशिचक्रम् यथा । ज्योतिषतत्त्वे दृष्टे ।
"रेखात्रय पूर्वपरायत स्यात्
तत्पाश्वतो याम्यकुवेरभेदात् ।
एकैकमीशानविशाचरे तु
कृताग्नवायोर्विदिशोर्त्तवोर्यात् ॥
वेदाग्निवह्निमुखग्नवदाग्निमध्यात्
यथैवयाम्यपरवत्रयवायोः ।
मेषादिन प्रविलिखेत् सकलास्तु रेखा
ज्ञ्यापातात् प्रविलिखेदिह प्रान्तिकात् ॥"
तथा —
"वाल सौर सुर योग शशी हौमेति राशिषु ।
क्रमेण मिलिता वर्गा अन्यात्राप्रादशा स्मृता ॥"
तेन च चा र ई मेष । ए क क वृष । का च छ मिथुनम् । ह डि कर्कट । भो भो सिंह । प प श ष ण ठ पा कन्या । ककारजुका । चकारो वृश्चिक । उकारो धनु । तकारो मकर । पवर्ग कुम्भ । दकारो मीन । अकाराशिवामयुक्त कर्म भवेत् । तथा च ।
"अकारराशिवोषाममयुक्त भवेत्स्वम् ।"

इति वचनात् ।

"राशीनां त्रुटनाहेतवा अन्तच च वक्रम् ।
चराशिभराशन्ना इत्यर्थ इत्यर्थ ॥"
तदा तु भराशिरवार्थ तदा वक्रमानस्वर अर्थाद् राशि दर्शन्तं दर्शेत ।

"सर्व्वादरवरराशन्तं नवपैत् साधकाचरम् ।"
इति रामार्चनचन्द्रिकाश्रुतवचनात् । तथा
"चथादि राशिमच्चि नामादक्षरराशित ॥"

इति तत्रैव ॥

"तेन मन्त्रादवर्णेन नामादक्षरेण च ।
ग्रामदेवादि वस्त्र वाहन द्वारमेव वा ।
रिपुमन्त्राक्षराख्य स्यात् तेन तत्राक्षिप्त भवेत् ॥
एक पञ्च नव बान्धवा स्मृता
द्वौ च षट् च दशमाश सेवका ।
पाङ्क्तिकन्तु मनवस्तु पोषका
द्वादशाष्टचतुरस्तु घातका ॥"

इति विद्युद्विषयम् ॥

रामार्चनचन्द्रिकाधृतवचनात् । पुरस्ताद् तु वक्तव्यम् । तथा च ।
"सहादशसहारमादि वर्ज्जनीयानि यत्नत ॥"


इति वचनात् ॥

स्वाहारे ।
"सप्त धर्म माक्षकमुमपशुत्वचचा ।
मल्ल प्रभाकमभावया द्वारश वायव ॥
नामाद्गलनवमेतैर्वा शुभाशुभफल लभेत् ॥
सप्ते सिद्धिरस्तथा मित्र पते धनसम्पत्त ।
भ्रातरि व्याकरिवन्न सखौ शत्रुविस्सन ।
पुत्रे पुत्रतिसिद्धि स्यात् सप्ते साधकस्य रिपु ।
कलत्रे मध्यमा प्रोक्ता मरणे मरण भवेत् ॥
धर्मे धर्माभिवृद्धि स्यात् सिद्धिर कर्मणि स्थित ।
आये च धनसम्पत्तिर्व्यये च अखिलक्षय ॥"
वैद्यनामकं तु प्रकृताम्नि कर्तृरिति पाठ । इति तत्रसार ॥

राशिचक्रकार, पुं, (राशिचक्रकार ।) रामार्चनराशिपरिमाणप्रापकाङ्क । तद्विवरण यथा —
अथ राशिचक्राकारे वरमवर्ण इत्यम् ।
"अथादु दशमासोऽस्मिन्नेकारवदाम्
परिमितमसमान सुवर्णादीन देव ।
भवति परिमितस्त्र वर्जेत वेदचित्
यममन्त्रकरा सुभौमयकाराश ग्रन्थ ॥"

उदाहरणम् ।
"यमप्रति सिम राशिभि मिल कृष्णाख्य
पद्मविधमिति कथहरूलदेवोवा ।
प्रवर मत्स आर्म विन्दिला दन्ति सर्व
तत्र प्रवरकमार्थ सुवर्णाय शोभम् ।"

अथ कृष्णकमानामामारदप्रश्नस्य



रविर्वि १ । देव १ । रविर्विवर्षेत १ । रविभर १ । देव १ विर १ । कर्म आर्चि १ ।

अथाशुधान्यराशिमानानयनाय


न्यास



परिधि १ । वेध $\frac{१}{११}$ । जातं फलम् ५४५ $\frac{५}{११}$ ।

अथ शूकधान्यराशिमानानयनाय

न्यास



परिधि १ । वेध $\frac{२}{३}$ । जातम् १११ $\frac{२}{३}$ ।

अथ भित्त्यन्तर्बाह्यकोणसंलग्नराशिप्रमाणानयने करणसूत्रम् ।

"द्विवेदसत्रिभागैकनिघ्नास्तु परिधी फलम् ।
भित्त्यन्तर्बाह्यकोणस्थराशी स्वगुणभाजितम् ॥"


उदाहरणम् ।

'परिधिर्भित्तिलग्नस्य राशेस्त्रिंशत्करः किल ।
अन्तःकोणस्थितस्यापि तिथितुल्यः करः सखे ।
बहिः कोणस्थितस्यापि पञ्चघ्ननवसम्मितः ।
तेषामाचक्ष्व मे क्षिप्रं घनहस्तान् पृथक् पृथक् ।'

अत्रापि शूकादिधान्यानां राशिमानाव-
बोधनाय स्तम्भैकन्यसम् ।

तथाहि भित्तिलग्नधान्यराशिमानबोधकं क्षेत्रम् ।


न्यास



अत्रोदाहृत परिधि ३ । द्विनिघ्न ६ । अन्त १५ । चतुर्थ ४ । अपर ४५ । बहि भागैक $\frac{३}{४}$ निघ्न १० । तथा वेध १ । एभ्य एव तुल्यवेधकत्वस्य एव खात ६ । एवमु-भयगुणेन भक्त जातं पृथक् पृथक् फलम् १० । १५ । ३६ ।

अथाशुधान्यराशिमानानयनाय


न्यास



पूर्ववत् क्षेत्रमयानां स्वगुणगुणितपरिधि १० । वेध $\frac{१}{११}$ । फलानि २०२ $\frac{८}{११}$ । १३६ $\frac{४}{११}$ । ४६ $\frac{१}{११}$ ।

अथ शूकधान्यराशिमानानयनाय

न्यास



अत्रापि पूर्ववत् क्षेत्रमयानां स्वगुणगुणित परिधि १ । वेध $\frac{२}{३}$ । फलानि ३३३ $\frac{१}{३}$ । १११ $\frac{२}{३}$ । ५० ।

इति लीलावत्यां राशिव्यवहारः समाप्तः ॥

राष्ट्रं, पुं क्ली, (राजते इति । राज + "सर्वधातुभ्य ष्ट्रन् ।" उणा ४ । १५८ । इति ष्ट्रन् । अर्द्धर्चादित्वात् ।) विषयः । (यथा मनु । ८ । २५४ ।

"अस्मार्थं सक्ष्करान् यस्तु बलि गृह्णाति पार्थिवः ।
तस्य प्रक्षुभ्यते राष्ट्रं स्वर्गाच्च परिहीयते ॥")

उपद्रवः । इत्यमरः । ३ । ३ । १८६ । विषयो जनपदः । उपद्रवो मरकादि । इति भरतः ॥ (राष्ट्रपालननियमादिर्महाभारते १२ । ८७ अध्याये द्रष्टव्यः ॥ *। पुं पुरूरवोवंशजातस्य काशि पुत्रः । यथा, भागवते । ९ । १७ । ४ ।

"काशस्य काशिस्तत्पुत्रो राष्ट्रो दीर्घतम-पिता ॥")

राष्ट्रनिवासी [न्] पुं, (राष्ट्रे निवसतीति । नि + वस + णिनि ।) जानपदः । देशवासी । इति त्रिकाण्डशेषः ॥

राष्ट्रिका, स्त्री (राष्ट्र उपद्रवस्थानं तेनाश्यस्या इति । राष्ट्र + ठन् । टाप् ।) कण्टकारिका । इत्यमरः । २ । ४ । ९३ ॥ (पुं, राष्ट्रवासी । जानपदः । यथा, मनुः । १० । ६१ ।

"यत्र त्वेते परिध्वंसा जायन्ते वर्णदूषकाः ।
राष्ट्रिकैः सह तद्राष्ट्रं क्षिप्रमेव विनश्यति ॥"

राष्ट्रपति । यथा, हरिवंशे । १५६ — २२ ।

"कुम्भाण्ड । मन्त्रिणो ब्रूत । प्रीतास्मि न द्रुतम् ।
सुबलत्वं विनाशाय राष्ट्रिकोऽस्तु महीयते ।
यस्त्रातिप्रज्ञ सुहृदो निर्भृतोऽस्तु महीपते ।
राज्यस्थ ते मया दत्तं चिर वैरतता क्षया ॥")

राष्ट्रियः, पुं, (राष्ट्रेऽधिकृतः । राष्ट्र + "राष्ट्रावारपाराद् घखौ ।" ४ । २ । ९३ । इति घः । यद्वा, राष्ट्रे जातः । "तत्र जातः ।" ४ । ३ । २५ । इति घः ।) नाट्योक्तौ राजश्यालः । इत्यमरः । १ । ७ । १४ ॥ (राष्ट्राध्यक्षः । यथा, महाभारते । १२ । ८५ । १९ ।

"तत्र संप्रेषयेद्राष्ट्रे राष्ट्रियाय च दर्शयेत् ॥")

राष्ट्रीय, पुं (राष्ट्रे भव इति । राष्ट्र + छः ।) नाट्योक्तौ राजश्यालः । इति हेमचन्द्रः । ३ । २४ ॥ राष्ट्रसम्बन्धिनि, त्रि । (यथा, महाभारते । १२ । ८७ । ९ ।

धान्य हिरण्य भाण्डं भोज्यं राष्ट्रीयवञ्चनम् ॥")

रास, ऋ ङ शब्दे । इति कविकल्पद्रुमः । (भ्वा-आत्म० अक० सेट् ।) ऋ, अरिरासत् । ङ, रासते । इति दुर्गादासः ॥

रास पुं, (रासनमिति रासतेऽनेनेति वा । रास शब्दे + भावे अधिकरणे वा घञ् ।) कोलाहलः । शब्दः । भाषाशृङ्खलः । गोपानां क्रीडाभेदः । इति मेदिनी । से, ११ । तस्य विधिर्यथा,—

"कार्त्तिकीपूर्णिमायाञ्च कृत्वा तु रासमण्डलम् ।
गोपानां शतकं कृत्वा गोपीनां शतकन्यथा ।
शिलायां प्रतिमायां वा श्रीकृष्णं राधया सह ।
भारते पूजयेत् कृत्वा चोपचाराणि षोडश ।
गोलोके च वसेत् सोऽपि यावद्वै ब्रह्मणो वयः ।
भारतं पुनरागत्य हरिभक्तिं लभेद्ध्रुवम् ।
क्रमेण सुदृढां भक्तिं लब्ध्वा मन्त्रं हरेरपि ।
देहं त्यक्त्वा च गोलोकं पुनरेव प्रयाति च ।
तत्र कृष्णस्य सारूप्यं सम्प्राप्य पार्षदो भवेत् ।
पुनस्तत्पतनं नास्ति जरामृत्युहरो महान् ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २६ अध्यायः ॥ विस्तारस्तु श्रीभागवतस्य दशमस्कन्धे २९ अध्यायादिपञ्चाध्यायेषु च द्रष्टव्यः ॥ कस्यचिन्मते व्यक्तलक्षणविशेषम् । अन्य विधि यथा,—

'कार्त्तिके पौर्णमास्यान्तु रासयात्रा महाविधिः ।
सम्भवन्ती प्रकर्त्तव्या महाविभवविस्तरैः ।
इष्टलाभे पुरा प्राप्य नास्ति विस्मयं तव ।
पूजां कान्याहरान् तु महेन्द्रं च महोत्सवे ।
गोविन्दमावेदवेदविद्यानाम्बुजे ।
इत्येवराजनामोति तुवालय कोविदे ।

चन्दनागुरुकस्तूरीपङ्कपङ्क्तिविराजिते ।
विहरद्भिर्विभुभक्तैः काम एव मनोहरः ।
ध्यायेद्‌वृन्दावने रम्ये यमुनापुलिने वने ।
निकुञ्जसम्पन्न लक्ष गोपीमण्डलमण्डितम् ।
रासमण्डपमध्यस्थ गोविन्द कामकातरम् ।
द्वयोर्द्वयोर्गोपिकयोर्मध्ये स्थानमनेकधा ।
अपर नटवरेण सार्धं स मुरलीधरम् ।
गोपीगणमुखाम्भोजमधुपानमधुव्रतम् ।
कुलालचक्रप्रतिमं मण्डलं पङ्कजाङ्कितम् ।
दलाष्टशोभितं कार्यं मणिद्वयोरष्टौ च सन्धिषु ।
सन्धौ सन्धौ च गोविन्दं पार्श्वयोरष्टरूपकम् ।
मुकुन्दं माधवं लक्ष्म नटवागमेव च ।
हरिं दामोदरं विष्णुं पूजयेत् कामरूपिणम् ।
तदाष्टभूपुरे गोप्य प्रतिष्ठाप्य समन्तत ।
पूजनीया प्रयत्नेन कृष्णगीतपरायणा ।
अथष्टा गोपिकाश्चाथ मण्डलेऽष्टौ दलाम्बुजा ।
मणिद्वयस्था समाख्याता चन्द्रपङ्कजनिर्मला ।
गन्धोत्सवाभिलाषेण कमला बहुरूपिणी ।
राधा विशाखा विमला सुमित्रा ललिता तथा ।
सुन्दरी कमला रम्भा मणिद्वयोऽष्टौ प्रकीर्तिता ।
तारा राधा निराबाधा लक्ष्मा भैरवमागता ।
नार्यो ध्यानैरनुमाये पूजा कार्या विधानत ।
यत्नीर्थे साय समये गोप्यो वृन्दावन ययु ।
रासक्रीडां ततश्चाभिचक्रे च जगदीश्वर ।
गोप्यो रासक्रीडां चक्रु पौर्णमास्यां सदा
निशि ।
न तत्र पतिविरहो न भिक्षोर्निनदस्तथा ।
महानिशा द्वे घटिके रात्रिमध्यमयामयो ।
तत्रान्ते च कलय पौर्णमास्यां निशायुते ।
एवं रासक्रीडां यस्तु कारयेत्तुषि मानव ।
स सर्वदुष्कृत मुक्त नित्यानन्दमुपागत ।"
इत्युत्सवकलिका ।
(विलास । यथा, भागवते । ५ । २ । १२ ।
"अस्वादिपद्म तव उभयतो बिभर्ति
चञ्चुन चरतरागसुधान्विके ।"
"चञ्चे च चञ्चुन बिभर्षि किं तन्नाह । रसो मधुरालाप रासो विलासस्ताभ्यां सहिता सुधा अधरामृतम् । आदिशब्दात् स्मितमवेक्षा ।" इति तत्र श्रीधरस्वामी । क्रिया । यथा, भागवते । १ । ११ । १० ।
"तेनार्पिता चक्रकुलं समाविशत्
सरोवरम् प्रोक्षसदिति बासरान् ।
तत्ताविराहैव सुनिवृतेश्च
परस्परोद्वीपविद्युतनावधि ।"
"नैरर्पितश्च कलाभावे श्रान्ता दैवाद्यो साक्षाद्यो पुन पुन परिदत् तेषां ग्रीव प्राय वित्पूर्णक पुष्करमकरादावारपरोधवत् अतर्थं यथा वानरशुगात् भटाचारान् परस्परा इति । तत्ताविराहैव वासरेषु न विधवा स्त्रियो निवृतेभूव मरुद्धरतशोभेच नैव विद्युते कोविनायविमरवेदानो देव ।" इति गङ्गाधरो श्रीधरस्वामी । ७ ।)

रासभ, पु, (रासति शब्दायते इति । रास+ "रासिवल्लिभ्याञ्च ।" उणा ३ । १२५ । इति अभच ।) गर्दभ । इत्यमर । २ । ९ । ७८ । (अस्य हि अक्षम पर्य्याया ज्ञात । यथा, माघे । १९ । २६ ।
"मङ्गलाचालान् समासन्नान् रासभान् प्रमदकान् क्रमात् ।
उन्नामन्नतरांश्चैव मायाक्रमाय आसन ।"
अश्वतर । खच्चर इति भाषा । यथा, महाभारते । १ । १२५ । ७ ।
"स च रासभयुक्तेन स्यन्दनेनाशुगामिना ।
धारयाधसतावेव यथा याति तथा कुरु ।")
रासभवन्दिनी, स्त्री, मल्लिका । इति शब्दचन्द्रिका ।
रासभी, स्त्री, (रासभ+ङीष ।) गर्दभी । इति शब्दरत्नावली । (यथा, महाभारते । १२ । २७ । १४ ।
"एतत् श्रुत्वा मनुष्येषु दारका रासभीव च ।
आचरन्तीं दृष्टा पूर्वं रासभीं प्रत्यभाषत ।")
रासमण्डलं क्ली (रासस्य मण्डलम् ।) श्रीकृष्णस्य रासक्रीडास्थानम् । तद्विवरणम् । यथा —
"तस्मादुपरि गोलोक पञ्चाशत्कोटियोजने ।
वायुना धार्य्यमाणश्च विचित्रपरमाद्भुत ।
अतीवरम्यनिर्माणो निखिलप्रमी मनोहरा ।
शतशृङ्गश्च शैलेन पुण्यवृन्दावनेन च ।
सुरासमण्डलेनापि सदा विरचिताचल ।
कोटियोजनविस्तीर्णा प्रस्थेन विरचा अस ।
दैर्घ्यं तस्य शतगुणा परित परमा शुभा ।
अमूल्यरत्ननिकरा श्रीरामाविमयोज्ज्वला ।
मध्येश्च कौस्तुभाद्येनानामध्यानी मनोहरा ।
अमूल्यरत्ननिर्माणं तस्यापि प्रतिमन्दिरम् ।
मनोहरं प्राकारमहर् विश्वकर्मणा ।
गोपीभिर्गोपिकावृन्दैर्वेष्टितं श्यामसुन्दरि ।
कल्पवृक्षे पारिजातैरक्षोवे सरोवरे ।
पुष्पोद्याने शतकोटिभि सहस्र रासमण्डलम् ।
वेष्टितं वेष्टनैर्गोपीमन्दिरै शतकोटिभि ।
रत्नप्रदीपयुक्तैश्च पुष्पतल्पसमन्वितै ।
सुगन्धिचन्दनामोदै कस्तूरीकुङ्कुमान्वितै ।
क्रीडोपयुक्तैर्भोगैश्च ताम्बूलैर्विनिर्मितै ।
धूपै सुरभिरम्यैश्च माल्यैश्च रत्नदर्पणै ।
रत्नके रचितै श्वेतचामरारोपितै रपि ।
अमूल्यरत्नाभरणैर्मणिकुण्डलैर्वरैश्च ।
सन्ततमभिरामाभि र्वेष्टितैश्च वने समन्तत ।
मनोहरकल्पवृक्षै र्वेष्टितैरपि ।
रम्यं वर्तुलाकारं चन्द्र यत्र यथा शम ।
अमूल्यरत्नरचित रत्नोपकरणान्वितम् ।
कस्तूरीकुङ्कुमे रम्ये सुगन्धिचन्दनान्विते ।
चारुनम मधुपवरे कर्ण्णमनोहरे ।
दर्पणान्वितैश्च सर्वैश्च विराजितैर्युते वने ।
श्रीरामवरवेषाभिरलङ्कृतैश्च मम हरे ।
रासमण्डलैश्च विभिन्नरत्नके ।
चन्दनचन्दनाद्यैश्च शुद्धैश्च विभूषित ।

चन्द्रतम्बरबेष्टित मणिमङ्ग मनोहरम् ।
कोट्योधननतूच नैर्ब्यं रत्नतुल्योत्तरम् ।
शैलप्रस्थ परिमित पञ्चाशत्कोटियोजनम् ।
अतीवकमनीयश्च मन्दिरैर्मञ्चकैर्वरम् ।
प्राकारमिव तस्यापि गोलोकस्य मनोहरम् ।
परितो वलितं रम्यं श्रीराधारत्नमन्वितम् ।
तत्र वृन्दावनं रम्यं शुभं चन्दनपादपैः ।
कल्पवृक्षैश्च रम्यैश्च मन्दारैः कामधेनुभिः ।
शोभितं शोभनाढ्यश्च पुष्पोद्यानैर्मनोहरैः ।
क्रीडासरोवरै रम्यैः सुरम्यै रतिमन्दिरैः ।
अतीवरम्यं तद्वासि रासदीप्तसमन्वितम् ।
रत्नैः रचितैः रम्यैरलङ्कारोपशोभितैः ।
परितो वर्तुलाकारं विस्तीर्णं योजनं वनम् ।
वटमण्डपसंयुक्तं पुष्पोद्यानैरलङ्कृतम् ।
तत्रान्तरालं रम्यं रत्नेनैव हि निर्मितम् ।
वरदस्थानमीशस्य परितश्च चतुर्गुणम् ।
गोपीभिः कल्पवृक्षैश्च सर्वराधावलम्बितम् ।
क्रीडाभिर्नैर्शरत्नश्च राधारासविनोदकैः ।
विलासैरर्चितैस्ताभिः कृष्णाद्यैराज्ञितैश्च च ।
पुष्पान्वितैर्माल्यैश्च परिपक्वसुगन्धिभिः ।
रासोत्सवैश्च क्रीडैश्च वृन्दावनविहारिणी ।
तत्र क्रीडति सा राधा मम प्राणाधिदेवता ।
दैव श्रीरासमण्डल शतमानसुसम्भृता ।
अत्रादिदेवैः तत्रैश्च पूजिता सदा ।"
इति ब्रह्मवैवर्ते गणपतिखण्डवाद श्रीकृष्ण जन्मे नाम अध्याय ।
रासयात्रा स्त्री, (रासस्य यात्रा उत्सव ।) कार्त्तिकीपूर्णिमायां श्रीकृष्णस्य रासोत्सव तद्विवरणं यात्रातत्त्वे द्रष्टव्यम् । ७ । इति विष्णुधर्म्मोत्तरे यथा —
"पौर्णमास्यां रासयात्रां कुर्यात् कृष्णस्य
प्रीतये ।
पुष्पमालासमायुक्तां सर्वां वैवाहिक कर्म्म ।"
पौर्णमास्यां चैव पौर्णमास्याम् ।
"शरदि रासयात्रां मैत्रीभिरन्वितम् ।
कृत्वा तान् पूजयेत् कृष्णमाधवेश्वरं कृष्णसद्म ।
आलायश्च नारदादिगणैश्च सुरेश्वरे ।
कुर्यादानन्दपूरं रासं निशि तत्र ।
विलासैश्च कुर्यात् ईश्वराय महात्मन ।"
इति वामकेश्वरतन्त्रे । २ पटल ।
रासेरक, पु (रासे क्रीडायां ईरकः [illegible] । [illegible] ।) [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] इति शब्दरत्नावली । [illegible] इति त्रिकाण्डशेषः ।
रासेश्वरी स्त्री, (रासस्य ईश्वरी ।) राधा । यथा —
"राधा रासेश्वरी रम्या [illegible] ।"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे [illegible] ।
रास्ना स्त्री, ([illegible]) [illegible]
"[illegible]" [illegible]
इति [illegible] । [illegible]

विशेष । राश्न इति हिन्दी भाषा । तत्पर्य्यायः । नाकुली २ सुरसा ३ सुगन्धा ४ गन्धनाकुली ५ नकुलेष्टा ६ भुजङ्गाक्षी ७ छत्राकी ८ सुवहा ९ । इत्यमरः ॥ नाकुल्यादिपञ्चकं रास्नायाम् । नकुलेष्टादिचतुष्कं सर्पाक्ष्यामित्याहुः । इति तट्टीकायां भरतः ॥ रस्या १० श्रेयसी ११ रसना १२ रसा १३ सुगन्धिमूला १४ रसाढ्या १५ अतिरसा १६ दीर्घमूलिका १७ सर्पगन्धा १८ पलङ्कषा १९ । इति जटाधरः ॥ अस्या गुणाः । गुरुत्वम् । तिक्तत्वम् । उष्णत्वम् । विषवातास्रकासशोथकम्पोदराध्मानाशित्वम् । पाचनत्वञ्च ।

रास्ना तु त्रिविधा प्रोक्ता मूलं पत्रं तृणं तथा ।
श्रेष्ठौ मूलन्तौ शिष्टौ तृणा रास्ना तु मध्यमा ।'
इति राजनिर्घण्टः ॥

अपि च ।
'नाकुली सुरसा रास्ना सुगन्धा गन्धनाकुली ।
नकुलेष्टा भुजङ्गाक्षी सर्पाक्षी विषनाशिनी ॥
नाकुली तुवरा तिक्ता कटुरुष्णा विनाशयेत् ।
भोगिलूताखुवृश्चिकविषज्वरकृमिव्रणान् ॥'
इति भावप्रकाशः ॥

रास्ना आमवातघ्नी । इति राजवल्लभः ॥ ओषधिविशेषः । कांटा आमरुली इति भाषा । तत्पर्य्यायः । एलापर्णी २ सुवहा ३ युक्तरसा ४ । इत्यमरः ॥ अपि च ।

रास्ना युक्तरसा रस्या सुवहा रसना रसा ।
एलापर्णी च सुरसा सुगन्धा श्रेयसी तथा ॥
रास्नामपाचनी तिक्ता गुरूष्णा कफवातजित् ।
शोथश्वाससमीरास्रवातशूलोदरापहा ।
कासज्वरविषाशीतिवातिकामयहिध्मजित् ॥"
इति भावप्रकाशः ॥

स्त्रिया । यथा वाजसनेयसंहितायाम् ।११।३ ।
'आदित्यै रास्नासि ।'
'इ घोक अदित्यै अदित्या भूम्याः रास्नासि रसना असि ।' इति तद्भाष्ये महीधरः ॥ रामपत्नीनामान्यतमा । यथा ब्रह्मवैवर्ते । १ । ९ । १३—१४ ।
'नामानि कामपत्नीनां सावधान निबोध मे ।
कम्भा कलावती कान्ता कालिका कलहप्रिया ।
कन्दली भीषणा रास्ना प्रमोदा भूषणा शुकी ।
एतस्यां बहवः पुत्रा बभूवुः शिवमायया ॥'")

राहुः, पुं (रह त्यागे + बहुलवचनात् उण् ।) त्यागः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः । (रहति ग्रहीतुं त्यजति चन्द्रमिति । रह त्यागे + बहुलवचनात् उण् । इत्युज्ज्वलः । १ । १ ।) ग्रहविशेषः । तत्पर्य्यायः । तमः २ स्वर्भानुः ३ सैंहिकेयः ४ विधुन्तुदः ५ । इत्यमरः ॥ अस्रपिशाचः ६ ग्रहकल्लोलः ७ सैंहिकः ८ उपप्लवः ९ शीर्षकः १० उपरागः ११ सिंहिकासुतः १२ । इति शब्दरत्नावली ॥ [illegible] १३ कबन्धः १४ । इति जटाधरः ॥ अगुः १५ असुरः १६ । इति ज्योतिस्तत्त्वम् ॥ तस्योत्पत्तिर्यथा,—

"सिंहिकायामथोत्पन्ना विप्रचित्तिसुतास्तथा ।
व्यंशः शल्यश्च बलवान् नलश्चैव च ।
इल्वलो नमुचिश्चैव वातापी सृमरो निकः ।
नरकश्चकालनाभौ भौमश्च नरकस्तथा ॥
राहुर्ज्येष्ठश्च तेषां वै चन्द्रसूर्य्यप्रमर्द्दनः ।
इत्येते सिंहिकापुत्रा देवैरपि दुरासदाः ॥
दारुणाभिजनाः क्रूराः सर्व्वे ब्रह्मद्विषस्तु ते ।
दशान्यानि सहस्राणि सैंहिकेयो गणः स्मृतः ।
निहतो जामदग्न्येन भार्गवेण बलीयसा ।
स्वर्भानोस्तु प्रभा कन्या पुलोमस्तु शची सुता ॥"
इति वह्निपुराणे प्रजापतिवंशनामाध्यायः ॥०॥

तस्य शिरश्छेदकारणं यथा —
"देवलिङ्गप्रतिच्छन्नः स्वर्भानुर्देवसंसदि ।
प्रविष्टः सोममपिबच्चन्द्रार्काभ्याञ्च सूचितः ॥
चक्रेण क्षुरधारेण जहार पिबतः शिरः ।
हरिस्तस्य कबन्धस्तु सुधयाप्लावितोऽपतत् ॥
शिरस्त्वमरतां नीतमजो ग्रहमचीकॢपत् ।
यस्तु पर्व्वणि चन्द्रार्कावभिधावति वैरधीः ॥"
इति श्रीभागवते ८ स्कन्धे ९ अध्यायः ॥

स च मलयपर्व्वतजातः । शूद्रश्च । द्वादशाङ्गुलपरिमाणः । धूम्रवर्णः । धूम्रवस्त्रः । सिंहवाहनः । चतुर्भुजः । खड्गचर्म्मशूलवरधारी । सूर्य्यास्यः । अस्य अधिदेवता कालः । प्रत्यधिदेवता सर्पः । इति ग्रहयज्ञतत्त्वम् ॥ अस्य स्वरूपं प्रमितम् । स च चक्रालवाहिः । समाकृतिः । अग्निस्वामी नैर्ऋतस्वामी च । इति ग्रहयागतत्त्वम् ॥ (राहुचारस्य फलाफलं बृहत्संहितायां ५ अध्यायतो द्रष्टव्यम् ।)

राहुग्राहः, पुं (राहोर्ग्राहो ग्रहणं यत्र ।) चन्द्रसूर्य्योपग्रहणम् । यथा,—
"राहुग्राहोऽर्कचन्द्रयोः उपराग उपप्लवः ।"
इति हेमचन्द्रः । २ । ३९ ॥
(अत्र राहुग्रास इत्यपि पाठो दृश्यते ।)

राहुचक्रं, क्ली, (राहोश्चक्रम् ।) रथादिगमनादिषु अवश्यज्ञातव्यं यामार्द्धेन यामार्द्धे प्राच्यादिषु राहोर्भ्रमणम् । यथा —
"पञ्चार्के विधौ वह्नौ सौम्ये मे वायव्य भुजे ।
दक्षोऽग्निः भौमौ याम्ये गुरावैशे भृगौ निशे ।
राहुर्भ्रमति यामार्द्धे चागत्या च वामतः ।
इति युद्धे विवादे च यात्रायां सम्मुखं त्यजेत् ।
राहुं विवादयेद्युद्धाद्दक्षे पृष्ठे तु कर्मणां फलम् ॥"
इति स्वरशास्त्रसारावली । ७ ।

राहुकालानलचक्रं यथा,—
"तस्य चक्रं प्रवक्ष्यामि राहुकालानलात्मकम् ।
शुभाशुभप्रदं चक्रं त्रिशूलं तत्त्रिकादिकम् ।
यत्र भागे स्थितो राहुर्यन्त्रं तदनिर्द्दिशेत् ।
सुखान् यान्ति यतः पृष्ठे तस्य पृष्ठं प्रकल्पितम् ।
अर्द्धोपरमाश्च ख्याता यामक्ते यत्र दैवतम् ।
ग्रामं तस्य दक्षिणं सर्व्वं दक्षभागमपि ।
राहुभुक्तानि ऋक्षाणि जीवपक्षे बुधोदये ।
बुधोदयेन भोग्यानि मृतपक्षं प्रकीर्त्तितम् ।
मृतपक्षे भवेत् तस्य युद्धं जीवाङ्गमध्यगम् ।
एवमङ्गद्वयो राहुर्भ्रान्त स्वरपारगे ।
जीवपक्षे प्रयाणं च मृतपक्षे रवौ स्थिते ।
तस्मिन् काले शुभा यात्रा विपरीते तु हानिदा ॥"
इति स्वरोदयः ॥

राहुच्छत्रं, क्ली आर्द्रकम् । इति राजनिर्घण्टः ॥

राहुदर्शनं, क्ली, (राहोर्दर्शनं यत्र ।) राहोः ग्रासग्रहणम् । ग्रहणमिति यावत् । यथा,—
"सम्पूर्णं दशमं राहोर्यावद्दृश्यद्वयमुच्यते ।
तत्र कर्माणि कुर्व्वीत गच्छन्नागच्छतो नतु ॥
राहुदर्शनकान्तिविवाहाद्यवहिष्ठं ।
आगमाद्यन्तु कर्मैव दानाद्यं विवर्जितम् ॥"
इति तिथ्यादितत्त्वम् ॥

राहुभेदी, [न्] पुं (राहुं भिनत्ति । भिद् + णिनि ।) विष्णुः । इति जटाधरः ॥

राहुमूर्द्धभित्, पुं, (राहोर्मूर्द्धानं भिनत्ति छिनत्ति । भिद् + क्विप् ।) विष्णुः । इति त्रिकाण्डशेषः ॥

राहुरत्नं, क्ली, (राहुप्रियं रत्नम् । राहो रत्नमिति वा ।) गोमेदकः । इति राजनिर्घण्टः ॥

राहुसूः, पुं, बुद्धः । इति हेमचन्द्रः । २ । १५१ ॥

राहुरुच्चस्थितियोगः पुं, (राहुणा सह गुरुयोगो मेलनम् ।) एकराशिस्थितगुरुराहू । स च चाण्डालयोग इति ख्यातः । तस्य काले शुद्धिजनकर्म्म यथा, भीमदेवचन्द्रसारसंग्रहे ।
"सर्व्वं कार्य्यं न कर्त्तव्यं गुरौ सिंहस्थिते च ।
चण्डाले न कुर्वीत तमोयुक्ते बृहस्पतौ ॥"
तमोयुक्ते राहुयुक्ते । गुरुदोषे इति निर्णयः । चैत्रिककर्म्मादिपरम् । तथा च ज्योतिषम् ।
"एकराशौ स्थितौ ख्यातौ यदि राहुबृहस्पती ।
विवाहव्रतचूडादि सर्व्वं तत्र परित्यजेत् ॥"
अत्रमासाद्युपकल्प भविष्ये ।
"अश्विन्याद्येकराशौ तु सम्पर्कं यदि यामयोः ।
गुरौ राहोरपि तथा वर्जयेत् ॥"
अत्र गुरावन्यस्य हेतुः ।
"यत्र यत्र स्थितो जीवस्तमोयोगेन जायते ।
उपरागाय किं न स्यान्नक्षत्रो मनीषिणाम् ॥"
इति मलमासतत्त्वम् ॥०॥

अस्य प्रतिप्रसवो यथा —
"कन्यान्नारादिकजिह्नदर्पि
हरसुतो राहुयुतो विषमं ।
पौषेषु दैवेषु न चास्ति दोषं
सर्व्वेषु कार्य्येषु तृणयो वदन्ति ॥"
इति ज्योतिःसारसमुच्चयमिति केचिद् वदन्ति ॥

राहुसूतकं, पुं (राहोः सूतकं यत्र ।) उपरागः । इति हलायुधः ॥

राहुहा [न्] पुं (राहुं हन्तीति। हन्+क्विप्।) विष्णुः। इति हेमचन्द्रः।

राहूच्छिष्ट, पुं, (राहोरुच्छिष्टः।) लशुनः। इति त्रिकाण्डशेषः। (अस्य विवरणन्तु रसोन शब्दे द्रष्टव्यम्।)

राहूत्सृष्ट, पुं (राहुणा उत्सृष्टः परित्यक्तः।) लशुनः। इति हारावली। २२३। (अस्य विवरणं रसोनशब्दे द्रष्टव्यम्।)

रि श गतौ। इति कविकल्पद्रुमः। (तुदा० पर० सक० सेट्।) रेफादिः। श रियति। इति दुर्गादासः।

रिक्त क्ली (रिच+क्त।) शून्यम्। वनम्। इति मेदिनी। ते, ५।

रिक्त, त्रि (रिच+क्त।) रिक्तम्। इति शब्दरत्नावली। (शून्यम्। यथा मनुः। ८।४५।
"भाण्डपूर्णानि यानानि तार्य्यं दाप्यानि मारुत।
रिक्तभाण्डानि यत्किञ्चित् पुमांसश्चापरिच्छदाः।")

रिक्तक, त्रि (रिक्त+कन्।) शून्यम्। इत्यमरः। ३। १। ५६। (यथा, मनुः। ८। ४।
"पण यानं तरे दाप्यं पौरुषोऽर्द्धपणं तरे।
पादं पशुश्च योषिच्च पादार्द्धं रिक्तकः पुमान्।")

रिक्ता स्त्री (रिच+क्त। टाप्।) तिथिभेदः। सा तु चतुर्थी नवमी चतुर्द्दशी च। यथा —
"नन्दा भद्रा जया रिक्ता पूर्णा च तिथयः क्रमात्।"
इति तिथ्यादितत्त्वम्।

कर्म्मसु तस्या निषेधविधी यथा —
"नन्दा भद्रा जया रिक्ता पूर्णा नामसदृक्फला।"
न रिक्ता सर्व्वकर्म्मसु। इति ज्योतिःसारः।
"चन्द्रे चार्केऽङ्गारिकशुक्रविधुते मध्येऽथवा चापयो
कक्षा च व्यतिपातवैधृतिदिने विरिष्टा रिक्ता तिथिम्।
कराद्यायनवेष्टयोर्विहिते लग्नात्मके मानुषे।
रिक्तासु विधवा कन्या दर्शेऽपि स्यादिवाहिता।
अष्टेवारिष्टे चैव यदि रिक्ता तिथिर्भवेत्।
तस्मिन् विवाहिता कन्या पतिसन्तानवर्ज्जिता।"
इति दीपिका।
"षड्डे मासि दिवाकरे शुभकरे रिक्तेतरे वा तिथौ
सौम्ये भवतिथिर्जीवदिवसे पक्षे च लक्ष्मीतरे।"
इति भुजबलभीमः।
"दाम्भी सप्तमी नन्दा रिक्तासु पञ्चपर्व्वसु।
वक्रमावृषभौ चन्द्रात् त्रिशूलगाणमच्छकम्।"
इति ज्ञानविलासोत्ति।
"पूर्व्वमासकथर्व्वगकरहितेमूर्द्धावशिष्टे तिथौ
षष्ठे न हि सितेन्दुजीवरदरपि सौम्ये सौमौरये।
कताथि पञ्चे वर्षे च्छद्मनि करादेः।
षष्ठो प्रतिपदश्चैव षष्ठिका तथाष्टमी।
रिक्ता पञ्चदशी चैव जीवितमासदिने तथा।
वर्षे सर्व्वविधि चादौ विदारम्भन्तु कारयेत्।"
इति विष्णुधर्मोत्तरः।

"शून्यातिथ्यादशविमिश्रतिथ्यादिषु
रिक्तादर्शे विगतचन्द्रतिथि विहाय।
शाङ्गालिमीनमुन्थ विष्णुनारिवारे
शस्तेन्दुयोगकरणेषु चलप्रचारः।"
इति दीपिका।
"चन्द्रार्कयोर्भवेत पूर्णा कुजे भद्रा जया गुरौ।
बुधमन्दौ च नन्दायां शुक्रे रिक्तास्तथा तिथि।"
इति भीमपराक्रमः।
"सर्व्वत्र कार्य्ये बुधजीवयुक्ता
केन्द्रत्रिकोणोपगताः प्रशस्ताः।
क्रूरैश्च भाविगताश्च पापा
स्तिथिर्विरिक्ता शुभदा च चार्व।"
इति दीपिका।
"चतुर्थी नवमी चैव रिक्ता चैव चतुर्द्दशी।
शुक्रे नन्दा बुधे भद्रा शनौ रिक्ता कुजे जया।
गुरौ पूर्णा च संयुक्ता सिद्धयोगाः प्रकीर्त्तिताः।
बुधमन्दगता नन्दा कुजे भद्रा जया गुरौ।
भृगुरिक्तान्वितं प्रोक्तं पूर्णा च रविचन्द्रयोः।"
इति ज्योतिःसारसारः।
"अष्टादशोद्वादशीषु न सर्व्वेषु दिनेष्वपि।
पूर्णिमाप्रतिपद्‌रिक्तासप्तमीषु च।
तथा पञ्चद्वितीयायां यात्रायां मरणं भवेत्।"
इति समुद्रसारावली।

रिक्थ क्ली, (रिच्यते त्यज्यते मृतेनेति। रिच+ "पातृतुदिवचिरिचिसिचिभ्यस्थक्।" उणा० २। ७। इति थक्।) धनम्। इत्यमरः। २। ९। ९। (यथा, मनुः। ८। २७।
"बालदायादिकं रिक्थं तावद् राजानुपालयेत्।
यावत् स स्यात् समावृत्तो यावच्चातीतशैशवः।")

रिक्थहारी, [न्] त्रि, (रिक्थं हरतीति। हृ+णिनिः।) दायादः। धनहारी। यथा।
"यद्यपी नियुक्तो देवरादिः क्षेत्रजपुत्रोत्पादनाय
पोषणे रक्षणपुत्रार्थं प्रवृत्तोऽयं जनयति च द्विपितृको दासुष्यायणो द्वयोरपि रिक्थहारी पिण्डदाता च।" इति मिताक्षरायां दायभागः।

रिक्थी, [न्] त्रि, (रिक्थमस्यास्तीति। रिक्थ+इनि।) धनहारी। धनी। (यथा याज्ञवल्क्यः। २। ५९।
"योऽभियुक्तः परेतः स्यात् तस्य रिक्थी तद् हरेत्।")

रिङ्खा, स्त्री, खिला। खुरः। इति हेमचन्द्रः। ४। २०३।

रिख र गतौ। इति कविकल्पद्रुमः। (भ्वा० पर० सक० सेट्।) र, रिङ्खति। इति दुर्गादासः।

रिग र गतौ। इति कविकल्पद्रुमः। (भ्वा० पर० सक० सेट्।) र, रिङ्गति। इति दुर्गादासः।

रिङ्खणं, क्ली, (रिङ्ख+ल्युट्।) स्खलनम्। इति हेमचन्द्रः। ६। १२९। (यथा —
"तुमाप रिङ्खणैर्येषां हारतसमपदम्।
कुमाराः पचरसौ ते वक्षस्थायाः विशाखरे।")

रिङ्गण क्ली, (रिङ्ग+ल्युट्।) स्खलनम्। इत्यमरः। "रे सर्व्वदुर्व्वारगन्धनिरासी सवेर

त्रिधामान्यथाभावे स्खलने। श्रीनिवास विधिज्ञानादेष स्खलने। इति रमानाथः। धर्म्मविलङ्घनं रिङ्गणमिति स्वामी। बालानां हस्तपादाभ्यां चलनं रिङ्गणम्। विधिमार्गे चलनं रिङ्गणमित्यन्ये। रिङ्गणं भेदोऽप्यप्रिणोप चारेण सर्व्वे स्खलनम्। रिग रिगि लिगि गतौ भ्वादि। रिङ्खणमिति पाठे इति रख रिखि सर्व्वे स्खलने रूपम्।" इति भरतः।

रिच, लि सम्पर्चविरेचने। इति कविकल्पद्रुमः। (चुरा० पक्षे भ्वा० पर० सक० सेट्।) लि रेचयति रेचति। रिक्तो रिपुदरादान्तो धनेन सैन्य रेचति। रेचयति च तदर्थे इति हलायुधः। इति दुर्गादासः।

रिच, इर् ध न ऋ विरेके। इति कविकल्पद्रुमः। (रुधा० उभ० सक० अनिट्।) विरेक पौष पूर्ण्णेन पुरीषोत्सर्गः। इति चतुर्भुजः। इर्, अरिचत् अरैक्षीत्। ध न, रिणक्ति रिङ्क्ते अतिसारकी। ऋ, रेका। इति दुर्गादासः।

रिच, ह अत्यये। इति कविकल्पद्रुमः। (भ्वा० आत्म० सक० सेट्।) अत्यये भवति। ह रेचते। इति दुर्गादासः।

रिपम् पुं कामः। पलमः। इति शिवः।

रिपु, पुं, (अरिक रपतीति। रप व्यक्तायां वाचि+ "रपे रिच्चोपधायाः।" उणा० १। २०। इति कु इकारश्चोपधायाः। "रिप कत्थनयुद्धनिन्दा हिंसादानेषु। "ईपी लिप। यथा १।१३। इति शाकलकाकुशब्दः। रिपति शैथिल्य दद्यति। तत्र शाकलकादि ककारस्य पकारः। रिपति मोक्षार्थं पुष्पं विकसितं वा निन्दति च कृत्यु पुरुषे।" इति निघण्टुटीकायां देवराजयज्वा। १। २३। ३।) शत्रुः। इत्यमरः। २। ८। १०। (यथा, हितोपदेशे।
"न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः।
कारणादेव जायन्ते मित्राणि रिपवस्तथा।")
शरीरस्थषड्रिपवो यथा। कामः क्रोधः लोभः मोहः मदः मात्सर्य्यञ्च। तथा हि।
"आज्ञाय मोहमत्वेन च वैरिषट्क-
माविश दैन्यवर्गं मनसि च यमादि।"
इत्यादि नवकारे छान्दोदर्शनम्। ... वीरचन्द्रमाहात्म्यम्। इति शब्दचन्द्रिका। जयादिकम् अष्टयम्। मत्पक्षीय। अरकौण्ड्‌य रिपुमन्दिरम्। यथा,—
"अष्टकार्य्ये पञ्चमं चैव मालिन्यं वर्षं सम्भवम्।
दुःस्थं दूरं गतदानं दृश्येन रिपुमन्दिरम्।"
अपि च।
"दुर्ज्जनोऽकारिता न रिपोर्व्वै क्रियते वचः।
इत्यं वर्षं तदुःप्रोक्तं वरुणस्य चरितम्।"
अन्यच्च।
"परान्निकरैः षष्ठे चाष्टमे कण्टकम्।
करस्थं पुरस्कृतो वैरिणां विजयम्।"
इति ज्योतिस्तत्त्वम्।

(शुचपुत्रस्य शिष्टे पुत्र । यथा, हरिवंशे । ७ । ३४ २५

"तस्मात्त्रिशिरसश्चापि सुताः प्रभुशयायतः ।
शिष्टेरापत्त सञ्च्छाया पञ्चपुत्रानकल्मषान् ॥
रिपुं रिपुञ्जयं पुष्पं वृकलं वृकतेजसम् ।"

यनौ पुत्र । यथा भागवते । ८ । २१ । २ ।
"यत्रो मध्ये मन्त्रिपु कौश्लमकोरिपुरितिश्रुता ।")

रिपुघातिनी, स्त्री, (रिपुं हन्तीति । हन+णिनि ।) लताविशेषः । कुरुद इति भाषा । यथा,
"कुणिका बहुपित्तौघा कुणिका रिपुघातिनी ।"
इति शब्दचन्द्रिका ॥

रिफ, प घ वधे । इति कविकल्पद्रुमः । (तुदा-पर सक सेट ।) षोपधः । प घ, रिम्फति रेरिम्फ । अप्रमत्तवरादिरयमित्यन्ये । इति दुर्गादासः ॥

रिपक, क्ली नक्षत्रचक्रस्य द्वादशराशि । यथा —
"कन्मस्थानञ्च दशमं स्व मेषूरणमादशम् ।
छिद्राण्यष्टमम् स्थानं रिपकाख्यं द्वादशं स्मृतम् ॥"

तत्र विशेषो यथा,—
"प्रासादमापञ्च चिन्तयेद्भवस्य रिपकेऽथ मन्त्रियषौ
सौम्यस्तापिपुसौम्यैर्तिर्मणिचितेयी चालितं भवेत् ॥"
इति ज्योतिस्तत्त्वम् ॥

रिप्र, त्रि, (रीङ् स्रवणे+"कौप्त्रीदो दृढश्च पुटच सरी त्रियमकुङ्गुतिमपो ।" उणा० ५ । ५५ । इति रप्रत्ययः । धातोर्ह्रस्वः । प्रत्ययस्य पुटच ।) अधम । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (यथा, ऋग्वेदे । ८ । ७८ । १ ।
"शुम्भाति रिप्रमविराय ताम्ना ।"
'रिप्र अशुभावयमेव पापकल्पम् ।' इति तद्भाष्ये सायनः ॥ क्ली, पापम् । यथा, ऋग्वेदे । १० । १७ । १० ।
"विश्वं हि रिप्रं प्रवहन्ति देवीः ।"
"देवीर्देव्य द्योतमानोर आपः विश्वं सर्वं रिप्रं पापं प्रवहन्ति पुरस्ताद्भावात् प्रापयन्ति अपगमयन्ति यावत् ।" इति तद्भाष्ये सायनः ॥)

रिप्रवाह, त्रि, पापवाहक । यथा,—
"क्रव्यादमग्निं प्रहिणोमि दूरम् ।
यमराज्यं गच्छतु रिप्रवाहः ॥"
इति आश्वलायनगृह्यसूत्रस्य मन्त्रपद्धतिः ॥
"रिप्रं पापं वहतीति रिप्रवाहः ।" इति तट्टीकायां गुणविष्णुः । "स प्रहितः क्रव्यादग्नि यमराज्यं गच्छतु यमस्य राज्यं प्रति प्रयातु । किम्भूतः रिप्रवाहः रिप्रमिति पापनाम । रिप्रं पापं वहति मानयति रिप्रवाहः ।" इति बाचस्पतिमश्रगुणविष्णुमतम् । अथर्ववेद । ३५ । १६ । ८ ।
"रिप्रवाहः रिप्रं पापं तस्य वोढा कोऽपि अस्ति यत्र यातो राजा यमो भानु यमराजस्य राज्ये स्थान गच्छतु प्राप्नोतु ।" इति तत्रत्यभाष्ये सायनः । १ । १६ । ८ ।)

रिफ कुत्सने । इति कविकल्पद्रुमः ॥ (भ्वा पर० सक० सेट् ।) कौषधातुरयम् । रिफक रेफः । इति दुर्गादासः ॥

रिफ, घ वधे । इति कविकल्पद्रुमः । (तुदा-पर सक सेट ।) घ रिफति । वधो दानप्रापणच्छेदनादिष्वप्युद्दिष्टः । इति दुर्गादासः ॥

रिव ऋ गत्याम् । इति कविकल्पद्रुमः । (भ्वा-पर सक सेट ।) ऋ, रिण्वति । इति दुर्गादासः ॥

रिभ रवे । इति कविकल्पद्रुमः ॥ (भ्वा पर अक सेट ।) रिरेभ । इति दुर्गादासः ॥

रिभेद, पुं, अरिभेद । इति राजनिर्घण्टः ॥

रिरी, स्त्री, पित्तलम् । इति हेमचन्द्रः । ४ । ११४ ॥

रिव ऋ वधे । इति कविकल्पद्रुमः । (भ्वा० पर-सक० सेट् ।) ऋ, रिवति । वधो गतिः । इति दुर्गादासः ॥

रिश औ य हिंसे । इति कविकल्पद्रुमः ॥ (तुदा पर सक अनिट् ।) औ, अरिक्षत् । य, रिशति । रेशति । इति दुर्गादासः ॥

रिश्य पुं, (रिश्यते हिंस्यते इति । रिश्+क्यप् ।) मृग । इति त्रिकाण्डशेषः ॥

रिष, वधे । इति कविकल्पद्रुमः ॥ (भ्वा पर०-सक०-सेट ।) रेषति । इति दुर्गादासः ॥

रिषि, पुं, ऋषिः । अर्थानि प्रायशः कार्यान्यपि कथयन्ति अवयः । कथं तु गतौ आप्नोति कि । रिषिकरादिष्वं । विद्याविदग्धमतया रिषय प्रसिद्धा । इति प्रयोगात् । विशी स्त्री च । इत्यमरटीकायां भरतः ॥

रिष्ट, क्ली, (रिष+क्त ।) क्षेमम् । कल्याणम् । अशुभम् । अमङ्गलम् । (यथा मार्कण्डेये । ५० । ८८ ।
"उत्तमोऽपि यामित्यो यथाविदनो दर्शयेदेव वा ।
दृष्टे तत्र हि रिष्टानामङ्गिरासो समागमः ॥")
अभावः । नाशः । इत्यमरभरतौ । अशुभस्याभाव । इति केचित् । इति भरतः । पापम् । इत्यजयः । तद्वति त्रि ॥

रिष्ट, पुं, (रिष+क्त ।) खड्गः । फेनिलः । स तु रक्तसिद्धः । इति मेदिनी । टे ४० ॥

रिष्टक, पुं, (रिष्ट एव । स्वार्थे कन् ।) रक्तसिद्धः । इति शब्दरत्नावली ॥

रिष्टि, पुं, (रेषति हिनस्तीति । रिष+क्तिच् ।) खड्गः । इति मेदिनी । टे, ४० ।

रिष्टि, स्त्री (रिष्+क्तिन् ।) अशुभम् । इति मेदिनी । टे, ४० ॥ शुभमेव । इति शब्दरत्नावली ।

रिष्य पुं (रिष्यते इति । रिष+यक् ।) मृगविशेषः । यथा,—
"ऋष्य ऋष्यो रिश्या रिष्य मृगः खादिवेष्योऽपि च ।"
इति शब्दरत्नावली ॥

रिस्य त्रि, (रिष वधे+"मन्त्रनिरुस्यानिदिति ।" उणा० ३ । ११२ । इति बहुलवचनात् साधु ।) वधक । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

रिह, वधे । इति कविकल्पद्रुमः । (भ्वा पर-सक सेट ।) रेहति । इति दुर्गादासः ॥

री, ओ ङ य भ्रवणे । इति कविकल्पद्रुमः । (दिवा० आत्म अक अनिट् ।) ओ, रीणः । ङ य, रीयते पयः । इति दुर्गादासः ॥

री ग रवे । वधे । गतौ । इति कविकल्पद्रुमः । (क्र्या प् पर अक सक च अनिट् ।) ग, रिणाति रौति रिणि । रव शब्दः । गतौ च कालकर्मणी री गतिरेषणयोः । रैणम इति वसिरिति दम्पन्याय । रिणाति रैणते इत्यपि । इति शब्दार्थे भट्टमल्लः । इति दुर्गादासः ॥

री, स्त्री, (री+क्विप् ।) गतिः । इति शब्दरत्नावली । रवः । वधः । इति रीधातोर्दर्शनात् ॥

रीट्या, स्त्री, स्त्रा । यथा । सोढौ रीट्या अपृष्टा च कृतौ रहिया इत्येतौ द्वाव स्मृतौ । अयन्तु अव्ययोर्यौ प्रविष्टे प्रमाणेषु इमाणे प्रयुक्त इति कश्चित् । इत्यमरटीकायां भरतः ॥

रीठा, स्त्री रीठाकरञ्ज । इति राजनिर्घण्टः ॥

रीठाकरञ्ज पुं स्वनामख्यातवृक्षः । तत्पर्यायः । गुच्छक २ गुच्छपुष्पक ३ रीठा ४ गुच्छफल ५ अरिष्ट ६ माङ्गल्य ७ कुम्भबीजक ८ प्रकीर्य ९ सोमवल्क १० पीतिक ११ । अस्य गुणाः । तिक्तत्वम् । उष्णत्वम् । कटुत्वम् । स्निग्धत्वम् । वातकफकुष्ठकण्डूविषविस्फोटनाशित्वञ्च । इति राजनिर्घण्टः ॥

रीढ़क, पुं पृष्ठवंशः । इति हेमचन्द्रः । ३ । २५१ ॥

रीढ़ा, स्त्री, (रिह वधे+औणादिक क्त ।) अवज्ञा । इत्यमरः । १ । ७ । २२ ॥

रीण, त्रि, (री+क्त । ल्वादित्वात् न ।) द्रुतः क्षरितः । स्यूतम् । इत्यमरः । ३ । १ । ९२ ॥

रीति, स्त्री (री+क्तिच् क्तिन् वा ।) आरकूटः । (तन्मयपात्रगुणा यथा,—
"पित्तलकारकूटेऽस्त्रियां रीतिश्च कथ्यते ।
रीत्या जगद्रीती कपिला पिङ्गलापि च ।
रीतिरप्युपधातु स्यात्ताम्रस्य यशदस्य च ।
पित्तलस्य गुणा ज्ञेयाः स्वयोनिसदृशा जनैः ।
संयोगजप्रभावेण तस्यान्यस्य गुणा मताः ।"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ।)
प्रचारः । स्यन्दः । इत्यमरः । २ । ८ । ६० । ३ । ३ । ६८ ॥ लौहकिट्टम् । इति मेदिनी । ते १ । स्वभावः । इति भरतः । सीमा । स्रवणम् । गतिः । अभावः । तन्त्रोक्तः पर्यायः । नामानि । स्वभावः २ स्रवणम् ३ भावः ४ चाञ्चल्य ५ प्रकृतिः ६ सहजः ७ रूपधारणम् ८ धर्मः ९ क्रम १० नियमः ११ क्रमः १२ प्रकारः १३ सौभाग्यम् १४ । इति हेमचन्द्रः । (यथा, कथासरित्सागरे । १४ । ६९ ।
"रिप्रामाद्रिपुवाकाररीतिरुद्धो रहसम ।"

स्तुतिः । यथा ऋग्वेदे । २ । २४ । १४ ।
"महीव रीतिः शवसासरत् पृथक् ।"
"महीव रीतिः महती स्तुतिरिव ।" इति तद्भाष्ये सायणः ।) काव्यस्यात्मा । इति वामनसूत्रम् । गुणभेदेन तद्विभागमाह ।
"ओजःप्रसादमाधुर्य्यगुणत्रितयभेदतः ।
गौड़वैदर्भपाञ्चालरीतयः परिकीर्त्तिताः ।"
एतेषां लक्षणानि यथा —
"ओजः समासभूयस्त्वं मांसलं पदडम्बरम् ।
यत्तावदर्थमात्रस्य प्रसादः परिकीर्त्तितः ।
शब्दार्थयोस्तु रसवन्माधुर्य्यं परिकीर्त्तितम् ।
सर्व्वलोकावगाह्यं यद्वाच्यं तदभिधीयते ।
सुबोधमपि गम्भीरं प्रसन्नमुपनागरम् ।"
ग्राम्य यथा,—
"कन्ये मन्येऽधुना धन्यो यस्त्वामद्य विवाहयेत् ।
मार्ज्जिव तपसा सन्धि सुन्दरक्षोभमागम ।"
उपनागरं यथा—
"तन्वि त्वन्मुखं स्याद् भाविन्मनविनो भवा ।
वसुधायां सुधाभावादनन्या स्वर्गे विराजते ।
शब्दाडम्बरं तत् स्यादुपनागरमास्पदम् ।
वर्णाद्यनुप्रासः परे पादे विधीयते ।
पदादौ तु यमकमाश्रित्य पाञ्चालधर्म्मजम् ।' ॥
क्रमेण रीतित्रयाणामुदाहरणानि ।
"गङ्गोत्तुङ्गतरङ्गसङ्गतजटाजूटापगाजनुर्वि
स्फूर्जत्कुण्डलिभीतिसम्भ्रमितमत्कारस्फुरत् समाभा ।
आनन्दाम्लशापिका विन्दती चित्ते गिरीशप्रभो
र्वा पायादवधूर्म्मे भगवती लज्जावती पार्व्वती ॥
भवती विरहव्याधिमधमाव समस्तमा ।
कामिनी यामिनीकान्तं लतामिव पश्यति ॥
कस्त्वासि सत्त्वापतिस्तनयेऽस्या
किं तावदस्य नरलोकरापि ।
जगाम एषाऽपरतामपैतु
कलभुवो मध्यमयामत ॥"
इति काव्यचन्द्रिका ।
(अस्या अर्थविवरणं साहित्यदर्पणस्य ९ परिच्छेदे द्रष्टव्यम् ।)
रीतिजं, क्ली पुष्पाञ्जनम् । इति राजनिर्घण्टः ॥
रीतिका, स्त्री, कुसुमाञ्जनम् । इति शब्दचन्द्रिका विलक्षणः । (यथा, बृहत्संहितायाम् । ५७।८।
"अष्टौ सीसकभागाः कांस्यस्य द्वौ तु रीतिका भाग ।
मयकथितो योगोऽयं विज्ञेयो वज्रसंघात ॥")
रीतिपुष्पं क्ली (रीतेः पित्तलस्य पुष्पमिव । तद्वर्णत्वात् ।) कुसुमाञ्जनम् । इत्यमरः । २ । ९ । १ ॥
रीव ऋ म वीवे । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ० सक० सेट् ।) ऋ अरिरीवत् । म, रीवते रीवति । चौरो धनमपहरत्यथा । इति दुर्गादासः ॥

रु, ङ वधे । गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म० सक० सेट् ।) ङ, रवते । इति दुर्गादासः ॥
रु, ल ध्वनौ । इति कविकल्पद्रुमः ॥ (अदा०-पर० अक० सेट् ।) ल, रौति रवीति मयूरी । इति दुर्गादासः ॥
रु पुं, शब्दे । इत्येकाक्षरकोषः ॥
रुक्ं त्रि वहुधनं । इति शब्दमाला ॥
रुक् [च्] स्त्री, (रुच + भावे क्विप् ।) शोभा । (यथा, माघे । ४ । ६६ ।
"स्फटिकरचितभित्तौ विकचवारिजरूपे
रिन्दोदितदिनलक्ष्मा स्फटिकस्य चामूरे ॥")
द्युतिः । (यथा, किराते । ५ । ४५ ।
"विपतिः योऽशुकं पितृतो हरद्
दृढतिकामिव रौचनिकीं रुचम् ॥")
इच्छा । इति मेदिनी ॥ (यथा, महाभारते । १३ । १२४ । २८ ।
"नानाबुद्धिरुचो लोके मनुष्यान्नूनमिच्छसि ।
यदीतु अनुग्रहे सर्व्वोक्तिताभि हरिस रुम ॥")
त्विट् । यथा रघुः । ८ । ६ ।
"अनुपदी यमपूर्वयमेवरौ
तत्त्वमापदवाप्यसर रुचा ।")
शारिकापक्षिकाकः । इति शब्दरत्नावली ॥
रुक् [ज्] स्त्री (रुज + क्विप् ।) रोगः । इत्यमरः । २ । ६ । ५१ ॥ (यथा भागवते । ६ । ११ । ८ ।
'दोषस्य दृष्ट्वा गुरु लाघवं यथा
भिषक् चिकित्सेत रुजां निदानवित् ॥"
रुजति पीडयतीति । पीड़ादायक, त्रि । यथा, महाभारते । ५ । ८४ । १ ।
"प्रयान्तं देवकीपुत्रं परवीररुजो दश ।
महारथा महाबाहुमन्वयुः शस्त्रपाणयः ॥"
अथवा परस्य वीराणां रुज भेदिनि ।)
रुक्प्रतिक्रिया स्त्री, (रुजः प्रतिक्रिया निराकरणम् ।) चिकित्सा । इत्यमरः । २ । ६ । ५ ॥
रुक्म क्ली (रोचते शोभते इति । रुच + "युजिरुचितिजां कुश्च ।" उणा । १ । १४६ । इति मक् कुत्वञ्चाल्पादेशः ।) काञ्चनम् । (यथा रामायणे । २ । ७ । २१ ।
"रत्नविमलवहसे हि वौकृष्णरूपाणि च ।
सम्प्रस्त केकयीपुत्र केकयी धनमाददत् ।")
धुस्तूरम् । इत्यमरः । लौहम् । इति मेदिनी । मे ९८ ॥ (अस्य पर्य्यायो यथा —
"हाटकम् कलधौतं रुक्म तपनीयं काञ्चनम् ॥"
इति वैद्यकरत्नमालायाम् ।)
नागकेशरम् । इति राजनिर्घण्टः ॥ (रुक्म पुं । इति उज्ज्वलदत्तः । १ । १४६ ॥ रोचमाने त्रि । यथा, ऋग्वेदे । ४ । १० । १२ ।
"[illegible] रुक्म रुचोऽदिः ।"
"दिवि रुक्मेव रुक्मा रोचमान भावेह इव ।"
इति तद्भाष्ये सायणः ।)
रुक्मकारकः पुं (रुक्म करोति यथार्थं करोति ... ।
ड + "ण्वुल्तृचौ ।" ३ । १ । १३३ । इति ण्वुल् ।

तथा स्वार्थे कन् ।) स्वर्णकारः । इत्यमरः । २ । १० । ८ ॥
रुक्माङ्गदः, पुं, राजविशेषः । यथा । अस्ति कलिङ्गविषये रुक्माङ्गदो नाम नरपतिः [illegible] अश्वमेधयागे चक्रभ्रामणार्थं सोऽपि धनार्थिनम् अर्थे । इत्यादि हितोपदेशे ३ परिच्छेदः ॥
रुक्मिणी, स्त्री, (रुक्मं स्वर्णं इष्टमस्या इति । रुक्म + इनि । ङीप् ।) लक्ष्मीविशेषः । तस्याः नाम । १ रमा २ विष्णुप्रिया ३ माया ४ भामा ५ पद्मा ६ इन्दिरा ७ चपला ८ हरिकान्ता ९ कमला १० इन्दिरा ११ लक्ष्मी १२ महालक्ष्मी १३ पद्मा १४ कमला १५ श्री १६ हरिप्रिया १७ । इति जटाधरः ॥ अस्या विवरणं यथा
"विदर्भराजो धर्म्मात्मा भीष्मको नाम धार्म्मिकः ।
बभूवुस्तस्य पुत्रास्तु पञ्च रुक्मादयः शुभाः ।
तेषामवरजा कन्या रुक्मिणी रुक्मवर्णिनी ।
कमलाक्षी सम्पूर्णा सर्व्वलक्षणशोभिता ।
रामकृष्णोऽभवत् पौत्रा रुक्मिणी लक्षणान्विता ।
माधवस्य सुता स्त्रिया प्राकट्येन पार्थिवि ॥"
इति पाद्मोत्तरखण्डे १० अध्यायः ॥
(रुक्मिण्या सह शिशुपालस्य विवाहोद्योगः श्रीकृष्णेन रुक्मिण्याहरणं कुमाराय तदा पाण्डवे सह राज्ञा युयुधानेन दिवं जग्मिवान् । ११ अध्याये द्रष्टव्यम् ।) भागवतस्य रुक्मिण्या पारिजातपुष्पप्राप्तिवृत्तान्तं तत्रैव च १४ अध्याये द्रष्टव्यम् ।) अस्याः सन्निधानं च यथा तत्रैव । १६० । ४—६ ।
"—————द्वारवत्यां महत् ।
प्रथमं प्रथमं यत्र दक्षिणानां पुरात् ।
द्वितीयमथ चैत्यं च युधिष्ठिरो महारथ ।
चारुप्रथमश्चैव सुदेष्णो द्रुम एव च ।
सुचेतनः सुचारुश्च चारुविन्दश्च वीर्य्यवान् ।
चारुवाहुः अनुष्ठाय भद्रः चारुहाना तथा ॥")
स्वर्णक्षीरी । इति राजनिर्घण्टः ॥
रुक्मिणीशः, पुं, (रुक्मिण्याः ईशः ।) श्रीकृष्णः । यथा —
भूत उवाच ।
"[illegible] समाकृष्य रुक्मिणी पुरुषर्षभम् ।
कन्यैरभिमनं यथा भाषसे अस्मिणस्य ।
ओषं तेन च दत्तं दुर्गन्धां हृष्टतां यथा ।
तत्कालेन मनुजा यथा विरहोत्तराः ॥
[illegible] उवाच ।
[illegible]
[illegible]
भूत उवाच ।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

इति प्राग्वरकन्या सा दासीभिः परिचारिता ।
तां दृष्ट्वा ब्राह्मणी वृद्धा कुटिं चिपिटा गता
यष्टिम् ॥
तां कृपणां कन्यां जरायां बहुपालकम् ।
कर स्पृष्ट्वा समुद्धृत्य प्राह का त्वं वरानने ॥
सा शुक्लपुत्री वसनं परिधाय हिया भिया ।
शर्म्मिष्ठया सह सर्व्वं प्राह राजानमीप्सती ॥
यथाविसृज्याभिप्राय चालाशुक्रस्य शोभनाम् ।
आश्वास्य तां ययौ गेहं तस्याः परिजनावृता ॥
सा गत्वा भवनं शुक्रं प्राह शर्म्मिष्ठया कृतम् ।
तच्छ्रुत्वा कुपितो विप्रः वृषपर्व्वाणमब्रवीत् ॥
त्यज मां दैत्यं विभो दोषो यद्यस्ति ते मयि ।
शर्म्मिष्ठा वाग्यतस्तां कुरु यत्तत्प्रतिज्ञितम् ॥
राजानं प्रणतं प्राह पितुर्दृष्ट्वा तथाब्रवीत् ।
देवयानी प्रिया कन्या मम दासी भवत्विति ॥
समानीय तदा राजा दासीं तां विनियुज्य सः ।
ययौ निजगृहं शुक्रो देवं परमकं स्मरन् ॥
ततः शुक्रसमानीय ययाति प्रतिलोमकम् ।
ददौ तस्मै तां विधिवत् देवयानीं तथा सह ।
दत्त्वा प्राह नृप विप्रोऽस्मि राजसुता यतः ।
शयने वसने तस्या जरा स्यादुपभोगतः ॥
शुक्रस्येतद्वचः श्रुत्वा राजा तां वरवर्णिनीम् ।
अदृष्ट्वा स्थापयामास देवयान्यनुगां भिया ॥
सा शर्म्मिष्ठा राजपुत्री दुःखशोकभयाकुला ।
नित्यं न्यग्रोधमाश्रित्य देवयानीं ह सेवते ॥
तत्र सा यमुना कन्या आह्वयीत् तटे ।
विश्वामित्रं मुनिं या तु ददर्श कृताभिराजनम् ।
वर्जितं पुष्पगन्धाभिः सुरूपाभिः सुवासितम् ।
कारयन्तं व्रतं माल्यधूपदीपोपचारकैः ॥
विश्वायाहन्क पद्म वेदिकायां सुविष्ठितम् ।
रम्यापीतैश्चतुर्भिस्तु चतुष्कोणं विराजितम् ॥
वाससा निर्म्मितग्रन्थि स्वर्णदण्डैर्विचित्रिते ।
विभिन्नकौशाम्बरैर्व नानारत्नविभूषितम् ॥
पीठिका च स्वर्णेन नानारत्नोत्कं शुभे ।
तत्रान्तरे पत्राद्यैर्व्यामश्चैरिर्ते ॥
चापविद्या भवपीठे कलिकायां प्रपूजयत् ।
पञ्चभिरप्यभिश्चापि षोडशैरुपचारकैः ॥
पाद्यमर्घ्यमथाचमं शीतलं सुमनोहरम् ।
परमानन्दजनक गृहाण परमेश्वर ॥
दूर्व्वाचन्दनगन्धाढ्यमक्षतयुक्तं प्रयत्नतः ।
गृहाण रुक्मिणीकान्त प्रसन्नो मम प्रभो ॥
नानातीर्थोद्भवं वारि सुगन्धि सुमनोहरम् ।
स्नानार्थममीयं त्वं गृहाण प्रियया सह ॥
नानाकुसुमगन्धाढ्यं सुवर्णपीतसुन्दरम् ।
वस्त्रं शोभाकरं चारु माल्यं नय सुरेश्वर ॥
नानारत्नसमायुक्तं चित्रं चन्दनं हरे ।
महाभारत्नं गृह्ण विरागरत्न सहित ॥
पट्टवस्त्रमिदं देव प्रमायनिर्विनिर्म्मितम् ।
गृहाण वासुदेव त्वं रुक्मिण्या रमया सह ॥
नानारत्नसमायुक्तं स्वर्णकान्तिविभूषितम् ।
दिव्यं नय देवेश महाभरणं मम ॥
ईश्वरीसिद्धराशादि धूपमङ्गुरुसम्भवात् ।

गृहाण रुक्मिणीनाथ सनाथ कुरु मां प्रभो ॥
कर्पूरागुरुगन्धाढ्यं परमानन्ददायकम् ।
धूपं गृहाण वरद हैम्भ्या प्रियया सह ॥
भक्त्या गोघृतस्नातां सदा रम्यां मनोरमाम् ।
दीपमालोकय विभो जगदालोककारक ॥
श्यामसुन्दर पद्माक्ष पीताम्बर चतुर्भुज ।
प्रपन्नं पाहि देवत्र रुक्मिण्या सहिताच्युत ॥
इति नानां व्रतं दृष्ट्वा मुनिं नत्वा सुदुःखिता ।
शर्म्मिष्ठा निष्ठचना कृताञ्जलिरुवाच ताम् ॥
शर्म्मिष्ठोवाच ।
राजपुत्रीं दुर्भगां मां स्वामिना परिवर्ज्जिताम् ।
त्रातुमर्हसि वै देवी व्रतेनानेन कर्म्मणा ॥
श्रुत्वा तु तां वचस्तस्याः कारयामास तद्व्रतम्
वियत् ।
पूजोपकरणं दत्त्वा कारयामास सादरात् ॥
व्रत कृत्वा तु शर्म्मिष्ठा कथां स्वामिनमीश्वरम् ।
सुता पुत्रान् सुषमुखा समभूत् स्थिरयौवना ॥
ज्ञीतिं चार्थोकर्वणिकामध्ये तरमया सह ।
व्रतं कृत्वा पतिं लेभे रामं राघवमानवम् ॥
द्रुपदस्यप्रसादेन स्वलैः द्रौपदी व्रतम् ।
पतियुक्ता दुःखमुक्ता बभूव स्थिरयौवना ॥
तथा रमा सिते पक्षे वैशाखे द्वादशीदिने ।
व्रतमस्याद्वतं चक्रे पूर्व्वं मन्त्रसुसम्मतम् ॥
षट्पञ्च करे बद्धा भोजयित्वा द्विजान् बहून् ।
सुभ्रा दापित्य चीरार्थं शुभिं स्वामिना सह ॥
भुक्ता पृथिवीं सर्व्वामपूर्व्वां स्वजनैर्वृता ।
या पुत्री सुपुत्र साध्वी मेघमालप्रलापिनी ॥
दैत्यानामुपकारिकां पद्मदामसमोऽसती ।
महीमालाद्यौ सदाभार्या सुभगौ कल्किगामिनी ॥
व्रतवरमिनं मत्वा सर्व्वमर्थ्यलब्धा
भवति विदितसत्त्वा पूजिता पुत्रकामा ।
हरिचरणसरोजद्वन्द्वभक्तैकतानाः
प्रभवति मतिमत्पुत्री ब्रह्मविद्धैरगम्याम् ॥”
इति कल्किपुराणे रुक्मिणीव्रतम् ३१ अध्यायः ॥
रुक्मिदर्पः पुं (रुक्मिणि भीष्मकपुत्रे दर्पो यस्य सः । तस्य रुक्मिनाशकत्वात् ।) बलदेवः । इति हलायुधः ॥
रुक्मिदारी [न्] पुं, (रुक्मिणं दारयतीति । दॄ + णिच् + णिनि ।) बलदेवः । इति त्रिकाण्डशेषः ॥
रुक्मिभित्, [द्] पुं (रुक्मिणं भिनत्तीति । भिद् + क्विप् ।) बलदेवः । इति हेमचन्द्रः । २ । १३८ ॥
रुक्मी, [न्] पुं (रुक्मं स्वर्णविशेषोऽस्यास्तीति । रुक्म + इनि ।) भीष्मकराजज्येष्ठपुत्रः । यथा —
“राजासीद्भीष्मको नाम विदर्भाधिपतिर्महान् ।
तस्य पञ्चाभवन् पुत्राः कन्यैका च वरानना ॥
रुक्म्यग्रजो रुक्मरथो रुक्मबाहुरनन्तरः ।
रुक्मकेशो रुक्ममाली रुक्मिण्येषां स्वसा सती ॥”
इति श्रीभागवते १० स्कन्धे ५२ अध्यायः ॥
(रुक्मिणीहरणानन्तरं कृष्णेन सहास्य युद्धं हरिवंशे हरिवंशे ११७ अध्याये तथा प्रद्युम्नस्य विवाहे तत्कन्यापरिणयप्रसङ्गे बलभद्रेण

सहास्य द्यूतक्रीडा पराजयस्तदा बलदेवास्य हस्तादेव निधनञ्च ११८ अध्याये विस्तरशो द्रष्टव्यम् ॥)
रुक्वत् [त्] क्ली, भस्म । इति हेमचन्द्रः ॥
रुच दि ङ दीप्तौ । अभिप्रीतौ च । कर्मप्रीतौ रोचते इति कर्त्तृप्रयोग विषय । इत्युगादिः ॥
(भीरव । सदृशा वानुकम्पारकने ।
“दोषधातुमलाग्नीनां समा प्रीत्य समीरणः ।
रजोगुणमयः सूक्ष्मो रूक्षः शीतो लघुश्चलः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
रुच, त्रि, (रुच + क्त । आदित्वादिट् ।) दीप्तिमान् । रुचिशालिनि । तस्य स्त्रियामपि । इत्यमर । (यथा, रामायणे । २ । १२ । १८ ।
“त्वया विहीनस्तव शोकदग्धा
त्वां समनयेव मत्तः पिता हि ॥”)
दीप्तौ । इति राजनिघण्टुः ॥
रुच ङ ल दीप्त्यभिप्रीत्योः । इति कविकल्पद्रुमः ॥
(भ्वा आत्म अक सेट ।) प्रीतिरिह च अनुरागविषयः । तत्र यस्मात् रागस्तस्य सम्प्रदानम् । स रोचते चक्र पुष्ट्यर्थे । ल, अरुचत् । इति दुर्गादासः ॥
रुचक क्ली (रोचतेऽनेनेति । रुच् + “वुन्” उणा २ । ३७ । इति वुन् ।) सौवर्च्चलाख्यलवणम् । माल्यम् । बीजपूरकम् । (यथा —
“सौवर्च्चलं स्याद्रुचकमन्यपाकञ्च तत्स्मृतम् ॥”
तथास्य गुणाः ।
“रुचकं रोचनं भेदि दीपनं पाचनं परम् ।
सुस्नेहं वातनुन्नातिपित्तलं विशदं लघु ।
उद्गारशुद्धिदं सूक्ष्मं विबन्धानाहशूलजित् ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥)
माङ्गल्यद्रव्यम् । (यथा भागवते । १ । ११ । १४ ।
“वारैश्च सहाश्वैश्च रुचकेन च भूषितम् ॥”
“रुचकस्य मङ्गलद्रव्यैः ।” इति श्रीधरः ।) दन्तकः । इति मेदिनी । के, १३८ । स्वादरः । इति शब्दरत्नावली । रोचना । विडङ्गम् । इति हेमचन्द्रः । शरभम् । इति शब्दरत्नावली । (शिरोभूषणविशेषः । यथा, कुमारसम्भवे । १६ । ३१ ।
“प्रावर्त्तिकमालविमलारक्षामतो तदपि चुनी हि ॥
रुचकं हारं च शुभं सुरसोऽद्याति दयाभिः ॥”
रुचकं मातुलुङ्गकम् । इत्युञ्ज्वलदत्तः ।
२ । ३७ ।)
रुचक, पुं (रोचते इति । रुच + वुन् ।) बीजपूरः । निम्बः । दन्तः । कपोतः । इति मेदिनी । (यथा कुमारसम्भवे । ८ । २ ।
“जीवेन भवति हेयं
जीवेष्य प्रिय कुपिनं रुचकञ्च ॥”)
पर्व्वतविशेषः । यथा विष्णुपुराणे । २ । २ । २६ ।
“निषधः शिशिरश्चैव पतङ्गो रुचकस्तथा ॥”
स्कन्धः । यथा, कुमारसम्भवे । ११ ।
२८ ।)

"समचतुरस्रो रुचको
मध्योऽष्टाश्रिरिव रुचको हितुथः ।")
रुच, स्त्री (रुच + क्विप् । पक्षे टाप् ।) दीप्तिः । शोभा । इच्छा । (यथा, महाभारते । ३ । ५ । १३ ।
"नहि तस्मै न रुचामभ्युपैति
तत्पाद्य भ्रममत्र मन्ये ।")
शारिकाशुकवाक् । इति शब्दरत्नावली ।
रुचि, स्त्री (रुच्यते इति । रुच + "इगुपधात् किः ।" उणा० ४ । ११८ । इति इन् । स च कित् ।) अभिष्वङ्गः । अनुरागः । आसक्तिः । क्षुधा । (यथा, किराते । ६ । ४२ ।
"रुचिकरमपि नार्थवद्बभूव
स्तिमितसमाधिशुचौ पृथातनये ।"
"अग्नौ रुचिकरो बस्ति प्रोक्तो वह्निदीपन ।"
इति वैद्यकचक्रपाणिसंग्रहे ग्रहण्यधिकारे ।)
अभिलाषः । गभस्तिः । किरणः । इत्यमरभरतौ । शोभा । इति मेदिनी । (यथा, रघु । ५ । १० ।
"लक्ष्मीविनोदयति येन दिगन्तलम्बी
सोऽपि त्वदाननरुचिं विजहाति चन्द्रः ।")
प्रभा । इति हेमचन्द्रः । गोरोचना । इति राजनिर्घण्टः । आलिङ्गनविशेषः । तल्लक्षणं यथा । नायिकाया नायकस्य सम्मुखे आस्यो-पर्युपविश्य वसति यदा रुचिः दृश्यता मदनशास्त्रम् । इति कामशास्त्रम् ।
रुचि, पुं (रोचते शोभते इति । रुच + इन् । स च कित् ।) प्रजापतिविशेषः । स च रौच्यमनुपिता । यथा,—
मार्कण्डेय उवाच ।
"रुचिः प्रजापतिः पूर्वं निर्ममो निरहङ्कृतिः ।
अत्रासुप्तोऽभयो लोके चचार पृथिवीमिमाम् ।
अनग्निमनिकेतन्तमेकाहारमनाश्रमम् ।
विमुक्तसङ्गं तं दृष्ट्वा प्रोचुः स्वपितरो मुनिम् ।
पितर ऊचुः ।
वत्स कस्मात् त्वया पुण्यो न कृतो दारसंग्रहः ।
स्वर्गापवर्गहेतुत्वाद्बन्धस्तेनानिशं विना ।
गृही समस्तदेवानां पितॄणाञ्च तथार्हणाम् ।
ऋषीणामतिथीनाञ्च कुर्वन् लोकानवाप्नुते ।
स्वाहोच्चारणतो देवान् स्वधोच्चारणतः पितॄन् ।
विभजत्यन्नदानेन भूतादीनतिथीनपि ।
स त्वं दैवात्तथास्मत्तो बन्धमवाप्स्यसि ।
आपाद्योऽपि मनुष्याणां भूतानाञ्च दिने दिने ।
अनुत्पाद्य सुतान् देवानसन्तर्प्य पितॄन् तथा ।
भूतादींश्च कथं मौढ्यात् सुगतिं गन्तुमिच्छसि ।
रुचिरुवाच ।
परिग्रहोऽतिदुःखाय पापायाधोगतेस्तथा ।
भवत्यतो मया पूर्वं न कृतो दारसंग्रहः ।
यथात्मोद्धृतिरिव वराका नियम्यते ।
ममतत् दृश्यतेऽपि विमुक्त्यै स्थितम् ।"
इत्यादि ।
पितर ऊचुः ।
"युक्तं यदात्मनः पुंसां निरोधो मुक्तिकारणम् ।
किन्तु नेयाय मार्गोऽयं यत्र त्वं पुत्र वर्तसे ।"
इत्यादि ॥
मार्कण्डेय उवाच ।
"स तेन पितृवाक्येन भृशमुद्विग्नमानसः ।
कन्याभिलाषी विप्रर्षिः परिबभ्राम मेदिनीम् ।
कन्यामलभमानोऽसौ पितृवाक्याग्निदीपितः ।
चिन्तामवाप महतीमतीवोद्विग्नमानसः ।
किं करोमि क्व गच्छामि कथं मे दारसंग्रहः ।
क्षिप्रं भवेत् पितॄणां यो ममाभ्युदयकारकः ।
इति चिन्तयतस्तस्य मतिर्जाता महात्मनः ।
तपसाराधयाम्येनं ब्रह्माणं कमलोद्भवम् ।
ततो वर्षशतं दिव्यं तपस्तेपे स वेधसम् ।
दिव्यन्तु सुचिरं कालं रुचिर्नियममास्थितः ।
ततः सन्दर्शयामास ब्रह्मा लोकपितामहः ।
उवाच च प्रसन्नोऽस्मीत्युच्यतामभिवाञ्छितम् ।
ततोऽसौ प्रणिपत्याह ब्रह्माणं जगतः पतिम् ।
पितॄणां वचनात्तेन यत् कर्तुमभिवाञ्छितम् ।
ब्रह्मा चाह रुचिं विप्रं श्रुत्वा तस्याभिवाञ्छितम् ।
प्रजापतिस्त्वं भविता स्रष्टव्या भवता प्रजाः ।
सृष्ट्वा प्रजाः सुतान् विप्र समुत्पाद्य क्रियास्तथा ।
कृत्वा कृताधिकारस्त्वं ततः सिद्धिमवाप्स्यसि ।
स त्वं यथोक्तं पितृभिः कुरु दारपरिग्रहम् ।
कामञ्चेममभिध्याय क्रियतां पितृपूजनम् ।
त एव तुष्टाः पितरः प्रदास्यन्ति तवेप्सितम् ।
पत्नीं सुतांश्च सन्तुष्टाः किं न दद्युः पितामहाः ।
मार्कण्डेय उवाच ।
इत्यृषिर्वचनं श्रुत्वा ब्रह्मणोऽव्यक्तजन्मनः ।
नद्या विविक्ते पुलिने चकार पितृतर्पणम् ।
तुष्टाव च पितॄन् विप्रः स्तवैरेभिरथादृतः ।
एकाग्रः प्रयतो भूत्वा भक्तिनम्रात्मको रुचिः ।"
रुचिकृतपितृस्तोत्रं यथा —
रुचिरुवाच ।
"नमस्येऽहं पितॄन् भक्त्या ये वसन्त्यधिदैवतम् ।
देवैरपि हि तर्प्यन्ते ये श्राद्धेषु स्वधोत्तरैः ।
नमस्येऽहं पितॄन् स्वर्गे ये तर्प्यन्ते महर्षिभिः ।
श्राद्धैर्मनोमयैर्भक्त्या भुक्तिमुक्तिमभीप्सुभिः ।
नमस्येऽहं पितॄन् स्वर्गे सिद्धाः सन्तर्पयन्ति यान् ।
श्राद्धेषु दिव्यैः सकलैरुपहारैरनुत्तमैः ।
नमस्येऽहं पितॄन् भक्त्या येऽर्च्यन्ते गुह्यकैर्दिवि ।
तन्मयत्वेन वाञ्छद्भिरृद्धिमात्यन्तिकीं पराम् ।
नमस्येऽहं पितॄन् मर्त्यैरर्च्यन्ते भुवि ये सदा ।
श्राद्धेषु श्रद्धयाभीष्टलोकप्राप्तिप्रदायिनः ।
नमस्येऽहं पितॄन् विप्रैरर्च्यन्ते भुवि ये सदा ।
वाञ्छिताभीष्टलाभाय प्राजापत्यप्रदायिनः ।
नमस्येऽहं पितॄन् ये वै तर्प्यन्तेऽरण्यवासिभिः ।
वन्यैः श्राद्धैर्यताहारैस्तपोनिर्धूतकल्मषैः ।
नमस्येऽहं पितॄन् विप्रैर्नैष्ठिकब्रह्मचारिभिः ।
ये संयतात्मभिर्नित्यं सन्तर्प्यन्ते समाधिभिः ।
नमस्येऽहं पितॄन् श्राद्धै राजन्यास्तर्पयन्ति यान् ।
कव्यैरशेषैर्विधिवल्लोकद्वयफलप्रदान् ।
नमस्येऽहं पितॄन् वैश्यैरर्च्यन्ते भुवि ये सदा ।
स्वकर्माभिरतैर्नित्यं पुष्पधूपान्नवारिभिः ।
नमस्येऽहं पितॄन् श्राद्धे ये शूद्रैरपि भक्तितः ।
सन्तर्प्यन्ते जगत्यत्र नाम्ना ज्ञाताः सुकालिनः ।
नमस्येऽहं पितॄन् श्राद्धे पाताले ये महासुरैः ।
सन्तर्प्यन्ते स्वधाहारैस्त्यक्तदम्भमदैः सदा ।
नमस्येऽहं पितॄन् श्राद्धैरर्च्यन्ते ये रसातले ।
भोगैरशेषैर्विधिवन्नागैः कामानभीप्सुभिः ।
नमस्येऽहं पितॄन् श्राद्धैः सर्पैः सन्तर्पितान् सदा ।
तत्रैव विधिवन्मन्त्रभोगसम्पत्समन्वितैः ।
पितॄन्नमस्ये निवसन्ति साक्षाद्
ये देवलोकेऽथ महीतले वा ।
तथान्तरीक्षे च सुरादिपूज्या-
स्ते मे प्रतीच्छन्तु मयोपनीतम् ।
पितॄन्नमस्ये परमार्थभूता
ये वै विमाने निवसन्त्यमूर्ताः ।
यजन्ति यानस्तमलैर्मनोभि-
र्योगीश्वराः क्लेशविमुक्तिहेतून् ।
पितॄन्नमस्ये दिवि ये च मूर्ताः
स्वधाभुजः काम्यफलाभिसन्धौ ।
प्रदानशक्ताः सकलेप्सितानां
विमुक्तिदा येऽनभिसंहितेषु ।
तृप्यन्तु तेऽस्मिन् पितरः समस्ता
इच्छावतां ये प्रदिशन्ति कामान् ।
सुरत्वमिन्द्रत्वमितोऽधिकं वा
गजाश्वरत्नानि महागृहाणि ।
सोमस्य ये रश्मिषु येऽर्कबिम्बे
शुक्ले विमाने च सदा वसन्ति ।
तृप्यन्तु तेऽस्मिन् पितरोऽन्नतोयै-
र्गन्धादिना पुष्टिमितो व्रजन्तु ।
येषां हुतेऽग्नौ हविषा च तृप्ति-
र्ये भुञ्जते विप्रशरीरसंस्थाः ।
ये पिण्डदानेन मुदं प्रयान्ति
तृप्यन्तु तेऽस्मिन् पितरोऽन्नतोयैः ।
ये खड्गमांसेन सुरैरभीष्टैः
कृष्णैस्तिलैर्दिव्यमनोहरैश्च ।
कालेन शाकेन महर्षिवर्यैः
सम्प्रीणितास्ते मुदमत्र यान्तु ।
कव्यान्यशेषाणि च यान्यभीष्टा-
न्यतीव तेषाममरार्चितानाम् ।
तेषान्तु सान्निध्यमिहास्तु पुष्प-
गन्धाम्बुभोज्येषु मया कृतेषु ।
दिने दिने ये प्रतिगृह्णतेऽर्चां
मासान्तपूज्या भुवि येऽष्टकासु ।
ये वत्सरान्तेऽभ्युदये च पूज्याः
प्रयान्तु ते मे पितरोऽत्र तुष्टिम् ।
पूज्या द्विजानां कुमुदेन्दुभासो
ये क्षत्रियाणाञ्च नवार्कवर्णाः ।
तथा विशां ये कनकावदाता
नीलीनिभाः शूद्रजनस्य ये च ।
तेऽस्मिन् समस्ता मम पुष्पगन्ध-
धूपान्नतोयादि निवेदनेन ।

तथाग्निहोत्रेण च यान्ति तृप्तिं
सदा पितृभ्यः प्रणतोऽस्मि तेभ्यः ॥
ये देवपूर्व्वाण्यभितृप्तिहेतो-
रश्नन्ति कव्यानि शुभाहृतानि ।
तृप्ताश्च ये भूतिसृजो भवन्ति
तृप्यन्तु तेऽस्मिन् प्रणतोऽस्मि तेभ्यः ॥
रक्षांसि भूतान्यसुरांस्तथोग्रान्
विनाशयन्त्वशिवं प्रजानाम् ।
आद्याः सुराणाममरेशपूज्या-
स्तृप्यन्तु तेऽस्मिन् प्रणतोऽस्मि तेभ्यः ॥
अग्निष्वात्ता बर्हिषद आज्यपाः सोमपास्तथा ।
व्रजन्तु तृप्तिं श्राद्धेऽस्मिन् पितरस्तर्पिता मया ॥
अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे
दिशम् ।
तथा बर्हिषदः पान्तु याम्यां ये पितरः स्थिताः ॥
प्रतीचीमाज्यपास्तद्वदुदीचीमपि सोमपाः ।
ऊर्द्ध्वमर्य्यमा रक्षेत् कव्यवालोऽनलोऽप्यधः ॥
रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः ।
सर्व्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे ॥
विश्वो विश्वभुगाराध्यो धन्यो धर्म्मः सनातनः ।
भूतिदो भूतिकृद्भूतिः पितॄणां ये गणा नव ॥
कल्याणः कल्यदः कर्त्ता कल्यः कल्यतराश्रयः ।
कल्यताहेतुरनघः षडिमे ते गणाः स्मृताः ॥
वरो वरेण्यो वरदस्तुष्टिदः पुष्टिदस्तथा ।
विश्वपाता तथा धाता सप्त चैते तथा गणाः ॥
महान् महात्मा महितो महिमावान्महाबलः ।
गणाः पञ्च तथैवैते पितॄणां पापनाशनाः ॥
सुखदो धनदश्चान्यो धर्म्मदोऽन्यश्च भूतिदः ।
पितॄणां कथ्यते चैतत्तथा गणचतुष्टयम् ॥
एकत्रिंशत् पितृगणा यैर्व्याप्तमखिलं जगत् ।
त एवात्र तृप्यन्तु यच्छन्तु च सदा हितम् ॥"
इति मार्कण्डेयपुराणे रौच्ये मन्वन्तरे पितृस्तवः ॥

मार्कण्डेय उवाच ।

"एवन्तु स्तुवतस्तस्य तेजसो राशिरुच्छ्रितः ।
प्रादुर्बभूव सहसा गगनव्याप्तिकारकः ॥
तद्दृष्ट्वा सुमहत्तेजः समाच्छाद्य स्थितं जगत् ।
जानुभ्यामवनीं गत्वा रुचिः स्तोत्रमिदं जगौ ॥
अर्च्चितानाममूर्त्तानां पितॄणां दीप्ततेजसाम् ।
नमस्यामि सदा तेषां ध्यानिनां दिव्यचक्षुषाम् ॥
इन्द्रादीनाञ्च नेतारो दक्षमारीचयोस्तथा ।
सप्तर्षीणां तथान्येषां तान्नमस्यामि काम-
दान् ॥
मन्वादीनाञ्च नेतारः सूर्य्याचन्द्रमसोस्तथा ।
तान्नमस्याम्यहं सर्व्वान् पितॄनप्युदधावपि ॥
नक्षत्राणां ग्रहाणाञ्च वाय्वग्न्योर्नभसस्तथा ।
द्यावापृथिव्योश्च तथा नमस्यामि कृताञ्जलिः ॥
प्रजापतेः कश्यपाय सोमाय वरुणाय च ।
योगेश्वरेभ्यश्च सदा नमस्यामि कृताञ्जलिः ॥
नमो गणेभ्यः सप्तभ्यस्तथा लोकेषु सप्तसु ।
स्वयम्भुवे नमस्यामि ब्रह्मणे योगचक्षुषे ॥
सोमाधारान् पितृगणान् योगमूर्त्तिधरांस्तथा ।
नमस्यामि तथा सोमं पितरं जगतामहम् ॥
अग्निरूपांस्तथैवान्यान्नमस्यामि पितॄनहम् ।
अग्नीषोममयं विश्वं यत एतदशेषतः ॥
ये तु तेजसि ये चैते सोमसूर्य्याग्निमूर्त्तयः ।
जगत्स्वरूपिणश्चैव तथा ब्रह्मस्वरूपिणः ॥
तेभ्योऽखिलेभ्यो योगिभ्यः पितृभ्यो यतमानसः ।
नमो नमो नमस्ते मे प्रसीदन्तु स्वधाभुजः ॥

मार्कण्डेय उवाच ।

एवं स्तुतास्ततस्तेन तेजसो मुनिसत्तमाः ।
निश्चक्रमुस्ते पितरो भासयन्तो दिशो दश ॥
निवेदितञ्च यत्तेन पुष्पगन्धानुलेपनम् ।
तद्भूषितानथ स तान् ददृशे पुरतः स्थितान् ॥
प्रणिपत्य रुचिर्भक्त्या पुनरेव कृताञ्जलिः ।
नमस्तुभ्यं नमस्तुभ्यमित्याह पृथगादृतः ॥
ततः प्रसन्नाः पितरस्तमूचुर्मुनिसत्तमम् ।
वरं वृणीष्वेति स तानुवाचानतकन्धरः ॥
साम्प्रतं सर्गकर्त्तृत्वमादिष्टं ब्रह्मणा मम ।
सोऽहं पत्नीमभीप्सामि धन्यां दिव्यां प्रजाव-
तीम् ॥

पितर ऊचुः ।

अत्रैव सद्यः पत्नी ते भविष्यति मनोरमा ।
तस्याञ्च पुत्रो भविता भवतो मुनिसत्तम ॥
मन्वन्तराधिपो धीमांस्त्वन्नाम्नैवोपलक्षितः ।
रुचे रौच्य इति ख्यातिं प्रयास्यति जगत्त्रये ॥
तस्यापि बहवः पुत्रा महाबलपराक्रमाः ।
भविष्यन्ति महात्मानः पृथिवीपरिपालकाः ॥
त्वञ्च प्रजापतिर्भूत्वा प्रजाः सृष्ट्वा चतुर्विधाः ।
क्षीणाधिकारो धर्म्मज्ञ ततः सिद्धिमवाप्स्यसि ॥
स्तोत्रेणानेन च नरो योऽस्मांस्तोष्यति भक्तितः ।
तस्य तुष्टा वयं भोगान् दास्यामो ज्ञानमुत्तमम् ॥
शरीरारोग्यमैश्वर्यं पुत्रपौत्रादिकन्तथा ।
प्रदास्यामो न सन्देहो यच्चान्यदभिवाञ्छितम् ॥
तस्मात् पुण्यफलं लोके वाञ्छद्भिः सततं नरैः ।
पितॄणाञ्चाप्यतिप्रीत्या स्तोतव्या मानवैः ॥
श्राद्धे च य इमं भक्त्या अस्मत्प्रीतिकरं स्तवम् ।
पठिष्यति द्विजाग्र्याणां भुञ्जतां पुरतः स्थितः ॥
स्तोत्रश्रवणसम्प्रीत्या सन्निधाने परे कृते ।
अस्माभिरक्षयं श्राद्धं तद्भविष्यत्यसंशयम् ॥
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ॥
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible]
[illegible] ॥

[illegible] ।
[illegible] ।
[illegible] ।
[illegible]
[illegible] ॥

[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ।
[illegible] ॥
[illegible] ॥
[illegible] ॥"
[illegible] ।
"[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥"
[illegible] ॥

रोगहारी, [न्] पुं, (रोगं हरति तच्छीलः । हृ + णिनि ।) वैद्यः । इत्यमरः । २ । ६ । ५७ ॥ रोगनाशके, त्रि ॥

रोगितरुः पुं, (रोगिणां शोकनाशकस्तरुः ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥

रोगिवल्लभं, क्ली, (रोगिणां वल्लभं प्रियम् ।) औषधम् । इति शब्दचन्द्रिका । रोगिप्रिये, त्रि ॥

रोगी, [न्] त्रि, (रोगोऽस्यास्तीति । रोग + इनिः ।) रोगयुक्तः । तत्पर्य्यायः । व्याधितः २ विकृतः ३ ग्लानः ४ म्लानः ५ मन्दः ६ आतुरः ७ अभ्यान्तः ८ अभ्यमितः ९ रुग्णः १० आमी ११ अपटुः १२ । इति राजनिर्घण्टः ॥ आमयावी १३ ग्लानः १४ । इत्यमरः ॥ ० ॥ अथ चिकित्सार्थं रोगिणः परीक्षा । तत्र वाग्भटः ।

"दर्शनस्पर्शनप्रश्नैः परीक्षेत च रोगिणम् ।
आयुरादि दृशा स्पर्शाच्छीतादेः प्रश्नतोऽपरम् ॥"

आयुरादि । आदिशब्दात् साध्यासाध्यत्वादि । दृशा दर्शनेन । अथ स्पर्शनादिभ्य इति भावे क्विप् । स्पर्शात् शीतादेः । शीतोष्णमृदुकठिनत्वादिना परीक्षणञ्च । प्रश्नतः । उदरलाघवशौचबलक्षुधाबलाबलादिना ।

"मिथ्या दृष्टा विकारा हि दुराख्यातास्तथैव च ।
तथा दुष्परिदृष्टाश्च मोहयेयुश्चिकित्सकान् ॥"

तत्र दर्शनं नेत्रजिह्वादेः कर्त्तव्यम् ॥ ० ॥ तत्र नेत्रपरीक्षा यथा,—

"नेत्रं स्यात् पवनाद्रूक्षं धूम्रवर्णं तथारुणम् ।
कोटरान्तः प्रविष्टञ्च तथाचञ्च विलोकनम् ॥
हरिद्राभञ्च नीलञ्च रक्तं वा हरितं तथा ।
दीपद्विट् सदाहञ्च नेत्रं स्यात् पित्तकोपतः ॥
चक्षुर्बलासबाहुल्यात् स्निग्धं स्यात् सलिलप्लुतम् ।
तथा धवलवर्णञ्च ज्योतिर्हीनं बलान्वितम् ॥
नेत्रं द्विदोषबाहुल्यात् स्याद्दोषद्वयलक्षणम् ।
त्रिदोषलिङ्गं सैवेत सम्मारयति रोगिणम् ॥
त्रिदोषदूषितं नेत्रमन्तर्भ्रमं भवेत् ।
त्रिलिङ्गं सलिलस्रावि प्राणिनोऽन्तीक्षयस्यपि ॥" ●

अथ जिह्वापरीक्षा ।

"शाकपत्रप्रभा रूक्षा स्फुटिता रसनानिलात् ।
रक्ता श्यामा भवेत् पित्तात् श्लेष्मार्द्रा धवला कफात् ।
परिदग्धा खरस्पर्शा कृष्णा दोषत्रयेऽधिके ।
सैव दोषद्वयाधिक्ये दोषद्वितयलक्षणा ॥"

अथ मूत्रपरीक्षा ।

"वातेन पाण्डुरं मूत्रं रक्तं नीलञ्च पित्ततः ।
रक्तमेव भवेद्रक्तात् धवलं फेनिलं कफात् ॥"

अथ शरीरस्य उष्णत्वादिज्ञानार्थं स्पर्शनं कार्य्यम् । तत्र नाडीपरीक्षामाह ।

"पुंसो दक्षिणहस्तस्य स्त्रियो वामकरस्य तु ।
अङ्गुष्ठमूलगा नाडी परीक्षेत भिषग्वरः ॥
अङ्गुलीभिस्तु तिसृभिर्नाडीमवहितः स्पृशेत् ।
तच्चेष्टया सुखं दुःखं जानीयात् कुशलोऽखिलम् ॥
सद्यः स्नातस्य भुक्तस्य क्षुत्तृष्णातपशीलिनः ।
व्यायामश्रान्तदेहस्य सम्यङ् नाडी न बुध्यते ॥
वातेऽधिके भवेन्नाडी प्रव्यक्ता तर्ज्जनीतले ।
पित्ते व्यक्ता मध्यमायां तृतीयाङ्गुलिगा कफे ॥
तर्ज्जनीमध्यमामध्ये वातपित्तेऽधिके स्फुटा ।
अनामिकायां तर्ज्जन्यां व्यक्ता वातकफे भवेत् ॥
मध्यमानामिकामध्ये स्फुटा पित्तकफेऽधिके ।
अङ्गुलित्रितयेऽपि स्यात् प्रव्यक्ता सन्निपातिनः ॥
वातात् वक्रगतिर्नाडी पित्तादुत्प्लुत्य गामिनी ।
कफान्मन्दगतिर्ज्ञेया सन्निपातादतिद्रुता ॥
वक्रमुत्प्लुत्य चलति धमनी वातपित्ततः ।
वहेद्वक्रञ्च मन्दञ्च वातश्लेष्माधिके सति ॥
उत्प्लुत्य मन्दं चलति नाडी पित्तकफेऽधिके ।
कामात् क्रोधात् वेगवहा क्षीणा चिन्ताभयाप्लुता ॥
स्थित्वा स्थित्वा चलेद्या या सा हन्ति स्थानच्युता तथा ।
अतिक्षीणा च शीता च प्राणान् हन्ति न संशयः ॥
ज्वरकोपेन धमनी सोष्णा वेगवती भवेत् ।
मन्दाग्नेः क्षीणधातोश्च सैव मन्दतरा मता ॥
चपला क्षुधितस्य स्यात् तृप्तस्य भवति स्थिरा ।
सुखिनोऽपि स्थिरा ज्ञेया तथा बलवती मता ॥"

इति भावप्रकाशः ॥

(लक्षणान्तरादिकमाह ।

"रोगो यस्यास्ति रोगी स स चिकित्स्यस्तु यादृशः ।
यादृशश्चाचिकित्स्योऽपि वक्ष्यमाणो निशम्यताम् ॥"

तत्र चिकित्स्यः ।

"भिषक्पथ्यनिरताभ्यां युक्तः सत्त्वेन चक्षुषा ।
चिकित्स्यो भिषजां रोगी वैद्यभक्तो जितेन्द्रियः ॥"

सत्त्वं अवश्याभ्युन्यक्रियादिष्वविक्लवताकरः तेन युक्तः । चक्षुषा चक्षुरुपलक्षितेन । ततोऽर्थं जानीत्यनेन चिकित्स्यः रोगान् मोचयितव्यः । अन्यच्च ।

"आयुष्मान् सत्त्ववान् साध्यो द्रव्यवान् मित्रवानपि ।
चिकित्स्यो भिषजा रोगी वैद्यवाक्यस्थिता-स्तिकः ॥"

आयुर्व्वेदोऽस्तीति मतिर्यस्य स आस्तिकः ॥ अथाचिकित्स्यः ।

"चण्डः साहसिको भीरुः कृतघ्नो व्यग्र एव च ।
शोकाकुलो मुमूर्षुश्च विहीनः करणैश्च यः ॥
वैरी वैद्यविदग्धश्च महारोगश्च शङ्कितः ।
भिषजामविधेयाश्च नोपक्रम्या भिषग्विदा ॥
एतानुपाचरन् वैद्यो बहून् दोषानवाप्नुयात् ॥"

चण्डोऽत्यन्तक्रोधशीलः । साहसिकः अविचार्य्यकारी । भीरुर्भयशीलः । कृतघ्नो वैद्यकृतोपकारलोपकः । व्यग्रो व्याकुलः । विहीनः करणैश्च यः निखिलेन्द्रियशक्तिरहितः । वैरी न चिकित्स्यः कदाचिद्रोगोद्रेके अपवादभयात् । वैद्यविदग्धो वैद्यधूर्त्तः । तथा च सुश्रुतः ।

"स न सिद्ध्यति वैद्यस्तु दृष्टे यस्य न पूज्यते ।"

शङ्कितो वैद्यविश्वासरहितः । भिषजामविधेया वैद्यवचनाविधायिनः । भिषग्विदा वैद्यतुल्याः । एते नोपक्रम्याः न चिकित्स्याः । अथ दूतस्य लक्षणम् ।

"यश्चिकित्सकमानेतुं याति दूतः स कथ्यते ।
स च यादृक् समुचितस्तादृगत्र निगद्यते ॥
दूताः सुजातयोऽव्यङ्गाः पटवो निर्म्मलाम्बराः ।
सुखिनोऽश्ववृषारूढाः शुभपुष्पफलैर्युताः ॥
सजातयः सुचेष्टाश्च सजीवदिग्विनिःसृताः ।
भिषजं समये प्राप्ता रोगिणः सुखहेतवे ॥"

सजातयः रोगिसमानजातयः ।

"यस्यां श्वासं वहति सा नाडी जीवसंज्ञिता ॥"

अथ दूतस्य यात्रायां शकुनविचारः ।

"वैद्याह्वानाय दूतस्य गच्छतो रोगिणः कृते ।
न शुभं सौम्यशकुनं प्रदीप्तन्तु सुखावहम् ॥"

प्रदीप्तमपि दूतो रोगी रिक्तहस्तो वैद्यं न पश्येत् । तथा च ।

"रिक्तहस्तो न पश्येत्तु राजानं भिषजं गुरुम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रोग्य त्रि, (रोगाय हितमिति । रोग + यत् ।) अपथ्यम् । अहितम् । इति शब्दचन्द्रिका ॥ रोगसम्बन्धि च ॥

रोचकः, पुं, (रोचयतीति । रुच + णिच + ण्वुल् ।) क्षुधा । तत्पर्य्यायः । बुभुक्षा २ अशना ३ जिघत्सा ४ रुचिः ५ । इति हेमचन्द्रः । ३ । ५७ ॥ कदली । इति शब्दरत्नावली ॥ राजपलाण्डुः । अवदंशः । इति राजनिर्घण्टः । ग्रन्थिपर्णभेदः । भण्डिउर इति नेपालदेशे ख्यातः । तत्पर्य्यायः । निशाचरः २ धनहरः ३ कितवः ४ गन्धदायकः ५ । अस्य गुणाः । मधुरत्वम् । तिक्तत्वम् । कटुत्वम् । पाके कटुत्वम् । लघुत्वम् । तीक्ष्णत्वम् । हृद्यत्वम् । हिमत्वम् । कुष्ठकण्डूकफानिलरक्षोऽलक्ष्मीस्वेदज्वरास्रविषव्रणनाशित्वञ्च । इति भावप्रकाशः ॥ (काचकूप्यादिकारके । यथा, रामायणे । २ । ८३ । १३ ।

"मायूरकाः क्राकचिका वेधका रोचकास्तथा ॥"

"रोचकाः काचकूप्यादिकर्त्तारः इति कतकः ।" इति तट्टीका ॥) रुचिकारके, त्रि । (यथा, सुश्रुते । १ । ४६ । मांसवर्गे ।

"मयाख्यो रोचको वस्यो बामिलो ज्वरापहः ।")

रोचनः, पुं, (रोचयतीति । रुचि + णिच् + नन्द्यादित्वात् ल्युः ।) कूटशाल्मलिः । इत्यमरः ॥ (तस्य पर्य्यायो यथा,—

रोगघ्न, क्ली, (रोग हन्तीति । हन+टक् ।) औषधम् । इति वैद्यकम् ॥ रोगनाशके, त्रि । (स्त्रियां ङीप् । यथा सुश्रुते । १ । ४४ ।
"त्रिवृता सर्वरोगघ्नी विभागकृतकल्पिता ।")
रोगभू, स्त्री (रोगाणां भूः स्थानं व्याधिमन्दिरत्वात् ।) शरीरम् । इति शब्दचन्द्रिका ।
रोगराज, पुं (रोगाणां राजा । टच् ।) राजयक्ष्मा । इति राजनिर्घण्टः । (यथा,—
"इति व्याधिसमूहस्य रोगराजस्य हेतुजम् ।
रूपमेकादशविधं हेतुश्चोक्तश्चतुर्विधः ॥"
इति चरके चिकित्सास्थाने ८ अध्याये ॥)
रोगलक्षण, क्ली, (रोगाणां लक्षणम् ।) निदानम् । इति राजनिर्घण्टः ॥
रोगशान्तक, पुं, (रोगान् शान्तयतीति । शान्ति+ण्वुल् ।) वैद्यः । इति शब्दचन्द्रिका ॥
रोगशिला, स्त्री (रोगाय रोगनिवृत्तये शिला ।) मनःशिला । इति राजनिर्घण्टः ॥ (विवरणमस्या मनःशिलाशब्दे विज्ञेयम् ।)
रोगशिल्पी, [न्] पुं (रोगे शिल्पीव ।) वृक्षविशेषः । इति जटाधरः ॥ शोराधु इति भाषा ॥
रोगश्रेष्ठ, पुं (रोगेषु श्रेष्ठः ।) ज्वरः । इति राजनिर्घण्टः ॥
रोगह, क्ली, (रोगान् हन्तीति । हन्+ड ।) औषधम् । इति शब्दचन्द्रिका ॥
रोगहरद्रव्य क्ली, (रोगहरं रोगनाशकं द्रव्यम् ।) रोगनाशकवस्तु । यथा —

धन्वन्तरिरुवाच ।

"द्रव्याणि मधुरादीनि वक्ष्ये रोगहराण्यहम् ।
शालिषष्टिकगोधूमचीरश्चैव तथा मधु ॥
मत्स्याण्डखण्डरुचकयवशर्करकसारकम् ।
गम्भारी पौष्कर बीज द्राक्षा खर्जूरक बला ।
नारिकेलतालफला विदारी च पियालकम् ।
मधुक शालकुष्माण्ड सुखाद्य मधुरो गणः ॥
मूर्च्छादाहप्रशमन षडिन्द्रियप्रसादनः ।
क्रिमिकृत् कफकृत् द्रव्य एकोऽत्यर्थं निषेवितः ॥
श्वासकासास्यमाधुर्य्यस्वरघातार्व्वुदानि च ।
गलगण्डश्लीपदानि गुरुवस्त्यर्व्वुदानि कारयेत् ॥ ० ॥
दाडिमामलकाम्लञ्च कपित्थकरमर्द्दकौ ।
मातुलुङ्गाम्रातकञ्च वदरं तिन्तिडीफलम् ।
दधितक्र काञ्जिकञ्च लकुच चाम्लवेतसम् ।
अम्लो वर्गः स्मृतस्त्वेष्व जारको पाचको रुचः ।
कफवातहृत् उष्णो विदाही चानुलोमनः ।
अम्लोऽत्यर्थं निषेव्यमाणः कुर्य्याद्दन्तहर्षकम् ॥
शरीरस्य च शैथिल्यतर कुष्ठ करोत्यथ ।
क्षतक्षीणक्षताग्निविषपाचकाग्निभावनः ॥ ० ॥
लवणान्यथ सौवर्चलसैन्धवबिडोद्भिदलवणम् ।
शोधन पाचन भेदी विश्लेषणमथादितः ॥
मागधी मार्द्दवकृत् च एकः परिसेवितः ।
गात्रकण्डूकोठशोथवैवर्ण्य जनयेदयम् ।
रक्तवातरक्तपित्तपुंस्त्वेन्द्रियबलादिकम् ॥ ० ॥
चीरशिग्रु लसुनञ्च देवदारु च कुष्ठकम् ।
त्रयूषणं अमृतयुक्तं सुधा गुग्गुलुशाल्मली ।
कटुको दीपनः शोधी कुष्ठकण्डूकफापहः ।
स्थौल्यालस्यकृमिहरः शुक्रमेदोविशोधनः ।
एकोऽत्यर्थं सेव्यमानो भ्रमदाहादिकृद्भवेत् ॥ ० ॥
तन्तमाल करीराणि हरिद्रेन्द्रयवाभया ।
स्वादुकण्टकवेत्राणि बृहतीदयकृच्छिनी ।
गुडूची च द्रवन्ती च त्रिवृन्मण्डूकपर्ण्यपि ।
कारवेल्लकवार्त्ताकुकरवीरकपाचकाः ।
रोहिणी शङ्खपुष्पी च कर्कोटो वैजयन्तिका ।
जाती वरुणकं निम्बो ज्योतिष्मती पुनर्नवा ।
तिक्तो रसश्छेदनः स्याद्रोचनो दीपनस्तथा ।
शोधनो ज्वरतृष्णाघ्नो मूर्च्छाकण्डूतिका हरेत् ।
विड्मूत्रक्लेदमेदोघ्नः शमनः स च सेवितः ।
मन्याभ्रमश्चैवकार्श्यशिरःशूलवातादिकृत् ॥ ० ॥
त्रिफलाश्मकौन्तु पाषाणभेदटङ्कणम् ।
तिन्दुक वकुल शाक निष्पावं मुद्गशिम्बिका ॥"
निष्पावस्थाने पालङ्क्या इति क्वचित् पाठः ।
"कषायो ग्राहको रोपी स्तम्भनः क्लेदशोषणः ।
एकोऽत्यर्थं सेव्यमानो हृद्दाहस्य पीडकृत् ॥
मलशोषज्वराध्मानमन्याग्रहादिकारकः ॥ ० ॥
हरिद्रा कुष्ठलवणमेषशृङ्गी बलाद्वयम् ।
कच्छुरो शल्लकी पर्णी पुनर्नवा शतावरी ।
अग्निमन्थो ब्रह्मदण्डी सहदेवदण्डके तथा ।
यवकोलकुलत्थानि दशमूलगणः कम् ।
एषक ममलो वातघ्नो बहुपित्तहरस्तथा ।
शतावरी विदारी च बालकोशीरचन्दनम् ।
दूर्वा वट पिप्पली च बदरी शल्लकी तथा ।
कदली चोत्पल पद्मपुष्पमथ पटोलकम् ॥ ० ॥
अथ श्लेष्महरो वर्गो हरिद्रा गुरुकुष्ठकम् ।
शतपुष्पी च जाती च चीरा पिप्पलाकुली ॥ ० ॥
सपित्तैकवमामन्दा सैव प्रवरं घृतम् ।
तथाधीसाक्षिमेधाग्निकान्तिश्च वर्द्धते घृतम् ।
कैवल पैत्तिक सर्पिर्वातिकं लवणान्वितम् ।
देय बहुकफे चापि व्योषक्षारसमन्वितम् ।
मस्तीनाकोद्वर्त्तिमेदप्रमेहोमावतरोगिषु ॥ ० ॥
तैल वातश्लेष्माय कृमिकोष्ठदर्शिषु ।
भग्नातपाखभावानिवायामक्लीवधातुषु ।
रूक्षे क्षीणपावासितालाङ्गनयोषिषु च ।
तथा दग्धा कुष्ठभग्ना चात्यर्कशिरोदषि ।
उत्तमस्य पर्वं मात्रा त्रिभिश्चाष्टैश्च मध्यमे ।
अधमस्य पलार्द्धेन स्नेहकालौषधेषु च ॥ ० ॥
अनुपेय घृते इव पृथक् तैले न प्रशस्यते ।
स्नेहे पीते तु तद्धार्या पिबेदुष्णोदकं नरः ।
वातानुलोमणीनाभिविवर्द्धस्निग्धसमननम् ।
रूक्षस्य स्नेहनं कार्यमतिस्निग्धस्य रूक्षणम् ।
श्यामाकचोरदूषामलकपिण्याकशक्तुभिः ।
वातरोगे तु रात्रौ वा कफे वा दिने स्मृतः ॥
न स्नेहयेदतिस्थूलदहद्रव्यतान् ॥"
इति गारुडे रोगघ्ने १७७ अध्यायः ॥ ० ॥

धन्वन्तरिरुवाच ।

"घृततैलादि वक्ष्यामि सर्व्वश्रेष्ठं रोगहृत् ।
शङ्खपुष्पी वचा सोमा ब्राह्मी ब्रह्मसुवर्चला ।
अभया गुडूची चैव अटरूषकवाकुची ।
एतैरक्षसमैर्भागैर्घृतप्रस्थं विपाचयेत् ।
कण्टकार्य्या रसप्रस्थं क्षीरप्रस्थसमन्वितम् ।
एतद्ब्राह्मीघृत नाम स्मृतिमेधाकरं परम् ॥ ० ॥
त्रिफलाचित्रकवलानिर्गुण्डीनिम्बवासकाः ।
पुनर्नवा गुडूची च बृहती च शतावरी ।
एतैर्घृत यथालाभं सर्वरोगविमर्द्दनम् । ० ।
शतावरीकषाये तु तैलस्याढकं पचेत् ।
काकोलीमधुकमञ्जिष्ठाचन्दनोत्पलपद्मकैः ।
शतपुष्पीपिप्पलीकुष्ठ सैन्धवागुरुकर्करैः ।
मांसीजीवकजीवन्ति चीराढ्यकच्छमादिकम् ।
एतत्तैलवरं पक्वं स्नापयेत्तेन सुभं ।
सर्वावातविकारांस्तु सर्व्वावान्ताराशयान् ।
तैलमतत् प्रशमयत्यर्थाः रामबालकम् ॥ ० ॥
शतावरीसमायुक्तं क्षीरप्रस्थं तथैव च ।
शतपुष्पा देवदारु मांसी शैलेयकं वचा ।
चन्दनं तगरं कुष्ठं मांसी चांशुमती तथा ।
एते कषायं कल्कैश्चौव विपाचयेत् ।
कुब्जवामनपङ्गूनां बधिरक्लीबकुण्डिनाम् ।
वायुना भग्नगात्राणां ये च क्षीणाश्च मेदुरः ।
जराजर्जरगात्राणां चाथावमूत्ररोगिणाम् ।
स्नानसूताश्चापि ये बाला ध्रियत्युग्रमताश्च ये ।
च वन्ध्यानाशयत्याशु तैलैव स्याद्याप्तकं ।
नारायणमिदं तैलं विष्णुनोक्तं समर्द्दनम् ॥ ० ॥
पृथक् तैलं घृतं कुर्य्यात् समस्तैरौषधैः पृथक् ।
शतावर्या गुडूच्या वा त्रिफलैः रसवासुभ ।
निर्गुण्ड्या वा प्रसारण्या कण्टकार्य्या रसैः
स्त्रिभिः ।
बलातिबलया वापि वासकस्य कषायकैः ।
भाङ्ग्या चैरण्डकैवापि भृङ्गराजेन शक्तिमान् ।
गवल्या गुडूच्यैव खदिरेण वटादिभि ।
षष्टिका मोदकेः वापि च स्यात् सर्वरोग
हृत् ।
द्विनिश मधुना वापि घृत खण्डगुडादिभिः ।
सर्वं कटुकैर्युक्त यथायोग रोगहृत् ।
चित्रककारवेल्लनामलवक मारकम् ।
यथा च वाता गजिका सपपवाज्यवैतन ।
ज्योतिष्मतीच लक्ष्म तैलं क्षीरे विपाचयेत् ।
शतसिप्यन्दर्दं तैलं भग्न दद्यात् भगन्दरे ।
शोधनं रोपणञ्चैव सवर्णकरं परम् ।
चित्रकाद्य महातैलं सर्वरोगप्रभञ्जनम् ।
अजमोदं पाशिन्दूरी हरिताकिनाशनम् ।
चारट्य चित्रकसमादर्कं तरलोदकम् ।
इन्द्रवारुणी यष्टीमागर्कदलैः कन्दलैः दर्मे ।"
कन्दर्थे स्थाने खन्दनैः इति च पाठः ।
"एभिः सर्वैः तैलमकासहेत योजितम् ।
दन्तविना पवेदतत् अभ्यन्तरेण शमनम् ।
अजमोदादिकं तैलं गजमाला अपोहति ।
पिण्डस्तु पचेत् पीडं मध्येन विशोधयेत् ।
रोपक मृदुभाव तैलेनाभक्त कारयेत् ।
अजमोदादिकं तैलं महाशीर्षं रोगहृत् ।"
इति गारुडे १७८ अध्यायः ॥

रोगहारी, [न्] पुं, (रोगं हरति तच्छील । हृ+णिनि ।) वैद्यः । इत्यमरः । २ । ६ । ५७ ॥ रोगनाशके, त्रि ॥

रोगितरुः पुं, (रोगिणां शोकनाशकस्तरुः ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥

रोगिवल्लभं, क्ली, (रोगिणां वल्लभं प्रियम् ।) औषधम् । इति शब्दचन्द्रिका ॥ रोगिप्रिये त्रि ॥

रोगी [न्] त्रि, (रोगोऽस्यास्तीति । रोग+इनि ।) रोगयुक्तः । तत्पर्य्यायः । व्याधितः २ विकृतः ३ ग्लानः ४ म्लानः ५ मन्दः ६ आतुरः ७ अभ्यान्तः ८ अभ्यमितः ९ अमः १० आमयी ११ अपटुः १२ । इति राजनिर्घण्टः ॥ व्याममावी १३ ग्लास्नुः १४ । इत्यमरः ॥ * ॥ अथ चिकित्सार्थं रोगिणः परीक्षा । तत्र वाग्भटः ।

"दर्शनस्पर्शनप्रश्नैः परीक्षेत च रोगिणम् ।
आयुरादि दृशा स्पर्शाच्छीतादेः प्रश्नतोऽपरम् ॥"

आयुरादि । आदिशब्दात् साध्यत्वासाध्यत्वादि । दृशा दर्शनेन । अत्र सप्तम्यादित्वेन भावे क्तिः । स्पर्शात् शीतादेः । शीतोष्णमृदुकठिनत्वादिकं परीक्षयेत् । प्रश्नेन । उन्मत्तस्वग्लानिवत्त्वबुभुक्षादिकादिना ।
"मिथ्या दृष्टा विकारा हि दुराख्यातास्तथैव च ।
तथा दुष्परिदृष्टाश्च मोहयेयुश्चिकित्सकान् ॥"
तत्र दर्शनं नेत्रजिह्वामूत्रादेः कर्त्तव्यम् ॥ * ॥
तत्र नेत्रपरीक्षा यथा,—
"नेत्रं स्यात् पवनाद्रूक्षं धूम्रवर्णं तथारुणम् ।
कोटरान्तःप्रविष्टञ्च तथास्यच्च विलोकनम् ॥
हरिद्राभञ्चरक्तं वा हरितं तथा ।
दीपद्वेषि सदाहञ्च नेत्रं स्यात् पित्तकोपतः ॥
चक्षुर्मलाश्रवाहुल्यात् स्निग्धं स्यात् सलिलप्लुतम् ।
तथा धवलवर्णञ्च ज्योतिर्हीनं बलान्वितम् ॥
नेत्रं द्विदोषबाहुल्यात् स्याद्दोषद्वयलक्षणम् ।
त्रिदोषलिङ्गं चैतत् सम्भावयति रोगिणम् ॥
त्रिदोषदूषितं नेत्रमन्तर्मग्नं भवेत् ।
त्रिलिङ्गं सलिलस्रावि प्राणिनोऽप्यसाध्यमादि ॥" *
अथ जिह्वापरीक्षा ।
"शाकपत्रप्रभा रूक्षा स्फुटिता रसनानिलात् ।
रक्ता श्यामा भवेत् पित्तात् लिप्तार्द्रा धवला कफात् ॥
परिदग्धा खरस्पर्शा कृष्णा दोषत्रयेऽधिके ।
सैव दोषद्वयाधिक्ये दोषद्वितयलक्षणा ॥"
अथ मूत्रपरीक्षा ।
"वातेन पाण्डुरं मूत्रं रक्तं नीलञ्च पित्ततः ।
रक्तमेव भवेत् रक्तात् शुक्लं फेनिलं कफात् ॥"
अथ शरीरस्य उष्णत्वादिज्ञानार्थं स्पर्शनं कार्य्यम् । तत्र नाडीपरीक्षामाह ।
'पुंसो दक्षिणहस्तस्य स्त्रियो वामकरस्य तु ।
अङ्गुष्ठमूलगा नाडी परीक्षेत भिषग्वरः ॥

अङ्गुलीभिस्तु तिसृभिर्नाडीमवहितः स्पृशेत् ।
तच्चेष्टया सुखं दुःखं जानीयात् कुशलोऽखिलम् ॥
सद्यः स्नातस्य भुक्तस्य क्षुत्तृष्णातपशीलिनः ।
व्यायामश्रान्तदेहस्य सम्यक् नाडी न बुध्यते ॥
वातेऽधिके भवेन्नाडी प्रव्यक्ता तर्ज्जनीतले ।
पित्ते व्यक्ता मध्यमायां तृतीयाङ्गुलिगा कफे ॥
तर्ज्जनीमध्यमामध्ये वातपित्तेऽधिके स्फुटा ।
अनामिकायां तर्ज्जन्यां व्यक्ता वातकफे भवेत् ॥
मध्यमानामिकामध्ये स्फुटा पित्तकफेऽधिके ।
अङ्गुलित्रितयेऽपि स्यात् प्रव्यक्ता सन्निपाततः ॥
वाताद्वक्रगतिर्नाडी पित्ताद्भृङ्गतुल्यगामिनी ।
कफात् मन्दगतिर्ज्ञेया सन्निपातान्तिद्रुता ॥
वक्रद्रुतञ्च चलति धमनी वातपित्ततः ।
वहेद्वक्रञ्च मन्दञ्च वातश्लेष्माधिके ततः ॥
उत्प्लुत्य मन्दं चलति नाडी पित्तकफेऽधिके ।
कामात् क्रोधात् वेगवहा क्षीणा चिन्ताभयाप्लुता ॥
स्थित्वा स्थित्वा चलेद्या या सा स्मृता प्राणनाशिनी तथा ।
अतिक्षीणा च शीता च प्राणान् हन्ति न संशयः ॥
ज्वरकोपेन धमनी सोष्णा वेगवती भवेत् ।
मन्दाग्नेः क्षीणधातोश्च सैव मन्दतरा मता ॥
चपला क्षुधितस्य स्यात् तृप्तस्य भवति स्थिरा ।
सुखिनोऽपि स्थिरा ज्ञेया तथा बलवती मता ॥"
इति भावप्रकाशः ॥
(लक्षणान्तरादिकमाह ।
"रोगो यस्यास्ति रोगी स च चिकित्स्यस्तु पादशः ।
पादश्चाचिकित्स्योऽपि वक्ष्यमाणो निशम्य ताम् ॥"
तत्र चिकित्स्यः ।
"नित्यप्रहृतिवाभ्यां युक्तः सर्व्वत्र चक्षुषा ।
चिकित्स्यो भिषजां रोगी वैद्यभक्तो जितेन्द्रियः ॥'
सत्त्व आत्माभ्युदयक्रियाभिर्विचक्षणताकरः तेन युक्तः । चक्षुषा चक्षुरुपलक्षितेन । ततोऽन्येनापीन्द्रियेण चिकित्स्यः रोगान् मोचयितव्यः ।
अन्यच्च ।
"आयुष्मान् सत्त्ववान् साध्यो द्रव्यवान् भिषग्वाक्यपि ।
चिकित्स्यो भिषजा रोगी वैद्यवाक्यकृदास्तिकः ॥"
आयुर्वेदोऽस्तीति मतिर्यस्य स आस्तिकः ।
अथाचिकित्स्यः ।
"चण्डः साहसिको भीरुः कृतघ्नो व्यग्र एव च ।
शोकाकुलो मुमूर्षुश्च विहीनः करणैश्च यः ॥
वैरी वैद्यविदग्धश्च श्रद्धाहीनश्च शङ्कितः ।
भिषजामविधेयश्च नोपक्रम्या भिषग्विधाः ॥
एतानुपाचरन् वैद्यो बहून् दोषानवाप्नुयात् ॥"
चण्डोऽत्यन्तकोपशीलः । साहसिकः अविचार्य्यकारी । भीरुः भयशीलः । कृतघ्नो वैद्यकृतोपकारलोपकः । व्यग्रो व्याकुलः । विहीनः करणैश्च चित्तेन्द्रियशक्तिरहितः । वैरी न चिकित्स्यः कदाचिद्रोगोद्रेके अपवादभयात् । वैद्यविदग्धो वैद्यधूर्त्तः । तथा च सुश्रुतः ।
"स न सिद्ध्यति वैद्यस्तु यस्य न पृच्छति ।"
शङ्कितो वैद्यविश्वासरहितः । भिषजामविधेयः वैद्यवचनाविधायिनः । भिषग्विधा वैद्यतुल्याः । एते नोपक्रम्याः न चिकित्स्याः । अथ दूतस्य लक्षणम् ।
"यश्चिकित्सकमानेतुं याति दूतः स कथ्यते ।
स च याहक समुचितस्ताहगत्र निगद्यते ॥
दूताः सुजातयोऽव्यङ्गाः पटवो निर्म्मलाम्बराः ।
सुखिनोऽश्ववृषारूढाः शुभपुष्पफलैर्युताः ॥
सजातयः सुचेष्टाश्च सजीवदिशि संस्थिताः ।
भिषजं समये प्राप्ता रोगिणः सुखहेतवे ॥"
सजातयः रोगिसमानजातयः ।
"यस्यां प्राणमरुद्याति सा नाडी जीवसंज्ञिता ॥"
अथ दूतस्य यात्रायां शकुनविचारः ।
"वैद्याह्वानाय दूतस्य गच्छतो रोगिणः कृते ।
न शुभं शौच्यं शकुनं प्रशंसन्तु सुखावहम् ॥"
प्रशस्तमपि दूतो रोगी रिक्तहस्तो वैद्यं न पश्येत् । तथा च ।
"रिक्तहस्तो न पश्येत्तु राजानं भिषजं गुरुम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रोग्य त्रि, (रोगाय हितमिति । रोग+यत् ।) अपथ्यम् । अहितम् । इति शब्दचन्द्रिका ॥ रोगसम्बन्धिनि च ॥

रोचकः, पुं (रोचयतीति । रुच+णिच+ण्वुल् ।) क्षुधा । तत्पर्य्यायः । बुभुक्षा २ अशना ३ जिघत्सा ४ रुचिः ५ । इति हेमचन्द्रः । ३ । ५७ ॥ कन्दली । इति शब्दरत्नावली ॥ राजपलाण्डुः । अवरुः । इति राजनिर्घण्टः ॥ पक्षिविशेषः । भकिउर इति नेपालदेशे ख्यातः । तत्पर्य्यायः । निशाचरः २ धनहरः ३ कितवः ४ गन्धनाशकः ५ । अस्य गुणाः । मधुरत्वम् । तिक्तत्वम् । कटुत्वम् । पाके कटुत्वम् । लघुत्वम् । शीतलत्वम् । रुच्यत्वम् । हिमत्वम् । कृच्छ्रकण्डूकफानिलरक्तदोषश्वीत्रमेदोऽसृग्ज्वरगन्धविषघ्नतानाशित्वञ्च । इति भावप्रकाशः ॥ (काचकूप्यादिकारकः । यथा, रामायणे । २ । ८३ । १६ ।
"मायूरकाः क्राकचिका वेधका रोचकाः तथा ॥"
"रोचकाः काचकूप्यादिकर्म्मारः इति कतकः ।"
इति तट्टीका ॥) रुचिकारके, त्रि ॥ (यथा, सुश्रुते । १ । ४६ । मांसवर्गे ।
"कषायो रोचको वक्ष्यस्तेषामेको ज्वरापहः ॥")

रोचनः, पुं, (रोचयतीति । रुचि+नन्द्यादित्वात् ल्युः ।) कूटशाल्मलिः । इत्यमरः ॥ (तस्य पर्य्यायो यथा,—

'तुङ्गिन खालनि प्रोक्तो रोचन कृत
खालोलि ।"
इति भावप्रकाशे । १ । १ ।
काम्पिल्ल । तत्पर्यायो यथा,—
"कम्पिल्ल कर्कशश्चन्द्रो रक्ताङ्गो रोचनोऽपि
च ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
श्वेतशिग्रु । पलाण्डु । आरग्वध । करञ्ज ।
अङ्कोट । दाडिम । इति राजनिघण्टः ॥
(दानवविशेष । यथा हरिवंशे । १६६ । ७५ ।
"कुम्भाण्ड कुम्भनाभा च रोचनो वैतलोदर ।"
दक्षिणापुत्राणामन्यतम । स च स्वायम्भुवमन्व
न्तरे देवविशेष । इति भागवतम् । ४ । १ । ७ ।
स्वारोचिषमन्वन्तर इन्द्र । इति च तत्रैव । ८ । १ ।
२० । भारतवर्षान्तर्गतपर्व्वतविशेष । यथा
मार्कण्डेये । ५७ । ११ ।
'तुङ्गप्रस्थो नागगिरी रोचन पाण्डराचल ।")
त्रि रोचक । इति मेदिनी । न, ११६ । (यथा,
सुश्रुते । १ । ४६ । खाद्यवर्गे ।
"कृष्णाख्य रोचन हृद्यं वर्णेन लघु दीपनम् ।"
दीप्तिमाली । यथा, हरिवंशे । १५८ । ३५ ।
"अलङ्कार रोचन चारुगात्र
महाबल धर्म्मगतारमोघम् ।
वरमनघ प्रतिमप्रमेय
महारवं विश्वसृज नमस्ते ।"
शोभमान । यथा, भट्टि । ६ । ७२ ।
"भृङ्गालिकोकिलकुटुम्बितशृङ्गे यत्र लक्ष्मण ।
रोचनैर्भूषितो पश्यामस्ताक भूम्याविधम् ।"
अनुरागकर । यथा भागवते । १ । १ । ११ ।
"भद्रायुष्कस्कन्धो खलु नात्मवल बुध ।
रोचमान यशो यस्य सद्वाक्यस्य रोचनम् ।',
रोचक, पुं (रोचयतीति । रोचि + ण्वुल् । तत
कन् ।) अम्लोट । इति राजनिघण्टः ॥ (गुणा
अस्य अम्लोटशब्दे ज्ञातव्या ॥)
रोचनफल, पुं (रोचन रुचिकर फलमस्य ।)
बीजपूरक । इति राजनिघण्टः ॥
रोचनफला, स्त्री (रोचनं रोचक फलमस्या ।)
चिर्भिटा । इति राजनिघण्टः ॥
रोचना, स्त्री, (रोचते या । रुच + "बहुलमन्य
त्रापि ।" उणा० २ । ७८ । इति युच । टाप् ।)
रक्तकह्लारम् । गोपित्तम् । गोरोचना इति
ख्यातम् । (यथा मनु । ८ । २१४ ।
"स्त्री वस्त्रं च वालोऽश्वं वह्निं वायुध रोच
नाम् ।
धन्युः सावित्रीं स्याम् ...)
वरस्त्री । इति मेदिनी । न, ११८ । (वसुदे
वपत्नी । यथा, भागवते । ९ । २४ । ४५ ।
'पौरवी रोहिणी भद्रा मदिरा रोचना इला ।
देवकीप्रमुखाश्चासन् पत्न्य आनकदुन्दुभे ।")
रोचनिका, स्त्री, (रोचनैव । स्वार्थे कन् ।
टापि अत इत्वम् ।) वंशरोचना । इति राज
निघण्टः । गुडारोचनी । इति रत्नमाला ॥

रोचनी, स्त्री, (रोचयति इति । रुच + ल्युट् ।
बहुलमिति ल्युट् । ततो ङीप् ।) आमलकी ।
गोरोचना । इति राजनिघण्टः ॥ रक्तत्रिवृता ।
इति हेमचन्द्रः ॥ श्वेतत्रिवृता । गुँडारोच
नीति ख्याततिक्तद्रव्यम् । तत्पर्याय । काम्पिल्ल २
कर्कश ३ चन्द्र ४ रक्ताङ्ग ५ । इत्यमर ॥
कम्पिल्ल ६ कम्बोज ७ कम्पिल ८ काम्पिल्य ९
रेचनी १० । इति भरत ॥ पर्य्यायान्तर गुणाश्च
काम्पिल्लकशब्दे द्रष्टव्या ॥
रोचमान, पुं, (रोचते इति । रुच + शानच् ।)
अश्वग्रीवास्थरोमावर्त्त । यथा,—
"श्रीवत्सो हृदयावर्त्तो रोचमानो गलोद्भव ।"
इति त्रिकाण्डशेष ॥
(यथा, माघे । ५ । ४ ।
"अश्वा व्यधुवन्नुन्नतीभवद्रोचमाना
स्तस्थ पयोधय इवोर्मिभिरापतन्त ।"
नृपविशेष । यथा, महाभारते । १ । ६७ । १८ ।
"अश्वग्रीव इति ख्यात सत्त्ववान् यो महा
सुर ।
रोचमान इति ख्यात पृथिव्यां सोऽभवन्नृप ॥"
दीप्यमाने, त्रि । यथा, कथासरित्सागरे ।
७४ । ७८ ।
'रोचमानै समायुक्तपुष्पामलयजदामभि ।
गन्धमङ्गलसम्पूर्तिपयसिक्तैरिव भूषितम् ।")
रोचि, [स्] स्त्री, (रोचतेऽनयेति । रुच् +
बाहुलकात् इसिन् । इत्युज्ज्वल । २ । १२२ ।)
प्रभा । इत्यमर ॥ (यथा माघे । १ । २१ ।
'रथाङ्गपाणे पटलेन रोचिषा
मृषीत्विष सवलिता विरेजिरे ।")
रोचिष्णु, त्रि, (रोचते तच्छील । रुच + "अल
कृञ्निराकृञिति ।" ३ । २ । १३६ । इति
इष्णुच ।) अलङ्कारादिना दीप्तिशील । तत्
पर्याय । विभ्राट् २ भ्राजिष्णु ३ । इत्यमर ॥
(यथा कथासरित्सागरे । ६४ । ८ ।
"तत्र शूकरदन्ताग्नि भिन्दन् शार्ङ्गनिरन्तरम् ।
श्यामलाम्बरराशिपाण्डुलक्ष्मीव रात्रि करे ॥"
रोचक । यथा सुश्रुते । १ । ४५ । मद्यवर्गे ।
"सुगन्धि दीपन हृद्य रोचिष्णु क्रमिनाशनम् ॥")
रोची स्त्री, (रोचते इति । रुच + इन् । वा
ङीप् ।) हिलमोचिका । इति शब्दरत्नावली ॥
रोची [न्] त्रि, (रोचते इति । रुच + णिनि ।)
रोचिष्णु । इति हेमचन्द्र ॥
रोच्य त्रि (रुच + ण्य । "यजयाचरुचप्रवच
र्चश्च ।" ७ । ३ । ६६ । इति कत्वादेशो न ।)
प्रकाश्यम् । प्रीतिविषय । रुचधातो कर्म्मणि
यत्प्रत्ययेन निष्पन्नोऽयम् ॥
रोट्, [ऋ] त्रि, (रुट + "अन्येभ्योऽपि दृश्यन्ते ।"
३ । २ । ७५ । इति विच ।) त्रिम । वधक ।
रोचतीति विच गुण । इति मुग्धबोधटीकायां
दुर्गादास ॥
रोटिका, स्त्री पिष्टकविशेष । रोटी इति रुटी
इति च भाषा । तत्करणप्रकारमाह ।

"सुक्षामायमवचन किञ्चित् पुरायतोयितम् ।
तमके खर्पर्येन कृत्वा मृदौऽङ्गारोपितेन्धनम् ।
विद्वेषा रोटिका प्रोक्ता गुणास्तस्या प्रचक्ष्यते ।
रोटिका बलकृद्रुच्या इहणी धातुवर्द्धिनी ।
वातघ्नी कफकृद्गुर्व्वी दीप्ताग्नीनां प्रपूजिता ।"
अथ मोटी ।
"सुखरोपूपसम्पूर्णं सम्पुटमाद विमर्दयेत् ।
विधाय चक्राकारं निर्मितां मृदौ पचेत् ।
अङ्गारकर्कटी सौम्या इहणी शुक्रला लघु ।
दीपनी कफकृत्वक्ता पीनसश्वासकासजित् ।"
अथ यवरोटिका ।
यवजा रोटिका रुच्या मधुरा विशदा लघु ।
मलशुक्रानिलकरी बल्या रुचिकफापहा ।
पीनसश्वासकासघ्नी मेदोरोगहरा भवेत् ।"
अथ माषरोटिका ।
"पूर्व्वं पक्तुं स्वमाषाणां पचन्ती शालिभिर्ध्रुवम् ।
चणकौरचिता राडी कथ्यते रजनीप्रिया ।
स्वेदिता वालका कथा दीप्ताग्नीनां प्रपूजिता
मायाशां लवणक्षीरे स्थापिता व्यञ्जनपुरा
ज्वालयेऽपि पोलिका यस्ते पिष्टाक्ता धूमको ज्वला
धूमसौरभिता सैव प्रोक्ता भास्वरिका बुधै ।
भास्वरिकाख्यान समुरिका इति पुस्ति
इति वा पाठ ।
"भर्म्मरी कफपित्तघ्नी किञ्चित् वातकरी मता
अथ चणकरोटिका ।
"चाणक्या रोटिका रुच्या ग्रैष्मपित्तकफप्रणुत्
विष्टम्भिनी न चक्षुष्या तद्गुणा निष्पनुषी
इति भावप्रकाश

रोड ऋ अनादरे । इति कविकल्पद्रुम ॥ (भ्वा
पर सक सेट ।) ऋ, अररोडत् । इति
दुर्गादास ॥
रोदस्, [स्] क्ली (रुद + असुन् ।) स्वर्ग । भूमि ।
इति मेदिनी । से, ११ । (यथा, ऋग्वेदे ।
२२ । ५ ।
"इत इतोऽसि रोदसीविश्वपत्नी धावसु ।"
रोदन, क्ली, (रुद + ल्युट् ।) क्रन्दनम् । (य
चाणक्यशतक । ६२ ।
"दुर्ब्बलस्य बलं राजा बालानां रोदनं बलम्
बलं मूर्खस्य मौनित्वं चौराणामनृतं बलम्
अश्रु । इति मेदिनी । न, ११९ । तस्य शुभा
यथा —
"यावत् चिरसम्भाषितं सुभगं इवाम ।
प्रसुवोऽशु दीर्घं रुदन्त शान्ति न सुखावहम्
इति गारुडे ९९ अध्याय
कपिलाधिमूर्धा नेत्राम्बुना रहस्यो का
यथा,—
"दुष्टे तुषि मत दृष्ट्वा रुदति करिका चन्द्र
इत्युपक्रम्य ।
"तन्मुखिन्द्रूता सर्व्वं रसवती नभूत च ।"
रोदनादुपलक्षेन ममार्थं मरणं स्यात । यथा —
'म्रानिनी मा रुदन्वैव मा रोदी तुष्य माम्
तम् ।

रोदनाश्रुप्रपतनान्मृतानां नरकं ध्रुवम् ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे १७ अध्यायः ॥
मृतमुद्दिश्य रोदननिषेधो यथा,—
"श्लेष्माश्रु बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः ।
अतो न रोदितव्यं हि क्रियाः कार्य्याः विधानतः ॥"
इति शुद्धितत्त्वम् ॥

रोदनिका, स्त्री, (रोदनं अश्रु मार्ज्जनेनास्त्यस्येति । रोदन+ठन् ।) यवासः । इति राजनिर्घण्टः ॥ (विवृतोऽस्य यवासशब्दे ज्ञातव्यः ॥)

रोदसी, स्त्री (रुद्यतेऽनयेति । रुद्+करणे ल्युट् । ङीप् ।) दुरालभा । इत्यमरः । २ । ४ । ९९ ॥

रोदसी, स्त्री, (रोदस्+गौरादित्वात् ङीष् ।) स्वर्गः । भूमिः । इत्यमरः । ३ । ३ । २२८ ॥

रोदसी, च, स्वः । भूमिः । यथा,—
"द्यावापृथिव्यौ रोदस्यौ रोदसी रोदसीति च ॥"
इति भरतधृतकोषः ॥

रोदस्यौ, स्त्री, भूमिस्वर्गौ । यथा,—
"प्रकरणादपि भूद्यावौ रोदस्यौ रोदसी च ते ॥"
इत्यमरः । ३ । ३ । २२८ ॥
"भूर्भूमिः द्यौराकाशं एते संहिते विग्रहीते च रोदसीरोदःशब्दयोर्वाच्ये इति भूद्यावौ पदाः मध्येते एतेन ईदन्तधातुशब्दद्वयेन एकवचनान्तेनापि भूद्यावौ समाहृते उच्येते ।
'रोदश्च रोदसी चापि दिवि भूमौ पृथक् पृथक् ।
सह प्रयोगेऽप्यनयो रोदः स्यादपि रोदसी ॥
इति विश्वः ॥
'रोदसी रोदसा साकं द्यावीखर्गौ निव स्थितौ ।
इत्यजयः ।
रोदसीत्यव्ययमप्यस्ति । यथा । द्यावापृथिव्यौ रोदस्यौ रोदसी रोदसीति चेति ।" इति तट्टीकायां भरतः ॥

रोधः, पुं (रुणद्धि जलमिति । रुध+पचाद्यच् ।) नदीतीरम् । इत्यमरटीकायां भरतः ।१।१ ।७।
(रुध+घञ् । रोधनम् । यथा मार्कण्डेये । ६३ । १ ।
"अथ वैवस्वते जातो ऽमन्वन्तरात् सप्तमे ।
समतीते गतो रोध नियामे स्वल्पवान् पुरा ॥")

रोधः, [स्] क्ली (रुणद्धि वार्य्यादिकमिति । रुध+"सर्व्वधातुभ्योऽसुन् ।" उणा ४ । १ ८८ । इति असुन् ।) नदीतीरम् । इत्यमरः ।१ । १ ।७ ।
(यथा, रघुः । ५ । ४२ ।
"स नर्म्मदारोधसि सीकरार्द्रै
र्मरुद्भिरानर्त्तितनक्तमाले ।
निवेशयामास विलङ्घिताध्वा
क्लान्तं रजोधूसरकेतु सैन्यम् ॥")

रोधनं, त्रि, (रुणद्धीति । रुध+ल्यु ।) रोधकर्त्ता । (रुध+भावे ल्युट् ।) रोधे, क्ली । इति व्याकरणम् ॥ (यथा, भागवते । ३ । ३ । २७ ।
"पातन गिरिभङ्गेभ्यो रोधनं चाम्बुगर्त्तयोः ॥")

रोधवक्रा, स्त्री, (रोधेन वक्रा ।) नदी । यथा । निम्नगा रोधवक्रा च स्रवन्ती निम्नगापगा नदीपर्य्याये भागुरिः । इति भरतः ॥

रोधोवक्रा, स्त्री, (रोधसा वक्रा ।) नदी । इति त्रिकाण्डशेषः ॥

रोधोवती, स्त्री, (रोधोऽस्त्यस्या इति । रोधस्+मतुप् । ङीप् ।) नदी । इति राजनिर्घण्टः ॥

रोध्र, क्ली, (रुध्यतेऽनेन । रुध+बाहुलकात् रन् ।) अपराधः । पापम् । इति मेदिनी । रे ८१ ॥

रोध्र, पुं, लोध्र । इति मेदिनी राजनिर्घण्टश्च ॥
(यथा, सुश्रुते । १ । १९ ।
"मधूच्छिष्टं समधुकं रोध्रं सर्ज्जरसं तथा ।
मञ्जिष्ठां चन्दनं मूर्व्वां पिष्ट्वा सर्पिर्व्विपाचयेत् ॥")

रोध्रपुष्प, पुं (रोध्रस्येव पुष्पमस्य ।) मधूकवृक्ष । इति राजनिर्घण्टः ॥ (मण्डलिसर्पजाति विशेषः । तद्यथा । आदर्शमण्डल श्वेतमण्डलो रक्तमण्डलश्चित्रमण्डल एवतो रोध्रपुष्पो मिलिन्दको गोनस इत्यादिः ।" इति सुश्रुते कल्पस्थाने चतुर्थेऽध्याये ॥)

रोध्रपुष्पिणी, स्त्री, (रोध्र इव पुष्पातीति । पुष्प+णिनि । ङीप् ।) धातकीवृक्ष । इति राजनिर्घण्टः ॥

रोप, पुं, (रुप्यतेऽनेनेति । रुप विमोहे+घञ् ।) बाण । इत्यमरः ॥ (रुह+णिच्+घञ् ।) रोपणम् । इति मेदिनी । पे, २ ॥ (यथा महाभारते । १३ । ५८ । २४ ।
"एता जातास्तु वृक्षाणां तेषां रोपे गुणास्त्विमे ।")
छिद्रे क्ली । इति हेमचन्द्रः ॥

रोपण, क्ली विमोहनम् । रुपधातोर्भावेऽनटप्रत्ययेन निष्पन्नम् ॥ जननम् । प्रादुर्भावः । ण्यन्त रुहधातोः पकारादेशे अनटप्रत्ययेन निष्पन्नम् । इति व्याकरणम् ॥ (यथा, सुश्रुते । १ । १५ ।
"सन्धिसंश्लेषसंहननरोपणपूरणबलस्थैर्य्यकृच्छ्लेष्मा पञ्चधा प्रविभक्त उदककर्म्मणानुग्रहं करोति ॥")
अञ्जनविशेष । यथा,—
"रोपण रसक पिष्ट्वा सम्यक् सन्नाय वारिणा ।
पश्चीयात्तण्डुल सर्व्वं क्षणेन मधोगतम् ॥
शुष्कञ्च तण्डुल सर्व्वं पर्पटीसन्निभ भवत ।
विचूर्ण्य भावयेत् सम्यक् त्रिवेल त्रिफलारसे ॥
कर्पूरस्य रसभाव दशमांशेन निक्षिपत् ।
अञ्जयेन्नयने तेन मेघाखिलगण्डिकृद् ॥"
इति भावप्रकाशः ॥
(त्रि रोपक । यथा सुश्रुते । ४ । १८ ।
"क्षेहनात् त्रिगुणो धार्य्यः पुटपाकस्तु रोपण ।"
व्रणरोगे मांसाङ्कुरजननव्यापारक्रियादिकम् । तद्यथा —
"आदौ विम्लापन कुर्य्याद्द्वितीयमवसेचनम् ।
तृतीयमुपनाहञ्च चतुर्थीं पाटनक्रियाम् ॥
पञ्चम शोधनञ्चैव षष्ठ रोपणमिष्यते ।
एते क्रमा व्रणस्योक्ता सप्तमो वै स्तायच ॥
निम्नप्रशमने कल्को मधुना चतशोधन ।
रोपण सर्पिषा युक्तो यवकल्कोऽप्यथ विधि ॥"
इति वैद्यकचक्रपाणिसंग्रहे व्रणशोथाधिकारे ॥)

रोपणचूर्णं, क्ली, (रोपणस्य चूर्णम् ।) नयनाञ्जन विशेष । यथा, भावप्रकाशे ।
अथ रोपणचूर्णम् ।
"शिलायां रसक पिष्ट्वा सम्यगाप्लाव्य वारिणा ।
गृह्णीयात् तण्डुल सर्व्वं क्षणेनमध्यागतम् ॥
शुष्क तच्च जल सर्व्वं पर्पटीसन्निभ भवेत् ।
विचूर्ण्य भावयेत् सम्यक् त्रिवेल त्रिफलारसे ॥
कर्पूरस्य रजस्तत्र दशमांशेन निक्षिपेत् ।
अञ्जयेन्नयन तेन सर्व्वदोषोपशान्तये ॥
समस्तानेत्ररोगघ्न चूर्णमेतन्न संशय ॥"

रोपणीवर्त्ति, स्त्री, नेत्राञ्जनभेदः । यथा । अथ रोपणीवर्त्तिः ।
'अशीतिस्तिलपुष्पाणि षष्टि पिप्पलितण्डुला ।
जातीपुष्पाणि पञ्चाशन्मरिचानि च षोडश ।
एषा पिष्टाम्बुना वर्त्ति हन्ता कुसुमिकाभिधा ।
तिमिराञ्जुनशुक्राद्या नाशिनी मांसवर्द्धिनुत ।
एतस्या अञ्जने प्रोक्ता मात्रा गण्डेह रेणुका ॥'
कुसुमिकावर्त्ती रोपणी । इति भावप्रकाशः ॥

रोप्यातिरोप्य पुं धान्यविशेष । अस्य गुणा ।
"रोप्यातिरोप्या लघवः शीघ्रपाका गुणोत्तरा ।
अदाहिनो दोषहरा बल्या मूत्रविवर्द्धना ॥"
इति राजवल्लभः ॥

रोम क्ली जलम् । इति शब्दचन्द्रिका ॥ (लोम । यथा, महाभारते । १ । ११९ । ३ ।
"द्वौ चास्य पिकावधरौ च कर्णा
वन्तरामौ समगोदरौ च ॥"
जनपदविशेष । इति केचित् ॥)

रोम [न्] क्ली, (रौतीति । रु+"नामन् सीमन्व्योमन्रोमन्निति ।' उणा ४ । १५ । इति मनिन्प्रत्ययेन साधु ।) शरीरस्थाताङ्कुर । रोयां इति भाषा । तत्पर्य्याय । लोम २ अङ्गजम् ३ त्वगजम् ४ चर्म्मजम् ५ तनरुहम् ६ । इति राजनिर्घण्टः ॥ स्थानविशेषे तस्य शुभाशुभसूचकत्व यथा,—
"अल्परोमयुता श्रेष्ठा अश्वा हस्तिकरोपमा ।
रोमैकैकं कूपके स्यान्नृपाणाञ्च महात्मनाम् ॥
द्वे द्वे रोमे पण्डितानां श्रोत्रियाणान्तथैव च ।
रोमत्रयं दरिद्राणां रोगी निर्मांसजानुकः ॥"
इति गारुडे ६२ अध्यायः ॥
रक्तरोम्णोऽपवित्रत्व यथा,—
"न सपर्वत्ते क्रीडेत स्त्रानि स्रानि न मद्यपेत् ।
रोमाणि च रहस्यानि नाशिष्टेन सह व्रजेत् ॥'
इति कौर्म्मे उपविभागे १५ अध्यायः ॥
(जनपदविशेष । तद्देशवासिनि । पु भूम्नि । यथा महाभारते । ६ । ९ । ५५ ।
"वानायवो दशा पार्श्वा रोमाणः कुशबिन्दवः ॥)

रोमक, क्ली, (रोमे कायतीति । कै+क ।) पांशुलवणम् । (यथा, सुश्रुते । १ । ४२ ।
"सैन्धवसौवर्च्चलबिडपाक्यरोमकसामुद्रकपक्तिम यवक्षारोषरप्रसूतसुवर्च्चिकाप्रभृतीनि समासेन लवणो वर्ग ॥") अयस्कान्तः । इति राजनिर्घण्टः ॥ (रोमैव । जनपदविशेष । तद्देशवासिनि पुंभूम्नि । यथा, महाभारते । २ । ५१ । ५ ।
"औष्णीकानन्तवासांश्च रोमकान् पुरुषादकान् ॥")

रोमकन्द पुं, (रोमयुक्तः कन्दो मूलमस्य ।) पिण्डालुः । इति राजनिर्घण्टः ॥

रोमकपत्तन स्त्री, (रोमक पत्तनमिति कर्म्मधारयः ।) देशविशेषः । रूम इति पारस्य भाषा । यथा,—

"लङ्काकुमध्ये यमकोटिरस्याः
प्राक् पश्चिमे रोमकपत्तनञ्च ।
अधस्ततः सिद्धपुरं सुमेरुः
सौम्येऽथ याम्ये वड़वानलश्च ।
कुवृत्तपादान्तरितानि तानि
स्थानानि षड़ गोलविदो वदन्ति ॥"

इति सिद्धान्तशिरोमणौ गोलाध्यायः ॥

रोमकूप पुं, (रोम्णां कूपः ।) लोमविवरम् । यथा,—
"प्रजापतिस्ततस्तासां ददौ मत्वा समस्तशुभम् ।
समस्तरोमकूपेषु निवसन्तीन्दिवाकरः ॥'
इति मार्कण्डेयपुराणे देवीमाहात्म्यम् ॥
(तथा च ।
"ऊर्द्ध्वं वाताधिकश्वासैर्मेढ्योर्निगुल्फरधः ।
कुपितं रोमकूपेषु समस्तेषूत्प्रवर्त्तते ॥"
इति वाभटे निदानस्थाने तृतीयेऽध्याये ॥)

रोमकेशर स्त्री (रोम्णां केशरमिव ।) चामरम् । इति त्रिकाण्डशेषः ॥

रोमगुच्छ पुं, (रोम्णां गुच्छस्तवकः ।) चामरम् । इति हेमचन्द्रः ।३।३८१। हारावली च ।१७३।

रोमगुच्छक, पुं, (रोमगुच्छ एव । स्वार्थे कन् ।) चामरम् । इति जटाधरः ॥

रोमन्थ पुं, उद्गीर्य्य चर्व्वणम् । इत्यमरः ॥ जावोर काटा इति भाषा ॥ (यथा, रघुः । १ । ५२ ।
"लग्नैर्विरतरोमन्थमुटजाङ्गनभूमिषु ॥")

रोमभूमि, स्त्री, (रोम्णां भूमिरिव ।) चर्म्म । इति राजनिर्घण्टः ॥

रोमलता स्त्री (रोम्णां लतेव ।) लोमावलिः । इति हेमचन्द्रः । ३ । २७ ॥

रोमवान्, [त्] त्रि, लोमविशिष्टः । रोमशब्दात् इदर्थे मतुपप्रत्ययेन निष्पन्नः ॥

रोमविकार पुं, (रोम्णां विकारः ।) रोमाञ्चः । इति हलायुधः ॥

रोमश, पुं (रोमाणि सन्त्यस्येति । रोमन् + "लोमादिपामादिपिच्छादिभ्यः शनेलचः ।" ५ । २ । १०० । इति शः ।) मेषः । इति हेमचन्द्रः । पिण्डालुः । कुम्भी । शूकरः । इति राजनिर्घण्टः ॥ (ऋषिविशेषः । यथा, भागवते । ६ । २५ । १९ ।
"रोमशश्च्यवनो दत्त आसुरिः सपतञ्जलिः ॥"
अस्य शरीरैकलोमपतने एकेन्द्रपातो भवेत् एवं सर्व्वलोमपतनकालस्तस्य परमायुः । एतादृशो ऽप्यसौ कौशानि वा क्रियन्ति न्यातीति चिन्त यन् निरस्तु उटज न निर्म्मिमे केवलं वर्षासु धारापातनिवृत्तये मस्तकविन्यस्तकटातपत्रः ऽभवत् । विशेषविवरणमस्य ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे द्रष्टव्यम् । क्ली, उपस्थम् । यथा, ऋग्वेदे । १ । ८६ । १६ ।
"सेदीशे यस्य रोमशं निषेदुषो
विजृम्भते विश्वस्मादिन्द्र उत्तरः ।"
"निषेदुषः शयानस्य रोमशमुपस्थं विजृम्भते विवृतं भवति ।' इति तद्भाष्ये सायणः ।)
अतिशयलोमविशिष्टे, त्रि । (यथा मनुः ।३।७।
"नीलक्रियं निष्पुरुषं निश्छन्दो रोमशार्शसम् ।')

रोमशफल पुं, (रोमशं फलमस्य । टिण्डिशः । इति राजनिर्घण्टः ॥

रोमशा स्त्री, (रोमाणि सन्त्यस्या इति । रोमन् + शः । टाप् ।) इर्व्वारुः । इति राजनिर्घण्टः । लोमशा च ॥ (बृहस्पतिकन्या । यथा, ऋग्वेदे । १ । १२६ । ७ ।
"सर्व्वाहमस्मि रोमशा गन्धारीणामिवाविका ।")

रोमशूक, क्ली, (रोमयुक्तं शूकं यस्य ।) स्थौणेयकम् । इति भावप्रकाशः ॥

रोमहर्ष पुं, (रोम्णां हर्षः ।) रोमाञ्चः । इति हलायुधः ॥ (यथा, गीतायाम् । १ । २९ ।
"वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥")

रोमहर्षण, क्ली, (रोम्णां हर्षणम् ।) रोमाञ्चः । इत्यमरः ॥ (रोम्णां हर्षणं यस्मात् । रोमाञ्चकरे, त्रि । यथा गीतायाम् । १८ । ७४ ।
"संवादमिममश्रौषमद्भुतं लोमहर्षणम् ॥")

रोमहर्षण, पुं, सूतः । अस्य व्युत्पत्तिर्यथा,—
"अस्य ते सर्व्वरोमाणि वचसा हर्षितानि यत् ।
द्वैपायनस्य भगवंस्ततो वै रोमहर्षणः ।
भवन्तमेव भगवान् व्याजहार स्वयं प्रभुः ॥"
इति कौर्म्मे १ अध्यायः ।
(स तु व्यासशिष्यः । यथा, भागवते । १ । ७८ । २२ ।
"सोऽर्च्चितः सपरीवारः कृतासनपरिग्रहः ।
रोमहर्षणमासीनं महर्षेः शिष्यमैक्षत ॥"
अस्यान्यद्विवरणं लोमहर्षणशब्दे द्रष्टव्यम् ।)
विभीतकवृक्षः । इति मेदिनी । णे, ११६ ॥

रोमाञ्च, पुं, (रोम्णां अञ्चः उद्गमः ।) रोमहर्षणम् । इत्यमरः ॥ पुलककण्टकरोमविक्रिया रोमोद्गमरोमहर्षणानि । इति भरतः ॥ (स तु सात्त्विकभावविशेषः । यथा, साहित्यदर्पणे । ३ । १६१ ।
"स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः ।
वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विकाः स्मृताः ॥"
"हर्षाद्भुतभयादिभ्यो रोमाञ्चो रोमविक्रिया ॥")

रोमाञ्चिका, स्त्री, (रोमाञ्च उत्पादकत्वेनास्त्यस्या इति । रोमाञ्च + ठन् ।) रक्तलीक्षुपः । इति राजनिर्घण्टः ॥

रोमाञ्चित, त्रि (रोमाञ्चः सञ्जातोऽस्येति । रोमाञ्च + "तदस्य सञ्जातं तारकादिभ्य इतच् ।" ५ । २ । ३६ । इति इतच् ।) जातपुलकः । रोमाञ्चविशिष्टः । तत्पर्य्यायः । हृष्टरोमा २ । इति त्रिकाण्डशेषः ॥ (यथा, मार्कण्डेये । १० । २ ।
"स च शान्तिमते वह्नौ परितुष्टेन चेतसा ।
हर्षरोमाञ्चितवपुः प्रविवेशाश्रमं गुरोः ॥")

रोमाली, स्त्री, (रोम्णां आली श्रेणिरिव ।) नवयष्टिः । इति शब्दमाला ॥ (रोम्णां आली ।) रोमावली । (यथा आर्य्यासप्तशत्याम् । ४६८ ।
"निधिनि क्षेपस्थानस्योपरि विन्यस्तमिव
लता विहिता ।
लोभयति तव तदुदरि जघनतटाद्युपरि
रोमाली ॥")

रोमालुः, पुं, (रोमविशिष्ट आलुः ।) पिण्डालुः । इति राजनिर्घण्टः ॥

रोमालुविटपी, [न्] पुं, (रोमालुरिव विटपी वृक्षः ।) कुम्भीवृक्षः । इति राजनिर्घण्टः ॥

रोमावली, स्त्री, (रोम्णामावली ।) नाभेरूर्द्ध्वे लोमश्रेणी । तत्पर्य्यायः । रोमलता २ । इति हेमचन्द्रः । ३ । २७ । रोमाली ३ । इति शब्दमाला । लोमराजी ४ । यथा,—
"तस्याः प्रविष्टा नतनाभिरन्ध्रं
रराज तन्वी नवलोमराजी ।
नीवीमतिक्रम्य सितेतरस्य
तन्मेखलामध्यमणेरिवार्च्चिः ॥"
इति कुमारसम्भवम् ।
सा च यौवनारम्भे भवति । अस्या वर्णना यथा,—
"नीरान्नीरसुधागता मधुकरी वीचि स्फुर
श्रेणी
मोहे ऽयमिदं विशालमिति मातुः कर
त्यक्ता ।
शैवालाङ्कुरशङ्कया प्रसितुं रोमावलीं
भीरुति
आकाशीति सदु अरमीमविन्नतयोर्ऽभरा
पृच्छति ॥"
इति रसमञ्जरी ।

रोमाश्रयफला स्त्री, (रोमाश्रयं फलमस्याः ।) भिण्डितिक्तालुपः । इति राजनिर्घण्टः ॥

रोमोद्गम पुं (रोम्णामुद्गमः ।) रोमाञ्चः । इति हलायुधः । (यथा, कुमारे । ७ । ७७ ।
"रोमोद्गमः प्रादुरभूदुमायाः
स्विन्नाङ्गुलिः पुङ्गवकेतुरासीत् ।
वृत्तिस्तयोः पाणिसमागमेन
समं विभक्तेव मनोभवस्य ॥")

रोमोद्भेद, पुं, (रोम्णामुद्भेदः ।) रोमाञ्चः । इति त्रिकाण्डशेषः । (यथा, प्रबोधचन्द्रोदये । १ अङ्के ।
"स्फुरद्रोमोद्भेदस्तरलतरताराकुलदृशो
भयोल्लासोत्फुल्लस्तनकुचभराबद्धसुभगम् ॥")

रौक्ष, पुं मार्गीयामलकम् । इति शब्दचन्द्रिका । (पार्व्वतीयामलकशब्देऽस्य गुणादयोऽभिहिताः ॥)

रोलम्ब, पुं (रौतीति । रु + क्विप् । रौ कूजन् सन् लम्बते आकाशात् आधारात् लम्बतीति । लम्ब + अच् ।) भ्रमरः । इति त्रिकाण्डशेषः ॥

(यथा, वक्रोक्तिपञ्चाशिकायाम् । ४० ।
"सद्ये हरनयनाग्निना गमयति कुन्तलि
रोलम्बाः श्रुतसुमनोशविधौ यत्ना सुरेति
कोलाहलम् ।
कथम् ॥")

रोष, पुं, (रुष + घञ् ।) क्रोध । इत्यमरः ॥ (यथा, आर्य्यासप्तशत्याम् । ४४८ ।
'गुणयसि किं मानवती उपशायादृदितमश्रु
रोषभर पयसापि मानवेन च रोष उच्यते
चरति ।'

रोषक, पुं (रोषति सम्मील । रुष + "कुष
यति ।")
मस्कारेभ्यश ।" ४ । २ । १५१ । इति बुन् ।)
पारद । हेमपक्कौषध । इति मेदिनी । भे,
७१ ॥ अवरभूमि । क्रोधने, त्रि । इति हेम
चन्द्र ॥ (यथा, मार्कण्डेये । २१० । १० ।
'न चक्र कोपयोलस्य मार्कण्डाग्नौपि रोषण ।
नाम प्रख्याय यामापि कोपनाश्रितैव
साम् ॥'")

रोह, पुं (रोहतीति । रुह् + घञ् ।) अङ्कुर ।
इति हेमचन्द्र ॥ (यथा, महाभारते । १२ ।
१९ । ४८ ।
"क्वचित् कोके वहतैःस्माच्छतिलो
श्रोत्रपेक्ष रोहयाङ्ययेमित ।
आपयथौ विद्युतो सविशाल्य
मध्यादध्य मावमन्येत विनम् ॥"
रोहणीये, त्रि । यथा वाजसनेयसंहिता
याम् । २९ । ११ ।
'तेन रोहमायमुपमेध्याय ।'
रोह रोहणीय ससाम् ।' इति महीधर ।)

रोहक पुं (रुह् + ण्वुल् ।) प्रेतभेद । आरोहि
त्रि । इति मेदिनी । के, १४८ ॥ (यथा महा
भारते । ८ । १४ । १२ ।
विनोदानीमनुमति कुरु राजाच सदनाम् ।
योजापि चक्रपाहाता रोहकोशव कवट
काम् ॥")

रोहणं, क्ली (रोहयनेति । रुह + करणे
ल्युट् ।) मुक्तम् । इति राजनिघण्ट ॥ अङ्कु
प्रादुर्भाव । इति शब्दरत्नावलीकटपक्षयेन
विषमम् ॥

रोहण पुं (रोहत्यानेनेति । रुह + कर्त्तरि
करणे ल्युट् ।) पर्व्वतविशेष । तत्पर्य्याय ।
विदूराद्रि २ । इति जटाधर ॥ (यथा,
राजतरङ्गिण्याम् । १२ ।
"अपारपुलिनस्थानीयाद्रि हिमालये माधवे
निशामणिकटीमते इरश्रिरोहणि रोहणे ।
महश्यामरभूधरे महनकल्दरे मल्दरे
अभ्यात न पतन्यमो परिचितास्तु मनोभवैः ॥")

रोहन्त पुं (रुहतीति । रुह + "रुहिनन्दि
जीविप्राणिभ्य सिदाशिषि ।" उणा ३ ।
१२७ । इति झच् ।) वृक्षभेद । इत्युणादि

कोष ॥ इत्यमाद्यः । इति संक्षिप्तसारोणा
दिवृत्ति ॥

रोहन्ती पुं (रुह + झच् । स्त्रियाम् डीप् ।)
लतामेद । इत्युणादिकोष ॥ लतामात्रम् ।
इति संक्षिप्तसारोणादिवृत्ति ॥

रोहि, पुं, (रोहतीति । रुह + "इन्पिधि
वहीति ।" उणा ४ । ११८ । इति इन् ।)
बीजम् । वृक्ष । इत्युणादिकोष ॥ धार्म्मिक ।
इति सिद्धान्तकौमुद्यामुणादिवृत्ति ॥

रोहिण, क्ली (रुह + "रुहेश्च ।" उणा ३ ।
५५ । इति इनन् ।) कालभेद । इत्युणादि
कोष ॥ स तु दिवसीयनवममुहूर्त्त । पूर्व्वाह्ण
काष्ठस्य मौहूर्त्तकालभेदावधि । अपराह्ण
काष्ठस्य पूर्व्वावधि । एकोद्दिष्टश्राद्धस्य समा
पनकाल । रौहिणस्य नामान्तरम् । यथा,
"अत्र पूर्व्वोक्तं श्राद्धमभिधाय रौहिणन्तु न
लङ्घयेदित्यभिधानेन पूर्व्वाह्णश्राद्धस्य सङ्गवात्
परो रौहिणपर्य्यन्तगौणपूर्व्वाह्णकाल मन्यते
तेन रौहिणं पूर्व्वाह्णश्राद्धस्य गौणकालावधि
ततावधि अपराह्णश्राद्धस्य पूर्व्वावधिरित्यव
गम्यते । रौहिणन्तु दिवसस्य नवममुहूर्त्त ।
तस्य ज्योतिषोक्तरोहिण्यधिदैवतत्वात् रौहिणम्
मिति । आह ।
आरभ्य कुतपे श्राद्धं कुर्य्यादारौहिणं बुध ।
विधिज्ञो विधिमास्थाय रौहिणन्तु न लङ्घयेत् ॥
इति श्राद्धतत्त्वम् ॥

रोहित, पुं (रोहतीति । रुह + "रुहेश्च । उणा
३ । ९५ । इति इतन् ।) मृगभेद । वटवृक्ष ।
रोहितकवृक्ष । इति राजनिघण्ट ॥ (शाल्मल
द्वीपस्थपर्व्वतविशेष । यथा मात्स्ये । १२२ । ८६ ।
"रोहितो यस्तृतीयस्तु रोहिणो नाम विश्रुत ॥")

रोहिणि, स्त्री रोहिणीगणयम् । इति शब्द
रत्नावली ॥ (यथा, हनूमत्संहितायाम् । ६ । ७।८ ।
'चारचन्द्रमरोहिणि
श्यामकामदमरसयोना ।
यमशुचि कुसुममता
सम्मानित दिशि दारं ॥")

रोहिणिका स्त्री, (रोहिण्येव स्वार्थे कन् । टाप्
इत्यञ्च ।) कोपादिना रक्तवर्णा स्त्री । इति
जटाधर ॥

रोहिणी स्त्री (रुह + इनन् । गौरादित्वात्
ङीष् ।) स्त्रीगवी । इत्यमरः ॥ (यथा, माघ ।
१२ । ४ ।
"प्रोषा नियुक्तामिवतो सवत्सया
नियम्य पारोगुभयेव गाश्रुतो ।
अहिंसुपारोच्छित रोहिणी पय
श्चिद निरध्यो दुग्ध स गोदुह ॥")
तत्त्विन । कटुम्भरा । (यथास्या पर्य्याय ।
'कटी तु कटुका तिक्ता कृष्णमेदा कटुम्भरा ।
अशोका मत्स्यशकला चक्राङ्गी शकुलादनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
सोमवल्क । (यथास्या पर्य्यायो रत्नमालायाम् ।

"कटफल सोमवल्काख्य सोमवृक्षच रोहिणी ॥"
महाश्वेता । तत्पर्य्यायो यथा,—
"कटभी किणिही श्वेता महाश्वेता च रोहिणी ॥"
इति वैद्यकरत्नमालायाम् ॥)
लोहिता । इति मेदिनी । णी, १७ ॥ विद्युत् ।
त्रिगरावीविशेष । इति हेमचन्द्र ॥ कामरी ।
हरीतकी । मञ्जिष्ठा । इति राजनिघण्ट ॥
कपिलवर्णा वर्तुलाकारा विरेचन प्रशस्ता हरी
तकी । इति रायमुकुट ॥ ॥ वलदेवमाता ।
सा वसुदेवभार्य्या कश्यपस्योरसस्यमाता ।
यथा,—
"अथको रोहिणी धीरे वसुदेवस्य धीमत ।
रोहिण्या इरभिः श्री चाहिर्गहरिकी प्रजा ॥"
इति महाभारते हरिवंशे ॥ ॥
सुरभिकन्या । यथा,—
श्रीमार्कण्डेय उवाच ।
"अथ तदा मानुष सुरभिर्नाम गामन ।
अर्वा माता महाभागाना सर्व्वलोकोपकारिणी ॥
तस्यास्तु तनया ज्ञेया कश्यपात् प्रजापते ।
नाम्ना या रोहिणी शुभ्रा सर्व्वकामदुधा
शुभाम् ॥
तस्यां यमी भूरसेनाहसोरिति यथोक्ततत् ।
कामधेनुरिति ख्याता सर्व्वलक्षणसंयुता ॥"
इति कालिकापुराणे द्विसाध्याय ॥ ॥
नववर्षीया कन्या । यथा,—
"अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी ।
दशमे कन्यका प्रोक्ता अत ऊर्द्ध्वं रजस्वला ॥"
इत्युद्वाहतत्त्वम् ॥ ॥
(पञ्चवर्षा कुमारी । यथा, देवीभागवते । ३ ।
२६ । ४२ ।
"रोहिणी पञ्चवर्षा च षड्वर्षा कालिका
स्मृता ।'
रोगनाशार्थमासा पूजा कर्त्तव्या । यथा तत्रैव ।
३ । २६ । ४८ ।
"रोहिणी रोगनाशाय पूजयेद्विधिवन्नर ॥"
अस्या पूजामन्त्रो यथा तत्रैव । ३ । २६ । ५९ ।
"रोहयन्ती च बीजानि प्राग्जन्मसञ्चितानि
वै ।
या देवी सर्व्वभूतानां रोहिणी पूजयाम्यहम् ॥"
हिरण्यकशिपुकन्या । यथा, महाभारते ।
१ । ६५ । १९ ।
"कन्या वा रोहिणी नाम हिरण्यकशिपो
सुता ॥" ॥
रोहिणि + अणे ङीप् ।) अश्विन्यादिसप्त
विंशतिनक्षत्रान्तर्गतचतुर्थनक्षत्रम् । तत्पर्य्याय ।
रोहिणि २ । इति शब्दरत्नावली ॥ ब्राह्मी ३ ।
इति हेमचन्द्र ॥ (यथा महाभारते । १ ।
१७६ । १६ ।
"अदृश्यन्त रोहिण्या प्रभया भानुमत्या
शरत्कालतमाशात् हसुगोपर वन्म ॥")
तत्र प्रकाशनि पञ्चतारात्मकम् । तत्रापि

स्वामी दैवता यस्याः । नवमसन्धौ उदिते सति सिंहलस्य यदृच्छितस्याधिकरन्तत्स्य गत भवति । यथा —

"कस्तुकाक्षि । शकुनामती नभो
मध्यमामतवति प्रजापती ।
पश्यसि गजकुम्भपालिप्रिया
नि सता हतुचि । सिहलयत ॥"

इति कालिदासकृतरात्रिशर्म्मनिरूपणम् ॥ * ॥
तत्र जातफलं यथा —

"धर्म्मकार्य्ये कुशलः कुलीनः
सुचारुदेहो विलसत्कलेवरः ।
तारापतेः कुलितालिताशयो
यो रोहिणीजः स धनी च मानी ॥"

इति कोष्ठीप्रदीपः ॥ * ॥

गलरोगविशेषः । यथा । रोहिणीनामककालरोगाणां नामानि संख्याचाह ।
'रोहिणी पञ्चधा प्रोक्ता कण्ठशालूक एव च ।
अधिजिह्वश्च वलयोऽलाससंज्ञ एकवृन्दकः ।
ततो वृन्दः शतघ्नी च गिलायुः कण्ठविद्रधिः ।
गलौघः स्वरघ्नश्च मांसतानस्तथैव च ।
विदारी कण्ठदेशे तु रोगा अष्टादश स्मृताः ॥"
तत्र पञ्चानामपि रोहिणीनां सामान्यसंप्राप्तिमाह ।

'गलेऽनिलः पित्तकफौ च मूर्च्छितौ
प्रदूष्य मांसञ्च तथैव शोणितम् ।
गलोपसंरोधकरैस्तथाङ्कुरै-
र्निहन्त्यसून् व्याधिरियं हि रोहिणी ॥"

अनिलः मूर्च्छितः सन् कफपित्तौ च मूर्च्छितौ पित्तं वा मूर्च्छितं कफो वा मूर्च्छितः । ननु त्रयोऽपि मूर्च्छिताः पृथग्दोषजाया अविवक्षितत्वात् । तस्याः वातजाया लक्षणमाह ।

"जिह्वासमन्तादृभृशवेदनास्तु
मांसाङ्कुराः कण्ठविरोधिनः स्युः ।
सा रोहिणी वातकृता प्रदिष्टा
वातात्मकोपद्रवगाढयुक्ता ॥"

जिह्वासमन्तात् जिह्वायाः सर्व्वतः । वातात्मकोपद्रवगाढयुक्ता स्तम्भादिभिरतिशयेन युक्ता ॥"
पित्तजामाह ।

"क्षिप्रोद्गमा क्षिप्रविदाहपाका
तीव्रज्वरा पित्तनिमित्तजाता ॥"

श्लेष्मजामाह ।

'स्रोतोनिरोधिन्यपि मन्दपाका
गुर्व्वी स्थिरा सा कफसम्भवा तु ॥"

स्रोतोऽत्र कण्ठस्रोतः ॥ * ॥ सन्निपातजामाह ।

"गम्भीरपाकिन्यनिवार्य्यवीर्य्या
त्रिदोषलिङ्गा त्रिभवा भवेत् सा ॥"

रक्तजामाह ।

"स्फोटैश्चिता पित्तसमानलिङ्गा
साध्या प्रदिष्टा रुधिरात्मिका तु ॥"

रक्तभेदरासु हारकत्वावधिमाह ।
"सद्यस्त्रिदोषजा हन्ति त्र्यहात् कफसमुद्भवा ।
पञ्चाहात् पित्तसम्भूता सप्ताहात् पवनोत्थिता ॥"

कण्ठशालूकमाह ।

"कोलास्थिमात्रः कफसम्भवो यो
ग्रन्थिर्गले कण्टकशूकभूतः ।
खरः स्थिरः शस्त्रनिपातसाध्य-
स्तं कण्ठशालूकमिति ब्रुवन्ति ॥"

कण्टकशूकभूत कण्टकवच्छूकवद्वेदनाजनक ॥
अधिजिह्वामाह ।

'जिह्वाग्ररूपः श्वयथुः कफात्तु
जिह्वोपरिष्टादपि रक्तमिश्रात् ।
ज्ञेयोऽधिजिह्वः खलु रोग एष
विवर्ज्जयेदागतपाकमेनम् ॥"

आगतपाकमित्यादैतमन्यत् ॥ * ॥ वलयमाह ।

"बलास एवायतमुन्नतञ्च
शोथं करोत्यन्नगतिं निवार्य्य ।
तं सर्व्वथैवाप्रतिवार्य्यवीर्य्यं
विवर्ज्जनीयं वलयं वदन्ति ॥"

अलासमाह ।

"गले तु शोथं कुरुतः प्रवृद्धौ
श्लेष्मानिलौ श्वासरुजोपपन्नम् ।
मर्म्मच्छिदं दुस्तरमेनमाहु-
र्बलाससंज्ञं भिषजो विकारम् ॥"

मर्म्मच्छिदं मर्म्माणि छिनत्तीव वेदनाजनकम् ॥
एकवृन्दमाह ।

'वृत्तोन्नतोऽन्तः श्वयथुः सदाहः
सकण्डुरोऽपाक्यमृदुर्गुरुश्च ।
नाम्नैकवृन्दः परिकीर्त्तितोऽसौ
व्याधिर्बलासक्षतजप्रसूतः ॥"

अन्तः गलमध्ये । अपाकी ईषत्पाकी । अमृदुः ईषन्मृदुः ॥ * ॥ वृन्दमाह ।

"समुन्नतं वृत्तममन्ददाहं
तीव्रज्वरं वृन्दमुदाहरन्ति ।
तच्चापि पित्तक्षतजप्रकोपा-
द्विद्यात् सतोदं पवनात्मकन्तु ॥" * ॥

शतघ्नीमाह ।

"वर्त्तिर्घना कण्ठनिरोधिनी तु
चितातिमात्रं पिशितप्ररोहैः ।
अनेकरुक् प्राणहरी त्रिदोषा
ज्ञेया शतघ्नीसदृशी शतघ्नी ॥"

घना कठिना । अनेकरुक् वातपित्तकफज तोदादिकनानारुग्युक्ता । शतघ्नीसदृशी लोहकण्टकसंवृता शतघ्नी महती शिला । तत्तुल्या यत प्राणहरी ॥ * ॥ गिलायुमाह ।

"ग्रन्थिर्गले त्वामलकास्थिमात्रः
स्थिरोऽल्परुक् स्यात् कफरक्तमूर्त्तिः ।
संलक्ष्यते सक्तमिवाशनञ्च
स शस्त्रसाध्यस्तु गिलायुसंज्ञः ॥"

गलविद्रधिमाह ।

"सर्व्वं गलं व्याप्य समुत्थितो यः
शोफो रुजः सन्ति च यत्र सर्व्वाः ।
स सर्व्वदोषैर्गलविद्रधिस्तु
तस्यैव तुल्यः खलु सर्व्वजस्य ॥" * ॥

गलौघमाह ।

"शोफो महान् यस्तु गलावरोधी
तीव्रज्वरो वायुगतिनिहन्ता ।
कफेन जातो रुधिरान्वितेन
गले गलौघः परिकीर्त्तितोऽसौ ॥"

वायुगतिनिहन्ता उदानवायुगतिरोधकः ॥ * ॥
स्वरघ्नमाह ।

'यस्ताम्यमानः श्वसिति प्रसक्तं
भिन्नस्वरः शुष्कविमुक्तकण्ठः ।
कफोपदिग्धेष्वनिलायनेषु
ज्ञेयः स रोगः श्वसनात् स्वरघ्नः ॥"

ताम्यमान तमः पश्यन् । शुष्कविमुक्तकण्ठः शुष्को विमुक्तोऽस्वाधीनः कण्ठो यस्य सः । अस्वाधीनता भुक्तं गिलितुं अशक्यत्वात् । अनिलायनेषु वायुवहेषु । श्वसनात् वातात् ॥ * ॥
मांसतानमाह ।

"प्रतानवान् यः श्वयथुः सुकष्टो
गलोपरोधं कुरुते क्रमेण ।
स मांसतानः कथितोऽवलम्बी
प्राणप्रणुत् सर्व्वकृतो विकारः ॥"

प्रतानवान् विस्तारवान् । सुकष्टः अतिशयेन कष्टं यत्र सः ॥ * ॥ विदारीमाह ।

"सदाहतोदं श्वयथुं सुताम्र-
मन्तर्गले पूतिविशीर्णमांसम् ।
पित्तेन विद्याद्वदने विदारीं
पार्श्वे विशेषात् स तु येन शेते ॥"

पार्श्वे विशेषात् स तु येन शेते च पुरुषो येन पार्श्वेन विशेषादाकुलेन शेते तस्मिन् पार्श्वे सा विदारी भवति इत्यर्थः ॥ * ॥ अथ गलरोगाणां चिकित्सा ।
"रोहिणीनान्तु साध्यानां हितं शोणितमोक्षणम् ।
छर्द्दनं धूमपानञ्च गण्डूषो नस्यकर्म्म च ।
वातजान्तु हृते रक्ते लवणैः प्रतिसारयेत् ।
सुखोष्णान् स्नेहकवलान् धारयेच्चाप्यभीक्ष्णशः ।
विस्राव्य पित्तसम्भूतां सिताक्षौद्रप्रियङ्गुभिः ।
पथ्यस्तु कवलो द्राक्षापरूषैः कथितो हितः ।
आगारधूमकटुकैः कफजां प्रतिसारयेत् ।
आगारधूमं झुल इति लोके । कटुकानि शुण्ठीपिप्पलीमरिचानि ।
"श्वेताविडङ्गदन्तीषु तैलं सिद्धं ससैन्धवम् ।
नस्यकर्म्मणि दातव्यं कवलञ्च कफात्मके ॥"
श्वेता अपराजिता ।
"पित्तवत् साधयेद्वैद्यो रोहिणीं रक्तसम्भवाम् ।
विस्राव्य कण्ठशालूकं साधयेत्तुण्डिकेरिवत् ।
एककालं यवान्नञ्च भुञ्जीत स्निग्धमल्पशः ।
उपजिह्विकवच्चापि साधयेदधिजिह्वकम् ।
एकवृन्दन्तु विस्राव्य विधिं शोधनमाचरेत् ।
एकवृन्दमिव प्राज्ञो वृन्दञ्च समुपाचरेत् ।
गिलायुश्चापि यो व्याधिस्तञ्च शस्त्रेण साधयेत् ।
अमर्म्मस्थं सुपक्वञ्च भिन्द्याद्गलविद्रधिम् ॥"
इति भावप्रकाशः ॥

(शूले, त्रि । यथा, महाभारते ।५।११।११।

"नैव ह्रस्वा न महती न लघ्वी नापि रोहिणी ।
नीलकुञ्चितकेशी च तथा दीर्घाम्बरा तथा ।")

रोहिणीपतिः पुं, (रोहिण्याः पतिः ।) चन्द्रः । इति हेमचन्द्रः । २ । १८ ॥ (यथा, देवीभागवते । १ । ११ । १८ ।
"इत्थं भावमवाप्य मनुजाः रोहिणीपतिः ।
गुरुः क्रोधसमायुक्तः कान्ताविरहदुःखितम् ॥"
वसुदेवः । वृषभश्च ॥)

रोहिणीरमणः पुं, (रोहिण्याः रमणः ।) वृषभः । इति राजनिर्घण्टः ॥ वसुदेवः ॥ (चन्द्रः । यथा, गीतगोविन्दे । २ । १ ।
"वलित जयन्तेवकेन हरेरिह प्रवेश ।
केन्दुविम्बसमुदयमभरोहिणीरमणेन ।")

रोहिणीवल्लभः, पुं (रोहिण्याः वल्लभः ।) चन्द्रः । इति हलायुधः ॥ वसुदेवश्च ॥

रोहिणीशः, पुं, (रोहिण्याः ईशः ।) चन्द्रः । इति हेमचन्द्रः ॥ (यथा, माघे । २ । ६ ।
"यो रेवतीजानिरिवेन जातु
न रोहिणीयो न च रोहिणीशः ।")
वसुदेवश्च ॥

रोहिण्यष्टमी, स्त्री, (रोहिणीयुक्ता अष्टमी ।) रोहिणीनक्षत्रयुक्तभाद्रकृष्णाष्टमी । यथा,—
"कृष्णाष्टम्याञ्च रोहिण्यामर्द्धरात्रेऽर्च्चनं हरेः ।
कार्य्या विद्धापि सप्तम्या हन्ति पापं त्रिजन्मजम् ॥
उपोषितोऽर्च्चयेन्मन्त्रैस्तिथिभान्ते च पारणम् ॥
योगाय योगपतये योगेश्वराय योगसम्भवाय गोविन्दाय नमो नमः ॥ स्नानमन्त्रः । यज्ञाय यज्ञेश्वराय यज्ञपतये यज्ञसम्भवाय गोविन्दाय नमो नमः ॥ अर्घ्यमन्त्रः । विश्वाय विश्वेश्वराय विश्वपतये विश्वसम्भवाय गोविन्दाय नमो नमः ॥ शयनमन्त्रः । धर्म्माय धर्म्मेश्वराय धर्म्मपतये धर्म्मसम्भवाय गोविन्दाय नमो नमः ॥ पारणमन्त्रः ।
स्थण्डिले पूजयेद्देवं सचन्द्रां रोहिणीं तथा ।
शङ्खे तोयं समादाय सपुष्पफलचन्दनम् ।
जानुभ्यामवनीं गत्वा चन्द्रायार्घ्यं निवेदयेत् ॥
क्षीरोदार्णवसम्भूत अत्रिनेत्रसमुद्भव ।
गृहाणार्घ्यं शशाङ्केन्दो रोहिण्या सहितो मम ॥
श्रिये वसुदेवाय बलदेवाय नन्दाय यशोदायै ।
अनघं वामनं शौरिं वैकुण्ठं पुरुषोत्तमम् ।
वासुदेवं हृषीकेशं वृष्णिं च दैत्यसूदनम् ॥
वाराहं पुण्डरीकाक्षं श्रीकान्तमजमव्ययम् ।
दामोदरं पद्मनाभं केशवं गरुडध्वजम् ॥
गोविन्दमच्युतं देवमनन्तमपराजितम् ।
अधोक्षजं जगद्बीजं सर्गस्थित्यन्तकारकम् ॥
अनादिनिधनं विष्णुं त्रिलोकेशं त्रिविक्रमम् ।
नारायणं चतुर्बाहुं शङ्खचक्रगदाधरम् ॥
पीताम्बरधरं दिव्यं वनमालाविभूषितम् ।
श्रीवत्साङ्कं जगद्धाम श्रीपतिं श्रीधरं हरिम् ॥
यं देवं देवकी देवी वसुदेवादजीजनत् ।
भौमस्य ब्रह्मणो गुप्त्यै तस्मै ब्रह्मात्मने नमः ।
नामान्येतानि सङ्कीर्त्य गव्यं प्रार्थयेत् पुनः ।
त्राहि मां सर्व्वपापघ्न दुःखशोकार्णवात् प्रभो ।
देवकीनन्दन श्रीश हरे संसारसागरात् ॥
दुर्वृत्तांस्त्रायसे विष्णो ये स्मरन्ति सकृत् सकृत् ।
सोऽहं देवातिदुर्वृत्तस्त्राहि मां शोकसागरात् ॥
पुष्कराक्ष निमग्नोऽहं महत्यज्ञानसागरे ।
त्राहि मां देवदेवेश त्वामृतेऽन्यो न रक्षिता ॥
स्वजन्म वासुदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥
शान्तिरस्तु शिवञ्चास्तु धनाढ्यश्चाभिराज्यभाक् ।"
इति गारुडे १३२ अध्यायः ॥

रोहित्, पुं (रोहतीति । रुह + "हृसृरुहियुषिभ्य इतिः ।" उणा० १ । ९९ । इति इतिः ।) सूर्य्यः । इति मेदिनी । टे, १४० ॥ मृगभेदः । मत्स्यभेदः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (अश्वभेदः । यथा वाजसनेयसंहितायाम् । २४ । ३ । "मयुश्चराभ्याय मकटः शाद्वलाय रोहित् ।" 'एको रोहित् अश्वः शाद्वलाय ।' इति तद्भाष्ये महीधरः ॥ रोहितवर्णविशिष्टे, त्रि । (यथा ऋग्वेदे । १ । १ । १६ ।
"रोहित् श्यावा सुमदंशुर्ललामी ।"
"रोहित् रोहितवर्णा श्यावा श्यामवर्णा ।" इति तद्भाष्ये सायणः ॥)

रोहित्, स्त्री, (रुह + "हृसृरुहियुषिभ्य इतिः ।" उणा० १ । ९९ । इति इतिः ।) मृगी । ("अभ्यस्य स्वतस्य मृगी रोहिद्भवति । तथाच महिम्नः स्तवे । गत रोहिद्भूतां रिरमयिषु मृष्यस्य वपुषा ।" उज्ज्वलः । १ । ९९ ।) लता । इति मेदिनी । टे, १४० ॥ (वडवा । यथा, ऋग्वेदे । १ । १४ । १२ ।
"युक्ष्वा ह्यरुषी रथे हरितो देव रोहितः ।"
"हे देवाग्ने रोहितः रोहिच्छब्दाभिधेया अश्वीया वडवा रथे युक्ष्व युङ्क्ष्व योजय ।" इति तद्भाष्ये सायणः ॥७॥ रोहन्त्याभिर्वीजानि तथावेन हि वीजानि प्ररोहन्तीति तथात्वम् । नदी । इति निघण्टुः । १ । १३ । १८ ॥ निगमेषु बहुवचनान्तत्वेन प्रायशः श्रवणात् बहुवचनान्तत्वम् ॥)

रोहित, क्ली (रुह + "रुहे रश्च लो वा ।" उणा० ३ । ९४ । इति इतन् ।) कुङ्कुमम् । रक्तम् । ऋजुशक्रशरासनम् । इति मेदिनी । ते १४५ ॥ (यथा, मनुः । १ । ३८ ।
"विद्युतोऽशनिमेघांश्च रोहितेन्द्रधनूंषि च ।
उल्कानिर्घातकेतूंश्च ज्योतींष्युच्चावचानि च ॥")

रोहितः, पुं, (रोहतीति । रुह + "रुहे रश्च लो वा ।" उणा० ३ । ९४ । इति इतन् ।) मीनविशेषः । (यथाह कश्चित् ।
"इन्दीवरो विलसपीठको वाचा वाचामगोचरः ।
रोहितो यो हितः पोष्णो मधुरो मधुरो प्रियः ॥")
रोहितमत्स्यस्य वचनगुणाश्च यथा,—
"तस्य प्रशस्तो मेदकुक्षिस्तु मत्स्यो
य श्रेष्ठोऽसौ लोहितो दृष्टचक्षुः ।
कोष्ठा वक्ष रोहितस्यापि मांसं
वातं हन्ति स्निग्धमत्यन्त वीर्य्यम् ॥"
इति राजनिर्घण्टः ॥
अपि च ।
"रक्तोदरो रक्तमुखो रक्ताक्षो रक्तपक्षतिः ।
लघुपक्षो भक्ष्यश्रेष्ठो रोहितः कथितो बुधैः ॥
रोहितः सर्व्वमत्स्यानां वरो वृष्योऽर्द्दितार्त्तिजित् ।
कषायानुरसः स्वादुर्वातघ्नो नातिपित्तकृत् ॥
ऊर्द्ध्वजत्रुगतान् रोगान् हन्यात् रोहितमुण्डकम् ॥'
इति भावप्रकाशः ॥
(तथाच ।
"वातघ्नो नातिपित्तघ्नः श्लेष्मकरः स्यात् रोहित सर्व्वदा ।'
इति हारीते प्रथमस्थाने एकादशेऽध्याये ॥
"शैवलाहारभोजित्वात् स्वप्नस्य च विवर्जनात् ।
रोहितो दीपनीयश्च लघुपाको महाबलः ॥"
इति चरके सूत्रस्थाने सप्तविंशेऽध्याये ॥
"कषायानुरसस्तेषां शष्पशैवालभोजनः ।
रोहितो मारुतहरो नात्यर्थं पित्तकोपनः ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥
स्वनामख्यातो हरिश्चन्द्रस्य नृपस्य पुत्रः । यथा देवीभागवते । ७ । १५ । १५ ।
"राजा पुत्रमुखं दृष्ट्वा सुखमाप महत्तरम् ।
नामास्य रोहितश्चेति चकार विधिपूर्व्वकम् ॥"
अस्य विवरणन्तु तत्रैव द्रष्टव्यम् ॥) मृगभेदः । रोहितकवृक्षः । इति मेदिनी । ते १४६ ॥ (रोहीतकोऽपि पाठः । रोहीतकशब्दोऽप्यस्य गात ॥ यथा सुश्रुते । ६ । १० ।
"पथ्याक्षरोहीतमधूकवारी
चौर्य्या युक्ता मदिरायमिश्रिता ॥"
अभिघोटकः । इति निघण्टुः । १ । १५ ॥
"रोहन्ति आरोहन्ति रथं वहन्त्यादित्यमिति रोहितः ।' इति तत्र देवराजयज्वा ॥ यथा, ऋग्वेदे । १ । ९४ । १० ।
"यद्युक्था अरुषा रोहिता रथे ॥"
"रोहिता लोहितवर्णौ रोहित इत्यग्नेरश्वस्याख्या रोहितोऽग्नेरिति निगमात् रोहितेनाग्नेर्देवता गमयति निमन्त्रयस्य ।" इति तद्भाष्ये सायणः ॥) रक्तवर्णः । रक्तवर्णविशिष्टे त्रि । इत्यमरः ॥ (यथा वाजसनेयसंहितायाम् । १६ । १९ ।
"नमो रोहिताय स्थपतये वृक्षाणां पतये नमो नमः ॥")

रोहितकः पुं (रोहित एव । स्वार्थे कन् ।) वृक्षविशेषः । रोहड़ा इति भाषा । तत्पर्य्यायः । रोही २ प्लीहघ्नः ३ दाडिमपुष्पकः ४ । इत्यमरः । रोहीतकः ५ रोहिनः ६ रोहितः ७ कुशाल्मलिः ८ दाडिमपुष्पः ९ [illegible] १० कूटशाल्मलिः ११ विरोचनः १२ शाल्मलिकः १३ । अस्य गुणाः । कटुत्वम् । स्निग्धत्वम् । कषायत्वम् । सुशीतलत्वम् । कृमिदोष

प्लीहोदरमेहघ्नं च। इति राज-
निघण्टः ॥ अपि च।
'रोहितो लोहितो रोही रोही दाडिम
पुष्पकः।
रोहीतकः प्लीहघाती रक्तो रक्तप्रसादनः ॥"
इति भावप्रकाशः ॥
अन्यच्च।
"रोहीतको यकृत्प्लीहगुल्मोदरहरः स्मृतः ॥"
इति राजवल्लभः ॥
(मत्स्यविशेषः। यथा महाभारते ।३।२५३।१८।
"मद्रान् रोहितकांश्चैव आग्नेयान्मालवानपि।
गणान् सर्वान् विनिर्जित्य नीतिज्ञः प्रहसन्निव।
प्रस्थाप्य यवनांश्चैव निर्ययौ प्रसभन्दन ॥")
रोहिता, स्त्री (रोहित+टाप्। "वर्णादनु-
दात्तात्तोपधात्तो नः।" ४।१।३९। इति
पाणिनीनोक्तः ङीप् तकारस्य नकारादेशश्च न।)
लाक्षादिना रक्तवर्णा। यथा —
"रोहिण्यो रोहिता रक्ता लोहिनी लोहिता
च सा।"
इति जटाधरः ॥
रोहिताश्व पुं, (रोहित अश्वो यस्य।) अग्निः।
इत्यमरः ॥ हरिश्चन्द्रराजसुतः। इति मेदिनी।
व, ६३ ॥
रोहितिका स्त्री (रोहिणो वर्णोऽस्यस्या इति।
रोहित+ठन्।) लाक्षादिना रक्तवर्णा। इति
जटाधरः ॥
रोहितक, पुं (रोहित इव। स्वार्थे कन्।)
रोहितवृक्षः। यथा —
'प्लीहारी रोहितैष स्यात् रक्तपुष्पश्च
रोहितः ॥"
इति भरतधृतरत्नकोषः ॥
(विवरणमस्य रोहितकशब्दे ज्ञातव्यम्॥)
रोही [न्] पुं, (अवश्यं रोहतीति। रुह+
आवश्यके णिनि।) रोहितकवृक्षः। (अस्य
पर्यायो यथा —
रोही रोहितकः प्लीहशत्रुर्दाडिमपुष्पकः ॥"
इति वैद्यकरत्नमालायाम् ॥
"रोहीतको रोहितको रोही दाडिमपुष्पकः।'
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)
अश्वत्थवृक्षः। वटवृक्षः। इति मेदिनी। न,
१२ ॥
रोहीतक, पुं (रोहीत इव। स्वार्थे कन्।)
रोहितकवृक्षः। इति राजनिघण्टः॥ (यथा
बृहत्संहितायाम्।५४।६८।
"रोहीतकस्य पश्चाद्दिविभागस्त्रिभिः करैः
याम्ये ॥"
तथास्य पर्यायः।
'रोहीतको रोहितको रोही दाडिमपुष्पकः ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)
रौक्ष्य क्ली (रूक्षस्य भावः। रूक्ष+ष्यञ्।)
रूक्षता। रूक्षस्य भावः इत्यर्थे ष्यञ्प्रत्यय-
निष्पन्नम्। तथा हि।

"तैलं यदीन्द्रदीपस्य तैलं वचादकं स्मृतम्।
तेन त्वां स्नापयाम्यद्य सम्यक्सानन्दमन्त्रिकाम्॥"
इति दुर्गापूजायां महाष्टमीमहानवम्यामहा-
स्नानप्रकरणे देवीपुराणम्॥ (तथा च।
"य एषा वातप्रमथा भवन्ति याश्च तेषु वै।
रौक्ष्याद्यवधुर्यान्ति न स वस्तु समीरणम्॥'
इति सुश्रुते सूत्रस्थाने ४ अध्याये॥)
रौच्य, पुं (रुचेरपत्यमिति। रुचि+ष्यञ्।)
मनुविशेषः। यथा,—
'रौच्यादयस्तथान्येऽपि मनवः सम्प्रकीर्तिताः।
रुचेः प्रजापतेः पुत्रो रौच्यो नाम भविष्यति॥"
इति मार्के ९ अध्यायः॥
तन्मन्वन्तरे देवादयो यथा,—
"मयोदयस्य पर्यायं ये रौच्यस्य मनोः सुराः।
सुधर्माश्च सुधर्माणो वरतो मे निशामय॥
सुधर्मात्मा सुराश्च सुकर्माणस्तथापरे।
सुधर्माणस्तथा ह्येते समस्ताः सुनिश्चिताः॥
महावलो महावीर्यस्तेषामिन्द्रो दिवस्पतिः।
भविष्यश्च सप्तर्षीन् गदतो मे निशामय॥
धृतिमानव्ययश्चैव तत्त्वदर्शी निरुत्सुकः।
निर्मोहः सुतपाश्चान्यो निष्प्रकम्पश्च सप्तमः॥
चित्रसेनो विचित्रश्च नयहरिभवो दृढः।
सुनेत्रः क्षत्रवृद्धिश्च सुरथश्चैव तत्सुताः॥"
इति मार्कण्डेयपुराणम्॥
अन्यदिवरणं लुचिशब्दे द्रष्टव्यम्॥ ॥ विल्व-
काष्ठदण्डः। तत्पर्यायः। वैल्वः २। इति हेम-
चन्द्रः॥ (क्ली, रौच्यस्तोत्रमिति। ष्यञ्। स्तवनाम
विशेषः। यथा, मार्कण्डेये।९८।३९।
"शान्तिदेवो गृहस्थो दुःखादधिक श्रुतं।
निशामयतद्विरतं रौच्यं श्रुत्वा नरोत्तम॥")
रौट, ऋ नादरे। इति कविकल्पद्रुमः॥ (भ्वा-
पर० सक० सेट्।) ऋदुदृदुपक्षरो। ऋ, अरु-
रौटत्। नादरोऽनादरः। रौटति खलं साधुः।
इति दुर्गादासः॥
रौड, ऋ अनादरे। इति कविकल्पद्रुमः॥ (भ्वा-
पर० सक०-सेट्।) ऋ अरुरौडत्। इति
दुर्गादासः॥
रौद्र, क्ली (रुद्रस्येदम्। रुद्र+अण्।) मन्ना
रावडक्यानर्गतगुरसः। तत्पर्यायः। उग्रम् २।
इत्यमरः॥ रे क्रोधस्थायिके। ओढो देवता यस्य
रौद्रम्। यदाह भरतः।
"शृङ्गारो विष्णुदैवत्यः स्याद्धास्यः प्रमथदैवतः।
करुणो यमदैवः स्याद्रौद्रो रुद्राधिदैवतः॥"इति
रे क्रोधस्थायिके। उच्यते क्रुधा समर्थेऽपि उग्रः।
उचितं समवायेन शाश्वीति रक्तनिपातनाच्च
ग। क्ल्वाभिमाषिता रौद्रः। यथा, रावण-
चरितादि। यत्तु बीभत्सरौद्रे क्रौर्ये रूपभेदात्
अन्ये पुंसि बीभत्सरौद्रौ चेति पुंल्लिङ्गपाठ रुद्र-
युक्तः। इति भरतः॥ ॥ अपि च।
अथ रौद्रः।
"रौद्रः क्रोधस्थायिभावो रक्तो रुद्राधिदैवतः।
आलम्बनं रिपुस्तत्र तच्चेष्टोद्दीपनं मतम्॥

मुष्टिप्रहारपातनविकृतच्छेदावदारणैश्चैव।
संग्रामसम्भ्रमाद्यैरस्योद्दीप्तिर्भवेत् प्रौढा॥
भ्रूविभङ्गौष्ठनिर्दंशबाहुस्फोटनतर्जनाः।
आत्मावदानकथनमायुधोत्क्षेपणानि च।
अनुभावास्तथा क्षेपक्रूरसन्दर्शनादयः॥
उग्रतावेगरोमाञ्चस्वेदवेपथवो मदः।
मोहामर्षादयस्तत्र भावाः स्युर्व्यभिचारिणः॥"
यथा,—
"कृतमनुमतं दृष्टं वा यैरिदं गुरु पातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः।
नरकरिपुणा सार्द्धं तेषां सभीमकिरीटिना-
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम्॥"
अस्य युद्धवीराद्भेदमाह।
'रक्तास्यनेत्रता चात्र भेदिनी युद्धवीरतः॥"
इति साहित्यदर्पणे ३ परिच्छेदः॥
रौद्र, पुं, (रुद्रस्यायमिति। रुद्र+अण्।) सूर्य-
तेजः। तत्पर्यायः। घर्मः २। इति मेदिनी।
रे, ८॥ प्रकाशः ३ द्योतः ४ आतपः ५।
इत्यमरः॥ तस्य गुणाः।
"आतपः कटुको रूक्षः स्वेदमूर्च्छाविघातकः।
दाहवैवर्ण्यजननो नेत्ररोगप्रकोपकः॥"
इति राजवल्लभः॥ ॥
यमः। यथा —
"जठरः पिङ्गलो रौद्रो घोराक्षः कालमित्रः।
अग्निनामा हुतो रौद्रः षष्ठ रौद्रः प्रकी-
र्तितः॥"
मन्वन्तरे सप्तमो रौद्रः प्राक्स्मृतः॥ तेषां
फलानि यथा,—
"पिङ्गलो रौद्रनामा च कालरूपः प्रकाशयेत्।
प्रथमे वहुरोगः स्यात् सर्वजीवक्षयङ्करः॥
जठरो रौद्रनामा च घोररूपश्च कारयेत्।
ज्वरादिपित्तरोगांश्च नानाविधकरो नृणाम्॥
अग्निनाम्ना यदा वर्षे रौद्रो भवति नान्यथा।
उत्पातं विस्ति सूर्येण वराहो रौद्रो भवेत्।
रौद्रनामा महारौद्रो वह्निर्देवो भवेद्ध्रुवम्।
चित्रोदितं वर्षं कुष्ठरोगसमन्वितम्॥
घोरनामा महारौद्रो घोररूपञ्च कारयेत्।
उत्पातं यदा दृश्य नानारोगसमन्वितम्॥
कालनामा महारौद्र उत्पाते पीडनं यदा।
नानारोगसमायुक्तं प्रजानां दुःखदं भवेत्॥"
इति ज्योतिषम्॥
रसविशेषः। इति मेदिनी। रे, ८॥ तद्विवरणं
स्त्रीलिङ्गरौद्रशब्दे द्रष्टव्यम्। हिमस्य ऋतुः।
इति हेमचन्द्रः॥ यमः। इति धरणिः॥ (कार्ति-
केयः। यथा महाभारते। ३।२२८।११।
"आग्नेयः कृत्तिकापुत्रो रौद्रो गाङ्गेय इत्यपि।
श्रूयते भगवान् देवः सर्वदेवमयो गुहः॥")
रौद्र, त्रि, (रुद्र+अण्।) तीव्रः। (यथा, रुचि
निर्णयव्याख्याने विषमज्वरचिकित्सिते कालिकोक्त-
ज्वरांशकथनप्रस्तुतम्।
"ज्वरविसर्गरविभिरत्र वहुधा नरोत्तमः।
भयप्रकम्पो रौद्रः कालान्तकसमोपमः॥")

भीषणः । इति मेदिनी । रे, ८ ॥ (यथा, महाभारते । ९ । ४४ । ५० ।
"तस्य तं तद्वच श्रुत्वा रौद्रं लोमप्रहर्षणम् ।
प्रचक्रुर्वेचुलं पूर्वा कृतयत्नो प्रसरादृषम् ॥")
रुद्रसम्बन्धिनि च ।

रौद्री, स्त्री, (रौद्र+ङीप् ।) गौरी । इति मेदिनी । रे ८ ॥ रुद्रजटा । इति राजनिर्घण्टः ॥ रुद्रेण्यक्तमहारौद्री माया महारौद्रीनाम्नी चामुण्डा च । यथा,—
"एक एव महान्‌ब्धौ रुद्रसञ्ज्ञो महाम्बुधौ ।
स च मायां महारौद्रीं रौरवीं विदधच्च च ।
सा माया बहुधा भीमा सर्व्वदेवप्रमोहिनी ।
तया तु मोहिता देवाः सर्व्वे निद्रां तु भेजिरे ।
दैवी च विधिरौनाम्नी स दैत्यं समताडयत् ।
तया तु ताडितं तस्य दैत्यस्य शुभलोचने ।
चर्म्ममुण्डे उभे सम्यक् पृथग्भूते बभूवतुः ।
करोत्सु रावणेन्द्रस्य चर्म्ममुण्डे समाहृयत ।
अपश्यन्त हरेर्देवी चामुण्डा तत्र साभवत् ।
सम्भूतमहारौद्री या देवी परमेश्वरी ।
महादिश्यो तु या चैव कालरात्रिः प्रकीर्त्तिता ॥"
इति वाराहे त्रिशक्तिमाहात्म्यम् ॥

रौप्य, क्ली, (रूप्यमेव । अण् ।) रूप्यम् । इति राजनिर्घण्टः ॥ (यथा, माघे । ४ । ६० ।
"एकतनिर्म्मलाह पतिते घनतिमिरमुषि
ज्योतिषि रौप्यभित्तिषु पुरः प्रतिपन्नति
सद्य ॥")
तत्करणं यथा,—
"भस्मान्य गुरुमाम्लस्य करेणा मारिक रसम् ।
घमनाच्च भवनीय सुवर्णकरणं स्मृतम् ॥"
इति गारुडे १८८ अध्याये ॥
(औषधादिषु अस्याभावे यद्यातस्य तद्‌यथा,—
'सुवर्णमथ । रौप्यं स्यात् यत्र न लभ्यते ।
तत्र कान्तिन कर्म्माणि भिषक् कुर्य्याद्विचक्षणः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
न हि ये, त्रि । यथा भागवते । ४।७५।१२४ ।
"स्वर्णरौप्यायसे शृङ्गे चक्रुर्भा सन्मनो यथे ॥")

रौम, क्ली (रुमायां लवणाकरे भवम् । रुमा+अण् ।) शाम्भरिलवणम् । इत्यमरटीकायां रामाश्रम ॥

रौमक क्ली, शाम्भरिलवणम् । तत्पर्य्याय । वसुकम् २ । इत्यमर ॥ 'रुमा नाम नदी लवणाकरः तत्र भवं रौमकम् । दधे कान्ति च्य रौम तत स्वार्थे कः रौमकम् ।"इति तट्टीकायां भरत ॥ (पर्य्यायोऽस्य यथा —
"शाकम्भरीयं कथितं गुडाख्यं रौमकन्तथा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रौमलवण क्ली, (रौमं लवणमिति ।) शाम्भरिलवणम् । इति रत्नमाला ॥

रौरव, पुं, (रुरुनामकविशिष्टसत्वायमिति । रुरु+अण् ।) नरकविशेष । घोरः । इति मेदिनी । वे ४९ ॥ अस्य विवरणं यथा,—
"रौरवं कूटसाक्षी तु याति यश्चानृतो नरः ।
तस्य स्वरूपं वक्ष्यामि रौरवस्य निशामय ।
योजनानां सहस्रे द्वे रौरवो हि प्रमाणतः ।
जानुमात्रप्रमाणन्तु तत्र श्वभ्रं सुदुस्तरम् ।
तत्राङ्गारचयो यत्र कृत तद्धरणीसमम् ।
ज्वलन्नानासितीव्रेण तापिताङ्गारभूमिना ।
तन्मध्ये पापकर्म्माणं विमुञ्चन्ति यमानुगाः ।
स दह्यमानस्तीव्रेण वह्निना तेन धावति ।
पदे पदे च पादोऽस्य शीर्य्यते जायते पुनः ।
अहोरात्रेणोद्धरञ्च पादन्यासं स गच्छति ।
एवं सहस्र विस्तीर्णं योजनानां विमुच्यते ।"
इति मार्कण्डेयपुराणे पितापुत्रसंवादनामाध्याय ॥ (तथाच देवीभागवते ।८।२२।८-११ ।
"एतन्ममाहमिति यो भूतद्रोहेण केवलम् ।
पुष्णाति प्रत्यहं स्वीयकुटुम्बं कार्य्यलम्पटः ।
एतद्विहाय चात्रैव स्वाशुभेन पतेदिह ।
रौरवे नाम नरके सर्व्वसत्त्वभयावहे ॥
इह लोकेऽमुना ये तु हिंसिता जन्तवः पुरा ।
त एव रुरवो भूत्वा परत्र पीडयन्ति तम् ।
तस्माद्रौरवमित्याहुः पुराणज्ञा मनीषिणः ।
रुरुः सर्पादपि क्रूरो जन्तुरुक्तः पुरातनैः ॥")

रौरव, त्रि, चञ्चल । धम' । घोर । इति शब्दरत्नावली ॥ (रुरोर्मृगस्येदमिति । अण् । रुरुसम्बन्धिनि च । यथा, मनु । २ । ४१ ।
"कार्ष्णरौरववास्तानि चर्म्माणि ब्रह्मचारिणः ।
वसीरन्नानुपूर्व्वेण शाणक्षौमाविकानि च ॥")

रौहिट [ष] पुं रोहितमत्स्य । यथा । "अ एव रौहिषो मध्ये चरतीति भवभूति ।" इत्यमरटीकायां भरत ॥

रौहिण, क्ली (रौहिणमेव । स्वार्थे अण् ।) दिवसस्य नवममुहूर्त्तः । यथा । अथ पूर्व्वाह्णमाह्नमभिधाय रौहिणन्तु न लङ्घयेदित्यभिधानेन पूर्व्वाह्णश्राद्धस्य सङ्कटात् परो रौहिणः प्रथमभागोऽपूर्व्वाह्णकाल प्रतीयते । तेन रौहिणपूर्व्वाह्णश्राद्धस्य गौणकालत्वेनोत्तरार्द्ध । अथ श्राद्धश्राद्धस्य पूर्व्वाह्णविधिरित्युच्यते गतश्च पूर्व्वस्मिन् सङ्कटात् परः रौहिणपर्य्यन्तं निषेधाभ परस्मिन् मुहूर्त्तत्रयमात्रे तत्त्विधानाभ पूर्व्वस्मिन् ग्राह्यम् । रौहिणान्तस्यापूर्व्वाह्णलाभात् न परस्मिन् तथात्वाभावात् । उभयस्मिन् सङ्कटलाभे परस्मिन् शुक्लपक्षे नि.ययात्राः इति वचनात् । रौहिणन्तु दिवसस्य नवममुहूर्त्तस्य ज्योतिषोक्तरौहिणत्वेनलाभात् रौहिणत्वमिति । इति श्राद्धतत्त्वम् ॥

रौहिण पुं, (रुह+इनन् । स्वार्थे अण् ।) चन्दनद्रुम । इति त्रिकाण्डशेषः ॥

रौहिणेय क्ली, मरकतमणि । इति राजनिर्घण्टः ॥

रौहिणेय पुं (रोहिण्या अपत्यमिति । रोहिणी + "स्त्रीभ्यो ढक् ।" ४।१।१२० । इति ढक् ।) बलदेव । (यथा, महाभारते । १।१६१।१८ ।
"तत्रोपविष्टं पृथुदीर्घबाहुं
ददर्श कृष्णः सह रौहिणेयः ॥")
बुधग्रह । इत्यमर ॥ (पुरुषोत्तमस्यास्य पञ्च कात्यनाम । यथा, तीर्थतत्त्वे ।
"मार्कण्डेये वटे कृष्णे रौहिणेये महोदधौ ।
इन्द्रद्युम्नसरः स्नात्वा पुनर्जन्म न विद्यते ॥")

रौहिणेय त्रि (रौहिण्याः अपत्यमिति । रोहिणी +ढक् ।) गोवत्स । इति मेदिनी । ये १२७ ॥

रौहिष क्ली, (रोहतीति । रुह + "रुहेर्वृद्धिश्च । उणा १।४८ । इति टिषच् । वृद्धिश्च धातोः ।) कतृणम् । इत्यमरः ॥ रौहिषतृणम् । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः ।
"कतृणं रौहिषं देवजग्धं सौगन्धिकं तथा ।
भूतीकं ध्यामं पौरञ्च श्यामकं धूपगन्धिकम् ॥
रौहिषं तुवरं तिक्तं कटुपाकं व्यपोहति ।
कृच्छ्रकण्ठव्याधिपित्तास्रशूलकासकफज्वरान् ॥"
इति भावप्रकाशः ॥ * ॥
अन्यत् कतृणशब्दे द्रष्टव्यम् ॥

रौहिष पुं (रुह + टिषच् । वृद्धिश्च धातोः ।) मृगविशेषः । इत्यमरः ॥ रोहितमत्स्यः । इति जटाधरः ॥

रौहिषी, स्त्री, (रौहिष+ङीष् ।) स्नायी । दूर्व्वा । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

ल

ल, लकारः । स तु व्यञ्जनस्य तृतीयो वर्णो व्यञ्जनस्थाद्यादिवर्णश्च । अस्योच्चारणस्थानं दन्तः । इति व्याकरणम् । 'तथाच सिद्धान्तकौमुद्याम् । "लृतुलसानां दन्ताः ।") तस्य स्वरूपं यथा —
"लकारं चञ्चलापाङ्गि ! कुण्डलीत्रययुतम् ।
पीतविद्युल्लताकारं सर्व्वरत्नप्रदायकम् ॥
पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा ।
त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा ।
आत्मादितत्त्वसहितं हृदि भावय पार्व्वति ॥"
इति कामधेनुतन्त्रम् ॥ *
(वर्णोद्धारतन्त्रमालायाम् ।) अस्य लेखनप्रकारो यथा,—
'कुण्डलीत्रययुक्ता वामादृक्षगता लघ ।
पुनरूर्द्धगता रेखा तासु नारायणः शिवः ।
ब्रह्मशक्तिश्च अनिरुद्धगामस्य प्रचक्षते ॥"
ध्यानं यथा —
"चतुर्भुजां पीतवस्त्रां रक्तपङ्कजलोचनाम् ।
सर्व्वदा वरदां भीमां सर्व्वालङ्कारभूषिताम् ।
योगीन्द्रसेवितां नित्यां योगिनीं योगरूपिणीम् ।
चतुर्व्वर्गप्रदां देवीं नागहारोपशोभिताम् ॥
एवं ध्यात्वा लकारन्तु तन्मन्त्रं दशधा जपेत् ॥"
इति वर्णोद्धारतन्त्रम् ॥
तस्य नामानि यथा —
"लक्षः पूतना इन्द्री माधवः प्रजापतिः ।
वलानुजः पिनाकीशो वासवो मांसदृक्

सहचरी नारीऽस्य देवी सदृश प्रादयीदति।
भिक्षा दायी क्रिया माता भामिनी कामिनी
प्रिया॥
ज्वालिनी नमिनी नादः प्रद्युम्नः शोषणी हरिः।
त्रिधामममी वली वीरो मेरुगिरिः कला रसः॥"
इति मातृकाभिधानम्॥
(अनुबन्धविशेष। यथा, कविकल्पद्रुमे।
'दिवाद्यो ल्कादादिश ।" एतत्र चाद्‌ ली
भवति लुगादृश्योऽप। अस्ति इति॥ छन्द-
शास्त्रोक्तो लघुसञ्ज्ञको गणविशेषः। इति
छन्दोमञ्जरी॥)

लं, क्ली (लीयतेऽनेनेति। ली+अभिधानात्डप
परेऽपि ड।) एक्लीतमम्। इति तन्त्रम्॥

लः, पुं, (लातीति। ला+अच्।) इन्द्रः। इति
मेदिनी। ले, १॥

लक, क स्वादे आपने। इति कविकल्पद्रुमः॥
(चुरा० पर० सक० सेट्।) स्वादो रसो
स्वादनम्। क, लाकयति मोदकं बालकः।
इति दुर्गादासः॥

लकच, पुं, लकुचवृक्षः। इति शब्दरत्नावली॥

लकुच, पुं, (लकयते इति। लक स्वादे+बाहु
लकादुच।) वृक्षविशेषः। डेहुया इति
मादार इति च भाषा। तत्पर्य्यायः। लिकुचः २
ग्राहः ३ कषायी ४ दृढवल्कलः ५ डहुः ६
कार्श्यः ७ शूरः ८ स्थूलस्कन्धः ९। अस्य गुणाः।
विकृतरसत्वम्। कषायत्वम्। उष्णत्वम्। लघु
त्वम्। कफदोषहरत्वम्। दाहित्वम्। मल
वातस्तम्भदायकत्वञ्च। इति राजनिर्घण्टः॥ ७॥
अपि च।
"लकुचं गुरुमधुरो लिकुचो डहुरित्यपि।
आमं लकुचमुष्णञ्च गुरु विष्टम्भकृत्तथा॥
मधुराम्लं तथाम्लञ्च दोषत्रितयरक्तकृत्।
शुक्राग्निनाशनञ्चापि नेत्रयोरहितं स्मृतम्॥
सुपक्वं तत्तु मधुरमम्लं वातपित्तकृत्।
कफवह्निकरं वृष्यं विष्टम्भकृत्तथा मतम्॥"
इति भावप्रकाशः॥ ७॥

अन्यच्च।
"लकुचं गुरु विष्टम्भि स्वाद्वम्लं रक्तपित्तकम्।
श्लेष्मकारि शरीरस्य शुक्राग्निनाशनम्॥"
इति वैद्यकम्॥

लक्तकः, पुं (रक्तेन रक्तवर्णेन आप्नोतीति। के+
क। रस्य लत्वम्।) अलक्तकः। इति शब्द
रत्नावली। (यथा, गो० रामायणे। २।६ ।१६।
"प्रगृह्य लक्तकरसमुभौ तत्पुरवर्त्तिनौ।
तत्रैव रञ्जतुस्तस्याश्चरणौ पल्लवप्रभौ॥")
जीर्णवस्त्रखण्डम्। नेकड़ा इति भाषा। तत्
पर्य्यायः। कर्पटः २। नक्तकः ३। लक्तकः ४।
इति भरतः॥ ये मलिनमाद्रिङ्गवीवस्त्रखण्डं
नेकड़ा इति ख्यातं। लक्तकादयस्तस्य नामानि
इति केचित्। पटोऽस्त्री कर्पटः प्रोक्तः विचय
प्रोक्तलक्तकः। इति रभसः॥ अलक्ते चोले
राधादौ अनुभूयते लक्त रक्त लाक च स्वादे

आपने पुर्ख्यो जिन्नेति विभावितत्वात् न नि
कर्मेति स तत्र स्वार्थे कः लक्तकोऽत्र स्यादि।
अभ्यते स्म अक्त यक्त अनुजो रक्त न अक्त क
सुखं पथात्निति निपन्नत्तुशीर्षो मनीषान्थ्यात्
अक्तस्य पूर्वमोपे नक्तकच्छदपद्ममादिरपि।
इति मट्टीकायां भरतः॥

लक्तकर्म्मा [न्] पुं, (लक्तं रक्तवर्णं करोतीति।
कृ+मनिन्।) रक्तलोध्रः। इति शब्द
चन्द्रिका॥

लक्ष, क न दर्शने। अङ्के। इति कविकल्पद्रुमः॥
(चुरा० उभ० सक० सेट्।) क न, लक्षयति
लक्षयते घटं लोकः। अङ्कयति चिह्नयुक्तं करोती
त्यर्थो वा। इति दुर्गादासः॥

लक्ष क्ली (लक्ष्यतेऽनेनेति। लक्ष+अच्।) व्याजः।
शरव्यम्। इति मेदिनी। षे, २६॥ (यथा,
मनुः। ७। ५४।
"मौलान् शास्त्रविदः शूरान् लब्धलक्षान्
कुलोद्गतान्।
सचिवान् सप्त चाष्टौ वा प्रकुर्व्वीत परीक्षि
तान्॥")

लक्ष, क्ली, पुं, (लक्षयतीति। लक्ष+अच्।)
संख्याविशेषः। इति मेदिनी। षे २६॥ लाख
इति भाषा। (यथा कथासरित्सागरे।४६।९८।
"लक्षेणाश्वभिर्मेघे सहायातैर्युतस्य हि।
अयुतमभ्यधिकं हैव वर्जत वराजिनाम्॥")

लक्षक, त्रि (लक्षयतीति। लक्ष+ण्वुल्।)
लक्षयति यः। यथा। लक्षकं नाम लक्षयति।
"वाच्यार्थस्य समन्वयति शक्त्या यद्भवेत्।
तत्र लाक्षणिकं नाम लक्षकस्तद्विदुर् यः॥"
वाच्यार्थसमन्वयति यत्राम चङ्केतित तदेव
वाच्यार्थे वाचकं यः वाच्यार्थे शक्तिशून्य
भवेत्। वैयाकरणस्तु शब्दा गुरुगामित्यत्र
श्वेति अवबाधादिव गुरुगात्वपि शक्ता एव।
नैयायिकस्तु नौराद्यवच्छिन्ना सक्तमन्व
नौरादिशक्त्यैव गृहीता एव नौरादन्वयबोध
यन्ति तत्र लक्षका एव। अपि च। तदेव
विषयदयात्मात्मकं नाममपि जहत्
स्वार्थादिभेदादनेकविधमिश्रणं स्यादेतद्यदि
नौरादिन्यवस्थया गङ्गादिपदस्य भागे तटे
अनुभवे भवेत्तुत्वरीतत्तमेव लक्षकाणां
विभागो न भवेदति। नौराद्यन्वयबोध प्रति
नौरादिशक्त्यैव पदस्यालक्ष्य भावेन हेतु
तया लक्षकाणामनुभावकत्वात् गुरुत्वामनो
येन श्वेतिरिव्यान्ते शक्त्येन दृष्टान्तेन गङ्गायां
घोष इत्यत्रो लक्षितैन नौरादिना साकेन
गृहीतावगमैकस्यैव अन्वयाधिपत्यान्वयबोध
प्रतिबन्धान्ति चेत्। प्रकृतपाविच्छिन्नस्यैव प्रश्न
यादवच्छर्मोऽत्मारेऽस्यशुद्धेर्मुख्यतया नौराद
विशेषितस्य सुबदाधिपत्यादेर्वोधान्तरान्वयबोधा
योगात्। न च शक्त्यैव अन्यत्र यथाकाङ्क्ष-
मन्यत्रोपस्थापिताभिमतार्थोऽभिकान्वय-
बोध प्रति हेतुत्वान्वयशुद्धौ लक्षणापद्यमयम्।

कुम्भा प्रविष्टमौयान्तौ लत्यह कुम्भादान्
न्वयविशेषत्वाशुपपत्तेः। कुम्भादिपदे यद्यात्मरी
तत्पार्थयोर्भिषोऽन्वयबोधस्थापतुमर्हत्वात्।
तस्मात् शक्तिरिव भक्तिरपि शाब्दानुभावक भव
त्येव शाक्यतावच्छेदकस्य षष्ठ्यर्थाय न अभि
धारः। इति शब्दशक्तिप्रकाशिका॥

लक्षण, क्ली, (लक्ष्यतेऽनेनेति। लक्ष+ल्युट्।
यद्वा, "अर्त्तिस्तु च।" उणा १। ७। इति
नप्रत्ययस्तस्याडागमश्च।) चिह्नम्। (यथा,
रघुः। १०। ६।
"अथाच्युतो भविष्यन्त्याः कार्य्यसिद्धेर्हि लक्ष
णम्॥")
नाम। इति मेदिनी। णे, ७१॥ लक्ष्यते ज्ञायते
ऽनेनेति लक्षणम्। तद्विविधम्। इतरभेदानु
मापकम्। व्यवहारप्रयोजकञ्च। इति न्याय
मतम्॥ आकरवसते तु।
"स्वपक्षितधर्मधर्मामभिधान विधायकम्।
अन्यकान्त्वभिप्रायो तदभिधानलक्षणम्॥"
इति बोपदेवः॥
(कथनपद्धतिः। "समानासमानजातीयो
व्यवच्छेदो लक्षणार्थः।" इति वात्स्यायनीय
भाष्यम्। ५। सारसः। सारसपक्षी यथा, मनौ। ३।१६।
"सर्व्वं परवशं दुःखं सर्व्वमात्मवशं सुखम्।
एतद्विद्यात् समासेन लक्षणं सुखदुःखयोः॥")
दर्शनम्। इति शब्दधातुरत्नाकरः॥

लक्षण, पुं (लक्ष+"अर्त्तिस्तु च।" उणा १। ७।
इति नप्रत्ययस्तस्याडागमश्च। लक्षणमस्यास्तीति अच्
वा।) सौमित्रिः। यथा, हरिवंशे। ४१। १५८।
"लक्षणानुगतो यत्र धर्मभृतामिति रतः।
चतुर्दश वने समा तपो चचार राघवः॥")
सारसपक्षी। इति शब्दरत्नावली॥

लक्षणा, स्त्री (लक्षण+टाप्।) सारसी। इति
मेदिनी। णे, ७१॥ उष्ट्री। इति विश्वः
कोषलक्षणान्तरेऽपि॥ (अप्सरोविशेषः। यथा,
महाभारते। १। १२३। ६२।
"अलम्बुषा लक्षणा क्षेमा देवी रम्भा मनोरमा॥")
शब्दशक्तिः। यथा —
"लक्षणा शक्यसम्बन्धस्तात्पर्य्यानुपपत्तितः॥"
इति भाषापरिच्छेदः॥
गङ्गायां घोष इत्यादौ गङ्गापदस्य शक्यार्थे
प्रवाहरूपे घोषस्याभावानुपपत्तिसत्त्वेऽप्यनु
पपत्तिर्यत्र प्रतिबध्यते तत्र लक्षणया
तीरस्य बोधः। सा च शक्यसम्बन्धरूपा। तथा
हि प्रवाहरूपशक्यार्थसम्बन्धः तीरे वर्त्तते
तस्मात्तीरस्य अन्वय तत्र शाब्दबोधः। इति
सिद्धान्तमुक्तावली॥ ७॥ अपि च।
"अन्यत्वादिवत्प्रयार्थे व्यर्थमुच्यते
न्वितः।
लक्षणा विविधाद्याभिलक्ष लक्ष्येकधा॥"
कार्य्यलक्षणा शब्दार्थेनैव बोधकतया
अनुपपत्तिरुच्यते। यथा तीरस्यादिना मङ्गार्थे
मरुस्य। कार्य्यसम्बन्धऽभिमत्यादिना शक्य

शक्तिरेव वा स्वैकानुभावकत्वादजहत्स्वार्था। यथा श्वेतत्वादिना नीलघटत्वादिना च घटादि धर्म्मस्य। काचिच्च घटत्वाच्छेदकीभूतशब्दस्य पूर्व्वपूर्व्वं प्रत्यायकत्वान्निरूढ़ा। यथा, आह-व्याप्तिप्रकारेण तदाश्रयत्वानुभावकत्वादव्यादिपदस्य। काचिच्च पूर्व्वपूर्व्व तादृश्येना प्रत्यायकत्वादाधुनिकी। यथा घटत्वादिना पटादिधर्म्मस्य। अन्या शक्यसदृशत्वप्रकारेण बोधकतया गौणीत्युपदश्यते। यथा अग्नि-र्माणवक इत्यादावग्निसदृशत्वादिना अग्न्यादि धर्म्मस्य। इति शब्दशक्तिप्रकाशिका॥०॥

अन्यच्च।

"मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते। रूढ़ेः प्रयोजनाद्वासौ लक्षणाशक्तिरर्पिता॥"१॥

कलिङ्गः साहसिक इत्यादौ कलिङ्गादिशब्दो देशविशेषादिरूपे स्वार्थे असम्भवन् यथा शब्दस्य यथा स्वसंयुक्तान् पुरुषादीन् प्रत्याययति। यथा च गङ्गायां घोष इत्यादौ गङ्गादिशब्दो जलमयाद्यर्थवाचकत्वात् प्रकृतेऽसम्भवन् स्वस्य सामीप्यादिसम्बन्धसम्बन्धिनं तटादिं बोधयति। सा शब्दस्यार्पिता स्वाभाविकेतरा ईश्वरानुद्भाविता वा शक्तिर्लक्षणा नाम। पूर्व्वत्र हेतु रूढ़िः प्रसिद्धिरेव। उत्तरत्र गङ्गातटे घोष इति प्रतिपादनादलभ्यस्य शीतत्वपावनत्वाति-शयस्य बोधनरूपं प्रयोजनम्। हेतुं विनापि यस्य कस्यचित् सम्बन्धिनो लक्षणेऽतिप्रसङ्गः स्यादित उक्तं रूढ़िः प्रयोजनाद्वेति॥०॥

तद्भेदानाह।

"मुख्यार्थस्येतराक्षेपो वाक्यार्थेऽन्वयसिद्धये। स्यादात्मनोऽप्युपादानादेषोपादानलक्षणा॥"२॥

रूढ़ावुपादानलक्षणा यथा। श्वेतो धावति। प्रयोजने यथा। कुन्ताः प्रविशन्ति। अत्र योः श्वेतादिभिः कुन्तादिभिश्च अचेतनतया कर्त्तृधावनप्रवेशनक्रिययोः कर्त्तृतया न्वयमलभमानैरेतत्सिद्धये आत्मसम्बन्धिनो ऽश्वादयः पुरुषादयश्च आक्षिप्यन्ते। पूर्व्वत्र प्रयोजनाभावाद्रूढ़िः। उत्तरत्र कुन्तानामतिगहनत्वं प्रयोजनम्। अत्र च मुख्यार्थ-स्यात्मनोऽप्युपादानम्। लक्षणलक्षणायान्तु परस्यैवोपलक्षणमित्यनयोर्भेदः। इयमेवाजहत्स्वार्थेत्युच्यते॥०॥

"अर्पणं स्वस्य वाक्यार्थे परस्यान्वयसिद्धये। उपलक्षणहेतुत्वादेषा लक्षणलक्षणा॥"३॥

रूढ़िप्रयोजनयोर्लक्षणलक्षणा यथा। कलिङ्गः साहसिकः गङ्गायां घोष इति च। अनयोर्हि पुरुषतटयोर्वाक्यार्थेऽन्वयसिद्धये कलिङ्गगङ्गा-शब्दावात्मानमर्पयतः। यथा वा।

'उपकृतं बहु तत्र किमुच्यते
सुजनता प्रथिता भवता परम्।
विदधदीदृशमेव सदा सखे
सुखितमास्व ततः शरदां शतम्॥"

अत्रापकारादीनां वाक्यार्थेऽन्वयसिद्धये उप-कृतादयः शब्दाः आत्मानमर्पयन्ति। अपकारिणं प्रति उपकारादिप्रतिपादनान्मुख्यार्थ-बाधः वैपरीत्यलक्षणश्च सम्बन्धः फलमपकारा-तिशयः। इयमेव जहत्स्वार्थेत्युच्यते॥०॥

"आरोपाध्यवसानाभ्यां प्रत्येकं ता अपि द्विधा।"

ताः पूर्व्वोक्ताश्चतुर्भेदा लक्षणाः।

"विषयस्यानिगीर्णस्यान्यतादात्म्यप्रतीतिकृत्। सारोपा स्यान्निगीर्णस्य मता साध्यवसा-निका॥"४॥

रूढ़ावुपादानलक्षणा सारोपा यथा। अश्वः श्वेतो धावति अत्र हि श्वेतगुणवान् अश्वोऽनि-गीर्णस्वरूपः स्वसमवेतश्वेतगुणतादात्म्येन प्रती-यते। प्रयोजने यथा एते कुन्ताः प्रविशन्ति अत्र सर्व्वनाम्ना कुन्तधारिपुरुषनिर्द्देशात् सारोपात्वम्। रूढ़ौ लक्षणलक्षणा यथा। कलिङ्गः पुरुषो युध्यति। अत्र पुरुषकलिङ्गयो-राधाराधेयभावसम्बन्धः। प्रयोजने यथा आयु-र्घृतम्। अत्रायुष्कारणमपि घृतं कार्य्यकारण-भावसम्बन्धसम्बन्धादायुस्तादात्म्येन प्रतीयते अन्य-वैलक्षण्येनाव्यभिचारेणायुष्करत्वं प्रयोजनम्। यथा च राजकीये पुरुषे गच्छति राजासौ गच्छतीत्यत्र स्वस्वामिभावलक्षणः सम्बन्धः। यथा वा अग्रमात्रेऽवयवे हस्तोऽयम्। अत्राव-यवावयविभावलक्षणः सम्बन्धः। ब्राह्मणेऽपि तक्षाणौ अत्र तात्कर्म्यलक्षणः सम्बन्धः। इन्द्रा-र्थासु स्थूणासु अमी इन्द्राः अत्र तादर्थ्यरूपः। एवमन्यत्रापि। निगीर्णस्य पुनर्विषयस्यान्यता-दात्म्यप्रतीतिकृत् साध्यवसाना। अस्याश्चतुर्षु भेदेषु पूर्व्वोदाहरणान्येव॥०॥

"सादृश्येतरसम्बन्धाः शुद्धास्ताः सकला अपि। सादृश्यात्तु मता गौण्यस्तेन षोड़श भेदिताः॥"५॥

ताः पूर्व्वोक्ता अष्टभेदा लक्षणाः सादृश्येतर-सम्बन्धाः कार्य्यकारणभावादयः। अत्र शुद्धानां पूर्व्वोदाहरणान्येव। रूढ़ावुपादानलक्षणा सारोपा गौणी यथा। एतानि तैलानि हेमन्ते सुखानि अत्र तैलशब्दस्तिलभवधर्म्मरूप-मुख्यार्थमुपादायैव सार्षपादिषु वर्त्तते। प्रयोजने यथा राजकुमारेषु तत्सदृशेषु च गच्छत्सु एते राजकुमारा गच्छन्ति। रूढ़ा-वुपादानलक्षणा साध्यवसाना गौणी यथा तैलानि हेमन्ते सुखानि। प्रयोजने यथा राजकुमारा गच्छन्ति। रूढ़ौ लक्षणलक्षणा सारोपा गौणी यथा राजा गौड़ेन्द्रं कण्टकं शोधयति। प्रयोजने गौर्व्वाहीकः। रूढ़ौ लक्षणलक्षणा साध्यवसाना गौणी यथा कण्टकं शोधयति। प्रयोजने यथा गौर्ज्जल्पति॥०॥

"व्यङ्ग्यस्य गूढ़ागूढ़त्वाद्द्विधा स्युः फल-लक्षणाः॥"६॥

प्रयोजने या अष्टभेदा लक्षणा दर्शितास्ताः प्रयोजनरूपव्यङ्ग्यस्य गूढ़ागूढ़तया प्रत्येकं द्विधा भूत्वा षोड़शभेदाः। तत्र गूढ़ः काव्यार्थभावना-परिपक्वबुद्धिविभवमात्रवेद्यः। यथा उपकृतं बहु तत्रेत्यादि। अगूढ़ोऽतिस्फुटतया सर्व्वजन-वेद्यः। यथा उपदिशति कामिनीनां यौवनमद एव ललितानि। अत्रोपदिशतीत्यनेन आविष्करोतीति लक्ष्यते आविष्कारातिशयश्चाभिधेयवत् स्फुटं प्रतीयते॥०॥

"धर्म्मिधर्म्मगतत्वेन फलस्यैता अपि द्विधा।"७॥

एता अनन्तरोक्ताः षोड़शभेदा लक्षणाः फलस्य धर्म्मगतत्वेन धर्म्मिगतत्वेन च प्रत्येकं द्विधा भूत्वा द्वात्रिंशद्भेदाः। क्रमेणोदाहरणम्।

"स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घनाः
वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः।
कामं सन्तु दृढ़ं कठोरहृदयो रामोऽस्मि सर्व्वं सहे
वैदेही तु कथं भविष्यति ह हा हा देवि धीरा भव॥"

अत्रात्यन्तदुःखसहिष्णुरूपे रामे धर्म्मिणि लक्ष्ये तस्यैवातिशयः फलम्। गङ्गायां घोष इत्यत्र तटादिषु लक्ष्येषु शीतत्वपावनत्वादिरूपधर्म्म-स्यातिशयः फलम्॥०॥

"तदेवं लक्षणाभेदाश्चत्वारिंशन्मता बुधैः।"

रूढ़ावष्टौ फले द्वात्रिंशदिति चत्वारिंशल्लक्षणा-भेदाः॥०॥ किञ्च।

"पदवाक्यगतत्वेन प्रत्येकं ता अपि द्विधा।"८॥

ता अनन्तरोक्ताः। अत्र पदगतत्वेन यथा गङ्गायां घोषः। वाक्यगतत्वेन यथा उपकृतं बहु तत्रेति। एवमशीतिप्रकारा लक्षणा। इति साहित्यदर्पणम्॥

लक्षा, स्त्री, (लक्षयतीति। लक्ष + अच्। टाप्।) लक्षम्। इत्यमरटीकायां भरतः। इति शब्दरत्नावली॥ ३३॥

लक्षित, त्रि, (लक्ष + क्त।) आलोचितः। दृष्टः। (यथा, रघुः। ५। ४४।

"स चापि लक्षितपूर्व्वकेतून शरैव्व नामयतया निरुद्ध॥")

अङ्कित। इति लक्षधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नम्। लक्षणाश्रयश्च॥

लक्षितलक्षणा, स्त्री लक्षिते लक्षणा। यथा द्विरेफपदेन वर्णद्वयविशिष्टाभ्रमरपदमर्थे ऽभिधायैव भ्रमरोपस्थितिः। अत्र रूढ़िरस्ति। प्रकृते तु रूढ़िप्रयोजनाभावा न्नैयायिकैरियमेव लक्षितलक्षणोच्यते। न च लक्षणाद्वयाभावात् कथमियं लक्षितलक्षणेति वाच्यम्। यत्र लक्षितात् पुनरन्याभिधान तत्रैव लक्षितलक्षणायाः परिभाषितत्वात्। इति साहित्यदर्पणटीकायां रामचरणतर्कवागीशः॥

लक्षिता, स्त्री, (लक्ष + क्त। स्त्रियां टाप्।) परकीयानायिकाविशेषः। अस्या लक्षणम्।

पुंश्चलीभावनिपुणा । उदाहरणं यथा,—
"यद्भाव यद्गतं यद्भूयाद्यन्नपि वा भयात् ।
यद्भवतु तद्भवतु वा विषमस्तत्र गोपनोपायः ॥"
इति रसमञ्जरी ॥

लक्ष्म [न्] क्ली (लक्ष्यतेऽनेन लक्ष्यते इति वा । लक्ष+मनिन् ।) चिह्नम् । (यथा, शाकुन्तले १ अङ्के ।
"सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥")
प्रधानम् । इत्यमरः । ३ । ३ । १२४ ॥

लक्ष्मक, क्ली चिह्नम् । इति शब्दरत्नावली ॥ (यथा, माघे । ९ । ३१ ।
"अथ लक्ष्मणानुगतकान्तवपु-
र्जलधिं विलङ्घ्य शिशिरद्युतिना ।
परिवारितं मदिरया च यया
तिमिरौघराक्षसकुलं बिभिदे ॥")
सारः । इत्यमरटीकायां भरतः ॥ (लक्ष्मीरस्य अस्तीति । लक्ष्मी+पामादित्वात् न । लक्ष्म्या अस्तीति गतत्वेनात्र साधनम् ।) श्रीयुक्ते, त्रि । इति मेदिनी । णे ७५ ॥

लक्ष्मण पुं (लक्ष्मणमस्यास्तीति । अर्शआदित्वात् अच् ।) सारसः । इति राजनिर्घण्टः । श्रीराम-भ्राता । इति मेदिनी । णे ७६ ॥ (यथा अध्यात्मरामायणे । १ । ३ । ४५ ।
"भरताद्भवतो नाम लक्ष्मणं लक्ष्मणान्वितम् ।
शत्रुघ्नं शत्रुहन्तारमेवं गुरुरभाषत ॥")
स च शेषांशः अयोध्यायां सुमित्रायां दशरथाज्जातः । इन्द्रजिद्वधोऽस्य चतुर्दशवर्ष-पर्यन्तं आहारनिद्रारहितत्वं यथा —
"एकदा रघुनाथश्च सीतया लक्ष्मणेन च ।
यातः सरसि नवन्यौ रम्ये पञ्चवटीतटे ।
उवाच सीतां हेमन्ते नव शुष्मान् निर्मलम् ।
तथाम्यग्रं त्वं यन्त वस्तु सुशीतलम् ॥
सनाथ नयन चक्रे सीतायै प्रदत्तं पुर ।
ततो ऽसौ लक्ष्मणाय चकारभुङ्क्ते ऽथ प्रभुः ।
लक्ष्मणस्तु यतीना न चैव भुङ्क्ते फलं जलम् ।
प्रेमसादरवाष्पेण सौमित्रिरवदत्तदा ॥
निद्रां न याति यो भुङ्क्ते चतुर्दश चतुर्दश ।
स एव पुरुषो योगी तदलीत रावणात्मजः ॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ११५ अध्यायः ॥

लक्ष्मणक स्त्री (लक्ष्मणस्य प्रसवकर्त्री ।) सुमित्रा । इति शब्दरत्नावली ॥

लक्ष्मणा स्त्री (लक्ष्मणमस्त्यस्या इति । अर्श आदित्वात् अच् । टाप् ।) श्वेतकण्टकारी । इति राजनिर्घण्टः । सारसी । औषधिभेदः । इति मेदिनी । णे ७६ ॥ पुत्रकन्दा लक्ष्मणाकन्द इति भाषा ख्यातः । तत्पर्यायः । पुत्रकन्दा २ पुत्रदा ३ नागिनी ४ नागाह्वा ५ नागपत्री ६ तुलिनी ७ मणिकी ८ कर्णिकापुष्पा ९ पु पर्णी १० । अस्य गुणाः । मधुरत्वम् । शीतत्वम् ।

स्त्रीवन्ध्यत्वनाशित्वम् । रसायनकरत्वम् । बल्यत्वम् । त्रिदोषशमनत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"पुत्रकाकाररक्ताल्पबिन्दुभिर्लाञ्छिता सदा ।
लक्ष्मणा पुत्रजननी वस्तगन्धाकृतिर्भवेत् ॥"
इति भावप्रकाशः ॥ ॥
(महाधिपतिकन्या । यथा भागवते । १० । ५८ । ५७ ।
"सुताञ्च मद्राधिपतेर्लक्ष्मणां लक्षणैर्युताम् ।
स्वयंवरे जहारैकः स सुपर्णः सुधामिव ॥")
दुर्योधनकन्या । सा तु श्रीकृष्णपुत्रेण साम्बेन विवाहिता । इति महाभारतम् ॥ (यथा, भागवते । १ । ६८ । १ ।
"दुर्योधनसुतां राजन् लक्ष्मणां समितिञ्जयः ।
स्वयंवरस्थामहरत् साम्बो जाम्बवतीसुतः ॥")

लक्ष्मी, स्त्री, (लक्षयति पश्यति उद्योगिनमिति । लक्ष+"लक्षेर्मुट् च ।" उणा० ३ । १६० । इति ईप्रत्ययो मुडागमश्च ।) विष्णुपत्नी । तत्पर्यायः । पद्मालया २ पद्मा ३ कमला ४ श्रीः ५ हरिप्रिया ६ इन्दिरा ७ लोकमाता ८ मा ९ क्षीरोदतनया १० रमा ११ । इत्यमरः ॥ जलधिजा १२ भार्गवी १३ । इति शब्दरत्नावली ॥ हरिवल्लभा १४ दुग्धाब्धितनया १५ क्षीरसागरसुता १६ । इति कविकल्पलता ॥ ॥
अथ लक्ष्मीमन्त्रः ।
"वासवं वह्निसमारूढं वामनेत्रेन्दुसंयुतम् ।
बीजमेतत् श्रियः प्रोक्तं सर्वकामफलप्रदम् ॥" ॥
अस्य पूजाप्रयोगः । प्रातःकृत्यादिपीठन्यासान्तं कर्म्म विधाय हृत्पद्मस्य पूर्वादिकेशरेषु मध्ये च पीठशक्तीः पीठमनुञ्च न्यसेत् । ॐ विभूत्यै नमः । एवं उन्नत्यै कान्त्यै सृष्ट्यै कीर्त्यै सन्नत्यै पुष्ट्यै उत्कृष्ट्यै ऋद्ध्यै । ततः श्रीकमलासनाय नमः । इत्यासनं विन्यस्य षडङ्गन्यासं कुर्यात् । शिरसि भृगुऋषये नमः मुखे निचृच्छन्दसे नमः । हृदि श्रियै देवतायै नमः । ततः कराङ्गन्यासौ कुर्यात् । श्रां अङ्गुष्ठाभ्यां नमः । श्रीं तर्जनीभ्यां स्वाहा । श्रूं मध्यमाभ्यां वषट् । इत्यादि । एवं श्रां हृदयाय नमः इत्यादिना च न्यसेत् । तथा च निबन्धे ।
"अङ्गानि दीर्घयुक्तेन रमाबीजेन कल्पयेत् ।"
ततो ध्यानम् ।
"कान्त्या काञ्चनसन्निभां हिमगिरिप्रख्यैश्चतुर्भिर्गजै-
र्हस्तोत्क्षिप्तहिरण्मयामृतघटैरासिच्यमानां श्रियम् ।
बिभ्राणां वरमब्जयुग्ममभयं हस्तैः किरीटोज्ज्वलां
क्षौमाबद्धनितम्बबिम्बललितां वन्देऽरविन्दस्थिताम् ॥"
एवं ध्यात्वा मानसैः सम्पूज्य शङ्खस्थापनं कुर्यात् । ततः पीठपूजां विधाय केशरेषु मध्ये च विभूत्यादिपीठशक्तिपूजां विधाय पुनर्ध्यात्वा आवा-

हनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधाय आवरणपूजामारभेत् । अग्न्यादिकोणेषु मध्ये दिक्षु च श्रां हृदयाय नमः । इत्यादिना षडङ्गं सम्पूज्य दलेषु पूर्व्वादितः ॐ वासुदेवाय नमः । एवं सङ्कर्षणाय प्रद्युम्नाय अनिरुद्धाय । विदिग्दलेषु ॐ दमकाय ॐ सलिलाय ॐ गुग्गुलवे ॐ कुरुण्टकाय । ततो दलाग्रेषु ॐ इन्द्रनिधये नमः । एवं दसुधारायै । पार्श्वे ॐ महानिधये शङ्खनिधये । पत्राग्रेषु पूर्व्वादिषु ॐ बलाकायै नमः । एवं विमलायै कमलायै वनमालिकायै विभीषिकायै मालिकायै शाङ्कर्य्यै वसुमालिकायै । तद्बहिरिन्द्रादीन् वज्रादींश्च पूजयेत् । ततो धूपादिविसर्जनान्तं कर्म्म समापयेत् । अस्य पुरश्चरणं द्वादशलक्षजपः । तथा च ।
"भानुलक्षं जपेन्मन्त्रं दीक्षितो विजितेन्द्रियः ।
तद्दशांशं जुहुयात् कमलैर्मधुराप्लुतैः ।
अथवा जुहुयात्तत्र बिल्वैर्वा मधुराप्लुतैः ।
बिल्वैः पत्रैर्वा जुहुयाद्विधिना साधकोत्तमः ।
वाग्भवं वनिता विष्णोर्माया मकरकेतनः ।
चतुर्व्वर्णात्मको मन्त्रश्चतुर्व्वर्गफलप्रदः ॥"
वाग्भवं ऐं । विष्णुवनिता श्रीं । माया ह्रीं । मकरकेतनः क्लीं । अस्य पूजादिकं पूर्व्ववद् बोध्यम् । तथा च ।
"रमाया कथिते पीठे तद्विधानेन पूजयेत् ।
कुर्य्यात् प्रयोगान् तत्स्थानेनैव साधकोत्तमः ।
निधिभिः सेव्यते नित्यं सर्वसम्पद्भिरन्विते ॥"
ध्याने तु विशेषः ।
"माणिक्यप्रतिमप्रभां हिमनिभैस्तुङ्गैश्चतुर्भिर्गजै-
र्हस्ताग्राहितरत्नकुम्भसलिलैरासिच्यमानां सदा ।
हस्ताब्जैर्वरदानमम्बुजयुगाभीतीर्दधानां हरेः
कान्तां काङ्क्षितपारिजातलतिकां वन्दे सरोजा-
सनाम् ॥"
अस्य पुरश्चरणं द्वादशलक्षजपः । तथा च ।
"भानुलक्षं जपेन्मन्त्रं तद्दशांशं सरोरुहैः ।
जुहुयादथवा पुष्पैः कमलैश्च त्रिमधुप्लुतैः ॥"
महालक्ष्म्यास्तु मन्त्रः । कमलासने वासिन्यै इदं मिति प्रोक्तो दशाक्षरः । तथा च निबन्धे ।
"श्रीयां वासिनि च तथा श्रवो माद्यन्तकस्वराः ।
वालेन्दुमैं प्रियो वह्निजाया प्रोक्तो दशाक्षरः ॥"
"श्रीवां नकारः । वासिनः । मधो मे । मादयत्वन्तः । वालेन्दुबीजे वह्निजाया स्वाहा ।" अस्य पूजाप्रयोगः । पूर्व्ववत् पीठन्यासान्तं विधाय ऋष्यादिन्यासं कुर्यात् । शिरसि दक्षऋषये नमः । मुखे विराट्छन्दसे नमः । हृदि श्रियै देवतायै नमः । तथा च शारदायाम् ।
"ऋषिः स्यादक्षो विराट्छन्दो देवता श्रीः प्रकी-
र्त्तिता ॥"
ततः कराङ्गन्यासौ । ॐ श्रीं नमो ऽङ्गुष्ठाभ्यां नमः । ॐ पद्मिन्यै तर्जनीभ्यां स्वाहा । ॐ विष्णुपत्न्यै नमो मध्यमाभ्यां वषट् । ॐ वरदायै अनामिकाभ्यां हुं ।

ॐ कमलरूपायै नमः करतलाभ्यां फट्। एवं हृदयादिषु। ॐ ऐं श्रियै नमो हृदयाय नम इत्यादि। तथा च निबन्धे।
"श्रियै हृदयमाख्यातं पद्मिन्यै शिर ईरितम्।
विष्णुपत्न्यै शिखा प्रोक्ता वरदायै तनुच्छदम्।
अस्त्रं कमलरूपायै नमोऽन्ता प्रणवादिकाः।"
ततो ध्यानम्।
"आसीना सरसीरुहे स्मितमुखी हस्ताम्बुजैर्बिभ्रती
दानं पद्मयुगाभये च वपुषा सौदामिनीसन्निभा।
मुक्ताहारविराजमानपृथुलोत्तुङ्गस्तनोद्भासिनी
पायाद्वः कमला कटाक्षविभवैरानन्दयन्ती हरिम्॥"
एवं ध्यात्वा मानसैः सम्पूज्य शङ्खस्थापनं कृत्वा पूर्व्वोक्तपीठशक्तिसहितपीठमन्त्रेण पूजां विधाय पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधायावरणपूजामारभेत्। अग्न्यादिचतुष्कोणेषु च ॐ श्रियै नमो हृदयाय नमः। ॐ पद्मिन्यै नमः शिरसे स्वाहा। ॐ विष्णुपत्न्यै नमः शिखायै वषट्। ॐ वरदायै नमः कवचाय हुम्। ॐ कमलरूपायै नमोऽस्त्राय फट्। ततः पूर्व्वादिदिक्षु पूर्व्ववत् बलाकादि पूजयेत्। तद्बहिरिन्द्रादीन् वज्रादींश्च पूजयेत्। ततो धूपादिविसर्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणं द्वादशलक्षजपः। तथा च।
"द्वादशलक्षं मनुमस्य जपेद्विजितेन्द्रियः।
दशांशं जुहुयादग्नौ मधुराक्तैः सरोरुहैः॥" ●।
अथ लक्ष्मीस्तोत्रम्।
ईश्वर उवाच।
"त्रैलोक्यपूजिते देवि! कमले विष्णुवल्लभे।
यथा त्वं सुस्थिरा कृष्णे तथा भव मयि स्थिरा॥
ईश्वरी कमला लक्ष्मीश्चला भूतिर्हरिप्रिया।
पद्मा पद्मालया सम्पदुच्चैः श्रीः पद्मधारिणी॥
द्वादशैतानि नामानि लक्ष्मीं सम्पूज्य यः पठेत्।
स्थिरा लक्ष्मीर्भवेत्तस्य पुत्त्रदारादिभिः सह॥"
इति तन्त्रसारः॥
विष्णुपुराणोक्तलक्ष्मीस्तोत्रं तत्रैव १ अंशे ९ अध्याये द्रष्टव्यम्॥ ●। अथ लक्ष्मीपूजानिरूपणम्। यथा, स्कन्दपुराणे।
"पौषे चैत्रे तथा भाद्रे पूजयेत् स्त्रियः श्रियम्।
सिंहे धनुषि मीने च स्थिते सप्ततुरङ्गमे॥
प्रयत्नात् पूजयेल्लक्ष्मीं शुक्लपक्षे गुरोर्दिने।
नापराह्णे न रजनौ च नासिते न चतुर्द्दशि॥
दर्शाद्याश्चैव नन्दायां रिक्तायाञ्च विवर्जयेत्।
त्रयोदश्यां तथाष्टम्यां कमलां नैव पूजयेत्॥
न पूजयेत् शनौ भौमे न बुधे नैव भार्गवे।
पूजयेत्तु गुरोर्वारे चाभावे रविसोमयोः॥
गुरुवारे हि पूजा च यत्नेन यदि लभ्यते।
तत्र पूज्या तु कमला धनपुत्त्रविवर्द्धिनी॥
न कुर्य्यात् प्रथमे मासि नैव कुर्य्याद्विसर्ज्जनम्।
न यष्टीं वादयेत्तत्र नैव भिण्टीं प्रदापयेत्॥
पौषे च दशमी प्रोक्ता चैत्रके पञ्चमी तथा।
नभस्ये पूर्णिमा ज्ञेया गुरुवारे विशेषतः॥
आढकं धान्यसम्पूर्णं नानाभरणभूषितम्।
सुगन्धिशुक्लपुष्पैश्च शुक्लपक्षे प्रपूजयेत्॥
पौषे तु पिष्टकं दद्यात् परमान्नञ्च चैत्रके।
पिष्टकं परमान्नञ्च नभस्ये तु विशेषतः॥
गुरुवारसमायुक्ता नभस्ये पूर्णिमा शुभा।
कमलां पूजयेत्तत्र पुनर्जन्म न विद्यते॥
एकेन कलसेनैव कमलां पूजयेद्यदि।
इह लोके सुखं प्राप्य परत्र वैष्णवं व्रजेत्॥
प्राङ्मुखो पूजयेल्लक्ष्मीं पश्चिमाननसंस्थिताम्।
गन्धपुष्पधूपदीपनैवेद्याद्युपचारकैः॥
गन्धद्वारेतिमन्त्रेण गन्धेनावाहयेद्बुधः।
श्रिये जात इति ह्याभ्यां पुष्पैरावाहयेत्ततः॥"
ततो ध्यानम्।
"हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदसमावहाम्॥
गौरवर्णां द्विभुजां सितपद्मोपरिस्थिताम्।
विष्णोर्वक्षःस्थलस्थाञ्च जगच्छोभाप्रकाशिनीम्॥
ध्यायेदाद्यां सदा देवीं पूजाकाले विशेषतः।
ततः पूजादिकं कुर्य्यात् श्रीं लक्ष्म्यै नम इत्यृचा॥
लक्ष्मीः पद्मालया पद्मा कमला श्रीर्धृतिः क्षमा।
तुष्टिः पुष्टिस्तथा कान्तिर्मेधा विद्या रमा स्मृतिः॥
हरिप्रिया तथा विष्णोः प्रिया नारायणस्य च।
एताभिः सप्तदशभिर्लक्ष्मीनामादिभिरर्च्चयेत्॥
लक्ष्मीनारायणाभ्याञ्च नमोऽन्तेन प्रपूजयेत्।
शिवञ्च कुबेरञ्च पूजयेत्तदनन्तरम्॥'
तथाचारे।
"न कृष्णपक्षे रिक्तायां दशमीद्वादशीषु च।
अयनादिचतुष्के च लक्ष्मीपूजां न कारयेत्॥"
इति कालचन्द्रिका॥
दीपान्वितामावस्यायां लक्ष्मीपूजाविधिर्यथा —
"तुलाराशिगते भानौ अमावास्यां नराधिप।
स्नात्वा देवान् पितॄन् भक्त्या सम्पूज्याथ प्रणम्य च॥
कृत्वा तु पार्व्वणश्राद्धं दधिक्षीरगुडादिभिः।
ततोऽपराह्णसमये घोषयेन्नगरे नृपः।
लक्ष्मीः सम्पूज्यतां लोका उल्काभिश्चाभिवेष्ट्य तान्॥
अमावास्या यदा रात्रौ दिवाभागे चतुर्द्दशी।
पूजनीया तदा लक्ष्मीर्विज्ञेया सुखरात्रिका॥
अमावास्यां यदा देवाः कार्त्तिके मासि केशवात्।
अभयं प्राप्य सुप्ताश्च क्षीरोदार्णवपार्श्वतः॥
लक्ष्मीर्दैत्यभयान्मुक्ता सुप्ता सुखाम्बुजोदरे।
चतुर्युगसहस्रान्ते ब्रह्मा स्वपिति पङ्कजे॥
अतोऽत्र विधिवत् कार्य्या मनुष्यैः सुखरात्रिका।
दिवा तत्र न भोक्तव्यमृते बालातुराज्जनात्॥
प्रदोषसमये लक्ष्मीं पूजयित्वा यथाक्रमम्।
दीपवृक्षास्तथा कार्य्याः शक्त्या देवगृहेष्वपि॥
चतुष्पथश्मशानेषु नदीपर्व्वतसानुषु।
वृक्षमूलेषु गोष्ठेषु चत्वरेषु गृहेषु च॥
वस्त्रैः पुष्पैः शोभितव्याः क्रयविक्रयभूमयः।
दीपमालापरिक्षिप्ते प्रदोषे तदनन्तरम्॥
ब्राह्मणान् भोजयित्वादौ विभज्य च बुभुक्षितान्।
अलङ्कृतेन भोक्तव्यं नववस्त्रोपशोभिना।
स्निग्धैर्मुग्धैर्विदग्धैश्च बान्धवैर्भृतकैः सह॥"
अथ लक्ष्मीपूजायां पुष्पदानकाले।
"नमस्ते सर्व्वदेवानां वरदासि हरिप्रिये।
या गतिस्त्वत्प्रपन्नानां सा मे भूयात्त्वदर्च्चनात्॥"
लक्ष्म्यै नम इत्यनेन वारत्रयं पूजयेत्।
"सुखरात्र्यां प्रदोषे तु कुबेरं पूजयन्ति ये।"
इति वचनबलात् कुबेरमपि पूजयन्ति।
"धनदाय नमस्तुभ्यं निधिपद्माधिपाय च।
भवन्तु त्वत्प्रसादान्मे धनधान्यादिसम्पदः॥"
इति पठित्वा कुबेराय नम इति च पूजयेत्। ततो देवगृहादिषु दीपान् दद्यात्। तत्र मन्त्रः।
"अग्निर्ज्योती रविर्ज्योतिश्चन्द्रज्योतिस्तथैव च।
उत्तमः सर्व्वज्योतीषां दीपोऽयं प्रतिगृह्यताम्॥'
ततो ब्राह्मणान् सम्पूज्य भोजयित्वा स्वयं भुक्त्वा सुखं सुप्त्वा प्रत्यूषे भविष्योक्तं कर्म्म कुर्य्यात्। तथा,—
"सुखरात्रिकयः काले प्रदीपोज्ज्वलितालये।
वस्त्रैर्म्माल्यैरलङ्कृत्य भार्य्या कुसुमैरर्च्चयेत्॥
प्रणिपत्य च कार्य्यं लक्ष्मीमङ्गलहेतवे।
गोरोचनाघृतञ्चैव दद्यान्मूर्द्धि सर्व्वतः॥"
लक्ष्मीपूजामन्त्रः।
"विश्वरूपस्य भार्य्यासि पद्मे पद्मालये शुभे।
महालक्ष्मि नमस्तुभ्यं सुखरात्रिं कुरुष्व मे॥
वर्षाकाले महाघोरे यन्मया दुष्कृतं कृतम्।
सुखरात्रिप्रभातेऽद्य तन्मे लक्ष्मीर्व्यपोहतु॥
या रात्रिः सर्व्वभूतानां या च देवेष्ववस्थिता।
संवत्सरप्रिया या च सा ममास्तु सुमङ्गला॥
माता त्वं सर्व्वभूतानां देवानां सृष्टिसम्भवा।
आख्याता भूतले देवि! सुखरात्रि नमोऽस्तु ते॥"
लक्ष्म्यै नम इति च पूजयेत्। इति तिथ्यादितत्त्वम्॥ ●। तस्या उपाख्यानं यथा —
नारद उवाच।
"श्रीकृष्णस्यात्मनश्चैव निर्गुणस्य निराकृतेः।
सावित्रीयमसंवादे श्रुतं सुनिर्म्मलं यशः॥
तद्गुणोत्कीर्त्तनं सत्यं मङ्गलानाञ्च मङ्गलम्।
अधुना श्रोतुमिच्छामि लक्ष्म्युपाख्यानमेव च॥
केनादौ पूजिता सापि किम्भूता केन वा पुरा।
तद्गुणोत्कीर्त्तनं सत्यं वद वेदविदाम्बर॥
श्रीनारायण उवाच।
सृष्टेरादौ पुरा ब्रह्मन् कृष्णस्य परमात्मनः।
देवी वामांशसम्भूता बभूव रासमण्डले॥
अतीवसुन्दरी श्यामा न्यग्रोधपरिमण्डला।
यथा द्वादशवर्षीया शश्वत् सुस्थिरयौवना॥
श्वेतचम्पकवर्णाभा सुखदृश्या मनोहरा।
शरत्पार्व्वणकोटीन्दुप्रभाप्रच्छादितानना॥
शरन्मध्याह्नपद्मानां शोभामोचनलोचना।

सा च देवी द्विधा भूता सहसैवेश्वरेच्छया ।
समा रूपेण वर्णेन तेजसा वयसा त्विषा ।
यशसा वाससा मूर्त्त्या भूषणेन गुणेन च ।
स्मितेन वीक्षणेनैव वचसा गमनेन च ।
मधुरेण स्वरेणैव नयेनानुनयेन च ।
तद्वामांशो महालक्ष्मीर्दक्षिणांशश्च राधिका ।
राधादौ वरयामास द्विभुजञ्च परात्परम् ।
महालक्ष्मीश्च तत्पश्चाच्चकमे कमनीयकम् ।
कृष्णस्तद्गौरवेणैव द्विधारूपो बभूव ह ।
दक्षिणांशश्च द्विभुजो वामांशश्च चतुर्भुजः ।
चतुर्भुजाय द्विभुजो महालक्ष्मीं ददौ पुरा ।
लक्ष्यते दृश्यते विश्वं स्निग्धदृष्ट्या ययानिशम् ।
देवीषु या च महती महालक्ष्मीश्च सा स्मृता ।
द्विभुजो राधिकाकान्तो लक्ष्मीकान्तश्चतुर्भुजः ।
शुद्धसत्त्वस्वरूपेण गोपैर्गोपीभिरावृतः ।
चतुर्भुजश्च वैकुण्ठं प्रययौ पद्मया सह ।
सर्व्वांशेन समौ द्वौ तौ कृष्णनारायणौ परौ ।
महालक्ष्मीश्च योगेन नानारूपा बभूव सा ।
वैकुण्ठे च महालक्ष्मीः परिपूर्णतमा रमा ।
शुद्धसत्त्वस्वरूपा च सर्व्वसौभाग्यसंयुता ।
प्रेम्णा सा च प्रधाना च सर्व्वासु रमणीषु च ।
स्वर्गे च स्वर्गलक्ष्मीश्च शक्रसम्पत्स्वरूपिणी ।
पातालेषु च मर्त्त्येषु राजलक्ष्मीश्च राजसु ।
गृहलक्ष्मीर्गृहेष्वेव गृहिणी च कलांशया ।
सम्पत्स्वरूपा गृहिणां सर्व्वमङ्गलमङ्गला ।
गवां प्रसूः सा सुरभी दक्षिणा यज्ञकामिनी ।
क्षीरोदसिन्धुकन्या सा श्रीरूपा पद्मिनीषु च ।
शोभास्वरूपा चन्द्रे च सूर्य्यमण्डलमण्डिता ।
विभूषणेषु रत्नेषु फलेषु च जलेषु च ।
नृपेषु नृपपत्नीषु दिव्यस्त्रीषु गृहेषु च ।
सर्व्वशस्येषु वस्त्रेषु स्थानेषु संस्कृतेषु च ।
प्रतिमासु च देवानां मङ्गलेषु घटेषु च ।
माणिक्येषु च मुक्तासु माल्येषु च मनोहरा ।
मणीन्द्रेषु च हीरेषु क्षीरेषु चन्दनेषु च ।
वृक्षशाखासु रम्यासु नवमेघेषु वस्तुषु ।
वैकुण्ठे पूजिता सादौ देवी नारायणेन च ।
द्वितीये ब्रह्मणा भक्त्या तृतीये शङ्करेण च ।
विष्णुना पूजिता सा च क्षीरोदे भारते मुने ॥
स्वायम्भुवेन मनुना मानवेन्द्रैश्च सर्व्वतः ।
ऋषीन्द्रैश्च मुनीन्द्रैश्च सद्भिश्च गृहिभिर्भवे ।
गन्धर्व्वाद्यैश्च नागाद्यैः पातालेषु च पूजिता ।
शुक्लाष्टम्यां भाद्रपदे कृता पूजा च ब्रह्मणा ।
भक्त्या च पक्षपर्य्यन्तं त्रिषु लोकेषु नारद ॥
चैत्रे पौषे च भाद्रे च पुण्ये मङ्गलवासरे ।
विष्णुना निर्म्मिता पूजा त्रिषु लोकेषु भक्तितः ।
वर्षान्ते पौषसङ्क्रान्त्यां मेध्यामावाह्य प्राङ्गणे ।
मनुस्तां पूजयामास सा भूता भुवनत्रये ।
राजेन्द्रेण पूजिता सा इन्द्रेणैव मङ्गला ।
केदारेणैव नीलेन नलेन सुबलेन च ।
ध्रुवेणोत्तानपादेन शक्रेण बलिना तथा ।
कश्यपेन च दक्षेण कर्द्दमेन विवस्वता ।
प्रियव्रतेन चन्द्रेण कुवेरेणैव वायुना ।
यमेन वह्निना चैव वरुणेनैव पूजिता ॥
एवं सर्व्वत्र सर्व्वैश्च वन्दिता पूजिता सदा ।
सर्व्वैश्वर्य्याधिदेवी सा सर्व्वसम्पत्स्वरूपिणी ॥"
अपि च ।

नारद उवाच ।

"नारायणप्रिया सा च वरा वैकुण्ठवासिनी ।
वैकुण्ठाधिष्ठातृदेवी महालक्ष्मीः सनातनी ॥
कथं बभूव सा देवी पृथिव्यां सिन्धुकन्यका ।
किं तद्ध्यानञ्च स्तवनं सर्व्वं पूजाविधिक्रमम् ।
पुरा केन स्तुतादौ सा तन्मे व्याख्यातुमर्हसि ॥

श्रीनारायण उवाच ।

पुरा दुर्व्वाससः शापात् भ्रष्टश्रीश्च पुरन्दरः ।
बभूव देवसङ्घश्च मर्त्त्यलोकश्च नारद ॥
लक्ष्मीः स्वर्गादिकं त्यक्त्वा रुष्टा परमदुःखिता ।
गत्वा लीना च वैकुण्ठे महालक्ष्म्याञ्च नारद ॥
तदा शोकाद्ययुर्द्देवा दुःखिता ब्रह्मणः सभाम् ।
ब्रह्माणञ्च पुरस्कृत्य ययुर्वैकुण्ठमेव च ॥
वैकुण्ठे शरणापन्ना देवा नारायणे परे ।
अतीवदैन्ययुक्ताश्च शुष्ककण्ठौष्ठतालुकाः ॥
तदा लक्ष्मीश्च कलया पुरा नारायणाज्ञया ।
बभूव सिन्धुकन्या सा शक्रसम्पत्स्वरूपिणी ॥
तदा मथित्वा क्षीरोदं देवा दैत्यगणैः सह ।
सम्प्रापुश्च वरं लक्ष्मीं ददृशुस्ताञ्च तत्र हि ॥
सुरादिभ्यो वरं दत्त्वा वनमालाञ्च निर्म्मलाम् ।
ददौ प्रसन्नवदना तुष्टा क्षीरोदशायिने ॥
देवाश्चाप्यसुरग्रस्तं राज्यं प्रापुश्च तद्वरात् ।
तां सम्पूज्य च संस्तूय सर्व्वत्र च निरापदः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३५ ।३६ अध्यायौ ।
लक्ष्म्या अवस्थानस्थानानि यथा —
"यं यं दद्यौ गुरुर्देवो माता तातश्च बान्धवः ।
अतिथिः पितृलोकाश्च न यामि तस्य मन्दिरम् ॥
मिथ्यावादी च यः शश्वदनध्यायी च यः सदा ।
सत्त्वहीनश्च दुःशीलो न गेहं तस्य याम्यहम् ॥
सत्यहीनः स्थाप्यहारी मिथ्यासाक्ष्यप्रदायकः ।
विश्वासघ्नः कृतघ्नो यो न यामि तस्य मन्दिरम् ॥
चिन्ताग्रस्तो भयग्रस्तः शत्रुग्रस्तोऽतिपातकी ।
ऋणग्रस्तोऽतिकृपणो न गेहं यामि पापिनाम् ॥
दीक्षाहीनश्च शोकार्त्तो मन्दधीः स्त्रीजितः सदा ।
पुंश्चलीपतिपुत्रो यो तद्गेहं नैव याम्यहम् ॥
पुंश्चल्यन्नपाचकश्च यो शूद्राणां याजकः सदा ।
शूद्रान्नभोजी तद्याजी तद्गेहं नैव याम्यहम् ॥
यो दुर्व्वाक् कलहाविष्टः कलिं शश्वन्निषेवते ।
स्त्री प्रधाना गृहे यस्य न यामि तस्य मन्दिरम् ॥
यत्र नास्ति हरेः पूजा तदीयगुणकीर्त्तनम् ।
नोत्साहश्च प्रशंसा च न यामि तस्य मन्दिरम् ॥
कन्यावेदविक्रेता नरघाती च हिंसकः ।
नरकागारसदृशं न यामि तस्य मन्दिरम् ॥
स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं सुरस्य च ।
यो हरेद्ब्राह्मणीनश्च न यामि तस्य मन्दिरम् ॥
यत् कर्म्म निन्दिताचारी शठधीः कुरुते शठः ।
स पापी पुण्यहीनश्च न यामि तस्य मन्दिरम् ॥
मातरं पितरं भार्य्यां गुरुपत्नीं गुरोः सुतम् ।
अनाथां भगिनीं कन्यामनन्याश्रयबान्धवान् ॥
कार्पण्याद्यो न पुष्णाति सञ्चयं कुरुते सदा ।
तद्गृहान्नरकाकारान् यामि नाशुचिनीरा ।
दन्तं पुरीषसंयुक्तं यस्तु पश्यति सन्ध्ययोः ।
यः शेते स्निग्धपादश्च न यामि तस्य मन्दिरम् ॥
अधौतपादशायी यो नग्नः शेतेऽतिनिन्दितः ।
सन्ध्याशायी दिवाशायी न यामि तस्य मन्दिरम् ॥
मूर्ध्नि तैलं पुरो दत्त्वा योऽन्यदङ्गमुपस्पृशेत् ।
ददाति चात्मगात्रे वा न यामि तस्य मन्दिरम् ॥
दत्त्वा तैलं मूर्ध्नि गात्रे विलिप्य च स्पृशेद्धनम् ।
प्रणमेदाचरेत् पुष्पं न यामि तस्य मन्दिरम् ॥
छला हिनस्ति नखरैर्नखरैर्विलिखेन्महीम् ।
गात्रे पादे मलं यस्य न यामि तस्य मन्दिरम् ॥
दन्तं वस्त्रं यस्य मलं रूक्षमस्तकम् ।
विकृतो याचहासी च न यामि तस्य मन्दिरम् ॥
मन्त्रविद्योपजीवी च ग्रामयाजी चिकित्सकः ।
सूपकारो देवलश्च न यामि तस्य मन्दिरम् ॥
विवाहं धर्म्मकार्य्यं वा यो निहन्ति च कोपतः ।
दिवामैथुनकारी यो न यामि तस्य मन्दिरम् ॥"
इत्यादि ब्रह्मवैवर्त्ते गणेशखण्डे लक्ष्मीचरित्र-
नाम २६ अध्यायः ॥ * ॥ अपि च ।

"कुचैलिनं दन्तमलोपधारिणं
बह्वाशिनं निष्ठुरवाक्यभाषिणम् ।
सूर्य्योदये चास्तमये च शायिनं
विमुञ्चति श्रीरपि चक्रपाणिनम् ॥
नित्यं छिद्रकुचाणां धरणिविलिखनं पादयो रुक्षमादि
दन्तानामप्यशौचं वसनमलिनता रूक्षता मूर्द्धजानाम् ।
द्वे सन्ध्ये चापि निद्रा विवसनशयनं पादयोर्गात्रदेह
कार्ष्णि पीठे च वाद्यं निधनहसनयोर्देह स्नापि लक्ष्मीः ॥
शिरः स्नातेन चरणौ समालभ्यैतौ
वराङ्गनाङ्गसमभोगनम् ।
अवमत्य विप्रमधर्म्मेषु
निरन्तरं सिञ्चमानमपि वट ॥
यस्य कस्य तु पुष्पस्य माल्यस्य निर्मितं ।
शिरसा धार्य्यमाणस्य अलक्ष्मीः प्रतिहन्यते ॥
दीपस्य पश्चिमा छाया छाया शय्यासनस्य च ।
रजकस्य तु यत्तीर्थमलक्ष्मीस्तत्र तिष्ठति ॥"
इत्यादि गारुडे ११४ अध्यायः ॥ * ॥
अनुचिते तस्याः स्थितिर्यथा —

देवा ऊचुः ।

"कमले कमलालये ! केषु स्थानेष्ववस्थिता ।
पुण्यानां वर्णं किं वा प्रयच्छसि वसति ।

दत्तात्रेय उवाच ।
हृत्वा पादस्थिता लक्ष्मीर्निलयं संप्रयच्छति ।
सक्थिनि संस्थिता वस्त्रं रत्नं नानाविधं वसु ॥
कलत्रदा गुह्यसंस्था क्रोडस्थापत्यदायिनी ।
मनोरथान् पूरयति पुरुषाणां हृदि स्थिता ॥
लक्ष्मीर्लक्ष्मीवतां श्रेष्ठ कण्ठस्था कण्ठभूषणैः ।
अभीष्टबन्धुदारैश्च तथाश्लेषं प्रवासिभिः ॥
मिष्टान्नं वाक्यलावण्यमाज्ञामवितथां तथा ।
मुखसंस्था कवित्वञ्च यच्छत्युदधिसम्भवा ॥
शिरोगता सन्त्यजति ततोऽन्यं याति संश्रयम् ।
सैव शिरोगता दैत्यान् परित्यजति चाप्युतम् ॥"
इति मार्कण्डेयपुराणे दत्तात्रेयचरिताध्यायः ॥ * ॥
अथ लक्ष्मीचरित्रम् ।
श्रीकृष्ण उवाच ।
"मेरुपृष्ठे सुखासीनां लक्ष्मीं पृच्छति केशवः ।
केनोपायेन देवि त्वं तुष्टा भवसि निश्चला ॥
श्रीरुवाच ।
शुक्लाः पारावता यत्र गृहिणी यत्र चोज्ज्वला ।
अकलहा वसतिर्यत्र तत्र तिष्ठ वसाम्यहम् ॥
धान्यं सुवर्णसदृशं तण्डुला रजतोपमाः ।
अन्नञ्चैवातुषं यत्र तत्र तस्य वसाम्यहम् ॥
यः संविभागी प्रियवाक्यभाषी
वृद्धोपसेवी प्रियदर्शनश्च ।
अल्पप्रलापी न च दीर्घसूत्री
तस्मिन् सदाहं पुरुषे वसामि ॥
यो धर्मशीलो विजितेन्द्रियश्च
विद्याविनीतो न परोपतापी ।
अगर्वितो यश्च गुणानुरागी
तस्मिन् सदाहं पुरुषे वसामि ॥
चिरं स्नाति द्रुतं भुङ्क्ते पुष्पं घ्राय न जिघ्रति ।
यो न पश्येत् स्त्रियं नग्नां विवस्त्रं स च मे प्रियः ॥
त्यागः सत्यञ्च शौचञ्च दया एते महागुणाः ।
यः प्राप्नोति गुणानेतान् महावान् स च मे प्रियः ॥
कर्मण्यकर्मणि तु त्याग एव विशिष्यते ।
काले देशे च पात्रे च स च त्यागः प्रशस्यते ॥
नित्यमामलके लक्ष्मीर्बिल्वे वसति शोभने ।
नित्यं शङ्खे च पद्मे च नित्यं श्रीः शुक्लवाससि ॥
वसामि पद्मोत्पलशङ्खमध्ये
वसामि चन्द्रे च महेश्वरे च ।
नारायणे चैव वसुन्धरायां
वसामि नित्योत्सवमन्दिरेषु ॥"
वसुन्धरायामित्यत्र वसौ धरायामिति वा पाठः ।
"यथोपदिष्टा गुरुभक्तियुक्ता
पत्युर्वचो नाक्रमते च नित्यम् ।
नित्यञ्च रक्ता पतिशुश्रूषणे च
तस्याः शरीरे नियतं वसामि ।
शुद्धा च धीरा प्रियवादिनी च
सौभाग्ययुक्ता च सुशोभना च ।
लावण्ययुक्ता प्रियदर्शना या
पतिव्रता या च वसामि तासु ।
श्यामा सुगात्री तनुमध्यभागा
सुभ्रूः सुकेशी सुमतिः सुशीला ।
गम्भीरनाभिः समदन्तपङ्क्तिः
तस्याः शरीरे नियतं वसामि ॥
या पापरक्ता पिशुनस्वभावा
स्वाधीनकान्तं परिभूयते च ।
अमर्षकामा कुचरित्रशीला
तामप्रजां प्रेतमुखीं त्यजामि ॥
पुष्पं पर्युषितं पूतिं शयनं वस्तुभिः सह ।
भुक्तासनं कुमारीश्च दूरतः परिवर्जयेत् ॥
चिताङ्गारमस्थीनि वह्निं भस्म द्विजञ्च गाम् ।
न पादेन स्पृशेत् पात्रं कार्पासास्थि तुषं गुरुम् ॥
नखकेशोदकञ्चैव मैथुनं पर्वसन्धयोः ।
वर्जयेन्नग्नशायित्वमेकाकी मिष्टभोजनम् ॥
शिरः स्पृश्य चरणौ सम्पूर्णौ
निशाङ्गनासेवनमल्पभोजनम् ।
अनग्नशायित्वमपर्वमैथुनं
चिरप्रनष्टां श्रियमानयन्ति षट् ॥
सम्मार्जनीरजोवातं निर्गुण्डीलङ्घनं तथा ।
रात्रौ बिल्वफलाश्च कपित्थं वर्जयेद्बुधः ॥
स्नानाचमनयोर्वाद्ये अशूचा मलपादयोः ।
उच्छिष्टस्पर्शने मूर्द्ध्नि स्नानाभ्यङ्गञ्च वर्जयेत् ॥
शयनञ्चान्धकारे च रात्रिवासो दिने तथा ।
स्नानाम्बरं कुचैलश्च वर्जयेत् शुष्कभोजनम् ॥
परेणोद्धृतं वस्त्रं स्वयं माल्यापकर्षणम् ।
आत्मस्तवमदश्च न कुर्यात् क्षौरमङ्गनम् ॥
शुक्रवारे च मत्तेभ शिलापिष्ट दर्पणे ।
स्वयं नामैव मर्द्दित मालिका नैव धारयेत् ॥
तारकां पुष्पवन्तौ च न पश्येत्सुधियः पुमान् ।
मेघेन्द्रधनुषी परस्त्रीं नग्नां यान्तं दिवाकरम् ॥
कुर्यान्नान्यधनाकाङ्क्षी परस्त्रीणां तथैव च ।
परेषां प्रतिकूलञ्च उदिताके प्रबोधनम् ॥
नखदन्तकरस्थेन च तिकाङ्गारवारिभिः ।
वृथा विलेखनं भूमौ न कुर्यादात्मकाङ्क्षया ॥
स्वयं दोहं स्वयं माल्यं स्वयं हस्ते च चन्दनम् ।
आपितस्य यदि चौरं शक्रादपि हरेत् श्रियम् ॥"
स्वयं दोहमित्यत्र पयितव्येति वा पाठः ।
"न निन्द्यां शयने विद्ये पादयोर्नैकलम्पता ।
प्रतिकूलं चरेत् स्त्रीणां भुक्त्वा च दन्तधावनम् ॥
अहतं मांसमत्स्य मध्याह्ने स्त्रियमन्यथा ।
भयवाङ्मनसैव शक्रादपि हरेत् श्रियम् ॥
मलैर्युक्तः परदारसेवी
आचारहीनः परवञ्चकश्च ।
स्त्रीजितचारी परिवादशील
स्त्वं निकृष्टं दम्भमयं त्यजामि ॥
शयनञ्चार्द्रपादेन रात्रिवासो दिने तथा ।
नोत्तरीयमधः कुर्यात् शुष्कपादेन भोजनम् ॥
अशुचि स्नानपश्चात् दुर्गन्धामलवाससाम् ।
अभूषणानुपूर्व्याश्च न कुर्यादाश्रमस्तुतम् ॥
कर्णे च कण्ठे प्राणे तथा करतलेऽपि च ।
पादे पृष्ठे तथा भाले न कुर्याच्छुक्लेपनम् ॥
चतुर्थ्यां हस्त संयो शुक्लपक्षे गणश्च ।
हरिद्रा कण्ठमध्ये च पादपृष्ठे तथाग्रुमः ।
शस्त्रं पुष्पं यथा तोयं हस्तेनैव मस्तोऽपिमम् ।
गृहीत प्रथमं वस्त्रं वर्जयेत्तु कदाचन ।
अनाद्यं शरदभ्रच्छाया सम्मार्जनीरजः ।
स्त्रीणां पादरजो राजन् शक्रादपि हरेत्
श्रियम् ॥
कुचैलिनं दन्तमलप्रधारिणं
बह्वाशिनं निष्ठुरवाक्यभाषिणम् ।
सूर्योदये चास्तमिते तु शायिनं
विमुञ्चति श्रीरपि चक्रपाणिनम् ॥"
बह्वाशिनमित्यत्र बह्वाशिनमिति वा पाठः ।
"नित्यं छिन्नकुचानां चिन्तितमलिनं पादयो-
रत्यशौचं
शय्याङ्गे तैलहीनं वसनमलिनतायन्तथ मङ्ग-
लानाम् ।
द्वे सन्ध्ये चापि निद्रा विवसनशयनं माषशाला-
तिरेकः
खाट्टे पीठे च वाद्यं हरति धनपतेः केशव
स्यापि लक्ष्मीम् ॥"
धनपतेरित्यत्र स्वपतः इति वा पाठः ।
"एवं यः कुरुते नित्यं यथोक्तानि च केशव ।
तुष्टा भवामि तस्याहं स्थिरा निश्चला यथा ॥
श्रीभाषितमिदं स्तोत्रं प्रातरुत्थाय यः पठेत् ।
तद्गृहं विपुलं रम्यं नित्यं भवति नान्यथा ॥
बाधितो मुच्यते रोगी बद्धो मुच्येत बन्धनात् ।
आपदस्तस्य नश्यन्ति तमः सूर्योदये यथा ॥"
इति स्कन्दपुराणे लक्ष्मीकेशवसंवादे लक्ष्मी-
चरित्रं समाप्तम् ॥ * ॥ दुर्गा । यथा,—
"स्तुतिः सिद्धिरिति ख्याता श्रिया संवर्द्धनाच्च या ।
लक्ष्मीर्या लक्षणा यापि क्षमात् सा शान्ति-
रुच्यते ॥"
इति देवीपुराणे ४५ अध्यायः ॥
सम्पत्तिः । शोभा । ऋद्ध्यौषधम् । हरिप्रियौ-
षधम् । पद्मिनीवृक्षः । इति मेदिनी । मे, २८ ॥
वीरा । वीरयोषित् । इति शब्दरत्नावली ॥
स्थलपद्मिनी । हरिद्रा । शमी । श्वेतम् । मुक्ता ।
इति राजनिर्घण्टः ॥ मोक्षप्राप्तिः । इति
चण्डीटीकायां नागभट्टः ॥ (शोभा । यथा,
कुमारे । १ । ३८ ।
"तथागतैवाबलरक्षमार्गे-
ज्योतिःप्ररोहैरुदितैः शिरस्थः ।
अचाल्यवालाग्निविचौक्तमार्थी
बालस्य लक्ष्मीं ग्लपयन्तमिन्दोः ॥")

लक्ष्मीकान्तः, पुं, (लक्ष्म्याः कान्तः ।) नारायणः ।
यथा,—
"नमः कमलनेत्राय हरये परमात्मने ।
जगतः पालयित्रे च लक्ष्मीकान्त नमोऽस्तु ते ॥"
इति जन्माष्टमीव्रतकथा ॥

लक्ष्मीगृहं, क्ली, (लक्ष्म्याः गृहमाश्रयस्थानम् ।)
रक्तोत्पलम् । इति त्रिकाण्डशेषः । लक्ष्मी-
गेहञ्च ।

लक्ष्मीजनार्दनः, पुं, (लक्ष्म्या सहितो जनार्दनः ।)
शालग्रामविशेषः । तस्य लक्षणं यथा,—
"एकद्वारे चतुश्चक्रं नवीननीरदोपमम् ।

लक्ष्मीपतिगाढचो मेघो रहितो यथमाचया ।"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥
(तथा, देवीभागवते । ९ । ४२ । ५९ ।)

लक्ष्मीताल पुं (लक्ष्मीयुक्तस्तालः ।) श्रीतालवृक्षः । इति राजनिर्घण्टः ॥ सङ्गीतशास्त्रोक्त-तालविशेषः । तस्य द्रुतलघुविरामक्रमो यथा,—
"द्रौ लौ द्रू ग्लौ विरामान्तौ द्रुतौ लू द्विविरा मकः ।
विरामान्तौ द्रुतौ लघु द्रुतौ लघुविरामकः ॥"
इति सङ्गीतरत्नाकरे लक्ष्मीताल ॥

लक्ष्मीनारायण, पुं (लक्ष्म्यान्वितो नारायणः ।) शालग्रामविशेषः । तस्य लक्षणं यथा,—
"एकद्वारे चतुश्चक्रं वनमालाविभूषितम् ।
नवीननीरदाकारं लक्ष्मीनारायणाभिधम् ॥"
इति ब्रह्मवैवर्त्तपुराणम् ॥

लक्ष्मीनृसिंह पुं, (लक्ष्मीयुक्तो नृसिंहः ।) शालग्रामविशेषः । तस्य लक्षणं यथा,—
"द्विचक्रं विस्तृतास्यञ्च वनमालाविभूषितम् ।
लक्ष्मीनृसिंहं विख्यातं गृहिणाञ्च सुखप्रदम् ॥"
इति ब्रह्मवैवर्त्तपुराणम् ॥

लक्ष्मीपति, पुं (लक्ष्म्याः पतिः ।) वासुदेवः । नरपतिः । इति मेदिनी । ती, २१५ ॥ (यथा किराते । १ । ४४ ।
"अथ क्षमामेव निरस्तविक्रम
चिराय पर्य्येषि सुखस्य साधनम् ।
विहाय लक्ष्मीपतिलक्ष्म कार्म्मुकं
जटाधरः सन् जुहुधीह पावकम् ॥")
लवङ्गवृक्षः । पूगः । इति विश्वः ॥

लक्ष्मीपुत्र, पुं, (लक्ष्म्याः पुत्रः ।) कामदेवः । घोटकः । इति मेदिनी । रे, २८३ ॥ कुशः । लवः । इति शब्दरत्नावली ॥

लक्ष्मीपुष्प, पुं, (लक्ष्मीयुक्तं सौन्दर्य्यविशिष्टं पुष्पमिवास्य ।) पद्मरागमणिः । इति हेमचन्द्रः ॥

लक्ष्मीफल, पुं (लक्ष्म्याः स्वर्णवर्णं फलं यस्य ।) बिल्ववृक्षः । इति राजनिर्घण्टः ॥

लक्ष्मीवान् [त्] पुं (लक्ष्मीः शोभाऽस्त्यस्येति । मतुप् । मस्य वः ।) पनसवृक्षः । इति शब्दमाला ॥ श्वेतरोहितवृक्षः । इति राजनिर्घण्टः ॥ (विष्णुः । यथा, महाभारते । १३ । १४९ । २९ ।
"धर्म्मकृद्धर्म्मगुप्तो लक्ष्मीवान् समितिञ्जयः ॥")

लक्ष्मीवान् [त्] त्रि, (लक्ष्मीरस्त्यस्येति ।) श्रीयुक्तः । धनवान् । तत्पर्य्यायः । लक्ष्मणः २ श्रीलः ३ श्रीमान् ४ । इत्यमरः ॥ (यथाह कश्चित् ।
"गुणैः परामराक्रान्तैः श्रियै विषमदैः धिया ।
लक्ष्मीवन्तो न जानन्ति प्रायेण परवेदनाम् ॥")

लक्ष्मीवेष्ट, पुं (लक्ष्मीयुक्तो वेष्टः ।) श्रीवेष्टः । इति राजनिर्घण्टः ॥

लक्ष्मीश, पुं (लक्ष्म्या ईशः ।) विष्णुः । इति हलायुधः ॥

लक्ष्मीसमाह्वा स्त्री (लक्ष्म्याः सम आह्वा यस्याः ।) सीता । इति शब्दरत्नावली ॥

लक्ष्मीसहज, पुं, (लक्ष्म्याः सह जातः इति । जन् + डः । क्षीराब्धिजातत्वादस्य तथात्वम् ।) चन्द्रः । इति शब्दरत्नावली ॥

लक्ष्म्याराम, पुं, (लक्ष्म्या आरामः ।) वनभेदः । इति शब्दमाला ॥

लक्ष्य, क्ली, (लक्ष्यते यदिति । लक्ष + ण्यत् ।) शरव्यम् । तत्पर्य्यायः । लक्षम् २ शरव्यम् ३ । इत्यमरः । २ । ८ । ८६ ॥ प्रतिमानः ४ वेध्यम् ५ । इति जटाधरः ॥ वेधम् ६ । इति शब्दरत्नावली ॥ (यथा कुमारे । ३ । ६४ ।
"कामस्तु बाणावसरं प्रतीक्ष्य
पतङ्गवद्वह्निमुखं विविक्षुः ।
उमासमक्षं हरबद्धलक्ष्यः
शरासनज्यां मुहुराममर्श ॥")

लक्ष्य, त्रि, लक्षणया बोध्यः । इति साहित्यदर्पणम् ॥ (लक्ष्यते इति । लक्ष + ण्यत् ।) दर्शनीयः । इति लक्षधात्वर्थदर्शनात् ॥ (ज्ञेयः । इत्यमरः ॥ यथा, रघुः । ६ । ८१ ।
"रोमाञ्चलक्ष्येण स गात्रयष्टिं
भित्त्वा निराक्रामदरालकेश्याः ॥"
अनुमेयः । इति मल्लिनाथः ॥ यथा, कुमारे । ५ । ७४ ।
"इति द्विजातौ प्रतिकूलवादिनि
प्रवेपमानाधरलक्ष्यकोपया ।"
तथा च रघुः । ४ । ५ ।
"छायामण्डललक्ष्येण तमदृश्या किल स्वयम् ।
पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितम् ॥")

लख, सर्पि । इति कविकल्पद्रुमः ॥ (भ्वा० पर० सक० सेट् ।) लखति । सर्पि गतौ । इति दुर्गादासः ॥

लखि र सर्पि । इति कविकल्पद्रुमः ॥ (भ्वा० पर० सक० सेट् ।) र, लङ्खति । सर्पि गतौ । इति दुर्गादासः ॥

लग, र अङ्गे । गतौ । इति कविकल्पद्रुमः ॥ (भ्वा० पर० अङ्गे अक० गतौ सक० सेट् ।) र, लङ्गति । अङ्गो गतिवैकल्यम् । इति दुर्गादासः ॥

लग, क स्वदे । इति कविकल्पद्रुमः ॥ (चुरा० पर० सक० सेट् ।) क, लागयति । स्वदे आस्वादे । स्वदे इति स्वद क आस्वादने । इत्यस्य णेरनित्यत्वे भावे अलि रूपम् । इति दुर्गादासः ॥

लग, म ए सङ्गे । इति कविकल्पद्रुमः ॥ (भ्वा० पर० अक० सेट् ।) म लगयति । ए, अलगीत् । लगति अधरं ओष्ठे । इति दुर्गादासः ॥

लगई, त्रि चपलः । इति त्रिकाण्डशेषः ॥

लगित, त्रि, सङ्गयुक्तम् । लागा इति भाषा । इति लगधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नम् ॥

लगुड, पुं दण्डः । लाठी इति भाषा । इत्यमरः ॥ लगुडो वंशादिमयो दण्डः । लौहमयोऽप्ययम् । इति सुभूतिः ॥ लगुडो लौहमयो खदिरमयो पलाशादिमयो । इति वटीकायां भरतः ॥

(अस्यातिपरिमाणादि यथा, सुश्रुते ।
"अङ्गुष्ठ पञ्चमात्रं प्रमाणं सुश्रुतोक्तं ।
लौहमयप्रमाणं च कुर्य्यात् सुवेदर ।
एकादशो द्वादशाङ्गुलं तथा वसुदशाङ्गुलः ।
उत्तमं मानमेव वैष्णवं प्रोक्तं तथा ।
चलनी शतपञ्चाशत् पञ्चमी मेव विद्वै ।
दण्डाय परिषष्टौ तेन युधि तु प्रभुः ॥")

लग्न, क्ली, (लगति सक्ते इति । लग सङ्गे + "क्षुब्धस्वान्तध्वान्तलग्नेति ।" ७ । २ । १८ । इति निपातनात् साधु ।) राशीनामुदयः । इत्यमरः ॥ राशि प्रति राशिस्थानस्य प्रकारः । अहोरात्र मध्ये द्वादशराशीनाम् उदयमात्रम् । उदयः पूर्व्वाचलसंयोग । तेषां क्रमेण उदयावस्थानानि अष्ट गौ लघुनी षोडशे कोटिमाने विख्यातः स्वस्य वा । इति लघुटीकायां भरतः ॥ तेषां मानपरिमाणं यथा —
"रामोऽगवेदे-४ । ४० भमविषु मेषे । ५ । ७ ग्राहो रुषे ५ । ६ पद्म सप्तावेदे ५ । ४० । बाणे कृषीरे ५ । ३१ विषयेऽङ्गुणे ५ । २९ । क्रमोत्क्रमात्तुलादिमानम् ॥"
तथा हि ।

मेषस्य	४ । ४० ।	तुलायाः	५ । २९ ।
वृषस्य	४ । १० ।	वृश्चिकस्य	५ । ३१ ।
मिथुनस्य	५ । ६ ।	धनुषः	५ । ४ ।
कर्कटस्य	५ । ४ ।	मकरस्य	५ । ६ ।
सिंहस्य	५ । ३१ ।	कुम्भस्य	४ । १० ।
कन्यायाः	५ । २९ ।	मीनस्य	४ । ४० ।

इति दीपिका ॥ * ॥ इदमवधूतानिर्णयप्रोक्तम् प्रति कलिकाताक्षदेशे वर्त्तमानोपार्व्वमानानि प्रामाणिककारिका यथा —
"वेदोऽङ्गे ४ । ६ बोऽश्मवेदे ४ । ४८ द्विरसेष वर्षे ५ । २७ बोऽग्नरोमामुखाभे ५ । ४ । भारावाराम्यपाशे-५ । १९ मैश्यगपवने ५ । ५९ घटविभि-५ । १६ चन्द्रवेदे ५ । ४१ । वसुप्सामि ५ । १९ वसुषोऽश्मविभि ४ । ४५ इषवोऽङ्गेषुभि ४ । ५७ बोऽश्मवेदे-४ । ४० । मेषादेषोनतिर्व्वि विपिनगदिमते शाकमेनि दशाहि ॥" * ॥
उभयमताज्ञानयोरिदं प्रति रविभोग्यं यथा
"लग्नतरुष्णदम्भ द्विष तत्तन्नक्षत्र क्रमत पदम् ।
विपरीत रवेर्भोग्येन वा तत्त्वमप्यपि ॥"
इति ज्योतिषम् ॥

एतयोर्विवरणं यथा —
तत्र प्राचीनमतमानम् ।

राशयः	नव्यमतम् ।		मानमतम् ।	
राशयः	पलम् ।	विपलम् ।	दण्ड ।	पलम् ।
१ मेषः ।	७ ।	११ ।	३ ।	४० ।
२ वृषः ।	८ ।	११ ।	४ ।	१० ।
३ मिथुनम् ।	९ ।	१२ ।	५ ।	६ ।
४ कर्कटः ।	११ ।	९ ।	५ ।	४ ।
५ सिंहः ।	१२ ।	५२ ।	५ ।	३१ ।
६ कन्या ।	१० ।	५८ ।	५ ।	२९ ।

लग्ना	दिनधृतम् ।		मासधृतम् ।	
यथा	पलम् ।	विपलम् ।	दण्ड ।	पलम् ।
७ तुला ।	१० ।	५८ ।	५ ।	२९ ।
८ वृश्चिक ।	११ ।	२२ ।	५ ।	३९ ।
९ धनु ।	११ ।	२० ।	५ ।	३० ।
१० मकर ।	१० ।	१२ ।	५ ।	६ ।
११ कुम्भ ।	८ ।	३४ ।	४ ।	१० ।
१२ मीन ।	७ ।	३४ ।	२ ।	४० ।

तत्र स्वदेशाद्युदिकलग्नमानम् ।

लग्ना	दिनधृतम् ।		मासधृतम् ।	
यथा	पलम् ।	विपलम् ।	दण्ड ।	पलम् ।
१ मेष ।	८ ।	१२ ।	४ ।	६ ।
२ वृष ।	९ ।	३६ ।	४ ।	४८ ।
३ मिथुनम् ।	१ ।	५४ ।	५ ।	२० ।
४ कर्कट ।	११ ।	२ ।	५ ।	४ ।
५ सिंह ।	११ ।	८ ।	५ ।	३४ ।
६ कन्या ।	१ ।	५८ ।	५ ।	२९ ।
७ तुला ।	११ ।	१२ ।	५ ।	३६ ।
८ वृश्चिक ।	११ ।	२२ ।	५ ।	४१ ।
९ धनु ।	१ ।	१८ ।	५ ।	१९ ।
१० मकर ।	९ ।	१ ।	४ ।	३५ ।
११ कुम्भ ।	७ ।	५६ ।	२ ।	५८ ।
१२ मीन ।	७ ।	३४ ।	२ ।	४० ।

अथ जन्मकालीनलग्नस्थग्रहस्थितफलम् ।
“लग्ने सूर्य्येऽधिरोगी शशिनि बलयुतो
रूपवान् वित्तयुक्तो
भौमे चण्डः सकामी प्रचुरतनयके सर्व-
शास्त्रार्थवेत्ता ।
जीवे दाता सविद्यः सुकविरथ गते भार्गवे
मन्त्रवेद्यः
सौरौ कण्डूतियाम्बयमपि च नियतं बन्धितो
धर्महीनः ॥”
इति ज्योतिस्तत्त्वम् ॥ ● ॥
अपि च ।

हरिवाच ।
“उन्मर्त्य समारभ्य राशौ भाग स्थितो ग्रहः ।
सराशारौ प्रवेशहि सङ्गि वहुभिरासम
विग्रामा ॥
मीने मेषे च पञ्च स्युश्चतस्रो वृषकुम्भयोः ।
मकरे मिथुने तिस्रः पञ्च चापे च कर्कटे ॥
सिंहे च वृश्चिके षट् च सप्त कन्या तुले तथा ।
एता लग्नप्रमाणेन घटिकाः परिकीर्त्तिताः ॥
स्वर्पूर्वाशाधनादेवस्वाशीलविभामरा ।
लग्नेन्या हि वै मत्स्य लग्ना मेषान्योऽथवा ॥
मेषलग्ने भवेद्वन्ध्या वृषे भवति कामिनी ।
मिथुने सुभगा कन्या वेश्या भवति कर्कटे ॥
सिंहे चैवाल्पपुत्रा च कन्यायां रूपसंयुता ।
तुलायां रूपसौन्दर्य्यं वृश्चिके कर्कशा भवेत् ॥
सौभाग्यं धनुषि ख्यातं मकरे नीचगामिनी ।
कुम्भे चैवाल्पपुत्रा स्यान्मीने वैराग्यसंयुता ॥
तुला कर्कटको मेषो मकरश्चैव राघव ।
चरकार्य्याणि कुर्य्याच्च स्थिरकार्य्याणि चैव हि ।
पञ्चाननो वृषः कुम्भो वृश्चिकः स्युः स्थिराणि हि ।
कन्या धनुश्च मीनश्च मिथुनं द्विस्वभावकम् ॥
द्विस्वभावानि कर्म्माणि कुर्य्यादेषु विचक्षणः ।
यात्रा चरेण कर्त्तव्या प्रवेशश्च स्थिरेण तु ।
देवस्थापनवैवाह्यं द्विस्वभावेन कारयेत् ॥”
इति गारुडे ६१ अध्यायः ॥

लग्नः, पुं, (लग + क्तः । निपातनात् साधुः । यद्वा, लस्ज + क्तः । “ओ लस्जी । लग्न लग्नवान् । लस्जेरोदित्त्वान्नत्वकादिकभावे गत्वं स्यात् ।” इति लग्नपदे दुर्गादासः ।) स्तुतिपाठकः । तत्पर्य्यायः । प्रातर्गेयः २ स्तुतिव्रतः ३ । इति त्रिकाण्डशेषः ॥ सक्तः ॥ इति जटाधरः ॥

लग्न, त्रि, (लस्ज + क्तप्रत्ययेन साधुः ।) सक्तः । लज्जितः । इति मेदिनी ॥

लग्नकः, पुं, (लग्न एव । स्वार्थे कन् ।) प्रतिभूः । इत्यमरः ॥ हे जामिन इति जामिन इति च ख्यातिः । तत्पर्य्याये लग्नकः । ओ लस्जी व्रीडे । क्तः । स्वार्थे कन् । प्रतिनिधिर्भवति प्रतिभूः । क्विप् । इति तट्टीकायां भरतः ॥

लघिका, स्त्री, नधिका । इत्यमरटीका ॥

लघ इ शोषे । इति कविकल्पद्रुमः ॥ (भ्वा० पर० सक० सेट् ।) इ, लङ्घति । शोष इह अल्पीकरणम् ।
‘य व्याधिरतिदीर्घाश्च कदाचित् न लङ्घति ।’
इति चक्रायुधः ॥
गतावप्यस्ति । अध्वे यानमिव लङ्घेताम् । इति दुर्गादासः ॥

लघ, इ क लिपि । इति कविकल्पद्रुमः ॥ (चुरा० पर० सक० सेट् ।) इ क, लङ्घयति । लिपिर्दीप्तिः । इति दुर्गादासः ॥

लघ इ ङ अशनगत्योः । इति कविकल्पद्रुमः ॥ (भ्वा० आत्म० सक० सक० च सेट् ।) इ ङ, लङ्घते । अशनं भोजनाभावः । तथा च ।
‘ये युवा लङ्घने प्रोक्तास्ते युवा लघुभोजने ।’
इति वैद्यकम् ॥
लङ्घने उपवासे इत्यन्ये । इति दुर्गादासः ॥

लघटः, पुं, (लङ्घते मध्यस्थानमत्युच्चैरपरस्यामि पतति पुनः इत्यतो गच्छतीति वा । लङ्घ + “लङ्घेर्नलोपश्च ।” उणा० ४।१४४ । इति अटिः । नलोपश्च धातोः ।) वायुः । इत्युणादिकोषः ॥

लघटिः, पुं, (लघ गतौ + अटिः । इरभावः ।) वायुः । इत्युणादिकोषः ॥

लघिमा [न्] पुं, (लघोर्भावः । लघु + “पृथ्वादिभ्य इमनिज्वा ।” ५ । १ । १२२ । इति इमनिच् ।) लघुत्वम् । (यथा रघुः । ११ । १० ।
“धाता वरिमेण्वि रजोविरहितः
समगुणैर्मे लघिमानमाता ॥”)
अनु शिवस्याष्टैश्वर्य्यान्तर्गत ऐश्वर्य्यविशेषः । यथा
“लघिमा वशिता
यत्र महिमाणिमा ।
॥”
त प्रैयस ।

(अवरुद्धमतलम् । ह्रस्वत्वम् । यथा, आर्य्यासप्तशत्याम् । ६ ।
“अयि लघिमा पश्चात् महतामपि विधीयते नहि
महिम्ना ।
वामन इति त्रिविक्रममभिदधति दशावतार
विदः ॥”)

लघिष्ठः, त्रि, अयमनयोरेषां वा अतिशयेन लघुः इत्यर्थे इष्ठप्रत्ययेन निष्पन्नः । अतिशयलघुयुक्तः । इति व्याकरणम् ॥ (यथा, विदग्धमुखमण्डने ।
“भविष्णी रम्भोरु त्रिभुवनजयश्लाघिरधुना
न रामोऽपि ख्याता न युधि पुरतो लक्ष्मणयुतः ।
प्रभिन्नलक्ष्मीवैभवपरमधुना वानरचमू-
र्लघिष्ठेदं षष्ठाक्षरपरविलोपात् पठ पुनः ॥”
सीतारावणयोरुक्तिप्रत्युक्तिरियम् । षष्ठाक्षरलोपे तेन वाक्यम् । यथा । “दशवदनश्लाघि ।’ “ख्याता युधि ।’ “उभे चमूः ॥)

लघीयान् [स्] त्रि, अयमनयोरेषां वा अतिशयेन लघुः इत्यर्थे ईयसुप्रत्ययेन निष्पन्नः । अतिशयलघुत्वयुक्तः । इति व्याकरणम् ॥ (यथा, महाभारते । २ । ६२ । १४ ।
“न वै समृद्धिं पालयते लघीयान्
यत्नाः समानेष्यति राजपुत्रि ! ॥”)

लघु क्ली, (लङ्घते अनेनेति । लङ्घ + “लङ्घिबंह्योर्नलोपश्च ।” उणा० १ । ३० । इति कुः । धातोर्नलोपश्च ।) शीघ्रम् । इत्यमरः ॥ (यथा, रामायणे । २ । ४६ । २१ ।
“यावदेव तु संप्राप्तास्तावदेव वय लघु ।
रथमारोह गच्छामः पन्थानमकुतोभयम् ॥”)
कृष्णागुरु । इति मेदिनी । घे, ५ ॥ लामज्जकम् । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा —
“लामज्जकं सुनालं स्यादमृणालं लयं लघु ।
इष्टकापथकं सेव्यं नलदं जालमूलकम् ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
हस्ताश्विनीपुष्यनक्षत्राणि । यथा, बृहत्संहितायाम् । ९८ । ९ ।
“लघु हस्ताश्विनपुष्याः
पण्यरतिज्ञानभूषणकलाद्य ।
शिल्पौषधयानादीन्
सिद्धिकराणि प्रदिष्टानि ॥”
कालपरिमाणविशेषः । यथा, भागवते । ३ । ११ । ७ ।
“यथाम् पञ्च विदुः काष्ठां लघुता दश पञ्च च ।
लघूनि वै समाम्नाता दश पञ्च च नाडिका ॥”
पुं, प्राणायामविशेषः । यथा, मार्कण्डेये । ३९ । १३—१४ ।
“लघुमध्योत्तरीयाख्यः प्राणायामस्त्रिधोदितः ।
तस्य प्रमाणं वक्ष्यामि तदलर्क शृणुष्व मे ॥
लघुर्द्वादशमात्रस्तु द्विगुणः स तु मध्यमः ।
त्रिगुणाभिस्तु मात्राभिरुत्तमः परिकीर्त्तितः ॥”
लघु स्त्री, स्पृक्का नाम औषधि । x
घे, ३ ॥ (तथोक्तं यथा —

सूक्ष्मादिपाकप्रयाणश्यौ देवी मत्स्याख्या मता लघुः ।
मत्स्याख्या मधु कोटिमालवल्कीति कथ्यते ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

लघु, त्रि (लङ्घ+कु । नलोपश्च ।) अगुरु । (यथा,—
कथादपि लघुस्तूलस्तूलादपि च याचकः ।
न नीतो वायुना कस्मादयमायनशङ्कया ॥"
इत्युद्भटः ॥)
मनोज्ञ । (इत्यमरः । यथा, रघुः । ११ । १४ ।
"ताभ्यमां कमलयोनिमां तथा
शालिनाथ न परिश्रमश्च्छिदाम् ।
दयनेन लघुना यथा तयो-
र्प्रीतिमापुरुभयोस्तपस्विनः ॥")
निःसार । इति मेदिनी । वे ५ । (यथा रघुः । १२ । ६६ ।
"श्रुत्वा रामः प्रियोदन्तं मेने तत्सङ्गमोत्सुकः ।
महार्णवपरिक्षेपं लङ्कायाः परिखालघुम् ॥")
क्षमः । इति हेमचन्द्रः । ७ । व्याकरणोक्त लघुस्वरो यथा । ह्रस्वो लघुः दीर्घो गुरुरिति वाररुचकारणाम्यते । तथा संयोगे सति ह्रस्वोऽपि गुरुर्भवतीत्यस्य इति वर्त्तनाथ । इति दुर्गसिंहकृततत्त्वप्रकाशिका । ७ । छन्दःशास्त्रोक्त लघुस्वरो यथा,—
"मस्त्रिगुरुस्त्रिलघुश्च नकारो
भादिगुरुः पुनरादिलघुर्यः ।
जो गुरुमध्यगतो रलमध्यः
सोऽन्तगुरुः कथितोऽन्तलघुस्तः ॥
गुरुरेको गकारस्तु लकारो लघुरेककः ॥"
इति छन्दोमञ्जरी ॥

लघुकाय, पुं (लघुः कायो यस्य ।) छागः । इति त्रिकाण्डशेषः । क्षुद्रशरीरश्च ॥

लघुकाश्मर्य्य, पुं (लघु काश्मर्य्यः ।) कट्फल वृक्षः । इति राजनिर्घण्टः ॥

लघुखट्विका स्त्री, (लघु खट्विका ।) क्षुद्रखट्वा । तत्पर्य्यायः । खट्वाकी २ । इति हारावली । २ ८ ॥

लघुगङ्ग, पुं (लघुगङ्ग ।) अभिधोपुष्पस्तवकस्य बालि । यथा,—
"उच्चः पूर्व्वमवालास्य सुगमकरीन्दुरादिभिः
लघु
मातामितवसन्तिमन्दं यत्राय पुष्पाभिवर्षा
लघु ॥"
इति दीपिका ॥

लघुगम, पुं (लघुगर्व्व इव ।) निवातकवच । इति हारावली । १८० ॥

लघुचिर्भिटा, स्त्री, (लघुश्चिर्भिटा ।) गोरक्षकर्कटी । इति राजनिर्घण्टः ॥

लघुजङ्गल, पुं, लावकपक्षी । इति त्रिकाण्डशेषः ॥

लघुदन्ती स्त्री, (लघुः क्षुद्रा दन्ती ।) क्षुद्रदन्ती-वृक्षः । यथा,—
"लघ्वी दन्ती विशल्या च स्यादुदुम्बरपर्ण्यपि ।
तथैरण्डफला शीघ्रा श्येनघण्टा घुणप्रिया ।
वराहाङ्गी च कथिता निकुम्भश्च मकूलकः ॥"
अस्या गुणाः ।
"दन्तीद्वयं सरं पाके रसे च कटु दीपनम् ।
गुदाङ्कुराश्मशूलास्रकण्डुकुष्ठविदाहनुत् ।
तीक्ष्णोष्णं हन्ति पित्तास्रकफशोथोदरक्रिमीन् ॥"
इति भावप्रकाशः ॥
तत्फलगुणाः ।
"तदृक्फलं भवेत् स्वादुरसपाकयोः ।
शीतलं स्पर्शपित्तघ्नं गुरुशोथकफापहम् ॥"
इति भावप्रकाशः ॥

लघुदुन्दुभि, पुं (लघुर्दुन्दुभि ।) दमकवाद्यम् । इति शब्दरत्नावली ॥

लघुद्राक्षा, स्त्री, (लघुः क्षुद्रा द्राक्षा ।) काकली द्राक्षा । इति राजनिर्घण्टः ॥

लघुनामन्, [न्] स्त्री, (लघु लघुत्वयुक्तं नाम यस्य ।) अगुरु । इति शब्दचन्द्रिका ॥

लघुपञ्चमूल, क्ली, (लघु क्षुद्रं पञ्चमूलम् ।) क्षुद्र पञ्चमूलपाचनम् । तत्तु शालपर्णीपृश्निपर्णी-बृहतीकण्टकारीगोक्षुरकयुक्तम् । यथा,—
"शालपर्णी पृश्निपर्णी वार्त्ताकी कण्टकारिका ।
गोक्षुरः पञ्चभिश्चैतैः कनिष्ठं पञ्चमूलकम् ॥"
अस्य गुणाः ।
"पञ्चमूलं लघु स्वादु बल्यं पित्तानिलापहम् ।
नात्युष्णं बृंहणं ग्राहि ज्वरश्वासाश्मरीप्रणुत् ॥"
इति भावप्रकाशः ॥

लघुपत्रक, पुं, (लघूनि पत्राणि यस्य । कप् ।) रोचनी । गुण्डारोचनी इति ख्यात । इति शब्दचन्द्रिका ॥

लघुपत्री, स्त्री (लघूनि पत्राणि यस्याः । ङीष् ।) अश्वत्थोदुम्ब । इति राजनिर्घण्टः ॥

लघुपिच्छल, पुं (लघु पिच्छलः ।) भूकम्-दारकः । इति राजनिर्घण्टः ॥

लघुपुष्प, पुं, (लघूनि क्षुद्राणि पुष्पाणि यस्य ।) भूमिकदम्बः । इति राजनिर्घण्टः ॥ (भूमिकदम्बशब्देऽस्य विवृतिर्ज्ञेया ॥)

लघुबदर, पुं (लघुः क्षुद्रो बदरः ।) क्षुद्रकोलिः । तत्पर्य्यायः । कर्कन्धू २ बहुकण्टक ३ सूक्ष्म पत्र ४ सुकर्ष्म ५ मधुर ६ बदरी ७ शिशुप्रिय च । इति राजनिर्घण्टः ॥ अस्य गुणाः ।
"कर्कन्धु क्षुद्रबदरं कथितं पूर्व्वसूरिभिः ।
अम्लं स्यात् क्षुद्रबदरं कषायं मधुरं मनाक् ।
स्निग्धं गुरु च तिक्तञ्च वातपित्तापहं स्मृतम् ।
शुष्कं भिन्नविड्ं वर्ण्यं लघु तृष्णाक्लमा
पहम् ॥"
इति भावप्रकाशः ॥
अस्य पक्वफलगुणाः । मधुराम्लत्वम् । श्लेष्म वातकारित्वम् । रुच्यत्वम् । स्निग्धत्वम् । वृष्यकारकत्वम् । ईषत्पित्तनिराकरणत्वञ्च । इति राजनिर्घण्टः ॥

लघुबन्दरी स्त्री (लघुः क्षुद्रा बन्दरी ।) मुद्गरी । इति राजनिर्घण्टः ॥

लघुब्राह्मी, स्त्री, (लघुः क्षुद्रा ब्राह्मी ।) क्षुद्र-ब्राह्मी । तत्पर्य्यायः । मत्स्याक्षी २ मत्स्यगन्धा ३ । इति राजनिर्घण्टः ॥

लघुमन्थ पुं (लघुः क्षुद्रो मन्थः) क्षुद्राग्नि मन्थः । इति राजनिर्घण्टः ॥

लघुमांस पुं, (लघु लघ्वं मांसं यस्य ।) तित्तिरि पक्षी । इति त्रिकाण्डशेषः ॥

लघुमांसी, स्त्री, गन्धमांसी । इति राजनिर्घण्टः ॥

लघुलय, क्ली, (लघु शीघ्रं लीयते इति । ली+ अच् ।) वीरणमूलम् । इत्यमरः ॥

लघुवल्लभा, स्त्री, (वटा वल्लभा यस्याः वा । लघुः वटावला ।) लघूदुम्बरिका । इति राजनिर्घण्टः ॥

लघुविक्रम पुं (लघुः क्षिप्रकारी विक्रमो यस्य ।) शीघ्रवेधी । इति हेमचन्द्रः । ३ । ४११ । (प्राणविक्रमोऽपि । यथा, कथासरित्सागरे । ४२ । १११ ।
"स राजपुत्रस्त्रिलेव दृष्टकस्य तस्थिवान् ।
भूय, प्रचण्डप्रहारेण लघुविक्रमो विदारयेत् ॥"
यथा च ।
"मात्रापितृभ्रातृरायो दृढकर्मा मयं गतो ।
लघुहस्तः शुचिः शूरः सन्नोपस्करभित् ।
प्रत्युत्पन्नमतिर्धीमान् व्यवसायी विशारदः ।
सत्यधर्मपरो यश्च स भिषक् पाद उच्यते ॥"
इति सुश्रुते सूत्रस्थाने ३४ अध्यायः ॥)

लघुवैदुम्बरा, स्त्री, (लघुर्वैदुम्बरा ।) लघूदुम्बरिका । इति राजनिर्घण्टः ॥

लघूदुम्बरिका स्त्री (लघुः क्षुद्रा उदुम्बरिका ।) क्षुद्रोदुम्बरिका । छोट डुमुर इति भाषा । तत्पर्य्यायः । लघुवल्लभा २ लघुवैदुम्बरा ३ लघुबदरायवा ४ अब्धादुदुम्बरिका ५ । एव वीर्य्यविपाकेषु उदुम्बरात् किञ्चिन्नयूनगुणम् । इति राजनिर्घण्टः ॥

लघ्वी, स्त्री, (लघु+ङीष् ।) वालतृणम् । (यथा,—
"तृणौ लिखो शरावश्च लघ्वी चैव तिरश्चताम् ।
सर्षपामाशु जीवेत अतुमातर्जयेषिका ॥"
इति वैद्यकचक्रपाणिदत्तसंग्रहीतोषाधिकारे ।)
स्पन्दनभेद । इति मेदिनी । वे, १ । पृक्का । इति राजनिर्घण्टः ॥

लङ्का, स्त्री, (रमन्तेऽस्यामिति । रम्+बाहुलकात् कः । रस्य लत्वम् । इत्युज्ज्वलः । ३ । ४ ।) रावणपुरी । (यथा, नैषधे । १ । १० ।
"दिशो च लङ्कामयनि सदोर्थ
मात्मा पुराणि च आश्रितायुः ॥")
ज्योतिःशास्त्रमते या च पृथिव्या मध्यभागे तिष्ठति । लङ्कोदयात् परमक्रान्त्या अहर्निशं समप्रमाणं भवति । यथा,—
"लङ्का कुमध्ये यमकोटिरस्याः
प्राक् पश्चिमे रोमकपत्तनञ्च ।

अधस्तनं सिद्धपुरं सुमेरुः
सौम्येऽथ याम्ये वडवानलश्च ।
कुवृत्तपादान्तरितानि तानि
स्थानानि षड्गोलविदो वदन्ति ॥"

अपि च ।

"यल्लङ्कोज्जयिनीपुरोपरि कुरुक्षेत्रादिदेशान् स्पृशन्
सूत्रं मेरुगतं बुधैर्निगदिता सा मध्यरेखा भुवः ।
आदौ प्राग्दिवसोऽपरत्र विषये पश्चाद्धि रेखोदयात्
स्यात्तस्मात् क्रियते तदन्तरभवं खेटेष्वृणं स्वं फलम् ॥"

इति सिद्धान्तशिरोमणिः ॥ * ॥

अथ लङ्कापुरीवर्णनम् ।

स्कन्द उवाच ।

"दैत्यदानवविद्रावी स्वर्गप्राकारतोरणाम् ।
दक्षिणस्योदधेस्तीरे त्रिकूटो नाम पर्व्वतः ।
शिखरे तस्य शैलस्य मध्यमेऽम्बुधिसन्निधौ ॥
पतत्रिभिश्च दुष्प्रापां टङ्कच्छिन्नां चतुर्द्दिशम् ।
प्रकार्य्य मनुजता पूर्व्वं प्रयत्नात् बहुवत्सरैः ॥
वसन्तु तत्र दुर्द्धर्षाः सुखं राक्षसपुङ्गवाः ।
अमरावतीं समासाद्य सेन्द्रा इव दिवौकसः ॥
लङ्कादुर्गं समासाद्य शत्रूणां प्रकरन्ति ये ।
दुराधर्षा भविष्यन्ति राक्षसैर्बहुभिर्वृताः ॥"

इति वह्निपुराणे कपिलदशकनामाध्यायः ॥ * ॥

शाखा । शाकिनी । कुलटा । इति मेदिनी । के, ३३ ॥ धान्यविशेषः । तत्पर्य्यायः । कराञ्जलिपुटा २ कालिका ३ रूपशालिका ४ । अस्या गुणाः । रुच्यत्वम् । स्निग्धत्वम् । शैत्यत्वम् । पित्तनाशित्वम् । वातकारित्वम् । गुरुत्वञ्च । इति राजनिर्घण्टः ॥

लङ्कादाही, [न्] पुं, (लङ्कां दहति तच्छील । दह + णिनि ।) हनूमान् । इति शब्दरत्नावली ।

लङ्काधिपति, पुं (लङ्काया अधिपतिः ।) रावणः । इति जटाधरभूरिप्रयोगौ ॥ (यथा, रघुः । ६ । ६२ ।

"पुरा जनस्थानविमर्द्दशङ्की
सन्धाय लङ्काधिपतिः प्रतस्थे ॥")

लङ्कापति, पुं, (लङ्कायाः पतिः ।) रावणः । इति भूरिप्रयोगः ॥

लङ्कापिका
लङ्काधिका
लङ्कारिका
} स्त्री स्पृक्का । इति शब्दरत्नावली । पिड्शाक इति भाषा ॥

लङ्कास्थायी, [न्] पुं (लङ्कायां तिष्ठतीति । स्था + णिनि ।) वृक्षविशेषः । लङ्कासिज इति भाषा । यथा,—

"लङ्कास्थायी रावणचो भद्रपुष्पो विशायकः ।"

इति शब्दचन्द्रिका ॥

(लङ्कायां तिष्ठतीति ।) लङ्कावासिनि, त्रि ॥

लङ्केशः पुं (लङ्काया ईशः पतिः ।) रावणः । इति त्रिकाण्डशेषः ॥

लङ्कोपिका, स्त्री, स्पृक्का । इति शब्दरत्नावली ।

लङ्कोयिका, स्त्री, स्पृक्का । इति शब्दरत्नावली ॥

लङ्ग, पुं (लङ्गतीति । लङ्ग गतौ + अच् ।) सङ्गः । मिलनम् । इति मेदिनी । गे, २१ । मा इति भाषा ॥

लङ्गूल, क्ली, लाङ्गूलम् । इत्युणादिकोषः ॥

लङ्घन क्ली, (लङ्घ + ल्युट् ।) उपवासः । (यथा, सुश्रुते । १ । ४६ ।

"तत्रादौ लङ्घनं कार्य्यं विरिक्ते वमने हितम् ।
विरुक्षे स्वेदनं पथ्यं रसपीथि प्रयोजितं च ॥"

यथा च ।

"लङ्घन इवर्णं काये स्वयमेव शनेः शनैः ।
स्वेन स्वाभाविकेनैव जानीते यः स वै भिषक् ॥"

"तदभिवेशस्य वचो निशम्य गुरुरब्रवीत् ।
यत्किञ्चिल्लाघवकरं देहे तल्लङ्घनं स्मृतम् ॥"

"लघूष्णतीक्ष्णविशदं रूक्षं सूक्ष्मं खरं सरम् ।
कठिनञ्चैव यद्द्रव्यं प्रायस्तल्लङ्घनं स्मृतम् ॥"

"————पिपासा मारुतातपौ ।
पाचनान्युपवासश्च व्यायामश्चेति लङ्घनम् ॥"

"प्रभूतश्लेष्मपित्तास्रमलाः संसृष्टमारुताः ।
बृहच्छरीरा बलिनो लङ्घनीया विशुद्धिभिः ॥"

"तमरोचिषो प्रमेहार्त्ता स्निग्धाभिष्यन्दिदृंहिणाम् ।
शिशिरे लङ्घनं शस्तमपि वातविकारिणाम् ॥"

इति चरके सूत्रस्थाने द्वाविंशेऽध्याये ॥

"ज्वरे लङ्घनमेवादावुपदिष्टमृते ज्वरात् ।
क्षयानिलभयक्रोधकामशोकश्रमोद्भवात् ॥
आमाशयस्थो हत्वाग्निं सामो मार्गान् पिधापयन् ।
विदधाति ज्वरं दोषस्तस्मात् लङ्घनमाचरेत् ॥
अनवस्थितदोषाग्नेर्लङ्घनं दोषपाचनम् ।
ज्वरघ्नं दीपनं काङ्क्षारुचिलाघवकारकम् ॥
प्राणाविरोधिना चैनं लङ्घनेनोपपादयेत् ।
बलाधिष्ठानमारोग्यं यदर्थोऽयं क्रियाक्रमः ॥
तत्तु मारुततृष्णाक्षुन्मुखशोषभ्रमान्विते ।
कार्य्यं न बाले वृद्धे वा न गर्भिण्यां न दुर्ब्बले ॥
वातमूत्रपुरीषाणां विसर्गे गात्रलाघवे ।
हृदयोद्गारकण्ठास्यशुद्धौ तन्द्राक्लमे गते ॥
स्वेदे जाते रुचौ चापि क्षुत्पिपासासहोदये ।
तथा सद्व्यथमाक्लेश निर्व्वचे चान्तरात्मनि ॥
पर्व्वभेदोऽङ्गमर्द्दश्च कासः शोषो मुखस्य च ।
क्षुत्प्रणाशोऽरुचिस्तृष्णा दौर्ब्बल्यं श्रोत्रनेत्रयोः ।
मनसः सम्भ्रमोऽभीक्ष्णमूर्द्ध्ववातस्तमो हृदि ।
देहाग्निबलनाशश्च लङ्घनेऽतिकृते भवेत् ॥"

इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥)

क्रमणम् । (यथा, कुमारे । ५ । ६४ ।

"यथा श्रुतं वेदविदांवर त्वया
जनोऽयमुच्चैः पदलङ्घनोत्सुकः ।
तपः किलेदं तदवाप्तिसाधनं
मनोरथानामगतिर्न्न विद्यते ॥")

भवनम् । इति मेदिनी । ने, १२ ॥ अपि लङ्घनविधौ यथा,—

"न चापि लङ्घयेद्धीमानोमान्धात्मन्यथ कश्चन ।
न चैनं पादेन कुर्य्यात् सुखेन न धमेद्बुधः ॥"

इति कौर्म्मे उपविभागे १५ अध्यायः ॥

(अतिक्रमः । यथा महाभारते । १ । १५८ । ३६ ।

"न चाप्यधर्म्मः कल्याण बहुपत्नीकता नृणाम् ।
स्त्रीणामधर्म्मः सुमहान् भर्त्तुः पूर्व्वस्य लङ्घने ॥")

अपहस्तीयमर्ति । यथा,—

"कुरुष्व लङ्घनं योषिन्मगाधशुद्धारकाम् ।"

इति हेमचन्द्रः ॥ * ॥

(स्त्री, अवमानना । यथा, मार्कण्डेये । १२५ । ३३ ।

"अन्यस्यापि सर्व्वस्य लङ्घना क्रियते स्त्रिया ।
तां नाल चलितं बोढुं किं पुनः पितुरमाराज्ञाम् ॥")

लछ, लक्ष्मणि । इति कविकल्पद्रुमः ॥ (भ्वा - पर सक सेट ।) लछति दृढ चक्षेव लोपः । इति दुर्गादासः ॥

लज, भर्ज्जे । इति कविकल्पद्रुमः ॥ (भ्वा पर सक सेट ।) लजति । इति दुर्गादासः ॥

लज इ भर्ज्जे । इति कविकल्पद्रुमः ॥ (भ्वा पर सक सेट ।) इ, लञ्जति । इति दुर्गादासः ॥

लज इ क भासार्थे । इति कविकल्पद्रुमः ॥ (चुरा पर अक सक च सेट ।) इ क लञ्जयति । भा दीप्तिः सकार्थो निकतनहिंसा बलन्नानानि । इति दुर्गादासः ॥

लज क अपवारे । इति कविकल्पद्रुमः ॥ (चुरा पर सक सेट ।) अपवारेराच्छादनम् । क, लाजयति चन्द्रं मेघः । इति दुर्गादासः ॥

लज, श व्रीडे । इति कविकल्पद्रुमः ॥ (भ्वा - आत्म अक सेट ।) श लजते । विशेषार्थं तस्य इत्यन्ये । इति दुर्गादासः ॥

लज, तृ क भाषणे । इति कविकल्पद्रुमः ॥ (अदन्त चुरा पर अक सेट ।) क, लजयति । भाषणं दीप्तिः । इति दुर्गादासः ॥

लज्जकारिका, स्त्री (लज्जां लज्जां करोतीव । कृ + ण्वुल् । टापि अत इत्वम् ।) लज्जालुलता । इति शब्दमाला ।

लज्जा, स्त्री, (लज्जनमिति । लस्ज व्रीडने + "गुरोश्च हलः ।" ३ । ३ । १०३ । इति अ । टाप् ।) अन्तःकरणवृत्तिविशेषः । इति नागोजीभट्टः । अकार्य्ये कर्म्मणि परज्ञानभयम् । लाज इति भाषा । तत्पर्य्यायः । मन्दाक्षम् २ ह्रीः ३ त्रपा ४ व्रीडा ५ । सा अन्यतश्चेत् अपत्रपा ६ । इत्यमरः ॥ मन्दास्यम् ७ लज्या ८ व्रीडः ९ व्रीडनम् १० । इति शब्दरत्नावली ॥ (यथा, कुमारे । १ । ४८ ।

"लज्जा तिरश्चां यदि चेतसि स्या-
दसंशयं पर्व्वतराजपुत्र्याः ।
तं केशपाशं प्रसमीक्ष्य कुर्य्यु-
र्व्वालप्रियत्वं शिथिलं चमर्य्यः ॥")

लज्जालुः । इति राजनिर्घण्टः ॥

लज्जालु पुं, स्त्री, (लज्जेवास्या अस्तीत्यर्थे आलुः ।) क्षुपविशेषः । तत्पर्य्यायः । रक्तपादी २ शमीपत्रा ३ स्पृक्का ४ खदिरपत्रिका ५ सङ्कोचिनी ६ समङ्गा ७ नमस्कारी ८ प्रसारिणी ९ सप्तपर्णी १० खदिरी ११ गण्डमालिका १२ लज्जा १३ लज्जिरी १४ अल्पलज्जा १५ अस्ररोधिनी १६ रक्तमूला १७ ताम्रमूला १८ स्वगुप्ता १९ अञ्जलिकारिका २० । इति राजनिर्घण्टः ॥ महाभीता २१ वशिनी २२ महौषधि २३ । इति शब्दचन्द्रिका ॥ अस्या गुणाः । कटुत्वम् । शीतत्वम् । पित्तातिसारशोथदाहश्रमश्वासव्रणकुष्ठकफास्रनाशित्वञ्च ॥ तद्भेदो यथा,—

"लज्जालुर्विपरीतान्या स्वल्पक्षुपा बहुदला ।
वैपरीत्या च लज्जालुरभिधाने प्रयोजयेत् ॥
लज्जालुर्वैपरीत्या तु कटुरुष्णा कफापहा ।
इयं विद्यामवधैव नानाविज्ञानकारका ॥"

इति राजनिर्घण्टः ॥

अस्या वृषपर्णीशब्दे द्रष्टव्याः ॥ * ॥ अपि च ।

"लज्जालुः स्यात् शमीपत्रा समङ्गाञ्जलिकारिका ।
रक्तपादी नमस्कारी नाम्ना खदिरकेत्यपि ॥
लज्जालुः शीतला तिक्ता कषाया कफपित्तजित् ।
रक्तपित्तमतीसारं योनिरोगान् विनाशयेत् ॥"

अथ लज्जालुभेदः ।

"अलम्बुषा खरत्वक् च तथा मेदोगला स्मृता ।
अलम्बुषा लघुः स्वादुः कृमिपित्तकफापहा ॥"

इति भावप्रकाशः ।

अस्या दुग्धिकाशब्दे द्रष्टव्याः ॥

लज्जाहीन, त्रि, (लज्जा हीनं त्यक्ता यस्य ।) लज्जाविमुक्तः । तत्पर्य्यायः । अपत्रपिष्णुः २ । इत्यमरः ॥ लज्जितः ३ । इति शब्दरत्नावली ॥

लज्जित त्रि, (लज्जा सञ्जाताऽस्य । लज्जा + तार कादित्वात् इतच् ।) लज्जायुक्तः । तत्पर्य्यायः । ह्रीणः २ ह्रीतः ३ । इत्यमरः ॥ (यथा, रघुः । १९ । ५४ ।

"कामं जीवति मे नाथ इति सा विजहौ शुचम् ।
प्राङ्मत्वा सत्यमस्यान्तं जीवितास्मीति लज्जिता ॥")

लज्जिरी, स्त्री, लज्जालुः । इति राजनिर्घण्टः ॥

लज्या, स्त्री लज्जा । इति शब्दरत्नावली ॥

लञ्ज, र क भासने । इति कविकल्पद्रुमः ॥ (अदन्त चुरा पर अक सेट् ।) र लञ्जयति । भासनं दीप्तिः । इति दुर्गादासः ॥

लञ्ज पुं (लञ्जयति शोभते इति । लञ्ज + अच् ।) पदः । कच्छः । इति हेमचन्द्रः ॥ पुच्छः । इति जटाधरः ॥

लञ्जिका, स्त्री, (लञ्जयति शोभते इति । लञ्ज + ण्वुल् । टापि अत इत्वम् ।) वेश्या । इति हेमचन्द्रः ॥

लट, बाल्योक्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर० अक० सक० च सेट् ।) बाल्योक्तं तच्च भावो बाल्य मामोद इति यावत् । लटति बोकः शिशुः स्यात् । किञ्चिद्वदति वेत्यन्ये । इति दुर्गादासः ॥

लट, पुं, (लटति यदृच्छया वदतीति । लट + अच् ।) प्रमादवचनम् । दोषः । इति विश्वः ॥

लटक, पुं, (लटतीति । लट + "कुन् शिल्पिसंज्ञयोरपूर्व्वस्यापि ।" उणा० २ । ३२ । इति कुन् ।) दुर्जनः । इत्युणादिकोषः ॥

लटपर्णं, क्ली (लटतुल्यं पर्णमस्य ।) त्वचम् । इति राजनिर्घण्टः ॥

लट्टः, पुं, दुर्जनः । इति शब्दरत्नावली ॥

लट्वः, पुं (लटतीति । लट + "अशूप्रुषिलटीति ।" उणा० १ । १५१ । इति क्वन् ।) आलिन्दीयः । नेटुया इति भाषा । रागभेदः । तुरङ्गमः । इत्युणादिकोषः ॥

लट्वा स्त्री, (लट + क्वन् । टाप् ।) करञ्जभेदः । नाटाकरञ्जा इति भाषा । वाद्यभेदः । पक्षिविशेषः । चामचटक इति ख्यातः । इति मेदिनी । वे, ४२ ॥ कुसुम्भम् । इति हेमचन्द्रः ॥ भ्रमरकः । भोमरी इति ख्यातः । इत्यमरभरतौ ॥ (फिङ्गी । इति धारावली । ४५ ॥ तूलिका । चटकम् । यथा,—

"लट्वा तु तूलिका ख्याता लट्वा पक्षिण्यपि दृश्यते ॥"

इति शाब्दिकरत्नावली ।" इति उणादिवृत्तौ उज्ज्वलः । १ । १५१ ॥)

लड विलासे । इति कविकल्पद्रुमः ॥ (भ्वा० पर० अक० सेट् ।) लडति बाला । इति दुर्गादासः ॥

लड, इ कि भाषणे । इति कविकल्पद्रुमः ॥ (चुरा-पक्षे भ्वा-पर-सक-सेट् ।) इ, लण्डयति । कि, लाडयति लडति । भाषणं कथनम् । अयं वैदिक इत्यन्ये । इति दुर्गादासः ॥

लड, ओ इ कि जिह्वोन्मथने । इति कविकल्पद्रुमः ॥ (चुरा पक्षे भ्वा पर सक सेट् ।) ओ, ललितः । मधुरलवणादिस्वादपानेऽपि जिह्वा चाल्यते । अस्मात् जिह्वायामित्यस्य स्यादिति बोध्यम् । लडु इति । इ, लण्डते । कि, लाडयति लडति तर्क्कं लोकः । इति दुर्गादासः ॥

लड क उपसेवे । इति कविकल्पद्रुमः ॥ (चुरा पर सक सेट् ।) उपसेव इह आस्वादनम् । क लाडयेत् पञ्चवर्षाणि पुत्रमिति अत्र डलयोरैक्याल्लालनम् । अन्यथा लालयेत् प्रयोगः । इति रमानाथः । लाडयति सतो बालं । इति दुर्गादासः ॥

लड क इ क्षेपे । इति कविकल्पद्रुमः ॥ (चुरा आत्म सक सेट् ।) क इ, लाडयते । लाम कर इत्यन्ये । जिह्वैव आत्मनेपदा बोध्या । इति दुर्गादासः ॥

लड, ऋ क क्षेपे । इति कविकल्पद्रुमः ॥ (अदन्त चुरा० पर सक० सेट् ।) लडयति । ऋ, अललडत् । इति दुर्गादासः ॥

लड, म उन्मन्थनविलयोः । इति कविकल्पद्रुमः ॥ (भ्वा०-पर अक क्वचित् पीडनार्थे सक सेट् ।) उन्मन्थनं पीडितीभावः चतुर्विधे भावश्च । लडति लता वायुना पीडिता चञ्चला वा इत्यर्थः । जिह्वा लडितसर्प्पिका । लडति जिह्वा अन्नव्यतो स्वादित्वात् । म, लडयति । लडयति अपत्यमन्यवत्सस्य पीडयति । पीडयतीत्यर्थः । कपाटमपि विरलमन्दरीभवतीति गुरुः । तत् विपरीतार्थे । उभयत्र डलयोरैक्याल्ललनम् । केचित्तु जिह्वोन्मथने इति पठित्वा जिह्वया उन्मन्थनं चलनमिति व्याख्याय लडति जिह्वा सर्प इत्युदाहरन्ति । इति दुर्गादासः ॥

लडह, त्रि मनोज्ञः । इति त्रिकाण्डशेषः ॥

लड्डु त्रि, दुर्जनः । इति शब्दरत्नावली ॥

लड्डुक, पुं पिष्टकविशेषः । लाडु इति भाषा । यथा । लड्डुकी दुग्धदी गुरुः । इति राजवल्लभः ॥ अपि च ।

"तेनैव घटिता यत्र भवेत् पूर्णैव लड्डुकः ॥"

इति शब्दचन्द्रिका ॥

लण्ड स्त्री, (लण्ड्यते उत्क्षिप्यते इति । लडि + घञ् ।) पुरीषम् । न्याड इति भाषा । यथा,—

"समेधमानेन स लडवाहुना
निवर्त्तमानस्य च गोसिञ्चयन् ।
प्रसिञ्चमानं परिहृष्टयोषितं
पपात लण्डं विषमङ्ग पितौ बहु ॥"

इति श्रीभागवते १० स्कन्धे ३७ अध्याये ८ श्लोकः ॥ लण्डं पुरीषसमूहम् । इति तट्टीकायां श्रीधरस्वामी ॥

लद्रुज, त्रि, (लद्रु लद्रमुद्दिश्य जायते इति । जन् + ड ।) लद्रुदेशजातः । यथा,—

"पूर्व्वाषाढाभिजातं नक्षत्रोत्तिं प्रकीर्त्तितम् ।
चित्रसुमायनं लक्ष्यालोका अभावनात् शुचि ॥
अधिया मञ्जनात्तत्व प्रयाहमपरीक्षिता ।
इत्येवा भव घट प्रमद्भसाभाग्य मानिक ॥"

इति मेदतन्त्रे ४६ पटलः ॥ * ॥ लद्रुजं वायुषा लद्रुज इति ख्यातः । इत्येकार्थ्यदायायको च ।

लप गतौ । कोषधातुरयम् । इति कविकल्पद्रुमः ॥ (भ्वा पर गम सेट् ।) लपति । इति दुर्गादासः ॥

लता, स्त्री (लतति वेष्टयते भाषयतीति । लत + अच् । टाप् ।) भाषा "दरहिता गुल्मादिः । तत्पर्य्यायः । वल्ली २ प्रतानिः ३ । इत्यमरः ॥ वल्लि ३ वेल्लि ५ प्रतानि ६ । मा प्राकारसमाकुला चेष्टनाभिनी । इति शब्दरत्नावली ॥ तत्पर्य्यायः । वीरुत् २ गुल्मिनी ३ उलपः ४ । इत्यमरः ॥ * ॥ अभावो वीरुधी वेरवृक्षेषु

यथा,—
"अपूर्व्वां सप्तमहोरात्रे पूर्व्वं विशति चन्द्रमाः
ततो वीथ्यन्तु वसति प्रयात्यर्कं ततः क्रमात् ।
छिनत्ति वीथ्यो यस्तु वीथ्यन्तस्थे निशाकरे ।
यत्र वा प्रातरप्येकं प्रसङ्ख्या च विन्दति ॥"
इति श्रीविष्णुपुराणे २ अंशे १२ अध्यायः ॥ ७ ॥
आरम्भे रोपणीया शुभदा लतादिर्यथा,—
"अलाबूश्चापि कुष्माण्ड मायाम्बुज सुकाशुक ।
खर्ज्जूरी कर्कटी चापि शिविरे मङ्गलप्रदा ॥
वार्त्ताकु कारवेल्लञ्च वार्त्ताकुञ्च शुभप्रदा ।
लताफलञ्च शुभदं सर्व्वं सर्व्वत्र निश्चितम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १ २ अध्यायः ॥
श्यामा । प्रियङ्गु । (अस्याः पर्य्यायो यथा —
"प्रियङ्गुः फलिनी कान्ता लता च महिलाह्वया ।
गुन्द्रा गुन्द्रफला श्यामा विष्वक्सेनाङ्गना प्रिया ॥'
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पृक्का । (यथास्याः पर्य्यायः ।
"तस्करोऽवारकश्चोक्तो देवी पृक्का लता लघुः ॥"
इति वैद्यकरत्नमालायाम् ॥)
अग्रपर्णी । इत्यमरः । ज्योतिष्मती । (अस्याः पर्य्यायो यथा,—
"ज्योतिष्मती स्यात् कटभी ज्योतिष्का कङ्गुनीति च ।
पारावतपदी पण्या लता प्रोक्ता ककुन्दनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
लताकस्तूरिका । माधवी । दूर्व्वा । इति मेदिनी । ते ५१-५२ ॥ कैवर्त्तिका । शारिवा । इति राजनिर्घण्टः ॥ (बृहती । तत्पर्य्यायो यथा,—
"भण्टाकी बृहती सिंही वार्त्ताकी राष्ट्रिका कुली ।
प्रसहा रक्तपाका च लता हस्तिका परा ॥")
नारी । यथा,—
"नार्य्यां परलतां प्राप्य अयुतं यस्तु साधकः ।
प्रजपेत् स भवेत् शीघ्रं विद्याया वल्लभः स्वयम् ॥"
इति तन्त्रसारे श्यामासाधनम् ॥
(तथा च नैषधे । १ । ८५ ।
"लता लता गन्धवहेन चुम्बिता
करम्बिताङ्गी मकरन्दशीकरैः ।
दृशा नृपेण स्मितशोभिकुड्मला
दरादराभ्यां दरकम्पिनी पपे ॥"
"लता नवीना लता माधवीलता पक्षे लता रम्या लता स्त्री ।" इति तट्टीका ॥ ७ ॥ अप्सरोविशेषः । यथा महाभारते । १ । २१७ । २ ।
"अहञ्च सौरभेयी च समीची बुद्बुदा लता ।
यौगपद्येन तं विप्रमभ्यगच्छाम भारत ! ॥")

लताकरञ्जः पुं, (लतारूपः करञ्जः ।) करञ्जविशेषः । कण्टकरेज इति हिन्दी भाषा । तत्पर्य्यायः । दुःस्पर्शः २ वीराख्यः ३ वज्रबीजकः ४ धनदाक्षः ५ कण्टफलः ६ कुबेराक्षी ७ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवातनाशित्वञ्च । तद्बीजगुणाः । दीपनत्वम् । पथ्यत्वम् । शूलगुल्मविषापहत्वञ्च । इति राजनिर्घण्टः ॥

लताकस्तूरिका स्त्री, (लतारूपा कस्तूरी मृगद्गन्धत्वात् । ततः स्वार्थे कन् ।) लताकस्तूरी । तत्पर्य्यायः । कटुः २ दक्षिणदेशजा ३ । अस्याः गुणाः । तिक्तत्वम् । स्वादुत्वम् । वृष्यत्वम् । हिमत्वम् । लघुत्वम् । चक्षुष्यत्वम् । छेदनीत्वम् । श्लेष्मतृष्णावस्त्यास्यरोगनाशित्वञ्च । इति पथ्यापथ्यविवेकः । अपि च ।
"लताकस्तूरिका तिक्ता स्वादुः शीतास्य-
रोगनुत् ॥"
इति राजवल्लभः ॥

लताजिह्वः, पुं (लतेव जिह्वा यस्य ।) सर्पः । इति शब्दमाला ॥

लतातरुः पुं, (लतेव दीर्घस्तरुः ।) नारङ्गवृक्षः । तालवृक्षः । इति शब्दमाला ॥ शालवृक्षः । इति त्रिकाण्डशेषः ॥

लताद्रुमः, (लतेव द्रुमः दीर्घत्वात् ।) लताशालः । तत्पर्य्यायः । तार्क्षः २ अश्वकर्णः ३ कुलिकः ४ मन्यः ५ दीर्घः ६ । इति रत्नमाला ॥

लतापनसः, पुं, (लतायां पनसमिव फलमस्य ।) फललताविशेषः । तरमुज इति ख्यातः । तत्पर्य्यायः । चैलालः २ चित्रफलः ३ सुखाशः ४ राजतिमिशः ५ नाटाम्रः ६ सैंडुः ७ । इति त्रिकाण्डशेषः ॥

लतापृक्का, स्त्री, (लताप्रधाना पृक्का ।) बहुदाम्ना । इति शब्दरत्नावली ॥ पिडिङ्शाक इति भाषा ॥

लताप्रतानिनी, स्त्री, (लताप्रतानोऽस्त्यस्येति । इनि ।) शाखाप्रचयवती लता । तत्पर्य्यायः । वीरुत् २ गुल्मिनी ३ उलपः ४ । इत्यमरभरतौ ॥ वीरुधा ५ वयत् ६ । इति शब्दरत्नावली ॥ प्रतानी ७ कच्छ ८ । इति जटाधरः ॥

लताफलं, क्ली, (लतायाः फलमस्य ।) पटोलम् । यथा —
"वार्त्ताकुं कारवेल्लञ्च वार्त्ताकुञ्च शुभप्रदा ।
लताफलञ्च शुभदं सर्व्वं सर्व्वत्र निश्चितम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १ २ अध्यायः ॥

लताभद्रा स्त्री, (लतया भद्रा यस्याः ।) भद्रालीक्षुपः । इति शब्दमाला ॥

लतामणिः पुं (लताखण्डो मणिः ।) प्रवालः । इति त्रिकाण्डशेषः राजनिर्घण्टश्च ॥ (प्रवालशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

लतामरुत्, स्त्री (लतायां मरुत् यस्याः ।) एला । इति शब्दरत्नावली ॥

लतामाधवी स्त्री (लताप्रधाना माधवी ।) माधवीलता । इति शब्दरत्नावली ॥

लतायष्टिः, स्त्री (लता यष्टिरिव ।) मञ्जिष्ठा । इति शब्दमाला ॥

लतायावकं क्ली, (लतायां याव इव यस्य । कन् ।) प्रवालम् । इति हारावली । ८१ ॥ (गुणादयोऽस्य प्रवालशब्दे ज्ञेयाः ॥)

लतारसनः, पुं, (लतेव रसना यस्य ।) सर्पः । इति हारावली । १५ ॥

लतार्कः पुं, (लता अर्क इव तीव्रा यस्य ।) हरितपलाण्डुः । तत्पर्य्यायः । दुद्रुमः २ । इत्यमरः ॥

लतालकः, पुं, हस्ती । इति त्रिकाण्डशेषः ॥

लतावेष्टः, पुं (लतयेव आविष्टो वेष्टनं यत्र ।) षोडशरतिबन्धान्तर्गतद्वितीयबन्धः । यथा —
"बाहुभ्यां पादयुग्माभ्यां वेष्टयित्वा स्त्रियं रमेत् ।
लघुलिङ्गताडनं योगी लतावेष्टोऽयमुच्यते ॥"
इति रतिमञ्जरी ॥ ७ ॥
पर्व्वतविशेषः । यथा —
"अश्वमेधे निरुद्धस्य चरान् वाञ्छितवान् तदा ।
अध्वनारख मागध्य वाह्यतश्च समन्ततः ।
वेणुमन्तं लतावेष्टं तथा रैवतकं गिरिम् ।
ऋक्षवन्तं गिरिञ्चैव मागध्य त्वरिता ययौ ॥"
इति हरिवंशे भानुयुद्धम् ॥
(पर्व्वतोऽयं द्वारकाया दक्षिणस्यां दिशि स्थितः । यथा, तत्रैव । १५५ । १६ ।
"दक्षिणस्यां लतावेष्टः पञ्चवर्णो विराजते ।
इन्द्रकेतुप्रतीकाशः पश्चिमस्यां तथा क्षयः ॥")

लतावेष्टितकं, स्त्री, (लतयेव वेष्टितं वेष्टनं यत्र । कन् ।) आलिङ्गनभेदः । यथा, शब्दमालायाम् ।
"उद्घृष्टकं पीडितकं लतावेष्टितकं तथा ।"

लताशालः, पुं शालवृक्षः । इति शब्दरत्नावली ॥

लतासाधनं, स्त्री, (लतया स्त्रिया साधनम् ।) योषिदधिकरणकेष्टदेवताराधनम् । तद्यथा —
"लताया साधनं वक्ष्ये शृणुष्व परवल्लभे ।
शतं बीजं शतं भाले शतं सिन्दूरमण्डले ।
स्तनद्वन्द्वे शतद्वन्द्वं शतं नाभौ महेश्वरि ।
शतं योनौ महेशानि उत्थाय च शतत्रयम् ॥
एवं दशशतं जप्त्वा सर्व्वसिद्धीश्वरी भवेत् ।
अथान्यत् सम्प्रवक्ष्यामि साधनं भुवि दुर्लभम् ॥
रजोऽवस्थां समानीय तद्योनौ स्वेष्टदेवताम् ।
पूजयित्वा महाराज्ञी त्रिदिनं पूजयेन्नतः ॥
शतत्रयञ्च षट्त्रिंशदधिकं प्रजपेज्जपम् ।
अष्टोत्तरशतं पूर्व्वं चक्रवक्त्रे जपेद्बुधः ।
ततस्तौ मधुभिः पुष्पैर्यजेदष्टोत्तरं शतम् ।
ततः पूर्णाहुतिं दत्त्वा जपेदष्टोत्तरं शतम् ॥
धनवान् बलवान् वाग्मी सर्व्वयोषित्प्रियङ्करः ।
षोडशादेव च भवेत् सत्यं सत्यं न संशयः ॥'
इति मायातन्त्रे १२ पटलः ॥
अन्यत् अन्नदाकल्पे १६ पटले गुप्तसाधनतन्त्रे ४ पटले च द्रष्टव्यम् ॥

लतिका, स्त्री लता । इति लताशब्दात् स्वार्थे कन्प्रत्ययेन टिकप्रत्ययेन वा निष्पन्नम् ॥ (यथा,—
"इयं सम्प्रति दूरादवमुपगतो हन्त मलयात्
तदेकां सद्दृष्टिं विनयति । नेष्यामि दयनीम् ।
समीरेणालोके नवकुसुमिता चूतलतिका
धुनाना मूर्द्धानं नहि नहि नहीत्येव कुरुते ॥"
इत्युद्भटः ॥)

लपिका, स्त्री, (लप वाते + "क्वुन्शिल्पिसंज्ञयोः" किप् ।" उणा २ । १४० । इति लिकन् ।) गाथा । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

लप क भाषे । इति कविकल्पद्रुमः ॥ (भ्वा० पर० सक० सेट् ।) प, अलीलपत् अललापत् । भाष कथनम् । इति दुर्गादासः ॥

लपन क्ली, (लप्यतेऽनेनेति । लप + करणे ल्युट् ।) मुखम् । इत्यमरः । (भावे ल्युट् ।) भाषणम् । इति शब्दरत्नावली । (यथा, आर्य्यासप्तशत्याम् । ३८१ ।

"प्रकटयति रागमधिकं लपनमिदं वक्त्रमाञ्च मावहति ।

प्रीणयति च प्रतिपदं दूति शुकस्येव दयितस्य ॥"

"शुकस्येव दयितस्य लपनं वचनमादधाति । मधे चन्दनम् ।" इति तट्टीका ।)

लपितं, क्ली (लप + क्त भावे ।) वचनम् । कथिते त्रि । इत्यमरः । (लपितमस्त्यास्येति । अच् । वचनयुक्ते च त्रि । यथा, अथर्ववेदे । ४।३८।८।

"यं सा क्रोधयन्ति लपिता वर्त्तिनं मयूखा इव । तामद्य गन्धि दुर्हिता जन स्वल्पयुवति ॥")

लपिका, स्त्री, खाद्यविशेषः । लपसी । इति ख्याता । यथा,—

"घृतितां समितां भृष्टां शर्करां पयसि क्षिपेत् । नारिकेलस्य खण्डानि लवङ्गमरिचादिकम् ।

सिद्धैषा लपिका ख्याता गुणानस्या वदाम्यहम् ।

लपिका तु गुरुः वृष्या बल्या पित्तानिलापहा ।

स्निग्धा श्लेष्मकरी गुर्वी रोचनी तर्पणी परम् ॥"

इति भावप्रकाशः ॥

लब इ ङ अवसंसने । शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा० आत्म० अवस्रंसने सक० शब्दे अक० सेट् ।) इ, लम्ब्यते । ङ, लबते । अवसंसनमिह अधःपतनमिति गोविन्दभट्टः । नताऽत्र धरणीकुचदारपि सीमन्तमालम्बते । इति दुर्गादासः ॥

लब्ध त्रि, (लभ् + क्त ।) प्राप्तः । इत्यमरः ॥ (यथा, हितोपदेशे ।

"धनमर्थेन लिप्सेत लब्धं यत्नेन पालयेत् ।

रक्षितं वर्द्धयेत् सम्यक् वृद्धं तीर्थेषु निक्षिपेत् ॥")

लब्धवर्ण, पुं (लब्धो वर्णो यशोऽपि येन ।) पण्डितः । इत्यमरः ॥ (यथा, रघुः । ११ । २ ।

"स च लब्धवर्णमपि लब्धवर्णभाक् तं दिदेश मुनये सलक्ष्मणम् ॥")

लब्धा, स्त्री, (लभ + क्त । टाप् ।) नायिकाभेदः । यथा —

"प्रतिभोगक्षतं लब्धा लब्धा यथा प्रतिभर्त्तृका ।

अवहारादिता या च सा प्रोषितभर्त्तृका ॥"

इति जटाधरः ॥

लभ इ ङ शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा० आत्म० अक० सेट् ।) इ, लम्भ्यते । ङ, लभते । इति दुर्गादासः ॥

लभ, डु ल ष प्राप्तौ । इति कविकल्पद्रुमः ॥ (भ्वा० आत्म० सक० अनिट् ।) डु, लब्धिमम् । लौ लब्धा । ङ, लभते । ष, लभा । लभन्ति पुत्रपरमागमिति मधुकलाविलासादिति रमानाथः । वस्तुतस्तु लभते लभ मथादित्वादन् ततो लभ इत्याचरतीति क्वौ साध्यम् । इति दुर्गादासः ॥

लभस, पुं, (लभ + "अतसिचमीति ।" उणा ३ । ११७ । इति असच् ।) वाजिबन्धनरज्जुः । इत्युणादिकोषः ॥ धनम् । याचकः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

लभ्य, त्रि, (लभ्यते इति । लभ + "पोरदुपधात् ।" ३ । १ । ९८ । इति यत् ।) न्याय्यम् । इत्यमरः ॥ लब्धव्यम् । इति मेदिनी । ये ४१ ॥ (यथा, गुणकापसिद्धौ । १ । २ । ३ ।

"नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुधा श्रुतेन ।

यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥")

लमक, पुं (रमते इति । रम् + "रमेरश्च लो वा ।" उणा २ । ३३ । इति क्वुन् रस्य लत्वञ्च ।) विटः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (तीर्थशोधकः । इत्युज्ज्वलः । विलासिनि, त्रि । इति केचित् ॥)

लम्पट, पुं, विटः । इति लम्पाकशब्दार्थे मेदिनी । के, १४८ ॥ (यथा कथासरित्सागरे । ३० । ११ ।

"कृतेनरारुचौऽनेन यद्यपि स्त्रीषु लम्पटः ।

तथापि न स तु जैनविधौ स्वात्मया विधः ॥")

कामुकः । यथा,—

"यदीश्वरात् प्रतिकामलम्पटः सुतेषु दारेषु धनेषु चिन्तयन् ।

शुद्धेन चित्तान् कुकलेवराश्रयाद् यस्तस्य यत्न श्रम एव केवलम् ॥"

इति श्रीभागवते ५ स्कन्धे १४ अध्यायः ॥

लम्पाक पुं लम्पटः । देशभेदः । इति मेदिनी । के, १४८ । (यथा, मार्कण्डेये । ५७ । ४० ।

"लम्पाका शूलकाराश्च चूलिका जागुडैः सह । औपधाश्चानिभद्राश्च किरातानाञ्च जातयः ॥")

लम्पाटह पुं, पटहवाद्यम् । इति हारावली ॥

लम्प पुं मुखपति । काष इति भाषा । इति पंशह । उत्तमात्र प्रलम्बनात् ।

लम्ब पुं, (लम्बते इति । लबि अवस्रंसने + अच् ।) नर्त्तकः । अङ्गम् । कान्तः । इति धरणिधरादीकायामित्युत्कोषः । यथा

"शाश्वत दीर्घत्व लम्बोदुकोषः कप्रतिकामिवे । समाकारः प्रदानत्वा स्रोता पाञ्चाले वर्णे ॥"

इति हेमचन्द्रः ॥

उत्कोचः । यथा,—

"उत्कोचकस्तु लम्बः स्यात् पादकन्यादिवाचने ॥"

इति शब्दमाला ॥

क्षेत्राद्यौ समभागरेखा लम्ब वा । यथा,—

"त्रिभुजे भुजयोर्योगस्तदन्तरगुणो भुवा हृतो लब्धा ।

द्विष्ठा भूरूनयुता दलिताबाधे तयोः स्याताम् ॥

स्वाबाधाभुजकृत्योरन्तरमूलं प्रजायते लम्बः ।

लम्बगुणं भूम्यर्द्धं स्पष्टं त्रिभुजे फलं भवति ॥"

उदाहरणम् ।

"क्षेत्रे मही मनुमिता त्रिभुजे भुजौ तु यत्र त्रयोदशतिथिप्रमितौ च यस्य ।

तत्रावलम्बकमथो कथयावबाधे क्षिप्रं तथा च समकोणमितिं फलाख्याम् ॥"

न्यास । भूः १४ भुजौ १३ । १५ लम्बः आबाधे ५ । ९ । लब्धो लम्ब १२ क्षेत्र फलम् ८४ । इति लीलावती ॥ (दैर्घ्यविस्तारः । यथा, हरिवंशे । ४१ । ७२ ।

"समन्तु समवेतानां प्रलम्बाभरणभूषणैः ।

देवैश्चक्रगतो भाति मणीवार इवांशुमान् ॥")

त्रि दीर्घः । लम्बा इति भाषा । यथा,—

"दूरतः शोभते मूर्खो लम्बशाटपटावृतः ।

तावच्च शोभते मूर्खो यावत् किञ्चिन्न भाषते ॥"

इति चाणक्यशतकम् ॥

(लम्बमान । यथा, रघुः । ६ । १० ।

"पादाङ्गुष्ठवर्त्ताविनमन्नदन्त कलमाग्रतो यशिरोरवर्ण ।

आभाति बालातपरक्तमाशु सनिर्भरोद्गार इवाद्रिराजः ॥")

लम्बक, पुं (लम्बो लम्बः स्वार्थे कः ।) ह्रासः । चतुरस्रम् । इति मेदिनी । के, १०७ । रामान । स्त्री । इति शब्दरत्नावली । भेष पती । इति राजनिघण्टः । (प्रथ । तद्वर्ण पद विशेषयत् नव प्रथम स्यात् ।

"लम्बकस्य पदः स्मृतो सोमकर्णो दिवे ह्रदः ॥"

इति वैद्यकम् ॥

लम्ब कर्णः इति अमरटीकायां) दीर्घमोचम् । तद्वति, त्रि । (यथा, महाभारते । ८ । ४५ । १६ ।

"लम्बान्ध्याः समवकालाभा लम्बदीर्घकराः ॥")

लम्बकेश, पुं (लम्बः केशः इवाचमाने यस्य ।) विष्टरः । स तु दिवाखरोश पट्टादिकवर्ण वाहुविनयवासादेवपलितविहित्या कदलानिर्मितः । यथा —

"लम्बकेशा मेरु भवा लम्बकेश्च विष्टरः ।

दर्भवावर्त्तको भवत् वामावर्त्तेषु विष्टरः ॥"

इति कर्मकाण्डम् ॥

केशीवाचम् । इति वायुविशये मन्त्रा माहात्म्ये प्रतिमित्तनदर्भेत्युवाकस्वपि विमितम् । ० । दीर्घकेशयुक्ते त्रि ।

लम्बदन्ता, स्त्री, (लम्बाः दन्ताः इव दलानि यस्याः ।) सैंहलीशिम्बी । इति राजनिघण्टः । दीर्घदन्तयुक्ते, त्रि ।

लम्बन, क्ली (लम्बते इति। लम्ब+ल्यु।) नाभिलम्बितकण्ठिकादि। तत्पर्य्यायः। ललन्तिका २। इत्यमरः॥ लम्बते लम्बनं मन्यादि स्यान्नम्। इति तट्टीकायां भरतः॥ (लम्ब+भावे ल्युट्।) लम्बशब्दार्थश्च॥

लम्बन, पुं (लम्बते इति। लम्ब+ल्यु।) कफः। इति शब्दचन्द्रिका॥

लम्बबीजा स्त्री (लम्बानि बीजानि यस्याः।) सैंहलीपिप्पली। इति राजनिर्घण्टः॥

लम्बमान त्रि, लम्बायमानवस्तु। लम्बधातोः कर्त्तरि शानच्प्रत्ययेन निष्पन्नम्॥

लम्बा स्त्री, लक्ष्मीः। गौरी। तिक्ततुम्बी। इति मेदिनी। बे, ६॥ दनुकन्याविशेषः। यथा —

"अरुन्धती वसुर्यामी लम्बा भानुर्मरुत्वतीम्।
सङ्कल्पा च मुहूर्त्ता च साध्या विश्वा च भारत।
ककुदे दक्षपुत्राय दश ता वै ददौ प्रभुः॥"

इति हरिवंशे अधिपतिस्थापनम्॥

हिमालयकन्याविशेषः। यथा,—

"ततश्चानन्तरं श्रुत्वा देवीलम्बामयाब्रवीत्।
गच्छस्व लम्बे शीघ्रं त्वं बाणस्य भवनं शुभे॥
ततो योगं समाधाय चित्रलेखा हिमवत्सुता।
लम्बा ऐकस्य तद्रूपं दृश्यते पार्श्वमागता॥
मान्द्वाजसुपागम्य ब्रह्मा या मायसी पुनः।
परित्याज्य बाणस्य विजयाधिष्ठिता ततः।
प्रसूते वासुदेवस्य निद्राया कोट्टवी स्थिता॥"

इति महाभारते हरिवंशे बाणयुद्धम्॥

लम्बिका, स्त्री, (लम्बते या। लम्ब+ण्वुल्। टापि अत इत्वम्।) तालुस्थघण्टिका। तत्पर्य्यायः। घण्टिका २। इति राजनिर्घण्टः॥ सुधास्रवा ३ गलशुण्डिका ४। इति हेमचन्द्रः॥ अलिजिह्वा ५ अलिजिह्विका ६। इति शब्दरत्नावली॥

लम्बित त्रि (लम्ब+क्तः।) स्रस्तः। (यथा, गीतगोविन्दे। १२। १८।

"सन्धरद्गुरुबकलम्बितकम्बलतुम्बुलय प्रिय
लोचने॥")

शब्दितः। इति लम्बधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नम्। लम्बमानमाल्यादिश्च॥ (यथा महाभारते। १। १५७। ३२।

"वस्त्रोऽयमस्मा यस्त कालकृन्तेन लम्बितः॥")

लम्बोदर पुं (लम्बमुदरं यस्य।) गणेशः। इत्यमरः॥ (यथा आर्य्यासप्तशत्याम्। १८८।

"गतिगलितवरयुवति करौ कपोलौ करोतु
सन्मलिनौ।
गुरुबन्धमामभिशुर लम्बोदर किं मद वहसि॥"

नृपविशेषः। इति भागवतम्। १२। १। २२॥) औदरिके त्रि। इति हेमचन्द्रः॥ (यथा, कथासरित्सागरे। ७। १२।

"ततो लम्बोदरेणैव पुंसारोपितवाहुकः।
सम्प्राप्त स पातालं केशारिकोऽखिले॥")

लम्बोष्ठ पुं (लम्ब ओष्ठो यस्य। ओत्वोष्ठयोः समासे वा। इति वामनः।) उष्ट्रः। इति राजनिर्घण्टः। लम्बमानौष्ठयुक्ते त्रि। (देवयानदेवताविशेषः। यथा, प्रयोगसारे देवयागप्रकरणे।

"सुगान्धो वाहकश्चाथ लम्बोष्ठो वधवक्त्रया॥")

लम्बौष्ठ, पुं, (लम्ब ओष्ठो यस्य।) उष्ट्रः। इति त्रिकाण्डशेषः। दीर्घोष्ठविशिष्टे, त्रि॥

लम्भन, स्त्री, प्रतिलम्भः। इति हेमचन्द्रः॥ अपि लभि इ शब्दे इत्यस्मात् भावेऽनट (ल्युट्) प्रत्ययेन निष्पन्नमिति॥

लम्भा स्त्री, (लभते इति। लभ इ श शब्दे+अच्। टाप्।) शाटप्रबला। इति धारावली॥

लय, इ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा आत्म सक सेट्।) इ, लयते। इति दुर्गादासः॥

लय, पुं, (ली+अच्।) विनाशः। संश्लेषः। तौर्य्यत्रिकस्य साम्यम्। इति मेदिनी। ये ५२॥ प्रलयः। इति शब्दरत्नावली॥ *॥ अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेर्निद्रा। इति श्रीपरमहंससदानन्दयोगीन्द्रकृतवेदान्तसारः॥ तस्माद्धि चित्तं लयपति लयस्थानमिति। लयो द्विविधः। चिरकालसत्कारादरासेवितनिर्व्विकल्पकसमाध्यभ्यासपाटवे जातितत्त्वलोपसर्व्वाविधमलविक्षेपवत् तैलरहितदीपकलिकावच्च प्रत्यगभिन्ने परमानन्दे चित्तवृत्तेरेकत्व प्रथमः। द्वितीयस्तु मूर्च्छावस्थावत् व्यालस्येन चित्तवृत्तेर्ब्बाह्यशब्दादिविषयपरित्यागादरेऽतिप्रश्नगात्मस्वरूपानवभासनात् वृत्तेस्तम्भीभावः लयवनिद्राख्यः। इति श्रीनृसिंहसरस्वतीकृतसुबोधिन्याख्या तट्टीका॥ गीतवाद्यपादन्यासानां क्रियाकालयोः परस्परं समता लयः। सोऽयं त्रिधा तस्मिन्नेव लयन्ति प्रयान्ति साम्यं गीतादयोऽनेनेति वा लयः। ली इ य अो श्लिषि लयः शब्दो वा अलः। इत्यमरटीकायां भरतः॥ *॥ लयस्थानविस्मयाय गायकस्य चतुर्द्दशदोषान्तर्गतदोषविशेषो यथा,—

"शङ्कितं भीतमुद्घुष्टमव्यक्तमनुनासिकम्।
काकस्वरं शिरसि स्थितं लयस्थानविवर्ज्जितम्॥
विस्वरं विरसञ्चैव विश्लिष्टं विषमाहतम्।
व्याकुलं तालहीनञ्च गायनदोषाश्चतुर्दश॥" *॥

अथ लयाः। द्रुतं स्थितिं कण्ठस्थितिं कपालस्थितिरिति लयत्रयम्। अपरे तु।

"त्रिपदी स्यादलतिका भ्रामिका द्विमलम्बिका।
वामधुपत्तलम्बिका हस्तधारा पतृत्कः॥
अम्भक्तिका कलतिक स्तम्भक स्वरित्तथा।
कथितश्चतुरश्रोऽस्वचतुरश्रोऽय वर्णकः॥
अथ पट्टान्तालवावक्रदा मन्दघटीत्यपि।
कारम्भधर्म्मरी घट्टा मियोऽङ्कविता सत॥
अलिधिष्ण्य समयश्च वलितोऽन्तश्चतथा।
आविर्हत् टङ्कवलसलाधिरविचित्रकौ॥
आम्बौ विततधारा च सङ्कुचोऽय विलोचकः।
रमणीयस्तथैव करकटकमधक॥
चत्वारिंशदिमे प्रोक्ता मया लयविशारदे।
लयेन तुष्टो भगवान् लये प्रीतो भवाद्भुत॥"

(त्रि, आवरणात्मकम्। इति श्रीधरस्वामी। यथा, भागवते। ११। २५। १५।

"यदा जयेद्रज सत्त्वं तमो मूढं लयं जडम्।
युज्येत शोकमोहाभ्यां निद्रया हिंसया शया॥'

सौ लामञ्जकम्। यथा,—

"लामज्जकं सुनालं स्याद्गन्धाल लयं लघु।
इष्टकापथकं शैव्यं मनदवादनालकम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

लयपुत्री स्त्री, (लयस्य पुत्रीव।) नर्त्तकी। इति शब्दरत्नावली॥

लयारम्भ, पुं, (लयस्यारम्भो यस्मात्।) नटः। इति त्रिकाण्डशेषः॥

लयालम्ब, पु, (लयमालम्बते इति। लम्ब+अण्।) नटः। इति शब्दरत्नावली॥

लर्ब्ब, गतौ। (भ्वा पर सक सेट्।) लर्ब्बति। इति सिद्धान्तकौमुदी॥

लल, इ क ईप्सायाम्। इति कविकल्पद्रुमः॥ (चुरा आत्म सक सेट्।) क इ लालयते। ईप्सा आप्तुमिच्छा। इति दुर्गादासः॥

लल तृ क ईंसे। इति कविकल्पद्रुमः॥ (अन्त्य चुरा पर सक सेट्।) ईसा इति आप धातोः सन्नन्तस्य रूपम्। प्रत्ययाद् इत्यकारस्य सरूपोऽपि अल अच न बाध्यते इति पैस्त्रीविहितप्रत्यये क्वचित् सरूपोऽपि न बाध्यते इत्यस्य बाध्यत्वात् अन्यथा आशोभाकारश्च मित्वान्योऽपि न स्यु। एवं अस्मात्सैव प्रौढ लक्ष्ये इत्यादिष्वपि बोध्यम्। ललयति धन लोकः। इति दुर्गादासः॥

ललज्जिह्व, पुं, (ललन्ती जिह्वा यस्य।) उष्ट्रः। कुक्कुरः। हिंस्रे त्रि। इति मेदिनी। वे, ६६॥ (चलदसनायुक्ते च त्रि। यथा, कथासरित्सागरे। १६। १२७।

"तावच्च प्रकटीभूय भगवान् भैरवाकृतिः।
उद्वृत्ताखिललज्जिह्व कृत्वा हुंकारमभ्यधात्॥")

ललत् त्रि, विलासयुक्तः। उन्मत्तविशिष्टः। क्रीडाक्रियाविशिष्टः। चेष्टाविशिष्टः। शोभाविशिष्टः। उपवेशनविशिष्टः। भावविशिष्टः। क्रतुचेष्टाविशिष्टः। इति ललधातोः कर्त्तरि शतृप्रत्ययेन कस्य लकारादेशेन च निष्पन्नम्॥

ललन्तम्बु, पुं (ललत् चलन्नम्बु यत्र।) निम्बुकः। इति जटाधरः॥ (विवर्त्तोऽस्य निम्बुकशब्दे ज्ञेयः॥)

ललन, स्त्री (लल+ल्युट्।) केलिः। इति हेमचन्द्रः॥ चालनम्। इति बालबोधिनी। यथा -

"कामी करालवदना विविधान्ताविपाशिनी।
विचित्ररत्नाम्बरा वरमालाविभूषणा।
हीपिचर्म्मपरीधाना शुभ्रमांसातिभैरवा।
अतिविस्तारवदना जिह्वाललनभीषणा॥"

इति देवीमाहात्म्यम्॥

ललन पुं (ललते ईप्सते इति। लल+कर्म्मणि ल्युट्।) सालः। सालः। प्रियालः। इति राजनिर्घण्टः॥

ललना, स्त्री (लालयति ईप्सति कामानिति। लल+णिच्+ल्युः। टाप्।) कामिनी। (यथा कथा-सरित्सागरे। १। ५।
"इतिप्रदुलित ललित लवनानुपवल लवनाद्यित हनुमत्र।
पथ केयकुसुम परिमल वासितदेश वहत्य निला॥")
नारीभेदः। जिह्वा। इति मेदिनी। ने, १९९।
ललनाप्रिय, क्ली (ललनानां प्रियम्।) ह्रीवेरम्। इति राजनिर्घण्टः॥
ललनाप्रिय, पुं (ललनानां प्रियः।) कदम्बः। इति राजनिर्घण्टः। कामिनीवल्लभश्च॥
ललन्तिका, स्त्री (ललन्त्येव। स्वार्थे कन्।) नाभिलम्बकण्ठिकादि। तत्पर्यायः। लम्बनम् २। इत्यमरः। गोधा। इति शब्दमाला॥
ललाक, पुं मेहनम्। इति शब्दचन्द्रिका।
ललाट, क्ली, (ललं ईप्सामटति प्राप्नोतीति। अट+अच्।) अवयवविशेषः। कपाल इति भाषा। तत्पर्यायः। अलिकम् २ गोधिः ३। इत्यमरः। भालम् ४ ललाम ५ भाल ६ कपालक ७ अलीकम् ८। इति शब्दरत्नावली। ललाटकम् ९। इति धनञ्जयः। तस्य शुभाशुभ लक्षणम्। यथा —
"उन्नतैर्विपुलैः शङ्खैर्ललाटैर्विषमैस्तथा।
निर्धना धनवन्तश्च अर्द्धेन्दुसदृशैर्नराः॥
आचार्याः शुक्तिविशाले शिरालैः पापकारिणः।
उन्नताभिः शिराभिस्तु स्वस्तिकाभिर्धनेश्वराः॥
निम्नैर्ललाटैर्वधार्हाः क्रूरकर्मरतास्तथा।
संवृतैश्च ललाटैश्च कृपणा उन्नतैर्नृपाः॥
ललाटोपगताभिश्च रेखाभिः शतवर्षिणाम्।
नृपत्वं स्याच्चतसृभिरायुः पञ्चनवत्यथ॥
अरेखेणायुर्नवतिर्विच्छिन्नाभिश्च पुंश्चलाः।
केशान्तोपगताभिश्च अशीत्यायुर्नरो भवेत्॥
पञ्चभिः सप्तभिः षड्भिः पञ्चाशद्बहुभिस्तथा।
चत्वारिंशच्च वक्राभिर्विच्छिन्नाभिश्च या मिभिः॥
त्रिंशतिर्भ्रूप्रलग्नाभिरायुः क्षुद्राभिरल्पकम्।
न एष वायैष्वभिभ्रुवो चाय ललाटकम्॥
शुभमर्द्धमर्द्धस्थानमनुज एकाद्धलीमहम्॥"
इति गारुडे ६५ अध्यायः॥
("अन्नपद प्रपाह्मनि चक्षुणी। मध्याकोस्तङ्क नाभिशङ्खाभ्यां ...बिमुक्तिकायीत इतीना एके का।" इति सुश्रुते शारीरस्थाने षष्ठेऽध्याये।)
ललाटक, क्ली (ललाटमेव। कन्।) प्रशस्त ललाटम्। इति शब्दरत्नावली। ललाट भाषम्। इति धनञ्जयः॥
ललाटन्तप, त्रि (ललाटं तपतीति। ललाट+तप+"असूर्य्यललाटयोर्दृशितपोः।" ३। २। ३६। इति खश्। मुम्।) ललाटतापकः। "ललाटन्तप सूर्य्यः।" इति सिद्धान्तकौमुदी। (यथा रघुः। १३। ४१।
"हविर्भुजामेधवतां चतुर्णां
मध्ये ललाटन्तपसप्तसप्तिः।
अयौ तपस्व्यपरस्तपस्वी
नाम्ना सुतीक्ष्णश्चरितेन दान्तः॥"
यथा च, नैषधे। १। १३८।
"अथ विधातुमतीव पाथिवकुञ्जात्
तव प्रिया प्रैयमदुःखमिच्छता।
वियोगसी सबभयेति नियता
शिथिलपाटनतपनिमुराचरा॥")
ललाटिका, स्त्री, (ललाटे भवोऽलङ्कारः। "कर्ण ललाटात् कनलङ्कारे।" ४। ३। ६५। इति कन्।) ललाटविहितललाटाभरणम्। टिका इति भाषा। तत्पर्यायः। पत्रपाश्या २। इत्यमरः। ललाटस्थचन्दनम्। तत्पर्यायः। प्रमचर्षी २। इति शब्दरत्नावली॥ (तिलक। इति मल्लिनाथः। यथा कुमारे। ५। ५१।
"तम प्रभ्रष्टकला ललाटगृहे
ललाटिकाचन्दनधूसरालका।
न जातु बाला लभते स्म निर्वृति
तुषारसङ्घातशिलातलेष्वपि॥")
ललाम, [न्] क्ली, ललामम्। यथाह शब्दः।
"प्रधानध्वजशृङ्गेषु पुण्ड्रवालधिवसु च।
भूषावाजिप्रभावेषु ललामं स्यात् ललाम च॥"
(प्रधाने। यथा, रघुः। ५। ६५।
"तम स्ययवरसमाहुतराजलोक
कन्याललाम कमनीयमजस्य लिप्सोः॥"
पुरुषः। इति रघुटीकायां मल्लिनाथधृत यादवः। ५। ६४।)
ललाम, क्ली, (लड् विलासे+क्विप्। लं अमति प्राप्नोतीति। अम गतौ+अच्। डस्य लत्वम्।) चिह्नम्। ध्वजः। शृङ्गम्। प्रधानम्। भूषा। (यथा, भागवते। ३। १३। ३८।
"पीतकाय श्रीलभाललामं
दष्ट्राग्रतः कुमारमबिदतागमम्॥")
वालधिः। पुण्ड्रम्। तुरङ्गः। प्रभावः। इति मेदिनी। मे ५१। अश्वललाटे अभ्यनखचिह्नम्। गवाश्वीयं ललाटचिह्नम्। अन्यत्र भूषा। इत्यमरटीकायां भरतः। (पुंपुंसकलिङ्गमपि। यथा —
"ललामोऽस्त्री ललाममपि प्रभावे पुण्ड्रे ध्वजे।
श्रेष्ठभूषापुण्ड्रशृङ्गचिह्नाश्वनिर्लिङ्गः॥"
इति रघुटीकायां मल्लिनाथधृतयादवः।
रम्ये श्रेष्ठे च त्रि। यथा, महाभारते। ७। २२। ११।
"ललामैर्हरिभिर्युक्तः सर्वशब्दकेऽष्टौ।
राजा सर्वं अधिमार्थ प्राणभीरन्वधावत्॥")
ललामक क्ली, पुरोन्यस्तमाल्यम्। इत्यमरः। तदेव माल्य पुरः ललाटभागे न्यस्तं ललाटपर्य्यन्त मालम्बं ललामकं ललामं तिलकमिव इति स्वार्थे कः। इति भरतः॥
ललामी, स्त्री कर्णभूषणविशेषः। तत्पर्यायः। कर्णान्दुरिका २। इति शब्दमाला॥
ललितं, क्ली, (लल+क्तः।) शृङ्गारभावजक्रिया विशेषः। इत्यमरः। सुकुमारविधानेन भ्रू नेत्रादिक्रियाचक्षुविवरणेष्वाङ्गविन्यासो ललितम्। तथा च।
"सुकुमाराङ्गविन्यासो मसृणो ललितं भवेत्॥"
तथा,—
"उध्यमङ्क करकिसलयानमरोपरतौ
सा विन्दती ललितललिता लोचनस्याङ्गरेषु।
विन्यस्यन्ती चरणकमले लीलया स्वैरपाति
नि शब्दा च प्रथमवयसा नर्त्तिता पङ्कजाक्षी।
भर्त्सनादिक्रियाभालिसुकुमारविधानम्।
करुणाम्यङ्गविन्यासवशात् ललितं विदुः॥"
इत्यन्येऽपि।
"समासान्योऽपि इद स्याल्ललितं रतिचेष्टितम्।"
इत्यन्ये।
लसत् केऽपि भावे क्तः। लड विलासे इत्यस्य लडयोरैक्यात् लस्य वार्थे वा। इति भरतः। अपि च।
"विन्यासभङ्गिरङ्गानां भ्रूविलासमनोहरा।
सुकुमारा भवेद्यत्र ललितं तदुदीरितम्॥"
इत्युज्ज्वलनीलमणिः।
ललित, पुं (लल्यते ईप्स्यते इति। लल+कर्म्मणि क्तः।) रागविशेषः। तस्य स्वरूपं यथा,—
"प्रफुल्लसप्तच्छदमाल्यधारी
युवातिगौरोऽमललोचनश्री।
दिशि प्रत्येन् भास्वतः प्रभाते
विलासिवेशो ललितः प्रदिष्टः॥"
तस्य रागिणी यथा,—
"प्राप्ता यास्तु इमाः ललितः पठमञ्जरी।
विभाषा भैरवी चैव कामोदी गोकलीकर्षी॥"
इति सङ्गीतदामोदरः।
ललित त्रि, (लल+क्त।) सुन्दरः। (यथा रघुः। ८। १।
"अथ तस्य विवाहकौतुकं
ललितं बिभ्रत एव पार्थिव॥")
ईप्सितः। इति मेदिनी। ते, १३७। चलितः। इति विश्वशब्दरत्नावली॥
ललितकान्ता, स्त्री, (ललिता कान्ता च।) मङ्गलचण्डिका। तस्या ध्यानं यथा,—
"देवी ललितकान्ताख्या देवी मङ्गलचण्डिका।
वरदाभयहस्ता च द्विभुजा गौरदेहिका।
रक्तपद्मासना च किरीटा सुभानना।
नवयौवनसम्पन्ना चार्वङ्गी ललनोत्तमा॥"
इति नियोगनिवन्धः॥
ललिता, स्त्री, (ललित+टाप्।) कस्तूरी। दुर्गा। इति राजनिर्घण्टः। नारीविशेषः। यथा —
"निर्म्मलाद्वस्तु राजर्षे प्राप्तावपञ्च पुरा।
प्रसिद्धो कन्यारीहोऽभूत् चापाव सिन्धकण्ठः।
तस्याः ललोपदेशेन निजके कामधर्मः।
तस्यापत्ने तन्नोषे तस्य विदुरक्षलता।
प्रमत्तस्य धैर्यश्च तस्यापद्मदाहेश्च।
अश्रलायनवाचीक्ष दृष्ट्वा लता निरिक्षि।
तत् कान्ता च दीना च शरीरं त्यज पुरैव।
लक्षारसानुकारात् अम्बा नाम मही पद्मा॥"

नि स्नाता तत्र चामुत्र चिरायुरगदो भवेत् ॥
तस्मात् पूर्व्वेण कुण्डात्तु ललिताख्या सरिद्वरा ।
धामराद्दक्षिणात पूर्व्वं महादेवावतारिता ॥
वैशाखशुक्लपक्षस्य तृतीयायां नरस्तु यः ।
कुर्य्यात् ललितास्नानं स शम्भुसदनं व्रजेत् ॥
ललितायाः पूर्व्वतीरे भगवाम्नाम पर्व्वतः ।
तत्र विष्णुलिङ्गरूपी तस्मात् भगवान् हरिः ॥
ललितायां नरः स्नात्वा द्वादश्यां शुक्लपक्षके ।
भगवन्तं समालभ्य यो यजेत् परमेश्वरम् ।
स याति विष्णुभवनं शरीरेण चिरात्मना ॥'

इति कालिकापुराणे ८५ अध्यायः ॥ * ॥

गोपीविशेषः । यथा,—

"अखिलरसामृतमूर्त्तिः
प्रसृमररुचिरुद्धतारकापालिः ।
कलितश्यामा ललितो
राधाप्रेयान् विधुर्जयति ॥"

इति भक्तिरसामृतसिन्धुः ॥

ललिता श्यामला शैव्या पद्मा भद्रा च भूयसी ।

इति तट्टीकायां श्रीजीवगोस्वामी । तस्याः स्वरूपं यथा,—

"या दुर्गा सैव ललिता ललिता सैव राधिका ।
एतासामन्तरं नास्ति सत्यं सत्यं हि नारद ! ॥"

इति पाद्मे पातालखण्डे रासलीलायां नारदं प्रति श्रीकृष्णवाक्यम् ॥ रागिणीविशेषः । सा च मेघरागस्य पत्नी । यथा, सङ्गीतदामोदरे ।

"ललिता मालसी गौडी नाटी देवकिरी तथा ।
मेघरागस्य रागिण्यो भवन्तीमाः सुमध्यमाः ॥
(सा तु हनूमन्मते हिन्दोलरागस्य पत्नी । सोमेश्वरमते वसन्तस्य पत्नी । यथा, सङ्गीतदर्पणे ।
"वेलावली रामकिरी देशाख्या पटमञ्जरी ।
ललिता सहिता एता हिन्दोलस्य वराङ्गनाः ॥'
"देशी देवकिरी चैव वराटी तोडिका तथा ।
ललिता चाथ हिन्दोली वसन्तस्य वराङ्गनाः ॥
अस्या ध्यानादिकमाह तत्रैव । अथ ललिता ।
रि प वर्ज्या च ललिता औडुवा सवया मता ।
मूर्च्छना शुद्धमध्या स्यात् सम्पूर्णा क्वचिदूचिरे ।
धैवतत्रयसंयुक्ता द्वितीया ललिता मता ॥"
ध्यानम् । यथा,—
"प्रफुल्लसप्तच्छदमाल्यकण्ठा
सुगौरकान्तिर्युवती सुदक्षा ।
विनिःश्वसन्ती सहसा प्रभाते
विलासवेषा ललिता प्रदिष्टा ॥"
उदाहरणम् । ध ग म ध नि ध ।
अथवा,—
ध रि ग म प ध नि ध । इति प्रथमा ॥
ध नि ध ग म ध । इति द्वितीया ।
इति ललिता ॥)

ललितासप्तमी, स्त्री, (ललिताख्या सप्तमी ।) भाद्रशुक्लसप्तमी । तत्र कुक्कुटीव्रतं कार्य्यम् । यथा भविष्ये ।
"भाद्रे मासि सिते पक्षे सप्तम्यां नियमेन या ।
स्नात्वा शिवं वेष्टयित्वा मण्डपे च सहाम्बिकम् ।
पूजयेच्च सदा तस्या दुःखाय नैव विद्यते ॥"

इति कुक्कुटीव्रततत्त्वे स्वानम् । इति तिथ्यादितत्त्वम् ॥ * ॥

तद्विधिर्यथा । तत्रादौ स्वस्तिवाचनपूर्व्वकं सङ्कल्पं कुर्य्यात् । ॐ अद्येत्यादि भाद्रे मासि शुक्ले पक्षे सप्तम्यान्तिथौ यावज्जीवनपर्य्यन्तं अमुकगोत्रा श्रीमदमुकी शिवदुर्गाप्रीतिकामा प्रतिवर्षीयभाद्रशुक्लसप्तम्यां गणेशादिदेवतापूजापूर्व्वकशिवपार्व्वतीपूजायावज्जीवनडोरकधारणभविष्यपुराणोक्तव्रतकथाश्रवणरूपललितासप्तमीव्रतमहं करिष्ये । तत सङ्कल्पसूक्तं पठित्वा सामान्यार्घ्यं विधाय गणेशादीन् सम्पूज्य भूतशुद्ध्यादिकं विधाय मण्डलादिषु पूजामारभेत । ततो ध्यात्वा स्वशिरसि पुष्पं दत्त्वा मानसोपचारैः सम्पूज्य अर्घ्यं संस्थाप्य पुनर्ध्यात्वा आवाहयेत । शिवपूजाविधिना शिवं दुर्गापूजाविधिना दुर्गाञ्च यथाशक्त्युपचारैः सम्पूज्य आवरणदेवान् पूजयेत् । ततो द्रव्यग्रन्थियुक्तडोरकं दुग्धेन सिक्तं शिवदुर्गाभ्यां अर्पयित्वा तत् डोरकं वामकरे बद्ध्वा भोज्यं सम्प्रदाय कथां शृणुयात् । अष्टफलानि दद्यात् । ततो दक्षिणां दद्यात् ॥ * ॥ अथ कथा ।

श्रीकृष्ण उवाच ।

"लोमशो नाम देवर्षिर्मथुरामागतः पुरा ।
सोऽर्च्चितो वसुदेवेन देवक्या च युधिष्ठिर ॥
उपविष्टः कथाः पुण्याः कथयामास वै तदा ।
तत कथयितुं भूयः कथामेतां प्रचक्रमे ॥
कंसेन निहताः पुत्त्रा जाता जाताः पुनः पुनः ।
मृतवत्सा देवकि ! त्वं पुत्त्रदुःखेन दुःखिता ।
यथा चन्द्रमुखी दीना बभूव नहुषप्रिया ।
तथा त्वं देवकी भद्रे पुत्त्रदुःखेन दुःखिता ॥
पश्चाच्चीर्णव्रता सा तु बभूवाक्षयपुत्त्रिका ।
त्वमेव देवकी देवि ! भविष्यसि न संशयः ॥

देवक्युवाच ।

का सा चन्द्रमुखी दीना बभूव नहुषप्रिया ।
कथं चीर्णव्रतं सम्यक् तस्याः सन्ततिकारणम् ॥

लोमश उवाच ।

अयोध्यायां पुरा राजा नहुषो नाम विश्रुतः ।
तस्य राज्ञी महादेवी नाम्ना चन्द्रमुखी प्रिया ॥
पुरोहितस्य तस्यैव पत्नी माला च नामिका ।
तयोरासीद्दृढप्रीतिः सख्योर्या परस्परम् ॥
अथ तेऽपि च स्त्रियौ स्नानार्थं सरयूजले ।
प्राप्ते प्राप्तास्तु तत्रैव बहुधा नगराङ्गनाः ॥
स्नातास्ता मण्डलं चक्रुस्तन्मध्ये शालरूपिणम् ।
लेखयित्वा शिवं शान्तमुमया सह शङ्करम् ॥
गन्धपुष्पाक्षतैर्भक्त्या पूजयित्वा यथाविधि ।
प्रणम्य शिरसा भक्त्या इदानीं गन्तुमिच्छथ ॥
किमिदं क्रियते साध्व्यः कथ्यतां यदि रोचते ।
कदा वा क्रियते किं वा फलं सम्यक् तदुच्यताम् ॥

स्त्रिय ऊचुः ।

पूजितोऽस्माभिरेतस्मिन् पार्व्वत्या सह शङ्करः ।
बद्धा सूत्रमिदं शुभ्रं शिवस्यात्मा निवेदितः ॥
धारणीयमिदं तावद्यावत् प्राणस्य धारणम् ।
तासान्तु तद्वचः श्रुत्वा ते कृत्वा मानसं तथा ॥
कृत्वा च सम्मतिं तत्र बद्धा दोर्भ्यां सुडोरकम् ।
ततस्ताः स्वगृहं जग्मुः सखीभिः परिवारिताः ॥
कालेन महता तत्र विस्मृतं तद्व्रतं नृप ॥
प्रमत्तया चन्द्रमुख्या विसृष्टञ्च सुडोरकम् ॥
मृता केचिन्मृते काले सा बभूव प्लवङ्गमी ।
माला च कुक्कुटी जाता तत्सख्यव्रतपालनात् ॥
तथैव ते च स्त्रियौ जाते जातिस्मरे कुले ।
सम्भूय भूयस्तत्रैव प्राप्तश्च समयः पुनः ॥
तद्दिने तद्दिने प्राप्ते पुनः काले च ते मृते ।
अदेवमातृके देशे जाते गोकुलसङ्कुले ॥
राज्ञो जाया बभूवाथ पृथ्वीनाथस्य सा पुनः ।
ईश्वरी नाम विख्याता सा तु राज्ञोऽतिवल्लभा ॥
अग्निमीलद्विजस्यासीद्भार्य्या भूषणनामिका ।
पुरोहितस्य कालेन कुक्कुटी बहुपुत्त्रिणी ॥
जातिस्मरा चारुपुत्रा तथैव चाष्टसप्रजा ।
पुत्त्रैर्निरन्तरा प्रीतिर्बभूवाथ तयोर्द्विज ॥
ततेश्वरी पुत्त्रमेकं प्रसूता तच्च रोगिणम् ।
नववर्षं तु पञ्चत्वमगात्तच्च युधिष्ठिर ॥
तत्र तां भूषणा द्रष्टुमागमत्तामतिदुःखिता ।
सखीभावादतिस्नेहादष्टपुत्त्रसमन्विता ॥
अयुक्ताभरणा नित्यं स्वभावनैव भूषिता ।
तां दृष्ट्वा पुत्त्रिणीं भद्रां प्रजज्वालेश्वरी तदा ॥
ततो गृहं प्रेषयित्वा तां सखीं तीव्रमत्सरा ।
चिन्तयामास सा राज्ञी तस्याः पुत्त्रवधं प्रति ॥
हता हतास्ते पुत्त्राः पुनर्न्योन्यवधकामया ।
बहुपुत्रा जीववत्सा पद्मकाभरणा कथम् ।
शोभसे त्वधिकं भद्रे तडित् सौदामिनी यथा ॥

भूषणोवाच ।

भाद्रे मासि सिते पक्षे सप्तम्यां ललिताव्रते ।
स्नात्वा शिवं वेष्टयित्वा मण्डपे च सहाम्बिकम् ॥
सम्पूज्य विधिवत् प्राप्तं त्रैलोक्ये यच्च विद्यते ।
तदेव हि व्रतं पूर्व्वं त्वया सह मया कृतम् ॥
तत्क्रियाचरितं भक्त्या तेनाहं सुस्थिरा सखि ।
त्वया नाचरितं सम्यक् दृष्टान्तश्चरीरया ॥
तेन ते सन्ततिच्छिन्ना राज्येऽपि सति दुःखिता ।
प्रभाव एष कथितो व्रतस्यास्य मया सखि ॥
अहं तुभ्यं प्रदास्यामि तस्य धर्म्मस्य सुव्रते ।
सखीभावात् प्रतीच्छ त्वं नाव कार्य्या विचारणा ॥
सम्पूज्य शङ्करं भक्त्या करे बद्धा सुडोरकम् ।
यावज्जीवं मया तावत् शिवस्यात्मा निवेदितः ॥
इत्थं समयं कृत्वा वत प्रभृति डोरकम् ।
अवकृत्यमयं चापि करमाश्रित्य धारणम् ॥
शङ्करलोमया सार्द्धं जीवन्तं रावणात्मजा ।
ताम्रपात्रे प्रतिष्ठाप्य ब्राह्मणायोपपादयेत् ॥
पायसं पिष्टकञ्चैव भक्ष्यं भोज्यं प्रयत्नतः ।
यथोक्तान् भोजयित्वा तु स्वयं भुञ्जीत तत्परम् ॥
भक्त्या सोमसहाय शिवस्यात्मा निवेदितम् ।
इत्थं प्रतिपद्य व्रतदानफल तत ॥

बभूव सुप्रभा साध्वी ईश्वरी गुरुसेवती ।
तमस्यास्य प्रभावेन सुपुत्रा त्वञ्च देवकि ॥
भविष्यसि त्रिलोकेशं पुत्रञ्च जनयिष्यसि ।
इत्येवं श्रावयित्वा च विरराम मुनिस्तदा ॥
जगाम मथुरां पार्थ यथापूर्वं मनोरमम् ।
या स्त्रियः श्रावयिष्यन्ति व्रतमेतद्युधिष्ठिर ।
कुक्कुटाख्यं प्रयत्नात्तु व्रतमाचरितं शुभम् ।
तासां मनस्तिरिन्दिरी न कदाचिद्भविष्यति ॥
स्त्रियश्चैवाचरिष्यन्ति व्रतमेतत् सुखप्रदम् ।
अस्मिन् लोके सुखं भुक्त्वा यास्यन्ति प्रियमन्दिरम् ॥

या कुक्कुटीव्रतमिदं प्रयतोद्यमेन
देवं विभाव्य कुरुते च गुरुं विधाय ।
भक्त्या करोति कलुषौघविदारणञ्च
साध्वी जना भवति सौभगजीववत्सा ॥'
इति भविष्यपुराणे कुक्कुटीव्रतकथा समाप्ता ।

लवं, क्ली, (लू+अप् ।) वालोमलम् । इति शब्दचन्द्रिका । लवङ्गम् । लामज्जकम् । इत्यम् । इति राजनिर्घण्टः ॥

लव, पुं (लवनमिति । लू+अप् ।) लेशः । (यथा, रघुः । १६ । ६६ ।
"वकिनरायैरमकेसरस्य
प्रभावलान् वारिलवान् वमन्ति ॥")
विनाशः । छेदनम् । रामपुत्रः । इति मेदिनी । वे ४६ । अत्र विनाशस्थाने विलासः । इति विश्वप्रकाशः । (रामपुत्रस्य कथाविवरणान्तिक रामायणे उत्तरकाण्डतो द्रष्टव्यम् ।) कालभेदः । यथा,—
"अष्टादशनिमेषास्तु काष्ठा काष्ठाद्वयं लवः ।"
इति हेमचन्द्रः ॥
(यथा, भागवते । ३ । १९ । ३४ ।
"तुलयाम लवेनापि न स्वर्गं नापुनर्भवम् ।
भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः ॥")
लावाभाम पक्षी । इति राजनिर्घण्टः ॥
(किञ्चित्त्व । यथा । गोपुच्छलोम । इति रघुटीकायां मल्लिनाथधृतशेषवचनम् । यथा रघुः । १५ । ३२ ।
"स तौ कुशलवोन्मृष्टगर्भक्लेदौ तदाख्यया ।
कविः कुशलवावेव चकार किल नामतः ॥")

लवङ्गं, क्ली, (लुनाति पीडामिति । लू+ "लवङ्गादयश्च ।" उणा ९ । ११८ । इति अङ्गच् ।) स्वनामख्यातपुष्पविशेषः । तत्पर्यायः । देवकुसुमम् १ श्रीसंज्ञम् २ इति अमरः । श्रीपुष्पम् ३ । इति भावप्रकाशः । लवङ्गकम् ४ । इति शब्दरत्नावली । अङ्गकं ५ दिव्यम् ७ दिव्यम् ८ लवम् ९ कीरेष्टम् १० वारिजम् ११ वारिसम्भवम् १२ श्रीकरम् १३ मौक्तिकसुमम् १४ चन्दनपुष्पम् १५ । अस्य गुणाः । शीतलत्वम् । तिक्तत्वम् । चक्षुष्यत्वम् । भुक्तरोचनत्वम् । वातपित्तकफनाशित्वम् । तीक्ष्णत्वम् । मुखदत्वा तृष्णाघ्नत्वञ्च । इति राजनिर्घण्टः ॥ भावप्रकाशे

शूलघ्नत्वम् । दीपनत्वम् । लघुत्वञ्च । इति राजवल्लभः ॥ अपि च ।
"लवङ्गं कटुकं तिक्तं लघु नेत्रहितं हिमम् ।
दीपनं पाचनं रुच्यं कफपित्तास्रनाशकृत् ॥
तृष्णां छर्दिं तथाध्मानं शूलमाशु विनाशयेत् ।
कासं श्वासञ्च हिक्काञ्च क्षयं क्षपयति ध्रुवम् ॥"
इति भावप्रकाशः ॥
(यथा,—
"विरहानलसन्तप्ता तापिनी कापि कामिनी ।
लवङ्गानि सुगन्धानि पश्यति राघव दृशौ ॥"
इत्युद्भटः ॥)

लवङ्गक, क्ली, (लवङ्ग+स्वार्थे कन् ।) लवङ्गम् । इति शब्दरत्नावली ॥ (लवङ्गशब्देऽस्य विवरणं विज्ञेयम् ॥)

लवङ्गकलिका स्त्री, लवङ्गम् । इति राजनिर्घण्टः ॥

लवङ्गलता स्त्री, (लवङ्गस्य लता ।) पुष्पलताविशेषः । यथा, जयदेवः ।
"ललितलवङ्गलतापरिशीलनकोमलमलय
समीरे ।
मधुकरनिकरकरम्बितकोकिलकूजितकुञ्ज
कुटीरे ॥
विहरति हरिरिह सरसवसन्ते ।
नृत्यति युवतिजनेन समं सखि विरहिजनस्य
दुरन्ते ॥"
(यथा च ।
"अयि ! मधुप ! लवङ्गलतान्ते
किं मधूनि विधूय मधुन्यान् ।
इह मम हि मनः समेत्य
यदि कलारोलत्वं विपना ॥")
राधाया सखीविशेषश्च ॥

लवण, क्ली (लुनाति जाड्यमिति । लू+
ल्युट् । पृषोदरादित्वात् णत्वम् ।)
रसविशेषः । तत्तु षड्विध
धं यथा । सैन्धवम् १
सामुद्रम् ५ । ... [illegible]
"सामुद्रं ... [illegible]
सैन्धवं ... [illegible]
रौमकं ... [illegible]
सौवर्च ... [illegible]
यथा । ... [illegible]
प्रभृति ... [illegible]
चरति स ... [illegible]
भानुमि ... [illegible]
"लवणं सैन्धवं ... [illegible]
स्निग्धं सूक्ष्मं ... [illegible]
व्यक्तं मधुरं वा ... [illegible]
भेदनं स्निग्धमल ... [illegible]
कफहरं दीपनं ... [illegible]
रोचनं तीक्ष्णमुष्णं ... [illegible]
लघु वीर्येण याति ... [illegible]
पुंस्त्वघ्नं ... [illegible]

रोमकं तीक्ष्णमत्युष्णं व्यवायि कटुपाकि च ।
वातघ्नं लघु विष्यन्दि सूक्ष्मं विड्भेदि मूत्रलम् ॥
लघु सौवर्चलं हृद्यं सुगन्धोद्गारशोधनम् ।
कटुकं पाके विबन्धघ्नं दीपनं रुच्यमेव च ॥
वातानुलोमनं ... विशदं ... ।
दीपनं पाचनं भेदि लवणं तीक्ष्णमुष्णकम् ।
कफघ्नं वातघ्नं ... ।
लवणं कटुकं तिक्तं विज्वरं कटु पाचनं ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥

लू+भावे ल्युट् ।) छेदनम् । यथा । अशोऽमि लावो लवथे । इति चामरः (लक्ष्मद्र प्रकारविशेषः । यथा, हरिवंशे भविष्यपर्वणि । ६६ । १० ।
"व्याहितं विषकं विषं शुष्कं लावं स्मृतम् ॥")

लवण, पुं (लुनातीति । लू+ल्युः ।) दैत्यविशेषः । (यथा महाभारते । ६ । ६ । ११ ।
"लवणेन समुद्रेण समन्तात् परिवारितः ॥")
रावणविशेषः । रसविशेषः । इति मेदिनी । णे, ७३ ॥ (यथा, भागवते । ९ । ११ । १४ ।
"शत्रुघ्नश्च मधोः पुत्रं लवणं नाम राक्षसम् ।
हत्वा मधुवने चक्रे मथुरां नाम वै पुरीम् ॥")
दण्डकपिप्पल्याञ्च सूचकः । इति चक्रपाणिदत्तकृतद्रव्यगुणोपरि शिवदासीयटीका ॥ तत्पर्यायः । पटुः २ । तस्य गुणाः ।
"लवणो वस्तिरुजापहरो
पचनः रुचिकरश्च दारकः ।
रचितो बिलतो अराति बिर्ब
क्लिष्टमादाय स्वादि बुद्धकारी ॥"
इति राजनिर्घण्टः ॥
अपि च ।
"लवणं स्निग्धतीक्ष्णोष्णं पाचनो दीपनो भवः ।
शोधकः स्रावी हर्षकारी लघुः ॥"

पाचनं अकरोदितः ।
॥"

पति तापयति दारयति कुथ्नाति मांसानि प्रगालयति कुष्ठानि विषं वर्द्धयति शोफान् स्फोटयति दन्तान् च्यावयति पुंस्त्वमुपहन्ति इन्द्रियाण्युपरुणद्धि वलीपलितखालित्यमापादयति च लोहितपित्ताम्लपित्तवीसर्पवातरक्तविचर्च्चिकेन्द्रलुप्तप्रभृतीन् विकारानुपजनयति ।"

"प्रलीयन् क्लेदविष्यन्दमार्दवं कुरुते मुखे ।
यः शीघ्रं लवणो ज्ञेयः स विदाहान्मुखस्य च ॥"

इति चरके सूत्रस्थाने २६ अध्यायः ॥

"लवणः संशोधनः पाचनो विश्लेषणः क्लेदनः शैथिल्यकृदुष्णः सर्व्वरसप्रत्यनीको मार्गविशोधनः सर्व्वशरीरावयवमार्द्दवकरश्चेति स एवं गुणोऽप्येक एवात्यर्थमासेव्यमानो गात्रकण्डूकोठशोफवैवर्ण्यपुंस्त्वोपघातेन्द्रियोपतापान् तथा मुखाक्षिपाक रक्तपित्तवातशोणिताम्लीका प्रभृतीनापादयति ।"

'यो भक्तरुचिमुत्पादयति कफप्रसेकं जनयति मार्द्दवञ्चापादयति स लवणः ।' इति सुश्रुते सूत्रस्थाने ४२ अध्यायः ॥ ७ ॥)

लवणासुरस्य विवरणं यथा,—

"पूर्व्वं कृतयुगे राजन् ! दैतेयः सुमहामतिः ।
लोलापुत्त्रोऽभवज्ज्येष्ठो मधुर्नाम महासुरः ॥
स मधुर्वीर्य्यसम्पन्नो धर्म्मे च सुसमाहितः ।
बहुमानाच्च रुद्रेण दत्तस्तस्याद्भुतो वरः ॥
शूलं शूलाद्विनिष्कृष्य महावीर्य्यं महाप्रभम् ।
ददौ महात्मा सुप्रीतो वाक्यञ्चैतदुवाच ह ॥
यावत् सुरैश्च विप्रैश्च न विरुध्येर्महासुर ! ।
तावच्छूलं तवेदं स्यादन्यथा नाशमेष्यति ॥
यश्च त्वामभियुञ्जीत युद्धाय विगतज्वरः ।
तं शूलो भस्मसात् कृत्वा पुनरेष्यति ते करम् ॥
एवं रुद्राद्वरं लब्ध्वा भूय एव महासुरः ।
प्रणिपत्य महादेवं वाक्यमेतदुवाच ह ॥
भगवन्मम वंशस्य शूलमेतदनुत्तमम् ।
भवेत्तु सततं देव सुराणामीश्वरो ह्यसि ॥
तं ब्रुवाणं मधुं देवः सर्व्वभूतपतिः शिवः ।
प्रत्युवाच महादेवो नैतदेवं भविष्यति ॥
माभूत्ते विफला वाणी मत्प्रसादकृता शुभा ।
भवतः पुत्त्रमेकन्तु शूलमेतद्भविष्यति ॥
यावत् करस्थः शूलोऽयं भविष्यति सुतस्य ते ।
अवध्यः सर्व्वभूतानां शूलहस्तो भविष्यति ॥
एवं मधुर्वरं लब्ध्वा देवात् सुमहदद्भुतम् ।
भवनं सोऽसुरश्रेष्ठः कारयामास सुप्रभम् ॥
तस्य पत्नी महाभागा प्रिया कुम्भीनसीति या ।
विश्वावसोरपत्यं साप्यनलायां महाप्रभा ॥
तस्याः पुत्त्रो महावीर्य्यो लवणो नाम दारुणः ।
बाल्यात् प्रभृति दुष्टात्मा पापान्येव समाचरत् ॥
तं पुत्त्रं दुर्व्विनीतन्तु दृष्ट्वा क्रोधसमन्वितः ।
मधुः स शोकमापेदे न चैनं किञ्चिदब्रवीत् ॥
स विहाय इमं लोकं प्रविष्टो वरुणालयम् ।
शूलं निवेश्य लवणे वरं तस्मै न्यवेदयत् ॥
स प्रभावेण शूलस्य दौरात्म्येनात्मनस्तथा ।
सन्तापयति लोकांस्त्रीन् विशेषेण च तापसान् ॥
आहारः सर्व्वसत्त्वानि विशेषेण च तापसाः ।
आचारो रौद्रता नित्यं वासो मधुवने तथा ॥
हत्वा बहुसहस्राणि सिंहव्याघ्रमृगाण्डजान् ।
मानुषांश्चैव कुरुते नित्यमाहारमाह्निकम् ॥
तच्छ्रुत्वा राघवो वाक्यमुवाच स महामुनीन् ।
घातयिष्यामि तद्रक्षो व्यपगच्छतु वो भयम् ॥
प्रतिज्ञाय तदा तेषां मुनीनामुग्रतेजसाम् ।
स भ्रातॄन् सहितान् सर्व्वानुवाच रघुनन्दनः ॥
को हन्ता लवणं वीरः कस्यांशः स विधीयताम् ।
भरतस्य महाबाहो शत्रुघ्नस्य च धीमतः ॥
राघवेणैवमुक्तस्तु भरतो वाक्यमब्रवीत् ।
अहमेनं वधिष्यामि ममांशः स विधीयताम् ॥
भरतस्य वचः श्रुत्वा धैर्य्यशौर्य्यसमन्वितम् ।
लक्ष्मणावरजस्तस्थौ हित्वा सौवर्णमासनम् ॥
शत्रुघ्नस्त्वब्रवीद्वाक्यं प्रणिपत्य नराधिपम् ।
कृतकर्म्मा महाबाहुर्मध्यमो रघुनन्दनः ॥
आर्य्येण हि पुरा शून्या अयोध्या परिपालिता ।
सन्तापं हृदये कृत्वा आर्य्यस्यागमनं प्रति ॥
प्रेष्ये मयि स्थिते राजन् भूयः क्लेशमाप्नुयात् ।
तथा ब्रुवति शत्रुघ्ने राघवः पुनरब्रवीत् ।
एवं भवतु काकुत्स्थ क्रियतां मम शासनम् ॥
स त्वं हत्वा मधुसुतं लवणं पापनिश्चयम् ।
राज्यं प्रशाधि धर्म्मेण वाक्यं मे यद्यवेक्षसे ॥
यदा तु युद्धमाकाङ्क्षन् यः कश्चित् समाह्वयेत् ।
तदा शूलं गृहीत्वा तु भस्म रक्षः करोति हि ॥
स त्वं पुरुषशार्दूल ! तमायुधविनाकृतम् ।
अप्रविष्टं पुरं पूर्व्वं द्वारि तिष्ठ धृतायुधः ।
अन्यथा क्रियमाणे तु अवध्यः स भविष्यति ॥
ततः प्रभाते विमले तस्मिन् काले स राक्षसः ।
निर्गतस्तु पुराद्वीरो भक्ष्याहारप्रचोदितः ॥
एतस्मिन्नन्तरे वीर उत्तीर्य्य यमुनां नदीम् ।
तीर्त्त्वा मधुपुरद्वारि धनुष्पाणिरतिष्ठत ॥
ततोऽर्द्धदिवसे प्राप्ते क्रूरकर्म्मा स राक्षसः ।
आगच्छद्बहुसाहस्रं प्राणिनां भारमुद्वहन् ॥
ततो ददर्श शत्रुघ्नं स्थितं द्वारि धृतायुधम् ।
तमुवाच ततो रक्षः किमनेन करिष्यसि ॥
तस्यैवं भाषमाणस्य हसतश्च मुहुर्मुहुः ।
शत्रुघ्नो वीर्य्यसम्पन्नो रोषादश्रूण्यवासृजत् ॥
उवाच च सुसंक्रुद्धः शत्रुघ्नः स निशाचरम् ।
योद्धुमिच्छामि दुर्बुद्धे द्वन्द्वयुद्धं त्वया सह ॥
तच्छ्रुत्वा भाषितं तस्य शत्रुघ्नस्य महात्मनः ।
क्रोधमाहारयत्तीव्रं तिष्ठ तिष्ठेति चाब्रवीत् ॥
आहूतस्तु पुनस्तेन शत्रुघ्नेन महात्मना ।
लवणः क्रोधसंयुक्तो युद्धाय समुपस्थितः ॥
आकर्ण्णान् स विकृष्याथ तद्धनुर्धन्विनां वरः ।
स मुमोच महावाणं लवणस्य महोरसि ॥
उरस्तस्य विदार्य्याशु प्रविवेश रसातलम् ।
पुनरेवागमत्तूर्णमिक्ष्वाकुकुलनन्दनम् ॥
शत्रुघ्नशरनिर्भिन्नो लवणः स निशाचरः ।
पपात सहसा भूमौ वज्राहत इवाचलः ॥
तच्च शूलं महद्दिव्यं हते लवणराक्षसे ।
पश्यतां सर्व्वदेवानां रुद्रस्य वशमन्वगात् ॥
हते तु लवणे देवाः सेन्द्राः साग्निपुरोगमाः ।
ऊचुः सुमधुरां वाणीं शत्रुघ्नं शत्रुतापनम् ॥
वरदास्तु महाबाहो सर्व्व एव समागताः ।
विजयाकाङ्क्षिणस्तुभ्यममोघं दर्शनं हि नः ॥
देवानां भाषितं श्रुत्वा शूरो मूर्द्ध्नि कृताञ्जलिः ।
प्रत्युवाच महाबाहुः शत्रुघ्नः प्रयतात्मवान् ॥
इयं मधुपुरी रम्या मधुरा देवनिर्म्मिता ।
निवेशं प्राप्नुयाच्छीघ्रमेष मेऽस्तु वरः परः ॥
तं देवाः प्रीतमनसो बाढमित्येव राघवम् ।
भविष्यति पुरी रम्या शूरसेना न संशयः ॥
ते तथोक्त्वा महात्मानो दिवमारुरुहुस्तदा ।
शत्रुघ्नोऽपि महातेजास्तां सेनां समुपानयत् ॥
सा सेना शीघ्रमागच्छत् श्रुत्वा शत्रुघ्नशासनम् ।
निवेशनञ्च शत्रुघ्नः श्रावणेन समारभत् ॥
तां पुरीं दिव्यसङ्काशां नानापण्योपशोभिताम् ।
निरीक्ष्य परमप्रीतः परं हर्षमुपागमत् ॥
तस्य बुद्धिः समुत्पन्ना निवेश्य मधुरां पुरीम् ।
रामपादौ निरीक्षेऽहं वर्षे द्वादश आगते ॥"

इति श्रीरामायणे उत्तरकाण्डे एकषष्ट्यादिसप्तषष्ट्यध्यायेभ्यः सङ्कलितम् ॥ ८ ॥ लवणसमुद्रस्योत्पत्तिर्यथा,—

"विरजा सा रसोयुक्ता कृत्वा यौवनगोपकम् ।
नदी बभूव तत्रैव धन्या गर्भवती सती ॥
तस्यौ तत्र सुखासीना सार्द्धं पुत्त्रैश्च सप्तभिः ।
एकदा हरिणा सार्द्धं वृन्दारण्ये सुनिर्ज्जने ॥
विजहार पुनः साध्वी शृङ्गारासक्तमानसा ।
एतस्मिन्नन्तरे तत्र मातुः क्रोडं जगाम ह ।
कनिष्ठपुत्त्रस्तस्याश्च भ्रातृभिः पीडितो भिया ॥
भीतं स्वतनयं दृष्ट्वा तत्याज तं कृपानिधिः ।
क्रोडे चकार बालं सा कृष्णो राधागृहं ययौ ॥
प्रबोध्य बालं सा साध्वी न ददर्शान्तिके प्रियम् ।
विललाप भृशं तत्र शृङ्गाराक्रान्तमानसा ॥
शशाप स्वसुतं कोपात् लवणोदो भविष्यसि ।
कदापि ते जलं केचिन्न खादिष्यन्ति जीविनः ॥
शशाप सर्व्वान् बालांश्च यात दूरं महीतलम् ।
गच्छध्वं च महीं मत्त्वा जम्बुद्वीपं मनोहरम् ॥
स्थितिर्भवतु युष्माकं भविष्यति पृथक् पृथक् ।
द्वीपे द्वीपे स्थितिं कृत्वा तिष्ठन्तु सुस्थिराः सुताः ॥
दोषस्थानेर्नदीभिश्च सह क्रीडन्तु निर्ज्जने ।
कनिष्ठो मातृशापाच्च लवणोदो बभूव ह ॥
कनिष्ठं कथयामास मातृशापञ्च बालकान् ।
आश्रयन्दुःखिताः सर्व्वे मातृस्थानञ्च बालकाः ॥
श्रुत्वा विवरणं सर्व्वं प्रजग्मुर्धरणीतलम् ।
प्रणम्य मातुश्चरणं भक्तिनम्रात्मकन्धराः ॥
सप्तद्वीपे समुद्राश्च सप्त तस्थुर्विभागशः ।
कनिष्ठाद्दूरपर्य्यन्तं द्विगुणं द्विगुणं सुते ॥
लवणेक्षुसुरासर्पिर्दधिदुग्धजलार्णवाः ।
सर्व्वेषाञ्च सतां पूर्णा शब्दायञ्च भविष्यति ।
याताः सहसा सप्तैव सप्तद्वीपं वसुन्धराम् ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २ अध्यायः ॥

अभूव सुप्रभा साध्वी इन्दरी भुवनेश्वरी ।
प्रभावात् प्रभावेण सुपूता व्रत ईदृशि ॥
भविष्यसि त्रिलोकेशी पुत्रश्च भविष्यति ।
इत्येवं भाषयित्वा च विरराम मुनिस्तदा ।
जगाम मथुरं भाव यथार्थं मनोहरम् ।
या स्त्रियः प्राचरिष्यन्ति व्रतमेतद्युधिष्ठिर ।
कुक्कुट्याख्यं व्रतं ह्येतत् दयनाचरित शुभम् ।
तासां सन्ततिविच्छेदो न कदाचिद्भविष्यति ।
स्त्रियश्चैवाचरिष्यन्ति व्रतमेतत् सुतप्रदम् ।
अस्मिन् लोके सुखं भुक्त्वा यास्यन्ति शिवमन्दिरम् ॥

या कुक्कुटीव्रतमिदं प्रकरोति सम्यक्
देवं विभाव्य हृदये च गुरुं विधाय ।
भक्त्या करोति कथुधौतविधानदृष्टं
साध्वी सदा भवति सौभगलोकवन्द्या ॥"

इति भविष्यपुराणे कुक्कुटीव्रतकथा समाप्ता ॥

लवं, क्ली, (लू+अप् ।) जातीफलम् । इति शब्दचन्द्रिका ॥ लवङ्गम् । लामज्जकम् । इत्यनु । इति राजनिघण्टः ॥

लव, पुं, (लवनमिति । लू+अप् ।) लेशः । (यथा, रघुः । १६ । ६६ ।
"पश्चेतरायैरभकेलिवस्य
सुधालवान् यान्तिलवान् वमन्ति ॥")
विनाशः । छेदनम् । रामपुत्रः । इति मेदिनी । पे २१ ॥ गोलोमवस्त्रीणाम् किलाट । इति विश्व हेमचन्द्रौ । (रामपुत्रस्य जन्मविवरणादिक रामायणे उत्तरकाण्डे द्रष्टव्यम् ।) कालभेदः । यथा,—
"अष्टादशनिमेषास्तु काष्ठा काष्ठाद्वयं लवः ॥"
इति हेमचन्द्रः ॥
(यथा, भागवते । १ । १८ । १३ ।
"तुलयाम लवेनापि न स्वर्गं नापुनर्भवम् ।
भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः ॥")
लावकाख्या पक्षी । इति राजनिघण्टः ॥
(किञ्चित् । पश्य । गोपुच्छलोम । इति रघुटीकायां मल्लिनाथधृतवैजयन्ती । यथा रघुः । १५ । ३२ ।
"स तौ कुशलवोन्मृष्टगर्भक्लेदौ तदाख्यया ।
कविः कुशलवावेव चकार किल नामतः ॥")

लवङ्ग, क्ली, (लुनाति दोषादिकमिति । लू+ "तरत्यादिभ्यश्च ।" उणा० १ । ११८ । इति अङ्गच् ।) स्वनामख्यातकलिकाद्रव्यम् । तत्पर्याय । देवकुसुमम् २ श्रीसंज्ञम् ३ । इत्यमरः । शेखरम् ४ । इति भावप्रकाशः ॥ लवङ्गकम् ५ । इति शब्दरत्नावली ॥ लवङ्गकलिका ६ दिव्यम् ७ श्रीकरम् ८ वरम् ९ श्रीपुष्पम् १० रुचिरम् ११ वारिसम्भवम् १२ भृङ्गारम् १३ गीर्वाणकुसुमम् १४ चन्दनपुष्पम् १५ । अस्य गुणाः । शीतलत्वम् । तिक्तत्वम् । चक्षुष्यत्वम् । क्षुधारोचनत्वम् । वातपित्तकफनाशित्वम् । तीक्ष्णत्वम् । अङ्गरुजा पहत्वम् । इति राजनिघण्टः ॥ आध्मानानाह

शूलघ्नत्वम् । शीतलत्वम् । लघुत्वञ्च । इति राजवल्लभः ॥ अपि च ।
"लवङ्गं कटुकं तिक्तं लघु नेत्रहितं हिमम् ।
दीपनं पाचनं रुच्यं कफपित्तास्रनाशकृत् ॥
तृष्णां छर्दिं तथाध्मानं शूलमाशु विनाशयेत् ।
कासं श्वासञ्च हिक्काञ्च क्षयं क्षपयति ध्रुवम् ॥"
इति भावप्रकाशः ॥
(यथा,—
"विरहानलतप्ताङ्गा तापिनी कापि कामिनी ।
लवङ्गानि चकर्तस्य यद्यपि रागवेशनी ॥"
इत्युद्भटः ॥)

लवङ्गक क्ली, (लवङ्ग+स्वार्थे कन् ।) लवङ्गम् । इति शब्दरत्नावली ॥ (लवङ्गशब्देऽस्य विवरणं विज्ञेयम् ॥)

लवङ्गकलिका स्त्री, लवङ्गम् । इति राजनिर्घण्टः ॥

लवङ्गलता, स्त्री, (लवङ्गस्य लता ।) पुष्पलताविशेषः । यथा, जयदेवः ।
"ललितलवङ्गलतापरिशीलनकोमलमलय
समीरे ।
मधुकरनिकरकरम्बितकोकिलकूजितकुञ्ज
कुटीरे ॥
विहरति हरिरिह सरसवसन्ते ।
नृत्यति युवतिजनेन समं सखि विरहिजनस्य
दुरन्ते ॥"
(यथा च ।
"अयि ! मधुप ! लवङ्गलतागये
चिर मधूनि विधूय मधुव्रताम् ।
इह धने हि वनेचरमध्वुर्ग
वद धनाशलताय पिबधना ॥")
राधायाः सखीविशेषश्च ॥

लवण, क्ली (लुनाति जाड्यमिति । लू+नन्द्यादित्वात् ल्युः । पृषोदरादित्वात् णत्वम् ।) क्षाररसयुक्तद्रव्यम् । तत्तु पञ्चविधं यथा । सौवर्चलम् १ सैन्धवम् २ विडम् ३ औद्भिदम् ४ सामुद्रम् ५ । तथा हि ।
"सामुद्रं यत्तु लवणमक्षीवं वशिरञ्च तत् ।
सैन्धवोऽस्त्री शीतशिवं माणिमन्थञ्च सिन्धुजे ॥
रोमकं वसुकं पांश्यं विड्च कृतके द्वयम् ।"
सौवर्चलेऽक्षरुचकम् । इत्यमरः ॥ (अस्य विवरणं यथा । "सैन्धवसामुद्रविडसौवर्चलरोमकौद्भिदप्रभृतीनि लवणानि यथोत्तरमुष्णानि वातहराणि कफपित्तकराणि यथापूर्वं स्निग्धानि स्वादूनि सृष्टमूत्रपुरीषाणि चेति ।
"चक्षुष्यं सैन्धवं हृद्यं रुच्यं लघ्वग्निदीपनम् ।
स्निग्धं समधुरं वृष्यं शीतं दोषघ्नमुत्तमम् ॥
सामुद्रं मधुरं पाके नात्युष्णमविदाहि च ।
भेदनं स्निग्धमीषच्च शूलघ्नं नातिपित्तलम् ॥
सक्षारं दीपनं रूक्षं शूलहृद्रोगनाशनम् ।
रोचनं तीक्ष्णमुष्णञ्च विड् वातानुलोमनम् ॥
लघु सौवर्चलं पाके वीर्योष्णं विशदं कटु ।
गुल्मशूलविबन्धघ्नं हृद्यं सुरभि रोचनम् ॥

रोमकं तीक्ष्णमत्युष्णं व्यवायि कटुपाकि च ।
वातघ्नं लघु विस्यन्दि सूक्ष्मं विड्भेदि मूत्रलम् ॥
लघु तीक्ष्णोष्णमुत्क्लेदि सूक्ष्मं वातानुलोमनम् ।
सतिक्तं कटु सक्षारं विद्यादौद्भिदमौत्कटम् ॥
कफवातक्रिमिहरं लेखनं पित्तकोपनम् ।
दीपनं पाचनं भेदि लवणं गुटिकाह्वयम् ॥
ऊषसूतं वालुकैलं शैलमूलाकरोद्भवम् ।
लवणं कटुकं छेदि विद्यात् कटु चाधिकम् ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)
लू+भावे ल्युट् ।) छेदनम् । यथा । लवोऽभिलावो लवनम् । इति अमरः (मधुसूदनप्रकारविशेषः । यथा, हरिवंशे भविष्यपर्वणि । ५६ । १७ ।
"आहितं निधनं नित्यं क्षुद्रं लवणं हतम् ॥")
लवण, पुं (लुनातीति । लू+ल्यु ।) सिन्धुभेदः । (यथा महाभारते । ६ । ५ । ११ ।
"लवणेन समुद्रेण समन्तात् परिवारितः ॥")
राक्षसविशेषः । रसविशेषः । इति मेदिनी । णे, ७४ ॥ (यथा, भागवते । ६ । २१ । ७ ।
"कट्वम्लतिक्तलवणक्षाराद्यैरनिवर्तवैः ।
मारुतकेचकदृष्टा कर्मलाक्षोपितवेदसः ॥")
पृथिवीगुणविशेषश्च । इति भरतादिप्रसन्नकथासुद्वारि प्रबन्धीयटीका ॥ तत्पर्यायः । पटु २ । तस्य गुणाः ।
"लवणो वातहरोऽभिदाही
पचनः स्वादुकरश्च सारकश्च ।
रुचितो नितरां कफश्च पित्त
छिन्निमादश्च ददाति कुष्ठकारी ॥"
इति राजनिर्घण्टः ॥
अपि च ।
"लवणं छेदनं तीक्ष्णं पाचनं दीपनं परम् ।
स्निग्धो रुचिकरः सूक्ष्मो हृद्यकषाये लघु ॥"
अन्यच्च ।
"लवणं शोधनं रुच्यं पाचनं कफपित्तदम् ।
पुंस्त्ववातहरं कायशैथिल्यमृदुताकरम् ॥
अत्यन्तियुक्तोऽभिपाकात्परिक्कथाभयावहम् ।"
इति राजवल्लभः ॥ ० ॥
("लवण स्वन्दयत्याश कपोलगलदाहकृत् ।"
"लवणं स्तम्भसङ्घातवन्धविध्मापनोऽग्निकृत् ।
स्नेहनं स्वेदनं तीक्ष्णो रोचनश्छेदभेदकृत् ॥
सोऽतियुक्तोऽस्रपवनं खलतिं पलितं वलिम् ।
तृट्कुष्ठविषवीसर्पान् जनयेत् क्षपयेद्बलम् ॥"
इति वाग्भटे सूत्रस्थाने दशमोऽध्यायः ॥
"लवणो रस पाचनः क्लेदनो दीपनश्च्यावनश्छेदनो भेदनस्तीक्ष्णः सरो विकाशी अधःस्रंसी अवकाशकरो वातहरः स्तम्भबन्धसंघातविधमनः सर्वरसप्रत्यनीकभूतः आस्यमास्रावयति कफं विष्यन्दयति मार्गान् शोधयति सर्वशरीरावयवान् मृदूकरोति रोचयत्याहारमाहारयोगी नात्यर्थं गुरुः स्निग्ध उष्णश्च ।
स एवं गुणोऽप्येक एवात्यर्थमुपयुज्यमानः पित्तं कोपयति रक्तं वर्द्धयति तर्षयति मूर्च्छ

यति तापयति दारयति कुष्णाति मांसानि प्रगालयति कुष्ठानि विषं वर्द्धयति शोफान् स्फोटयति दन्तान् च्यावयति पुंस्त्वमुपहन्ति इन्द्रियाण्युपरुणद्धि वलीपलितखालित्यमापादयति च लोहितपित्ताम्लपित्तवीसर्पवातरक्तविचर्चिकेन्द्रलुप्तप्रभृतीन् विकारानुपजनयति ।”

“प्लीहानं ग्रन्थिविष्यन्दलाघवं कुरुते गुरो ।
स श्रेष्ठो लवणो ज्ञेय अविदाह्यनुरसश्च सः ॥”

इति चरके सूत्रस्थाने २६ अध्यायः ॥

“लवणः संशोधनः पाचनो विश्लेषणः क्लेदनः शैथिल्यकृदुष्णः सर्वरसप्रत्यनीको मार्गविशोधनः सर्वशरीरावयवमार्दवकरश्चेति स एवं गुणोऽप्येक एवात्यर्थमासेव्यमानो गात्रकण्डूकोठशोफवैवर्ण्यपुंस्त्वोपघातेन्द्रियोपतापान् तथा मुखाक्षिपाक रक्तपित्तवातशोणिताम्लीका प्रभृतीनापादयति ।”

“यो भक्तरुचिमुत्पादयति कफप्रसेकं जनयति मार्दवञ्चापादयति स लवणः ।’ इति सुश्रुते सूत्रस्थाने ४२ अध्यायः ॥ * ॥)

लवणासुरस्य विवरणं यथा,—

“पूर्व्वं कृतयुगे राजन् ! दैतेयः सुमहामतिः ।
लोलापुत्त्रोऽभवज्ज्येष्ठो मधुर्नाम महासुरः ॥
स मधुर्वीर्य्यसम्पन्नो धर्म्मे च सुसमाहितः ।
बहुमानाच्च रुद्रेण दत्तस्तस्याद्भुतो वरः ॥
शूलं शूलाद्विनिष्कृष्य महावीर्य्यं महाप्रभम् ।
ददौ महात्मा सुप्रीतो वाक्यं चैतदुवाच ह ॥
यावत् सुरैश्च विप्रैश्च न विरुध्येर्महासुर ! ।
तावच्छूलं तवेदं स्यादन्यथा नाशमेष्यति ॥
यश्च त्वामभियुञ्जीत युद्धाय विगतज्वरः ।
तं शूलो भस्मसात् कृत्वा पुनरेष्यति ते करम् ॥
एवं रुद्राद्वरं लब्ध्वा भूय एव महासुरः ।
प्रणिपत्य महादेवं वाक्यमेतदुवाच ह ॥
भगवन्मम वंशस्य शूलमेतदनुत्तमम् ।
भवेत्तु सततं देव सुराणामीश्वरो ह्यसि ॥
तं ब्रुवाणं मधुं देवः सर्व्वभूतपतिः शिवः ।
प्रत्युवाच महादेवो नैतदेवं भविष्यति ॥
माभूत्ते विफला वाणी मत्प्रसादकृता शुभा ।
भवतः पुत्त्रमेकन्तु शूलमेतद्भविष्यति ॥
यावत् करस्थः शूलोऽयं भविष्यति सुतस्य ते ।
अवध्यः सर्व्वभूतानां शूलहस्तो भविष्यति ॥
एवं मधुर्वरं लब्ध्वा देवात् सुमहदद्भुतम् ।
भवनं सोऽसुरश्रेष्ठः कारयामास सुप्रभम् ॥
तस्य पत्नी महाभागा प्रिया कुम्भीनसीति या ।
विश्वावसोरपत्यं सा ह्यनलायां महाप्रभा ॥
तस्याः पुत्त्रो महावीर्य्यो लवणो नाम दारुणः ।
बाल्यात् प्रभृति दुष्टात्मा पापान्येव समाचरत् ॥
तं पुत्त्रं दुर्व्विनीतन्तु दृष्ट्वा क्रोधसमन्वितः ।
मधुः स शोकमापेदे न चैनं किञ्चिदब्रवीत् ॥
स विहाय इमं लोकं प्रविष्टो वरुणालयम् ।
शूलं निवेश्य लवणे वरं तस्मै न्यवेदयत् ॥
स प्रभावेण शूलस्य दौरात्म्येनात्मनस्तथा ।
सन्तापयति लोकांस्त्रीन् विशेषेण च तापसान् ॥
आहारः सर्व्वसत्त्वानि विशेषेण च तापसाः ।
आचारो रौद्रता नित्यं वासो मधुवने तथा ॥
हत्वा बहुसहस्राणि सिंहव्याघ्रमृगाण्डजान् ।
मानुषांश्चैव कुरुते नित्यमाहारमाह्निकम् ॥
तच्छ्रुत्वा राघवो वाक्यमुवाच स महामुनीन् ।
घातयिष्यामि तद्रक्षो व्यपगच्छतु वो भयम् ॥
प्रतिज्ञाय तथा तेषां मुनीनामुग्रतेजसाम् ।
स भ्रातॄन् सहितान् सर्व्वानुवाच रघुनन्दनः ॥
को हन्ता लवणं वीरः कस्यांशः स विधीयताम् ।
भरतस्य महाबाहो शत्रुघ्नस्य च धीमतः ॥
राघवेणैवमुक्तस्तु भरतो वाक्यमब्रवीत् ।
अहमेनं वधिष्यामि ममांशः स विधीयताम् ॥
भरतस्य वचः श्रुत्वा धैर्य्यशौर्य्यसमन्वितम् ।
लक्ष्मणावरजस्तस्थौ हित्वा सौवर्णमासनम् ॥
शत्रुघ्नस्त्वब्रवीद्वाक्यं प्रणिपत्य नराधिपम् ।
कृतकर्म्मा महाबाहुर्मध्यमो रघुनन्दनः ॥
आर्य्येण हि पुरा शून्या त्वयोध्या परिपालिता ।
सन्तापं हृदये कृत्वा आर्य्यस्यागमनं प्रति ।
प्रेम्णि मयि स्थिते राजन् भूयः क्लेशमवाप्नुयात् ॥
तथा ब्रुवति शत्रुघ्ने राघवः पुनरब्रवीत् ।
एवं भवतु काकुत्स्थ ! क्रियतां मम शासनम् ॥
स त्वं हत्वा मधुसुतं लवणं पापनिश्चयम् ।
राज्यं प्रशाधि धर्म्मेण वाक्यं मे यद्यवेक्षसे ॥
यदा तु युद्धमाकाङ्क्षन् यदि कश्चित् समाह्वयेत् ।
तदा शूलं गृहीत्वा तु भस्म रक्षः करोति हि ॥
स त्वं पुरुषशार्द्दूल ! तमायुधविनाकृतम् ।
अप्रविष्टं पुरं पूर्व्वं द्वारि तिष्ठ धृतायुधः ॥
अन्यथा क्रियमाणे तु अवध्यः स भविष्यति ॥
ततः प्रभाते विमले तस्मिन् काले स राघवः ।
निर्गतस्तु पुराद्वीरो भ्रात्राचारप्रचोदितः ॥
एतस्मिन्नन्तरे वीर उत्तीर्य्य यमुनां नदीम् ।
तीर्त्वा मधुपुरद्वारि धनुष्पाणिरतिष्ठत ॥
ततोऽर्द्धदिवसे प्राप्ते क्रूरकर्म्मा स राक्षसः ।
आगच्छद्बहुसाहस्रं प्राणिनां भारमुद्वहन् ॥
ततो ददर्श शत्रुघ्नं स्थितं द्वारि धृतायुधम् ।
तमुवाच ततो रक्षः किमनेन करिष्यसि ॥
तस्यैव भाषमाणस्य हसतश्च मुहुर्मुहुः ।
शत्रुघ्नो वीर्य्यसम्पन्नो रोषादश्रूण्यवर्त्तयत् ॥
उवाच च सुसंक्रुद्धः शत्रुघ्नः स निशाचरम् ।
योद्धुमिच्छामि दुर्बुद्धे द्वन्द्वयुद्धं त्वया सह ॥
तच्छ्रुत्वा भाषितं तस्य शत्रुघ्नस्य महात्मनः ।
क्रोधमाहारयत्तीव्रं तिष्ठ तिष्ठेति चाब्रवीत् ॥
आहूतस्तु पुनस्तेन शत्रुघ्नेन महात्मना ।
लवणः क्रोधसंयुक्तो युद्धाय समुपस्थितः ॥
आकर्णात् स विकृष्याथ तद्धनुर्धन्विनां वरः ।
स मुमोच महाबाणं लवणस्य महोरसि ॥
उरस्तस्य विदार्य्याशु प्रविवेश रसातलम् ।
पुनरेवागमत्तूर्णमिक्ष्वाकुकुलनन्दनम् ॥
शत्रुघ्नशरनिर्भिन्नो लवणः स निशाचरः ।
पपात सहसा भूमौ वज्राहत इवाचलः ॥
तच्च शूलं महद्दिव्यं हते लवण
पश्यतां सर्व्वदेवानां रुद्रस्य वशमन्वगात् ॥
हते तु लवणे देवाः सेन्द्राः साग्निपुरोगमाः ।
ऊचुः सुमधुरां वाणीं शत्रुघ्नं शत्रुतापनम् ॥
वरं वृणु महाबाहो सर्व्व एव समागताः ।
विजयाकाङ्क्षिणस्तुभ्यममोघं दर्शनं हि नः ॥
देवानां भाषितं श्रुत्वा शूरो मूर्द्ध्नि कृताञ्जलिः ।
प्रत्युवाच महाबाहुः शत्रुघ्नः प्रयतात्मवान् ॥
इयं मधुपुरी रम्या मधुरा देवनिर्म्मिता ।
निवेशं प्राप्नुयाच्छीघ्रमेष मेऽस्तु वरः परः ॥
तं देवाः प्रीतमनसो बाढमित्येव राघवम् ।
भविष्यति पुरी रम्या शूरसेना न संशयः ॥
ते तथोक्त्वा महात्मानो दिवमारुरुहुस्तदा ।
शत्रुघ्नोऽपि महातेजास्तां सेनां समुपानयत् ॥
सा सेना शीघ्रमागच्छत् श्रुत्वा शत्रुघ्नशासनम् ।
निवेशनञ्च शत्रुघ्नः श्रावणेन समारभत् ॥
तां पुरीं दिव्यसङ्काशां नानापण्योपशोभिताम् ।
निवेश्य परमप्रीतः परं हर्षमुपागमत् ॥
तस्य बुद्धिः समुत्पन्ना निवेश्य मधुरां पुरीम् ।
रामपादौ निरीक्षेऽहं वर्षे द्वादश आगते ॥’

इति श्रीरामायणे उत्तरकाण्डे एकषष्ट्यादिसप्तषष्ट्यध्यायेभ्यः सङ्कलितम् ॥ * ॥ लवणसमुद्रस्योत्पत्तिर्यथा,—

“निरुध्य सा रजोयुक्ता धृत्वा वीर्य्यममोघकम् ।
सद्यो बभूव तत्रैव धन्या गर्भवती सती ।
तस्थौ तत्र सुतापीना सार्द्धं पुत्त्रैश्च सप्तभिः ॥
एकदा चरिता सार्द्धं वृन्दारण्ये सुनिर्ज्जने ।
विजहार पुनः साध्वी शृङ्गारासक्तमानसा ॥
एतस्मिन्नन्तरे तत्र मातुः क्रोडं जगाम ह ।
कनिष्ठपुत्त्रस्तस्याश्च भ्रातृभिः पीडितो भिया ॥
भीतं स्वतनयं दृष्ट्वा तत्याज तां कृपानिधिः ।
क्रोडे चकार बालं सा लज्जौ राधारहः ययौ ॥
प्रबोध्य बालं सा साध्वी न ददर्शान्तिकं प्रियम् ।
विललाप भृशं तत्र शृङ्गाराद्भ्रममानसा ॥
शशाप स्वसुतं कोपात् लवणोदो भविष्यसि ।
कन्यापि ते मम कश्चिन्न ग्रहिष्यन्ति जीविनः ॥
शशाप सर्व्वान् बालांश्च यान्तु श्रद्धा मही
तलम् ।
गच्छध्वं च महीं शीघ्रं जम्बुद्वीपं मनोहरम् ॥
स्थितिर्नैकत्र युष्माकं भविष्यति पृथक् पृथक् ।
द्वीपे द्वीपे स्थितिं कृत्वा तिष्ठन्तु सुस्थिराः सुताः ॥
लोमशाभिर्नरीभिश्च सह क्रीडन्तु निर्ज्जने ।
कनिष्ठो मातृशापाच्च लवणोदो बभूव ह ॥
कनिष्ठः कथयामास मातृशापञ्च भ्रातृकान् ।
आत्मगुप्तिरताः सर्व्वे मातृशापाच्च बालकाः ॥
श्रुत्वा विरच्य सर्व्वे पन्थमुपदर्शितम् ।
प्रजग्मुर्मातृचरणं भक्तिनम्रात्मकन्धराः ॥
सप्तद्वीपे बद्धदाश्च सप्त सागुर्विभागतः ।
कनिष्ठादुदकपर्य्यन्तं द्विगुणं द्विगुणं मुने ॥
लवणेक्षुसुरासर्पिर्दधिदुग्धजलार्णवाः ।
दधैवाय जलं पूर्णं ह्यन्ता यत्र भविष्यति ।
याता मसृणाः सर्व्वे सप्तद्वीपां वसुन्धराम् ॥”

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २ अध्यायः ॥

लवण, त्रि, (लवणेन संसृष्टम्। लवण+ठक्। "लवणाल्लुक्।" ४।४।२४। इति ठको लुक्। यद्वा लवणो रसोऽस्यास्तीति। अर्श आद्यच्।) लवणरसयुक्तः। इति मेदिनी। णे ७५। (यथा, सुश्रुते। १।२१।
"मधुरस्निग्धस्वादिष्ठो लवणः स्मृतः।")
लावण्ययुक्तश्च।

लवणकिंशुका, स्त्री, महाज्योतिष्मती। इति राजनिर्घण्टः॥

लवणक्षारः, पुं, (लवणस्य क्षारः।) लोणारक्षारः। इति राजनिर्घण्टः॥

लवणखानि, स्त्री, (लवणस्य खानिः खनिः।) शाम्भरिलवणोत्पत्तिस्थानम्। तत्पर्य्यायः। रुमा २। इति हेमचन्द्रः। ४।७। लवणाकरमात्रञ्च॥

लवणतृणं, क्ली, (लवणरसविशिष्टं तृणम्।) तृणविशेषः। तत्पर्य्यायः। लोमशतृणम् २ क्षारतृणम् ३ पटुतृणकम् ४ अम्लकाण्डम् ५। अस्य गुणाः। सक्षारत्वम्। अम्लत्वम्। कषायत्वम्। [illegible]त्वम्। अग्निवृद्धिकरत्वञ्च। इति राजनिर्घण्टः॥

लवणत्रयं, क्ली, (लवणानां त्रयम्।) सैन्धवं विडं रुचकञ्च। इति राजनिर्घण्टः॥

लवणधेनुः, स्त्री, (लवणनिर्म्मिता धेनुः।) दानार्थलवणनिर्म्मितधेनुः। तद्विवरणं यथा,—

वराह उवाच।

"लवणधेनुं प्रवक्ष्यामि तां निबोध महीपते।
अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशोत्तरे।
धेनुं लवणमयीं कृत्वा षोडशप्रस्थकल्पिताम्।
वत्सं चतुर्भी राजेन्द्र [illegible] कारयेत्।
सौवर्णमुखशृङ्गाणि खुरा रौप्यमयास्तथा।
मुखं गुडमयं तस्या जिह्वा शर्करया नृप।
[illegible] राजन् पार्श्वं ताम्रमयन्तथा।
नेत्रे रत्नमये कुर्य्यात् कर्णौ पत्रमयौ तथा।
श्रीखण्डशृङ्गकोटी च नवनीतमया स्तना।
सूत्रपुच्छा ताम्रपृष्ठा [illegible]।
कांस्योपदोहां राजेन्द्र घण्टाभरणभूषिताम्।
सुगन्धपुष्पधूपैश्च पूजयित्वा विधानतः।
आच्छाद्य वस्त्रयुग्मेन ब्राह्मणाय निवेदयेत्।
अयने वाथ सङ्क्रान्तौ व्यतीपाते तथायने।
[illegible] अन्यकाले प्रदापयेत्।
दीनाय साधुवृत्ताय कुलीनाय च धीमते।
वेदवेदाङ्गविदुषे श्रोत्रियायाहिताग्नये।
दद्यात् प्रदानमन्त्रेण [illegible] नृप।
[illegible]।
[illegible] शुद्धिकापञ्चके।
आच्छाद्य वस्त्रयुग्मेन दक्षिणां कनकं ददेत्।
पूर्व्वोक्तेन विधानेन लवणा कनकेन तु।
इमां गृहाण भो विप्र रुद्ररूपे नमोऽस्तु ते।
रसाश्च सर्व्वभूतानां सर्व्वदेवनमस्कृता।
कामं कामदुघे कामान् [illegible] नमोऽस्तु ते।
दत्त्वा तु लवणेनैव एकाहमेव तिष्ठति।
स्वयं निरान्नं [illegible] लवणाधिपा।
अद्यस्यैव प्रतेनाथ स्वयमेव कनकेन तु।
रुद्रलोकं समाप्नोति यत्र देवो वृषध्वजः।
य इदं शृणुयाद्भक्त्या श्रावयेद्वापि मानवः।
मुच्यते सर्व्वपापेभ्यो रुद्रलोकञ्च गच्छति।"
इत्यादि वाराहपुराणे धेनुमाहात्म्ये लवणधेनुमाहात्म्यम्॥

लवणमदः, पुं, (लवणस्य मदः।) लोणारक्षारः। इति राजनिर्घण्टः॥

लवणा, स्त्री, (लुनाति या। लू+ल्युः। टाप्।) नदीभेदः। दीप्तिः। इति मेदिनीशब्दरत्नावल्यौ॥ महाज्योतिष्मती। इति राजनिर्घण्टः॥

लवणाचलः, पुं, (लवणनिर्म्मितः अचलः।) दानार्थलवणनिर्म्मितपर्व्वतः। यथा,—
"अथातः सम्प्रवक्ष्यामि लवणाचलमुत्तमम्।
यत्प्रदाता नरो लोकं प्राप्नोति शिवसंयुतम्।
उत्तमः षोडशद्रोणः कर्त्तव्यो लवणाचलः।
मध्यमः स्यात्तदर्द्धेन चतुर्भिरधमः स्मृतः।
वित्तहीनो यथाशक्त्या द्रोणादूर्द्ध्वन्तु कारयेत्।
चतुर्थांशेन विष्कम्भान् पर्व्वतान् कारयेत् पृथक्।
विधानं पूर्व्ववत् कुर्य्यात् ब्रह्मादीनाञ्च सर्व्वदा।
तद्वद्धेमतरून् सर्व्वान् लोकपालान्निवेशयेत्।
सरांसि कामदेवादींस्तद्वदत्र निवेशयेत्।
कुर्य्याज्जागरमप्यत्र दानमन्त्रान्निबोधत।
सौभाग्यरससम्भूतो यतोऽयं लवणो रसः।
तदात्मकत्वेन च मां पाहि पापान्नगोत्तम।
यस्मादन्नरसाः सर्व्वे नोत्कटा लवणं विना।
प्रियश्च शिवयोर्नित्यं तस्मात् शान्तिप्रदो भव।
विष्णुदेहसमुद्भूतं यस्मादारोग्यवर्द्धनम्।
तस्मात् पर्व्वतरूपेण पाहि संसारसागरात्।
अनेन विधिना यस्तु दद्याल्लवणपर्व्वतम्।
उमालोके वसेत् कल्पं ततो याति परां गतिम्।"
इति मात्स्ये ७० अध्यायः॥

लवणाब्धिजं, क्ली, (लवणाब्धौ लवणसमुद्रे जायते इति। जन्+ड।) सामुद्रलवणम्। इति राजनिर्घण्टः॥

लवणासुरजं, क्ली, लोणारक्षारः। इति राजनिर्घण्टः॥

लवणोत्तमं, क्ली, (लवणेषु उत्तमम्।) सैन्धवम्। इति रत्नमाला॥

लवणोत्थं, क्ली, (लवणादुत्तिष्ठतीति। उत्+स्था+क।) लोणारक्षारः। इति राजनिर्घण्टः॥

लवणोदः, पुं, (लवणम् उदकं यस्य। उदकस्य उदादेशः।) लवणसमुद्रः। इत्यमरः॥

लवनं, क्ली, (लू+भावे ल्युट्।) छेदनम्। इत्यमरः॥

लवनी, स्त्री, फलवृक्षविशेषः। नोना इति भाषा। तत्पर्य्यायः। पीतफला २ अमिता ३। इति शब्दचन्द्रिका॥

लवली, स्त्री, (लवं लेशं लातीति। ला+क। गौरादित्वात् ङीष्।) फलवृक्षविशेषः। नोयाड़ इति भाषा। तत्पर्य्यायः। सुगन्धमूला २ मृदुः ३ कोमलवल्कला ४। इति राजनिर्घण्टः॥ तस्य फलगुणाः। रुच्यत्वम्। सुगन्धित्वम्। कषायाम्लत्वञ्च। इति राजवल्लभः॥
"लवलीफलमस्रार्शोवातपित्तहरं लघु।"
इति वैद्यकम्॥
(यथा, राजेन्द्रकर्णपूरे। ६०।
"क्रान्ता वेलावनितलवलीपल्लवग्रासगोष्ठी
दिक्पालानां सममथ परित्राणमस्मिन्
[illegible]।")

लवाकः, पुं, (लवार्थं छेदार्थं अकतीति। अक+अण्।) छेदनयन्त्रम्। इत्युणादिकोषः॥

लवाणकः, पुं, (लूयतेऽनेनेति। लू+"आणको लूधूशिङ्घिधाञ्भ्यः।" उणा० ३। ८३। इति आणकः।) दात्रादि। इत्युणादिकोषः॥

लवित्रं, त्रि, (लूयतेऽनेनेति। लू+"अर्त्तिलूधू—।" उणा ४। १५८। इति इत्रः।) छिद्रः। इत्युणादिकोषः॥

लवित्रं, क्ली, (लूयतेऽनेनेति। लू+"अर्त्तिलूधूसूखनसहचर इत्रः।" ३। २। १८४। इति इत्रः।) दात्रम्। इत्यमरः॥

लश, क शिल्पयोगे। इति कविकल्पद्रुमः॥ (चुरा०-पर० अक० सेट्।) क, लाशयति कुम्भकारः। शिल्पं पुनरिहार्थः। इति दुर्गादासः॥

लशुनं, क्ली, (अश्यते भुज्यते इति। अश+"अशेर्लश च।" उणा० ३। ५७ इति उनन्। लशादेशश्च धातोः।) रसुनः। तत्पर्य्यायः। महौषधम् २ अरिष्टः ३ महाकन्दः ४ रसोनकः ५। इत्यमरः। रसोनः ७ म्लेच्छकन्दः ८ भूतघ्नः ९ उग्रगन्धः १०। अस्य गुणाः। अम्लरसेन वर्ज्जितत्वम्। गुरुत्वम्। उष्णत्वम्। कफवातनाशित्वम्। अरुचिकृमिहृद्रोगशोफशमनत्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥ ७॥ अपि च।
"यदामृतं वैनतेयो जहार सुरसत्तमात्।
तदा ततोऽपतद्बिन्दुः स रसोनोऽभवद्भुवि।
अमृतोत्थो रसोनस्तु स्यादुग्रगन्धो महौषधम्।
अरिष्टो म्लेच्छकन्दश्च यवनेष्टो रसोनकः।
पञ्चभिश्च रसैर्युक्तो रसेनाम्लेन वर्ज्जितः।
तस्माद्रसोन इत्युक्तो द्रव्याणां गुणवेदिभिः।
कटुकश्चापि मूलेषु तिक्तः पत्रेषु संस्थितः।
नाले कषाय उद्दिष्टो नालाग्रे लवणः स्मृतः।
बीजे तु मधुरः प्रोक्तो रसस्तद्गुणवेदिभिः।
रसोनो वृष्यः स्निग्ध उष्णः पाचनः
सरः।
रसे पाके च कटुकस्तीक्ष्णो मधुरको मतः।
भग्नसन्धानकृत् कण्ठ्यो गुरुः पित्तास्रवृद्धिकृत्।
बलवर्णकरो मेधाहितो नेत्र्यो रसायनः।
हृद्रोगजीर्णज्वरकुक्षिशूल-
विबन्धगुल्मारुचिकासशोफान्।
दुर्नामकुष्ठानलसादजन्तु-
समीरणश्वासकफांश्च हन्ति।

मद्यं मांसं तथाम्लञ्च हितं लशुनसेविनाम्।
व्यायाममातपं रोषमतिनीरं पयो गुडम्।
रसोनमश्नन् पुरुषस्त्यजेदेतन्निरन्तरम्॥"

इति भावप्रकाशः॥ ●॥

अन्यच्च।
"लशुनः क्षारमधुरः कट्वम्लो रुच्यो गुरुः सरः।
भग्नसन्धानकृद्बल्यो रक्तपित्तप्रदूषणः॥"

इति राजवल्लभः॥

(तथाचास्य गुणादिविषयो यथा,—
"कटुश्च वीर्य्यो लशुनो हि तस्य
स्निग्धो गुरुः स्वादुरसोऽथ मत्स्य।
एतस्य मेधास्वरवर्णचक्षु
र्भग्नास्थिसन्धानकरः सुतीक्ष्णः॥
हृद्रोगजीर्णज्वरकुक्षिशूल
प्रमेहहिक्कारुचिगुल्मशोषान्।
दुर्नामकुष्ठानलमान्द्यजन्तु
समीरणश्वासकफांश्च हन्ति॥"

इति हारीते चिकित्सास्थाने तृतीयाध्याये॥
"शीतवातहिमदग्धसकर्णां
स्तब्धभुग्नकुटिलव्यथितास्याम्।
भेषजस्य पवनोपहतानां
सन्ति विधिरतो लशुनस्य॥"
"शीलयेल्लशुनं शीते वसन्तेऽपि कफोल्बणे।
घनोदयेऽपि वातार्त्तः सदा वा शीलशीलया॥"

इति वाग्भटे उत्तरस्थाने ३९ अध्यायः॥
"क्रिमिकुष्ठकिलासघ्नो वातघ्नो गुल्मनाशनः।
स्निग्धश्चोष्णश्च वृष्यश्च लशुनः कटुको गुरुः॥"

इति चरके सूत्रस्थाने २७ अध्यायः॥)

लशून, पुं (रसेन ऊनः रस्य लत्वम्। पृषो-दरादित्वात् साधु। ध अकारश्चोपश्च।) लशुनः। इति शब्दरत्नावली॥

लष क प्रियप्रयोगे। इति कविकल्पद्रुमः॥ (चुरा- पर०-अक० सेट्।) क, लाषयति कृपणो द्रव्ये प्रियं शुनकोऽयः। इति दुर्गा-दासः॥

लष च कान्ति। इति कविकल्पद्रुमः॥ (भ्वा उभ -अक सेट्।) च लषति लषते। इति दुर्गादासः॥

लष, य च श्लेषे। इति कविकल्पद्रुमः॥ (दिवा उभ -अक सेट्।) य च, लष्यति लष्यते। इति दुर्गादासः॥

लष्वः पुं, (लाषयति द्रव्ये प्रियं शुनकोऽपि। लष+"सर्व्वनिघृष्वरिष्वेति।" उणा १।१५३। इति वन्प्रत्ययेन साधुः।) नर्त्तकः। इत्यु-णादिकोषः॥

लस, श्लिषि। क्रीडे। इति कविकल्पद्रुमः॥ (भ्वा- पर अक सेट्।) लसति। इति दुर्गादासः॥

लस क शिल्पयोगे। इति कविकल्पद्रुमः॥ (चुरा- पर अक सेट्।) क, लासयति कृपणो द्रव्ये प्रियं शुनकोऽयः। इति दुर्गादासः॥

लसा, स्त्री, (लसतीति। लस्+अच्।) हरिद्रा। इति हारावली। ९१॥

लसिका, स्त्री, (लसतीति। लस्+अच्। ततः स्वार्थे कन् ततष्टापि अत इत्वम्।) लाला। यथा—
"लालायां पिच्छला ख्याता लसिका लाखिका तथा।"

इति शब्दचन्द्रिका॥

लसीका, स्त्री इक्षुरसः। लक्ष्मांसमध्यगरसः। इति केचित्॥ (यथा। "लसीका उदक-विशेषः। यथाह चरकः। यत्तु मांसत्वगन्तरे उदकं तल्लसीकाशब्दं लभते।" इति विजय-रक्षितकृतप्रमेहरोगव्याख्याने॥
"यत्तु त्वगन्तरे व्रणगतं लसीकाशब्दं लभते।"

इति चरके शारीरस्थाने सप्तमेऽध्याये॥)

लसुध ई श्रो ह क्रीडे। इति कविकल्पद्रुमः॥ (भ्वा- आत्म- अक सेट्। निष्ठायामनिट्।) क्विपि सयोगान्तलोपे लत्। ई श्रो, लग्नः। ह, लग्यते। इति दुर्गादासः॥

लस्तः त्रि, श्लिष्टः। क्रीडितः। शिल्पयुक्तः। लस धातोः क्तप्रत्ययेन निष्पन्नः। इति लस्तकशब्द व्युत्पत्तौ भरतश्च॥

लस्तकः, पुं धनुषो मध्यभागः। इत्यमरः॥

लस्तकी [न्] पुं, (लस्तकोऽस्त्यस्येति। लस्तक+ इनि।) धनुः। इति शब्दमाला॥

लहरि } स्त्री महातरङ्गः। तत्पर्य्यायः।
लहरी, } उल्लोलः २ कल्लोलः ३। इति हेम-चन्द्रः शब्दरत्नावली च॥ (यथा, आर्य्या-सप्तशत्याम्। ६१४।
"सरित इव यस्य गेहे शुष्यन्ति विशाल गोत्रजा नार्य्यः।
क्षारत्वेन च क्षयति जलनिधिलहरिषु जलद इव॥")

ला, ङ ग्रहे। इति कविकल्पद्रुमः॥ (अदा- पर सक अनिट्।) ङ, लाति। गृह्णाति धनम्। इति दुर्गादासः॥

ला, स्त्री, ग्रहणम्। दानम्। इति मेदिनी। ले १॥

लाक्षकी स्त्री, सीता। यथा,—
"राधव त्वं इव सीता सारङ्गाक्ष्य रुक्मिणी।
विष्णोऽवतारमाकृष्य लक्ष्मीर्म्मा कमलालया॥
नारायणी विमाना च विमला पुरुषोत्तमे।
वैकुण्ठे तु महालक्ष्मी राधा वृन्दावने वने॥
कलाय कमला दाक्षो यस्या सा लाक्षकी मता।
एवं शतघटावामीश्वरी राधिकाधिका॥"

इति पाद्मोत्तरखण्डे ५५ अध्यायः॥

लाक्षणिकः, पुं लक्षणया प्रतिपादकः। इति साहित्यदर्पणम्॥ लक्षणाज्ञानवर्त्तिमनपदस्य लाक्षणिकत्वम्। इति सारमञ्जरी॥ (यथा, विभक्तिन्यायवादे।
"शक्तो लाक्षणिको रूढो योगरूढश्च यौगिकः।
कश्चित् यौगिकरूढश्च शब्दः षोढा निगद्यते॥"
(लक्षणमधीते वेद वा। लक्षण+"क्रतूक्थादि-सूत्रान्तात् ठक्।" ४।२।६०। इति ठक्। लक्षणाभिज्ञे त्रि।)

लाक्षा, स्त्री, (लक्ष्यतेऽनयेति। लक्ष+"गुरोश्च हलः।" ३।३।१०३। इति अः। टाप्। यद्वा, "शाकुनकात् रञ्जतेरपि च। कर्णिकादित्वात् वा लत्वम्।" इत्युज्ज्वलः। ३। ६२।) रक्त-वर्णद्रवनिर्य्यासविशेषः। लाहा इति भाषा॥ तत्पर्य्यायः। राक्षा २ जतु ३ यावः ४ अलक्तः ५ द्रुमामयः ६। इत्यमरः॥ खदिरिका ७ रक्ता ८ रक्तमाता ९ पलङ्कषा १० क्रिमिजा ११ द्रुम-व्याधिः १२ अलक्तकः १३ पलाशी १४ सुद्रिणी १५ दीप्तिः १६ जतुका १७ मन्थमारिणी १८ शीला १९ द्रवरसा २० पित्तारिः २१। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। कषायत्वम्। श्लेष्मपित्तार्शोव्रणविषरक्तविषमज्वरनाशित्वञ्च। इति राजनिर्घण्टः॥ भग्नविभग्नव्रणदोषनाशि-त्वम्। बल्यत्वञ्च। इति राजवल्लभः॥ अपि च।
"लाक्षा वर्ण्या हिमा बल्या स्निग्धा च तुवरा लघुः।
अनुष्णा कफपित्तास्रहिक्काकासज्वरप्रणुत्॥
व्रणोरःक्षतवीसर्पकृमिकुष्ठगदापहा।
अलक्तको गुणैस्तद्वद्विशेषाद्व्यङ्गनाशनः॥"

इति भावप्रकाशः॥

(शतपदी। सेवती। गुलाब इति च। तत्-पर्य्यायो यथा—
"शतपत्री तरुणपुष्पा कर्णिका चारुकेशरा।
महाकुमारी गन्धाढ्या लाक्षा लक्ष्मांश मधुला॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

लाक्षातरुः, पुं (लाक्षोत्पादकतरुः।) पलाश-वृक्षः। इति शब्दमाला॥ (पलाशशब्देऽस्य विशेषो ज्ञेयः॥)

लाक्षातैलं क्ली, (लाक्षादिभिः पक्वं तैलम्।) पक्वतैलविशेषः। लाक्षादितैलमिति ख्यातम्। तद्द्विविधं स्वल्पं बृहच्च। यथाक्रमं तत्प्रकार-तद्गुणश्चाह।
"लाक्षाहरिद्रामञ्जिष्ठाकल्कैस्तैलं विपाचितम्।
षड्गुणेनारनालेन दाहशीतज्वरापहम्॥"

इति स्वल्पलाक्षातैलम्॥

बृहद्यथा—
"लाक्षारसाढ़के प्रस्थं तैलस्य विपचेद्भिषक्।
मस्त्वाढ़कसमायुक्तं पिष्टा चात्र समावपेत्॥
शतपुष्पां हरिद्रां च मूर्व्वां कुष्ठं हरेणुकाम्।
कटुकां मधुकां रास्नामश्वगन्धां च दारु च॥
मुस्तकं चन्दनञ्चैव एषां चैकसमांशकैः।
द्रव्यैरेतैः तत् सिद्धं सर्व्वज्वरविनाशनम्॥
विषमाख्यान् ज्वरान् सर्व्वानाशु एव प्रशमं नयेत्।
कासं श्वासं प्रतिश्यायं कण्डूदौर्गन्ध्यगौरवम्।
त्रिकपृष्ठग्रहं शूलं गात्राणां स्फुटनं तथा।
पापालक्ष्मीप्रशमनं सर्व्वग्रहनिवारणम्।
अश्विभ्यां निर्म्मितं श्रेष्ठं तैलं लाक्षादिकं महत्॥"

इति बृहल्लाक्षातैलम्। इति सुश्रुतः॥

लाक्षाप्रसाद, पुं (लाक्षाया प्रसादो यस्मात् ।) रक्तलोध्र । इति राजनिर्घण्टः ॥

लाक्षाप्रसादन, पुं, (लाक्षां प्रसादयतीति । प्र+सद्+णिच्+ल्यु ।) रक्तलोध्र । तत्पर्य्याय । क्रमुक २ पट्टिका ३ पट्टी ४ । इत्यमरः ॥ (तथास्य पर्य्याय ।
"द्वितीय पट्टिकालोध्रः क्रमुक स्थूलवल्कल ।
जीर्णपत्रो बृहत्पत्र पट्टी लाक्षाप्रसादन ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

लाक्षावृक्ष, पुं (लाक्षोत्पादको वृक्ष ।) कोषाम्रः । इति राजनिर्घण्टः ॥ पलाशवृक्षः । इति शब्दरत्नावली ॥

लाख, ऋ शोषणालमर्थयो । इति कविकल्पद्रुमः । (भ्वा पर० सक सेट ।) ऋ, अललाखत् । इति दुर्गादासः ॥


लाघ ऋ ङ शक्तौ । इति कविकल्पद्रुमः ॥ (भ्वा० आत्म अक सेट ।) ऋ अललाघत् । ङ, लाघते । शक्तिः सामर्थ्यम् । इति दुर्गादासः ॥

लाघव, क्ली, (लघोर्भाव कर्म्म वा । लघु+"इगन्ताच्च लघुपूर्व्वात् ।" ५ । १ । १३१ । इति अण् ।) आरोग्यम् । इति राजनिर्घण्टः ॥ लघुत्वम् । लघोर्भाव इत्यर्थे अण्प्रत्ययेन निष्पन्नम् ॥ (शीघ्रत्वम् । यथा, महाभारते ।५।१८३।७।
"तासां रूप भारत नोव शक्य
हस्तलाघवात् लाघवाच्चैव वक्तुम् ॥"
अल्पत्वम् । यथा, मार्कण्डेये । ४१ । १७ ।
"अक्रोधो गुरुशुश्रूषा शौचमाहारलाघवम् ।
नित्यस्वाध्याय इत्येते नियमा पञ्च कीर्त्तिता ॥"
क्षेपम् । यथा, कुमारे । २ । २६ ।
"यमोऽपि विलिखन् भूमिं दण्डेनास्तमितत्विषा ।
कुरुतेऽस्मिन्नमोघेऽपि निर्व्वाणालातलाघवम् ॥")

लाङ्गल, क्ली (लङ्गतीति । लगि गतौ+बाहुलकात् कलच् । वृद्धिश्च धातो । इति उणादिवृत्तौ उज्ज्वलदत्त । १ । १०८ ।) स्वनामख्यात भूमिकर्षणयन्त्रम् । तत्पर्य्याय । हलम् २ गोदारणम् ३ सीरः ४ । इत्यमरः ॥ फल ५ गोदम् ६ कृषाण ७ गोर्द ८ । इति भरतः ॥ (यथा वाजसनेयसंहितायाम् । १२ । ७१ ।
"लाङ्गल पवीरवत्सुशेवं सोमपित्सरु ।")
लिङ्ग । इति त्रिकाण्डशेष ॥ पुष्पविशेषः । तालवृक्ष । गृहदारु । इति मेदिनी । ले १२८ ॥

लाङ्गलग्रह, पुं, कृषक । लाङ्गलं गृह्णाति य इत्यर्थे अनुप्रत्ययेन निष्पन्न । ("हालिकलाङ्गला कुश्यप्रतिसीरमेढमेढीहलीषदः पवीरवयस्याः पम् ।"२ । ९ । ५ । इत्यस्य मार्गितोका अप ।)

लाङ्गलचक्र क्ली, (लाङ्गलाकार चक्रम् ।) कृषिकर्म्मणि शुभाशुभज्ञापक चक्राकारचक्रविशेषः । यथा । अथ लाङ्गलचक्रं स्वरोदये ।
"लाङ्गलं दण्डिकायुग्मयोजद्वयसमन्वितम् ।
दण्डिकादि लिखेत् भानि दिनेशाक्रान्तभादितः ।
दण्डिकाद्वयतयानो हरिमार्गे त्रिकं त्रिकम् ।
योजयोश्च त्रिकत्रिक मध्ये पञ्चकं त्रिकम् ॥
दण्डाग्रे च त्रयो हानिप्रदाः स्वामिनो भयम् ।
सप्तभिर्लाङ्गलयोः स्यात् चैवाष्टमादिनक्षक ॥"
इति ज्योतिस्तत्त्वम् ॥



लाङ्गलदण्ड, पुं, (लाङ्गलस्य दण्ड ।) लाङ्गल मध्यस्थकाष्ठम् । लाङ्गलेर ईश इति भाषा । तत्पर्य्याय । ईषा २ । इत्यमरः ॥ ईषा ३ । इति शब्दरत्नावली ॥

लाङ्गलपद्धति, स्त्री, (लाङ्गलस्य पद्धति ।) लाङ्गल रेखा । सिराल इति भाषा । तत्पर्य्याय । सीता १ । इत्यमर ॥ सीता २ । इति शब्दरत्नावली ॥

लाङ्गलिक, पुं, (लाङ्गलवत् आकृतिरस्यस्येति । लाङ्गल+ठन् ।) स्थावरविषभेदः । इति हेमचन्द्र ॥

लाङ्गलिका, स्त्री,(लाङ्गलमिवाकारोऽस्त्यस्या इति । लाङ्गल+ठन् । टाप् ।) लाङ्गलीवृक्ष । इति शब्दरत्नावली ॥ (यथा, गारुडे १८९ अध्याये ।
"इन्द्रवारुणिकामूलं लिम्पेल्लाङ्गलिका तथैव च ।
तेन नश्यन्ति विषं शल्यो नि क्षरति पथात् ॥")

लाङ्गलिकी स्त्री, (लाङ्गल+ठन् । ङीप् ।) वृक्ष विशेष । लाङ्गलिया इति विषलाङ्गलिया इति च भाषा । तत्पर्य्याय । अग्निशिखा २ । इत्यमर ॥ अग्निज्वाला ३ लाङ्गलिका ४ लाङ्गली ५ । इति शब्दरत्नावली ॥ गौरी ६ दीप्ता ७ हलिनी ८ गर्भघातिनी ९ अग्नि जिह्वा १० इन्द्रपुष्पा ११ अग्निमुखी १२ वह्निशिखा १३ । इति रत्नमाला ॥ अस्या गुणा । कुष्ठदुष्टव्रणाग्निमान्द्यनाशित्वम् । इति राजवल्लभ ॥ राजनिर्घण्टोक्तगुणपर्य्याया कलिकारीशब्दे द्रष्टव्या ॥

लाङ्गली [न्] पुं, (लाङ्गलमस्त्यस्येति । लाङ्गल+इनि ।) बलराम । इति शब्दरत्नावली ॥ (यथा, हरिवंशे । १७ । ३८ ।
"आयधिका विवशादि यद्वृत लाङ्गलिना सह ।
प्राज्ञधर्म्मा विवशञ्च आम्यभा ददर्श च ॥")
नारिकेल । इत्यमर ॥ (यथा —
"नारिकेलो दृढफलो लाङ्गली कूर्च्चशीर्षक ।
तुङ्गस्कन्धफलश्चैव सकराच धरापच ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
सर्प । इति शब्दचन्द्रिका ॥ (लाङ्गलविशिष्टे, त्रि । यथा, रामायणे । २ । ३२ । ३ ।
"तथायोत्तु पिङ्गलो गार्ग्यस्त्रिजटो नाम वै द्विज ।
ध्यसत्वतवने नित्य फालकुद्दाललाङ्गली ॥"
तथा महाभारते । १ । २२४ । ११ ।
"राम पाशिपदाशीव इवो यथाय लाङ्गली ।")
स्त्रियां ङीष् । नदीविशेष । यथा, मार्कण्डेये । ५७ । २८ ।
"लाङ्गलिनी वंशधरा महेन्द्रप्रभवा स्मृता ॥")

लाङ्गली, स्त्री, (लाङ्गलाकारोऽस्त्यस्या इति । लाङ्गल+अच् । ङीष् ।) लाङ्गलाकारपुष्प जलजलताविशेष । कोसडा इति भाषा । तत्पर्य्याय । शारदी २ तोयपिप्पली ३ शकुलादनी ४ । इत्यमर ॥ जलाढ्नी ५ जलपिप्पलि ६ । इति शब्दरत्नावली ॥ पिप्पला ७ झामा हिनी ८ मत्स्यगन्धा ९ । इति जटाधर ॥ कलि कारी १० । इति राजनिर्घण्टः ॥ (ग्रामधर्मे । तत्पर्य्यायो यथा —
"स्त्रिया विशालिगन्धा च ग्रामधर्म्मेक्षमप्यपि ।
लाङ्गली कलधौ चैवाऽपुष्पा गुणा मता ॥"
इति गारुडे २०८ अध्याय ॥)

लाङ्गुल क्ली, पुच्छम् । इत्यमरटीकायां रायमुकुट ॥

लाङ्गूल, क्ली, (लङ्ग+"खर्जिपिञ्जादिभ्य ऊरोलचौ ।" उणा० ४ । ९ । इति ऊलच् । बाहुलकात् वृद्धिश्च ।) पशुपक्ष्यादीनामङ्गविशेष लोमाद्यवयवविशेष । ल्याज इति भाषा । तत्पर्य्याय । पुच्छम् २ लम ३ वालहस्त ४ वालधि ५ । इत्यमर ॥ लाङ्गूलम् ६ लाङ्गुलम् ७ पुच्छाग्रम् ८ व्याल ९ । इति शब्दरत्नावली ॥ लङ्ग ९ पिच्छ ११ वाल १२ । इति जटाधर ॥ (यथा, कुमारे । १ । १३ ।
"लाङ्गूलविक्षेपविसर्पिशोभै-
रितस्ततश्चन्द्रमरीचिगौरै ।
यस्यार्थयुक्तं गिरिराजशब्द
कुर्व्वन्ति वालव्यजनैश्चमर्य्य ॥")
गोलाङ्गूलस्य माहात्म्य यथा,—
"लाङ्गूलेनोद्धृतं तोयं यद्गुर्ग्गृह्णाति यो नरः ।
सर्व्वतीर्थफल प्राप्य सर्व्वपापैः प्रमुच्यते ॥"
इति वाराहपुराणम् ॥
शिश्न । इति मेदिनी । ले १२७ ॥ क्रमुक । इति सिद्धान्तकौमुद्यामुणादिवृत्ति ॥

लाङ्गूलिका, स्त्री (लाङ्गूलाकृतिरस्त्यस्या इति । लाङ्गूल+ठन् ।) पृश्निपर्णी । इति राजनिर्घण्टः ॥

लाङ्गूली, [न्] पुं (प्रशस्त लाङ्गूलमस्त्यस्येति । लाङ्गूल+इनि ।) वानर । इति शब्दचन्द्रिका ॥ ऋषभनामौषधम् । इति राजनिर्घण्टः ॥

लाछ, इ लक्ष्मणि । इति कविकल्पद्रुमः ॥ (भ्वा पर सक सेट ।) इ, लाञ्छ्यते । लाञ्छति । इति दुर्गादासः ॥

लाज, भर्त्सने । भर्जे । इति कविकल्पद्रुमः ॥ (भ्वा० पर सक सेट ।) लाजति ॥

लाज, इ भर्त्सने । भर्जे । इति कविकल्पद्रुमः ॥ (भ्वा पर०-सक० सेट ।) इ द्वितीय

क्वथितौ। लाजति। ८, लाञ्छने। भर्त्सने एव केचित् पठन्ति। भर्जी भञ्जनम्। इति दुर्गादासः ॥

लाज, क्ली, (लाज+अच्।) उशीरम्। इति मेदिनी। जे १५॥ (भृष्टधान्यम्। खइ इति भाषा॥

"येषां स्फुटत्तण्डुलाकानि धान्यानि यत्तु यानि च।
भृष्टानि स्फुटिताग्राण्युर्लाजानीति मनीषिणः।
लाजाः स्युर्मधुराः शीता लघवो दीपनाश्च ते।
स्वल्पमूत्रमला रूक्षा बल्याः पित्तकफच्छिदः।
छर्द्यतीसारदाहास्रमेहमेदस्तृषापहाः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

लाज, पुं (लाज+अच्।) आर्द्रतण्डुलः। इति मेदिनी। जे, १५॥

लाजा, स्त्री, अक्षतम्। इति मेदिनी। जे, १५॥ (यथा, सुश्रुते। ४। १६।

"पैत्तिके शर्कराजाजामधुके धारिता मुखे॥")

लाजाः, पुं भूम्नि, (लाज्यन्ते ये ते। लाज+घञ्।) भृष्टधान्यम्। लाखीया इति खइ इति च भाषा। (यथा, रामायणे। २। ४३। १२।

'कदा प्राणिसहस्राणि राजमार्गे ममात्मजौ।
लाजैरवकरिष्यन्ति प्रविशन्तावरिन्दमौ॥")

तत्पर्य्यायः। अक्षतम् २। इत्यमरः। २। ९। ४७॥ लाजा ३ अक्षता ४। इति भरतः॥ अस्य गुणाः। तृष्णाच्छर्द्दतीसारप्रमेहमेदःकफनाशित्वम्। कासपित्तोपशमनत्वम्। अग्निकारित्वम्। लघुत्वम्। शीतलत्वञ्च। अस्य सक्तुगुणाः। अग्निकारित्वम्। दाहतृष्णाज्वरातीसारनाशित्वम्। अशेषदोषशमनत्वञ्च। तस्य पेयागुणाः। श्रमकफस्य शमनत्वम्। तृषाढ्या ग्लानिदाहवैकृत्यादिरोगनाशित्वञ्च। इति राजवल्लभः॥ अपि च।

"एते च व्रीहयो भृष्टाः लाजा इति च कीर्त्तिताः।
यवादयश्च ये भृष्टा धाना परिकीर्त्तिताः॥
लाजाश्च यवधानाश्च तथा पित्तनाशनाः।
गोधूमयवधानाश्च किञ्चिदुष्णाश्च दीपनाः॥
छर्द्यतीसारशमनो धातुसाम्यकरः परः।
मन्दाग्निविषमाग्नीनां बालवृद्धवियोषिताम्।
इदञ्च सुकुमाराणां लाजमण्डं सुसंस्कृतम्॥"

इति राजनिघण्टुः॥ *॥

तस्य यूषगुणाः।

"द्राक्षादाडिमखर्ज्जूरच्छदितामधुशर्करम्।
लाजचूर्णं समव्याप्य सन्तर्पणमुदाहृतम्॥"

लाजचूर्णं द्राक्षादिजलशर्करामध्वाज्यसहितं तर्पणसक्तुमिश्रितम्। लाजसक्तुगुणाश्च गुणपर्य्ये।

"लाजानां सक्तवः शीता मधिताग्निप्रदा विनिश्चिताः।
छर्द्यतीसारदाहार्त्तिविषमज्वरापहाः॥"

चरकश्च।

"तत्र तर्पणमेवादौ प्रदेयं लाजसक्तुभिः।
ज्वरापहं फलरसैर्युक्तं समधुशर्करम्॥"

इति भावप्रकाशः॥

लाञ्छनं क्ली, (लाञ्छ+ल्युट्।) नाम। चिह्नम्। इति मेदिनी। ने, १२१॥ (यथा, कुमारे। ७। ३५।

"दिवापि निष्ठ्यूतमरीचिभासा
बाल्यादनाविष्कृतलाञ्छनेन।
चन्द्रेण नित्यं प्रतिभिन्नमौले-
श्चूडामणेः किं ग्रहणं हरस्य॥")

लाञ्छन, पुं, (लाञ्छतीति। लाञ्छ+ल्यु।) राजीधान्यम्। इति राजनिघण्टुः॥ क्वचित् पुस्तके लाञ्छनीति च पाठः॥

लाट, पुं देशान्तरम्। (यथा, कथासरित्सागरे। ७८। ११८।

"ददौ तस्मै सपुत्राय शीलाः वीरवराय च।
लाटदेशे ततो राज्यं स कर्णाटपतिर्नृपः॥")

वस्त्रम्। इति मेदिनी। टे, २०॥ जीर्णभूषणादि। इति शब्दरत्नावली॥

लाड, ऋ क क्षेपे। इति कविकल्पद्रुमः॥ (अदन्त-चुरा० पर० सक० सेट्।) लाडयति अल-लाडत्। इति दुर्गादासः॥

लाप पुं, कथनम्। लपधातोर्भावे घञ्प्रत्ययेन निष्पन्नम्॥

लाप्य, त्रि (लप्यते इति। लप्+ण्यत्।) कथनीयम्। लपधातोः कर्म्मणि ध्यण्प्रत्ययेन निष्पन्नम्। इति मुग्धबोधव्याकरणम्॥

लाभः, पुं, (लभ+घञ् करणे।) मूलधनादधिकं वाणिज्योपार्ज्जित धनम्। तत्पर्य्यायः। फलम् २। इत्यमरभरतौ॥ अभ्यम ३ वृद्धि ४। इति शब्दरत्नावली॥ (यथा, रामायणे। २। ४२। ५२।

"सुखदुःखे भयक्रोधौ लाभालाभौ भवाभवौ।
यच्च किञ्चित्तथाभूतं ननु दैवस्य कर्म्म तत्॥")

प्राप्तिः। इति शब्दमालादर्शनात्॥ (अत्र धर्म्मविवाहेषु भ्रमत्यम्। यथा मनुः। १। ११५।

"सप्त वित्तागमा धर्म्म्या दायो लाभः क्रयो जयः।
प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एव च॥")

लाभ्य, त्रि (लभ+ण्यत्।) लाभः। इति शब्दरत्नावली॥

लामज्जक क्ली, वीरणमूलम्। इत्यमरः॥ अस्य पर्य्यायगुणाः शुभ्रवीरणमूले द्रष्टव्याः। उशीरवत् पीतवर्णविशिष्टविशेषः। तत्पर्य्यायः। सुनालम् २ अमृणालम् ३ लवम् ४ लघु ५ इष्टका-पथकम् ६ शीघ्रम् ७ दीर्घमूलम् ८ जला-शयम् ९। अस्य गुणाः। हिमत्वम्। तिक्तत्वम्। वातपित्तकफदाहश्रमरक्तविसर्प-ज्वरापहत्वञ्च। इति राजनिघण्टुः॥

लालन, क्ली (लल+णिच्+ल्युट्।) अयन्त्र-क्षेपकरणम्। स्नेहपूर्व्वकचाटुकारकरणम्। आदर इति भाषा। तत्र शीघ्रदीर्घे उपदेश इव यथा-पालनम्। क, लालयेत् पञ्च वर्षाणि पुत्रमिति पञ्च डलयोरैक्यात्लालनम्। इति कविकल्पद्रुमटीकायां दुर्गादासः॥ तथा हि।

"लालने बहवो दोषास्ताडने बहवो गुणाः।
तस्मात् पुत्रञ्च शिष्यञ्च ताडयेन्न तु लालयेत्॥"

अपि च।

"लालयेत् पञ्च वर्षाणि दशवर्षाणि ताडयेत्।
प्राप्ते तु षोडशे वर्षे पुत्रं मित्रवदाचरेत्॥"

इति चाणक्यशतकम्॥

लालसा, पुं स्त्री, (लस्+यङ्। ततः "अ प्रत्ययात्।" ३। ३। १०२। इति अ। टाप्।) महाभि-लाषः। इत्यमरः॥ औत्सुक्यम्। याच्ञा इति मेदिनी। से, ६४॥ दोहदम्। यथा,—

"दोहदं दौहृदं श्रद्धा लालसा च समाः स्त्रियाम्॥"

इति हेमचन्द्रः॥

लोल। इति नानार्थे स एव॥ (लोलुपे, त्रि। इति माधवः। यथा माघे। ४। ६।

"छायां निजस्त्रीचटुलालसानां
मदेन किञ्चिच्चटुलालसानाम्।
कुर्व्वाणमुत्पिञ्जजातपत्रैः
विहङ्गमानां जलजातपत्रैः॥"

तथा च कुमारे। ७। ५६।

"तस्मिन् मुहूर्त्ते पुरसुन्दरीणा-
मीशानसन्दर्शनलालसानाम्॥")

लालसीक, क्ली, पिच्छलम्। इति शब्दरत्नावली॥

लाला स्त्री, (लल+णिच्+अच्। टाप्।) मुखभवजलम्। लाल इति भाषा। तत्पर्य्यायः। सृणिका २ स्यन्दिनी ३। इत्यमरः॥ दासिका ४ सृणीका ५। इति शब्दरत्नावली॥ मुख-स्राव। इति राजनिर्घण्टः॥ (यथा सुश्रुते। ४। ५२।

"श्लीपदच्छेदाद्भवेच्छोषो लालाविदाहश्च श्रम॥")

लालाटिकः, त्रि, (ललाटं पश्यतीति। ललाट+ "पश्यति लालाटकुक्कुट्यौ पश्यति।" ४। ४। ४६। इति ठक्। दूरेस्थिता प्रभोर्ललाटं पश्यति न तु कार्य्येषूपतिष्ठते इत्यर्थः।) प्रभोर्भावदर्शी। कार्य्याक्षमः। इत्यमरः॥ यः सेवकः कोप-प्रसादचिह्नज्ञानाय प्रभोर्ल्ललाटमेव पश्यति। यच्च प्रभोः कार्य्येऽक्षमोऽप्रसक्तो लालाटिकः पूर्व्व-वत् स्मृतः। केचित्तु कार्य्याक्षम इति भाव-दर्शिन एव विशेषणं कृत्वा एकमेव लालाटिकं साङ्ख्ये तु ज्ञापयति। भावदर्शीति च पाठः लालाटिकः उदात्ते प्रभुभावनिदर्शिनि। इत्य-मरः। इति तट्टीकायां भरतः॥ आलिङ्गन-विशेषे, पुं। इति मेदिनी। के, १२१॥ ललाट सम्बन्धिनि, त्रि। यथा। प्रासिन्तु लालाटिकी-मादि॥

लालामेहः, पुं, (लालावत् मेहतीति। मिह+ अच्।) प्रमेहविशेषः। यथा —

"लालातन्तुयुतं मूत्रं लालामेहेन पिच्छिलम्॥"

प्रमेहतीति शेषः। चक्रोक्तम्।

"गुडूच्याः स्वरसः पेयो मधुना सर्व्वमेहनुत्।

हरिद्राचन्द्रयुक्तो वा रसो धात्र्या समा-
न्वितः ।"
अपि च ।
"चन्द्रप्रभा वचा मुस्ता भूनिम्बामृतदारु च ।
हरिद्रातिविषा दार्व्वी पिप्पलीमूलचित्रकम् ॥
त्रिवृद्दन्तीपत्रकञ्च त्वगेला वंशलोचना ।
प्रत्येकं कर्षमात्राणि कुर्य्यादेतानि बुद्धिमान् ॥
धान्यकं त्रिफला चव्यं विडङ्गं गजपिप्पली ।
सुवर्णमाक्षिकं व्योषं द्वौ क्षारौ लवणत्रयम् ॥
एतानि टङ्कमात्राणि गृह्णीयात् पृथक् पृथक् ।
द्विकर्षं हतलोहं स्यात् चतुष्कर्षा सिता भवेत् ॥
शिलाजत्वष्टकर्षं स्यादष्टौ कर्षाश्च गुग्गुलोः ।
विधिना योजितैरेतैः कर्त्तव्या गुटिका शुभा ॥
चन्द्रप्रभेति विख्याता सर्व्वरोगप्रणाशिनी ।
निहन्ति विंशतिं मेहान् कृच्छ्रमष्टविधं तथा ॥"
इत्यादि भावप्रकाशः ॥
(तथास्य लक्षणान्तरम् ।
"तन्तुबद्धमिवालालं पिच्छिलं यः प्रमेहति ।
लालामेहिनं विद्यात्तं श्लेष्मकोपतः ॥"
इति चरके निदानस्थाने चतुर्थेऽध्याये ॥)

लालायितः, त्रि, लालाविशिष्टः । लालच इति भाषा । लालाशब्दात् समस्तार्थोऽपि काच्चा दिष्वं क्यं कृतौ इति मुग्धबोधव्याकरणमते च क्तप्रत्यये कृते रूपमिदम् । यथा । अत्र लालायितः पयो । इति भक्तादेवोक्तमतेन लिखितपाणिनीयव्याकरणीयमहाभाष्यम् ॥
अपि च ।
"परिखावलयच्छलेन या
न परेषां ग्रहणस्य गोचरः ।
फणिभाषितभाष्यफक्किका
विषमा कुण्डलनामवापिता ॥"
इति नैषधे २ सर्गः ॥
परिखेति । अन्येषां ग्रहणगोचरो नैयमिति कृत्वा परिखावलयव्याजेन या पुरी कुण्डलनां प्रापिता विधात्रेति शेषः । फणिना भाषिता या महाभाष्यफक्किका सदृशीयमपि परेषां ज्ञानगोचरो नैयमिति कृत्वा अत्र लालायितः पयो चेदं कुण्डलनां प्रापिता फक्किकेतीति शेषः । इति भरतमल्लकृतटीका ॥

लालाविषः, पुं, (लालायां विषं यस्य ।) लूतादिः । इति हेमचन्द्रः । ४ । १०८ ॥

लालास्रावः, पुं, (लालां स्रावयतीति । स्रु + णिच् + अण् ।) ऊर्णनाभः । इति हेमचन्द्रः । (लालास्रावके, त्रि । यथा, सुश्रुते । ५ । १६ ।
"लालास्रावी च विज्ञेय अल्पमानु पौविरो
सदः ॥")

लालिकः, पुं, महिषः । इति हेमचन्द्रः ।४।३४८॥

लालित्यं, क्ली, (ललित + ष्यञ् ।) ललितस्य भावः । यथा,—
"प्रीतिं मञ्जुलस्य यो जनयति विप्रः विविधान् लात
कं कुन्दारविन्दमन्दिरमद भजा भवज्ञानम् ।

लाटी मधुरितस्य वचसि चतुरपौविष्टरी
प्रस्फुट ।
संविनाथकरोमणामणमदेवालिकलौला
मतीम् ॥"
इति लीलावती ॥

ला(वा)वः, पुं स्त्री, पक्षिविशेषः । लावौया इति भाषा । इत्यमरभरतौ । (यथा, सुश्रुते ।४।९।
"लाव्यालुपोस्वैःआसे लावाद्यैर्वापि विष्किरैः ।")
अस्य मांसगुणाः । लघुत्वम् । कटुत्वम् । मल-
बद्धकारित्वम् । स्वादुत्वम् । शीतत्वम् । त्रिदोष-
नाशित्वञ्च । इति राजवल्लभः । (तथा च ।
"कषायो दीपनश्चैव कषायो मधुरो लघुः ।
लावः कटुविपाकश्च सन्निपाते च पूजितः ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ।)
(यथास्य गुणपर्य्यायौ ।
"लावा विष्किरवर्गेषु ते चतुर्द्धा मता बुधैः ।
पांशुलो गौरकोऽन्यस्तु पौण्ड्रकोदर्भरस्तथा ।
लावा वह्निकरा स्निग्धा गरघ्ना ग्राहिका
हिताः ॥
पांशुलः श्लेष्मलस्तेषु वीर्य्योष्णोऽनिलनाशनः ।
गौरो लघुतरो रूक्षो वह्निकारी त्रिदोषजित् ।
पौण्ड्रक पित्तकृत् किञ्चिद्गुरुर्वातकफापहः ।
दर्भरो रक्तपित्तघ्नो हृदामयहरो हिमः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ।)

ला(वा)वकः, पुं (लाव एव । स्वार्थे कन् ।) लाव-
पक्षी । तत्पर्य्यायः । लघुलङ्घनः २ । इति
त्रिकाण्डशेषः । (तथास्य मांसगुणाः ।
"पचिषाद् मधुरश्चैव लावको लाघवात्मकः ।
कषायो दीपनः प्रोक्तः कषायो मधुरो लघुः ।
तथा विपाके मधुरः सन्निपातेऽतिपूजितः ॥"
इति हारीते प्रथमे स्थाने एकादशेऽध्याये ॥
यथा, सुश्रुते । ४ । १९ ।
"तित्तिरलावकमिश्रैकलावका
प्रमेहं जयन्ति समयूरतित्तिरि ॥"
लुनातीति । लू + ण्वुल् । छेदकः । यथा, भाग-
वते । ४ । १६ ।
"यथा ग्रामगापकः पैची मालको लावक-
स्तथा ॥")

लावण्य, त्रि, (लवण + अण् ।) लवणेन संस्कृतम् ।
यथा,—
"मार्गेष्क दाधिक सपिपधिष्यो संस्कृत क्रमात् ।
लवणोदकाभ्यामुदक लावणिकमुदर्शितम् ।
औदश्वितमौदश्वितक लवणं स्यात्तु लावणम् ॥"
इति हेमचन्द्रः ॥
लवणसम्बन्धि च । (यथा हरिवंशे ।९३।२ ।
"स मां परिभवन्नेव स्वां वेलां लवणाकरम् ।
क्षोदयामास चण्डैर्लावणैरम्बुविप्लवैः ॥")
मङ्ग्यां स्त्री । इति रत्नमाला ॥

लावणिकं, त्रि, (लवण + ठञ् ।) लवणेन संस्कृतम् । इति हेमचन्द्रः । लवणसम्बन्धि च ।
लवणविक्रेतरि, पुं । (यथा, मार्षे । १० ।
९८ ।

"लोकपूर्वैः सुतनोस्तुलायिका
मौरवाटामपि लावणिकेन ।")
लवणपात्रे, क्ली । इति केचित् ।

लावण्य, क्ली, (लवण + ष्यञ् ।) लवणत्वम् ।
लवणस्य भावः इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम् ।
(अथवा लिट् छेदे इति वर्त्तते लवः । अस्य
आदिभ्योऽच । तस्य भावः । सुखादित्वात्
ष्यञ् । यद्वा, लवणा लिट् सैव । चतुर्वर्णा-
दित्वात् स्वार्थे ष्यञ् ।) सौन्दर्य्यविशेषः । तस्य
लक्षणं यथा,—
"मुक्ताफलेषु च्छायायास्तरलत्वमिवान्तरा ।
प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते ॥"
इत्युज्ज्वलनीलमणिः ॥
तथा हि ।
"नीतिर्भूमिभुजां नतिर्गुणवतां ह्रीरङ्गनानां
धृति-
र्दम्पत्योः शिशवो गृहस्य कविता बुद्धेः प्रसादो
गिराम् ।
लावण्यं वपुषः स्मृतिस्तु मनसः शान्तिर्द्विजस्य
क्षमा
शक्तस्य द्रविणं गृहाश्रमवतां स्वास्थ्यं सतां
मण्डनम् ॥"
इति नवरत्नान्तर्गतमाघश्लोकः ।
(शौलकैपुण्याणि । अस्य प्रमाणं लावण्यार्जित-
शब्दे द्रष्टव्यम् ।)

लावण्यार्जितं क्ली, (लावण्येन अर्जितम् ।) विवाह-
कालीन श्वशुराभ्यां दत्तं धनम् । यथा,—
"प्रीत्या दत्तञ्च यत्किञ्चित् श्वश्वा वा श्वशुरेण
वा ।
पादवन्दनिकं यच्च लावण्यार्जितमुच्यते ॥"
इति विवादचिन्तामणिधृतकात्यायनवचनम् ।
लावण्य शौलकैपुण्यादि । तथा च पादग्रहणाय
शीलान्विमर्दी वा स्त्रियै श्वशुरादिना दत्तं
तृतीय स्त्रीधनमित्यर्थः । इति तद्व्याख्यानम् ।

लावा स्त्री (लाव + टाप् ।) पक्षिविशेषः । तत्-
पर्य्यायः । लावकः २ लावः ३ लवः ४ । अस्याः
मांसगुणाः । पथ्यत्वम् । ग्राहित्वम् । लघुत्वञ्च ।
इति राजनिर्घण्टः ॥

लाडु, } स्त्री अलाबुः । इति शब्दरत्नावली ॥
लाबू }

लासः पुं (लस् + घञ् ।) नृत्यमात्रम् । स्त्रीणां
नृत्यम् । इति शब्दरत्नावली ॥ (यथा कथा-
सरित्सागरे । ६ । ३१ ।
"मन्दवनितवातेह शिखानेत्रैर्नौगात
लास्यभरनतायैः कामयमि प्रसादात् ॥")
यूषः । इति शब्दचन्द्रिका ॥

लासकं, क्ली (लसतीति । लस् + ण्वुल् ।) मुकुटम् ।
इति हारावली ॥ मटका इति भाषा ॥

लासकः, पुं, (लसतीति । लस् + ण्वुल् ।) लास्य-
कारी । मयूरः । लट्वः । इति मेदिनी । के, ३
पेटः । इति धरणिः । (शैलिकारकः । यथा,
भर्तृहरौ । १ । ३६ ।

"नवजलकणसिक्तास्वीतलामादधान
कुसुमभरनतानां लाघवं पान्थानाम् ।")
लासकी, स्त्री, नर्त्तकी । इत्यमरः ।
लासिका, स्त्री, (लासोऽस्त्यस्या इति । लास+ ठन् ।) नर्त्तकी । इत्यमरः ।
लास्फोटनी, स्त्री आस्फोटनी । वेधनिका । इत्यमरटीकायां रायमुकुटः ।
लास्य, क्ली, (लस्+"ऋहलोर्ण्यत् ।" ३।१।१२४ । इति ण्यत् ।) नृत्यम् । इत्यमरः । तौर्य्यत्रिकम् । इति मेदिनी । भावाश्रयं नृत्यम् । तालल्याश्रय नृत्यम् । इति भरतः ।
पुंनृत्यं ताण्डवं प्राहुः स्त्रीनृत्यं लास्यमुच्यते ।"
इति सङ्गीतनारायणे नाट्यसंहिता ।
(यथा, महाभारते । १ । ८८ । १ ।
'सम्भोगसंहृष्टचातुर्य्यैर्हावलास्यमनोहरैः ।
राजानं रमयामास तथा रेमे तयैव सः ।")
लास्यः पुं, (लास्यमस्त्यस्येति । लास्य+अच् ।) नर्त्तकः । इति शब्दरत्नावली ।
लास्यक, क्ली (लास्यमेव । स्वार्थे कन् ।) नृत्यम् । इति शब्दरत्नावली ।
लास्या, स्त्री, (लास्यमस्त्यस्या इति । लास्य+ अच् । टाप् ।) नर्त्तकी । इति शब्दरत्नावली ।
लिकुच क्ली (लक्यते आस्वाद्यते इति । लक+ बाहुलकात् उच । पृषोदरादित्वात् इत्वम् ।) फलम् । इति राजनिर्घण्टः । (वडु । अस्य गुणा यथा —
"पित्तश्लेष्मप्रकोपीणि लकुचलिकुचान्यपि ।"
इति चरके सूत्रस्थाने २७ अध्याये ।)
लिकुच पुं, लकुच । इत्यमरः ।
लिक्षा स्त्री, लिक्षा । इति शब्दरत्नावली ।
लिक्षा स्त्री (लिश गतौ+बाहुलकात् स । सच कित् । इत्युणादिवृत्तौ उज्ज्वल । ३ । ६६ ।) यूकाण्डम् । इत्यमरः । लिकि इति भाषा । इत्यमरभरतौ । तत्पर्य्याय । लिक्षा २ लीक्षा ३ लीक्षा ४ लिक्षिका ५ । इति शब्दरत्नावली । (यथा —
'अङ्कुपाराश्च सन्त्याश्च यूका लिक्षाश्च नाशयेत् ।"
इति वाभटे निदानस्थाने चतुर्द्दशोऽध्यायः ।)
परिमाणविशेष । यथा,—
"जालान्तरगते भानौ यच्चाणुर्दृश्यते रजः ।
तैश्चतुर्भिर्भवेल्लिक्षा लिक्षाषड्भिश्च सर्षपः ।"
इति शब्दचन्द्रिका ।
सयकारकवर्गद्वितीयवतीयमपि पाठः ।
लिख इ स्पर्शे । इति कविकल्पद्रुमः । (भ्वा पर सक सेट ।) इ लिङ्खते । स्पर्शे गतौ । इति दुर्गादासः ।
लिख, श लेखने । इति कविकल्पद्रुमः । (तुदा पर सक सेट ।) श लिखति पुस्तकं लेखकः । अयं विभाषया कुटादिरिति केचित् । तेन लिखितं विकल्पोऽपि प्रक्रियाविरिति । लिखितश्च लेखितश्च लिखनं इत्यादि सिद्धम् । इति दुर्गादासः ।

लिख त्रि, (लिखतीति । लेख+"इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः ।) लेखकः । इति लिखधातो कप्रत्ययेन निष्पन्नम् ।
लिखन क्ली, लेखनम् । लिपिः । इत्यमरटीकायां सारसुन्दरी । (यथा, मार्कण्डेये । ५१ । २२ ।
"प्रविष्टमन्त्रलिखनात् शस्त्रमात्राद्विधारणात् ।
विशुद्धगेहावसथान्नायासाश्च वै द्विज ।।")
विधिलिपिरित्यभीया यथा,—
"यस्य यल्लिखनं पूर्व्वं यत्र काले निरूपितम् ।
तदेव खण्डितुं राधे पारश्च को विधिः ।
विधातुश्च विधाताहं येषां यल्लिखनं कृतम् ।
ब्रह्मादीनाञ्च दुर्ग्नाया न मत खण्ड्य कदाचन ।"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १५ अध्यायः ।
लिखित, क्ली (लिख+भावे क्त ।) लिपिः । इत्यमरः । लेखनम् । इति भरतः । (लिख+ कर्म्मणि क्त ।) लिखितपदार्थे, त्रि । यथा —
'प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति
कीर्त्तितम् ।"
इति मिताक्षरायां याज्ञवल्क्यः ।
मुनिविशेषे, पुं । यथा, आह्निकतत्त्वे याज्ञवल्क्यः ।
"पराशरव्यासशङ्खलिखिता दक्षगौतमौ ।
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः ।"
लिख्या स्त्री, परिमाणविशेष । यथा —
'जालान्तरगते भानौ यच्चाणुर्दृश्यते रजः ।
तैश्चतुर्भिर्भवेल्लिख्या लिख्याषड्भिश्च सर्षपः ।'
इति शब्दचन्द्रिका ।
लिग, इ गतौ । इति कविकल्पद्रुमः । (भ्वा पर सक सेट ।) इ, लिङ्गति । इति दुर्गादासः ।
लिग इ क चित्रे । इति कविकल्पद्रुमः । (चुरा पर सक सेट ।) इ क लिङ्गयति शब्दं स्त्रीनपुंसके प्रातिपदिकं चित्रं करोतीत्यर्थः । इति दुर्गादासः ।
लिगु क्ली, (लिङ्गति विषयात् विषयान्तरं गच्छतीति । लिग+'स्मृतृपुमृकृधिभ्यो गुलिगु ।" उणां । १ । ३७ । इति कुप्रत्ययेन साधु ।) मनः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ।
लिगु , पुं (लिग+कु ।) मृगः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः । भूप्रदेशः । मूर्खः । इति नानार्थरत्नमाला ।
लिङ्ग, क्ली, (लिङ्गति अनेन इति । लिङ्ग+घञ् । अभिधानात् क्लीवलिङ्गत्वम् ।) चिह्नम् । (यथा, महाभारते । १ । ७ । १२ ।
"येन लिङ्गेन यो देशो युक्तः समुपलक्ष्यते ।
तेनैव नाम्ना तं देशं वाच्यमाहुर्मनीषिणः ।")
शेफः । इत्यमरः । अनुमानम् । सांख्योक्त प्रकृतिः । (यथा, सांख्यकारिकायाम् । ५५ ।
"तत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः
पुरुषः ।
लिङ्गस्याविनिवृत्तेस्तस्माद्दुःखं स्वभावेन ।"
प्रकृतिकार्य्ये विरतिश्च । यथा तत्रैव । १ ।
"हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं
लिङ्गम् ।

सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम् ।"
विशेषस्तु तत्र द्रष्टव्यः ।) शिवमूर्त्तिविशेषः । इति मेदिनी । गे,२३ । साध्यम् । व्यक्तम् । पुंस्त्वादि । इति त्रिकाण्डशेषः । (यथा मनु । ५ । १३६ ।
"एका लिङ्गे गुदे तिस्रस्तथैकत्र करे दश ।
उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता ।")
सामर्थ्यम् । यथा —
"यावतामेव धातूनां लिङ्गं रूढिगतं भवेत् ।
अर्थश्चैवाभिधेयस्तु तावद्भिर्गुणविग्रहः ।"
इति तिथ्यादितत्त्वे एतत्कारिकाव्याख्यायां रघुनन्दनः ॥ ● ॥ अथ शेफार्थस्य लिङ्गस्य पर्य्यायः । शिश्न २ स्मरस्तम्भ ३ उपस्थ ४ मन्मथाङ्कुश ५ कन्दर्पमुषल ६ शेफ ७ मेहनम् ८ शेफ [ह]९ मेढ्र १० सांगुः ११ ध्वज ११ रामलता १२ यष्टि १३ । इति शब्दरत्नावली । लाङ्गलम् १५ साधनम् १६ शेफ १७ कामाङ्कुश १८ । इति जटाधरः ॥ ● ॥ लिङ्गमध्ये वाणिलालवर्णयुक्त स्वाधिष्ठाननामकषड्दलपद्ममस्ति । यथा —
"मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके ।
मध्ये स्वयम्भूलिङ्गन्तु कोटिसूर्य्यसमप्रभम् ।
तदूर्द्ध्वे हेमवर्णाभं व स वर्णचतुर्द्दलम् ।
तदूर्द्ध्वेऽग्निसमप्रख्यं षड्दलं हीरकप्रभम् ।
वादिलान्तषड्वर्णेन युक्तं स्वाधिष्ठानसंज्ञकम् ।
स्वशब्देन परं लिङ्गं स्वाधिष्ठानं ततो विदुः ।'
इति तन्त्रम् ॥७॥
अस्याधिष्ठातृदेवतान्यथा ।
"प्रजनः सर्व्वभूतानामुपस्थोऽध्यात्ममुच्यते ।
अधिभूतं तथा शुक्रं दैवतञ्च प्रजापतिः ।"
इति महाभारते आश्वमेधिकपर्व्व ॥ ● ॥
अस्य शुभाशुभलक्षणं यथा,—
'स्थूले लिङ्गे च धनवान् स्याच्च पुत्रादि
वर्ज्जितः ।
स्थूललिङ्गो दरिद्रः स्याद् रोगकृपणो भवेत् ।"
इति गारुडे ६३ अध्यायः ॥ ● ॥
अपि च ।
"महल्लिङ्गारुराख्यातं स्वल्पलिङ्गो धनी नरः ।
अपत्यरहितश्चैव स्थूललिङ्गो धनोज्झितः ।"
महल्लिङ्गादिभिरिति शेषः ।
'मेढ्रे वामनते चैव सुतार्थरहितो भवेत् ।
वक्रेऽन्यथा पुत्रवान् स्यात् दारिद्र्यं विनते
त्वध ।
अल्पे तु तनयो लिङ्गे शिरालेऽथ सुखी नरः ।
स्थूलग्रन्थियुते लिङ्गे भवेत् पुत्रान्वितः ।'
इति गारुडे ६६ अध्यायः ।
अन्यच्च ।
"दीर्घलिङ्गेन दारिद्र्यं स्थूललिङ्गेन निर्द्धनः ।
कृशलिङ्गेन सौभाग्यं ह्रस्वलिङ्गेन भूपतिः ।
ककुद्मे कठिने लिङ्गे परदाररतः सदा ।
रमते च पणैः दासीं निर्द्धनो भवति ध्रुवम् ।
शुक्ललिङ्गेन चाचौर रक्तलिङ्गेन भूपतिः ।
परस्त्रीं रमते नित्यं नारीणां वल्लभो भवेत् ।
श्यामलिङ्गेन रक्तेन रमते पीतमाङ्गनाम् ।

दाक्षं सुदक्ष निधाप्ता कन्यकाया पति
भवेत् ॥
इति वामनकम् ॥
शिवस्य लिङ्गरूपस्य तत्प्रतिमास्वरूपस्य च
कारणं यथा —
निलीम उवाच ।
'देवि कार्यं विचक्षेत ! दक्षस्त्रिपुरदहनका ।
कस्माल्लिङ्गार्चितं रूपं प्राप्तवान् सह भार्य्यया ॥
पार्थिवलिङ्गरूपश्च कथं ख्यातं शुभकारम ।
पञ्चवक्त्रश्चतुर्बाहुः शूलपाणिस्त्रिलोचन ॥
कथं विगर्हितं रूपं प्राप्तवान् विश्वपूजक ! ॥
एतन्मम समाचक्ष्व मित्रावरुणनन्दन ॥
श्रीवशिष्ठ उवाच ।
मन्त्र राजन् प्रवक्ष्यामि यथा दृश्यति गौरवात् ।
स्वायम्भुवो मनुः पूर्व्वं मन्दरे पर्व्वतोत्तम ।
दधार सुनिभिः सार्द्धं दीर्घसत्रमनुत्तमम् ।
तस्मिन् समागता सर्व्वे सुमयः शंसितव्रता ।
अन्येद्युः देवतानाञ्च निध प्रोचुस्तपोधना ।
विप्राणां वेदविदुषां नः पूज्यो देवतावरः ॥
इति तस्य वच श्रुत्वा धर्म्मं एव महत्तम ।
भृगुं तपोनिधिं विप्र प्रोचुः प्राञ्जलयस्तदा ॥
ऋषय ऊचुः ।
त्वमाकं संशयं छिन्धि समर्थोऽसि शुभव्रत ।
ब्रह्मविष्णुमहेशानामन्तिक व्रज सुव्रत ॥
गत्वा तेषां समीपन्तु तथा दृष्ट्वा च वियद्दान् ।
शुद्धसत्त्वगुणस्तेषां यस्मिन् स विप्रस्त तुवे ॥
स एव पूज्यो विप्राणां नेतरस्तु कदाचन ।
तस्मात् त्वं हि सुनिश्रेष्ठ विबुधानां निरीक्षणम् ।
शिघ्रं कुरु सुनिश्रेष्ठ अस्मल्लोकहित प्रभो ॥
इत्युक्तस्ततः स्तूर्णं कैलासं सुनिसत्तम ।
जगाम वामदेवस्य यत्रास्ते वृषभध्वज ॥
अहङ्कारसुपागम्य शङ्करस्य महात्मन ।
शूलहस्त महारौद्र नन्दि दृष्ट्वाब्रवीद्भिज ॥
सम्प्राप्तो हि भृगुर्विप्रो हर मद्‌ सुरोत्तमम् ।
निवेदयस्व मां शीघ्र शङ्कराय महात्मने ॥
तस्य तद्वचन श्रुत्वा नन्दी सर्व्वमहेश्वर ।
उवाच परुष वाक्य महर्षिममितौजसम् ॥
असान्निध्य प्रभोस्तस्य देव्या क्रीडति शङ्कर ।
निवर्त्तस्व निवर्त्तस्व यदि जीवितुमिच्छसि ॥
एवं निराकृतस्तेन तस्यातिष्ठच्चिरात्तदा ।
बहूनि दिवसान्यथ यद्‌दारे सुनीश्वर ॥
ततः क्रोधसमाविष्टो भृगु प्रोवाच शङ्करम् ।
विमदज्ञानदृष्टो मां न जानासि शङ्कर ॥
नारीसङ्गमभतोऽसौ यस्मात् मामवमन्यते ।
योनिलिङ्गस्वरूप वै रूपं तस्माद्भविष्यति ॥
अब्राह्मण मां न जानासि तमसा चाप्युपावृत ।
अब्रह्मण्यस्तमाप्नो न पूज्योऽसौ द्विजन्मनाम् ॥
तस्मात् जगत्प्रभु नक्तं इत अविद्यया ।
शिवस्याभ्र अक्षयैव पत्र पुष्पं मतान्तिकम् ॥
निर्म्माल्यमस्य चापाद्य भविष्यति न संशय ।
एवं शप्ता महादेवा शङ्कर लोकपूजितम् ।
उवाच गत्वा नन्दि शूलधरं नृप ! ॥
तदभक्ताश्च ये लोके भवालिङ्गाभिधारिण ।
ते पाषण्डसमायुक्ता वेदबाह्या भवन्ति वै ।
एवं शप्त्वा सुनिस्तत्र स्त्र त्रिपुरदहनकम् ।
जगाम ब्रह्मलोकं वै सर्व्वलोकनमस्कृतम् ॥"
इति पाद्मोत्तरखण्डोपाख्यानतमोऽध्याय
समुद्गीतम् ॥ * ॥ शिवलिङ्गस्य पूजाधारो यथा,
"पूजाधारानि वक्ष्यामि यस्मिन् सान्निध्यता
भवेत् ।
लिङ्गस्था पूजयेद्देवी पुस्तकस्था तथैव च ।
पुस्तकस्था महादेवी पादुके प्रतिमासु च ॥
सलिङ्गमाध्यमस्थानी शुक्रादौ प्रतिष्ठितम् ।
कपालेषु छत्र लिङ्ग अभ्यन्तरेषु साधके ।
अल्पलोकप्रद प्रोक्तं वन्मने प्रतिष्ठितम् ।
साधिकारेषु कलिङ्ग सुखभोगं तथैव च ।
मातृकामाधरूपेण सिद्धिदयाप्यधिष्ठितम् ॥
देव्युवाच ।
साधिकारेषु यल्लिङ्ग मन्त्रहीन प्रतिष्ठितम् ।
निवेदितमिहारेष अक्षयन्तु कथमभवत् ।
कुर्व्वन्ति भक्तियाताञ्च लोकानां याचनात्मकम् ।
तुलिदेवमिह प्राण योगिनामघमोचनम् ।
मन्मेऽनुधिपेनाथ कथ निवापति विभो ॥
ईश्वर उवाच ।
साधु साधु महादेवि ! इदम्यगिदमुत्तमम् ।
यत्त्वया चोदित भद्रे ! तथैव न चान्यथा ।
दुर्व्विज्ञेयं सुरैश्चापि किं पुनर्मनुजाशुभि ।
आविष्टो साधक मेव हृदयानन्दकारकम् ।
इन्द्रियाद्याश्च योगसुख दास्ति लिङ्गमपर्णं ।
शिवनाक ततो लिङ्ग विमलानन्ददायकम् ।
सुलभान् यच्छते नित्य विमानस्थां वराङ्गनाम् ।
भैरव पश्यति नित्य क्रीडन्त मात्मचक्र ॥
उमामहेश्वरचापि स्वर्गे पश्यति साधक ।
अनिर्व्वर्त्तिताधिकारे लिङ्ग निसुवनेश्वरि ! ।
आक्रमन्ति महाविद्या अदैत्या दानवादय ।
शून्यागार यथा देवि ! आक्रमन्ति सदा प्रिय ।
अमधिवेतस्तु सुङ्गन्ति तथा लिङ्गस्तु कल्पना ।
प्रेतं यथा सुराध्यक्षे आक्रमन्ति पिशाचका ।
शून्यञ्च यन्त्रलिङ्गन्तु आश्रयन्ति तथा प्रिय ॥"
इत्याद्ये देवीपुराणे कन्याकुब्जप्रपञ्चाध्याय ॥ * ॥
अथ लिङ्गलक्षणम् ।
तत्र बाणलिङ्गस्य लक्षणं यथा,—
"बाणलिङ्गं तथा प्रोक्तं मुक्तिमुक्तिप्रदायकम् ।
उत्पत्तिर्बाणलिङ्गस्य मन्त्रके धीयते शृणु ।
नर्म्मदादेविकायाश्च गङ्गायमुनयोस्तथा ।
सन्ति पुण्यनदीनाञ्च बाणलिङ्गानि षण्मुखे ।
इत्यादिपूजितान्यत्र सविशेषेविधितानि च ।
सदा सन्निहितस्तत्र शिव सर्व्वार्थदायक ।
रत्नलिङ्गानि साम्यादुः धान्यान्यापरादीनि
च ॥"
अथार्षिदिलिङ्गलक्षणम् ।
"प्राप्तं विनकोणास्तु स्थापयेत् करोटकम् ।
आमिष तत्र प्रतिनिमसथवा प्रतिकाञ्चितम् ।
एतल्लिङ्गवरं ख्यातं तैजसादिप्रविभागेन ।" * ॥
अथ याम्यलिङ्गलक्षणम् ।
'दण्डाकारं भवेद्याम्यमथवा दण्डाकृति ।
यद्‌यद्गुप्त सह तेन निर्मितं शासदि तत् ।
नित्याधात् विधानं तैश्च क्रियते स्थापितं तु ॥" * ॥
अथ नैरृतलिङ्गलक्षणम् ।
"रावण खड्गसदृशं श्यामश्रीमधुरप्रदम् ।
करवालादिप्रनिमन्तु कृष्णकुन्दितं तथा ।
रावण निरृते लिङ्ग शार्दूले न सुखप्रदम् ॥"
अथ वारुणलिङ्गलक्षणम् ।
"वारुणं वर्त्तुलाकारं पाशाङ्कु चाक्रवर्त्तितम् ।
वहिर्मुखादिं कुसुम समीरात् स्यात् ।
अथ वायुलिङ्गलक्षणम् ।
"सार्द्ध धूम्र स वायव्यं अथवा ध्वजवाहनम् ।
मस्तके स्थापितं तस्य ध्वजध्वजमितल्लान ।" ॥
अथ कुवेरलिङ्गलक्षणम् ।
"तुम्बमालागदाकारं गुह्यकेशस्य मध्यगं ।"
अथ रौद्रलिङ्गलक्षणम् ।
"दिव साध्यसथवा राशि समीक्ष रविवर्द्धनम् ।
अग्निशूलाङ्कितं रौद्र हैमकुञ्जवर्द्धनम् ॥"
अथ वैष्णवलिङ्गलक्षणम् ।
"चतुर्भुजमय वापि वैष्णवं शायवैरपान ।
वैष्णवं शङ्खचक्राङ्कगदाब्जादिविभूषितम् ॥
श्रीवत्स कौस्तुभाङ्कञ्च सर्व्वविश्वाधमाङ्कितम् ।
वैनतेयसमाङ्कं वा तथा विष्णुपदाङ्कितम् ।
वैष्णवं नाम तत् प्रोक्तं सर्व्वकामफलप्रदम् ।
प्राणायामादिसंस्थञ्च प्रभाढ्यं श्रीविवर्द्धनम् ।
पद्माङ्कं स्वस्तिकाङ्कं वा श्रीवत्साङ्कं विभूतये ।"
इति वीरमित्रोदयधृतकालोत्तर ॥ * ॥
नारद उवाच ।
"अथ वक्ष्यामि ते विप्र लिङ्गभेदादयं परम् ।
श्रवणाद्यस्य पापानि नाशमायान्ति तत्
क्षणात् ।
मधुपिङ्गलवर्णाभं छत्राकुम्भलिकाञ्चितम् ।
स्वयम्भुलिङ्गमाख्यातं सर्व्वसिद्धिविधायकम् ।
नानावर्णसमाकीर्णं जटाजूटसमन्वितम् ।
बहुस्मयाकृष्य लिङ्गं सुरासुरनमस्कृतम् ।
दीपाकारं शुभवर्णं छत्रविन्दुसमन्वितम् ।
नीलकण्ठं समाख्यातं लिङ्गं पूज्यं सुरासुरैः ।
शुक्लाभं शुक्लकेशञ्च नेत्रत्रयसमन्वितम् ।
त्रिलोचनं महादेवं सर्व्वपापप्रणाशनम् ।
ज्वललिङ्गं जटाजूटं छत्राभं शूलधारिणम् ।
नानाविचित्रमाख्यातं सर्व्वसत्त्वैर्विवर्जितम् ।
मधुपिङ्गलवर्णाभं श्वेतयज्ञोपवीतिनम् ।
श्वेतपद्मसमासीनं चन्द्ररेखाविभूषितम् ।
पञ्चवक्त्रसमायुक्तं त्रिपुरारिसमाश्रयम् ।
शुभ्राभं पिङ्गलं कण्ठं सूक्ष्मावाधरं परम् ।
त्रिशूलधरमीशानं लिङ्गं सर्व्वार्थसाधनम् ।
त्रिशूलडमरुधरं शुभ्ररत्नप्रभाभया ।
अर्द्धनारीश्वराकारं सर्व्वदेवैरभिष्टुतम् ।
ईश्वरत्नमयं नाम सूर्यं लिङ्गं सदाञ्जनम् ।
महाकालं समाख्यातं धर्म्मकामार्थमोक्षदम् ।
एतत्तु कथितं तुभ्यं लिङ्गचिह्नं मनीषिषु ।

एकेनैव कृतार्थः स्यात् बहुभिः किन्तु सुव्रत ।"
इति हेमाद्रिधृतलक्षणकाण्डम् ॥ * ॥
"उत्ताङ्गं श्रेयसे योग्यं प्रोक्तमन्यद् विवर्जयेत् ।
यमवर्णन्तु यल्लिङ्गं यमाङ्गं वा कमण्डलुम् ।
इन्द्राङ्गं सवर्णिकं वा वज्रबाणान्वितं मतम् ।
अग्निवर्णं महाकालं नन्दीशं पद्मरागवत् ।
पद्मरागनिभं सर्व्वं महाभं सिद्धपूजितम् ।
मौक्तिकाभं नीलनिभं ब्रह्मादिभिः प्रपूजितम् ।
मधुदे सैन्धवेषु गुह्यकैर्यातुधानकैः ।
नानावर्णमयं नीलं प्रथाङ्गमञ्जनप्रभम् ।"
इति वीरमित्रोदयधृतकालोत्तरम् ।
इति बाणलिङ्गलक्षणम् ॥ * ॥
अथ तस्य परीक्षा ।
"इत्येवं लक्षणं प्रोक्तं परीक्षां तस्य कीर्त्तये ।
त्रि पञ्च सप्त वारं वा तुलासाम्यं न जायते ।
तदा बाणं समाख्यातं शेषं पाषाणसम्भवम् ।"
इति वीरमित्रोदयधृतम् ।
तुलाकरणन्तु तण्डुलेन । अपरतुलायां तण्डुला यद्यधिकाः स्युस्तदा तल्लिङ्गं गृहिणां पूज्यमन्यथा लिङ्गञ्चेदधिकं तदोदासीनपूज्यमित्यादिति किं वदन्तीति हेमाद्रिधृतलक्षणकाण्डम् ।
"अप्रतलस्तुलारूढ़ं वृद्धिमेति न हीयते ।
बाणलिङ्गमिति ख्यातं शेषं नार्म्मदमुच्यते ।
त्रिपञ्चवारं यस्यैव तुलासाम्यं न जायते ।
तदा बाणं समाख्यातं शेषं पाषाणसम्भवम् ।"
इति स्कन्दसंहिता ।
"जले वा प्रक्षिपेद्भूमावुपरि तदुपलभ्यते ।
बाणलिङ्गं तदा विद्धि न्यूनं सुखविवर्द्धकम् ।"
इति वीरमित्रोदयः ॥ * ॥
बाणप्रस्थमपरत्रापि तत्रैव ।
"अथ बाणं समाख्यातं यथा यत्र तथादिम ।
बाणः सदाशिवो देवो बाणो बाणासुरोऽपि च ॥
तेन यस्मै हृतं तस्मात् बाणलिङ्गमुदाहृतम् ।
तत्र सन्निहितश्चैव शिवः धर्म्मार्थदायकः ।
तत्प्रतिष्ठं तल्लिङ्गं बाणाख्येन शिवेन च ।
पक्वजम्बूफलाकारं कुक्कुटाण्डसमाकृति ।
भुक्तिमुक्तिप्रदश्चैव बाणलिङ्गमुदाहृतम् ।"
पक्वफलं पद्मबीजम् ।
"पक्वजम्बूफलाकारं कुक्कुटाण्डसमाकृति ।"
इति हेमाद्रिधृतलक्षणकाण्डे पाठः ॥ * ॥
देवीं प्रति शिववाक्यम् ।
"प्रथमं नार्म्मदं लिङ्गं पक्वजम्बूफलाकृति ।
मधुवर्णं तथा शुक्लं नीलं मरकतप्रभम् ।
हंसडिम्बाकृति पुनः स्थापनार्थं प्रशस्यते ।
अथ संवक्षे लिङ्गं गिरितो नर्म्मदाजले ।
पुरा बाणासुरेणाहं प्रार्थितो नर्म्मदातटे ।
आविरासं गिरौ तत्र लिङ्गरूपी महेश्वरः ।
बाणलिङ्गमपि ख्यातमतोऽप्यन्यगतोऽपि वै ।
अन्येषां कोटिलिङ्गानां पूजने यत् फलं लभेत् ।
तत् फलं लभते मर्त्यो बाणलिङ्गैकपूजनात् ।"

तथा,—
"ताम्री वा स्फाटिकी स्वर्णी पाषाणी राजती तथा ।
वेदिका च प्रकर्त्तव्या तत्र संस्थाप्य पूजयेत् ।" * ।
प्रत्यहं योऽर्च्चयेल्लिङ्गं नार्म्मदं भक्तिभावतः ।
ऐहिकं किं फलं तस्य मुक्तिस्तस्य करे स्थिता ।"
इति प्रत्यहबाणलिङ्गपूजायाः फलम् । इति याज्ञवल्क्यसंहिता ॥ * ॥
"संस्थाप्य श्रीबाणलिङ्गं रत्नकोटिगुणं भवेत् ।
रत्नलिङ्गे ततो बाणात् फलं कोटिगुणं स्मृतम् ।
गुणांस्तु रत्नलिङ्गस्य वक्तुं शक्नोति शङ्करः ।
सिद्धयो रत्नलिङ्गे स्युरणिमाद्याः सुसंस्थिताः ।"
इति सूतसंहिता ॥ * ॥
"रत्नधातुमयान्येव लिङ्गानि कथितान्यपि ।
पवित्राण्येव पूज्यानि धर्म्मकामप्रदानि च ।
एतेषामपि सर्व्वेषां काश्मीरं हि विशिष्यते ।
काश्मीरादपि लिङ्गाच्च बाणलिङ्गं विशिष्यते ।
बाणलिङ्गात् परं नान्यत् पवित्रमिह दृश्यते ।
ऐहिकामुष्मिकं सर्व्वं पूजाकृत् प्रयच्छति ।"
इति बाणलिङ्गप्रशंसा । इति केदारकल्पम् ॥ * ॥
निन्द्यलिङ्गमाह तत्रैव ।
"कर्कशे बाणलिङ्गे तु पुत्रदारक्षयो भवेत् ।
चिपिटे पूजिते तस्मिन् गृहभङ्गो भवेद्ध्रुवम् ।
एकपार्श्वस्थिते चैव पुत्रदारधनक्षयः ।
शिरसि स्फुटिते बाणे व्याधिर्म्मरणमेव च ।
छिन्नलिङ्गेऽर्च्चिते भार्य्या विदेशगमनं भवेत् ।
लिङ्गे च कणिकां दृष्ट्वा व्याधिमान् जायते पुमान् ।
अङ्गुष्ठसि विलाये तु गोधनानां क्षयो भवेत् ॥ *
तीक्ष्णाग्रं वक्रशीर्षञ्च बाणलिङ्गं विवर्जयेत् ।
अतिस्थूलमतिसूक्ष्मं स्वल्पं वा भूषणान्वितम् ।
गृही विवर्जयेत्ताहक् तद्धि मोक्षाधिनो हितम् ।"
इति दुष्टबाणलिङ्गलक्षणम् । इति हेमाद्रिः ॥ * ॥
शुभलिङ्गमाह ।
"अपरं कपिलं लिङ्गं घनाभं मोक्षकाङ्क्षिणः ।
लघु वा कपिलं स्थूलं गृही नैवार्च्चयेत् क्वचित् ।
पूजितस्य गृहस्थेन वर्णेन भ्रमरोपमम् ।
तत् सपीठमपीठं वा मन्त्रसंस्कारवर्जितम् ।
सिद्धिमुक्तिप्रदं लिङ्गं सर्व्वप्रासादपीठगम् ।"
इति शुभबाणलिङ्गलक्षणम् । इति वीरमित्रोदयः ॥ * ॥ बाणलिङ्गस्यावाहनादि न कर्त्तव्यं यथा,—
"बाणलिङ्गानि राजेन्द्र ! स्थितानि भुवनत्रये ।
न प्रतिष्ठा न संस्कारस्तेषामावाहनं न च ।"
इति भविष्यपुराणम् ॥
"ब्राह्मे मुहूर्त्ते चोत्थाय यः स्मरेद्बाणलिङ्गकम् ।
सर्व्वत्र जयमाप्नोति यत्र यत्र महेश्वर ! ।"
इति योगसारे ६ परिच्छेदः ॥ * ॥
अथ बाणलिङ्गध्यानम् ।
"ॐ प्रमत्तं शक्तिसंयुक्तं बाणाख्यञ्च महाप्रभम् ।
कामबाणान्वितं देवं संसारदहनक्षमम् ।
शृङ्गारादिरसोल्लासं बाणाख्यं परमेश्वरम् ।
एवं ध्यात्वा बाणलिङ्गं यजेत्तं परमं शिवम् ।
मनसा गन्धपुष्पाद्यैः सम्पूज्याद्य मनुं स्मरेत् ।
प्राणायामं ततः कृत्वा बाणलिङ्गन्तु तोषयेत् ।
तदिष्टदेवयोरैक्यं विभाव्य चागमं जपेत् ।
ततो जपं समाप्याथ स्तवेनानेन तोषयेत् ।" * ।
अथ स्तवः ।
"बाणलिङ्ग महाभाग संसारात्त्राहि मां प्रभो ।
नमस्ते चोग्ररूपाय नमस्तेऽव्यक्तयोनये ।
संसारकारिणे तुभ्यं नमस्ते सूक्ष्मरूपधृक् ।
प्रमत्ताय महेन्द्राय कालरूपाय वै नमः ।
दक्षगाय नमस्तुभ्यं नमस्ते योगकारिणे ।
योगिनां योगकर्त्रे च मोक्षदात्रे नमो नमः ।
नमः कामाङ्गनाशाय नमः कल्मषहारिणे ।
नमो विश्वप्रदात्रे च नमो विश्वस्वरूपिणे ।
बाणस्य वरदात्रे च रावणस्य जयाय च ।
रामस्याश्वमेधाय च राज्याय भरतस्य च ।
सुग्रीवां योगदात्रे च राक्षसानां क्षयाय च ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ।
ऐं डाकिनीशक्तियुक्ताय महामायाप्रियाय च ।
भगप्रियाय सत्याय देहिनां नियताय च ।
परित्राणाय योगिनां कौलिकानां प्रियाय च ।
कुलाङ्गनानां भक्ताय कुलाचाररताय च ।
कुलभक्ताय योगाय नमो नारायणाय च ।
मधुपानप्रमत्ताय योगेशाय नमो नमः ।
कुलनिन्दाप्रणाशाय कौलिकानां सुखाय च ।
कुलयोगाय सिद्धाय शुद्धाय परमात्मने ।
परमात्मस्वरूपाय लिङ्गमूलात्मकाय च ।
सर्व्वेश्वराय सत्याय शिवाय निर्गुणाय च ॥ * ॥
इत्येतत् परमं गुह्यं बाणलिङ्गस्य शङ्कर ।
यः पठेत् साधकश्रेष्ठो नारायणसमः स च ।
स्तवस्यास्य प्रसादेन योगी योगमवाप्नुयात् ।
राज्यार्थिनां भवेद्राज्यं भोगिनां भोग एव च ।
साधूनां साधनं देव कौलिकानां कुलं भवेत् ।
यं यं कामयते मन्त्री तं समाप्नोति लीलया ।
बाणलिङ्गप्रसादेन सर्व्वमाप्नोति शङ्करम् ।
किमन्यत् कथयामीह तव देवि कुलेश्वरि ! ।
महाभये समुत्पन्ने राजद्वारे कुलेश्वर ! ।
देशान्तरभये प्राप्ते दस्युचौरादिसङ्कुले ।
पठनात् स्तवराजस्य न भयं लभते क्वचित् ।
बाणलिङ्गस्य माहात्म्यं सङ्क्षेपात् कथितं मया ।
तस्य श्रवणमात्रेण नरो मोक्षमवाप्नुयात् ।
बाणलिङ्गं समाराध्य योगिनां योगसाधने ।
कौलिकानां कुलाचारे पशूनां पशुनिग्रहे ।
वैरिणां देशपाते रोगिणां रोगनाशने ।
यो यो नारायणश्रेष्ठं सर्व्वं तत्सिद्धिदं भवेत् ।"
इति योगसारे सप्तमोल्लासे पार्व्वतीशिवसंवादे बाणलिङ्गस्तोत्रं समाप्तम् ॥ * ॥
अथ रोदलिङ्गलक्षणम् ।
"नदीसमुद्भवं रौद्रमन्योदरस्य विपर्ययात् ।

महीवेगात् यम शिव यथात रौद्रमुच्यते ।"
इति वीरमित्रोदयः ।
'वहिर्भवाह्यस्याग्रं बाणलिङ्गसमाकृति ।
तदन्यदपि बोद्धव्यं रौद्रलिङ्गं सुलक्षणम् ॥
नदीपारगतं यच्चान्यद्या बाणलिङ्गसमाकृति ।
तदन्यदपि बोद्धव्यं लिङ्गं रौद्रं भविष्यति ॥
रौद्रलिङ्गं तथाख्यातं बाणलिङ्गसमाकृति ।
श्वेतं रक्तं तथा पीतं कृष्णं त्रिशूलिपूजितम् ॥
स्वभावात् कृष्णवर्णं वा सत्त्वजातिषु सिद्धिदम् ।
सर्वेषामभयं रौद्रं बाणलिङ्गवदीरितम् ॥"
इति रौद्रलिङ्गलक्षणम् । इति नवग्रहमखदीपि ।
अथ शिवनाभिलिङ्गलक्षणम् ।
"उत्तमं मध्यमधमं त्रिविधं लिङ्गमीरितम् ।
चतुरङ्गुलमुन्नधौ रम्यं वेदिकयान्वितम् ॥
उत्तमं लिङ्गमाख्यातं मुनिभिः शास्त्रकोविदैः ।
तदर्द्धं मध्यमं प्रोक्तं तदर्द्धमधमं स्मृतम् ॥"
तस्य महिमा ।
'शिवनाभिमयं लिङ्गं प्रतिपूज्य महर्षिभिः ।
श्रेष्ठं च सर्वलिङ्गेभ्यस्तस्मात् पुण्यं विशिष्यते ॥"
इति शिवनाभिलिङ्गलक्षणम् । इति वीरमित्रोदयधृतशिवनारदसंवादः ॥ * ॥
अथ दैवलिङ्गलक्षणम् । सिद्धान्तशेखरे ।
"करपुटसमाग्रं शूलटङ्केन्दुभूषितम् ।
रेखाकोटरसंयुक्तं शिखोन्नतसमन्वितम् ॥
दीपाकारञ्च यल्लिङ्गं मध्यभागान्निवर्जितम् ।
लिङ्गं गोलमिति प्रोक्तं गोलकं प्रोच्यतेऽधुना ॥
कुक्कुटाण्डस्य चाकारं नागरङ्गफलोपमम् ।
काकडिम्बफलाकारं गोललिङ्गमितीरितम् ॥"
इति गोललिङ्गलक्षणम् ।
अथार्षलिङ्गलक्षणं तत्रैव ।
"नारिकेलफलाकारं ब्रह्मसूत्रविवर्जितम् ।
मूले स्थूलञ्च यल्लिङ्गं कपित्थफलसन्निभम् ॥
नालस्य वा दण्डाकारं मध्ये स्थूलञ्च यद्भवेत् ।
मध्ये स्थूलं यदं लिङ्गमार्षलिङ्गमुदाहृतम् ॥"
इत्यार्षलिङ्गलक्षणम् ॥ * ॥
अथ लिङ्गलक्षणम् ।
"लिङ्गं हि द्विविधं प्रोक्तं [illegible] ।
तल्लिङ्गं द्विविधं ज्ञेयमचलञ्च चलं तथा ।
प्रत्येकं त्रिविधं ज्ञेयं लिङ्गं तदुभयात्मकम् ॥
प्रासादे स्थापितं लिङ्गमचलं तच्छिलादिजम् ।
स्थापितं चचलं शैवे स्थिरं लिङ्गमयोजितम् ॥
पञ्चधा तत्र स्थिरं लिङ्गं स्वयम्भु दैवपावकम् ।
आर्षञ्च मानुषं लिङ्गं तेषां लक्षणमुच्यते ॥"
इति सिद्धान्तशेखरः ।
'आचार्यमुनये वीर स्वयम्भूतो महेश्वरः ।
यत्र चैव स्वयं जातं लिङ्गमस्तु स्वयम्भु तत् ।
यस्मिन् यस्य संस्थाप्य ददाति शिवमेव तु ॥"
इति षट्कर्मदीपिका ॥ * ॥
"नानाचिह्नदलयुक्तं नानावर्णसमन्वितम् ।
अदृष्टमूलं यल्लिङ्गं कदाचित् भुवि जायते ।
तल्लिङ्गन्तु स्वयम्भूतमपरं चलमच्युतम् ।
स्वयम्भु लिङ्गमित्युक्तं तत्र नाशाक्षिमं मतम् ।
महाभमस्तकं लिङ्गं भैरवं तद्वदाहृतम् ।
पद्माभमस्तकं ब्राह्मं छत्राभं शाक्रमुच्यते ॥
शिरोमुन्नं समाधेयं त्रिपदं याम्यमीरितम् ।
खड्गाभं नैरृतं लिङ्गं वारुणं कलसाकृति ॥
वायव्यं ध्वजवल्लिङ्गं कौवेरं गदान्वितम् ।
ईशानस्य त्रिशूलाभं लोकपालादिनिर्मितम् ।
स्वयम्भु लिङ्गमाख्यातं सर्वशास्त्रविशारदैः ॥"
इति स्वयम्भुलिङ्गलक्षणम् ।
इति सिद्धान्तशेखरः ॥ * ॥
"दृष्ट्वा लिङ्गं महेशस्य स्वयम्भु तस्य पार्वति ।
सर्वपापविनिर्मुक्तः परे ब्रह्मणि लीयते ॥"
एतेषां पूजाफलं तत्रैव ।
"विशेषाच्छैलजं मुक्तौ मुक्तये चाशुवल्लभम् ।
पार्थिवं भुक्तये शस्तं मुक्तये चाशुवल्लभम् ॥
एवं वै दारुजं ज्ञेयं चित्रलिङ्गं तथा पुनः ।
स्थिरलक्ष्मीप्रदं ज्ञेयं हैमं राज्यप्रदं तथा ॥
पुत्रवृद्धिकरं   राङ्गमायुःप्रवर्द्धनम् ॥"
इति मत्स्यसूक्तमहातन्त्रम् ॥ * ॥
"पारदञ्च महाभूत्यै सौभाग्याय च मौक्तिकम् ।
चन्द्रकान्तं मृत्युजितं स्फाटिकं सर्वकामदम् ॥"
इति पद्मपुराणम् ॥ * ॥
"सर्वफलप्रदा भूमिमयस्ताद्देव हि ।
अचलाद्याः स्मृता ह्यष्टौ मणयो विद्रुमाकृता ।
राजौ प्रकाशका सर्वविघ्नाद्याभासकारिणि ।
नानावर्णास्तु विज्ञेया रत्नैर्मिश्रा च रूपतः ।
वज्राद्या स्फाटिकाद्याश्च मुक्तामादिविनिर्मितम् ।
सर्वकामप्रदं पुंसां लिङ्गं तात्कालिकं मतम् ॥"
इति वीरमित्रोदयधृतकालोत्तरः ॥ * ॥
"गान्धं सौभाग्यदं लिङ्गं सौम्यं मुक्तिप्रदायकम् ।
नानामूलोद्भवं लिङ्गं नानाकामप्रदायकम् ॥
सैकतं सुखदं लिङ्गं सौभाग्याय च लावणम् ।
उच्चाटने तु भास्मं सौवं प्रभुत्वदायकम् ।
तात्कालिकं दरिद्रश्च कृत्वा भक्त्या समर्चयेत् ॥"
इति लक्षणसमुच्चयः ।
अथ गन्धलिङ्गम् । गरुडपुराणे ।
"कस्तूरिकाया द्वौ भागौ चत्वारश्चन्दनस्य च ।
कुङ्कुमस्य त्रयश्चैव शशिना च चतुःसमम् ।
एतद्गन्धलिङ्गं कृत्वा सम्पूज्य भक्तितः ।
शिवसायुज्यमाप्नोति बन्धुभिः सहितो नरः ॥"
पुष्पमयलिङ्गं यथा,—
"कार्यं पुष्पमयं लिङ्गं नानागन्धसमन्वितम् ।
नवखण्डां धरां भुक्त्वा तदीयोऽधिपतिर्भवेत् ॥"
अथ रजोमयलिङ्गम् ।
"रजोभिर्निर्मितं लिङ्गं यः पूजयति भक्तितः ।
विद्याधरपदं प्राप्य पश्चाच्छिवसमो भवेत् ॥"
अथ गोशकृल्लिङ्गम् ।
"श्रीकामो गोशकृल्लिङ्गं कृत्वा भक्त्या प्रपूजयेत् ।
अच्छिन्नकापिलेनैव गोमयेन प्रकल्पयेत् ॥"
अच्छिन्नं भूमिपतनरहितेन । शून्योद्धृतेनेति यावत् ॥ * ॥
अथ यवगोधूमशालिजलिङ्गम् ।
"कार्यं यवकृतं लिङ्गं यवगोधूमशालिजम् ।
श्रीकामः पुष्टिकामश्च पुत्रकामश्च वर्द्धयेत् ।'
अथ सिताखण्डमयलिङ्गम् ।
"सिताखण्डमयं लिङ्गं काममारोग्यवर्द्धनम् ।
वंशे लवणजं लिङ्गं तालत्रिकटुकान्वितम् ॥"
तालं हरितालम् । त्रिकटुकं शुण्ठीपिप्पली मरीचं इति प्रसिद्धम् ।
"गव्यघृतमयं लिङ्गं संपूज्य बुद्धिवर्द्धनम् ।"
तथा ।
"लवणेन च सौभाग्यं पार्थिवं सर्वकामदम् ।
कामं तिलपिष्टोत्थं तुषोत्थं मारणे स्मृतम् ।
भस्मोत्थं सर्वफलदं गुडोत्थं प्रीतिवर्द्धनम् ।
गन्धोत्थं गुणं भूरि शर्करोत्थं सुखप्रदम् ।
वंशाङ्कुरोत्थं वंशकरं गोमयं सर्वरोगनुत् ।
केशास्थिसम्भवं लिङ्गं सर्वशत्रुविनाशनम् ।
लोमजे मारणे पिष्टसम्भवं लिङ्गमुत्तमम् ।
दारिद्र्यदं द्रुमोद्भूतं पिष्टं चाटनप्रदम् ।
दधिदुग्धोद्भवं लिङ्गं कीर्त्तिलक्ष्मीसुखप्रदम् ।
धान्यदं धान्यजं लिङ्गं फलोत्थं फलदं भवेत् ।
पुष्पोत्थं दिव्यभोगायुर्मोक्षौ धात्रीफलोद्भवम् ।
नवनीतोद्भवं लिङ्गं कीर्त्तिसौभाग्यवर्द्धनम् ।
दूर्वाकाण्डसमुद्भूतमपमृत्युनिवारणम् ।
कर्पूरसम्भवं लिङ्गं चलं वै भुक्तिमुक्तिदम् ।
अयस्कान्तं चतुर्थी तु ज्ञेयं सामान्यसिद्धिदम् ।
सर्वं मृद्भवं श्रेष्ठं मम वत्समहर्निशम् ।
रसलिङ्गं महाभूत्यै सौभाग्याय च मौक्तिकम् ।
पुष्परागं महाभोगं ज्योतिषोरत्नसुप्रदम् ।
आयकं कुलधनदं तैजसं सर्वकामदम् ।
चन्द्रापीडं नृमुक्तिं स्फाटिकं सर्वकामदम् ।"
चन्द्रापीडं चन्द्रकान्तमित्यर्थः ।
'शूलाद्यमणिजं शत्रुघातार्थं मौक्तिकं तथा ।"
शत्रुनिधनात् शूलरोगनाशं च शून्यमणि' ।
"आयुष्यं हीरकं ज्ञेयं रोगघ्नं मौक्तिकोद्भवम् ।
शुभदं पुष्पकं गौरं वैदूर्यं शत्रुनाशनम् ।
नीलं लक्ष्मीप्रदं ज्ञेयं स्फाटिकं सर्वकामदम् ॥"
इति पारदपत्रे ।
"महामुक्तिप्रदं हैमं राजतं भूतिवर्द्धनम् ।
आरकूटं तथा कांस्यं द्रव्यं सामान्यशक्तिदम् ॥"
आरकूटं पित्तलम् ।
"त्रपु सौभाग्यदं लिङ्गं प्रभवो नागजे कृतम् ।
कीर्त्तिदं कांस्यजं लिङ्गं राजतं पुष्टिवर्द्धनम् ।
पैत्तलं भुक्तिमुक्त्यर्थं मिश्रजं सर्वसिद्धिदम् ॥"
मिश्रजमष्टधातुनिर्म्मितम् । इति कालोत्तरः ।
"पितृणां सद्गतये लिङ्गं पूज्य रजतसम्भवम् ।
हैमजं ब्रह्मलोकस्य प्राप्तये पूजयेत् पुमान् ।
पूजयेत्ताम्रजं लिङ्गं पुष्टिकामो हि मानवः ॥"
इति शिवनारदसंवादः ।
तात्कालिकलिङ्गप्रमाणन्तु कालोत्तरमते ।
"ताम्रलिङ्गं मणौ सार्द्धं रैत्यं सौवर्णकं च ।
रत्नपञ्चकलिङ्गञ्च शर्कराख्यास्य तथा ।
पुष्टिकामस्तु सततं लिङ्गं पित्तलजं बनम् ।

कीर्त्तिकामो यजेन्नित्यं लिङ्गं कांस्यसमुद्भवम् ।
शत्रुमारणकामस्तु लिङ्गं लौहमयं सदा ।
सदा सीसमयं लिङ्गमायुष्कामोऽर्च्चयेन्नरः ॥"
इति मत्स्यसूक्तमहातन्त्रम् ।
"श्रियं लक्ष्मीप्रदं चैव राजतं चैव राज्यदम् ।
प्रवालं हितकरं राज्ञः ताम्रमायुःप्रवर्द्धनम् ।
विद्वेषकारकं कांस्यं रैत्तिकं शत्रुनाशनम् ।
सीसन्तु सेवकं लिङ्गमायसं शत्रुनाशनम् ।
अष्टलौहमयं लिङ्गं कुष्ठरोगापहारकम् ।
त्रिलौहसम्भवं लिङ्गं विज्ञाय प्रति सिद्धिदम् ।'
इति लक्षणसमुच्चये ।
"श्रीपर्णं वचनं लिङ्गं शैलजं सर्व्वसिद्धिदम् ।
धातुजं धनदं साक्षाद्दारुजं भोगसिद्धिदम् ।"
इति लिङ्गपुराणम् ।
"गन्धपुष्पमयं लिङ्गं तथान्नादिविनिर्म्मितम् ।
कस्तूरीसम्भवं लिङ्गं यशःकामो प्रपूजयेत् ।
लिङ्गं गोरोचनोत्थञ्च रूपकामस्तु पूजयेत् ।
कान्तिकामस्तु सततं लिङ्गं कुङ्कुमसम्भवम् ।
श्वेतागुरुसमुद्भूतं महाबुद्धिविवर्द्धनम् ।
धाराप्राप्त्यै लिङ्गं कृष्णागुरुसमुद्भवम् ।
यच्चन्दनसम्भूतम् ।" इति कालोत्तरे ।
"पार्थिवे शिवपूजायां सर्व्वसिद्धियुतो भवेत् ।
पाषाणे शिवपूजायां द्विगुणं फलमीरितम् ।
स्वर्णलिङ्गे च पूजायां शत्रूणां नाशनं मतम् ।
सर्व्वसिद्धीश्वरो रौप्ये फलं तस्माच्चतुर्गुणम् ।
ताम्रे पुष्टिं विजानीयात् कांस्ये च धनसञ्चयम् ।
गङ्गायाञ्च चतुर्गुणं लाक्षायां रोगवान् भवेत् ।
स्फाटिके सर्व्वसिद्धिः स्यात्तथा मरकते प्रिये ।
लौहलिङ्गे रिपोर्नाशः कामदं भस्मलिङ्गकम् ।
वालुकायां कार्य्यसिद्धिर्गोमये रिपुहिंसनम् ।
सर्व्वलिङ्गस्य माहात्म्यं धर्म्मकामार्थमोक्षदम् ॥"
इति मातृकाभेदतन्त्रे १५ पटलः ।
"ब्रह्मा सम्पूजयेन्नित्यं लिङ्गं शैलमयं शुभम् ।
तस्य संपूजनादेव प्राप्तं ब्रह्मपदमुत्तमम् ।
इन्द्रनीलमयं लिङ्गं विष्णुः समर्च्चयेत् सदा ।
विष्णुत्वं प्राप्तवान् तेन सोऽभूद्भूतैकपालकः ।
स्फाटिकं निर्म्मलं लिङ्गं वरुणोऽभ्यर्च्चयेत् सदा ।
तेन तद्वरुणत्वं हि प्राप्तं तेजोबलान्वितम् ॥"
इति षट्कर्म्मदीपिकाधृतशिवधर्म्मे ।
'पूजयेत् पार्थिवे लिङ्गे पाषाणलिङ्गकेऽथवा ।
स्वर्णलिङ्गेऽथवा देवि रौप्ये ताम्रे च कांस्यके ।
पारदे वाथ गङ्गायां स्फाटिके मरकतेऽपि वा ।
कार्य्यभेदे लौहलिङ्गे भस्मनिर्म्मितलिङ्गके ।
वालुकानिर्म्मिते लिङ्गे गोमये तु प्रपूजयेत् ।
संस्कारेण विना देवि पाषाणादौ न पूजयेत् ॥"
इति मातृकाभेदतन्त्रे ७ पटलः ।
इति शिवलिङ्गनिर्म्माणप्रकारः ॥ ० ॥ अथ शिवलिङ्गसंस्कारः ।
"संस्कारञ्च प्रवक्ष्यामि विशेष इह यद्भवेत् ।
रौप्यञ्च स्वर्णलिङ्गञ्च स्वगृहे विधाय च ।
तस्मादुत्तोल्य तल्लिङ्गं दुग्धमध्ये दिनत्रयम् ।
नामकेन स्थापयित्वा कायवदं प्रपूजयेत् ।
षोडशेनोपचारेण वेदाद्यं पार्व्वती यजेत् ।
तस्मादुत्तोल्य तल्लिङ्गं गङ्गातोये दिनत्रयम् ।
ततो वेदोक्तविधिना संस्कारमाचरेत् सुधीः ॥"
पूर्व्वोक्तवचने फलविशेषकामनया नानाविध लिङ्गपूजोक्ता सा च पूजा ।
"लिङ्गं सुलक्षणं कुर्य्याच्चालिङ्गमलक्षणम् ।
दैर्घ्यहीने भवेद्व्याधिरधिके शत्रुवर्द्धनम् ।
मानहीने विनाशः स्यादधिके च शिशुक्षयः ।
विस्तारे चाधिके हीने राष्ट्रनाशो भवेद्ध्रुवम् ।
पीठहीने तु भार्य्याया शिरोहीने कुलक्षयः ।
ब्रह्मसूत्रविहीने च राज्ञो राष्ट्रं विनश्यति ।
तस्मात् सर्व्वप्रयत्नेन लिङ्गं कुर्य्यात् सुलक्षणम् ॥"
इत्यादिना सुलक्षणलिङ्गस्यैव फलदातृत्वमुक्तम् ।
इति मातृकाभेदतन्त्रे ७ पटलः ।
देव्युवाच ।
"इन्द्रिये रहितो देवः शून्यरूपः सदाशिव ।
आकारो नास्ति देवस्य किं तस्य पूजने फलम् ॥"
शिव उवाच ।
"शैवे पूजा महेशानि कदाचिन्नास्ति पार्व्वति ।
सदस्य परमेशानि रौद्री शक्तिरितीरिता ।
रौद्री तु परमेशानि आद्या कुण्डलिनी भवेत् ।
वर्त्तते परमेशानि ब्रह्मविष्णुशिवात्मिका ।
सार्द्धत्रिवलयाकारे शिवं वेष्ट्य सदा स्थिता ।
शक्तिं विना महेशानि प्रेतत्वं तस्य निश्चितम् ।
शक्तिसंयोगमात्रेण कर्म्मकर्त्ता सदाशिव ।
अतएव महेशानि पूजयेच्छिवलिङ्गकम् ॥"
इति चक्रस्थितशिवलिङ्गपूजनवचनम् ॥
इति लिङ्गार्च्चनतन्त्रे २ पटलः ॥ ० ॥
देव्युवाच ।
"लिङ्गप्रमाणं देवेश कथयस्व मयि प्रभो ।
पार्थिवे च शिलादौ च विशेषो यत्र यो भवेत् ॥"
श्रीशिव उवाच ।
स्वर्णिकातोलकं यावन्मध्ये तोलकद्वयम् ।
एतदन्यं न कुर्व्वीत कदाचिदपि पार्व्वति ॥"
इति मातृकाभेदतन्त्रे ७ पटलः ।
अपि च ।
"स्वर्णिकातोलकं यावन्मध्ये तोलकद्वयम् ।
शिवस्यास्य प्रमाणेन घटनं कारयेद्बुधः ।
अङ्गुष्ठपर्व्वमानन्तु कृत्वा लिङ्गं प्रपूजयेत् ।
स्वर्णादिलिङ्गघटने प्रमाणं परिकीर्त्तितम् ।
फलसूक्ष्ममवाप्नोति अन्यथा चैतदन्यथा ॥"
इति षट्कर्म्मदीपिकाधृतविश्वसारतन्त्रम् ।
"लिङ्गे वेदी तथा पीठे समसूत्रनिपातवत् ।
समस्थैव विजानीयात् सिद्धपीठकरस्थिरम् ॥"
इति कालोत्तरे ।
स्वर्णिकादिभेदेन ब्राह्मणादीनां पूजार्थस्य प्रशस्त यथा,—
"चतुर्धा पार्थिवं लिङ्गं वर्णभेदेन पार्व्वति ।
शुक्लं रक्तं तथा पीतं कृष्णञ्च परमेश्वरि ।
शुक्लन्तु ब्राह्मणे शस्तं क्षत्रिये रक्तमिष्यते ।
पीतन्तु वैश्यजातौ स्यात् कृष्णं शूद्रे प्रकीर्त्तितम् ॥"
तथा ।
"शुक्लं हि पार्थिवं लिङ्गं निर्म्माय यस्तु पूजयेत् ।
स एव परमेशानि त्रिवर्गफलभाग्भवेत् ।
क्षत्रियस्तु वरारोहे रक्तं निर्म्माय पार्थिवम् ।
पूजयेत् सततं यस्तु त्रिवर्गफलमाप्नुयात् ।
हरितं पार्थिवं देवि । निर्म्माय यस्तु पूजयेत् ।
स च वैश्यो महेशानि । त्रिवर्गफलभाग्भवेत् ।
कृष्णं हि पार्थिवं लिङ्गं निर्म्माय यस्तु पूजयेत् ।
स शूद्रः परमेशानि । त्रिवर्गफलभाग्भवेत् ॥"
इति लिङ्गार्च्चनतन्त्रे ३ पटलः ॥ ० ॥
"शिलादौ च महेशानि । स्थूलञ्च फलदायकम् ।
अङ्गुष्ठमानं देवेशि । यद्वा हेमादिमानकम् ।
क्रमेण देवदेवेशि । फलं बहुविधं लभेत् ।
स्थूलात् स्थूलतरं लिङ्गं यत्नाच्च परमेश्वरि ॥
पूजनाद्धारणाद्देवि । फलं बहुविधं स्मृतम् ॥"
स्थूलात् स्थूलमिति पार्थिवलिङ्गेतरपरम् । स्वर्णिकातोलकमिति विशेषवचनात् । शिला-स्फाटिकमरकतादीनां पञ्चसूत्रीकरणमुक्तं यथा,—
"शिवलिङ्गस्य यन्मानं तन्मानं दक्षवक्षयोः ।
योन्यग्रमपि यन्मानं तद्योऽपि तथा भवेत् ॥"
इति लिङ्गपुराणम् ।
"लिङ्गस्य यावन्विस्तारः परिणाहोऽपि तावान् ।
लिङ्गस्य द्विगुणा दैर्घ्ये योनिस्तद्वत्प्रमिता ॥
कुर्व्वीताङ्गुष्ठतो ह्रस्वं न कदाचिदपि क्वचित् ।
रत्नादिशिवनिर्म्माणे मानमिच्छावशाद्भवेत् ॥"
इति तन्त्रान्तरम् ।
लिङ्गव्युत्पत्तिर्यथा,—
"आकाशं लिङ्गमित्याहुः पृथिवी तस्य पीठिका ।
आलयः सर्व्वदेवानां लयनाल्लिङ्गमुच्यते ॥"
इति स्कन्दपुराणम् ।
लिङ्गमहिमा यथा,—
शिव उवाच ।
"न तुष्याम्यर्च्चितोऽर्थानां पुष्पधूपनिवेदनैः ।
लिङ्गेऽर्च्चिते तथात्यर्थं परं तुष्यामि पार्व्वति ॥
एष देवि । पुरा ह्यस्मिन् लोकेऽत्र सर्व्वदैवतैः ।
लिङ्गस्यालिङ्गमित्युक्तं सद्वास्तुरनिकरे ।
प्रवक्ष्यामि शिवे देवि । यो भक्तिभावेन नरः ।
सर्व्वाणि पापानि निर्दहेद्दग्धकल्मषः ।
मन्मना मन्नमस्कारो मामेव प्रतिपद्यते ॥"
इति वीरमित्रोदयधृतस्कन्दपुराणम् ।
द्रव्यविशेषेण पूजादिफलं यथा,—
"पञ्चपूतघृतैर्लिङ्गं स्नापितं मम मानवः ।
लक्षाश्वमेधानां फलमाप्नोति सत्तम ।
सुगन्धिचन्दनद्रव्यैर्लिङ्गमालिप्य भक्तितः ।
आलिप्यते सुरस्त्रीभिः सुमध्येयन्तमुद्दमे ॥"
इति तत्रैव ॥ ० ॥
लिङ्गपूजाया अकरणे दोषः तत्पूजाफलञ्च यथा,
"विना लिङ्गार्च्चनं यस्य काले गच्छति नित्यशः ।
महापापाभिभूतस्य दुर्गतस्य दुरात्मनः ।
इष्टं सर्व्वदानानि व्रतानि विविधानि च ।
तीर्थानि विमला यज्ञा लिङ्गाराधनवर्ज्जिनः ।

न लिङ्गाराधनादन्यत् पुरा वेदे चतुर्ष्वपि ।
विद्यते सर्वशास्त्राणामेष एव सुनिश्चितः ॥
भुक्तिमुक्तिप्रदं लिङ्गं विविधापन्निवारणम् ।
पूजयित्वा नरो नित्यं शिवसायुज्यमाप्नुयात् ॥
सर्वमन्यत् परित्यज्य क्रियाजालमशेषतः ।
भक्त्या परमया विद्वान् लिङ्गमेकं प्रपूजयेत् ॥"
इति स्कन्दपुराणम् ॥ * ॥
"अश्वमेधसहस्राणि वाजपेयशतानि च ।
महेशार्चनपुण्यस्य कलां नार्हन्ति षोडशीम् ॥"
इति मत्स्यसूक्ते १६ पटलः ॥
"मद्गुणान् कीर्त्तयेन चराचरमिदं जगत् ।
शिवलिङ्गं समभ्यर्च्य स्थितमत्र न संशयः ॥"
इति लिङ्गपुराणम् ॥ * ॥
"शिवस्य पूजनाद्देवि चतुर्वर्गाधिपो भवेत् ।
अष्टैश्वर्ययुतो मर्त्यः शम्भुनाथस्य पूजनात् ।
अथ नारायणेनोक्तं यदि शम्भुं प्रपूजयेत् ।
स्वर्गे मर्त्ये च पाताले ये देवाः संस्थिताः सदा ।
तेषां पूजा भवेद्देवि शम्भुनाथस्य पूजनात् ॥"
इति लिङ्गपुराणम् ॥ * ॥
"असारे खलु संसारे सारमेतच्चतुष्टयम् ।
काश्यां वासः सतां सङ्गो गङ्गाम्भः शम्भु-
पूजनम् ॥"
इति षट्कर्मदीपिकाधृतकालोत्तरे नारद
वाक्यम् ॥ * ॥
"अग्निहोत्रञ्च वेदाश्च यज्ञाश्च बहुदक्षिणाः ।
शिवलिङ्गार्चनस्यैते कोट्यंशेनापि ते समाः ॥
छित्त्वा भित्त्वा च भूतानि हत्वा सर्वमिदं
जगत् ।
यजेद्देवं विरूपाक्षं न स पापेन लिप्यते ॥
अनेकजन्मसाहस्रं भ्राम्यमाणश्च योनिषु ।
न समाप्नोति वै मुक्तिं विना लिङ्गार्चनं नरः ॥"
इति स्कन्दपुराणम् ॥ * ॥
"ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा प्रत्यनुलोमजः ।
पूजयेत् सततं लिङ्गं तत्तन्मन्त्रेण सादरम् ॥'
तत्तन्मन्त्रेणेति यथायोग्यं वैदिकतान्त्रिकनाम
मन्त्रैरित्यर्थः । इति वीरमित्रोदयधृतस्कन्द
पुराणम् ॥ * ॥
"मयि भक्ता तथा भक्ते विष्णुस्त्रिभुवनेश्वर ।
तदोपरि महादेव प्रभवाय सनातन ॥
लिङ्गवेदी महादेवी लिङ्गं साक्षान्महेश्वरः ।
तयोः प्रपूजनान्नित्यं देवी देवश्च पूजितौ ॥"
इति लिङ्गपुराणम् ॥ * ॥
अथ पारदशिवलिङ्गमाहात्म्यम् ।
"ज्योतिर्मयं महालिङ्गं कैलासशिखरे प्रिये ।
तस्यैव प्राकृतांशिकं काश्यां विश्वेश्वरः स्थितः ॥
पूर्णलिङ्गं महेशानि शिवलीनं न चान्यथा ।
शिलामध्ये यथा चक्रं लक्ष्मीनारायणं परम् ।
पारदस्य शताधिको लक्ष्मीनारायणो न हि ॥
पकारं विष्णुरूपञ्च आकारं कालिका स्वयम् ।
रेफं शिवं दकारञ्च ब्रह्मरूपं न चान्यथा ॥
पारदं परमेशानि ब्रह्मविष्णुशिवात्मकम् ।
यो यजेत् पारदं लिङ्गं स एव शम्भुरव्ययः ॥

आजन्ममध्ये यो देवि एकदा यदि पूजयेत् ।
स एव धन्यो देवेशि स ज्ञानी स च तत्त्ववित् ॥
स भक्तवेत्ता स धनी स दाता सर्वपूज्यते ।
अणिमादिविभूतीनामीश्वरः साधकोत्तमः ॥" * ॥
अथ पारदशिवलिङ्गनिर्म्माणविधिः ।
"पारदे शिवनिर्म्माणे नानाविघ्नं यतः प्रिये ।
अतएव महेशानि शान्तिस्वस्त्ययनं चरेत् ॥
पारदं शिववीजं हि ताडनं हि न कारयेत् ।
ताडनादितनाशः स्यात् आताडनाद्वित्तहीनता ।
ताडनादोषयुक्तस्य ताडनाच्च रणं भवेत् ॥"
इति मातृकाभेदतन्त्रे ८ पटलः ॥ * ॥
अथ शिवलिङ्गोत्पत्तिः ।
ब्रह्मोवाच ।
"पुरा त्वां चञ्चलं ज्ञात्वा त्वदग्रे न प्रकाशितम् ।
इदानीं योगिनं ज्ञात्वा कथयामि न संशयः ॥
अतिगुह्यमतिगुह्यमतिगुह्यं न संशयः ।
गोपितव्यं गोपितव्यं गोपितव्यं तथापि च ॥
शम्भुना गोपितं तत्त्वं तवाग्रे प्रकाशितम् ।
अद्य तत् कथयाम्यद्य सावधानोऽवधारय ॥
सनाद्या विविधाः सर्गा मया सृष्टा हि नारद ।
देवदानवदैत्याश्च गन्धर्व्वयक्षराक्षसाः ॥
सर्व्वे स्त्रीसङ्गताः सृष्टा मैथुनाज्जायते प्रजाः ।
केवलं हि शिवः शम्भुर्दारपरिग्रहवर्ज्जितः ॥
कदापि न मनश्चक्रे दृष्ट्वा चिन्तापराः सुराः ।
मामेव शरणं जग्मुः इन्द्रा देवासुरादयः ॥
प्रणिपत्य स्तुतिं कृत्वा उपतस्थुः समाहिताः ।
प्राहुः प्राञ्जलयः सर्व्वे भयाद्गद्गदभाषया ॥
देवा ऊचुः ।
पदाश्रिता वयं सर्व्वे भवानपि जनार्द्दनः ।
केवलं हि महादेवो दृढव्रतो जगत्पतिः ॥
विवाहे न मनश्चक्रे कथं वा मोक्ष्यते शिवः ।
उपायं चिन्तय विभो सदारः कथमीश्वरः ॥
येन स्याज्जगतां नाथस्तत् कुरुष्व दयानिधे ।
इति श्रुत्वा वचस्तेषां ततो ब्रह्मा प्रजापतिः ॥
सह तैर्वैकुण्ठं जगाम कमलासनः ।
उवाच तं जगन्नाथं विष्णुं कमललोचनम् ॥
ब्रह्मोवाच ।
सृष्टा मया सुरश्रेष्ठ मानुषा मैथुनोद्भवाः ।
सर्व्वे स्त्रैणा विना शम्भुं यत् कुरुष्व तच्च मे ॥
श्रीभगवानुवाच ।
शृणु वत्स महाबाहो गच्छामस्त्वं सदाशिवम् ।
कर्त्तव्यं चरितं तेन अनुज्ञातं यथाविधि ॥
किन्तु तद्योग्यनारीणां विवाहार्थं प्रकल्पय ।
ब्रह्मोवाच ।
इह गच्छामहे सर्व्वे अनुज्ञापय तं हरे ॥
आद्याशक्तिं महामायां प्रसाद्यस्व वै लघु ।
कन्या भूत्वा महाशम्भुं मोहयिष्यति शङ्करम् ॥
एवमुक्त्वा तु तौ सार्द्धं जग्मतुर्विधिकेशवौ ।
यत्र देवी महातेजाः शोभते कार्य्यमात्मनः ॥
उवाच दक्षं तद्युक्तं तपस्व प्रजापते ।
ब्रह्मा विष्णुश्च सर्व्वे ते तपसा तोषयेच्छिवाम् ॥
आविर्भूय सा देवी कालिका जगदीश्वरी ।

प्राह मां च किमर्थं तु यत्नकाङ्क्षाः सुरासुराः ॥
देव्युवाच ।
शीघ्रं वद यथाकामं मत्तः प्राप्स्यसे फलम् ।
अचिरात् सम्प्रदास्यामि सत्यं सत्यं न संशयः ॥
देवा ऊचुः ।
भूत्वा तु दक्षकन्या त्वं शङ्करं परिमोहय ।
अस्माकं वाञ्छितञ्चैतत् कुरु सिद्धिं सदा शिवे ॥
एतत् श्रुत्वा वचस्तेषां निरीक्ष्य कमलासनम् ।
उवाच विस्मयाविष्टा कालिका जगदीश्वरी ॥
देव्युवाच ।
शम्भुरज्ञानतो बालः किं मां सम्मोहयिष्यति ।
मम योग्यं पुमांसन्तु अन्यं वै परिकल्पय ॥
ब्रह्मोवाच ।
शम्भुः सर्व्वगुरुर्देवो ज्ञानार्कः परमेश्वरः ।
महाबलो महातेजाः स ते मोहं करिष्यति ॥
शम्भुतुल्यः पुमान्नास्ति कदाचिन्नपि कुत्रचित् ।
इत्युक्ता ब्रह्मणा देवी बाढमित्याह चेश्वरी ॥
इत्याह दक्षं दृष्ट्वा उवाच उच्यतां वरः ।
दक्षोऽपि दृष्ट्वा तां देवीं खड्गखर्प्परधरां पराम् ॥
खर्व्वां लम्बोदरीं व्याघ्रचर्म्मावृतकटिश्रोणीम् ।
नीलोत्पलकपालाढ्यकरयुग्मां वरप्रदाम् ॥
ततस्तवविधानेन भेजे दक्षः प्रजापतिः ॥
दक्ष उवाच ।
यदि मे वरदासि त्वं देवानामपि वाञ्छितम् ।
मदीयतनया भूत्वा शङ्करं किल मोहय ॥
तथेत्युक्त्वा जगद्धात्री अन्तर्द्धानं गता तदा ।
देवताश्च ततो गत्वा यत्र देवः स्थितो हरः ॥
अस्तौषुः परमात्मानमगुणं गुणमाश्रितम् ।
प्रहृष्टसुभक्त्या प्राञ्जलिः सम्भाषित ॥
देवा ऊचुः ।
भगवन् देवदेवेश लोकनाथ महाप्रभ ।
वयं सर्व्वे तु सस्त्रीकाः एतदर्थं परमेश्वर ॥
अतस्त्वं कुरु चोद्वाहं सदारस्त्वं यथा भवेः ।
दक्षगेहे महाकाली मायेति परिकीर्त्तिता ॥
जाता ते प्रीतये शम्भो सा ते योग्या न
संशयः ॥
ईश्वर उवाच ।
भवतां प्रीतये सम्यक् करिष्ये नात्र संशयः ।
उद्योगः क्रियतां शीघ्रं विवाहाय ममैव हि ॥
इत्युक्तास्तु सुराः सर्व्वे शङ्करेण महात्मना ।
कृतकृत्या गताः सर्व्वे भवनं सर्व्वसुन्दरम् ॥
दक्षाय कथयामास शङ्करोदितवचः ।
ततो विवाहं निर्व्वर्त्य कृतकृत्या यथा गताः ॥
गताः सर्व्वे महेशोऽपि सत्या सह तदा गृहम् ।
जगाम रेमे सत्या च चिरं निर्भरमानसः ॥
अथ काले कदाचित्तु सत्या सह महेश्वरः ।
रेमे न विदेत तोषं ययौ आत्माभवत्ततः ॥
उवाच दीनया वाचा देवदेवं जगद्गुरुम् ।
भगवन्नहि शक्नोमि तव भारं सहन्त्वहम् ॥
क्षमस्व मां महादेव कृपां कुरु जगत्पते ।
विमुच्य वचनं सत्या भगवान् वृषभध्वजः ॥
निर्भरं रमणं चक्रे सार्द्धं विह्वलमानसः ॥

तथा सम्पूजयमथ सती च व्यक्तमैथुना।
उत्थापाय मनश्चक्रे उभयोस्तेन उत्तमम्।
यथाम चरत्रोर्ध्वे तेषामखिलं जगत्॥
पाताले भूतले स्वर्गे शिवलिङ्गास्तदाभवन्।
तेन भूता भविष्याश्च शिवलिङ्गा यथोमय॥
यत्र लिङ्गं तत्र योनिर्यत्र योनिस्तत्र शिव।
उभयोश्चैव तेजोभिः शिवलिङ्गं समायत॥"
इति शिवलिङ्गोत्पत्तिकथनमिति नारदपञ्चरात्रागमेनद्वतीयरात्रे प्रथमाध्याये नारदब्रह्मसंवाद॥ ७॥ शिवलिङ्गपूजायां सर्व्वेषामधिकारो यथा —
"शाक्तो वा वैष्णवो वापि सौरो वा गाणपोऽथवा।
शिवार्च्चनविहीनस्य कुत सिद्धिर्भवेत् प्रिये॥
अनाराध्य च मां देवि योऽर्च्चयेद्देवतान्तरम्।
न गृह्णाति महादेवि शाप दत्त्वा व्रजेत् पुरम्।
पर्व्वतावधिं देवि सिद्धाप्रादि क्रमेण हि।
धनानि वस्तुधान्येव पुण्यान्येव यथाविधि॥
सुमेरुसदृश चात्र नानाविध महेश्वरी।
सप्तादिक महेशानि यत् स्यात् सागरोपमम्।
यद्दत्तं पुष्पनैवेद्य सर्व्वं विष्ठासमं भवत्।
शिवार्च्चनविहीनो य पूजयेद्देवतान्तरम्।
विशेषत कलियुगे स नर पापभाग्भवेत्॥"
इति उत्पत्तितन्त्रे ६४ पटल॥ ८॥
"सर्व्वपूजासु देवेशि! लिङ्गपूजापरं परम्।
लिङ्गपूजां विना देवि अन्यपूजां करोति य॥
विफला तस्य पूजा स्यादन्ते नरकमाप्नुयात्।
तस्माल्लिङ्गं महेशानि प्रथमं परिपूजयेत्॥
यद्गात्र लिङ्गपूजायां रहितं सततं प्रिये।
तद्गात्रं पतितं मन्ये विष्ठाभूमिसमं स्मृतम्॥
ब्रह्म विट् क्षत्त्रियो देवि यदि लिङ्गं न पूजयेत्।
ततक्षणात् परमेशानि चण्डालतामियु।
शूद्रश्च परमेशानि स वा शूकरवद्भवेत्॥
शिवार्च्चनन्तु देवेशि यस्मिन् गेहे विवर्ज्जितम्।
विष्ठागृहसमं देवि तद्गृहं विद्धि पार्व्वति।
यत्र विष्ठा पयो मूत्रं तस्मिन् वसति पार्व्वति॥
शाक्तो वा वैष्णवो वापि शैवो वा परमेश्वरि॥
आदौ लिङ्गं प्रपूज्याथ बिल्वपत्रैर्वरानने॥
पश्चादन्यं महेशानि! लिङ्गं प्राप्य प्रपूजयेत्।
अन्यथा मूत्रवत् सर्व्वं शिवपूजां विना प्रिये॥'
इति लिङ्गार्च्चनतन्त्रे १ पटल॥
उपक्रमोपसंहारादि। यथा। लिङ्गानि तु उपक्रमोपसंहाराभ्यासापूर्व्वताफलार्थवादोपपत्त्याख्यानि। तदुक्तम्।
"उपक्रमोपसंहारावभ्यासोऽपूर्व्वताफलम्।
अर्थवादोपपत्ती च लिङ्गं तात्पर्य्यनिर्णये॥"
तत्र प्रकरणप्रतिपाद्यस्यार्थस्य तदाद्यन्तयोरुपपादनम् उपक्रमोपसंहारौ। यथा छान्दोग्ये षष्ठे प्रपाठके। प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुन एकमेवाद्वितीयमित्यादौ ऐतदात्म्यमिदं सर्व्वमित्यन्ते च प्रतिपादनम्॥ १॥ प्रकरणप्रतिपाद्यस्य वस्तुन तन्मध्ये पौनःपुन्येन प्रतिपादनम् अभ्यास। यथा तत्रैवाद्वितीयवस्तुनो मध्ये तत्त्वमसीति नवकृत्व प्रतिपादनम्॥ २॥ प्रकरणप्रतिपाद्यस्य वस्तुन प्रमाणान्तरेणाविषयीकरणम् अपूर्व्वता। यथा। तत्रैवाद्वितीयवस्तुनो मानान्तराविषयीकरणम्॥ ३॥ फलन्तु। प्रकरणप्रतिपाद्यस्यात्मज्ञानस्य तदनुष्ठानस्य वा तत्र तत्र श्रूयमाणं प्रयोजनम्। यथा। तत्रैव आचार्य्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये इत्यद्वितीयवस्तुज्ञानस्य तत्प्राप्तिः प्रयोजनं श्रूयते॥ ४॥ प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनम् अर्थवाद। यथा तत्रैव उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्यद्वितीयवस्तुप्रशंसनम्॥ ५॥ प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रूयमाणा युक्ति उपपत्ति। यथा तत्र यथा सौम्यैकेन मृत्पिण्डेन सर्व्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्। इत्यादावद्वितीयवस्तुसाधने विकारस्य वाचारम्भणमात्रत्वे युक्ति श्रूयते॥ ६॥ इति श्रीपरमहंससदानन्दयोगीन्द्रविरचितवेदान्तसार॥ (पुराणविशेष। यथा, देवीभागवते। १। ३। ११।
"एकादशसहस्राणि लिङ्गाख्यं चातिविस्तृतम्॥
अस्त्राण्यष्टिवरयं पुराणमञ्दे दश्यम्॥ हेतु। यथा, तर्ककौमुद्याम्। 'लिङ्गज्ञानजन्यं लिङ्गिज्ञानमनुमिति॥' 'व्याप्यमानं लिङ्गन्तु करणं न हि।" इति भाषापरिच्छेदे॥ सूक्ष्मशरीरम्। यथा पञ्चदश्याम्। १। २१।
"बुद्धिकर्म्मेन्द्रियप्राणपञ्चकैर्मनसा धिया।
शरीरं सप्तदशभि सूक्ष्मं तल्लिङ्गमुच्यते॥")
लिङ्गक, पुं, (लिङ्गेन कायतीति। कै+क।) कपित्थवृक्ष। इति शब्दचन्द्रिका॥ (गुणादयोऽस्य कपित्थशब्दे विज्ञेया॥)
लिङ्गवर्द्धन, पुं (लिङ्गं वर्द्धयतीति। वृध+णिच+ल्यु।) कपित्थवृक्ष। इति शब्दचन्द्रिका। शिश्नवृद्धिकरणम्। तस्यौषधं यथा,—
"कटुतैलं भल्लातकं बृहतीफलदाडिमम्।
वल्कलै साधितं लिप्तं लिङ्गं तेन विवर्द्धते॥"
अपि च।
'कुष्माण्डमरीचानि तगरं मधुपिप्पली।
अपामार्गाश्वगन्धा च बृहती शितवर्णिका॥
यवाश्चित तैलपक्वं पादिकाङ्गेन शुभम्।
लिङ्गबाहुस्तनानाञ्च कर्णयोर्व्वृद्धिकृद्भवेत्॥"
इति गारुडे १८ अध्याय॥
लिङ्गवर्द्धिनी स्त्री, (लिङ्गं वर्द्धयति या। वृध+णिच+इनि। ङीप्।) अपामार्ग। इति शब्दचन्द्रिका॥
लिङ्गवृत्ति, पुं (लिङ्गमेव वृत्तिर्जीविकोपायो यस्य।) जीविकार्थजटादिचिह्नधारी। तत्पर्य्याय। धर्म्मध्वजी २। इत्यमर। २।७।५४॥
"जीविकार्थिमित्यत्र यो बिभर्त्ति जटादिकम्।
धर्म्मध्वजी लिङ्गवृत्तिरपि तत्र निगद्यते॥"
इति
लिङ्गालिका स्त्री सूक्ष्ममूषिका। तत्पर्य्याय। दीना २। इति हारावली। २१७॥
लिङ्गिनी स्त्री, (लिङ्गमस्त्यस्या इति। लिङ्ग+इनि।) लताविशेष। पचगुरिया इति हिन्दी भाषा। तत्पर्य्याय। बहुपत्री २ ईश्वरी ३ शिवबल्लिका ४ स्वयम्भू ५ लिङ्गसम्भूता ६ लैङ्गी ७ चित्रफला ८ अमृता ९ लिङ्गा १० देवी ११ चण्डा १२ कामदामिनी १३ शिवजा १४ शिववल्ली १५। अस्या गुणा। कटुत्वम्। उष्णत्वम्। दुर्गन्धत्वम्। रसायनत्वम्। सर्व्वसिद्धिकरत्वम्। दिव्यत्वम्। वश्यत्वम्। रसनियामकत्वञ्च। इति राजनिर्घण्ट॥ (वल्कलादिलिङ्गधारिणी। यथा, सुश्रुते। ४। ७४।
'लिङ्गिनीं गुरुपत्नीञ्च सगोत्रामथ पर्व्वसु।
वृद्धाञ्च सन्ध्ययोश्चापि गच्छतो जीवितक्षय॥")
लिङ्गी [न्], पुं, (लिङ्गमस्त्यस्येति। इनि।) हस्ती। इति जटाधर॥ त्रि धर्म्मध्वजी। यथा —
'अलिङ्गी लिङ्गवेशेन यो लिङ्गमुपजीवति।
स लिङ्गिनां हरेदेनस्तिर्य्यग्योनौ च गच्छति॥"
इति कौर्म्मे उपविभागे १५ अध्याय॥
(वानप्रस्थ। इति श्रीधरस्वामी॥ यथा, भागवते। ४। २८। ६५।
"तेनास्य तादृश राजन् लिङ्गिनो देहसम्भवम्।
श्रद्धत्स्वानुभूतोऽर्थो न मन स्प्रष्टुमिच्छति॥")
लिप, लि श्री श प भ लेप। इति कविकल्पद्रुम॥ (तुदा उभ सक अनिट्।) लि लिम्पोऽस्ति। श्री, लेपा। श प भ लिम्पति लिम्पते चन्दनेन गात्रं सुखी। इति दुर्गादास॥
लिप, पुं (लिम्पतीति। लिप+क।) लेपनकर्त्ता। इति लिपधातो कर्त्तरि कप्रत्ययेन निष्पन्नम्॥
लिपि स्त्री, (लिप+"इगुपधात् कित्।" उणा ४। ११८। इति इन्। स च कित्।) लिखितवर्णम्। तत्पर्य्याय। लिखितम् २ अक्षरसंस्थानम् ३ लिवि ४। इत्यमर॥ लिखनम् ५ अक्षनम् ६ अक्षरविन्यास ७ लिपी ८ लिवी ९। इति तट्टीका॥ अक्षररचना १०। इति जटाधर॥ लिपिका ११। इति शब्दरत्नावली॥ (यथा नैषधे। १। १५।
"अथ दरिद्रो भवितेति वैधसीं
लिपिं ललाटेऽर्थिजनस्य जाग्रतीम्।
मृषा न चक्रेऽल्पितकल्पपादप
प्रणीय दारिद्र्यदरिद्रतां नृप॥"
अस्या पञ्चविधत्वं यथा, वाराहीतन्त्रे।
"मुद्रालिपि शिल्पलिपिर्लिपिर्लेखनिसम्भवा।
गुण्डिकाघुणसम्भूता लिपय पञ्चधा स्मृता॥")
लिखितपुस्तकादि। इति केचिदिति भरत॥
लिपिकर, पुं (लिपिं करोतीति। लिपि+कृ+"दिवाविभानिशेति।" ३। २। २१। इति ट।) लेखक। इत्यमरटीका॥

लिपिका, स्त्री, (लिपिरेव। लिपि+स्वार्थे कन्। टाप्।) लिपिः। इति शब्दरत्नावली॥

लिपिकार, पुं, (लिपिं करोतीति। कृ+अण्।) लेखकः। इत्यमरः। २। ८। १६॥

लिपी, स्त्री, (लिपि। कृदिकारादिति ङीष्।) लिपिः। इति शब्दरत्नावली॥

लिप्त त्रि, (लिप+क्त।) अञ्चितम्। कृतलेपनम्। तत्पर्य्यायः। दिग्धम् २। इत्यमरः॥ विलिम्पितम् ३। इति शब्दरत्नावली॥ चर्च्चितम् ४। इति जटाधरः॥ (यथा, कथासरित्सागरे। ४। ४८।

"तल्लिप्ताखिलगात्राश्च चत्वारो विहिता मया।")

मिलितम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ विषदिग्धम्। इति मेदिनी। ते, ५२॥

लिप्तक, पुं, (लिप्त एव। स्वार्थे कन्।) विषाक्तबाणः। इत्यमरः। २। ८। ८८॥

लिप्तिका, स्त्री, (लिप्तैव। स्वार्थे कन्।) एकः। यथा। वैम्बस्य चतुर्थोंऽश अवयवी लिप्तिका चतुष्क अभिधेयः। इति वतुष्कमसुसङ्कलावली॥

लिप्सा स्त्री (लब्धुमिच्छा। लभ+सन्+अ। टाप्।) इच्छा। इत्यमरः॥ (यथा, हरिवंशे। ६८। २६।

"लिप्सां चक्रे प्रविशतु मथिरत्ने स्यमन्तके।
गोविन्दो न च तं लेभे शक्तोऽपि न जहार च॥")

लिप्सु, त्रि (लभ+सन्+उ।) लब्धुमिच्छुः। तत्पर्य्यायः। गृध्नु १ गर्द्धनः २ लुब्धकः ३ लुब्ध ४ अभिलाषुकः ५ लोलुपः ६ लोलुभः ७। इति हेमचन्द्रः। (यथा, कथासरित्सागरे। ५४। ११८।

"सोऽप्युपायकलोभात्तु बहुधी कल्पितायति।
उपसर्गान्न विधुनामिक द्राक्षयोभयम्॥")

लि(लि)बि स्त्री, (लिप्+इन्। बाहुलकात् पस्य बत्वम्।) लिपिः। इत्यमरः॥

लिबि(बि)कार, पुं, (लिबिं करोतीति। कृ+ "दिवाविभानिशेति।" ३। २। २१। इति ट।) लिपिकारः। लिपिं करोति इत्यर्थे चकृट इत्यनेन कर्त्तरि टप्रत्ययेन निष्पन्नः॥

लिबि(बि)कर, पुं (लिबिं करोतीति। कृ+ट। पृषोदरादित्वात् द्वितीयाया अलुक्।) लिपिकारः। इत्यमरटीकायां भानुदीक्षितः॥

लिबी, स्त्री, (लिबि+कृदिकारादिति ङीष्।) लिपिः। इति शब्दरत्नावली॥

लिम्प, पुं, (लिम्पतीति। लिम्प+"अनुपसर्गात् लिम्पविन्देति।" ३। १। १३८। इति श।) लेपकर्त्ता। इति लिम्पधातोः कर्त्तरि शप्रत्ययनिष्पन्नम्। इति मुग्धबोधव्याकरणम्॥

लिम्पट, पुं, विटम्। इति हारावली। १६२॥

लिम्पाक, स्त्री, निम्बकविशेषः। पातिनेबु इति भाषा। तस्य गुणाः। सुरभित्वम्। स्वादुत्वम्। वातश्लेष्मनाशित्वम्। भक्तरोचनत्वम्। वातश्लेष्महर-त्वम्। कृमिघ्नत्वम्। हृदिक्तत्वम्। नातिपित्तकरत्वम्। इति राजवल्लभः॥ (यथा च।

"कर्षे मुद्ग कृत तात्र लिम्पाकाद्रितचो पलम्॥"

इति रविगुप्तसारसंग्रहे मौद्गिकपलादिलोहे।)

लिम्पाक, पुं जम्बीरः। खरः। इति शब्दरत्नावली॥

लिश, इ य श्ली सौक्ष्म्ये। इति कविकल्पद्रुमः॥ (दिवा आत्म० अक० अनिट्।) सौक्ष्म्य-मल्पीभावः। इ य, लिश्यते धनं कार्श्ये। श्ली, लेष्टा। इति दुर्गादासः॥

लिश, श श्ली गत्याम्। इति कविकल्पद्रुमः॥ (तुदा० पर० सक० अनिट्।) लिशति। श्ली, अलिक्षत् लेष्टा। इति दुर्गादासः॥

लिम्ब, पुं, नर्त्तकः। लम्बधातोः कर्त्तरि अनुप्रत्ययेन निपातनात् सिद्धः। उपधाया इत्वमपि। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः। १।१५३। (लङ्घ इति पाठः साधुः।)

लिह, ल ज श्ली स्वादे। इति कविकल्पद्रुमः॥ (अदा० उभ० सक० अनिट्।) ल ज, लेढि पुष्पाणि षट्पदः। लीढे। श्ली, अलिक्षत्। इति दुर्गादासः॥

ली, जि द्रावणे। इति कविकल्पद्रुमः॥ (चुरा० पर० सक० अनिट्।) द्रावणं द्रवीकरणम्। जि, लाययति लयति। विल्ये घृतकाविति लापयति लोहमयो कर्म्मकारः। स्नेहद्रवे तु लाल्योर्लीनप्रलयाविति लयो घृतमयी लीनयत्यपि। इति दुर्गादासः॥

ली शि श्लिषि। इति कविकल्पद्रुमः॥ (क्र्या-पर० अक० अनिट्।) शि लिनाति बाला लावण्यं प्राप्नोतीत्यर्थः। कम्पावित्यन्ये लिनाति जलधौ नदी। लीन लीनि। अयं अन्त अातलीयादिः। इति दुर्गादासः॥

ली, ङ य श्ली श्लिषि। इति कविकल्पद्रुमः॥ (दिवा आत्म० अक० अनिट्।) ङ य लीयते चन्द्रः स्वर्ये। श्लो, लीन। इति दुर्गादासः॥

लीका, स्त्री, लिक्षा। इति शब्दरत्नावली॥

लीक्षा, स्त्री, लिक्षा। इति शब्दरत्नावली॥

लीढ, त्रि, आस्वादितः। इति लिहधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नः॥ (यथा, श्रीकण्ठ चरिते। १। ५१।

"या शुद्धमेऽस्तु शिवमात्मनलावणिर्यी
भक्ता मदीयवचसोद्गलनाटघण्टा॥")

लीन, त्रि, (ली+क्त। "ल्वादिभ्यः।" ८। २। ४४। इति निष्ठातस्य नः।) अधपातः। स्थितः। इति व्याकरणम्॥ अपि च।

"दिवाकराद्रक्षति यो गुहासु
लीनं दिवाभीतमिवान्धकारम्।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने
ममत्वमुच्चैःशिरसामतीव॥"

इति कुमारसम्भवे। १। १२॥

लीला, स्त्री (लयनमिति। ली+सम्पदादित्वात् क्विप्। लियं लातीति। ला+क।) केलिः। विलासः। शृङ्गारभावचेष्टा। इति मेदिनी। ले, ४०॥ खेला। इति विश्वः॥ (यथा, भागवते। १। १। १८।

"अथाख्याहि हरेर्धीमन्नवतारकथाः शुभाः।
लीला विदधतः स्वैरमीश्वरस्यात्ममायया॥")

अलब्धप्रियसमागमया खचित्तविनोदार्थं प्रियस्य या वेशगतिहसितवचितभणितैरनुकृति क्रियते सा लीला। यथा च।

"अप्राप्तवल्लभसमागमनायिकाया
सख्याः पुरोऽत्र निजचित्तविनोदबुद्धा।
आलापवेशगतिहास्यविलोकनाद्यैः
प्राणेश्वरानुकृतिमाकलयन्ति लीलाम्॥" इति।

प्रियानुकरणं लीला। यथा वनोद्दिश यदृति याति तथा तथाखाविष्कारोऽन्योऽपि। ली ङ य श्ली श्लिषि लाम्बीति लक लीला। इत्यमर टीकायां भरतः॥ *॥ सा प्रकटाप्रकटभेदेन द्विविधा यथा,—

"प्रकटाप्रकटा चेति लीला सेयं द्विधोच्यते।"

इति पद्मपुराणम्॥

तथा हि।

"यदा कृष्णः प्रकाशे स्वैर्लीलामिव च दीव्यति।
तदेकेन प्रकाशेन कम्पाविष्यमदन्तरे।
तत्रैव स्वपरीवारैर्लीलादि कुरुते हरिः।
तत्तद्भावानुसारेण लीलाख्या शक्तिरेव सा।
तेषां परिकराणाञ्च तं तं भावं विभावयेत्।
प्रपञ्चगोचरत्वेन सा लीला प्रकटा स्मृता।
अन्यास्त्वप्रकटा भान्ति तादृशास्तदगोचराः।
तत्र प्रकटलीलायामेव स्यातां गमागमौ।
गोकुले मथुरायाञ्च द्वारकायाञ्च शार्ङ्गिणः।
याश्चान्यास्तत्र तत्रैव सन्ति ताः॥"

इति श्रीभागवतामृतम्॥

लीलावती, स्त्री, (लीलाऽस्त्यस्या इति। लीला+मतुप्। मस्य व।) केलियुक्ता। विलासवती। शृङ्गारभावचेष्टान्विता। खेलाविशिष्टा। इति लीलाशब्दात्यदर्शनात्॥ *॥ भास्कराचार्य्यस्य पत्नी। तद्दुहिताप्यन्य। यथा। गोदावरीतीर निवासिनी महाराष्ट्रदेशीयस्य श्रीभास्कराचार्य्यस्य पत्न्यकर्त्तुं सन्न्याः लीलावती विरह विनिवारणाय तां सम्बोधयन्त्या लीला वतीमिव। इति लीलावतीग्रन्थस्य मङ्गला चरणश्लोकस्य टीकायां भेदः॥ *॥ (अपि च स्त्रीविशेषः। यथा, मार्कण्डेये। १२६। १७।

"लीलावती वीरसुता वीरभद्रसुताविभा॥")

वेश्याविशेषः। यथा,—

"अभिरूपेण सम्प्राप्य चकुपिता पिता भृशम्।
धर्म्मकार्य्यमिति ज्ञात्वा न ददाति कथञ्चन।
योऽसौ सुवर्णकारस्य हरिमोऽपि च वत्सलात्।
न स्वभावादविप्रात् सभार्यं समुपागतः।
यत्रात्मपरितुष्टात् स्वाद्युतपरम्॥"

इति मत्स्यपुराणे लीलावतीवेश्यायाः कन्याकथ-नामे प्रीमतवरवचनं यथाविषयवर्णनम्।

इति तिथ्यादितत्त्वम् ॥ ७ ॥ न्यायग्रन्थविशेषः । तस्य द्वितीयश्लोको यथा,—
"अथ शाक्यमुनिरन्यतो गुणगणं कर्म्माधिकं श्लाघते
जातिर्यद्युतिभागता न च पुनः श्लाघ्या विशेषक्षितिः ।
सत्यञ्च यत्नो गुणादिभिरयं यस्मात्तु यत् प्रीतये
तस्मौला नयवेदकर्म्मकुशला श्रीन्यायलीला कृती ॥"
इति मल्लनमिश्रः ।

लीलोद्यानं, क्ली, (लीलायाः उद्यानम् ।) देववनम् । इति त्रिकाण्डशेषः ॥ (यथा, कथासरित्सागरे । १८ । ४१ ।
"अथ मानससुस्नातो देवीबालासेवितम् ।
अतीव रम्यमेतच्च लीलोद्यानं सुशोभितम् ॥")

लुक [च] पुं, लोपः । यथा । स्यमोर्लुक् क्लीबात् परयोः स्यमोर्लुक् स्यात् । इति मुग्धबोधव्याकरणम् ॥

लुकायित त्रि, (लुक कायस्य यस्य तादृश इवाचरतीति । लुकाय + क्विप् । ततः क्तः ।) अन्तर्हितः । यथा । अन्तर्धाने लुकायनमिति यावत् । यथा गुरोरन्तर्हिते शिशुः निलीयते अन्तर्धीयते लुकायते लुकायतीति लुकापनयने ऽपि लुक । लुक काय शरीरं यस्य स लुकायः तत् स इवाचरतीति क्वौ साध्यम् । इति कारकटीकायां दुर्गादासः । कर्म्मणि क्तप्रत्ययेन निष्पन्नोऽयम् ॥

लुङ्ग, पुं, छोलङ्ग । इति रत्नमाला ॥

लुज, इ क भासार्थे । इति कविकल्पद्रुमः । (चुरा० पर० अक० सक० च सेट् ।) इ क, लुञ्जयति । भा दीप्तिः । सकार्थो निकेतनमिह वा बलदानादि । इति दुर्गादासः ॥

लुञ्च अपनयने । इति कविकल्पद्रुमः । (भ्वा० पर० सक० सेट् ।) योऽलुञ्चीत् कर्म्मादिकम् । इति दुर्गादासः ॥

लुट, विलोटविलोडनयोः । इति कविकल्पद्रुमः । (भ्वा० पर० विलोटे अक० विलोडने सक० सेट् ।) लोटति । इति दुर्गादासः ॥

लुट इ चुरौ । इति कविकल्पद्रुमः । (भ्वा० पर० सक० सेट् ।) इ, लुण्टति । चुरिश्चौर्य्यम् । इति दुर्गादासः ॥

लुट, ष ङ य विलोटविलोडनयोः । इति कविकल्पद्रुमः । (दिवा० पर० विलोटे अक० विलोडने सक० सेट् ।) ष अलुटत् । ङ, अलुलुटत् अलुलोटत् । य, लुट्यति । विलोटः सम्बन्धो भावः । तत्र लुट्यन् भस्मोघो भुवि रोदसामि । इति भट्टिः । विलोडने लुट्यन्मृगारामान् दुर्गान् बलादामि च लोटति । इति रमानाथः । इति दुर्गादासः ॥

लुट, ष ङ दीप्तिप्रतिघातौ । इति कविकल्पद्रुमः । (भ्वा० आत्म० अक० प्रतिघाते सक० सेट् ।) ष, अलुटत् । ङ लोटते । प्रतिहति श्लोकादिना पतनं पुनरुत्थानं वा । इति दुर्गादासः ॥

लुट, क भासि । इति कविकल्पद्रुमः । (चुरा० पर० अक० सेट् ।) क, लोटयति । भासो दीप्तिः । इति दुर्गादासः ॥

लुठ, उपघाते । इति कविकल्पद्रुमः । (भ्वा० पर० सक० सेट् ।) लोठति । इति दुर्गादासः ॥

लुठ इ गत्यालस्यस्तेयलोटे । इति कविकल्पद्रुमः । (भ्वा० पर० सक० अक० च सेट् ।) इ, लुण्ठति । आलस्यं मन्दीभावः । स्तेयं चौर्य्यम् । लोटः लोठनम् । इति दुर्गादासः ॥

लुठ, ष ङ प्रतीघाते । इति कविकल्पद्रुमः । (भ्वा०-आत्म० सक० सेट् ।) ष, अलुठत् । ङ, लोठते । इति दुर्गादासः ॥

लुठ, क चौर्य्ये । इति कविकल्पद्रुमः । (चुरा० पर० सक० सेट् ।) क, लोठयति । इति दुर्गादासः ॥

लुठ, शि लोटे । इति कविकल्पद्रुमः । (तुदा० पर० अक० सेट् ।) शि, लुठति अलुठीत् लुलोठ । लोटः सम्बन्धीभावः । वारोऽत्र हरिवाणीयां लुठति समन्तके । इति दुर्गादासः ॥

लुठनं, क्ली, (लुठ लोटे + ल्युट् ।) अश्वस्य भूमौ पुनः पुनः अङ्गपरिवर्त्तनम् । लोटा इति गडागडि इति च भाषा । तत्पर्य्यायः । वेल्लनम् २ । इति त्रिकाण्डशेषः ॥

लुठित त्रि (लुठ + क्तः ।) तद्भूमिपरावृत्तः । श्रमशान्त्यर्थं पुनः पुनर्भूमौ लुठितोऽश्वः । तत्पर्य्यायः । उपावृत्तः २ । इत्यमरभरतौ । वेल्लितः ३ । इति शब्दरत्नावली ॥ उपावृत्तः ४ परावृत्तः ५ । इति हेमचन्द्रः ॥ (यथा, कथासरित्सागरे । १०२ । ७७ ।
"प्रवालकलापो लुठितः किमप्यग्नशिरोरयम् ।
विद्युताकालकल्पान्तमेघौघः पतितो भुवि ॥")

लुड, मन्थे । इति कविकल्पद्रुमः । (भ्वा० पर० सक० सेट् ।) लोडति । मन्थो विलोडनम् । इति दुर्गादासः ॥

लुड, शि संवृतौ । क्षेपे । इति कविकल्पद्रुमः । (तुदा० पर० सक० सेट् ।) शि, लुडति अलुडीत् लुलोड । इति दुर्गादासः ॥

लुण्ट, कि अवज्ञाचौर्य्ये । इति कविकल्पद्रुमः । (चुरा० पक्षे भ्वा० पर० सक० सेट् ।) एतस्य वकारप्रकृतिः टवर्गान्त्यैक । तेन भादिमत्वे पवादौ तत्रापि लुण्ट इत्यादि । कि, लुण्टयति लुण्टति । इति दुर्गादासः ॥

लुण्टक पुं, (लुण्टतीति । लुण्ट + ण्वुल् ।) चौरविशेषः । डका इति भाषा । तत्पर्य्यायः । भावकः २ । इति शब्दचन्द्रिका ॥

लुण्टा स्त्री, (लुण्ट + अङ् । टाप् ।) लुठनम् । इति कश्चित् शब्दरत्नावली ॥

लुण्टाक, पुं, (लुण्टतीति । लुण्ट + "जल्पभिक्षकुट्टलुण्टवृङः षाकन् ।" ३ । २ । १५५ । इति षाकन् ।) चौरः । लुटधातोः षाकप्रत्ययेन निष्पन्नः ।

लुण्टाकी, स्त्री, (लुण्टाक + स्त्रियां ङीप् ।) चौरा स्त्री । इति मुग्धबोधव्याकरणम् ॥

लुण्ठक, त्रि (लुण्ठतीति । लुण्ठ + ण्वुल् ।) स्तेयकारकः । लुटेरा इति भाषा । यथा,—
"ये चौरा वञ्चिता दृष्टा गरदा ग्रामलुण्ठकाः ।
सारमेयादने ते वै पात्यन्ते पातकान्विताः ॥"
इति पाद्मे पातालखण्डम् ॥

लुण्ठनं, क्ली, (लुण्ठ + ल्युट् ।) लुठनम् । इति कश्चित् शब्दरत्नावली ॥ (यथा, देवीभागवते । ५ । १ । १८ ।
"करस्य लुण्ठनं तद्वत् तत्पत्नीनां नराधिप ॥")

लुण्ठा, स्त्री, (लुण्ठ + अङ् । स्त्रियां टाप् ।) लुठनम् । इति कश्चित् शब्दरत्नावली ॥

लुण्ठाक, पुं, (लुण्ठ + षाकन् ।) काकः । इति त्रिकाण्डशेषः ॥ (चौरः । यथा, कथाविशांधे । १ । १ ।
"विप्रोऽभिसारिकाणां भवनगवाक्षाटिकप्रभानिकरः ।
यत्र विराजति रजनीतिमिरपटप्रकटलुण्ठाकः ॥")

लुण्ठी, स्त्री, लुठनम् । इति कश्चित् शब्दरत्नावली ॥

लुण्ड, क चौर्य्ये । इति कविकल्पद्रुमः ॥ (चुरा० पर० सक० सेट् ।) क, लुण्डयति । इति दुर्गादासः ॥

लुण्डिका, स्त्री (लुण्डी । स्वार्थे कन् । ततष्टाप् ।) आयशारिकी । इति शारदावली । एकत्र वेष्टितमेघलोमादि । लुण्डि इति लुटि इति च भाषा । यथा,—
"लोष्टश्च शलाभ्याल तामभावकमातपे ।
प्रत्यग्रक्षया दृष्ट्वा तत्सम्भव समाहरेत् ॥"
तामभावके वृतं लोष्टं दत्त्वा रौद्रे तत्र स्थाप्य मेघलोमलुण्डिकया दृष्ट्वा समवाय भस्म तेन समाहरेत् । इति भैषज्यरत्नावली ॥

लुण्डी, स्त्री, आयशारिकी । इति त्रिकाण्डशेषः ॥

लुथ, इ क्लेशे । इति कविकल्पद्रुमः । (भ्वा० पर० अक० सेट् ।) इ लुन्थते । क्लेशो दुःखी । इति दुर्गादासः ॥

लुप, ल इ प श न औ छेदे । इति कविकल्पद्रुमः । (तुदा० उभ० सक० अनिट् ।) ल, अलुपत् अलुप्त । इ प न, लुम्पति लुम्पते । स, अलुपत् । औ लोप्ता । इति दुर्गादासः ॥

लुप, इर य लुपि । इति कविकल्पद्रुमः । (दिवा० पर० सक० सेट् ।) इर, अलुपत् अलोपीत् । अस्मात् पुषादित्वादङ्ग इत्यन्ये । य, लुप्यति । लुपि आकुलीभावः । मातुः लुप्यति बालकं भैषज्यनिवृत्तैः । इति रमानाथः । इति दुर्गादासः ॥

लुप्, पुं, (लुप् छेदे + क्विप् ।) लोपः । यथा । अभोभगोऽघोभ्योऽवे लुप् । इति मुग्धबोधव्याकरणम् ॥

लुप्त, त्रि, (लुप्+क्त ।) चौर्य्यधनम् । लोप्त इति ख्यातम् । इति शब्दरत्नावली । लोपयति, त्रि । यथा,—
"चन्दुमानिति लुप्ताढ्यं चाश्चाल्लं ग्राह्ययीति च ।
प्रथमा निष्क्रम इषात् परधान विनिमयते ।"
इति तिथ्यादितत्त्वम् ॥
(यथा च आर्य्यासप्तशत्याम् । ४६२ ।
"परिहरतामपि लुप्तमिवलि स्थामन्तमाय मलमानि ।
बद्धभ्रमलमधवरेस वध्वर्मे पुरमायित सहते ।")
लुब, क्षि द आहने । इति कविकल्पद्रुमः । (चुरा पक्षे भ्वा परं॰ सकं॰ सेट् ।) क्षि, लुभयति लुबति । द, लुभाते । आहन वध । इति दुर्गादासः ॥
लुब्ध पुं, (लुभ+गत्यर्थेति क्तः ।) व्याधः । (यथा, महाभारते । १६ । ४ । २१ ।
"स संनिरुद्धेन्द्रियवाङ्मनास्तु
शिश्ये महायोगमुपेत्य कृष्णः ।
जराथ तं देशमुपाजगाम
लुब्धस्तदानीं मृगलिप्सुरुग्रः ।")
लम्पटः । इति शब्दरत्नावली ॥
लुब्ध, त्रि, (लुभ+क्त ।) आकाङ्क्षी । इति मेदिनी । धे, १४ । तत्पर्य्यायः । गृध्नुः २ । गर्द्धनः ३ अभिलाषुकः ४ तृष्णकः ५ । इत्यमरः । (यथा, कथासरित्सागरे । ५५ । ६ ।
"लुब्धो यद्यपि सर्वस्य भीतः पापाद् भवन् ।
स्वस्य परापवादेषु मम प्राण्येषु योऽभवत् ।")
लुब्धक, पुं (लुब्ध एव । स्वार्थे कन् ।) व्याधः । इत्यमरः । (यथा कथासरित्सागरे । ८ । २७ ।
'आसाकमीदृशः सोऽथ दन्ती लुब्धक इति ।")
लम्पटः । इति लुब्धशब्दादप्यनात् ॥ (मायुः । यथा भागवते । ४ । २५ । ५३ ।
"दिक्कालिनाम पश्चाद्द्वारेणया याति पुरञ्जन ।
वैशस नाम विषयं लुब्धकेन समन्वितः ।')
लुभ य इर् गार्द्ध्ये । इति कविकल्पद्रुमः ॥ (दिवा पर सक -सेट् ।) गाध्यमाकाङ्क्षा । य लुभ्यति धनं लुब्ध । इर, अलुभत् अलोभीत् । आद्यात् पुषादित्वात् नित्यं ङ इत्यन्ये । इति दुर्गादासः ॥
लुभ, श विमोहने । इति कविकल्पद्रुमः ॥ (तुदा पर सक -सेट् ।) श, लुभत्यालसि कार्ये च । इति हलायुधः । लोभिता लोब्धा । इति दुर्गादासः ॥ [लुपशब्देन निष्पन्न ॥
लुभित त्रि, विमोहित । विमोहनार्थलुभधातोः
लुल विमर्द्दे । इति कविकल्पद्रुमः ॥ (भ्वा पर सक सेट् ।) चौरधातुरयम् । लुलाप । इति दुर्गादासः ॥
लुलाप पुं (लुल्यते इति । लुल विमर्द्दे+भिन्न त्वात् अट । लुलं आप्नोतीति । आप+अच ।) महिषः । इत्यमरः ॥ (यथा, दुर्गा-भक्तितरङ्गिण्याम् ।
"लुलाप खड्गेन छिन्धि छिन्धि ।")
(तथास्य पर्य्यायः ।
"महिषो घोटकारिः स्यात्कासरश्च रज स्वलः ।
यौलदुञ्च सश्वकायो लुलापो यमवाहनः ।"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ।)
लुलापकन्द, पुं, (लुलापप्रियः कन्दः ।) महिष कन्दः । इति राजनिर्घण्टः ॥
लुलापकान्ता, स्त्री, (लुलापस्य कान्ता ।) महिषी । इति राजनिर्घण्टः ॥
लुलित त्रि, (लुल+क्त ।) आन्दोलितः । यथा
'प्रेङ्खोलितस्तरलितो लुलितान्दोलितावपि ।"
इति भूरिप्रयोगः ॥
(यथा, कथासरित्सागरे । १० । ७ ।
"हत्वा रथाश्वांश्छित्त्वेद शिरो लुलितकुण्डलम् ।"
विलोलितं । इति श्रीधरः ॥ यथा भागवते । १ । ८ । ३८ ।
"युधि तुरगरजो विधूम्रविष्वक्
कचलुलितश्रमवार्य्यलङ्कृतास्ये ।"
श्रान्तः । यथा, रामायणे । २ । ६५ । १८ ।
"न च विभ्राजते देवी शोकाश्रुलुलितानना ।"
म्लानः । यथा, आर्य्यासप्तशत्याम् ।
"प्रातर्निद्राति यथा यथा लुलितापि सखी रजन्यां ।
आमोदयति प्रभितमनायासा तथा वान्ता मधुः ।"
उन्मूलितः । यथा, भागवते । ३ । १८ । २४ ।
"विशीर्णबाह्वङ्घ्रिशिरोरुहोऽपतद्
यथा नगेन्द्रो लुलितो नभस्वता ।"
खण्डितः । यथा, तत्रैव । ४ । ६ । १० ।
"किमत्रकाधिलुलितात् पततो विमानात् ।"
विक्षिप्तः । यथा, तत्रैव । ७ । ८ । २१ ।
"योऽघात्पुलिनु कुपितस्यापविजृम्भितस्य
विस्फूर्जितेन लुलिताः स तु ते निरस्तः ।")
लुष स्तेये । इति कविकल्पद्रुमः ॥ (भ्वा पर सक सेट् ।) लोषति । इति दुर्गादासः ॥
लुष हिंसने । इति कविकल्पद्रुमः ॥ (भ्वा पर॰ सक सेट् ।) चौरधातुरयम् । लुष्यः । इति दुर्गादासः ॥
लुशभ, पुं, (रोषतीति । रुष हिंसायाम्+"वृषादिभ्यश्च ।" उणा ३ । १२४ । इति अभच् । लुषादेशश्च धातोः ।) मत्तहस्ती । इत्युणादिकोषः ॥
लुह, औ गार्द्ध्ये । इति कविकल्पद्रुमः ॥ (भ्वा पर॰ सक अनिट् ।) औ अलुक्षत । गार्द्ध्यं अभिलाषा । लोहति धनं लोकः । इति दुर्गादासः ॥
लू, ञ ति छिदि । इति कविकल्पद्रुमः ॥ (क्र्या उभ॰-सक अनिट् ।) ञ ति लुनाति लुनीते । लूनः लूनिः । इति दुर्गादासः ॥
लूता स्त्री (लूनातीति । लू+बाहुलकात् तन् । गुणाभावश्च ।) कीटविशेषः । माकडसा इति भाषा । तत्पर्य्यायः । तन्तुवायः २ ऊर्णनाभः ३ मर्कटकः ४ । इत्यमरः ॥ मर्कटः ५ लूतिका ६ जालनाभि ७ प्लवगः ८ तन्तुवायः ९ । इति शब्दरत्नावली ॥ (यथा, आर्य्यासप्तशत्याम् । ५४ ।
"लूतातन्तुविनद्धद्वारं शून्यालयं यशस्त्वम् ।
यमिके वसिमण्डपिहितसूनो रोहिणीव वनिते ।")
पिपीलिका । रोगविशेषः । इति मेदिनी । ते, ५२ ॥ शेषस्य पर्य्यायः । मन्थरः २ इन्द्रा ३ । इति राजनिर्घण्टः ॥ तद्रोगस्य निदानादि लूतानां चतुर्विंशत्युत्पत्तिश्चाह ।
"विश्वामित्रनृपश्रेष्ठ प्रसादेनावलोक्य ।
तेभ्यो जाताश्च लूता इति ख्याताश्च षोडश ।"
अथ लक्षणं ।
"विश्वामित्रो नृपवरं वशिष्ठविमानम् ।
वसिष्ठ कोपयमाश मायाश्रमपदं किल ।
कुपितस्य मुनेस्तस्य ललाटे स्वेदबिन्दवः ।
अपतन् दर्शनादेव वसिष्ठस्य महात्मनः ।
लूने तृणे महर्षेस्तु धेन्वर्थं सम्भृतेऽपि च ।
ततो जातास्त्विमा घोरा नानारूपा महा विषाः ।
तासामष्टौ कष्टसाध्या वर्ज्यास्ताश्च इव हि ।"
तत्र कष्टसाध्याश्चाह तासामष्टौ कष्टसाध्या । तासां साध्या अतो दशलक्षणमाह ।
"त्रिमण्डला श्वेता कपिला पीतिका रक्तविषा तथा ।
अरुणा रक्ता सिता कृष्णा शिरो मृगा ।
पिप्पिका विविधाकारा मलकानि नवानि च ।
शोथा महान्तो ज्वरो रक्ता ज्वरावती ज्वरा ।
सामान्यं सर्व्वलूतानामेतद्दंशस्य लक्षणम् ।"
दंशकोऽष्टम्यमध्ये पुनराह ।
"दंशमध्ये तु यत् कृष्णं श्यावं वा जालकावृतम् ।
दग्धाकृति भृशं पाकं क्लेदशोथज्वरान्वितम् ।
दूषीविषाभिलूताभिस्तद्दष्टमिति निर्दिशेत् ।"
सौम्यसाध्ययोर्दंशसाध्यासाध्ययोर्लक्षणमाह ।
"शोथः श्वेतासिता रक्ता पीता च पिडका ज्वरः ।
प्राणान्तिको भवेद्दाहः श्वासो हिक्का शिरो ग्रहः ॥"
तच्चौषधं यथा —
"रजनीद्वयमञ्जिष्ठानागकेशरै ।
शीताम्बुपिष्टैरालेपः सद्यो लूता विनाशयेत् ।"
अपि च ।
"लवणो रोचनो कुङ्कुमश्च समांशकम् ।
सर्व्वैतत्कल्कमपि नस्य हरणं तथा ।
सकृत्पिष्टं समञ्जिष्ठासमवायं प्रयोजयेत् ।

शृङ्गाटकं समङ्गाञ्च पद्मकिञ्जल्कमित्यपि ।
कल्कीकृत्य पचेत् सर्पिः पयो दत्त्वा चतुर्गुणम् ।
सम्यक् पक्वेऽवतीर्णे च शीते तस्मिन् विनि-
क्षिपेत् ।
सर्पिस्तुल्यं भिषक् क्षौद्रं तगरञ्च निधापयेत् ।
विषाणि हन्ति दुर्गाणि गरदोषकृतानि च ।
अष्टाङ्गन्ति विषं सम्यग्गरैरुपहतां त्वचाम् ।
योगश्चायमर्कः खलु मांसमार्द्रं विषघ्नताम् ।
नाशयत्यञ्जनाभ्यङ्गपानवस्तिषु योजितम् ।
सर्पकीटाखुलूतादिदष्टानां विषहृत् परम् ।"
अमृताद्यमिदं घृतम् । इति भावप्रकाशः ॥
(तथा च ।
"कीटेभ्यो दारुणतरा लूता षोडश ता अपि ।
अष्टाविंशतिरित्येके ततोऽप्यन्ये तु भूयसीः ।
सहस्ररश्म्यनुचरा वदन्त्यन्ये सहस्रशः ।
वपुःप्रवरूपा तु लूतैव विषात्मिका ।
रूपाणि नामतस्तासां दुर्ज्ञेयान्यतिसङ्करात् ।
तासां स्थानमवस्था च दोषतोऽतः प्रचक्षते ।
कृच्छ्रसाध्या पृथग्दोषैरसाध्या निचयेन या ।
तत्र दंशः पैत्तिको दाहतृट्स्फोटज्वरदाहवान् ।
क्षमोष्मा रक्तपीताभः क्लेदी दाहावलोचनः ।
श्लैष्मिकः कठिनः पाण्डुः परूषकफलाकृतिः ।
निद्रां शीतज्वरं कासं कण्डूञ्च कुरुते भृशम् ।
वातिकः परुषः श्यावः पर्व्वभेदज्वरप्रदः ।
तद्विभागं यथास्वञ्च दोषलिङ्गैर्विभावयेत् ।
असाध्यायास्तु दंशोद्भवास्विकाशिरो
व्रणाः ।
श्वेताः पीताः सिता रक्ताः पिटिकाः श्वयथू-
द्भवाः ।
वेपथुर्वमथुर्दाहस्तृड्भ्रमश्च वक्त्रशोषता ।
स्यातोऽथवक्रमस्तत्र एकमेवावभञ्जनम् ।
पञ्चमूलयवाञ्च दद्यात् स्रवति शोणितम् ।
तस्मादपि सर्व्वथा प्रायो वमनैरस्तु भूयसा ।
सौख्यमभ्यावहत्येन या विधा वत्सुपाचिता ।
सम्प्राहृतं दद्याद्वमनं पश्चिमं च परं क्रमात् ।
लूतादंशश्च सर्व्वोऽपि दद्रुमण्डलसन्निभः ।
सितोऽसितोऽरुणः पीतः श्यावो वा मृदुरु-
न्नतः ।
मध्ये कृष्णोऽथवा श्यावः पर्य्यन्ते जाल-
कावृतः ।
विसर्पवान् शोथयुतस्तप्यते बहुवेदनः ।
ज्वराशुपाकविस्फोटकोठदाहरुजान्वितः ।
क्लेदेन यत् स्पृशत्यङ्गं तस्यापि कुरुते व्रणम् ।
न्यायदद्राग्लम्बुषणकालानशार्णवे ।
दंष्ट्राभिदष्टमात्रेऽपि विषं यत्नैर्विशोधयेत् ।
लूता नामेदमल्पदष्टं चापरं कीटकाः ।
तद्दूषितञ्च पक्वादिदञ्च एकं विकारकृत् ।
दिनार्द्धं लक्ष्यते नैव दंशो लूताविषोद्भवः ।
स्तोकावधवराभाति ततोऽसौ प्रथमेऽहनि ।
अव्यक्तवर्णः प्रचलः किञ्चित् कण्डूरुजान्वितः ।
द्वितीयेऽभ्युन्नतोऽन्तेषु पिटकैरिव चाचितः ।
व्यक्तवर्णो नतो मध्ये कण्डूमान् ग्रन्थिसन्निभः ।
तृतीये सज्वरो रोमहर्षकृद्रक्तमण्डलः ।
शरावरूपस्तोदाढ्यो रोमकूपेषु सास्रवः ।
महांश्चतुर्थे श्वयथुस्तापश्वासभ्रमप्रदः ।
विकारान् कुरुते तांस्तान् पञ्चमे विषकोपजान् ।
षष्ठे व्याप्नोति मर्म्माणि सप्तमे हन्ति जीवितम् ।
इति तीक्ष्णं विषं मध्यं हीनञ्च विभजेदतः ।
एकविंशतिरात्रेण विषं शाम्यति सर्व्वथा ।
अथाशु लूतादष्टस्य शस्त्रेणादंशमुद्धरेत् ।
दहेच्च जाम्बवौष्ठाद्यैर्न तु पित्तोत्तरं दहेत् ।
कर्कशं भिन्नरोमाञ्च मर्म्मसन्ध्यादिसंस्थितम् ।
प्रसृतं सर्व्वतो दंशं न छिन्दीत दहेन्न च ।
लेपयेदगदैर्मध्ये मधुसैन्धवसंयुतैः ।
सुशीतैः सेचयेच्चाम्बुकषायैः क्षीरिवृक्षजैः ।
सर्व्वतोऽपहरेद्रक्तं शृङ्गाद्यैः सिरयापि वा ।
शीता लेपास्तथा शीता बोधिभिः प्रान्तकारणे ।
फलिनीद्विनिशाचीरसर्पिभिः पद्मकाह्वयः ।
अगदो लूताकीटानामगदः सर्व्वकार्म्मिकः ।"
"रोध्रं सेव्यं पद्मकं पद्मरेणु
कालीयाख्यं चन्दनं यच्च रक्तम् ।
कान्ता पुष्पं दुग्धिनीका मृणालं
लूताः सर्व्वा घ्नन्ति सर्व्वक्रियाभिः ।"
इति वाग्भटे उत्तरस्थाने ३७ अध्यायः ।)

लूतारिः पुं, (लूताया अरिः ।) दुग्धफेनीक्षुपः । इति राजनिर्घण्टः ॥

लूतिका, स्त्री (लूतैव । स्वार्थे कन् । टापि अत इत्वम् ।) मर्कटकः । इति शब्दरत्नावली ॥

लूनः त्रि, (लूयते स्मेति । लू + क्तः । "ल्वादिभ्यः ।" ८ । २ । ४४ । इति निष्ठातस्य नः ।) छिन्नः । इत्यमरः ॥ (यथा कथासरित्सागरे । २७ । १४२ ।
"दैवेन वैरिणा सख्ये लूनबाहुरिव स्थितः ।"
उपचितः । यथा, कुमारे । ३ । ६१ ।
"तस्याः सखीभ्यां प्रणिपातपूर्व्वं
स्वहस्तलूनः शिशिरात्ययस्य ।
व्यकीर्य्यत त्र्यम्बकपादमूले
पुष्पोच्चयः पल्लवभङ्गभिन्नः ॥")

लूनकः पुं, (लून एव । स्वार्थे कन् ।) भेदितः । पशुः । इति मेदिनी । के, १६९ ॥

लूनिः स्त्री, (लू + क्तिन् । "ऋकारल्वादिभ्यः क्तिन्निष्ठावद्भवतीति वक्तव्यम् ।" ८ । २ । ४४ । इत्यस्य वार्त्तिकोक्त्या तस्य नः ।) छेदः । इति मुग्धबोधव्याकरणम् ॥ (कौटि । रघुनन्दनदत्त । ४ । १२ ।)

लूमं, क्ली, (लूयते इति । लू + बाहुलकात् मक् ।) लाङ्गूलम् । इत्यमरः ॥

लूमविषः, पुं, (लूमे लाङ्गूले विषमस्य ।) वृश्चिकादिः । इति हेमचन्द्रः ॥

लूष, क वधे । स्तेये । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क, लूषयति । इति दुर्गादासः ॥

लेखः, पुं, (लिख्यते इति । लिख + घञ् ।) देवः । इत्यमरः ॥ लेख्यम् । इति मेदिनी । खे, ४ ॥ (यथा, कुमारे । १ । ७ ।
"भजन्ति विद्याधरसुन्दरीणा-
मनङ्गलेखक्रिययोपयोगम् ॥")

लेखकः, पुं, (लिखतीति । लिख + ण्वुल् ।) लेखनकर्त्ता । तत्पर्य्यायः । लिपिकरः २ अक्षरचणः ३ अक्षरचुञ्चुः ४ । इत्यमरः । २ । ८ । १५ ॥ बोधकः ५ करकः ६ मसीभक्षः ७ करग्राही ८ । इति शब्दरत्नावली ॥ वर्णी ९ । इति जटाधरः ॥ * ॥ तस्य लक्षणानि यथा,—
"सर्व्वदेशाक्षराभिज्ञः सर्व्वशास्त्रविशारदः ।
लेखकः कथितो राज्ञः सर्व्वाधिकरणेषु वै ॥
शीर्षोपेतान् सुसम्पूर्णान् समश्रेणिगतान्
समान् ।
अक्षरान् वै लिखेद्यस्तु लेखकः स वरः स्मृतः ॥
उपायवाक्यकुशलः सर्व्वशास्त्रविशारदः ।
बह्वर्थवक्ता चाल्पेन लेखकः स्यान्नृपोत्तम ॥
वाक्याभिप्रायतत्त्वज्ञो देशकालविभागवित् ।
अनाहार्य्यो नृपे भक्तो लेखकः स्यान्नृपोत्तम ॥"
इति मात्स्ये १८९ अध्यायः ॥ * ॥
अपि च ।
"सकृदुक्तगृहीतार्थो लघुहस्तो जिताक्षरः ।
सर्व्वशास्त्रसमालोकी प्रकृष्टो नाम लेखकः ॥"
इति चाणक्यसंग्रहः ॥ * ॥
राजलेखकलक्षणं यथा,—
"ब्राह्मणो मन्त्रशास्त्रज्ञो राजनीतिविशारदः ।
नानालिपिज्ञो मेधावी नानाभाषासमन्वितः ।
मन्त्रव्याख्याचतुरो धीमान् नीतिशास्त्रार्थकोविदः ।
सन्धिविग्रहभेदज्ञो राजकार्य्ये विचक्षणः ।
सदा राजहितान्वेषी राजसन्निधिमाश्रितः ।
कार्य्याकार्य्यविचारज्ञः सत्यवादी जितेन्द्रियः ।
स्वल्पवादी शुद्धात्मा धर्म्मज्ञो राजधर्म्मवित् ।
एवमादिगुणैर्युक्तः स एव राजलेखकः ।
शुभाशुभज्ञः सततं नृपविश्वासरक्षकः ।
नृपाशङ्कितकार्य्येषु स एव राजलेखकः ॥"
इति मन्त्रकौमुदी ॥ * ॥
लेखकर्म्म कायस्थेन कर्त्तव्यम् । यथा —
"लेखकानपि कायस्थान् लेख्यकृत्ये नियोज-
येत् ॥"
कुर्य्यादिति शेषः । इति पराशरसंहितायाम् १ अध्यायः ॥ (गणेशस्तु महाभारतस्य लेखकः । यथा, महाभारते । १ । १ । ७८—७९ ।
"श्रुत्वैतत् प्राह विघ्नेशो यदि मे लेखनी क्षणम् ।
लिखतो नावतिष्ठेत तदा स्यां लेखको ह्यहम् ॥
व्यासोऽप्युवाच तं देवमबुद्ध्वा मा लिख क्वचित् ।
ओमित्युक्ता गणेशोऽपि बभूव किल लेखकः ॥")

लेखनं, क्ली, (लिख + ल्युट् ।) छर्दनम् । शुम्भनकः । अक्षरविन्यासः । इति मेदिनी । ने, १२२ ॥ भूमौ लेखननिषेधो यथा,—
"न भूमौ विलिखेद्वर्णं मन्त्रं न पुस्तकं लिखेत् ।"
इति योगिनीतन्त्रे द्वितीयभागे ७ पटलः ॥
लेखनासनम् । यथा,—
"दन्तालकदिवाकारसञ्चयचन्दनवेष्टने ।
भूर्जेऽथवा लेख्य पुष्पाम्भोरादिविलम्बनम् ॥"

इयं कुक्कुटः तस्याः कस्य सत। श्रिका सग श्रिका। इति भावप्रकाशः ॥

लेखन, पुं, (लिख+ल्युः।) वाण। इति राज निर्घण्टः ।

लेखनिकः पुं, (लेखनं शिल्पमस्य। लेखन+ठन्।) लेखधारकः। परहस्तेन लेखकः। स्वहस्तेन लेखकः। इति मेदिनी। के, २११ ॥

लेखनी, स्त्री लिख्यतेऽनया। (लिख+ल्युट्। ङीप्।) लेखनसाधनवस्तु। तत्पर्यायः। वर्ण तूलिका २। इति हारावली। वर्णतूली ३ कलम ४ अक्षरतूलिका ५। इति जटाधरः। कराभयः ६ चित्रकः ७। इति शब्दरत्नावली। ७। (यथा, महाभारते। १।१।७८

“श्रुत्वैतत् प्राह विघ्नेशो यदि मे लेखनी क्षणम्।
लिखतो नावतिष्ठेत तदा स्यां लेखको ह्यहम्॥”)

लेखनीकरणशुभाशुभं यथा,—

“वंशजया लिखेद्यस्तु तस्य लक्ष्मीर्भवेद्ध्रुवम्।
ताम्रजया तु विभवो भवेत्तु तन्नयो भवेत्॥
मन्दालक्ष्मीर्भवेन्नित्यं सुवर्णस्य शलाकया।
रूप्यजस्य कृता वै मतिशुद्धिः प्रजायते॥
तथा अष्टमयैरेव पुष्पैरीक्षणकामम्।”

अपिमयैर्विचकाञ्चनयै।

“दैर्घ्येण विपुला लक्ष्मीः काश्येन मरणं भवेत्।
अष्टाङ्गुलप्रमाणेन दशाङ्गुलेन नायक।
चतुरङ्गुलसङ्ख्या वा यो लिखेत् पुस्तकं शुभे।
तस्य चरणस्य तु सन्त्यायुर्याति वै दिने॥”

यथा दैर्घ्यमित्यादिवचने एकत्रैव विधिनिषेधौ तथाप्यष्टाङ्गुलदशाङ्गुलयोर्विधिः निषेधस्तु दरूपे। इति योगिनीतन्त्रे तृतीयभागे ७ पटलः। (खटिका। तत्पर्यायो यथा,—

“खटिका कठिनी चापि लेखनी च निगद्यते।”

इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे।)

लेखनीय त्रि, लेख्यम्। लेखितव्यम्। इति लिख धातोः कर्मण्यनीयप्रत्ययेन निष्पन्नम्। (यथा, सुश्रुते। ६। १८।

“लेखनो लेखनीयश्च रोपणीयश्च स त्रिधा।”)

लेखर्षभ, पुं, (लेखेषु देवेषु ऋषभः श्रेष्ठः। लेख ऋषभ इवेति वा।) इन्द्रः। इत्यमरः।

लेखहार पुं लेख हरति इत्यर्थे अण्प्रत्ययेन निष्पन्नः। पत्रवाहकः। इति सिद्धान्तकौमुदी। (यथा कथासरित्सागरे। ५। ६५।

“निगद च नृपस्तस्य लेखहारं यथार्थयत्।”)

लेखहारक पुं, (लेखहार एव। स्वार्थे कन्।) पत्रवाहकः। (यथा कथासरित्सागरे। १८। १८।

“आज्ञाताय ममागारे स्थितेभ्योऽप्युक्तवाविने।
आसुष्मद्विलक्ष्येव प्रहितो लेखहारकः।”)

लेखा स्त्री, (लिखतीति इति। लिख+बाहुलकात् अप्। टाप्।) लिपिः। पङ्क्तिः। इति मेदिनी। खे, ११

लेखार्ह, पुं (लेखे अर्हः।) तालवृक्षः। इति राजनिर्घण्टः। लेखनयोग्ये, त्रि।

लेखित, त्रि, लेख्यते यत्। कारितलिखितम्। इति ण्यन्तलिखधातोः क्तप्रत्ययेन निष्पन्नम्।

लेख्य त्रि, (लिख+ण्यत्।) लेखितव्यम् लेखनीयम्। इति लिखधातोः कर्मणि यप्रत्ययेन निष्पन्नम्। ●। व्यवहाराङ्गक्रियापादाङ्गम्। यथा —

“षाण्मासिकेऽपि समये भ्रान्तिः सञ्जायते यतः।
धात्राक्षराणि सृष्टानि पत्रारूढान्यतः पुरा॥
लेख्यन्तु द्विविधं प्रोक्तं स्वहस्तान्यकृतं तथा।
असाक्षिक साक्षिमच्च सिद्धिर्देशस्थितेस्तयोः॥
तत्रास्य साक्षिणो यत्र धनिकर्णिकलेखकाः।
तदन्यथार्थं करणमतो व्याधिः क्रियामयात्॥
दर्शितं प्रतिकालञ्च पठितं साक्षितञ्च यत्।
लेख्य सिध्यति सर्वत्र मृतेष्वपि च साक्षिषु॥”

इति व्यवहारतत्त्वे बृहस्पतिः॥

अपि च। साम्प्रतं लेख्य निरूप्यते। तत्र लेख्य द्विविधम्। शासन चानपदञ्चेति। शासनं निरूपितम्। जानपदमभिधीयते। तच्च द्विविधम्। स्वहस्तकृतमन्यकृतञ्चेति। तत्र स्वहस्तकृतम साक्षिकम्। अन्यकृत ससाक्षिकम्। अनयोश्च देशाचारानुसारेण प्रामाण्यम्। यदाह नारदः।

“लेख्यन्तु द्विविधं ज्ञेयं स्वहस्तान्यकृतन्तथा।
असाक्षिमत् साक्षिमच्च सिद्धिर्देशस्थितेस्तयोः॥”

इति।

तथान्यकृतमाह।

“यः कश्चिदर्थो निष्णातः स्वरुच्या तु परस्परम्।
लेख्यन्तु साक्षिमत् कार्यं तस्मिन् धनिकपूर्वकम्॥”

धनिकाधमर्णयोर्यो निरूपणादिः परस्पर स्वरुच्या इयता कालेनैतावद्देयमितीयती च प्रतिमासं वृद्धिरिति निष्णातो व्यवस्थित स्तस्मिन्नर्थे कालान्तरे विप्रतिपत्तौ वस्तुतत्त्व निर्णयार्थं लेख्यम्। साक्षिमद्युक्तमर्थं साक्षि युक्तम्। धनिक पूर्वो यस्मिन् तद्धनिकपूर्वकम्। धनिकनामलेखनपूर्वकमिति यावत् कार्यं कर्त्तव्यम्। उत्तमर्णेन साक्षिणो वा कर्त्तव्या।

“कथा तु यत् कृतं कार्यं सिद्धयर्थन्तस्य साक्षिणः।
प्रवर्त्तन्ते विवादेषु स्वकृत वाप्यलेख्यकम्॥”

इति नारदात्।

अपि च।

“समामासतदर्धाहर्नामजातिस्वगोत्रकैः।
सब्रह्मचारिकात्मीयपितृनामादिचिह्नितम्॥”

समा संवत्सरः। माघवैशाखादिस्तदर्धं पक्ष शुक्लः कृष्णो वा। अहस्तिथिः प्रतिपदादि। नाम धनिकाधमर्णयोः। जातिर्ब्राह्मणादिः। स्वगोत्र वाशिष्ठगोत्रीयमेतैः यमादिभिश्चिह्नि तम्। तथा ब्रह्मचारित्व बह्वृचादिशाखा प्रयुक्त गुणनामकृच कठ इति। आत्मीय पितृनाम धनिकर्णिकपितृनाम। आदि पद ग्राह्यद्रव्यजातिसंख्यावापादेयद्रव्यम्। एतैश्चि ह्नितं लेख्य कार्यमिति सर्वेण सम्बन्धः। किञ्च।

“समाप्तेऽर्थे ऋणी नाम स्वहस्तेन निवेशयेत्।
मतं मेऽमुकपुत्रस्य यदत्रोपरि लेखितम्॥”

धनिकाधमर्णयोर्थेऽर्थे स्वरुच्या व्यवस्थि तस्मिन्नर्थे यथाक्रमं लिखिते ऋणी अधमर्णो नामात्मीयं स्वहस्तेनास्मिन् लेख्ये यदुपरि लेखि तन्ममामुकपुत्रस्य मतमभिप्रेतमिति निवेशयेत् पत्रे लिखेत्। तथा —

“साक्षिणश्च स्वहस्तेन पितृनामकपूर्वकम्।
अत्राहममुकः साक्षी लिखेयुरिति ते समाः॥”

साक्षिणः लेख्ये ये साक्षिणो लिखितास्तेऽप्या त्मीयपितृनामलेखनपूर्वकमस्मिन्नर्थे अहममुको देवदत्तः साक्षीति स्वहस्तेनैकैकशो लिखेयुः ते च समाः सङ्ख्यातो गुणतश्च कर्त्तव्याः। यद् धमर्णः साक्षी वा लिपिज्ञो न भवति तदा स्वमतोऽन्येन साक्षी च साक्ष्यन्तरेण सर्वेषाम् सन्निधौ स्वमतं लेखयेत्। यथाह नारदः।

“अलिपिज्ञ ऋणी यः स्यात् स्वमतन्तु स लेख येत्।
साक्षी वा साक्षिणान्येन सर्वसाक्षिसमीपतः॥”

इति।

अपि च।

“उभयाभ्यर्थितेनैतन्मया ह्यमुकसूनुना।
लिखितं ह्यमुकेनेति लेखकोऽन्ते ततो लिखेत्॥
ततो लेखको धनिकाधमर्णिकाभ्यां उभाभ्यां प्रार्थितेन मयामुकेन देवदत्तेन विष्णुमित्रसूनुना एतल्लेख्यं लिखितमित्यन्ते लिखेत्। ●। साम्प्रतं स्वकृतलेख्यमाह।

“विनापि साक्षिभिर्लेख्यं स्वहस्तलिखितन्तु यत्।
तत् प्रमाणं स्मृतं लेख्यं बलोपधिकृतादृते॥”

यल्लेख्यं स्वहस्तेन लिखितं अधमर्णेन तत् साक्षि भिर्विनापि प्रमाणं स्मृतं मन्वादिभिः। बलेन बलात्कारेण। उपधिना छलेन लोभक्रोधभयमदादिलक्षणेन यत् कृतं तद वि। नारदोऽप्याह।

“मत्ताभियुक्तस्त्रीबालबलात्कारकृतञ्च यत्।
तदप्रमाणं लिखितं भयोपधिकृतं तथा॥”

सर्वैतत् स्वहस्तकृतं परहस्तकृतञ्च लेख्यं देशा चारानुसारेण सम्बन्धकव्यवहारे गमकव्यवहार युक्तमर्थक्रमापरिलोपेन लिप्यक्षरापरिलोपेन च लेख्यमित्येतावत एव साधुमन्ये देश प्रसिद्ध देशभाषयापि लेखनीयम्। यथाह नारदः।

“देशाचाराविरुद्धं यद्व्यक्ताधिविधिलक्षणम्।
तत् प्रमाणं स्मृतं लेख्यमविप्लुतक्रमाक्षरम्॥”

इति॥

विधानं निधिराधिविधिराधीकरणस्य क्रम। बौध्याधिभोग्याधिकालकृतादिभेदे यद् यत्र निधानं सर्वोद्धारसाक्षिविधिलक्षणम्। अविप्लुतक्रमाक्षरं यदीयक्रम अक्रमाक्षराणि अविप्लुतानि क्रमाक्षराणि यस्मि न्प्रमाणाक्षरादि अविप्लुतक्रमाक्षरम्। यदेवं भूतं लिखितं प्रमा णम्। राजशासनस्य साधुसम्बन्धियमोऽभिहि तः। लेखप्रवृत्तेन लेख्याहरणप्राप्तं लिखेत्

देयमित्याह । ऋणं लेख्यगतन्देयं पुरुषैस्त्रिभिरेव तु । यथा धारणादिकृतमृणं त्रिभिरेव देयं तथा लेख्यगतमप्याधर्मपुत्रतत्पुत्रैस्त्रिभिरेव देयम् । न चतुर्थादिभिरिति नियम्यते । ननु पुत्रपौत्रैर्ऋणं देयमित्यविशेषेणर्णमात्रं त्रिभिरेव देयमिति नियतमेव । बाढमस्त्येवोक्तयाज्ञवल्क्य वचनाज्जन्म विषये स्मृत्यन्तरप्रभवामपवादशङ्कामपनेतुमिद वचनमारब्धम् । तथा हि । पत्रलक्षणमभिधाय कात्यायनेनाभिहितम् । एवं कालमतिक्रान्तं पितृणान्दाप्यते ऋणमिति । इत्थं पत्रारूढ़मतिक्रान्तकालमपि पितुर्वापि पितृणां ऋणं दाप्यते । अत्र पितृणामिति बहुवचननिर्द्देशात् कालमतिक्रान्तमिति वचनाच्चतुर्थादिर्दाप्यत इति प्रतीयते । तथा हारीतेनापि । लेख्यं यस्य भवेद्धस्ते लाभस्तस्य विनिर्दिशेदिति । अत्रापि यस्य हस्ते पत्रमस्ति तस्य लाभ इति सामान्येन चतुर्थादिभ्योऽप्यलाभोऽस्तीति प्रतीयते । अतस्तदाशङ्कानिवृत्त्यर्थमिदं वचनमिति युक्तम् । वचनद्वयन्तु योगीश्वरवचनानुसारेण योजनीयम् ॥ ॥ अस्यापवादमाह । आधिस्तु भुज्यते तावद्यावत्तन्न प्रदीयते । ऋणमन्त्र्यपि पत्रारूढ़ं त्रिभिरेव देयमिति नियमाद्व्यापकत्वादधिकारेणाधावप्यनधिकारप्रसङ्गादिदमुच्यते । यावच्चतुर्थेन पञ्चमेन वा ऋणं न दीयते तावदेवाधिर्भुज्यत इति वदता धनस्वामिकस्यापि चतुर्थादेरप्यधिकारो दर्शितः । नन्वेतदप्ययुक्तमेव फलभोग्यो न नश्यतीति वचनम् । तदपि तत्रैव सत्यङ्कारवाक्यवत् पुरुषत्रयविषयमेव स्यादिति सर्व्वमनवद्यम् ॥ ● ॥ प्रासङ्गिकं परिसमाप्य प्रकृतमेवानुसरति ।

"देशान्तरस्थे दुर्लेख्ये नष्टोन्मृष्टे हृते तथा ।
भिन्ने दग्धेऽथवा छिन्ने लेख्यमन्यत्तु कारयेत् ॥"

व्यवहारक्षमे पत्रे पत्रान्तरं कुर्य्यादिति विधीयते । व्यवहारक्षमलेख्यान्तरमदेशान्तरस्थे पत्रे दुर्लेख्ये दुष्टानि सन्दिग्धाक्षराणि अवाचकानि वा लेख्यानि लिप्यक्षराणि यस्मिन् तत् दुर्लेख्यम् तस्मिन्दुर्लेख्ये नष्टे कालवशेन उन्मृष्टे मषीविश्लेषादिना अन्तरित लिप्यक्षरे हृते तस्करादिभिर्भिन्ने विदलिते दग्धे अग्निना छिन्ने द्विधा भूते सति विभवति । एतच्चाधिप्रत्यर्थिनोः परस्परानुमतौ सत्यां विमत्यान्तु व्यवहारप्राप्तौ देशान्तरस्थपत्रानयनाद्यशक्यतया कालो दातव्यः दुर्देशावस्थिते नष्टे वा पत्रे साक्षिभिरेव व्यवहारनिर्णयः कार्य्यः । यथाह नारदः ।

"लेख्ये देशान्तरन्यस्ते शीर्णे दुर्लिखिते हृते ।
सतस्तत्कालकरणमसतो द्रष्टृदर्शनम् ॥" इति ।

सतो विद्यमानपत्रस्य देशान्तरस्थस्यानयनाय कालकरणं कालावधिर्दातव्यः । असतः पुनरविद्यमानस्य पत्रस्य पूर्व्वं ये द्रष्टारः साक्षिणस्तेषां दर्शनं व्यवहारपरिसमापनं कार्य्यम् । यदा तु साक्षिणो न सन्ति तदा दिव्येन निर्णयः कार्य्यः अलेख्यसाक्षिके दैवी व्यवहारे विनिर्दिशेदिति स्मरणात् । एतच्च जानपदं व्यवस्थापत्रम् । राजकीयमपि व्यवस्थापत्रमीदृशमेव भवति । इयांस्तु विशेषः ।

"राज्ञः स्वहस्तसंयुक्तं स्वमुद्राचिह्नितन्तथा ।
राजकीयं स्मृतं लेख्यं सर्व्वेष्वर्थेषु साक्षिमत् ॥"
इति ॥ ● ॥

तथान्यदपि राजकीयं जयपत्रं वृहस्पतिनोक्तम् ।
यथोपन्यस्तसाध्यार्थसंयुक्तं सोत्तरक्रियम् ।
सावधारणकञ्चैव जयपत्रकमिष्यते ॥
प्राड्विवाकादिहस्ताङ्कं मुद्रितं राजमुद्रया ।
सिद्धेऽर्थे वादिने दद्याज्जयिने जयपत्रकमिति ॥

तथा । सभासदोऽपि मतं मेऽमुकपुत्रस्येति स्वहस्तं दद्युः ।

"सभासदश्च ये तत्र स्मृतिशास्त्रविदः स्थिताः ।
यथा लेख्यविधौ तद्वत् स्वहस्तं दद्युरेव ते ॥"
इति मनुस्मरणात् ।

सभासन्नाश्च परस्परानुमतिव्यतिरेकेण व्यवहारो निःशल्यो भवति । यथाह नारदः ।

"यत्र सभ्यो जनः सर्व्वः साध्वेतदिति मन्यते ।
स निःशल्यो विवादः स्यात् सशल्यस्त्वन्यथा भवेत् ॥" इति ।

एतच्चतुष्पाद्व्यवहार एव ।

"सीमयैव साध्यमर्थं चतुष्पादान्वितस्य यत् ।
राजमुद्राङ्कितञ्चैव जयपत्रकमिष्यते ॥"
इति स्मरणात् ।

यत्र तु हीनता यथा ।

"अन्यवादी क्रियाद्वेषी नोपस्थाता निरुत्तरः ।
आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः ॥"
इति ।

तत्र न जयपत्रमस्ति अपि तु हीनपत्रमेव तच्च कालान्तरे दण्डप्राप्त्यर्थं जयपत्रं तु प्राड्न्याय विधिसिद्ध्यर्थमिति विशेषः । लेख्यसन्देहे निर्णयनिमित्तमाह ।

"सन्दिग्धलेख्यशुद्धिः स्यात् स्वहस्तलिखितादिभिः ।
युक्तिप्राप्तिक्रियाचिह्नसम्बन्धागमहेतुभिः ॥"

प्रत्यर्थिनेति सन्दिग्धस्य लेख्यस्य शुद्धिः स्वहस्तलिखितादिभिः स्यात् । स्वहस्तेन लिखितं यल्लेख्यान्तरं तेन शुद्धिः । यदि सदृशान्यक्षराणि भवन्ति तदा शुद्धिः स्यादित्यर्थः । आदिग्रहणात् साक्षिलेखकस्वहस्तलिखितान्तरसंवादाच्छुद्धिरिति । युक्तिः प्राप्तियुक्तिः । देशकालपुरुषाणां द्रव्येण सह सम्बन्धः प्राप्तिः । अस्मिन्देशे अस्मिन् काले अस्य पुरुषस्येदं द्रव्यं घटत इति युक्तिः । प्राप्तिः क्रिया साक्ष्युपन्यासः । चिह्नमसाधारणं श्रीकारादि । सम्बन्धः अर्थिप्रत्यर्थिनोः पूर्व्वमपि परस्परविश्वासेन दानग्रहणादिसम्बन्धः । आगमोऽस्यैतावतोऽर्थस्य सम्भावित प्राप्त्युपायः । एत एव हेतवः । एभिर्हेतुभिः सन्दिग्धलेख्यशुद्धिः स्यादित्यर्थः । यदा तु लेख्ये सन्देहो न जायते तदा साक्षिभिर्निर्णयः कार्य्यः । यथाह कात्यायनः ।

"दूषिते पत्रके वादी तदारूढ़ांस्तु निर्द्दिशेत् ॥"
इति ।

साक्षिसम्भवविषयमिदं वचनम् । साक्ष्यसम्भवविषयन्तु हारीतवचनम् ।

"न मयैतत् कृतं पत्रं कूटमेतेन कारितम् ।
अधरीकृत्य तत् पत्रमथ दिव्येन निर्णयः ॥"
इति ॥ ● ॥

एवं शोधिते पत्रे ऋणे च दातव्ये प्राप्ते यदा तत्कृत्स्नमेवं दातुमसमर्थस्तदा किं कर्त्तव्यमित्यत आह ।

"लेख्यस्य पृष्ठेऽभिलिखेद्दत्त्वा दत्त्वर्णिको धनम् ।
धनी चोपगतं दद्यात् स्वहस्तपरिचिह्नितम् ॥"

अधमर्णिकः सकलन्दातुमसमर्थस्तदा यथाशक्त्यनुसारेण दत्त्वा दत्त्वा पूर्व्वकृतस्य लेख्यस्य पृष्ठेऽभिलिखेदेतावन्मया दत्तमिति । उत्तमर्णो वा उपगतं प्राप्तं धनं तदेव लेख्यस्य पृष्ठे दद्यादभिलिखेदेतावन्मया लब्धमिति । कथं स्वहस्तपरिचिह्नितम् । स्वहस्तलिखिताक्षरचिह्नितम् । यद्वोपगतं प्रवेशपत्रं स्वहस्तलिखितचिह्नितमधमर्णायोत्तमर्णो दद्यात् ॥ ● ॥ ऋणे तु दत्ते लेख्यं किं कर्त्तव्यमित्यत आह ।

"दत्त्वर्णं पाटयेल्लेख्यं शुद्ध्यै वान्यत्तु कारयेत् ।"

क्रमेण सकृदेव वा कृत्स्नमृणं दत्त्वा पूर्व्वकृतं लेख्यं पाटयेत् । यदा तु दुर्गदेशावस्थितं लेख्यं नष्टं वा तदा शुद्ध्यै अधमर्णनिष्कृत्यर्थमन्यल्लेख्यं कारयेदुत्तमर्णमधमर्णः पूर्व्वोक्तक्रमेणोत्तमर्णो विशुद्धिपत्रमधमर्णाय दद्यादित्यर्थः ॥ ● ॥ ससाक्षिके ऋणे कृत्स्ने दातव्ये किं कर्त्तव्यमित्यत आह ।

"साक्षिमच्च भवेद् यद्वा तद्दातव्यं ससाक्षिकम् ।"

यत्तु ससाक्षिकमृणं तत् पूर्व्वसाक्षिसमक्षमेव दद्यात् । इति लेख्यप्रकरणम् । इति मिताक्षरायां व्यवहाराध्यायः ।

लेख्यचूर्णिका, स्त्री, (लेख्यस्य चूर्णिका ।) तूलिका इति शब्दरत्नावली ।

लेख्यपत्र, पुं, (लेख्यं लेखार्हं पत्रं यस्य ।) तालवृक्षः । इति भावप्रकाशः । लेखनीय पत्रे, क्ली ।

लेख्यस्थान, क्ली (लेख्यस्य स्थानम् ।) लिख्यते यत्र । आफिस इति इंराजभाषा । तत्पर्य्यायः । पत्राङ्ग १ । इति शब्दरत्नावली ।

लेद, स्त्री गूथम् । ल्याद इति भाषा । यथा —
"उत्सृजन्ति हस्तिनो लेदञ्च भयमाय च ।"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे पिशुनाहरणे १२ अध्यायः ।

लेप ऋ ङ गमने । इति कविकल्पद्रुमः । (भ्वा०-आत्म० सक० सेट् ।) ऋ अलिलेपत् । ङ लेपते लिलेपे । इति दुर्गादासः ।

लेप, पुं (लिप + घञ् ।) लेपनम् । (यथा, मार्कण्डेये । ११ । ११ ।

"भूमिविशुध्यति कालात् दाहमाज्जनगोक्रमे ।
लपादुल्लेखनात् सेकात् वेश्मसम्माज्जनार्च्चनात् ॥")
भोजनम् । इति मेदिनी । पे, १० ॥ (लिप्यते
ऽनेनेति ।) सुधा । इति विश्वः । चुन इति भाषा ॥
लेपकः, पुं, (लिम्पतीति । लिप् + ण्वुल् ।) जाति-
विशेषः । राज इति थैकर इति च भाषा ।
तत्पर्य्यायः । पलगण्डः २ । इत्यमरः ॥ लेपी ३ ।
इति शब्दरत्नावली ॥ लेप्यकृत् ४ । इति हेम-
चन्द्रः ॥ (लेपनकर्त्तरि, त्रि ॥)
लेपनं, क्ली, (लिप + ल्युट् ।) लेपः । लेपा इति
भाषा । यथा,—
"वेश्माख्यस्य पिते पत्ते तृतीयापञ्चमी तिथिः ।
तत्र मां लेपयेत्तत्र्यलेपैरलिप्तोभिनम् ॥"
इति तिथ्यादितत्त्वम् ॥
विष्णुगृहलेपनफलं यथा,—
वराह उवाच ।
"शृणु तत्त्वेन मे देवि । लिप्यमानस्य यत् फलम् ।
सर्व्वं ते कथयिष्यामि यथा प्राप्नोति मानवः ।
गोमयं गृह्य वै भूमे मम वेश्मोपलेपयेत् ।
यत्नानि तस्य यावन्ति पदानि च विलिम्पतः ॥
तावद्वर्षसहस्राणि दिव्यानि दिवि मोदते ।
यदि द्वादश वर्षाणि लिम्पते मम कर्म्मणा ।
जायते विपुले शुद्धे धनधान्यसमाकुले ।
दिवौकसश्च्युतो देवि । कुशद्वीपाय गच्छति ।
कुशद्वीपमनुप्राप्य सहस्रं जीवते दश ।
महत्त्वेन जायेत अणिमाद्गुणवान् शुचिः ।
कुशद्वीपात् परिभ्रष्टो मम कर्म्मपरायणः ।
राजा वै जायते सुभ्रु सर्व्वधर्म्मेषु निष्ठितः ।
लेपनस्य प्रभावेण मम कर्म्मपरायणः ।
भक्त्या यत्किञ्चितथापि सर्व्वशास्त्राणि गच्छते ।
देवि । आदयति यज्ञे मम आयतनानि च ॥
आरधित्वा यथान्यायं मम लोकाय गच्छति ॥
गोमयस्य तु वक्ष्यामि तच्छृणुष्व वसुन्धरे ।
गोमयन्तु समादाय यावद्भूमौ गच्छति ॥
शरीरे यदि वा दूरे गच्छावति गोमयम् ।
यावन्ति तत्पदान्यस्य तावद्वर्षसहस्रकम् ।
गोमयानयिता चैव स्वर्गलोके महीयते ॥
एकादशसहस्राणि एकादशशतानि च ।
ततः स शाल्मले द्वीपे रमते च सदा शुभे ॥
शाल्मलात् परिभ्रष्टो राजा भवति धार्म्मिकः ।
गङ्गत्वेन जायेत सर्व्वधर्म्मविशारदः ॥
अथ द्वादशवर्षाणि नयित्वा शुचिव्रतः ।
वहते गोमयं सुभ्रु मम लोकाय गच्छति ॥"
इति वराहपुराणम् ॥
देवीगृहलेपनफलं यथा,—
"देव्या गृहन्तु यः शुद्धं गोमयेनानुलेपयेत् ।
स्त्रियो वा यदि वा पुंस अवस्थायन्तु निरन्त-
रम् ।
स लभेदीप्सितान् कामान् देव्या लोकञ्च
गच्छति ॥"
इति देवीपुराणे ३९ अध्यायः ॥
(रात्रौ लेपननिषेधो यथा,—
"न रात्रौ लेपनं कुर्य्यात् शुष्कमात्रं न मार्ज-
येत् ।
शुष्कमात्रमुपेक्षेत प्रदद्ये पौरुषं प्रति ॥"
इति मध्यखण्डे पञ्चविंशेऽध्याये शाङ्गधरे-
णोक्तम् ॥)
लेपनः, पुं, (लिप्यतेऽनेनेति । लिप् + करणे ल्युट् ।)
तुरुष्कनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥
लेपी [न्] पुं (लिम्पतीति । लिप् + णिनि ।)
लेपकः । थैकर इति भाषा । इति शब्दरत्ना-
वली ॥ लेपकर्त्तरि लेपविशिष्टे च त्रि ॥
लेप्यं त्रि, (लिप + ण्यत् ।) लेपनीयम् । लेप-
यम् । लिपधातोः कर्म्मणि यत्प्रत्ययेन निष्पन्नम् ॥
(यथा, भागवते । ११ । २७ । १२ ।
"शैली दारुमयी लौही लेप्या लेख्या च
सैकती ।
मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता ॥")
लेप्यकृत्, पुं, (लेप्यं करोतीति । कृ + क्विप् ।)
लेपकः । इति हेमचन्द्रः । ३ । ५८६ ॥
लेप्यमयी स्त्री, (लेप्य + मयट् । ङीप् ।) काष्ठादि-
घटितपुत्तलिका । तत्पर्य्यायः । अञ्जलि-
कारिका २ । इति हेमचन्द्रः ॥
लेप्यस्त्री, स्त्री, (लेप्या स्त्री ।) सुगन्धद्रव्यलिप्ता
स्त्री । इति शब्दरत्नावली ॥
लेशः, पुं, विषराशिः । इति ज्योतिस्तत्त्वम् ॥
लेलिहानः, पुं, (पुनः पुनरतिशयेन वा लेढीति ।
लिह् + यङ् + शानच् ।) शिवः । इति शब्द-
रत्नावली ॥ सर्पः । इति हेमचन्द्रः ॥ पुनःपुन-
र्लेहनकर्त्तरि, त्रि ॥ (यथा, महाभारते । १ ।
२१६ । ५ ।
"सप्तजिह्वाननः क्रूरो लेलिहानो विसर्पति ॥")
लेलिहाना, स्त्री, (लेलिहान + स्त्रियां टाप् ।)
मुद्राविशेषः । यथा,—
"वामं विस्तारितं कृत्वाप्यधो निवाय चाल-
येत् ।
प्राज्ञस्य सुदृढगल लेलिहानेति कीर्त्तिता ॥"
इत्थं तारारहस्ये । अन्या लेलिहाना यथा ।
"योनिमण्डलाधरे तिष्ठस्यूत्तरमूर्द्ध्वं समाविशेत् ।
बीजानि चोद्धरन् मन्त्री मुद्रामन्यमथाचरेत् ।
तर्ज्जनीमध्यमानामा समं कुर्य्यादधोमुखम् ।
अनामायां क्षिपेदृद्धां अर्व्वीं ऋत्वा कनि-
ष्ठिकाम् ।
लेलिहानाख्यमुद्रेयं जीवन्यासे प्रकीर्त्तिता ॥"
इति तन्त्रसारः ॥
लेषः, पुं (लिश् + घञ् ।) कणा । इत्यमरः ॥
(यथा, महाभारते । १२ । १८ । ३३ ।
"इत्थ वै राजधर्म्माणां लेशः समनुवर्णितः ॥")
लेष्टुः पुं, (लिश्यते इति । लिश् + बाहुलकात्
तुन् ।) लोष्टम् । इत्यमरः ॥ (यथा, महाभारते ।
१२ । ३४ । २६ ।
"अथ यो ब्राह्मणान् क्रुद्धः परामृशति लोष्टे-
विराट् ।
यथा महार्णवे क्षिप्त आमलोष्टुर्विनश्यति ॥")
लेष्टुघ्नः, पुं, (लेष्टुं हन्तीति । हन् + टक् ।
लेष्टुभेदनः । इति शब्दरत्नावली ॥
लेष्टुभेदनः पुं (लेष्टुं भिनत्तीति । भिद् + ल्युट् ।)
लोष्टभञ्जनसाधनमुद्गरः । मुद्गर इति ख्यातः ।
इति केचित् । इति भरतः ॥ तत्पर्य्यायः ।
कोटिशः २ । इत्यमरः ॥ कोटीशः ३ । इति
रत्नकोषः ॥ लेष्टुघ्नः ४ लेष्टुभेदी ५ पुष्करः ६ ।
इति शब्दरत्नावली ॥
लेहिकः, पुं, घटचारोहकः । तत्पर्य्यायः । कटि-
रोहकः २ । इति शब्दमाला ॥
लेहः पुं (लेहनमिति । लिह् + घञ् ।)
आहारः । भक्षणम् । इति हेमचन्द्रः ॥ तत्-
पर्य्यायः । आदनम् २ स्वदनम् ३ अदनम् ४
अभि ५ । इति राजनिर्घण्टः ॥ (यथा, सुश्रुत-
संहितायाम् । १ । ४६ ।
"अथातश्चर्व्व्यलेह्यपेयचोष्यभक्ष्याहारविधि-
मथात अध्यायमतोऽन्य इति ते दश
भाषा ॥"
कर्म्मणि घञ् । इव । यथा सुश्रुते । १ । ४४ ।
"पचेल्लेहं सिता चौद्रं पलाष्टकयुतान्वितम् ॥"
लेढीति । लिह् + पचाद्यच् । लेहनकर्त्तरि त्रि ।
यथा भट्टिः । ६ । ८२ ।
"रक्षोऽहं मधुनो लेहः सुवेलेयम् नितः ।"
अवलेहः । तत्पर्य्यायो यथा —
"क्वाथादेः स्यात् पुनः पाकात् घनत्वं सा रसः
क्रिया ।
सोऽवलेहश्च लेहः स्यात्तन्मात्रा स्यात् पलो-
न्मिता ।
सिता चतुर्गुणा कार्य्या चूर्णाच्च द्विगुणो गुडः ।
द्रवं चतुर्गुणं दद्यादिति सर्व्वत्र निश्चयः ॥"
इति मध्यखण्डेऽष्टमेऽध्याये शाङ्गधरेणोक्तम् ॥)
लेहनं, क्ली (लिह् + ल्युट् ।) जिह्वया स्वा-
दग्रहणम् । चाटन इति भाषा । तत्पर्य्यायः ।
जिह्वाकारः २ । इति हेमचन्द्रः ॥
लेहिनः, पुं, (लिह् + बाहुलकात् इनच् ।) टङ्क-
णम् । इति हेमचन्द्रः ॥
लेह्यं क्ली, (लिह् + ण्यत् ।) अमृतम् । इति
शब्दमाला ॥ लेहनीये, त्रि ॥ (यथा, कथा-
सरित्सागरे । ३९ । २१० ।
"तत्समानाविधं भक्ष्यभोज्यलेह्यादि षड्रसम् ।
दिव्यमन्नं बुभुजिरे यत्र मानुषपोषणम् ॥"
आहारविशेषो यथा,—
"आहारं षड्विधश्चूष्यं पेयं लेह्यं तथैव च ।
भोज्यं भक्ष्यं तथा चर्व्व्यं गुरु विद्याद्यथोत्त-
रम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
लैङ्गं, क्ली (लिङ्गमधिकृत्य कृतो ग्रन्थ इति ।
लिङ्गस्येदमिति वा । लिङ्ग + अण् ।) लिङ्ग-
पुराणम् । यथा,—
"ब्राह्मं कौर्म्मं तथा लैङ्गं शैवं स्कान्दन्तथैव च ।"
इत्यादि पाद्मोत्तरखण्डे ४३ अध्यायः ॥
(अस्य विवरणादिकं पुराणशब्दे द्रष्टव्यम् ॥)

लेङ्गी, स्त्री, लिङ्गिनी । इति राजनिर्घण्टः । लिङ्ग धारयितरि, त्रि ।

लोक, ऋ ङ दीप्तौ । इति कविकल्पद्रुमः ।(चुरा-पर० अक० सेट् ।) ऋ, अलुलोकत् । ङ, लोकयति । इति दुर्गादासः ।

लोक, ऋ ङ ईक्षे । इति कविकल्पद्रुमः । (भ्वा-आत्म० सक० सेट् ।) ऋ, अलुलोकत् । ङ, लोकते । विलोकयन्त्यो वपुरापुरक्ष्णां प्रकाम-विस्तारफलं हरिण्यः । इत्यादौ विलोकन विलोक प्रत्यान् न करोतीति णौ साध्यम् । इति दुर्गादासः ।

लोकः, पुं, (लोक्यते इति । लोक+घञ् ।) भुवनम् । जनः । इत्यमरः । सप्तलोकनामानि यथा —

"भूर्भुवः स्वर्महश्चैव जनश्च तप एव च ।
सत्यलोकश्च सप्तैते लोकास्तु परिकीर्त्तिताः ॥"
इत्यग्निपुराणम् ॥

अपि च ।

"भूर्लोको भुवः स्वर्लोकस्त्रैलोक्यमभिधीयते ।
महर्जनस्तपः सत्यं सप्त लोकाः प्रकीर्त्तिताः ॥
भूर्लोकः पार्थिवो लोकः अन्तरीक्षं भुवः स्मृतः ।
भाद्यो लोको दिवि प्रोक्तः केवलादूर्द्धं यथाक्रमम् ॥
भूतस्याधिपतिश्चाग्निस्ततो भूतपतिस्तु सः ।
वायुर्नभसोऽधिपतिस्तेन वायुर्नभःपतिः ।
भाद्यस्य सूर्य्योऽधिपतिस्तेन सूर्य्यो दिवस्पतिः ॥
गन्धर्व्वाप्सरसश्चैव गुह्यका यक्षराक्षसाः ।
भूर्लोकवासिनः सर्व्वे अन्तरीक्षचरास्तथा ॥
मरुतः सप्तभिः स्कन्धैः सप्ताश्चैव चाश्विनौ ।
आदित्या वसवः सर्व्वे तथैव च गवाङ्गनाः ॥
चतुर्थं तु महर्लोके तिष्ठन्ति कल्पवासिनः ।
प्रजानां पतिभिः सर्व्वैः सेव्यते पञ्चमो महान् ॥
मनुः सनत्कुमाराद्या वैराजश्च सुतास्तथा ।
षष्ठे तु संस्थिता लोके देवा देवविरोधकाः ॥
सत्यस्तु सप्तमो लोको ह्यपुनर्भवगामिनाम् ।
ब्रह्मलोकः समाख्यातो ह्यप्रतीघातलक्षणः ॥
मर्य्यादया व्यवस्थाप्य ऊर्द्ध्वं दिवाकरः ।
दश तानि सुते पावदृद्धियुग्मे द्विगुणान्तरे ॥
दशयोजनकोट्यस्तु मेरुदृर्द्धं ध्रुवः स्मृतः ।
अधोऽधिष्ठितश्चापि त्रैलोक्यैक उच्यते ॥
त्रिगुणेषु चतुर्थ्येषु योजनानां शतेषु च ।
लोकान्तरमथैकैकं ध्रुवादूर्द्धं विधीयते ॥
देवदानवगन्धर्व्वयक्षराक्षसपन्नगाः ।
भूतविद्याधराश्चैव अष्टौ ते देवयोनयः ॥
ते ब्रह्माण्डस्य मध्यस्थाः परतत्समनावृतम् ।
ततोऽपि पातालस्थाने ततो भूतादिरुच्यते ॥
ततो महान् प्रधानञ्च प्रकृतिः पुरुषस्तथा ।
पुरुषादीश्वरो ज्ञेयो यस्य ह्यात्मगतं जगत् ॥
शिवोमायामहेशानां परात्परतरा मता ॥"

इति देवीपुराणे त्रैलोक्याभ्युदये षड्यष्टितमोऽध्यायः ॥ * ॥ दिक्पालानां लोका यथा,

"प्रजापतिस्तु भगवान् सुवनं चैव देवताम् ।
सर्व्वेषामेव लोकेषु सृष्टेषु व्ययोचयत योगवित् ॥
सर्व्वेषामपि लोकानां दिव्यतानां द्विजोत्तमाः ।
चकार शक्रं राजानं देवानां दितिपूर्ब्बजम् ॥
पूर्ब्बस्यां कौशिको राजा दक्षिणस्यां यमो दिशि ।
वरुणः पश्चिमायान्तु उत्तरस्यां सदा धनी ॥" * ॥

पुण्यवतां लोका यथा,—

"एवं विभज्य राज्यानि पुरा प्रोक्तानि यानि च ।
लोकांश्च विन्धे दिव्यान् ददावथ पृथक् पृथक् ॥
कस्यचित् सूर्य्यसङ्काशान् कस्यचिद्वह्निसन्निभान् ।
कस्यचिद्विद्युदुद्योतान् कस्यचिच्चन्द्रसन्निभान् ॥
नानावर्णान् काममयाननेकान्तर्नगान् ।
स तान् सुकृतिनां लोकान् भावनाय च संस्थितान् ॥
आसूर्द्ध्वं ये तपस्यन्ति सौम्याक्षाराशनाः सदा ।
एते सुकृतिनां लोका ये प्राप्ताः पुण्यकर्म्मभिः ।
ये यजन्ति मखैः पुण्यैः समाप्तवरदक्षिणैः ।
स्वदारनिरता दान्ताः ऋजवः सत्यवादिनः ॥
दीनानुग्रहकर्त्तारो ब्रह्मण्या लोकपूजिताः ।
योगयुक्ता महात्मानो यान्ति तत्र तपोज्ज्वलाः ॥
सर्व्वे सदाः समायुक्ता कोपिता ये समोचिताः ।
एवं नियोज्य तनयान् स्वयं लोकपितामहः ।
पौष्करं श्रम्यमरुत्तमामारुरोह प्रजापतिः ॥
सर्व्वे स्वयम्भुवस्तेषु पावकेषु दिवौकसः ।
रेमिरे स्वेषु लोकेषु महेन्द्रेणाभिपालिताः ॥"

इति वह्निपुराणे वाराहप्रादुर्भावनामाध्यायः ॥ (अनार्थे विषयोऽस्य यथा,—

"यथा लोकस्य आदित्यस्तथा पुरुषस्य गर्भाधानं यथा कृतयुगमेवं बाल्यम् । यथा त्रेता तथा यौवनं यथा द्वापरस्तथा स्थाविर्य्यं यथा कलिरेवमातुर्य्यं यथा युगान्तस्तथा मरणमित्येवमनुमानेनानुक्तानामपि लोकपुरुषयोरवयवविशेषाणामन्येषामाग्य विद्यात् ।"

"तत्र संयोगापेक्षी लोकशब्दः षड्धातुसमुदायो हि सामान्यतः सर्व्वलोकः । तस्य हेतुरुत्पत्तिर्वृद्धिरुपप्लवो वियोगश्च तत्र हेतुरुत्पत्तिकारणं उत्पत्तिर्जन्म वृद्धिराप्यायनमुपप्लवो दुःखागमः षड्धातुविभागो वियोगः स जीवापगमः स प्राणनिरोधः स भङ्गः स लोकस्वभावः ।" इति चरके शारीरस्थाने पञ्चमेऽध्याये ।

"तस्मात् क्रिया योऽभिहिताः कस्मात् लोकस्य द्वैविध्यात् । लोको हि द्विविधः स्थावरो जङ्गमश्च । द्विविधात्मक एवाग्नेयः सौम्यश्च तद्भूयस्त्वात् । पञ्चात्मको वा ।" इति सुश्रुते सूत्रस्थाने प्रथमेऽध्याये ॥ * ॥)

लोककान्ता, स्त्री, (लोकानां कान्ता प्रिया ।) ऋद्धिनामौषधम् । इति राजनिर्घण्टः ॥ (लोकप्रिये त्रि । यथा, मो रामायणे । २ । १८ । ६ ।

"लोककान्तः प्रिय पुत्त्र कृशश्चीराम्बरं वनम् ।
प्रस्थित मत्सुतो मेऽद्य हृदयं किं न दीर्य्यते ॥")

लोकचक्षुः [स्] क्ली, (लोकानां चक्षुरिव ।) सूर्य्यः । इति शब्दमाला ॥ अवस्य लोचनम् ॥

लोकजित्, पुं, (लोकं जितवानिति । जि+क्विप् ।) बुद्धः । इत्यमरः ॥ (लोकजेतरि त्रि । यथा, शतपथब्राह्मणे । १४ । ४ । १ । ११ ।

"स काम कामयते तमाप्नोति तदे तल्लोकजिदेव ॥")

लोकतुषारः, पुं, (लोके तुषार इव ।) कर्पूरः । इति राजनिर्घण्टः ॥ (कर्पूरशब्देऽस्य गुणादिकं ज्ञातव्यम् ॥)

लोकनाथः, पुं, (लोकानां नाथः ।) बुद्धः । इति त्रिकाण्डशेषः ॥ (यथा राजतरङ्गिण्याम् । १ । १३८ ।

"लोके भगवतो लोकनाथादारभ्य केचन
ये जन्तवो गतक्लेशान् बोधिसत्त्वानवेहि तान् ॥")

ब्रह्मा । इति शब्दरत्नावली ॥ विष्णुः । इति तस्य सहस्रनामस्तोत्रम् ॥ शिवः । यथा —

"अकिञ्चनः सन् प्रभवः स सम्पदां
स लोकनाथः पितृसद्मगोचरः ।
स भीमरूपः शिव इत्युदीर्य्यते
न सन्ति याथार्थ्यविदः पिनाकिनः ॥"
इति कुमारसम्भवम् ॥

(तथा च महालिङ्गार्च्चनतन्त्रे शिवशतनामस्तोत्रे ।

"त्रैलोक्ये लोकनाथश्च चन्द्रलोके महेश्वरः ॥")

वटिकौषधविशेषः । तद्यथा —

"पारदं गन्धकञ्चैव समभागं विचूर्णयेत् ।
मृताभ्रं रसतुल्यञ्च पुनस्तेनैव मर्द्दयेत् ॥
रसाद्द्विगुणलौहञ्च लौहतुल्यञ्च ताम्रकम् ।
भक्षवराटिकायाञ्च ताम्रतद्विगुणं क्षिपेत् ॥
नागवल्लीद्रवेणैव मर्द्दयेद्यत्नतो भिषक् ।
पचेद्गजपुटेनैव स्वाङ्गशीतं समुद्धरेत् ॥
यकृत्प्लीहोदरहरः गुल्मश्वयथुनाशनः ।
पिप्पलीमधुसंयुक्तो मधुना वा हरीतकीम् ।
गोमूत्रञ्च पिबेच्चानु गुडं वा जीरकान्वितम् ॥"

इति लोकनाथो रसः । इति वैद्यकरसेन्द्रसारसंग्रहे यकृत्प्लीहाधिकारे ॥ * ॥ लोकप्रभौ, त्रि । यथा, मो रामायणे । २ । ११ । १९ ।

"लोकनाथस्य रामस्य पीडया पीडितं जगत् ।
अपर्य्यं लोकं सोमस्य राहुग्रस्तस्य पीडया ॥")

लोकपालः, पुं, (लोकान् पालयतीति । पाल+णिच्+अण् ।) राजा । इति हलायुधः ॥ (यथा, राजतरङ्गिण्याम् । १ । १४८ ।

"उत्तमो लोकपालोऽयमिति कस्य प्रत्ययः ।
यः प्रापान् विना सर्व्वं पश्यते न मनुष्यवत् ॥")

दिक्पालः । यथा —

"इन्द्रो वह्निः पितृपतिर्निर्ऋतिर्वरुणोऽनिलः ।
धनदः शङ्करश्चैव लोकपाला पुरातनाः ॥"
इति वह्निपुराणम् ॥

(यथा च, मनुः । ५ । ९६ ।
"सोमाग्न्यर्कानिलेन्द्राणां वित्ताप्पत्योर्यमस्य च ।
अष्टानां लोकपालानां वपुर्धारयते नृपः ॥")

लोकबान्धवः, पुं (लोकानां बान्धवः ।) सूर्य्यः । इति जटाधरः ॥

लोकबाह्य, पुं, (लोकात् लोकसमाजात् बाह्यः ।) सर्व्वाचारवर्ज्जितः । यथा,—
"लोकबाह्यस्तु यो वाजिगजाद्याचारवर्ज्जितः ॥"
इति जटाधरः ॥

लोकमाता स्त्री, (लोकानां मातेव ।) लक्ष्मीः । इत्यमरः ॥ (तद्वया लोकजननीसमापि च । यथा भागवते । २ । ३ । ५ ।
"प्रतिष्ठाकामः पुरुषो रोदसी लोकमातरौ ॥")

लोकलोचन, क्ली, (लोकानां लोचनमिव ।) सूर्य्यः । इति शब्दरत्नावली ॥ (जनस्य लोचनञ्च । यथा, कथासरित्सागरे । १८ । ८२ ।
"सोऽभ्यधात्तृपाक्षिप्तचेतसा यन्त्रैरितः परः ।
आगाम काव्यतिलकादस्मयो लोकलोचने ॥")

लोकविनायक , पुं (लोके विनायक इव ।) गण विशेषः । यथा —
"स्कन्दग्रहादयो ये च धार्म्मिकबाधकादयः ।
कौमाराद्यैर्भुवि सेवा ये च लोकविनायकाः ।
महदभ्युदयात्तारः सर्व्वलोकविपादिनः ॥"
इति वह्निपुराणम् ॥

लोकविश्रुति , स्त्री, (लोके विश्रुतिः ।) जनश्रुतिः । किंवदन्ती । इति केचित् ॥

लोकायत, क्ली, (लोकेषु आयतं विस्तीर्णमिव ।) तर्कभेदः । चार्व्वाकशास्त्रम् । इत्यमरभरतौ ॥

लोकायतिकः, पुं, (लोकायतं शास्त्रमस्यास्तीति । लोकायत+ठन् ।) चार्व्वाकः । इति हेमचन्द्रः ॥ (तार्किकः । यथा, शान्तिपर्व्वणि । २४८ । १ ।
"ऐन्द्रजालमनाक्षपादेष्वमरबायपि विद्यारदे ।
लोकायतिकमुख्यैश्च शुश्रुवः शब्दमीरितम् ॥")

लोकालोकः, पुं, (लोक्यतेऽसौ इति लोकः । न लोक्यतेऽसौ इति अलोकः । ततः कर्म्मधारयः ।) चक्रवालपर्व्वतः । तत्पर्य्यायः । चक्रवाडः २ । इत्यमरः ॥ द्वे बाह्यद्वीपो सप्तद्वीपवेष्टकः प्राकारवत् स्थिते गिरौ लोकालोक इति ख्यातः । अन्तर्लोक्यते सूर्य्यरश्मिभिः प्रकाशमानत्वात् इति लोकः । तथा बहिः सूर्य्यकिरणाभावात् न लोक्यते इति अलोकः । लोकश्चासौ अलोकश्चेति लोकालोकः । चक्रं महीचक्रं वलति वेष्टयति चक्रवालः । वह् ड वेष्टे च धातुः । डलयोरैक्यात् चक्रवाडः । इति भरतः ॥ (यथा रघुः । १ । ६८ ।
"लोकमन्धतमसात् क्रमोदितौ रश्मिभिः शशिदिवाकराविव ।
प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः ॥"
अस्य विवरणं यथा देवीभागवते । ८ । १४ । १५ ।
श्रीनारायण उवाच ।
ततः परस्तात्तथा लोकालोकेति नामकः ।
अचलाद्यो च लोकालोकयोश्च परिकल्पितः ॥
यावदन्तश्च देयं सुमनोर मानसोत्तरात् ।
तावतीयावती शुद्धा काञ्चनी भूमिरस्ति हि ॥
दर्पणोदरतुल्या सा सर्व्वप्राणिविवर्ज्जिता ।
यस्यां पतन् पदार्थो न किञ्चित् प्रत्युदीयते ॥
अत सर्व्वप्राणिसत्वरहिता सा च नारद ।
लोकालोक इति ख्याता पदम परिकल्पिता ॥
लोकालोकान्तरे चाद्य वर्त्तते सर्व्वदा स्थितिः ।
ईश्वरेण त्रिलोकानां यथाव्यवस्थया कृतः ॥
सूर्य्यादीनां ध्रुवान्तानां रश्मयो यत्प्रसादिह ।
अर्व्वाचीनाश्च यो लोकाद्यात्म्याना कदापि हि ॥
पराचीनत्वभाजो हि न भवन्ति च नारद ॥
तावदुन्नतमायाम पर्व्वतेन्द्रो महोदयः ।
एतावाँल्लोकविन्यासोऽयं समायामानतश्च वै ।
कविभिः स तु पञ्चाशत्कोटिभिर्गणितस्य च ॥
भूगोलस्य चतुर्थांशो लोकालोकाचलो ह्ययम् ॥
तस्योपरि चतुर्दिक्षु सृष्टा आत्मयोनिना ।
निवेशिता दिग्गजा ये तन्नामानि निबोधत ।
ऋषभः पुष्पचूडोऽथ वामनोऽपराजितः ॥
एते समस्तलोकस्य स्थितिहेतव ईरिताः ।
तेषाञ्च स्वविभूतीनां बहुवीर्य्योपबृंहणम् ॥
विशुद्धसत्त्वमैश्वर्य्यं वहयन् भगवान् हरिः ।
आस्ते विष्वक्सेनोपेतो विष्वक्सेनादिपार्षदैः ॥
निजायुधैः परिवृतो भुजदण्डैः समं ततः ।
आस्ते सकललोकस्य स्वस्तये परमेश्वरः ॥
आकल्पमेव वेषं स गतो विष्णुः सनातनः ।
स्वमायारचितस्यास्य गोपीथायात्मसाधनः ॥
योऽन्तर्विस्तार एतेन ह्यलोकपरिमाणकम् ।
व्याख्यातं यद्बहिर्लोकालोकाचल इती
रणात् ॥" ॥)

लोकश्च अलोकश्च तौ । सूर्य्यादालोकविशिष्टतद्रहितदेशौ । अत्र द्विवचनप्रयोगः स्यात् ।
यथा भागवते । ५ । २ । ३४ ।
"तत परस्तात् लोकालोकनामाचलो लोकालोकयोरन्तराले परित उपक्षिप्तः ॥")

लोकेशः, पुं, (लोकानामीशः ।) ब्रह्मा । इत्यमरः ॥ बुद्धभेदः । इति त्रिकाण्डशेषः । पारदः । इति राजनिर्घण्टः ॥ (ईशः । यथा रघुः । ३ । ६६ ।
"यथा च वृत्तान्तमिमं सदोगतस्
त्रिलोचनैकांशतया दुरासदः ।
तवैव सन्देशहराद्विशांपतिः
शृणोति लोकेश ! तथा विधीयताम् ॥"
लोकपालः । यथा, मनुः । ५ । ९७ ।
"लोकेशाधिष्ठितो राजा नास्याशौचं विधीयते ।
शौचाशौचं हि मर्त्यानां लोकेशप्रभवाप्ययम् ॥"
लोकाधिपतौ, च । यथा, भागवते । ३ । ६ । १९ ।
"पादावस्य विनिर्भिन्नौ लोकेशो विष्णुराविशत् ॥")

लोकेश्वरः, पुं, (लोकानामीश्वरः ।) बुद्धभेदः । इति त्रिकाण्डशेषः ॥ शिवस्य नामान्तरं प्रभुः ॥ (यथा, महाभारते । १ । १ । १६ ।
"अवसीदत लोकोऽयं हतमाता सखी तदा ।
उवाच चापि ऋषिना लोकेश्वरमिदं प्रभुम् ॥")
लोकपालः । यथा, महाभारते । ८ । १ । २९ ।
"पद्मगर्भसमाराभिरूढं चिव नभस्तलम् ।
सुरासुरैस्तवितानां पतीन् लोकेश्वरान्
इयात् ॥")

लोकेश्वरात्मजा, स्त्री, (लोकेश्वरस्य बुद्धस्य आत्मजेव ।) बुद्धशक्तिभेदः । तत्पर्य्यायः । तारा २ महाश्री ३ ओङ्कारा ४ स्वाहा ५ श्री ६ मनोरमा ७ तारिणी ८ जया ९ अनन्ता १० शिवा ११ खदिरवासिनी १२ भद्रा १३ वैश्या १४ नीलसरस्वती १५ शङ्खिनी १६ महातारा १७ वसुधारा १८ धनन्ददा १९ त्रिलोचना २० लोचना २१ । इति हेमचन्द्रः ॥

लोचृ ऋ क भासि । इति कविकल्पद्रुमः ॥ (चुरा० पर० अक० सेट् ।) ऋ अलुलोचत् । भासि दीप्तौ । किन्तु पुरुषोत्तमप्रभृतयस्तु भाष इति मत्वाग्रहकार भाषा वचनाद्भावस्तु । इति दुर्गादासः ॥

लोचृ, ङ ईक्षे । इति दुर्गादासः ॥ (भ्वा० आत्म० सक० सेट् ।) ईक्षं पर्य्यालोचनं प्रतिभानमिति यावत् । ऋ अलुलोचत् । ङ, लोचते कार्य्यं सुधीः । इति दुर्गादासः ॥

लोच, क्ली, (लोचते पर्य्यालोचयति सुखदुःखा दिकमिति । लोच+अच् ।) अश्रु । इति जटाधरः ॥

लोचकः, पुं, (लोचते इति । लोच+ण्वुल् ।) मांसपिण्डम् । अक्षितारका । कज्जलम् । स्त्रीणां ललाटाभरणम् । कदली । नीलवस्त्रम् । निर्बुद्धिः । कर्णपूरः । ज्या । भ्रूपर्णी । इति मेदिनी । के, ५ ॥ निर्मोकः । इति शब्दरत्नावली ॥

लोचनं, क्ली (लोच्यतेऽनेनेति । लोच+ल्युट् ।) चक्षुः । इत्यमरः ॥ तस्य शुभाशुभलक्षणं यथा,—
"रक्तान्तैः पद्मपत्राभैर्लोचनैः सुखभागिनः ।
मार्जारलोचनैः पापो महात्मा मधुपिङ्गलैः ॥
क्रूराः केकरनेत्राश्च हरिणाक्षाः कलङ्किनः ।
जिह्मैश्च लोचनैः क्रूराः सेनान्यो गजलोचनाः ॥
गम्भीराक्षा ईश्वराः स्युः मन्त्रिणः स्थूलचक्षुषः ।
नीलाम्बुजाभा विद्वांसः सौभाग्यं श्यामचक्षु
षाम् ॥
स्यात् सम्यक्तारकाणामप्युत्पाटनं स्त्रियः ।
मण्डलाक्षाश्च पापाः स्युर्निःस्वाः स्युर्दीन
लोचनाः ॥
दृक् स्निग्धा विपुला भोगी अल्पायुर्नाभि
खण्डना ॥
विषमलोचना दाम्भिको दरिद्रा दिवमन्दुः ॥"
इति गारुडे ६५ अध्यायः ॥

लोचनहिता, स्त्री (लोचनाभ्यां हिता ।) तुत्थाञ्जनम् । इति राजनिर्घण्टः ॥

लोचना, स्त्री (लोचते पश्यति लोचयतीति। लोच + ल्युः। टाप्।) बुद्धशक्तिभेदः। यस्या प्रभावं पश्यायाश्च लोकेश्वराश्चाधस्ते द्रष्टव्या ॥

लोचनामय, पुं, (लोचनयोरामयः।) चक्षुरोगविशेषः। तत्पर्य्यायः। अभिमन्थ २। इति त्रिकाण्डशेषः ॥

लोचनी स्त्री (लोच्यतेऽनया। लोच + ल्युट्। ङीप्।) महाश्रावणिका। इति राजनिर्घण्टः ॥

लोचमकट, पुं, लोचमस्तकः। इत्यमरटीकायां स्वामी ॥

लोचमस्तक, पुं, (लोचं कृष्णं मस्तकं मयूरशिखेव यस्य।) मयूरशिखौषधम्। लालचुटा इति ख्यातं। पिच्छमाणिकेति केचित्। तत्पर्य्यायः। शराणा २ कारवी ३ दीप्य ४ मयूरः ५। इत्यमरः। लोचमर्कटः ६। इति भरतः ॥

लोचिका स्त्री दधिदुग्धमर्द्दितगोधूमचूर्णकृतपिष्टकसहित हलितमण्डलाकारनिर्म्मितघृतभृष्टपिष्टिका। लुचि इति भाषा। इति पाकराजेश्वरः ॥

लोट ऋ उन्मादे। इति कविकल्पद्रुमः ॥ (भ्वा-पर-अक-सेट्।) ऋ, अलुलोटत्। लोटति लोक उन्मादयतीत्यर्थः। इति दुर्गादासः ॥

लोटुल, पुं (लोटतीति। लोट + बाहुलकात् उलच्।) अभिलोटकः। इति संक्षिप्तसारोणादिवृत्तिः ॥

लोड ऋ उन्मादे। इति कविकल्पद्रुमः ॥ (भ्वा-पर-अक-सेट्।) ऋ, अलुलोडत्। इति दुर्गादासः ॥

लोणक्ष, क्ली, (लोण लवणरसयुक्तं क्षयम्।) लवणक्षम्। इति राजनिर्घण्टः ॥

लोणा स्त्री (लवणमस्त्यस्या इति। अच्। टाप्। पृषोदरादित्वात् साधुः।) क्षुद्राम्लिका। इति राजनिर्घण्टः ॥ (तथास्याः पर्य्यायः।
"लोणा लोणी च कथिता हस्तलोणी तु
घोटिका।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

लोणार, क्ली, (लवणं ऋच्छतीति। लवण + ऋ + अण्। पृषोदरादित्वात् साधुः।) क्षारविशेषः। तत्पर्य्यायः। लवणोत्थम् २ लवणाकरजम् ३ लवणम् ४ कलणम् ५ लवणक्षारः ६ लवणः ७। अस्य गुणाः। अत्युष्णत्वम्। तीक्ष्णत्वम्। पित्तवृद्धिकारित्वम्। क्षारत्वम्। रेचनत्वम्। वातगुल्माशूलनाशित्वञ्च। इति राजनिर्घण्टः ॥

लोणाम्ला, स्त्री, क्षुद्राम्लिका। इति राजनिर्घण्टः ॥

लोत, क्ली (लुनातीति। लू + "हसिमृग्रिण्वामि।" उणा ३।८६। इति तन्।) चोरधनम्। तत्पर्य्यायः। लोप्त्रम् २। इति जटाधरः। लोप्त्री ३ लोत्रम् ४ लुप्तम् ५। इति शब्दरत्नावली ॥

लोत, पुं क्ली (लुनातीति। लू + "हसिमृग्रिण्वामि।" उणा ३।८६। इति तन्।) नेत्राम्बु। इति त्रिकाण्डशेषः। चिह्नम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ लवणम्। अश्रुपातः। इति संक्षिप्तसारोणादिवृत्तिः ॥

लोत्र, क्ली, (लूनातीति। लू + "सर्व्वधातुभ्यष्ट्रन्।" उणा ४।१५८। इति ष्ट्रन्। यद्वा, ला + "अशित्रादिभ्य इत्रोत्रौ।" उणा ४।१७२। इति उत्र। इत्युज्ज्वलः।) लोतम्। इति शब्दरत्नावली ॥ नेत्रजलम्। इति संक्षिप्तसारोणादिवृत्तिः ॥

लोध, पुं, (रुणद्धीति। रुध + अच्। रस्य लः।) स्वनामख्यातवृक्षः। रक्तवर्णस्य तस्य पर्य्यायः। तिरीटः २ मार्ज्जनः ३ रक्तः ४ लोध्रः ५ तिल्वकः ६। श्वेतस्य तस्य पर्य्यायः। शुक्लः २ शवरलोध्रः ३ महालोध्रः ४ शावरः ५। इति रत्नमाला ॥ अस्य गुणाः। कफवातनाशित्वम्। चक्षुष्यत्वम्। शोथनाशित्वम्। सरत्वञ्च। इति राजवल्लभः ॥

लोध्र, पुं, (रुणद्धीति। रुध + बाहुलकात् रन्। रस्य लः।) लोध्रद्रुमः। (यथा, शिशुपालवधे। ९।४६।
"अधरेष्वलक्तकरसः सुदृशां
विशदं कपोलभुवि लोध्ररजः।
नवमञ्जनं नयनपङ्कजयो-
र्विभिदे न शङ्कितविलासपदम् ॥")
तत्पर्य्यायः। गालवः २ शावरः ३ तिरीटः ४ तिल्वः ५ मार्ज्जनः ६। इत्यमरः ॥ पट्टलोध्र माचे लोध इति ख्याते। पट्टिकालोध्र इति सुभूतिः। शाबरः श्वेतलोध्रे पीतो रक्तलोध्र इति स्वामी ॥ तस्य पर्य्यायान्तरं यथा। लोधः ७ भिल्लतरुः ८ तिलकः ९ काण्डकीलकः १० लोध्रकद्रुमः ११ शम्बरः १२ हस्तिरोध्रकः १३ तिलकः १४ काण्डनीलकः १५ हेमपुष्पकः १६ भिल्ली १७ शावरकः १८। अस्य गुणाः। कषायत्वम्। शीतलत्वम्। वातकफास्रनाशित्वम्। चक्षुष्यत्वम्। विषघ्नत्वम्। तत्र विशिष्टो वल्कलोध्रः। इति राजनिर्घण्टः ॥ अपि च।
"लोध्रस्तिल्वस्तिरीटश्च शाबरो गालवस्तथा।
द्वितीयः पट्टिकाख्यः स्यात् क्रमुकः स्थूलवल्कलः ॥
लोध्रपत्रो बृहत्पत्रः पट्टीलाक्षाप्रसादनः।
लोध्रो ग्राही लघुः शीतश्चक्षुष्यः कफपित्तनुत्।
कषायो रक्तपित्तासृग्ज्वरातीसारशोथहृत् ॥"
इति भावप्रकाशः ॥
(तथा च।
"निष्कतुल्यं मतो लोध्रो दृढयष्टिस्तिरीटकः।
तस्य मूलत्वचं शुभ्रामन्तर्वल्कलवर्ज्जिताम्।
चूर्णयेत् त्रिधा तस्या द्वौ भागौ क्वाथयेत्ततः।
लोध्रस्यैव कषायेण तृतीयं तेन भावयेत्।
भागं तु दशमं तस्य पुनः क्वाथेन भावयेत्।
शुष्कं पूर्व्वं पुनस्तत्त्वा तत ऊर्द्ध्वं प्रयोजयेत्।
दधिमस्तुसुरामण्डमूत्रैरथ मधुना।
दधिमण्डमथो वा तत् पाचितं पिबेत् ॥"
"सुरां लोध्रकषायेण चास्यां पञ्चशिवां पिबेत् ॥"
इति चरके कल्पस्थाने नवमेऽध्याये ॥)

लोध्रकद्रुम पुं, (लोध्र एव लोध्रकः। स एव द्रुमः।) लोधः। इति राजनिर्घण्टः ॥

लोप पुं, छेदः। अन्तर्भावः। लुप्यमानोभावे घञ्प्रत्ययेन निष्पन्नोऽयम्। (अभावः। यथा, रघुः। १।६८।
"सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः।
प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः ॥")
व्याकरणमते वर्णनाशः। तथा हि। नाशविधिर्येषा। लोपोऽस्त्रीमाहोरित्यादि ॥ अपि च।
"सकलेभ्यो विशिष्य स्याद्बली लोपविधिस्तथा।
लोपस्वरादेशयोस्तु स्वरादेशो विधिर्बली ॥'
इति दुर्गादासः ॥

लोपा, स्त्री, अगस्त्यमुनिपत्नी। इति जटाधरः ॥

लोपाक, पुं (लोपं शीघ्रमदर्शनं अकति प्राप्नोतीति। अक + अच्।) शृगालः। इति त्रिकाण्डशेषः ॥ (यथा, सुश्रुते। १।४६।
"श्वाविच्छल्यकगोधाशशवृषदंशलोपाकलोमशकर्णकदलीमृगप्रियकाजगरसर्पमूषिकनकुल
महाबभ्रुप्रभृतयो बिलेशयाः ॥")

लोपापक, पुं, (लोपं द्रुतमदर्शनं आप्नोतीति। आप + ण्वुल्।) शृगालः। इति शब्दमाला ॥

लोपापिका स्त्री, (लोपापक + स्त्रियां टाप्। अत इत्वम्।) शृगाली। इति शब्दमाला ॥

लोपामुद्रा, स्त्री, अगस्त्यमुनिभार्य्या। इत्यमरः ॥ लोपयति योषितां रूपाभिमानमिति लोपा पचाद्यच् आमुदयति बहु हर्षमिति आमुदा अच् तत कर्म्मधारयः। किंवा न मुद इति अमुदा पतिशुश्रूषया लोपे अमुदा लोपामुद्रा। लोपा च।
"लोपामुद्रा तु वैदर्भी लोपा स्त्री कुम्भजन्मनः।'
इति कल्पभूषणम्। इति भरतः ॥ ० ॥
अस्या अन्यदाचप्रसङ्गेन अगस्त्यशब्दे लिख्यते। अगस्त्यर्षेरावृत्तं गौरीव विवरात्री विधानात्। यथा ब्रह्मवैवर्त्ते।
"अप्राप्ते भास्करे कन्यां पितृभूतेष्वभिदिने।
अर्घ्यं दद्युरगस्त्याय गौडदेशनिवासिनः ॥"
नारदीये।
"षष्ठे लोप विनिक्षिप्य तिलपुष्पाक्षतैर्युतम्।
मन्त्रेणानेन वै दद्याद्दक्षिणाशामुखस्थितः ॥
काशपुष्पप्रतीकाश अग्निमारुतसम्भव।
मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते ॥"
प्राचनन्तु।
"आतापिर्भक्षितो येन वातापिश्च महासुरः।
समुद्रः शोषितो येन स मेऽगस्त्यः प्रसीदतु ॥"
गन्धादिकन्तु अगस्त्याय नम इत्यनेन देयं विधि-मात्रेणो नामाधस्तात् प्रामाण्यात्।
दक्षिणाशामुखस्थित इति अन्यत्रापि ग्रथो गाङ्गकर्तृधर्म्मावादिति रत्नाकरः ॥ ० ॥
तत्पत्न्यर्घदानमन्त्रः।
"लोपामुद्रे महाभागे राजपुत्रि पतिव्रते।
गृहाणार्घ्यं मया दत्तं मैत्रावरुणिवल्लभे ॥"
इति मलमासतत्त्वम् ॥

(अस्या जन्मादिविवरणन्तु महाभारते वन पर्व्वणि ९९ अध्यायमारभ्य द्रष्टव्यम् ।)

लोपामुद्रापति, पुं, (लोपामुद्रायाः पतिः ।) अगस्त्यमुनिः । इति पुराणम् ॥

लोपाशक, पुं, (लोपं आकुलीभावं चकितमशाति । अश् + ण्वुल् ।) शृगालः । इति हारावली ॥

लोपाशिका स्त्री (लोपाशक + स्त्रियां टाप् । अत इत्वम् ।) शृगाली । इति हारावली । १०२ ॥

लोप्त्र, क्ली (लुप + ष्ट्रन् ।) चौर्य्यधनम् । लोत्रम् । इत्यमरः ॥ (यथा, महाभारते । १ । १०७ । ५ ।
"ते तस्यावसथे लोप्त्रं दस्यवः कुरुसत्तम ।
निधाय च भयाल्लीनास्तत्रैवानागते बले ॥")

लोप्त्री, स्त्री, (लोप्त्र + स्त्रियां ङीष् ।) लोप्त्रम् । इति शब्दरत्नावली ॥

लोभ, पुं, (लुभ + घञ् ।) आकाङ्क्षा । परद्रव्याभिलाषः । तत्पर्य्यायः । तृष्णा २ लिप्सा ३ वशः ४ स्पृहा ५ काङ्क्षा ६ गृध्नुता ७ गर्द्धः ८ वाञ्छा ९ इच्छा १० ईहा ११ मनोरथः १२ कामः १३ अभिलाषः १४ । इति हेमचन्द्रः ॥ ० ॥
तस्य लक्षणं यथा,—
"परवित्तादिकं दृष्ट्वा नेतुं यो हृदि जायते ।
अभिलाषो द्विजश्रेष्ठ स लोभः परिकीर्त्तितः ॥"
इति पाद्मे क्रियायोगसारे १६ अध्यायः ॥ ० ॥
स च ब्रह्मलोभराज्जातः । यथा,—
"ब्रह्मणोऽभवत् क्रोधो लोभश्चाधरसम्भवः ।"
इति मात्स्ये सृष्ट्युपनिर्णये ३ अध्यायः ॥ ० ॥
स तु नाशकारणं यथा,—
"लोभप्रमादविश्वासैः पुरुषो नश्यति त्रिभिः ।
तस्माल्लोभो न कर्त्तव्यः प्रमादो न न विश्वसेत् ॥"
इति गारुडे नीतिसारे ११५ अध्यायः ॥
अपि च ।
"त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥"
इति श्रीभगवद्गीतायाम् १६ अध्यायः ॥
(लोभनिन्दाविषयकश्लोकाश्च यथा,—
"लोभः प्रतिष्ठा पापस्य प्रसूतिर्लोभ एव च ।
द्वेषक्रोधादिजनको लोभः पापस्य कारणम् ॥
लोभात् क्रोधः प्रभवति लोभात्कामः प्रजायते ।
लोभान्मोहश्च नाशश्च लोभः पापस्य कारणम् ॥
लोभात् क्रोधः प्रभवति क्रोधाद्द्रोहः प्रवर्त्तते ।
द्रोहेण नरकं याति शास्त्रज्ञोऽपि विचक्षणः ।
मातरं पितरं पुत्रं भ्रातरं वा सुहृत्तमम् ।
लोभाविष्टो नरो हन्ति स्वामिनं वा सहोदरम् ॥
लोभेन बुद्धिश्चलति लोभो जनयते तृषाम् ।
तृषार्त्तो दुःखमाप्नोति परत्रेह च मानवः ॥
लोभाविष्टो नरो वित्तं वीक्षते न स चापदम् ।
दुग्धं पश्यति मार्ज्जारो यथा न लगुडाहतिम् ॥
प्रायेण धनिनामेव धनलोभो निरन्तरम् ।
पश्य कोटिद्वयोपेतं लक्षाय प्रयतं धनुः ॥
नाभ्यर्थमर्पितया शुभसुहृदि नवीनमनम् ।
अभिनैस्ताभ्यर्ण लोभस्यमानोऽस्वयविषम् ॥
लोभं सदा विचिन्त्यो लुब्धेभ्यः सर्व्वतो भयं दृष्टम् ।
कार्य्याकार्य्यविचारो लोभविमूढस्य नास्त्येव ॥
तत्त्वधर्म्मतपोभिः प्रकृष्टधर्म्मे प्रज्ञावद्भिर्विदितः ।
लोभो यत्र प्रविष्टः कुटिलं हृदयं किरातो नाम ॥
श्वेतोपमत्र इति पूर्व्वपश्चाद्विशेष-
भावी क्षमाक्रमि वसुप्रकरं निधाय ।
लक्ष्मोदये समय वदति यद्वदन्यो
दीपा भवन्ति कलुषा बलवान् हि लोभः ॥
यद्दुर्गामटवीमटन्ति विकटं क्रामन्ति देशान्तरं
गाहन्ते गहनं समुद्रमतनक्लेशां कृषिं कुर्व्वते ।
सेवन्ते कृपणं पतिं गजघटासङ्घट्टदुःसञ्चरं
सर्पन्ति प्रधनं धनान्धितधियस्तल्लोभविस्फूर्ज्जितम् ॥" ० ॥)

लोभी, [न्] त्रि (लोभोऽस्यास्तीति । लोभ + इनि ।) लोभयुक्तः । तत्पर्य्यायः । गृध्नुः २ गर्द्धनः ३ लुब्धः ४ अभिलाषुकः ५ तृष्णकः ६ लोलुपः ७ लोलुभः ८ । इति जटाधरः । लिप्सुः ९ । इति हेमचन्द्रः ॥

लोभ्य, पुं, (लुभ्यते इति । लुभ + यत् ।) मुद्गः । इति हेमचन्द्रः ॥ लोभनीये, त्रि ॥

लोम, [न्] क्ली (लूयते छिद्यते इति । लू + "नामन्सीमन्व्योमन्रोमन्लोमन्पाप्मन्ध्यामन् ।" उणा० ४ । १५० । इति मनिन्प्रत्ययेन साधुः ।) शरीरस्थकेशः । तत्पर्य्यायः । तनूरुहम् २ रोम ३ । इत्यमरः ॥ तनुरुहम् ४ तनुरुट् ५ । इति शब्दरत्नावली ॥ (यथा, मुण्डकोपनिषदि । १ । १ । ७ ।
"यथोर्णनाभिः सृजते गृह्णते च
यथा पृथिव्यामोषधयः सम्भवन्ति ।
यथा सतः पुरुषात् केशलोमानि
तथाक्षरात् सम्भवतीह विश्वम् ॥")
तत्तु गर्भस्थस्य षष्ठे मासि भवति । इति सुख-बोधः ॥ अपि च ।
"षष्ठे मासि च नारीणां देहिके नाधिकारिता ।
उदरस्थस्य बालस्य नखलोमप्रसवनात् ॥"
इति स्मृतिः ॥
(तथास्य विवृतिः ।
"अस्थीनि मनांसि लोमानि अवयवानि भवन्ति हि ।
सन्ति नावन्ति लोमानि यावन्तो लोम कूपकाः ॥
अङ्गप्रत्यङ्गनिर्वृत्तिः स्वभावादेव जायते ।
अङ्गप्रत्यङ्गनिर्वृत्तौ ये भवन्ति गुणागुणाः ॥
ते ते गर्भस्य विज्ञेया धर्म्माधर्म्मनिमित्तजाः ।"
अन्यत्र च ।
"निवर्त्तन्ते विधिः सम्भवाद् ईश्वरात् । धर्मविशेषो रचनाविशेषः । इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

लोम, क्ली, लाङ्गूलम् । इति जटाधरः ॥ (रोम । यथा, तैत्तिरीयसंहितायाम् । ५ । ५ । ६ । २ ।
"अयो ह्यस्याग्नालोमे सन्दर्शनं वा यदि प्रिया तन्नूपरश्वेति ॥")

लोमकर्णी, स्त्री भारुण्डा । इति राजनिर्घण्टः ॥

लोमकर्णः पुं (लोमयुक्तौ कर्णौ यस्य ।) शशः । इति हेमचन्द्रः ॥ (अस्य पर्य्यायो यथा,—
"शशकर्णः शशः शूली लोमकर्णो विलेशयः ।"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ।) लोमयुक्तकर्णविशिष्टे, त्रि ॥

लोमघ्न, क्ली, (लोमानि हन्तीति । हन + टक् ।) इन्द्रलुप्तकम् । इति भूरिप्रयोगः ॥ टाक इति भाषा ॥ लोमघातके, त्रि ॥

लोमपाद, पुं, (लोमानि पादयोर्यस्य ।) अङ्गदेशीयराजविशेषः । स तु अयमशृङ्गमुनेः श्वशुरः । इति रामायणम् ॥ (अयं हि सूर्य्यवंशीयस्य दशरथस्य सखा । विभाण्डककुमारः ऋष्यशृङ्गो यद्देशे बहुकालं अवसत् तन्न वर्षति स्म तदा तमानीय शान्तां नाम दशरथकन्यां दत्तवान् । एतद्वृत्तान्तन्तु महाभारते वनपर्व्वणि ११ अध्यायतो विशेषतो द्रष्टव्यम् ।)

लोमपादपुर, स्त्री, (लोमपादस्य पुः ।) पुरीविशेषः । अधुना भागलपुर इति ख्याता । तत्पर्य्यायः । चम्पा २ मालिनी ३ कर्णपूः ४ । इति हेमचन्द्रः ॥

लोमपर्णी, स्त्री, (लोमयुक्तं पर्णम् ।) माषपर्णी । इति राजनिर्घण्टः ॥

लोमविष, पुं, (लोम्नि विषं यस्य ।) व्याघ्रादिः । इति हेमचन्द्रः ॥

लोमश, पुं (लोमानि सन्त्यस्येति । लोमन् + "लोमादिभ्यः शः ।" इति शः ।) मुनिविशेषः । (मुनिरयं तीर्थाभिलाषिणा पाण्डवेन युधिष्ठिरेणानुगामी सर्व्वतीर्थदर्शनार्थमिति यथा माहात्म्ये महाभारते वनपर्व्वणि द्रष्टव्यम् ।) मेषः । अतिलोमान्विते, त्रि । इति मेदिनी । शे ३७ । यथा,—
"कदाचिदपुत्री यस्य भवति लोमशः सुतः ॥"
इति कामन्दकम् ।
(आग्नापहरणरूपकर्म्मविपाकात् लोमशो भवति । यथा, महाभारते । १३ । १११ । ११ ।
"आज्यं हृत्वा तु पुरुषो लोमशः सम्प्रजायते ॥")

लोमशकाण्डा स्त्री (लोमशः काण्डो यस्याः ।) कर्कटी । इति राजनिर्घण्टः ॥ (कर्कटीशब्देऽस्या गुणादयो ज्ञातव्याः ।)

लोमशपर्णिनी, स्त्री, (लोमशं पर्णमस्त्यस्या इति । इनि । ङीप् ।) माषपर्णी । इति शब्दचन्द्रिका ॥

लोमशपुष्पक, पुं, (लोमशानि पुष्पाणि यस्य । कप् ।) शिरीषवृक्षः । इति राजनिर्घण्टः ॥

लोमशमार्ज्जार, पुं, (लोमशो लोमयुक्तो मार्ज्जारः ।) मार्ज्जारविशेषः । गन्धमूषा

इति भाषा। तत्पर्य्यायः। पूतिकः २ मार्ज्जारकः ३ सुगन्धी ४ मत्स्यगन्धः ५ गन्धमार्ज्जारकः ६। इति राजनिर्घण्टः॥ अस्य गुणाः।
"गन्धमार्ज्जारवीर्य्यन्तु वीर्य्यदं कफवातनुत्।
कण्डूकुष्ठहरं मेध्यं सुगन्धं स्वेदगन्धनुत्॥"
इति भावप्रकाशः॥

लोमशा, स्त्री (लोमानि सन्त्यस्या इति। लोमन् + श। टाप्।) काकजङ्घा। मांसी। (अस्याः पर्य्यायो यथा,—
"जटा जटिला मिषी मांसी क्रव्यादा च सा।
किरातिनी च जटिला लोमशा तु तपस्विनी॥"
इति वैद्यकरत्नमालायाम्॥)
वचा। (अस्याः पर्य्यायो यथा —
"वचोग्रगन्धा षड्ग्रन्था गोलोमी शतपर्व्विका।
क्षुद्रपत्री च मङ्गल्या जटिलोग्रा च लोमशा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
शुक्लशिम्बिः। महामेदा। काशीशम्। शाकिनीभेदः। इति मेदिनी। शे, ५०॥ अतिबला। इति विश्वः॥ शृगाली। एर्व्वारुः। गन्धमांसी। इति राजनिर्घण्टः॥

लोमशातनं क्ली (लोम्नां शातनम्।) लोमपातनम्। तस्यौषधानि यथा —
"हरितालं शङ्खचूर्णं कदलीदलभस्म च।
एतच्चूर्णेन चोद्धृत्य लोमशातनमुत्तमम्॥
तथा हरितालञ्च शम्बुकाख्यं भस्म च।
काञ्जिकेन समायुक्तं लोमशातनमुत्तमम्॥
सुधा च हरितालञ्च शङ्खचूर्णं मनःशिला।
तैलेनैव समेतञ्च ज्ञातव्यं लेपयेत्।
तत्पश्चात्तु समादेव लोमशातनमुत्तमम्॥"
इति गारुडे १८५ अध्यायः॥
(तथाच।
"भल्लातकं विड़ङ्गञ्च यवक्षारञ्च मेचकम्।
मनःशिला शङ्खचूर्णं तैलञ्च तथैव च।
लोमानि शातयत्येव लेपः कार्य्यो विचारतः॥"
इति वैद्यके भैषज्यरत्नावल्यां क्षुद्ररोगाधिकारे॥ ७॥)

लोमहर्षण, क्ली, (लोम्नां हर्षणमिव।) रोमाञ्चः। इत्यमरः॥ (लोम्नां हर्षणमस्मादिति। रोमाञ्चकारके त्रि। यथा महाभारते। १। १७०। १॥
"तस्मिन् महाभये घोरे तुमुले लोमहर्षणे।
यदर्द्धं प्रतरालानि चक्रिया प्रदुर्भवा॥")

लोमहर्षण पुं (निखिलपुराणकथाश्रवणात् लोम्नां हर्षणं उद्गतो यस्मात्।) सूतः। यथा,
"पुराणसंहिता चक्रे पुराणार्थविशारदः।
प्रख्यातो व्यासशिष्योऽभूत् सूतो वै लोमहर्षणः।
पुराणसंहितां तस्मै ददौ व्यासो महामुनिः॥"
इति विष्णुपुराणे ३ अंशे ४ अध्यायः॥ ७॥
स च बलरामेण हतः। यथा —
"तथा चैव बलभद्रो निहतो लोमहर्षणः।
बलरामाच्युतात्मा नैमिषेऽभूत् महात्मना॥"
इति वह्निपुराणे २० अध्यायः॥

लोमहृत् पुं (लोमानि हरति नाशयतीति। हृ + क्विप्।) हरितालम्। इति हेमचन्द्रः॥

लोमालिका स्त्री (लोमाढ्या लोमशा एव कायतीति। कै + क। टाप्।) शृगालिका। यथा —
"लोमालिका दीर्घजिह्वा किखिवक्त्रा मुखी च सा॥"
इति त्रिकाण्डशेषः॥

लोल त्रि, (लोडतीति। लुड विलोडने + अच्।) चञ्चलः। (यथा, साहित्यदर्पणे ६ परिच्छेदे। १४१।
"पक्ष्मलोत्पलितनयनपत्र
दलवलयविलासमभीरे।
पर्य्यङ्कमिव सदसैव तदङ्गा
लालोलकमलमिव करेण॥")
साकाङ्क्षः। इत्यमरः॥ (यथा रघुः। ७। २३।
"प्रौढप्रकामाधरिते मनोज्ञा
मध्योपलोलानि विलोचनानि॥"
पुं, तामसमनुः। इति मार्कण्डेयपुराणम्। ७४। ४१॥)

लोला स्त्री, (लोल + टाप्।) जिह्वा। लक्ष्मीः। इति मेदिनी। ले, १०॥ चपला स्त्री च। (यथा, आर्य्यासप्तशत्याम्। ६ ८।
"सर्व्वाङ्गमयमनसो लोला ग्राम अमेव सम्यग्याम्।
अचलसमपि भाग्यवन्तो भजते पुरुषाविलेव सा॥"
चतुर्दशाक्षरवृत्तिविशेषः। इति छन्दोमञ्जरी॥ अस्य लक्षणादिकं छन्दः शब्दे द्रष्टव्यम्॥)

लोलार्क, पुं, (लोलनामा अर्कः।) सूर्य्यः। यथा
स्कन्द उवाच।
"तत्र सूर्य्योदयवसात् धर्म्मं एव विभावरः।
नैमोदितम् वै धर्म्मो चक्षुर्भिर्दितमानसाः॥
तत्र महर्षि मुनयोगमक्षमा विभावरा।
पुरपौरायसयुक्ता सदाचारसमन्विता॥
सम्यौलिक्षिप्तया दिवो रावणाचो महात्मनाम्।
मध्ये नागकुलम् सर्व्वे यक्षाणि च यक्षमा॥
तत्त्विखुवन भवत् विभावरपुरोत्तमम्।
दिवा सूर्य्यस्य सहस्र चकरायाच चकवत्॥
तत्र कोर्द्धाभिसूचैव भास्वता विभिर्दितिः।
भाद्रभौ रावणपुर तद्दृश्य यतीश्वराः॥
तत्राद्भुता तदा दृष्टे क्षोभाकातैव चक्षुषा।
विलयाताम्बराद्दृष्टं लोकपुत्र इव यत्॥
पतमान समालोक्य पुर भास्वद्दृष्टः।
यतो भवाय सर्व्वाय इदमुचेर्यौवत॥
दिवो कल्पितमधस्थे भास्वा तत्रैव चाः।
कादिमृषुकुर धर्म्मे इरभग पतमानौ॥
सदाचरण यक्ष कुमायाम् धर्म्मलोकवः।
श्रुत्वा च विश्वकामाय कैलासे भास्वते हरि॥
कालवान् दैवगतिवा जयविशेषैव तद्।
पातितं रावणपुर तत्र कुशलिलोचनः॥
कुहरघु भगवान् क्षमिभीर्द्दमनामगतः।
हदम्राविर्व्विवेशैव विमयात यशोऽमरात्॥
तयो यथा सुरपति सुद्रे च बन्धयात्।
इत्थं महेश्वरयाक्त सन्दर हरिसाकरात्॥
गत्वा ब्रह्मा च देवेश शङ्कर शूलपाणिनम्।
प्रयाद्य भास्वरायापि शारादकाशमागमत्॥
ततो दिवाकरं भूय पातिताद्दाय शङ्कर।
तथा नामास्य लोलेति रथमारोपयत् पुनः॥
आरोपिते दिवकरे महाश्रेष्ठ सुरैरिदम्।
यथाम्बरं सततं पुनरारोभवादिति॥"
इति श्रीवामनपुराणे सुकेशिचरिते लोलार्कवर्णनं नाम १५ अध्यायः॥

लोलिका, स्त्री, (लोलतीति। लुल + ण्वुल। टापि अत इत्वम्।) चाङ्गेरी। यथा —
"सुदा दन्तशठाम्लष्ठा चाङ्गेरी लोलिका च सा॥"
इति जटाधरः॥

लोलित, त्रि, श्लथ। ल्यांथा इति भाषा। लुल विमर्द्दे अधाक्षरे चलि लोल लोड्य चाल इत्यर्थे इत्यप्रत्ययेन निष्पन्नः॥

लोलुप, त्रि, (गर्हितं लुम्पतीति। लुप + यङ् + अच्।) अतिलुब्धः। इत्यमरः॥ (यथा, माघे। १। ४०।
"तथापि वाचालतया युनक्ति मां
मिथस्त्वदाभाषणलोलुपं मनः॥")

लोलुभ, त्रि, (भृशं लुभ्यतीति। लुभ + यङ् + अच्।) लोलुपः। इत्यमरः॥ (यथा, कथासरित्सागरे। ११७। ६८।
"क्षयोदयैरनिशं पुंभावं स दृष्ट्वा कमललोलुभः।
तत्राकं को भवेन्नार्यां सुखस्य स किं पुनः॥")

लोड, ऋ उन्मादे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ऋ, लोडति धार्य्यं लोल। इति दुर्गादासः॥

लोष्ट, क्ली, (लोष्टते इति। लोष्ट + अच्।) लौहमलम्। इति राजनिर्घण्टः॥ लेष्टुः। इत्यमरः॥

लोष्ट पुं क्ली, (लोष्टते इति। लोष्ट + घञ्। यद्वा लुप्यते इति। लू + "लोष्टपलितौ।" उणा० ३। ८९। इति क्तप्रत्ययेन निपातितः।) मृत्पिण्डखण्डम्। ढेला इति भाषा। तत्पर्य्यायः। लोष्टुः २। इति शब्दरत्नावली अमरश्च॥ लोष्टु ३ दलिः ४। इति हेमचन्द्रः॥ (यथा वैराग्यशतके। १।
"अहौ वा हारे वा बलवति रिपौ वा
सुहृदि वा
मणौ वा लोष्टे वा कुसुमशयने वा दृषदि वा।
तृणे वा स्त्रैणे वा मम समदृशो यान्तु दिवसाः
क्वचित् पुण्यारण्ये शिव शिव शिवेति प्रलपतः॥")

लोष्टक, पुं (लोष्ट इवेति। इव + कन्।) लेष्टुभेदनः। इत्यमरटीकायां भरतः॥

लोष्टभेदन, पुं (भिनत्तीति। भिद् + ल्युः। लोष्टस्य भेदनः।) लोष्टमर्द्दनार्थमुद्गरः। मर इति ख्याते इति केचित्। तत्पर्य्यायः। कोटिशः २ लोष्टघ्नः ३ लेष्टुघ्नः ४ कोटिशः ५ लोष्टोघ्नः ६। इत्यमरटीका॥

लोष्टु, पुं, लोष्टः। इति हेमचन्द्रः॥

लोहं, क्ली, अगुरु । इत्यमरः ॥ (यथास्य पर्य्यायः ।
"अगुरु प्रवरं लोहं राजार्हं योगजन्तथा ।
वंशिकं क्रिमिजञ्चापि क्रिमिजग्धमनार्य्यकम् ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

लोहः, पुं क्ली (लूयतेऽनेनेति । लू + बाहुलकात् ह ।) लौहम् । लोहकम् । सर्व्वतैजसम् । इति मेदिनी । हे, ८ । रुधिरम् । इति राजनिर्घण्टः ॥ अथ शुद्धलोहस्य पर्य्यायः । शुल्वम् २ शुल्वायसम् ३ तीक्ष्णसारम् ४ शिलात्मजम् ५ अश्मजम् ६ कृषिलोहम् ७ सारम् ८ शस्त्रायसम् ९ । अथ तीक्ष्णलोहस्य पर्य्यायः । तीक्ष्णम् २ शस्त्रायसम् ३ शस्त्रम् ४ पिण्डम् ५ पिण्डायसम् ६ शठम् ७ आयसम् ८ निशितम् ९ तीव्रम् १० खड्गम् ११ मुण्डजम् १२ अयः १३ चित्रायसम् १४ चीनजम् १५ । अस्य गुणाः । रूक्षत्वम् । उष्णत्वम् । तिक्तत्वम् । वातपित्तकफप्रमेहपाण्डुशूलनाशित्वम् । तीक्ष्णत्वम् । मुण्डाधिकगुणत्वञ्च । इति राजनिर्घण्टः ॥ * ॥ अथ लोहस्योत्पत्तिनामलक्षणगुणाः ।
"पुरा लोमिलदैत्यानां निघ्नतां सुरैर्युधि ।
उत्पन्नानि शरीरेभ्यो लोहानि विविधानि च ॥
लोहोऽस्त्री शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी ।
गुरुता दृढ़तोत्क्लेदकदाहस्य कारिता ।
अश्मदोषः सुदुर्गन्धो दोषाः सप्तायसस्य तु ॥
लोहं तिक्तरसं शीतं मधुरं तुवरं गुरु ।
रूक्षं वयस्यं चक्षुष्यं लेखनं वातलं जयेत् ॥
कफं पित्तं गरं शूलं शोथार्शःप्लीहपाण्डुताः ।
मेदोमेहकृमीन् कुष्ठं तत्किट्टं तद्वदेव हि ॥

षण्ढत्वकुष्ठामयमृत्युदं भवेत्
हृद्रोगशूलौ कुरुतेऽश्मरीञ्च ।
नानारुजानाञ्च तथा प्रकोपं
करोति हृल्लासमशुद्धलोहम् ॥
लौहकारि सकारादि यावन्
पीतमुक्तिमदस्मकृत पुरम् ।
मारणं न तदुक्ते शरीरके
दाहकं कृमि वमनञ्च यच्छति ॥"*॥

तत्र कान्तलोहस्य लक्षणं गुणाश्च ।
"चमत्कारं तदाकारात् द्रावकत्वाच्च वेदिते ।
लौहे स्पर्शे च कान्तानि तस्मात्कान्तमभिधीयते ॥
लोहं धारादयं कान्तमानमतिवारणम् ।
आर्द्रपाण्डुर्वातशूलञ्च परिणामजम् ।
हृद्रिन पीनसं पित्तं श्वासमाशु व्यपोहति ॥"
अथ कान्तलोहस्य लक्षणं गुणाश्च ।
"यत्पात्रे न प्रसरति जले तैलबिन्दुः प्रतप्ते
हिङ्गुर्गन्धं त्यजति च निजं तिक्ततां निम्बकल्कः ।
तप्तं दुग्धं भवति शिखराकारकं नैति भूमिं
कृष्णाङ्गः स्यात् चणकसदृशः कान्तलोहं
तदुक्तम् ॥
गुल्मोदरार्शःशूलामामवातं भगन्दरम् ।
कामलाशोथकुष्ठानि क्षयं कान्तमयो हरेत् ॥
प्लीहानमम्लपित्तञ्च यकृच्चापि शिरोरुजम् ।
सर्व्वान् रोगान् विजयते कान्तलोहं न संशयः ।
बलं वीर्य्यं वपुः पुष्टिं कुरुतेऽग्निं विवर्द्धयेत् ॥"
अथ किट्टम् ।
"ध्मायमानस्य लोहस्य मलं मण्डूरमुच्यते ।
लोहकिट्टाभिधा किट्टी सिंहाणञ्च निगद्यते ॥
यल्लोहं यद्गुणं प्रोक्तं तत्किट्टमपि तद्गुणम् ॥"
अथ लोहस्याशुद्धस्य दोषमाह ।
"षण्डत्वकुष्ठामयमृत्युहारि
हृद्रोगशूलौ कुरुतेऽश्मरीञ्च ।
नानारुजानाञ्च तथा प्रकोपं
कुर्य्याच्च हृल्लासमशुद्धलोहम् ॥"
अथ लोहस्य शोधनार्थं शोधनमभिधीयते ।
"पत्तलीकृतपत्राणि लोहस्याग्नौ प्रतापयेत् ।
निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके ॥
गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा ।
एवं लोहस्य पत्राणां विशुद्धिः सम्प्रजायते ॥"
अथ लोहस्य मारणविधिः ।
"शुद्धलोहभवं चूर्णं पातालगरुडीरसैः ।
मर्द्दयित्वा पुटेद्वह्नौ दद्यादेवं पुटत्रयम् ॥
पुटत्रयं कुमार्य्याश्च कुठारच्छिन्निकारसैः ।
पुटषट्कं ततो दद्यादेवं तीक्ष्णमृतिर्भवेत् ॥"
अन्यच्च ।
"निपीड्य मर्द्दयेत् दत्त्वा तीक्ष्णचूर्णकम् ।
मर्द्दयेत् कन्यकानीरैर्यामयुग्मं ततः पुटेत् ।
एवं सप्तपुटैर्मृत्युं लौहचूर्णमवाप्नुयात् ॥
अथोऽयमुत्तमो योगो ब्रह्मणो लोहमारणे ।
कथ्यते रामराजेन कौतुकादपि साधुना ॥
हरतालकगुणं गन्धं दत्त्वा कुमार्य्याश्च कन्यकाम् ।
द्वयोः समं लोहचूर्णं मर्द्दयेत् कन्यकाद्रवैः ।
यामयुग्मं ततः पिण्डं कृत्वा ताम्रस्य पात्रके ।
घर्म्मे धृत्वा रुबुकस्य पत्रैराच्छादयेद्बुधः ॥
यामद्वयाद्भवेदुष्णं धान्यराशौ न्यसेत्ततः ।
दत्त्वोपरि शरावञ्च त्रिदिनान्ते समुद्धरेत् ॥
पिष्ट्वा च गालयेद्वस्त्रादेवं वारितरं भवेत् ।
दारितस्य दलं पिष्ट्वा तच्चतुर्थं शतावरी ॥
तद्वैनायधूमं समीयात् क्रामयेदपि ।
आतपे शोषयेत्तच्च पुटेदेवं पुनः पुनः ॥
एकविंशतिवारैस्तु म्रियते नात्र संशयः ।
एवं सर्व्वाणि लोहानि स्वर्णादीन्यपि मारयेत् ॥"
अथ मारितलोहस्य गुणाः ।
"लोहं तिक्तं सरं शीतं कषायं मधुरं गुरु ।
रूक्षं वयस्यं चक्षुष्यं लेखनं वातलं जयेत् ॥
कफं पित्तं गरं शूलं शोथार्शःप्लीहपाण्डुताः ।
मेदोमेहकृमीन् कुष्ठं तत्किट्टं तद्वदेव हि ॥
शुद्धाभिषेकात् समारभ्य यावत् कुर्व्वीत लोहकम् ।
तावल्लोहं समश्नीयाद्यथादोषानलं नरः ॥
कूष्माण्डं तिलतैलञ्च माषान्नं राजिकां तथा ।
मद्यमम्लरसञ्चैव वर्ज्जयेल्लौहसेवकः ॥"
इति भावप्रकाशः ॥
लोहपात्रे भक्ष्यनिषेधो यथा,—
"यदा तु चायसे पात्रे पक्वमश्नाति वै द्विजः ।
स पापिष्ठोऽपि भुङ्क्तेऽन्नं रौरवे परिपच्यते ॥"
इति मत्स्यसूक्तम् ।
अपि च ।
"अय पात्रे पयःपानं गव्यं पिष्टान्नमेव च ।
मद्यादिकं मधु गुडं नारिकेलोदकं तथा ।
फलं मूलञ्च भक्षित्वा सद्यश्चान्द्रायणं चरेत् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ।
(आगम एवास्य उत्पत्ति सूत्रे । यथा, मनुः । ९ । ३२१ ।
"अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितम् ।
तेषां सर्व्वत्रगं तेजः स्वासु योनिषु शाम्यति ॥"
पुं, छागः । स तु सर्व्वाङ्गलोहितः रक्तवर्णो वा । यथा, मनुः । ३ । २७२ ।
"कालशाकं महाशल्काः खड्गलोहामिषं मधु ।
आनन्त्यायैव कल्प्यन्ते मुन्यन्नानि च सर्व्वशः ॥"
मार्जारजातिविशेषः । यथा, महाभारते । २ । ४७ । २५ ।
"लोहान् परमकाम्बोजानृषिकानुत्तरानपि ।
सहितांस्तान् महाराज व्यजयत् पाक-
शासनिः ॥"
रक्तवर्णे, त्रि । यथा, महाभारते । ६ । ११६ । १७ ।
"अभवच्च वराहस्य लोहस्य प्रमुखे बलम् ।
पञ्चशाखान् शुभप्रख्यान् स शुशोभैकवासरः ॥")

लोहकण्टक, पुं (लोहस्य कण्टक इव ।) मदनवृक्षः । इति शब्दचन्द्रिका । लौहमय कण्टकञ्च । (यथा, आर्य्यासप्तशत्याम् । ४७१ ।
"सखि लोहकण्टकनिभतया तथा मन्ये
विद्धोऽसि ॥")

लोहकान्त, क्ली, (लोहं कान्तोऽस्येति ।) अयस्कान्तम् । इति राजनिर्घण्टः ॥

लोहकार, पुं (लोहं लोहमयं शस्त्रादि करोतीति । कृ + अण् ।) लौहकारकः । इति हलायुधः ॥ (यथा, बो० रामायणे । २ । ८३ । १२ ।
"प्रख्यातास्त्वष्टकाराश्च भाण्डकाराश्च ये ॥")

लोहकारक, पुं, (लोहं शस्त्रादि करोति । कृ + ण्वुल् ।) वर्णसङ्करजातिविशेषः । कामार इति भाषा । तत्पर्य्यायः । व्योकारः २ इत्यमरः । लोहकारः ३ अयस्कारः ४ कर्म्मकारः ५ कर्म्मारः ६ । इति भरतमल्लौ । तस्योत्पत्तिर्यथा ।
"शूद्रायामपि वीर्य्याद्वै कर्म्मकारोऽभवत्
सुतः ॥"
इति पराशरपद्धतिः ॥

लोहकिट्ट, क्ली, (लोहस्य किट्टम् ।) लोहमलम् । तत्पर्य्यायः । किट्टम् २ लोहचूर्णम् ३ अयोमलम् ४ लोहजम् ५ अयश्चूर्णम् ६ लोहम् ७ लोहमलम् ८ । (यथा, सुश्रुते । ६ । ४४ ।
"सुभावितं क्षौद्रघृतप्लुतं
लीढं निहन्त्याशु हि लोहकिट्टम् ॥")
अस्य गुणाः । मधुरत्वम् । कटुत्वम् । लघुत्वम् । कृमिवातहलीमकपाण्डुमेहगुल्मशोथनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।

"भाव्यमानस्य लोहस्य मल मण्डूरमुच्यते ।
लोहसिंहानिका किट्टी सिंहाणञ्च निगद्यते ॥
यल्लोहं यद्गुणं प्रोक्तं तत्किट्टमपि तद्गुणम् ॥"
इति भावप्रकाशः ॥

(तथास्य लोहरसादिविधिः ।
"अतो हि सुतमं किट्टं मध्यमाशीतिवार्षिकम् ।
अधमं षाष्टिवर्षीयं ततो हीनं विषोपमम् ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥
"कुर्य्यं पथ्याचूर्णं त्रिफलागव्याम्लसलोहकिट्टञ्च ।
शृङ्गवेरस्याहं पल भक्षस्य रघु केशराजस्य ॥"
इति वैद्यकचक्रपाणिसंग्रहे परिणामशूलाधिकारे ॥)

लोहचूर्णं, क्ली, (लोहस्य चूर्णम् ।) लोहकिट्टम् । इति राजनिर्घण्टः ॥ (यथा, बृहत्संहितायाम् । ७६ । १ ।
"माक्षीकधातुमधुपारदलोहचूर्ण-
पथ्याशिलाजतुविडङ्गघृतानि योऽद्यात् ।
सैकानि विंशतिरहानि जरान्वितोऽपि
सोऽशीतिकोऽपि रमयत्यबलां युवेव ॥")

लोहज, क्ली, (लोहात् जायते इति । जन्+डः ।) लोहकिट्टम् । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्य यथा "मण्डूरं लोहजं किट्टम् ।" इति वैद्यकरत्नमालायाम् ॥) कांस्यम् । इति हेमचन्द्रः ॥

लोहद्रावी [न्] पुं (लोहानि द्रावयतीति । द्रु+णिच्+णिनि ।) टङ्कणः । इति राजनिर्घण्टः ॥ (टङ्कणशब्देऽस्य विवरणो विज्ञेयः ॥)

लोहनाल पुं, (लोहस्य नालं दण्डो यस्य ।) नाराचः । इति त्रिकाण्डशेषः ॥

लोहपृष्ठ पुं (लोहस्येव कठिनं श्यामं वा पृष्ठं यस्य ।) कङ्कपक्षी । इत्यमरः ॥ लोहमयपृष्ठयुक्ते त्रि ॥

लोहप्रतिमा, स्त्री (लोहस्य प्रतिमा ।) लोहमयी प्रतिमा । तत्पर्य्यायः । सूर्म्मी १ स्थूणा २ । इत्यमरः ॥ सूर्म्मी ४ सूर्म्मि ५ सूर्म्मिः ६ । इति भरतः ॥ सूर्म्मिका ७ । इति शब्दरत्नावली ॥

लोहमयं, त्रि, लोहात्मकम् । लोहनिर्म्मितम् । लोहशब्दात् स्वरूपार्थे मयट्प्रत्ययेन निष्पन्नम् ॥ (यथा, छान्दोग्योपनिषदि । ६ । १ । ५ ।
"यथा सोम्यैकेन लोहमणिना सर्व्वं लोहमयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं लोहमित्येव सत्यम् ॥")

लोहमारक, पुं (लोहं मारयति जारयतीति । मृ+णिच्+ण्वुल् ।) शालिञ्चशाकः । इति त्रिकाण्डशेषराजनिर्घण्टौ ॥

लोहल पुं (लोहं लातीति । ला+कः ।) ग्रहकाचार्य्यः । इति मेदिनी । ल १९८ ॥

लोहल, त्रि, (लोहमिव लातीति । ला+कः ।) अव्यक्तवाक् । इत्यमरः ॥ लोहघातकश्च ॥

लोहवर, क्ली, (लोहेषु सर्व्वतैजसेषु वरम् ।) स्वर्णम् । इति त्रिकाण्डशेषः ॥

लोहश्लेषण पुं, (लोहानि सर्व्वतैजसानि श्लेषयति योजयतीति । श्लिष्+ल्युः ।) टङ्कणः । इति हेमचन्द्रः ॥

लोहसङ्कर क्ली, (लोहानां सङ्करो यत्र ।) वर्त्तलोहम् । इति राजनिर्घण्टः ॥ मिश्रिततैजसञ्च ॥

लोहाख्य क्ली (लोहमेव आख्या यस्य ।) अगुरु । इति रत्नमाला ॥

लोहाभिसार, पुं, (लोहानां शस्त्रादीनां अभिसारो यत्र ।) लोहाभिहारः । इत्यमरटीकायां भरतः ॥

लोहाभिहार, पुं (लोहानामभिहारो यत्र ।) शस्त्रभृतां राज्ञां नीराजनाविधिः । इत्यमरः ॥ महानवमीदीपाल्यां अश्वादीनां नीराजने सति पश्चात् शस्त्रधारिणो राज्ञो यः शान्त्युक्तो निःशब्दस्नप्रधानो विधिः प्रयाणात् प्राक् स लोहाभिहारः । लोहस्य शस्त्रस्य अभिहारः सर्व्वतो हरणमत्रेति बहुव्रीहिः । लोहाभिहार इत्युक्तो विधिर्नीराजनोत्तर इत्यमरमाला । लोहोऽस्त्री शस्त्रके लौहे इति मेदिनी । लोहाभिसार इति पठन्त्यन्ये तत्र लोहं शस्त्रं अभिसार्य्यते प्रस्थाप्यतेऽनेनेति घञ् वाहनायुधादेर्निःशेषेण राजनं यत्र सा नीराजना नीरस्य शान्त्युदकस्य अजनं क्षेपो यत्र सा नीराजना वा । इति भरतः ॥

लोहार्गल क्ली (लोहस्य अर्गलमिव ।) तीर्थविशेषः । यथा,—

वराह उवाच ।
"अस्ति देवि च तत्रैव यच्चां त्वं परिपृच्छसि ।
गुह्यमन्यच्च वक्ष्यामि महत् कर्म्मणो गति ॥
तत हिमवटे गत्वा म्लेच्छदेशमदूरतः ।
श्वेतमध्ये वरारोहे हिमवन्तं समाश्रितम् ॥
तत्र लोहार्गलं नाम विश्रामो मे विधीयते ।
गुह्यं पञ्चदशं यत्र समन्तात् पञ्चयोजनम् ।
दुर्लभं पुण्यहीनानां मम कर्म्मानुचारिणाम् ।
तत्र तिष्ठाम्यहं भद्रे । उदीचीं दिशमाश्रितः ॥
तत्र ब्रह्मा च रुद्रश्च स्कन्दश्चैव मरुद्गणाः ।
आदित्या वसवो रुद्रा अश्विनौ च महौजसौ ॥
सोमो बृहस्पतिश्चैव ये चान्ये च दिवौकसः ।
तिष्ठन्त्येवार्गलं दत्त्वा चक्रं यत्र महौजसम् ॥
ततो मे दानवाः सर्व्वे क्रमन्तो लोकमुत्तमम् ।
मया चैवान्तरं ज्ञात्वा हत्वा मायाञ्च वैष्णवीम् ॥
शतकोटिसहस्राणि क्षणेनैव विनाशितम् ।
एवं लोहार्गलं नाम मे तत्र कारितम् ॥
एकधारा पतत्यत्र इन्द्रनीलसमप्रभा ।
तत्र स कुरुते स्नानं पञ्चरात्रोषितो नरः ॥
स्वर्गलोकं समासाद्य क्रीडते सह मोदते ।
अथात्र मुञ्चति प्राणान् मद्द्वारविनिर्म्मितः ॥
ब्रह्मलोकं परित्यज्य मम लोकं प्रपद्यते ।
गुह्यान्यत्र महाभागे देवि लोहार्गले मम ॥
सिद्धिकामेन सर्व्वेण स्नातव्यं भावसंयुतम् ।
एतत्ते कथितं भद्रे लोहार्गलनिवासिनः ।
माहात्म्यं पद्मपत्राक्षि गुह्यं पञ्चमहीश्वरम् ।
मङ्गल्यञ्च पवित्रञ्च मम भक्तसुखावहम् ॥"
इत्यादि वराहपुराणे लोहार्गलमाहात्म्यवर्णनं नामाध्यायः ॥ ७ ॥ लोहकीलके स्त्री क्ली च ।

लोहि, स्त्री, श्वेतटङ्कणम् । इति वैद्यकराजनिर्घण्टः ॥

लोहिका, स्त्री, (लोहमस्त्यस्येति । लोह+ठन् ।) लौहपात्रम् । तत्पर्य्यायः । खरसान्द्र १ खरपात्रम् २ । इति त्रिकाण्डशेषः ॥

लोहित क्ली (रोहतीति । रुह + "रुहे रश्च लो वा ।" उणा ३ । ९४ । इति इतन् रस्य लत्वञ्च ।) रक्तगोशीर्षम् । कुङ्कुमम् । रक्तचन्दनम् । इति मेदिनी । ते, १४७ ॥ पत्तङ्गम् । हरिचन्दनम् । तृणकुङ्कुमम् । रुधिरम् । इति राजनिर्घण्टः ॥ (यथा, मनुः । ४ । ५६ ।
"नाप्सु मूत्रं पुरीषं वा ष्ठीवनं वा समुत्सृजेत् ।
अमेध्यलिप्तमन्यद्वा लोहितं वा विषाणि वा ॥")
युद्धम् । इति हेमचन्द्रः ॥ (सरोवरविशेषः । इति मात्स्ये । १२ । १५ ॥ माणिक्यम् । तत्पर्य्यायो यथा,—
"माणिक्यं पद्मरागः स्यात् शोणरत्नञ्च लोहितम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

लोहित, पुं, (रुह+इतन् । रस्य लः ।) नदविशेषः । (सागरविशेषश्च । यथा, रामायणे । ४ । ४ । ३८ ।
"ततो रक्तजलं भीमं लोहितं नाम सागरम् ।
गत्वा प्रेक्ष्य ताञ्चैव बृहतीं कूटशाल्मलीम् ॥")
भौमः । (यथा, बृहत्संहितायाम् । ६ । ८ ।
"मध्येन यदि मघानां गच्छति लोहितः करोति ततः ।
पाण्ड्यो नृपो विनश्यति शस्त्रोद्योगाद्भयमवृष्टिः ॥")
रक्तवर्णः । इति मेदिनी । ते, १४७ ॥ रोहितमत्स्यः । मृगविशेषः । इति शब्दरत्नावली ॥ सर्पः । (यथा महाभारते । २ । ९ । ८ ।
"वासुकिस्तक्षकश्चैव नागश्चैरावतस्तथा ।
कृष्णश्च लोहितश्चैव पद्मश्चित्रश्च वीर्य्यवान् ॥")
मराकारः । इति चरकः ॥ मकरः । इति शब्दचन्द्रिका ॥ रक्ताशुः । रक्तशालिः । इति राजनिर्घण्टः ॥ (यथा सुश्रुते । १ । ४६ ।
"शालिका धवमोषूमा लोहिता ये च शालयः ।
सुगन्धको महराजश्च पाण्डुका प्रमदाः स्मृताः ॥")
कम्मेदः । इति हेमचन्द्रः ॥ (पर्व्वतविशेषः । इति मात्स्ये । १२० । ११ ॥ कुशद्वीपस्थवर्षविशेषः । इति तत्रैव । १२२ । ६१ ॥)

लोहित त्रि, रक्तवर्णयुक्तः । इत्यमरः ॥ (यथा मनुः । ५ । ६ ।
"लोहितान् वृक्षनिर्य्यासान् व्रश्चनप्रभवांस्तथा ।
शेलुं गव्यञ्च पेयूषं प्रयत्नेन विवर्जयेत् ॥")

लोहितक, क्लो, (लोहितमिव । इवार्थे कन् ।) रीति । इति राजनिघण्टः ॥

लोहितक, पुं, (लोहित एव । स्वार्थे कन् ।) मङ्गलग्रहः । इति शब्दमाला ॥ पद्मरागमणिः । इति हेमचन्द्रः ॥ (यथा, माघे । ११ । ५२ ।

"लयनेषु लोहितकनिर्मिता भुवः

शितिरत्नरश्मिहरितीकृतान्तराः ॥"

रक्तवर्णयुक्ते त्रि । यथा महाभारते ।१।८।१।

"नीलपीतासितश्यामैः सितैर्लोहितकैरपि ।

अवतानैस्तथा गुल्मैर्मञ्जरीजालधारिभिः ॥")

लोहितचन्दन, क्लो (लोहितं चन्दनमिव ।) कुङ्कुमम् । इत्यमरः ॥ रक्तचन्दनम् ॥ (यथा, किरातार्ज्जुनीये । ६ । ३४ ।

"परिक्षमं लोहितचन्दनोचितं

पदातिरन्तर्गिरिरेणुरूषितः ॥")

लोहितपुष्पक, पुं, (लोहितं पुष्पमस्य । कप् ।) दाडिमवृक्षः । इति भावप्रकाशः ॥

लोहितवर्त्तिका,क्लो (लोहिता वर्त्तिका ।) मौक्तिकम् । इति रत्नमाला ॥ रक्तवर्त्तिका च ॥

लोहिता, स्त्री (लोहित + स्त्रियां टाप् ।) रागा दिना रक्तवर्णा । इति जटाधरः ॥ वराह क्रान्ता । इति शब्दचन्द्रिका ॥ रक्तपुनर्नवा । इति राजनिघण्टः ॥

लोहिताक्ष, पुं, (लोहिते अक्षिणी यस्य । बहु ब्रीहौ स्वाङ्गात् षच् ।) विष्णुः । इति शब्द माला ॥ कोकिलः । इति शब्दचन्द्रिका ॥ रक्त वर्णचक्षुर्युक्ते त्रि । (यथा, महाभारते । १ । ५६ । ६ ।

"यथा सती लोहिताक्षी महात्मा

पौराणिको वेदविदाम् पुरस्तात् ॥")

लोहिताङ्ग पुं (लोहितमङ्गं यस्य ।) मङ्गल ग्रहः । इत्यमरः ॥ (यथा, हरिवंशे । २२८ । १४ ।

"वामे च दक्षिणे चैव स्थितौ शुक्रबृहस्पती ।

शनैश्चरो लोहिताङ्गो लोहिताकसमद्युतिः ॥")

कम्पिल्लकः । इति राजनिघण्टः ॥

लोहितानन, पुं, (लोहितमाननं मुखं यस्य ।) नकुल । इति राजनिघण्टः ॥ रक्तवर्णमुखे, त्रि ॥

लोहितायस [सु] क्लो, (लोहितमयः ।) ताम्रम् । इति त्रिकाण्डशेषः ॥ (विवृतोऽस्य ताम्रशब्दे विशेषः ॥)

लोहितायस, क्लो (लोहितमायसम् ।) रक्तवर्ण लोहजाति । इति मुग्धबोधव्याकरणम् ॥

लोहिनी, स्त्री (लोहिता + "वर्णादनुदात्ता दिति ।" ४ । १ । ३९ । इति ङीप् । तकारस्य नकारादेशश्च ।) रक्तवर्णा स्त्री । यथा,—

"रोहिणी रोहिता रक्ता लोहिनी लोहिता च सा ॥"

इति जटाधरः ॥

लोहोत्तम, क्लो (लोहेषु धातुषु उत्तमम् ।) स्वर्णम् । इति हेमचन्द्रः ॥

लौकायतिक, पुं, (लोकायतमधीते वेद वा । लोकायत + "क्रतूक्थादि सूत्रान्ताट् ठक् ।" ४ । २ । ६० । इति ठक् ।) तार्किकभेदः । (यथा, श्रीरामायणे । २ । १०८ । ३८ ।

"कच्चिन्न लौकायतिकान् ब्राह्मणांस्तात सेवसे ।

अनर्थकुशला ह्येते बालाः पण्डितमानिनः ॥")

चार्वाकशास्त्रवेत्ता । लोकायत वेत्ति इत्यर्थे व्यिकप्रत्ययेन निष्पन्नोऽयम् ॥

लौकिक, त्रि, (लोके विदितः प्रसिद्धो हितो लोकं वेत्ति वा । लोक + ठञ् ।) लोकव्यवहारसिद्धः । यथा,—

"वैदिका लौकिकाश्चैव ये यथोक्तास्तथैव ते ।

निर्मीतापास्तु विशेषा शाकाशेषाश्चसम्पदः ॥"

इति कलापव्याकरणे सन्धिप्रकरणे प्रथमप्रकरणम् ॥ लोकाय हित इत्यर्थे च व्यिकप्रत्ययनिष्पन्नः । इति मुग्धबोधव्याकरणम् ॥

लौकिकता, स्त्री, (लौकिकस्य भावः । लौकिक + तल् ।) लोकव्यवहारसिद्धत्वम् । शिष्टाचारेऽस्य भूरिप्रयोगः ॥

लौकिकाग्नि, पुं, (लौकिकोऽग्निः ।) व्यवहार्य्य अग्निः । यथा, याज्ञवल्क्ये ।

"न पैतृयज्ञियो होमो लौकिकाग्नौ विधी- यते ॥"

लोड, ऋ उन्मादे । इति कविकल्पद्रुमः ॥ (भ्वा - परं अक० सेट् ।) ऋदुदनुबन्धो । ऋ, अलु- लोडत् । इति दुर्गादासः ॥

लोह पुं (लोह एव । प्रज्ञाद्यण् ।) लोहः । इत्यमरटीकायां भरतः ॥ स च षड्विधः । यथा । कान्ति १ पाण्डि २ कालः ३ कालिङ्ग ४ वज्रक ५ । अस्य षडोऽप्यविधि संस्कारः । यथा । क्षालितत्वम् १ उद्वर्त्तनम् २ अश्मभावनम् ३ आतपशोषः ४ निर्वेध ५ मारणम् ६ दलनम् ७ पाचनम् ८ स्वेदपाकः ९ स्थालीपाकः १० पुटनम् ११ पुटपाकः १२ पाकविधानं १३ । अस्य गुणाः । आयुर्बल वीर्य्यकान्तिप्रदत्वम् । रोगनाशित्वम् । मेह- ज्वरपाण्डुत्वम् । आयुष्यकृत् तस्य गुणाः । शोथशूलाद्यर्शःकुष्ठपाण्डुप्रमेहमेदवातु नाशित्वम् । वयःस्थैर्य्यबलवर्णकारित्वम् । मारकत्वम् । गुरुत्वञ्च । शीतलत्वञ्च गुणौ । सर्वरोग नाशित्वम् । मदकारित्वञ्च । अशुद्धस्य तस्य गुणाः । वातरोगोत्पत्तिः । आयुर्नाशकत्वम् । इति रसेन्द्रसारसंग्रहः ॥ (अमांस स्रोधरादि- विषय ॥

"त्रिफलाक्तसुधौ तोये त्रिफलाकोष्णं पचम् ।

तत् काथे पादशेषे लोहस्य पलपञ्चकम् ॥

कृत्वा तत्राधि भवति सर्वाङ्गं विनिवेशयेत् ।

पूर्वं प्रक्षीयते रोगो त्रिदिने लोहपाक ॥"

इति लोहशोधनम् ॥ * ॥

"भाद्रपाकादयः स्थालीपाकाच पुटपाकतः ।

त्रिदशो जायते लोही मयोऽलसको भवेत् ॥"

इति सर्वाप्यलोहमारणम् ॥ * ॥

"दाशद्रोमित दरदे लौहचूर्णेन लेपयेत् ।

ममाशोरेण संमर्द्य यामयुग्मञ्च मर्द्दयेत् ।

पुटेदेवं लौहचूर्णं यावद्वा मारणं भवेत् ॥"

इति वैद्यकरसेन्द्रसारसंग्रहे लोहमारणाधि कारे ॥") अन्यत् लोहशब्दे द्रष्टव्यम् ॥ (छाग विशेष । यथा, महाभारते । १३ । ८८ । १३ ।

"अजेन वापि लौहेन मधुमांसेन पार्थिव ।

दत्तेनाक्षय्यमाप्नोति पितरो वसुधाधिपम् ॥"

लोहशब्दार्थोऽप्ययम् ॥)

लौहचारक, पुं, (लौहेन लौहविकारेण चार प्रचारो यत्र ।) नरकभेदः । यत्र विमर्द्देनमस्य । इति पुराणम् ॥

लौहज, क्लो, (लौहात् जायते इति । जन्+ड ।) मण्डूरम् । इति रत्नमाला ॥

लौहभाण्ड, पुं, (लौहस्य भाण्डमिवाहृतिर्यस्य ।) अश्मभालम् । इति शब्दचन्द्रिका ॥ हामान् दिस्ता इति भाषा । लौहनिर्मितभाण्डे, क्लो ॥

लौहभूः, स्त्री, (लौहस्य भूरिव ।) कटाही । स तु लौहपात्रविशेषः । यथा,—

"लौहात्मा चायसा लौहा लौहभूः कडङ्गा अपि ॥"

इति शब्दचन्द्रिका ॥

लौहमल, क्लो, (लौहस्य मलम् ।) लोहमलम् । इति राजनिर्घण्टः ॥ (तस्याऽस्य विधः ।

"तप्तो लौहमलाभ्यामाशिखकविधामाना यथा मायत

पाके तावमन्ते दिनमानमपि च क्षापयेत् द्वावत

मद्याद्द्रवकतो प्रमोद इवमोहको यदि

कामयेत् ।

पाके तावमते विधिमथवा पाके पूर्ण मोतिते ॥

मद्याकालद्वयमुदये प्रतिदिनं अमृता यथ

द्योतनम् ।

पैत भोजनपूर्वमध्यविरतोऽक्षयव्दमोक्षैरे ।

पीत शूलहराश्मान्कनवतावामप्रिपञ्चरा

न्मादापत्तितिमेहरुग्यकठराप्लीहादि सर्वा

यह ॥"

इति भैषज्यरत्नावली शूले वरुणमण्डूरम् ॥)

लौहमुख, पुं, (लाहस्य मुखमिव ।) नरकविशेष । यत्र चर्षणमितिप्राति । इति पुराणम् ॥ लोह निर्मितकीलकञ्च ॥

लौहा, स्त्री, लौहभूः । इति शब्दचन्द्रिका ॥

लौहात्मा, स्त्री, (लौह आत्मा यस्याः ।) लौहभूः । इति शब्दचन्द्रिका ॥

लौहित्य पुं, लौहित्यः । इति लौहित्यमस्या स्वार्थे चत् (ष्यञ्) प्रत्ययेन निष्पन्नः । लोहित वर्णविशिष्टे, त्रि ॥

लौहितीक, त्रि (लोहित इव । लोहित + "कर्क- लोहिताट्टीकक् ।" ५ । ३ । ११० । इति ईकक् ।) लोहितसदृशः । इति सिद्धान्तकौमुदी ॥

लौहित्य क्लो (लोहितस्य भाव । लोहित + ष्यञ् ।) लोहितत्वम् । इति वैद्यकी । पै, १०२ ॥

लौहित्य पुं, (लोहित एव। स्वार्थे ष्यञ्।) नदभेदः। स च ब्रह्मपुत्त्रः। इति मेदिनी। ये, १२। सागरः। इति शब्दमाला॥ तस्य नदविशेषस्य उत्पत्तिर्यथा,—

सगर उवाच।

"अमोघायां कथं जज्ञे लौहित्यो ब्रह्मणः सुत।
कथं शान्तनुभार्य्यायां रत स कमलासन॥
पारक्षेत्रियपुत्त्रो वा कथं जज्ञे पितामहात्।
तत् सर्व्वं श्रोतुमिच्छामि कथयस्व द्विजोत्तम॥

और्व्व उवाच।

शृणु त्वं नृपशार्द्दूल कथयामि महत्तरम्।
आख्यानं ब्रह्मपुत्त्रस्य लौहित्यस्य महात्मनः॥
हरिवर्षे महावर्षे शान्तनुर्नाम नामतः।
मुनिरासीन्महाभागो ज्ञानवान् सुतपोधनः॥
तस्य भार्य्या महाभागा अमोघाख्या महासती।
हिरण्यगर्भस्य मुनेरनुयाताप्यमोघया॥
तया सार्द्धं स कैलासमध्यादामर्व्वतेऽवसत्।
लोहिताख्यस्य सरसस्तीरे वै गन्धमादने॥
एकदा स तपोनिष्ठो निजपुष्पादिगोचरे।
जगाम वनमध्यन्तु चिन्वन् बहुफलानि च॥
तस्मिन्नवसरे ब्रह्मा सर्व्वलोकपितामहः।
तत्राजगाम यत्रास्ति अमोघा शान्तनोः प्रिया॥
तां दृष्ट्वा हेमगर्भाभां युवतीमतिसुन्दरीम्।
मोहितो मदनेनाशु तथाभूद्दूषितेन्द्रियः॥
उदीरितेन्द्रियो भूत्वा जिघृक्षुस्तां महासतीम्।
अथाधावत्ततो ब्रह्मा धर्तुं तां मदनार्द्दितः॥
धावमानं विधातारं दृष्ट्वामोघा महासती।
नैवं नैवमिति प्रोक्ता पर्णशालां व्यलीयत॥
इत्युवाच धातारममोघा कुपिता तदा।
पर्णशालान्तरगता द्वारमावृत्य तत्क्षणात्॥
अकार्य्यं न तथा कार्य्यं मुनिपत्न्या विगर्हितम्।
बलात् प्रमथ्य चाह तत्त्वया त्वाञ्च शपाम्यहम्॥
अमोघया चैवमुक्ते विधातुश्च तदा ध्रुवम्।
रेतश्चस्कन्द च तदैवाश्रमे शान्तनोर्मुनेः॥
च्युते रेतसि धातापि हंसयानं समास्थितः।
लज्जयातिपरीतात्मा द्रुतं वै स्वाश्रमं ययौ॥
गते वेधसि शान्तनुर्निजमाश्रममागतः।
आगत्य दृष्ट्वा पदवीं पदचिह्नं तथा भुवि॥
रेतश्च पतितं भूमौ विधातुर्ज्वलनोपमम्।
अमोघां परिपप्रच्छ पर्णशालान्तरस्थिताम्॥
किमेतदद्य सुभगे प्रवृत्तं दृश्यते तु यत्।
पदचिह्नं पदवीं च रेतश्चेदं च कीदृशम्॥
सा तस्य वचनं श्रुत्वा शान्तनुं मुनिसत्तमम्।
अमर्षितेव व्याजह्रे विकलानना॥
हंसयुक्तस्यन्दनेन कोऽप्यागम्य चतुर्मुखः।
कमण्डलुकरो भीक्ष्णं रतिं मां समयाचत॥
ततो मया भृशं निरस्य उटजान्तरवेशया।
प्रयातस्तेन भगतो मम शापभयार्द्दितः॥
शृणु तत्र प्रतीकारं यदि शक्नोषि शान्तनो।
न हि मां धर्षितां योद्धुं कश्चित् शक्नोति जीव भत्॥
स तस्या वचनं श्रुत्वा स्वयं ब्रह्मा समागतः।
इति निश्चित्य मनसा तत्र ध्यानपरोऽभवत्॥
दिव्यज्ञानेन तज्ज्ञात्वा देवकार्य्यमुपस्थितम्।
सोऽपावतारयोग्यापि हिताय जगतो मुनिः॥
धात्रोर्न्नं निश्चयित्वा स्वभार्य्यामिदमब्रवीत्।
इदं रेतो ब्रह्मणस्त्वं पिबामोघे ममाज्ञया॥
हिताय सर्व्वजगतां देवकार्य्यार्थसिद्धये।
भवत्या निकटं ब्रह्मा स्वयमेव समागतः॥
तदभिप्रायमशक्ताभाषयो न समस्य च।
गतो निजाश्रमं तस्य कुरुष्वाद्य तद्वचः॥
तच्छ्रुत्वा शान्तनोर्व्वाक्यममोघातीव लज्जिता।
वाक्यमश्रीव सा प्राह पतिं नत्वा महासती॥
नाहं तस्य रेतो धास्यामि न चेत् विमनस्कता।
अन्यत्र यदि कर्त्तव्यं पीत्वा त्वं मयि चोत्सृज॥
तत्तस्या वचः श्रुत्वा युक्तं तथ्यञ्च शान्तनुः।
स्वयं पीत्वा च तत्तेजस्तस्या गर्भे न्यषिञ्चयत्॥
संक्रामिते शान्तनुना तेजोभिन्नसव सती।
गर्भं दधानामोघाख्या हिताय जगतां तदा॥
तस्याः काले तु सम्प्राप्ते जातो जलसञ्चयः।
तन्मध्ये तनयश्चापि नीलवासाः किरीटधृक्॥
रत्नमालाधरायुक्तो रक्तगौरश्च सोऽभवत्।
चतुर्भुजः पद्मविद्याधरशक्तिधरस्तथा॥
शिशुमारशिरः स्कन्धः शुभ्रकायो जलोत्करे।
स जातश्च तथा भूत शान्तनुर्लोकशान्तनु॥
चतुर्णां पर्व्वतानाञ्च मध्यदेशे न्यवेशयत्।
कैलासस्योत्तरे पार्श्वे दक्षिणे गन्धमादनः॥
जारुधिः पश्चिमे शैलः पूर्व्वे सम्वर्त्तकाह्वयः।
तेषां मध्ये स्वयं कुण्डं पर्व्वतानां विधिः सुतः॥
बाढातिवर्द्धते नित्यं शरदीव निशाकरः।
स तोयमध्यगं पुत्त्रमाधाय हृदिव स्वयम्॥
क्रमतस्तस्य संस्कारानकरोद्विवृद्धये।
अथ काले बहुतिथे व्यतीते ब्रह्मणः सुतः॥
तोयराशिस्वरूपेण ववृधे पञ्चयोजनान्।
तस्मिन् देवा ययुः सम्प्रीत्येव इव सागरे॥
ग्रीष्मान्वये पूर्व्वं दध्याधारणो भवे।
तस्मिन्नवसरे रामो जामदग्न्यः प्रतापवान्॥
चक्रे मातृवधं घोरमनुज्ञ पितुराज्ञया।
तस्य पापस्य मोक्षाय स्वपितुश्चोपदेशतः॥
स जगाम महाकुण्डं ब्रह्माख्यं स्नातुमिच्छया।
तत्र स्नात्वा च पीत्वा च मातृहत्यामपानयत्॥
वीथीं परशुना कृत्वा तत्र व्याममदारयत्॥"

इति कालिकापुराणे कामरूपोपाख्याने ८२ अध्यायः॥०॥ अपि च।

"जातसप्तत्र योऽपि तीर्थमासाद्य स परम्।
वीथीं परशुना कृत्वा ब्रह्मपुत्त्रमवाहयत्॥
ब्रह्मकुण्डात् सृतः सोऽपि कासारे लोहिताह्वये।
कैलासोपत्यकायान्तु न्यपतद्ब्रह्मणः सुतः॥
तस्यापि सरसस्तीरे समुत्थाय महाबलः।
कुठारेण गिरिं पूर्व्वामनयद्ब्रह्मणः सुतम्॥
ततोऽपरमपि गिरिं हेमसङ्गं विभिद्य च।
कामरूपान्तरं पीठमवाहयत्तु हरिः॥
तस्य नाम विधिश्चक्रे स्वयं लौहित्यगङ्गकम्।
लोहितात् सरसो जातो लौहित्याख्यस्ततोऽभवत्॥
स कामरूपमखिलं पीठमाप्लाव्य वारिणा।
गोपयन् सर्व्वतीर्थानि दक्षिणं याति सागरम्॥
प्रागेव दिव्ययमुना उग्रज्ञा ब्रह्मणः सुत।
पुनः पतति लौहित्ये गत्वा द्वादशयोजनम्॥
चैत्रे मासि सिताष्टम्यां यो नरो नियतेन्द्रियः।
स्नाति लौहित्यतोयेषु स याति ब्रह्मणः पदम्॥
चैत्रन्तु सकलं मासं शुचिः प्रयतमानसः।
लौहित्यतोये यः स्नाति स कैवल्यमवाप्नुयात्॥"

इति कालिकापुराणे ८४ अध्यायः॥

ल्वी, शि श्रिवि। इति कविकल्पद्रुमः॥ (क्र्या-पर-सक-अनिट्।) ओष्ठ्यवर्गीयोपधः। ल्विनाति अल्वीत् ल्वीनि। अन्तःस्थादोपध इति रमानाथः। ल्लिनाति। इति दुर्गादासः॥

ल्वी, शि ग गत्याम्। इति कविकल्पद्रुमः॥ (क्र्या-पर-सक-अनिट्।) पवर्गादोपधः। ल्वीनाति अल्वेत् ल्वीति। शि, ल्विनाति ल्वीनाति अल्वीन ल्वीनि। शिरेव क्र्यादित्वसिद्धौ गकारस्य प्वादिसंज्ञिकार्थम्। इति दुर्गादासः॥

व

व वकारः। स च अन्तःस्थवर्णविशेषः। अस्योच्चारणस्थानं दन्तोष्ठम्। इति व्याकरणम्॥ (यथा, शिक्षायाम्। १८।
"विज्ञायते तु कुं प्रोक्तो दन्त्योष्ठो वः स्मृतो बुधैः॥")
दन्त्यवकारः। स च अन्तःस्थवः। यथा। अन्तःस्था य र ल वाः। इति कलापव्याकरणम्। ५।१।
"ततोऽक्षरसमाम्नायमसृजद्भगवानजः।
अन्तःस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणम्॥"
इति श्रीभागवते १२ स्कन्धे ६ अध्यायः॥
"ततश्चोऽक्षराणां समाम्नायं समाहारं तस्मै चाह। अन्तःस्था य र ल वाः। ऊष्माणः श ष स हाः। स्वरा अकारादयः। स्पर्शाः कादयो मावसानाः। ह्रस्वदीर्घौ च। आदिशब्दात् निरनुनासिकादयः। स एव लक्षणं स्वरूपं यस्य तम्।" इति तट्टीकायां श्रीधरस्वामी॥०॥ "यवर्गीयवकारस्य प ब भ म वा इत्येकपदोक्ता उत्पत्तिस्थानमोष्ठकृता दन्त्यवकारस्य दन्त्यमभेदि ल य र ष ब ल वा व इति भिन्नपदे पठितवान्। यथा बहुव्रीहि इत्यत्र वकारस्य ओष्ठ्यात् अन् दन्त्यवात् अनुस्वारस्य मकारो न स्यात्। वैदिकास्तु अस्योत्पत्तिस्थानं दन्तोष्ठेमाहुः। अतएव तद्विधो परम वर इत्यादौ दन्तोष्ठोच्चारणमिति।" इति मुग्धबोधटीकायां दुर्गादासः॥०॥

गस्य पर्य्यायः ।
"वो वायो वारुणो रुग्मा वरुणो देव
सञ्ज्ञकः ।
तोय तत्त्वश्च वामांश ।' इति नीलवर्णाभि
धानम् । * । अपि च ।
"वकारो वरुणो वायु रेव सङ्कर्षणो जल ।"
इति रुद्रयामले गणनीय । * ।
अपि च ।
'वो वायो वारुणो रुग्मा वरुणो देवसञ्ज्ञकः ।
शङ्गीशो ज्वालिनी वधः कलसञ्ज्ञितवाहक ।
उल्कारीयस्तु मायोतो वत्सा स्त्रिक सागरः
शुचिः ।
निधानु शङ्कर श्वेतो त्रिधेषी यमधारणम् ।"
इति नानातन्त्रशास्त्रम् ।
अस्य स्वरूपं यथा,—
"वकार चञ्चलापाङ्गि कुण्डली मोक्षमव्ययम् ।
पञ्चप्राणमयं वर्णं त्रिशक्तिसहितं सदा ।
त्रिबिन्दुसहितं वर्णमात्मादितत्त्वसंयुतम् ।
पञ्चदेवमयं वर्णं पीतविद्युल्लतामयम् ।
चतुर्व्वर्गप्रदं वर्णं सर्व्वसिद्धिप्रदायकम् ।
त्रिशक्तिसहितं देवि ! त्रिबिन्दुसहितं सदा ।"
इति कामधेनुतन्त्रम् । * ।
मन्त्रीयवर्णमालायामस्य लेखनप्रकारो यथा,—
"कोणत्रययुता रेखा मध्यबिन्दुविभालिका ।
माया शक्तिः परा नित्या ध्यानमस्य प्रचक्ष्यते ।"
इति वर्णोद्धारतन्त्रम् । * ।
अस्य ध्यानम् ।
"कुन्दपुष्पप्रभां देवीं द्विभुजां पद्मलोचनाम् ।
शुक्लमाल्याम्बरधरां रत्नहारोज्ज्वलां पराम् ।
साधकाभीष्टदां सिद्धां सिद्धिदां सिद्धसेविताम् ।
एवं ध्यात्वा वकारन्तु तन्मन्त्रं दशधा जपेत् ।"
इति वर्णोद्धारतन्त्रम् ।
व, व्य इवार्थे । इति मेदिनी । वे २ । (यथा,
रघु । ४ । ४२ ।
"ताम्बूलीनां दलैस्तत्र रचितापानभूमयः ।
नारिकेलासवं योधाः शात्रवं व यशः पपुः ।")
वं, क्ली, (वा त गमनहिंसयोः + क ।) प्रचेता ।
इति मेदिनी । वे, २ । वरुणबीजम् । इति
तन्त्रम् ।
व पुं (वानमिति । वा + भावे क) सान्त्व
नम् । (वाति गच्छतीति । वा गमने + क ।)
वायुः । वरुणः । इति मेदिनी । वे १ ।
बाहुः । मन्थनम् । कल्याणम् । वसतिः ।
वरुणः । वरुणालयः । इति शब्दरत्नावली ।
शार्दूलः । वस्त्रम् । शालूकः । चन्दनम् ।
इति नानार्थरत्नाकरकोषः ।
वः [स्] त्रि, युष्मान् । युष्मभ्यम् । युष्माकम् ।
युष्मच्छब्दस्य द्वितीयाचतुर्थीषष्ठीबहुवचनान्त
रूपोऽयम् । इति व्याकरणम् । (यथा, शुक
बोधे ।
"दृष्ट्वा तु वो मोऽपि करिष्यते वो
ददातु वो कल्पशुभानि वो वः ।"

पाण्डवाचारौ तु व्यस्त प्रयोगो न भवति । इति
वैयाकरणशिक्षा ।)
वंश पुं (वमति उद्गिरति पुत्रवान् वम्यते इति
वा । टु वम उद्गिरणे इति धातोर्बेदा वन शब्दे
इति धातोर्बाहुलकात् शः । यद्वा, वशि
उच्यते इति वा । वश कान्तौ + अच् घञ् वा ।
ततो नुम् ।) पुत्रपौत्रादिः । तत्पर्य्यायः ।
सन्ततिः २ गोत्रम् ३ जननम् ४ कुलम् ५
अभिजनः ६ अन्वयः ७ अन्ववायः ८ सन्तानः
९ । इत्यमरः । २ । ७ । १ । निवहम् १०
जातिः ११ । इति जटाधरः । कुलस्य द्विविधा
अन्वया वा प्राणिमात्रैकलक्षणा सन्तानाः वंश
इति व्याडिः । धनेन विद्यया वा ख्यातस्या-
पत्यधारा वंश इति शुभूः । वमति उद्गिरति
पूर्व्वपुरुषान् वंशः कायोति वा । इत्यमर
टीकायां भरतः । * । (यथा, रघु । १ । २ ।
"क्व सूर्य्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ।"
पुत्रः । यथा, भागवते । ८ । २ । १७ ।
"तृणयन् वंशः सुमतिभूरत्नातिसुतो यतः ।")
तृणजातिविशेषः । बांश इति भाषा । तत्
पर्य्यायः । त्वक्सारः २ कर्म्मारः ३ त्वचिसारः ४
तृणध्वजः ५ शतपर्व्वा ६ यवफलः ७ वेणुः ८
मस्करः ९ तेजनः १० । इत्यमरः । २ । ४ ।
६० । त्रिपुपर्व्वा ११ । इति जटाधरः ।
यवः १२ । इति शब्दरत्नावली । दृढग्रन्थिः १३
कण्टालुः १४ कण्टकी १५ महाबलः १६ दृढ-
ग्रन्थिः १७ दृढपत्रः १८ धनुर्द्रुमः १९ धानुष्यः २०
दृढकाण्डः २१ । (यथा, ऋतुसंहारे । २ । २४ ।
"ध्वनति पवनविद्धः पर्व्वतानां दरीषु
स्फुटति पटुनिनादैः शुष्कवंशस्थलीषु ।
प्रसरति तृणमध्ये लब्धवृद्धिः क्षणेन
ग्लपयति मृगयूथ प्रान्तलग्नो दवाग्निः ।")
अस्य गुणाः । अम्लत्वम् । कषायत्वम् ।
किञ्चित्तिक्तत्वम् । शीतलत्वम् । मूत्रकृच्छ्र
प्रमेहार्शःपित्तदाहास्रनाशित्वञ्च । इति राज
निघण्टुः । * । अपि च ।
"वंशः सरो हिमः स्वादुः कषायो वस्ति
शोधनः ।
छेदनः कफपित्तघ्नः कुष्ठास्रव्रणशोथजित् । * ।
तत्करीरः कटुः पाके रसे रूक्षो गुरुः सरः ।
कषायः कफकृत् स्वादुर्विदाही वातपित्तलः ।
तद्यवास्तु सरा रूक्षाः कषायाः कटुपाकिनः ।
वातपित्तकरा उष्णा बद्धमूत्राः कफापहाः ।"
इति भावप्रकाशः । * ।
(मध्योन्नतास्थि । यथा —
"वंशः पृष्ठास्थि मेरौ कार्ष्टे वेणौ गणे कुले ।"
इति रघुटीकायां मल्लिनाथधृतवैजयन्ती ।७।३८।)
पृष्ठावयवः । शिरदाँड़ा इति भाषा । (यथा,
भागवते । ११ । ८ । ३३ ।
"यदस्थिभिर्निर्म्मितवंशवंश्य
स्थूणं त्वचा रोमनखैः पिनद्धम् ।")

वंशः । इति मेदिनी । शे ११ । (यथा, रघुः ।
७ । ३९ ।
"उत्थापितः संयति रेणुरश्वैः
सान्द्रीकृतः स्यन्दनवंशचक्रैः ।")
वाद्यभाण्डविशेषः । इति धरणिः । बांशी इति
भाषा । (यथा रघुः । २ । १२ ।
"स कीचकैर्मारुतपूर्णरन्ध्रैः
कूजद्भिरापादितवंशकृत्यम् ।
शुश्राव कुञ्जेषु यशः स्वमुच्चै-
रुद्गीयमानं वनदेवताभिः ।"
विंशतिरस्य वंशोऽथर्व्वे दृष्टा ।) दश-
मानदण्डः । इति राजनि० ८ । (नापाभ
यम्भूतायुरोविशेषे क्लो । यथा, महाभारते ।
१ । ६५ । ४६ ।
"अब्रवीत् मधु वंशामहवः मामेकविंशतिम् ।
अन्वगां शुभगां भार्य्यामिति प्राप्य यथावत ।")
वंशकं, क्ली, (वंश इव कायतीति । कै + क ।
अगुरु । इति वाराहमी । १ ४ ।
वंशक, क्ली, (वंश इव प्रतिकृतिः । "इवे प्रति
कृतौ ।" ५ । ३ । ९६ । इति कन् ।) मत्स्यविशेषः ।
इति शब्दमाला । वंशपातामाछ इति भाषा ।
इक्षुविशेषः । इति रत्नमाला । वांशार इति
वाघगाछा इति च भाषा । अस्य गुणाः ।
"वंशकस्तदभिष्यन्दी कफकृद्विषनाशनः ।"
इति राजवल्लभः ।
(यथा सुश्रुते । १ । ४५ ।
"पौण्ड्रको भीरुकश्चैव वंशकः शतपोरकः ।"
"कान्तारस्तापसेक्षुश्च पौण्ड्रको भीरुकस्तथा ।
काण्डेक्षुस्तुच्छपुष्पश्च वंशकः ।
स्वगुण ।")
(इत्थी यथा । "अश्मायां कन् ।" ४ । १ ।
८० । इति कन् । शुक्रमांसे । इति विद्वान
कौमुदी ।)
वंशकफ क्ली, व्याकारोऽनुलेपनार्थकम् । यथा —
"दशवंशाभिधाहार्द्दुष्टिकटुष्ट मनोहरं ।
पोषकाय वंशकफं कालतुल्यं मनोहरम् ।"
इति वाराहकी । ५१ ।
वंशकर्पूररोचना, स्त्री (कर्पूर इव रोचते
शोभते इति । रुच् + ल्यु । तत इत्थेन
युक्ता ।) वंशरोचना । इति राजनिघण्टुः ।
वंशक्षीरी, स्त्री, (वंशस्य क्षीरमिवास्ति यस्याः
अच् । गौरादित्वात् ङीष् ।) वंशरोचना । इति
राजनिघण्टुः ।
वंशग., पुं (वंशाज्जायते इति । जन् + ड ।)
वेणुयवः । इति राजनिघण्टुः ।
वंशज, त्रि, (वंशात् सद्वंशाज्जायते इति ।
जन् + ड ।) सत्कुलजातः । तत्पर्य्यायः । बीज्यः
२ वंश्यः ३ । इति हेमचन्द्रः । ३ । १०७ । (कुलो
त्पन्नेऽपि । यथा आर्य्यासप्तशत्याम् । ३६८ ।
"अविरतमीषिगुणं यस्य वंशजस्य विपरीतं
कम् ।
किं कुर्म्मोऽपरिचितं भ्रष्ट यद् इतरादिभ ।")

वंशजा, स्त्री, (वंशे जायते इति । जन्+ड+टाप् ।) वंशरोचना । इति शब्दरत्नावली ॥ (अस्या गुणा यथा,—
"वंशजा बृंहणी वृष्या बल्या स्वाद्वी च शीतला । तृष्णाकासज्वरश्वासक्षयपित्तास्रकामला । हरेत् कुष्ठं व्रणं पाण्डुं कषाया वातकृच्छ्रजित् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

वंशतण्डुल, पुं, (वंशजातस्तण्डुलः ।) वेणुयव । इति राजनिर्घण्टः ॥

वंशधान्य, क्ली, (वंशस्य धान्यम् ।) वेणुयव । इति राजनिर्घण्टः ॥

वंशनालिका, स्त्री, (वंशनालोऽस्त्यस्या इति । वंशनाल+ठन् । टाप् ।) वंशी । इति शब्दरत्नावली ॥

वंशनेत्र, क्ली (वंशस्य नेत्रमिवाग्रमस्य ।) इक्षुमूलम् । इति राजनिर्घण्टः ॥

वंशपत्र, पुं, (वंशस्य पत्राणीव पत्राण्यस्य ।) नलः । इति राजनिर्घण्टः । (वंशस्य पत्रम् ।) वंशस्य दले क्ली ॥ (हरितालम् । यथा,—
"तालकं वंशपत्राख्यं कुष्माण्डसलिले क्षिपेत् । सप्तधा वा त्रिधा वापि दध्याम्ले च वा पुनः ॥ शोषयित्वा पुनः शुष्कं चूर्णयित्वा तुलाद्वति । तत ग्रहावके भाण्डे स्थापयेत् कुशलो भिषक् ॥ वदरीपत्रकल्केन सन्धिलेपञ्च कारयेत् । अधश्चाग्निमथ पार्श्वे तावज्ज्वाला प्रदीयते ॥ स्वाङ्गशीतं समुद्धृत्य मात्त्रिमाभो भवेदयं ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे कुष्ठाधिकारे ।)

वंशपत्रक, क्ली, (वंशपत्रमिव । स्वार्थे कन् ।) हरितालम् । इति हेमचन्द्रः । ४ । १२८ ॥

वंशपत्रक, पुं (वंशस्य पत्रमिवाकृतिरस्यास्ति । इवार्थे कन् ।) क्षुद्रमत्स्यविशेष । इति शब्दमाला ॥ वाशपाता माछ इति भाषा । नलः । श्वेतेक्षुः । इति राजनिर्घण्टः ॥

वंशपत्रपतित क्ली, अष्टदशाक्षरपादच्छन्दो विशेष । यथा —
"दिङ्मुनिर्वंशपत्रपतितं भरनभनलगैः ॥"
उदाहरणम् ।
"मूलवंशपत्रपतितं हरिणमलघवे पश्य सुकुन्द । मौक्तिकमिवोत्तममरकतमम् । यत्र च तं चकोरनिकरं प्रपिबति सुन्तो धामवमिन्दु चन्द्रकिरणैर्मतकमिव ॥"
वंशपत्रपतितेति केचित् । वंशदलमिति शम्भो । इति छन्दोमञ्जरी ।

वंशपत्री स्त्री, (वंशपत्र+गौरादित्वात् ङीष् ।) नाडीहिङ्गु । तृणविशेष । तत्पर्य्यायः । वंशदला २ जीरिका ३ जीर्णपत्रिका ४ । अस्या गुणाः । सुमधुरत्वम् । शिशिरत्वम् । पित्तरक्तदोषनाशित्वम् । रुच्यत्वम् । पशूनां दुग्धदायित्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः ।
"वंशपत्री वेणुपत्री पिण्डा हिङ्गु शिवाटिका । हिङ्गुपत्रीगुणा विज्ञैर्वंशपत्री च कीर्त्तिता ॥"
इति भावप्रकाशः ॥

वंशपीत पुं, (वंशः वंशपत्रमिव पीत ।) कथ गुग्गुलु । इति राजनिर्घण्टः ॥

वंशपुष्पा, स्त्री (वंशस्य पुष्पाणीव पुष्पाणि यस्याः ।) सहदेवीलता । इति राजनिर्घण्टः ॥

वंशपूरक, क्ली (वंशस्येव पूरकमस्य ।) इक्षुमूलम् । इति राजनिर्घण्टः ॥

वंशरोचना स्त्री, (रोचते इति । रुच+णिच्+ल्यु । टाप् । वंशस्य रोचना ।) स्वनामख्यातवंशपर्व्वजातश्वेतवर्णौषधविशेषः । वंशलोचन इति भाषा । तत्पर्य्यायः । त्वक्क्षीरी २ । इत्यमरः । २ । ६ । ११ ६ ॥ वंशलोचना ३ । इति भरतः । तुगाक्षीरी ४ शुभा ५ वांशी ६ वंशजा ७ । इति रत्नमाला । श्वेतिम ८ । इति शब्दरत्नावली । तुगा ९ त्वक्क्षीरी १० शुभ्रा ११ वंशक्षीरी १२ वैणवी १३ त्वक्सारा १४ कर्म्मरी १५ श्वेता १६ वंशकर्पूररोचना १७ तुङ्गा १८ रोचनिका १९ पिङ्गा २० वंशशर्करा २१ । अस्या गुणाः । रूक्षत्वम् । कषायत्वम् । मधुरत्वम् । हिमत्वम् । रक्तशुद्धिकारित्वम् । तापपित्तोद्रेकहरत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"वंशजा तु बृंहणी वृष्या बल्या स्वाद्वी च शीतला । तृष्णाकासज्वरश्वासक्षयपित्तास्रकामला । हरेत् कुष्ठं व्रणं पाण्डुं कषाया वातकृच्छ्रजित् ॥"
इति भावप्रकाशः ॥

वंशलोचना, स्त्री (वंशरोचना । रस्य लः ।) वंशरोचना । इति हेमचन्द्रः ॥ अस्या गुणाः ।
"कषायमधुरा रूक्षा वातघ्नी वंशलोचना । तुगाक्षीरी चक्षुष्याकासघ्नी मधुरा हिमा ॥"
इति राजवल्लभः ॥

वंशशर्करा, स्त्री (वंशस्य शर्करेव ।) वंशरोचना । इति राजनिर्घण्टः ॥

वंशशलाका, स्त्री (वंशस्य शलाकेव दार्ढ्यात् ।) वीणाङ्गलम् । इति हेमचन्द्रः । २ । २ ॥ (वंशनिर्म्मिता शलाकेति मध्यलोपी समासः ।) वंशविनिर्म्मितशलाका च ॥

वंशस्तनित, वंशस्थविल } क्ली, द्वादशाक्षरपादच्छन्दो विशेषः । यथा,—
"वदन्ति वंशस्थविलं जतौ जरौ ॥"
उदाहरणम् ।
"विलासवंशध्वनिविस्मितानने प्रपूर्य्य यः पञ्चमरागमद्भुतम् । ब्रजाङ्गनानामपि गानशालिनां जहार मानं स हरिः पुनातु वः ॥"
वंशस्तनितमपि क्वापि । इति छन्दोमञ्जरी ॥

वंशाग्र क्ली (वंशस्य अग्रम् । प्रथमजातत्वात् ।) वंशाङ्कुरः । इति राजनिर्घण्टः ॥

वंशानुचरित, क्ली, (वंशस्य अनुचरितम् ।) वंशचरितकथनम् । तत् पुराणस्य पञ्चलक्षणान्तर्गतलक्षणविशेषः । यथा शब्दरत्नावल्याम् ।
"सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च । वंशानुचरितञ्चेति पुराणं पञ्चलक्षणम् ॥"
(यथा, भागवते । ६ । १ । ४ ।
"तेषां मया पृथगनघानुकम् । वंशानुचरितानि च । कीर्त्तितस्य महाभाग । नित्यं शुश्रूषवो हि न ॥")

वंशाङ्कुर, पुं, वंशस्याङ्कुरः । वांशेर कोड़ा इति भाषा । तत्पर्य्यायः । करीरम् २ वंशाग्रम् ३ यवफलाङ्कुरः । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । अम्लत्वम् । कषायत्वम् । लघुत्वम् । शीतलत्वम् । पित्तास्रदाहकृच्छ्रघ्नत्वम् । रुचिकारित्वम् । तन्मज्जी मिशु लत्वञ्च । इति राजनिर्घण्टः ॥

वंशिक, क्ली (वंशोऽस्त्यस्येति । ठन् ।) अगुरु । इत्यमरः । २ । ६ । १२६ ॥

वंशिका, स्त्री (वंशिक+टाप् ।) अगुरु । इत्यमरटीकायां भरतः । वंशी । इति शब्दरत्नावली ॥

वंशी स्त्री, (वंश कारणत्वेनास्त्यस्याः । अच् । गौरादित्वात् ङीष् ।) मुरली । इति शब्दरत्नावली ॥ वांशी इति भाषा । (यथा, कथासरित्सागरे ।
"निर्म्मिता कापि गोपीनां कृष्णगोलधिनायिनी । विचिन्ना वामदेवीय न वंशी सुरवैरिक ॥") कर्षचतुष्टयम् । इति राजनिर्घण्टः ॥ वंशी वाद्यस्य विवरणम् । यथा,—
"तालेन राजते गीतं तालो वादित्रसम्भवः । गरीयस्तेन वादित्रं तच्चतुर्व्विधमुच्यते ॥ ततं शुषिरमानद्धं घनमित्थं चतुर्व्विधम् । ततं तन्त्रीगतं वाद्यं वंशाद्यं शुषिरं तथा । चर्म्मावनद्धमानद्धं घनं तालादिकं मतम् ॥"
शुषिरं यथा —
"वंशोऽथ पारीमधुरीतित्तिरीशङ्खकाहलाः । तोड़हीमुरलीबुक्काशृङ्गिकास्वरनाभयः ॥ शृङ्गं कापालिकं वंशचर्म्म वंशश्च यः परः । एते शुषिरभेदास्तु कथिता पूर्व्वसूरिभिः ॥ वर्ण्णतः सरलश्चैव पर्व्वदोषविवर्ज्जितः । वैणवः खादिरो वापि रक्तचन्दनजोऽथवा ॥ श्रीखण्डजोऽथ लौहो दन्तिदन्तमयोऽपि वा । राजतस्ताम्रजो वापि लौहजः स्फाटिकोऽथवा ॥ कनिष्ठाङ्गुलितुल्येन रन्ध्रेण च शोभितः । शिक्षाविद्याप्रवीणेन वंशः कार्य्यो मनोहरः ॥ षड्भिरेव मतोऽपीति सप्तसुनिर्मोदितम् । ततोऽप्येतेऽपि तदाकारा वंशा एव प्रकीर्त्तिताः ॥ तत्र कृत्वा शिरोदेशादवो हित्वाङ्गुलम् । फुत्कारम्भं कुर्व्वीत निगमाङ्गुलिपर्व्वणा ॥ पञ्चाङ्गुलानि वक्ष्य तारस्थानि कारयेत् । कुर्य्यात् तथान्तरेऽपि षडस्थानि कीदृशात् ॥ वदरीबीजतुल्यानि संस्थानादाङ्गुलम् । भागयोर्म्मध्यं कार्य्यं स्वरादेशांदृशेऽथ ॥ विकच्चैव कथा देवा ह्येव सुस्वरता भवेत् । पञ्चाङ्गुलोऽथ वंशः स्यादेकैकाङ्गुलिवर्द्धित ॥ अष्टाङ्गुलानि यावत् स्यात् यावच्चारम्याङ्गुलम् । भूतकारतारम्भस्य मानं ङ्गुलिममन्नम् । सदैव नाम वंशस्य तद्विदैः परिकीर्त्तितं ॥

एकाङ्गुलो द्व्यङ्गुलश्च त्र्यङ्गुलश्चतुरङ्गुलः ।
अतितारतरत्वेन वांशिके समुपेक्षितः ॥
अथोदश्याङ्गुलो वंशोऽपरः पञ्चदश्याङ्गुलः ।
निन्दितौ वंशतत्त्वज्ञैस्तथाष्टदश्याङ्गुलः ॥
महानन्दस्तथा नन्दो विजयोऽथ जयस्तथा ।
चत्वार उत्तमा वंशा मतङ्गमुनिसम्मताः ॥
दशाङ्गुलो महानन्दो नन्द एकादशाङ्गुलः ।
द्वादशाङ्गुलमानस्तु विजयः परिकीर्त्तितः ॥
चतुर्दशाङ्गुलमितो जय इत्यभिधीयते ।
सप्त स्वरा इति विज्ञैः क्रमाच्च व्यवस्थिताः ॥
वैविध्यं शोभना चापि सुस्वरत्वञ्च शोभता ।
माधुर्य्यमिति पञ्चामी प्रवक्ताश्च गुणाः स्मृताः ॥
श्रीत्कारबहुलः स्तब्धो विस्वरः स्फुटितो लघुः ।
अमधुरश्च विज्ञेया षड्दोषाः प्रवक्तृके समाः ॥
इत्याप्रयोगवाद्ये च व्यवस्था गीतवादने ।
अभिर्दोषैर्युतोऽसौ च निन्दितो वांशिको मतः ॥
स्थानकादिषमाभिज्ञो गमकाद्यः स्फुटाक्षरः ।
शीघ्रहस्त कलाभिज्ञो वांशिको रक्त उच्यते ॥
प्रसूतिन्दहरांशश्च युक्तिवेश्चकुलेर्गुणा ॥
शून्यापत्ते सुस्वरत्व अङ्गुलीचारणक्रिया ।
समतानमसक्षाम रागरागाङ्गवेदिता ॥
क्रियाभाषाविभाषाज्ञ दक्षता गीतवादने ।
अस्थाने चापि दुःस्थाने मार्गभिमोक्षकीशलम् ।
गात्नुर्दा स्थानगाहम तद्दोषाच्छादनं तथा ।
वांशिकस्य गुणा एते मया सक्षिप्य दर्शिताः ।'
इति संगीतदामोदरः ॥

वंश्य, त्रि, (वंशे भवः । वंश+"दिगादिभ्यो यत् ।" ४ । ३ । ५४ । इति यत् ।) वंशजातः । तत्पर्य्यायः । कुल्यः २ बीज्यः ३ । इति त्रिकाण्डशेषः ॥ (यथा, मनुः । २ । ६१ ।
"स्वायम्भुवस्यास्य मनोः षड्वंश्या मनवोऽपरे ।"
वंशोत्पन्नमात्रे च । यथा रघुः । १८ । ४८ ।
"वंश्या गुणाः खल्वपि लोककान्ताः
प्रारम्भसूक्ष्माः प्रथिमानमापुः ।"
पृष्ठवंशाव्यविशेषः । पृष्ठावयवविशेषश्च । इति वंशशब्दव्युत्पत्तेः । यथा, भागवते ।११।८।१२।
"यदस्थिभिर्निर्मितवंशवंश्य
स्थूणं त्वचा रोमनखैः पिनद्धम् ।")

वक्क ऋ ङ कौटिल्ये । गतौ । इति कविकल्पद्रुमः ।
(भ्वा० आत्म० सक० सक० च सेट् ।) कौटिल्य मिह कुटिलीभाव कुटिलीकरणञ्च । ऋ, वङ्कते । ङ वङ्कते काष्ठं कुटिलं स्यादित्यर्थः । वङ्कते काष्ठं कुटिलं करोतीत्यर्थः । इति दुर्गादासः ॥

वक्ष, ङ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा० आत्म० सक० सेट् ।) ङ वक्षते । इति दुर्गादासः ॥

वक्तव्य, त्रि, (ब्रू वच वा+तव्य ।) कुत्सितः । हीनः । (यथा, मनुः । ८ । ६६ ।
"नाध्यधीनो न वक्तव्यो न दस्युर्न विकर्म्मकृत् ।")
वचनार्हः । इति मेदिनी । ये, १३ । (यथा, महाभारते । १२ । ७६ । ३३ ।
"वक्तव्याश्चापि राजानः सर्वे यत्र युधिष्ठिरः ।
युधिष्ठिरस्याश्वमेधो भवद्भिरनुभूयताम् ।"
वच+भावे तव्य ।) वचने, क्ली ॥

वक्ता, [ऋ] त्रि, (वच+तृच ।) यो वक्तु जानाति सः । इति भरतः ॥ औचित्यात् बहु विशिष्ट वक्ति । इति मुकुटः ॥ (यथा, हितोपदेशे ।
"भद्रं कृतं कृतं मौनं कोकिलैर्जलदागमे ।
दर्दुरा यत्र वक्तारस्तत्र मौनं हि शोभनम् ॥")
तत्पर्य्यायः । वद २ वदावदः ३ । इत्यमरः ।
३ । १ । ३५ । वदान्यः ४ वक्ता ५ । इति जटाधरः ॥ सुवक्ता । इति भरतः ॥ बहुभाषी । इत्येके । तत्पर्य्यायः । वाचोयुक्तिपटुः २ वाग्मी ३ वावदूकः ४ । इत्यमरः ॥ वचन ५ सुवचाः ६ प्रवाक ७ । इति जटाधरः ॥ पण्डितः । इति मेदिनी । ते, ५३ ॥

वक्त्र, क्ली, (वक्ति अनेनेति । वच+"गुधृवीपचिवचियमिसदिक्षदिभ्यस्त्रः ।" उणा० ४ । १६६ । इति त्रः ।) मुखम् । इत्यमरः । २ ।
६ । ८९ । (यथा, मनौ । ८ । २७२ ।
"धर्म्मोपदेशं दर्पेण विप्राणामस्य कुर्व्वतः ।
तप्तमासेचयेत्तैलं वक्त्रे श्रोत्रे च पार्थिवः ॥")
तगरमूलम् । इति शब्दमाला ॥ वस्त्रभेदः । इति मेदिनी । रे, ८४ ॥ छन्दोविशेषः । इति हेमचन्द्रः ॥ तस्य लक्षणादि यथा,—
"अनक्षरद्वयम वक्त्र विषमश्च कन्यादन ।
तयोद्वयोरपाष्टोऽथ वक्त्रलक्षणमुच्यते ॥
वक्त्र युगर्थ्या मतौ स्यातामब्धेर्याऽनुष्टुभि ख्यातम् ॥"
अत्र द्विरावर्त्ता श्लोक पूरयितव्यः ।
"वक्त्राम्भोज सदा स्मेर चक्षुर्नीलोत्पल पुष्पम् ।
वल्लवीनां सुरारातेश्चेतो भृङ्ग चकारोत्के ॥"
इति छन्दोमञ्जरी ॥

वक्त्रखुरः पुं, (वक्त्रस्य खुर इव पृषोदरादित्वात् सः ।) दन्तः । इति त्रिकाण्डशेषः ॥

वक्त्रजः पुं, (अग्रजो वक्त्राद् जायते इति । ब्राह्मणोऽस्य मुखमासीत् इति श्रुतेः । जन+डः ।) ब्राह्मणः । इति त्रिकाण्डशेषः ॥ मुखजाते त्रि ॥

वक्त्रताल, क्ली, (वक्त्रस्य तालम् ।) मुखवाद्यम् । इति केचित् । त्रिकाण्डशेषे मुखवाद्य वक्त्रवाद्यमिति लिखितम् ॥

वक्त्रपट्टः, पुं, (वक्त्रस्य पट्ट इव ।) अश्वानाम्भोजन पात्रम् । तोबड़ा इति भाषा । तत्पर्य्यायः । तलिका २ तवशारणम् ३ । इति हेमचन्द्रः । ४ । ३१० ॥

वक्त्रभेदी, [न्] पुं (वक्त्रं भिनत्तीति । भिद्+णिनि ।) तिक्तरसः । इति हेमचन्द्रः । ६ । ४५ ॥ मुखभेदके, त्रि ॥

वक्त्रवासः, पुं, (वक्त्रं वासयति सुरभीकरोतीति । वासि+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) नारङ्गः । इति राजनिर्घण्टः ॥ (विशेषोऽस्य नारङ्गशब्दे ज्ञातव्यः ॥ वक्त्रस्य वासः ।) मुख-सुगन्धश्च ॥

वक्त्रशोधन, क्ली (वक्त्रस्य शोधनमिव ।) मदनम् । इति राजनिर्घण्टः ॥ (वक्त्रस्य शोधनम् ।) मुखशुद्धिकरणञ्च ॥

वक्त्रशोधी, [न्] पुं (वक्त्रं शोधयतीति । शुध+णिच+णिनि ।) जम्बीरः । इति शब्दार्थ ॥ मुखशोधके, त्रि ॥

वक्त्रासव, पुं, (वक्त्रस्य आसवः ।) अधरामृतम् । इति त्रिकाण्डशेषः ॥

वक्रं क्ली, (वङ्कते इति । वकि कौटिल्ये+रन् । पृषोदरादित्वात् न लोपः । यद्वा, वञ्चति । वञ्च गतौ+"स्फायितञ्चिवञ्चि" । उणा० २ । १३ । इति रक् । न्यङ्क्वादित्वात् कुत्वम् ।) नदीवङ्कः । तत्पर्य्यायः । पुटभेदः २ । इत्यमरः ॥ वङ्कः ३ । इति भरतः । (वक्रं मार्गादिकम् । तत्प्रयोगो यथा —
"कालागुरुद्रवविधा वक्रं सरस्यां कुटिलं भ्रम ।
मन्मथमङ्गलं गृहं श्रीहरिमन्दिरसमारक्तम् ॥"
—इति नैषधकरभाषादशाम् ॥
तथाह्य विषय ।
"घृताक्तैःश्वमन्थोया वक्रवासीवसे, मतम् ।
तैलं नस्य प्रयुञ्जीत शिरोऽमदापहम् ॥"
इति प्रतापवचनम् ।
इति चक्रपाणिसंग्रहे शिरोरोगाधिकारे ॥)

वक्रः, पुं (वञ्चतीति । वञ्च गतौ+"स्फायितञ्चि वञ्चीति ।" उणा० २ । १३ । इति रक् । न्यङ्क्वादित्वात् कुत्वम् ।) शनैश्चरः । इति मेदिनी । रे, ३५ ॥ मङ्गलग्रहः । इति हेमचन्द्रः । २ । ३ ॥ रुद्रः । त्रिपुरासुरः । इति शब्दरत्नावली । पर्पटः । इति राजनिर्घण्टः ॥ ग्रहगतिविशेषश्च । स तु ग्रहस्य पञ्चस्थानात् सप्तमस्थितराश्यवस्थितिकाले "प्राग्गमनवशात् इति ज्योतिःशास्त्रम् । यथा,—
"वक्रा स्युः पञ्चषट्स्थेऽर्क्के अतिवक्रा नगाष्टगे ।
नवमे दशमे भानौ जायते वक्रभार्गतिः ।
द्वादशैकादशे वापि कमशो शीघ्रगौ पुनः ।
इति चित्रपक्षवाचे शुक्रस्य वक्रत्वं ।
न तु राहुकेतुवशात् निशीथादिभिश्चयन्त ।
राहुकेतू सदा वक्रौ शीघ्रगौ चन्द्रभास्करौ ॥"
इति ज्योतिस्तत्त्वम् ॥
(वहुदेशीयनृपतिभेदः । यथा, महाभारते ।
२ । १४ । ११ ।
"तमेव च महाराज ! शिष्यवत् समुपस्थितः ।
वक्रः करूषाधिपतिर्मायायोधी महाबलः ॥")

वक्र त्रि, (वङ्कते इति । वकि कौटिल्ये+रन् । पृषोदरादित्वात् न लोपः । यद्वा, वञ्च+रक् ।) अशृजु । बाँका इति भाषा । तत्पर्य्यायः । अरालम् २ वृजिनम् ३ जिह्मम् ४ ऊर्म्मिमत् ५ कुञ्चितम् ६ नतम् ७ आविद्धम् ८ कुटिलम् ९ भुग्नम् १० वेल्लितम् ११ । इत्यमरः । ३ । १ । ७१ ॥ वङ्कुरम् १२ वेल्लम् १३ विनतम् १४ वक्रम् १५ । इति शब्दरत्नावली ॥ आनतम् १६ आभुग्नम् १७ मङ्गुरम् १८ । इति जटाधरः ॥

(यथा, महाभारते । ३ । १६९ । १९ ।
"स वै तथा वक्र एवाभ्ययाय
द्रष्टावक्रः प्रथितो वै महर्षिः ।")
वक्राणि यथा । अलकः १ भाल २ भ्रूः ३
नखचिह्नम् ४ अङ्कुशः ५ कुञ्चिका ६ भग्नवक्त्र
वम् ७ बालेन्दुः ८ दात्रम् ९ कृपाणः १०
चक्रकः ११ शुकास्यम् १२ पलाशपुष्पम् १३
विद्युत् १४ कटाक्षः १५ शक्रधनुः १६ नखा १७
ग्रीवा १८ करः १९ हस्तिदन्तः २० शूकर
दन्तः २१ सिंहनखादि २२ । इति कविकल्प
लता । क्रूरः । इति मेदिनी । रे, ६५ ॥
वक्रकण्ट, पुं, (वक्रा कण्ठा कण्टका यस्य ।)
वदरवृक्षः । इति राजनिघण्टुः ॥ (वक्रः
कण्टः ।) कुटिलकण्टकश्च ॥
वक्रकण्टक, पुं, (वक्रा कण्टका अस्य ।) खदिर
वृक्षः । इति राजनिघण्टुः । (विषयोऽस्य
खदिरशब्दे विशेयः ।)
वक्रखड्ग, पुं, (वक्र खड्गः ।) करवालः ।
इति राजनिघण्टुः ॥
वक्रग्रीव पुं, (वक्रा ग्रीवास्य ।) उष्ट्रः । इति
त्रिकाण्डशेषः ॥
वक्रचञ्चु, पुं, (वक्रा चञ्चुर्यस्य ।) शुकपक्षी ।
इति शब्दरत्नावली ॥
वक्रताल, क्ली, (वक्र ताल यत्र ।) वाद्यविशेषः ।
तत्पर्यायः । मुखवाद्यम् २ । वक्रनालमिति वा
पाठः । इति त्रिकाण्डशेषः ॥
वक्रताली, स्त्री (वक्रताल+गौरादित्वात् ङीष् ।)
मुखवाद्यम् । इति शब्दरत्नावली ॥
वक्रतुण्ड, पुं, (वक्रंतुण्डं यस्य ।) शुकपक्षी ।
इति शब्दरत्नावली ॥ (वक्रोष्ठे, त्रि । यथा,
भागवते । ६ । १ । २८ ।
'स पाशहस्तांस्त्रीन् दृष्ट्वा पुरुषानतिदारुणान् ।
वक्रतुण्डानूर्ध्वरोम्ण आत्मानं नेतुमागतान् ॥")
वक्रदंष्ट्र, पुं, (वक्रा दंष्ट्रा यस्य ।) शूकरः । इति
केचित् ॥
वक्रनक्र, पुं, (वक्रः कुटिलः नक्र इव हिंस्रश्च ।)
पिशुनः । शुकपक्षी । इति मेदिनी । रे २८५ ॥
वक्रनालं, क्ली, मुखवाद्यम् । इति शब्दादित्रि
त्रिकाण्डशेषः ।
वक्रनासिक, पुं (वक्रा नासिका यस्य ।) पेचकः ।
इति त्रिकाण्डशेषः । कुटिलनासायुक्ते, त्रि ।
वक्रपुच्छ पुं, स्त्री (वक्रं पुच्छं यस्य ।) कुक्कुरः ।
इति त्रिकाण्डशेषः । वक्रोमकुटिललाङ्गूलश्च ।
वक्रपुष्प पुं, (वक्राणि पुष्पाण्यस्य ।) वकवृक्षः ।
इति शब्दरत्नावली । पलाशवृक्षः । इति
राजनिघण्टुः ।
वक्रवालधि, पुं (वक्रो वालधिः केशयुक्तलाङ्गूलं
यस्य ।) कुक्कुरः । इति हेमचन्द्रः । ४ । २८४ ।
कुटिलपुच्छश्च ॥
वक्रभणित, क्ली, (वक्रं कुटिलं भणितम् ।)
कुटिलवाक्यम् । तत्पर्यायः । द्विकोक्तिः २ ।
इति त्रिकाण्डशेषः ॥

वक्रम, पुं (अवक्रमणमिति । अव+क्रम+भावे
घञ् । अलोपः ।) पलायनम् । इति शब्दरत्ना
वली ॥
वक्रलाङ्गूल, पुं, (वक्रं लाङ्गूलं यस्य ।) कुक्कुरः ।
इति राजनिघण्टुः । कुटिलपुच्छे, त्रि ।
वक्रवक्त्र, पुं, (वक्रं वक्त्रं मुखमस्य ।) शूकरः ।
इति शब्दरत्नावली । कुटिलमुखविशिष्टे त्रि ।
वक्रशल्या स्त्री, (वक्रं शल्यमिव मध्याविक
यस्याः ।) कुटुम्बिनीक्षुपः । इति राज
निघण्टुः ॥
वक्राग्र, क्ली (वक्रमग्रं यस्य ।) कपाटवक्रश्च ।
इति रत्नमाला ॥ । कुटिलाग्रभागश्च ॥
वक्राङ्ग, पुं, (वक्रमङ्गं यस्य ।) हंसः । इति
हेमचन्द्रः । कुटिलावयवे, क्ली । (कुटिलाव
यवविशिष्टे, त्रि । यथा, हरिवंशे । १ २ । ३८ ।
"तरङ्गविषमापीड़ा चक्रवाकोन्नतस्तनी ।
वेगगम्भीरवक्राङ्गी मत्स्यमीनविभूषणा ॥")
वक्रि, त्रि, मिथ्यावादी । वक्रधातोः क्तिन्प्रत्ययेन
निष्पन्नः ॥
वक्री, [न्] पुं, (वक्रो वक्रतास्यास्तीति । इनिः ।
वैदिकधर्म्मविरुद्धवादित्वादस्य तथात्वम् ।) बुद्धः ।
इति शब्दरत्नावली । वक्रगतिविशिष्टे, त्रि । यथा
"सर्व्वेशो यदि वक्री स्यात् शुभ कार्य्येषु
वक्रता ।
सर्व्वेऽप्यस्य गती मध्ये दुःखान्याधिवृत्तः ॥"
इति ज्योतिस्तत्त्वम् ।
वक्रोक्ति, स्त्री (वक्रा कुटिला उक्तिः ।)
काकूक्तिः । यथा, कामधेनुकल्पतरुधृतमत्स्य
पुराणम् ।
"अथ हसे हयोत्थर्षं दाता वक्रोक्तिभिः परैः ।
मात्स्यभावाद्यत् किञ्चित् मयोत्पादनम्
निध्यते ।
तत् कश्चिदन्यो न नयेत विमान्य यथाक्रमम् ।
न वाह्यं न च तत् चौर मालव्य केनचित्
क्वचित ॥"
लक्षप्रदीपेऽप्येवम् । वक्रोक्तिभिः काकूक्तिभिः ।
इति मुहूर्त्ततत्त्वम् । * । कुटिलोक्तिः । यथा,
"वादी व्याकरणं विनैव विदुषां धृष्टः प्रविष्टः
सभा
जल्पन्नल्पमतिः स्मयात् पटुवटुभ्रूभङ्गवक्रो
क्तिभिः ।
ह्रीतः सन् परिहासमेति गणको गोलानभिज्ञस्तथा
ज्योतिर्व्वित्सदसि प्रगल्भगणक प्रश्नप्रपञ्चो
क्तिभिः ॥"
इति सिद्धान्तशिरोमणौ गोलाध्यायः ।
(वक्रा अर्थान्तरव्यञ्जनेन कुटिला उक्तिः ।
शब्दालङ्कारभेदः । तल्लक्षणादिकं यथा
साहित्यदर्पणे दशमपरिच्छेदे ।
"अन्यस्यान्यार्थकं वाक्यमन्यथा योजयेद् यदि ।
अन्यः श्लेषेण काक्वा वा सा वक्रोक्तिस्ततो द्विधा ।
द्विधेति श्लेषवक्रोक्तिः काकुवक्रोक्तिश्च । क्रमे
णोदाहरणं यथा,—

"के यूयं स्थल एव सम्प्रति वयं प्रश्नो विशेषाश्रय
किं ब्रूते विहगः स वा फणिपतिर्यत्रास्ति सुप्तो
हरिः ।
वामा यूयमहो विडम्बरसिकः कीदृक् स्मरो
वर्त्तते
येनास्मासु विवेकशून्यमनसः पुंस्वेव योषिद्
भ्रमः ॥"
अत्र विशेषपदस्य विः पक्षी शेषो नाग इति
अर्थद्वययोगात् सभङ्गः श्लेषः । अन्यत्र तु अभङ्गः ।
"काले कोकिलवाचाले सहकारमनोहरे ।
कृतागसः परित्यागात् तस्याश्चेतो न दूयते ॥"
अत्र कयाचित् सख्या निषेधार्थे नियुक्तो नञ्
अन्यथा काक्वा दूयत एवेति विध्यर्थे घटितः ।")
वक्रोष्ठिका स्त्री, (वक्रोष्ठोऽस्त्यस्या इति । ठन् ।
ईषद्धसनेन हि ओष्ठस्य वक्रता जायते अतो-
ऽस्यास्तथात्वम् । यद्वा, वक्र ओष्ठो यस्याः ।
तत स्वार्थे कन् । टापि अत इत्वम् ।) अल्प
हसितम् । ईषद्धास्यम् । तत्पर्य्यायः । स्मितम्
२ । इति हेमचन्द्रः ॥
वक्ष रोषसंहत्योः । इति कविकल्पद्रुमः । (भ्वा
पर रोषे अक संहतौ सक सेट ।) वक्षति ।
इति दुर्गादासः ॥
वक्ष [स्] क्ली, (उच्यतेऽनेनेति । वच+"वसि
वपिभ्यां सुट् च ।" उणा ४ । २१९ । इति
असुन् सुट् । वचसेरसुन् इति रमानाथ ।
धातुप्रदीपश्च ।) अङ्गविशेषः । स तु स्तनयोपरि
कण्ठाधोभागः । बुक इति भाषा । तत्
पर्य्यायः । क्रोडम् २ भुजान्तरम् ३ उरः ४
वत्सम् ५ । इत्यमरः । अङ्कः ६ उत्सङ्गः ७ ।
इति जटाधरः । वक्षसम् ८ शयपीठकम् ९ ।
इति शब्दचन्द्रिका । अपि च ।
"अथ वक्षश्च वक्षं स्यादुरो वक्षस्थले स्मृतम् ।'
इति शब्दरत्नावली ।
तस्य शुभाशुभलक्षणं यथा,—
"समवात् समवक्षा स्यात् पीनैर्म्मर्म्मोभि
र्क्वचित् ।
वक्षोभिर्विषमैर्निःस्व शस्त्रेण निधनस्तथा ॥"
इति गारुडे ६६ अध्यायः ।
(पुं, वहतीति । वह+"वहिहाधाञ्भ्य
श्छन्दसि ।" उणा ४ । २२० । इति असुन् ।
सुट् च । अनड्वान् । इत्युज्ज्वलदत्तः ॥")
वक्षज, क्ली, (वक्षस्यनेनेति । वक्षरीवर्षस्त्री+
सुट् ।) वक्षः । इति शब्दचन्द्रिका । (वाहक,
त्रि । यथा, ऋग्वेदे । ६ । २१ । ६ ।
"त्रिधातूनि वक्षणानि वक्षे ।"
"वक्षणानि वाहकानि स्तोत्राणि क्रियाश्च
करवाम ।" इति तद्भाष्ये सायणः ॥)
वक्षोज स्त्री (वक्षसि जायते इति । जन्+ड ।)
स्तनः । इति शब्दरत्नावली । (यथा, साहित्य
दर्पणे ३ परिच्छेदे ।
"मध्यस्य प्रथिमानमेति जघनं वक्षोजयोर्मन्दता
दूरं यात्युदरञ्च रोमलतिका नेत्रार्जवं धावति ।

कन्दर्प परिपीड्य भूतममनोराज्याभिषिक्त
त्वयात्
अङ्गानीव परस्परं विच्यते विलुण्ठन शुभ्रुव ।")
बघोदर पुं, (बघमि रोदतीति । बघ+क ।) ऋक्ष । इति त्रिकाण्डशेषः । (यथा, आर्य्या सप्तशत्याम् । ४४६ ।
"मा प्रबरतदा पीवरवक्षोरुहयोभरत्र भज
गर्व्वम् ।
निर्म्मोकैरपि शोभा ययोरभङ्गीभिरस्पृष्टे ।")
बल्समानः, त्रि, भविष्यत्क्षणीयविषय । बध धातोः अभानप्रत्ययेन निष्पन्न । यथा । अथ बध्यमानवचनात् मध्यदानप्राप्तवैव अवध्यम् । इति तिथ्यादितत्त्वम् । अपि च ।
"तथैव शाम्भवीमध्ये पारम्भ अवद्योऽधिके ।
बध्यमानस्य षष्ठीश्यया प्राप्तहिंसा मतम् ।"
इति श्रीहरिभक्तिविलासे १५ विलासः ।
बाढ़, श्लथि । इति कविकल्पद्रुम । (भ्वा पर मक सेट ।) बाढति । श्लथि मतौ । इति दुर्गादासः ।
बध, ह श्लथि । इति कविकल्पद्रुम । (भ्वा पर सक सेट । इदित् ।) ह, बधति । श्लथि मतौ । इति दुर्गादासः ।
बग, ह खञ्जे । इति कविकल्पद्रुम । (भ्वा पर अक० सेट ।) ह, बगति । इति दुर्गादासः ।
बगला } स्त्री, दशमहाविद्यान्तर्गतदेवी
बगलामुखी } विशेष । तदुक्तं तन्त्रान्तरे ।
"अथातः सम्प्रवक्ष्यामि बल सम्पत्कारकम् ।
साधकानां हितायाय स्तम्भनाय च वैरि
णाम् ।
यस्या स्मरणमात्रेण पवनोऽपि स्थिरायते ।
प्रणवं स्थिरमायाञ्च ततश्च बगलामुखि ।
तदन्ते सर्व्वदुष्टानां ततो वाच मुख पदम् ।
स्तम्भयेति ततो जिह्वां कीलयेति पदद्वयम् ।
बुद्धिं नाशय पश्चात्तु स्थिरमायां समालिखेत् ।
लिखेच्च पुनरोङ्कारं स्वाहेति पदमन्ततः ।
षट्त्रिंशदक्षरी विद्या सर्व्वसम्पत्करी मता ।"
स्थिरमाया ह्लीं । तथा च ।
"वह्निबीजेन्द्रमायाढ्य स्थिरमाया प्रकीर्त्तिता ।
ॐ ह्लीं बगलामुखी सर्व्वदुष्टानां वाच मुखं स्तम्भय जिह्वां कीलय कीलय बुद्धिं नाशय ह्लीं ॐ स्वाहा । ● । तन्त्रान्तरे ।
"वह्निबीजेन्द्रमायाढ्य बगलामुखि सर्व्वदुष्ट ।
दुष्टानां वाचमित्युक्त्वा मुखं स्तम्भय कीर्त्तयेत् ।
जिह्वां कीलय बुद्धिं तत् विनाशय पदं वदेत् ।
पुनर्व्वीजं ततस्तारं वह्निजायावधिर्भवेत् ।
तारादिका चतुर्व्विंशदक्षरा कल्पपादपी ।"
ॐ ह्लीं बगलामुखि सर्व्वदुष्टानां वाच मुखं स्तम्भय जिह्वां कीलय बुद्धिं विनाशय ह्लीं ॐ स्वाहा । इत्यपि मन्त्रान्तरम् । ● । अनयोः पूजा । प्रातःकृत्यादिप्राणायामान्तं विधाय ऋष्यादिन्यासं कुर्य्यात् । यथा, शिरसि नारद ऋषये नमः । मुखे त्रिष्टुप्छन्दसे नमः । हृदि

बगलामुख्यै देवतायै नमः । गुह्ये ह्लीं बीजाय नमः । पादयोः स्वाहाशक्तये नमः ।
"नारदोऽस्य ऋषिः प्रोक्तः त्रिष्टुप् छन्दश्च तन्मुखे ।
श्रीबगलामुखीं देवीं हृदये विन्यसेत्ततः ।
ह्लीं बीजं गुह्यदेशे तु स्वाहाशक्तिञ्च पादयोः ।"
ततः कराङ्गन्यासौ । ॐ ह्लीं अङ्गुष्ठाभ्यां नमः । बगलामुखि तर्ज्जनीभ्यां स्वाहा । सर्व्वदुष्टानां मध्यमाभ्यां वषट् । वाचं मुखं स्तम्भय अनामिकाभ्यां हुँ । जिह्वां कीलय कीलय कनिष्ठाभ्यां वौषट् । बुद्धिं नाशय ह्लीं ॐ स्वाहा करतलपृष्ठाभ्यां फट् । एवं हृदयादिषु । यथा च दिव्यतन्त्रे ।
"षड्भिरङ्गैस्तथा दीर्घबीजैश्च षडङ्गके ।
करन्यासञ्च तथा कराङ्गन्यासमाचरेत् ।"
ततो मूलान्ते आनन्दव्यापिनीबगलामुखीश्री पादुकां पूजयामि इति मूलाधारे । मूलान्ते विद्यानन्दव्यापिनीबगलामुखीश्रीपादुकां पूजयामि शिरसि । मूलान्ते त्रिपुरव्यापिनी बगलामुखीश्रीपादुकां पूजयामि सर्व्वाङ्गे । तत्र च ।
"मूर्द्धि भाले दृशोः श्रोत्रे गण्डयोर्नासयोर्मु
खे ।
ओष्ठयोर्मुखवृत्ते च दक्षिणांसे च कूर्परे ।
मणिबन्धेऽङ्गुलीमूले अग्रे च कुचयोर्हृदि ।
नाभौ कट्यां गुह्यदेशे वामांसे कूर्परे तथा ।
मणिबन्धेऽङ्गुलीमूले मतश्च विन्यसेत् पुनः ।
दक्षवामे चोरुजान्वोर्गुल्फयोरङ्गुलिमध्यतः ।
क्रमेण मन्त्रवर्णांस्तु न्यस्य ध्यायेद्यथाविधि ।" ● ।
ततो ध्यानम् ।
"मध्ये सुधाब्धिमणिमण्डपरत्नवेदी
सिंहासनोपरिगतां परिपीतवर्णाम् ।
पीताम्बराभरणमाल्यविभूषिताङ्गीं
देवीं स्मरामि धृतमुद्गरवैरिजिह्वाम् ।
जिह्वाग्रमादाय करेण देवीं
वामेन शत्रून् परिपीडयन्तीम् ।
गदाभिघातेन च दक्षिणेन
पीताम्बराढ्यां द्विभुजां नमामि ।"
इति ध्यात्वा मानसैः सम्पूज्य वहिःपूजामारभेत् । ● । तत्र प्रथमतोऽर्घ्यस्थापनम् । यथा । स्वाग्रतः चतुरस्र विधाय ऐशानादिकोणेषु पूर्व्वादिदिक्षु च गुरुमापनर्त्तकचन्द्रबेभ्यो मञ्च पत्रके नमः इत्यनेन मन्त्रेणैव सम्पूज्य तेन मधुना वा अर्घ्यपात्रमापूरयेत् । ततो गारुडं विद्यया संपूज्य पत्राणि विन्यसेत् । ततो पीठ-पीठिकाद्वे प्रदर्श्य धेनोरवैव ध्यानं पूजोप करणान्युपचर्य । ● । अथवा यन्त्रम् । षट्कोणं वसुदलं ततश्चतुरस्रं भूपुरात्मकम् । ततो मन्त्र मुखार्थं ॐ आधारशक्तिकमलासनाय नमः । इदं प्रक्रियाप्रासनाय नमः । पूर्व्ववत् ध्यात्वा पीठे आवाह्य षडङ्गानि न्यसेत् । ततो देवीं प्रदक्ष पुरतः षडङ्गेन सकलं यजेत् । ततो मूलेन सकलिता पीठयोर्निधाय प्रदक्ष ध्यात्वा

विद्याभिर्देवमेवैविद्यमये मुखे चिन्ता इमद् हुँस्थयोगेन स्वाहावर्णो मदलाश्लिष्टां प्रयेत् । ततो यथाशक्त्युपचारैः सम्पूज्य आवरणपूजा मारभेत् । षट्कोणेषु पूर्व्वे ॐ सुभगायै नमः । इत्यग्निकोणे भगवाप्यायै । ईशाने भगाढ्यायै । पश्चिमे भगाविद्यायै । नैरृते भगपातिन्यै । वायौ भगमालिन्यै । ततोऽष्टदल पत्रेषु ब्राह्म्याद्याः पूज्याः । यथापि ॐ ब्राह्म्यै नमः । एवं विमलायै । अक्षिकायै । अपरा जितायै । शुभायै । चक्रिण्यै । सौम्यायै । आकर्षिण्यै । ततो द्वारेषु ॐ भैरवाय नमः । तद्बाह्ये इन्द्रादीन् वज्रादीन् पूजयेत् । ततो मूलेन धूपादिकं दत्त्वा यथाशक्ति जपं विधाय त्रिकूटस्थां प्रदक्षिणे पुष्पाञ्जलित्रयं दत्त्वा देवै योनिमुद्रां प्रदर्शयेत् । ततो भैरवाय बलिं दद्यात् । ततो विसर्ज्जनान्तं कर्म्म समापयेत् । अस्य पुरश्चरणं लक्षजपः । तथा च ।
"पीताम्बरधरो भूत्वा पूर्व्वाशाभिमुखस्थितः ।
लक्षमेकं जपेन्मन्त्रं हरिद्राग्रथितमालया ।
ब्रह्मचर्य्यरतो नित्यं प्रयतो ध्यानतत्परः ।
प्रियङ्गुकुसुमेनापि पीतपुष्पैश्च होमयेत् ।" ● ।
द्वितीयमन्त्रे तु ध्यानादिकं सर्व्वं पूर्व्ववत् ।
ध्यानन्तु ।
"गम्भीराञ्च मदोन्मत्तां स्वर्णकान्तिसमप्रभाम् ।
चतुर्भुजां त्रिनयनां कमलासनसंस्थिताम् ।
मुद्गरं दक्षिणे पाशं वामे जिह्वाञ्च वज्रकम् ।
पीताम्बरधरां देवीं दृढपीनपयोधराम् ।
हेमकुण्डलभूषाञ्च चन्द्रार्द्धमुकुटाञ्चिताम् ।" ● ।
अथ प्रयोगः ।
"कुर्व्वीत चाम्बुनिलयं दुष्टानां बुद्धिनाशनम् ।
अपकीर्त्तिप्रयोगी च मन्त्र चाप्युदुर्वं करेत् ।
हरिद्राहरितालाभ्यां लवणं कुङ्कुमादिकैः ।
स्तम्भयेत् प्रयोगादि नाम वार्त्ता विचारतो ।
अथवा पीतपुष्पैश्च त्रिमधुसिक्तैश्च होमयेत् ।
स्तम्भयेच्च सर्व्वेषु प्रयोगे प्रकाशयेत् ।"
यन्त्रम् ।
"ॐकारयोः षट्कोणवन्दनाग्रमध्ये विलिख्य ।
मध्ये नाम साध्यस्य तदग्रे वायवादयम् ।
बीज त्रिकोणमग्नेः स्तीर्णं विभूषितम् ।
चतुरस्रपरीतं तं विलिखेत् समितम् ।
हकारेण समावेष्ट्य चतुष्कोणेषु दर्शि ।
तत्कोणरेखाग्रेषु भूबीजमाद्यं लिखेत् ।
त्रिशूलमध्यरेखायां द्वारी बीजानि मानवी ।
अन्यानि च कोणेषु तद्विधेऽमलां लिखेत् ।
प्रथमादिरेखं चार्द्धं माङ्गल्यपरिरक्षकम् ।
आलेख्य चाद्यया यन्त्रराष्टं स्थिरमायया ।
दिव्याष्टदलोपेत मातृसिद्धिप्रदायिका ।
लिखेत् पूर्व्वदाक्षिण्य मध्ये मङ्गलपीठम् ।
षट्कोणमध्ये वा हरितालालक्ते ।
दिव्यधूपे सुगन्धे लिखिता मातृकादेवी ।
त्रिरष्टदलस्तम्भ मूर्त्ते भैरव वह्नि ।
कुम्भकारेण वहन् भ्रमतो विपरीतः ।

मृत्तिकां धनुपादाय वृषभ कारयेत्ततः।
पञ्च तस्योपरि न्यस्य तालकेन विलिख्य च॥
समागायां विनिक्षिप्य पीतरज्ज्वा निमे गृहे।
अर्च्चयेत् चतुष्कार्लं नित्यं पीतोपचारतः।
दुष्टस्य स्तम्भयत्येव मुखं वाचस्पतेरपि॥"
इति बगलापरिच्छेदः॥ ७॥

निबन्धान्तरे।
"काली तारा महाविद्या षोडशी भुवनेश्वरी।
भैरवी छिन्नमस्ता च विद्या धूमावती तथा॥
बगला सिद्धविद्या च मातङ्गी कमलात्मिका।
एता दश महाविद्याः सिद्धविद्याः प्रकी-
र्त्तिताः॥"

अथ बगलामुखीस्तोत्रम्।
"मध्ये सुधाब्धिमणिमण्डपरत्नवेदी
सिंहासनोपरिगतां परिपीतवर्णाम्।
पीताम्बराभरणमाल्यविभूषिताङ्गीं
देवीं भजामि धृतमुद्गरवैरिजिह्वाम्॥
जिह्वाग्रमादाय करेण देवीं
वामेन शत्रुं परिपीडयन्तीम्।
गदाभिघातेन च दक्षिणेन
पीताम्बरां तां द्विभुजां भजामि॥
चलत्कनककुण्डलोल्लसितचारुगण्डस्थलीं
लसत्कनकचम्पकद्युतिमदिन्दुबिम्बाननाम्।
गदाहतविपक्षकां कलितलोलजिह्वाञ्चलां
स्मरामि बगलामुखीं विमुखवाङ्मनस्स्तम्भिनीम्॥
पीयूषोदधिमध्यचारुविलसद्रक्तोत्पले मण्डपे
सत्सिंहासनमौलिपातितरिपुं प्रेतासनाध्यासि-
नीम्।
स्वर्णाभां करपीडितारिरसनां भ्राम्यद्गदां वि-
भ्रमा-
मित्थं ध्यायति यान्ति तस्य विलयं सद्योऽथ
सर्व्वापदः॥
देवि त्वच्चरणाम्बुजार्च्चनकृते यः पीतपुष्पाञ्जलीन्
भक्त्या वामकरे निधाय च मनुं मन्त्री मनो-
ज्ञाक्षरम्।
पीठध्यानपरोऽथ कुम्भकवशात् बीजं स्मरेत्
पार्थिवं
तस्यामित्रमुखस्य वाचि हृदये जाड्यं भवेत्
तत्क्षणात्॥
वादी मूकति रङ्कति क्षितिपतिर्वैश्वानरः
शीतति
क्रोधी शाम्यति दुर्जनः सुजनति क्षिप्रानुगः
खञ्जति।
गर्व्वी खर्व्वति सर्व्वविच्च जडति त्वद्यन्त्रणा-
यन्त्रितः
श्रीनित्ये बगलामुखि प्रतिदिनं कल्याणि तुभ्यं
नमः॥
मन्त्रस्तावदलं विपक्षदलने स्तोत्रं पवित्रं च ते
यन्त्रं वादिनियन्त्रणं त्रिजगतां जैत्रं च चित्रं
च ते।
मातः श्रीबगलेति नाम ललितं यस्यास्ति
जन्तोर्मुखे
त्वन्नामग्रहणेन संसदि मुखस्तम्भो भवेद्
वादिनाम्॥
दुष्टस्तम्भनमुग्रविघ्नशमनं दारिद्र्यविद्रावणं
भूभृद्भीशमनं चलन्मृगदृशां चेतःसमाकर्षणम्।
सौभाग्यैकनिकेतनं मम दृशोः कारुण्यपूर्णामृतं
मृत्योर्मारणमाविरस्तु पुरतो मातस्त्वदीयं वपुः॥
मातर्भञ्जय मे विपक्षवदनं जिह्वां च सं कीलय
ब्राह्मीं मुद्रय नाशयाशु धिषणामुग्रां गतिं
स्तम्भय।
शत्रूंश्चूर्णय देवि तीक्ष्णगदया गौराङ्गि
पीताम्बरे
विघ्नौघं बगले हर प्रणमतां कारुण्यपूर्णेक्षणे॥
मातर्भैरवि भद्रकालि विजये वाराहि विश्वा-
श्रये
श्रीविद्ये समये महेशि बगले कामेशि रामे रमे।
मातङ्गि त्रिपुरे परात्परतरे स्वर्गापवर्गप्रदे
दासोऽहं शरणागतः करुणया विश्वेश्वरि
त्राहि माम्॥
संरम्भे चौरसङ्घे प्रहरणसमये बन्धने व्याधिमध्ये
विद्यावादे विवादे प्रकुपितनृपतौ दिव्यकाले
निशायाम्।
वश्ये वा स्तम्भने वा रिपुवधसमये निर्ज्जने वा
वने वा
गच्छंस्तिष्ठंस्त्रिकालं यदि पठति शिवं प्राप्नुया-
दाशु धीरः॥
नित्यं स्तोत्रमिदं पवित्रमिह यो देव्याः
पठत्यादरात्
धृत्वा यन्त्रमिदं तथैव समरे बाहौ करे वा
गले।
राजानोऽप्यरयो मदान्धकरिणः सर्पा मृगेन्द्रा-
दिकाः
ते वै यान्ति विमोहिता रिपुगणा लक्ष्मीः
स्थिरा सिद्धयः॥
त्वं विद्या परमा त्रिलोकजननी विघ्नौघ-
सञ्छेदिनी
योषाकर्षणकारिणी त्रिजगतामानन्दसंवर्द्धिनी।
दुष्टोच्चाटनकारिणी पशुमनःसम्मोहसन्दायिनी
जिह्वाकीलनभैरवी विजयते ब्रह्मादिमन्त्रो यथा॥
विद्या लक्ष्मीः सर्व्वसौभाग्यमायुः
पुत्रैः पौत्रैः सर्व्वसाम्राज्यसिद्धिः।
मानं भोगो वश्यमारोग्यसौख्यं
प्राप्तं तत्तद्भूतलेऽस्मिन् नरेण॥
यत् कृतं जपसन्नाहं गदितं परमेश्वरि।
दुष्टानां निग्रहार्थाय तद्गृहाण नमोऽस्तु ते॥
ब्रह्मास्त्रमिति विख्यातं त्रिषु लोकेषु विश्रुतम्।
गुरुभक्ताय दातव्यं न देयं यस्य कस्यचित्॥
पीताम्बरां द्विभुजां त्रिनेत्रां गात्रकोमलाम्।
शिलामुद्गरहस्तां च स्मरेत्तां बगलामुखीम्॥
ब्रह्मस्थायाष्टकाले तु पठनीयं स्तोत्रमिदं
स्यात्॥"
इति रुद्रयामले बगलामुखीस्तोत्रं समाप्तम्।
इति मुण्डमालातन्त्रसारः॥

बगाहः, पुं, (अव+गाह+भावे घञ्। अलोपः।) अवगाहः। इति मुग्धबोधव्याकरणम्॥

वग्नुः, पुं, (वक्ति इति। वच+"वचेर्गश्च।" उणा° १।१६। इति नुः गश्चान्तादेशः।) वक्ता। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः। वावदूकः। इति उज्ज्वलदत्तोणादिवृत्तिः॥ (शब्दः। यथा, ऋग्वेदे। ७।१०३।२।
"गवामह न मायुर्वत्सिनीनां
मण्डूकानां वग्नुरत्रा समेति॥"
"मण्डूकानां वग्नुः शब्दः समेति सङ्गच्छते॥"
इति तद्भाष्ये सायणः॥)

वघि इ ङ गतिनिन्दारम्भजवेषु। इति कविकल्पद्रुमः॥ (भ्वा°-आत्म°-सक°-जवे अक°-सेट्।) इ, वङ्घ्यते। ङ वङ्घते। जवे एव केचित् पठन्ति। इति दुर्गादासः॥

वङ्गः, पुं, (वङ्गतीति। वगि+अच्।) वरीधकम्। इत्यमरटीकायां भरतः॥

वङ्गा, स्त्री, (वङ्ग+टाप्।) वनमाषभाण्डः। तत्पर्य्यायः। मत्स्यकम् २। इति त्रिकाण्डशेषः॥

वङ्गिलः, पुं, (वङ्गति इति। वगि+इलच्।) कण्टकः। इति त्रिकाण्डशेषः॥

वङ्ग्र, त्रि, (वच+रन्। "वञ्चिगतौ।" ७।३।६३। इति अमरस्य कुत्वम्।) वक्रम्। यथा, वङ्ग्रं काष्ठम्। इति मुग्धबोधव्याकरणम्॥

वङ्क्षि स्त्री (वङ्कते इति। वकि कौटिल्ये+"वङ्क्र्यादयश्च।" उणा° ४।६६। इति क्रिन् प्रत्ययेन निपातितम्।) पार्श्वास्थि। तत्पर्य्यायः। पर्शुका २। इति हेमचन्द्रः। ३।२८९॥

वङ्क्रि, पुं स्त्री (वङ्कते इति। वकि कौटिल्ये+"वङ्क्र्यादयश्च।" उणा° ४।६६। इति क्रिन् प्रत्ययेन निपात्यते।) वाद्यभेदः। इत्युणादिकोषः। गृहदारु। पार्श्वास्थि। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

वङ्क्षणः, पुं, (वञ्चति वङ्गतो भवतीति। वञ्च+क्युः। पृषोदरादित्वात् साधुः।) ऊरुसन्धिः। इत्यमरः। २।६।७१॥ कुचकी इति भाषा॥ (यथा, सुश्रुते शारीरस्थाने ५ अध्याये।
"वङ्क्षणाश्रयौ कटावा। तैर्नौ वयोगुणच आत्मप्रविष्टौ॥")

वङ्क्षुः, स्त्री, (वक्षतीति। वक्ष+बाहुलकात् कुः। नुम् च।) महानदीविशेषः। यथा,—
"तस्याः सीतेति सीता च वङ्क्षुर्भद्रा च
कीर्त्तिता॥"
सा च केतुमालवर्षस्था गङ्गा। यथा। एवं माल्यवच्छिखरान्निष्पतन्ती ततोऽनुपरतवेगा केतुमालमभि चक्षुः प्रतीच्यां दिशि सरित्पतिं प्रविशति। इति श्रीभागवते ५ स्कन्धे १७ अध्यायः॥ (यथा च महाभारते। ६।९।१६।
"भीमरथी च वेणा च सप्तवेणा तथा दिवा।
वङ्क्षुश्च कावेरी वदुम्मन्दाकिनी तथा॥")

वङ्गं, क्ली, (वङ्गतीति । वगि गतौ + अच् ।) धातुविशेषः । रां इति भाषा । तत्पर्य्यायः । त्रपु २ स्वर्णजम् ३ नागजीवनम् ४ मृदङ्गम् ५ रङ्गम् ६ गुरुपत्रम् ७ पिच्चटम् ८ चक्रसंज्ञम् ९ तमरम् १० नागजम् ११ कस्तीरम् १२ आलीनकम् १३ सिंहलम् १४ । इति हेमचन्द्रः । ४ । १०८ ॥ स्वर्णजम् १५ नागम् १६ त्रपु १७ । इति शब्दरत्नावली ॥ अस्य गुणाः । तिक्तत्वम् । मधुरत्वम् । शिशिरत्वम् । पाण्डुत्वम् । कृमिवातनाशित्वम् । ईषत्कफपित्तकारित्वञ्च । इति राजवल्लभः ॥ (अथ वङ्गस्य नाम लक्षणगुणाः ।

रङ्गवङ्गत्रपु प्रोक्तं तथा पिच्चटमित्यपि ।
खुरकं मिश्रकञ्चापि द्विविधं वङ्गमुच्यते ॥
उत्तमं खुरकं तत्र मिश्रकन्त्ववरं मतम् ।
रङ्गं लघु सरं रूक्षमुष्णं मेहकफक्रिमीन् ॥
निहन्ति पाण्डुं सश्वासं चक्षुष्यं पित्तलं मनाक् ।

सिंहो यथा हस्तिगणं निहन्ति
तथैव वङ्गोऽखिलमेहवर्गम् ।
देहस्य सौख्यं प्रबलेन्द्रियत्वं
नरस्य पुष्टिं विदधाति नूनम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
अस्य शोधनमारणविधिर्यथा —
"वङ्गं खर्परिके क्षिप्तं यामार्द्धेन विशुध्यति ॥"
इति वङ्गशुद्धिः ॥
'वङ्गं सतालमर्कस्य पिष्ट्वा दुग्धेन मर्द्दयेत् ।
शुष्काश्वत्थभवैर्भस्मैः सप्तधा भस्मतां नयेत् ॥"
मतान्तरम् ।
'वङ्गं खर्परके क्षिप्त्वा चुल्ल्यां संस्थापयेत् सुधीः ।
द्रवीभूते पुनस्तस्मिन् चूर्णान्येतानि दापयेत् ॥
प्रथमं रजनीचूर्णं द्वितीयञ्च यमानिका ।
तृतीये जारकञ्चैव ततश्चिञ्चात्वगुद्भवम् ॥
अश्वत्थवल्कलोत्थञ्च चूर्णं तत्र विनि-
क्षिपेत् ।
एवं विधानतो वङ्गं म्रियते नात्र संशयः ॥
वङ्गं निहन्त्यसृक् सर्व्वं क्षिप्रमग्निप्रकोपनम् ।
मेदः श्लेष्मामयघ्नञ्च क्रिमिघ्नं मेहनाशनम् ॥'
इति वङ्गमारणम् । इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥) अन्यद्रङ्गशब्दे द्रष्टव्यम् ॥ * ॥ सीसकम् । देशविशेषे पुं भूम्नि । इति मेदिनी । गे १३ ॥ (एकवचनान्तोऽपि । यथा महाभारते । १ । १०४ । ५ ।
'अङ्गस्याङ्गो भवद्देशो वङ्गो वङ्गस्य च
स्मृतः ॥")
स तु प्राचीदेशान्तर्गतजनपदविशेषः । यथा —
'अङ्गवङ्गा मद्गुरका अन्तर्गिरिबहिर्गिराः ॥
इत्युक्तञ्च ।
"प्राच्यां मागधमाणर्द्रा प्राच्यां वर्षवदा
स्मृता ॥"
इत्यादि महापुराणवचनम् ॥
स्थानान्तरं यथा,—
"आयत्यामथ द्वीपतङ्गान्तिकुरुकौशिका ।
कलिङ्गौड्रान्ध्रकिष्किन्ध्याविन्ध्यगवराटश्च ॥"
इति ज्योतिस्तत्त्वधृतकूर्म्मचक्रवचनम् ॥
तस्य सीमा यथा —
'रत्नाकरं समारभ्य ब्रह्मपुत्रान्तगं शिवे ।
वङ्गदेशो मया प्रोक्तः सर्व्वसिद्धिप्रदर्शकः ॥"
इति शक्तिसङ्गमतन्त्रे ७ पटलः ॥
वङ्ग पुं चन्द्रवंशीयबलिराजपुत्रः । यथा,—
"बलेः सुतपसो जज्ञे अङ्गवङ्गकलिङ्गकाः ।
सुह्मपौण्ड्राश्च बालेया अनपान्त्वथ चाङ्गतः ॥"
इति गारुडे १४२ अध्यायः ॥ * ॥
(स च वङ्गो दीर्घतमस ऋषेर्बलेः क्षेत्रजः । यथा महाभारते । १ । १०४ । ४७—५२ ।
'तम् प्रसादयामास पुनस्तमृषिसत्तमम् ।
बलिः सुदेष्णां भार्य्यां स्वां तस्मै तां प्राहिणोत्
पुनः ॥
तां स दीर्घतमाङ्गेषु स्पृष्ट्वा देवीमथाब्रवीत् ।
भविष्यन्ति कुमारास्ते तेजसादित्यवर्च्चसः ॥
अङ्गो वङ्गः कलिङ्गश्च पुण्ड्रः सुह्मश्च ते सुताः ।
तेषां देशाः समाख्याताः स्वनामकथिता भुवि ॥
अङ्गस्याङ्गो भवद्देशो वङ्गो वङ्गस्य च स्मृतः ।
कलिङ्गविषयश्चैव कलिङ्गस्य च स स्मृतः ॥
पुण्ड्रस्य पुण्ड्राः प्रख्याताः सुह्माः सुह्मस्य च
स्मृताः ।
एवं बलेः पुरा वंशः प्रख्यातो वै महर्षिजः ॥")
वार्त्ताकुः । कार्पासः । इति मेदिनी । गे १५ ॥
वङ्गजं, क्ली, (वङ्गात् धातुविशेषात् जायते इति । जन् + डः ।) सिन्दूरम् । इति रत्नमाला ॥
वङ्गदेशजात, त्रि ॥
वङ्गनः, पुं, (वङ्गतीति । वगि + ल्युः ।) वार्त्ताकुः । इति शब्दरत्नावली ॥ वैगुन इति भाषा ॥ (गुणान्योऽस्य वार्त्ताकुशब्दे ज्ञातव्याः ॥)
वङ्गला, स्त्री, रागिणीविशेषः । इति हलायुधः ॥ वङ्गालीति च नामान्तरम् ॥
वङ्गशुल्वजं, क्ली (वङ्गशुल्वाभ्यां रङ्गताम्राभ्यां जायते इति । जन + डः ।) कांस्यम् । इति हेमचन्द्रः । ४ । ११२ ॥
वङ्गसेन, पुं बकवृक्षः । यथा,—
"वङ्गसेनस्तमस्त्रिदः शुकनासो रुचिप्रदः ।
व्रणानि कृमनो ।' इति त्रिकाण्डशेषः ।
वङ्गसेनक पुं, (वङ्गसेन + स्वार्थे कन् ।) बकवृक्षः । यथा —
"रक्तपुष्पो मुनिवरस्तिर्य्यग्वङ्गसेनकः ॥"
इति रत्नमाला ॥
अस्य पुष्पगुणाः ।
"शाकं कटु च पुष्पाणि वङ्गसेनस्य चैव हि ।
कटुपाकानि तिक्तानि वातपित्तकराणि च ॥'
इति राजवल्लभः ॥
वङ्गारिः, पुं, (वङ्गस्य रङ्गधातोररिः । अत्र वङ्गधातुमारकत्वात् तथात्वम् ।) हरितालम् । इति हेमचन्द्रः ॥
वङ्गाल पुं भैरवरागस्य पुत्रः । यथा —
"वङ्गालः पञ्चमः करो मधुरो हर्षकसा ।
देशाख्यो माधवः सिन्धुर्भैरवस्य प्रकी-
र्त्तिताः ॥"
अस्य ध्यानम् ।
"कपालिवेश्मिनकररत्नवलयो
भास्वत्त्रिशूलपरिमण्डितवामहस्तः ।
भस्मोज्ज्वलो निबिडबद्धजटाकलापो
वङ्गाल इत्यभिहितस्तदयाबधः ॥
माङ्गल्यो देवरङ्गाणो यद्योद्धृतासमध्यम ।
प्रचर्य्य विनियोगस्य मोक्षोऽयं सुविना मतम् ॥"
इति सङ्गीतदर्पणः ।
वङ्गाली, स्त्री, भैरवरागस्य रागिणी । यथा,—
"भैरवी कौशिकी चैव भाषा वैराटी तथा ।
वङ्गाली चेति रागिण्यो भैरवस्यैव वल्लभाः ॥"
इति सङ्गीतदामोदरः ।
अस्या ध्यानम् ।
"तपोवनस्था गुणमूर्त्तिशाली
शुकं दधाना धवलोत्तरीया ।
प्रांशुः कुमारी कमनीयमूर्त्तिः
चन्द्राशिकेव सुविशाङ्गनीता ॥"
इति सङ्गीतदर्पणः ।
"वङ्गाली औडवा ज्ञेया षड्जांशन्यासकेन च
भाक् ।
ऋषभहीना च विज्ञेया मूर्च्छना प्रथमा मता ।
पूर्व्वा वा महर्षीरिता कलिनाथेन भाषिता ॥"
इति सङ्गीतरत्नम् ।
वच, ध्रौ वाचि । सन्देशे । इति कविकल्पद्रुमः ॥ (भ्वा० पर० सक० अनिट् ।) ध्रौ, वक्ता । अयं शेप् (सेट्) इत्येके । म वचनीयं वचः । इति हलायुधः । इति दुर्गादासः ॥
वच, ङ सन्देशे । इति कविकल्पद्रुमः ॥ (चुरा० पर० सक० सेट् ।) सन्देशो वचनादिः । ङ, वाचयत्यतिथ्यौ लिपिमिति हलायुधः । इति दुर्गादासः ॥
वच, ल ध्रौ वाचि । इति कविकल्पद्रुमः ॥ (अदा० पर० द्विक० सेट् ।) ल, वक्ति । ध्रौ, वक्ता । वचनादन्तिकमपि प्रयोज्या । इत्यन्ये । इति दुर्गादासः ॥ (यथा —
"कपिरप्यनुष्ठनौसि प्रयोगी नामिधीयते ।
अपठेनोद्धि यथा उत्तमं पुरुषं वदेत् ॥"
इति बहुलवचनम् ।)
वचः, पुं, (वक्तीति । वच + अच् ।) कीरपक्षी । इति मेदिनी । चे ९ ॥
वचः, [स्] क्ली, (उच्यते इति । वच + "सर्व्वधातुभ्योऽसुन् ।" उणा० ४ । १८८ । इत्यसुन् ।) वाक्यम् । इत्यमरः । १ । ६ । १ ॥ (यथा, रघौ । ७ । ११ ।
"इति प्रगल्भं पुरुषाधिराजो
मृगाधिराजस्य वचो निशम्य ।
प्रत्याहतास्त्रो गिरिशप्रभावा-
दात्मन्यवज्ञां शिथिलीचकार ॥")
वचक्नुः, पुं (वक्तीति । वच् + "वचेरगुक् च" इत्युणा० ३ । ८१ । इति क्नुः ।) ब्राह्मणः । इति मेदिनी । ने, १५ ॥

वचक्नुः त्रि, (वक्तीति । वच + "वचेर्गश्च" इति ।" उणा० ३ । ८१ । इत्यक्नुच ।) वावदूकः । इति मेदिनी । नि, १२० ।

वचक्नी, स्त्री ब्राह्मिका । वार्त्ति । शब्दभेदः । इति शब्दरत्नावली । मेदिन्यां वचक्नी इति वरक्नी इति च पाठः ।

वचनं, क्ली, (उच्यतेऽनेनेति । ऐकाग्र्यकथकादेरुक्तवात्वम् । वच + ल्युट् ।) शुण्ठी । इति शब्दचन्द्रिका । वाक्यम् । तत्पर्य्यायः ।

"इरा सरस्वती ब्राह्मी भाषा वाणी च शारदा ।
गिरा गौश्च गिरो दत्री गीर्व्वाणी भारती
स्वरी ।
वाग्वाचा वचसामीशा वाग्देवी वर्णमातृका ।
वचनं भाषितं चोक्तिर्व्याहारो कथितं वचः ।
वाग्देवीवचसादेर्य्ये पर्य्याय परिकीर्त्तितः ।
यथास्थानं यथायोग्यमेते ज्ञेया मनीषिभिः ॥"
इति शब्दरत्नावली ॥ * ॥

(यथा, हितोपदेशे ।
"अचलितेश्वरद्वारमदृष्टविरहव्यथम् ।
अनुक्तक्लीववचनं धन्य कस्यापि जीवनम् ॥")

तत्तु त्रिविधम् । यथा,—
वशिष्ठ उवाच ।
"वचनं त्रिविधं प्रोक्तं लौकिके वैदिके तथा ।
सर्व्वं जानाति शास्त्रज्ञो निर्म्मलज्ञानचक्षुषा ॥
अवज्ञमहितं पश्चात् श्रोतुश्च श्रुतिसुन्दरम् ।
सुबुद्धिश्चाब्रवीदेतत् नहि तेषां कदाचन ॥
व्यापन्नं प्रीतिजनकं परिणामसुखावहम् ।
दयालुर्धर्म्मशीलश्च बोधयत्येव बान्धवम् ॥
श्रुतिमात्रात् सुधातुल्यं सर्व्वकाले सुखावहम् ।
सत्यं सारं हितकरं वचसां श्रेष्ठमीप्सितम् ॥
एवं च त्रिविधं प्रोक्तं नीतिसारनिरूपितम् ।
कथ्यतां त्रिषु मध्ये किं वदामि वाक्यमीप्सि
तम् ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४१ अध्यायः ॥ विभक्तिः । सा तु स्यादिस्यादिश्च । यथा । "एकैकं वचनं क्रमात् बहुव्वचनं स्यात् ।" इति मुग्धबोधव्याकरणम् । तद्वैदिकपर्य्यायः । श्लोकः १ धारा २ इला ३ गौः ४ गौरी ५ गान्धर्व्वी ६ गभीरा ७ गम्भीरा ८ मन्द्रा ९ मन्द्राजनी १० वाशी ११ वाणी १२ वाणीची १३ वाणः १४ पविः १५ भारती १६ धमनिः १७ नाळी १८ मेना १९ मेळिः २० सूर्य्या २१ सरस्वती २२ निवित् २३ स्वाहा २४ वग्नुः २५ उपब्दिः २६ मायुः २७ काकुत् २८ जिह्वा २९ घोषः ३० स्वरः ३१ शब्दः ३२ स्वनः ३३ ऋक् ३४ होत्रा ३५ गीः ३६ गाथा ३७ गणः ३८ धेना ३९ ग्नाः ४० विपा ४१ नना ४२ कशा ४३ धिषणा ४४ नौः ४५ अक्षरम् ४६ मही ४७ अदितिः ४८ शची ४९ वाक् ५० अनुष्टुप् ५१ धेनुः ५२ वल्गुः ५३ गल्दा ५४ सरः ५५ सुपर्णी ५६ बेकुरा ५७ । इति सप्तपञ्चाशत् वाङ्नामानि । इति वेदनिघण्टौ । १ । ११ ।

वचनग्राही [न्] त्रि (वचनं गृह्णातीति । ग्रह + णिनि ।) वचनेस्थितः । इत्यमरटीकायां रमानाथः ।

वचनीयः, त्रि, (वच + अनीयर् ।) कथनीयः । इति वचधातोः कर्म्मणि अनीयप्रत्ययेन निष्पन्नः । (निन्दायां, स्त्री । यथा, कुमारे । ४ । २१ ।
"मदनेन विना कृता रतिः
क्षणमात्रं किल जीवितेति मे ।
वचनीयमिदं व्यवस्थितं
रमण । त्वामनुयामि यद्यपि ॥"
"इति वचनीयं निन्दा मे मम व्यवस्थितम् ॥"
इति तट्टीकायां मल्लिनाथः ।)

वचनीयता, स्त्री (वचनीयस्य भावः । वचनीय + तल् ।) लोकापवादः । यथा —
'जनप्रवादः कौलीनं विगानं वचनीयता ॥"
इति हेमचन्द्रः । २ । १८४ ॥
(तथा, मृच्छकटिकनाटके प्रथमाङ्के ।
'कामं नीचमिदं वदन्ति पुरुषाः स्वप्ने च
यद्वर्द्धते
विश्वस्तेषु च वञ्चनापरिभवश्चौर्य्यं न शौर्य्यं
हि तत् ।
स्वाधीना वचनीयतापि हि वरं बद्धो न
सेवाञ्जलि-
र्म्मार्गो ह्येष नरेन्द्रसौप्तिकवधे पूर्व्वं कृतो
द्रौणिना ॥")

वचनेस्थितः, त्रि, (वचने तिष्ठति स्थितः । स्था + "गत्यर्थेति ।" ३ । ४ । ७२ । इति क्तः । "तत्पुरुषे कृति बहुलम् ।" ६ । ३ । १४ । इति सप्तम्या अलुक् ।) वचने तिष्ठति यः । वचनस्थः । तत्पर्य्यायः । विधेयः २ विनयग्राही ३ आश्रवः ४ । इत्यमरः । ३ । १ । २४ । वश्यः ५ प्रणेयः ६ । इति कवि-कल्पलता-
दिति भरतः ॥

वचनोपक्रमः पुं, (वचनस्य उपक्रमः ।) वाक्यारम्भः । इति भरतशब्दरत्नावल्यौ । तत्पर्य्यायः । उपन्यासः २ वाङ्मुखम् ३ । इत्यमरः ॥

वचरः, पुं (व्यवान्तरे चरतीति । वच + चर + अच् । अलोपः ।) कुक्कुटः । शठः । इति मेदिनी ॥

वचलुः, पुं प्रभुः । यथा,—
"पुंसि मन्त्रुः स्त्रुपप्रस्तु वचलुर्भगशुक्तयः ।
अरष्यस्य प्ररद्धुः स्त्राद्रमिन्ते स्मोतिरिष्वपि ॥"
इति शब्दमाला ॥

वचसाम्पतिः पुं (वचसां वाचां पतिः ।) बृहस्पतिः । यथा,—
"जीवाङ्गिरा सुरगुरुर्वचसाम्पतीज्यौ ।"
इति दीपिका ॥

वचस्करः, त्रि, (करोतीति । कृ + अच् । वचसः करः ।) वचनेस्थितः । इति केचित् ॥

वचा, स्त्री, (वाचयतीति । वच + णिच् + अच् । निपातनात् ह्रस्वः । यद्वा अन्तर्भावितण्यर्थात् वच अच् ।) ओषधिविशेषः । वच इति भाषा । तत्पर्य्यायः । उग्रगन्धा २ षड्ग्रन्था ३ गोलोमी ४ शतपर्व्विका ५ । इत्यमरः । २ । ४ । १०२ ॥ तीक्ष्णा ६ जटिला ७ मङ्गल्या ८ विजया ९ उग्रा १० रक्षोघ्नी ११ । इति रत्नमाला । वच्या १२ लोमशा १३ । इति जटाधरः ॥ भद्रा १४ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कफामग्रन्थिशोथघ्न-ज्वरातिसारवाताध्मानशमित्वम् । वान्तिकारित्वञ्च । इति राजनिघण्टुः ॥ * ॥ अपि च ।

"वचोग्रगन्धा षड्ग्रन्था गोलोमी शतपर्व्विका ।
क्षुद्रपत्री च मङ्गल्या जटिलोग्रा च लोमशा ॥
वचोग्रगन्धा कटुका तिक्तोष्णा वान्तिवह्निकृत् ।
विबन्धाध्मानशूलघ्नी शकृन्मूत्रविशोधिनी ॥
अपस्मारकफोन्मादभूतजन्त्वनिलान् हरेत् ॥'
अथ खुरासानी वचा ।
"पारसीकवचा शुक्ला प्रोक्ता हैमवतीति सा ।
हैमवत्युदिता तद्वत् गुणं हन्ति विशेषतः ॥'
अथ महाभरी वचा । यस्या लोके कुलीञ्जन इति नामान्तरम् ।
'सुगन्धाप्युग्रगन्धा च विशेषात् कफकासनुत् ।
सुस्वरत्वकरी रुच्या हृत्कण्ठमुखशोधिनी ॥"
अपरा सुगन्धा स्थूलग्रन्थिर्यस्या लोके महाभरा इति नाम ।
"स्थूलग्रन्थिः सुगन्धाख्या ततो हीनगुणा स्मृता ॥"
अथ चोपचीनीति लोके प्रसिद्धा । तस्या गुणाः ।
"द्वीपान्तरवचा किञ्चित्तिक्तोष्णा वह्निदीप्तिकृत् ।
विबन्धाध्मानशूलघ्नी शकृन्मूत्रविशोधिनी ॥
वातव्याधीनपस्मारमुन्मादं तनुवेदनाम् ।
व्यपोहति विशेषेण फिरङ्गामयनाशिनी ॥'
इति भावप्रकाशः ॥ * ॥
अपरञ्च ।
"वचायुग्मा वातकफघ्न्याग्नेयी स्मृतिवर्द्धिनी ॥"
इति राजवल्लभः ॥ * ॥
अन्यच्च ।
"अहिंस्रा पयसाक्तेन मासमेकन्तु सेविता ।
वचा कुर्य्यान्नरं प्राज्ञं श्रुतिधारणमुत्तमम् ।
चन्द्रसूर्य्यग्रहे पीत्वा पलमेकं पयोऽन्वितम् ।
वचायास्तत्क्षणं कुर्य्यात् महाप्रज्ञान्वितं नरम् ॥"
इति गारुडे १९८ अध्यायः ॥

वचोग्रहः, पुं, (गृह्णातीति । ग्रह + अच् । वचसां ग्रहः ।) कर्णः । इति राजनिघण्टुः ॥

वज, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) वजति । इति दुर्गादासः ॥

वज क वसने । गतौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) कर्द्दे मार्गणसंस्कार इति पाठः । मार्गणस्य शरस्य संस्कारो मार्गणसंस्कारः । क, वाजयति शरं वाणं करोतीत्यर्थः । इति रमानाथः । मार्गस्य संस्कारोऽत्रेति केचित् । इति दुर्गादासः ॥

वज्रं पुं क्ली, (वजतीति । वज गतौ + "ऋज्रेन्द्राग्रवज्रविप्रेति ।" उणा० २ । २८ । इति रन्प्रत्ययेन निपातितः ।) इन्द्रास्त्रम् । वाज इति भाषा । तत्पर्य्यायः । ह्रादिनी २ कुलिशम् ३

भिदुरम् ४ पविः ५ शतकोटिः ६ स्वरुः ७ शम्बः ८ दम्भोलिः ९ अशनिः १० । इत्यमरः । १।१।५४ ॥ कुलीशम् ११ भिन्दुरम् १२ भिदु १३ मघवसु १४ शम्ब १५ सब १६ अशनी १७ वज्राशनि १८ । इति तट्टीका ॥ जम्भारिः १९ त्रिदशायुधम् २० शतधारम् २१ शतारम् २२ आपोत्थम् २३ अच्छलम् २४ । इति पुरुषोत्तमः । गिरिकण्टक २५ गौः २६ अभीत्यम् २७ मेघभूति २८ गिरिज्वर २९ । इति शब्दरत्नावली । जामवि ३० दम्भ ३१ । इति जटाधरः ॥ भिद ३२ अम्बुजम् ३३ । इति त्रिकाण्डशेषः ॥ (यथा, ऋग्वेदे १।३२।२।

"अहन्नहिं पर्वते शिश्रियाणं
त्वष्टास्मै वज्रं स्वर्य्यं ततक्ष ॥")

अस्योत्पत्तिर्यथा,—

"दधीचस्य च दधिचा धर्मो ज्ञात्वा दिवाकरम् ।
एतज्ञ चकार सततेचाच विश्वो रक्तवत् ॥
त्रिशूलचापि रुद्रस्य चक्रमिन्द्रस्य चाधिकम् ।
दैत्यदानवशत्रूणां भयसंत्रासकारकम् ॥
रूपञ्च प्रतिमङ्कले तदा पावकतो महत् ।
न प्रयाकाय तद्दद्यु पाक्तर्य रवे पुन ॥
अर्चास्वपि रत पादौ न कश्चित् कारयेत्
क्वचित् ।
य करोति स पापिष्ठो गतिमाप्नोति निन्दि-
ताम् ।
कुष्ठरोगमवाप्नोति लोकेऽस्मिन् दुःखसंयुतम् ।
तस्मात् धर्म्मकामार्थी चित्रेष्वायतनेषु च ।
न क्वचित् कारयेत् पादौ देवदेवस्य धीमतः ॥"
इति मात्स्ये ११ अध्यायः ॥ * ॥

अपि च ।

"प्रविश्य नगरं गृहो नैमिषात् पुरन्दरः ।
ददर्शोग्रमुखं धाम कठिनसकरं महत् ॥
तस्तेजान्निःसृत्य ददृशे पिष्टौ मांसस्य वाजव ।
सुहस्तस्फटिकवत्रायो कराभ्यां जग्राह ताम् ॥
तत कोपसमायातो मांसपेश्यौ शतक्रतु ।
कराभ्याममर्द्दयामास तत् सा कठिनाभवत् ॥
अङ्गानाद्यं वज्रं कृत्वोऽहं वज्रं तथा ।
शतपर्व्वा च कुलिशं संजातो मांसपेशितः ॥"
इति वामने ८ अध्यायः ॥ * ॥

वृत्रासुरवधाय दधीचिमुनेरस्थ्ना इन्द्रार्थं विश्वकर्म्मणा निर्म्मितवज्रस्य प्रमाणं यथा,—

"एवं शतपर्व्विणी दध्यङ्गस्थिमयं वज्रं महत् ।
परे भक्त्या ते ब्रह्मण्याङ्गानां समयन् कश्यौ ।
ततः पश्यास्य महो बुद्धिमतस्तस्य भरतश्च ।
आक्रम्य प्रयत्न बोर्न च दीर्घं पुनः सतम् ।
अर्थेन्द्रो वज्रमुदस्य निर्मितं विश्वकर्म्मणा ।
शुभे कर्णविनिर्भिन्नो भगवत्तेजसान्वित ॥
वज्रो देवसती कर्णविद्धो धृतस्तोभन ।
स्वयमात्रा शुभितं वे स्तोभै वधयात्र ॥"
इति श्रीभागवते ६ स्कन्धे १० अध्यायः ॥ * ॥

मणिवर्णकरत्नविशेषस्य यथा,—

"एकलक्षणमावाप्ति सैन्धु कथितेषु च ।

वि पठेञ्चैमिनेयोऽस्मि प्रारम्भो मापुद्रद
सदा ।
तस्य माभूद्भय घोरं विद्युतोयोऽशनीदपि ॥"
इत्याह्निकतत्त्वधृतब्रह्मपुराणम् ।

"शुभे कन्यागमिष्यन्ति जैमिनेश्वापि कीर्त्तनात् ।
विद्युदग्निभयं नास्ति पठिते च गृहोदरे ॥"
लिखिते च गृहोदरे । इति वा पाठः ।

"जैमिनिश्च सुमन्तुश्च वैशम्पायन एव च ।
पुलस्त्यः पुलहश्चैव पञ्चैते वज्रवारकाः ॥"
इति पुराणम् ॥ * ॥ * ॥

रत्नविशेषः । हीरा इति भाषा । तत्पर्य्यायः । इन्द्रायुधम् २ हीरम् ३ भिदुरम् ४ कुलिशम् ५ पविः ६ अभेद्यम् ७ अशिरम् ८ रत्नम् ९ दृढम् १० भार्गवकम् ११ षट्कोणम् १२ बहुधारम् १३ शतकोटिः १४ । अस्य गुणाः । षड्रसोपेतत्वम् । सर्व्वरोगापहारकत्वम् । सर्व्वाघशमनत्वम् । सौख्यत्वम् । देहदार्ढ्यकरत्वम् । रसायनत्वञ्च । तद्विधानं यथा,—

"आयुष्यं विशुद्धम् स्निग्ध सौन्दर्य्यं लघु शीतलम् ।
षड्रसत्वोपधारश्च शुभाभ्यामर्च्चितं विदुः ॥"

तस्य कुलवर्णा यथा,—

"अपरार्थं काकपादञ्च रेखाकाकपदं पर्त्तुलम् ।
आधारमलिनं बिन्दु च वावि स्फुटितलता ।
नीलाभं चिपिटं रूक्षं तस्य दोषं प्रचेत् ॥"

वज्रस्य चतुर्म्मध्यस्थं यथा,—

"श्वेतालोहितपीतमेचकतया छायाश्चतस्र
क्रमात्
विप्रादिष्वभिदाःस्य यत् सुमनसः प्राप्नोति सर्व्वं
सत ।
क्ष्मोता कीर्त्तिमनुत्तमां श्रियमिदं रत्ने यथा
सम्भवत
सर्व्वासामपवादए तु कुलिशं पश्य छिन
नाप्यत ॥" * ॥

तस्य परीक्षा यथा,—

"यत् पाषाणतले निकाषनिकरैर्नोद्दृश्यते
भिन्दुरे
यच्चान्योपलतोऽतरस्मुर्र्वेषां ताम बाधादनम् ।
यच्चान्यं निवतोऽपयेत दलयेत्यचैव वा भिद्यते
तस्मात् कुलिशं वदन्ति कुशलाः श्रेष्ठं महा
घच तत् ॥" * ॥

तस्य सर्व्वगुणो यथा,—

"नित यो विदि रत्नाय्यैषु बलवान्दारुविरहितो
रात्रस्त्वा स्वो क्वचिच्छित्रिमृचत् भवेद
शुभा ।
प्रख्यानकधिदिव्यस्तु शुभदो वैश्योऽस शूद्रो
भवेत्
धर्म्मात्मविचरदाश्वैव कथितो वज्रस्य सर्व्वो
गुणः ॥"
इति राजनिर्घण्टः ॥ * ॥

अपि च ।

अथ वज्रस्य नामगुणाः ।

"हीरकं पुंसि वज्रोऽस्त्री चन्द्रो मणिवरश्च सः ।
स तु श्वेत स्मृतो विप्रो लोहित क्षत्रियो
मतः ।
पीतो वैश्योऽसितः शूद्रश्चतुर्व्वर्णात्मकश्च सः ॥
रसायने मतो विप्रः सर्व्वसिद्धिप्रदायकः ।
क्षत्रियो व्याधिविध्वंसी जरामृत्युहरः परः ॥
वैश्यो धनप्रदः प्रोक्तस्तथा देहस्य दार्ढ्यकृत् ।
शूद्रो नाशयति व्याधीन् वयस्तम्भं करोति च ॥
पुंस्त्रीनपुंसकानीति लक्षणीयानि लक्षणैः ।
सुवृत्ता फलसम्पूर्णास्तेजोयुक्ता बृहत्तराः ।
पुरुषास्ते समाख्याता रेखाबिन्दुविवर्ज्जिताः ॥
रेखाबिन्दुसमायुक्ता षडस्रास्ते स्त्रियः स्मृताः ॥"
षड्भाः षट्कोणाः ।

"त्रिकोणाश्च सुदीर्घाश्च ते विज्ञेया नपुंसकाः ।
तेऽपि स्युः पुरुषाः श्रेष्ठा रसबन्धनकारकाः ।
स्त्रियः कुर्व्वन्ति कायस्य कान्तिं स्त्रीणां सुख
प्रदाः ।
नपुंसकास्त्ववीर्य्याः स्युरकामाः सत्त्ववर्ज्जिताः ।
स्त्रियः स्त्रीभ्यः प्रदातव्या क्लीबं क्लीबे प्रयो
जयेत् ।
सर्व्वेभ्यः सर्व्वदा देयाः पुरुषा वीर्य्यवर्द्धनाः ॥
अशुद्धं कुरुते वज्रं कुष्ठं पार्श्वव्यथां तथा ।
पाण्डुतां पङ्गुताञ्चैव तस्मात् संशोध्य मारयेत् ॥"

मारितस्य वज्रस्य गुणाः ।

"आयुः पुष्टिं बलं वीर्य्यं वर्णं सौख्यं करोति च ।
सेवितं सर्व्वरोगघ्नं मृतं वज्रं न संशयः ॥"
इति भावप्रकाशः ।

(अथ वज्रमारणम् ।

"निवृत्य हिङ्गुकार्पासमलनालेन वेष्टयेत् ।
त्रिःसप्तवारमासेन त्रिफलायां प्रलेपयेत् ।
ततोऽग्नौ निक्षिपेत् वज्रं गजपुटे पचेत् ।
एवं सप्तपुटैनैव म्रियते कुलिशं ध्रुवम् ॥"

मतान्तरम् ।

"कासमर्द्दे तु मेषस्य मूत्रे वज्रस्य निक्षिपेत् ।
त्रि सप्तधा अन्तर्दग्धं वज्रमेव मृतं भवेत् ॥"

अन्यच्च ।

"त्रि सप्तधा मत्कुण रक्तेनैव सेचयेत् ।
हस्तदैर्घ्ये शिग्रु तन्मध्ये कुलिशं क्षिपेत् ।
प्रदाय वालिकयैव सिक्तं पुण्ड्रकेण तु ।
भस्मी भवति तद्वज्रं वज्रवत् कुरुते तनुम् ।
आयुष्यं सौख्यजनकं बलवर्णप्रदायकम् ।
रोगघ्नं मृत्युहरं वज्रभस्म भवत्यदः ॥"

इति वज्रमारणम् । इति वैद्यकरसेन्द्रसारसंग्रहे मारणमारणाधिकारे ॥ * ॥) अपरञ्च । अथ रत्नमयकथा । विष्णुधर्म्मोत्तरे ।

"वज्रं मरकतञ्चैव पद्मरागञ्च मौक्तिकम् ।
इन्द्रनीलं महानीलं वैदूर्य्यं गन्धशस्यकम् ।
चन्द्रकान्तं सूर्य्यकान्तं स्फाटिकं पुलकं तथा ।
कर्क्केतनं पुष्परागं तथा ज्योतीरसं द्विज ।
स्फाटिकं राजपट्टञ्च तथा राजमयं शुभम् ।
सौगन्धिकं तथा गञ्जं शङ्खब्रह्ममयं तथा ।
गोमेदं रुधिराक्षञ्च तथा भल्लातकं द्विज ।
धूलीमरकतञ्चैव तुत्थकं सीसमेव च ।

पीतं प्रवालकञ्चैव गिरिजञ्च भार्गव ।
भुजङ्गमाममणिञ्चैव तथा वज्रमणिं शुभ ॥
टिट्टिभञ्च तथा पीतं भ्रामरञ्च तथोत्पलम् ।
रत्नान्येतानि सर्व्वाणि धार्य्याण्येव महीभृता ॥
सुवर्णप्रतिबद्धानि जयारोग्यसुखाप्तये ॥"
इति युक्तिकल्पतरुः ॥

तस्योत्पत्तिपरीक्षाद्यादि यथा,—
"इत्थमिह परीक्ष्य रत्नानां बलो नामासुरोऽभवत् ।
इन्द्राद्या निर्ज्जितास्तेन निर्ज्जेतुं तैर्न शक्यते ॥"
इत्युपक्रम्य ।
"महाप्रभावं विबुधैरुपेतमतुल्यहीनम् ।
रत्नपूर्व्वा परीक्षेयं ततोऽस्माभिः प्रकीर्त्त्यते ॥
तस्यास्थिलेशो निपपात येषु
भुवः प्रदेशेषु कथञ्चिदेव ।
वज्राणि वज्रायुधनिर्ज्जिगीषो
भवन्ति नानाकृतिमन्ति तेषु ॥
हैममातङ्गसौराष्ट्रा पौण्ड्रकालिङ्गकोशलाः ।
वेण्वातटाः ससौवीरा वज्रस्याष्टाविहाकराः ॥
आताम्रा हिमशैलाच्च शशिभा वेण्वातटीयाः स्मृताः
सौवीरे तु सिताब्जमेघसदृशास्ताम्राश्च सौराष्ट्रजाः ।
कालिङ्गाः कनकावदाततरुचिराः पीतप्रभाः कोशले
श्यामाः पुण्ड्रभवा मतङ्गविषये नात्यन्तपीतप्रभाः ॥
अत्यर्थं लघु वज्रतञ्च गुणवत् पार्श्वेषु सम्यक् सम
रेखाबिन्दुकलङ्ककाकपदकत्रासादिभिर्व्वर्ज्जितम् ।
लोकेऽस्मिन् परमाणुमात्रमपि यत् वज्रं क्वचिद् दृश्यते
तस्मिन् देवसमाश्रयो ज्वलितसत्तीक्ष्णाग्रधारं यदि ॥
वर्णेन वज्रयुक्ता देवानामपि परिग्रहे प्रोक्ताः ।
वर्णेभ्यश्च विभागः कार्य्यो वज्राश्रयादेव ॥
हरितसितपीतपिङ्गश्यामाताम्राः स्वभावतो रुचिराः ।
हरिवरुणशक्रहुतवहपितृपतिमरुतां स्वकाः वर्णाः ॥
विप्रस्य शङ्खकुमुदस्फटिकावदातः
स्यात् क्षत्रियस्य शशबभ्रुविलोचनाभः ।
वैश्यस्य कान्तकदलीदलसन्निकाशः
शूद्रस्य धौतकरवालसमानदीप्तिः ॥
द्वौ वज्रवर्णौ पृथिवीपतीनां
सद्भिः प्रदिष्टौ न तु सार्व्वजन्यौ ।
यः स्याज्जवाविद्रुमभङ्गशोणो
यो वा हरिद्रारससन्निकाशः ॥
ईशत्वात् सर्व्ववर्णानां गुणवत् सार्व्ववर्णिकम् ।
कामतो धारयेद्राजा न त्वन्योऽन्यत् कथञ्चन ॥
अपरीक्षितवर्णा हि यादृक् स्याद्वर्णसङ्करः ।
ततः कष्टतरो वज्री वज्राणां सङ्करो मतः ॥
न च मार्गविभागमात्रवृत्त्या
विदुषा वज्रपरिग्रहो विधेयः ।
गुणवद्गुणसम्पदां विभूत्यै
विपरीतो व्यसनोदयस्य हेतुः ॥
एकमपि यस्य शृङ्गं
विदलितमवलोक्यते विशीर्णं वा ।
गुणवदपि तन्न धार्य्यं
वज्रं श्रेयोऽर्थिभिर्भवने ॥
स्फुटिताग्रविशीर्णशृङ्गदेशं
मलवर्णैः पृषतैरुपेतमध्यम् ।
नहि वज्रभृतोऽपि वज्रमाशु
श्रियमप्यायतलालसो न कुर्य्यात् ॥
यस्यैकदेशः क्षतजावभासो
यदा भवेल्लोहितवर्णचित्रम् ।
न तत् कुर्य्याद्ध्रियमाणमाशु
स्वच्छन्दमृत्योरपि जीवितान्तम् ॥
कोट्यः पार्श्वानि धाराश्च षडष्टौ द्वादशेति च ।
उत्तुङ्गसमतीक्ष्णाग्रा वज्रस्याकरजा गुणाः ॥
षट्कोटिशुद्धममलं स्फुटतीक्ष्णधारं
वर्णान्वितं लघु सुपार्श्वमपेतदोषम् ।
इन्द्रायुधांशुविसृतिच्छुरितान्तरीक्ष-
मेवंविधं भुवि भवेत् सुलभं न वज्रम् ॥
तीक्ष्णाग्रं विमलमपेतसर्व्वदोषं
धत्ते यः प्रयततनुः सदैव वज्रम् ।
वृद्धिस्तु प्रतिदिनमेति यावदायुः
श्रीसम्पत्सुतधनधान्यगोपशूनाम् ॥
आग्नेयसर्पविषव्याघ्रतस्कराम्बुभयानि च ।
दूरात्तस्य निवर्त्तन्ते कर्म्माण्याथर्व्वणानि च ॥
यदि वज्रमपेतसर्व्वदोषं
बिभृयात्तण्डुलविंशतिं गुरुत्वे ।
मणिशास्त्रविदो वदन्ति तस्य
द्विगुणं रूपकलक्षमथ मूल्यम् ॥
त्रिभागहीनार्द्धतदर्द्धशेष
त्र्यंशं त्रिशोऽर्द्धभागाः ।
अष्टोत्तिभागोऽथ शताधिभागः
सहस्रभागोऽल्पसमानयोगः ।
यवाल्पहीनेष्वभिहितस्य
वज्रस्य मूल्यं प्रथमं प्रदिष्टम् ।
द्वाभ्यां क्रमाद्वाप्तिगुणागतस्य
लिङ्गादभावस्य विनिश्चयोऽयम् ॥
न चापि तण्डुलैरेव वज्राणां धारणक्रमः ।
अष्टाभिः सर्षपैर्गौरैस्तण्डुलं परिकल्पयेत् ॥
यत्तु सर्व्वगुणैर्युक्तं वज्रं तरति वारिणि ।
रत्नवर्गे समस्तेऽपि तस्य धारणमिष्यते ॥
अनेनापि हि दोषेण तरलत्वेन दूषितम् ।
समस्तात् स्वल्पमानं वज्रं लभति मानवः ॥
प्रकटानेकदोषस्य स्वल्पस्य महतोऽपि वा ।
स्वल्पांशहृतो भागो वज्रस्य न विधीयते ॥
सुदोषमलङ्कारं वज्रं यदपि दृश्यते ।
रत्नानां परिकर्म्मापि मूल्यं तस्य भवत्यपि ॥
प्रथमं गुरुवर्णाभ्युपेत
प्रविशत् समुपैति यत्र दोषम् ।
अलमाभरणेन तस्य राज्ञो
गुणहीनोऽपि मणिर्न भूषणाय ॥
नार्य्या वज्रमधार्य्यं गुणवदपि सुतप्रसूतिमिच्छन्त्या ।
अन्यत्र शौचविदिष्टस्याद्गुणैर्विमुक्ताच्च ।
अथवा पुष्परागेण तथा गोमेदकेन च ।
वैदूर्य्यस्फटिकाभ्याञ्च काचैश्चापि पृथग्विधैः ॥
प्रतिरूपाणि कुर्व्वन्ति वज्रस्य कुशला जनाः ।
परीक्षा तेषु कर्त्तव्या विद्वद्भिः सुपरीक्षकैः ॥
क्षारोल्लेखनशाणाभिस्तेषां कार्य्यं परीक्षणम् ।
पृथिव्यां यानि रत्नानि ये चान्ये लोहधातवः ॥
सर्व्वाणि विलिखेद्वज्रं तच्च तैर्न विलिख्यते ।
गुरुता सर्व्वरत्नानां गौरवाधारकारणम् ।
वज्रे तद्वैपरीत्येन सूरयः परिचक्षते ॥
जातिरजातिं विलिखन्ति वज्रकुरुविन्दाः ।
वज्रेणैव विलिखति नान्येन लिख्यते वज्रम् ॥
वज्राणि मुक्ता मणयो ये च केचन जातयः ।
न तेषां प्रतिबद्धानां भा भवत्यूर्द्ध्वगामिनी ॥
तिर्य्यक्क्षततलात् केषाञ्चित् कथञ्चिद्दूर्या दृश्यते ।
तिर्य्यगालिख्यमानानां सा पार्श्वेष्वपि दृश्यते ॥
यद्यपि विशीर्णकोटिः
सविन्दुरेखान्वितो विवर्णो वा ।
तदपि धनधान्यपुत्रान्
करोति सेन्द्रायुधो वज्रः ।
सौदामिनीविस्फुरिताभिरामं
राजा यथोक्तं कुलिशं दधानः ।
पराक्रमाक्रान्तपरप्रतापः
समस्तसामन्तभुवं भुनक्ति ॥"
इति गारुडे ६८ अध्यायः ॥

वज्रार्थे वैदिकपर्य्यायो यथा । दिद्युत् १ नेमिः २ हेतिः ३ नमः ४ पविः ५ सृकः ६ वृकः ७ वधः ८ वज्रः ९ अर्कः १० कुत्सः ११ कुलिशः १२ तुञ्जः १३ तिग्मम् १४ मेनिः १५ स्वधितिः १६ सायकः १७ परशुः १८ । इत्यष्टादश वज्रनामानि । इति वेदनिघण्टौ । २ । २ ॥

वज्र, क्ली, (वज्र गतौ + ऋज्रेन्द्रेति रन् ।) बालकः । धात्री । इति मेदिनी । रे ६६ ॥ काञ्जिकम् । इति धरणिः ॥ वज्रपुष्पम् । इति शब्दरत्नावली ॥ हीरकविशेषः । स च बहुविधो यथा । नीलवज्रम् १ अब्जाभम् २ मौरवम् ३ नानकेश्वरम् ४ तिमिराख्यम् ५ सबलम् ६ धौताख्यम् ७ श्रीवज्रम् ८ रोचिषी ९ वाहीकम् १० मणिवज्रकम् ११ मदनाख्यम् १२ इत्यादि । तेषां नामानुरूपं चिह्नम् । इति पुराणम् ॥ अथर्व्ववेदः । तस्योत्पत्त्यादि यथा —
"पुरा दधीच इत्यस्य महिमा वज्रमुत्तमम् ।
निर्म्मितं शक्रकस्य मनसे परिवर्तितः ॥
ते निशुम्भवधाद्यास्त्वरेषु महीभृताम् ।
देवराज एव तस्य वज्रमिह धारकम् ॥
तदूर्द्ध्वं वज्रवातमारुधसम्भवोऽभवत् ।

अश्वान् सबलितं यस्मात् ग्रामकस्य सतां मतम् ।
त्रिपाक [illegible] भाग वज्रमिति मनुविषम् ।
वज्रमुद्वज्रम् निर्दिष्ट तस्माद्वा विजानि प्रवेर ।
ग्राम्यैश्च यत्र ग्राम्यादासुरस्य भूत ॥"

इति भावप्रकाशः ।

वज्र पुं, (वज्र+रन् ।) कोकिलाक्षवृक्षः । श्वेतकुशः । इति राजनिर्घण्टः । मन्थान [illegible] इति भावप्रकाशः । श्रीकण्ठपर्य्यायः । यथा —

"अनिरुद्धात् सुभद्रायां वज्रो नाम नृपोऽभवत् ।
प्रतिबाहुरभूत्तस्मात् सुबाहुस्तस्य चाभवत् ॥"

इति गारुडे १४४ अध्यायः ॥

अपि च ।

प्रद्युम्न आसीत् प्रथमः पितृवद्रुक्मिणीसुतः ।
स रुक्मिणो दुहितरमुपयेमे महारथः ॥
तस्यां ततोऽनिरुद्धोऽभूत् नागायुतबलान्वितः ।
स चापि रुक्मिणः पौत्रीं दौहित्रो जगृहे ततः ॥
वज्रस्तस्याभवद्यस्तु मौषलादवशेषितः ।
प्रतिबाहुरभूत्तस्मात् सुबाहुस्तस्य चात्मजः ॥"

इति श्रीभागवते । स्कन्धे ९ अध्यायः ॥

(विश्वामित्रपुत्त्रभेदः । यथा, महाभारते ।१३। ४।५१,५८ ।

उष्णात्रयश्च भगवान् गालवश्च महामुनिः ।
ऋषिर्वज्रस्तथाख्यातः सालङ्कायन एव च ॥"
"विश्वामित्रात्मजाः सर्वे मुनयो ब्रह्मवादिनः ॥")

(कृष्णप्रपौत्त्रानिरुद्धपुत्त्रः मथुराधिपतिः । यथा,—

अष्टौ महिष्यः [illegible] जाम्बवती च [illegible] ।
तथा [illegible] ८३ [illegible] ॥
[illegible] च [illegible] परिवव्रजुः ।
[illegible] ॥"

इति ब्रह्मपुराणम् ।

अथ [illegible] —

"दृष्टा सुमहत् वज्रपात महात्मा
मदमत्ता [illegible] ।
वज्राभिधान [illegible]
[illegible] ॥"

इति काशीखण्डम् ॥

वज्रक क्ली, (वज्र+इवार्थे कन् ।) वज्रक्षारम् । इति राजनिर्घण्टः । (यथा सुश्रुते चिकित्सित-स्थाने ८ अध्याये । तैलं वज्रकमभ्यङ्गाय ॥) सर्व्वरोगनाशकतैलविशेषः । [illegible] यथा,—

"कुर्व्वमाणं प्रथमं [illegible] विधुमुग्रम् ।
[illegible] चतुष्कम् ॥
[illegible] ।
[illegible] वज्रकम् ।
[illegible] ॥"

इति [illegible] ॥

वज्रकङ्कट, पुं (वज्रं कङ्कटमिवास्य ।) हनूमान् । इति हेमचन्द्रः ।१।१६० ॥

वज्रकण्टक पुं, (वज्रमिव कण्टकोऽस्य सहार्थकत्वात् ।) स्नुहीवृक्षः । इति शब्दचन्द्रिका । गोक्षुर [illegible] इति राजनिर्घण्टः ॥

वज्रकन्द पुं, (वज्राकारः कन्दोऽस्य ।) वनकन्दः । इति रत्नमाला । गदरकन्द आलु इति भाषा ॥

वज्रकपाली [न्] पुं, (वज्रकपालमस्त्यस्येति । इनि ।) बुद्धविशेषः । तत्पर्य्यायः । हेरम्ब १ हेवज्र २ चक्रसम्बर ३ हेव ४ त्रिपुरान्तक ५ प्रतिविद्य ७ वज्रटीक ८ । इति हेमचन्द्रः ॥

वज्रकालिका, स्त्री (वज्रोपलक्षिता कालिका ।) मायादेवी । इति हेमचन्द्रः ॥

वज्रकेतु, पुं, (वज्र केतुश्चिह्नमस्य ।) नरकराज । यथा,—

"तेन वज्रितेति नरकः प्राप्य विमानमानुत ।"

इत्युपक्रम्य ।

"इति धाराम्बितस्य वज्रकेतोरभूत् ग्रन्था ।
दुर्लभ प्राप्तिमान् यत्र बाणस्य नगर प्रति ॥"

इति कालिकापुराणे ३८ अध्यायः ॥

वज्रक्षार, क्ली (वज्रवत् क्षारमिति ।) क्षारविशेषः । तत्पर्य्यायः । वज्रकम् १ क्षार श्रेष्ठम् ३ विश्वकम् ४ क्षार ५ अन्दार ६ धूमाख्यम् ७ धूमसारकम् ८ । अस्य गुणाः । अनुष्णवम् । तीक्ष्णत्वम् । क्षारत्वम् । रेचनत्वम् । गुल्मोदराग्निदीप्त्यजीर्णनाशकत्वम् । सरत्वञ्च । इति राजनिर्घण्टः ॥ (सम्भीषणविधि [illegible] विशेषः । तद्यथा,—

"सामुद्रं सैन्धवं काचं यवक्षारं सुवर्च्चलम् ।
टङ्गणं सर्ज्जिका क्षार तुल्यं सर्व्वं विचूर्णयेत् ॥
अर्कक्षीरैः स्नुहीक्षीरैरातपे भावयेत् त्र्यहम् ।
तेन निम्बाम्लवल्लीरा भावयेत् पुनः पुनः ॥
मन्दं क्षारं चूर्णवत् यथा [illegible] ।
[illegible] यदि वा [illegible] समम् ॥
[illegible] प्रयोजयेत् ।
वज्रक्षारमिदं सिद्धं [illegible] विनाशनम् ।
[illegible] गुल्मेषु शूलेषु [illegible] ।
अग्निमान्द्येऽप्यजीर्णे च [illegible] ।
[illegible] पिबेत् वा [illegible] हितम् ।
कर्षं [illegible] विनाशनम् ॥"

इति वैद्यकचक्रपाणिसंग्रहे [illegible] ॥)

वज्रचर्म्मा, [न्] पुं, (वज्रवत् दृढं चर्म्म यस्य ।) गण्डकः । खड्गकम् । इति राजनिर्घण्टः ॥

वज्रजित् पुं, (वज्रं जयति तत्प्रहारेणाप्यनश्वरत्वादिति । जि+क्विप् । "वज्रजित् दितिं शक्तितुङ्"? ६ । १।७१ । इति तुगागमः ।) गरुड़ः । इति हेमचन्द्रः ।२।१४५ ॥

वज्रज्वाला स्त्री (वज्रस्य ज्वाला ।) वज्राग्निः । इति हलायुधः । (यथा, माघे ।१९।३४ ।

"[illegible] वज्रज्वालाविलाससदृशद्युति ॥")

वज्रटीक, पुं (वज्रेण वज्रकपालेन टीकते गच्छति प्रकाशते इति । टीक+क ।) वज्रकपाली नामक बुद्धः । इति त्रिकाण्डशेषः ॥

वज्रतुण्ड पुं (वज्रं वज्रतुल्यं कठिनं तुण्डं यस्य ।) गरुड़ः । मशकः । इति त्रिकाण्डशेषः ॥ गृध्रः । मशकः । इति राजनिर्घण्टः ॥ (वज्रतुल्यमुखे, त्रि । यथा भागवते ।५।२६।१५ ।

"यस्त्विह वा अविधीयमानासु वा मूर्द्धन्य रसमद्भुतमनक्ष्यागतिमुद्धियदि पातेन अद्यतायां निरीक्षते तत्र चापि निरये पापकर्म्मिणो वज्रतुण्डाः प्रचण्डकाकवटादयः प्रपक्षोदराः द्रुत्पाटयन्ति ॥")

वज्रदन्त, पुं (वज्रमिव कठिना दन्ता यस्य ।) शूकरः । मूषिकः । इति शब्दमाला ॥

वज्रदशन पुं, (वज्रमिव कठिनं दशनमस्य ।) मूषिकः । इति हेमचन्द्रः ।४।३६६ ॥

वज्रद्रु, पुं, (वज्राकारो द्रुः ।) स्नुहीवृक्षः । इत्यमरः ॥

वज्रद्रुम, पुं (वज्राकारो द्रुमः ।) स्नुहीवृक्षः । इति शब्दरत्नावली ॥ (तथास्य पर्य्यायः ।

"सीहुण्डो वज्रद्रुमः स्यात् सुधा वज्रद्रुमोऽपि च ।
सुधा समन्तदुग्धा च स्नुक्स्त्रियां स्यात् स्नुही गुडा ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वज्रधर पुं (धरतीति । धृ+अच् । वज्रस्य धरः ।) इन्द्रः । इति हलायुधः । (यथा, महाभारते ।१।११३।३३ ।

"महेन्द्रो वा शुभया यदिह
लोकानुमत्या यापि यथा जगन्ति ।
तथा वा त्वमथो यथाभूत्
यथा प्रथा वज्रधरस्य चैव ॥")

विद्याधरविशेषः । इति त्रिकाण्डशेषः ॥ (यथा सुराधिपतिराजविशेषः । यथा, राजतरङ्गिण्याम् ।८।५४ ।

"तदतादि सह सर्व्वे पार्थिवीयाग्रयो नृपाः ।
शाक्तिको वाचटो वज्रधरो मत्स्यपुराधिप ॥")

वज्रनिर्घोष, पुं, (वज्रस्य निर्घोषः ।) वज्रनिष्पेषः शब्दः । इति हलायुधः ॥

वज्रनिष्पेष, पुं (वज्राणां निष्पेषः सङ्घर्षः ।) वज्रनिर्घोषः । तत्पर्य्यायः । स्फूर्ज्जथुः १ । इत्यमरः ।१।३।१०॥ "द्वे वज्रनिष्पेषे । वज्रोत्पत्तिश्चतुर्मुखात् मेघ हृदि निर्घोष्यत्वं वर्णितं मेघ तत्र चाटोपभवो द्वयमपि केचित् । द्वौ स्फूर्ज्जनौ वज्रनिर्घोषे । निर्घोष वज्रशब्दः । अम्बुदनाद इत्यन्ये । निर्घोषकर्म्म खाटोप स्फुटितं इत्यत्र तु अविराभिधान । जुलः विद्युत् अनुपर्व्वतं विशाद प्रदीप्तियोनि मुखं । हिमो उत्पातेनि सह विनाशनात् दोषः । सर्व्वे स्फूर्ज्जनि दोषादि सदृशम् । केचित्तु दोष निर्घोषनि । केचिद्भाषया दीप्तिदर्शनि । वज्रस्य निर्घोषः स्फूर्ज्जथुः स्फूर्ज्जिते निर्घोषे च पुंसि । विद्योतो हि सा ॥" इति भरतः ॥

वज्रपाणि पुं, (वज्रं पाणौ यस्य ।) इन्द्रः । इति त्रिकाण्डशेषः ॥ (यथा महाभारते ।१।१८८ ।

"इन्द्र सूराश्च वे भूय प्राज्ञस्यान् दृष्टवा ।

वज्रल नाम वज्राख्य विदित यदुपालिना ।”
श्राद्धम् । यथा महाभारते । १ । १७१ । ५१ ।
‘वज्रपाणिप्रकाशश्च स्यात् तत्र वज्ररथ स्मृतम् ।
येभ्यो वै शापवज्राश्च वर्त्तन्ते ह्यवरीयसः ॥”)

वज्रपुष्पं, क्ली, (वज्रमिव पुष्पम् ।) तिलपुष्पम् । इत्यमरः । २ । ४ । ७६ ॥

वज्रपुष्पा, स्त्री (वज्रमिव पुष्पं यस्याः ।) शतपुष्पा । इति राजनिर्घण्टः ॥

वज्रबीजक, पुं (वज्रमिव कठिनं बीजमस्य । कप् ।) लताकरञ्ज । इति राजनिर्घण्टः ॥

वज्रमूली, स्त्री, (वज्रमिव कठिनं मूलं यस्याः । ङीष् ।) माषपर्णी । इति राजनिर्घण्टः ॥ (विवरणमस्या माषपर्णीशब्दे ज्ञातव्यम् ॥)

वज्ररथ, पुं, (वज्रमिव रथो यस्य ।) क्षत्रियः । इति पुराणम् ॥ (यथा, महाभारते ।१।१७१।५१।
“वज्रपाणिप्रकाशश्च स्यात् तत्र वज्ररथ स्मृतम् ॥)

वज्ररद पुं, (वज्रमिव रदोऽस्य ।) शूकरः । इति त्रिकाण्डशेषः ॥ वज्रतुल्यदन्तत्वात् ॥

वज्रवल्ली, स्त्री, (वज्रमिव कठिना वल्ली ।) अस्थिसंहारलता । इति शब्दावली ॥

वज्रवाराही, स्त्री मायादेवी । तत्पर्य्यायः । मारीची २ विमुखा ३ वज्रकालिका ४ विकटा ५ गौरी ६ पोत्रिरथा ७ । इति त्रिकाण्डशेषः ॥

वज्रवृक्ष, पुं (वज्रनिवारको वृक्षः ।) सेहुण्डवृक्षः । इति राजनिर्घण्टः । (तथास्यान्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
“स्नुही स्नुक् च महावृक्षो वज्रद्रुः सुधा गुडा ॥”)

वज्रशल्य, पुं, (वज्रमिव कठिनं शल्यं गात्रलोमशलाका यस्य ।) शल्यकनामा जन्तुः । इति राजनिर्घण्टः ॥

वज्रशृङ्खला स्त्री, (वज्रवत् शृङ्खलं यस्याः ।) विद्यादेवी । इति हेमचन्द्रः । २ । १५३ ॥

वज्रसूर्य्य पुं, (अतिसारवत्त्वात् वज्रमिव तेजस्वित्वात् सूर्य्य इव च ।) बुद्धविशेषः । इति त्रिकाण्डशेषः ॥

वज्रा स्त्री (वजति गच्छतीति । वज गतौ + ‘ऋजेन्द्रेति ।’ उणा २ । २८ । इति रक् । टाप् ।) स्नुहीवृक्षः । गुडूची । इति मेदिनी । रे ८१ । दुर्गा । यथा —
“वज्राङ्कुशकरी देवी वज्रा तेनोपगीयते ।”
इति देवीपुराणे ४५ अध्यायः ॥

वज्राङ्ग, पुं (वज्रमिव अङ्गं यस्य ।) सर्पः । इति राजनिर्घण्टः । वक्राङ्ग इति वा पाठः । वज्रतुल्याङ्गयुक्ते, त्रि ॥

वज्राङ्गी स्त्री, (वज्रमिव अङ्गं यस्याः । ङीष् ।) गवेधुका । इति शब्दचन्द्रिका । अस्थिसंहारी । इति भावप्रकाशः ॥

वज्राभ पुं, (वज्रस्य हीरकस्य आभा इव आभा यस्य ।) दुग्धपाषाणः । इति राजनिर्घण्टः । हीरकतुल्यदीप्तिमति, त्रि ॥

वज्राशनि, पुं वज्रम् । इति त्रिकाण्डशेषः ॥

वज्रास्थिशृङ्खला स्त्री, मौकिलावृक्षः । इति राजनिर्घण्टः ॥

वज्री [न्] पुं, (वज्रोऽस्त्यस्येति । वज्र + “अत इनिठनौ ।” ५ । २ । ११५ । इति इनिः ।) इन्द्रः । इत्यमरः । १ । १ । ४५ ॥ (यथा रघुः । ९ । २४ ।
“यमकुबेरजलेश्वरवज्रिणां
समधुरं मधुरञ्चितविक्रमम् ॥”)
बुद्धः । इति मेदिनी । ने, १९६ ॥ (वज्रविशिष्टे, त्रि । यथा, महाभारते । १३ । १४ । २८१ ।
“पिनाकिनं वज्रिणं दीप्तशृङ्गं
शुभाङ्गदं धारयन्तमुपेतम् ॥)

वज्री स्त्री (वज्र + इक । गौरादित्वात् ङीष् ।) स्नुहीभेदः । इति मेदिनी । रे, ८१ ॥ (तथास्याः पर्य्यायः ।
“सेहुण्डः सिंहतुण्डः स्याद्वज्री वज्रद्रुमोऽपि च ।
सुधासमन्तदुग्धा च स्नुक् स्त्रियां स्यात् स्नुही गुडा ॥’
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वञ्चक पुं, (वञ्चयति प्रतारयतीति । वञ्च + णिच् + ण्वुल् ।) शृगालः । इत्यमरः ॥ गृहबभ्रुः । इति मेदिनी । के, १५३ ॥

वञ्चक, त्रि, (वञ्चयति इति । वञ्च + णिच् + ण्वुल् ।) खलः । धूर्त्तः । इति मेदिनी । के, १५४ ॥ (यथा कलाविलासे । २ । ३६ ।
‘अङ्ग पुत्र वञ्चकानां सकलकलाहृदयसारमतिकुटिलम् ।
ख्याते भवन्ति यस्मिन् चञ्चलचित्तचपला श्रियो ह्यचपलाः ॥’)

वञ्चथ, पुं, (वञ्चति प्रतारयतीति । वञ्च + “शीङ्शपीति ।” उणा ३ । ११३ । इति अथ ।) धूर्त्तः । इत्युणादिकोषः ॥ वञ्चकः । कोकिलः । इति संक्षिप्तसारोणादिवृत्तिः ॥

वञ्चन क्ली, (वञ्च + भावे ल्युट् ।) प्रतारणम् । इति हेमचन्द्रः । ३ । ४३ ॥ तस्य गोपनीयत्वम् । यथा,—
वञ्चनञ्चापमानञ्च मतिमान्न प्रकाशयेत् ॥”
इति चाणक्यसंग्रहः ॥

वञ्चना, स्त्री (वञ्च + णिच् + युच् + टाप् ।) प्रतारणा । यथा,—
‘स कामं सुनया प्रिया प्रेत्य हैमवतं पुरम् ।
शशाभिनन्दि सुरस वञ्चनामिव मेनिरे ॥’
इति कुमारसम्भवे । ६ । ९० ॥

वञ्चित त्रि (वञ्च्यते स्मेति । वञ्च + णिच् + क्त ।) वञ्चनाविशिष्टः । प्रतारितः । तत्पर्य्यायः । विप्रलब्धः २ । इति हेमचन्द्रः । ३ । १ । ६ ॥ (यथा, कुमार । ४ । १ ।
“विधिना जन एष वञ्चितः
त्वदधीनं खलु देहिनां सुखम् ॥”)

वञ्चुक त्रि, (वञ्चति प्रतारयतीति । वञ्च + उकञ् ।) प्रतारणशीलः । तत्पर्य्यायः । धूर्त्त २ वञ्चक ३ । इति शब्दरत्नावली ॥

वञ्च्य, त्रि (वञ्च + ण्यत् । “वञ्चेर्गतौ ।” ७ । ३ । ६३ । इति कुत्वं न ।) गमनीयम् । इति गत्यर्थे वञ्चधातोः कर्म्मणि घ्यण्प्रत्ययविधानम् । इति मुग्धबोधव्याकरणम् ॥

वञ्जुल पुं, (वञ्चतीति । वञ्च गतौ + बाहुलकात् उलच् मुमच ।) तिनिशवृक्षः । (तथास्य पर्य्यायः ।
‘तिनिशः स्यन्दनो नेमी रथद्रुर्व्वञ्जुलस्तथा ॥’
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
अशोकवृक्षः । इत्यमरः । २ । ४ । ७० ॥ स्थलपद्मवृक्षः । इति शब्दरत्नावली ॥ पक्षिविशेषः । इति हलायुधः ॥ जलवेतसः । इति मेदिनी । ले १२८ ॥ (अस्य पर्यायो यथा —
‘वेतसो नम्रकः प्रोक्तो वानीरो वञ्जुलस्तथा ।
अभ्रपुष्पश्च विदुलो रथः शीतश्च कीर्त्तितः ॥’
इति भावप्रकाशः ॥
यथा च रामायणे । ४ । १ । ८८ ।
“चिरविल्वा मधूकाश्च वञ्जुला बकुलास्तथा ॥)

वञ्जुलद्रुम, पुं, (वञ्जुलो द्रुमः ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥ (विवरणमस्य अशोकशब्दे वञ्जुलशब्दे च ज्ञातव्यम् ॥)

वञ्जुलप्रिय पुं, (वञ्जुलस्य प्रियः । वञ्जुलः प्रियोऽस्येति कर्म्मधारयो वा ।) वेतसवृक्षः । यथा
“विदुलो वेतसः शीतो वानीरो वञ्जुलप्रियः ।”
इति रत्नमाला ॥

वञ्जुला, स्त्री, (वञ्जुल + टाप् ।) बहुदुग्धा गौः । इति हेमचन्द्रः । ४ । ३३५ ॥ (नदीविशेषः । यथा, मात्स्ये । ११४ । २८ ।
‘गोदावरी भीमरथी कृष्णवेणी च वञ्जुला ।
तुङ्गभद्रा सुप्रयोगा बाह्या कावेरी चैव तु ।
दक्षिणापथनद्यस्ताः सह्यपादाद्विनिःसृताः ॥”)

वट, वेष्टे । इति कविकल्पद्रुमः ॥ (भ्वा पर सक सेट् ।) वटति वृक्षं लता । इति दुर्गादासः ॥

वट इ स्तेये । चौरधातुरयम् । इति कविकल्पद्रुमः ॥ (भ्वा पर सक सेट् । इदित् ।) इ, वण्टकः । इति दुर्गादासः ॥

वट इ कि वण्टने । इति कविकल्पद्रुमः ॥ (चुरा-पक्षे भ्वा पर सक सेट् ।) वण्टनं विभागः । इ, वण्टते । कि वण्टयति वण्टति । वण्टन्ति दायादा धनात् भाग्यं विभज्य परस्परम् । इति हलायुधः । अयं चुरादौ केनचित् पठ्यते । इति मुग्धबोधटीका । इति दुर्गादासः ॥

वट, शृ क वेष्टे । भाषे । इति कविकल्पद्रुमः ॥ (आत्मनेपदी? चुरा-पर सक सेट् ।) वटयति । इति दुर्गादासः ॥

वट म उक्तौ । इति कविकल्पद्रुमः ॥ (भ्वा-पर सक सेट् ।) म, वटयति । इति दुर्गादासः ॥

वट, पुं, (वटति वेष्टयति स्कन्धेन इत्याशयः(मिति ।) वट + अच् ।) वृक्षविशेषः । बड़गाछ इति भाषा । तत्पर्य्यायः । न्यग्रोधः २ बहुपात् ३ । इत्यमरः । २ । ४ । ३२ । वैश्रवणालयः ४ । इति शब्दरत्नावली । रक्तफलः ६ शृङ्गी ७ कर्म्मजः ८ ध्रुवः ९ क्षीरी १० वैश्रवणावासः ११ भाण्डीरः १२ । इति जटाधरः । यक्षावासः १३ रोहिणः १४ अवरोही १५ विटपी १६ स्कन्धरुहः १७ मण्डली १८ महाच्छायः १९ भृङ्गी २० यक्षावासः २१ यक्षतरुः २२ पादरोहिणः २३ नीलः २४ प्रियाश्रयः २५ बहुपात् २६ वनस्पतिः २७ । अस्य गुणाः । कषायत्वम् । मधुरत्वम् । शिशिरत्वम् । कफपित्तज्वरदाहतृष्णामेहयोनिदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।

"वटः शीतो गुरुर्ग्राही कफपित्तव्रणापहः ।
वर्ण्यो विसर्पदाहघ्नः कषायो योनिदोषहृत् ॥"

इति भावप्रकाशः ॥

अस्य रुद्ररूपत्वं यथा,—

ऋषय ऊचुः ।

"अथ तथाश्वत्थवटौ गोमाश्च सत्तमौ हरे ।
सर्व्वेभ्योऽपि तरुभ्यस्तौ कथं पूज्यतमौ स्मृतौ ॥

सूत उवाच ।

अश्वत्थरूपी भगवान् विष्णुरेव न संशयः ।
रुद्ररूपी वटस्तद्वत् पलाशो ब्रह्मरूपधृक् ॥
दर्शनस्पर्शसेवासु ते वै पापहराः स्मृताः ।
दुःखापद्व्याधिदुष्टानां विनाशकारिणो ध्रुवम् ॥"

इति पाद्मोत्तरखण्डे ११० अध्यायः ॥

अन्यत् पदार्थशब्दे द्रष्टव्यम् ॥ बटः । इति हेमचन्द्रः । टे, ३३ ॥ कड़ि इति भाषा ॥ गोलः । भक्ष्यम् । वड़ा इति भाषा । साम्यम् । इति मेदिनी । टे, ७ ॥ स्त्री, तन्त्रमतेऽन्यतरोऽक्षरवटसंज्ञकयोरश्वत्थादि यथा । अस्यैव वटसाङ्केतनामभ्यन्तरे अर्जुनवटाख्या चतुर्थीत्थोऽन्तर्भवति इत्यादिभिरुक्तवटसंज्ञा बोधव्यानि । यदि ।

"अर्जुनवटमार्गे तु भाण्डीराख्यं वटं स्मृतम् ।
वारणाख्यं तृतीयञ्च वटं सङ्केतवटम् ।
तृतीयं च तत्र पञ्चमं वीरवटं वटः ।
तरश्च वटाद्यं नाम्ना वंशीवटमुच्यते ।
अथापरवटं नाम नवमं परिकीर्त्तितम् ।
आदाय वटं तत्रैव दशमं सुमनोहरम् ।
अयोध्यायां वटं श्रीकृष्णवटमदर्शितम् ।
नाम वंशीवटं चैव द्वादशं परिकीर्त्तितम् ।
नाम श्यामवटश्चैव त्रयोदशमथाद्भुतम् ।
नाम वटवटं चैव चतुर्दशमुदाहृतम् ।
पञ्चदशं वटं स्थानं गन्धर्व्वदशकीर्त्तितम् ।
न च "एकादश वटं चैव संख्यायोऽपि प्रकीर्त्तितम् ॥"
यत्र वटाष्टमादि(?) षोडशवटानि । इति नारायणभट्टकृतव्रजभक्तिविलासे ॥ ७ ॥

वटः, त्रि, (वटतीति । वट + अच् ।) गुणः । इति मेदिनी । टे, ३० ॥ वेटे इति भाषा ।

वटक, पुं, (वट एव । स्वार्थे कन् ।) पिष्टकविशेषः । इत्यमरभरतौ । बड़ा इति भाषा । अस्य गुणौ । विदाहित्वम् । तृष्णाकारित्वञ्च । इति राजवल्लभः । अपि च ।

"माषाणां पिष्टिको गुरुर्ग्ली तथा दहिवटकविहूणिम् ।
हस्त विदग्धवटकोष्ठकैर्वृषु यथेष्टम्भे ।
विशुष्का वटका यत्ना कृत्वा शीतोमशुका ।
तालापयकरा ज्या विदग्धा वातमाया ।
विषमनेत्र भेदकारिणोऽपिप्रपूजिता ।
संपूज्य विविधेषु खण्ड नीरकिषु च ।
तस्य तत्र वटकान् यत्नतामपि सम्भवेत् ।
शुक्लपक्ष वटको यत्नदूरीषधो गुरुः ।
विपक्षदिक्पातो च क्षेत्र पवनापहः ।
राज्यतयाविरोधिणा पाचका तांश्च भक्षयेत् ।"
तत्प्रकारा यथा ।

"वटकुसुमनगमायर्वोदधिशोष्ठे
भेदितेषुपनपुञ्जे घनलज्जालयाद्ये ।
हत इव हतपको य पतेन खड्गधाके
वटकामलकेर्लि सा यथास्य प्रियेयम् ॥ १ ॥
यामिये यामिपूर्व्वैर्धमरिचविभागारिकैला
मह्यक्षेप-
कलियापनसवक्षमलकरसवते धेनिते
पिष्टके ।
खट पक्वो घृते च प्रयाति समधो दुग्धपूरे
प्रमाढ़े
शीलो कर्पूरवीर्त्ति तमिह सुरभि या प्रयात्
प्रियेयम् ॥ २ ॥
यत्पिष्टकटिकाविलोडये यदा तु मा पचेत् ।
यथाक्रते अथास्ते सा पोषूदयास्याविकाम् ॥ ३ ॥
सज्जीरकाद्यपिलचूलवारिकेन
जालीलपयमारिचे बविने सुपिष्टे ।
कर्म्मतया च दृढभावतया भवेद्या
सा तासवट्युटिका विरसे प्रियेयाम् ॥ ४ ॥
कटुनमरिचचूर्णे पक्वगोधूमपक्व
प्रकटितवटकोऽयं भूरिभातोवकाड्ढ्य ।
सरसिजमधुमध्ये यो निवार्य निहन्ति
रविन इव तथाधौ धीधुर्यो विशार ॥ ५ ॥
सुरभिदधिमरिचे वकुले पक्वेरावरे ।
यद्दे मधुघृतलाजादि मसृण्याग्रराज्य च ॥ ६ ॥
सैरवेष्टके पोरवरेकया शाकुनियुक्ते ।
समाप्यपाकर्द्धचरे यारवे वरपूजिता ॥" ७
इति रघुनाथमाहूतके भोजनकुतूहले १९ अध्यायः ॥ ७ ॥ अथ दधिवटकः ।

"अभिनवो धेररिमा तु पक्ष्व क्व मदयेत् ।
तप्तोरे क्षारधकारि वटकान् मज्जयेत्ततः ।
अथि वाटकाद्ये तु दधा राजिकरीषणः ।
वटकस्य गुणो पूर्व्वेरोऽपि च कामिना ॥ ८ ॥

अथ माषवटः ।

सुपाया वटकाक्षेप सोपिता कथनी विशा ।
काक्षरोऽपि विरोधहृन्मा विश ॥ ९ ॥

अथ मापवटः ।

माषाणां पिष्टिका विहूमधार्द्धकमा ।
तथा विदिना मध्ये वटिका कायु गोविन्दः ।
ताम्निमवमपीवे वा क्वथा सुखेदिता ।
वटकस्य पुवेर्धुका ज्ञाला वसिता भवम् ॥ १० ॥

अथ कुष्माण्डवटिः ।

कुष्माण्डवटी शेया पूर्व्वोऽसव्टकाद्गुणः ।
विशेषात् पित्तरक्तघ्नी लघ्वी च कथिता बुधैः ॥

अथ शुक्रवटिका ।

शुक्राणां वटिका तद्वद्विधा साधिता तथा ।
यथा यथा तथो लघ्वी सुखदायका धाता ॥"

इति भावप्रकाशः ॥ ११ ॥

(वटी । बड़ि इति भाषा । यथा —

"वटका अथ कथ्यन्ते तन्नाम वटिका वटी ।
मोदको वटिका पिण्डी गुडो वर्त्तिस्तथोच्यते ॥
लेहवत् साध्यते वह्नौ गुडो वा शर्कराथवा ।
गुग्गुलुर्वा क्षिपेत्तत्र चूर्णं तन्निर्म्मिता वटी ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ।

यथा च ।

"शङ्कर चूर्णयेत्सुक्ष्मं माषमेकमथ्राङ्गुलि लिपेत् ।
यत्ना च वटकं कृत्वा खादेत् तदनुपानतः ॥"

इति शार्ङ्गधरे मध्यखण्डे सप्तमोऽध्याये शङ्कर वटकः ॥ ७ ॥) अष्टमाषकपरिमाणम् । यथा,—

"दशगुञ्जात्मकं माषं ज्ञात् माषो माषचतुष्टयम् ।
द्वौ शाणौ वटकः कोलद्रोणको दङ्गणश्च सः ॥"

इति शब्दमाला ॥

(यथा च ।

"माषैश्चतुर्भिः शाणः स्याद्धरणः स निगद्यते ।
टङ्कः स एव कथितस्तद्द्वयं कोल उच्यते ।
क्षुद्रको वटकश्चैव द्रङ्क्षणः स निगद्यते ॥"

इति शार्ङ्गधरे पूर्व्वखण्डे प्रथमेऽध्याये ॥)

वटपत्र, पुं, (वटस्येव पत्रं यस्य ।) सितार्जकः । इति राजनिर्घण्टः ॥ (तथास्य पर्य्यायः ।

"अर्ज्जको तुवरो शुक्लो शरदूष्मोपमोऽनिला ।
श्वेताद्धरे तथा तु कुठेरककुठेरको ।
तथा शुक्लोक्ष्य श्वेतो वटपत्रस्तथोऽपरः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

वटपत्रा, स्त्री, (वटस्येव पत्रमस्याः ।) मिठा माल्लोपुष्पवल्ली । इति रत्नमाला ॥

वटपत्री, स्त्री, (वटस्येव पत्रं यस्याः । गौरादि त्वात् ङीष् ।) पाषाणभेदीविशेषः । तत्पर्य्यायः । इरावती २ हिरावती ३ मोहनी ४ दरावती ५ रसाम्ला ६ अश्माशरीनिबर्हिणी ७ । अस्या गुणाः । हिमत्वम् । मोदकत्वम् । मेहरक्तपित्तनाशित्वम् । मूत्ररोधनाशित्वम् । शर्कराकृच्छ्रनाशित्वम् । योनिरोगनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।

"वटपत्री तु कथिता मोहनी चेरावती मुने ।
वटपत्री कषायोक्ता योनिमूत्रगदापहा ॥"

इति भावप्रकाशः ॥

वटरः, पुं, कुक्कुटः । वेष्टः । मठः । चौरः । चक्रः । इति शब्दरत्नावली ॥

वटाकी [न्] पुं, स्त्री, (वटिं वटाख्यं वर्त्तनीयं । अच् + णिनि ।) घण्टा । इति हेमचन्द्रः । ६ । ९ । वटाकू इत्यपि पाठः, त्रि ॥

यन्त्राकारः पुं रज्जुः। इत्यमरटीकायां रामाश्रमः।

वटारका, स्त्री, रज्जुः। दड़ि इति वेटे इति च भाषा। इति पुराणम्॥ (यथा महाभारते। १०।१२८।३८।
"बधादिमां सत्यमयीं धर्म्मस्यैवं वटारकाम्॥"
पुंलिङ्गोऽप्ययं शब्दः। यथा, महाभारते। ३।१८७।४।
'वटारकमयं पाशमथ मत्स्यस्य महति।
मनुमनुजग्राहुस्तं तस्मिन् मज्जे न्यवेशयत्॥")

वटावीकः पुं, चौरविशेषः। यथा —
"नामचौरो वटावीकः सन्धिचौरस्तु हारकः।'
इति शब्दमाला॥

वटिः स्त्री, (वटतीति। वट+'सर्व्वधातुभ्य इन्।" उणा ४।११८। इति इन्।) उपजिह्विका। यथा —
"उपजिह्विकोत्पादिका च वटिरुद्देहिका
देवी॥"
इति हारावली।११॥

वटिका, स्त्री, (वटिरेव। स्वार्थे कन्। टाप्।) वटी। वड़ी इति भाषा। तत्पर्य्यायः। गिलती २। इति शब्दचन्द्रिका॥ अथ वटिकाविधिः।
"वक्ष्या अथ कथ्यन्ते तन्नामा वटिका वटी।
मोदको गुटिका पिण्डी गुडो वर्त्तिस्तथोच्यते॥
लेहवत् साध्यते वह्नौ गुडो वा शर्करापवा।
गुग्गुलुर्वा क्षिपेत्तत्र चूर्णं तन्निर्म्मिता वटी॥"
तत्र वह्निसिद्धे गुडादौ।
"कुर्य्यादवह्निसिद्धेन क्वचिद्गुग्गुलुना वटीम्।
द्रवेण मधुना वापि गुटिकां कारयेद्बुधः॥
सिता चतुर्गुणा देया वटीषु द्विगुणो गुडः।
चूर्णे चूर्णसमं कार्य्यो गुग्गुलुर्मधु तत्समम्॥"
तत्सम चूर्णसमम्।
'द्रवन्तु द्विगुणं देयं मोदकेषु भिषग्वरैः॥"
द्रवं चतुर्गुणमिति वा पाठः। द्रवं द्रवस्य द्रवम्।
"कर्षप्रमाणा तन्मात्रा बलं दृष्ट्वा प्रयुज्यते।
बलमिति कालादेरप्युपलक्षणम्। इति भावप्रकाशः॥ *॥ व्यञ्जनोपयोगिद्रव्यम्। अस्यापि वड़ी इति भाषा। यथा,—
"माषाणां पिष्टिका हिङ्गुलवणार्द्रकसंयुता।
तया विरचिता वस्त्रे वटिका साधु शोषिता॥
भर्जिताऽसन्नतैले ता अथवा सुपाचिता।
वटकस्य गुणैर्युक्ता ज्ञातव्या रुचिरा ध्रुवम्॥
कुष्माण्डकवटी ज्ञेया पूर्व्वोक्तवटिकागुणा।
विशेषात् पित्तरक्तघ्नी लघ्वी च कथिता बुधैः॥
मुद्गानां वटिका तद्वद्रचिता पाचिता तथा।
पथ्या रुच्या तथा लघ्वी मुद्गसूपगुणा स्मृता॥"
इति भावप्रकाशः॥

वटी स्त्री, (वट+अच्। गौरादित्वात् ङीष्।) वटिका। इति भावप्रकाशः॥ वटविशेषः। तत्पर्य्यायः। अरोहट २ प्ररोहः ३ शिफारुः ४ वल्शः ५ अमरा ६ भङ्गिनी ७ चीरकाष्ठा ८। अस्या गुणाः। कषायत्वम्। मधुरत्वम्। शिशिरत्वम्। पित्तनाशित्वम्। दाहतृष्णाश्रमश्वासविषच्छर्द्दिनाशनत्वञ्च। इति राजनिघण्टुः॥

वटी, त्रि रज्जुः। इत्यमरः।२।१।२०॥

व(ब)टुः, पुं, (वटतीति। वट+"कटिवटिभ्याञ्च।" उणा १।१८। इति उः।) माणवकः। यथा,—
"वटुः पुनर्माणवको भिक्षाश्च याचमानकम्॥'
इति हेमचन्द्रः॥
ब्रह्मचारी। यथा। वटुर्मौञ्जी ब्रह्मचारी। इति शब्दरत्नावली॥ (यथा महाभारते। १।१५८।१५।
"तस्मादनुव्रतं सर्व्वेऽप्य वटुरेव धनुर्म्मधात्।
आरोपयतु शीघ्रं वै तथेत्युक्तो द्विजर्षभः॥")
कुत्सितश्च। यथा —
"मञ्जकमथं श्लोकाक शुकनास कुटमट।
त्वयो वटुर्भिक्षको दौवारिक इत्यपि॥"
इति च शब्दरत्नावली॥
बालकः। यथा,—
"बालको माणवो बाल किशोरो वटुरि
त्यपि॥"
इत्यपि शब्दरत्नावली॥

वटुक, पुं, (वटु+स्वार्थे अज्ञायां वा कन्।) बालकः। इति शब्दरत्नावली॥ (यथा, पाद्मे क्रियायोगसारे।
"कुमारीर्वटकान् पूज्य तथा शैवतपोधनान्।
राजसूयफलं तेन प्राप्यते नात्र संशयः॥"
ब्रह्मचारी। यथा भागवते।१।८८।१०।
"स तथा यजन दृष्ट्वा भगवान् हरिनाद्रुनः।
दूरात् प्रत्युदियाद्भूत्वा वटुको योग
मायया॥")
भैरवविशेषः। (यथा महानिर्व्वाणतन्त्रे।५।१२३।
"भैरवाश्चैव वेतालाः वटुका नायिकास्तथा।
शाक्ता शैवा वैष्णवाश्च सौरा गाणपतादयः॥")
अस्य मन्त्रादिर्यथा,—
"उद्धरेद्बटुकं दीर्घमापदुद्धारणं तथा।
कुरुद्वयं पुनर्दीर्घं वटुकञ्च समुद्धरेत्।
एकविंशाक्षरात्मा शक्तिवहो महामनुः॥"
अस्य पूजा। प्रातःकृत्यादिप्राणायामान्तं विधाय पीठन्यासं कुर्य्यात्। यथा। धर्म्मादि धर्म्मैश्वर्य्यान्तं हृदि विन्यस्य ऋष्यादिन्यासं कुर्य्यात्। यथा शिरसि ॐ बृहदारण्यकऋषये नमः। मुखे गायत्रीच्छन्दसे नमः। हृदि वटुकभैरवाय देवतायै नमः। ततो मूर्त्तिन्यासः। ह्रौं वों ईशानाय नमोऽङ्गुष्ठयोः। हैं वें तत्पुरुषाय नमस्तर्ज्जन्योः। हुं वुं अघोराय नमो मध्यमयोः। हिं विं वामदेवाय नमोऽनामिकयोः। हं वं सद्योजाताय नमः कनिष्ठयोः। पुनस्तान् पञ्चमूर्त्तीन् शिरोवदनहृद्गुह्यपादेषु तत्पुरुषादिक्रमेण न्यसेत्। तयोरप्रागन्तिमयोरीषत्परिवर्त्तनेषु तर्ज्जनीषु च तान् न्यसेत्। तथा च निबन्धे।
"अङ्गुलीदेशवदनेषु मूर्त्तिश्चसद्यथा पुरा।
तथाऽपि वक्त्रस्थानेष्वाविशेषेण पुरः सरम्।
वकारं पञ्चह्रस्वाद्यानीशानादिषु योजयेत्॥"
ततः कराङ्गन्यासौ। तद्यथा ॐ ह्रां वां अङ्गुष्ठाभ्यां नम इत्यादि। ॐ ह्रां वां हृदयाय नम इत्यादि च। षड्दीर्घबीजद्वयेन कुर्य्यात्। तथा च निबन्धे।
"षड्दीर्घयुक्तया शक्त्या वकारेणापि सहता।
अङ्गानि जातियुक्तानि पञ्चधाद्येन कल्पयेत्॥"
ततो ध्यानम्।
"तस्य ध्यानं त्रिधा प्रोक्तं सात्त्विकादिप्रभेदतः॥"
सात्त्विकम्। यथा,—
"वन्दे बालं स्फटिकसदृशं कुण्डलोद्भासिवक्त्रं दिव्याकल्पैर्नवमणिमयैः किङ्किणीनूपुराद्यैः।
दीप्ताकारं विशदवदनं सुप्रसन्नं त्रिनेत्रं हस्ताब्जाभ्यां वटुकमनिशं शूलदण्डौ दधा
नम्॥'१॥
राजसं यथा,—
"उद्यद्भास्करसन्निभं त्रिनयनं रक्ताङ्गरागस्रजं स्मेरास्यं वरदं कपालमभयं शूलं दधानं करैः।
नीलग्रीवमुदारभूषणशतं शीतांशुचूड़ोज्ज्वलं बन्धूकारुणवाससं भयहरं देवं सदा भावये॥"२॥
तामसं यथा,—
"ध्यायेन्नीलाद्रिकान्तं शशिशकलधरं मुण्डमाला
महेशं
दिग्वस्त्रं पिङ्गकेशं डमरुमथ सृणिं खड्ग
शूलाभयानि।
नागं घण्टां कपालं करसरसिरुहैर्बिभ्रतं
भीमदंष्ट्रं
सर्पाकल्पं त्रिनेत्रं मणिमयविलसत्किङ्किणी-
नूपुराढ्यम्॥"३॥
"सात्त्विकं ध्यानमाख्यातमपमृत्युविनाशनम्।
आयुरारोग्यजननमपवर्गफलप्रदम्॥१॥
राजसं ध्यानमाख्यातं धर्म्मकामार्थसिद्धि
दम्॥२॥
तामसं शत्रुशमनं कृत्याभूतग्रहापहम्॥"३॥
एवं ध्यात्वा मानसैः सम्पूज्य शङ्खस्थापनं कुर्य्यात्॥ *॥ अथ पूजायन्त्रम्।
"धर्म्माधर्म्मादिभिः कल्पपीठे पद्मनवोभिते।
वटकोणान्तर्वृत्तकोणाख्ये भोमपद्मस्य पुरे॥"
ततो मूलेन मूर्त्तिं सङ्कल्प्य पूर्व्ववत् ध्यात्वा आवाहनादिं कुर्य्यात्। तत्र क्रमः। गन्धेन नतो आसनमर्घ्यासनम्। मूलादिसाङ्गदेवेन स्नापनम्। मूलेन वासिधम्। अघोरेण वस्त्रोपवीतम्। तत्पुरुषेण माल्यधूपदीपाद्यनम्। ईशानेन दन्तामिति विरुद्ध। तत्र कर्णिकाग्निदिक्षु कोणेषु ईशानादीन् यजेत्। ततो योमपद्मान्तेषु असिताङ्गादिभैरवान् यजेत्।
"असिताङ्गो रुरुश्चण्डः क्रोधोन्मत्तौ च भैरवौ।
कपाली भीषणश्चैव संहारोऽष्टौ च भैरवाः॥"
एतेऽष्टभैरवास्त्रिनेत्रास्त्रपाणयः। तत वटकोणेषु ह्रां वां कूर्म्माय नम इत्येवं पूजयेत्।

ततः पूर्व्वादिडाकिनीराकिणीलाकिनीकाकिनी
शाकिनीहाकिनीमालिनीपूजाम् देवीपूजाम्
उमापूजाम् रुद्रपूजाम् मातृकापूजाम् च
यजेत् । ऊर्द्धं ऊर्द्ध्वकेशीपूजाम् अधोऽधोकेशी
पूजाम् । तद्बहिरष्टपत्रेषु लोकेशान् बटुक
स्थान पूजयेत् । तद्यथा पूर्व्वे ॐ ब्रह्माणी
पूजाय नमः । एवमीशाने माहेश्वरीपूजाय ।
उत्तरे वैष्णवीपूजाय । अग्निकोणे कौमारीपूजाय ।
पश्चिमे इन्द्राणीपूजाय । नैरृते महालक्ष्मी
पूजाय । याम्ये वाराहीपूजाय । वायव्ये
चामुण्डापूजाय । तथा च निबन्धे ।
“ब्रह्माणीपूजनं पूर्व्वे माहेशीपूजनमैश्वरे ।
वैष्णवीपूजनं सौम्ये कौमारीपूजनमानिले ।
इन्द्राणीपूजनं भूयः पश्चिमे पूजयेत्ततः ।
महालक्ष्मीञ्च पश्चाद्धि नैरृते समर्च्चयेत् ।
वाराहीपूजनं याम्ये चामुण्डापूजमानले ॥”
तद्बहिर्द्दिक्षु च । पैतुक त्रिपुरान्तकं वेताल
वह्निजिह्व करालं कालान्तक एकपाद भीम
रूप अचल हाटकेश्वर पूजयेत् । ततो
योगिनीवेष्टितदिव्ययोगीशाय नमः । एवं
योगिनीवेष्टितान्तरीक्षयोगीशाय नमः । एवं
योगिनीवेष्टितभूमिष्ठयोगीशाय नमः । ईशा
नाधिनिर्ऋतिषु पूजयेत् ॥ ५ ॥ अस्य पुर
श्चरणैकविंशतिसहस्रजपः ।
“वर्णलक्षं जपेन्मन्त्रं हविष्याशी जितेन्द्रियः ।
तद्दशांशं प्रजुहुयात्तिलैर्मधुरसप्लुतैः ॥”६ ॥
अथ बलिदानम् ।
“पूर्व्वं विप्र दुर्गां समाराध्य बलिं दद्यात् ।
घृताक्तं पललं सपिष्टान्नमथापि शर्करा ।
गुडमिक्षुरसापूपमत्स्यैः परिमिश्रितैः ।
कृत्वा कदलमाराध्य दर्व्वं प्रागुक्तवर्त्मना ।
रक्तचन्दनपुष्पाद्यैर्गिरि तस्मै बलिं हरेत् ॥”
यद्वा ।
“अन्यूनाङ्गमर्च्चं कृत्वा राजसं प्राग्मुनीरितम् ।
बलिप्रदानसमये रिपूणां सर्व्वसैन्यकम् ।
निवेदयेद्बलित्वेन बटुकाय विधिज्ञधीः ॥
विदर्भयेच्च मन्त्राभ्यां बलिमन्त्रं तथा सुधीः ।
प्रभुपदस्य रुधिरं पिशितञ्च दिने दिने ॥
अन्वयश्च गणे सार्द्धं सारमेयसमन्वित ।
बलिरत्नोऽयमाख्यातः सर्व्वेषां विजयप्रदः ।
अनेन बलिना तुष्टो बटुकः परमेश्वरम् ।
सर्व्वं शत्रुभ्यो विभजेत्तानिव कुञ्जमानव ॥
दर्व्व हते परबल चीयते नात्र संशय ॥”
इति तन्त्रसारः ॥ ० ॥

अथ बटुकभैरवस्तोत्रम् ।
“कैलासशिखरासीनं देवदेवं जगद्गुरुम् ।
शङ्करं परिपप्रच्छ पार्व्वती परमेश्वरम् ॥
श्रीपार्व्वत्युवाच ।
भगवन् सर्व्वधर्म्मज्ञ सर्व्वशास्त्रागमादिषु ।
आपदुद्धारणं मन्त्रं सर्व्वसिद्धिप्रदं नृणाम् ॥
सर्व्वेषाञ्चैव भूतानां हिताय वाञ्छितं मया ।
विशेषतस्तु राज्ञां वै शान्तिपुष्टिप्रसाधनम् ।
अङ्गन्यासकरन्यासबीजन्याससमन्वितम् ।
वक्तुमर्हसि देवेश मम हर्षविवर्द्धनम् ॥
श्रीभगवानुवाच ।
शृणु देवि महामन्त्रमापदुद्धारहेतुकम् ।
सर्व्वदुःखप्रशमनं सर्व्वशत्रुनिबर्हणम् ॥
अपस्मारादिरोगाणां ज्वरादीनां विशेषतः ।
नाशनं स्मृतिमात्रेण मन्त्रराजमिमं प्रिये ॥
ग्रहराजभयानाञ्च नाशनं सुखवर्द्धनम् ।
स्नेहाद्वक्ष्यामि तं मन्त्रं सर्व्वसारमिमं प्रिये ॥
सर्व्वकामार्थदं मन्त्रं राज्यभोगप्रदं नृणाम् ।
प्रणवं पूर्व्वमुद्धृत्य देवी प्रणवमुद्धरेत् ॥
बटुकायेति वै पश्चादापदुद्धारणाय च ।
कुरुद्वयं ततः पश्चाद्बटुकाय पुनः क्षिपेत् ॥
देवीं प्रणवमुद्धृत्य मन्त्रराजमिमं प्रिये ।
मन्त्रोद्धारमिमं देवि त्रैलोक्यस्यापि दुर्लभम् ।
अप्रकाश्यमिमं मन्त्रं सर्व्वशक्तिसमन्वितम् ॥
स्मरणादेव मन्त्रस्य भूतप्रेतपिशाचकाः ।
विद्रवन्ति भयार्त्ता वै कालरुद्रादिव प्रजाः ॥
पठेद्वा पाठयेद्वापि पूजयेद्वापि पुस्तकम् ।
अग्निचौरभयं वापि ग्रहराजभयन्तथा ।
न च मारीभयं तस्य सर्व्वत्र सुखवान् भवेत् ॥
आयुरारोग्यमैश्वर्य्यं पुत्त्रपौत्त्रादिसम्पदः ।
भवन्ति सततं तस्य पुस्तकस्यापि पूजनात् ॥
श्रीपार्व्वत्युवाच ।
य एष भैरवो नाम आपदुद्धारको मतः ।
त्वया च कथितो देव भैरव कल्प उत्तमः ॥
तस्य नामसहस्राणि अयुतान्यर्व्वुदानि च ।
सारमुद्धृत्य तेषां वै नामाष्टशतकं वद ॥ ० ॥
श्रीभगवानुवाच ।
यस्तु सङ्कीर्त्तयेदेतत् सर्व्वदुःखनिबर्हणम् ।
सर्व्वान् कामानवाप्नोति साधकः सिद्धिमेव च ॥
शृणु देवि प्रवक्ष्यामि भैरवस्य महात्मनः ।
आपदुद्धारकस्येदं नामाष्टशतमुत्तमम् ॥
सर्व्वपापहरं पुण्यं सर्व्वापद्विनिवारकम् ।
सर्व्वकामार्थदं देवि साधकानां सुखावहम् ॥
देहाङ्गन्यसनञ्चैव पूर्व्वं कुर्य्यात् समाहितः ।
भैरवं मूर्द्ध्नि विन्यस्य ललाटे भीमदर्शनम् ।
अक्ष्णोर्भूतात्मनं न्यस्य वदने तीक्ष्णदर्शनम् ।
क्षेत्रपं कर्णयोर्मध्ये क्षेत्रपालं हृदि न्यसेत् ।
क्षेत्राख्यं नाभिदेशे च कट्यां सर्व्वाघनाशनम् ।
त्रिनेत्रमूर्व्वोर्विन्यस्य जङ्घयो रक्तपाणिकम् ॥
पादयोर्द्देवदेवेशं सर्व्वाङ्गे बटुकं न्यसेत् ।
एवं न्यासविधिं कृत्वा तदनन्तरमुत्तमम् ॥
नामाष्टशतकस्यापि छन्दोऽनुष्टुबुदाहृतम् ।
बृहदारण्यको नाम ऋषिश्च परिकीर्त्तितः ॥
देवता कथिता चेह सद्भिर्बटुकभैरवः ।
धर्म्मार्थकाममोक्षेषु विनियोगः प्रकीर्त्तितः ॥ १ ॥
ॐ भैरवो भूतनाथश्च भूतात्मा भूतभावनः ।
क्षेत्रज्ञः क्षेत्रपालश्च क्षेत्रदः क्षत्रियो विराट् ।
श्मशानवासी मांसाशी खर्पराशी मखान्तकृत् ।
रक्तपः प्राणपः सिद्धः सिद्धिदः सिद्धसेवितः ॥
करालः कालशमनः कलाकाष्ठातनुः कविः ।
त्रिनेत्रो बहुनेत्रश्च तथा पिङ्गललोचनः ॥
शूलपाणिः खड्गपाणिः कङ्काली धूम्रलोचनः ।
अभीरुर्भैरवो भीरुर्भूतपो योगिनीपतिः ॥
धनदो धनहारी च धनपः प्रतिभावान् ।
नागहारो नागकेशो व्योमकेशः कपालभृत् ॥
कालः कपालमाली च कमनीयः कलानिधिः ।
त्रिलोचनो ज्वलन्नेत्रस्त्रिशिखी च त्रिलोकपः ॥
त्रिवृत्ततनयो डिम्भः शान्तः शान्तजनप्रियः ।
बटुको बटुवेशश्च खट्वाङ्गवरधारकः ॥
भूताध्यक्षः पशुपतिर्भिक्षुकः परिचारकः ।
धूर्त्तो दिगम्बरः शौरिर्हरिणः पाण्डुलोचनः ॥
प्रशान्तः शान्तिदः शुद्धः शङ्करप्रियबान्धवः ।
अष्टमूर्त्तिर्निधीशश्च ज्ञानचक्षुस्तपोमयः ॥
अष्टाधारः कलाधारः सर्पयुक्तः शशीशिखः ।
भूधरो भूधराधीशो भूपतिर्भूधरात्मजः ।
कङ्कालधारी मुण्डी च नागयज्ञोपवीतवान् ॥
जृम्भणो मोहनः स्तम्भी मारणः क्षोभणस्तथा ।
शुद्धनीलाञ्जनप्रख्यदेहो मुण्डविभूषितः ॥
बलिभुग्बलिभूतात्मा कामी कामपराक्रमः ।
सर्व्वापत्तारको दुर्गो दुष्टभूतनिषेवितः ॥
कामी कलानिधिः कान्तः कामिनीवशकृद्वशी ।
सर्व्वसिद्धिप्रदो वैद्यः प्रभविष्णुः प्रभाववान् ॥
अष्टोत्तरशतं नाम भैरवस्य महात्मनः ।
मया ते कथितं देवि रहस्यं सर्व्वकामिकम् ॥
य इदं पठति स्तोत्रं नामाष्टशतमुत्तमम् ।
न तस्य दुरितं किञ्चिन्न रोगेभ्यो भयं तथा ॥
न शत्रुभ्यो भयं किञ्चित् प्राप्नोति मानवः क्वचित् ।
पातकानां भयं नैव पठेत् स्तोत्रमनन्यधीः ॥
मारीभये राजभये तथा चौराग्निजे भये ।
औत्पातिके महाघोरे तथा दुःस्वप्नदर्शने ।
बन्धने च तथा घोरे पठेत् स्तोत्रं समाहितः ॥
सर्व्वे प्रशमनं यान्ति भयाद्भैरवकीर्त्तनात् ।
एकादशसहस्रन्तु पुरश्चरणमुच्यते ॥
त्रिसन्ध्यं यः पठेद्देवि संवत्सरमतन्द्रितः ।
स सिद्धिं प्राप्नुयादिष्टां दुर्लभामपि मानुषः ॥
षण्मासान् भूमिकामस्तु जप्त्वा लभते महीम् ।
राजा शत्रुविनाशाय जपेन्मासाष्टकं पुनः ॥
रात्रौ वारत्रयञ्चैव नाशयत्येव शात्रवान् ।
जपेन्मासत्रयं रात्रौ राजानं वशमानयेत् ॥
धनार्थी च सुतार्थी च दारार्थी यस्तु मानवः ।
पठेद्वारत्रयं यद्वा वारमेकं तथा निशि ॥
धनं पुत्त्रांस्तथा दारान् प्राप्नुयान्नात्र संशयः ।
रोगी रोगात् प्रमुच्येत बद्धो मुच्येत बन्धनात् ॥
भीतो भयात् प्रमुच्येत देवि सत्यं न संशयः ।
यान् यान् समीहते कामांस्तांस्तानाप्नोति
निश्चितम् ॥
अप्रकाश्यमिदं गुह्यं न देयं यस्य कस्यचित् ।
सत्कुलीनाय शान्ताय ऋजवे दम्भवर्ज्जिते ।
दद्यात् स्तोत्रमिदं पुण्यं सर्व्वकामफलप्रदम् ।
ध्यानं वक्ष्यामि देवस्य यथा ध्यात्वा पठेन्नरः ॥ ० ॥
ॐ शुद्धस्फटिकसङ्काशं सहस्रादित्यवर्च्चसम् ।
अष्टबाहुं त्रिनयनं चतुर्बाहुं द्विबाहुकम् ॥

भुजङ्गमेखलं देवमग्निवर्णशिरोरुहम् ।
दिगम्बरं कुमारीशं बटुकाख्यं महाबलम् ॥
खट्वाङ्गमसिपाशञ्च शूलञ्चैव तथा पुनः ।
डमरुञ्च कपालञ्च वरदं भुजगं तथा ॥
नीलजीमूतसङ्काशं नीलाञ्जनचयप्रभम् ।
दंष्ट्राकरालवदनं नूपुराङ्गदभूषितम् ।
आत्मवर्णसमोपेतसारमेयसमन्वितम् ।
ध्यात्वा जपेत् सुसंहृष्टः सर्व्वान् कामानवाप्नुयात् ॥
एतच्छ्रुत्वा ततो देवी नामाष्टशतमुत्तमम् ।
भैरवाय प्रहृष्टाभूत् स्वयञ्चैव महेश्वरी ॥'
इति विश्वसारोद्धारतन्त्रे आपदुद्धारकल्पे भैरवस्तवराजः समाप्तः ॥*॥ अथ वटुकभैरवकवचम् ।

श्रीभैरव उवाच ।

"देवेशि देहरक्षार्थं कारणं कथ्यतां ध्रुवम् ।
म्रियन्ते साधका येन विना श्मशानभूमिषु ॥
रणेषु चातिघोरेषु महावायुजलेषु च ।
शृङ्गिमकरवज्रेषु ज्वरादिव्याधिवह्निषु ॥

श्रीदेव्युवाच ।

कथयामि शृणु प्राज्ञ वटोस्तु कवचं शुभम् ।
गोपनीयं प्रयत्नेन मातृजारोपमं यथा ।
तस्य ध्यानं त्रिधा प्रोक्तं सात्त्विकादिप्रभेदतः ।
सात्त्विकं राजसञ्चैव तामसं देव तत् शृणु ॥
वन्दे बालं स्फटिकसदृशं कुण्डलोद्भासिवक्त्रं
दिव्याकल्पैर्नवमणिमयैः किङ्किणीनूपुराद्यैः ।
दीप्ताकारं विशदवदनं सुप्रसन्नं त्रिनेत्रं
हस्ताब्जाभ्यां वटुकमनिशं शूलखड्गौ
दधानम् ॥१॥
उद्यद्भास्करसन्निभं त्रिनयनं रक्ताङ्गरागस्रजं
स्मेरास्यं वरदं कपालमभयं शूलं दधानं करैः ।
नीलग्रीवमुदारभूषणशतं शीतांशुचूडोज्ज्वलं
बन्धूकारुणवाससं भयहरं देवं सदा भावये ॥२॥
ध्यायेन्नीलाद्रिकान्तं शशिशकलधरं मुण्डमाल
महेशं
दिग्वस्त्रं पिङ्गकेशं डमरुमथ सृणिं खड्ग
शूलाभयानि ।
नागं घण्टां कपालं करसरसिरुहैर्बिभ्रतं
भीमदंष्ट्रं
सर्पाकल्पं त्रिनेत्रं मणिमयविलसत्किङ्किणी
नूपुराढ्यम् ॥३॥*॥
अस्य वटुकभैरवकवचस्य महाकाल ऋषिरनुष्टुप्छन्दः श्रीवटुकभैरवो देवता वं बीजं ह्रीं शक्तिरापदुद्धारणायेति कीलकं मम सर्व्वाभीष्टसिद्ध्यर्थे विनियोगः ।
"ॐ शिरो मे भैरवः पातु ललाटं भीषणस्तथा ।
नेत्रे च भूतहननः सारमेयानुगो भ्रुवौ ॥
भूतनाथश्च मे कर्णौ कपोलौ प्रेतवाहनः ।
नासापुटौ तथोष्ठौ च भस्माङ्गः सर्पभूषणः ॥
भीषणास्यो ममास्यञ्च शक्तिहस्तो गलं मम ।
स्कन्धौ दैत्यरिपुः पातु बाहू अतुलविक्रमः ॥
पाणी कपाली मे पातु मुण्डमालाधरो हृदम् ।
वक्षःस्थलं तथा शान्तः कामचारी स्तनं मम ।
उदरञ्च स मे तुष्टः क्षेत्रेशः पार्श्वतस्तथा ।
क्षेत्रपालः पृष्ठदेशं क्षेत्राख्यो नाभितस्तथा ॥
कट्यौ पापौघनाशश्च वटुको लिङ्गदेशकम् ।
गुदं रक्षाकरः पातु ऊरू रक्षाकरः सदा ॥
जानू च घुर्घुराराओ जङ्घे रक्षतु रक्तपः ।
गुल्फौ च पादुकासिद्धः पादपृष्ठं सुरेश्वरः ॥
आपादमस्तकञ्चैव आपदुद्धारणस्तथा ।
सहस्रारे महापद्मे कर्पूरधवलो गुरुः ॥
पातु मां वटुको देवो भैरवः सर्व्वकर्म्मसु ।
पूर्व्वस्यामसिताङ्गो मे दिशि रक्षतु सर्व्वदा ॥
आग्नेय्याञ्च रुरुः पातु दक्षिणे चण्डभैरवः ।
नैरृत्यां क्रोधनः पातु मामुन्मत्तस्तु पश्चिमे ॥
वायव्यां मे कपाली च नित्यं पायात् सुरेश्वरः ।
भीषणो भैरवः पातूत्तरस्यां दिशि सर्व्वदा ॥
संहारभैरवः पातु दिश्यैशान्यां महेश्वरः ।
ऊर्द्ध्वं पातु विधाता वै पाताले नन्दिको विभुः ॥
सद्योजातस्तु मां पायात् सर्व्वतो देवसेवितः ।
वामदेवोऽवतु प्रीतो रणे घोरे तथावतु ॥
जले तत्पुरुषः पातु स्थले पातु गुरुः सदा ।
डाकिनीपुत्रकः पातु दारांस्तु लाकिनीसुतः ॥
पातु शाकलको भ्रातॄन् श्रियं मे सततं गिरः ।
लाकिनीपुत्रकः पातु पशूनश्वानजांस्तथा ॥
महाकालोऽवतु च्छत्रं सैन्यं वै कालभैरवः ।
राज्यं राज्यश्रियं पायात् भैरवो भीतिहारकः ॥
रक्षाहीनन्तु यत् स्थानं वर्जितं कवचेन च ।
तत् सर्व्वं रक्ष मे देव त्वं यतः सर्व्वरक्षकः ॥
एतत् कवचमीशान तव स्नेहात् प्रकाशितम् ।
नाख्येयं नरलोकेषु सारभूतञ्च सुप्रियम् ॥
यस्मै कस्मै न दातव्यं कवचेशं सुदुर्लभम् ।
न देयं परशिष्येभ्यः कृपणेभ्यश्च शङ्कर ॥
यो ददाति निषिद्धेभ्यः स वै भ्रष्टो भवेद्ध्रुवम् ।
अनेन कवचेशेन रक्षां कृत्वा द्विजोत्तम ।
विचरन् यत्र कुत्रापि विघ्नौघैः प्राप्यते न स ॥
मन्त्रेण म्रियते योगी कवचं यन्न रक्षितम् ।
तस्मात् सर्व्वप्रयत्नेन दुर्लभं पापचेतसाम् ॥
भूर्ज्जे रम्भात्वचे वापि लिखित्वा विधिवत् प्रभो ।
धारयेत् पाठयेद्वापि सम्पठेद्वापि नित्यशः ।
सम्प्राप्नोति प्रभावं वै कवचस्यास्य वर्णितम् ॥
नमो भैरवदेवाय सारभूताय वै नमः ।
नमस्त्रैलोक्यनाथाय नाथनाथाय वै नमः ॥"
इति विश्वसारोद्धारतन्त्रे आपदुद्धारकल्पे भैरवभैरवीसंवादे वटुकभैरवकवचं समाप्तम् ॥

वटुकरण, क्ली, (वटोः करणम् ।) उपनयनम् । इति त्रिकाण्डशेषः ॥

वठ, स्थौल्ये । इति कविकल्पद्रुमः ॥ (भ्वा-पर-अक-सेट् ।) स्थौल्यमिह सामर्थ्यम् । वठति दाता दातुं समर्थः स्यादित्यर्थः । इति दुर्गादासः ॥

वठ, इ इ एकचर्य्ये । इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-अक-सेट् । इदित् ।) एकस्य चरणमेकचर्य्यम् । इ, वण्ठ्यते । इ, वण्ठते चारश्चौरेषु एकचरतीत्यर्थः । इति दुर्गादासः ॥

वठर, पुं, (वठतीति । वठ + "वठिमनिभ्याम्चिच ।" उणा० ५ । ३८ । इति अरप्रत्ययः । उणादित्वात् उत्वाभावः ।) मूर्खः । इत्युणादिकोषः ॥ अम्बष्ठः । इति हेमचन्द्रः ॥ शब्दकारः । वक्रः । इति संक्षिप्तसारोणादिवृत्तिः ॥

वण्ठर, त्रि, (वठ + अर । इत्युणादेः ।) शठः । मन्दः । इति त्रिकाण्डशेषः ॥

वड आरोहणे । चौरधातुरयम् । इति कविकल्पद्रुमः ॥ (भ्वा-पर-सक-सेट् ।) वडभी । नाडुधम् । इति दुर्गादासः ॥

वड इ क विभागे । इति कविकल्पद्रुमः ॥ (चुरा-पर-सक-सेट् । इदित् ।) इ क, वण्डयति । अथ केचिन्न पठन्ति । इति दुर्गादासः ॥

वड इ ङ वेष्टे । विभागे । इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-सक-सेट् । इदित् ।) इ वण्ड्यते । ङ वण्डते । इति दुर्गादासः ॥

वडभी, स्त्री, (वड्यते आरुह्यतेऽस्यामिति । वड + बाहुलकात् अभच् । गौरादित्वात् ङीष् ।) गृहचूडा । इत्यमरः ॥ छदनि । इति भाषा ॥ तत्पर्य्यायः । गोपानसी २ । इति शब्दरत्नाकरसुन्दरी ॥ चन्द्रशालिका ३ कूटागारम् ४ । इति त्रिकाण्डशेषः ॥

'चन्द्रशाला च वडभी स्यात्ताः प्रासादमूर्द्धनि ॥"
इति श्रीधरः ॥

छेवायां वडभी चडा । इति रुद्रः ॥
वडभी चन्द्रशालापि प्रासादाग्रे च मण्डपे ॥"
इति कोषान्तरम् ॥

'शुद्धान्ते वडभी चन्द्रशाले सौध इवेष्यते ॥"
इति रभसः ॥

ह्रस्वान्तापि वडभि । तां कस्याञ्चिद्भवनवडभौ सुप्तपारावतायामिति । मेघदूतम् । ३ ॥ वडभि वडभी वलभि वलभी चेति चतुष्टयमिति वृद्धाः । इति भरतः ॥ (यथा, हरिवंशे । ८४ । २१ ।
"सुवासिता बहुद्वारा उपनीतोत्तरच्छदा ।
क्रियन्तां भवनाटाग्रे वडभ्यो वीथयस्तथा ॥")

वडा, स्त्री, (वड् + अच् + टाप् ।) वटकः । यथा,—
"कण्डैलायवसालैर्युक्तं यत्नात्स्थूलं पिण्डम् ।
पिष्टचूर्णं वटी वडा ॥ इति शब्दचन्द्रिका ॥

वड्र, त्रि (वड्रते इति । वड + बहुलमन्यत्रापीति रक् ।) वृहत् । इत्यमरः । ३ । १ । ६१ ॥ अस्य भाषा बड़ ॥

वण, शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा-पर-अक-सेट् ।) च, अवाणीत् अवणीत् । इति दुर्गादासः ॥

वण्ट, उ क भागे । इति कविकल्पद्रुमः ॥ (चुरा-पर-सक-सेट् ।) वण्टयति वण्टापयति । इति दुर्गादासः ॥

वण्ट पुं (वण्ट्यते इति । वण्ट + घञ् ।) भागः । दात्रमुष्टिः । इति हेमचन्द्रः । ३ । ७ ॥ (वण्ट + अच् ।) अकृतविवाहः । इति शब्दमाला ॥

वण्टक पुं, (वण्ट इव । स्वार्थे कन् ।) भागः । इत्यमरः । ३।३।१८ ॥ (वण्ट + ण्वुल् । विभाग कारके, त्रि ।)

वण्ड, पुं (वण्डते इति । वडि ङ एकचरे + अच् ।) अकृतोद्वाहः । खर्व्वः । कुण्ठायुधः । इति मेदिनी । डे, ८ ॥

वण्डर, पुं स्वयंकारकः । कुक्कुरस्य लाङ्गूलम् । करीरकोषः । तालस्य पल्लवम् । पयोधरः । इति मेदिनी । रे, १८८ ॥ तत्र खोजाख्यकाराणां गणितो ऽयम् । किन्तु वडि ङ एकचरे इत्यस्मात् अरन् प्रत्ययेन निष्पन्नत्वात् दन्त्यवकारादौ लिखितः ॥

वण्डाल पुं युद्धम् । नौका । खनित्रम् । इति मेदिनी हेमचन्द्रश्च ॥

व(ब)ण्ठ, पुं, (वनम इति वनु सम्भक्तौ । वन् + "शमस्तात् ठः ।" उणा० १ । ११४ । इति ठः ।) अनाहूतमेघः । तत्पर्य्यायः । कुम्भी १ निःसङ्गः २ ग्रीष्मिकः ३ । इति हेमचन्द्रः ।

वण्ठ त्रि, (वनति इति । वन सम्भक्तौ । वन + "शमस्तात् ठः ।" उणा० १।११४ । इति ठः ।) कुन्तान्वितानः । इति मेदिनी । ठे, २४ ॥ वडे इति भाषा ॥

वण्ठा, स्त्री, (वण्ठ + टाप् ।) पांशुला । इति मेदिनी । ठे २४ ॥

वत, अ, (वाताति । वा + डति ।) साम्यम् । तत्पर्य्यायः । वा २ यथा ३ तथा ४ एव ५ एवम् ६ । इत्यमरः ॥

वत अ, खेदः । अनुकम्पा । (यथा, प्रसन्नराघवम् । प्रथमाङ्के ।
"क वत हरिणकानां जीवितञ्चातिलोलं
क च निशितनिपाता वज्रसाराः शरास्ते ॥")
सन्तोषः । विस्मयः । आमन्त्रणम् । इत्यमरः । ३ । ३ । २४१ ॥

वतंस पुं (अवतंसयति अवतंस्यतेऽनेन वेति । अव + तसि + अच् । घञ् वा । अवस्याल्लोपः ।) कर्णपूरः । कर्णभूषणम् । शेखरः । शिरोभूषणम् । इति मेदिनी । से, १० ॥ (यथा गीतगोविन्दे । २ । ४ ।
"चलितदृगञ्चलचञ्चलमौलिकपोलविलोल
वतंसम् ।
रासे हरिमिह विहितविलासं
स्मरति मनो मम कृतपरिहासम् ॥")

वतण्ड पुं, (वनतीति । वन् + "अण्डन् कृसृभृवृञः ।" उणा० १ । १२८ । इत्यत्र वनतेरण्डन् बाहुलकात् । वतण्ड इति केचिदुज्ज्वलदत्तोक्ता अण्डन् प्रत्ययेन साधुः ।) मुनिभेदः । इत्युणादिकोषः ।

वतू पुं सुरवर्त्मा । सत्यवाक् । पन्थाः । अक्षिरोगः । इति संक्षिप्तसारोणादिवृत्तिः ।

वतोका, स्त्री, (अवगतं तोकमपत्यं यस्याः अवस्याल्लोपः ।) अवतोका । इत्यमरटीकायां भरतः ।

वतृस, स्त्री, (वन्तीति । वद्द याच्ञायां वाचि + "हृसृरुहियुषितिभ्यः कित् ।" उणा० ३ । ६२ । इति सः ।) वक्षः । इत्यमरः ॥

वत्स पुं, (वदतीति । वद् + "वृतृवदिहनिकमिकषिभ्यः सः ।" उणा० ३ । ६२ । इति सः ।) वत्सः । गोशिशुः । बाछुर इति भाषा । तत्पर्य्यायः । शकृत्करिः २ तर्णकः ३ । इति वैद्यकरत्नमालायाम् । चामरः । दोग्धा ४ दोहकः ५ पीथः ६ । इति शब्दरत्नावली । रौहिणेयः ७ बाहुलेयः ८ तर्णकः ९ । सद्योजातस्य तस्य पर्य्यायः । तर्णकः १ तर्णः २ तर्णकः ३ वत्सः ४ । इति जटाधरः ॥ पुत्रादिः । इति मेदिनी । से, ११ ॥ बाछा इति भाषा । (यथा, माघे । ६ । ८ । ११ ।
"न तस्य धर्म्मः श्रियमुपायात भवान् नारोढुमर्हति ।
न दक्षीणा प्रया यस्य चक्षुषावपि युक्षालयः ॥")
शिशोर्नामपुत्रः । सुमालिनामपुत्रस्य नामान्तराणि । यथा भागवते । ९ । १७ । ५—६ ।
"तत्पुत्रः केतुमानस्य यज्ञे भीमरथस्ततः ।
दिवोदासो द्युमांस्तस्मात् प्रतर्द्दन इति स्मृतः ॥
स एव शत्रुजिद्वत्स ऋतध्वज इतीरितः ।
तथा कुवलयाश्वेति प्रोक्तोऽलर्कोऽन्यकात ॥"
देशभेदः । यथा कथासरित्सागरे । ९ । ४ ।
"अस्ति वत्स इति ख्यातो देशो दर्पविधान्तये ।
स्वर्गस्य निर्म्मितो धात्रा प्रतिमल्ल इव क्षितौ ॥")

वत्सक, क्ली, (वत्स + संज्ञायां इवार्थे वा कन् ।) पुष्पकासीसम् । इति राजनिघण्टः ॥ (विवरणमस्य पुष्पकासीसशब्दे ज्ञातव्यम् ।)

वत्सक, पुं, (वत्स + कन् ।) कुटजः । इत्यमरः ॥ (अस्य पर्य्यायो यथा —
"कुटजः शक्रपर्य्यायो वत्सको गिरिमल्लिका ।
कुटजस्तुङ्गबल्लिञ्च वत्सवापि कलिङ्गकः ॥"
इति वैद्यकरत्नमालायाम् ।
तथान्ये पर्य्यायाः ।
"कुटजः कुटजः कौटो वत्सको गिरिमल्लिका ।
कालिङ्गः शक्रशाखी च मल्लिकापुष्प इत्यपि ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ।)
इन्द्रयवः । इति राजनिघण्टः ॥

वत्सकबीजं, क्ली (वत्सकस्य बीजम् ।) इन्द्रयवः । इति राजनिघण्टः ॥ (यथा,—
"बीजं वत्सकबीजञ्च निम्बभूनिम्बमार्क्कवम् ।
पिप्पली रोहिणी पाठा दार्व्वीमतिविषां
समाम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वरातिसारे गोमाद्यचूर्णे ॥)

वत्सकामा स्त्री (वत्सं कामयते इति । कम् + अण् । टाप् ।) वत्साभिलाषिणी गौः । तत्पर्य्यायः । वत्सला २ । इति राजनिघण्टः ॥ पुत्राभिकामा स्त्री च ॥

वत्सतर, पुं, (प्रथमवया वत्सः । "वत्सोक्षाश्वर्षभेभ्यश्चेति ।" ५ । ३ । ९१ । इति ष्टरच् ।) अप्राप्तदमनकालः शकृत् । दोयाने बाछुर इति भाषा । तत्पर्य्यायः । दम्यः २ । इत्यमरः । २ । ९ । ६२ ॥ तुदाल्यः ३ गतिः ४ । इति राजनिघण्टः ॥

वत्सतरी स्त्री (वत्सतर + ङीप् ।) इषोत्सर्गे व्रषवत्सीविव कल्पिता त्रिहायणी गौः । यथा, कात्यायनसूत्रम् । पयस्विन्या पुत्रो यश्च रूपवान् स्यात् तमलङ्कृत्य यूथमुख्यां चतस्रो वत्सतर्यश्चालङ्कृत्य एतं युवानं पतिं वो ददामि तेन क्रीडन्तीश्चरथ प्रियेण मा न साम्भुवा सुभगा रायस्पोषेण समिषा मदेम इत्यनेन उत्सृजेदिति । अथवा इं वत्सतर्यो यो युष्मान् एतं युवानं पतिं ददामि तेन इत्यनेन इत्याद्युक्त साधयामि तेन इदिव यद्यं क्रीडन्तो चैतन्य चरथ धमथ यो वत्सतर्यो यूयमपि माव नावानस्वविषया भविष्यथ किन्तु सदा वाचया । वय इयस्य वत्सतर्योऽस्य साहेन रायस्पोषेण धनसम्पदा सामभुवा सम्बन्ध भावेन इषा अन्नेन च समिदेन इषा मदाम सुभगा लोकस्य प्रिया इति सम्पदम इति भविष्यत्सामीप्ये वर्त्तमान इति पाणिनिस्मर सात्मविष्यन्र्थे वर्त्तमाना ॥ ० ॥ वत्सतर्य्योऽपि चरन्ति स्मृतिः ।
"अयतो लोहिता पद्मौ पादौ भ्यां लोलपाश्वरे ।
पृष्ठतस्तु भवेत् तथा वृषभस्य तु मोचने ॥"
तासां वय प्रमाणं यथा —
"त्रिहायणीभिरन्याभि सुरूपाभि सखी
भिन ।
सर्व्वाभिकरणोपेत सर्व्वांशस्वदो महान् ।
चतुर्भ्यो विधानेन स्मृतिस्मृतिनिदर्शनात् ॥"
इति शुद्धितत्त्वे वृषोत्सर्गविचारः ॥

वत्सनाभ पुं (वत्सान् नभ्यति हिनस्तीति । नभ हिंसायाम् + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) विषवृक्षविशेषः । इत्यमरः । २।८।११ ॥ स तु स्थावरविषभेदः । प्रायो वत्सान् नभ्यति हिनस्ति वत्सनाभः नभ्य न हिंसे ण्यन्तात् कर्म्मणि अण् । वत्सस्य नाभिरिव वत्सनाभः स्यादिति केचित् न युक्तं अथ सिन्धुवारपत्रसदृशपत्र । इति भरतः ॥ ० ॥ (यथा, हरिवंशे । २२१ । ६५ ।
"दत्त्वा वत्सनाभाख्य पननाथस्य तव ।)
तत्पर्य्यायः । अमृतम् २ विषम् ३ उग्रम् ४ महौषधम् ५ गरलम् ६ मारणम् ७ नागः ८ स्तोककम् ९ प्राणहारकम् १० स्थावरादि ११ । अस्य गुणाः । अतिमधुरत्वम् । उष्णत्वम् । वातकफकण्ठरुक्सन्निपातनाशित्वम् । पित्तसन्तापकारकत्वञ्च । इति राजनिघण्टः ॥ ० ॥ अस्य स्वरूपनिरूपणं यथा ।
"सिन्धुवारसदृक्पत्रो वत्सनाभ्याकृतिस्तथा ।
यत्पार्श्वे न तरोर्वृद्धिर्वत्सनाभः स भाषितः ॥"
तस्य नामान्तराणि यथा ।
"विष प्राणहरं प्रोक्तं व्यवायि च विकाशि च ।
आग्नेयं वातकफहृद्योगवाहि मदावहम् ॥"
अवापि सकलकायस्यायतपूर्ब्बकमाकृतमनयोगम् ॥

शिलाजि चोक्तशोधनपूर्ब्बकं सन्निवर्त्य शिलाजितो करणशीलम्। आयसं अधिकायग्राह्यम्। योगवाहि भक्षणगुणग्राहकम्। महावहं सभो गुणाधिक्येन वृद्धिविध्वंसकम्।

"लब्ध पुष्टियुक्तं तु पाषाणादपि रसायनम्।
योगवाहि निरोगञ्च तु वृष्ण योग्यवहनम्।
ये दुर्गुणा विभेऽशुद्धे ते स्युर्वीर्य्या विशोधनात्।
तस्मादिदं प्रयोगेषु शोधयित्वा प्रयोजयेत्॥"
इति भावप्रकाशः॥

(क्लीवेऽपि दृश्यते। यथा —
"चत्वारि वत्सनाभानि मुस्तके द्वे प्रकीर्त्तिते।"
"वीरावत्सनाभो वत्सनाभे पीतविन्मूत्रनेत्रता॥"
इति सुश्रुते कल्पस्थाने द्वितीयेऽध्याये॥)

वत्सपत्तन क्ली, (वत्सस्य वत्सराजस्य पत्तनम्।) भारतवर्षोत्तरे देशविशेषः। तत्पर्य्यायः। कौशाम्बी २। इति हेमचन्द्रः। ४। ४१॥

वत्सपाल पुं, (वत्सान् पालयतीति। वत्स+पालि+अण्) श्रीकृष्णः। बलदेवः। यथा —
"वृन्दावनं गोवर्द्धनं यमुनापुलिनानि च।
वीक्ष्यासीदुत्तमा प्रीती राममाधवयोर्नृप॥
एवं व्रजौकसां प्रीतिं यच्छन्तौ बालचेष्टितैः।
कलवाक्यैः स्वकालेन वत्सपालौ बभूवतुः॥"
इति श्रीभागवते। १० । ११। ३६॥
(वत्सपालके, त्रि। यथा हरिवंशे। ६७।२४।
"न तत्र वयसा तुल्यो वत्सपाले महायशः।
रेमे वै निवसन् कृष्णः पुरा स्वर्गगतो यथा॥")

वत्सर, पुं, (वसन्त्यस्मिन् अयनऋतुमासपक्षवारादय इति। वस निवासे+"वसेश्च।" उणा० ३। ७१। इति सरन्। "सः स्यार्द्धधातुके।" ७। ४। ४९। इति सस्य तः।) द्वादशमासात्मककालः। अयनद्वयात्मकः। तत्पर्य्यायः। संवत्सरः २ अब्दः ३ हायनः ४ शरत् ५ समा ६। इत्यमरः। १। ४। २०॥ शरदा ७ वर्षम् ८ वरिषम् ९ संवत् १०। इति शब्दरत्नावली॥
"शतवर्षविवाहे च वत्सरपरिकल्पनमाहुराचार्य्याः।
आधानपूर्व्वमेके प्रसूतिपूर्व्वं तदान्ये तु॥"
सौरसावनचान्द्रनाक्षत्रभेदेन चतुर्व्विधो वत्सरः। यथा चूडोपनयनादिषु सावनेन शुभाशुभगणनन्तु सौरेणेति सिद्धम्। सावनवत्सरस्य एकदिनाधिकवत्सरो नाक्षत्रो भवति तयोर्भेदः। सौरस्तु पञ्चषष्ट्यधिकत्रिशतदिनैर्भवति। यथा —
"मेषादीनामहश्चन्द्रे वत्सरे शशाङ्कचक्रकम्॥१०७॥
तुलादीनामदश्चपञ्चकन्तु लिखेत्तत॥"१०८॥
चान्द्रवत्सरोऽपि द्वादशमासैर्भवति। मलमासपाते तु त्रयोदशमासैर्भवति। तथा च श्रुतिः। द्वादशमासाः संवत्सरः क्वचित्त्रयोदशमासाः संवत्सर इति। त्रयोदशोऽधिमासः। स्मृतिः। यस्मिन्नब्दे द्वादशैकश्च यत्र इति। त्रयो मास इति। यथा मासाः समेके संवत्सर इति प्रकरणश्रुता यत्र समेके शब्दो मासपरम्पर-लोका। इति मलमासतत्त्वम्॥ अथ वर्त्तमानवत्सरगणना।

"शकेन्द्रकालः पृथगाकृति २२ घ्नः
शशाङ्कनन्दाश्वियुगैः ४२९१ समेतः।
शराद्रिवस्विन्दु १८७५ हृतः सलब्धः
षष्ट्यावशिष्टः प्रभवादयोऽब्दाः॥
षष्टवर्जेन्तु षष्ट्येव स्वये अपूर्णे खोर्मिभि ।६।
हृतनुतक्रमत खामिद्भुतेऽपि मासकाम्य॥"

अस्यार्थः। शकेन्द्रकालः शकराजाब्दकालः। पृथक् आकृतिः २२ द्वाविंशत्या पूरितः। शशाङ्कनन्दाश्वियुगैरेकनवत्यधिकशतद्वयाधिकचतुःसहस्रैः समेतोऽङ्कः। शराद्रिवस्विन्दुभिः पञ्चसप्तत्यधिकाष्टशताधिकैकसहस्रैः हृतः प्रकोष्ठि तावता हृत कार्य्यः। सलब्धः पूर्व्वप्रकाराद् शरेत्यादिना लब्धसंख्यया युतः कार्य्यः। षष्ट्यावशिष्टाः षष्ट्यादशेषोऽङ्कः पूर्व्ववत् षष्ट्याहृतलब्धत्यावशिष्टः प्रभवाद्य। एकावशेषे प्रभवः द्व्यादशेषे विभवादि। अथ अङ्कस्तु षष्ट्येव यत्रातिरिक्तः शराद्रिवस्विन्दुहृता अवशिष्टं तत्र सूर्य्यश्चाप्रभि अपूर्ण खोर्मिभि षष्ट्या हृते पुनक्रमेत इत्यनेन षष्ट्या हृतावशिष्टा अङ्का दत्ता षष्टिहृतशेषाङ्के रामि हृते त्रिभागा हृतेऽवशिष्टा अङ्का तथा मासाः स्युरिति। प्रभवादिवर्षाण्युपक्रम्य।

"आद्या तु विंशतिर्ब्राह्मी द्वितीया वैष्णवी
स्मृता।
तृतीया रुद्रदैवत्या श्रेष्ठा मध्याधमा भवन्॥"
भविष्यपुराणे।

भैरव उवाच।

"षष्ट्यब्दे कथयाम्यत्र क्रूरा सौम्याश्च ये प्रिये।
संवत्सरेषु तच्छ्रु प्रभवाद्ये वरानने॥
बहुतोयास्तथा मेघा बहुशस्या च मेदिनी।
बहुक्षीरास्तथा गावो व्याधिरोगविवर्ज्जिताः।
प्रशान्ताः पार्थिवाश्चैव प्रभवे परिकीर्त्तिताः॥१॥
सुभिक्षं क्षेममारोग्यं सर्व्वे व्याधिविवर्ज्जिताः।
प्रशान्ता मानवाश्चैव बहुशस्या वसुन्धरा।
हृष्टास्तुष्टा जनाः सर्व्वे विभवे च वरानने॥२॥
रोगा बहुविधाश्चैव मनुष्या वाजिकुञ्जराः।
सर्व्व एव प्रणश्यन्ति शुक्ले वर्षे वरानने॥३॥
उत्सवञ्च जगत् सर्व्वं धनधान्यसमाकुलम्।
निर्व्वृत्तञ्च प्रजावृद्धिः प्रमोदे जायते प्रिये॥४॥
नीरोगाश्च निराबाधा मानवा विगतज्वराः।
बहुक्षीरास्तथा गावः प्रजापत्ये वरानने॥५॥
निरातङ्कं जगत् सर्व्वं सर्व्वतो मङ्गलान्वितम्।
अङ्गिरसि प्रजाः सर्व्वा निःशोकाश्च वरानने॥६॥
सुभिक्षं क्षेममारोग्यं वर्षाकाले सुशोभनम्।
शस्यवृद्धिर्विजानीयात् श्रीमुखे सुरवन्दिते॥७॥
बहुक्षीरास्तथा गावो धान्यञ्च बलवत्तरम्।
जायन्ते सर्व्वशस्यानि भावे वर्षे वरानने॥८॥
महार्घं जायते सर्व्वं घृततैलरसादिकम्।
प्रजानाश्च भवेद्दृष्टिर्युवि वत्सरे शुभे॥९॥
निर्व्वान्ति सर्व्वशस्यानि मध्या धातरि कीर्त्तिता।
इक्षुगोरसधान्यानां प्रसवस्तु वरानने॥१०॥
सुभिक्षं क्षेममारोग्यं कार्पासस्य महार्घता।
लवणं मधु गव्यञ्च ईश्वरे दुर्लभं प्रिये॥११॥
सुभिक्षं क्षेममारोग्यं प्रशान्ताः पार्थिवाः प्रिये।
तस्करापहृतं वित्तं बहुधान्ये वरानने॥१२॥
राष्ट्रभङ्गञ्च दुर्भिक्षं तस्करैश्चोपपीडनम्।
जानीयाद्विग्रहं घोरं प्रमाथिनि वरानने॥१३॥
जायन्ते सर्व्वशस्यानि मेदिनी निरुपद्रवा।
लवणं मधु गव्यञ्च महार्घं विक्रमे प्रिये॥१४॥
कोद्रवाः शालिमुद्गाश्च शर्कमाषास्तथैव च।
महार्घं जायते सर्व्वं वृषे च सुरवन्दिते॥१५॥
चणकाः मुद्गमाषाश्च अन्यच्च विफलं प्रिये।
महार्घं जायते सर्व्वं चित्रभानौ वरानने॥१६॥
सुभिक्षं क्षेममारोग्यं निःस्वं निरुपद्रवम्।
अन्नसारो भवेत्तत्र स्वभानौ दृश्यते जनैः॥१७॥
च महर्घञ्च जायेत धान्यस्याथ प्रपीडनम्।
शस्यं भवति सामान्यं तारणे सुरवन्दिते॥१८॥
बहुशस्यानि जायन्ते सर्व्वदेशे सुलोचने।
चौराट्टङ्कश्च पार्थिवे नास्ति संशयः॥१९॥
दुर्भिक्षं जायते घोरं सर्व्वोपद्रवसंयुतम्।
अनावृष्टिः समाख्याता व्यये वत्सरे प्रिये॥२०॥
उद्गतो वर्षते मेघो जल नैवोपजायते।
महार्घं सर्व्वजित्यब्दे सर्व्वमेव वरानने॥२१॥
कोद्रवाः शालिमुद्गाश्च कङ्गुमाषास्तथैव च।
सुलभं जायते सस्यं जगति सर्व्वधारिणि॥२२॥
अनयविप्लवा लोका धान्यौषधिप्रपीडनम्।
जायते मानुषे कष्टं विरोधिनि न संशयः॥२३॥
सर्व्वाः प्रजाः प्रपीड्यन्ते व्याधिशोकश्च जायते।
विरोधोऽधिरोगाश्च पापाद्विकृते
जनाः॥२४॥
उपन्तं जगत् सर्व्वं तस्करैर्नृपविग्रहैः स्वरे।
पीडिताश्च प्रजाः सर्व्वा देशभङ्गः खरे
प्रिये॥२५॥
सुभिक्षं क्षेममारोग्यं शस्यं भवति शोभनम्।
बहुक्षीरास्तथा गावो नन्दने नन्दने प्रिये॥२६॥
अल्पतोयास्तथा मेघा वर्षन्ति खण्डमण्डले।
नश्यन्ति सर्व्वशस्यानि विजये नात्र संशयः॥२७॥
क्षत्रियाश्च तथा वैश्याः शूद्राश्च नरकर्म्मकाः।
पीडितास्ते वरारोहे जये सर्व्वे न संशयः॥२८॥
सरोगञ्च तथा देवि नाडज्वरसमन्वितम्।
अभिभूतं जगत् सर्व्वं मन्मथे सुरवन्दिते॥२९॥
सुखधान्यचयो देवि सर्व्वशस्यमहाधना।
यश्चाराश्च नश्यन्ति दुर्मुखे दुर्म्मदाः प्रजाः॥३०॥
पीड्यन्ते सर्व्वशस्यानि दंशे दंशे सुचिक्किते।
हेमलम्बे प्रजाः सर्व्वा चौयन्ते नात्र संशयः॥३१॥
तस्करैः पार्थिवैश्चैव अभिभूतमिदं जगत्।
अर्घो भवति सामान्यो विलम्बे तु महद्भयम्॥३२॥
विषमस्थं जगत् सर्व्वं विरोधे भयदर्शनम्।
विकारी सर्व्वतोऽपायो मम वाक्यन्तु
नान्यथा॥३३॥
शर्व्वरीति प्रमन्दो देवि सहिमपवन।
दुर्भिक्षं सर्व्वरोगार्त्तं शर्व्वरी विप्लवः॥३४॥

वनच्छाग पुं, (वनस्य छाग ।) आरण्यच्छाग । तत्पर्य्याय । एडक २ शिशुवाल ३ । इति त्रिकाण्डशेष ॥ (वने छाग इव ।) शूकर । इति शब्दमाला ॥

वनज, क्ली (वने जले जायते इति । जन्+ड ।) अम्बुजम् । इति मेदिनी । जे, २८ ॥ (यथा, रघु । ५ । ७३ ।
"दीर्घेष्वमी नियमिता पटमण्डपेषु
निद्रां विहाय वनजाक्ष ! वनायुदेश्या ।
वक्त्रोष्मणा मलिनयन्ति पुरोगतानि
लेह्यानि सैन्धवशिलाशकलानि वाहाः ॥"
जलजाते वनोद्भवे च त्रि । यथा, रामायणे । २ । ५४ । ७ ।
"दारूण्यपि परिच्छिन्नानि वनजैरुपजीविभिः ॥")

वनज, पुं (वने जले अरण्ये वा जायते इति । जन्+ड ।) मुस्तक । इति मेदिनी । जे, २८ ॥ गज । इति विश्व ॥ वनमूरण । इति राजनिघण्ट ॥ (तुम्बुरुधन्यम् । तत्पर्य्यायो यथा —
"तुम्बुरु सौरभ सौरो वनजः सानुजोऽन्धक ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वनजा, स्त्री, (वने जायते इति । जन्+ड । टाप ।) मुद्गपर्णी । इति मेदिनी । जे, २८ ॥ अरण्यकार्पासी । वन्योपोदकी । अश्वगन्धा । गन्धपत्रा । मिश्रेया । ऐन्द्रम् । इति राजनिघण्ट ॥

वनजीर, पुं (वनोद्भवो जीर ।) वनोद्भव जीरक । तत्पर्य्याय । वृहत्पाली २ सूक्ष्मपत्र ३ अरण्यजीर ४ कण ५ । अस्य गुणा । कटुत्वम् । शीतत्वम् । व्रणनाशित्वञ्च । इति राजनिघण्ट ॥

वनतिक्त, पुं (वनेषु वनोद्भवेषु तिक्त ।) हरीतकी । इति शब्दमाला ।

वनतिक्ता, स्त्री (वनेषु वनोद्भवेषु मध्ये तिक्ता ।) वनतिक्तिका । इति रत्नमाला ॥

वनतिक्तिका, स्त्री (वनतिक्ता+कन् । टापि अत इत्वम् ।) पाठा । इत्यमर । २ । ४ । ८४ ॥ (गुणादिकमस्याः पाठाशब्दे ज्ञेयम् ॥)

वनद पुं (वनं जलं ददातीति । दा+क ।) मेघ । इति शब्दमाला ॥ जलदातरि त्रि ॥

वनदमन, पु (वनजातो दमन ।) अरण्यदमन । इति राजनिर्घण्ट ॥

वनदीप, पुं, (वनस्य दीप इव ।) वनचम्पक । इति राजनिघण्ट ॥

वनधेनु, पुं (वनस्य धेनुरिव ।) गवयी । इति राजनिघण्ट ॥

वनपल्लव पुं (वनमिव निविड पल्लवो यस्य ।) शोभाञ्जनवृक्ष । इति जटाधर ॥ अरण्यपल्लवश्च ॥

वनपांशुल, पुं, (वने पांशुल पापिष्ठ ।) व्याध । इति शब्दरत्नावली ।

वनपिप्पली, स्त्री (वनोद्भवा पिप्पली ।) वनोद्भवपिप्पली । तत्पर्य्याय । सूक्ष्मपिप्पली २ क्षुद्रपिप्पली ३ वनकणा ४ । अस्या गुणा । कटुत्वम् । उष्णत्वम् । तीक्ष्णत्वम् । रूक्षत्वम् । दीपनत्वम् । सा आमा गुणाढ्या । शुष्का अल्पगुणा । इति राजनिघण्ट ॥

वनपुष्पा स्त्री, (वनमिव निविड पुष्पं यस्याः । टाप ।) शतपुष्पा । इति राजनिघण्ट ॥ (शतपुष्पाशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

वनपूरक, पु, (वनजात पूरको बीजपूरक ।) वनबीजपूरक । इति राजनिर्घण्ट ॥

वनप्रिय क्ली, (वनेषु वनजातेषु मध्ये प्रियम् ।) त्वचम् । इति राजनिघण्ट ॥

वनप्रिय पुं, (वन प्रियं यस्य ।) कोकिल । इत्यमर । २ । ५ । १८ ॥ (यथा —
"अयि वनप्रिय ! विघ्नत एव कि
मलिभुजो विपथो भवताधुना ।
मदनयैव कुहूरिति विद्यया
न पततश्चरणौ धरणौ तव ॥"
इत्युद्भट ॥)
अरण्यप्रियमात्रे, त्रि ॥

वनबीज, पुं, (वनस्य वनोद्भवो वा बीजो बीजपूरक ।) वनबीजपूरक । इति राजनिघण्ट ॥

वनबीजक, पुं, (वनबीज+स्वार्थे कन् ।) वनबीजपूरक । इति राजनिघण्ट ॥

वनबीजपूरक, पुं, (वनोद्भवो बीजपूरक ।) अरण्यजातबीजपूर । तत्पर्य्याय । वनज २ वनबीजक ३ वनबीज ४ अम्लका ५ गन्धाढ्या ६ वनोद्भवा ७ देवदूती ८ सीता ९ देवदासी १० देवेष्टा ११ मातुलुङ्गिका १२ मधुनी १३ मधुफला १४ । अस्य गुणा । अम्लत्वम् । कटुत्वम् । उष्णत्वम् । रुचिप्रदत्वम् । वातामदोषकृमिकफश्वासनाशित्वञ्च । इति राजनिघण्ट ॥

वनभद्रिका, स्त्री (वने भद्रं यस्याः । तत टापि अत इत्वम् ।) भद्रबला । इति केचित् ॥

वनभुक्, [ज्] पुं, (वन भुङ्क्ते इति । वन+भुज+क्विप ।) ऋषभौषधम् । इति शब्दचन्द्रिका ॥

वनमक्षिका, स्त्री, (वनस्य मक्षिका ।) दंश । इत्यमर । २ । ५ । २७ ॥

वनमल्ली स्त्री, (वनोद्भवा मल्ली ।) वनोद्भवमल्लिका । इति शब्दरत्नावली ॥

वनमाला स्त्री, (वनोद्भवपुष्परचिता माला । मध्यपदलोपिसमास ।) कृष्णस्य माला । तल्लक्षणं यथा,—
"आजानुलम्बिनी माला सर्व्वर्त्तुकुसुमोज्ज्वला ।
मध्ये स्थूलकदम्बाढ्या वनमालेति कीर्त्तिता ॥"
इति शब्दमाला ॥
(वनपुष्पस्रक् । यथा रघु । ९ । ५१ ।
"ग्रथितमौलिरसौ वनमालया
तरुपलाशसवर्णतनुच्छदः ॥")

वनमालिनी स्त्री, (वनमाली अस्त्यस्यामिति । इनि । ङीप ।) द्वारकापुरी । इति त्रिकाण्डशेष ॥ वाराही । इति राजनिर्घण्ट ॥

वनमाली, [न्] पुं (वनमाला अस्त्यस्येति । इनि ।) श्रीकृष्ण । इत्यमर । १ । १ । २१ ॥ (नारायण । यथा प्रद्युम्नविजये । ६ अङ्के ।
"कमलदामलया वनमालिन
स्त्रिदिवया गिरिशस्य निशा विधुम् ।
सुचिरमा परियोजयती विधे
श्चतुरता सुहृदूपमागमे ॥")

वनमुक् [च्] पुं, (वन जलं मुञ्चतीति । मुच+क्विप ।) मेघ । इति शब्दरत्नावली ॥ (जलवर्षिणि, त्रि । इति रघु । ९ । २२ ॥)

वनमुद्ग पुं, (वनोद्भवो मुद्ग ।) मुकुष्टक । इत्यमर । २ । ९ । १७ ॥ तत्पर्य्याय । वरक २ निगूढक ३ कुलीनक ४ खर्ज्जी ५ । इति हेमचन्द्र । ४ । २३९ ॥ अस्य अन्यपर्य्यायगुणौ मुकुष्टमकुष्टकशब्दयोर्द्रष्टव्यौ ॥ (यथा, सुश्रुते । १ । ४६ ।
"वनमुद्गकलायमकुष्टमसूरमङ्गल्यहरेणुशतीन
निष्पावकहरेणुकाढकीप्रभृतयो वैदला ॥")

वनमुद्गा, स्त्री (वनमुद्ग+टाप ।) मुद्गपर्णी । इति राजनिर्घण्ट ॥

वनमूत, पुं, मेघ । वन जल मूतं बद्धं अनेन वन सूयते इति वा भरतोक्ति । इत्यमरटीकायां भरतधृतरायमुकुटशब्दप्रत्युदाहरणात् ॥

वनमूर्द्धजा स्त्री, (वनस्य मूर्द्धि जायते इति । जन्+ड ।) वनबीजपूरक । इति राजनिघण्ट ॥

वनमोचा, स्त्री, (वनोद्भवा मोचा ।) काष्ठकदली । इति राजनिघण्ट ॥

वनर, पुं, (वानर । पृषोदरादित्वात् साधु ।) वानर । इति भरतद्विरूपकोष ॥

वनराज, पुं (वनस्य वने वा राजा । "राजाहःसखिभ्यष्टच्" ५ । ४ । ९१ । इति टच् ।) सिंह । इति शब्दमाला ॥ वनस्य राजा च ॥

वनलक्ष्मी, स्त्री, (वनस्य लक्ष्मी शोभा ।) कदली । इति राजनिर्घण्ट ॥

वनवर्व्वर, पुं, (वनोद्भवो वर्व्वर ।) कृष्णार्जक । इति राजनिघण्ट ॥

वनवर्व्वरिका, स्त्री, (वनजाता वर्व्वरिका ।) अरण्यवर्व्वरी । वनवाबुइ इति भाषा । तत्पर्य्याय । सुगन्धि २ सुगन्धक ३ रोमशाखी ४ विषघ्न ५ सुरस ६ कुष्ठपत्रक ७ विशालु ८ शोफहारी ९ सुवक १० । अस्या गुणा । उष्णत्वम् । सुगन्धित्वम् । पित्ताग्नि प्रवर्द्धनत्वम् । श्वासकफापहत्वञ्च । इति राजनिघण्ट ॥

वनवल्लरी, स्त्री (वनोद्भवा वल्लरी ।) निःश्रेणिका तृणम् । इति राजनिघण्ट ॥

वनवह्नि पुं (वनस्य वनोद्भवो वा वह्नि ।) दावानल । इति हेमचन्द्र । ४ । १६७ ॥ (यथा, कथासरित्सागरे । ५६ । १८९ ।
"ज्वालाजालप्रभाजालजटिल वनवह्निना ।
प्रदीप्तमिव तैर्व्याप्तैस्तिमिरस्तोम महति ॥")

वनवासन, पुं (वनं वासयति सर्व्वेति । वासि+ल्यु ।) गन्धमार्जार । इति त्रिकाण्डशेष ॥

वनवासी, [न्] पुं, (वनं वासयति सुरभीकरोतीति । वासि + णिनि ।) ऋषभनामौषधम् । मुष्ककवृक्षः । वाराहीकन्दः । शाल्मलीकन्दः । नीलमहिषकन्दः । इति राजनिर्घण्टः ॥ (वने वसतीति । वस + णिनि ।) वनवासकर्त्तरि, त्रि ॥ (यथा, मनुः । ६ । २७ ।
"तापसेष्वेव विप्रेषु यात्रिकं भैक्षमाहरेत् ।
गृहमेधिषु चान्येषु द्विजेषु वनवासिषु ॥")

वनवृन्ताकी, स्त्री, (वनस्य वृन्ताकी वार्त्ताकी ।) बृहती । इति राजनिर्घण्टः ॥

वनव्रीहि, पुं, (वनस्य व्रीहिः ।) नीवारः । इति हेमचन्द्रः । ४ । २४२ ॥

वनशूकरी, स्त्री (वनस्य शूकरीव रोमयुक्तत्वात् सा तथात्वाच्च ।) कपिकच्छुः । इति राजनिर्घण्टः ॥ (वनस्य शूकरी ।) आरण्यवराही च ॥

वनशूरण, पुं, (वनजातः शूरणः ।) वनोद्भवोलः । बन ओल इति भाषा । तत्पर्य्यायः । विषशूरणः २ वन्यः ३ वनकन्दः ४ अरण्यशूरणः ५ वनजः ६ श्वेतशूरणः ७ वनकन्दलः ८ । अस्य गुणाः । रुच्यत्वम् । कटुत्वम् । उष्णत्वम् । क्रिमिगुल्मशूलाग्निदोषसमीरोपशमनाधिकत्वञ्च । इति राजनिर्घण्टः ॥

वनशृङ्गाट, पुं, (वनस्य शृङ्गाट इव कण्टकावृतत्वात् ।) गोक्षुरकः । इत्यमरः । २ । ४ । ९९ ॥ (अस्य पर्य्यायो यथा —
'गोक्षुरः क्षुरकोऽपि स्यात् त्रिकण्टः स्वादुकण्टकः ।
गोकण्टको गोक्षुरको वनशृङ्गाट इत्यपि ॥
पलङ्कषा श्वदंष्ट्रा च तथा स्यादिक्षुगन्धिका ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वनशृङ्गाटक, पुं, (वनशृङ्गाट + स्वार्थे कन् ।) गोक्षुरकः । इति राजनिर्घण्टः ॥

वनशोभन, क्ली, (वनं जलं शोभयतीति । शुभ + णिच् + ल्युः ।) पद्मम् । इति शब्दचन्द्रिका ॥ वनस्य शोभाकारके, त्रि ॥

वनश्वा, [न्] पुं, (वनस्य वने वा श्वा कुक्कुरः ।) गन्धमार्ज्जारः । वृकः । व्याघ्रः । इति मेदिनी । ने, २७ ॥

वनसङ्कट, पुं, (वने सङ्कटो बाहुल्यं यस्य ।) मसूरः । इति शब्दचन्द्रिका ॥

वनसमूह, पुं, (वनानां समूहः ।) अरण्यसंहतिः । तत्पर्य्यायः । वन्या २ । इत्यमरः । २ । ४ । ४ ॥ वान्या ३ । इति शब्दरत्नावली ॥ जलसमूहश्च ॥

वनसरोजिनी, स्त्री, (वनस्य सरोजिनी पद्मिनीव शोभाकरत्वात् ।) वनकार्पासी । इति शब्दरत्नावली ॥

वनस्थ, पुं, (वने तिष्ठतीति । स्था + कः ।) मृगः । इति शब्दचन्द्रिका ॥ (वानप्रस्थः । यथा, मनुः । ५ । १३७ ।
"एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम् ।
त्रिगुणं स्याद्वनस्थानां यतीनान्तु चतुर्गुणम् ॥")
वनस्थायिनि, त्रि ॥ (यथा, हरिवंशे । १५२ । २९ ।
"प्रवृत्तचक्रो नृपतिर्वनस्थान्
गजान् गजे स्थैरिव वीर्य्यवीरान् ॥")

वनस्था, स्त्री, (वने तिष्ठति या । स्था + कः । टाप् ।) अश्वत्थीवृक्षः । इति राजनिर्घण्टः ॥

वनस्पति, पुं, (वनस्य पतिः । पारस्करादित्वात् सुट् ।) विना पुष्पं फलिद्रुमः । (यथा, मनुः । १ । ४७ ।
"अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः ॥")
वृक्षमात्रम् । इति मेदिनी । ते, २१६ ॥ (यथा, महाभारते । १ । १३१ । १६ ।
"कथं नु शाखाभिस्तैश्छिन्नमूलो वनस्पतिः ॥")
श्योनाकवृक्षः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
"नन्दीवृक्षोऽश्वत्थभेदः प्ररोही गजपादपः ।
स्थालीवृक्षः क्षयतरुः क्षीरी च स्याद्वनस्पतिः ॥"
इति भावप्रकाशे । १ । १ ॥
घृतपृष्ठस्य पुत्रविशेषः । यथा भागवते । ५ । २० । २१ ॥ "आमो मधुरुहो मेघपृष्ठः सुधामा भ्राजिष्ठो लोहितार्णो वनस्पतिरिति घृतपृष्ठसुताः ॥" वटवृक्षः । तत्पर्य्यायो यथा —
"वटो रक्तफलः शृङ्गी न्यग्रोधः स्कन्धजो ध्रुवः ।
क्षीरी वैश्रवणावासो बहुपादो वनस्पतिः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वनहरिद्रा, स्त्री (वनोद्भवा हरिद्रा ।) अरण्यहरिद्रा । तत्पर्य्यायः । शोली २ शोलिका ३ वनार्द्रा ४ । अस्या गुणाः । कटुत्वम् । गौल्यत्वम् । रुच्यत्वम् । तिक्तत्वम् । दीपनत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"अरण्यहलदीकन्दः कुष्ठवातास्रनाशनः ॥"
इति भावप्रकाशः ॥

वनहासः, पुं, (वनस्य हास इव प्रकाशकत्वात् ।) काशतृणम् । इति त्रिकाण्डशेषः ॥ कुन्दवृक्षः । इति राजनिर्घण्टः ॥

वनहासकः, पुं, (वनहास + स्वार्थे कन् ।) काशतृणम् । इति शब्दरत्नावली ॥

वनाखुः, पुं, (वनस्याखुः ।) शशकः । इति त्रिकाण्डशेषः ॥

वनाखुकः, पुं, मुद्गः । इति त्रिकाण्डशेषः ॥

वनाग्नि, पुं, (वनस्य अग्निः ।) वनवह्निः । तत्पर्य्यायः । दवः २ दावः ३ वनहुताशः ४ । इति हेमचन्द्रः । ४ । १६४ ॥

वनाटुः, पुं, वर्मेशः । नीलमक्षिका । इति शब्दचन्द्रिका ॥

वनामलः, पुं (वनस्य आमल आमलक इव ।) लघुपाकफलः । इति शब्दमाला ॥

वनाम्रः, पुं, (वनस्य आम्र इव ।) कोशाम्रः । इति राजनिर्घण्टः ॥ (गुणादिविशेषोऽस्य कोशाम्रशब्दे ज्ञेयः ॥)

वनायुः, पुं, देशविशेषः । यथा —
"यथा यथश्च वानायुवनायुजपद्धतानाम् ॥"
इति शब्दरत्नावली ॥
(यथा, महाभारते । ८ । ७ । ११ ।
"आजानेयैः सैन्धवैः पार्व्वतीयै-
र्नदीजकाम्बोजवनायुबाह्लिकैः ॥"
दानवविशेषः । यथा, महाभारते । १ । ६५ । ३ ।
"गरिष्ठश्च वनायुश्च दीर्घजिह्वश्च दानवः ॥")

वनायुजः, पुं (वनायौ देशे जायते इति । जन + डः ।) वनायुदेशोद्भवघोटकः । अस्य रूपान्तरं वानायुजः । इति शब्दरत्नावली ॥

वनारिष्टा, स्त्री, (वनजाता अरिष्टेव ।) वनहरिद्रा । इति राजनिर्घण्टः ॥

वनार्च्चकः, पुं, (वनस्य अर्च्चक इव । नियतपुष्पचयनात् तथात्वम् ।) पुष्पजीवी । मालाकारः । इति जटाधरः ॥

वनार्द्रका, स्त्री, (वनोद्भवा आर्द्रका ।) वनभवार्द्रकम् । इति राजनिर्घण्टः ॥ अस्याः पर्य्यायगुणौ ऐन्द्रशब्दे द्रष्टव्यौ ॥

वनालिका, स्त्री (वनं अलति भूषयतीति । अल + ण्वुल् । टापि अत इत्वम् ।) हस्तिशुण्डी । यथा,—
"वज्रवल्ल्यस्थिसंहारी हस्तिशुण्डी वनालिका ।"
इति हारावली । ८५ ॥

वनाश्रय, पुं, (वनमेव आश्रयो यस्य ।) द्रोणकाकः । इति जटाधरः ॥ (अरण्यवासिनि, त्रि । यथा, मार्कण्डेये । १९ । ४३ ।
"सौहित्यमक्षितो लोकस्य भूप ! वना-
श्रये ॥")

वनाहिर, पुं (वनस्य आहिरः ।) शूकरः । इति त्रिकाण्डशेषः ॥

वनि, पुं, अग्निः । खनि कषि अजि असि वसि वनि ध्वनि ग्रन्थि चरिभ्यश्च । इत्यनेन वन धातोः पूर्ण्णाशुद्धस्य इप्रत्ययेन निष्पन्नः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः । ४ । १३९ ॥

वनित, त्रि, (वन + क्तः ।) याचितः । सेवितः । इति मेदिनी । ते, १०८ ॥

वनिता, स्त्री, (वन + क्तः । टाप् ।) जातरागस्त्री । स्त्रीसामान्यम् । इति मेदिनी । ते, १०८ ॥ (यथा, रघुः । २ । १९ ।
"वशिष्ठधेनोरनुयायिनं त-
मावर्त्तमानं वनिता वनान्तात् ।
पपौ निमेषालसपक्ष्मपङ्क्ति-
रुपोषिताभ्यामिव लोचनाभ्याम् ॥")

वनी, स्त्री वनम् । इत्यमरटीकायां भरतः ॥ (यथा, साहित्यदर्पणे । २ ।
"केलीवनीयमपि वञ्जुलकुञ्जमध्ये ॥")

वनी, [न्] पुं (वनं आश्रयत्वेनास्त्यस्येति । वन + इनिः ।) वानप्रस्थः । यथा,—
"गृहमेधी ब्रह्मचारी क्षत्रियवार्ध्यो यत्र वनी वसति श्यामाकैरपचन्तोऽन्ये पुरा तर्प्पिताः ।" इत्याह्निकतत्त्वे हारीतः ॥

वनीक, त्रि, याचकः । इत्यमरटीकासारसुन्दरी ॥

वनीपक, त्रि, (वनिं याचनमिच्छतीति । क्यच् । ततो ण्वुल् ।) याचकः । इत्यमरः । ३ । १ । ४८ ॥

वनेसृग्गा, स्त्री (वने सृगा । अलुक्समासः ।) करञ्जः । इति रत्नमाला ।

वनेचर, त्रि (वने चरतीति । चर+"चरेष्टः ।" इति टः । तत्पुरुषे कृतीत्यलुक् ।) अरण्यचारी । यथा,—

"वनेचराणां वनितासखानां
दरीगृहोत्सङ्गनिषक्तभासः ।
भवन्ति यत्रौषधयो रजन्या-
मतैलपूराः सुरतप्रदीपाः ॥'
इति कुमारसम्भवे १ सर्गः ॥

वनेज्य, पुं, (वने इज्यः पूज्यः ।) चक्रदालः । इति राजनिर्घण्टः ॥

वनेसर्ज्जः, पुं (वने सर्ज्ज इव ।) असनवृक्षः । इति रत्नमाला ॥

वनोद्भवा, स्त्री, (वने उद्भवो यस्याः ।) वनकार्पासी । इति रत्नमाला ॥

वनौकाः, [स्] पुं (वनमेव ओको गृहं यस्य ।) वानरः । इत्यमरः । २ । ५ । ३ ॥ (वनवासिनि त्रि । यथा, भागवते । ४ । ८ । २१ ।
'धर्म्मोऽग्निः कश्यपः शुक्रो मुनयो ये वनौकसः ।
चरन्ति दक्षिणीकृत्य भ्रमन्तो यत् सतारकाः ॥")

वन्दाका, स्त्री, वन्दा । यथा,—
"वन्दाका शेखरी शेखा वन्दा च वन्दकेऽप्यतः ॥"
इति भरतधृतरुद्रः ॥

वन्दथ, पुं (वन्दते स्तौति वन्द्यते स्तूयते इति वा । वन्द + "शीङ्शपिरुगमिवञ्चिजीविप्राणिभ्योऽथः ।" इत्यथ वञ्चीत्यस्य स्थाने वन्दीति पाठोऽपि बहुसम्मत इत्यतोऽयं ।) स्तोता । स्तुत्यः । वन्दिधातोरथप्रत्ययेन निष्पन्नः । इति सिद्धान्तकौमुदी ॥

वन्दन, क्ली, (वन्द्यतेऽनेनेति । वन्द+करणे ल्युट् ।) वन्दनम् । इति शब्दचन्द्रिका ॥ (वन्द+भावे ल्युट् ।) प्रणामः । स तु षोडशधाभक्त्यन्तर्गतभक्तिविशेषः । यथा । पाद्मोत्तरखण्डे शिवपार्व्वतीसंवादे ।
'आद्यं तु वैष्णवं प्रोक्तं शङ्खचक्राङ्कनं हरेः ।
धारणञ्चोर्द्ध्वपुण्ड्राणां तन्मन्त्राणां परिग्रहः ॥
अर्च्चनञ्च जपो ध्यानं तन्नामस्मरणं तथा ।
कीर्त्तनं श्रवणञ्चैव वन्दनं पादसेवनम् ॥
तत्पादोदकसेवा च तन्निवेदितभोजनम् ।
तदीयानाञ्च सेवा च द्वादशीव्रतनिष्ठता ॥
तुलसीरोपणं विष्णोर्देवदेवस्य शार्ङ्गिणः ।
भक्तिः षोडशधा प्रोक्ता भवबन्धविमुक्तये ॥"
इति हरिभक्तिविलासे ११ विलासः ॥
षोडशोपचारपूजान्तर्गतशेषोपचारः । यथा,—
"आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम् ।
मधुपर्काचमनस्नानवसनाभरणानि च ।
गन्धपुष्पे धूपदीपौ नैवेद्यं वन्दनं तथा ॥"
इत्याह्निकतत्त्वे आचारचिन्तामणिः ॥●॥
अथ वन्दनम् ।
"प्रणमेद्यथाङ्गं समुदाय प्रदर्शयेत् ।
पतेत् पतितप्रणामश्च प्रसीद भगवन्निति ॥"
तदुक्तमेकादशे श्रीभागवते ।
"स्तवैरुच्चावचैः स्तोत्रैः पौराणैः प्राकृतैरपि ।
स्तुत्वा प्रसीद भगवन्निति वन्देत दण्डवत् ॥"
अथ प्रणामविधिः । कालिकापुराणे ।
"स स्वयं गद्यपद्याभ्यां पाणिभ्यां नमस्कृतिम् ।
शिरो मध्यादयो कृत्वा बाहुभ्याञ्च परस्परम् ।
प्रपत मादि मात्रेव भीत दुःखमहार्णवात् ॥"
क्रियागमे ।
"दोर्भ्यां पद्भ्याञ्च जानुभ्यामुरसा शिरसा दृशा ।
मनसा वचसा चेति प्रणामोऽष्टाङ्ग ईरितः ॥
जानुभ्याञ्चैव बाहुभ्यां शिरसा वचसा धिया ।
पञ्चाङ्गकः प्रणामः स्यात् पूजासु प्रवराविमौ ॥"
इति ॥
"गरुडं दक्षिणे कृत्वा कुर्य्यात्तत्पृष्ठतो बुधः ।
अवश्यञ्च प्रणामांस्त्रीन् शक्तश्चेदधिकाधिकान् ॥'
तथा च नारदपञ्चरात्रे ।
"अग्निं पीठं हरिं पात्रं गुरून् गुरुतमेव च ।
त्रिचतुर्व्विंशदथवा चतुर्व्विंशत्यष्टकम् ।
नमेच्छतमथवा तत्र धन्वया नमेत् ॥"
विष्णुधर्म्मोत्तरे ।
"दृष्ट्वार्च्चादग्रमादेव प्रणमेत् पुरुषोत्तमम् ।
स्थानापेक्षा न कर्त्तव्या दृष्ट्वा द्विजसत्तमाः ।
देवार्च्चाकृतपूजा हि शुचि सर्व्वं प्रकीर्त्तितम् ॥"
अथ नमस्कारमाहात्म्यम् । नारसिंहे ।
"नमस्कारः स्मृतो यज्ञः सर्व्वयज्ञेषु चोत्तमः ।
नमस्कारेण चैकेन नरः पूतो हरिं व्रजेत् ॥"
स्कान्दे ।
"दण्डप्रणामं कुरुते विष्णवे भक्तिभावितः ।
रेणुसंख्यं वसेत् स्वर्गं मन्वन्तरसहस्रकम् ॥"
तत्रैव श्रीब्रह्मनारदसंवादे ।
"प्रणम्य दण्डवद्भूमौ नमस्कारेण योऽर्च्चयेत् ।
स यां गतिमवाप्नोति न तां क्रतुशतैरपि ॥
नमस्कारेण चैकेन नरः पूतो हरिं व्रजेत् ॥"
तत्रैव शिवोमासंवादे ।
"भूमिमापीड्य जानुभ्यां शिर आरोप्य वै भुवि ।
प्रणमेद् यो हि देवेशं सोऽश्वमेधफलं लभेत् ॥"
तत्रैवान्यत्र ।
"तीर्थकोटिसहस्राणि तीर्थकोटिशतानि च ।
नारायणप्रणामस्य कलां नार्हन्ति षोडशीम् ॥
शाठ्येनापि नमस्कारं कुर्व्वतः शार्ङ्गधन्विने ।
शतजन्मार्ज्जितं पापं तत्क्षणादेव नश्यति ॥
रेणुगुण्ठितगात्रस्य कणा देहे भवन्ति ये ।
तावद्वर्षसहस्राणि विष्णुलोके महीयते ॥"
विष्णुधर्म्मोत्तरे ।
"अभिवाद्य जगन्नाथं कृतार्थश्च तथा भवेत् ।
नमस्कारक्रिया तस्य सर्व्वपापप्रणाशिनी ॥
जानुभ्याञ्चैव पाणिभ्यां शिरसा च विचक्षणः ।
कृत्वा प्रणामं देवस्य सर्व्वान् कामानवाप्नुयात् ॥"
ब्रह्मपुराणे ।
"अनादिनिधनं देवं दैत्यदानवदारणम् ।
ये नमन्ति नरा नित्यं नहि पश्यन्ति ते यमम् ॥
ये जना जगतां नाथं नित्यं नारायणं द्विजाः ।
नमन्ति नहि ते विष्णोः स्थानादन्यत्र गामिनः ॥"
नारदीये ।
"एकोऽपि कृष्णस्य कृतः प्रणामो
दशाश्वमेधावभृथेन तुल्यः ।
दशाश्वमेधी पुनरेति जन्म
कृष्णप्रणामी न पुनर्भवाय ॥"
भक्तिसुधोदये ।
"विष्णोर्देवप्रणामार्थं भक्तेन पतता भुवि ।
पातितं पातकं तत्र नोत्तिष्ठति पुनः सह ॥
अपि पापं दुराचारं नरं त्वत्प्रणतं हरे ।
नेक्षन्ते किङ्करा याम्या उलूकास्तपनं यथा ॥"
श्रीविष्णुपुराणे । श्रीयमस्य निजभटानुशासने ।
"हरिममरगणार्च्चिताङ्घ्रिपद्मं
प्रणमति यः परमार्थतो हि मर्त्त्यः ।
तमपगतसमस्तपापबन्धं
व्रज परिहृत्य यथाग्निमाज्यसिक्तम् ॥"
ब्रह्मवैवर्त्ते ।
"शरणागतरक्षणोद्यतं
हरिमीशं प्रणमन्ति ये नराः ।
न पतन्ति भवाम्बुधौ स्फुटं
पतितानुद्धरते न तापसौ ॥"
अष्टमस्कन्धे च बलिवाक्ये ।
"अहो प्रणामाय कृतः समुद्यमः
प्रपन्नभक्तार्थविधौ समाहितः ।
यल्लोकपालैस्त्वदनुग्रहोऽमरै-
रलब्धपूर्व्वोऽपसदेऽसुरेऽर्पितः ॥"
अतएव नारायणव्यूहस्तवे ।
"अहो भाग्यमहो भाग्यमहो भाग्यं नृणामिदम् ।
येषां हरिपदाब्जाग्रे शिरो न्यस्तं यथा तथा ॥"
किञ्च नारसिंहे श्रीयमोक्तौ ।
"तस्य वै नारसिंहस्य विष्णोरमिततेजसः ।
प्रणामं ये प्रकुर्व्वन्ति तेषामपि नमो नमः ॥"
भविष्योत्तरे च जलधेनुप्रसङ्गे ।
"विष्णोर्व्विश्वगदाद्युग्रजनाद्दवकशम्पते ।
प्रणामं ये प्रकुर्व्वन्ति तेषामपि नमो नमः ॥"
इत्यादि ॥●॥
अथ प्रणामनिषेधः । हृन्नारदीये तु रुको पाख्यानारम्भे ।
"एकहस्ते न नमेद्यस्तु विष्णवे शक्तिकाधिके ।
शीयेत विनाशीयात् कदाचिदपि नावधेत् ॥"
किञ्च माद्ये । वैशाखमाहात्म्ये यमनारदसंवादे ।
"प्रज्ञको भगवद्द्वारं कामरूप्यपरिच्छदम् ।
आनत्वा तपनामादि यान्ति ते नरकौकसः ॥"
अथ नमस्कारनिषिद्धानि । विष्णुस्मृतौ ।
"जन्मप्रभृति यत्किञ्चित् पुमान् वै धर्म्ममाचरेत् ।
सर्व्वं तन्निष्फलं याति एकहस्ताभिवादनात् ॥"
वाराहे ।
"वस्त्रप्रावृतदेहस्तु यो नरः प्रणमेत माम् ।
श्वित्री स जायते मूर्ख सप्तजन्मानि भामिनि ॥"

क्रियाद्यन्त।
"अपि दृष्टे वामभागे समीपे गर्भमन्दिरे।
जपहोमनमस्कारान् न कुर्यात् कमलालये॥"
अपि च।
"दण्डभूमौ निपतितो न शक्तः प्रणमेद्धरिम्।
उत्थायोत्थाय कर्त्तव्यं दण्डवत् प्रणिपातनम्॥
तत्र प्रदक्षिणां कुर्यात् भक्त्या भगवतो हरेः।
नामानि कीर्त्तयन् भक्त्या तस्य साष्टाङ्गवन्द
नाम्॥"
इति हरिभक्तिविलासे ८ विलासः॥
अन्यत् नमस्कारशब्दे प्रणामशब्दे च द्रष्टव्यम्। (विषविशेषः। यथा, ऋग्वेदे। ७।५१।२।
"यद्विजामन् परुषि वन्दनं भुवत्॥"
असुरः। रक्षोविशेषः। इति ऋग्भाष्ये सायनः। ७।२१।५।)

वन्दनमाला, स्त्री, (वन्दनाया माला यत्र सा।) तोरणम्। इति हलायुधः। २। १४६॥ (वन्दनाया माला इति कर्म्मधारये।) रम्भास्तम्भचतुष्टयैर्दिश्याम्रपल्लवरचितमाला। यथा,
"कुर्य्याद्वन्दनमालां यो रम्भास्तम्भैः शुभोद्भवैः।
चतुष्कोणे पवित्रागारे चक्रपाणिनः॥
युगानि पञ्चलक्षाणि स्वर्गे तस्योत्सवो भवेत्।
पूज्यते वासवाद्यैश्च क्रीडते चाप्सरोगणैः॥"
इति हरिभक्तिविलासे १३ विलासः॥

वन्दनमालिका स्त्री, (वन्दनमाला + स्वार्थे कन्।) वहिर्द्वारोपरि शुभदा माला। यथा,—
"तोरणोर्द्ध्वे तु मङ्गल्य दामवन्दनमालिका॥"
इति हेमचन्द्रः। ४।७४॥

वन्दना स्त्री, (वन्द + "घट्टिवन्दिविदिभ्यश्चेति वाच्यम्।" ३। ३। १०७। इत्यस्य वार्त्तिकोक्त्या युच्। टाप्।) स्तुतिः। तत्पर्य्यायः। समीची २। इति त्रिकाण्डशेषः। होमभस्मना तिलकम्। यथा —
'ऐशान्यामाहरेद्भस्म शुचौ वाथ शुचेश्च वा।
वन्दनां कारयेत्तेन शिरःकण्ठांसकेषु च।
कक्षप्रत्येतिमन्त्रेण यथानुक्रमयोगतः॥"
इति तिथ्यादितत्त्वे वशिष्ठवचनम्॥

वन्दनी स्त्री, (वन्द + ल्युट्। ङीप्।) नतिः। जीवातुः। घटी। याचनकर्म्म। इति मेदिनी। ने ९७। क्वचित् पुस्तके घटीस्थाने कटी याचनकर्म्मस्थाने मोचनकर्म्म इति च पाठः। तत्र तु पवर्गीयवकारादौ लिखितोऽयं शब्दः। किन्तु वदि क शुभाभिवादयोरित्यस्मात् अन्तस्थवघटितत्वात् अन्तःस्थवकारादौ लिखितः॥

वन्दनीय, त्रि, (वदि + अनीयर्।) स्तवनीयः। वन्द्यः। वन्दितव्यः। वदधातोरनीयप्रत्ययेन निष्पन्नः॥ (यथा, महाभारते। ७।८।१।
"तत शुक्लाभ्रमाभात आतुभ्यो भूमये क्षितः।
शिरसा वन्दनीयं तमभिवन्द्य कृताञ्जलिम्॥")

वन्दनीय, पुं, (वन्द्यते निषकार्थं क्रूयते इति। वदि + अनीयर्।) पीतभृङ्गराजः। इति राजनिर्घण्टः॥

वन्दनीया, स्त्री (वदि + कर्म्मणि अनीयर्। टाप्।) गोरोचना। इति त्रिकाण्डशेषः॥ (विवृतिरस्या गोरोचनाशब्दे विज्ञेया॥)

वन्दा, स्त्री, (वन्दते आश्रयत्वमिति। वदि + अच्। टाप्।) वृक्षोपरिस्थः। बाँदु इति परगाछा। इति च भाषा। तत्पर्य्यायः। वृक्षादनी २ वृक्षरुहा ३ जीवन्तिका ४। इत्यमरः॥ वन्दाका ५ शेखरी ६ सेया ७ वन्दका ८। इति भरतधृतचन्द्रः॥ वन्दकः ९ नीलवल्ली १० इति रत्नमाला॥ वन्दाकी ११ पद्मचारिका १२ इति शब्दरत्नावली॥ वृक्षिणी १३ पुष्पिणी १४ वन्द्या १५ परपुष्टा १६ पराश्रया १७। इति शब्दचन्द्रिका॥ कन्याविशेषः। भिक्षुकी। इति मेदिनी। दे १॥ अस्या गुणाः वन्दाकशब्दे द्रष्टव्याः॥

वन्दाक, पुं वृक्षोपरिस्थः। बाँदा इति हिन्दी भाषा। तत्पर्य्यायः। पादपरुहा २ शिखरी ३ तरुरोहिणी ४ वृक्षादनी ५ वृक्षरुहा ६ कामवृक्ष ७ शेखरी ८ कामरूपा ९ तरुरुहा १० तरुस्था ११ गन्धमादनी १२ कामिनी १३ तरुभुक् १४ श्यामा १५ उपनी १६। अस्य गुणाः। तिक्तत्वम्। शिशिरत्वम्। कफपित्तश्रमापहत्वम्। वश्याभिचारिकत्वम्। रक्ततम्। कषायत्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"वन्दाकः स्याद्धिमस्तिक्तः कषायो मधुरो रसे।
मङ्गल्यः कफवाताश्रक्षोव्रणविषापहः॥'
इति भावप्रकाशः॥

वन्दाका, स्त्री वन्दा। इति भरतधृतचन्द्रः॥

वन्दाकी, स्त्री वन्दा। इति शब्दरत्नावली॥

वन्दारु, त्रि, (वन्दते स्तौति अभिवादयतीति। वन्द + "शृवन्द्योरारुः।" ३। २। १७३। इति आरु।) वन्दनशीलः। तत्पर्य्यायः। अभिवादकः २। इत्यमरः। ३।१।२८॥ अभिवादयिता ३। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे। १।१४०।२।
"पीपति वो अतसो वन्दारुः सद्य
वन्दे धने॥"
स्तोत्रे, क्ली। इति ऋग्वेदभाष्ये सायनः। ४। ४२।११)

व(ब)न्दि स्त्री, (वन्दते स्तौति इत्यादिकं यस्तु न च यमिति। वदि + "सर्व्वधातुभ्य इन्।" उणा० ४।११७। इति इन्।) प्रग्रहमनुष्यगृहादि। कयेदी इति भाषा। तत्पर्य्यायः। प्रग्रहः २ उपग्रहः ३ बन्दी ४। इत्यमरभरतौ॥ बन्दिका ५। इति शब्दरत्नावली॥ सोमावेद। रघुवादिकोष॥ (स्तवः। यथा, भागवते। ६। १। २९।
"वन्दन्ते वैतवेयोर्ज्जितस्ते च समागताः॥"
पुं, स्तुतिपाठकः। यथा, हरिवंशे। २१२। ५।
"सूतमागधवन्दीनामेकैकस्य सहस्रकम्॥")

व(ब)न्दिग्राह, पुं (वन्दिमि गृहस्य ग्रहणमिति। ग्रह + अण्।) अनुरोधप्रवेशतागारभञ्जकः। (डाकाइत इति भाषा॥) यथा —
"बन्दिग्राहांस्तथा वाजिकुञ्जराणाञ्च हारिणः।
प्रसह्यघातिनश्चैव शूलमारोपयेन्नरान्॥
बन्दिग्राहानीन् बलात्कम्मेन घातकांश्च नरान्
शूलानारोपयेत्। अयञ्च वधप्रकारविशेषः
पदेश॥
"सभागारायुधागारदेवतागारभेदकान्।
हस्त्यश्वरथहर्त्तॄंश्च हन्यादेवाविचारयन्॥
इति मनुस्मरणात्। इति मिताक्षरायां व्यवहारकाण्डे दण्डप्रकरणम्॥

व(ब)न्दिचौर, पुं (बन्दिमिव विधाय चौरः अत्र हारकः। एतस्य बन्दिमिव कृत्वा समानदया ग्रामप्रहारकत्वादस्य तथात्वम्।) बन्दिग्राहः। तत्पर्य्यायः। माषकः २। इति हारावली। १४५॥ बन्दीकारः ३। इति त्रिकाण्डशेषः॥

व(ब)न्दिपाठ, पुं (वन्दि + भावे इन्। बन्दिस्तुतिकृतः पाठो यत्र।) स्तुतिपाठः। तत्पर्य्यायः। भोगावली २। इति त्रिकाण्डशेषः॥

व(ब)न्दी, स्त्री, (वन्दि + "कृदिकारादक्तिनः।" इति ङीष्।) वन्दिः। इत्यमरटीकायां भरतः॥ (यथा, कुमारे। २।५७।
'गोमारस्सुरधेन्यासौ च पुरस्कृत्य गोत्रभित्।
प्रत्यानेष्यति शत्रुभ्यो वन्दीमिव जयश्रियम्॥')

व(ब)न्दी [न्] पुं, (वन्दते स्तौति नृपादीनिति। वदि स्तुतौ + णिनि।) राजादयानां श्रैयान्स्तुतिकारकः। तत्पर्य्यायः। स्तुतिपाठकः २। इत्यमरः॥ मागधः ३ मगधः ४। इत्यन्ये। इति सटीकायां भरतः॥ (यथा, रघुः। ४।६।
"शरत्कालिनमाविष्या काले काले च वन्दिनः।
स्तुत्य स्तुतिभिरर्थ्याभिरुपतस्थुः सरस्वतीम्॥")
अस्योत्पत्तिर्यथा,—
"क्षत्रियाद्विप्रकन्यायां सूतो भवति जातितः।
वैश्यान्मागधवैदेहौ राजविप्राङ्गनासुतौ॥"
इति मानवे १० अध्यायः॥
याहीतरमतो प्रक्षिप्तो शाक्त्याकरथे निन्दा यथा —
"वन्दिभ्यश्चैव विप्रेभ्यो भाविभ्यश्च हर्षदम्।
यदि तत्र न दद्यात्तु विषम् ... भवेत्॥"
वन्दिनो दीर्घकौलारः। अपि च अन्यो ... भवेन्निति॥
"वृत्ता पौराणिका प्रोक्ता मागधा वंश
शंसकाः।
वन्दिनस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयः॥"
इत्युक्तेः। इत्यत्र याहीतरान्विमिश्रान् सा हि वन्दिशब्दनिष्पन्नो दायादर्थे निन्दाप्रवाद याहात् पूर्वं तदर्थं भोज्यान्न उपदेशः। इति आह्निकतत्त्वम्॥ (भाट। यथा भागवते। ११।४।१५।
"को वा भवादशमाराध्य यतात्मं सुरेश द्वन्द्व।"

…मधोमित्र येषां पुरस्कृत्य निर्व यशु ।"
"सुरवन्दिनो देवभवाः ।" इति तट्टीकायां श्रीधरस्वामी ।)

व(ब)न्दीकार, पुं, (वन्दीन् ग्रहस्य करोतीति । कृ + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) बन्दिग्राह । डाकाइत इति भाषा । तत्पर्य्यायः । मोषकः २ प्रसह्यचौरः ३ विलाभः ४ । इति त्रिकाण्डशेषः ॥

वन्ध्या, स्त्री, (वन्द्यते लभ्यते इति । वन्दि + ण्यत् ।) वन्दा । इति शब्दचन्द्रिका ॥ गोरोचना । इति भावप्रकाशः ॥ (वन्दनीये त्रि । यथा साहित्यदर्पणे १ परिच्छेदे ।
"श्लाघ्यैः परम्परा वन्द्या यस्यैं तथा कृपो
कुरु ॥"
यथा च भागवते । ४ । १२ । २६ ।
"आतिष्ठ पदतां वन्द्य तद्विष्णोः परमं
पदम् ॥")

वन्द्र, त्री, (वन्द्यते स्तूयते इति । वदि स्तुतौ + "स्फायितञ्चीति ।" उणां २ । १३ । इति रक् ।) कल्याणम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

वन्र, त्रि, (वन्दते स्तौति देवादीन् पूजकत्वे इति । वद + रक् ।) पूजकः । इत्युणादिकोषः ॥

वन्य, क्ली, (वने भवम् । वन + यत् ।) त्वचम् । इति राजनिर्घण्टः ॥ (कुन्दरुम् । तत्पर्य्यायो यथा,—
"कुन्दुरु वर वन्य सुगन्धं परीक्षकम् ॥"
इति वैद्यकरत्नमालायाम् ।)

वन्य, त्रि, (वने भवः । वन + यत् ।) वनोद्भवः । इति मेदिनी । ये ५४ । (यथा, रघुः । १ । ४५ ।
"हैयङ्गवीनमादाय घोषवृद्धानुपस्थितान् ।
नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखि-
नाम् ॥")

वन्य, पुं, (वन + यत् ।) वनसूरणः । वाराही-कन्दः । दरभः । इति राजनिर्घण्टः ॥ (चोरकः । तत्पर्य्यायो यथा —
"चौरो ग्रन्थिपर्णाख्यः सुकन्दः कुटिलाग्रकः ।
गन्धी शुक्लभालः स्कन्दः मथ कपुरी ॥"
इति वैद्यकरत्नमालायाम् ।)

वन्या, स्त्री (वनानां समूहः वनानां वा समूहः इति । वन + 'पाशादिभ्यो यः ।" ४ । २ । ४९ । इति यः ।) वनसमूहः । इत्यमरः । २ । ४ । १ । जलसंहतिः । इति मेदिनी । ये ५४ । गुन्द्रपर्णी । (तत्पर्य्यायो यथा रत्नमालायाम् ।
'गुन्द्रपर्णी गुन्द्रलता काकता विश्वपर्णिका ।
वन्या माल्यारमित्यपि कपर्दिकाश्च सा ॥")
नानालकटी । गुञ्जा । मिश्रेया । भद्रमुस्ता । नागबला । इति राजनिर्घण्टः ॥ (अश्वगन्धा । तत्पर्य्यायो यथा,—
"हयगन्धाश्वगन्धाख्या वाजिगन्धाश्वगन्धिका ।
वन्या तुरगगन्धा च कम्बुकाश्चावरोहकः ।"
वल्या कथिता हयग्री । इति वैद्यकरत्नमालायाम् ।)

वन्योमोन्की, स्त्री (वन्या वनोद्भूता उपोन्की ।) लतादिविशेषः । वनपुंइ इति भाषा । तत्पर्य्यायः । वनजा २ वनवाटिका ३ । अस्याः गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । रोचनत्वञ्च । इति राजनिर्घण्टः ॥

वप्, पुं (वपति भागमर्हतीति । वन सम्भक्तौ + "कमेरर्थावचेति ।" उणां २ । २० । इति उप्रत्ययः ।) अंशी । भागी । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

वप, यो न डु ये सन्तानशौचभीजोप्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-अनिट् ।) यो, वप्ता । न वपति वपते । डु, उप्त्रिमम् । सन्तानो मुण्डनकरणम् । वपति मस्तकं नापितः । वपति तन्तु तन्तुवायः । बीजोप्तौ वपति क्षेत्रं कृषकः । वपति धान्यं । यदि वपति लवाय पोसमासात् बीजम् । इति दुर्गादासः ॥

वपः, पुं, (वप + घः ।) केशमुण्डनम् । बीजवपनम् । इति वपधातोर्भावप्रत्ययेन निष्पन्नः ॥

वपन, क्ली, (वप + भावे ल्युट् ।) केशमुण्डनम् । (यथा मनुः । ५ । १४० ।
"शूद्राणां मासिकं कार्य्यं वपनं न्यायवर्त्तिनाम् ॥")
बीजाधानम् । इति मेदिनी । ने १९९ ।

वपनी, स्त्री (उप्यते मस्तकादिकमस्यामिति । वप + अधिकरणे ल्युट् । ङीप् ।) नापितशाला । इति हेमचन्द्रः । ४ । ६६ । (तन्तुवायशाला । इति संक्षिप्तसारव्याकरणात् ।)

वपा, स्त्री, (उप्यते इति । वप + भिदादित्वादङ् । टाप् ।) छिद्रम् । (यथा, शतपथब्राह्मणे । ६ । २ । १ । १५ ।
"अथ वल्मीकवपा सुषिरा यस्मै निर्हिता भवति ॥") मेदः । इत्यमरः । २ । ६ । ६४ ।
(यथा, रामायणे । १ । १४ । ३६ ।
"पतत्रिणस्तस्य वपामुद्धृत्य नियतेन्द्रियः ।
ऋत्विक् परमसम्पन्नः श्रपयामास शास्त्रतः ॥"
सा च हृदयस्थधातुः । यथा । "त्वक् च लोहितञ्च मांसञ्च मेदश्च नाभिश्च हृदयञ्च क्लोम च यकृच्च प्लीहा च वृक्कौ च बस्तिश्च पुरीषा-धानञ्चामाशयश्च पक्वाशयश्चोत्तरगुदञ्चाधरगुदञ्च क्षुद्रान्त्रञ्च स्थूलान्त्रञ्च वपा च वपावहनञ्चेति मातृजानि ।" इति चरके शारीरस्थाने तृतीये-ऽध्याये ।)

वपिल पुं, (वपति बीजमिति । वप् + इलच् ।) पिता । इत्युणादिकोषः ॥

वपु, [स्] क्ली (उप्यन्ते देहान्तरभोगसाधनबीजीभूतानि कर्म्माण्यत्रेति । वप + "अर्त्ति पृवपियजीति ।" उणां २ । ११८ । इति उसिः ।) शरीरम् । इत्यमरः । २ । ६ । ७० ॥ (यथा, रघुः । २ । ३० ।
"एकातपत्रं जगतः प्रभुत्वं
नवं वयः कान्तमिदं वपुश्च ॥")
प्रशस्ताकृतिः । इति मेदिनी । सि, ३६ ॥ (रूपम् । यथा, मनुः । ५ । ९६ ।
"अष्टानां लोकपालानां वपुर्धारयते नृपः ।"
"वपुर्ह्येषोऽष्टः ।" इति मेधातिथिः ॥ स्त्री, स्वनामख्याता देवकन्या । सा तु धर्म्मराजस्य पत्नी । यथा, मार्कण्डेये । ५ । २१ ।
"बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्त्तिस्तथो-दशी ।
पत्न्यर्थं प्रतिजग्राह धर्म्मो दाक्षायणीः
प्रभुः ॥")

वपुःस्रव, पुं, (वपुषः शरीरात् स्रवः क्षरणं यस्य ।) शरीरस्थरसधातुः । इति राजनिर्घण्टः ॥

वपुन, पुं (वप + उनन् । वपुन + पृषोदरादित्वात् वस्य मः इति केचित् ।) देवता । इति शब्दरत्नावली ॥

वपुना, स्त्री, वयुना । इति भावप्रकाशः ॥ (रूपे, क्ली । यथा, ऋग्वेदे । ३ । ३ । १५ ।
"इदं न चित्र वपुषाय भूयत
मन्द्रोदित यशसिताय दक्षते ।"
"वपुषाय रूपार्थं दयत दधनीयम् ।" इति तद्भाष्ये सायनः ।)

वपुष्मा स्त्री पद्मचारिणी । इति जटाधरः । (काशीराजस्य कन्या । जनमेजयस्य पत्नी । सा तु रम्भा नामाप्सरा । जनमेजयकृताश्वमेध काले इन्द्रेणैवमश्वप्रविष्टेन धर्षितामीदृशी जनमे-जयेनैव परित्यक्तापि पुनरस्य राजवि(श्वा)वसु-वाक्येन गृहीता । एतद्विवरणन्तु हरिवंशे १९८ अध्याये द्रष्टव्यम् ।)

वप्ता, [ऋ] पुं, (वपति बीजमिति । वप + तृच् ।) जनकः । इति मेदिनी ॥ कविः । इति जटाधरः ॥ (नापितः । यथा ऋग्वेदे । १० । १४२ । ४ ।
"यदा ते वातो अनुवाति शोचि-
र्वप्तेव श्मश्रु वपसि प्र भूम ॥"
"यदा यदा वायुना वपति मुण्डयति तथा भूम भूमिं प्रवपसि प्रकर्षेण मुण्डयसि ।" इति तद्भाष्ये सायनः ।)

वप्ता, [ऋ] त्रि (वपतीति । वप् बीजोप्तौ + तृच् ।) वापकः । इति मेदिनी ॥ (कर्षकः । यथा मनुः । ३ । १४२ ।
"यथेरिणे बीजमुप्त्वा न वप्ता लभते फलम् ।
तथार्च्चे हविर्दत्त्वा न दाता लभते फलम् ॥")

वप्र, क्ली, पुं, (उप्यतेऽत्रेति । वप + "स्फायितञ्चीति" रक् ।" उणां० २ । १३ । इति रक् ।) दुर्गद्वारे परिखाया उद्धृतमृत्तिकास्तूपवद्ध उच्चस्थानम् । तदुपरि प्राकारो निबध्यते तत् । इथा चाथ प्राकारम् । उद्धातादुद्धृतमृदा वप्रः कार्य्येन् तस्मिन् परि प्राकारमिति । तत्पर्य्यायः । चयः २ । इत्यमरभरतौ ॥ रीतिकाश्च ३ । इति शब्दरत्नावली ॥ (यथा, आर्य्यासप्तशत्याम् । २५ ।
"तव स्वर्गे तस्या सुविमान कलितकटि
कटकोऽपि ।
अपि वप्तु हिमगिरिः महाद्रयो विभूषयन्ति ॥")

महावप्रो यथा,—

"महोद्यानां महावप्रां तड़ागशतशोभिताम्।
प्राकारगृहसम्बाधामिन्द्रस्येवामरावतीम्॥
महान् वप्रो यस्याः।

"प्राकाराधारभूता छत्रिमोच्छ्रिता भूमि
संप्रसद्या।"

इति विष्णुपुराणे ५ अंशे २३ अध्याये॥ *॥
वपन्ति बीजमत्र। खेत इति भाषा। तत्
पर्य्याय। केदार २ क्षेत्रम् ३। इत्यमरभरतौ।
निष्कुट ४ वनखम् ५ वाणिका ६ पाटीर ७।
इति जटाधर॥ (यथा, रघुवंशे रघुधवितायाम्।
१८।१६।

"शालीसुमध्यपि धरा धरधौधराभ
धाराधरोज्झितपय परिपूर्णवप्रा।")

रेणु। तट। इति मेदिनीकरहेमचन्द्रौ॥
(यथा, किराते। ७।११।

"तत् पूर्व्वं प्रतिविदधे सुरापगाया
वप्रान्तस्खलितविवर्त्तनं पयोभि॥"

पर्व्वतधातु। यथा, किराते। ५।३६।

"नानारत्नज्योतिषां सन्निपाते-
श्छन्नेष्वन्त सानुवप्रान्तरेषु॥")

वप्र क्ली (वप+"ऋधिवपिभ्यां रन्।" उणा
२।२७। इति रन्) सीसकम्। इति हेम
चन्द्र।४।१०६॥ (तत्पर्य्यायान्तरम्।
'सीस वप्रञ्च वप्रञ्च योगेष्ट नागनामकम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भाग॥)

वप्र पुं (वपति बीजमिति। वप+रन्।)
तात। इति मेदिनी। रे, ८२॥ प्राकार।
इति विश्व॥ प्रजापति। इति सचिप्तसारी
कादिवृत्ति॥

वप्रा, स्त्री, (वप+रन्। टाप।) मञ्जिष्ठा।
इति राजनिघण्ट॥ (विवरणमस्या मञ्जिष्ठा
शब्दे ज्ञातव्यम्॥)

वप्रि, पुं (वपति बीजमत्र। वप+"वङ्क्रा
दयश्च।" उणा ४।६६। इति क्रिन्प्रत्ययेन
साधु।) क्षेत्रम्। इति सिद्धान्तकौमुद्या
मुणादिवृत्ति॥ दुमति। समुद्र। इति सचिप्त
सारोणादिवृत्ति॥

वप्री, स्त्री (वप्री+पृषोदरादित्वात् साधु।)
वल्मीक। इति हलायुध॥

वम, पुं एकाराख्यवर्णान्तर्गतप्रथमवर्णम्।
अस्याधिपतिरिन्द्र। तत्र विचिन्तानि यथा,—
"मौक्तिकहारसुभानि वयार्क्षि।'

इति ज्योतिस्तत्त्वम्॥

अन्न जातफलम्।

"वमाभिधाने जनन हि यस्य
शूरोऽतिधीरो मनुज सती स्यात्।
महालया तन्निलये निवास
करोति नित्य सुविचक्षण स्यात्॥"

इति कोष्ठीप्रदीप॥

दाचिणात्यमते अस्य शब्दस्य प्रथमवकार'
पवर्गीय मिष्टकारोऽन्त्यः॥

वम्भ, गत्याम्। इति कविकल्पद्रुम॥ (भ्वा पर
सक सेट।) वकारादि। ओष्ठ्यवर्गचतुर्थो
पध। वम्भति। इति दुर्गादास॥

वम् स्य, (उ+अ+म्।) शिवपूजान्ते कपोल
वाद्यविशेष। तत्तु उकाराकारमकारात्मक
शिवप्रणवस्वरूपम्। यथा —

"डिम् डिम् डिम् डिम् डिडिम् डिम् डिडिमत
डमरु वादयन् उन्मनाद
वम् वम् वम् वम् ववम् वम् स्मितरमुखिरा
लालमानेन कुर्व्वन्।
कर्पूराधिक्यभासापटितमटुघटाबन्धिबन्धाप-
मालो
मायायोगी दयाब्धी रघुरमयपुर' प्राक्पी
प्रादुरासीत्॥"

इति रामलीलामृतकाव्यम्॥ *॥
कवचबीजम्। यथा। नासापुटौ धृत्वा वमिति
कवचबीजस्य चतु षष्टिवारजपेन कुम्भकं कृत्वा
तस्मात् ललाटस्थचन्द्रामृतस्तवद्धया मातृका
वर्णात्मिकया समस्त देह विरचय्य लमिति
पृथ्वीबीजस्य द्वात्रिंशद्वारजपेन दृढ सुदृढ
विचिन्त्य दक्षिणेन वायु रेचयेत्। इति भूत
शुद्धिप्रकरणे तन्त्रसार॥

वम, ञ ज्जु टु उद्गिरि। इति कविकल्पद्रुम॥
(भ्वा पर सक सेट।) वकारादि। ञ,
वेमतु वयमतु। अन्ये तु तत्कार्य्यविधायक
सूत्रे वकारो येन न पठन्ति येषुच केचिदुद्गिर
सिद्धान्तसाधनाय तत्सूत्रे इत्यवकारादित्वम
स्यापिगत्यर्था स्वीकुर्व्वन्ति। केचित् पुनरस्य
वकारादित्वस्वरमप्यस्ति इति प्रतपन्ति।
ज्जु, वाम वम'। उ वमित्वा वान्त्वा। टु,
वमथु। उद्गिरि वान्तौ। वमति अन्नमजीर्ण
वान्। अत्रान्तेऽपि णौ अमन्तत्वात् ह्रस्वादित्वा
केवलस्य ह्रस्वविकल्पनात् सोपसर्गस्य नित्य
ह्रस्व'। वमयति वामयति प्रवमयति। इति
दुर्गादास॥

वम' पुं स्त्री, वमनम्। इति वमधातोरच्प्रत्ययेन
निष्पन्नम्। इति सिद्धान्तकौमुद्यामुणादिवृत्ति॥

वमथु, पुं, (वमनमिति। वम्+"ट्वितोऽथुच्।"
३।३।८९। इति अथुच।) वमि। (यथा,
सुश्रुते उत्तरतन्त्रे ४९ अध्याये।

"दौर्बल्यबाधकामज्वरवमथुभि पाखुना
दाहभाक्त्वा॥")

हस्तिशुण्डनिर्गतजलकणा। तत्पर्य्याय। कर
शीकर' २। इत्यमर'।२।८।३९॥ (यथा,
नैषधे।१८।६।

"इवनिवसपुष्पावेयाभ' कमलकरणभृते
कुसुमितमलयस्याक्तैरमेयमयैवदविन्दुभि॥")

वमन, क्ली (वम्+भावे ल्युट्।) छर्द्दनम्।
(यथा सुश्रुते।१।१२।

"मधुराम्लौ रसौ वापि वमनाय प्रयोजयेत्॥"
वमनद्रव्यमपि। यथा, कथासरित्सागरे।
६४।१७।

"स दत्त्वा वमन ज्ञात्वा वमनकल्पमष्टी
वमन॥")

आर्द्दनम्। इति मेदिनी। ने, १३४॥ ... ।
इति विश्व॥ (व्याकरणम्। सर्गा, २२।
१५।२८।

"या सौराज्यप्रकाशाभिवमौ पौरगिरि ...।
सर्वाभिव्यन्दवमन कर्णैोऽपि निरगान्...॥")

अथ वमनकल्पोऽवधि।

"वमने मदनं श्रेष्ठ त्रिवृन्मूल विरेचने।
नियमस्त्वस्य तु व्याधि विषयेण विधीयता॥
फलानि तानि पक्वानि न चातिहरितान्यपि।
आदायाह्रि प्रशस्तर्क्षे मध्ये ग्रीष्मवसन्तयो॥
प्रमृज्य कुशमुत्तोल्यां त्रिभृा वस्त्रा प्रवेशयेत्।
गोमयेनानुलिप्तां तां धान्यमध्ये निधापयेत्॥
मृदुभूतानि मधिरगन्धानि कुथवेष्टनात्।
निष्कृष्य निगतान्त्वाचि शोषयेतान्दयातपे॥
तेषां तत सुगुप्ताप्रामानुद्धृत्य फलपिप्पली।
दधिमध्वाज्यपललैर्मृदित्वा शोषयेत पुन॥
तत सुगुप्त सन्धाय कार्य्यकाले प्रयोजयेत्।
अथादाय ततो मात्रा जर्ज्जरीकृत्य वारुणेन्॥
यष्टीसीं मधुयष्ट्या वा कोविदारस्य वा ...।
कर्म्मुदारस्य निम्बस्य वा बिम्ब्या ... वा॥
शणपुष्प्याः सदा पुष्प्याः प्रत्यकपुष्प्या ... दन्त।
तत पिबेत् कषाय न प्रातर्नु...॥
अनोनेनैव विधिना साधु तेन यथा वमेत्।
वेगानिश्वरप्रतिश्यायगुल्मान्तर्विद्रधीषु च॥"
"पिते कफस्थानगते जीमूतानि ... तत्।
सुद्दादिरधोऽर्ज्वपित्ते च जीर तत्पिप्पली
...॥
चैरेयी वा कषन्द्रिप्रसैतनेनैकु च।
दध्युत्तर वा दधि वा तत्मुक्ष्य त्वमन्नम्॥
पयान्निक्कापकल्काभ्यां विद्रं तत् निद्वदुग्ध
...म्।
सपि कफाभिभूतेऽग्नौ ... ॥"
"वत्सकादिप्रतीवाप कषाय पञ्चमूलक।
निम्बकाम्यतरजायणमापुतो निष्यदति॥
मद्वमानमपि व्यायीत् पश्चात् सर्कवेतोलद्रान्।
वाटपुष्पफलकदम्बपूर्वीभाव्य सुशीतलम्॥
वमेत्तस्य वमादौ कभौ ... ॥"
"इक्ष्वाकुर्मधमे ग्रस प्रयात्यपि च मागध।
फलपुष्पविकोशस्य प्रवालैलद्र नादिगन्।
पित्तश्लेष्मज्वरे चोरं निमानिक्वे प्रयोजयेत्॥'
"सहुमिर्म्मा पिचिमन्द मुम्मोष्यरममारिषे।
कपोद्रवे ज्वरे कासे गलरोगेऽप्यरोचके॥
गुल्मे ज्वरे प्रपक्के च ... सागरमे ...।
नर साधु वमत्येव न च दौर्बल्यमश्नुते॥"
"जीवकर्षभकौ वीरा कपिकच्छू शतावरी।
काकोलीक्षीरकाकोली मेदा महामेदा मधूलिका॥
तत्रोभि एकशो वा प्रभागपरशौक्लिना।
काले सुरसरा च पञ्चा मधुविशनाबुना॥"
"वमराची मधूकानी जोधेन कमलस्य वा।
पायदेत् कौटजं बीजं युक्त मसरपान्या॥

सप्राज्यं शाकटाधान्त मथवा पाययेत पृथक् ।
वमनौषधमुख्यानामिति कल्पदिगीरिता ।
ओषधीनामनेकेषां मनिमानन्यान्यपि च कल्पयेत् ॥"
इति वाभटे कल्पस्थाने प्रथमेऽध्याये ॥)

वमन पुं (वमनीय सुखरुचमिति । वम् + ल्युट् ।) पुं । इति राजनिर्घण्टः ॥

वमनी स्त्री, (वमन + ङीप् ।) जलौका । इति राजनिर्घण्टः ॥ (विवृतिरस्या जलौकाशब्दे ज्ञातव्या ॥)

वमनीया, स्त्री, (वमयतीति । वम् + णर्थे विवचा याम् । अभिधानात् कर्त्तरि अनीयर् ।) मक्षिका । इति राजनिर्घण्टः । वमनयोग्ये त्रि ॥

वमि, स्त्री, (वमनमिति । वम् + सर्वधातुभ्य इन् । उणा० ४ । ११७ ।) प्रच्छर्दिका । इत्यमरः । २ । ६ । ५५ ॥ (अस्या सम्प्राप्तिसहितचिकित्सित प्रकारमाह यथा,—

"आमवे शूलदोषार्त्ते वमेद्धी धम ग्रस ।
पीत गिरीयथा क्षीणे वेगे गम्भीरनिस्सृति ॥
राजा वा पीतम यदि अजीर्णाप्यायते वमि ।
तस्मीदेवैवो वमति विस्तरो वाणितान्वते ॥
गार्भे सज्जी कटं शूल तथा शोषोऽतिसृज्यका ।
विकलाङ्गी भ्रमात्त्व भ्रमत्प्रतीयते ग्रसत् ॥
गिरीतिर्मेकपतेश्चर्यं करपादौ हिमोपमौ ।
एतैर्लिङ्गैस्तु सयुक्तां छर्दिं दूरं परित्यजेत् ॥"

चिकित्सा ।

'स प्रथमसपाकमिष कषाय
ससैन्धवामलकस्य कल्कं ।
क्वाथ पिबेन्मिश्रितपिप्पलीकं
स नागदृष्टिमिव शारदम्ब ॥"

'आमलक्या रसेनाथ युत चन्दनक मधु ।
युञ्ज्यामलमात्रेण वेगो हन्ति वमि ध्रुवम् ॥
मिश्रकटुकरजनीदयप चर्वितं मधुना च लावसूकम् ।
सम्हततमिति चवनेनक्षयुना पुन वमि विना इत्यति ॥"

'काञ्जीर्नी काकमाची च काच प्रकरया युतम् ।
लाजाढ्यकमेतुङ्क हन्ति पित्तवमिं नृणाम् ॥
मातुलुङ्गरसेनैव पथ्यापकरया युत ।
ज्वान्ति काय पित्तभवं वमिं शीघ्रं नियच्छति ॥
इङ्गा पित्तवमि घोरां सदाहभ्रमहारिणीम् ।
सक्ताररसमथवापि मधुप्रकरयान्वितम् ॥
न्यौदपानं प्रशस्तं वा सलाजाकरयान्वितम् ।"

"अमाश्वयौ प्रयच्छति दाडिमामलकत्वचा ।
मधुनोपोषित मा प्रयात्क्रं हन्ति वमि ध्रुवाम् ॥
मम्माखीन स्वकदमकलोत्प्पूर्णं
सद्यश्च धान्यद्वर्मं मधुह प्रयात् ।
छर्द्योदृदं वमनमाशु निहन्ति पुंसां
मल्लीकया मधुविकृत्पुनीपि सेव्यः ॥"

"ऊर्ध्वभागमतो दोषे विरेको हि प्रशस्यते ।
तद्विन् आति अधोभाग वमन प्राप्यति ध्रुवम् ॥
यथ द्विभागमायसेत्तत्या दयाभया मधु ।
क्रिमिज वमनं ज्ञात्वा क्रिमीणां प्रशमक्रिया ॥
न चोप्य सानिपातश्च न शोध्य न तथा शनु ।
तङ्कलीयकक्षार्के वा न मद्य कालिक न तु ॥
वमिर्वैर्षि च कपित प्रयुक्तन ग्रसुल मे ।
आनूप प्रालिमतश्च पुनपुष्या च वास्तुकम् ॥
आर्द्रको मसपूलथ दधि वमिर्गुडान्वितम् ।
अङ्गारमत्का आप वमौ पथ्य प्रपश्यते ॥
यथाबल यथाकाल यथारोगं यथाक्रमम् ।
तथा हङ्गा प्रकुर्मन्ति पथ्याना सुपक्रमम् ॥
दिवानिद्रा प्रयुक्तीत वमौ चान्निविपाकके ।
विकायोपि तथा कीर्ते वनिर्लिङ्गेऽयथा पुन ॥
न चोप्यतोयपानश्च जागिमोजनमेव च ।
वमनश्च कर्मेव वर्ज्ययेदमनाटिके ॥'
इति वैद्यके ॥)

अथ छर्द्यधिकार । तत्र छर्दिविप्रकर्षनि रूपणार्थं पूर्वरूप सम्प्राप्तिमाह ।
"अतिद्रवैरतिस्निग्धैरहृद्यैर्लवणैरपि ।
अकाले चातिमात्रैश्च तथा सात्म्यैश्च भोजनैः ॥
आमाद्युपामयैर्गर्भात् भीर्हर्षात् क्रिमिभिश्च ।
भयोद्वेगातिशोकाचयापानिद्रताम
दुर्दर्शर्षि एथक् सम्यम्ब्रोकशर्मिभि ।
बीभत्सैर्हेतुभिश्चान्यैर्भुतानुत्क्रिमती बलात् ॥"
आमात अवस्थक पक्षासात् । अजीर्णात् यथा मिमार्दमात् । आपन्नसत्त्वाया प्रसमभावा । अधिवीभित्सैरजनैर्हेतुभि पूयादिभि अविदमनवकप्रतिकारप्रकारमुपचार्य करुक्रियते छर्दि क्रियते ॥ ● ॥ पूर्वरूप माह ।
"हृल्लासोद्गाररोधौ च प्रसेको लवणस्तथा ।
द्वेषोऽन्नपाने च भृशं वमीनां पूर्वलक्षणम् ॥"
छर्दे सामान्यलक्षणमाह ।
"छादयन्नानन वेगैरर्दयन्नङ्गभञ्जनैः ।
निरुच्यते छर्दिरिति दोषो वक्त्रं प्रधावित ॥
छादयन् पूरयन् अङ्गभञ्जनै अङ्गभेदै अर्दयन् पीडयन् । वक्त्र प्रधावित वक्त्र यति धावित दोष छर्दिरित्युच्यते ॥"॥ वातजाया लक्षणमाह ।
"हृत्पार्श्वपीडामुखशोषमूर्ध
नाभ्यर्तिकासस्वरभेदतोदै ।
उद्गारशब्दप्रबल सफेन
विच्छिन्नकृष्ण तनुक कषायम् ।
कष्टेन चाल्प महता च वेगै
र्वातोऽतिनिलाच्छर्दयतीव दुःखम् ॥"
कषाय कषायरसम् । दुःख दुःखमिव छर्दयति ॥ ● ॥ पित्तजामाह ।
"मूर्च्छापिपासामुखशोषमूर्द्ध
ताल्वक्षिसन्तापतमोभ्रमार्त्तः ।
पीतं भृशोष्णं हरितञ्च तिक्त
धूम्रञ्च पित्तेन वमेत् सदाहम् ॥"●॥
कफजामाह ।
"तन्द्रास्यमाधुर्यकफप्रसेक
सन्तोषनिद्रारुचिगौरवार्त्तः ।
स्निग्ध घन स्वादु कफाद्विशुद्ध
सलोमहर्षोऽल्परुज वमेत्तु ॥"
सन्निपातजामाह । ● ॥ त्रिदोषजामाह ।
"शूलाविपाकारुचिदाहतृष्णा
श्वासप्रमोहप्रबलाप्रसक्तम् ।
छर्दिस्त्रिदोषाल्लवणाम्लनील
सान्द्रोष्णरक्त वमतां नृणां स्यात् ॥"
आगन्तुजामाह ।
"बीभत्सजा च क्रिमिजामजा च
दौहृदजा दौष्ट्रदजा च या हि ।
सा पञ्चमी ताश्च विभावयेत
दोषोच्छ्रयेणैव यथोक्तमादौ ॥"
एता पञ्चागन्तुजास्तु वाय्वादिदोषैव यतएव वा प्रागन्तुजा पञ्चमी विभावयेत् अनुरूपयेत् ॥●॥
उपद्रवानाह ।
"कासः श्वासो ज्वरस्तृष्णा हिक्का वैचित्त्यमेव च ।
हृद्रोगस्तमकश्चैव ज्ञेयाश्छर्द्युपद्रवा ॥
वैचित्त्यं चित्तविभ्रमम् । तमकं श्वास तमः ।
श्वासभेदेनैव तमकारुयुम्पि श्वासपृथगुल्लेखात् ॥
असाध्यां साध्यामाह ।
"क्षीणस्य या छर्दिरतिप्रसक्ता
सोपद्रवा शोणितपूयुक्ता ।
सचन्द्रिका तां प्रवदन्त्यसाध्यां
साध्यां चिकित्सेन्निरुपद्रवाञ्च ॥"
सचन्द्रिका मयूरपिच्छचन्द्रिकाप्रभायुक्ता ॥●॥
अथ छर्दिचिकित्सा ।
"आमाशयोत्क्लेशभवा हि सर्वा
श्छर्द्यो मता लङ्घनमेव तस्मात् ।
विधीयते मारुतजा विना तु
संशोधनं वा कफपित्तहारि ॥"
अथ द्वितीयपादे छर्दिघ्नम् ।
"हन्यात् क्षीरोदकं पीतं छर्दिं पवनसम्भवाम् ।
ससैन्धवं सर्पिरपि फलाम्लेर्दाडिमादिभि ॥"
क्षीरोदकं भागिकस्य क्षीरस्य उदकम् ॥ २ ॥
"गुडूचीत्रिफलानिम्बपटोलैः क्वथितं जलम् ।
पिबेत्माक्षिकसंयुक्तं छर्दिनाशाय पित्तजाम् ॥ ३ ॥
यवोशीरकषायश्च मधुना पित्तजे हितः ।
अधोमार्गहरो दोषे छर्दिः शीघ्रं निवर्तते ॥
विडङ्गत्रिफलाविश्वाचूर्णं मधुयुतं पिबेत् ।
विडङ्गप्लवशुण्ठीनां चूर्णं वा कफजां वमिम् ॥"
प्रवं कोशाम्बुसाम्बम् । गुडूचीति वाच्ये ॥ ३ ॥
"पिबेद्वा चाप्यनलं वाथवा शर्करा च शनो- क्षितम् ।
रसा मधुपलशापि कृत्वा सलिलस्य च ।
वायसा गालिता पीत हन्ति छर्दि त्रिदोष जाम् ॥३॥
गुडूच्या रचितः क्वाथः शीतः मधुसमन्वितः ।
जयेत्त्रिदोषजां छर्दिं त्रिदोषसंयुतां बलात् ॥
एलालवङ्गगजकेशरकोलमज्ज
लाजाप्रियङ्गु घनचन्दनपिप्पलीनाम् ।
चूर्णानि माक्षिकसितासहितानि लीढ्वा

छर्द्दिं निहन्ति सपमाक्षतपित्तजाताम् ।”
इति एलादिचूर्णम् ।८।
“अश्वत्थवल्कलं शुष्कं दग्धं निर्व्वापितं जले ।
तज्जलं पानमात्रेण छर्द्दिं जयति दुर्जयाम् ॥९॥
पथ्याविकटुधान्याकजीरकाणां रजो लिहन् ।
मधुना नाशयेच्छर्द्दिमरुचिञ्च त्रिदोषजाम् ॥१० ॥
बिल्वत्वचो गुडूच्या वा क्वाथः क्षौद्रेण संयुतः ।
छर्द्दिं त्रिदोषजां हन्ति पर्पटः पित्तजां
तथा ॥११॥
आम्रास्थिबिल्वनिर्यूहः पीतः समधुशर्करः ।
निहन्यात् छर्द्दिसीसारं वैश्वानर इवाहुतिम् ।”
इति निर्यूहकाय ॥१२॥
“जम्ब्वाम्रपल्लवकृतः क्वाथस्तु मधुतः पीतम् ।
शमयति मधुना युक्तः अमिमतिसारं ज्वरार्त्तिं
सुधाम् ॥१३॥
बीभत्सजां दृश्यतमैरिष्टैर्गन्धैर्हृद्यैः फले ।
लङ्घनेरामजां छर्द्दिं जयेत् धात्रीरसात्म
जाम् ॥१४॥
कृमिहृद्रोगवद्धन्यात् वमिं कृमिसमुद्भवाम् ।
तत्र तत्र यथादोषं क्रियां कुर्य्यात् चिकित्-
सकः ।”॥१५॥
इति छर्द्यधिकारः । इति भावप्रकाशः ।
वमिः, पुं, (वमति उद्गिरति धूमादिकमिति । टु वम उद्गिरणे + “इन् सर्व्वधातुभ्यः ।” इतीन् ।) अग्निः । इति मेदिनी । मे ५८ । धूर्त्तः । इति शब्दरत्नावली ।
वमितः, त्रि, (वम् + क्त ।) वान्तः । (यथा,—
“वमितं लङ्घयेत् प्राज्ञो लङ्घितं मनु वामयेत् ।
वमने सम्यगावृत्ते वर्ज्याकृष्णकर्षितम् ।”
इत्युद्भट ।”)
वमनहृतवस्तु । इति मुग्धबोधव्याकरणम् ।
वम्रः पुं, वेग्रः । इति शब्दरत्नावली ।
वम्रीकूटः पुं वल्मीकः । इति हेमचन्द्रः ।
वय ङ गत्याम् । इति कविकल्पद्रुमः । (भ्वा- आत्म- सक- सेट् ।) ङ, वयते । इति दुर्गा- दासः ।
वय, त्रि, अस्मदर्थे । आवरां इति भाषा । अस्मच्छब्दस्य वयादेशे सति रूपोऽयम् । इति व्याकरणम् । (यथा,—
“एको भवामि स भवेऽन्नमारो
दारैरपीभी स भवाव आवाम् ।
वय भवामो बहवः स पुत्रैः
अस्माकमप्यापि विभो प्रसीद ।”
इति मुग्धबोधव्याकरणम् ।)
वयः [स्] क्लो, (वयते वेति अवतीति वा । वय ङ गतौ यौगतौ अजगतौ वा + असुन् । अवते- र्वोऽभाव ।) पक्षी । (यथा, विष्णुपुराणे । १ । ५ । ३६ ।
“तत स्वच्छन्दतोऽन्यानि वयांसि वयसो-
ऽसृजत् ।”)
बाल्यादिः । इत्यमरः । ३ । ३ । २२८ । (यथा, महाभारते । ३ । ६८ । २१ ।
“तुल्यशीलवयोयुक्तां तुल्याभिजनसंयुताम् ।
नैषधोऽर्हति वैदर्भी तथैवमसितेक्षणा ।”
अन्नम् । इति निघण्टुः । २ । ७ । यथा, ऋग्- वेदे । ५ । २ । १ ।
“वय ते वय इन्द्र विद्धि षु णः प्रभरामहे वाजयु
र्न रथम् ।”)
यौवनम् । इति मेदिनी । से, ३५ । ७ । वयो विशेषे कर्त्तव्यानि यथा —
“शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ।”
इति रघुवंशे १ सर्गः ॥०॥
अपि च ।
“प्रथमेनार्ज्जिता विद्या द्वितीये नार्ज्जितं धनम् ।
तृतीये नार्ज्जितं पुण्यं चतुर्थे किं करिष्यति ।”
इति चाणक्यशतकम् ।
वयोविशेषाणां नियमा यथा —
“कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि ।
कैशोरमापञ्चदशात् यौवनञ्च ततः परम् ।”
इति प्रायश्चित्ततत्त्वधृतवचनम् ॥०॥
अपि च ।
“आषोडशाद्भवेद्बालस्तरुणस्तत उच्यते ।
वृद्धः स्यात् सप्ततेरूर्द्ध्वं वर्षीयान् नवतेः परम् ।”
इति भरतधृता स्मृतिः ॥०॥
अन्यच्च ।
“बाल्ये तद्धिर्वयो रूपं चक्षुः शुक्रं त्वचं रतिम् ।
दशकेन निवर्त्तन्ते मनः कर्म्मेन्द्रियाणि च ।”
इति महाभारतम् ॥०॥
(“कालप्रमाणविशेषापेक्षिणी हि शरीरावस्था वयोऽभिधीयते । तद्वयो यथा स्थूलभेदेन त्रिविधम् । बालं मध्यं जीर्णमिति । तत्र बाल- मपरिपक्वधातुमजातव्यञ्जनं सुकुमारमक्लेश- सहमसम्पूर्णबलं श्लेष्मधातुप्रायं आषोडशवर्षम् । विवर्द्धमानधातुगुणं पुनः प्रायेणानवस्थितसत्त्व- मात्रिंशद्वर्षमुपदिष्टम् । मध्यं पुनः समत्वागत- बलवीर्य्यपौरुषपराक्रमग्रहणधारणस्मरणवचनविज्ञान- सर्व्वधातुगुणं पित्तधातुप्रायमाषष्टिवर्षमुपदिष्टम् । अतः परं हीयमानधात्विन्द्रियबलवीर्य्यपौरुषपरा- क्रमग्रहणधारणस्मरणवचनविज्ञानं भ्रश्यमान- धातुगुणं वातधातुप्रायं क्रमेण जीर्णमुच्यते आ- वर्षशतम् ।” इति चरके विमानस्थाने ऽष्टमोऽध्याये । “वयस्तु त्रिविधं बालं मध्यं वृद्धमिति । तत्रोन- षोडशवर्षा बालास्तेऽपि त्रिविधाः क्षीरपाः क्षीरान्नादा अन्नादा इति । तेषु संवत्सरपराः क्षीरपा द्विसंवत्सरपराः क्षीरान्नादाः परतो ऽन्नादा इति । षोडशसप्तत्योरन्तरे मध्यं वयः तस्य विकल्पो वृद्धिर्यौवनं सम्पूर्णता हानि- रिति । तत्राविंशतेर्वृद्धिरात्रिंशतो यौवनमा- चत्वारिंशतः सर्व्वधात्विन्द्रियबलवीर्य्यसम्पूर्णता । अत ऊर्द्ध्वमीषत्परिहाणिर्यावत् सप्ततिरिति । सप्ततेरूर्द्ध्वं क्षीयमाणधात्विन्द्रियबलवीर्य्योत्साह- महन्यहनि वलीपलितखालित्यजुष्टं कासश्वास- प्रभृतिभिरुपद्रवैरभिभूयमानं सर्व्वक्रियास्वसमर्थं जीर्णागारमिवाभिवृष्टमवसीदन्तं वृद्धमाचक्षते । तत्रोत्तरोत्तरासु वयोऽवस्थासूत्तरोत्तरा भेषज- मात्राविशेषा भवन्त्यृते च परिहाणेः तत्राद्या- पेक्षया प्रतिकुर्व्वीत । भवन्ति चात्र ।
बाले विवर्द्धते श्लेष्मा मध्यमे पित्तमेव तु ।
भूयिष्ठं वर्द्धते वायुर्वृद्धे तद्वीक्ष्य योजयेत् ।
अग्निक्षारविरेकैस्तु बालवृद्धौ विवर्ज्जयेत् ।
तत्साध्येषु विकारेषु मृद्वीं कुर्य्यात् क्रियां
शनैः ।”
इति सुश्रुते सूत्रस्थाने ३५ अध्यायः ।
वयस्थः, त्रि (वयसि यौवने तिष्ठतीति । वयस् + स्था + क ।) युवा । इति हेमचन्द्रः । ३ । १ ॥ (यथा, महाभारते । १ । ४९ । ४ ।
“पिता पुत्रो वयःस्थोऽपि सततं बाल एव तु ।”)
वयस्थः, त्रि, युवा । इत्यमरः । २ । ६ । ४० ॥ वयसि यौवने तिष्ठति इति वयस्थः अन्यत्रापि तादृशगतस्य वा लुक वय स्थास्थ । वय पक्षिणि बाल्यादौ वयो यौवनभावके । इति विश्वः । इति भरतः ।
वय(य)स्था स्त्री, (वयो यौवनं तिष्ठत्यनयेति । वयस् + स्था + अन्यर्थे क । निपातनात् वा विसर्गस्य लोपः ।) आमलकी । हरीतकी । सोमवल्लरी । इत्यमरः । २ । ४ । ११७ । गुडूची । अर्कोला । काकोली । ब्राह्मी । इति मेदिनी । थे, १२ । शाल्मलिः । इति हेमचन्द्रः । क्षीरकाकोली । इति भावप्रकाशः । अजमोदा । (यथा सुश्रुते उत्तरतन्त्रे । ३२ ।
“वचा वयस्था गोलोमी हरितालं मनःशिला । कुष्ठं सर्ज्जरसश्चैव तैलार्थे वर्ग इष्यते ।”)
मत्स्याक्षी । युवती । इति राजनिर्घण्टः ।
वयस्यः, पुं, (वयसा तुल्यः । वयस् + “नौवयो- धर्म्मेति ।” ४ । ४ । ९१ । इति यत् ।) समान- वयस्कः । तत्पर्य्यायः । स्निग्धः २ सवयाः ३ । इत्यमरः । ३ । ८ । १२ । (यथा, आर्य्यासप्त- शत्याम् । ४ १ ।
“वस्तुमोचिति कास्यावशिरसि वयस्येव दयित उपश्रृणोति ।
तत्कालकलितकम्पा निपुणगति कलोह योषा- मम ।”)
वयस्या, स्त्री (वयस्य + टाप्) सखी । इत्यमरः । २ । ६ । १२ । (यथा, कथासरित्सागरे । २ । १३५ ।
“अवर्णि वा न हृदय श्री आयाति मदनातुरा । तां भवत्या वयस्यां मे तव प्रेमपराधिके ।”
इत्येवा । यथा कुमारसम्भवे । १० । ४ । १ । २९ ।
“एकया च विंशतिर्वयस्याभिः पञ्चकलाभिरिद- द्वितीया विधि ।” तथाच, श्रावणेवरहिता माघे । १३ । ९ ।
“तमसार्थमवरा रतरा इव अवरुरोधैर्यवनि- मर्च्छरन्ते ।”)
वयुनं, क्ली, (वीयते ज्ञायते ज्ञायते विपरा अनेन इति । अज गतौ + “अजियमिशीङ्भ्यश्च ।”

उणा० ३ । ६१ । इति उनन् । स च कित् । अवेर्वीभावः ।) ज्ञानम् । यथा,—
'इत्थामाह्रे रचयति विधिं पीठकौतूहलाद्ये-ष्विह त्वन्तर्निहितवयुना शिक्यभाण्डेषु तद्वित् ।"
इति श्रीभागवते १० स्कन्धे ८ अध्यायः ।
शिक्यभाण्डेषु अन्तर्निहितदध्यादौ वयुनं ज्ञानं यस्य सः । इति तट्टीकायां श्रीधरस्वामी ॥

वयुनः, पुं, (वीयते गम्यतेऽनेनेति । अज गतौ + उनन् ।) देवतागारम् । इत्युणादिकोषः । (एतदर्थे क्लीवलिङ्गः । इति उज्ज्वलदत्तः । ३ । ६१ ॥ विश्वागर्भवासः स्थानस्य पुंसः । यथा, भागवते । ६ । ६ । २० ।
'कृशाश्वोऽर्चिषि भार्यायां धूमकेतुमजीजनत् ।
धिषणायां वेदशिरं देवलं वयुनं मनुम् ॥")

वयोधाः, [स्] पुं, (वयो यौवनं दधातीति । वयस् + धा + "वयसि धाञः ।" उणा० ४ । २२८ । इति असि । स च डित् ।) युवा । इत्युणादिकोषः ॥ (अन्नम् । यथा, वाजसनेयसंहितायाम् । २१ । ७ ।
"वयोधसाधीतवाधीत जिन्व ।"
"वयोधसा वयो दधाति पुष्णाति वयोधा अन्नं तेनाधीतेनाध्ययनायोपस्थितेनाधीत जिन्व ।"
इति तद्भाष्ये महीधरः ॥ आयुर्दातरि, त्रि । यथा, वाजसनेयसंहितायाम् । २८ । २४ ।
"अग्निमिन्द्रं वयोधसम् ।"
"देवो होता अग्निं वयोधसमिन्द्रञ्च यजतु वयः आयुर्दधाति वयोधास्तमायुषो दातारं धारयितारं वा ।' इति तद्भाष्ये महीधरः ।)

वयोवृद्ध, स्त्री, (वयसा वृद्धमिव ।) क्षीरकम् । इति राजनिर्घण्टः ॥

वर, त् क ईप्से । इति कविकल्पद्रुमः ॥ (अदन्त-चुरा० पर० सक० सेट् ।) रेफोपधः । वरयति । इति दुर्गादासः ॥

वर, क्ली (व्रियते इति । वृ + कर्म्मणि अप् ।) कुङ्कुमम् । मनाक्प्रियम् । इत्यमरः । तथा च ।
"वरं प्राणत्यागो न च शिशुविनाशव्यथितता
वरं मौनं कार्य्यं न च वचनमुक्तं यदनृतम् ।
वरं क्लीवं भार्य्या न च परकलत्राभिगमनं
वरं भिक्षाशित्वं न च परधनाशाभिहरणम् ॥"
इति वामनपुराणे ५६ अध्यायः ॥
अभ्रकम् । वालकम् । आर्द्रकम् । इति राजनिर्घण्टः ॥

वर [म्] अव्य, मनाक्प्रियम् । यथा,—
"मनागिष्टे वरं क्लीबे किञ्चिदाधुदमव्ययम् ॥"
इति मेदिनी । वे ६१ ॥

वरवरा, स्त्री, (वरं वृणोतीति । वृ + अच् । मुम् च ।) चक्रपर्णी । इति शब्दचन्द्रिका ॥ चाकुलिया इति भाषा ॥

वरः पुं, (वृ + अप् ।) वरणम् । तत्पर्य्यायः । वृतिः २ । इत्यमरः । ३ । २ । ८ ॥ दे देवने । प्रार्थनाविशेषे इत्यन्ये । इति भरतः ॥ देवाद्वृतः । देवतादयात् याचितः । उत्कृष्टः ।
"तपोभिरिष्यते यस्तु देवेभ्यः स वरो मतः ।"
इति च भरतः ॥
जामाता । (यथा, रघुः । ६ । ८६ ।
'प्रमुदितवरपक्षमेकतस्तत्
क्षितिपतिमण्डलमन्यतो वितानम् ॥")
षिड्गः । इति मेदिनी । रे, ३४ ॥ गुग्गुलुः । इति शब्दरत्नावली ॥ पतिः । इति हेमचन्द्रः । ३ । १८८ ॥ (श्रेष्ठः । यथा, ऋग्वेदे । १ । १४३ । ५ ।
"न यो वराय मरुतामिव स्वनः सेनेव सृष्टा
दिव्या यथाशनिः ॥"
"योऽग्निर्वराय वरणाय नियन्तुं शक्यो न भवति ॥" इति तद्भाष्ये सायणः ॥)

वर, त्रि (वृ + अप् ।) श्रेष्ठः । इत्यमरः । ३ । १ । १०२ । (यथा, विष्णुपुराणे । १ । ११ । १८ ।
"राजासनं राजच्छत्रं वराश्ववरवारणाः ।
यस्य पुण्यानि तस्यैते मत्त्वैतत् शाम्य पुत्रक ॥')

वरक, क्ली, (व्रियते अनेन । वृ + अप् । ततः स्वार्थे कन् ।) पोताच्छादनम् । इति हारावली । १९ ॥ पोताधोवस्त्राधारवस्त्रम् । इति शब्दरत्नावली ॥

वरकः, पुं (व्रियते लोकैरिति । वृ + अप् । ततः कन् ।) वनमुद्गः । इति हेमचन्द्रः । ४ । २३९ ॥ धम्य ट । इति राजनिर्घण्टः ॥ क्षुद्रधान्यभेदः । चीना इति भाषा । तत्पर्य्यायः । स्थूलकङ्गुः २ रूक्षः ३ स्थूलप्रियङ्गुः ४ । अस्य गुणाः । मधुरत्वम् । रूक्षत्वम् । कषायत्वम् । वातपित्तकारित्वञ्च । इति राजनिर्घण्टः ॥ (वर + स्वार्थे कन् । याचकविशेषः । यथा, महाभारते । ३ । १०७ । ५१ ।
"स वव्रे तुरगं तत्र प्रथमं वरकारणात् ।
द्वितीयं वरकं वव्रे पितृभ्यो यावनेच्छया ॥")

वरक्रतु, पुं, (वराः श्रेष्ठाः क्रतवो यस्य स्वर्गाधिपत्यात् तथात्वम् । यद्वा वरः क्रतुर्येषात् पुत्रकतुत्वात् तथात्वम् ।) इन्द्रः । इति हेमचन्द्रः । २ । ८७ ॥

वरचन्दन, क्ली (वरं श्रेष्ठं चन्दनम् ।) कालीयम् । देवदारु । इति मेदिनी । ने, १४२ ॥

वरट, स्त्री, (व्रियते इति । वृ + "शकादिभ्यो अटन् ।" उणा० ४ । ८१ । इति अटन् ।) कुन्दपुष्पम् । इति शब्दरत्नावली ॥

वरटः पुं, (वरति सेवते वरीवर्त्तीति । वृञ सेवायाम् + "शकादिभ्योऽटन् ।" उणा० ४ । ८१ । इति अटन् ।) हंसः । इति मेदिनी । टे, ५१ ॥ कीटविशेषः । बोलता इति भाषा । तत्पर्य्यायः । गन्धोली २ वरटा ३ । इत्यमरः ॥ गन्धोलिः ४ वरला ५ । इति शब्दरत्नावली ॥ वरली ६ । इति जटाधरः ॥ सुमा ७ क्रूरा ८ सुवर्णका ९ । इति राजनिर्घण्टः ॥

वरटा, स्त्री, (वरट + टाप् ।) हंसी । (यथा, नैषधे । १ । १३५ ।
"मदेकपुत्रा जननी जरातुरा
नवप्रसूतिर्वरटा तपस्विनी ॥")
वरला । इत्यमरः । २ । ५ । २५ ॥ कुसुम्भवीजम् । इति भावप्रकाशः ॥ (अस्या गुणा यथा,—
"वरटा मधुरा स्निग्धा रक्तपित्तकफापहा ।
कषाया शीतला गुर्व्वी स्वादुर्वातविकारहा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वरटी, स्त्री, (वरट + जातौ ङीष् ।) हंसी । इति मेदिनी । टे, ५१ ॥ गन्धोली । इति त्रिकाण्डशेषः ॥ (यथा सुश्रुते कल्पस्थाने ८ अध्याये ।
"दष्टस्तुण्डीविटिवरटीभिर्न पदीमूकपल-
भिकामक्षीभिमरा शूकतुल्यविषा ॥")

वरट्टिका, स्त्री, कुसुम्भवीजम् । तत्पर्य्यायः । वरटा २ । अस्या गुणाः । मधुरत्वम् । स्निग्धत्वम् । रक्तपित्तकफापहत्वम् । कषायत्वम् । शीतलत्वम् । गुरुत्वम् । स्वादुत्वम् । अनिलापहत्वञ्च । इति भावप्रकाशः ॥

वरण, क्ली, (वृ + भावे ल्युट् ।) कन्यादिवरणम् । (यथा, महाभारते । १ । १९ । ७ ।
"न च विप्रेष्वधीकारो विद्यते वरणं प्रति ।
स्वयंवरः क्षत्रियाणामितीयं प्रथिता श्रुतिः ॥")
वेष्टनम् । इति मेदिनी । णे, ३५ ॥ पूजनादि । इति शब्दरत्नावली ॥ * ॥ अथ वरणविधिः । तत्र माध्यन्दिनीयानां होमपद्धतौ कर्म्मणि होमात् पूर्व्वमाचार्य्यं यजमानेन स्वयं वरणं कार्य्यम् । दानवाक्यवाक्यान्यवरणप्रमाणेषु यजमानः प्रतीयात् । इति हरिशर्म्मधृतकात्यायनवचनात् । तत्र मध्यवरणं प्रथमतः । ज्योतिष्टोमे । ... होमादौ ... कर्म्मकरणाय प्रेरणम् । तत्र च । सर्व्वत्र भारद्वाजो दाता यजीता च उदङ्मुखः । इति वचनात् यजमानस्य प्राङ्मुखत्व आचार्य्यादीनामुदङ्मुखत्वं प्रतीयते । वरणविधिमाह कात्यायनः । आचार्य्यमाचार्य्य आह माधु भवानास्तामर्च्चयिष्यामो भवन्तमिति । आचार्य्यमाचार्य्यानेव सन्नाम्याह साधु भवानास्तामिति । साधुवनादी इति प्रतिवचनम् । अर्च्चयिष्यामो भवन्तमिति युक्ते अर्च्चय इति प्रतिवचनं सामयात् । इति हरिशर्म्मा । इति कन्याचारतत्त्वम् ॥ * ॥ मेदिनीमते वकारादिशब्दोऽयम् । किन्तु अन्ये उकारादिरेवायोरमदमनुरेव विषय-मादय लिखितः ॥

वरण, पुं, (व्रियते अनेन वृणोतीति वा । वृ + "वृदृभ्यां उनन् ।" उणा० ३ । ५३ । इति उनन् ।) प्राकारः । वरकस्तम्भः । इत्यमरः । २ । २ । ३ । (यथा, किराते । ५ । २५ ।
"इह सिन्धवश्च वरणावरणाः
करिणां मुदे सनलदानलदाः ॥")
सेतुः । इति हारावली । ८१ ॥ वंशकः । इति हलायुधः । बाष्टी इति भाषा ॥

वरणसी स्त्री, वाराणसी । इति शब्दरत्नावली ।

वरणा, स्त्री, (वरण+टाप् ।) नदीविशेषः । इति शब्दरत्नावली । सा तु वाराणस्युत्तरसीमा । तस्या उत्पत्तिर्यथा —

हरिरुवाच ।
"महेश्वर ब्रह्मविभो मम वाक्य कालनाशम् ।
सत्यदयासमयकरीं शुभदां पुण्यवर्द्धिनीम् ।
योऽसौ प्राक्कालजे पुण्ये सम्प्रभवोऽव्ययः ।
प्रयागे वसत नित्यं योगशायी तु विश्रुत ।
चरणाद्दक्षिणात्तस्य विनिर्याता सरिद्वरा ।
विश्रुता वरणेत्येवं सर्व्वपापहरा शुभा ।
सव्यादन्या द्वितीया च असिरित्येव विश्रुता ।
ते उभे च सरिच्छ्रेष्ठे लोकपूज्ये बभूवतुः ।
ताभ्यां मध्ये तु यो देशस्तत् क्षेत्रं योगशायिनः ।
त्रैलोक्यप्रवरं तीर्थं सर्व्वपापप्रमोचनम् ।
न तादृशोऽस्ति गगने न भूम्यां न रसातले ।
तत्रास्ति नगरी पुण्या ख्याता वाराणसी शुभा ।
यस्यां हि भोगिनो नाथ प्रयान्ति भवनो लयम् ।'
इति वामने ३ अध्यायः ।

वरण्डः पुं (वृणोतीति । वृ+"अण्डन्कृसृभृवृञः ।" उणा १ । १२८ । इति अण्डन् ।) अन्तरावेदिः । समूहः । मुखरोगः । स तु मुख इति वयस्फोड़ा इति च भाषा । इति मेदिनी । डे, ११ । अत्रार्थे पवर्गीयवकारादिरयं किन्तु अन्त्यस्थवकारादिरयं धातोरौणादिक अण्डन् प्रत्ययनिष्पन्नत्वादत्र लिखितः ।

वरण्डकः पुं, (वरण्ड+स्वार्थे संज्ञायां वा कन् ।) मातङ्गवर्म्मा । हातीर हाओदा इति भाषा । यौवनकण्टकः । वयस् फोड़ा इति भाषा, वर्त्तुल । गोल इति ख्यात । इति मेदिनी । के, १ ३ । भित्ति । इति हेमचन्द्रः । मेदिनीकारेण अयं पवर्गीयवकारादौ लिखितः । किन्तु हेमचन्द्रेण वृणधातुनिष्पन्नत्वात् अन्त्यस्थवकारादौ परिगणितः ।

वरण्डक, त्रि, (वरण्ड+कन् ।) विशाल । भयसम्पन्न । लघु । इति शब्दरत्नावली ।

वरण्डा, स्त्री (वरण्ड+टाप् ।) शारिका । वर्त्तिः । शस्त्रभेद । इति मेदिनी । ते ११ ।

वरण्डालुः पुं (वरण्ड इव आलुरस्य ।) एरण्डवृक्षः । इति त्रिकाण्डशेषः ।

वरतिक्तः पुं, (वर श्रेष्ठस्तिक्तरसो यस्य ।) कुटजवृक्षः । इति राजनिर्घण्टः । (पर्पटकः । तत्पर्यायो यथा,—
"पर्पटो वरतिक्तश्च स्मृतः पर्पटकश्च सः ।
कथितः पांशुपर्य्यायस्तथा कवचनामकः ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

वरतिक्तिका, स्त्री, (वरतिक्त+स्वार्थे कन् । टाप् । अत इत्वम् ।) पाठा । इति राजनिर्घण्टः । आकनादि इति भाषा । (यथास्याः पर्य्यायः ।
"पाठाम्बष्ठाम्बष्ठकी च प्राचीना पापचेलिका ।
एकष्ठीला रसा श्रेया पाठिका वरतिक्तिका ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

वरकरी, स्त्री, रेणुकानामगन्धद्रव्यम् । इति शब्दचन्द्रिका ।

वरत्रा स्त्री, (व्रियतेऽनयेति वृ+"वृञ्चित ।" उणा ३ । १०७ । इति अत्रन् । टाप् ।) हस्तिकक्ष्यरज्जुः । वाकदड़ी इति ख्याता । तत्पर्य्यायः । चूषा २ कक्ष्या ३ कक्षा ४ । चर्म्मरज्जुः । तत्पर्य्यायः । नद्धी २ वध्री ३ वर्ध्री ४ वाध्री ५ । इत्यमरभरतौ । (यथा, ऋग्वेदे । १ । १०। ८ ।
"वधायुतो वरत्रया मह्याति भद्रयायकम् ।")

वरत्वच पुं, (वरा हितकरी त्वचा यस्य ।) निम्बवृक्ष । इति रत्नमाला ।

वरदः त्रि, (वर ददातीति । दा+"आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) अभीष्टदाता । तत्पर्य्यायः । समर्द्धक २ । इत्यमर । ३ । १ । ७ । समर्द्ध ३ वाञ्छितप्रद ४ । इति शब्दरत्नावली । (यथा, महाभारते । १ । २ । २१० ।
"वरद स वर वव्रे काशाम्य क्रियतो मम ।
प्रत्यक्षतो प्रतिश्रुत्य जगामादित्य पावकात् ।")
प्रसन्न । इति मेदिनी । दे, ३० ।

वरदा, स्त्री, (वरद+टाप् ।) कन्या । इति मेदिनी । दे ३७ । आदित्यभक्ता । इति राजनिर्घण्टः । (पर्य्यायो यथा —
"सुवर्चला सूर्य्यभक्ता वरदा वरदापि च ।
सूर्य्यावर्त्ता रविप्रीता परा ब्रह्मसुवर्च्चला ।"
इति च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
अश्वगन्धा । इति भावप्रकाश । वरदात्री च । (यथा, भागवते । ३ । १६ । २२ ।
"धर्म्मस्य ते भगवतस्त्रियुगस्त्रिभि स्वै
पद्भिश्चराचरमिदं द्विजदेवतार्थम् ।
नूनं भृतं तदभिघाति रजस्तमश्च
सत्त्वेन नो वरदया तनुवा निरस्य ।")

वरदाचतुर्थी स्त्री (वरदाख्या चतुर्थी ।) माघशुक्लचतुर्थी । तस्यां गौरी पूज्या । यथा । भविष्योत्तरे माघशुक्लपक्षमधिकृत्य ।
"चतुर्थी वरदा नाम तस्यां गौरी सुपूजिता ।
सौभाग्यमतुलं कुर्य्यात् पञ्चम्यां श्रीरपि श्रियम् ।"
इति तिथ्यादितत्त्वम् ।

वरदारु, पुं, (ददातीति । दा+रुन् । वरश्चासौ दारु ।) वृक्षविशेष । भूरस इति हिन्दी भाषा । तत्पर्य्याय । भूमौषध २ दारदारु ३ अरण्यदर ४ । अस्य गुणा । शिशिरत्वम् । रक्तपित्तप्रशमनत्वञ्च । इति भावप्रकाश ।

वरधर्म्माख्य, पुं, (वराणि धर्म्माण्यस्य । वरधर्म्मेति आख्या यस्य ।) चीरकञ्चुकोद्रुम । इति रत्नमाला ।

वरप्रदा, स्त्री (वर प्रददातीति । प्र+दा+कः ।) लोपामुद्रा । इति हेमचन्द्र । २ । ३० ।
वरदातरि, त्रि ।

वरफलः, पुं, (वरं फलमस्य ।) नारिकेलवृक्ष । इति शब्दचन्द्रिका । तत्पर्य्याये फेडफले च क्ली ।

वरमुखी, स्त्री, (वर मुखमस्याः । ङीष् ।) रेणुकानामगन्धद्रव्यम् । इति शब्दचन्द्रिका ।

वरयिता, [तृ] पुं, (वृ+णिच् । तृच् ।) भर्त्ता । इति हेमचन्द्र । वरणकारयिता च ।

वररुचिः, पुं, (वरा रुचिरस्य ।) कविविशेष । तत्पर्य्याय । पुनर्व्वसु २ । इति त्रिकाण्डशेष । स च विक्रमादित्यराजसभास्थनवरत्नान्तर्गतरत्नविशेष यथा,—
"धन्वन्तरिः क्षपणकामरसिंहशङ्कु
वेतालभट्टघटकर्परकालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य ।"
इति नवरत्नम् ।

वरल, पुं स्त्री, (वृणातीति । वृ+अलच् ।) वरटः । बोलता इति भाषा । यथा,
"विवस्त्री भङ्गरोलो वरलस्तु वषट्पद ।"
इति शब्दमाला ।

वरलब्धः, पुं, (वर उत्कर्षो लब्धः पुष्पेषु येन ।) चम्पकवृक्ष । इति त्रिकाण्डशेष । (वरेण लब्धः ।) वरप्राप्ते त्रि ।

वरला, स्त्री, (वृ+अलच्+टाप् ।) हंसी । इति मेदिनी । ले, ११८ । तत्र पवर्गीयवकारादौ पठितोऽयम् । वरटा च ।

वरली, स्त्री, (वरल+ङीष् ।) वरटा । इति जटाधरः ।

वरवत्सला स्त्री, (वरे जामातरि वत्सला ।) श्वश्रूभार्य्या । इति शब्दमाला ।

वरवर्णिनी, स्त्री, (वरः श्रेष्ठो वर्णः प्रशस्तः पीतो हरिद्रास्फूपस्या इति । वरवर्ण+इनिः । ङीप् ।) उत्तमा स्त्री । तत्पर्य्यायः । वरारोहा २ मत्तकाशिनी ३ उत्तमा ४ । इत्यमर । २ । ६ । ४ । मत्तकामिनी ५ । इति भरत । (यथा, विष्णुपुराणे । १ । १५ ।
"इत्थंभूता च कन्येयं वार्क्षेयी वरवर्णिनी ।
भविष्यत् भवता पूर्व्वं मया गोभिर्विवर्द्धिता ।")
लाक्षा । हरिद्रा । रोचना । प्रियङ्गुः । वाच्यस्त्री । इति मेदिनी । ने, ४४३ । गौरी । (यथा, महाभारते । ४ । २२ । २१ ।
"भद्रकालि ! नमस्तुभ्यं महाकालि नमोऽस्तु ते ।
चण्डि ! चण्डे ! नमस्तुभ्यं तारिणि ! वरवर्णिनि ! ।")
सरस्वती । लक्ष्मी । इति शब्दरत्नावली ।

वराशोक, स्त्री, कुङ्कुमम् । इत्यमरटीका ।

वरशृङ्गः, पुं (वरः श्रेष्ठो शृङ्गः पुरातनः ।) शिवः । इति त्रिकाण्डशेषः ।

वरा, स्त्री, (वृ+अप्+टाप् ।) फलत्रिकम् । इति मेदिनी । रे, ४२ । रेणुकानामगन्धद्रव्यम् । इति शब्दचन्द्रिका । गुडूची । मेदा । ब्राह्मी । विडङ्गम् । पाठा । हरिद्रा । इति राजनिर्घण्टः । मेदा च ।

वराकः, पुं, (वृणोति तत्त्वेन इति । वृ+"वृक्षभिपकाद्युत्कर्षवाक् ।" ४ । १ । १५५ ।

इति पाकम् ।) श्रेष्ठ । इति मेदिनी । के, १२८ । मुख्यम् । इति हेमचन्द्रः ।
वराक, त्रि, (वृ+"जल्पभिक्षेति ।" ३ । २ । १५५ । इति षाकन् ।) शोचनीयः । इति मेदिनी । के १२८ । अधमः । इति शब्दमाला । (यथा, मुकुन्दमालायाम् । १० ।
"नाथे श्रीपुरुषोत्तमे त्रिजगतामेकाधिपे चेतसा सेव्ये स्वस्य पदस्य दातरि परे नारायणे तिष्ठति । य कञ्चित् पुरुषाधमं कतिपयग्रामेशमल्पार्थदं सेवायै मृगयामहे नरमहो मूढा वराका वयम् ।")
वराङ्ग, क्ली, (वरमङ्गानाम् ।) मस्तकम् । गुह्यम् । इत्यमरः । ३ । ३ । २६ । गुह्यकम् । योनिः । इति त्रिकाण्डशेषः । श्रेष्ठावयवे च । (वरा श्रेष्ठान्यङ्गान्यस्य ।) तद्युक्ते त्रि । (चोचम् । यथा,
"त्वक्पत्रञ्च वराङ्गं स्याद्भृङ्गं चोचं तथोत्कटम् ।"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ।)
वराङ्ग, पुं, (वराणि श्रेष्ठान्यङ्गानि यस्य ।) हस्ती । इति त्रिकाण्डशेषः । विष्णुः । यथा,—
"सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी ।"
इति तस्य सहस्रनामस्तोत्रम् ।
वराङ्गक क्ली, (वरमङ्गमस्य । कप् ।) गुडत्वक् । इत्यमरः । २।४।१३३ । श्रेष्ठावयवयुक्ते त्रि ।
वराङ्गना स्त्री, (वरा श्रेष्ठा अङ्गना ।) अति प्रशस्ताङ्गयुक्ता स्त्री । यथा,—
"शिरः कम्पयन्त्यै चरणौ सुपूजितौ
वराङ्गनासेवनमल्पभोजनम् ।
अनम्बरत्वित्वापशयनं मैथुनं
चिरप्रनष्टां श्रियमानयन्ति षट् ।"
इति लक्ष्मीचरित्रम् ।
वराङ्गरूपोपेत, त्रि, (अङ्गानां रूपाणि अङ्गरूपाणि । वराणि अङ्गरूपाणि तैरुपेतः ।) श्रेष्ठरूपयुक्त । सुन्दर इत्यर्थ । तत्पर्यायः । सिंहसंहनन १ । इत्यमरः ।
वराङ्गी स्त्री, (वरमङ्गमन्तरवयवो यस्याः ।) हरिद्रा । इति राजनिर्घण्टः ।
वराङ्गी, [न्] पुं (वराङ्गमस्यास्तीति । इनि ।) अम्लवेतसः । वराङ्गाम्लवेतस इति वा पाठः । इति रत्नमाला । श्रेष्ठाङ्गयुक्ते, त्रि ।
वराट, पुं (वरं मन्दमटतीति । अट+कर्मणि अच् ।) कपर्दकः । इति राजनिर्घण्टः । (अस्य शोधनादिविषयो यथा —
"भूगर्भे च धने शुद्धे पत्तनीं स्थापयेत् सुधीः । सुवेश पूरयेत्तस्यां किञ्चिन्मध्यं निघम्बरः ।
वराटैः पूरितां मूषां तन्मध्ये विनिवेशयेत् । क्षारोपाधिः ततो दद्यात् माणिका पञ्चमूत्र मम् ।
अनेन म्रियते नूनं वराटः सर्वदोषजित् ।" ॥
अन्यच्च ।
"वराट तप्त चाङ्गेरी चमीरसात्रा स्वेद वा । अर्धयामपि भाण्डाणां यावत् पीत च गच्छति ।
पश्चादुद्धृत्य प्रक्षाल्य शुष्कीयाच्च वराटकान् ।"
इति वराटशुद्धिः ॥ ० ॥
इति वैद्यकरसेन्द्रसारसंग्रहे मारणमारणाधिकारे ।) रज्जुः । यथा । रज्जुः शुल्वा वराटो ना । इति स्त्रीकाण्डे रत्नकोषः । इत्यमरटीकायां भरत ॥
वराटक, पुं क्ली (वराट+स्वार्थे कन् ।) कपर्दकः । इत्यमरः । कड़ि इति भाषा । तस्य संख्याभेदेन संज्ञाभेदा यथा,—
"वराटकानां दशकद्वयं यत्
सा काकिणी ताश्च पणश्चतस्रः ।
ते षोडश द्रम्म इहावगम्यो
द्रम्मैस्तथा षोडशभिश्च निष्कः ।"
इति लीलावती ॥ ० ॥
अपि च । तान्त्रिक कायिक पण । इति याज्ञवल्क्यवचनेन शुल्वा पणात्मकाक्षकार्षिकास्तु षोडशपणः कार्षिकः । इत्यमरटीकोक्तेश्च अशीतिरक्तिकापरिमितताम्रे पणशब्द प्रसिद्ध तत्र च च तावत्संख्यकवराटकैर्लभ्यते इति वराटकेऽपि तथा व्यवहार । एतन्मूलकं भविष्यमत्स्यसूक्तयोर्वचनं यथा —
"अशीतिभिर्वराटकैः पण इत्यभिधीयते ।
ते षोडश पुराणं स्यात् रजत षड्भिस्तु ते ।"
इति प्रायश्चित्ततत्त्वम् ॥ ० ॥
ते च दक्षिणार्थं विधीयन्ते । यथा,—
"हतमयोग्यं दानं यतो यज्ञस्य प्रथितः । तस्मात् पर्णं काकिणीं वा फल पुष्पमथापि वा ।
प्रदद्यात् दक्षिणां यज्ञे तथा च सफलो भवेत् ।"
इति शुद्धितत्त्वम् ॥
वराटक, पुं, (वराट एव । स्वार्थे कन् ।) रज्जुः । पद्मबीजम् । इति मेदिनी । के, ९ २ ।
वराटकरजा, [स्] पुं (वराटक इव रजो यस्य ।) नागकेशरवृक्षः । इति शब्दमाला ।
वराटिका, स्त्री (वराट+स्वार्थे कन् । टाप् । अत इत्वम् ।) कपर्दकः । इत्यमरटीकायां भरत राजनिर्घण्टश्च । (यथा, नैषधे ।२।८८
"बहुकम्बुमणिर्वराटिका
गणनाटत्करकर्कटोत्करः ।")
तुच्छवाचिका च । यथा —
"प्रयाति मत्सरे येन तस्य मता वराटिका ।"
इत्युद्भटः ।
वराण, पुं (व्रियते इति । वृ+युच् । पृषोदरात् दीर्घः ।) इन्द्रः । इति त्रिकाण्डशेषः । वरुणवृक्षः । इति शब्दरत्नावली ।
वराणसी, स्त्री, (वाराणसी पृषोदरादित्वात् साधु ।) काशी । यथा,—
"काशी वराणसी वाराणसी शिवपुरी च सा ।"
इति हेमचन्द्रः ।
वरारक, क्ली, (वरे राजभिरट्यते इति । अट्+ण्वुल् ।) राजादनम् । इति शब्दचन्द्रिका ।
वराभिध, पुं, अम्लवेतसः । इति राजनिर्घण्टः । (वरा अभिधा यस्य ।) श्रेष्ठनामा च ।
वराम्ल पुं, (वर श्रेष्ठ अम्लोऽस्य । इत्यमरः ।) करमर्द्दः । इति रत्नमाला । वराम्ल इति वा पाठ ।
वरारक, क्ली (वर श्रेष्ठ धनिनं ऋच्छति गच्छति । ऋ+ण्वुल् ।) हीरकम् । इति हेमचन्द्रः । ४ । १११ । (गुणादयोऽस्य हीरकशब्दे ज्ञातव्याः ।)
वरारोह, पुं, (हस्तिन उपरितात् आवरोहणस्य वर आरोहो यस्य ।) हस्त्यारोह । आरोह । इति विश्वः ।
वरारोहा, स्त्री, (वर आरोहो नितम्बो यस्याः ।) उत्तमा स्त्री । इत्यमरः । २ । ६ । ४ । (यथा, महाभिषेकस्तवे । ४ । ४७ ।
"यदा तु वैदिकी दीक्षा दीक्षा पौराणिकी तथा ।
न स्यात्तत्र वरारोहे । तदैव प्रभव कलि ।")
कटि । इति हेमचन्द्रः ।
वरालिका, स्त्री, (वरा आलिका सखी यस्याः देवा ।) दुर्गा । इति त्रिकाण्डशेषः ।
वराशि, पुं, स्थूलवस्त्रम् । मोटा कापड़ इति भाषा । तत्पर्याय । स्थूलशाटक १ । इत्यमरः । वराशि २ स्थूलशाटकम् ३ स्थूलशाटिका ४ । इति तट्टीकायां भरत । स्थूलपट्टक ५ । इति शब्दरत्नावली । वराशि ७ । क्षौममिति जटाधरः ।
वरासन क्ली (वरार्थे दुर्गायै अस्यते क्षिप्यते दीयते इति यावत् । अस्+ल्युट् ।) ओड्रपुष्पम् । इति शब्दमाला । (वरमासनमिति ।) उत्तमासनञ्च ।
वरासन, पुं (वरां स्त्रीयां नारीं अस्यति अवतीति । अस्+ल्यु ।) विटः । (वरामपि जनान् अस्यति दूरीकरोतीति ।) द्वारपाल । इति विश्वः ।
वरासि, पुं (वरे श्रेष्ठे अस्यते क्षिप्यते इति । अस्+इन् ।) स्थूलशाटकः । (वरोऽसिर्यस्य ।) खड्गधरः । इति धरणि ।
वरासी, स्त्री, आवपाक । इति शब्दमाला ।
वराह, पुं (वरान् आहन्ति इति दुर्गः । हन् ३ । २ । ३८ । वर+हन् ।) पशुविशेष । बरा इति भाषा । तत्पर्याय । शूकर २ घृष्टि ३ कोल ४ पोत्री ५ किरि ६ किटि ७ दंष्ट्री ८ घोणी ९ स्तब्धरोमा १० क्रोड ११ भूदार १२ । इत्यमर । किर १३ सूकर १४ स्तब्धशूल १५ । इति जटाधर । स्थूलनासिक १६ दंष्ट्रायुध १७ बहुप्रज १८ रोमश १९ आखनिक २० भूक्षित् २१ बहुरः २२ । इति शब्दरत्नावली । अस्य मांसस्य गुणा । श्रमघ्नम् । वातघ्नम् । बलवर्द्धनञ्च । इति राजवल्लभ । बाहुबलम् । विष्टम्भनञ्च । इति तत्रैव पाठान्तरम् । अन्यत् शूकरशब्दे द्रष्टव्यम् ॥ ० ॥

तस्यैव निवेद्ये न देयम्। यथा। "नाभक्ष्यं नैवेद्यार्थे भक्ष्येष्वप्यजामहिषीक्षीरं पञ्चनखमत्स्यवराहमांसानि चेति।" इत्याह्निकतत्त्वधृतविष्णुसूत्रम्। *। वराहमांस भुक्त्वा विष्णुपूजादिनिषेधो यथा,—

वराह उवाच।

"भुक्त्वा वाराहमांसन्तु यो वै मामुपसर्पति।
पतनं तस्य वक्ष्यामि यथा भवति सुन्दरि!॥
वराहो दश वर्षाणि भूत्वा तु चरते वने।
व्याधो भूत्वा महाभागे समाः सप्त च सप्तति॥
कृमिर्भूत्वा समाः सप्त तिष्ठति तस्य पृष्ठके।
अघोरेऽमूषिको भूत्वा यथाश्याश्च चतुर्दश॥
एकोनविंशवर्षाणि यातुधानश्च जायते।
प्रस्तकश्चाष्टवर्षाणि जायते भवने बहु॥
षड्विंशतिवर्षाणि जायते पिशिताशनः।
एवं संसारितात्मा वाराहामिषभक्षकः॥
जायते विपुले विष्ठे कुले भागवतस्तथा।
हृषीकेशश्च श्रुत्वा सर्व्वसम्भूतसम्भवम्॥
प्रियता चाञ्जलिं कृत्वा मामर्चेदसुधाम च।
एतत्ते परमं गुह्यं तव भक्तसुखावहम्।
वाराहमांसभक्षास्तु येन मुच्यन्ति किल्बि-
षात्॥

वराह उवाच।

तरन्ति मानवा येन विष्कलसंसारसागरान्।
गोमयेन दिनं पञ्च कणाहारेण सप्त वै॥
प्राशीयन्तु ततो भुक्त्वा तिष्ठेत् सप्ताहं तत्र।
यवाहारस्त्र्यहं सप्त सक्तुभिश्च तथा त्रयम्॥
तिलभक्षो दिनान् सप्त सप्त पायसभक्षकः।
पयो भुक्त्वा दिनं सप्त कारयेच्छुद्धिमात्मनः॥
शान्तदान्तपरा भूत्वा अहङ्कारविवर्जिता।
दिनान्येकोनपञ्चाशच्चरेत व्रतनिश्चयः॥
प्रमुक्तः सर्व्वपापेभ्यः समझो विगतज्वरः।
कृत्वा तु मम कर्म्माणि मम लोकाय गच्छति॥"

इति वाराहमांसभक्षणापराधप्रायश्चित्तम्।
इति वाराहपुराणम्। *।

वन्यवराहमांसं श्राद्धादौ विहितम्। यथा अक्षय्यतृप्तौ हारीतः। महारण्यवासिनश्च वराहाश्चेति। एतच्च विवरणे ग्राम्यशूकराश्चेति वचनोक्तश्वेताश्वेततया व्यवस्थितम्। कल्पतरुस्तु। श्राद्धे नियुक्तानि शुक्र तथैवेति। विष्णूपासकस्य सर्व्वथा निषेधः। यथा वाराहे भगवद्वाक्यम्।

"भुक्त्वा वाराहमांसन्तु यस्तु मामुपसर्पति।
वराहो दशवर्षाणि भूत्वा वै चरते वने॥"

इत्येकादशीतत्त्वम्। *।

याज्ञवल्क्यः।

"हविष्यान्नेन वै मासं पायसेन च वत्सरम्।
मात्स्यहारिणकौरभ्रशाकुनच्छागपार्षतैः॥
ऐणरौरववाराहशाशैर्मांसैर्यथाक्रमम्।
मासवृद्ध्याभितृप्यन्ति दत्तैरेव पितामहाः॥"

इति श्राद्धतत्त्वम्। *।

विष्णोरवतारविशेषः। यथा,—

स्वायम्भुव उवाच।

"कुत्र प्रजाः स्थास्यन्ति पृथिवी तावत् प्रलयार्णवे मग्ना तस्या उद्धरणे यत्नं कुरु। इति श्रुत्वा ब्रह्मा भगवन्तं ध्यातवान्। ध्यायतस्तस्य नासाविवरात् अङ्गुष्ठप्रमाणो वराहपोतो निरगात्। स च आकाशस्थः सन् क्षणमात्रेण पर्व्वतोपमो बभूव। तं विष्णुं मत्वा ब्रह्मा तुष्टाव। स च तेन स्तुतः प्रलयार्णवजलमध्ये प्रविश्य दन्ताग्रेण पृथ्वीमुद्धृत्य निजधारणशक्त्या संस्थाप्य अन्तर्हितो बभूव। तत्र पृथिव्यां राजा स्वायम्भुवमनुरासीत्।" इति श्रीभागवतमतम्। *। तदवतारकर्तृकहिरण्याक्षवधो यथा —

"वराहपर्व्वतो नाम यः पुरा हरिनिर्म्मितः।
स एव भूतो भगवानस्माकमासुरान्तकः॥
ततश्चन्द्रप्रतीकाशमयत्नाच्छङ्खमुत्तमम्।
सहस्रारं तथा चक्रं सूर्य्यवह्निसमप्रभम्॥
यो वैकुण्ठः सुरेन्द्राणामनन्तो भोगिनामपि।
विष्णुर्यो योगविदुषां यो यज्ञो यज्ञकर्म्मणाम्॥
विश्वे यस्य प्रसादेन सवनस्था दिवौकसः।
आज्यं महर्षिभिर्दत्तमश्नुवन्ति सुधाकृतम्॥
ततो दैत्यवरः क्रूर पुराणं ब्रह्मसत्तमम्।
चक्रेण दध्मौ वेगेन विक्षिपन् दैत्यकोविदम्॥
तत्र रक्तनयनो हिरण्याक्षो महासुरः।
कोऽयमित्यब्रवन् रोषान्नारायणमुदैक्षत॥
वाराहरूपिणं देवं स्थितं पुरुषविग्रहम्।
शङ्खचक्रोद्यतकरं देवानामार्त्तिनाशनम्॥
ददर्श शङ्खचक्राभ्यां नाभ्यामसुरसत्तमः।
सूर्य्याचन्द्रमसोर्मध्ये पौर्णमास्यामिवाम्बुदः॥

ततो हिरण्याक्षसुतास्तु सर्व्वे
समादवन् दैत्यगणाः सुरेशम्।
निघ्नन्तु तां मा सहसा वराह
प्रदीप्तशस्त्रा बहुरूपरूपाः॥
तैर्मथ्यमानोऽतिमयेन सर्व्वै-
र्दैत्यासुरैर्दानवपुङ्गवैश्च।
नासौ चचालासुरवक्षसा वै
मेरौ सुवृत्ता इव मन्दराद्रिः॥
दैत्यस्तनोऽसौ सुवराहमाहवे
निपातयामास गदां ज्वलन्तीम्।
शक्तिं यथा विद्युतमाशु कृष्णे
प्रपद्यमानोऽपि गिरिं सुमेरु॥
स हन्यमानो ह्यनपायमेयः
प्रोवाच देवं सुवराहमूर्त्तिः।
प्रजापतेः सूनुमिमं निहत्य
मन्ये च स्वस्ति यथा सुरेन्द्रः॥
बलं समादाय परैरजेयं
विनाशयिष्याम्यहमेव माया।
दैत्यांस्तथा साकमतो हि दैत्यान्
कुलक्षयोत्थान् सुमयोपपन्नान्॥
संशामयिष्यामि न संशयोऽत्र
दैत्येन्द्रदर्पं च तु सङ्गमे वै॥

एवं ब्रुवति वाक्यन्तु विष्णोरथ चक्रमागतम्।
स चातुमतमुद्यम्य चर्म्मप्रहरणं दधे॥
दानवाश्चापि समरे मयतारपुरोगमाः।
उद्यतायुधनिस्त्रिंशाः सर्व्वे तं समुपाद्रवन्॥
स ताड्यमानोऽतिबलैर्दैत्यैः शस्त्रायुधोद्यतैः।
न चचाल वराहस्तु मैनाक इव पर्व्वतः॥
क्रोधसंरक्तनयनः शङ्खचक्रधरो हरिः।
व्यचरत् स वेगेन चाभ्रमन् सर्व्वतो दिशम्॥
स मयाद्यासुरेन्द्राणां बहुमानं नभस्तले।
अवधं सह गन्धर्व्वैस्तुष्टुवुर्मुनिसत्तमम्॥
दीप्तादित्यार्कं घोरं दर्शनीयसुदर्शनम्।
सुवर्णरेणुपर्य्यन्तं वज्रनाभं भयावहम्॥
मेदोऽस्थिमज्जारुधिरैः सिक्तं दानवसम्भवैः।
अद्वितीयं प्रहारेषु क्षुरपर्य्यन्तमण्डलम्॥
स्रग्दाममालाविततं कामगं कामरूपिणम्।
चक्रमुद्यम्य समरे वाराहः स्वेन तेजसा॥
चिच्छेद शार्ङ्गचक्रेण हिरण्याक्षस्य * तथा।
स छिन्नबाहुर्विशिरा न प्राकम्पत दानवः॥
कबन्धस्तु स्थितः सङ्ख्ये विशाख इव पादपः।
ततः स्थितस्यैव शिरस्तस्य भूमावपातयत्॥
हिरण्मयं रत्नचित्रं मेरोः शृङ्गमिवोत्तमम्।
हिरण्याक्षे हते दैत्या ये शेषाश्चैव दानवाः॥
सर्व्वे तस्य भयात् त्रस्ता असुराश्च दिशो
दश॥"

इति वह्निपुराणम्। *।

अथ वराहावतारकारणम्। शरभरूपिमहादेवकर्त्तृकतच्छरीरनाशश्च।

"त्रैलोक्यमखिलं दग्धं यदा कालाग्निना तदा।
अनन्तः पृथिवी ब्रह्मा विष्णोरन्तिकमागताः॥
तेन मत्ता तु पृथिवी चाश्मभारादधोगता।
ततो वराहरूपेण निमग्नां पृथिवीं जले॥
मग्नां समुद्धरात् क्षमात् तत्स्थितिञ्चोपरि।
वराहोऽपि स्वयं गत्वा लोकालोकाख्य गिरिम्॥
वाराह्या सह रेमे स पृथिव्या चारुरूपया।
स तया रममाणस्तु सुचिरं पर्व्वतोत्तमे॥
नावाप बोधं लोकेशो योऽसौ परमकारुकः।
पृथिव्यां योषिद्रूपायां रमयन्त्यास्ततः सुताः॥
त्रयो जाता द्विजश्रेष्ठास्तेषां नामानि वै शृणु।
सुवृत्तः कनको घोरः सर्व्वे एव महाबलाः॥
स तैः पुत्रैः परिवृतो वाराहो भार्य्यया तथा।
रममाणस्तदा कायमास वैयाकुलिया॥
इतस्ततश्च शिशुभिः क्रीडद्भिः पोत्रिभिस्तदा।
जगन्ति तत्र भग्नानि मही कल्पान्तके यथा॥
ततो देवगणाः सर्व्वे व्यथिता दैत्ययोनिभिः।
एवं च व्यथिता मत्वा चक्रुः सम्यक् च कारितम्॥
ततो विविश्य ते सर्व्वे प्रजाया सुरभिः सह।
शरण्यं शरणं जग्मुर्नारायणमथ विभुम्॥
तं समाराध्य गोविन्दं वासुदेवं जगत्पतिम्।
प्रणम्य सर्व्वे विज्ञाप्य सुदुःसहभयक्रमम्॥

देवा ऊचुः।

नमस्ते देवदेवेश! जगत्कारणकारण!।
कालरूपिन् भगवन् महाभूतरवाश्रय॥
इति स्तुतो देवदेवो भूतभावनभावनः।
सिद्धैर्देवगणैः सार्द्धं तान् यथार्थं देवविभुः॥

श्रीभगवानुवाच ।
यदर्थमागता यूयं ब्रह्मा मत्समन्वितम् ।
यत्र यद्वा मया कार्य्यं तद्वैवाकुलमुच्यताम् ॥
देवा ऊचुः ।
धीमन्नेते वसुधा नित्यं क्रीडया यज्ञपोत्रिण ।
लोकाश्च सर्व्वे सन्तुष्टा नाप्नुवन्त्युपशान्तिताम् ॥
इति तेषां निशम्यैतां श्रुत्वा वाक्यं जनार्द्दन ।
उवाच शङ्करं देवं ब्रह्माणञ्च विशेषतः ।
मनुते देवता ब्रह्मा प्रजाश्च सकला इमाः ।
प्राप्नुवन्ति महद्दुःखं धीमति सकलं जगत् ॥
वाराहं तच्च कायं त्यक्तुमिच्छामि शङ्कर ।
निर्द्दिष्टमस्ति यत् त्यक्तुं स्वेच्छया नहि शक्यते ॥
तं त्राणयस्व तत् कायं यथात्मा शङ्कराधुना ।
समाप्यायस्व तेजोभिर्येन शारभं तनुम् ।
आप्यायन्तु तदा देवा शङ्करो यत्र योगिनम् ।
रूपत्रयाणां सर्व्वात् विप्राणां भारवान् तथा ।
काय पापकरो भूयस्त्यक्तुं शक्तोऽधुना ।
प्रायश्चित्तैरपैतैर्वै प्रायश्चित्तमथ तत ।
चरिष्यामि तदर्थं मे सद्वृत्तेन पाल्यताम् ॥
प्रजा पाल्या मम सदा या हि योगीति निश्चय ।
मत्कृते प्रत्यहं तस्मात् त्वत्ते कार्यं प्रजापते ॥
श्रीमार्कण्डेय उवाच ।
इत्युक्तौ वासुदेवेन तदा च ब्रह्मशङ्करौ ।
तथा यथोक्तं तत् कार्य्यमिति गोविन्दमूचतुः ॥
वासुदेवोऽपि तान् सर्व्वान् विसृज्य त्रिदशांस्तदा ।
वाराहं तेजसा स्वं तु ध्यानपरोऽभवत् ॥
शर्व्वे शर्व्वैर्यदा तेज आदरेणैव माधव ।
तदा दधत्तु वाराहं शरभेण व्यवायत ॥
अष्टाष्टाङ्घ्रिरथो वर्ष्मे महादेवसमाप्रतिम् ।
ऋतुजग्मुस्तथा तेन व्याधातु धारणाप्रने ।
ततः सर्व्वैर्गणैः स स तेजो ह्युद्धवन् ।
आत्मधी तेन बलवान् घोरतापः समजायत ॥
ततः शरभरूपी च सहस्रबाहुशिरोऽभवत् ।
ऊर्द्धाधोभागतश्चाष्टपादयुक्तः सुभैरवः ॥
ज्वलनपीतनेत्रश्च चाष्टशृङ्गविभूषितः ।
ऊर्द्ध्वं वराहकायस्तु जघ्नोरुपलविस्तृतः ॥
तथाऽविस्तृते पार्श्वे वहमानस्तदाभवत् ।
समायान्तं ततो दृष्ट्वा कोपादावनमच्युतः ॥
सुतप्त कनको घोर आसीद् कोपमिश्रिता ।
उत्क्षिप्य युगपत् पोत्रघातैरधावत ॥
ततस्तु नखप्रहारेण शरभः वक्षमध्यतः ।
भित्त्वा वर्ष्म वराहस्य पातयामास तत्क्षणे ॥
स पातयित्वा प्रथमं सुदृढं कनकं तथा ।
धोरश्च खुरैरेव भित्त्वा भित्त्वा चचार च ॥
बलपातात्तु ते सर्व्वे निमग्ना वै महार्णवे ।
जगद्भुव विलयात्मा ज्वालानलसमर्पित ॥
पतितेषु वराहेषु तथा विष्णुरस्तथा ।
स्वकार्यं चिन्तयामास पुनरेव यथायथा ॥"
इति कालिकापुराणीयाद्यर्थस्त्रिंशाध्यायात् सङ्कलित ॥ * ॥ विष्णुः । मानभेदः । पर्म्मभेदः । मुस्ता । इति मेदिनी । हे, २६ ॥ (पर्वतविशेषः । उदाहरणम् । यथा, महाभारते । २ । २१ । २ ।
"वैहारो विपुलः शैलो वराहो वृषभस्तथा ।
तथा ऋषिगिरिस्तात शुभाश्चैत्यकपञ्चमाः ॥")
शिशुमारः । वाराहीकन्दः । इति राजनिर्घण्टः । अष्टादशद्वीपान्तर्गतक्षुद्रद्वीपविशेषः । यथा,—
"गन्धर्व्वा यवम सौम्यो वराह शङ्ख एव च ।
कुमुदश्च कशरुश्च नागो भद्रारकस्तथा ।
चन्द्रमस्तथा सुकृतवाङ्कमभक्तिमान् ।
ताम्राकुश कुमारी च तथ होमा इमाऽदश ॥"
इति शब्दमाला ॥
(कृष्णपिण्डीरः । तत्पर्य्यायो यथा,—
"वराहः कृष्णपिण्डीरः कृष्णपिण्डीतकश्च सः ॥"
इति वैद्यकरत्नमालायाम् ॥)

वराहकन्दः पुं, (वराहप्रियः कन्दो यस्य ।) वाराही । इति राजनिर्घण्टः ॥

वराहकान्ता, स्त्री, (वराहस्य कान्ता प्रियेति ।) वाराहीकन्दः । इति शब्दरत्नावली ॥

वराहकाली, [न्] पुं (वराहवत् कलति इति । कल + णिनि ।) सूर्य्यभक्तिपुष्पवृक्षः । तत्पर्य्यायः । सूर्य्यावर्त्तः २ । इति हारावली । ८४ ॥

वराहक्रान्ता, स्त्री, (वराहेन क्रान्ता अतिप्रियत्वात् ।) क्षुपविशेषः । इति शब्दमाला ॥ तत्पर्य्यायः । लज्जालुः २ समङ्गा ३ शमकारिका ४ वराहनामा ५ वन्दरा ६ शूकरी ७ निक्तगन्धिका ८ नमस्कारी ९ गण्डकाली १० खदिरी ११ । इति रत्नमाला ॥ लज्जालुका १२ अञ्जलिकारिका १३ छागाक्षि १४ गन्धकारी १५ शमीच्छदा १६ । इति पर्य्यायान्तरम् ॥ वाराही । चामारागु इति ख्याति । इति सुभूतिः । इत्यमरटीकायां भरतः ॥

वराहनामा, [न्] पुं, (वराहस्य नाम इव नाम यस्य ।) वाराहीकन्दः । इति शब्दमाला ॥

वराहिका स्त्री, कपिकच्छुः । इति राजनिर्घण्टः ॥

वराही, स्त्री, (वराहो भक्षकत्वेनास्त्यस्येति । अच् । गौरादित्वात् ङीष् ।) भद्रमुस्ता । शूकरकन्दः । इति राजनिर्घण्टः ॥

वरिवसित, त्रि (वस् + "नमोवरिवश्चित्रङः क्यच् ।" ३ । १ । १९ । इति क्यच् । ततः क्तः । "यस्य विभाषा ।" ६ । ४ । ५० । इति पक्षे यलोपः ।) उपासितः । इत्यमरः । ३ । १ । १०२ ॥

वरिवस्या, स्त्री (वरिवसः पूजायाः करणम् । वरिवस् + "नमोवरिवश्चित्रङः क्यच् ।" ३ । १ । १९ । इति क्यच् । "अ प्रत्ययात् ।" ३ । ३ । १०२ । इत्य । टाप् ।) शुश्रूषा । इत्यमरः । २ । ७ । ३५ ॥ (यथा ऋग्वेदे । १ । १६८ । १८ ।
"दुरे यदी वरिवस्या इनासो
विद्यामेष वृजनं जीरदानुम् ॥")

वरिवस्यित त्रि, (वरिवस्या सञ्जाता अस्य तारकादित्वादितच् । यद्वा वरिवस्य + क्त । "यस्य विभाषा ।" ६ । ४ । ५० । इति पक्षे यलोपाभावः ।) उपासितः । इत्यमरः । ३ । १ । १०२ ॥

वरिष्ठी, स्त्री वर्त्तिकी । इति शब्दरत्नावली ॥

वरिम स्त्री, (वृ + ष । बाहुलकात् इट ।) चत्वरः । इति शब्दरत्नावली ॥ ("वप स्थान वरिमाऽपि च ।" इत्युणादिवृत्तावुज्ज्वलदत्तः । ४ । ६२ ।)

वरिषा स्त्री भूम्नि (वृ + ष । बहुलवचनात् इट ।) वर्षा । इति भरतद्विरूपकोषः ॥

वरिषाप्रियः, पुं (वरिषा वर्षा प्रिया यस्य ।) चातकपक्षी । इति शब्दरत्नावली ॥

वरिष्ठ, क्ली, (अतिशयेन वरम् । वर + इष्ठन् ।) ताम्रम् । इत्यमरः । ३ । ९ । १११ ॥ (यथा,—
"रक्तं वरिष्ठं म्लेच्छास्यं ताम्रं शुल्वमुडुम्बरम् ॥"
इति वैद्यकरत्नमालायाम् ॥)
मरिचम् । इति मेदिनी । ठे, १५ ॥

वरिष्ठः, त्रि (अयमेषामतिशयेन वरः उरुर्वा अतिशायन इष्ठन् । प्रियस्थिरेति वरादेशः ।) इति व्याकरणम् ॥ वरतमः । (यथा, भागवते । १ । १० । १ ।
"हत्वा स्वरिक्थस्पृध आततायिनो
युधिष्ठिरो धर्म्मभृतां वरिष्ठः ॥")
उरुतमः । इति मेदिनी । ठे, १५ ॥ (यथा ऋग्वेदे । ४ । ५६ । १ ।
"यत्नौ वरिष्ठे इहतो विमिक्तन्
वृहीयाधवानिभिरै ॥")
श्रेष्ठः । इत्यमरः ॥

वरिष्ठ, पुं, (वर + इष्ठन् ।) तित्तिरिपक्षी । इति मेदिनी । ठे, १५ ॥ नारङ्गवृक्षः । इति राजनिर्घण्टः ॥ (चाक्षुषमनुपुत्रः । यथा, महाभारते । १३ । १८ । २ ।
"वरिष्ठो नाम भगवांश्चाक्षुषस्य मनोः सुतः ।"
धर्म्मसावर्णिमन्वन्तरस्य सप्तर्षिविशेषः । यथा, मार्कण्डेये । ९४ । १९ ।
"हविष्मांश्च वरिष्ठश्च ऋष्टिरन्यस्तथारुणिः ।
निश्चरश्चानघश्चैव विष्टिश्चान्यो महामुनिः ।
धर्म्मपुत्रोऽन्तरे तस्मिन् भविष्यन्ति च सप्तम ॥"
दैत्यविशेषः । यथा, हरिवंशे । २४१ । ११ ।
"वरिष्ठश्च गविष्ठश्च भूतसन्तापनो विभुः ।
सूत्रधारः किरीटी च खपोन्मादो महासुरः ॥")

वरिष्ठा, स्त्री (वरिष्ठ + टाप् ।) आदित्यभक्ता । इति राजनिर्घण्टः ॥

वरी स्त्री, (व्रियतेऽसौ । वृ + पचाद्यच् । गौरादित्वात् ङीष् ।) शतावरी । इत्यमरः । २ । ४ । १०१ ॥ सूर्य्यपत्नी । इति त्रिकाण्डशेषः ॥

वरीयान् [स्] त्रि, (अयमनयोरतिशयेन वरः उरुर्वा । ईयसुन् । प्रियस्थिरेति वरादेशः ।) श्रेष्ठः । (यथा, भागवते । ५ । १ । २ ।
"वरीयानेव ते प्रश्नः कृतो लोकहितो नृप ! ॥")
वरिष्ठः । अतिगुरुः । इति मेदिनी । ठे, १५ ॥

वरीयान्, पुं, विष्कम्भादिसप्तविंशतियोगान्तर्गता-ष्टादशयोगः । तत्र जातफलम् ।

"दाता दयालुः सुतरां सुवेशः
सत्कर्म्मकर्त्ता मधुरस्वभावः ।
नरो बलीयान् धनवान् धनाढ्यो
योगी वरीयान् यदि जन्मकाले ॥"

इति कोष्ठीप्रदीपः ॥

(पुलहस्य पुत्रः । इति भागवते । ४ । १ । ३८ ।)

वरीवर्द्दः, पुं, बलीवर्द्दः । इत्यमरटीकायां रमानाथः ॥

वरीषुः, पुं, कामः । इति त्रिकाण्डशेषः ॥

वरुटः, पुं, म्लेच्छजातिविशेषः । यथा,—

"पुलिन्दा नाहला निष्ट्याः शबरा वरुटा भटाः ।
माला भिल्लाः किरातास्च सर्व्वेऽपि म्लेच्छ-जातयः ॥"

इति हेमचन्द्रः ॥

वरुड़ः, पुं, अन्त्यजजातिविशेषः । यथा,—

"रजकश्चर्म्मकारश्च नटो वरुड एव च ।
कैवर्त्तमेदभिल्लाश्च सप्तैते चान्त्यजाः स्मृताः ॥"

एषां स्त्रीगमनादौ दोषो यथा,—

"एतांस्तु स्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च ।
पतत्यज्ञानतो विप्रो ज्ञानात् साम्यन्तु गच्छति ॥"

इति प्रायश्चित्ततत्त्वधृतयमवचनम् ॥

अस्योत्पत्तिर्यथा,—

"कैवर्त्तस्य च कन्यायां शौण्डिकाद्वैश्च शौचिकः ।
शौचिकात् शौण्डिकाज्जातो नटो वरुड़ एव च ॥"

इति पराशरपद्धतिः ॥

वरुणः, पुं, (वृणोति सर्व्वं व्रियते अन्यैरिति वा । वृ + "कृवृदारिभ्य उनन् ।" उणां ३ । ५३ । इति उनन् ।) देवताविशेषः । स च कश्यपस्य अदितिनाम्न्यां पत्न्यां जातः । तस्य चर्षण्यां पत्न्यां भृगुवाल्मीकी पुत्रौ जातौ । इति श्रीभागवतमतम् ॥ स च जलाधिपतिः पश्चिमदिक्पालश्च । तत्पर्य्यायः । प्रचेताः २ पाशी ३ यादसाम्पतिः ४ अप्पतिः ५ । इत्यमरः ॥ यादःपतिः ६ अपाम्पतिः ७ । इति तट्टीकायां भरतः ॥ अम्बुपः ८ मेघनादः ९ जलेश्वरः १० परञ्जयः ११ दैत्यदेवः १२ जीवनावासः १३ जम्बुकः(?) १४ । इति शब्दरत्नावली ॥ वारिलोमः १५ कुण्डली १६ रामः १७ सुखाशः १८ । इति जटाधरः ॥ * ॥ अनावृष्ट्यां तत्पूजादौ अस्य ध्यानविधिर्यथा । हयशीर्षपञ्चरात्रे ।

"अथ वारुणमर्च्चं कुर्य्यात् सप्तरत्नादिभिर्भवम् ।

द्विभुजं वरुणं कुर्य्यात् हंसपृष्ठस्थमम्बरम् ।
वामेन नागपाशन्तु धारयन्तं शुभेक्षणम् ।
दक्षिणं नागमाभोगं कारयेद्वरदार्पितम् ॥
वामे तु कारयेद्वृद्धिं दक्षिणे पुष्करं शुभम् ।
नागैर्नदीभिर्यादोभिः समुद्रैः परिवारितम् ॥
सर्व्वैर्वरुण देवं प्रतिष्ठाविधिनार्च्चयेत् ॥"

पुष्करं पद्मपुष्पम् । अथ ध्यानम् ।

"प्रसन्नवदनं सौम्यं हिमकुन्देन्दुसन्निभम् ।
सर्व्वाभरणसंयुक्तं सर्व्वलक्षणलक्षितम् ॥
किरीटे मौक्तिके सौम्ये शोभयन्तमवस्थितम् ।
लावण्यामृतधाराभिः स्नापयन्तमिव प्रजाः ॥
राजहंससमारूढं पाशहस्तकरं शुभम् ।
पुष्कराद्यैर्गणैः सर्व्वैः समन्तात् परिवारितम् ।
गौर्य्या कान्त्या चाद्भुतया नदीभिः परिवारितम् ।
नागैर्यादोगणैर्युक्तं मध्यार्थमिव चापरम् ।
स्वर्णहारकर्णपूरं नारायणमिवापरम् ॥"

इति ध्यात्वा पूजयेत् । वरुणमन्त्रोद्धारस्तु तन्त्रे ।

"अष्टात्रिंशात्मशैवेन चतुर्द्दशस्वरेण च ।
अर्द्धेन्दुबिन्दुयुक्तेन प्रणवोद्दीपितेन च ॥"

तेन ॐ वँ इति मन्त्रः ।

"प्रतिमायां स्थितिं कृत्वा मन्त्रेण निरोधयेत् ।
पूजयेद्गन्धपुष्पाद्यैः सान्निध्यं प्रार्थ्य भक्तितः ।
वामहस्तमहादण्डसमेत निम्नं नमो नमः ॥"

स्थितिं प्रतिष्ठाम् । निरोधयेत् अङ्गुष्ठाङ्गुष्ठ मुद्राभ्यां निरोधमुद्रां दर्शयेत् । नमस्कारमन्त्रस्तु

"वरुणो धवलो जिष्णुः पुरुषो निम्नगाधिपः ।
पाशहस्तो महाबाहुस्तस्मै नित्यं नमो नमः ॥"

इति अनावृष्टियोगतत्त्वम् ॥ * ॥

वृष्ट्यर्थं अस्य जपनीयमन्त्रो यथा,—

"पुष्करावर्त्तकैर्मेघैः प्लावयन्तं वसुन्धराम् ।
विद्युद्गर्जितसन्नद्धं तोयात्मानं नमाम्यहम् ॥
यस्य केशेषु जीमूता नद्यः सर्व्वाङ्गसन्धिषु ।
कुक्षौ समुद्राश्चत्वारस्तस्मै तोयात्मने नमः ॥"

इति ध्यात्वा मानसैरुपचारैर्वरुणमाराध्य मूलमन्त्रं जपेत् । प्रजापतिरृषिस्त्रिष्टुप् छन्दो वरुणो देवता एतावद्वाक्यमभिधाय सुवृष्ट्यर्थं जपे विनियोगः । मन्त्रस्तु गुरुमुखात् ज्ञेयः । स यथा । ॐ हरिरिन्द्रानायजारयो मरुता सुवृष्टिं गच्छ यथापमिह त्वा दिवं गच्छत तेजो वृष्टिमावह । इति मन्त्रस्य सहस्रजपानन्तरं सुवृष्टिमनोरथमतो भवति । अत्र सन्देहो न कार्य्यः ॥ १ ॥ मन्त्रान्तरम् । कूर्च्चं लक्ष्मीं तथा मायां तेन हुँ श्रीं ह्रीं इति त्र्यक्षरमन्त्रं नाभि-मात्रजलमध्ये प्रविश्य यः जपति सदा अना-वृष्टिं हरति महावृष्टिर्भवति । अष्टसहस्रजप-सङ्ख्या चतुर्गुणा तेन हविष्यवृक्षसङ्ख्यम् । दिवसत्रयानन्तरं चतुर्थदिने जपसमाप्तिः ।

"नाभिमात्रजले स्थित्वा जपेन्मन्त्रं समाहितः ।
वसुधाश्च जपेन्मन्त्रं निश्चितं वाप्य यत्नतः ॥"

अथवा ।

"वटवृक्षं जपेन्नित्यं तदा वृष्टिर्भवेत् ध्रुवम् ॥"

इति षट्कर्म्मदीपिका ॥ * ॥

पुस्तकान्तरे यं इति एकाक्षरमन्त्रोऽपि अस्य लेखितम् ॥ * ॥ महापातकिनो दण्डधनं गृहीत्वा राजा वरुणाय प्रतिपादयेत् । यथा —

"आददीत नृपः साधुर्महापातकिनो धनम् ।
आददानस्तु तल्लोभात्तेन दोषेण लिप्यते ॥
अप्सु प्रवेश्य तं दण्डं वरुणायोपपादयेत् ।
श्रुतवृत्तोपपन्ने वा ब्राह्मणे प्रतिपादयेत् ॥
ईशो दण्डस्य वरुणो राज्ञां दण्डधरो हि सः ।
ईशः सर्व्वस्य जगतो ब्राह्मणो वेदपारगः ॥"

इति मानवे ९ अध्यायः ॥ * ॥

वृक्षविशेषः । तत्पर्य्यायः । वरणः २ सेतुः ३ तिक्तशाकः ४ कुमारकः ५ । इत्यमरः । २ । ४ । २५ ॥ श्वेतपुष्पः ६ सेतुकः ७ वराणः ८ शिखिमण्डनः ९ । इति शब्दरत्नावली ॥ श्वेतद्रुमः १० श्वेतद्रुमः ११ साधुवृक्षः १२ तमालः १३ मारुतापहः १४ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । रक्तदोषशीतवातहरत्वम् । स्निग्धत्वम् । दीपनत्वम् । विस्रधिरोगजित्त्वञ्च । इति राजनिर्घण्टः । अपि च ।

"वरुणः पित्तलो भेदी श्लेष्मकृच्छ्राश्मभारुतान् ।
निहन्ति गुल्मवातास्रक्रिमींश्चोष्णोऽग्निदीपनः ।
कषायो मधुरस्तिक्तः कटुको रूक्षको लघुः ॥"

इति भावप्रकाशः ॥

अन्यच्च ।

"वरुणोऽश्मरीशूलघ्नो भेदी चोष्णोऽश्मरीहरः ।
पुष्पं वरुणजं ग्राहि पित्तघ्नं आमवातजित् ॥"

इति राजवल्लभः ॥ * ॥

जलम् । इति मेदिनी । णे ६५ ॥ सूर्य्यः । इति विश्वः ॥ (यथा, महाभारते । १ । ६५ । १५ ।

"धाता मित्रोऽर्य्यमा शक्रो वरुणस्त्वंश एव च ।
भगो विवस्वान् पूषा च सविता दशमस्तथा ॥"

मुनिभ्यसातकश्यपपुत्रविशेषः । इति महाभारतम् । १ । ६५ । ४२ ।)

वरुणात्मजा, स्त्री, (वरुणस्य जलस्य आत्मजा तदुद्भवत्वात् ।) मद्यम् । इत्यमरः । २ । १० । ३९ ॥ (विवरणमस्याः सुराशब्दे ज्ञेयम् ।)

वरुणानी, स्त्री, (वरुणस्य पत्नी । वरुण + "इन्द्रवरुणभवेति ।" ४ । १ । ४९ । इति ङीष् आनुगागमश्च ।) वरुणपत्नी । इति जटाधरः ॥ (यथा ऋग्वेदे । १ । २२ । १२ ।

"इहेन्द्राणीमुपह्वये वरुणानीं स्वस्तये ।
अग्नायीं सोमपीतये ॥")

वरुत्र, क्ली, (वृणोति आच्छादयत्यनेनेति । वृ + "अर्त्तिलूधूसूखनसहचर इत्रः ।" उणां ४ । १०२ । इति उत्रः ।) उत्तरीयवस्त्रम् । यथालोकम् प्रयोगेन निष्पन्नम् । इति सिद्धान्तकौमुद्यां उणादिवृत्तिः ॥

वरुलः, पुं, (वृ + उलच् ।) भक्तः । इति संक्षिप्तसारोणादिवृत्तिः ॥

वरूथं, क्ली, (व्रियते शरीरमनेनेति । वृ वरणे + "जृवृञ्भ्यामूथन् ।" उणां २ । ६ । इति ऊथन् ।) तनुत्राणम् । इति हेमचन्द्रः ॥ चर्म्म । इति मेदिनी । थे २१ ॥ तत्र रथगोपनार्थादौ लौहादिनिर्म्मितोऽर्थः प्रसिद्धः । (गृहम् । इति निघण्टुः । ३ । ४ ॥ यथा, ऋग्वेदे । १ । ५८ । ९ ।

"भवा वरूथं गृणते विभावो
भवा मघवन् मघवद्भ्यः शर्म्म ॥"

सैन्यम् । यथा भागवते । ९ । १ । २ ।

"तेनोदितारां द्युमतेऽभिनन्य शर्म्म
इन्द्र वरूथमिभमर्दिनमापचोऽपि ।

श्रीभगवानुवाच ।
यच्चमागता यूयं यद्वो भयमुपस्थितम् ।
यच्च यद्वा मया कार्य्यं तद्देवाः कथ्यताम् ॥
देवा ऊचुः ।
क्षोभ्यते वसुधा नित्यं क्रीडया यज्ञपोत्रिण ।
लोकाश्च सर्व्वे सक्षुब्धा नाश्नुवन्त्युपशान्तताम् ॥
इति तेषां निशम्यैतां श्रुत्वा वाक्यं जनार्द्दन ।
उवाच शङ्करं देवं प्रणम्य च विशेषतः ।
प्रभुरसि देवता सर्व्वा प्रणाम्य शरणं हर ।
प्राप्नुवन्ति महद्दुःखं शौण्डीरे सकलं जगत् ॥
वाराहं तच्च कायं त्यक्तुमिच्छामि शङ्कर ।
निर्द्दिष्टस्त्वं तत् त्यक्तुं स्वेच्छया नहि शक्यते ॥
त्वं आगच्छ तत् कायं यथात्मा शङ्कराधुना ।
समाप्यायय तेजोभिर्भैरवं भास्वरं प्रभु ।
आप्याययन्तु तदा देवा शङ्करो हन्तु पोत्रिणम् ।
इत्युक्तायां सततं विप्राणां भारत्यां तथा ।
कायं पापकरो भूत्वा त्यक्तुं शक्तोऽधुना ।
प्रायश्चित्तैस्तपैस्तैर्यैः प्रायश्चित्तमहं ततः ।
चरिष्यामि तदर्थं मे शुद्धयत्नेन भाव्यताम् ॥
प्रजा पाल्या मम सदा या हि पोत्रिन् निश्चयः ।
मत्कृते प्रयतश्च तस्मात् त्यक्ते काय प्रजाहति ॥
मार्कण्डेय उवाच ।
इत्युक्तौ वासुदेवेन तदा च सुरशङ्करौ ।
तथा यथोक्तं तत् कार्य्यमिति गोविन्दमूचतुः ॥
वासुदेवोऽपि तान् सर्व्वान् विसृज्य त्रिदशां-
स्तान् ।
वाराहं तेजसा सर्व्वं स्वयं ध्यानपरोऽभवत् ।
क्षणे क्षणे यदा तेज आददेव माधव ।
तदा हन्तुं वाराहं शरभो वै व्यजायत ॥
प्रभावादिष्वस्या सर्व्वं महादेवमुपागमत् ।
अद्भुतमूर्त्तया तेन व्याधात् शरभात्मने ॥
ततः सर्व्वदेवानां स स तेजो ह्युपाश्रिते ।
आप्यैतेन बलवान् धातेव समजायत ॥
तत शरभरूपी स तत्क्षणाद्धरिरिपोऽभवत् ।
ऊर्द्ध्वाधोभावसम्पादपार्श्वस्य शुभैरव ॥
द्विलक्षयोजनोच्छ्राय षाडलक्षैकविस्तृत ।
ऊर्द्ध्वं वराहकायस्तु लक्षयोजनविस्तृत ॥
लक्षार्द्धविस्तृत पार्श्वे धर्मावकाशोऽभवत् ।
समायान्तं ततो दृष्ट्वा क्रोधाद्धावन्तमञ्जसा ॥
सुहृत कनको घोरं आधिद्य क्रोधमूर्च्छित ।
उद्धिन्निपुच्छ प्रययौ पोत्रपातैर्महाबल ॥
ततस्तु शरभश्चाशु शरभं पक्षमध्यत ।
भित्त्वा वपुर्वराहस्य पातयामास तत्क्षणे ॥
स पातयित्वा प्रथमं सुहृत कनकं तथा ।
घोरं च कण्ठदेशेषु भित्त्वा भित्त्वा जघान च ॥
अक्षपातास्तु ते सर्व्वे पैतृसोमे महार्णवे ।
जयप्रदं विनश्याना कालापकसमर्षित ॥
पतितेषु वराहेषु तथा विष्णुवराहया ।
एतदर्थं विष्णुमायां पुनरेव समागता ॥"
इति कालिकापुराणीयपाठात्रिंशदध्या-
यात् उद्धृत ॥ ७ ॥ विष्णु । मानभेद ।
पर्व्वतभेद । मुस्ता । इति मेदिनी । हे २१ ॥

(सर्व्वतार्थे उदाहरणम् । यथा महाभारते । २ । २१ । २ ।
"वैहारो विपुलः शैलो वराहो वृषभस्तथा ।
तथा ऋषिगिरिस्तात शुभाश्चैत्यकपञ्चमाः ॥")
शिशुमार । वाराहीकन्द । इति राज-
निर्घण्टः ॥ अष्टादशद्वीपान्तर्गतक्षुद्रद्वीपविशेष ।
यथा,—
"गन्धर्व्वो वरुणः सौम्यो वराहः कङ्क एव च ।
कुमुदश्च कपिलश्च नागो भद्रारकस्तथा ॥
चन्द्रेन्द्रमनया प्रद्वयशाङ्खकामच्छिमान् ।
ताम्राङ्कश्च कुमारी च नव द्वीपा दशाष्टभिः ॥"
इति शब्दमाला ॥
(छागपिण्डीर । तत्पर्य्याया यथा,—
"वराह छागपिण्डीर छागपिण्डीतकस्तु च ॥"
इति वैद्यकरत्नमालायाम् ॥)

वराहकन्दः, पुं, (वराहप्रिय कन्दो यस्य ।) वाराही । इति राजनिर्घण्टः ॥

वराहकान्ता, स्त्री, (वराहस्य कान्ता प्रियेति ।) वाराहीकन्द । इति शब्दरत्नावली ॥

वराहकर्णी, [न्] पुं (वराहवत् कणति इति । कण+णिनि ।) क्षुद्रमत्स्यविशेष । तस्य पर्य्याय । क्षुद्रावर्त्त २ । इति हारावली । ९४ ॥

वराहक्रान्ता, स्त्री, (वराहेण क्रान्ता अतिप्रियत्वात् ।) लताविशेष । इति शब्दमाला । तत्पर्य्याय, । लज्जालु २ शमङ्गा ३ सम कारिका ४ वराहनामा ५ वरदा ६ शूकरी ७ तिक्तगन्धिका ८ नमस्कारी ९ गण्डकाली १० खदिरी ११ । इति रत्नमाला । लज्जालुका १२ अञ्जलिकारिका १३ शताञ्जलि १४ गण्डकारी १५ समीकरा १६ । इति ग्रन्थान्तरम् । वाराही । चामारालु इति भाषा । इति सुभूति । इत्यमरटीकायां भरत ।

वराहनामा, [न्] पुं, (वराहस्य नाम इव नाम यस्य ।) वाराहीकन्द । इति शब्दमाला ॥

वराहिका, स्त्री, कपिकच्छु । इति राजनिर्घण्टः ॥

वराही, स्त्री, (वराहो भक्षकत्वेनास्त्यस्येति । अच् । गौरादित्वात् ङीष् ।) भद्रमुस्ता । शूकरकन्द । इति राजनिर्घण्टः ॥

वरिवसित, त्रि (वरिवस्+"नमोवरिवश्चित्रङः क्यच् ।" ३ । १ । १९ । इति क्यच् । ततः क्त । "क्यस्य विभाषा ।" ६ । ४ । ५० । इति पक्षे यलोप ।) उपासित । इत्यमर । ३ । १ । १०२ ॥

वरिवस्या, स्त्री (वरिवस पूजायां करणम् । वरिवस्+"नमोवरिवश्चित्रङः क्यच् ।" ३ । १ । १९ । इति क्यच् । "अ प्रत्ययात् ।" ३ । ३ । १०२ । इत्य । टाप् ।) शुश्रूषा । इत्यमर । २ । ७ । ३५ ॥ (यथा, ऋग्वेदे । १ । १६८ । ८ ।
"भुवे यद्वा वरिवस्या यमानो
विद्यानेव इव चोरहादम् ॥")

वरिवस्यित, त्रि, (वरिवस्या सञ्जाता अस्य तारकादित्वादितच् । यद्वा वरिवस्य+क्त । "क्यस्य विभाषा ।" ६।४।५०। इति पक्षे यलोपा-भाव ।) उपासित । इत्यमर । ३।१।१०२ ॥

वरिशी, स्त्री बडिशी । इति शब्दरत्नावली ॥

वरिव क्ली, (वृ+उ । बाहुलकात् इट् ।) धनम् । इति शब्दरत्नावली । ("इदं धातु वरिवोऽपि च ।" इत्युज्ज्वलदत्तधृतवचनम् । १ । ६२ ॥)

वरिधा स्त्री भूम्नि (वृ+ध । बाहुलकात् इट् ।) वर्षा । इति भरतद्विरूपकोष ॥

वरिधाप्रिय, पुं (वरिधा वर्षा प्रिया यस्य ।) चातकपक्षी । इति शब्दरत्नावली ॥

वरिष्ठ, क्ली, (अतिशयेन वरम् । वर+इष्ठन् ।) ताम्रम् । इत्यमर । २ । ९ । ९७ ॥ (यथा,—
"इन्द्र वरिष्ठ म्लेच्छास्य ताम्र शुल्बमुदुम्बरम् ।"
इति वैद्यकरत्नमालायाम् ॥)
मरिचम् । इति मेदिनी । ठे, १५ ॥

वरिष्ठ, त्रि (अयमेषामतिशयेन वर उरुर्वा अतिशायन इष्ठन् । प्रियस्थिरेति वरादेश ।) इति व्याकरणम् ॥ वरतम । (यथा भागवते । १ । ११ । १ ।
"एतां खरिकयस्य च आततायिनो
युधिष्ठिरो धर्म्मभृतां वरिष्ठ ॥")
उरुतम । इति मेदिनी । ठे, १५ ॥ (यथा ऋग्वेदे । ४ । ५६ । १ ।
"यन्नो वरिष्ठे इवतो विनिघ्नत्
महीपापप्रयानेभिरत्नैः ॥")
बल । इत्यजय ॥

वरिष्ठ, पुं, (वर+इष्ठन् ।) तित्तिरिपक्षी । इति मेदिनी । ठे, १५ ॥ नारङ्गवृक्ष । इति राजनिर्घण्टः । (चाक्षुषमनुपुत्र । यथा, महाभारते । १३ । १८ । २ ।
"वरिष्ठो नाम मनवो चाक्षुषस्य मनो सुत ।"
धर्म्मसावर्णिमन्वन्तरस्य ऋषिविशेष । यथा मार्कण्डेये । ९३ । १९ ।
"हविष्मांश्च वरिष्ठश्च ऋष्टिरन्यस्तथारुणि ।
निश्चराश्चानघश्चैव रिष्टिश्चान्यो महामुनि ।
सावर्णेऽन्तरे तस्मिन् सप्तर्षयश्च धर्म्म ॥"
दैत्यविशेष । यथा, हरिवंशे । २४२ । ११ ।
"वरिष्ठश्च गरिष्ठश्च भूतलोकमना इति ।
सुप्रपाद किरीटी च अपोवहो महासुर ॥")

वरिष्ठा, स्त्री (वरिष्ठ+टाप् ।) आदित्यभक्ता । इति राजनिर्घण्टः ॥

वरी स्त्री, (वृणोतीति । वृ+पचाद्यच् । गौरादित्वात् ङीष् ।) शतावरी । इत्यमर । २ । ४ । १०० । कर्म्मकरी । इति त्रिकाण्डशेष ॥

वरीयान्, [स्] त्रि, (अयमनयोरतिशयेन वर उरुर्वा । ईयसुन् । प्रियस्थिरेति वरादेश ।) श्रेष्ठ । (यथा, भागवते । २ । १ । १ ।
"वरीयानेष ते प्रश्न कृतो लोकहितं नृप ॥")
वरिष्ठ । अतिगुरु । इति मेदिनी । ठे, १५ ॥

मूलम् २। घन ८। अथ स्रष्टो जातचतुर्थो घन ६४। अथवा राशिः ९। अस्य मूलम् ३। घन २७। अस्य वर्गो गवां घनः ७२९। य एव वर्गराशिघन स एव घनमूलघनवर्गः। इतिघन ३४। अथ घनमूले करणसूत्रं वृत्तद्वयम्।

"आद्यं घनस्थानमथाघने द्वे
पुनस्तथान्त्याद्घनतो विशोध्यम्।
घनं पृथक्स्थं पदमस्य कृत्या
त्रिघ्न्या तदाद्यं विभजेत् फलन्तु।
पङ्क्त्यां न्यसेत्तत्कृतिमन्त्यनिघ्नीं
त्रिघ्नीं त्यजेत्तत्प्रथमात् फलस्य।
घनं तदाद्याद्घनमूलमेवं
पङ्क्तिर्भवेदेवमतः पुनश्च।"

अत्रोद्देशकः। पूर्व्वघनानां मूलाय न्यासः ७२९। १९५३१२५। क्रमेण लब्धानि मूलानि ९। २७। १२५। इति लीलावत्यां घनमूलम्।

वर्गोत्तमः पुं, (वर्गेषु उत्तमः।) चराणां अर्थात् मेषकर्कटतुलामकरराशीनां प्रथमोंऽशः। स्थिराणां अर्थात् वृषसिंहवृश्चिककुम्भराशीनां पञ्चमोंऽशः। द्व्यात्मकानां अर्थात् मिथुनकन्या धनुर्मीनराशीनां नवमोंऽशश्च। यथा —
'चराणां प्रथमे भागे स्थिराणां पञ्चमे तथा।
नवमे द्व्यात्मकानाञ्च वर्गोत्तम इति स्मृतः।"
अपि च। राशीनां स्वकीयनवांशः। यथा —
'स्वनवांशस्तु राशीनां वर्गोत्तम इति स्मृतः।"
इति ज्योतिस्तत्त्वम्।

वर्च्च द दीप्तौ। इति कविकल्पद्रुमः। (भ्वा-आत्म-अक-सेट्।) द, वर्च्चते। इति दुर्गादासः।

वर्च्चः [स्] क्ली, (वर्च्चते इति। वर्च्च+"सर्व्वधातुभ्योऽसुन्।" उणा० ४। १८८। इति असुन्।) रूपम्। विष्ठा। (यथा, सुश्रुते उत्तरतन्त्रे ४ अध्याये।
"भूत्वा विट् सञ्चयोऽलकृष्णो
स्नायुपाकः समकटोऽथ [illegible]।
वर्च्चो सुखञ्चल्पमल्पं सफेनं
रुग्णं प्रयाति सानिलं मारुतेन।")
तेजः। इति मेदिनी। से, ३५। (यथा, ऋग्वेदे। ८। ६६। २१।
"अग्ने मघस्व सभा अस्मे वर्च्चः सुवीर्य्यम्।"
"वर्च्च तेजः।" इति तद्भाष्ये सायणः। अन्नम्। यथा तत्रैव। १। २४। १।
"अग्ने वर्च्चस्व पृतना अभिमातीरपास्य।
दुष्टरस्तरन्नरातीर्वर्च्चोधा यज्ञवाहसे।"
"वर्च्चोधा अन्न धेहि।" इति तद्भाष्ये सायणः।)

वर्च्चस्कः, पुं क्ली (वर्च्चस्+स्वार्थे कन्।) विष्ठा। इत्यमरः। २। ६। ६८। (तेजः। यथा महाभारते। १३। २५। १९।
"द्विकायासमुपस्पृश्य तथा सुन्दरिकाह्रदे।
अश्विभ्यां रूपवर्च्चस्कं प्रेत्य वै लभते नरः।")

वर्च्चस्वी [न्] पुं (वर्च्चोऽस्यास्तीति। वर्च्चस्+ "असुमायामेधेति।" ५। २। १२१। इति विनि।) चन्द्रः। यथा,—
"रोहिण्यामभवद्वर्च्चा वर्च्चस्वी येन चन्द्रमाः।"
इति वह्निपुराणम्।

वर्च्चाः [स्] पुं, (वर्च्चते इति। वर्च्च+असुन्।) चन्द्रपुत्रः। इति मेदिनी। से ३६। अस्य च।
"रोहिण्यामभवद्वर्च्चा वर्च्चस्वी येन चन्द्रमाः।"
इत्यादि वह्निपुराणे गणानुकीर्त्तने सप्तोद्देशनामाध्यायः।

वर्ज्जनं, क्ली, (वृज+ल्युट्।) त्यागः। हिंसा। इति मेदिनी। ने, १२२। मारणम्। इति हेमचन्द्रः।

वर्ज्जित त्रि, त्यक्तः। वृजधातोः क्तप्रत्ययेन निष्पन्नः। यथा —
"अवज्ञातञ्चावधूतं सरोषं विस्मयान्वितम्।
गुरोरपि न भोक्तव्यमन्नं सत्कारवर्ज्जितम्।"
इति कौर्म्मे उपविभागे १६ अध्यायः।

वर्ज्जनीय, त्रि, (वृज+अनीयर्।) वर्ज्जनयोग्यम्। त्यक्तव्यम्। वर्ज्जनीयान्नं यथा,—
"राज्ञान्नं नर्त्तकान्नञ्च तक्ष्णोऽन्नं कर्म्मकारिणः।
गणान्नं गणिकान्नञ्च षण्ढान्नञ्चैव वर्ज्जयेत्।
चक्रोपजीविरजकतस्करध्वजिनां तथा।
गान्धर्व्वलोहकारान्नं सूतकान्नं विवर्ज्जयेत्।
कुलालचित्रकर्म्मान्नं वार्द्धुषेः पतितस्य च।
पौनर्भवच्छत्रिकयोरभिशस्तस्य चैव हि।
सुवर्णकारशैलूषव्याधबद्धातुरस्य च।
चिकित्सकस्य चैवान्नं पुंश्चल्या दाण्डिकस्य च।
स्तेननास्तिकयोरन्नं देवतानिन्दकस्य च।
सोमविक्रयिणश्चान्नं श्वपाकस्य विशेषतः।
भार्य्याजितस्य चैवान्नं यस्य चोपपतिर्गृहे।
उत्सृष्टस्य कदर्य्यस्य तथैवोच्छिष्टभोजिनः।
अपाङ्क्तान्नञ्च सङ्घान्नं शस्त्राजीवस्य चैव हि।
क्लीवसंन्यासिनश्चान्नं मत्तोन्मत्तस्य चैव हि।
भीतस्य रुदितस्यान्नमवक्रुष्टं परिक्षुतम्।
ब्रह्मद्विषः पापरुचेः श्राद्धान्नं सूतकस्य च।
वृथापाकस्य चैवान्नं शवान्नं श्वशुरस्य च।
अप्रजानान्तु नारीणां भृतकस्य तथैव हि।
कारुकान्नं विशेषेण शस्त्रविक्रयिणस्तथा।
शौण्डान्नं घण्टिकान्नञ्च भिषजामन्नमेव च।
विद्धप्रजननस्यान्नं परिवित्त्यन्नमेव च।
पुनर्भुवो विशेषेण तथैव दिधिषूपतेः।
अवज्ञातञ्चावधूतं सरोषं विस्मयान्वितम्।
गुरोरपि न भोक्तव्यमन्नं संस्कारवर्ज्जितम्।
दुष्कृतं हि मनुष्यस्य सर्व्वमन्ने व्यवस्थितम्।
यो यस्यान्नं समश्नाति स तस्याश्नाति किल्विषम्।"
इति श्रीकूर्म्मपुराणे उपविभागे १६ अध्यायः।

वर्ज्यः त्रि (वृज+ण्यत्।) वर्ज्जनीयः। यथा,—
"अतः परं प्रवक्ष्ये च वर्ज्यं भक्ष्यप्रतिक्रियाम्।
भोक्तव्यमपर्युषितं स्नेहाक्तं चिरसंस्थितम्।
अस्नेहा अपि गोधूमयवगोरसविक्रियाः।
शशकः कच्छपो गोधा श्वाविन्मत्स्योऽथ खड्गकः।
भक्ष्या ह्येते तथा वर्ज्यौ ग्रामशूकरकुक्कुटौ।
पितृदेवादिशेषञ्च श्राद्धे ब्राह्मणकाम्यया।
प्रोक्षितञ्चौषधार्थञ्च खादन् मांसं न दोषभाक्।"
इति मार्कण्डेयपुराणे सदाचाराध्यायः।

वर्ण क वर्णे। इति कविकल्पद्रुमः। (चुरा-पर-सक-सेट्।) क, वर्णयति। अथ कश्चित् मन्यते। वर्ण शुक्लादिक्रिया। इति दुर्गादासः।

वर्ण, त् क स्तुतिविस्तारशुक्लाद्युद्युक्तिदीपने। इति कविकल्पद्रुमः। (अदन्त-चुरा-पर-सक-दीपने अक-सेट्।) वर्णयति वर्णापयति कविर्नीतीश्वरम्। वर्णयति तनुं विस्तारयतीत्यर्थः। वर्णयति प्रतिमां शुक्लादिवर्णां करोतीत्यर्थः। वर्णयति उद्युङ्क्ते गोप्यते वेत्यर्थः। शुक्लाद्युद्युक्तिदीपने इत्यपि पाठः। इति दुर्गादासः।

वर्णं, क्ली, (वर्णयतीति। वर्ण+अच्।) कुङ्कुमम्। इति हेमचन्द्रः।

वर्णः पुं, (व्रियते इति। वृ+"कॄवृजॄसिद्रुपन्यनिस्वपिभ्यो नित्।" उणा० ३। १०। इति नः। स च नित्।) जातिः। सा च ब्राह्मणक्षत्रियवैश्यशूद्राः। [illegible]। यस्मा भगवान् पुरुषरूपेण यदि ततवान् तदास्य शरीरात् चत्वारो वर्णा उत्पन्नाः। मुखतो ब्राह्मणा बाहुतः क्षत्रिया ऊरुतो वैश्याः पादतः शूद्रा जाताः। एतेषां वर्णानां धर्म्मा शास्त्रेषु निरूपिताः सन्ति। तत्र ब्राह्मणधर्म्मा उच्यन्ते। अध्ययनं यजनं दानञ्चेति। जीविका तस्य अध्यापनं याजनं प्रतिग्रहश्चेति। १। क्षत्रियस्य त्रयो धर्म्माः। अध्ययनं यजनं दानञ्च। प्रजानां रक्षणं जीविका। २। वैश्यस्य त्रयो धर्म्माः। अध्ययनं यजनं दानञ्च। वार्त्ता जीविका। कृषि गोरक्षणं वाणिज्यं कुसीदञ्चेति। ३। शूद्रस्य तु ब्राह्मणादिसेवा शुश्रूषा धर्म्मो जीविका च। ४। ब्राह्मणा आश्रमचतुष्टयवन्तो भवन्ति। ब्रह्मचारी गृहस्थो वानप्रस्थः संन्यासी च। तत्र उपनयनानन्तरं नियमं कृत्वा यो गुरोः समीपे स्थित्वा साङ्गवेदाध्ययनं करोति स ब्रह्मचारी उच्यते। १। साङ्गवेदाध्ययनं समाप्य यो दारपरिग्रहं कृत्वा स्वधर्म्माचरणं करोति स गृहस्थ उच्यते। २। पुत्रमुत्पाद्य यो वनवासं कृत्वा फलमूलपर्णादि भक्षयित्वा ईश्वराराधनं करोति स वानप्रस्थ उच्यते। ३। यः सर्व्वं गृहादिकं त्यक्त्वा शिखासूत्रं मुक्त्वा गैरिककौपीनाच्छादनं दण्डकमण्डलुधारणं भिक्षान्नजीवनं तीर्थे वा स्थित्वा केवलमीश्वराराधनं करोति स संन्यासी उच्यते। ४। क्षत्रियवैश्ययोस्तु प्रथमाश्रमत्रयं विहितम्। शूद्रस्य एक गृहाश्रमः। ईश्वराराधनन्तु सर्व्वेषां वर्णानामाश्रमाणाञ्च साधारणो धर्म्मः। तन्मध्ये यस्तु विष्णूपासकः स वैष्णव उच्यते। शिवोपासकः शैवः। दुर्गादिशक्त्युपासकः शाक्तः। सूर्य्योपासकः सौरः। गणेशोपासको गाणपत्य उच्यते। इति पुराणादयः ॥४॥ अपि च।

अभ्युद्गतैर्गिरिवरैरिव दीप्यमाना-
मौशीनरस्य ददृशुः पुरमुग्रशक्तेः ।")

वरूथः, पुं (व्रियते रथोऽनेनेति । वृञ् वरणे + "जॄवृञ्भ्यामूथन् ।" उणा २ । ६ । इति ऊथन् ।) परप्रहाराभिघातरक्षार्थं रथस्य समन्ततः लौहादिकृतावरणम् । तत्पर्य्यायः । रथगुप्तिः २ । इत्यमरभरतौ । २ । ८ । ५७ । रथवेश्म ३ । इति जटाधरः । (यथा, रामायणे । ६ । ५७ । २६ ।

"उदग्रध्वजकूबरं सवरूथं सपस्करम् ।"

चर्म्मविशेषः । यथा, तत्रैव । २ । ७६ । ११ ।

"ताम्रवर्णैः परिच्छिन्नं वरूथैश्च समावृतम् ।
वरूथस्य यथौ तस्य स्यन्दनं रथपालकः ।")

वरूथिनी, स्त्री, (वरूथः रथगुप्त्यादिकमस्त्यस्या इति । वरूथ + इनि । ङीप् ।) सेना । इत्यमरः । २ । ८ । ७८ । (यथा, रघुः । ११ । ५८ ।

"तस्य जातु मरुतः प्रतीपगा
वर्त्मसु ध्वजतरुप्रमाथिनः ।
चिक्लिशुर्भृशतया वरूथिनी-
मुत्तटा इव नदीरयाः स्थलीम् ॥")

वरेण्य, स्त्री (व्रियते लोकैरिति । वृ + "वृञ एण्यः ।" उणा ३ । ९८ । इति एण्य ।) कुङ्कुमम् । इति राजनिर्घण्टः ॥

वरेण्य, त्रि, (वृ + एण्यः ।) प्रधानम् । इत्यमरः । ३ । १ । ५७ । (यथा, भट्टिः । १ । ३ ।

"पुत्त्रो महामखभुजामखिलव-
सम्पन्नो ब्राह्मणो वरेण्यः ।"

वरणीयः । इति मल्लिनाथः । यथा, कुमारे । ७ । ९ ।

"तत्कारपूतेन वरं वरेण्यं
वधूः सुखस्नातविभूषणेन ।"

पुं पितृगणानामन्यतमः । यथा, मार्कण्डेये । ९६ । ३४ ।

"वरो वरेण्यो वरदः पुष्टिस्तुष्टिप्रदस्तथा ।"

भृगुपुत्रविशेषः । यथा, महाभारते । १३ । ८५ । १२८ ।

"भृगोस्तु पुत्राः सप्तासन् सर्व्वे तुल्या भृगो-
र्गुणैः ।
च्यवनो वज्रशीर्षश्च शुचिरौर्व्वस्तथैव च ।
शुक्रो वरेण्यश्च विभुः सवनश्चेति सप्त ते ॥"

महादेवः । यथा, तत्रैव शिवसहस्रनाम-
कीर्त्तने । १३ । १७ । १२६ ।

"वरो वराहो वरदो वरेण्यः सुमहास्वनः ।")

वरेश्वी, स्त्री गौरीदेवी । इति त्रिकाण्डशेषः ॥

वरेश्वरः पुं (वरः श्रेष्ठः ईश्वरः ।) शिवः । इति शब्दरत्नावली ॥

वराटी, स्त्री, (वराणि श्रेष्ठानि अटानि दलानि यस्याः ।) मदनकपुष्पम् । इति शब्दमाला ॥

वरोल पुं स्त्री, (वृ + ओलच् ।) वरटः । इति त्रिकाण्डशेषः ॥

वर्करः पुं (वृणोति मनुते इति । वृञ् आवरणे + बाहुलकात् करः ।) रमणबहुलमहः । इत्युणादिकोषः । २ । ११ ।) युवपशुः । इत्यमरः । २ । १० । २१ । मेषशावकः । इति तट्टीकायां भरतः । परिहासः । (यथा, आनन्दलहर्य्याम् । ७ ।

"कान्तं केलिकलाविधुरा समुदयत्याहक प्रति-
कारयते
क्रिमौ वर्करकर्करे प्रियपतेराकृष्य चिक्षी-
पते ।")

छागः । इति मेदिनी । रे, २१० ।

वर्करण्टः पुं (वर्करं परिहासं अटति गच्छतीति । अट + अण् ।) कटाक्षः । तरुणाश्रिरोचि । नारीपयोधरोत्सङ्गकान्तदन्तक्षतम् । इति मेदिनी । टे, ६५ ।

वर्गः, पुं (वृज्यते इति । वृजी वर्ज्जने + घञ् ।) सजातीयसमूहः । (यथा, रघुः । ५ । ३ ।

"प्रवाल शैवालपरिग्रहीतो
मार्गे निमग्नपुरुषादिवगाः ।")

समानधर्म्मिभिः प्राणिभिरप्राणिभिश्चयश्चित
इन्दम् । यथा कवर्गः । अत्र कवर्गत्वादिना
विजातीयत्वेऽपि सामान्यमस्ति । इत्यमर
भरतौ । ग्रन्थपरिच्छेदः । यथा —

"वर्गो प्रायपरिच्छेदेऽद्ध्यायाध्यायाङ्कसंग्रहाः ।
उच्छ्वासः परिवर्त्तश्च पटलः काण्डमस्त्रियाम् ।
स्थानं प्रकरणं पर्व्वाह्निकश्च ग्रन्थसन्धयः ॥"

इति त्रिकाण्डशेषः ।

समानाङ्कद्वयस्य पूरणम् । तत्पर्य्यायः । कृतिः २ ।
यथा करणकुतूहलम् ।

"समद्विघातः कृतिरुच्यतेऽथ
स्थाप्योऽन्त्यवर्गो द्विगुणान्त्यनिघ्नाः ।
स्वस्वोपरिष्टाच्च तथापरेऽङ्का-
स्त्यक्त्वान्त्यमुत्सार्य पुनश्च राशिम् ॥
खण्डद्वयस्याभिहतिर्द्विनिघ्नी
तत्खण्डवर्गैक्ययुता कृतिर्वा ।
इष्टोनयुग्राशिवधः कृतिः स्या-
दिष्टस्य वर्गेण समन्वितो वा ॥" ७ ॥

अस्योदाहरणम् ।

"सखे नवानां च चतुर्दशानां
ब्रूहि त्रिहीनस्य शतत्रयस्य ।
पञ्चोत्तरस्याप्ययुतस्य वर्गं
जानासि चेद्वर्गविधानमार्गम् ॥"

न्यासः ९ । १४ । ३९७ । १ ५ । एषां
यथोक्तकरणेन जाता वर्गाः ८१ । १९६ ।
८८२ ९ । १ १० २५ । अथवा नवानां
खण्डे ४ । ५ । अनयोराहतिः २० । द्विनिघ्नी ।
तत्खण्डवर्गैक्येन ४१ । युता जाता सैव
कृतिः ८१ । अथवा चतुर्दशानां खण्डे ६ । ८ ।
अनयोराहतिः ४८ । द्विनिघ्नी ९६ । तत्खण्ड-
वर्गौ ३६ । ६४ । अनयोरैक्येन १ । युता
जाता सैव कृतिः १९६ । अथवा खण्डे ४ । १ ।
तथापि सैव कृतिः १९६ । अथवा राशिः २९७ ।
अयं त्रिभिरूनः एवमयुतस्य ३९४ । ३ ।
अनयोर्घातः ८८२ ० । त्रिवर्गः ९ युतो जातो
वर्गः स एव ८८२०९ । एवं सर्व्वत्रापि इति

लीलावत्यां वर्गः । (स्त्री अप्सरोविशेषः ।
यथा महाभारते । १ । २१७ । १५ ।

"अप्सरास्मि महाबाहो देवारण्यविहारिणी ।
इष्टा धनपतेर्नित्यं वर्गा नाम महाबल ॥"
तस्याः प्रियसख्यः सौरभेयी समीची बुद्बुदा
लता चेति । एतद्वृत्तान्तस्तु तत्रैव द्रष्टव्यम् ।)

वर्गघन, स्त्री, (वर्गस्य समानाङ्कद्वयस्य घनम्
आघातः ।) पूरितसमानाङ्कद्वयस्याघातः ।
यथा । वर्गमूले करणसूत्रं वृत्तम् ।

"त्यक्त्वान्त्याद्विषमात् कृतिं द्विगुणयेन्मूलं समे तद्धृते
त्यक्त्वा लब्धकृतिं तदाद्यविषमाल्लब्धं द्विनिघ्नं
न्यसेत् ।
पङ्क्त्यां पङ्क्तिहृते समेऽन्यविषमात् त्यक्त्वाप्तवर्गं
फलं
पङ्क्त्यां तद्द्विगुणं न्यसेदिति मुहुः पङ्क्तेर्दलं
स्यात् पदम् ॥" ४ ॥

अस्योद्देशकः ।

"मूलं चतुर्णां च तथा नवानां
पूर्व्वं कृतानां च सखे कृतीनाम् ।
पृथक् पृथग्वर्गपदानि विद्धि
बुद्धेर्विवृद्धिर्यदि तेऽत्र जाता ॥"

न्यासः ४ । ९ । ८१ । १९६ । ८८२०९ । १०
१०० २५ । लब्धानि क्रमेण मूलानि २ । ३ ।
९ । १४ । २९७ । १ ० ०५ । इति लीला-
वत्यां वर्गमूलम् ॥

सजातीयाङ्कद्वयस्य घातः घनः । तस्य लघु-
लक्ष्म च वहुन्यायकौशलादरस्ति पूर्वं न
लिखितानि ग्रन्थान्तरे दृष्टान्ते । यत्र
करणसूत्रं वृत्तचतुष्टयम् ।

"समत्रिघातश्च घनः प्रदिष्टः
स्थाप्यो घनोऽन्त्यस्य ततोऽन्त्यवर्गः ।
आदित्रिनिघ्नस्तत आदिवर्गः
त्र्यन्त्याहतोऽथादिघनश्च सर्व्वे ॥
स्थानान्तरत्वेन युता घनः स्यात्
प्रकल्प्य तत्खण्डयुगं ततोऽन्त्यम् ।
एवं मुहुर्वर्गघनप्रसिद्धा-
वाद्याङ्कतो वा विधिरेष कार्य्यः ॥
खण्डाभ्यां वा हतो राशिस्त्रिघ्नः खण्डघनैक्ययुक् ।
वर्गमूलघनः स्वघ्नो वर्गराशेर्घनो भवेत् ॥" ९ ॥

अस्योद्देशकः ।

"नवघनं त्रिघनस्य घनं तथा
कथय पञ्चघनस्य घनं च मे ।
घनपदं च ततोऽपि घनात् सखे
यदि घनेऽस्ति घना भवतो मतिः ॥"

न्यासः ९ । २७ । १२५ । जाताः क्रमेण घनाः
७२९ । १९६८३ । १९५३१२५ । अथवा राशिः
९ । अस्य खण्डे ४ । ५ । आभ्यां राशिर्हतः
१८० त्रिनिघ्नश्च ५४ । खण्डघनैक्येन १८९ ।
युतो जातो घनः ७२९ । अथवा राशिः २७ ।
अस्य खण्डे २ । ७ । आभ्यां हतस्त्रिघ्नश्च
११३४ । खण्डघनैक्येन ८४९५ । युतो जातो
घनः १९६८३ । अथवा राशिः ९ । अस्य

दया समस्तभूतेषु तितिक्षा नाभिमानिता ।
सत्यं शौचमनायासो मङ्गलं प्रियवादिता ॥
मैत्र्यस्पृहा तथा तद्वदकार्पण्यं नरेश्वर ।
अनसूया च सामान्या वर्णानां कथिता गुणाः ॥
आश्रमाणाञ्च सर्व्वेषामेते सामान्यलक्षणाः ।
गुणांस्तथापद्धर्म्मांश्च विप्रादीनामिमान् शृणु ॥
क्षात्रं कर्म्म द्विजस्योक्तं वैश्यकर्म्म तथापदि ।
राजन्यस्य च वैश्योक्तं शूद्रकर्म्म न चैतयोः ॥
सामर्थ्ये सति तत्त्याज्यमुभाभ्यामपि पार्थिव ।
तदेवापदि कर्त्तव्यं न कुर्य्यात् कर्म्मसङ्करम् ॥
इत्येते कथिता राजन् वर्णधर्म्मा मया तव ।
धर्म्मानाश्रमिणां सम्यग्ब्रुवतो मे निशामय ॥ ८ ॥

और्व्व उवाच ।

बालः कृतोपनयनो वेदाहरणतत्परः ।
गुरुगेहे वसेद्भूप ब्रह्मचारी समाहितः ॥
शौचाचारवता तत्र कार्य्यं शुश्रूषणं गुरोः ।
व्रतानि चरता ग्राह्यो वेदश्च कृतबुद्धिना ॥
उभे सन्ध्ये रविं भूप तथैवाग्निं समाहितः ।
उपतिष्ठेत्तथा कुर्य्याद्गुरोरप्यभिवादनम् ॥
स्थिते तिष्ठेद्व्रजेद्याति नीचैरासीत चासति ।
शिष्यो गुरौ नृपश्रेष्ठ प्रतिकूलं न सञ्चरेत् ॥
तेनैवोक्तं पठेद्वेदं नान्यचित्तः पुरःस्थितः ।
अनुज्ञातश्च भिक्षान्नमश्नीयाद्गुरुणा ततः ॥
अवगाहेदपः पूर्व्वमाचार्य्येणावगाहिताः ।
समिज्जलादिकं चास्य काल्यं कल्यमुपानयेत् ॥
गृहीतग्राह्यवेदश्च ततोऽनुज्ञामवाप्य वै ।
गार्हस्थ्यमाविशेत् प्राज्ञो निष्पन्नगुरुनिष्कृतिः ॥ १ ॥
विधिनावाप्तदारस्तु धनं प्राप्य स्वकर्म्मणा ।
गृहस्थकार्य्यमखिलं कुर्य्याद्भूपाल शक्तितः ॥
निवापेन पितॄनर्च्चेद्यज्ञैर्देवांस्तथातिथीन् ।
अन्नैर्म्मुनींश्च स्वाध्यायैरपत्येन प्रजापतिम् ॥
बलिकर्म्मणा च भूतानि वाक्सत्येनाखिलं जगत् ।
प्राप्नोति लोकान् पुरुषो निजकर्म्मसमार्ज्जितान् ॥
भिक्षाभुजश्च ये केचित् परिव्राड्ब्रह्मचारिणः ।
तेऽप्यत्रैव प्रतिष्ठन्ते गार्हस्थ्यं तेन वै परम् ॥
वेदाहरणकार्य्याय तीर्थस्नानाय च प्रभो ।
अटन्ति वसुधां विप्राः पृथिवीदर्शनाय च ॥
अनिकेता ह्यनाहारा यत्र सायंगृहाश्च ये ।
तेषां गृहस्थः सर्व्वेषां प्रतिष्ठा योनिरेव च ॥
तेषां स्वागतदानादि वक्तव्यं मधुरं वचः ।
गृहागतानां दद्याच्च शयनासनभोजनम् ॥
अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्त्तते ।
स दत्त्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति ॥
अवज्ञानमहङ्कारो दम्भश्चैव गृहे सतः ।
परितापोपघातौ च पारुष्यञ्च न शस्यते ॥
यस्तु सम्यक् करोत्येवं गृहस्थः परमं विधिम् ।
सर्व्वबन्धविनिर्म्मुक्तो लोकानाप्नोत्यनुत्तमान् ॥
वयःपरिणतो राजन् कृतकृत्यो गृहाश्रमी ।
पुत्त्रेषु भार्य्यां निक्षिप्य वनं गच्छेत् सहैव वा ॥ २ ॥
पर्णमूलफलाहारः केशश्मश्रुजटाधरः ।
भूमिशायी भवेत्तत्र मुनिः सर्व्वातिथिर्नृप ॥
चर्म्मकाशकुशैः कुर्य्यात् परिधानोत्तरीयके ।
तद्वत्त्रिषवणं स्नानं शस्तमस्य नरेश्वर ॥
देवताभ्यर्च्चनं होमः सर्व्वाभ्यागतपूजनम् ।
भिक्षा बलिप्रदानञ्च शस्तमस्य नरेश्वर ॥
वन्यस्नेहेन गात्राणामभ्यङ्गश्चास्य शस्यते ।
तपश्च तस्य राजेन्द्र शीतोष्णादिसहिष्णुता ॥
यस्त्वेतां नियतश्चर्य्यां वानप्रस्थश्चरेन्मुनिः ।
स दहत्यग्निवद्दोषान् जयेल्लोकांश्च शाश्वतान् ॥ ३ ॥
चतुर्थश्चाश्रमो भिक्षोः प्रोच्यते यो मनीषिभिः ।
तस्य स्वरूपं गदतो मम श्रोतुं नृपार्हसि ॥
पुत्त्रद्रव्यकलत्रेषु त्यक्तस्नेहो नराधिप ।
चतुर्थमाश्रमस्थानं गच्छेन्निर्धूतमत्सरः ॥
त्रैवर्गिकांस्त्यजेत् सर्व्वानारम्भानवनीपते ।
मित्रादिषु समो मैत्रः समस्तेष्वेव जन्तुषु ॥
जरायुजाण्डजादीनां वाङ्मनःकर्म्मभिः क्वचित् ।
युक्तः कुर्व्वीत न द्रोहं सर्व्वसङ्गांश्च वर्ज्जयेत् ॥
एकरात्रस्थितिर्ग्रामे पञ्चरात्रस्थितिः पुरे ।
तथा तिष्ठेद्यथा प्रीतिर्द्वेषो वा नास्य जायते ॥
प्राणयात्रानिमित्तञ्च व्यङ्गारे भुक्तवज्जने ।
काले प्रशस्तवर्णानां भिक्षार्थं पर्य्यटेद्गृहान् ॥
कामः क्रोधस्तथा दर्पमोहलोभादयश्च ये ।
तांस्तु दोषान् परित्यज्य परिव्राट् निर्म्ममो
भवेत् ॥
अभयं सर्व्वसत्त्वेभ्यो दत्त्वा यश्चरते मुनिः ।
न तस्य सर्व्वभूतेभ्यो भयमुत्पद्यते क्वचित् ॥

कृत्वाग्निहोत्रं स्वशरीरसंस्थं
शारीरमग्निं स्वमुखे जुहोति ।
विप्रस्तु भैक्षोपगतैर्हविर्भिः
चिताग्निना स व्रजति स्म लोकान् ॥"

चिताग्नीनां अग्निचितामित्यर्थः । चिताग्निना इति वा पाठः । इति टीका ॥

"मोक्षाश्रमं यश्चरते यथोक्तं
शुचिः सुसङ्कल्पितबुद्धियुक्तः ।
अनिन्धनं ज्योतिरिव प्रशान्तं
स ब्रह्मलोकं व्रजति द्विजातिः ॥" ४ ॥

इति विष्णुपुराणे ३ अंशे ८ । ९ अध्यायौ ॥
प्रकारान्तरेण तेषामादिर्यथा,—
"ततस्त्रैलोक्य दिव यत्र सृष्टं स्वयम्भुवा ।
तस्मात् सृष्टात् समभवद्ब्रह्मा वेदमयो विधिः ॥
प्रजाविसर्गं विविधं मानसो मनसासृजत् ।
अग्रजान् ब्राह्मणानेव पूर्व्वं ब्रह्मा प्रजापतिः ॥
आग्नेयेभ्योऽभिनिर्वृत्तान् भास्करानलसप्रभान् ।
ततः सत्यञ्च धर्म्मञ्च तपो ब्रह्म च शाश्वतम् ॥
आचारञ्चैव शौचञ्च स्वर्गाय विदधे विभुः ।
देवदानवगन्धर्व्वा दैत्यासुरमहोरगाः ॥
यक्षराक्षसनागाश्च पिशाचा मनुजास्तथा ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च द्विजसत्तम ॥
ये चान्ये भूतसङ्घानां वर्णास्तांश्चापि निर्म्ममे ।
ब्राह्मणानां सितो वर्णः क्षत्रियाणाञ्च लोहितः ॥
वैश्यानां पीतको वर्णः शूद्राणामसितस्तथा ॥

भरद्वाजोवाच ।

चातुर्व्वर्ण्यस्य वर्णेन यदि वर्णो विभज्यते ।
सर्व्वेषां खलु वर्णानां दृश्यते वर्णसङ्करः ॥
कामः क्रोधो भयं लोभः शोकश्चिन्ता क्षुधा
श्रमः ।
सर्व्वेषां नः प्रभवति कस्माद्वर्णो विभज्यते ॥
स्वेदमूत्रपुरीषाणि श्लेष्मा पित्तं सशोणितम् ।
तनुः क्षरति सर्व्वेषां कस्माद्वर्णो विभज्यते ॥
जङ्गमानामसङ्ख्येयाः स्थावराणाञ्च जातयः ।
तेषां विविधवर्णानां कुतो वर्णविनिश्चयः ॥

नारद उवाच ।

न विशेषोऽस्ति वर्णानां सर्व्वं ब्राह्ममिदं जगत् ।
ब्रह्मणा पूर्व्वसृष्टं हि कर्म्मभिर्व्वर्णतां गतम् ॥
कामभोगप्रियास्तीक्ष्णाः क्रोधनाः प्रिय
साहसाः ।
त्यक्तस्वधर्म्मा रक्ताङ्गास्ते द्विजाः क्षत्रतां
गताः ॥
गोभ्यो वृत्तिं समास्थाय पीताः कृष्युपजीविनः ।
स्वधर्म्मान्नानुतिष्ठन्ति ते द्विजा वैश्यतां गताः ॥
हिंसानृतप्रिया लुब्धाः सर्व्वकर्म्मोपजीविनः ।
कृष्णाः शौचपरिभ्रष्टास्ते द्विजाः शूद्रतां
गताः ॥
इत्येतैः कर्म्मभिर्व्यस्ता द्विजा वर्णान्तरं गताः ।
इत्येते चतुरो वर्णा येषां ब्राह्मी सरस्वती ॥
विहिता ब्रह्मणा पूर्व्वं लोभात्त्वज्ञानतां गताः ।
ब्राह्मणा धर्म्मतन्त्रस्थास्तपस्तेषां न नश्यति ॥
ब्रह्म धारयतां नित्यं व्रतानि नियमांस्तथा ।
ब्रह्म चैव परं सृष्टं ये न जानन्ति तेऽद्विजाः ॥
ऋषिभिः स्वेन तपसा सृज्यन्ते चापरे परे ।
आदिदेवसमुद्भूता ब्रह्ममूलाक्षयाव्यया ॥
सा सृष्टिर्म्मानसी नाम धर्म्मतन्त्रपरायणा ॥

भरद्वाजोवाच ।

ब्राह्मणः केन भवति क्षत्रियो वा द्विजोत्तम ।
वैश्यः शूद्रश्च विप्रर्षे तद्ब्रूहि वदतां वर ॥

नारद उवाच ।

जातकर्म्मादिभिर्यस्तु संस्कारैः संस्कृतः
शुचिः ।
वेदाध्ययनसम्पन्नः षट्सु कर्म्मस्ववस्थितः ॥
शौचाचारस्थितः सम्यग्विघसाशी गुरुप्रियः ।
नित्यव्रती सत्यपरः स वै ब्राह्मण उच्यते ॥
सत्यं दानमथाद्रोह आनृशंस्यं त्रपा घृणा ।
तपश्च दृश्यते यत्र स ब्राह्मण इति स्मृतः ॥
क्षत्रजं सेवते कर्म्म वेदाध्ययनसङ्गतः ।
दानादानरतिर्यस्तु स वै क्षत्रिय उच्यते ॥
विशत्याशु पशुभ्यश्च कृष्यादानरतिः शुचिः ।
वेदाध्ययनसम्पन्नः स वैश्य इति सञ्ज्ञितः ॥
सर्व्वभक्ष्यरतिर्नित्यं सर्व्वकर्म्मकरोऽशुचिः ।
त्यक्तवेदस्त्वनाचारः स वै शूद्र इति स्मृतः ॥
शूद्रे चैव भवेल्लक्ष्म द्विजे तच्च न विद्यते ।
न वै शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः ॥

भरद्वाजोवाच ।

के वर्णाः कर्म्मवशाच्चातुर्व्वर्ण्यस्य वै पृथक् ।
चातुर्व्वर्ण्याश्रमाणाञ्च राजधर्म्माश्च के मताः ॥

नारद उवाच ।

[illegible] परिभाषः क्षमा तथा ।

ब्रह्मोवाच ।
"सर्गान्निजहरिश्चैव पूज्यः स्वायम्भुवादिभिः ।
विप्रादौ येन धर्मांश्च सहस्र स्राप वै प्रभुः ॥
यजनं याजनं दानं ब्राह्मणस्य प्रतिग्रहः ।
अध्यापनं चाध्ययनं षट् कर्म्माणि द्विजोत्तमे ॥
दानमध्ययनं यज्ञो धर्म्मः क्षत्रियवैश्ययोः ।
दण्डयुद्धं क्षत्रियस्य कृषिर्वैश्यस्य शस्यते ॥
शुश्रूषैव द्विजातीनां शूद्राणां धर्म्मसाधनम् ।
कारुकर्म्मस्तथाजीवः पाकयज्ञोऽपि धर्म्मतः ॥
भिक्षाचर्य्याथ शुश्रूषा गुरोः स्वाध्याय एव च ।
सन्ध्याकर्म्माग्निकार्य्यञ्च धर्म्मोऽयं ब्रह्मचारिणः ॥
धर्म्मेषामाश्रमाणान्तु द्वैविध्यन्तु चतुर्व्विधम् ।
ब्रह्मचार्य्युपकुर्व्वाणो नैष्ठिको ब्रह्मतत्परः ॥
योऽधीत्य विधिवद्वेदान् गृहस्थाश्रममाव्रजेत् ।
उपकुर्व्वाणको ज्ञेयो नैष्ठिको मरणान्तिकः ॥
अग्नयोऽतिथिशुश्रूषा यज्ञो दानं सुरार्च्चनम् ।
गृहस्थस्य समासेन धर्म्मोऽयं द्विजसत्तमाः ॥
उदासीनः साधकश्च गृहस्थो द्विविधो भवेत् ।
कुटुम्बभरणे युक्तः साधकोऽसौ गृही भवेत् ॥
ऋणानि त्रीण्यपाकृत्य त्यक्त्वा भार्य्याधना-
दिकम् ।
एकाकी यस्तु विचरेत् उदासीनः स मौक्षिकः ॥
भूमौ मूलफलाशित्वं स्वाध्यायस्तप एव च ।
संविभागो यथान्यायं धर्म्मोऽयं वनवासिनः ॥
तपस्तप्यति योऽरण्ये यजेद्देवान् जुहोति च ।
स्वाध्याये चैव निरतो वनस्थस्तापसो मतः ॥
तपसा कर्षितोऽत्यर्थं यस्तु ध्यानपरो भवेत् ।
सन्न्यासीह स विज्ञेयो वानप्रस्थाश्रमे स्थितः ॥
योगाभ्यासरतो नित्यमारुरुक्षुर्जितेन्द्रियः ।
ज्ञानाय वर्त्तते भिक्षुः प्रोच्यते पारमेष्ठिकः ॥
यस्त्वात्मरतिरेव स्यान्नित्यतृप्तो महामुनिः ।
सम्यक् च दमसम्पन्नः स योगी भिक्षुरुच्यते ॥
भैक्ष्यं श्रुतञ्च मौनित्वं तपो ध्यानं विशेषतः ।
सम्यक् च ज्ञानवैराग्यं धर्म्मोऽयं भिक्षुके मतः ॥
ज्ञानसन्न्यासिनः केचित् वेदसन्न्यासिनोऽपरे ।
कर्म्मसन्न्यासिनः केचित्त्रिविधः पारमेष्ठिकः ॥
योगी च त्रिविधो ज्ञेयो भौतिको मोक्ष एव च ।
तृतीयोऽन्त्याश्रमी प्रोक्तो योगमूर्त्तिसमाश्रितः ॥
प्रथमा भावना पूर्व्वे मोक्षे त्वक्षरभावना ।
तृतीये चान्तिमा प्रोक्ता भावना पारमेश्वरी ॥
धर्म्मात् सञ्जायते मोक्षो ह्यर्थात् कामोऽभि-
जायते ।
प्रवृत्तञ्च निवृत्तञ्च द्विविधं कर्म्म वैदिकम् ॥
ज्ञानपूर्व्वं निवृत्तं स्यात् प्रवृत्तञ्चापि दैवतम् ।
क्षमा दमो दया दानमलोभोऽभ्यास एव च ॥
आर्ज्जवञ्चानसूया च तीर्थानुसरणं तथा ।
सत्यं सन्तोष आस्तिक्यं तथा चेन्द्रियनिग्रहः ॥
देवताभ्यर्च्चनं पूजा ब्राह्मणानां विशेषतः ।
अहिंसा प्रियवादित्वमपैशुन्यमकल्कता ।
एते सामासिका धर्म्माश्चातुर्व्वर्ण्ये मनीषिताः ।
प्राजापत्यं ब्राह्मणानां स्मृतं स्थानं क्रियावताम् ॥
स्थानमैन्द्रं क्षत्रियाणां संग्रामेष्वपलायिनाम् ।
वैश्यानां मारुतं स्थानं स्वधर्म्ममनुवर्त्तिनाम् ।
गान्धर्व्वं शूद्रजातीनां परिचारेण वर्त्तताम् ॥"
इति गारुडे ४९ अध्यायः ॥ * ॥

अन्यच्च ।
"ब्राह्मणस्य तु वक्ष्यामि प्रभो कर्म्म वसुन्धरे! ।
यानि कर्म्माणि कुर्व्वीत मम भक्तिपरायणः ॥
षट्कर्म्मनिरतो भूत्वा अहङ्कारविवर्ज्जितः ।
लाभालाभं परित्यज्य भिक्षाहारो जितेन्द्रियः ॥
मम कर्म्मसमायुक्तः पैशुन्येन विवर्ज्जितः ।
शास्त्रानुसारी मध्यस्थो न जडः शिशुचेतनः ।
एतद्धि ब्राह्मणं कर्म्म एकचित्तो जितेन्द्रियः ।
इष्टापूर्त्तञ्च कुरुते स मामेति वसुन्धरे! ॥
क्षत्रियाणां प्रवक्ष्यामि मम कर्म्मसु निष्ठताम् ।
यानि कर्म्माणि कुर्व्वन्ति क्षत्रिया मध्यसंस्थिताः ॥
दानशूरश्च कर्म्मज्ञो यज्ञेषु कुशलः शुचिः ।
मम कर्म्मसु मेधावी अहङ्कारविवर्ज्जितः ॥
अल्पभाषी गुणज्ञश्च नित्यं भागवतप्रियः ।
गुरुविज्ञानसम्पन्नो गुरुकर्म्मस्वतन्द्रितः ॥
अभ्युत्थानाभिगमने पैशुन्येन विवर्ज्जितः ।
एतैर्गुणैः समायुक्तो यो मां भजति क्षत्रियः ॥
भक्तः सम यो नित्यं मम लोकाय गच्छति ।
वैश्यानान्तु प्रवक्ष्यामि मम कर्म्मसु निष्ठताम् ॥
यानि कर्म्माणि कुर्व्वते मम भक्तिपथे स्थिताः ।
एतैर्गुणैः स्वधर्म्मेण लाभालाभविवर्ज्जितः ॥
ऋतुकालाभिगामी च शान्तात्मा मोह-
वर्ज्जितः ।
शुचिदक्षो निराहारी मम कर्म्मरतः सदा ॥
गुरुपूजको नित्यं युक्तो भक्तानुवत्सलः ।
वैश्यस्त्वेवन्तु युक्तो यो नु कर्म्माणि कारयेत् ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥
अथ शूद्रस्य वक्ष्यामि कर्म्माणि शृणु माधवि! ।
यानि कर्म्माणि कृत्वा तु शूद्रो मत्तः व्यवस्थितः ॥
दम्पती मम भक्तौ यौ मम कर्म्मपरायणौ ।
उभौ भागवतौ भक्तौ मत्परौ कर्म्मनिष्ठितौ ॥
देशकालौ च जानाति रजसा तमसोज्झितः ।
निरहङ्कारयुक्तात्मा आतिथेयो विनीतवान् ॥
श्रद्धावानतिपूतात्मा लोभमोहविवर्ज्जितः ।
नमस्कारप्रियो नित्यं मम चिन्ताव्यवस्थितः ॥
शूद्रकर्म्माणि मे देवि! य एवं स समाचरेत् ।
मक्का चाचिरकालेन शूद्रमेव भवाम्बुधम् ॥"
इति वाराहे विविधकर्म्मविनिश्चिताध्यायः ॥

अपरञ्च ।
शुकपितोवाच ।
"विमाक्षो चातुराश्रम्य विस्तरान्मे तपोधन ।
आचचक्षे न मे ह्यद्य प्रयात प्रतिसिद्धति ॥
व्यास उवाच ।
कृतोपनयनः सम्यक् ब्रह्मचारी गुरौ वसन् ।
तत्र धर्म्मोऽस्य यश्चैव कथ्यमानं निशामय ॥
स्वाध्यायोऽथाग्निशुश्रूषा स्नानं भिक्षाटनं तथा ।
गुरौ निवेद्य तच्चाद्यमनुज्ञातेन नियमः ॥
धर्म्मार्थकाममोक्षाणां सम्यक् प्रत्युपपादनम् ।
दैवाहूतः भवेच्चैव तत्परोऽभूय नित्यदः ॥
अवाप्य सकलान् वेदान् प्राप्य प्राप्य गुरो-
र्म्मतात् ।
ततो वरान्मुदा दद्याद्गुरवे दक्षिणान्वितः ॥
गार्हस्थ्यकामस्तु गार्हस्थ्याश्रममाश्रयेत् ।
वानप्रस्थाश्रमञ्चापि चतुर्थं स्वेच्छया वसेत् ॥
तत्रैव च गुरोर्गेहे द्विजो निष्ठामवाप्नुयात् ।
गुरोरभावे तत्पुत्रे तद्वदेव निवसेत् ॥
एवं जयति मृत्युं स द्विजः प्राक्तनदुष्कृतम् ॥
उपावृत्तस्तु तस्मात् गृहस्थाश्रमकाम्यया ।
असमानकुलां कन्यामुद्वहेत निशाचर! ॥
स्वकर्म्मणा धनं लब्ध्वा पितृदेवातिथीनपि ।
सम्यक् सम्प्रीणयन्भार्य्या सदाचाररतो द्विज ॥
गार्हस्थ्यं ब्रह्मचर्य्यञ्च वानप्रस्थं यथाश्रमाः ।
क्षत्रियस्यापि गदिता य आचारा द्विजस्य हि ॥
वैश्यानाञ्च गार्हस्थ्याश्रमद्वितयं विधुः ।
गार्हस्थ्यमुत्तमं त्वेकं शूद्रस्य क्षणदाचर! ॥
स्वानि यथाश्रमोक्तानि कर्म्माणीह न हापयेत् ।
यो हापयति तस्यासौ परिकुप्यति भास्करः ॥"
इति वामनपुराणे १४ अध्यायः ॥ * ॥

पुनश्च ।
श्रीकूर्म्म उवाच ।
"ब्राह्मणक्षत्रियविशां शूद्राणाञ्च यथाक्रमम् ।
स्वधर्म्मानां मया भूयः शृणु धर्म्मान् यथोदितान् ॥
दानं दद्याद्यजेद्देवान् यज्ञैः स्वाध्यायतत्परः ।
नित्योदकी भवेद्विप्रः कुर्य्याच्चाग्निपरिग्रहम् ॥
कृतार्थं याजयेदन्यानन्यानध्यापयेत्तथा ।
कुर्य्यात् प्रतिग्रहान्नाथ शुक्लापाध्यायतो द्विज ॥"
शुक्लापोतु शुक्लः शुद्धो न्यायार्ज्जितोऽर्थो यस्य तस्मात् । इति तट्टीका ।
"सर्व्वलोकहितं कुर्य्यादहितं नाचरेद्द्विज ।
मैत्री समस्तभूतेषु ब्राह्मणस्योत्तमं धनम् ॥
ग्राव्णि रत्ने च पारक्ये समबुद्धिर्भवेद्द्विज ।
ऋतावभिगमः पत्न्यां शस्यते चास्य पार्थिव! ॥१
दानानि दद्यादिच्छातो द्विजेभ्यः क्षत्रियोऽपि
हि ।
यजेच्च विविधैर्यज्ञैरधीयीत च पार्थिव ॥
शस्त्राजीवो महीरक्षा प्रवरा तस्य जीविका ।
तत्रापि प्रथमे कल्पे पृथिवीपरिपालनम् ॥
धरित्रीपालनेनैव कृतकृत्या नराधिपाः ।
भवन्ति नृपतेरंशा यतो यज्ञादिकर्म्मणाम् ॥
दुष्टानां शासनाद्राजा शिष्टानां परिपालनात् ।
प्राप्नोत्यभिमताल्लोकान् वर्णसंस्थां करोति यः ॥२
पाशुपाल्यञ्च वाणिज्यं कृषिञ्च मनुजेश्वर ।
वैश्याय जीविकां ब्रह्मा ददौ लोकपितामहः ॥
तस्याप्यध्ययनं यज्ञो दानधर्म्मश्च शस्यते ।
नित्यनैमित्तिकादीनामनुष्ठानञ्च कर्म्मणाम् ॥३
द्विजातिसंश्रयं कर्म्म तादर्थ्यं तेन पोषणम् ।
क्रयविक्रयजैर्व्वापि धनैः कारुद्भवेन वा ॥
दानञ्च दद्याच्छूद्रोऽपि पाकयज्ञैर्यजेत च ।
पित्र्यादिकञ्च वै सर्व्वं शूद्रः कुर्व्वीत तेन च ॥४
भृत्यादिभरणार्थाय सर्व्वेषाञ्च परिग्रहः ।
ऋतुकालाभिगमनं स्वदारेषु महीपते ॥

त्रिपुष्कर स्वरान् देवी प्रकाशोदीर्नां मर्थ भयम् ।"

इति शारदातिलके ।

अस्यार्थः । चिदात्मेति चन्द्रसूर्याग्निरूपा । द्विचत्वारिंशदिति भूतलिपिमन्त्रमयी । पञ्चाशदिति मातृकामयीत्यर्थः । सर्व्वगात्रेण सर्व्ववर्णेन गुम्फिता परस्परमिलिता सती मन्त्रमयं जगत् सूते प्रकाशयति इत्यर्थः । मूलाधारे सर्पवत् कुण्डलीभूता नाडी वर्त्तते तन्मध्यस्थायित्वात् कुण्डली । सर्व्वविश्वेत्युभयोपादानात् शब्दार्थरूपोभयप्रतिपादिकेति सूचितम् । त्रिपुष्करमिति त्र्यश्रमध्यमकर्णिकत्वेन तोयत्रयम् । स्वरानिति उदात्तानुदात्तस्वरितान् । इति तट्टीका ॥ ० ॥ अपि च ।

"द्विचत्वारिंशता मन्त्रे गुम्फिता विश्वनायिका ।
सा प्रसूते कुण्डलिनी शब्दब्रह्ममयी विभुः ॥
शक्तिस्ततो ध्वनिस्तस्मान्नादस्तस्मान्निरोधिका ।
ततोऽर्द्धेन्दुस्ततो बिन्दुस्तस्मादासीत् परा ततः ॥"

इति सारदायामाचार्य्यः ।

मूले मूलाधारे द्विचत्वारिंशता गुम्फिता विश्वनायिका कुण्डलिनी अनेन क्रमेण अकारादिसकारान्तां द्विचत्वारिंशदात्मिकां भूतलिपिमन्त्रात्मिकां वर्णमालिकां सूते इत्यन्वयः । क्रममाह शक्तिमिति सा कुण्डलिनी शक्तिं सूते ततः शक्तेर्ध्वनिरासीदिति योजना । ततो ध्वनेरित्यादि ज्ञेयम् । अयञ्च क्रम सर्व्वोत्तरोत्तरो ज्ञेय । तत्र सत्त्वप्रविष्टा चिच्छक्तिशब्दवाच्या । पुनराकाशस्था सैव सत्त्वप्रविष्टा रजो-ऽनुविद्धा सती ध्वनिशब्दवाच्या । अपरावस्था सैव तमोऽनुविद्धा नादशब्दवाच्या । अपरावस्था सैव तम प्राचुर्य्यान्निरोधिकाशब्दवाच्या । सैव तदुभयप्राचुर्य्यादर्द्धेन्दुशब्दवाच्या । उक्तञ्च पदार्थादर्शे ।

"इच्छाशक्तिर्मलोद्युक्तो ज्ञानशक्तिप्रदीपक ।
शुक्लरूपिणी च सा शक्ति क्रियाख्या चञ्चल
प्रभुः ॥"

अत्रापि बिन्दुः स्थानान्तरगत पराख्यो भवति ।
पश्यन्ती मध्यमा वाणी वैखरी शब्दजन्मभूः ।
तत्र परा मूले पश्यन्ती स्वाधिष्ठाने मध्यमा कण्ठे वैखरी मुखे । तदुक्तं पञ्चाचार्य्यैः ।

"स्वात्मा कुण्डलिनी मध्ये ज्योतिर्मात्रास्वरूपिणी ।
अयोबिन्दुपा तस्मादूर्द्ध्वं सूक्ष्मगामिनी ॥
सैव प्रकाशा पश्यन्ती सुषुम्नामाश्रिता भवेत् ।
सैव हृत्पङ्कजं प्राप्य मध्यमा नादरूपिणी ॥
तत सञ्चरमाणा स्यादभिव्यक्तोर्द्ध्वगामिनी ।
सैवोरः कण्ठतालुस्था शिरोघ्राणरदस्थिता ॥
जिह्वामूलौष्ठनिष्पूतसर्व्ववर्णपरिग्रहा ।
शब्दप्रपञ्चजननी श्रोत्रग्राह्या तु वैखरी ॥
इच्छाज्ञानक्रियात्मा तेजोरूपा गुणात्मिका ।
क्रमेणानेन सृजति कुण्डली वर्णमालिकाम् ॥
अकारादिसकारान्तां द्विचत्वारिंशदात्मिकाम् ।
पञ्चाशद्वर्णगुम्फिता पञ्चाशद्वर्णमालिकाम् ॥

स्थाने तदष्टतो भिन्ना कला वर्णादिकान्
क्रमात् ॥"

इति तट्टीका ।

"अष्टौ स्थानानि वर्णानामुर कण्ठ शिरस्तथा ।
जिह्वामूलञ्च दन्ताश्च नासिकौष्ठौ च तालुका ॥"

इति शिक्षावचनम् ॥ ० ॥

किञ्च ।

"यथा भवन्ति देहान्तरमी वर्णाः स्वरा ।
भेदा येन प्रकारेण तथा वक्ष्यामि तत्त्वत ॥
समीरिता समीरेण सुषुम्नारन्ध्रनिर्गता ।
यान्ति प्रयान्ति वदने कण्ठादिस्थानघट्टित ॥
उच्चैरुच्चारितो वायुरुदात्त कुरुते स्वरम् ।
नीचैर्गतोऽनुदात्तञ्च स्वरित तिर्य्यगागत ॥
अष्टौ कण्ठादिस्थानैर्भिन्नाभिलपन्ति क्रमात् ।
अच्प्रभृतय ह्रस्वदीर्घप्लुतसञ्ज्ञा भवन्ति ता ॥
अकारेकारयोर्योगादेकारो वर्ण इष्यते ।
तस्यैवैकारयोगेन स्यादैकाराभिध तथा ॥
उकारयोगात्तस्यैव स्यादोकाराख्य स्वर ।
तस्यैवौकारयोगेन स्यादौकाराख्य स्वर ॥
सन्ध्यक्षरा स्युश्चत्वारो मन्त्रा सर्व्वार्थसाधका ।
इवर्णोवर्णयोर्यत्नेन वै सम्यक प्रदृश्यते ।
बिन्दुसर्गात्मकोऽयत्नमनयोरुच्चरा वदेत् ।
कण्ठात् निःसरन् स्वर प्रायोऽपात्मकस्त-
मर ॥
नश्वर सम एव स्यात् सोष्मास प्रायकस्तु च ।
स सम त्रिविध कण्ठे वायुना कादिमीरयेत् ॥
सम एव नमाद्येन च स्वरभागात्तु तम् ।
स्तोकगम्भीरयस्त्वर्थात् यथो इच्च वर्गगतम् ॥
विसर्गस्तात्त्विक घोषा घ अघश्च य तथा ।
कटुरेफवकारश्च महत्तो दन्तगस्तथा ।
ऊतवगलसानोष्ठाद्गुणप्रासनमकात् ।
दन्तोष्ठाभ्यां वश्च तनस्थानमोऽग्रान् समी-
रयेत् ॥"

इति प्रपञ्चसारे १ पटल ।

वर्णो विसर्ग एव नश्वरो नित्य सोष्माश्च सकारश्च उच्चारणोऽन्त प्रवेशमाणो वायु स्यादित्यन्वय । एवं प्राणको बहिर्निर्गमन शालोबायुश्च स्यात् स एव उच्चार सोष्मास । प्राणवायौ को वायुश्चेति प्राणक । इति तट्टीका ॥ ० ॥ अवर्णकवर्गहविसर्जनीया कण्ठ्या ॥१॥ इवर्णचवर्गयशास्तालव्या ॥२॥ ऋवर्णटवर्गरषा मूर्द्धन्या ॥३॥ लृवर्णतवर्गलसा दन्त्या ॥४॥ उवर्णपवर्गोपध्मानीया ओष्ठ्या ॥५॥ वो दन्त्योष्ठ्य ॥६॥ ए ऐ कण्ठतालव्यौ ॥७॥ ओ औ कण्ठौष्ठौ ॥८॥ इति शिक्षावचनम् ॥ ० ॥ अपि च ।

"यद्गुह्य सर्व्वतन्त्रेषु वर्णोच्चारविधि शिवे ।
तव स्नेहान्महेशानि ! तन्त्र कथयामि ते ॥
यथाप्यमातृकावर्णोच्चारश्च उच्यतोऽधुना ।
अ इ उ ऋ लृ ए ऐ ओ औ वर्णा प्रकीर्त्तिता ॥
अ इ ऋ कण्ठतो ज्ञेया, स्याद्विवर्तना
स्मृता ॥२॥

का टु इत्याद्य मूर्द्धन्या २ दन्त्या ळ तु ल सा
मता ॥ ० ॥
उपवर्गोष्ठभूता ५ स्थानानि कथितानि ते ।
विविध कथयाम्यद्य प्रोच्चार्य कण्ठत स्वरा ॥
अग्रय जिह्वया गृह्य स्वरय जिह्वदन्तकम् ।
तुरस्थानात्ततो वाच्या अकार कण्ठयातन ॥
अग्रनहयसंयोगे भवेत् पूर्व्वस्वरो गुरु ।
परान्तान्तिमवर्णस्य संयोगेषु श्रुतिद्वयो ॥
अपन्नान्तादिसंयोगे योरस्य तत्त्वेष्यते ।
यो श्रुतिस्तु तिरोभूय स्वरवत् श्रुतिता भवेत् ॥
शिवा वीणे धकारस्य इश्रुति परमेश्वरि ।
हदृतिश्च दादिस्थानौ तथादित्यो तु चश्रुति ॥
तद्दव इत्यादौ गमस्तत्रे चाख्या इत्यादौ च ।
रेफादिके तदन्ते वा हकारे घमवाच्यता ॥
यद्वै हृद इत्यादौ ।
किन्तु वैकाव्यमाश्रित्य स्फुट नावाच्य वाच्यता ॥
चु तूर्य्यध्वनिमाप्नोति यादिस्थे परमेश्वरि ।
वाञ्छ इत्यादौ ।
प्रु चतुर्थध्वनि याति नान्तस्थे तु विशेषत ॥
व्याकरणमिश्राणौ ।
लादिस्थोऽप्यथ नान्तस्थो वैनाख्य साम्यवाच्यता ।
प्रकार अहाय इत्यादौ ।
मान्तस्थे मि च मस्यापि नासिकाग्रलवाच्यता ।
ङ ञ ण न मा बिन्दुनासिकाग्रलघा स्मृता ।
यकारस्तु तृतीयश्च पदादौ सर्व्वदा भवेत् ॥
केयूरादावपि तथा अन्यत्र कण्ठमाश्रित ।
नादिस्थसंयोगोऽन्तस्थ स्वरयोगाच्चकार्के ।
प्रत्र स्मात इत्यादौ ।
वर्णोत्तरेषु च्छयोर्म्मिश्रणिकादिवाच्यता ।
वैनाख्यमपि तत्रास्ति गुरोरेव समभ्यसेत् ।
आदिरेफस्तु संयोगे हविरस्तो प्रवेशताम् ।
एवं शाक्ता मन्त्राणि ! पठेत् सोर्व्व जपेत्तदम् ॥
अन्यथा मन्त्राणि नान्यथा फलमाप्नुयात् ॥"

इति प्रपञ्चसारे १ पटल ॥ ० ॥

अपि च ।

"इत्थ स्वरेषु पूर्व्वोक्त परो दीर्घ क्रमादिमे ।
शिवशक्तिमयास्ते स्युर्बिन्दुसर्गविधात्मका ॥
बिन्दु पुमान् रवि प्रोक्त सर्ग शक्तिनिशा
कर ।
ह्रादायो मध्यर्ग यम तवतुष्क नपुंसकम् ।
विना स्वरैस्तु नार्थेवा व्याप्त शक्तिस्वरा ।
शिवशक्तिमयान् प्राहुस्तारकान् मनीषिण ॥
कारकाश्च पञ्चभूतात्मा तद्भूता मातृका मत ।
ततो भूतात्मका वर्णा पञ्च पञ्च विभागत ॥
वायुवह्निभूजलाकाशा पञ्चाशद्विषय क्रमात् ।
पञ्च ह्रस्वा पञ्च दीर्घा बिन्दन्ता सन्धिसम्भवा ।
पञ्चम कादय ष च ब व शान्ता सभी
रिता ॥"

इति सारदा ॥ ० ॥

अन्यदपि त्रिकोणाद्य यथा —
"वाग्भवाद्ये त्रिकोणे धात्रि संस्थापये
त्तन ।

प्रजनं स्वेषु दारेषु शौचमद्रोह एव च ।
आर्जवं भृत्यभरणं नव ते सार्ववर्णिकाः ।
ब्राह्मणस्य तु यो धर्मस्तं ते वक्ष्यामि केवलम् ।
दममेव महाराज धर्ममाहुः पुरातनम् ।
स्वाध्यायाभ्यसनञ्चैव तत्र कर्म समाप्यते ।
तं चेद्वित्तमुपागच्छेद्वर्तमानं स्वकर्मणि ।
अकुर्वाणं विकर्माणि शान्तं प्रज्ञानतर्पितम् ।
कुर्वीतापत्यसन्तानमथो दद्याद्यजेत च ।
संविभज्यापि भोक्तव्यं धनं सद्भिरितीष्यते ।
परिनिष्ठितकार्यस्तु स्वाध्यायेनैव ब्राह्मणः ।
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ॥ ॥
क्षत्रियस्यापि यो धर्मस्तं ते वक्ष्यामि पार्थिव ।
दद्याद्राजा न याचेत यजेत न च याजयेत् ।
नाध्यापयेदधीयीत प्रजाश्च परिपालयेत् ।
नित्योद्युक्तो दस्युवधे रणे कुर्यात् पराक्रमम् ।
ये तु क्रतुभिरीजानाः श्रुतवन्तश्च पार्थिवाः ।
ये तु युद्धे विजेतारस्ते तु लोकजितो नृपाः ।
अविक्षतशरीरो हि समराद्यो निवर्तते ।
क्षत्रियस्य तु तत् कर्म नोभयत्र प्रदम् ।
क्षत्रियाणामयं धर्मो निर्दिष्टो मुनिभिः परः ।
नास्य कृत्यतमं किञ्चिदास्ते दस्युविनिग्रहात् ।
दानमध्ययनं यज्ञो राज्ञां क्षेमोऽभिधीयते ।
तस्माद्राज्ञा महाराज योद्धव्यं धर्मशीलिना ।
प्रजाः स्वेषु च धर्मेषु स्थापयेत महीपतिः ।
धर्मेणार्थेन हि कर्माणि कारयेत् सततं
प्रजाः ।
परमां सिद्धिमाप्नोति नृपतिः परिपालनात् ।
कुर्यादन्यन्न वा कुर्यादैन्द्रो राजन्य उच्यते ॥ ॥
वैश्यस्य च प्रवक्ष्यामि यो धर्मः शाश्वतस्तव ।
दानमध्ययनं शौचं यज्ञश्च धनसञ्चयः ।
पालयेच्च पशून् वैश्यः पितृवद्धर्ममव्ययम् ।
विकर्म तद्भवेदन्यत् कर्म यत् स समाचरेत् ।
रक्षया स हि तेषां वै महत् सुखमवाप्नुयात् ।
प्रजापतिर्हि वैश्याय सृष्ट्वा परिददे पशून् ।
ब्राह्मणाय च राज्ञे च सर्वाः परिददे प्रजाः ।
तस्य वृत्तिं प्रवक्ष्यामि यच्च तस्योपजीवनम् ।
षण्णामेकां पिबेद्धेनुं शताच्च मिथुनं भरेत् ।
लब्धाच्च सप्तमं भागं तथा शृङ्गे कलाः खुरे ।
सस्यानां सर्वबीजानामेषा सांवत्सरी भृतिः ।
न च वैश्यस्य कामः स्यान्न रक्षेयं पशूनिति ।
वैश्ये चेच्छति नान्येन रक्षितव्याः कथञ्चन ॥ ॥
शूद्रस्यापि हि यो धर्मस्तं ते वक्ष्यामि भूपते ।
प्रजापतिर्हि वर्णानां दासं शूद्रमकल्पयत् ।
तस्माच्छूद्रस्य वर्णानां परिचर्या विधीयते ।
तेषां शुश्रूषणाच्चैव महत् सुखमवाप्नुयात् ।
शूद्र एतान् परिचरेत् त्रीन् वर्णाननुपूर्वशः ।
सञ्चयांश्च न कुर्वीत जातु शूद्रः कथञ्चन ।
पापीयान् हि धनं लब्ध्वा वशे कुर्याद्गरीयसः ।
राज्ञा वा समनुज्ञातः कामं कुर्वीत धार्मिकः ।
तस्य वृत्तिं प्रवक्ष्यामि यच्च तस्योपजीवनम् ।
अवश्यं भरणीयो हि वर्णानां शूद्र उच्यते ।
छत्रं वेष्टनमौशीरमुपानद्व्यजनानि च ।
यातयामानि देयानि शूद्राय परिचारिणे ।
अधार्याणि विशीर्णानि वसनानि द्विजातिभिः ।
शूद्रायैव प्रदेयानि तस्य धर्मधनं हि तत् ।
यश्च कश्चिद्द्विजातीनां शूद्रः शुश्रूषुराव्रजेत् ।
कल्प्यां तस्य तु तेनाहुर्वृत्तिं धर्मविदो जनाः ।
देयः पिण्डोऽनपत्याय भर्तव्यौ वृद्धदुर्बलौ ।
शूद्रेण च न हातव्यो भर्ता कस्याञ्चिदापदि ।
अतिरेकेण भर्तव्यो भर्ता द्रव्यपरिक्षये ।
न हि स्वमस्ति शूद्रस्य भर्तृहार्यधनो हि सः ।
उक्तस्त्रयाणां वर्णानां यज्ञस्तस्य च पार्थिव ।
स्वाहाकारवषट्कारौ मन्त्रः शूद्रे न विद्यते ।
तस्माच्छूद्रः पाकयज्ञैर्यजेत व्रतवान् स्वयम् ।
पूर्णपात्रमयीमाहुः पाकयज्ञस्य दक्षिणाम् ॥ ॥

श्रीवराह उवाच ।

इदानीमाश्रमाणाञ्च धर्मं वक्ष्यामि भूमिप ।
ब्रह्मचर्याश्रमं तावत् शृणु धर्माधिनायक ।
गत्वा गुरुगृहं शिष्यो नमस्कृत्य गुरुं शुचिः ।
ब्रूयादध्येतुमायातः शिष्योऽहं तव मारिष ।
तदाज्ञया नित्यमथो तिष्ठेत् नराधिप ।
यदा विचारं प्राज्ञश्च गुरुपादाभिवादनम् ।
तदाज्ञापालनञ्चापि ध्यानं दैवतमर्चनम् ।
स्नानेन चैव कालेऽपि तुष्टिं यश्च समागमम् ।
समाप्तविद्यो गुरवे दक्षिणां प्रतिपाद्य च ॥ ॥
यथाक्रमं ततो गच्छेद्गुरोराज्ञामधिगम्य ।
उद्वहेत् कुलजां कन्यां सुशीलां धर्मचारिणीम् ।
अनन्यचारिणीं सौम्यां रूपाढ्यां प्रियंवदाम् ।
गृहिणां प्रथमो धर्मोऽतिथिपूजैव पार्थिव ।
अप्राप्य पूजामतिथिर्यस्य गेहान्निवर्तते ।
स याति नरकं घोरं पुण्यं तस्मै प्रदाय च ।
प्रथमं स्नानार्थं एतद्देशागतस्यापि सतिथेः ।
पाद्यञ्च मधुपर्कञ्च दद्यात् प्रणतिपूर्वकम् ।
संलापं प्रियालापं कुर्यात्तेन यथासनम् ।
भोजनञ्च यथाशक्ति कारयेत्तमपि नृप ।
देवाश्च पितरश्चापि प्रीयन्तेऽतिथिपूजने ।
आतिथ्यसदृशं कर्म गृहस्थानां न विद्यते ।
यत्र नित्यं स्थितिर्नास्ति सोऽतिथिः परिकीर्तितः ।
सर्वाश्रमाणामधिको गृहाश्रम उदाहृतः ।
यथा नदनदाः सर्वे समायान्ति निवासमाश्रयम् ।
पितृदेवार्थिनं कार्यं गृहिणा सुसमीक्षता ॥ ॥
वानप्रस्थाश्रमं वक्ष्ये शृणुष्व जगतीपते ।
वानप्रस्थाश्रमं गच्छेत् जरठो गृहाश्रमात् ।
तदारण्यकवासादि समयेन च धर्मवित् ।
कन्दैस्तु प्रयतिमा प्रवक्ष्यत्योङ्गमाम् ।
सुते भार्यां परित्यज्य वनं गच्छेत् सहैव वा ।
ग्राम्यं सुखाहाराज्ञा च सर्वभूतानि दूरतः ।
परित्यक्तधर्मस्य ब्राह्मणस्य विधीयते ।
वर्णाश्रमोदराद्येन कथ्यते तद्विधुरे ।
भैक्षवृत्त्योपवीताः प्रयत एव मौनिनः ।
यथाकालमिन्द्राग्नी ध्यानतो निर्विकल्पकः ।
यमोपवासभोजी स्याद्वेदनिर्दिष्टो जितेन्द्रियः ।
निराशी सततं धर्मज्ञो निर्लोभी निर्विकार
भाव ।
विवेकी सर्वभूतानां विहाय कलुषं सदा ।
अपारं सत्यशौचञ्च यतात्मा समुपाश्रयन् ।
पञ्चमूलफलाहारो जलाशी वायुभोजनः ।
निराहारोऽथवा शुद्धोऽथवा तप आचरेत् ।
एवं कुर्वन् महाभाग ब्राह्मणः सिद्धिमाप्नुयात् ।
चतुर्थमाश्रमं वक्ष्ये शृणुष्वैकमना हि ।
गुरोः पुरीषमासाद्य भिक्षुः सन्न्यासधर्मवित् ।
विचरेत् सकलां पृथ्वीं लब्धाहारो ग्रामसङ्कुले ।
योगाभ्यासरतो नित्यं धर्मावयवतत्परः ।
धर्माधर्मविहीनो वा भिक्षुकः सिद्धिमा
प्नुयात् ॥"

इति वाराहे धर्मसंहिते २५।२६।२७ अध्यायाः ॥ ॥ अन्यत् नारसिंहपुराणे ५८ अध्याये मार्कण्डेयपुराणे मदालसोपाख्याने कूर्मपुराणे २।३ अध्याये च द्रष्टव्यम् ॥ ॥ गजविषयकमते । वालीर मुल् इति भाषा । तत्पर्यायः । प्रवेणी १ आस्तरणम् २ परिस्तोमः ३ कुथः ४ कुथा ५ । इत्यमरः ॥ प्रवेणि ७ परिस्तोम ८ कुथम् ९ । इति भरतः ॥ शुक्लादि । रङ इति ख्यातः । स च बहुविधो यथा । श्वेत १ पाण्डु २ धूसर ३ कृष्ण ४ पीत ५ हरित ६ रक्त ७ नील ८ श्याम ९ पाटल १० श्याव ११ धूम्र १२ पिङ्गल १३ कर्बुर १४ । इति चामरः ॥ गम्भीरगालकस्य बहु भाति वर्णो भवति । इति सारबोधः ॥ यशः । गुणः । स्तुतिः । इति मेदिनी । णे २६ ॥ अक्षरम् । व्रतम् । रूपम् । अम्बरम् । भेदः । गीतक्रमः । चित्रम् । तालविशेषः । अङ्गरागः । इति हेमचन्द्रः ॥

वर्ण पुं क्ली, (वर्ण्यते भिद्यते इति । वर्ण + घञ् ।) भेदः । (वर्ण्यते दीप्यतेऽनेनेति ।) वर्ण + घञ् ।) रूपम् । (वर्ण्यते । वर्ण + घञ् ।) अम्बरम् । (वर्ण्यते रज्यते इति । वर्ण + घञ् ।) विलेपनम् । इति मेदिनी । णे २६ ॥ शब्दश्च द्विविधः । ध्वन्यात्मको वर्णात्मकश्च । अस्योत्पत्तिप्रकारो यथा —

"यदैवात्मा विवक्षायामात्मन्येव विमर्शनम् ।
अव्यक्तं प्रकटयति यदा वा कुण्डली तदा ।
मूलाधारे विजृम्भति सुषुम्ना वेष्टिता तनुः ॥"

इति प्रपञ्चसारः ॥

अस्यार्थः । सुषुम्नामार्गस्यावेशात् चैतन्ये स्वाहेतोर्वेदा वा कुण्डली अविकृतरूपा यदि अवस्थानं यथावश्यं ध्वनिं न प्रकटयति अर्थात् शब्दभावव्यापारं करोति तदा मूलाधारे विजृम्भति सुषुम्नायां सुषुम्नाख्या सुषुम्नेति । इति तट्टीका ॥ ॥ अस्य कुण्डलीमूलप्रथमं यथा, —
'कुण्डली भुजगाकारा सर्पवत् कुण्डलीकृता ।
विद्यामयकला देवी ब्रह्मरन्ध्रगता ।
हिमाद्रिदुग्धशुभ्राभा पञ्चाशद्वर्णरूपिणी ।
तुष्टिता सर्वदा प्रियेण कुण्डली परदेवता ।
निराकृताप्रबुद्धा वा स्तनार्ध प्रसवं यतः ।
शुक्ला सुरूपिणी सर्वविश्वप्रसविनी ।

गो गौरी गौरवो गङ्गा गणेशो गोकुलेश्वर ।
शार्ङ्गी पञ्चान्तको गाथा गन्धर्व्व सर्व्वग
स्मृति ॥
सर्व्वसिद्धि प्रभा धूम्रा दिजाख्य शिवदर्शन ।
विश्वात्मा गौ एकरूपा वालबङ्किलोचन ॥
गीत सरस्वती विद्या भोगिनी नन्दनी धरा।
भोगवती च हृदय ज्ञान जालन्धरी लय ॥
लयस्थाने नर इति वा पाठ । ग ॥
घ घट्ट गौ घुर्घुरी घण्टी घण्टीशश्चिपुरा
न्तक ।
वायु शिवोत्तम चण्डा किङ्किणी घोरनायक ।
मरीचिर्म्मरयो मेधा कालरूपी च दाम्भिक ।
जम्बोन्दरा ज्वालमूल नन्दैशो घगण ध्वनि ।
शेखाख्यविद्या चन्द्रांशा कामाख्यमन्धामय ॥घ॥
ङ शङ्खो भैरवचण्डो बिन्दूत्तंस शिशुप्रिय ।
एकदन्ती दमनश्च रामरो विषयस्पृहा ।
कान्ति श्वेताङ्गयो घोरो द्विजात्मा ज्वालिनी
वियत् ।
मनश्शक्तिश्च मदनो विघ्नेशो चात्मनायक ॥
एकनेत्रो महानन्दो दुर्द्धरश्चन्द्रमा यति ।
शिवघोषा नीलकण्ठ कामेशी च मषाशुको ॥
॥ङ॥
च पुष्करो चणी वाणी चात्मशक्ति सुचन्दन ।
चन्द्रसुखधरो भुक्ता मद्विवाचारवस्मिनी ।
भुक्तास्थाने भीम इति च पाठ ।
एकरूपो रुचि कूर्म्मचासुण्डा दीर्घबाहुक ।
वामबाहुमलमाया चतुर्भू त्रिजरूपिणी ॥
न्यसितश्च द्विनेत्रश्च लक्ष्मीस्त्रितयजापन ।
चन्दन चन्द्रमा दयापेतनो वधिको बुध ।
दयी केन्दसुखेच्छात्मा कौमारपूर्व्वपलगुणी ।
चमड्डमेखला वायुर्मीन्मो च मूलाचनो । च ।
छन्दछन्द सुप्रभा च प । पशुपतिश्छ लि ।
निर्मल सरल वह्निभूतमात्मा विलासिनी ।
एकनेत्रश्च इयनी द्विशिरा वामकूर्पर ।
शोकथा लाङ्गली वामकामदा सदाशिव ॥
माता विद्याधर चायुश्चिचल शतिमस्तक ॥
॥छ ॥
ज प्रणो वानर जूली भोगदा विजया शिरा।
लवदयो भयो चेता धातकी सुमुखी विधु ॥
जम्बोन्दी स्मृति भासा सुप्रभा कणुका धरा।
दीर्घबाहु बधिप्रयो नन्दी तेजा सुराधिप ।
लवरा वैगितो वामो आनवाभ तन्नात्मक ।
शुक्लादन्तेश्वरो वेणी चामोन्मनविस्ततः ॥ज॥
झ भड्कारी गुहा भङ्कताशु मम बहुमत ।
चचधी द्राविणी नाद पाशी विजा मर्म
स्थिति ॥
विराजेन्द्रो धनुर्हस्त कर्कोमो वादन कुच ।
दीर्घबाहुबलो रूपमात्र'स्वन सुपत्र ।
दुर्म्मुखो वट आमा वामु विकटा कुम्भककः ।
कलङ्कप्रिया वामा चतुर्जीमध्यपर्व्वक ।
दण्डहारावरावश मायात्मा चञ्चल चर ।
॥झ॥

ञकारी बोधनी विश्वा कुण्डली मतन्ती वियत् ।
कौमारी नागविज्ञानी सव्याङ्गुलनखो नक ।
कुण्डलीस्थाने कुण्डली मखरस्थाने मुखर इति
वा पाठ ।
सर्व्वशस्यमिता बुद्धि स्वगात्मा घघरध्वनि ।
धर्म्मैकपादो सुमुखी विरजा चन्द्रेश्वरी ।
बुद्धिस्थाने सिद्धि स्वगस्थाने सग इति वा
पाठ ।
गायत्र पुष्पधन्वा च रागात्मा च धरा
शिवी ॥ञ॥
टङ्कार कपाली च सोमदा खेचरी ध्वनि ।
मुकुन्दो विनदा पृथ्वी वैष्णवी वारुणी नव ।
सोमदा स्थाने सोमेश इति क्वचित् पाठ ।
दक्षाङ्गार्द्धचन्द्रश्च जरा भूति पुनर्भव ।
वृहस्पतिर्द्धनुश्चित्रा प्रमोदा विमला कटि ।
दाना गिरिश्चहायगुणात्मा सुमुखो
मरुत् ॥ ट ॥
ठ शून्यो मञ्जरी वीज पाणिनी लाङ्गली
क्षमा ।
वनभी नन्दनो जिह्वा सुनङ्ग्धूणक सुधा ।
वर्त्तुल कुण्डलो वह्निरमृत चन्द्रमण्डल ।
दक्षजानुरुभावश्च दवभस्यो वृहद्ध्वनि ।
एकपादो विभूतिश्च ललाट सर्व्वमित्रक ।
वृषघ्नो नलिनी विष्णुर्म्महेशो ग्रामणी
शशी ॥ ठ ॥
ड स्मृतिदारुको नन्दरूपिणी योगिनी
प्रिय ।
कौमारी शङ्करस्त्रासस्त्रिवक्रो नन्दो ध्वनि ।
दुर्जयो जटिली भीमा द्विजिह्व पृथिवी सती ।
कोरगिरि क्षमा कान्तिनाभि स्वाती च
लोचनम् ।
जटिलीस्थाने जटिल इति कान्तिस्थाने शान्ति
रिति वा पाठ । ड ।
ढो ढक्का निर्गुण पूर्णो यक्षेशाद्यर्द्धनेश्वर ।
अर्द्धनारीश्वरश्चोयभीश्वरी विघ्नेशो नव ।
यक्षेशार्द्धनेश्वर इत्यत्र यक्षेशो धनेश्वर
इत्यपि पाठ ।
दक्षपादाङ्गुलीमूल सिद्धिर्न्नो विनायक ।
प्रहासा विरेरा चाहिर्निर्गुणो निधनो ध्वनि ।
प्रहासा स्थाने प्रहास इति वा पाठ ।
त्रिनेत्र पालिनी खड्गधारिणी क्रोड़पुच्छक ।
एकाङ्गुर सगात्मा च विशाखा श्रीर्म्मनो रति ॥
सङ्गस्थाने स्वकच इति वा पाठ । ढ ॥
णो निर्गुण रतिर्ज्ञान जम्भन पक्षिवाहन ।
जया शम्भो नरकजित् निष्कला योगिनीप्रिय ॥
द्विमुखं कोटवी श्रोत्र समृद्धिर्बोधनी मता ।
त्रिनेत्रो मानुषो व्योमदक्षपादाङ्गुल्ययुगलम् ।
माधव शङ्खिनी वीरो नारायणश्च निर्णय ।
सुयस्थाने चर्ण इति वा पाठ । ण ॥
त पूतना वृति शुद्धि इन्द्रो शक्तिकटो क्षमा ।
वामस्फिकचामरूपी च कामिनी मध्य
कर्णक ।

हरिस्थाने हवि इति वा पाठ ।
आषाढ़ी सच्चसुखश्च कामिका पृष्ठपुच्छक ।
रक्तकश्च श्यामसुखो वाराही मकरोत्कथा ॥
आषाढ़ीसच्चसुखस्थाने आषाढ़ाभ्यन्तरश्च
इति रक्तकश्चस्थाने रक्तकण्ठ इति वा पाठ ।
सुगतोऽङ्गसुखा बुद्धबाहुश्च क्रोड़पुच्छक ।
गन्धो विश्वामरश्चन्द्रश्चानुराधा च चौरक ॥
बुद्धस्थाने वृद्ध इति चौरकस्थाने चैविक इति वा
पाठ ।
जयन्ति पुलको भ्रान्तिरचङ्ग्मदनातुरा ॥ त ॥
थ शिरामी महाग्रन्थिग्रन्थिमाढ्यो भयानक ।
शिली शिरश्चिगो दण्डी भद्रकाली शिलोच्चय ।
लक्ष्मी बुद्धिर्व्विकर्म्मा च दक्षनागाधिपोऽमर ।
वरन्ता भीमन्ता केशी वामजान दलोऽमल ।
लक्ष्मी बुद्धिविकर्म्मा स्थाने लम्बो वह्निर्व्विकर्म्मा
इति वा पाठ ।
लोलीजब्धिनी गुह्य ग्रन्थग्रन्थो विदारक ।
लोलो इत्यादिस्थाने लोलोच्चयिनीपुर्ग्गुरार
चन्द्रदिवाकरौ इति वा पाठ । थ ॥
दोऽन्नेशी धातकिघाता दाना दर्ल कलत्रकम् ।
दीन वामश्च दानश्च भक्तिराद्दवती धरा ।
दाता दल स्थाने दानाद्यु इति वा पाठ ।
सुकृता योगिनी सदा कुण्डली वामगुल्फक ।
कात्यायनी शिवा दुर्गा लज्जा मति
कुण्डकी ॥
लज्जास्थाने यज्ञना कुण्डकीस्थाने कण्टको
इति वा पाठ ।
स्वस्तिक कुटिला रूप लक्ष्मीर्म्मालिनीन्द्रिय ।
धर्म्मपृष्ठामदेवश्च भमा बहुसुपच्छला ।
धर्म्मपृष्ठस्थाने धर्म्मालत् बहुस्थाने बह इति वा
पाठ ।
वरिदा पुरमथो च दक्षपार्श्विश्वरेशक ॥ द ॥
धो धनार्थो रुचि स्वाद्य धारन्तो धीतिनी
प्रिय ।
मौनेश शङ्खिनी तोयं नागेशो विश्वपावनी ।
धनार्थस्थाने धनाक्ष इति वा पाठ ।
विषका धरणा चिन्ता निषद्रुम न्यो मति ।
पीतवासा विरजा च धाता धर्म्मप्रवग्न ।
धरकाचिन्तास्थाने धरणी चिन्ता इति वा
पाठ ।
सन्दर्भौ मोहनी सन्ध्या चन्द्रतुल्या धर धरा ।
वामपादाङ्गुलीमूलं श्वेता प्रयुग भव ।
कर्म्मात्मा दीर्घजङ्घा च धनेशो धनश्चय ॥ध॥
नो शङ्खिनी क्षमा नीरिम्मारको विश्वपावनी ।
मेषश्च वसिता मेष दच्छरा नारदोऽञ्जन ।
नारदोस्थाने नवना इति वा पाठ ।
सर्व्वाभो विरजश्च वामपादाङ्गुल्युग्मम् ।
वैष्णवेयस्तुविद्ध मर्द्दिनारायण ॥
वामनो ज्वालिनी दीर्घो निरीह सुमति'मेदन् ।
इन्द्रात्मा दीर्घघोणा च जलिनाद्विकेशशो ।
शिरिवायवकोली च द्रिंशो नासिकैव
मति ॥ न ॥

धामान्यराणि दधानि मयाख्यातानि पुरा ॥"
इति ज्योतिस्तत्त्वे बृहस्पतिः ।
अवर्णसमप्रकारास्तु तत्तदर्थे द्रष्टव्याः ॥ ७ ॥ वर्णनामानि यथा,—
"तत्त्वबृंहितबोधाय नाम्नां तत्त्वप्रकाशनम् ।
वर्णनामानि कतिचित् वक्ष्यामि विदुषां मुदे ॥
ॐकारो वर्त्तुलस्तारो वामश्च हंसकारणम् ।
मन्त्राद्यं प्रणवः सत्यं बिन्दुशक्तिस्त्रिदैवतम् ॥
सर्व्वबीजोत्पादकश्च पञ्चदेवो ध्रुवस्त्रिकः ।
सावित्री त्रिशिखो ब्रह्म त्रिगुणो गुणजीवकः ॥
आदिबीजं वेदसारो वेदबीजमतः परम् ।
पञ्चरश्मिस्त्रिकूटश्च त्रिभवो भवनाशनः ॥
गायत्रीबीजषडङ्गौ मन्त्रविद्याप्रसूः प्रभुः ।
अक्षरं मातृकासूर्धामादिरद्वैतमोक्षदौ ॥ ॐ ॥
अः श्रीकण्ठः सुरेशश्च ललाटश्चैकमात्रिकः ।
पूर्णोदरी दण्डिमेषौ सारस्वत प्रियश्च ॥
ब्रह्मा वासुदेवो गणेशः केशवोऽमृतम् ।
कीर्त्तिर्निवृत्तिर्वागीशो नरकारिर्हरो महत् ॥
ब्रह्मा वामार्द्धनो कुम्भः करण्डः प्रणवात्मकः ।
मध्यमो वामपार्श्वः कामेशी मालिनी वियत् ॥
विश्वेशः श्रीविष्णुकण्ठौ प्रतिपत्तिर्दियिनी ।
अकोमकलसवाश्च भाशत्रु वामकर्णिकौ ॥ आ ॥
आकारो विजयानन्दो दीर्घच्छायो विनायकः ।
क्षीरोदधिः पयोदश्च पाशो दीर्घासुसत्तकौ ॥
प्रचण्ड एकजो रुद्रो नारायण ईश्वरः ।
प्रतिष्ठा मानदा कान्तो विश्वान्तकगजान्तकः ॥
पितामहो द्वितीयोऽभूः क्रिया कान्तिश्च
यमाख्यः ।
द्वितीया मानदा बाहुर्विघ्नराज कृष्णो वियत् ॥
नारायणश्च सुन्दरसुरो भगमालिनी ॥ आ ॥
इ सूक्ष्मा शाल्मली विद्या चन्द्र पूषा सयुत्सकः ।
सुमित्र सुन्दरी वीरः कोटरः काटरः यमः ॥
भूमध्यो माधवस्तुष्टिर्दक्षनेत्रश्च नासिका ।
शान्ता कान्ता कामिनी च कामो विघ्नविना
यकः ।
नेपालो भरणी रुद्रो निद्रा जिह्वा च पावकः ॥
॥ ई ॥
ईर्म्मूर्त्तिर्महामाया लोचनो वामलोचनम् ।
गोविन्द शेखरः पुष्टिः सुभद्रा रतिवर्द्धनः ॥
त्रिमूर्त्तिः प्रकाशश्च वामिशङ्करः परापरः ।
कर्णमरीचो भेदक्त रतिश्च पीडवर्द्धनः ॥
श्रीवत्सः शिवः तुष्टिश्चतुर्थी विष्णुमालिनी ।
वैष्णवी वैन्दवी जिह्वा कामकला सनातना ॥
पावकः कोटरः कीर्त्तिर्मोहिनी कालकारिका ।
कुचदन्द्र सन्मति च शान्तिस्त्रिपुरसुन्दरी ॥ उ ॥
उ शङ्करो वर्त्तुलाक्षो भूतः कल्याणवाचकः ।
अमरेशो दक्षकर्णः षण्मुखो मोहनः शिवः ॥
उग्रः प्रभुर्धृतिर्विष्णुर्विश्वकर्म्मा महेश्वरः ।
शम्भुश्चण्डिका पुष्टिः पञ्चमी वह्निवासिनी ॥
चण्डिकास्थाने चण्डिका इति वा पाठः ।
कामघ्ना कामदा श्रेष्ठो मोहिनी विघ्नहारिणी ।
उग्रः कुण्डिका श्रोत्रं पावकोधीशो हरो हरः ॥
अटश्च इति क्वचित् पाठः । ऊ ॥
ऊ कण्ठको रतिः शान्तिः क्रोधनो मधुसूदनः ।
कामराज कुचेशश्च महेशो वामकर्णकः ॥
कण्ठकस्थाने कण्टक इति वा पाठः ।
अर्घीशो भैरवः सूक्ष्मो दीर्घघोणा सरस्वती ।
विलासिनी विघ्नकर्त्ता लक्ष्मणो रूपकर्षिणी ॥
महाविद्येश्वरी षष्ठः षण्डो भूः काव्यजङ्घकः ॥
॥ ऋ ॥
ऋ पूर्णगिरिः पुरी देवमाता त्रिविक्रमः ।
भावभूतिः क्रिया क्रूरा रेचिका नासिका धृतः ॥
एकपादशिरो माला मधुरा शालिनी जलम् ।
स्थ स्थमानभर मेधा निवृत्तिरयथात्मकः ।
रौहिणी ग्रिपफूली च पूर्णगिरिश्च सप्तमी ॥
मेघः स्थाने मेध इति च पाठः ॥ ऋ ॥
ॠ क्रोधोऽतिथिशो वाणी वामनोऽमोघ
श्रीधृतिः ।
ऊर्द्धमुखी निशानाथः पद्ममाला विभक्षो ॥
शशिनी मोचिका श्रेष्ठा दैत्यमाता प्रतिष्ठिता ।
एकदन्तालयो माता हरिता लिपुनीदया ॥
माता स्थाने माया इति वा पाठः ।
कौमारः श्यामला मैत्री प्रतिष्ठा पतिरष्टमी ।
मज्जावमिष कौमारो पावको मत्वकर्षिणी ॥
मितस्थाने मतेति वा पाठः । ऌ ॥
ऌ स्थाणुः श्रीधरः शुद्धो मेघा धूम्रो वको वियत् ।
दक्षोपन्तरमसौ परिघः कौशिकस्तौ ॥
वरिष्ठस्थाने वाचस इति वा पाठः ।
विश्वेश्वरी दीर्घजिह्वा महिषो लाङ्गलि परा ।
चन्द्रिका पार्थिवो धूम्रा हिरण्य कामवर्द्धनः ॥
शुचिस्मिता च नवमी कान्तिरामानकेश्वरः ।
चिताकर्षिणी कायश्च स्तीकुक्षसुन्दरी ॥
चिताकर्षिणीस्थाने चित्ताकर्षिणी इति वा
पाठः । ॡ ॥
ॡकार कमला हर्षा हृषीकेशो मधुव्रतः ।
सूक्ष्मा कान्तिर्वामगण्डो रुद्र आमोदरी सुरा ॥
शान्तिकृत् स्वस्तिका शक्रो मायावी लोलुपो
वियत् ।
कुमुदो हरितो माता भीषणोऽयो जनार्दनः ॥
कामिनी विन्दवा वायो विश्वा सुखः शुचि
स्मिता ॥
विन्दवास्थाने विजया इति वा पाठः ।
उग्रो वैश्वानरस्थो म दशको वहनस्य रुद्रः ॥
एकारो वायवः प्रतिष्ठितोऽयोनिर्मद्र मरुत् ॥
उग्रा मूलोऽष्टमी च ज्योत्स्ना महा प्रसन्नैव ।
मूलस्थाने ब्रत इति वा पाठः ।
अध श्वासं ब्रता घोरा भद्रा कर्म्मसाधकः ।
वह्निविशुभमपती कुण्डली मोहिनी वक ॥
मोहिनीसारसंलिप विश्वोरा देवसङ्गकः ।
अग्निरेकादशी भद्रा पद्मनाभः कुलावृतः ॥ ए ॥
देवेशा भौतिकः कान्ता ज्ञाननो मोहिनी
शिवा ॥
एषा दामोदरः प्रज्ञोऽधरो विलप्तबाधि ।
समाङ्कशी भगदूयोनिः स्त परिनोपश्च ॥
ज्ञाताङ्गना कपर्द्दी श्री पीठेशोऽग्निः समाहकः ।
त्रिपुरा लोहिता राज्ञी वायवो भौतिकासनः ॥
महेश्वरो द्वादशी च विमलश्च सरस्वती ।
कामकोटो वामजानुरङ्गजान् विजया जगत् ॥
॥ ऐ ॥
ओकारः सद्योभूतो पश्चिमास्य पुनः स्थिरा ।
धरोत्तमो वासुदेवो गायत्री दीर्घजङ्घकः ॥
आप्यायनी चोदन्ती कन्यांशाको सुरो हिमः ।
उद्देश्यानन्दकतीसाः कैलासो वसुधाधरः ।
प्रथमाद्यो भक्तश्रमणीय कर्म्मसङ्गणः ।
पयोदशो दीर्घवाला रतिनाथो दिगम्बरः ॥
त्रैलोक्यविजया प्रज्ञा प्रीतिर्वीजादिकर्षिणी ॥
॥ ओ ॥
औकारः शक्तिभो नादस्तेजस्वी वामकर्णकः ।
सदाशिवपद्मैषश्च मनुकथ महाश्रिया ।
अधोदन्तश्च कण्ठोष्ठौ ज्वलन्नः सरस्वती ।
ज्वाला वाईठसी शान्तो व्यापिनी प्रजव
सह ॥
अनन्ता व्यापिनी व्योमा चतुर्दशी रतिप्रिय ।
नैर्ऋतमानकार्दिनी च ज्वालामालिनिका भृगुः ॥
व्योमास्थाने रोमा इति वा पाठः । औ ॥
अङ्गारकश्चतुर्थो दन्तो घटिका धनगुप्तकः ।
प्रद्युम्न श्रीशो पीतिर्व्वाचयोनिद्रवज्ञः ॥
दन्तस्थाने दम इति वा पाठः ।
पर्द्ध शशी प्रभाधीर योनबिन्दु कलानिधिः ।
अक्रूरश्चेतना नादपूर्णा दुःखहरः शिवः ॥
शिरः प्रद्युम्नदेवश्च शब्दद् सम्पर्णकः ।
पूर्णिमा रेवती शुद्धः कन्था चरित्रवाति ॥
अक्षरताकर्षिणी मूल विभिन्ना योगस्वपिनी ।
केदारो राधिकाचश्च कुम्भिका चैव दुर्द्धरः ॥
॥ अः ॥
अः कण्ठको महासेन कला पूर्णमृता हरिः ।
इच्छा भद्रा गणेशश्च रतिर्नैवारुद्रो दुखम्
द्विबिन्दुरचना वामोऽनिषद्वो दुःखदम् ।
द्विजिह्वा कुण्डलः वक्त्रः वर्णः प्रतिसंहारः ।
सुन्दरी प्रयमानका गजनाथो महेश्वरः ॥ क ॥
क क्रोधीशो महाकाली कामदेवः प्रकाशकः ।
कपाली तैजसः प्राणीर्वाक्शुद्धो जलावकः ॥
चक्री प्रजापतिः ब्रह्मदैवरचना विश्वाश्रितः ।
अनन्ता धारणी विष्णुपाशिनी परात्मकः ।
इन्द्रजन्यस्थाने इन्द्रदयौ इति वा पाठः ।
वर्णाढ्य सुधी मध्यः वकारोऽध शिरो
वदनम् ।
माहेश्वरो शुचा पृथ्वा मङ्गलश्च खरः ।
विद्या कामेश्वरो शुचः कामरूपो महेशकः ।
त्रिपुरं रक्ष्णो रङ्ग कुसुमा परमात्मकः ॥ ख ॥
ख प्रचण्ड कामरूपी वाङ्मिनीषु सरस्वती ।
आकाशनिलिनिर्द्धुमा ज्योतिस्थापिनी द्रुः ।
शिखको दन्तनातोय कोरिबिन्दुकोलीवासिनी ।
मूर्द्धं कपालौ सन्ध्याको कमलोऽपरामरः ।
शुभार्द्धपीठो चक्रविन्दौ कलाकाशरम्भदृष्टौ ।
॥ ग ॥

गो गौरी गौरवो गङ्गा गणेशो गोकुलेश्वर ।
शार्ङ्गी पञ्चान्तको गाथा गन्धर्व्वः सर्व्वग
स्मृतिः ।
सर्व्वसिद्धिः प्रभा धन्ना द्विजाख्यः शिवस्थान ।
विश्वात्मा गौः एकरूपा बालकुद्धिविलोचन ।
गीतः सरस्वती विद्या भोगिनी नन्दनी धरा ।
भोगवती च हृन्ये चाक जालन्धरी लव ।
लवस्थाने नर इति वा पाठः । ग ।
घ खड्गी घुर्घुरी घण्टी घण्टीशश्चिपुरा
न्तकः ।
वायु शिवोत्तम सत्त्वा किङ्किणी घोरनायक ।
मरीचिर्व्विरूपो मेधा कालरूपी च शाम्भिक ।
लम्बोदरा ज्वालमल गर्दभी ह्वन नन्दिनि ।
शैलाख्यविद्या सहर्त्ता कामाख्यमनचामय । घः ।
ङ भद्रो भैरवचन्दो विन्दूत्तम शिशुप्रिय ।
एकरुद्रो दगमस्त खपरो विश्वयोनिहा ।
कान्ति श्वेताङ्गो घोरो द्विणात्मा ज्वालिनी
वियत् ।
मन्त्रशक्तिश्च मदनो विघ्नेशो नायक ।
एकनचो महानन्दो दुहृदन्धमा यति ।
शिवघोषा नीलकण्ठ कामेशी च मयांशुकी ।
। ङ ।
च पुष्करी दली वामी वामशक्तिः सदाशिव ।
चन्द्रश्चक्रधरो भूता महिषा चारचन्द्रिनी ।
भूतास्थाने भीम इति च पाठः ।
एकरूपी रविः कूर्म्मवासुकी दीर्घबाहुक ।
वामबाहुमूलमाद्या चतुर्भुजः सिक्तरूपिणी ।
हरिनश्च ह्निनेत्रश्च लक्ष्मीश्चिवयलोचन ।
चन्द्रश्चन्द्रमा एवचेतना हदिको बुध ।
दवी कीटमुखेत्कारा कौमारपूर्व्वफलगुनी ।
चतङ्गमेखला वायुर्म्मन्त्री च मूलाधती । च ।
छन्दन सुषुम्ना च पशुपतिस्तथा ।
लिपाल तरल वह्निभूतमाता विलासिनी ।
एकनेत्रश्च कपली द्विविरा वामकूर्पर ।
गोत्रश्री लाङ्गली वामकाममता सदाशिव ।
माता विद्याधर पाशुलिङ्गता व्याप्तिमस्तक ।
। छ ।
ज जयो वानर शूली भोमदा विजया स्थिरा ।
लवदेवो जयो नेता धातकी सुमुखो विभु ।
लम्बोदरी स्मृतिः प्रात्मा सुप्रभा कुसुका धरा ।
दीर्घबाहुः रुचिर्हंसो नन्दी तेजा सुराधिप ।
जलयो वैतिली वामा मानवाश चन्द्राङ्कक ।
श्रुश्चान्तरश्चरो वेगी वामोत्मा मनस्विष्णु । ज ।
झा झङ्कारी गुह्यो झम्झावायु सत्य महामन ।
चण्डेशो द्राविणी बाद्यः मामी जिह्वा सर्व्व
स्थितिः ।
विराजेश्वो धनुर्द्धर कबन्धी नायक कुक ।
दीर्घबाहुभवो रूपमाकाश्वि तयच ।
दुर्मुखो गत चामा यात्रिकटा कुष्मकश्च ।
कलज्ञनप्रिया वामा महाकौमकपर्व्वक ।
दक्षवाहाङ्गुराद्य मायात्मा चमन पर ।
। ञ ।
ञकारो बोधनी विश्वा कुण्डली मसदो वियत् ।
कौमारी नागविज्ञानी सव्याहुलनखरी चक ।
कुण्डलीस्थाने कुक्कुली मसदस्थाने सुखद इति
वा पाठः ।
सर्व्वगचविला तुष्टिः खगात्मा चचरध्वनिः ।
धर्म्मकपादौ सुमुखी विरजा चन्द्रनेश्वरी ।
तुष्टिस्थाने सिद्धि खगस्थाने खग इति वा
पाठः ।
गायन पुष्पधन्वा च रागात्मा च चरा
शिखी । ञ ।
टङ्कारः कपाली च सोमदा खेचरी ध्वनि ।
मुकुन्दो विनदा पृथ्वी वैष्णवी वारुणी नव ।
सोमदा स्थाने सोमेश इति क्वचित् पाठः ।
दक्षाङ्गकाहुंचन्द्रश्च जरा भूति पुनर्भव ।
बृहस्पतिधनुश्चित्रा प्रमोदा विमला कटि ।
दाता शिरिमहाधनुर्ज्ञानात्मा सुमुखो
महत । ट ।
ठ शून्यो मञ्जरी वीज पाणिनी लाङ्गली
चथा ।
वनजो नन्दनी जिह्वा सुगक्षमूलक सुधा ।
वर्तुल कुण्डलो वह्निरमृत चन्द्रमण्डल ।
दक्षजानुश्चभावश्च देवभक्षो बृहद्ध्वनि ।
एकपादो विभूतिश्च ललाट सर्व्वमित्रक ।
वृषघ्नो नलिनी विष्णुर्महेशो ग्रामणी
प्रभो । ठ ।
ड स्मृतिदारुको नन्दिप्रियो योगिनी
प्रिय ।
कौमारी षडूरक्षाध्मिपको मन्त्री ध्वनि ।
दुरूपो जटिलो भीमा द्विजिह्वः पृथिवी सती ।
कोटरशिरः क्षमा कान्तिनाभिः स्वाती च
लोचनम् ।
जटिलीस्थाने जटिल इति कान्तिस्थाने भ्रान्ति
रिति वा पाठ । ड ।
ढो ढक्का निर्गुण पूर्ण्णो यक्षेशादनदेश्वर ।
चङ्गनारीश्वरश्चोद्धमीश्वरो विघ्नेशो मद ।
यक्षेशादनदेश्वर इत्यत्र यक्षेशो यमदेश्वर
इत्यपि पाठः ।
दक्षपादाङ्गुलेर्मूल सिद्धिदको विनायक ।
प्रहारा विदेरा चाह्निर्निर्गुणो निधनो ध्वनि ।
प्रहारा स्थाने प्रहास इति वा पाठः ।
त्रिगुण पाणिनी लक्ष्मधारिणी कोदण्डुक ।
दक्षापुर लम्बात्मा च विघ्नात्मा धीमेनी रतिः ।
तद्यस्थाने स्वकच इति वा पाठः । ढ ।
णो निर्गुण रतिर्ज्ञान जम्भक पक्षिवाहन ।
जया शम्भो नरकजित् निष्कला योगिनीप्रियः ।
द्विमुख कोटवी श्रोत्र समृद्धिर्बोधनी मता ।
त्रिनेत्रो मानुषो व्योमन्दपादाङ्गुलेर्मुखम् ।
माधव शङ्खिनी वीरो नारायणश्च निर्णय ।
मुखस्थाने नखं इति वा पाठः । ण ।
त पूतना तारिः शुद्धि शक्ती मल्लिचण्डो भया ।
वामस्फिक्वामदचो च कामिनी मध्य
कर्णिक ।
हरिस्थाने हरि इति वा पाठः ।
आषाढी लक्षुखश्च कामिका पृष्ठपुच्छक ।
एकचक्र श्यामसुखो वाराही मकरोदया ।
आषाढीलक्षुखस्थाने आषाढालक्षुख
इति एकचक्रस्थाने एकचक्र इति वा पाठ ।
सुगमो हस्तो गुह्यांगुष्ठ कोशपुच्छक ।
गन्धो विश्वासवक्त्रश्च गुरुदासा च गौरक ।
गुह्यस्थाने गुह्य इति गौरकस्थाने गैरिक इति वा
पाठः ।
जयन्ति पुलकी भ्रान्तिरजङ्गमदनातुरा । त ।
थ स्थिरामी महाग्रन्थिग्रन्थिपाद्धो भयानक ।
शिखी शिरश्छिन्नो दण्डी भद्रकाली शिलोचय ।
ज्ञानी शुद्धिर्निकर्म्मा च दक्षनाशाधिपोऽमर ।
वरदा भोगिनी केशो वामजानू दक्षोऽनल ।
ज्ञानी शुद्धिविकर्म्मा स्थाने ज्ञानी वह्निर्विकर्म्मा
इति वा पाठ ।
लोलोज्वलिनी गुह्य: परचन्द्रो विनायक ।
लोलो इत्यादिस्थाने लोलोज्वलिनीपूर्ण्णमधर
चन्द्रदिवाकरो इति वा पाठ । थ ।
दोऽङ्गोशो धातकिधाता दाता दत्त कलत्रकम् ।
दीन चानव दानव भक्तिराश्वनी धरा ।
दाता दत्त स्थाने दाताशु इति वा पाठः ।
सुषुम्ना योगिनी सदा कुम्भो वामगुल्फक ।
कात्यायनी शिवा दुर्गा लक्ष्मा नाभि
कण्टकी ।
लक्ष्मास्थाने लक्ष्मा कण्टकीस्थाने कण्टकी
इति वा पाठः ।
स्वस्तिक कुटिला रूप लम्बोष्ठोमाजितेन्द्रिय ।
धर्म्मशुभावदेवश्च क्षमा बहुसुखला ।
धर्म्महृत्स्थाने धर्म्मदत् बहुस्थाने बहु इति वा
पाठ ।
हरिदा पुरमधी च दक्षपादाङ्गुलिरेखक । द ।
धो धमार्गो रवि स्वाहा ज्ञानसी योगिनी
प्रिय ।
मोहेश: शङ्खिनी तोयं नागेशो विश्वपावनी ।
धनादस्थाने धनाद इति वा पाठः ।
पिङ्गला धरका चिन्ता नैपुण्यं प्रियो मति ।
पीतवासा चित्रका च धाता धर्म्मध्वजम: ।
धरकाचिन्तास्थाने धरको चिन्ता इति वा
पाठ ।
वन्दनी मोहको लज्जा वक्तुण्डा धर धरा ।
वामपादाङ्गुलेर्मूलं ज्येष्ठा सुरपुर भव ।
बुद्ध्यात्मा दीर्घजङ्घा च धनेशो धनघघ । ध ।
नो हसिनी चमा नारिर्न्नारदनो विश्वपावनी ।
मैषश्च धरिला मेष एकरा नारदोऽङ्ग ।
नारदोस्थाने नवधा इति वा पाठः ।
कर्णवामी निरश्चन वामपादाङ्गुलेर्मुखम् ।
वैनतेयस्तुतिश्च तरलिशाविरामक ।
वामनो ज्वालिनी दीर्घो निरीह सुमति मेदसु ।
ब्रह्मात्मा दीर्घघोषा च दक्षिणाङ्गुरवश्चरी ।
मित्रवामनोलो च शिरो मणिकेतु
मौर्षु । न ।

वर्णाः

म' पूरधियता सौख्या मोहित पञ्चमो रसा ।
शुक्लक्वा शिधि श्रीष काशराधि सुवासिता ।
मधष पावन माता पञ्चरेखाविरञ्जन ।
मालिनी मालिनी पाम वीरतश्वा धग्धर ।
पावनस्थाने पावन इति तन्त्रस्थाने तन्त्र इति वा पाठ' ।
दशपाच्च सेनानी मरीचि पवन प्रति ।
ऊर्द्धांर्द्ध नवमी कुम्भोऽनर्घ रेखा च मोचक ।
कुम्भस्थाने कान्ता इति रेखास्थाने रेया इति वा पाठ' ।
कला द्वितीयमिन्द्राक्षी लोकाक्षी मन आत्मन' ।
आत्मन स्थाने आत्मक इति वा पाठ' । प ।
प' वक्त्रो दुर्गिणी धूम्रा वामपार्श्वों जनार्दन ।
जया पाद शिखा रौद्री पितृकार प्राणिनी प्रिय ।
उमा विहङ्गम कालकर्त्त्रिणी प्रियपावकी ।
प्रलयाग्निर्नीलपादोऽक्षर पशुपति प्रभो ।
कुम्भारो मालिनी वक्ता पावनी मोहवल्लभ ।
निष्फलवामहङ्कार प्रयागो वामको ष्फकम् ।
ष्फकास्थाने भक्ष्या इति प्रयागस्थाने प्रयाम इति वा पाठ' । म' ।
बो वक्त्री भूधरी मार्गी पवरी लोचनप्रिय ।
प्रचेता कलश पक्षी सुखमत्त्व कपर्द्दिनी ।
एकवीरो भया मातृ शिखिवाही दुराश्रय' ।
सुखबिन्दुर्मत्ती षष्ठा योद्धा विवादनप्रिय ।
सुखबिन्दुस्थाने सुखबिन्दुरिति वा पाठ' ।
जोर्ण्हिनी ताडिता भूमि सुर्वबिम्बवतिप्रिय ।
हारभिर्लक्षिप्युत्त वसारी वसुधाधिप' ।
सुपविन्दुस्थाने पुष्पबिन्दोति वा पाठ ।
वक्त्री पृष्ठे पेटा च मोदको गगन प्रति ।
पूर्व्वाषाढ़ामधस्सिह्वो इति कुम्भकलोयकी ।र'।
भ' शिखा भ्रमरी भीमो विश्वमूर्त्तिर्निशाचरम् ।
दिक्को भूधरी मूर्च्छ वरुणस्य वाचक ।
निशाचरस्थाने निशाचर इति वा पाठ' ।
अदर्श भ्रमका दोषिर्वेचो भूमि पयो नभ ।
नाभिसक अशोकात्तुविश्वमूर्त्तिनिशाकर ।
नव स्थाने भव इति निशाचरस्थाने निशाकर इति वा पाठ' ।
प्रायात्मा तापिनी वक्ता विलवमी च चन्द्रिका ।
भीमसेन सुधाचिन्त सुखा माताग्रुरं वर' ।
अचलस्थाने वका इति सुखस्थाने सुख इति वा पाठ' । म' ।
म' कालो ज्वलित कालो महाकाली महाभाव' ।
वैकुण्ठो वसुधा चन्द्रो रवि' पुष्करायक ।
वसुधास्थाने वसुदा इति वा पाठ ।
कामभरो वचा मेधा विवदा दोमर्दक ।
कदरथ भ्रमावार्ध बन्दीमातोपरक्तरी ।
वैषस्थाने वैष इति वा पाठ ।
सिद्धि छिद्रो महावीरो प्रदिपर्वा जनेश्वर ।
प्रमत्त प्रियत पद वर्मांशो पञ्चमकलम् ।

वर्णाः

मातङ्गमालिनी विष्णु' षड्यामरयो वियत् ।
रयस्थाने मत्त इति वा पाठ । म ।
यो वाची वसुधा वायुर्बिन्दुरिति पुरुषोत्तम' ।
सुगाल' ष्वपन' श्रीशो प्रमार्षि' प्राणिसेवक' ।
सुगालस्थाने सुगाम इति वा पाठ ।
शुक्ला भ्रमो जटी लोला वायुवेगो यशस्करी ।
यज्ञुकष चापा वाली हृदय कपिला प्रभा ।
आर्येयो व्यापकाद्ययागो होमो याग प्रभा सुखम् ।
पक्ष सर्वेश्वरी धूमचामुण्डा सुमुखेश्वरी ।
प्रभास्थाने प्रभा इति वा पाठ ।
लगात्मा मधवी माता ज्वलिनी भक्तिनायक' ।
तक्षम श्रीधका भीमो धनिमादनवर्द्धिनी ।
लगात्मास्थाने विमात्मा इति तैवमस्थाने यमम इति वा पाठ ।
मेरु' मोक्ष पक्तिनामा मायच्छ्रा प्रावर्त्तक ।
मेरुस्थाने मेरु इति वा पाठ । व ।
रो रक्त क्रोधिनी रेफ पावककोकसो मत ।
प्रकाया दर्वभी दीपो रक्तकृष्णा पर वशी ।
ओकसस्थाने लोकन इति रक्तकृष्णास्थाने रक्त कृष्ण इति वा पाठ' ।
सुवर्गमो मति सर्व्वा धातु रक्त प्रकाशक ।
व्यापको रेवती दास कुलजो वह्निमण्डलम् ।
दासस्थाने नाशमिति मण्डलस्थाने दर्शाग्र इति वा पाठ' ।
उपरेखा सुखदग्धा वेदकपयना पुरा ।
प्रज्ञाति सुगती प्रजापश्रद्ध मायको धनम् ।
वेदकपयनास्थाने वेन्कपयना इति वा पाठ' ।
श्रीकण्ठ उग्रा भूयरं शम्भो त्रिपुरसुन्दरी ।
अविन्दुवर्तिनी ज्वाला श्रीशैलो विष्णुलोचनौ ।
श्रीशैलस्थाने श्रीशैल इति वा पाठ । र' ।
लकाक पूतना इन्द्रो माधव प्रकाशक' ।
बलानुज विवाकोषो व्यापको सोमवद्धक ।
माधवस्थाने माधवी इति वा पाठ' ।
प्रकृती वाहोमत ऐवी लवक वारुणी मति ।
शिखा वाक्षी क्रिया माता भामिनी कामिनी प्रिया ।
प्रकृतिस्थाने प्रकृतिमिति लवकस्थाने मरकमिति वा पाठ' ।
ज्वालिनी वैष्णवी गान्ध प्रचण्ड ओषको हरि ।
विमलाक्षमणी वक्षी पैनी मैत्रमिति वका दल ।
ममस्थाने मन्त्र इति बकास्थाने कथा इति वा पाठ' । ब' ।
बो वाक्षी बाढमी चन्द्रा वरुणो मेन्य्यंसक ।
सङ्कीर्णी ज्वालिनी वकु' कलक्षविकायक ।
वकस्थाने इष्टु इति कलकविकासे कलकंदर इति वा पाठ' ।
उच्चाटोमङ्क ना वीती वशा स्थिर खाना' तुष्टि ।
विमाता प्रहर' वेदो विशेषो समताप्तनम् ।श।
श' नन्दक कामरूपी श्वामक्ती अहामति ।
गौलनामा कुमारो ऽस्थि श्रीकण्ठा इनेश्वर ।

वर्णाः

प्रवण' प्रयवें प्राणा सुभगा विस्फूर्ति शुचो ।
प्रद्युम्नी महालक्ष्मीमहेश कुम्भकोलिनी ।
बाहुहर्षो वियद्गङ्गा पुष्पवाहुम हल ।
मामोद पुण्डरीकाक्षा काली कल्याणवायक ।
हलस्थाने द्विवा इति वा पाठ' । ष ।
प श्वेतो वासुदेवश्च मीना प्रज्ञा विनायक ।
परमेष्ठी वामबाहु' वेदो गर्भविमोचन ।
मीनास्थाने मीता इति प्रज्ञास्थाने प्रज्ञा इति वा पाठ' ।
सम्भोन्दरो यमोच्छिष्ट कामभुक कामद्रमक ।
सुनिवष्टा हस्ते लक्ष्मा मेघश्मा प्रिय प्रिय ।
कामद्रुमकस्थाने कालधमक इति वा पाठ ।
सर्व्वात्मा वदर कीमो मता वचोविलासिनी ।
कलकण्ठी सुधाबिन्दा दुष्टात्मा मनभू शिवास्त्र ।
घो वस सुयशा विष्णुर्वैश्यानरदस्त्रक ।
समहोन्न पक्तिनामा सोम मेघवती भयु ।
सुधमास्थाने सुभग इति भासस्थाने मोक्ष इति वा पाठ ।
प्रकृतिरीश्वर' शुद्धो प्रमा श्वेता कुम्भोलक ।
दधायारी म्लत सात्त्वी परमात्मा परोऽक्षर ।
सुलभ्य च सुखिरो गौ कलकण्ठो हकोन्ती ।
प्राणात्मा च पुराख्यो लक्ष्मी भीमो हिरण्मय ।
दुर्गोत्तारिणि सर्व्वोद्याभीषे मनिमनोहर ।
दुर्गोत्तारिणिस्थाने दुर्गोत्तारिणी इति सर्व्वो द्यानस्थाने सर्व्वोद्या इति मनोहरस्थाने मनोहर इति वा पाठ' । स ।
ह प्रियो गगन ज्वलो नागलोकोऽम्बिका पति' ।
नकुलीशो आलाधार प्राणिया कपिला मल ।
मलस्थाने मन इति वा पाठ' ।
परमात्मा अक्षरो वीरो मवाह प्राणिराज्य ।
नगो मयो दक्षालयाद कुटकुर्परादन ।
मवाहस्थाने वराह इति अक्षरस्थाने अक्षुच इति कुटकुर्परादनस्थाने कुटकोपरादन इति वा पाठ ।
अल्पोऽमरिरुद्र प्रभु प्राणप्रतिक्लादन ।
सर्वोचरावक ज्ञानी चेतना पादपूरक' ।
मविकुरम्याने चारिचर इति सर्वोपस्थाने सर्वोच इति वा पाठ ।
महाक्षभ्यो पर वारो मेधयानो हरिमेश' ।
विन्दुर्गा नियम ऐवी मेघताम्रमेश्वर' कुमार ।
इदपाद नराघम प्राणोद सोमसक्लगार्ध ।
ज्ञ' एकी विमला सोषोऽनवभो वनपद्म शिवा ।
व्यापिको शिवदा वैश्वमक्रवतात वज ।
ग्लौद्रावी च वैराग' वारो वाराङ्ग सयन ।
ज्वरो मङ्गलि पीता शिवेशो मक्तमालिनी ।ळ' ।
ळ' कोपगुल्लक शाली वन्द अंकेश पर' ।
गुर्गिनी विद्रुमा प्रमा महालिका हुमाकर ।
सुमुखस्थाने सुमुख इति वन्दस्थाने वद्धमिति मत्स्याने मय इति वा पाठ' ।
पराका कोपवर्द्धा नयाम्नी मेघवाचक ।
वर्मात्र वाराह काम संप्रोवार्तावपूरक ।

वर्णान्तस्थाने वर्णान्त इति वर्णाद्यस्थाने वर्णाग इति वा पाठः ।
सेवपालो महाघोरो मातृकाम्नायलक्षण ।
सुरत कथयतात्मना कालनिज्ञा गतीश्वरः ।
छायापुत्रश्च सघातो मनवः श्रीलंलाटक ॥'च ॥
इति नन्दनभट्टाचार्य्यविरचित वर्णाभिधान समाप्तम् ॥

वर्णक स्त्री, (वर्णयतीति । वर्ण + ण्वुल ।) हरितालम् । इति रत्नमाला ॥ गात्रानुलेपनयोग्य पिष्ट द्रव्य वा सुगन्धिद्रव्यम् । इत्यमरः ॥ चन्दनम् । इति शब्दरत्नावली ॥

वर्णक, पुं, क्ली, (वर्ण + स्वार्थे संज्ञायां वा कन् ।) विलेपनम् । चन्दनम् । इति मेदिनी । के, १५९ ॥ (यथा महाभारते । १२ ।१११।१ ७।
'वर्णकार्श्चस्तथा गन्धांश्चोरयित्वेह मानव ।
छुछुन्दरित्वमाप्नोति राजन् ! लोभपरायण ॥")

वर्णक, पुं क्ली, (वर्ण्यते रज्यतेऽनेनेति । वर्ण + घञ । स्वार्थे कन् ।) विद्रुमहरितालकादयोऽस्त्री कान्तिः । इत्यमरभरतौ ॥ (यथा आर्य्यासप्तशत्याम् । १८६ ।
"कस्तौ बिभ्रति शुम्भति च सारचलवर्णस्य वर्णक सुग्धः ।
को भवति दत्तकण्टकमन्ते कल्याणचित्रकेति ॥")

वर्णक पुं, (वर्णयति ग्रन्थादीन् विस्तारयतीति । वर्ण + ण्वुल ।) चारण । इति मेदिनी । के, ५० । मण्डलम् । इति शब्दरत्नावली ॥

वर्णकवि पुं, कुबेरपुत्र । इति त्रिकाण्डशेषः ॥

वर्णकूपिका, स्त्री (वर्णानां कूपिकेव ।) मस्याधारः । यथा,—
"मसीधानी मसिमणिर्मेलान्धुवर्णकूपिका ॥"
इति त्रिकाण्डशेषः ।

वर्णचारक, त्रि (वर्णान् नीलादीन् चारयति विस्तारयतीति । चर + णिच + ण्वुल ।) चित्रकारः । इति शब्दमाला ॥

वर्णज्येष्ठ, पुं (वर्णेषु चतुर्षु मध्ये ज्येष्ठ प्रथमोत्पन्नात् गुणोत्कृष्टत्वाच्च ।) ब्राह्मणः । इति त्रिकाण्डशेषः ॥

वर्णज्येष्ठ, त्रि (वर्णेन ज्योतिषोक्तपारिभाषिक ब्राह्मणादिवर्णेन ज्येष्ठः श्रेष्ठः ।) अष्टकोटिपरिगणनापरिगृहीतवर्णकूटे श्रेष्ठः । पारिभाषिकब्राह्मणवर्णोत्पन्नकन्यावरयोः ज्येष्ठकन्याविवाहनिषेधो यथा —
"मीनकर्कटवृश्चिकविप्रा
स्त्रिवणुग्धनुः क्षत्रिय उक्तः ।
कुम्भनरद्वयमेव विश स्युः
मेषवृषभकौ वनितावरजाति ॥
वर्णज्येष्ठा च या नारी वर्णहीनश्च यः पुमान् ।
तयोर्विवाहे मृत्युः स्यात् मस्ताधानाच्च कन्यकाः ॥"
इति ज्योतिस्तत्त्वे वर्णकूटम् ॥

वर्णतूलि, स्त्री (वर्णानां तूलिरिव ।) लेखनी । इति शब्दरत्नावली ॥

वर्णतूलिका स्त्री (वर्णानां तूलिकेव ।) लेखनी । इति हारावली । २१९ ॥

वर्णतूली स्त्री, (वर्णानां तूलीव ।) लेखनी । इति त्रिकाण्डशेषः ॥

वर्णद, क्ली (वर्ण ददातीति । दा + "आतो ऽनुपसर्गे कः ।" ३ । २ । ३ । इति क ।) कालीयकम् । इति जटाधरः ॥ वर्णदातरि, त्रि ।

वर्णदात्री, स्त्री, (वर्ण ददातीति । दा + तृच + ङीप् ।) हरिद्रा । इति राजनिर्घण्टः ॥ वर्णदातरि त्रि ।

वर्णदूत पुं, (वर्णा एव दूता यत्र ।) लिपि । तत्पर्य्यायः । लेख्य १ वाचिकहारक २ स्वस्ति मुख ३ । इति त्रिकाण्डशेषः ।

वर्णधर्म्म, पुं, क्ली (वर्णानां ब्राह्मणादीनां धर्म्म ।) ब्राह्मणक्षत्रियवैश्यशूद्राणां कर्त्तव्य कर्म्म । तद् यथा,—
"यजन याजन दान ब्राह्मणस्य प्रतिग्रह ।
अध्यापन चाध्ययन षट्कर्म्माणि द्विजोत्तमाः ॥
दानमध्ययन यज्ञो धर्म्मः क्षत्रियवैश्ययो ।
दण्डो युद्ध क्षत्रियस्य कृषिर्वैश्यस्य शस्यते ॥
शुश्रूषैव द्विजातीनां शूद्राणां धनसाधनम् ।
कारुकर्म्म तथाजीव पाकयज्ञोऽपि धर्म्मत ॥
क्षमा दमो दया दानमलोभस्त्याग एव च ।
आर्जवं चानसूया च तीर्थानुसरण तथा ॥
सत्य सन्तोष आस्तिक्य श्रद्धा चेन्द्रियनिग्रह ।
देवताभ्यर्च्चन पूजा ब्राह्मणानां विशेषत ॥
अहिंसा प्रियवादित्वमपैशुन्यमकल्कता ।
समासिकमिम धर्म्म चातुर्व्वर्ण्येऽब्रवीन्मनु ॥
प्रतापन ब्राह्मणानां स्मृत स्नान क्रिया सताम् ।
आत्मनेऽर्द्ध चाश्रमाणां यथाभिव्यक्ताधियाम् ॥
वैश्यानां मारुत स्नान स्वधर्म्ममनुवर्त्तताम् ।
गान्धर्व्वं शूद्रजातीनां परिचारे तु वर्त्तताम् ॥"
इति कौर्म्मे २ अध्यायः ॥०॥

अपि च ।
मार्कण्डेय उवाच ।
"हारीतस्त्वाश्रमाचार तेनैव चोदितो मुनि ।
प्रवक्ष्ये शृणुत वर्णे धर्म्मान् वक्ष्यामि शाश्वतान् ॥
वर्णानामाश्रमाणाञ्च योगशास्त्रञ्च सत्तमा ।
यत्प्राप्य मुनयो नित्य मुच्यते भवबन्धनात् ॥
ब्राह्मण्यां ब्राह्मणेनैव उत्पन्नो ब्राह्मण स्मृत ।
तस्य धर्म्म प्रवक्ष्यामि त योग्य देशमेव च ॥
कृष्णसारो मृगो यत्र स्वभावात्तु प्रवर्त्तते ।
तस्मिन् देशे वसन् धर्म्म कुर्व्वीत ब्राह्मणोत्तमः ॥
अध्यापन चाध्ययन यजन याजन तथा ।
दान प्रतिग्रहश्चैव षट्कर्म्माणीति चोच्यते ॥
अध्यापनञ्च त्रिविध धर्म्मार्थ काम्यकारणम् ।
शुश्रूषाकारणञ्चेति त्रिविध परिकीर्त्तितम् ॥
एषामन्यतमो यत्र दृश्यते यत्र मानवे ।
तत्र विद्या न दातव्या पुरुषेण हितैषिणा ॥
योग्यानध्यापयेच्छिष्यान् ब्रह्मभक्तिपरायणान् ।
विधिनात् प्रतिगृह्णानि यो दद्याद् धर्म्मसिद्धये ॥
वेदमेवाभ्यसेन्नित्य शुचौ देशे समाहित ।
धर्म्मशास्त्रञ्च यथाशक्त्या इत्याह्निकानुसारत ॥
नित्य नैमित्तिक धर्म्म कर्म्म कुर्य्यात् प्रयत्नत ।
गुरुशुश्रूषणञ्चैव यथान्यायमतन्द्रित ॥
स्नाय प्रातश्चरन्धीत विधिनाग्नि द्विजोत्तम ।
तत्स्नान प्रकुर्व्वीत वैश्वदेवं दिने दिने ॥
अतिथिश्चागत भक्त्या पूजयेच्छक्तितो गृही ।
अन्यानभ्यागतान् विप्रान् पूजयेदविरोधत ॥
स्वदारनिरतो नित्य परदारविवर्ज्जित ।
सत्यवादी जितक्रोध स्वधर्म्मनिरतो भवेत् ॥
स्वकर्म्मणि च सम्प्राप्ते प्रमादे नैव रोचयेत् ।
प्रियां हितां वदेद्वाच परलोकाविरोधिनीम् ॥
एष धर्म्म समुद्दिष्टो ब्राह्मणस्य समासत ।
धर्म्ममेवन्तु य कुर्य्यात स याति ब्रह्मण परम् ॥
हारीत उवाच ।
क्षत्रियाणां प्रवक्ष्यामि यथावदनुपूर्व्वश ।
येन येन प्रवर्त्तन्ते विधिना क्षत्रियादय ॥
राजा च क्षत्रियश्चैव प्रजा धर्म्मेण पालयेत् ।
कुर्य्यादध्ययन सम्यक् शुभयुक्तो यथाविधि ॥
दद्याद्दान द्विजातिभ्यो धर्म्मबुद्धिसमन्वित ।
देवताभ्यर्च्चनञ्च पितृकार्य्यपरस्तथा ॥
धर्म्मेण वै यथाकाङ्क्षी अधर्म्मञ्च विवर्जयेत् ।
उत्तमां गतिमाप्नोति क्षत्रियो हीनमाचरन् ॥०॥
गोरक्ष कृषिवाणिज्य कुर्य्याद्वैश्यो यथाविधि ।
दान धर्म्म यथाशक्त्या द्विजशुश्रूषण तथा ॥
लोभदम्भविनिर्म्मुक्त सत्यवागनसूयक ।
स्वदारनिरतो दान्त परदारविवर्ज्जित ॥
धनैर्व्विप्रान् समभ्यर्च्य यज्ञकाले यथोचित ।
अप्रमत्त स्वधर्म्मेषु वर्त्तेत देहपातनात् ॥
यज्ञाध्ययनदानानि कुर्य्यान्नित्यमतन्द्रित ।
पितृकार्य्यञ्च तत्कार्य्यं नारसिंहार्च्चन तथा ॥
एतद्वैश्यस्य कथित स्वधर्म्ममनुतिष्ठत ।
एतन्निषेवमाणस्तु स्वर्ग याति न संशय ॥०॥
वर्णत्रयस्य शुश्रूषां कुर्य्यात् शूद्र प्रयत्नत ।
दासवत् ब्राह्मणानाञ्च विशेषेण समाचरेत् ॥
अयाचित प्रदाता स्यात् कृषिं वृत्त्यर्थमाचरेत् ।
पाकयज्ञविधानेन यजेद्देवानतन्द्रित ॥
शूद्राणां साधिकं कार्य्यं यत्न स्यात् सुखभोजनम् ।
भार्य्यां पोषयतस्तस्य विशुद्धौ चित्तभाजनम् ॥
अन्यदेव रतिश्चैव परदारविवर्ज्जित ।
पुराणश्रवणं विप्रात् पितृभक्तस्य पूजनम् ॥
तथा विप्रनमस्कारस्तथा वर्ज्य दिने दिने ।
वर्ज्यं पक्षान्न चैव दासत्वविवर्ज्जनम् ॥
इत्थं कुर्व्वंस्तथा शूद्रो मनोवाक्कायकर्म्मभि ।
स्थानमैन्द्रमवाप्नोति नष्टपाप सुपुण्यकृत् ॥"
इति गारुडे ९९ ।१० अध्यायौ ॥०॥

अन्यच्च ।
भरद्वाज उवाच ।
"दानमध्ययन यज्ञो ब्राह्मणस्य त्रिवाचित ।
यज्ञो नास्ति चतुर्थोऽस्ति कर्म्मसङ्कारयं विना ॥
ब्राह्मणावल्ये वृत्त्यर्था तु न संश्रय ।

एतत्तु सम्यक् समाख्यातं त्रितयं चास्य
जीविका ।
दानमध्ययनं यज्ञः क्षत्त्रियस्याप्ययं त्रिधा ।
धर्म्मः प्रोक्तः क्षितेः रक्षा शस्त्राजीवश्च जीविका ।
दानमध्ययनं यज्ञो वैश्यस्यापि त्रिधैव तु ।
वाणिज्यं पाशुपाल्यञ्च कृषिश्चैवास्य जीविका ।
दानं यज्ञोऽथ शुश्रूषा द्विजातीनां त्रिधा मया ।
व्याख्यातः शूद्रधर्म्मोऽपि जीविका कारुकर्म्मजा ।
तद्वद्द्विजातिशुश्रूषा पोषणं क्रयविक्रयौ ।
वर्णधर्म्मास्त्विमे प्रोक्ताः श्रूयतामाश्रमाश्रयः ॥"
इति मार्कण्डेयपुराणे मदालसानुशासनाध्यायः ॥
अपरञ्च ।
"ब्राह्मणा ब्रह्मयोनिस्था ये स्वकर्म्मण्यवस्थिताः ।
ते सम्यगुपजीवेयुः षट्कर्म्माणि यथाक्रमम् ॥
अध्यापनमध्ययनं यजनं याजनं तथा ।
दानं प्रतिग्रहश्चैव षट् कर्म्माण्यग्रजन्मनः ॥
षण्णान्तु कर्म्मणामस्य त्रीणि कर्म्माणि जीविका ।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः ॥
त्रयो धर्म्मा निवर्त्तन्ते ब्राह्मणात् क्षत्त्रियं प्रति ।
अध्यापनं याजनञ्च तृतीयश्च प्रतिग्रहः ॥
वैश्यं प्रति तथैवैते निवर्त्तेरन्निति स्थितिः ।
न तौ प्रति हि तान् धर्म्मान् मनुराह प्रजा
पतिः ॥
शस्त्रास्त्रभृत्त्वं क्षत्त्रस्य वणिक्पशुकृषिर्विशः ।
आजीवनार्थं धर्म्मस्तु दानमध्ययनं यजिः ॥
वेदाभ्यासो ब्राह्मणस्य क्षत्त्रियस्य च रक्षणम् ।
वार्त्ताकर्म्मैव वैश्यस्य विशिष्टानि स्वकर्म्मसु ॥
अजीवंस्तु यथोक्तेन ब्राह्मणः स्वेन कर्म्मणा ।
जीवेत् क्षत्त्रियधर्म्मेण स ह्यस्य प्रत्यनन्तरः ॥
उभाभ्यामप्यजीवंस्तु कथं स्यादिति चेद्भवेत् ।
कृषिगोरक्षमास्थाय जीवेद्वैश्यस्य जीविकाम् ॥
वैश्यवृत्त्यापि जीवंस्तु ब्राह्मणः क्षत्त्रियोऽपि वा ।
हिंसाप्रायां पराधीनां कृषिं यत्नेन वर्ज्जयेत् ॥
कृषिं साध्विति मन्यन्ते सा वृत्तिः सद्विगर्हिता ।
भूमिं भूमिशयांश्चैव हन्ति काष्ठमयोमुखम् ॥
इदन्तु वृत्तिवैकल्यात् त्यजतो धर्म्मनैपुणम् ।
विट्पण्यमुद्धृतोद्धारं विक्रेयं वित्तवर्द्धनम् ॥
सर्व्वान् रसानपोहेत कृतान्नञ्च तिलैः सह ।
अश्मनो लवणञ्चैव पशवो ये च मानुषाः ॥
सर्व्वञ्च तान्तवं रक्तं शाणक्षौमाविकानि च ।
अपि चेत् स्युररक्तानि फलमूले तथौषधीः ॥
अपः शस्त्रं विषं मांसं सोमं गन्धांश्च सर्व्वशः ।
क्षीरं क्षौद्रं दधि घृतं तैलं मधु गुडं कुशान् ॥
आरण्यांश्च पशून् सर्व्वान् दंष्ट्रिणश्च वयांसि च ।
मद्यं नीलीञ्च लाक्षाञ्च सर्व्वांश्चैकशफांस्तथा ॥
काममुत्पाद्य कृष्यान्तु स्वयमेव कृषीवलः ।
विक्रीणीत तिलान् शुद्धान् धर्म्मार्थमचिर
स्थितान् ॥
भोजनाभ्यञ्जनाद्दानाद्यदन्यत् कुरुते तिलैः ।
कृमिभूतः श्वविष्ठायां पितृभिः सह मज्जति ॥
सद्यः पतति मांसेन लाक्षया लवणेन च ।
त्र्यहेण शूद्रीभवति ब्राह्मणः क्षीरविक्रयात् ॥

इतरेषान्तु पण्यानां विक्रयादिह कामतः ।
ब्राह्मणः सप्तरात्रेण वैश्यभावं नियच्छति ॥
रसा रसैर्निमातव्या न त्वेव लवणं रसैः ।
कृतान्नञ्चाकृतान्नेन तिला धान्येन तत्समाः ॥
जीवेदेतेन राजन्यः सर्व्वेणाप्यनयं गतः ।
न त्वेव ज्यायसीं वृत्तिमभिमन्येत कर्हिचित् ॥
यो लोभादधमो जात्या जीवेदुत्कृष्टकर्म्मभिः ।
तं राजा निर्धनं कृत्वा क्षिप्रमेव प्रवासयेत् ॥
वरं स्वधर्म्मो विगुणो न पारक्यः स्वनुष्ठितः ।
परधर्म्मेण जीवन् हि सद्यः पतति जातितः ॥
वैश्योऽजीवन् स्वधर्म्मेण शूद्रवृत्त्यापि वर्त्तयेत् ।
अनाचरन्नकार्य्याणि निवर्त्तेत च शक्तिमान् ॥
अशक्नुवंस्तु शुश्रूषां शूद्रः कर्त्तुं द्विजन्मनाम् ।
पुत्त्रदारात्ययं प्राप्तो जीवेत् कारुककर्म्मभिः ॥
यैः कर्म्मभिः प्रचरितैः शुश्रूष्यन्ते द्विजातयः ।
तानि कारुककर्म्माणि शिल्पानि विविधानि च ॥
वैश्यवृत्तिमनातिष्ठन् ब्राह्मणः स्वे पथि स्थितः ।
अवृत्तिकर्षितः सीदन्निमं धर्म्मं समाचरेत् ॥
सर्व्वतः प्रतिगृह्णीयाद्ब्राह्मणस्त्वनयं गतः ।
पवित्रं दुष्यतीत्येतद्धर्म्मतो नोपपद्यते ॥
नाध्यापनाद्याजनाद्वा गर्हिताद्वा प्रतिग्रहात् ।
दोषो भवति विप्राणां ज्वलनाम्बुसमा हि ते ॥
जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः ।
आकाशमिव पङ्केन न स पापेन लिप्यते ॥
अजीगर्त्तः सुतं हन्तुमुपासर्पद्बुभुक्षितः ।
न चालिप्यत पापेन क्षुत्प्रतीकारमाचरन् ॥
श्वमांसमिच्छन्नार्त्तोऽत्तुं धर्म्माधर्म्मविचक्षणः ।
प्राणानां परिरक्षार्थं वामदेवो न लिप्तवान् ॥
भरद्वाजः क्षुधार्त्तस्तु सपुत्त्रो विजने वने ।
बह्वीर्गाः प्रतिजग्राह वृधोस्तक्ष्णो महातपाः ॥
क्षुधार्त्तश्चात्तुमभ्यागाद्विश्वामित्रः श्वजाघनीम् ।
चण्डालहस्तादादाय धर्म्माधर्म्मविचक्षणः ॥
प्रतिग्रहाद्याजनाद्वा तथैवाध्यापनादपि ।
प्रतिग्रहः प्रत्यवरः प्रेत्य विप्रस्य गर्हितः ॥
याजनाध्यापने नित्यं क्रियेते संस्कृतात्मनाम् ।
प्रतिग्रहस्तु क्रियते शूद्रादप्यन्त्यजन्मनः ॥
जपहोमैरपैत्येनो याजनाध्यापनैः कृतम् ।
प्रतिग्रहनिमित्तन्तु त्यागेन तपसैव च ॥
शिलोञ्छमप्याददीत विप्रोऽजीवन् यतस्ततः ।
प्रतिग्रहाच्छिलः श्रेयांस्ततोऽप्युञ्छः प्रशस्यते ॥
सीदद्भिः कुप्यमिच्छद्भिर्धने वा पृथिवीपतिः ।
याच्यः स्यात् स्नातकैर्विप्रैरदित्संस्त्यागमर्हति ॥
अकृतञ्च कृतात् क्षेत्राद्गौरजाविकमेव च ।
हिरण्यं धान्यमन्नञ्च पूर्व्वं पूर्व्वमदोषवत् ॥
सप्त वित्तागमा धर्म्म्या दायो लाभः क्रयो जयः ।
प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एव च ॥
विद्या शिल्पं भृतिः सेवा गोरक्ष्यं विपणिः
कृषिः ।
धृतिर्भैक्षं कुसीदञ्च दश जीवनहेतवः ॥
ब्राह्मणः क्षत्त्रियो वापि वृद्धिं नैव प्रयोजयेत् ।
कामन्तु खलु धर्म्मार्थं दद्यात् पापीयसेऽल्पि
काम् ॥

चतुर्थमाददानोऽपि क्षत्त्रियो भागमापदि ।
प्रजा रक्षन् परं शक्त्या किल्बिषात् प्रतिमुच्यते ॥
स्वधर्म्मो विजयस्तस्य नाहवे स्यात् पराङ्मुखः ।
शस्त्रेण वैश्यान् रक्षित्वा धर्म्म्यमाहारयेद्बलिम् ॥
धान्येऽष्टमं विशां शुल्कं विंशं कार्षापणा
वरम् ।
कर्म्मोपकरणाः शूद्राः कारवः शिल्पिनस्तथा ॥
शूद्रस्तु वृत्तिमाकाङ्क्षन् क्षत्त्रमाराधयेद्यदि ।
धनिनं वाप्युपाराध्य वैश्यं शूद्रो जिजीविषेत् ॥
स्वर्गार्थमुभयार्थं वा विप्रानाराधयेत्तु सः ।
जातब्राह्मणशब्दस्य सा ह्यस्य कृतकृत्यता ॥
विप्रसेवैव शूद्रस्य विशिष्टं कर्म्म कीर्त्त्यते ।
यदतोऽन्यद्धि कुरुते तद्भवत्यस्य निष्फलम् ॥
प्रकल्प्या तस्य तैर्वृत्तिः स्वकुटुम्बाद्यथार्हतः ।
शक्तिञ्चावेक्ष्य दाक्ष्यञ्च भृत्यानाञ्च परिग्रहम् ॥
उच्छिष्टमन्नं दातव्यं जीर्णानि वसनानि च ।
पुलाकाश्चैव धान्यानां जीर्णाश्चैव परिच्छदाः ॥
न शूद्रे पातकं किञ्चिन्न च संस्कारमर्हति ।
नास्याधिकारो धर्म्मेऽस्ति न धर्म्मात् प्रतिषेध
नम् ॥
धर्म्मेप्सवस्तु धर्म्मज्ञाः सतां वृत्तिमनुष्ठिताः ।
मन्त्रवर्ज्जं न दुष्यन्ति प्रशंसां प्राप्नुवन्ति च ॥
यथा यथा हि सद्वृत्तमातिष्ठत्यनसूयकः ।
तथा तथेममञ्चामुञ्च लोकं प्राप्नोत्यनिन्दितः ॥
शक्तेनापि हि शूद्रेण न कार्य्यो धनसञ्चयः ।
शूद्रो हि धनमासाद्य ब्राह्मणानेव बाधते ॥
एते चतुर्णां वर्णानामापद्धर्म्माः प्रकीर्त्तिताः ।
यान् सम्यगनुतिष्ठन्तो व्रजन्ति परमां गतिम् ॥
एष धर्म्मविधिः कृत्स्नश्चातुर्व्वर्ण्यस्य कीर्त्तितः ।
अतः परं प्रवक्ष्यामि प्रायश्चित्तविधिं शुभम् ॥"
इति मानवे धर्म्मशास्त्रे भृगुप्रोक्तायां संहि
तायां दशमोऽध्यायः ॥ * ॥ अपरं ब्राह्मण
शब्दे द्रष्टव्यम् ॥

वर्णन, क्ली, (वर्ण स्तुतौ विस्तारे ... +
ल्युट् ।) स्तवनम् । (यथा, भागवते । १ ।
५४ । २० ।
"इत्थं विभाव्य दयमीश्वरजन कर्पेदा
दुष्याय हृच्छुरुवचनमातनुते ।
तत्त्वम्पि चाप्तुमिदमाह सदस्यवर्गे
संसारवत्र्म भगवन् मदधायमीन ॥")
विस्तरणम् । शुक्लादिवर्णयोजनम् । रोपणम् ।
इति वर्णधातोर्भावेऽनट्प्रत्ययेन निष्पन्नम् ॥
वर्णना, स्त्री, (वर्ण+णिच्+युच् । टाप् ।)
गुणकथनम् । तत्पर्य्यायः । ईडा १ स्तवः २
स्तोत्रम् ३ स्तुतिः ४ नुतिः ५ श्लाघा ६
प्रशंसा ७ अर्थवादः ८ । इति हेमचन्द्रः । २ ।
१९१ ॥ (यथा कथासरित्सागरे । ३९ ।
१११ ।
"विरराम नापि तद्वर्णना निहन्तुमना (?) ॥")
वर्णनीय, त्रि, (वर्ण+कर्म्मणि अनीयर् ।)
वक्तव्यम् । वर्णितव्यम् । (यथा साहित्यदर्पणे
६ परिच्छेदे ।

"वर्णनीया यथायोग साङ्गोपाङ्गा यमी
इह ।")
अथ्य । अन्यथा यथा —
"अथ वर्ण्यानि कथ्यन्ते तानि यानि कवी
श्वरै ।
महाकाव्यप्रबन्धेषु प्रवन्धेषु वर्णिरे ॥
राजा राजसुतपुरोहितकुमारामात्यसेनाधिपा
देशग्रामपुरीसरोऽब्धिसरिदुद्यानाद्रयाटव्या
श्रमा ।
मन्त्री दूतरणप्रयाणमृगयाश्वेभ स्तनेन्दवा
वीवाही विरह स्वयंवरसुरा पुष्पावचिता
रतम् ॥"
इति कविकल्पलतायाम् १ स्तवके १ कुसु
मम् । (स्वरार्थ । वर्णधात्वर्थदर्शनात् । यथा,
भागवते । ३ । २५ । १७ ।
"इमन्ति अादिराजस्य मनोहरितमनुजम् ।
भजित वर्णनीयस्य तदप्यादेय भर्तु ।")
वर्णपार्श्व, क्ली (वर्णस्य मार्गम् ।) चित्रकारस्य
तौल्यादिरागस्थानम् । यथा,—
"मल्लिका वर्णपात्र स्यात् तूलिका चैव
कूर्चिका ।"
इति शब्दमाला ॥
वर्णपुष्पक पुं, (वर्णवन्ति नानावर्णानि पुष्पाणि
यस्य । कप् ।) राजतरुणीपुष्पवृक्ष । इति
राजनिघण्ट ॥
वर्णपुष्पी स्त्री, (वर्णवन्ति पुष्पाणि यस्याः ।
ङीष् ।) उदकार्यपुष्पवृक्ष । इति राज
निघण्ट ॥
वर्णप्रसादन, क्ली, (वर्णस्य प्रसादनं यस्मात् ।)
अगुरु । इति राजनिघण्ट ॥
वर्णमाला, स्त्री, (वर्णस्य मातेव अकारादक्षर
प्रसवत्वात् ।) सरस्वती । इति शब्दावली ॥
वर्णमातृका, स्त्री (वर्णानां वर्णमालानां मातृ
केव ।) सरस्वती । इति शब्दरत्नावली ॥
वर्णमाला स्त्री, अक्षरमाला । (वर्णानां माला
समूह ।) अक्षरश्रेणी । तत्र संस्कृतवर्णा ५०
आख्यमालायाम् ५१ । इहरेजीयवर्णा २६ ।
फरासीया २३ । हिब्रु अर्थात् इहु
दीया २२ । आरबीया २८ । पारसीया ३१ ।
तुरस्कीया ३३ । ग्रीया ३१ । ग्रिक अर्थात्
इयुनानीया २४ । लाटिनदेशीया २२ । चच
अर्थात् मोजन्दरीया २६ । वायुदेशीया २७ ।
इटालिदेशीया २ । तातारीया २०२ ।
मग्धदेशीया १६ । चीनदेशीयवर्णा प्रसिद्धा
प्रका नष्यदशस्या ८००० । अथा
कारादिपकारान्तैकपञ्चाशन्नवमाला ।
यथा सनत्कुमारसंहितायाम् ।
"क्रमोत्तुकमतो माला मातृकार्णै पवेदके ।
सविन्दुके साष्टवर्गैःदन्तयत्नवर्णमिति ।"
आपि कु चु टु तु पु य श यो वर्णा प्रको
र्त्तिता । अकारादिवर्णान् सविन्दुन् प्रत्येकं
कृत्वा एन मन्त्रं अकारादीनां वर्णानां

दीनाथ यथार्थो अन्तिमवर्णं सानुस्वारं
कृत्वा पूर्वसूत्रार्थे मन्त्रस्य कार्यं । अतएव
प्रकारेणाष्टोत्तरशतसंख्यो जपो भवति । अत्र
प्रमाणमिदमुपलब्धम् ।
"सविन्दु वर्णमुच्चार्य पश्चान्मन्त्र जपेत् सुधी ।
अकारादिलकारान्तं विन्दुयुक्तं विभाव्य च ॥
वर्णमाला समाख्याता अनुलोमविलोमिका ।
क्षकारं मेरुमेवात्र तत्र मन्त्र जपेत् ध्रुवं ।"
इति मात्सीयवचनात् ।
प्रकारान्तर विशुद्धेश्वरे ।
"अनुलोमविलोमेन वर्णाष्टकविभेदन ।
सबिन्द्वाकारादिताम् वर्णान् वर्णमालादिताम्
मनून् ।
कुर्याद्वर्णमयीं मालां सर्वमन्त्रप्रकाशिनीम् ।
चरमार्णं मेरुरूपं अनुर्वं नैव कारयेत् ।"
इति तन्त्रसार ॥
अपि च ।
"अनुलोमविलोमेन कल्पया वर्णमालया ।
आदिक्षान्तलादि आत्ममेव परमेश्वरि ।।
क्षकार मेरुरूपञ्च लङ्घयेन्न कदाचन ।"
इति मुण्डमालातन्त्रम् ॥
वर्णरेखा, } स्त्री, (वर्णा लिख्यन्तेऽनयेति । लिख +
वर्णलेखा, } करणे घञ् । रलयोरैक्यम् ।) कठिनी ।
इति त्रिकाण्डशेष ॥
वर्णलेखिका, स्त्री, (वर्णलेखा + स्वार्थे कन् । टापि
अत इत्वम् ।) कठिनी । इति रत्नमाला ॥
वर्णवती, स्त्री, (वर्णोऽस्त्यस्यामिति । वर्ण + "तदा
स्त्यस्य ।" ५ । २ । ९४ । इति मतुप् । मस्य
व ।) हरिद्रा । इति जटाधर ॥ वर्णविशिष्टे,
त्रि ॥
वर्णविलोडक पुं, (वर्णान् विलोडयतीति । वि +
लोडि + ण्वुल् ।) चौरभेद । सन्धिचौर ।
इति मेदिनी । के २११ ॥
वर्णसङ्कर, पुं, (वर्णौ ब्राह्मणादिश्च वर्णानां
वा सङ्करो मिश्रण यत्र ।) मिश्रितजाति ।
तद्विवरणं यथा,—
"बभूवुस्तथा वर्णाश्या ब्राह्मणालय ।
शुक्लो बाहुदेशाच्च जाता क्षत्रियजातय ॥
ऊरुदेशाच्च वैश्याश्च पादत शूद्रजातय ।
तासां वर्णसङ्कराति बभूवुर्वर्णसङ्करा ॥
गोपनापितभीलाश्च तथा मोदककूबरौ ।
ताम्बूलिकवणिजौ च तथा वणिजजातय ।"
तोलाधारे भाला इति गलरस्थाने कुवर इति
च पाठ ।
"इत्येवमाद्या विप्रेन्द्र । सच्छूद्रा परिकीर्त्तिता ।
शूद्राविशोस्तु करणोऽम्बष्ठो वैश्यद्विजन्मनो ॥
विश्वकर्मा च शूद्रायां वीर्याधानं चकार स ।
ततो बभूवु पुत्राश्च नवैते शिल्पकारिण ॥
मालाकार कर्मकार शङ्खकार कुविन्दक ।
कुम्भकार कंसकार षडेते शिल्पिनां वरा ॥
सूत्रधारश्चित्रकार स्वर्णकारस्तथैव च ।
पतितास्ते ब्रह्मशापादयाज्या वर्णसङ्करा ॥"

पतनाद्या इत्यत्र अयाज्या इत्यपि पाठ
"स्वर्णकार स्वर्णचौर्याद् ब्राह्मणानां हिमो
त्तम ।
बभूव सद्य पतितो ब्रह्मशापेन कर्मणा ॥
सूत्रधारो द्विजानाञ्च शापेन पतितो भुवि ।
शीघ्रञ्च यज्ञकाष्ठञ्च न ददौ तेन हेतुना ॥
व्यतिक्रमेण चित्राणां सद्यश्चित्रकरस्तथा ।
पतितो ब्रह्मशापेन ब्राह्मणानाञ्च कोपत ॥
कश्चिद्वणिग्विशेषश्च सङ्गात् स्वर्णकारिण ।
स्वर्णचौर्यादिदोषेण पतितो ब्रह्मशापत ॥
कुलटायाञ्च शूद्रायां चित्रकारस्य वीर्यत ।
बभूवाट्टालिकाकार पतितो जारदोषत ॥
अट्टालिकाकारवीर्यात् कुम्भकारस्य योषिति ।
बभूव कोटक सद्य पतितो गृहकारक ॥
कुम्भकारस्य वीर्येण सद्य कोटकयोषिति ।
बभूव तैलकारश्च कुटिल पतितो भुवि ।
सद्य क्षत्रियवीर्येण राजपुत्रस्य योषिति ।
बभूव तीवरश्चैव पतितो जारदोषत ॥
तीवरस्य तु वीर्येण तैलकारस्य योषिति ।
बभूव पतितो दस्युर्लेट्श्च परिकीर्त्तित ॥
लेटस्तीवरकन्यायां जनयामास षट् सुतान् ।
माल्लं मल्लं मातरञ्च भड्ङ कोलञ्च कन्दरम् ॥"
कन्दरस्थाने कलन्दर इति वा पाठ ।
"ब्राह्मण्यां शूद्रवीर्येण पतितो जारदोषत ।
सद्यो बभूव चाण्डाल सर्वस्मादधमोऽशुचि ॥
तीवरेण च चाण्डाल्यां चर्मकारो बभूव ह ।
चर्मकार्यां च चाण्डालात् मांसच्छेदी बभूव ह ॥
मांसच्छेद्यां तीवरेण कोञ्च परिकीर्त्तित ।
कोञ्चस्त्रियाञ्च कैवर्त्तात् कर्त्तार परिकीर्त्तित ॥
सद्यश्चाण्डालकन्यायां लेटवीर्येण शौनक ।।
बभूवतुस्तौ द्वौ पुत्रौ हड्डिडोमौ च तथा ।"
हड्डिडोमौ च इत्यत्र हड्डिडोमौ इत्यपि
पाठ ।
"क्रमेण हड्डिकन्यायां चण्डालाज्जारदोषत ।
बभूव पञ्चपुत्रश्च जटा वनचराश्च ते ॥
लेटात्तीवरकन्यायां गङ्गातीरे च शौनक ।
बभूव सद्यो यो बालो गङ्गापुत्र प्रकीर्त्तित ॥
गङ्गापुत्रस्य कन्यायां वीर्येण वेशधारिण ।
बभूव वेशधारी च पुत्रो युङ्गी प्रकीर्त्तित ॥
वैश्यात्तीवरकन्यायां सद्य शुण्डी बभूव ह ।
शुण्डीयोषिति वैश्यात्तु पौण्ड्रकश्च प्रकीर्त्तित ॥
क्षत्रात् करणकन्यायां राजपुत्रो बभूव ह ।
राजपुत्र्यान्तु करणादागरीति प्रकीर्त्तित ॥
क्षत्रवीर्येण वैश्यायां कैवर्त्त परिकीर्त्तित ।
कलौ तीवरसंसर्गाद्धीवरश्च प्रकीर्त्तित ॥"
प्रकीर्त्तित इत्यत्र पतितो भुवि इति वा पाठ ।
"तैवर्त्ती तीवरात् पुत्रो बभूव रजक स्मृत ।
रजक्यां तीवराच्चापि कोयाली च बभूव ह ।
नापिताद्गोपकन्यायां सर्वस्वी तस्य योषिति ।
क्षत्राद्बभूव व्याधश्च बलवान् मृगहिंसक ॥
तीवरात् शुण्डिकन्यायां बभूवुः षट् सुता ।
ते अत्रो हड्डिनामानो दस्यवश्च सदा ॥

ब्राह्मण्यामृषिवीर्य्येण ऋतोः प्रथमवासरे।
कुत्सितश्चोदरे जातः कुदरस्तेन कीर्त्तितः ॥
तदशौचं विप्रतुल्यं पतितः ऋतुदोषतः ।
सद्यः कोटकसंसर्गादधमो जगतीतले ॥
क्षत्रवीर्य्येण वैश्यायामृतोः प्रथमवासरे।
जातः पुत्रो महादस्युर्बलवांश्च धनुर्द्धरः ॥
चकार वागतीतञ्च क्षत्रियो वारितस्तदा।
तेन जात्या स पुत्रश्च वागतीतः प्रकीर्त्तितः ॥
क्षत्रवीर्य्येण शूद्रायामृतुदोषेण पापतः ।
बलवन्तो दुरन्ताश्च बभूवुर्म्लेच्छजातयः ॥
अविद्धकर्णाः क्रूराश्च निर्भया रणदुर्ज्जयाः ।
शौचाचारविहीनाश्च दुर्द्धर्षा धर्म्मवर्ज्जिताः ॥
म्लेच्छात् कुविन्दकन्यायां जोलाजातिर्बभूव ह।
जोलात् कुविन्दकन्यायां शराकः परिकीर्त्तितः ॥
वर्णसङ्करदोषेण बह्व्यश्च पतजातयः ।
तासां नामानि सङ्ख्याश्च को वा वक्तुं द्विज
क्षम ॥
वैद्योऽश्विनीकुमारेण जातश्च विप्रयोषिति।
वैद्यवीर्य्येण शूद्रायां बभूवुर्बहवो जनाः ॥
ते च ग्राम्यगुणज्ञाश्च मन्त्रौषधिपरायणाः ।
तेभ्यश्च जाताः शूद्रायां ते व्यालग्राहिणो
भुवि ॥”

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥०॥

अपि च ।
“अयं द्विजैर्हि विद्वद्भिः पशुधर्म्मो विगर्हितः ।
मनुष्याणामपि प्रोक्तो वेणे राज्यं प्रशासति ॥
स महीमखिलां भुञ्जन् राजर्षिप्रवरः पुरा।
वर्णानां सङ्करं चक्रे कामोपहतचेतनः ॥
ततः प्रभृति यो मोहात् प्रमीतपतिकां स्त्रियम्।
नियोजयत्यपत्यार्थं तं विगर्हन्ति साधवः ॥०॥
ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः ।
चतुर्थ एकजातिस्तु शूद्रो नास्ति तु पञ्चमः ॥
सर्व्ववर्णेषु तुल्यासु पत्नीष्वक्षतयोनिषु ।
आनुलोम्येन सम्भूता जात्या ज्ञेयास्त एव ते ।
स्त्रीष्वनन्तरजातासु द्विजैरुत्पादितान् सुतान् ।
सदृशानेव तानाहुर्मातृदोषविगर्हितान् ॥
अनन्तरासु जातानां विधिरेष सनातनः ।
द्व्येकान्तरासु जातानां धर्म्म्यं विद्यादिमं
विधिम् ॥
ब्राह्मणाद्वैश्यकन्यायामम्बष्ठो नाम जायते।
निषादः शूद्रकन्यायां यः पारशव उच्यते ॥
क्षत्रियाच्छूद्रकन्यायां क्रूराचारविहारवान्।
क्षत्रशूद्रवपुर्जन्तुरुग्रो नाम प्रजायते ॥
विप्रस्य त्रिषु वर्णेषु नृपतेर्वर्णयोर्द्वयोः ।
वैश्यस्य वर्णे चैकस्मिन् षडेतेऽपसदाः स्मृताः ॥०॥
क्षत्रियाद्विप्रकन्यायां सूतो भवति जातितः ।
वैश्यान्मागधवैदेहौ राजविप्राङ्गनासुतौ ॥
शूद्रादायोगवः क्षत्ता चण्डालश्चाधमो नृणाम्।
वैश्यराजन्यविप्रासु जायन्ते वर्णसङ्कराः ॥
एकान्तरे त्वानुलोम्यादम्बष्ठोग्रौ यथा स्मृतौ।
क्षत्तृवैदेहकौ तद्वत् प्रातिलोम्येऽपि जन्मनि ॥०॥
पुत्रा येऽनन्तरस्त्रीजाः क्रमेणोक्ता द्विजन्मनाम्।
ताननन्तरनाम्नस्तु मातृदोषात् प्रचक्षते ॥
ब्राह्मणादुग्रकन्यायामावृतो नाम जायते।
आभीरोऽम्बष्ठकन्यायामायोगव्यान्तु धिग्वणः ॥
आयोगवश्च क्षत्ता च चण्डालश्चाधमो नृणाम्।
प्रातिलोम्येन जायन्ते शूद्रादपसदास्त्रयः ॥
वैश्यान्मागधवैदेहौ क्षत्रियात् सूत एव तु।
प्रतीपमेते जायन्ते परेऽप्यपसदास्त्रयः ॥
जातो निषादाच्छूद्रायां जात्या भवति पुक्कसः ।
शूद्राज्जातो निषाद्यान्तु स वै कुक्कुटकः स्मृतः ।
क्षत्तुर्जातस्तथोग्रायां श्वपाक इति कीर्त्त्यते ।
वैदेहकेन त्वम्बष्ठ्यामुत्पन्नो वेण उच्यते ॥
द्विजातयः सवर्णासु जनयन्त्यव्रतांस्तु यान्।
तान् सावित्रीपरिभ्रष्टान् व्रात्या इति विनि
र्द्दिशेत् ॥
व्रात्यात्तु जायते विप्रात् पापात्मा भूर्जकण्टकः ।
आवन्त्यवाटधानौ च पुष्पधः शैख एव च ॥
झल्लो मल्लश्च राजन्याद् व्रात्यान्निच्छिविरेव च।
नटश्च करणश्चैव खसो द्रविड एव च ।
वैश्यात्तु जायते व्रात्यात् सुधन्वाचार्य्य एव च।
कारुषश्च विजन्मा च मैत्रः सात्वत एव च ॥
व्यभिचारेण वर्णानामवेद्यावेदनेन च ।
स्वकर्म्मणाञ्च त्यागेन जायन्ते वर्णसङ्कराः ॥०॥
सङ्कीर्णयोनयो ये तु प्रतिलोमानुलोमजाः ।
अन्योन्यव्यतिषक्ताश्च तान् प्रवक्ष्याम्यशेषतः ॥
सूतो वैदेहकश्चैव चण्डालश्च नराधमः ।
मागधः क्षत्तृजातिश्च तथायोगव एव च ॥
एते षट् सदृशान् वर्णान् जनयन्ति स्वयोनिषु ।
मातृजात्यां प्रसूयन्ते प्रवरासु च योनिषु ॥
यथा त्रयाणां वर्णानां द्वयोरात्मास्य जायते ।
आनन्तर्य्यात् स्वयोन्यान्तु तथा बाह्येष्वपि क्रमात् ॥
ते चापि बाह्यान् सुबहूंस्ततोऽप्यधिकदूषि
तान् ।
परस्परस्य दारेषु जनयन्ति विगर्हितान् ॥०॥
यथैव शूद्रो ब्राह्मण्यां बाह्यं जन्तुं प्रसूयते ।
तथा बाह्यतरं बाह्यश्चातुर्वर्ण्ये प्रसूयते ।
प्रतिकूलं वर्त्तमाना बाह्या बाह्यतरान् पुनः ।
हीना हीनान् प्रसूयन्ते वर्णान् पञ्चदशैव तु ॥
प्रसाधनोपचारज्ञमदासं दासजीवनम्।
सैरिन्ध्रं वागुरावृत्तिं सूते दस्युरयोगवे ॥
मैत्रेयकन्तु वैदेहो माधूकं सम्प्रसूयते ।
नॄन् प्रशंसत्यजस्रं यो घण्टाताडोऽरुणोदये ॥
निषादो मार्गवं सूते दासं नौकर्म्मजीविनम्।
कैवर्त्तमिति यं प्राहुरार्य्यावर्त्तनिवासिनः ॥
मृतवस्त्रभृत्सु नारीषु गर्हितान्नाशनासु च ।
भवन्त्यायोगवीष्वेते जातिहीनाः पृथक् त्रयः ॥
कारावरो निषादात्तु चर्म्मकारः प्रसूयते।
वैदेहिकादन्ध्रमेदौ बहिर्ग्रामप्रतिश्रयौ ॥
चण्डालात् पाण्डुसोपाकस्त्वक्सारव्यवहारवान्।
आहिण्डिको निषादेन वैदेह्यामेव जायते ॥
चण्डालेन तु सोपाको मूलव्यसनवृत्तिमान्।
पुक्कस्यां जायते पापः सदा सज्जनगर्हितः ॥
निषादस्त्री तु चण्डालात् पुत्रमन्त्यावसायिनम्।
श्मशानगोचरं सूते बाह्यानामपि गर्हितम् ॥
सङ्करे जातयस्त्वेताः पितृमातृप्रदर्शिताः ।
प्रच्छन्ना वा प्रकाशा वा वेदितव्याः स्वकर्म्मभिः ॥
स्वजातिजानन्तरजाः षट् सुता द्विजधर्म्मिणः ।
शूद्राणान्तु सधर्म्माणः सर्व्वेऽपध्वंसजाः स्मृताः ॥
तपोबीजप्रभावैस्तु ते गच्छन्ति युगे युगे ।
उत्कर्षञ्चापकर्षञ्च मनुष्येष्विह जन्मतः ॥
शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः ।
वृषलत्वं गता लोके ब्राह्मणादर्शनेन च ॥
पौण्ड्रकाश्चौड्रद्रविडाः काम्बोजा यवनाः शकाः ।
पारदाः पह्लवाश्चीनाः किराता दरदाः खशाः ॥
मुखबाहूरुपज्जानां या लोके जातयो बहिः ।
म्लेच्छवाचश्चार्य्यवाचः सर्व्वे ते दस्यवः स्मृताः ॥
ये द्विजानामपसदा ये चापध्वंसजाः स्मृताः ।
ते निन्दितैर्वर्त्तयेयुर्द्विजानामेव कर्म्मभिः ॥०॥
सूतानामश्वसारथ्यमम्बष्ठानां चिकित्सितम्।
वैदेहकानां स्त्रीकार्य्यं मागधानां वणिक्पथः ॥
मत्स्यघातो निषादानां त्वष्टिस्त्वायोगवस्य च ।
मेदान्ध्रचुञ्चुमद्गूनामारण्यपशुहिंसनम् ॥
क्षत्तुग्रपुक्कसानान्तु बिलौकोवधबन्धनम्।
धिग्वणानां चर्म्मकार्य्यं वेणानां भाण्डवादनम् ॥
चैत्यद्रुमश्मशानेषु शैलेषूपवनेषु च ।
वसेयुरेते विज्ञाता वर्त्तयन्तः स्वकर्म्मभिः ॥०॥
चण्डालश्वपचानान्तु बहिर्ग्रामात् प्रतिश्रयः ।
अपपात्राश्च कर्त्तव्या धनमेषां श्वगर्दभम् ॥
वासांसि मृतचेलानि भिन्नभाण्डेषु भोजनम्।
कार्ष्णायसमलङ्कारः परिव्रज्या च नित्यशः ॥
न तैः समयमन्विच्छेत् पुरुषो धर्म्ममाचरन्।
व्यवहारो मिथस्तेषां विवाहः सदृशैः सह ॥
अन्नमेषां पराधीनं देयं स्याद्भिन्नभाजने।
रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च ॥
दिवा चरेयुः कार्य्यार्थं चिह्निता राजशासनैः
अबान्धवं शवञ्चैव निर्हरेयुरिति स्थितिः ॥
वध्यांश्च हन्युः सततं यथाशास्त्रं नृपाज्ञया।
वध्यवासांसि गृह्णीयुः शय्याश्चाभरणानि च ॥
वर्णापेतमविज्ञातं नरं कलुषयोनिजम्।
आर्य्यरूपमिवानार्य्यं कर्म्मभिः स्वैर्विभावयेत् ॥
अनार्य्यता निष्ठुरता क्रूरता निष्क्रियात्मता ।
पुरुषं व्यञ्जयन्तीह लोके कलुषयोनिजम् ॥
पित्र्यं वा भजते शीलं मातुर्वोभयमेव वा।
न कथञ्चन दुर्य्योनिः प्रकृतिं स्वां नियच्छति ॥
कुले मुख्येऽपि जातस्य यस्य स्याद्योनिसङ्करः
संश्रयत्येव तच्छीलं नरोऽल्पमपि वा बहु ॥
यत्र त्वेते परिध्वंसा जायन्ते वर्णदूषकाः ।
राष्ट्रिकैः सह तद्राष्ट्रं क्षिप्रमेव विनश्यति ॥
ब्राह्मणार्थे गवार्थे वा देहत्यागोऽनुपस्कृतः ।
स्त्रीबालाभ्युपपत्तौ च बाह्यानां सिद्धिकारणम् ॥
अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ।
एतं सामासिकं धर्म्मं चातुर्वर्ण्येऽब्रवीन्मनुः ॥०॥
शूद्रायां ब्राह्मणाज्जातः श्रेयसा चेत् प्रजायते ।
अश्रेयान् श्रेयसीं जातिं गच्छत्यासप्तमाद्युगात् ॥
शूद्रो ब्राह्मणतामेति ब्राह्मणश्चैति शूद्रताम् ।

क्षत्रियाज्जातमेवन्तु विद्याद्वैश्यात्तथैव च ।
अनार्य्यायां समुत्पन्नो ब्राह्मणात्तु यदृच्छया ।
ब्राह्मण्यामप्यनार्य्यात्तु श्रेयस्त्वं क्वेति चेद्भवेत् ॥
जातो नार्य्यामनार्य्यायामार्य्यादार्य्यो भवेद्गुणैः ।
जातोऽप्यनार्य्यादार्य्यायामनार्य्य इति निश्चयः ॥
तावुभावप्यसंस्कार्य्याविति धर्म्मो व्यवस्थितः ।
वैगुण्याज्जन्मनः पूर्व्व उत्तरः प्रतिलोमतः ॥
सुबीजञ्चैव सुक्षेत्रे जातं सम्पद्यते यथा ।
तथार्य्याज्जात आर्य्यायां सर्व्वं संस्कारमर्हति ॥
बीजमेके प्रशंसन्ति क्षेत्रमन्ये मनीषिणः ।
बीजक्षेत्रे तथैवान्ये तत्रेयन्तु व्यवस्थितिः ॥
अक्षेत्रे बीजमुत्सृष्टमन्तरैव विनश्यति ।
अबीजकमपि क्षेत्रं केवलं स्थण्डिलं भवेत् ॥
यस्माद्बीजप्रभावेण तिर्य्यग्जा ऋषयोऽभवन् ।
पूजिताश्च प्रशस्ताश्च तस्माद्बीजं प्रशस्यते ॥
अनार्य्यमार्य्यकर्म्माणमार्य्यञ्चानार्य्यकर्म्मिणम् ।
सम्प्रधार्य्याब्रवीद्धाता न समौ नासमाविति ॥"
इति मानवे १० अध्यायः ॥
वर्णसङ्करस्य कारणं दोषाश्च यथा,—
"अधर्म्माभिभवात् कृष्ण प्रदुष्यन्ति कुलस्त्रियः ।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसङ्करः ॥
सङ्करो नरकायैव कुलघ्नानां कुलस्य च ।
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ॥
दोषैरेतैः कुलघ्नानां वर्णसङ्करकारकैः ।
उत्साद्यन्ते जातिधर्म्माः कुलधर्म्माश्च शाश्वताः ॥
उत्सन्नकुलधर्म्माणां मनुष्याणां जनार्द्दन ।
नरके नियतं वासो भवतीत्यनुशुश्रुम ॥"
इति श्रीभगवद्गीतायाम् १ अध्यायः ॥
वर्णसि, पुं, (वृणोति स्थलमिति । वृञ् आवरणे + "वातसिवसिपञ्चसीति ।" उणा० ४ । १०७ । इति असि धातोर्नुक् च ।) जलम् । इत्युणादिकोषः ॥
वर्णा, स्त्री, (वर्ण्यते भक्ष्यते इति । वर्ण भक्षणे + कर्म्मणि घञ् । ततष्टाप् ।) आढ़की । इति हेमचन्द्रः ॥
वर्णाङ्का, स्त्री, (वर्णा अङ्क्यतेऽनयेति । अङ्क + करणे घञ् । ततष्टाप् ।) लेखनी । इति शब्दरत्नावली ॥
वर्णाट, पुं, (वर्णान् अटतीति । अट + अण् ।) गायनः । चित्रकरः । स्त्रीसक्तजीवनः । इति मेदिनी । टे, ५५ ॥
वर्णात्मा, [न्] पुं, (वर्णः अक्षरः आत्मा स्वरूपं यस्य ।) शब्दः । इति जटाधरः ॥
वर्णाधिप, पुं, (वर्णानां ब्राह्मणादीनामधिपः ।) ब्राह्मणादिवर्णेषु अधिपतिग्रहः । यथा,—
"ब्राह्मणे शुक्रजीवौ क्षत्रिये भौमभास्करौ ।
चन्द्रो वैश्ये बुधः शूद्रे पतितश्चोऽन्त्यजे शनिः ॥"
इति ।
"क्षात्राये वैश्यमाधिप इह कुमुदे च रवे शान्तौ च ।"
इति च ज्योतिस्तत्त्वम् ।

वर्णार्ह, पुं, (वर्णमर्हतीति । अर्ह + अच् ।) मुद्गः । इति राजनिघण्टः ॥
वर्णि, स्त्री, (वर्ण्यते स्तूयते इति । वर्ण स्तुतौ + इन् ।) स्वर्णम् । इति सिद्धान्तकौमुदी ॥ ("वर्णेर्वणिश्चाहिरण्ये ।" उणा० ४ । १२४ । इत्युक्ते अहिरण्ये तु वर्णिरितीव । क्वचित् पुंलिङ्गोऽपि ॥)
वर्णिक, पुं, (वर्णाः लेखनेन सन्ति अस्येति । वर्ण + ठन् ।) लेखकः । यथा,—
"लेखकोऽक्षरचुञ्चुः स्यादक्षरजीवकश्चणः ।
वर्णिको लिपिकरश्चाक्षरन्यासे लिपिर्लिबिः ॥"
इति हेमचन्द्रः । ३ । १४८ ॥
वर्णिका, स्त्री, (वर्णाः अक्षराणि लेखनेन सन्त्यस्या इति । वर्ण + ठन् + टाप् ।) कठिनी । यथा,—
"लेखन्यां वर्णिकापि स्यात् कठिन्यामपि वर्णिका ।"
इति हारावली । २४८ ॥
मषि । इति त्रिकाण्डशेषः । काञ्चनस्य उत्कर्षः । यथा,—
"वर्णकाद्यारयोः स्त्री तु चन्दने च विलेपने ।
द्वयोर्मात्रादिषु स्त्री स्यादुत्कर्षे काञ्चनस्य च ॥"
इति मेदिनी । के १४२ ॥
वर्णित, त्रि, (वर्ण + क्त ।) स्तुतियुक्तः । तत्पर्य्यायः । ईलितः २ शस्तः ३ पणायितः ४ पनायितः ५ प्रणुतः ६ पणितः ७ पनितः ८ गीर्णः ९ अभिष्टुतः १० ईडितः ११ स्तुतः १२ । इत्यमरः । ३ । १ । ११ ॥ नुतः १३ । इति जटाधरः ॥ (विस्तारितः । यथा, महाभारते । १ । २ । २९ ।
"चतुर्थमेतद्विपुलं वैराटं पर्व्व वर्णितम् ॥"
कथितः । यथा, कथासरित्सागरे । १९ । ६६ ।
"अभुक्तश्च न मया हरिदत्तस्यापि वर्णितम् ॥")
वर्णिनी, स्त्री, (वर्णोऽस्त्यस्या इति । वर्ण + इनि । ङीप् ।) हरिद्रा । इति राजनिघण्टः ॥ वनिता । इति हेमचन्द्रः । ३ । १६८ ॥
वर्णी, [न्] पुं, (वर्णाः अक्षराणि लेखनेन सन्त्यस्येति । वर्ण + इनि ।) लेखकः । (वर्णाः नीलपीतादयः लेखनेन सन्त्यस्येति । इनि ।) चित्रकरः । (यथा, महाभारते । १२ । ५९ । ५० ।
"अङ्गारकुम्भसूक्ष्माणां पताकाध्वजवर्णिनाम् ।
पदेष्वनभिरक्षाणां धारयेत च सर्व्वदा ॥")
वर्ण + "वर्णाद्ब्रह्मचारिणि ।" ५ । २ । १३४ । इति इनि ।) ब्रह्मचारी । यथा,—
"वर्णी स्यात् लेखके चित्रकरेऽपि ब्रह्मचारिणि ॥"
इति मेदिनी । ने, १२७ ॥
(यथा, कुमारे । ५ । ५२ ।
"ततो गृहीतया तदुपाय वर्णिना
विवेश याच्यो । तत एव कुतूहलम् ॥")
वर्णलिङ्गि, त्रि, (वर्णलिङ्गमस्त्यस्य "कर्म्मोपदेशवर्णान्नात् ।" ५ । २ । ११२ । इति इनि स्यात् ।
यथा कामन्दकीये नीतिसारे । ७ । १८ ।
"ब्राह्मणाश्रमे शुद्धे लिङ्गिनश्च परिचयः ।

हृतिचयमित्र प्राङ्मुखयो ध्येष्वदीन ।"
ज्येष्ठवर्णिनो ब्राह्मणस्येत्यर्थः ॥)
वर्तु, पुं, (वृञ् वरणे + "अविसृतीभ्यो नित् ।" उणा० ३ । ६८ । इति तुः । स च नित् ।) नदविशेषः । इत्युणादिकोषः । आदित्यः । इति संक्षिप्तसारोणादिवृत्तिः । (देशविशेषः । इत्युज्ज्वलदत्तः ॥)
वर्त्तक, स्त्री, (वर्त्तते इति । वृत + ण्वुल् ।) वर्त्तलोहम् । इति हेमचन्द्रः । विन्ति इति भाषा । (पुंलिङ्गे, त्रि । यथा, गो० रामायणे । २ । १०७ । १२ ।
"निवेद्य सेना भरतः महान्ती प्रावर्त्तत वरः ।
अभियन्तु स काकुत्स्थमिवेष गुरुवर्त्तकः ॥")
वर्त्तक, पुं, (वृत + ण्वुल् ।) पक्षिविशेषः । भाटर इति भाषा । (यथा, महाभारते । १३ । १११ । १३ ।
"कौशिकस्तु ततो भूत्वा वरो भवति वर्त्तकः ॥")
अस्य पर्य्यायो गुणाश्च यथा,—
"वर्त्तको वर्त्तिकश्चैव तदवस्था वर्त्तिका स्मृता ।
वर्त्तकोऽग्निकरः शीतो ज्वरदोषत्रयापहः ।
सुरुच्यः शुक्रदो बल्यो वर्त्तिकाल्पगुणा ततः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)
अश्वस्य खुरः । इत्यमरः । १ । १ । ११ ॥
वर्त्तका, स्त्री, (वर्त्तक + टाप् । "वर्त्तका शकुनौ प्राचाम् ।" इति वार्त्तिकोक्त्या न अत इत्वम् ।) वर्त्तकपक्षी । इत्यमरटीकायां रायमुकुटः ॥
वर्त्तजन्मा, [न्] पुं, (वर्त्तनि आकाशपथे जन्म यस्य ।) मेघः । इति शब्दमाला ॥
वर्त्तन, क्ली, (वर्त्ततेऽनेनेति । वृत + करणे ल्युट् ।) वृत्तिः । इत्यमरः । २ । ९ । १ ॥ (यथा भागवते । ७ । ११ । २६ ।
"प्रमाणानोद्वयमाभ्यां ब्रह्मणस्तते ।
श्वयत्रु मस्तिता नित्यं परिष्कारपरिच्छदा ॥")
वाचारम्भणसंस्थम् । इति शब्दरत्नावली ॥
वर्त्तन, क्ली स्त्री, (वर्त्ततेऽनेनेति । वृत + ल्युट् ।) तुर्क्कनाला । तकुपीठः । जीवनम् । इति मेदिनी । ने १०६ ॥ (यथा, मार्कण्डेये । १०७ । ११ ।
"देवतातिथिभृत्यानां पितॄणाञ्च वर्त्तनम् ।
यस्याधिष्ठेयमेव पुरुषस्य यद् धनम् ॥")
वर्त्तन, पुं, (वर्त्तते इति । वृत + "अनुदात्तेतश्च हलादेः ।" ३ । २ । १४९ । इति युच् ।) वामनः । इति मेदिनी । ने १०५ ॥ वर्त्तिष्णौ, त्रि । इत्यमरः । ३ । १ । ३२ ॥ (यथा भागवते । ३ । २१ । २६ ।
"एष देवाः तत्र यथा ब्रह्मणोऽनुवर्त्तनः ।
निर्द्दिष्टमिदमेवानां वर्त्तनं तव वर्त्तिनः ॥")
वर्त्तनि, पुं, पूर्व्वदेशः । इति त्रिकाण्डशेषः । (स्त्री, वर्त्ततेऽनेनेति । वृत + "वर्त्तनिः ।" उणा० २ । १०७ । इति ... ।)
वर्त्तनी, स्त्री, (वर्त्तनि + कृदिकारादक्तिन इति ङीष् ।) पन्थाः । पेषणम् । इति शब्दरत्नावली ।

वर्त्तमान, पुं (वर्त्तते इति । वृत्+शानच् । मुक् ।) प्रयोगाधिकरणीभूतकालः । इति मेधातिथिः ॥ सञ्जातवृत्तौ, त्रि । तत्पर्य्यायः । वर्त्तमान २ अनुजानन ३ । इति शब्दरत्नावली ॥ वैयाकरणमते तु । आरब्धापरिसमाप्तिकर्म्मत्वमाभ्यां । यथा । महाभारते पठति । स तु चतुर्विधः । यथा —
"प्रवृत्तोपरतश्चैव वृत्ताविरत एव च ।
नित्यप्रवृत्तः सामीप्यो वर्त्तमानश्चतुर्विधः ॥"
प्रवृत्तोपरतस्तावत् । मांसं न खादति आदौ प्रवृत्त मांसभोजनं निवर्त्तयति इत्यर्थः । इह कुमाराः क्रीडन्ति तदानीन्तनक्रीडाभावेऽपि पूर्ब्बक्रीडायां वृत्तौ वर्त्तमानत्वात् । पर्व्वता तिष्ठन्ति नित्यप्रवृत्तत्वात् । किञ्च पर्व्वतानां स्थितौ वर्त्तमानत्वेऽपि भूतभविष्यत्कालाभ्यां सम्बन्धविवक्षया पर्व्वताः स्थास्यन्ति इत्यपि स्यात् । सामीप्यो द्विविधः । भूतसामीप्यो भविष्यत् सामीप्यश्च । भूतसामीप्ये यथा । कदा आगतोऽसि इति प्रश्ने अयमेवागच्छामि इति आगतोऽपि वदति । भविष्यत् सामीप्ये यथा । कदा गमिष्यसि इति प्रश्ने एषोऽहं गच्छामि इति गमनक्रियमाणोऽपि वदति । इति मुग्धबोधटीकायां दुर्गादासः ॥

वर्त्तक, पुं, (वर्त्तो वर्त्तनं अस्ति अस्येति । वृत्+बाहुलकात् ऊक ।) वर्त्तीरः । वर्त्तक इति भाषा । इति मेदिनी । के ११२ ॥ अश्वखुरः । यथा —
"अश्वो यस्तिष्ठति नाशा वा स्थितो दैवयोगतः ।
दाचादिको वर्त्तकौ तस्याहो दृश्यतामिति ॥"
इति त्रिकाण्डशेषः ॥

वर्त्तलोह, क्ली, (वर्त्तते इति । वृत्+अच् । तच्च तल्लोहञ्चेति ।) लौहविशेषः । विड्टि इति भाषा । इति वैद्यकम् ॥ तत्पर्य्यायः । वर्त्त लोहम् १ वर्त्तकम् २ लोहसङ्करम् ३ नील कम् ४ लोहलोहम् ५ लोहजम् ६ वर्त्तलोह कम् ७ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । शिशिरत्वम् । कफवातविषापहत्वम् । मधुरत्वम् । पित्तदाहप्रशमनत्वञ्च । इति राजनिर्घण्टः ॥

वर्त्ति, स्त्री, (वर्त्तते अनया इति । वृत्+"सर्व्वधातुभ्य इन् ।" उणा० ४ । ११८ । इति इन् ।) नेत्राञ्जनम् । अञ्जनम् । गात्रानुलेपनी । दीपदशा । (यथा, भागवते । ६ । ११ । ८ ।
"यथा प्रदीपो घृतवर्त्तिमश्नन्
शिखाः सधूमा भजति ह्यन्यदा स्वम् ॥")
दीपः । इति मेदिनी । ते, ११ । ७ ॥ वर्त्तिविशेषो यथा, —
"कनकस्य वर्त्ते पद्मसूत्रस्य वर्त्ते पारदस्य तथा ।
पीतो दक्षाग्र्यं मोक्ष सिद्धान्ति मनसि ॥
...भक्तिभाव त्रिमिरं ... ॥"
इति मार्कण्डे १८ अध्यायः ।

(वर्त्ततेऽनयेति । वृत्+"हृसिमृग्रिण्वमिदमिलूपूधुर्विभ्य इन् ।" उणा० ४ । १३ । इति इः । बाहुलकात् णिचोऽपि । योगकल्पद्रुमम् । इत्युज्ज्वलदत्तः ॥)

वर्त्तिक, पुं पक्षिविशेषः । वटेर इति हिन्दी भाषा । तत्पर्य्यायः । वार्त्तिकः २ वर्त्तीं ३ वार्त्तिकायः ४ । अस्य मांसगुणाः ।
"तद्वच्च वर्त्तिकं प्रोक्तं विशेषं दीपनं ...।"
लघु निशिरञ्च । इति राजनिघण्टुः ॥

वर्त्तिका, स्त्री, वर्त्तकपक्षी । इत्यमरः । पक्षिविशेष इत्यन्ये । स्वार्थे कः वर्त्तक । भारद्वाज इति ख्यातः । तूलिका । वर्त्तिका शलाका । बाटभार इति ख्याता । नाम त्वमिदमिति भरतदीपिका । वर्त्तिकेति स्त्रिया मीलप्रतिषेधार्थं श्वयोधवाचकमिति मायमी । ... इति रायमुकुटः । इति तट्टीका सारसुन्दरी ॥ सा च वटेर पक्षी इति भाषया ख्याता । अस्या मांसगुणाः ।
"वर्त्तिका मधुरा रूक्षा कफमारुतनाशिनी ॥"
इति राजवल्लभः ॥
अजशृङ्गी । इति राजनिर्घण्टः ॥ (वर्त्ति+स्वार्थे कन् । टाप् ।) वर्त्ति । बाति इति पलिता इति पलिता इति च भाषा । इत्युणादि कोषः । सा सप्तविधा । यथा, —
"पद्मसूत्रभवा दर्भगर्भसूत्रभवा तथा ।
शाणजा बादरी चापि फलकोषोद्भवा तथा ।
वर्त्तिका दीपकार्य्येषु सदा सप्तविधा स्मृता ॥"
इति कालिकापुराणे ६८ अध्यायः ॥

वर्त्तिष्णु, त्रि, (वर्त्तते इति । वृत्+"अलङ्कृञ्-निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधु-सहचर इष्णुच् ।" ३ । २ । १३६ । इति इष्णुच् ।) वर्त्तनशीलः । तत्पर्य्यायः । वर्त्तनः । इत्यमरः । ३ । १ । २८ ॥ वर्त्तीं । इति हेमचन्द्रः । ३ । ६६ ॥ (यथा, मनौ । ५ । १ ।
"निरावधिश्च वर्त्तिष्णुः वर्त्तिष्णुः वर्त्तिनी ह्यलम् ।
उपनिषदर्थं च वैदुः वैदुः ... ॥")

वर्त्तिष्यमाण, त्रि, (वृत्+भविष्यति स्यतास् प्रत्ययः ।) भविष्यत्कालीनः । वर्त्तमानकाल सम्बन्धः । इति शब्दचिन्तामणिः ॥ (यथा भाद्विकायणी, ६ । १०८ ।
"वृत्तवर्त्तिष्यमाणायां कर्थायां निश्चयः ॥
अधिगमयस्तु ... दर्शितः ॥")

वर्त्ती, स्त्री, (वर्त्ति+कृदिकारादक्तिन इति ङीष् ।) वर्त्तिः । इत्यमरटीका ॥ (यथा, महाभारते । १ । ८३ । ४३ ।
"... ... ...
सुरान् ।
निर्व्वाणकाले दीपस्य वर्त्तीमिव ... ॥")

वर्त्ती, [न्] (वर्त्तते इति । वृत्+णिनि ।) वर्त्तिष्णुः । इति हेमचन्द्रः । ३ । ६६ ॥

वर्त्तुल, त्रि (वर्त्तते इति । वृत्+बाहुलकात् उलच् ।) गोलकम् । तत्पर्य्यायः । निस्तलम् २ वृत्तम् ३ । इत्यमरः । ३ । १ । ६८ ॥ अवृत्तादिकम् ४ । इति शब्दरत्नावली । ४ ॥ (यथा, भागवते । ५ । १६ । ६ ।
"यो वा अयं द्वीपः कुवलयकमलकोषाभ्यन्तर कोषो नियुतयोजनविशालः समवर्त्तुलो यथा पुष्कर पत्रम् ॥") गजदन्तपङ्क्त्यां यथा —
"सम्पूर्णानि महान्ति गुरूणि स्निग्धानि ...
... ... ॥
आरक्ता कठिना ... ...
... ...॥" ४ ॥
दन्तानि यथा —
"दन्तानि ... ... ।
... ... ॥
... ... ।
... ... ॥"
इति कविकल्पलतायाम् २ प्रतिबन्धे १ कुसुमम् ॥

वर्त्तुलं, क्ली, गृञ्जनम् । इति राजनिर्घण्टः ॥

वर्त्तुल, पुं कलायविशेषः । माटुला । इति भाषा । यथा, —
"कलायस्य चयो भेदा त्रिपुटो वर्त्तुलोऽङ्कुटी ।"
इति शब्दमाला ॥

वर्त्तुला स्त्री, (वर्त्तुल+टाप् ।) तर्कुपाली । इति हारावली । २१३ ॥ टेकोर बाटुल इति भाषा ॥

वर्त्तुली स्त्री, (वर्त्तुल+गौरादित्वात् ङीष् ।) गजपिप्पली । इति राजनिर्घण्टः ॥ (विवरणमस्या गजपिप्पलीशब्दे ज्ञातव्यम् ॥)

वर्त्म [न्] क्ली (वर्त्ततेऽनेनेति । वृत्+मनिन् ।) पन्थाः । इत्यमरः । २ । १ । १५ ॥ (यथा, भागवते । ६ । ५९ । ६ ।
"नेमावरेऽनपमयो अग्निः
वायुः सुखां यदिदं विचकार ।
यावर्त्ता विश्वमभियातिवर्त्म
... ... ॥"
"वर्त्मानि मार्गानुक्त्वा । इति तट्टीकायां सायनः ॥ यथा च रघौ । २ । ९ ।
"पुरस्कृता वर्त्मनि पार्थिवेन
प्रत्युद्गता पार्थिवधर्म्मपत्न्या ।
तदन्तरे सा विरराज धेनुः
दिनक्षपामध्यगतेव सन्ध्या ॥")
नेत्रच्छदः । इति मेदिनी । ने, १६८ ॥ (यथा, सुश्रुते । ६ । १० ।
"... ... वर्त्मसु ... ।
... ... ॥")

वर्त्मनि स्त्री, (वर्त्तते इति । वृत्+"इन्" उणा० ४ । १ ॥ इति इन् । ... ... । ... ... ।) ... ... ॥

वर्द्ध, क पूरणच्छेदौ । इति कविकल्पद्रुमः ॥ (चुरा० पर० सक० सेट् ।) क वर्द्धयति । ... ...

यस्य पाटपुराणिभ्यो भेदनियता बोधयति । तेन कश्चित् भीरमाया यत्नादौ वृध क इत्यस्य वृधन इत्यादि अस्य तु वर्द्धते इत्यादिभि । इति दुर्गादासः ॥

वर्द्धं क्ली, (वर्द्धयति पूरयतीति । वर्द्ध + अच ।) सीसकम् । इति हेमचन्द्रः । ४ । १ । ६ ॥

वर्द्ध , पुं, (वर्द्धते इति । वृध छेदने + अच ।) नाडीव्रणपट्टिका । इति जटाधरः ॥ पूर्त्ति । छेदः । इति वर्द्धशालपदद्वयनात् ॥

वर्द्धक पुं, (वर्द्धते इति । वृध् + ण्वुल ।) नाडीव्रणपट्टिका । इत्यमरः । २ । ४ । ८ ॥ (वर्द्धयतीति । वर्द्ध पूरणे छेदने च + ण्वुल ।) पूरके छेदके च, त्रि ॥

वर्द्धकि, पुं (वर्द्धते छिनत्तीति । वर्द्ध + अच । वर्द्धं कायतीति । कै शब्दे + बाहुलकात् डि ।) त्वष्टा । इत्यमरः । २ । १० । ९ ॥ (यथा, रामायणे । २ । ८३ । ७ ।
"कर्म्मान्तिकान् शिल्पकरान् वर्द्धकीन् खन कानपि ।
गणकान् शिल्पिनश्चैव तथैव नर्त्तकानपि ॥")

वर्द्धकी [न्] पुं (वर्द्धकी वर्द्धोऽस्ति अस्येति । वर्द्ध क + इनि ।) वर्णसङ्करजातिविशेषः । बाढइ इति हिन्दी भाषा । तत्पर्य्यायः । त्वष्टा २ वर्द्धकि ३ तक्षा ४ रूपकारः ५ रथकारः ६ रथकरः ७ काष्ठतट् ८ काष्ठतक्षकः ९ । इति शब्दरत्नावली ॥ (यथा, बृहत्संहितायाम् । ४३ । २२ ।
"करभङ्गे बलभेदो
नेम्या नाशो बलस्य विज्ञेयः ।
अपचयोऽक्षभङ्गे
तथाणिभङ्गे च वर्द्धकिनः ॥")

वर्द्धन, क्ली (वृध छेदपूरणयोः + ल्युट ।) छेदनम् । (यथा, मनुः । २ । २९ ।
"प्राङ्नाभिवर्द्धनात् पुंसो जातकर्म्म विधीयते ॥")
वृद्धिः । इति मेदिनी । ने, १२३ ॥

वर्द्धन त्रि (वर्द्धयतीति । वृध + नन्द्यादित्वात् ल्युः । यद्वा, वर्द्धत तच्छील इति । वृध धातोः + 'अनुदात्तेतश्चेति ।' ३ । २ । १४९ । इति युच ।) वर्द्धिष्णुः । इत्यमरः । ३ । १ । २८ ॥ (यथा, ऋग्वेदे । ३ । ३२ । १९ ।
"यस्मो हि त इन्द्र वर्द्धनो भूद्गम प्रिय सुतसोमो मियेधः ।")

वर्द्धनी, स्त्री, घटी । इति मेदिनी । नै १२३ ॥ सम्मार्ज्जनी । इति हेमचन्द्रः । ४ । ८९ ॥ जलपात्रविशेषः । बदना इति भाषा । यथा
"जालु स्त्री करकी पात्री वर्द्धनी च जलपात्रिका ॥"
इति जटाधरः ॥ * ॥

प्रतिष्ठादिकर्म्मणि तत्प्रयोगश्च यथा,—
"प्रतिष्ठा यस्य देवस्य तन्नाम्ना कलशं न्यसेत् ।
ऐशान्यां पूजयेद्रात्रौ वर्द्धन्यैव च वर्द्धमौम् ।
कलशं वस्त्रसंवीतं पञ्चरत्नसमन्वितम् ।
स्थापयेत्तत्र सर्व्वाणि पञ्चवारिघटं गुरुः ॥
तत्रपीठे रत्नगर्भं वस्त्रयुग्मेन वेष्टितम् ।
सर्व्वविघ्नोपशान्त्यर्थं पूजयेत् कलसं गुरुः ॥
इदन्तु कलसे पूज्य वर्द्धन्यां वस्त्रसंयुतम् ।
वर्द्धन्या तु समायुक्तं कलसं भ्रामयेत्तु ॥
वर्द्धनीं धारया सिञ्चन्नग्रतो धारयेत्तत ।
अभ्यर्च्य वर्द्धनीकुम्भं स्थण्डिले देवमर्च्चयेत् ॥"
इति गारुडे ४८ अध्यायः ॥

वर्द्धमान , पुं, (वर्द्धते इति । वृध वृद्धौ + शानच ।) एरण्डवृक्षः । इत्यमरः । २ । ४ । ५१ ॥ (अस्य पर्य्यायो यथा,—
"शुक्ल एरण्ड आमण्डश्चित्रो गन्धर्व्वहस्तकः ।
पञ्चाङ्गुलो वर्द्धमानो दीर्घदण्डोऽप्यदण्डकः ।
वातारिस्तरुणश्चापि रुबूकश्च निगद्यते ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) विष्णुः । शरावः । (यथा, महाभारते । ७ । ८ । १९ ।
"तथा गाः कपिला दोग्ध्रीः सवत्साः पाण्डु नन्दनः ।
हेमशृङ्गी रूप्यखुरा दत्त्वा चक्रे प्रदक्षिणम् ।
स्वस्तिकान् वर्द्धमानांश्च नन्द्यावर्त्तांश्च काञ्चनान् ॥"
अस्मिन्नर्थे क्लीवलिङ्गेऽपि दृश्यते । यथा, तत्रैव । १३ । ६४ । १२ ।
'सवास्तु तिलपूर्णानि वर्द्धमानानि माधव ।
प्रदाय पुरुषव्याघ्र सिद्ध पित्र्य च मोदते ॥"
तथा च सुश्रुते सूत्रस्थाने २९ अध्याये ।
'स्त्री पुत्रिणी सवत्सा गौर्वर्द्धमानमलङ्कृता ।
कन्या मत्स्याः फलं चामं स्वस्तिकं मोदका दधि ॥")
विष्णुः । इति मेदिनी । ने, ९ ० ॥ (यथा, महाभारते । १३ । १४९ । ४१ ।
"वर्द्धनो वर्द्धमानश्च विविक्तः श्रुतिसागरः ॥")
जिनविशेषः । तत्पर्य्यायः । वीरः २ चरमतीर्थकृत ३ महावीरः ४ ज्ञातः ५ ज्ञातनन्दनः ६ । इति हेमचन्द्रः । १ । १ ॥ धनिकां गृहविशेषः । यथा —
"स्वस्तिको वर्द्धमानश्च नन्द्यावर्त्तोऽपरोऽपि च ॥"
इति हलायुधः ॥
(यथा, बृहत्संहितायाम् । ५३ । ३३ ।
"द्वारालिन्दोऽन्तगतः प्रदक्षिणोऽन्यः शुभस्ततः
चान्यः ।
तद्वच्च वर्द्धमाने द्वारन्तु न दक्षिणं कार्य्यम् ॥")
देशविशेषः । यथा —
"प्राच्यां मागधशोणौ च वारेन्द्रीगौडराढ़काः ।
वर्द्धमानतमोलिप्तप्राग्ज्योतिषोदयाद्रयः ॥"
इति ज्योतिस्तत्त्वे कूर्म्मचक्रम् ॥
(मध्यदेशस्थ कूर्म्मपर्व्वतविशेषः । यथा मार्कण्डेये । ५८ । १२ ।
"विराटाः मगधाः शाल्वाः पाञ्चाला वारिपर्व्वताः ।
पिशाचाः वर्द्धमानाः स्युर्देशे कूर्म्मस्य मध्यतः ॥"
वृद्धिविशिष्टे, त्रि ।)

वर्द्धमानक , त्रि (वर्द्धमान + स्वार्थे कन् स्वार्थे वा कन् ।) वृद्धिविशिष्टः । पुं शरावः । इत्यमरः । २ । ९ । ३२ ॥ (यथा महाभारते । १४ । १५ । १२ ।
"भृङ्गाराणि कटाहानि कलशान् वर्द्धमानकान् ॥")
स्वार्थे कप्रत्यये शरावसम्पुटः ॥ (शरावसम्पुटम् । इति महाभारतटीकायां नीलकण्ठः ॥ यथा, महाभारते । ७ । ५५ । ४ ।
"कटकर्णीकनिष्कैश्च पुष्कैर्वर्द्धमानकैः ।
निष्कोद्योगैश्च कौशिकश्च स परिवारितः ॥")

वर्द्धापन क्ली, नाडीच्छेदनम् । यथा —
"वर्द्धयामि सुतोत्थां ते यावदेहे गुरुर्जिनिमा ।
तनौ वर्द्धापनं वर्द्धौ नाभावि करने मम ।
कर्त्तव्य तनुच्छेदात्मा प्रमात नवमेऽन्न ,
यथा मम तथा दार्य्यां भवन्ना महात्मने ॥"
वर्द्धापन नाडीच्छेदनम् । इति सिद्धान्तकौमुदी ।

वर्द्धित, त्रि, (वृध + क्त ।) प्रवृद्धम् । छिन्नम् । पूरितम् । इति मेदिनी । ते १४८ ॥ (धार पूतम् । यथा, मनुः । ६ । २२३ ।
"पाणिभ्यामुपसंगृह्य स्वयमन्नस्य वर्द्धितम् ।
विप्रान्तिके पितॄन् ध्यायन् शनकैरुपनिक्षिपेत् ॥"
"अन्नस्येति स्वार्थे षष्ठी । वर्द्धितं पूर्णं दिग्दशान्नपात्रम् ।" इति तट्टीकायां कुल्लूकभट्टः ॥
वृध + णिच + क्त । वृद्धिं प्रापितम् । यथा भागवते । ३ । २१ । १ ।
"इङ्गालेन ज्ञयस्तोकेन वेदन्य ध्यानवान् ।
आत्मना वर्द्धिताभ्यम्यानुजया प्रजापतिः ॥")

वर्द्धिष्णु त्रि (वर्द्धते इति । वृध + "अलङ्कृञिति ।" ३ । २ । १३६ । इति इष्णुच ।) वर्द्धनशीलः । तत्पर्य्यायः । वर्द्धनः २ । इत्यमरः । ३ । १ । २८ ॥ (यथा मनुः । ९ । ११ ।
"निराकरिष्णु र्वणिजो वर्द्धिष्णुः परिणो हरम् ।
उत्पादिका स युवा च वेदनु सरस्वती ॥")

वर्द्धू, स्त्री, (वर्द्धते दोर्घीभवतीति । वृध + "उकार [illegible] उक्तम् ।" उणा । २ । ८७ । इति उन्) चर्म्म । रज्ज्वादिकोषः ॥ (यथा, अथर्व्ववेदे । १४ । २ । १६ ।
"सदा विष्टिम्न मध्याद्दुवताग्ध्या मो वर्द्धू शुभङ्गला ॥")

वर्द्ध्री स्त्री, (वर्द्धू + गौरादित्वात् ङीष् ।) चर्म्म रज्जुः । वरी इति भाषा । तत्पर्य्यायः । वध्री २ वरत्रा ३ । इत्यमरः । नद्धी ४ । इति भरतः ॥

वर्म्म, [न्] क्ली (वृणोति संवृणोति अनेनेति । वृ + "सर्व्वधातुभ्यो मनिन् ।" उणा । ४ । १४० । इति मनिन् ।) कवचम् रज्ज्वादिकोषः । (यथा ऋग्वेदे । ६ । ७५ । १ ।
"जीमूतस्येव भवति प्रतीकं
यद्वर्म्मी याति समदामुपस्थे ।"
लौहम् । यथा तत्रैव । १ । ३१ । १५ ।
"त्वं तमग्ने अमृतत्व उत्तमे मर्त्त्वं दधासि श्रवसे दिवे दिवे ।"
"त्वं दक्षिणावतः [illegible]

घट। तदा कस्य यवमन्तस्य वर्द्धते लोहित-
मुत्पद्यते।" इति तट्टीकायां भरतः।)
वर्व्व गत्याम्। वर्वि। इति कविकल्पद्रुमः॥ (भ्वा-
पर-सक०-सेट्।) वर्व्वति। इति दुर्गादासः॥
वर्म्मन् [न्] क्ली (वृणोति आच्छादयति शरी-
रमिति। वृ+मनिन्।) तनुत्रम्। इत्यमरः।
२।८।६३॥ (यथा, रघुः। ३।५६।
"अथ भूतले नाराचौ पतन्तौ मातलिरिक्षिते।
वर्म्मभिः पवनोद्धूतराजतालीवनध्वनिः॥"
गृहम्। इति निघण्टुः। ३।४॥ यथा ऋक्-
संहितायाम्। ६१।१।
"छिन्नभिन्नशिरांसि...
...
...
...॥")
वर्म्मकण्टक पुं, पर्पटः। इति राजनिर्घण्टः॥
(विवरणमस्य पर्पटशब्दे विज्ञेयम्॥)
वर्म्मकषा, स्त्री (वर्म्म कषतीति। कष+अच्।
टाप्।) सातला। इति शब्दरत्नावली॥ चामार
कषा इति भाषा॥
वर्म्मा, [न्] पुं (वृ+मनिन्।) क्षत्रियस्य पद्धतिः।
यथा —
"शर्म्मान्तं ब्राह्मणस्य स्याद्वर्म्मान्तं क्षत्रियस्य च।
गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोः॥"
इति शुद्धितत्त्वधृतयमवचनम्॥
वर्म्म पुं, मत्स्यविशेषः। वानि इति भाषा।
अस्य मांसगुणाः। गुरुत्वम्। हृद्यत्वम्। कफाव-
हत्वम्। रक्तपित्तनाशित्वञ्च। इति राजवल्लभः॥
(यथा, सुश्रुते। १।११।
"वर्म्मिमत्स्यवराणां ...॥"
तथास्य गुणा यथा —
"...॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)
वर्म्मित त्रि (वर्म्म कृतोऽस्येति। वर्म्म+इतच्। तत
...। वर्म्म सञ्जातमस्येति। इतच् वा।)
वर्म्मयुक्तः। सन्नद्धः। तत्पर्य्यायः। दंशितः
२ व्यूढकङ्कटः ३। इत्यमरः।
२।८।६५॥ व्यूढकङ्कटः ४। इति शब्दरत्नावली॥
(यथा भट्टौ। रामायणे। २।६१।११।
"वर्म्मिणो दंशिताश्चैव ... मम बान्धवाः।
... ॥")
वर्म्मि पुं मत्स्यविशेषः। वामिमाछ इति भाषा।
अस्य मांसगुणाः। वातपित्तघ्नत्वम्। स्निग्धत्वम्।
गुरुदोषनाशित्वञ्च। इति राजवल्लभः॥
वर्य्य त्रि (वर्य्यते याच्यते इति। वरम् वृ ईप्सायाम्
+"अवद्यपण्यवर्य्या०।" ३।१।१०१। इति यत्।)
प्रधानम्। इत्यमरः। ३।१।५७॥ (यथा
भागवते। १।९।८।
"यदा धर्म्मसुताः ... मुनिवर्य्याः ...॥
...॥")
श्रेष्ठम्। इति मुग्धबोधव्याकरणम्॥ (यथा,
किराते। ७।९।

"माहेन्द्रं नगमभितः करेणुवर्य्याः
पर्य्यन्तस्थितजलदा दिवः पतन्तः॥")
वर्य्य, पुं, (वर्य्यते प्रार्थ्यते इति। वृ+यत्।)
कामदेवः। इति मेदिनी। ये ३०॥
वर्य्या स्त्री, (व्रियते इति। वृ+"अवद्यपण्य-
वर्य्येति।" ३।१।१०१। इति अप्रतिबन्धे
यत्।) पतिंवरा। इत्यमरः। ३।६।७॥ कन्या।
इति मुग्धबोधव्याकरणम्॥
वर्व्वणा, स्त्री, (वर्व्वणमस्त्यस्य वर्व्वति गच्छतीति
इति। वर्व्व गतौ+ल्युट्। टाप्।) नील-
मक्षिका। इत्यमरः। २।५।२७॥ नीला
कारवर्णा मक्षिका वर्व्वणा। भनभनिया इति
ख्याता। मक्षिकाख्यापी इत्येके। वरिति वदति
वर्व्वणा। अत्र वद भण शब्दे पचादित्वान्द्
ण्यन्। किंवा वृणोति पूतिकं भजते इति
वृणो विच् वर्। वरतेरपि वर्व्वा तत्र मक्षे
धारणे वर्व्वणा। इति तट्टीकायां भरतः॥
वर्व्वट, क्ली, (वर्व्वति वरयति मांसादिकमत्र इति।
वृ+"कृगृशृवृचतिभ्यः ष्वरच्।" उणा० २।
१२१। इति ष्वरच्।) विटुलम्। पीतचन्द-
नम्। पीतम्। इति राजनिर्घण्टः॥
वर्व्वर, पुं (वृणोति दीप्तिमिति। वृ+ष्वरच्।)
पामरः। स च नीचजातिः। देशः। बाबरी
इति भाषा। चक्रम्। देशविशेषः। (तद्देश
वासिनि, पुंभूम्नि। यथा, मार्कण्डेये। ५७।३८।
"काम्बोजा दरदाश्चैव वर्व्वरा हर्षवर्द्धनाः॥")
पविका। इति मेदिनी। रे २०८॥ तृण
विशेषः। बाबुइ पाबुइ इति भाषा। तत्प-
र्य्यायः। सुमुखः २ फणी ३ कृष्णवर्व्वरकः ४
सुगन्धकः ५ गन्धपत्रः ६ पूतगन्धः ७ तुवर-
कः ८। अस्य गुणाः। कटुत्वम्। उष्णत्वम्।
सुगन्धित्वम्। वातविषविबन्धदोषनाशि-
त्वञ्च। इति राजनिर्घण्टः॥
वर्व्वरकं स्त्री, (वर्व्वर+स्वार्थे कन्।) चन्दन-
भेदः। तत्पर्य्यायः। वर्व्वरोत्थम् २ श्वेतवर्व्व-
रकम् ३ पीतम् ४ सुगन्धि ५ निशादि ६
सुरभि ७। अस्य गुणाः। शीतलत्वम्। तिक्त-
त्वम्। श्रमपापहरकुष्ठकण्डूवमिनाशित्वम्।
त्रिदोषघ्नत्वञ्च। इति राजनिर्घण्टः॥
वर्व्वरा, स्त्री (वर्व्वरपुष्पवत् आकारोऽस्त्यस्या
इति। वर्व्वर+अच्। टाप्।) पुष्पविशेषः।
शाकभेदः। इति मेदिनी। रे २०८॥ (वर्व्व इति
शब्दं राति। रा+क।) मक्षिकाभेदः।
इति शब्दरत्नावली॥
वर्व्वरा } स्त्री, (वर्व्वर+टाप्। पक्षे त्रियाम्
वर्व्वरी } ङीष्।) तुलसीविशेषः। बाबुइ
इति भाषा। तत्पर्य्यायः। कवरी २ तुङ्गी ३
खरपुष्पा ४ अजगन्धिका ५ अजमती ६
वरारा ७ शतपुष्पिका ८। इत्यमरशब्दरत्ना-
वल्यौ। अस्या गुणाः यथा,
"वर्व्वरी कवरी तुङ्गी खरपुष्पाजगन्धिका।
पर्णासस्तत्र शुक्ले तु कठिञ्जरकुठेरकौ॥
कालमालः करालश्च फणिज्झः प्रस्थपुष्पकः।
तत्र शुक्लेऽर्ज्जकः प्रोक्तो वटपत्रश्च कीर्त्तितः।
वर्व्वरीतितयं रुच्यं शीतं कटु विदाहि च।
तीक्ष्णं रुचिकरं हृद्यं दीपनं लघु पाकि च।
पित्तलं कफवातास्रकण्डूकृमिविनाशनम्॥"
इति भावप्रकाशः॥
वर्व्वरीक पुं, (रुद्धते इति। भृश वर्द्धि+"ईषद्
दृशौ रे वच चाभ्यासस्य।" उणा० ४।१९।
इति ईकन् द्वित्वञ्च अभ्यासस्य वकारश्च।)
कामादिकथाहरश्च। कुटिलकुन्तलः। इद्-
मादिकोषः। अजगन्धिका। बाबुइ तुलसी
इति भाषा। इति शब्दचन्द्रिका। महा-
कालः। इति हेमचन्द्रः। तत्र पञ्चमीविभक्ता-
दारौ पठितोऽयं किन्तु मेदिन्यां वर्व्वरीकशब्दः
ख्यापयेत्॥
वर्व्वी, स्त्री, वर्व्वरी। इति शब्दचन्द्रिका॥
वर्षिष्ठ त्रि, (वृ+"ऋन्यो निष्।" उणा० ३।६६।
इति निष्।) मकरः। इन्दुकादिकोषः॥
वर्व्वुर, पुं, (वृ+बाहुलकात् उरच्।) वृक्ष-
विशेषः। बाबला इति भाषा। तत्पर्य्यायः।
युगलाक्ष २ कफान्तकः ३ गोश्टङ्गकण्टकः ४
गोश्टङ्गः ५ पंक्तिबीजः ६ दीर्घकण्टकः ७ कषा-
यकः ८ दृढबीजः ९ अजभक्ष्यः १०। अस्य
गुणाः। कषायत्वम्। उष्णत्वम्। कफकास
रक्तातिसारपित्तदाहार्त्तिनाशित्वञ्च। इति
राजनिर्घण्टः॥
वर्ष पुं क्ली, (वृष्यते इति। वृषु सेचने+
अधिकरणे भावे च घञ्। यद्वा
व्रियते याच्यते इति। वृ+"ऋतृषिदंसिवहिभ्य
सिभ्यः च।" उणा० ३।६२। इति सः।)
वृष्टिः। (यथा मनुः। ४।१०३।
"विद्युत्स्तनितवर्षेषु महोल्कानाञ्च सम्प्लवे।
आकालिकमनध्यायमेतेषु मनुरब्रवीत्॥"
जम्बूद्वीपांशः। वत्सरः। इत्यमरः। (यथा
मनुः। १।६९।
"चत्वार्य्याहुः सहस्राणि वर्षाणान्तु कृतं युगम्।
तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः॥")
जम्बुद्वीपः। इति मेदिनी। षे १३॥ (वर्षणं
मेघः। वृष+घञ्।) मेघः। इति हेम-
चन्द्रः। ३।७९।०॥ अथ जम्बूद्वीपस्य वर्ष-
सन्निवेशम्। तत्र जम्बूद्वीपस्य नववर्षविभागो यथा।
स्थितः। तत्र इलावृतं मध्यवर्त्ति वर्षम्। तस्य नाभ्यां
मेरुः। तद्दक्षिणे हरिवर्षं किम्पुरुषं भारतञ्च।
परिमाणं पूर्व्ववत्। पूर्व्वं भद्राश्ववर्षं केतुमालं पश्चिमे
नैलादि हिमवन्तादिर्व्विभक्ताः ...
कथिताः। भारतेऽस्मिन् वर्षे ...
...
...
...
...

यदावलेपेन रथेनैकेनावनिपतिं विदधे। तस्य ह वा एते श्लोकाः।
"प्रियव्रतकृतं कर्म्म कोऽनुकुर्य्याद्विनेश्वरम्।
यो नेमिनिम्नैरकरोच्छायां घ्नन् सप्त वारिधीन्॥"
छायां घ्नन् तमो निरस्यन्।
"भूसंस्थानं कृतं येन सरिद्गिरिवनादिभिः।
सीमा च भूतनिर्वृत्यै द्वीपे द्वीपे विभागशः॥"
एवं पितरि सम्प्रवृत्ते तदनुशासने वर्त्तमान आग्नीध्रो जम्बूद्वीपौकसः प्रजा औरसवद्धर्म्मावेक्षमाणः पर्य्यगोपायत्। तदुपलभ्य भगवानादिपुरुषः सदसि गायन्तीं पूर्व्वचित्तिं नामाप्सरसमभियापयामास। तस्यामु ह वा आत्मजान् स राजवर्य्य आग्नीध्रो नाभिकिम्पुरुषहरिवर्षेलावृतरम्यकहिरण्मयकुरुभद्राश्वकेतुमालसंज्ञान् नव पुत्त्रानजनयत्। आग्नीध्रसुतास्ते मातुरनुग्रहादौत्पत्तिकेनैव संहननबलोपेताः पित्रा विभक्ता आत्मतुल्यनामानि यथाविभागं जम्बूद्वीपवर्षाणि बुभुजुः। यानि नव वर्षाणि नवयोजनसहस्रायामानि अष्टभिर्म्मर्य्यादागिरिभिः सुविभक्तानि भवन्ति। एषां मध्ये इलावृतं नामाभ्यन्तरवर्षं यस्य नाभ्यामवस्थितः सर्व्वतः सौवर्णः कुलगिरिराजो मेरुर्द्वीपायामसमुन्नाहः कर्णिकाभूतः कुवलयकमलस्य मूर्द्धनि द्वात्रिंशत्सहस्रयोजनविततो मूले षोडशसाहस्रं तावतान्तर्भूम्यां प्रविष्टः। उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृङ्गवान् इति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्य्यादागिरयः प्रागायता उभयतः क्षारोदावधयो द्विसहस्रयोजनपृथव एकैकशः पूर्व्वस्मात् पूर्व्वस्मादुत्तर उत्तरो दशांशाधिकांशेन दैर्घ्य एव ह्रसन्ति। एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयः। अयुतयोजनोत्सेधा हरिवर्षकिम्पुरुषभारतानां यथासंख्यम्। तथैवेलावृतमपरेण पूर्व्वेण च माल्यवद्गन्धमादनावानीलनिषधायतौ द्विसहस्रं पप्रथतुः केतुमालभद्राश्वयोः सीमानं विदधाते।
भारतेऽप्यस्मिन् वर्षे सरिच्छैलाः सन्ति बहवः। मलयो मङ्गलप्रस्थो मैनाकस्त्रिकूट ऋषभः कूटकः कोल्लकः सह्यो देवगिरिर्ऋष्यमूकः श्रीशैलो वेङ्कटो महेन्द्रो वारिधारो विन्ध्यः शुक्तिमानृक्षगिरिः पारियात्रो द्रोणश्चित्रकूटो गोवर्द्धनो रैवतकः ककुभो नीलो गोकामुख इन्द्रकीलः कामगिरिरिति चान्ये च शतसहस्रशः शैलास्तेषां नितम्बप्रभवा नदा नद्यश्च सन्त्यसंख्याताः। एतासामपो भारत्यः प्रजा नामभिरेव पुनन्तीनामात्मना चोपस्पृशन्ति। चन्द्रवसा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणा पयस्विनी शर्करावर्त्ता तुङ्गभद्रा कृष्णवेण्या भीमरथी गोदावरी निर्व्विन्ध्या पयोष्णी तापी रेवा सुरसा नर्म्मदा चर्म्मण्वती अन्धः शोणश्च नदौ महानदी वेदस्मृतिरृषिकुल्या त्रिसामा कौशिकी मन्दाकिनी यमुना सरस्वती दृषद्वती गोमती सरयूरोघवती सप्तवती सुषोमा शतद्रुश्चन्द्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वेति महानद्यः। अस्मिन्नेव वर्षे पुरुषैर्लब्धजन्मभिः शुक्ललोहितकृष्णवर्णेन स्वारब्धेन कर्म्मणा दिव्यमानुषनारकगतयो बह्व्य आत्मन आनुपूर्व्व्येण सर्व्वा ह्येव सर्व्वेषां विधीयन्ते। यथावर्णविधानमपवर्गश्च भवति॥ १ ॥ ॰ ॥ अतः परं प्लक्षादीनां प्रमाणलक्षणसंस्थानतो वर्षविभाग उपवर्ण्यते। प्लक्षो जम्बुप्रमाणो द्वीपाख्यातिकरो हिरण्मय उत्थितो यत्राग्निरुपास्ते सप्तजिह्वः। तस्याधिपतिः प्रियव्रतात्मज इध्मजिह्वः स्वं द्वीपं सप्तवर्षाणि विभज्य सप्तवर्षनामभ्य आत्मजेभ्य आकलय्य स्वयमात्मयोगेनोपरराम। शिवं यवसं सुभद्रं शान्तं क्षेममभयममृतमिति वर्षाणि। तेषु गिरयो नद्यश्च सप्तैवाभिज्ञाताः। मणिकूटो वज्रकूट इन्द्रसेनो ज्योतिष्मान् सुपर्णो हिरण्यष्ठीवो मेघमाल इति सेतुशैलाः। अरुणा नृम्णाङ्गिरसी सावित्री सुप्रभाता ऋतम्भरा सत्यम्भरेति महानद्यः॥ २ ॥ ॰ ॥ प्लक्षस्तु समानेनेक्षुरसोदेनावृतो यथा तथा द्वीपोऽपि शाल्मलो द्विगुणविशालः समानेन सुरोदेनावृतः परिवृङ्क्ते। यत्र ह वै शाल्मली प्लक्षायामा। तद्द्वीपाधिपतिः प्रियव्रतात्मजो यज्ञबाहुः स्वसुतेभ्यः सप्तभ्यस्तन्नामानि सप्तवर्षाणि व्यभजत्। सुरोचनं सौमनस्यं रमणकं देववर्हं पारिभद्रमाप्यायनमभिज्ञातमिति। तेषु वर्षाद्रयो नद्यश्च सप्तैवाभिज्ञाताः। स्वरसः शतशृङ्गो वामदेवः कुन्दः कुमुदः पुष्पवर्षः सहस्रश्रुतिरिति। अनुमतिः सिनीवाली सरस्वती कुहू रजनी नन्दा राकेति॥ ३ ॥ ॰ ॥ एवं सुरोदाद्बहिस्तद्द्विगुणः समानेनावृतो घृतोदेन यथा पूर्व्वः कुशद्वीपो यस्मिन् कुशस्तम्बो देवकृतस्तद्द्वीपाख्याकरो ज्वलन इवापरः स्वशष्परोचिषा दिशो विराजयति। तद्द्वीपपतिः प्रैयव्रतो राजन् हिरण्यरेता नाम स्वं द्वीपं सप्तभ्यः स्वपुत्रेभ्यो यथाभागं विभज्य स्वयं तप आतिष्ठत्। वसुवसुदानदृढरुचिनाभिगुप्तस्तुत्यव्रतविविक्तवामदेवनामभ्यः। तेषां वर्षेषु सीमागिरयो नद्यश्चाभिज्ञाताः सप्त सप्तैव। चक्रश्चतुःशृङ्गः कपिलश्चित्रकूटो देवानीक ऊर्द्ध्वरोमा द्रविण इति। रसकुल्या मधुकुल्या मित्रविन्दा श्रुतविन्दा देवगर्भा घृतच्युता मन्त्रमालेति॥ ४ ॥ ॰ ॥ तथा बहिः क्रौञ्चद्वीपो द्विगुणः समानेन क्षीरोदेन परित उपक्लृप्तः। वृतो यथा कुशद्वीपो घृतोदेन। यस्मिन् क्रौञ्चो नाम पर्व्वतराजो द्वीपनामनिर्व्वर्त्तक आस्ते। तस्मिन्नपि प्रैयव्रतो घृतपृष्ठो नामाधिपतिः स्वे द्वीपे वर्षाणि सप्त विभज्य तेषु पुत्रनामसु सप्त रिक्थादान् वर्षपान्निवेश्य स्वयं भगवान् भगवतः परमकल्याणयशस आत्मभूतस्य हरेश्चरणारविन्दमुपजगाम। आमो मधुरुहो मेघपृष्ठः सुधामा भ्राजिष्ठो लोहितार्णो वनस्पतिरिति घृतपृष्ठसुताः। तेषां वर्षगिरयः सप्तैव नद्यश्चाभिख्याताः। शुक्लो वर्द्धमानो भोजन उपबर्हिणो नन्दो नन्दनः सर्व्वतोभद्र इति। अभया अमृतौघा आर्य्यका तीर्थवती रूपवती पवित्रवती शुक्लेति॥ ५ ॥ ॰ ॥ एवं पुरस्तात् क्षीरोदात् परित उपवेशितः शाकद्वीपो द्वात्रिंशल्लक्षयोजनायामः समानेन दधिमण्डोदेन परीतः। यस्मिन् हि शाको नाम महीरुहः स्वक्षेत्रव्यपदेशकः। यस्य ह महासुरभिगन्धस्तं द्वीपमनुवासयति। तस्यापि प्रैयव्रत एवाधिपतिर्नाम्ना मेधातिथिः। सोऽपि विभज्य सप्तवर्षाणि पुत्रनामानि तेषु स्वात्मजान् पुरोजवमनोजववेपमानधूम्रानीकचित्ररेफबहुरूपविश्वधारसंज्ञान्निधाप्याधिपतीन् स्वयं भगवत्यनन्त आवेशितमतिस्तपोवनं प्रविवेश। एतेषां वर्षमर्य्यादागिरयो नद्यश्च सप्त सप्तैव। ईशान उरुशृङ्गो बलभद्रः शतकेसरः सहस्रस्रोतो देवपालो महानस इति। अनघा आयुर्दा उभयस्पृष्टिरपराजिता पञ्चपदी सहस्रस्रुतिर्निजधृतिरिति॥ ६ ॥ ॰ ॥ एवमेव दधिमण्डोदात् परतः पुष्करद्वीपस्ततो द्विगुणायामः समन्तत उपकल्पितः समानेन स्वादूदकेन समुद्रेण बहिरावृतः। तद्द्वीपमध्ये मानसोत्तरनामैक एवार्व्वाचीनपराचीनवर्षयोर्म्मर्य्यादाचलोऽयुतयोजनोच्छ्रायायामः। यत्र तु चतसृषु दिक्षु चत्वारि पुराणि लोकपालानाम्। यदुपरिष्टात् सूर्य्यरथस्य मेरुं परिभ्रमतः संवत्सरात्मकं चक्रं देवानामहोरात्राभ्यां परिभ्रमति। तद्द्वीपस्याधिपतिः प्रैयव्रतो वीतिहोत्रो नाम तस्यात्मजौ रमणकधातकिनामानौ वर्षपती नियुज्य स स्वयं पूर्व्वजवद्भगवत्कर्म्मशील एवास्ते। तद्वर्षपुरुषा भगवन्तं ब्रह्मरूपिणं सकर्म्मकेण कर्म्मणाराधयन्ति॥ ७ ॥ इति श्रीभागवते ५ स्कन्धे १ । २ । १६ । १९ । २० अध्यायाः॥ ॰ ॥ अपि च।
"कन्ये द्वे दश पुत्राश्च सम्राट् कुक्षिश्च ते उभे।
ते सर्व्वे भ्रातरः शूराः प्रजापतिसमा दश॥
अग्नीध्रश्चाग्निबाहुश्च मेधा मेधातिथिर्व्वसुः।
ज्योतिष्मान् द्युतिमान् भव्यः सवनो मित्र एव वा॥
मेधाग्निबाहुपुत्रास्तु त्रयो योगपरायणाः।
जातिस्मरा महाभागा न राज्याय मनो दधुः॥
प्रियव्रतोऽभ्यषिञ्चत्तान् सप्त सप्तसु पार्थिवान्।
द्वीपेषु तेषु धर्म्मेण द्वीपांश्चैव निबोध मे॥
जम्बूद्वीपे तथाग्नीध्रं राजानं कृतवान् पिता।
प्लक्षद्वीपेश्वरश्चापि तेन मेधातिथिः कृतः॥
शाल्मले तु वपुष्मन्तं ज्योतिष्मन्तं कुशाह्वये।
क्रौञ्चद्वीपे द्युतिमन्तं भव्यं शाकाह्वये तथा॥
पुष्कराधिपतिं चैव सवनं कृतवान् नृपम्।
महावीतो धातकिश्च पुष्कराधिपतेः सुतौ॥
द्विधा कृत्वा ततो वर्षं पुष्करे च न्यवेशयत्।
[illegible]
[illegible]"

कुशद्वीपेश्वरोऽथ ज्योतिष्मानभवत्तु महाद्युतिः ।
तन्नामाङ्कानि वर्षाणि शाकद्वीपे चकार सः ।
तथा द्युतिमतः सप्त पुत्रास्तानपि निबोध मे ।
कुशलो मनोऽनुगश्चोष्णः प्रधानश्चान्धकारकः ।
मुनिश्च दुन्दुभिश्चैव सप्तमस्तु ततः स्मृतः ।
तेषां स्वनामधेयानि क्रौञ्चद्वीपे तथाभवन् ॥
ज्योतिष्मतः कुशद्वीपे पुत्रनामाङ्कितानि वै ।
तत्रापि सप्त वर्षाणि तेषां नामानि मे शृणु ।
उद्भिज्जं वेणुमच्चैव द्वैरथं लम्बनं च ।
धृतिमत् प्रभाकरञ्चैव कपिलञ्चापि सप्तमम् ।
वपुष्मतः सुताः सप्त शाल्मलीशस्य नामतः ।
श्वेतञ्च हरितञ्चैव जीमूतो रोहितस्तथा ।
वैद्युतो मानसश्चैव सप्तमः सुप्रभस्तथा ।
सप्तैव शाल्मले तेषां वर्षाणि तु यत्र वै ।
मेधातिथेः पुत्राः प्लक्षद्वीपेश्वरस्य वै ।
तेषां नामाङ्कितैर्वर्षैः सप्तभिः संवृतम् ।
पूर्वं शान्तभयं वर्षं शिशिरञ्च सुखोदयम् ।
आनन्दञ्च शिवञ्चैव क्षेमकञ्च ध्रुवं तथा ।
प्लक्षद्वीपादिद्वीपेषु शाकद्वीपान्तिकेषु च ।
ज्ञेयः पञ्चसु धर्मोऽयं वर्णाश्रमविभागजः ॥
यानि किम्पुरुषाद्यानि वर्षाण्यष्टौ हिमाह्वयम् ।
सुखमायुः स्वरूपञ्च बलं धर्मश्च निश्चयः ।
पञ्चस्वेतेषु वर्षेषु धर्मं साधारणं स्मृतम् ॥
आग्नीध्राय पिता पूर्वं जम्बुद्वीपं ददौ द्विज ।
तस्य पुत्रा बभूवुर्हि प्रजापतिसमा नव ।
ज्येष्ठो नाभिरिति ख्यातस्तस्य किम्पुरुषोऽनुजः ।
हरिवर्षस्तृतीयस्तु चतुर्थोऽभूदिलावृतः ।
रम्यश्च पञ्चमः पुत्रो हिरण्वान् षष्ठ उच्यते ।
कुरुस्तु सप्तमस्तेषां भद्राश्वश्चाष्टमः स्मृतः ।
नवमः केतुमालश्च तन्नाम्ना वर्षसंस्थितिः ॥
यानि किम्पुरुषाद्यानि वर्षाण्यष्टौ हिमाह्वयम् ।
तेषां स्वभावतः सिद्धिः सुखप्राया ह्ययत्नतः ।
विपर्ययो न तेष्वस्ति जरामृत्युभयं न च ।
धर्माधर्मौ न तेष्वास्तां नोत्तमाधममध्यमाः ।
न वै चतुर्युगावस्था आर्तवा ऋतवो न च ॥
आग्नीध्रसूनोर्नाभेस्तु ऋषभोऽभूत् सुतो द्विज ।
ऋषभाद्भरतो जज्ञे वीरः पुत्रशताग्रजः ।
सोऽभिषिच्यर्षभः पुत्रं महाप्राव्राज्यमास्थितः ।
तपस्तेपे महाभागः पुलहाश्रमसंश्रयः ॥
हिमाह्वं दक्षिणं वर्षं भरताय ददौ पिता ।
तस्मात्तु भारतं वर्षं तस्य नाम्ना महात्मनः ।
भरतस्याप्यभूत् पुत्रः सुमतिर्नाम धार्मिकः ।
तस्मिन् राज्यं समावेश्य भरतोऽपि वनं ययौ ।
इत्येषां पुत्रपौत्रैश्च सप्तद्वीपा वसुन्धरा ।
प्रियव्रतस्य पुत्रैस्तु भुक्ता स्वायम्भुवेऽन्तरे ।
एष स्वायम्भुवः सर्गः कथितस्ते द्विजोत्तम ।
पूर्वमन्वन्तरे तस्मिन् किमन्यत् कथयामि ते ॥”
इति मार्कण्डेयपुराणे स्वायम्भुवे मन्वन्तरे [illegible] ॥ अध्यायः ॥

अन्यच्च ।

“केतुमाले नराः कालाः सर्वे पनसभोजनाः ।
स्त्रियश्चोत्पलपत्राभा जीवन्ति च वर्षायुतम् ।
भद्राश्वे पुरुषाः शुक्लाः स्त्रियश्चन्द्रांशुसन्निभाः ।
दशवर्षसहस्राणि जीवन्ति आम्रभोजनाः ॥
रम्यके पुरुषा नार्यो रमन्ते रजतप्रभाः ।
दशवर्षसहस्राणि शतानि दश पञ्च च ।
जीवन्ति तत्र पुरुषा न्यग्रोधफलभोजनाः ।
हिरण्मये हिरण्याभाः सर्वे च लकुचाशनाः ।
एकादशसहस्राणि शतानि दश पञ्च च ।
जीवन्ति कुरुवर्षे तु श्यामाङ्गाः क्षीरभोजनाः ।
सर्वे मिथुनजातास्तु नित्यं सुखनिषेविणः ।
चन्द्रद्वीपे महादेवं यजन्ति सततं शिवम् ।
तथा किम्पुरुषे विप्रा मानवा हेमसन्निभाः ।
दशवर्षसहस्राणि जीवन्ति प्लक्षभोजनाः ।
यजन्ति सततं देवं चतुर्मूर्त्तिं चतुर्मुखम् ।
ध्याने मनः समाधाय सादरं भक्तिसंयुताः ॥
तथा च हरिवर्षेऽपि महारजतसन्निभाः ।
दशवर्षसहस्राणि जीवन्तीक्षुरसाशिनः ।
तत्र नारायणं देवं विश्वयोनिं सनातनम् ।
उपासते सदा विष्णुं मानवा विष्णुभाविताः ।
तत्र चन्द्रप्रभं शुभ्रं शुद्धस्फटिकनिर्मलम् ।
विमानं वासुदेवस्य पारिजातवनाश्रितम् ।
चतुर्द्वारमनौपम्यं चतुस्तोरणसंयुतम् ।
प्राकारैर्दशभिर्युक्तं दुराधर्षं सुदुर्गमम् ।
स्फाटिकैर्मण्डपैर्युक्तं देवराजगृहोपमम् ।
स्वर्णस्तम्भसहस्रैश्च सर्वतः समलङ्कृतम् ।
हेमसोपानसंयुक्तं नानारत्नोपशोभितम् ।
दिव्यसिंहासनोपेतं सर्वशोभासमन्वितम् ।
सरोभिः स्वादुपानीयैर्नदीभिश्चोपशोभितम् ।
नारायणपरैः शुद्धैर्वेदाध्ययनतत्परैः ।
योगिभिश्च समाकीर्णं ध्यायद्भिः पुरुषं हरिम् ।
स्तुवद्भिः सततं मन्त्रैर्नमस्यद्भिश्च माधवम् ।
तत्र देवादिदेवस्य विष्णोरमिततेजसः ।
राजानः सर्वकालन्तु महिमानं प्रकुर्वते ।
गायन्ति चैव नृत्यन्ति विलासिन्यो मनोरमाः ।
स्त्रियो यौवनशालिन्यः सदा मण्डनतत्पराः ॥
इलावृते पद्मवर्णा जम्बूफलरसाशिनः ।
त्रयोदशसहस्राणि वर्षाणां वै स्थिरायुषः ।
भारते तु स्त्रियः पुंसो नानावर्णाः प्रकीर्त्तिताः ।
नानादेवार्च्चने युक्ता नानाकर्म्माणि कुर्वते ।
परमायुः स्मृतं तेषां शतं वर्षाणि सुव्रताः ।
नवयोजनसाहस्रं वर्षमेतत् प्रकीर्त्तितम् ।
कर्म्मभूमिरियं विप्रा नराणामधिकारिणाम् ।
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः ।
विन्ध्यश्च पारियात्रश्च सप्तात्र कुलपर्वताः ।
इन्द्रद्वीपः कशेरुमांस्ताम्रवर्णो गभस्तिमान् ।
नागद्वीपस्तथा सौम्यो गन्धर्वस्त्वथ वारुणः ।
अयन्तु नवमस्तेषां द्वीपः सागरसंवृतः ।
योजनानां सहस्रन्तु द्वीपोऽयं दक्षिणोत्तरः ।
पूर्वे किराता यस्यान्ते पश्चिमे यवनास्तथा ।
ब्राह्मणाः क्षत्रिया वैश्या मध्ये शूद्रास्तथैव च ।
इज्यायुद्धवणिज्याभिर्वर्त्तयन्त्यत्र मानवाः ।
स्रवन्ते पावना नद्यः पर्वतेभ्यो विनिःसृताः ।
शतद्रुश्चन्द्रभागा च सरयूर्यमुना तथा ।
इरावती वितस्ता च विपाशा देविका कुहूः ।
गोमती धूतपापा च बाहुदा च दृषद्वती ।
कौशिकी लोहिता चैव हिमवत्पादनिःसृताः ।
वेदस्मृतिर्वेदवती वृत्रघ्नी सिन्धुरेव च ।
पर्णाशा वन्दना चैव सदानीरा मनोरमा ।
चर्मण्वती तथा नूपा विदिशा वेत्रवत्यपि ।
शिप्रा ह्यवन्ती च तथा पारियात्राश्रयाः स्मृताः ।
नर्मदा सुरसा शोणा दशार्णा च महानदी ।
मन्दाकिनी चित्रकूटा तामसी च पिशाचिका ।
चित्रोत्पला विपाशा च मञ्जुला वालुवाहिनी ।
ऋक्षवत्पादजा नद्यः सर्वपापहरा नृणाम् ।
तापी पयोष्णी निर्विन्ध्या सिप्रा च निषधा नदी ।
वेण्या वैतरणी चैव बलाका च कुमुद्वती ।
तोया चैव महागौरी दुर्गा चान्तःशिला तथा ।
विन्ध्यपादप्रसूतास्तु नद्यः पुण्यजलाः शुभाः ।
ऋषिकुल्या त्रिसामा च मन्दगा मन्दगामिनी ।
कृपा पलाशिनी चैव ऋषिका वंशकारिणी ।
शुक्तिमत्पादसञ्जाताः सर्वपापहरा नृणाम् ।
आसां नद्युपनद्यश्च सन्ति चान्याः सहस्रशः ।
तास्विमे कुरुपाञ्चाला मध्यदेशादयो जनाः ।
पूर्वदेशादिकाश्चैव कामरूपनिवासिनः ।
पौण्ड्राः कलिङ्गा मगधा दाक्षिणात्याश्च सर्वशः ।
तथापरान्ताः सौराष्ट्राः शूद्राभीरास्तथार्बुदाः ।
मालका मालवाश्चैव पारियात्रनिवासिनः ।
सौवीराः सैन्धवा हूणाः शाल्वाः कल्पनिवासिनः ।
मद्रा रामास्तथाम्बष्ठाः पारसीकास्तथैव च ।
आसां पिबन्ति सलिलं वसन्ति सरितां सदा ।
चत्वारि भारते वर्षे युगानि कवयोऽब्रुवन् ।
कृतं त्रेता द्वापरञ्च कलिश्चान्यत्र न क्वचित् ।
यानि किम्पुरुषाद्यानि वर्षाण्यष्टौ महर्षयः ।
न तेषु शोको नायासो नोद्वेगः क्षुद्भयं न च ।
स्वस्थाः प्रजा निरातङ्का सर्वदुःखविवर्जिताः ।
रमन्ते विविधैर्भावैः सर्वाश्च स्थिरयौवनाः ॥”
इति कूर्म्मपुराणे ४५ अध्यायः ॥
अपरं वामनपुराणे १३ अध्याये द्रष्टव्यम् ॥ प्रमथादिष्वपि वर्षशब्दो दृश्यते । तत्र संख्या दृष्ट्वा हरो यथा,—
“कनकप्रमाणि वर्षं तथा पुरी हि सा ।
मध्ये [illegible] सर्वदा मन्दविहिता ।
महायमविनाशाय महादिक्पालाय च ।
महाम्बुदवर्णाय महासिद्धिप्रदाय च ।
पुत्रमित्र नदुपदेहेशी वर्षेषु मदीश्वरेश ।
अनुमानमसा चौरा वचनेष्वपराजितः ।
धंवश्रमेहाशोऽवकार्य्यसमयता ।
विद्युतासमिवारागो धीमान् जनमानसः ।
प्रमथेदृक्कमलस्य देवेशामरपस्य च ।
मण्डलाधिपाधिन महावाराधीश्वरे ।
सकलदुःखवर्षवरद्योतिभूषणे ।
महाप्रमथ वर्षपति निखिल भूषिता हरे ।

उत्पातक्षोभनिर्घातविहतानां प्रमाय च ।
कथयामि महाभाग ब्रह्मण्येकमनाधुना ॥ * ॥
मङ्गला विजया भद्रा शिवा शान्तिर्धृतिः क्षमा ।
ऋद्धिर्वृद्धिरुन्नतिः सिद्धिस्तुष्टिः पुष्टिः श्रिया उमा ॥
दीप्तिः कान्तिर्यशो लक्ष्मीरीश्वरीति प्रकीर्त्तिता ।
विख्याताश्चोत्तमा देव्य सत्त्वभावव्यवस्थिता ॥
प्रथमं षट्स्थिता यस्य सर्व्वसिद्धिप्रदायिका ॥२
ब्राह्मी जयावती प्राज्ञी अजिता चापराजिता ॥
जम्भनी मानसी माया स्मितिः श्वेता विभो ध्रुवा ।
सरस्या कौशिकी गौरी विमला ललिताजया ॥
अरुन्धती क्रिया दुर्गा राक्षसा इति वायुना ।
मध्यभागे स्थिता देव्यो युगानामशुभापहा ॥२ ॥
काली रौद्री कपाली च घण्टाकर्णा मयूरिकी ।
बहुरूपा सुरूपा च त्रिनेत्रा रिपुहान्तिका ॥
माहेश्वरी कुमारी च वैष्णवी सुरपूजिता ।
वैवस्वती तथा घोरा कराली विकटादिभिः ॥
चर्च्चिका चेति धातुस्था देव्यस्त्रैलोक्यविश्रुता ।
पूजितव्या सुनिर्व्विण्ण । सर्व्वकामप्रसाधिका ॥२ ॥
सिद्धासुरगन्धर्व्ववरयोगयन्त्रैर्नुता ।
भावकालाश्रया काव्यदयरूपफलप्रदा ॥
प्रत्येकशः समस्ता वा कर्म्मणा सुनिश्चितम् ।
अथवा गुणभेदेन यत्र यत्र प्रपूजिता ॥"
इति देवीपुराणे वत्सरदेवतार्च्चाप्रतिविधिनामाध्यायः ॥ (वर्षके त्रि । यथा, भागवते । ३ । २१ । ९ ।
"नमाम्यभीक्ष्णं नमनीयपाद-
सरोजमल्पीयसि कामवर्षम् ॥")

वर्षकरी, स्त्री, (वर्षं सततध्वनं इव करोतीति । वर्ष+कृ+ट । ङीप् ।) झिल्लिका । इति हेमचन्द्रः । ४ । २८२ ॥

वर्षकेतु, पुं, (वर्षस्य वृष्टेः केतुरिव । सति वर्षे भूरिशः उत्पन्नत्वादस्य तथात्वम् ।) रक्तपुनर्नवा । इति राजनिर्घण्टः । (अलर्कवंशीयकेतुमतः पुत्रः । यथा, हरिवंशे । ३२ । ४ ।
"सेन्यस्य केतुमान् पुत्रो वर्षकेतुस्ततोऽभवत् ॥")

वर्षकोष, पुं (वर्षस्य वत्सरस्य कोष इव । सर्व्वस्य ज्ञानवत्त्वात् तथात्वमस्य ।) दैवज्ञः । इति शब्दरत्नावली । (वर्षस्य अन्तःस्थितफलकोष इव कोषः ।) माषः । इति शब्दमाला ॥

वर्षज, त्रि (वर्षात् जातमिति । जन्+ड ।) वृष्टिजातम् । वत्सरजातम् । जम्बुद्वीपजातम् । द्वीपांशजातम् । मेघजातम् । इति वर्षशब्दपूर्व्वकजनधातोर्डप्रत्ययेन निष्पन्नम् ॥

वर्षण, क्ली, (वृष्+ल्युट् ।) वृष्टिः । इति शब्दरत्नावली ॥ (यथा मार्कण्डेयपुराणे । १४ । २१ ।
"तथैव सुव्रत धर्म्मं इव वै वर्षणाय यत् ।
स्वल्पमाप्यायकं भाजनाको मेघाय हि यम ॥")

वर्षणिः, स्त्री, (वृष्+अनि ।) वर्त्तनम् । क्रिया । इति उणादिकोषः । क्रतुः । यजनम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

वर्षपर्व्वत, पुं, (वर्षाणां भारतादीनां विभाजकः पर्व्वत इति मध्यलोपी समासः ।) वर्षविभाजकगिरिः । यथा,—
"हिमवान् हेमकूटश्च निषधो मेरुरेव च ।
चैत्रः कर्णी च शृङ्गी च सप्तैते वर्षपर्व्वताः ॥"
इति हारावली ॥

वर्षपाकी [न्] पुं, (वर्षे वर्षाकाले पाकोऽस्त्यस्येति । वर्षपाक+इनिः ।) आम्रातकः । इति हेमचन्द्रः । ४ । २१८ ॥ (तथास्य पर्य्यायः ।
"आम्रातको वर्षपाकी ।" इति वैद्यकरत्नमालायाम् ॥)

वर्षपुष्पा स्त्री (वर्षे वर्षाकाले पुष्पं यस्याः ।) सहदेवीलता । इति राजनिर्घण्टः ॥ (सहदेवीशब्देऽस्या विवृतिर्ज्ञेया ॥)

वर्षप्रिय पुं (वर्षो वर्षणं प्रियं यस्य ।) चातकपक्षी । इति त्रिकाण्डशेषः ॥

वर्षवर, पुं, (वरतीति । वर आवरणे+अच् । वर्षस्य रेतोवर्षणस्य वर आवरकः ।) षण्डः । इत्यमरः । २ । ८ । ९ ॥ खोजा । इति भाषा ॥ (यथा, रत्नावल्याम् २ अङ्के ।
"नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपा-
मन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादयं
वामनः ॥")

वर्षवृद्धि स्त्री (वर्षस्य वृद्धिराधिक्यं यत्र ।) जन्मतिथिः । इति कालमाधवादर्शनात् ॥ अथ जन्मतिथिकृत्यम् । तच्चमासि न कर्त्तव्यं चान्द्रमाधीयत्वेन मानकालत्वात् । न च तत्र सौरमासीयत्वं तथात्वे तस्मात् तिथेः कदाचित् मासी तद्वर्षे तत्कृत्यलोपापत्तेः । न चैतावता प्रतिसंवत्सरत्वविधानात् । यथा ब्रह्मपुराणगरुड ।
"वर्षे च जन्मदिवसे स्नातैर्मङ्गलपाणिभिः ।
गुरुदेवाग्निविप्राश्च पूजनीयाः प्रयत्नतः ॥
स्वकच्च पितरौ तथा देवप्रजापतिः ।
प्रतिसंवत्सरञ्चैव कर्त्तव्यश्च महोत्सवः ॥"
स्नातैस्तिलस्नातैः । प्रजापतिर्ब्रह्मा । तथा च तत्तिथिकृत्यम् ।
"तिलोद्वर्त्ती तिलस्नायी तिलहोमी तिलप्रदः ।
तिलभुक् तिलवापी च षट्तिली नावसीदति ॥
मङ्गलपाणिभिः अभिप्रेतार्थसिद्धिमङ्गलसूत्रं तथा गोरोचनादिकमपि मङ्गलं तेन युक्तहस्तैः पाणिभिरित्यर्थः । तथा च ब्रह्मचिन्तामणौ ।
"गुरुदुग्धतिलावदाख्यमपत्येन समचम् ।
गुडगुञ्ज विमधिद्वार्थं दूर्व्वाक्षीरोचनायुतम् ।
संपूज्य मार्कण्डेयं मन्त्रेण प्रार्थयेदिदम् ॥
चिरजीवी यथा त्वं भो भविष्यामि तथा मुने ॥
रूपवान् वित्तवांश्चैव श्रिया युक्तश्च सर्व्वदा ।
मार्कण्डेय महाभाग सप्तकल्पान्तजीवन ।
आयुरिष्टार्थसिद्ध्यर्थमस्माकं वरदो भव ॥"
यत्तदपर्वेति तत्सर्वं अविच्छायमन्त्रैरेतत्रस्थानोक्तसवचनम् । नामसदृशी तथा दत्वा नृपतसन्ततमार्कण्डेयपुराणोक्तमन्त्रप्रयत्नादिकमोऽनेन मार्गेण पूजाविधानाथ । तत्स्थाने सप्तचत्वारिंशत् गव्येन मम दक्षिणेऽस्त्रमम् ॥ * ॥ पूजायामर्घ्यान्तरं पाद्यमाह मत्स्यपुराणम् । अर्घ्यं पाद्यादिकञ्चैव मधुपर्कं प्रयोजयेत् । पाद्यानन्तरं चाद्यमाह नरसिंहपुराणम् । पाद्यञ्चैव तृतीयया चतुर्थ्यार्घ्यं प्रदापयेत् । तृतीयया पुरुषसूक्तीयतृतीयया ऋचा । उभयत्रमन्त्रेणानिच्छाविकल्पः । इति श्रीदत्तः ॥ * ॥ श्रीपतिव्यवहारनिर्णये ।
"नवाम्बरधरो भूत्वा पूजयेच्च चिरायुषम् ॥"
तथा ।
"द्विभुजं जटिलं सौम्यं सुवृद्धं चिरजीविनम् ।
मार्कण्डेयं नरो भक्त्या पूजयेत् प्रयतस्तथा ॥
ततो दीर्घायुषं व्यासं रामं द्रौणिं कृपं बलिम् ।
प्रह्लादञ्च हनूमन्तं विभीषणमथार्च्चयेत् ॥"
रामोऽत्र परशुरामः । चिरजीवित्वप्रख्यातेः । द्रौणिरश्वत्थामा ॥ * ॥ तथा,—
"कृष्णपक्षे जन्मतिथिं प्राप्य सम्पूजयेन्नरः ।
षष्ठीञ्च दधिभक्तेन वर्षे वर्षे पुनः पुनः ॥"
योगियाज्ञवल्क्यः ।
"ध्यायेन्नारायणं नित्यं स्नानादिषु च कर्म्मसु ।
तद्विष्णोरिति मन्त्रेण स्नायादप्सु पुनः पुनः ॥
गायत्री वैष्णवी ह्येषा विष्णोः संस्मरणाय वै ॥"
ध्यायेत् स्मरेत् । स च मन्त्रः ।
"तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।
दिवीव चक्षुराततम् ॥"
वामनपुराणम् ।
"सर्व्वमङ्गलमङ्गल्यं वरेण्यं वरदं शुभम् ।
नारायणं नमस्कृत्य सर्व्वकर्म्माणि कारयेत् ॥" * ॥
बहुव्याहरति निन्दामाह भविष्यपुराणम् ।
"बहूक्त्वैव विना दानम् । यत्किञ्चित् कुरुते नरः ।
फलञ्चाल्पाल्पकं तस्य धर्म्मस्याह यथो भवेत् ॥"
ब्रह्मपुराणम् ।
"ब्रह्मवादिषमायुक्तं नमस्कारान्तकीर्त्तितम् ।
स्वाहामन्त्रेऽवसाने मन्त्र इत्यभिधीयते ॥
आदावेव शिवायेति मन्त्रस्यैव निवेदयेत् ।
एकैकस्य प्रकुर्व्वीत यथोद्दिष्टं क्रमेण तु ॥"
मन्त्रयुग्ममाह यथोपचारान्तरमपि ।
"मन्त्राक्षतञ्च प्रोक्तं भक्त्या कल्पयुक्तोत्तरम् ।
भक्तिमन्त्रपदेनञ्च कोटिं कोटिं युक्तोत्तरम् ॥
सर्व्वं च कर्म्मोपदिष्टं इति वाचादिभिरर्च्चयेत् ।
यथोपदेशारम्भे पूजयेच्च ततो ध्रुवम् ।
न पूज्यते गुरुश्च यत्र सा निष्फला क्रिया ॥"
इति ब्रह्मपुराणवचनात् ॥ * ॥
तत्र कर्म्माधिकारे विशेषोऽस्य पूजितदेवता नामभिः कार्य्यः ।
"सर्व्वेषां दैवतानाञ्च कुर्य्यात् यथाविधि ।
चतुर्द्दश्यां प्रयत्नेन आत्मा च दत्तवारिणा ।
होमसन्ततये देवं तत्संख्यं होमयेत् ॥"
इति त्रिवृद्भिर्वत्सरग्रंथात् ॥
एवं होमे प्रायश्चित्तं च मङ्गलम् ।

"आहारयाने कुर्य्यात् ध्यायन् वै मन्त्रदेव-
तास् ।"
इति स्मृतेः ।
अन्यत्र तु देवीपुराणम् ।
"होमो यथाग्निपूजायां शतमष्टोत्तरं भवेत् ।
अष्टाविंशतिरष्टौ वा यथाशक्ति विधीयते ॥" * ॥
स्कान्दे ।
"तस्य जातदिने ... मैथुनाध्वामिषं च ।
आमिषं कलहं हिंसां वर्षवृद्धौ विवर्जयेत् ॥"
अध्वान अध्वगमनम् । कलहमित्यत्र क्षौर-
मिति क्वचित् पाठः । क्षौरं मुण्डनम् । वर्षवृद्धौ
जन्मदिने ॥ * ॥ तद्यथा ।
"नखे जन्मनि संक्रान्तौ श्राद्धे जन्मदिने तथा ।
अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणा ॥"
जन्मनि पुत्रजन्मनि । ज्योतिषे ।
"स्नाता जन्मदिने नित्यं गुरुदेवान् प्रपूज्य
भोक्ता प्रियं
मङ्गल्योपयतो द्विजाय दत्त्वाभ्युदयिकं
वह वै ।
यत्नात् धारयति यश्च शुद्ध्यै श्रावं प्रयाति
पुर्व
शक्ते यस्तु निरामिषं न हि भवेत् कालान्तरे
पतितः ॥" * ॥
दीपिकायाम् ।
"जन्मपुत्रा यदि जन्ममासे
यस्य पूर्वं जन्मनिधिभवेयु ।
भवन्ति तदुत्तरमेव यास
प्रेतस्य जन्मसमानि तस्य ॥
जन्मान्तरकर्मोभावे यस्य जन्मनिधिभवेत् ।
अपृथयोगसमायो विक्रमस्य मदे मदे ॥"
जन्मनक्षत्रं जन्मतिथिः ।
"तत्र धर्मोपविचार्य सर्वविधुरार्पणम् ।
यथाशक्ति होमो वा यथार्थं मौनिनिष्ठता ।
गौरादयोऽपि ये एता देवापि तु पावनम् ।
सुरा माधी यथा दुष्ट मैवेद्यं रसनीयम् ।
सद्भ्यो वस्त्रयुक्ताय धर्मोपविष्ट स्थानं ॥"
रसनीयं कवितं दायकादिकेन । दीपा-
सवादीनां यजनम् । कयापालनगहडीत महा-
पुराणविष्णुधर्मोत्तरयोरपर दर्शनात् । तद्
यथा,—
"दधि पयांसि मांसानि मत्स्यानि कुसुमानि च ।
कृसमादीनि चान्यानि कलयाम्ना सह स्थानः ॥"
आयुर्वेदाला वन्दनीया ।
"अङ्गिरःपुत्रे विष्णुनु गर्भं
भागीरथ्याः समया विधिना ॥"
अत्र क्रम । निकारणेनम् । निजपुत्रकर्म
स्नानम् । नववस्त्ररोपणम् । गुरुपुरुषवि-
प्रादिपूजा मारोचयाज्ञयकर्मणि दधिदी
याको वर्धयत् । गुरुदत्तादिकराख पूज-
नीया । अक्षय पूजनीयम् । अत्र च ।
यथा आपो यत्र ययौ । यस्यं ही
मनुर्वे स्यात् । इत्थं च पुनर्भवाप्ती । अत्र

शक्तो विधवा द्विधा । इत्यनेन विद्विनिर्णयः ॥ * ॥
अश्वत्थमादीनां मोदनमाह विष्णुधर्मोत्तरे ।
"मोदमण्डनमयक्ष धनधाद यथै मतम् ।
प्रभोरप्यनमान्य तस्य पुष्परिता यत् ॥"
धनधार यवमिश्रम् । मतं क्षिरम् । पितरौ
प्रजापति सूर्यो गणपतिमार्कण्डेयश्च पूजनीय ।
तत्र प्रार्थनमन्त्रो ।
"चिरजीवी यथा त्वं भो भविष्यामि तथा मुने ।
रूपवान् वित्तवांश्चैव श्रिया युक्तश्च सर्वदा ।
मार्कण्डेय महाभाग सप्तकल्पान्तजीवन ।
आयुरारोग्यसिद्ध्यर्थमस्माकं वरदो भव ॥"
ततो व्यासपरशुरामाश्वत्थामकृपबलिप्रह्लाद-
हनूमद्विभीषणाः पूजनीयाः । षष्ठ्यपि पूज-
नीया ।
"त्रैलोक्ये यानि भूतानि स्थावराणि चराणि
च ।
ब्रह्मविष्णुशिवैः सार्द्धं रक्षां कुर्वन्तु तानि मे ॥"
इति मत्स्यपुराणोक्तं रक्षार्थं पठेत् ॥ * ॥
पितृमातृयादवपक्षयमस्तु विष्णुपुराणादुक्तम् ।
यथा,—
"श्रद्धोऽपि वरुदेवस्य पादौ ययाद् सभार ।
देवस्वाञ्च महाबाहुर्वसुदेवसुदायवान् ॥"
एवञ्च ।
"वसन्तु पितृमाता गौरवेणातिरिच्यते ॥"
इति मनुवचने पितुरपेक्षया यद्यपि मातु
गौरवमुक्तं तत् पोषणपराधं । अतएव
मनु ।
"नाति भर्त्तारि पुत्रस्तु वाच्यो मातुरदत्तिना ॥"
वाच्यो मद्यवीय ॥ * ॥ पुत्रपुत्र्योतिषयाभे तु
मनु ।
"वनिता पुत्रविभजनप्रस्थैरिति यत ।
मार्कण्डेयरा तस्मा दिवाप्यायुष्यजैनवे ॥"
अत्र वैदिकेतरमन्त्रपाठे शूद्रादीनामधिकारः ।
जन्मतिथौ प्रायश्चत्तपुराणोक्तमात् पौरुषा
कर्ममयापारः ॥ * ॥ जन्मतिथिवर्णनमाभि-
तु देवीपुराणम् ।
"तुमाया वस्त्रमिव मद्यो यामतोऽपिवा ।
एवं वदसमीयात्रे न तस्य निविष्टमना ॥
वत्सरे जन्मतिथिवदि स्यात्
पूजा तदा जन्मभवंतुतेव ।
अनद्यता मित्र दिवसेऽपि
पूजा तदा वा भवतीव वसात् ॥"
अं वचनम् । मरकतं इत्यादयाम्नार्कण्डेऽपि ।
पूजाहि निविषयकाम एव वक्तव्ये ।
"नयने स्वक्रिते दिव यामं वाक्यतु नस्वत ।
नवपञ्चमीमदरावैत तिथिनमे नवेव च ॥"
इति कृत्यतत्त्ववचनात् ।
अश्विने शुक्लपक्षे देव मन्वन्तरेण विहित-
कार्यं ग्राम । यथाहैत तु जैवायनमार्कण्डेयौ ।
"तत्परमदीरायें वर्षाकस्य मतो दयि ।
वर्णितहीन वनिता तवयत्र दिवं स्मृतम् ॥"
इति विद्याधरणम् ।

वर्षा, स्त्री शुचि, (वर्षा वर्षणमस्त्यासु इति ।
वर्ष + अर्शआदित्वात् अच् । टाप् । यद्वा, वृष्टि
इति । वृ + "वृषुवदीति ।" उणा० ३ । ६२ ।
इति स । ततष्टाप् ।) अथामकाल ऋतुः ।
तत्पर्य्याय । प्रावृट् २ । इत्यमरः ॥ १ । ४ । १९ ॥
घनकालः ३ अब्दामेः ४ प्रावृड् ५ मेघागमः ६
घनागमः ७ । इति शब्दरत्नावली । प्रावृषा ८
इति त्रिकाण्डशेषः । स च ऋतुः श्रीरागस्य
भाद्रमासद्वयात्मकः । आषाढादिमासद्वयात्मक
इत्यन्ये । आद्यस्य प्रमाणम् । यथा । नभस्य
नभश्चौ मेघागमः । मधुश्च माधवश्च वासन्ति
काविति । शुचिश्च शुक्रश्च मैष्माविति । अयेन
पुनरपरं देवानां दिनम् । नभाश्च नभस्यश्च
वार्षिकाविति । इषश्चोर्ज्जश्च शारदाविति ।
सहाश्च सहस्यश्च हैमन्तिकाविति । अयनद्
दक्षिणायनं देवानां रात्रिः । इति मलमास-
तत्त्वधृता श्रुतिः । द्वितीयस्य प्रमाणं तत्र चातु-
र्मास्यव्रतनियमश्च यथा । वाराहे ।
"आषाढशुक्लद्वादश्यां पौर्णमास्यामथापि वा ।
चातुर्मास्यव्रतारम्भं कुर्य्यात् कर्कटसंक्रमे ॥
अभावे तु तुलार्केऽपि मन्त्रेण नियमं व्रती ।
कार्त्तिके शुक्लद्वादश्यां विधिवत् समापयेत् ॥
चतुर्थ्यपि हि तस्योर्द्ध्वं चातुर्मास्यं व्रतं चर ।
कार्त्तिक्यां शुक्लपक्षे तु द्वादश्यां तत्समापयेत् ॥"
माघे ।
"प्रवृते वार्षिकान् मासान् देवस्योत्थापना-
वधि ।
मधुव्रता भवन्ति मधो पुरुषिकनिर्भयान् ।
तेजस्य कथञ्चिद्वि दुर्दरागः प्रजायते ।
वनौकसामवधयान् मधुनाम जायते ।
तमरे जन्मनि दीर्घा व्यापीयाकमभवत् ।
अत्र तुष्ट यदा योगी मधुमांसस्य वर्ज्जनात् ।
निराशिषो वर्णपरो विष्णुलोकं जायते ।
एकान्तोपवासैन विष्णुलोकमवाप्नुयात् ।
धारणापारणाभ्यास महाभाग दिने दिने ।
तामूलवर्ज्जनाद्भोगी रक्तकण्ठश्च जायते ।
फलत्यागात् फलाढ्यश्च नर्मे जिव्हे बहुभवेत् ।
वलत्यागात् मतिमान् यदुपूतश्च जायते ।
मन्ये भाराशयर्थे जलाकारवर्ण व्रतम् ।
साराभिरश्चवारिभ्योऽपि नियोरायत्र वदम् ।
ब्रह्मादिवाने याप तुरियाताप्ति वैश्य ॥"
अत्रकुमारः ।
"इदं वर्ण मया दैव । यवीर्णं पुरुषाय ।
निर्विघ्नां सिद्धिमायातु प्रसन्ने त्वयि केशव ॥
गृहीतेऽस्मिन् व्रते देव यद्यपूर्णे म्रिये त्वहम् ।
तन्मे भवतु सम्पूर्णं त्वत्प्रसादाज्जनार्द्दन ॥"
समाप्तौ च ।
"इदं व्रतं मया देव कृतं प्रीत्यै तव प्रभो ।
न्यूनं सम्पूर्णतां यातु त्वत्प्रसादाज्जनार्द्दन ॥" * ॥
अन्यत्र वर्णितवर्ज्य माहात्म्यम् ।
"कर्कटस्थे वर्षत्यापि सर्वे मकरायणम् ।
वर्षाकोऽकर वर्षेषु मायाच चतुरो वदेत् ॥"

एतद्दृष्टविषयम् । जर्द्धं वार्षिकाभ्यां मासाभ्यां नैकस्मात् परावर्तौ इति प्रश्नोक्ति । इति तिथ्यादितत्त्वम् ॥ वर्षर्तौ वर्णनीयानि यथा,—
"वर्षासु घनशिखिशिखण्डकघनसमा मधुकन्दली इन्द्रौ ।
धातीकदम्बकेतकमयूखामिलनिम्नगाहलि प्रीति ॥"
इति कविकल्पलतायाम् १ स्तबके ४ कुसुमम् ।
(एतत्कालसम्बन्धादिकं यथा,—
"घनघनादिदवारिदमाकुला
निखिलभू' घनतोयदपूरिता ।
अमदपालकरा विदिशो दिशो
कुस्तकीटलभिप्रभया मही ॥
नीलभृङ्गहरितोज्ज्वला मही
कुल्यकाबलिलसद्युता सरित् ।
इन्द्रगोपकविराजिता धरा
षट्पदभूषणविभूषिता च सा ॥
पत्री कूजति कानने च सरसी व्याकामपूर्णा तथा
हंसा मानसमाश्रयन्ति गगनाम्भस्य गता यान्ति च ।
गन्धश्वेतमहेन्द्रकन्दरदरीसञ्छादिता यामिनी
भाद्रे पवनस्य कोपनकरो वर्षास्तु शोभितः ।"
"किञ्चिद्धर्मे भवन्ति मस्तानां द्रवता भवेत् ।
बहुशस्तास भवेन्नानी वारिपूर्णा सरिन्नदा' ॥
बहुरकधरा मेघा बहुदृष्टा घनस्तमा' ।
इर्षे गुणसमायुक्ता यथा मेघा ऋतूत्तमा' ।
तासु वातकफौ कुमी जायेते हि भृशं भ्रमम् ।
इति ज्ञात्वा भिषक् श्रेष्ठ' कुर्यादस्य प्रति क्रियाम् ॥
स्वेदनं मर्दनं चैव निर्माते घनवन्तथा ।
गौरवामारतं ग्रस्त व्यायाम क्रमविक्रम' ॥
कट्वम्लक्षारपरता सेव्या वातकफापहा ।
निरूहा वस्तिकर्माद्या कफवातरुजापहा ॥"
इति हारीते प्रथमे स्थाने चतुर्थेऽध्याये ॥
"आदानग्लानवपुषामग्नि' सन्नोऽपि सीदति ।
वर्षासु दोषैर्दुष्यन्ति तेऽम्बुलम्बाम्बुदेऽम्बरे ॥
तुषारेण मरुता सहसा शीतलेन च ।
भूवाष्पेणाम्लपाकेन मलिनेन च वारिणा ॥
वह्निनैव च मन्देन तेष्वित्यन्योन्यदूषिषु ।
भजेत् साधारणं सर्वमूष्मणस्तेजनञ्च यत् ॥
आस्थापनं शुद्धतनुर्जीर्णं धान्यं रसान् कृतान् ।
जाङ्गलं पिशितं यूषान् मध्वरिष्टं चिरन्तनम् ॥
मस्तु सौवर्चलाढ्यं वा पञ्चकोलावचूर्णितम् ।
दिव्यं कौपं शृतञ्चाम्भो भोजनन्त्वतिदुर्दिने ॥
व्यक्ताम्ललवणस्नेहं संशुष्कं क्षौद्रवल्लघु ।
अपादचारी सुरभि सततं धूपिताम्बर' ॥
हर्म्यपृष्ठे वसेद्बाष्पशीतशीकरवर्जिते ।
नदीजलोदमन्थाह सप्रायासातपांस्त्यजेत् ॥"
इति वाभटे सूत्रस्थाने तृतीयेऽध्याये ।)
वर्षांश' पुं, (वर्षस्य वत्सरस्य अंश ।) मास ।
इति त्रिकाण्डशेष' ॥
वर्षाघोष, पुं, (वर्षासु घोषो महान् शब्दोऽस्य ।) महामण्डूक' । इति राजनिघण्ट ॥
वर्षाङ्ग ,पुं,(वर्षस्य वत्सरस्य अङ्गमिव । अभिधानात् पुंस्त्वम् ।) मास । इति हारावली । २८ ॥
वर्षाङ्गी स्त्री, (वर्षासु अङ्ग यस्या' । तत्र जाता कुरवदं'भारत्वात्तथात्वम् ।) पुनर्नवा । इति शब्दरत्नावली । (विवृतोऽस्या पुनर्नवाशब्दे ज्ञातव्य ।)
वर्षाभव , पुं, (वर्षासु भवतीति । भू+अच । वर्षासु भव उत्पत्तिर्यस्य वा ।) रक्तपुनर्नवा । इति राजनिघण्ट' । वर्षाजाते त्रि ।
वर्षाभू', पुं, (वर्षासु भवतीति । भू+क्विप् ।) भेक' । इत्यमर । १ । २ । २३ । (अस्य पर्यायो यथा,—
"मण्डूक' प्लवगो भेको वर्षाभूर्दर्दुरो हरि' ॥"
इति भावप्रकाशस्य पूर्वखण्डे द्वितीये भागे ।) इन्द्रगोप' । इति राजनिघण्ट' । भूलता । इति मेदिनी । भ, १८ ॥
वर्षाभू, स्त्री, (वर्षासु भवतीति । भू+क्विप ।) पुनर्नवा । इति मेदिनी । भ, १८ । (यथा, सुश्रुते सूत्रस्थाने ४५ अध्याये ।
"तिलपर्णिकावर्षाभूचिमलकपोतिकावसुन मधावुककायमश्नतीनि ।") भेकी । इति भरत द्विरूपकोषः । वर्षाभवे त्रि ।
वर्षाभ्वी, स्त्री (वर्षाभू+ङीप् ।) भेकी । इत्यमर' । १।२ ।२४। पुनर्नवा । इत्यमरमालाभानुदीक्षित ॥
वर्षामद, पुं (वर्षासु माद्यतीति । मद्+अच ।) मयूर' । इति केचित ॥
वर्षाम्भ'पारणत', पुं, (वर्षाम्भो वृष्टिजल तस्य पारणं उपवासान्ते पान व्रतमिव यस्य ।) चातकपक्षी । इति केचित् ॥
वर्षारात्र', पुं, (वर्षाणां रात्रि' । तत समासान्तो ऽच् ।) वर्षाकालीनरात्रि । इति पुंलिङ्गसङ्ग्रह टीकायां भरत ॥
वर्षार्चि , [स्] पुं (वर्षासु अर्चिर्दीप्तिरस्य ।) मङ्गलग्रह' । इति शब्दरत्नावली ॥
वर्षालङ्कायिका, स्त्री पृष्ठा । इत्यमरटीकायां भरत ॥
वर्षाविसर्ग', पुं (वर्षाणामवसानमत्र ।) शरत् काल' । इति राजनिघण्ट' ॥
वर्षिक, त्रि वर्षसम्बन्धि । वत्सरसम्बन्धि । वर्षशब्दात् वत्सरशब्दात् चेति ठक्प्रत्ययेन निष्पन्नम् ॥
वर्षिष्ठ', त्रि, अतिशयवृद्ध' । अयमनयोरतिशयेन वृद्ध इत्यर्थे वृद्धस्थाने वर्षादेशे इष्ठप्रत्ययेन निष्पन्न' ॥
वर्षीयस्, [स्] त्रि, (अयमनयोरतिशयेन वृद्ध । वृद्ध+ईयसुन् । वर्षादेश ।) अतिवृद्ध' । तत्पर्याय । दशमी २ ज्यायान् ३ । इत्यमर' । ३ । १ । ४१ ॥ (यथा,—
"आमोदमाद् भवेद्बालकस्तरुणः प्राकृतो । इह च्यायान् वयतोऽब्दात् वर्षीयान् मतो' यतः ।"
इति स्मृति ।)
वर्षुक , त्रि, (वर्षति तच्छील इति । वृष+ "लष पतपदस्थाभूवृषहनकमगमशृभ्य उकञ् ।" ३ । २ । १५४ । इति उकञ् ।) वर्षककर्ता । वृष धातोरुकञ्प्रत्ययेन निष्पन्न' । (यथा, भट्टौ । २ । १० ।
"अम्भु पयाद हिममागमानि
दीर्घीकृता पुष्पचय बभूव ।
निर्याभिन्या वहते घनश्च
भूयो बभाषे सुगिरा कुमार ।")
वर्षुकाब्द', पुं, (वर्षुकश्चासौ अब्दश्चेति कर्मधारय ।) वर्षणशीलमेघ । इति जटाधर ॥
वर्षेज , त्रि (वर्षे जायते इति । जन+ड' । सप्तम्या अलुक ।) वर्षाकालजात' । वत्सर जात । सप्तम्यन्तवर्षशब्दपूर्वकजनधातोर्डप्रत्ययेन निष्पन्न ॥
वर्षोपल , पुं, (वर्षासूपल ।) मेघभवशिला । करका । इत्यमर । १ । ३ । १२ । (यथा, बृहत्संहितायाम् । ७२ । ५३ ।
"वर्षोपलवच्चात वायुस्कन्धाच्च घनमारश्रवम् । ध्रियते किल स्वादिष्वेतत्त्रितयम् नवमभूतम् ।")
वर्ष्म, [न्] क्ली, (वर्षति व्रष्यते येति । वृष+ मनिन् ।) शरीरम् । (यथा कथासरित्सागरे । २ । ५ ।
"इदमं च समीपेऽस्य निद्रायाना मतह तम् । कामभूति निशाम्य स वर्ष्मणा प्रावधनिभम् ।")
प्रमाणम् । इत्यमर' । ३ । ३ । ११६ । प्रमाण मध्योन्नतिरिति स्वामी । (यथा महाभारते । १ । ११ । ८ ।
"अपापग्रहभीत् व्रतान् अक्रूरोररबृहत् । पलाशद्विलकामेढी वहत स व्रतान् पथि ।")
इयत्ता । इति भरत । आकृतिसुन्दरानति । इति मेदिनी । न, १९८ । (उन्नते श्वेते च त्रि । यथा, ऋग्वेदे । १ । २८ । २ ।
"वृषोवरदृषभश्चितामध्वक्षो
यत्र ग्रावा वरमता पृथिव्या' ।"
"यत्र श्रृणुष्व उन्नतवयव' शिरवचनो वा ।"
इति तद्भाष्ये सायण । वर्षीयान् । यथा, भागवते । ६ । १८ । २ ।
"ॐ नमो भगवते कूपाराय सर्वसत्त्वगुणविशेषणाय अनोऽनुपलक्षितस्थानाय नमो वर्ष्मणे नमो भूम्ने नमोऽवस्थानाय नमस्ते ।" "वर्ष्मणे इर्ष्यिष्ठ ।" इति तट्टीकायां श्रीधर' ।)
वर्ह, क्ली, शरीरम् । इति हिरूपकोष ॥
वर्ह, क वधे । दीप्तौ । इति कविकल्पद्रुम ॥ (चुरा पर वधे सक-दीप्तौ अक सेट ।) ईदितम्' । क वर्हयति । इति दुर्गादास ॥
वर्ह ङ वर्हे । इति कविकल्पद्रुम ॥ (भ्वा आत्म अक सेट ।) ङ, वर्हते क्वचित्प्रेम प्राशितं ॥
व(ब)र्ह क्ली, (वर्हयते दीप्यते इति । वर्ह+ अच ।) मयूरपिच्छम् । इत्यमर' । २।५। ३१ ॥ (यथा, महाभारते । १२ । १९ । ४ ।

"यथा सर्वाणि भूतानि बिभर्त्ति पृथिवी समम् ।
तथा बहुविध राजा सर्वं कुर्वीत धर्म्मवित् ॥")
पर्ण्णपत्रम् । इति भरतः ॥ (बर्हतीति । बर्ह वृद्धौ + अच् ।) पत्रम् । इति शब्दरत्नावली ॥ (यथा, रघुः । ६ । १० ।

"विभावितो विभ्रमन्त्यपत्र
मामादर कलकबर्हभन्य ।
प्रियाङ्गनगोत्रिनयाञ्जितैषो
विराटयामास युवा मनांसि ॥")

परीवारः । इति हेमचन्द्रः ॥

बर्हणं, क्ली (बर्हतीति । बर्ह वृद्धौ + ल्युः । बर्हयति शोभते इति । बर्ह दीप्तौ + ल्युः ।) पत्रम् । इति शब्दरत्नावली ॥

ब(ब)र्हिः [स्] पुं, (बृंहति वर्द्धते इति । बृंहि वृद्धौ + "बृंहेर्नलोपश्च ।" उणा० २ । ११ । इति इसि नलोपश्च ।) अग्निः । इति मेदिनी । सि, १९ ॥ चीतिः । इत्युणादिकोषः ॥ यज्ञः । इति हेमचन्द्रः ॥ (यथा, ऋग्वेदे । ७ । ७१ । ८ ।

"सूनो शोचिर्द्धिरदेहि रत्न
सुधा अभ्यावन् सुरभीणां अस्ते ।
सामो बर्हिः सुदयना निरेध
उर्ध्वं पाजस्वल्लिमि मदा च ॥"
"शोभनं च बर्हचनम् ।" इति तद्भाष्ये सायणः ।)

दीप्तम् । इत्यमरः ॥ (कुशः । सिद्ध कुशः । यथा, भागवते । ८ । १४ । १६ ।

"इदमाकल्प तत्राणि बर्हिषामाप्लुत

पुष्यः ॥")

ब(व)र्हिः [स्] पुं क्ली, (बृंहति वर्द्धते इति । बृंहि वृद्धौ + "बृंहेर्नलोपश्च ।" उणा० २ । ११ । इति इसि नलोपश्च ।) कुशः । इति मेदिनी । सि, १९ । (यथा, कुमारे । १ । ६१ ।

"सर्वविशेषविद्युत् देवविद्याभरणा
विधानविधिवत् बर्हिषपौमपैषी ॥")

बर्हि [स्] क्ली, (बृंहतीति । बृंहि वृद्धौ + इसि नलोपश्च ।) पञ्चिकर्षम् । इति शब्दरत्नावली ॥

बर्हिःपुष्प क्ली, (बर्हिषि दीप्तिकरं पुष्पमस्य ।) पञ्चिपर्णम् । इत्यमरटीकायां भरतः ॥

बर्हिर्मुखा [स्] पुं, (बर्हिषा कुशेन बर्हिषि यज्ञे वा मुख लेखो यस्य ।) अग्निः । इत्यमरः । १ । १ । ५० ।

बर्हिर्ज्ज क्ली (बर्हिषि दीप्तौ जायते । जन + ड ।) बर्हिणम् । चौरकम् । इत्यमरः ।

बर्हिकुसुम, क्ली, (बर्हिः बर्हतुल्यं कुसुमं यस्य ।) पञ्चिपर्णम् । इति शब्दचन्द्रिका ॥

ब(व)र्हिण, पुं (बर्हमस्यास्तीति । बर्ह + "पामादिभ्यो नः ।" इति नच् । यद्वा "बहुल मन्यत्रापि ।" उणा० २ । ७८ । इत्यत्र बर्हे बलच प्रत्ययः । बर्हिणो मयूरः । इत्युज्ज्वलदत्तोक्त्या इनच् ।) मयूरः । इत्यमरः । २ । ५ । ३० ॥ (यथा मनौ । ५ । ३१ ।

"मुद्गलादि पृषतान् मयान् बकवकाक्षन् बर्हिणः ।
अनिर्दिष्टांश्चैकखुरांष्टिट्टिभांश्च विवर्ज्जयेत् ॥"

स्त्री । तगरम् । तत्पर्य्यायो यथा —
"कालानुसार्य्यं तगरं कुटिलं मधुरं मतम् ।
अपरं पिण्डतगरं दण्डहस्ती च बर्हिणम् ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

बर्हिणवाहन पुं, (बर्हिणो मयूरो वाहनं यस्य ।) कार्त्तिकेयः । इति शब्दार्णवः ॥

बर्हिर्भगा, स्त्री, (बर्हि भगो वाहनं यस्याः ।) षष्ठी । इति त्रिकाण्डशेषः ॥

बर्हिःपुष्प, क्ली, (बर्हि बर्हवर्णं पुष्पं यस्य ।) पञ्चिपर्णम् । इत्यमरः । २ । ४ । १३० ॥

बर्हिर्ज्योतिः, [स्] पुं, (बर्हिषि यज्ञे ज्योतिर्यस्य ।) अग्निः । इति हेमचन्द्रः । ४ । १६४ ॥

बर्हिर्मुखः, पुं, (बर्हिरग्निर्मुखं यस्य ।) देवता । इत्यमरः । १ । १ । ९ ॥

बर्हिषद्, [द्] पुं, (बर्हिषि यज्ञे कुशासने वा सीदन्ति ये ते । बर्हिस् + सद् + क्विप् । षत्वं इत्यादित्वात् साधुः ।) पितृगणविशेषः । यथा
"अग्निष्वात्ताश्च सौम्याश्च पितरो बर्हिषः स्मृताः ।
अग्निष्वात्ता बर्हिषदो पिता सैषां बर्हिषाम् ॥"
इति कौर्म्मे १२ अध्यायः ॥

अपि च ।
"अग्निष्वात्तान् तथा सत्या आज्य च पुनर्वै ।
अग्निष्वात्तानपि सौम्यान् हविष्मन्तश्च सोम

पान् ॥
सुकालिनो बर्हिषदः आज्यपांस्तपर्पयेत् ।
तदैव पितृन् भक्त्या कालिनश्चैव भक्तये ॥
इमांस्तु विधिना पूर्वं पिण्डान् सर्वयेत् ॥"
अथ केचित् पितृधर्म्माः पितृगणाः द्विविधा अपि अनग्निविदग्धानाम् । तदुक्तम् ।
"अग्निदग्धा ये सौम्या यानमाश्रिता नरा ।
अग्निष्वात्ता सौम्यास्ते बर्हिषदः अनग्निदग्धाः"
इति अमरोक्तपरिचयेन विशिष्टकालविधा नाम् । इत्याह्निकतत्त्वम् ॥ (इन्द्रप्रमस्य प्रति ष्ठायै पुत्र । यथा, भागवते । ४ । २४ । ८–९ ।
"हविर्धानाद्धविर्धानीविदुरासूत षट्सुतान् ।
बर्हिषदं गयं शुक्लं कृष्णं सत्यं जितव्रतम् ॥
बर्हिषत्तु महाभागो हविर्धानिः प्रजापतिः ।
क्रियाकाण्डेषु निष्णातो योगेषु च कुरूद्वह ॥"
बर्हिषि यज्ञे सीदतीति । बर्हिषद्, त्रि । यथा ऋग्वेदे । २ । ३ । ३ ।
"स आ वह महतो शर्धो अच्युत
मिन्द्रं नरो बर्हिषदं यजध्वम् ॥")

बर्हिष्मत्, पुं, (बर्हिर्दीप्तिः अस्त्यस्य ।) अग्निः । इति शौनिकोक्तसमस्तकाव्यम् ॥

बर्हिष्ठ, क्ली (बर्हिषि तिष्ठतीति । स्था + क । षत्वमिति कम् ।) ह्रीबेरम् । इत्यमरः ॥ (यथा सुश्रुते कल्पस्थाने ११ अध्याये ।
"सेव्य हिरण्य गन्धादयेन
बर्हिष्ठदूष्टद्रदुग्धकल्पेन ॥"
त्रि प्रवृद्धम् । इति सायणः । यथा, ऋग्वेदे । १ । ११ ।
"बर्हो देवानामपि बर्हिष्ठेषु ।")

ब(व)र्ही, [न्] पुं, (बर्हमस्यास्तीति । बर्ह + इनि ।) मयूरः । इत्यमरः ॥ (यथा, ऋतुसंहारे । ४ । ६ ।
"घना मनोज्ञानपुरवारवोद्धृत
विभान्ति विद्युन्नतकान्तमोहितम् ।
कदम्बसर्जार्जुनकेतकीवनं
प्रतापयम् कुञ्जमत्र बर्हिणाम् ॥"
गन्धद्रव्यम् कासमर्दविशेषः । यथा, महाभारते । १ । ६१ । ३० ।
"सिद्धं पूर्ब्बेव बर्हि च पूर्णोत्तुङ्ग महा

भवम् ॥")

बल, भि ऊ संवरणे । इति कविकल्पद्रुमः । (भ्वा० आत्म० सक० सेट् ।) भि, बलयति धान्य मति । ऊ, बलते धर्म्मे लोकः संवृणोतीत्यर्थः । इति दुर्गादासः ॥

बलभि, } स्त्री, (बलभि + कृदिकारादिति वा
बलभी } ङीष् ।) बड्भी । इति शब्दरत्नावली अमरटीका च ॥ (यथा, कथासरित्सागरे । ८० । १४ ।
"अन्तःशालादरामभीमविधाय कौशलाभिरितः ।"
पुरीविशेषः । यथा, भट्टिः । २२ । ११ ।
"कामिन्दु विहित सदा समग्री
मेरकैलाशेन्द्रप्रतिमान् ।
कौशिकी भवनानुरागा ता
दिनकर पितरो बत गवाक्षान् ॥")

बलय पुं क्ली (बलते आवृणोति कलादिक मिति । बल + "कलिगलिनिलियम्य कयन् ।" उणा० ४ । ९८ । इति कयन् ।) कङ्कणविशेषः । वाला इति भाषा । तत्पर्य्यायः । आवापकः २ पारिहार्य्यः ३ कटकः ४ । इत्यमरः । पारिहार्यः ५ इत्यन्ये । इति शब्दरत्नावली । कटकः ७ कुकणम् ८ । इति जटाधरः ॥ (यथा, रामायणे । २ । ३२ । ५ ।
"सदैवमहाशिनोर्वलयैः केयूरैः कटकैरपि ।"
मण्डलम् । यथा, मार्कण्डेये । १० । ४६ ।
"अभ्यासावर्त्तसुपैनं गुरुर्मोनाय ।
वालय बलबन्तेन नराह बलिनांति ॥"
कण्ठरोगविशेषः । यथा, सुश्रुते निदानस्थाने २ अध्याये ।
"बलासबलवल्लाकृतपत्रलक्षणं वृत्ति ।"
"वातवलासपातवृद्धप्रत्ययद्र बलयोर्थ ।"
वैद्यकोक्ताविधरोगविशेषः । यथा सुश्रुते । १ । १४ ।
"तत्र दोषाधिष्ठानानि आधिकमेकं चतुर्भिस्तैः ।
तद्वधायस्तत्र बलयस्कन्धैः प्रत्येकं द्विविधा ॥" ० । वेष्टनम् । यथा, रघुः । १ । ३० ।
"अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः ।
तस्य धर्म्मरतेरासीद् वृद्धत्वं जरसा विना ॥"

बलक, पुं (बलमात्मीयवस्त्वाद्यतीति । बल + आ + ङ्कः अन् ।) अङ्गारवल्लीलताविशेषः । यथा,—

"बलाच एवायतनमुमतश्च
धीष करोत्यप्रगसि निवाप्य ।
तं सर्व्वदैवाप्रतिवार्य्यवीर्य्यं
विवर्ज्जयेत् वलय वदन्ति ।" * ।

अथ गलरोगाणां चिकित्सा ।
"कण्ठरोगेष्वसृङ्मोक्षस्तीक्ष्णैर्नस्यादिकर्म्मभिः ।
चिकित्सकश्चिकित्सान्तु कुशलोऽत्र समाचरेत् ।
क्वाथ एषाञ्च दार्व्वीत्वङ्निम्बतार्क्ष्यकलिङ्गजम् ।
हरीतकीकषायो वा पितो माक्षिकसंयुतः ।
कटुकातिविषादारुपाठामुस्ताकलिङ्गकाः ।
गोमूत्रक्वथिताः पीताः कण्ठरोगविनाशनाः ।
हरीतकी कटुका चोषा रास्त्रो त्वक् तिक्तका
घनम् ।
पाठा रसाञ्जनं दूर्व्वा तेजोह्वेति सुचूर्णितम् ।
क्षौद्रयुक्तं विधातव्यं गलरोगे महौषधम् ।
योगावेते त्रयः प्रोक्ता वातपित्तकफापहाः ।
यवाग्रजं तेजवतीं सपाठां
रसाञ्जनं दारु शिवां सकृष्णाम् ।
क्षौद्रेण कुर्य्यात् गुटिकां मुखेन
तां धारयेत् सर्व्वगलामयेषु ।"
इति भावप्रकाशः ॥ * ॥

वेला । कङ्कणम् । इति जटाधरः । (हस्तभूषण विशेषः । यथा, कामन्दकीये नीतिसारे । १८ । ४५ ।
"मुक्ताश्चो वलयश्चैव हस्तभेदाः सुदुर्ल्लभाः ।")

वलयित, त्रि, (वलयवत् करोतीति । वलय + तत्करोतीति णिच् ततः क्तः । यद्वा, वलय तदाकृतिर्जातमस्येति । वलय + इतच् ।) वेष्टितम् । इत्यमरः । (यथा, गीतगोविन्दे । ११ । २४ ।
"मौलनविलसित पीतपरागपटलभरवलयित
मूलम् ।"
यथा च वैराग्यशतके ।
"इत्ययमालावलयितबाहुं
परधनहरणे साधाराहुं ।
इत्याद्येवमभ्रमवीरं
कौपीनपतने महाशरीरं ।")

वलिर, त्रि, (वलते संवृणोति चक्षुस्तारामिति । वल + बाहुलकात् किरच् ।) केकरः । इत्यमरः ।

व(ब)लिश, स्त्री, (वलिना मत्स्यवद्दयानुपहारेण श्यति छिनत्ति मत्स्यानिति । शो + क ।) वडिशम् । इति शब्दरत्नावली ।

व(ब)लिशि, स्त्री (वलिना आहारोपचारेण मत्स्यादीन् श्यति विनाशयतीति । शो + बाहुलकात् कि ।) वडिशम् । इति शब्दरत्नावली ।

व(ब)लिशी, स्त्री (वलिशि + कृदिकारादिति ङीष् ।) वडिशम् । इति शब्दरत्नावली ।

व(ब)लूल, स्त्री, (वलते इति । वल संवरणे + "वले रूक ।" उणां ४ । ४ । इति ऊक ।) पद्मकन्दम् । पक्षिविशेषे, पुं । इति सिद्धान्तकौमुद्या मुणादिवृत्तिः उज्ज्वलदत्तश्च ।

व(ब)लूल, त्रि, बलवान् । बलशब्दात् सिध्मादित्वात् लच्प्रत्ययेन निष्पन्नः । इति मुग्धबोधव्याकरणम् । अस्य पवर्गीयबकारादित्वेऽपि तथा-लिखितत्वादत्र लिखनम् ।

वल्क, क भाषणे । इति कविकल्पद्रुमः । (चुरा-पर-सक-सेट ।) क, वल्कयति । भाषणं कथनम् । इति दुर्गादासः ।

व(ब)ल्क, क्ली, (वलते इति । वल संवरणे + "शूक मल्कोल्काः ।" उणां ३ । ४२ । इति कप्रत्ययान्तो निपातितः ।) वल्कलम् । (यथा, रघौ । ८ । ११ ।
"गुणवत् सुतरोपितश्रियः
परिणामे हि दिलीपवंशजाः ।
पदवीं तरुवल्कवाससां
प्रयताः संयमिनां प्रपेदिरे ।")
शकलः । इति मेदिनीशब्दरत्नावल्यौ । खण्डम् । इति विश्वः ।

व(ब)ल्क, पुं, (वल संवरणे + क निपातितश्च ।) पट्टिकालोध्रः । इति राजनिर्घण्टः ।

वल्कतरु, पुं, (वल्कप्रधानस्तरुरिति मध्यलोपी समासः ।) पूगवृक्षः । इति राजनिर्घण्टः ।

वल्कद्रुम, पुं (वल्कप्रधानो द्रुमः ।) भूर्ज्जवृक्षः । इति राजनिर्घण्टः । (विवरणमस्य भूर्ज्जशब्दे ज्ञातव्यम् ।)

व(ब)ल्कन, क्ली, (वलते संवृणोतीति । वल + बाहुलकात् कनन् ।) त्वचम् । इति राजनिर्घण्टः । छालचिनि इति भाषा ।

व(ब)ल्कल, पुं क्ली, (वलते संवृणोतीति । वल + बाहुलकात् कलन् ।) दृक्षत्वक् । बाकल इति भाषा । तत्पर्य्यायः । त्वक् १ वल्कम् २ । इत्यमरः । त्वचा ३ त्वचम् ४ चोचम् ५ चोलकम् ६ शल्कम् ७ छल्लकम् ८ छल्लि ९ छल्ली १० चोलकम् ११ । इति शब्दरत्नावली । (यथा, महाभारते । १ । १५६ । २ ।
"तौ तु पूर्व्वेण कालेन तपोयुक्तौ बभूवतुः ।
क्षुत्पिपासापरिश्रान्तौ जटावल्कलधारिणौ ।")

वल्कला, स्त्री, (वल्कल + टाप् ।) शिलावल्का । इति राजनिर्घण्टः ।

वल्कलोध्र, पुं, (वल्कप्रधानो लोध्रः ।) पट्टिका लोध्रः । इति राजनिर्घण्टः ।

वल्कवान् [त्] पुं (वल्कं शल्कोऽस्त्यस्येति । वल्क + मतुप् । मस्य वः ।) मत्स्यः । इति त्रिकाण्डशेषः । वल्कयुक्ते त्रि ।

वल्किल, पुं (वल्कोऽस्त्यस्येति । वल्क + इलच् ।) कण्टकः । इति शब्दरत्नावली ।

वल्कुत, स्त्री, वल्कलम् । इति शब्दचन्द्रिका ।

वल्ग, गतौ । इति कविकल्पद्रुमः । (भ्वा-पर-सक-सेट ।) वल्गति । अयं कुत्रचित्तु भृमगः । इति दुर्गादासः ।

वल्गनं, क्ली (वल्ग + ल्युट् ।) कुत्सितगमनम् । बहुभाषणम् । लम्फनम् । अश्वगतिभेदः ।

वल्गा, स्त्री, (वल्गत्यश्वोऽनयेति । वल्ग + करणे घञ् । टाप् ।) रश्मिनिका । लागाम् इति भाषा । तत्पर्य्यायः । कविका १ खलीनम् २ रश्मिः ३ कशा ४ । इति हेमचन्द्रः । (यथा, राजतरङ्गिण्याम् । ५ । ३१० ।
"वल्गाकर्षणवेगार्त्ता नृत्यति यस्य वाजिनः ।
वल्गाहृतोद्धतक्षत्रं विरतं वामपाणिनः ।")

वल्गित, क्ली, (वल्ग + भावे क्त ।) अश्वस्य विशेषगमनम् । तत्तु वेगेन किञ्चिदुपरिचरणम् । इत्यमरभरतौ । प्लुतगमनम् । (यथा, शिशुपाल वधे । २ । ७० ।
"अनिर्लोडितकार्य्यस्य वागजालं वाग्मिनो वृथा ।
निमित्तादपराद्धेषोर्धानुष्कस्येव वल्गितम् ।")
बहुभाषणञ्च ।

व(ब)ल्गु, पुं, (वलते इति । वल प्राणने + "वलेर्गुक् च ।" उणां १ । २ । इति उप्रत्ययः । गुगागमश्च धातोः ।) छागः । सुन्दरे, त्रि । इति मेदिनी । गे २५ । (यथा, रघौ । ५ । ६८ ।
"तद्वल्गुना युगपदुन्मिषितेन तावत्
सद्यः परस्परतुलामधिरोहतां द्वे ।
प्रस्पन्दमानपरुषेतरतारमन्त-
श्चक्षुस्तव प्रचलितभ्रमरञ्च पद्मम् ।")

व(ब)ल्गुक, क्ली, (वल्गु + स्वार्थे स्वार्थे वा कन् ।) चन्दनम् । विपिनम् । पणम् । रुचिरे त्रि । इत्यजयः । तत्र पवर्गीयबकारादौ लिखितोऽयं शब्दः । अस्माभिस्तु तथालिखितत्वादत्र लिखितः ।

वल्गुपत्र, पुं, (वल्गु मनोज्ञं पत्रं यस्य ।) वनमुद्गः । इति शब्दचन्द्रिका ।

वल्गुला, स्त्री, (वल्गु लातीति । ला + क । टाप् ।) चाङ्गुली । पक्षिविशेषः । तत्पर्य्यायः । पत्रवहा १ दिवान्धा २ निशाचरी ३ खेटिकी ४ दिवास्वापा ५ मांसेष्टा ६ मातृपालिका ७ । इति राजनिर्घण्टः ।

वल्गुलिका, स्त्री (वल्गुल + स्वार्थे कन् । टापि अत इत्वञ्च ।) तैलपायिका । यथा —
"वल्गुलिका सुस्त्र वहा परोक्षो तैलपायिका ।"
इति हेमचन्द्रः ।
(यथा कथासरित्सागरे । ६५ । ७८ ।
"ततो वल्गुलिकातस्य सद्य पटसद्मणत ।
स विभवती विषय्यों रात्रिमन्तहस्तदीम् ।")

वल्भ, ह भक्षणे । इति कविकल्पद्रुमः । (भ्वा-आत्म-सक-सेट ।) वल्भते अन्नं लोकः । इति दुर्गादासः ।

वल्भन, क्ली, (वल्भ भक्षणे + भावे ल्युट् ।) भक्षणम् । इति हेमचन्द्रः ।

वल्मिकः, पुं स्त्री, वल्मीकः । इति शब्दरत्नावली ।

वल्मिकि, पुं स्त्री वल्मीकः । इत्यमरटीकायां भरतः ।

व(ब)ल्मीक पुं क्ली, (वलते इति । वल संवरणे + "अलीकादयश्च ।" उणां ४ । २५ । इति ईकप्रत्ययेन साधुः ।) उन्मूलदर्शनात् उपदेहिकाः कीटादयो

विशात्।) उपदेहिकासञ्चयनिर्म्मितमृत्स्तूपः। तत्पर्य्यायः। वामलूरः २ नाकुः ३। इत्यमरः। इच्छाकः ४ वाल्मीकः ५ वाल्मीकिः ६ वाल्मिकः ७। इति जटाधरः। पुत्तकः ८ कृमपर्व्वतः ९ संमिद्धेनकः १०। इति शब्दरत्नावली॥ (यथा मेघदूते। १५।
"वल्मीकाग्रात् प्रभवति धनुःखण्डमाखण्डलस्य॥")
तन्त्रसिद्धया दीर्घनिर्मितो यथा। विष्णुपुराणम्।
"वल्मीकम्यचरोग्राणी ऋदनस्रेचा यथा।
श्रीपादविहितो शैवाय नारदानिधनप्रदाम्।
यत्नप्रावरणाय इयोर्याता न वदे
माम्॥"
इत्यादिकामतरलम्॥ ०॥
दैवयनिद्धायी यामात् पूर्व्वं प्रियसिन्धोभ्यामाल्पर्यं तन्त्रसिद्धया चातनं यथा,—
"वल्मीकशतनिकायिष्टु मामबेन सुमनाम्।
चालयेत् प्रियश्च वर्णदोषावायुध्यान्ये॥"
वल्मीकस्यादियादि मध्यवित्तवायुपादामान् सदायानीहि मायमीति सुलयाविदितिमतान् मायबद्धा ततवान्मर्म्मेव वा चान कार्य्यं सदम्। तथा चाच यथा —
"चालयेत् प्रथमं दृष्टं लोके यथाविधेरपि।
पश्चान्ते यथार्थे यवनामिवक्चैरपि।
म्लानिका करिष्यस्य पर्व्वतावतुरस्य च।
कुशवल्मीकमूलं कल्पवकतुपीरितम्॥"
इति दैवचिन्तामणिः॥
वल्मीक, पुं, (वल्मीक उपदेहिकासञ्चयनिर्म्मितमृत्स्तूप उत्पत्तिकारणत्वेनास्त्यस्येति। इत्।) वाल्मीकिमुनिः। रोगविशेषः। इति विश्वः। अथ वल्मीकरोगस्य लक्षणम्।
"पादौ धनकालरपादैडेः
कर्णौ स्तनौ वा विशिखेव देशे।
ग्रन्थिः च वल्मीकवदभ्युपाति
भाग्यः क्षेत्रेण तल्लग्नाद्धि।
मुखेऽध्यैर्वर्ण्यमिषोलव्यैः
विरसम बरपि चोषसाये।
वल्मीकमाहुर्भिषजो विकारं
विषक्रोधिं विरलं विदिवान्॥"
येता हतारिका। अत कष्टा। कथा साधुनायम्। तत्र कथा। वल्मीकाख्येनैव वपुर्विशरणमसङ्क्षयमारूढ एवं। विकल्पेन उपचारयोगः॥ ०॥ अत तस्य चिकित्सा।
"प्रक्षेपेऽपि वल्मीकं स्नानार्थं कुर्य्यात्
कर्द्दम्।
विशेषसंपूर्णैव चोषविका च दोषैवेत्।
वल्मीकस्य मलैघ्नस्य चाग्नेर्विधाकम्।
तत्र वल्मीकं तथा शोधितं शोणितेन विरच।
कृष्णगन्धं भक्षेण पुरुषा बहुवेव च।
कादिशत्कृत्वा सुलेपेन लेपयेच्च॥

स्नायाम्ले मधूके घृतुनिमे प्रवेशयेत्।
तूलिकेव सुतोत्रेव निवक तद्भवरादयेत्।
पक्व तत्र विभागोदारुतो सर्वा यथाक्रमम्।
अभिताय नलोपिष्टा प्रदिहाच्छिरिदम्
भिषक्।
संशोध्य दुष्टमांसानि क्षारेण प्रतिसारयेत्।
अथ विशुद्धं विज्ञाय रोमशेनाविलम् भिषक्।
मनःशिलाभल्लातकैलाघृतपवने।
मालीपक्वलकैष च विमलेन विपाचयेत्।
वल्मीकं नामभिर्नाहि बहुच्छिद्रं बहूज्ज्वलम्।
पाणिपादोपरिष्टात् शिरसेभृभिराश्रयम्।
वल्मीकं यत् वर्द्धितं च्छाद्यन्ते नाहि विना
मता॥"
अथ प्रियार्थं तैलम्। इति भावप्रकाशः।
(अस्य अपि अपहारेऽन्न रोगनाशिनं यथा,—
"पौष्टकवल्मीकसाधिकामृत भिषक्।
माहुत्याश्च कुष्ठानुदाहरने प्रवेशयम्॥"
इति वैद्यकचक्रपाणिसंग्रहे अरवल्मीकाधिकारे।)
वल्मीकि, पुं वल्मीकः। इति शब्दमाला॥
वल्मीकशीर्ष क्ली, (वल्मीकस्य शीर्षमिव शीर्षं मस्य।) सोलोऽञ्जनम्। इति राजनिर्घण्टः॥
वल्मीककूटं क्ली, (वल्मीकस्य वल्मीकपर्व्वतस्य वा कूटम्।) वल्मीकः। इति हेमचन्द्रः॥
वल्गुल } वृक्ष अविशूली। इति अविष्कल्पद्रुमः॥
वल्गुल } (अस्माभुरा पट् मक पेट।) वेङ्कापति चावल्गुलम्। इति दुर्गादासः॥
वल्ल इ संवरणे। इति कविकल्पद्रुमः॥ (भ्वा आत्म० सक सेट।) इ, वल्लते अन काल संवृणोतीत्यर्थः। इति दुर्गादासः॥
वल्लः पुं, (वल्लते अवृणोतीति। वल्ल+अच्।) गुञ्जात्रयपरिमाणम्। यथा,—
"वल्लस्त्रिगुञ्जो यथाश्च तैश्री।"
इति लीलावती॥
त्रिगुञ्जा। इति वैद्यकपरिभाषा। (यथा —
"त्रिवक्तुरघ्नधिपत्यमौलौ क्रमाद्गुणे।
इन्द्रसम्मदितं कार्यं दच्चाद्गुणेवरे।
वह्नी सौवीरचारेण दये च विषया वह॥"
इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे।)
चार्द्धमुद्गा। यथा,—
"रौप्यमहितयोविना तु कथिता मुद्गा तथा
माहषा
वल्लो वल्लयुगेन निष्कसमता मासकाश्चक्र॥"
इत्यादि राजनिर्घण्टः॥
वल्लकी, स्त्री (वल्लते इति। वल्ल+वुन्। गौरादित्वात् ङीष्।) वीणा। इत्यमरः। (यथा कुमारे। १। १११।
"वल्लकी वाद्यमानो हि शकुलस्थलचीवराम्॥")
शल्लकीवृक्ष। इति राजनिर्घण्टः। (अस्याः पर्य्यायो यथा —
"शल्लकी गजभक्ष्या च सुवहा सुरभीरसा।
महेरुणा कुन्दरुकी वल्लकी च बहुस्रवा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)

वल्लभः, पुं (वल्ल संवरणे + "रासिवल्लिभ्यश्च।" उणा ३। १२४। इति अभच्।) ईशः। अध्यक्षः। कुलीनतुरङ्गमः। इति मेदिनी। भे, १९। (यजुर्वेदीयशाखाविशेषप्रवर्त्तकः पुत्रः। स च कृष्णस्य पिता। यथा महाभारते। १३।४।८।
"वल्लभस्तस्य तनयः सावाघ्नौ बालाद्।
कुशिकस्तस्य तनय अष्टावनमगद्गति॥")
वल्लभ, त्रि, (वल्ल + अभच्।) प्रियः। (यथा, कामन्दकीयनीतिसारे। ५। ५८।
"कुलीनश्च कमद्युमीन् वल्लभश्च भूपतेः॥")
अध्यक्षः। इत्यमरः। अश्वपोऽश्च वल्लभः। इति स्वामी॥
वल्लभपालकः, त्रि, (वल्लभानां अश्वाधिकारिणां पालकः।) अश्वरक्षकः। इति भूरिप्रयोगः॥
वल्लभा, स्त्री, प्रिया। यथा —
"प्रेयसी दयिता कान्ता प्राणेशा वल्लभा प्रिया।
हृदयेशा प्राणसमा प्रेष्ठा प्रणयिनी च सा॥"
इति हेमचन्द्रः॥
वल्लरः, क्ली (वल्लते इति। वल्ल+अरच्।) कृष्णागुरुः। इति राजनिर्घण्टः। मञ्जरिः। इति शब्दरत्नावली। अरण्यम्। कुञ्जम्। इति मेदिनी॥
वल्लरि } स्त्री, (वल्ल+इन्। वल्लं संवरणं अश्नुतेति। अ+अच् ट। गौरादित्वात् वा ङीष्।) मञ्जरी। इत्यमरः। लता। (लता। यथा कुमारे। ४। ३१।
वल्लरी }
"मधुनाचिप पदवृते
मन्मथे पतनाय वल्लरी॥")
त्रिपत्रकम्। मेथिका। इति राजनिर्घण्टः॥
(अस्याः पर्य्यायो यथा —
"मेथिका मिश्रिमिर्दीपनी बहुपत्रिका।
बोधिनी बहुबीजा च जातिगन्धफला तथा।
वल्लरी चैव कामला मिश्रपुष्पा च केरवी।
कुञ्चिका बहुपर्णी च पित्तिकाराप्रहिता॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)
वल्लवः, पुं, (वल्ल पीतौ+क्विप्। वल्लं पीतिं वातीति। वा+क।) गोपः। इत्यमरः। (यथा माघे। ११। ५।
"गुणवदरिदया गिरवैदाखण्डेदै
दधति दधति श्रीदामादाम् वारिवैव।
प्रतिदिवसं सुदेवा भाववल्लभैते
मम वायुविद्युम्ने वल्लवा बोधयन्ति॥"),
भीमसेनः। इति मेदिनी। वे, ३३। (विराटनगरे अज्ञातवासे वल्लव इत्याख्ययात्मानं प्रकाशयामास। यथा महाभारते। ४। ७। १।
"पौरोगवो ब्रुवाणोऽहं वल्लवो नाम नामतः।
उपस्थास्यामि राजानं विराटमिति मे मतिः॥")
वल्लवः, त्रि, (वल्लमानमं वातीति। वा+क।) सूपकारः। इत्यमरः॥
वल्लवी, स्त्री (वल्लव+ङीष्।) गोपपत्नी। गोपरमणी। इत्यमरः। आभीरी २ गोपिका ३ गोपी ४ अस्नायुवी ५ आभीरिका ६। इति शब्दरत्नावली॥ (यथा, किराते। ४। १४।

"स मन्मरावलम्बित पीवरस्तनी
परिश्रमक्लान्तविलोचनोत्पला ।
तिरोहितं शोभतराम वल्लरी-
रभिप्रयुक्ता इव धारयोषित ॥")

वल्लि, स्त्री, (वल्लते संवृणोति वृक्षादीनिति । वल्ल+"सर्व्वधातुभ्य इन् ।" उणा ४ । ११७ । इतीन् ।) लता । इत्यमरटीकायां भरतः ॥ (यथा महाभारते । १२ । १८४ । ११ ।
"वल्लिर्वेष्टयते वृक्षं सर्व्वतश्चैव गच्छति ॥")
पृथिवी । इति शब्दमाला ॥

वल्लिकण्टकारिका, स्त्री, (वल्लिरूपा कण्टकारिका ।) अग्निदमनीक्षुप । इति राजनिर्घण्टः ॥

वल्लिदूर्व्वा, स्त्री, (वल्लिरूपा दूर्व्वा ।) माला दूर्व्वा । इति राजनिर्घण्टः ॥

वल्लिप्राकटपोतिका स्त्री (वल्लिप्रधाना प्राकट पोतिका ।) मूलपोती । इति राजनिर्घण्टः ॥

वल्लिसरण पुं (वल्लिप्रधानं सरणं ।) अश्वत्थ पर्णी । इति राजनिर्घण्टः ॥

वल्ली, स्त्री, (वल्लि+ङीष् ।) लता । इत्यमरः ॥ सा च भूमिप्रसारा वपमानस्थायिनी क्षुप्रा कादा । (यथा च ।
"विस्तारिण्यश्चाप्रतानिन्यो गुल्मिन्यश्चेति वल्ल्यो मताः ॥' इति सुश्रुते सूत्रस्थाने ३८ अध्यायः ।
यथा च, रामायणे । २ । ८ । ६ ।
"लताः वल्ल्यश्च गुल्माश्च स्थाणवश्मन एव च ।
लगाश्चे यत्कृते मार्गं छिन्दन्तो विविधान्
द्रुमान् ॥")
अजमोदा । इति मेदिनी । ले १८ । कैवर्त्तिका । चव्यम् । इति राजनिर्घण्टः ॥

वल्लीगङ्ग पुं (वल्लीरूपो गङ्गः ।) मत्स्यविशेषः । भोला इति वालिकड़ा इति च भाषा । अस्य गुणाः । लघुत्वम् । रुच्यत्वम् । अनभिष्यन्दित्वम् । मलष्कारत्वम् । बल्यत्वम् । कफनाशित्वञ्च । इति राजवल्लभः ॥

वल्लीज क्ली (वल्ल्यां लतायां जायते इति । जन+ड ।) मरीचम् । इति राजनिर्घण्टः शब्दचन्द्रिके ॥ (यथा बृहत्संहितायाम् । ८ । १३ ।
'भाद्रपदे वल्लीजं निष्पत्तिं यान्ति पूर्व्वसस्यञ्च ॥")

वल्लीवन्दरी स्त्री (वल्लीरूपा वन्दरी ।) भूवदरी । इति राजनिर्घण्टः ॥

वल्लीशूर पुं (वल्लीषु जातो शूरम ।) मङ्कष्ठः । इति राजनिर्घण्टः ॥

वल्लीतृण, पुं, (वल्लीवत् दीर्घो तृण ।) माधतृण । इति राजनिर्घण्टः ॥

वल्लुर क्ली, (वल्ल्यते आच्छाद्यते लतादिनेति । वल्ल+बाहुलकात् उरच् ।) कुञ्जम् । मञ्जरी । क्षेत्रम् । निर्ज्जलस्थानम् । शाड्वलम् । इति हेम चन्द्रः । शकटम् । इति मेदिनी । रे २१ । विषखरत्नादयोऽपि वल्लूरमिति पाठः ॥

वल्लूर, त्रि (वल्ल्यते संव्रियते इति । वल्ल+"खर्जि पिञ्जादिभ्य ऊरोलचौ ।" उणा ४ । ९० । इति ऊरच् ।) आममांसादिना शुष्कमांसम् । इत्यमरः । २ । ६ । ६३ ॥ (तद्याभक्ष्यत्व यथा, मनुः । ५ । १३ ।
"विमृश्यतश्च मांसादान् सौनं वल्लूरमेव च ॥"
"वल्लूरं शुष्कमांसम् ।" इति तट्टीकायां कुल्लूक भट्टः ॥) शूकरमांसम् । इति मेदिनी । रे २१ ॥ वनक्षेत्रम् । शाड्वलम् । ऊषरभूमि । इति हेमचन्द्रः ॥

वल्ला, स्त्री (वल्ल+भावे घञ् । वल्लाय संवरणाय साधुः । वल्ल+यत् ।) धात्रीवृक्षः । इति हारावली ॥

व(ब)ल्वज पुं (वल्वे पर्व्वते जायते इति । जन +ड ।) उलपः । इति हेमचन्द्रः ॥ बाव इति ख्यातद्रव्यम् । इत्यमरः ॥ वलते सूत्रं वेष्ट्यते निष्पाद्यते वलनेन यस्य पर्व्वत तत्र जाता वल्वजा इत्यन्ये । स्वभावात् बहुत्वे वल्वजाः । एको वल्वज इति भाष्यकारवचनादेकत्वमपि अतएव शुक्लशीरवल्वजादेरिति पाणिक बहुलार्थ कमदीश्वरस्त्रम् । इति तट्टीकायां भरतः ॥ (यथा, मनुः । २ । ४३ ।
"मुञ्जालाभे तु कर्त्तव्या कुशाश्मन्तकवल्वजैः ।
त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा ॥")

व(ब)ल्वजा स्त्री, (वल्वे पर्व्वते जायते इति । जन +ड । टाप् ।) तृणविशेषः । बावै घास इति हिन्दी भाषा । तत्पर्य्यायः । इक्षुपत्री २ वल्लरी ३ तृणवल्लजा ४ मौञ्जीपत्रा ५ इक्षुलता ६ पानीयपत्रा ७ इक्षुसुरा ८ । अस्या गुणाः । मधुरत्वम् । शीतलत्वम् । पित्तदाहव्रणापहत्वम् । वातप्रकोपकत्वम् । रुच्यत्वम् । कण्ठशुद्धिकारित्वञ्च । इति राजनिर्घण्टः ॥

वश, उ लिपि । इति कविकल्पद्रुमः ॥ (चुरा पर अक सेट ।) क वशयति । लिपि दीप्तिः । इति दुर्गादासः ॥

वश क कान्तौ । इति कविकल्पद्रुमः ॥ (अदा पर अक सेट ।) क, वष्टि यशो धीरः स्वान्तिकम् ।

वश लु स्पृहि । इति कविकल्पद्रुमः ॥ (अदा पर अक सेट ।) लु, वष्टि वश लोक । इति दुर्गादासः ॥

वश क्ली (वश+"वशिरण्योरुपसंख्यानम् ।" ३ । ३ । ५८ । इत्यस्य वार्त्तिकोक्त्या अप् ।) इच्छा । प्रभुत्वम् । आयत्तता । इति शब्द रत्नावली । (यथा महाभारते । १२ । ११४ । ७ ।
"वशे बलवतां धर्म्मः सुखं भोगवतामिव ॥")

वशंवद त्रि, (वश तवाहं वश इति वाक्यं वद तीति । वश+वद+"प्रियवशे वदः खच् ।" ३ । २ । ३८ । इति खच् । "अरुर्द्विषदजन्तस्य मुम् ।" ६ । ३ । ६७ । इति मुम् ।) वशं वदति श । आयत्तवाक्यकारकः । इति मुग्धबोध व्याकरणम् । (वशीभूतः । यथा, रामायणे । ४ । ५६ ।
"स अजार सुरासारी भूत्वा सोमपदरः ॥")

वश, त्रि, (वष्टीति । वश+अच् ।) आयत्तः । इति शब्दरत्नावली । (यथा कथासरित्सागरे । ८ । ७ ।
"गुणाढ्योऽपि तन्नाकर्ण्य वशः सेऽभवच्छो
अभवत् ॥")

वश्य पुं (वश+भावे यत् ।) इच्छा । इति सकोधवर्गे अमरः । (उच्यते इच्छते इति । वश+कर्म्मणि यत् ।) वैश्याइकम् । आय त्तता । प्रभुत्वम् । इति त्रिकाण्डशेषः ॥ जन्म । इति हेमचन्द्रः ॥

वशका, स्त्री, (वशेव आयत्ततया कायति शोभते इति । कै+क ।) वशा नारी । इति शब्द रत्नावली ॥

वशक्रिया, स्त्री, (वशस्य क्रिया करणम् ।) वशी करणम् । तत्पर्य्यायः । संवननम् २ । इत्यमरः ॥ मणिमन्त्रौषधैर्वशीकरणं संवननं सर्व्वं इति वशीकरण भावोऽवट । संवननं च इति केचित् । वशीकरणं वशक्रियासाधनं मणि मन्त्रादावपि । अवश्यं वशकः वशिकादिति रघुः । संवनन इति पाठान्तरम् । इति तट्टीकायां भरतः ॥

वशगा स्त्री (वशं गच्छतीति । गम+ड ।) वशीभूता । इति शब्दरत्नावली ॥ (यथा, बृहत्संहितायाम् । ३३ । ३२ ।
"शशाङ्कदिवाकरसुताः
धात्री समुद्ररसना वशगा करोति ॥"
अभिलाषे वाच्यलिङ्गे वशग इति शब्दः । यथा महाभारते । ३ । ६ । १२ ।
"इमानि ते वन वर्षं यमिच्छसि
प्रशाधि मत्वान् वशगोऽस्मि ते तव ॥")

वशा स्त्री, (वष्टि वश+अच् । टाप् । "वशि रण्योरुपसंख्यानम् ।" इति अप वा ।) वन्ध्या । (अस्या धनं राजा रक्षितव्यम्, यथा मनुः । ८ । २८ ।
"वशापुत्रासु चैवं स्याद्रक्षणं निष्कुलासु च ।
पतिव्रतासु च स्त्रीषु विधवास्वातुरासु च ॥")
सुता । योषा । स्त्रीगवी । करिणी । इति मेदिनी । शे ११ । (यथा कथासरित्सागरे । ४ । ११ ।
"अधिपत्य स ताभिश्च वशाभिरिव वारणः ॥")
वन्ध्या गवी । इत्यमरः । (यथा ऋग्वेदे । १ । ८७ ।
"स नो वर्धि भारतार्था वशाभिरपभि ॥"
"वशाभिर्वन्ध्याभिर्गोभिः ।" इति तद्भाष्ये सायणः । वशीभूता । यथा, भारते । १८ अध्याये ।
"अधिमन्नुर्ति कृत्वा वशोऽस्य हृषीकेशवन् ।
क्रोधमपि धामसेव वशाहं वा वशा भवेत् ॥")

वशाटक, पुं, (वशया आटकः । प्रभुत्वेना टनात् तथात्वम् ।) शिशुमारः । इति शब्द रत्नावली ॥

वशानी [न्] पुं, (वशां निवर्त्तयति । वश+ णिनि ।) कुञ्जरः । इति शब्दमाला ॥

वशि स्त्री (वश+भावे इन् ।) वशित्वम् । इति शब्दमाला ॥

वशिक, त्रि, शून्यम् । इत्यमरः । ३ । १ । १६ ॥

वशिका, स्त्री (वशो वशीकरणं साध्यत्वेनास्त्यस्या इति । वश + ठन् ।) अगुरु । इति शब्दचन्द्रिका ॥

वशिता, स्त्री, (वशिनो भावः । वशिन् + तल् ।) वशित्वम् । इति हेमचन्द्रः ॥ (यथा, भागवते । ११ । १५ । १६ ।
"नारायणे तुरीयाख्ये भगवच्छब्दशब्दिते ।
मनो मय्यादधद्योगी मद्धर्मा वशितामियात् ॥")

वशित्वं क्ली, (वशिनो भावः । वशिन् + त्व ।) आयत्तत्वम् । (यथा वक्रे । १ ।
"ज्ञाते सुविदितमपि प्रतिविम्बनीय
मारायितोऽपि नृपतिः परिशङ्कनीयः ।
अङ्के स्थितापि युवतिः परिरक्षणीया
शास्त्रे नृपे च युवतौ च कुतो वशित्वम् ॥")
शिवस्याष्टैश्वर्यान्तर्गतैश्वर्यविशेषः । यथा,—
"अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा ।
ईशित्वञ्च वशित्वञ्च तथा कामावसायिता ॥"
वशित्वं स्वातन्त्र्यं सैव मन्तव्यमिति रघुमरटीकायां भरतः ॥

वशिनी, स्त्री (वशो वशीकरणं साध्यत्वेनास्त्यस्या इति । वश + इनि । ङीप् ।) वन्दा । शमी वृक्षः । इति शब्दरत्नावली ॥

वशिरं, क्ली, (वष्टि कामयते इति । वश + बाहुलकात् किरच् । यद्वा, वशिं वशत्वं राति इति । रा + क ।) सामुद्रलवणम् । इत्यमरः ॥

वशिरः पुं, (वश + किरच् ।) गजपिप्पली । इत्यमरः ॥ (अस्य पर्यायो यथा,—
"करिपिप्पली कपिवल्ली कोलवल्ली श्रेयसी ।
चविका वशिरश्चापि सवाङ्गा गजपिप्पली ॥"
सुविदा इति ख्यातः । अस्य पर्यायो यथा —
"मार्कण्डेयः कपोतो वशिरः कपिचपलो ।
नागमाता वनितोऽस्य पर्यायः कितोऽपरः ॥"
इति वैद्यकरत्नमाला ॥)
चव्यम् । इति राजनिर्घण्टः ॥ अपामार्गः । इति मेदिनी । रे, ८ ॥ वन्दा । इति शब्दचन्द्रिका ॥

वशिष्ठः पुं, (अतिशयेन वशी वेद । वशवत् + इष्ठन् । "विन्मतोर्लुक् ।" ५ । ३ । ६५ । इति लुक् ।) यद्वा, वशिष्ठः । पृषोदरादित्वात् साधु । अस्य निरुक्तिर्यथा, महाभारते । १ । ८१ । ७८ ।
"वशिष्ठोऽथ वरिष्ठोऽथ वसोर्वसुमतामपि ।
वशिष्ठत्वाच्च वासाच्च वशिष्ठ इति विश्रुतम् ॥")
ब्रह्ममानसपुत्त्रविशेषः । तत्पर्यायः । अरुन्धती-जानिः २ । इति हेमचन्द्रः ॥ अरुन्धतीनाथः ३ वासिष्ठः ४ । इति शब्दरत्नावली ॥ अस्य ब्रह्मणः प्राणेभ्यो जन्म । तस्य भार्या अरुन्धती अक्षमाला च । पुत्त्रः शक्तिः । इति हिमालयखण्डम् ॥ अपि च ।
"वशिष्ठस्य प्रजाप्येषा या तु पुण्यवती सदा ।
कन्यात्वे पुण्डरीकान्ता सर्वलोकाभिविश्रुता ।
तस्य भार्या इति पुष्करार्कविषया ।
पुण्यक तुल्य तस्यैव वक्ता पुष्पा प्रतीयते ।

तर्पं तस्य धीमता वर्णं चन्द्रमालिकाम् ।
अदृश्याश्च पञ्चाशत् विरतो मलयं सुताः ।
इति कौर्मे १९ अध्यायः ॥
मित्रावरुणयोः पुत्त्रः । यथा,—
"इति गता नरेन्द्रेण कथितामित्र भूपते ।
वशिष्ठ श्रोतुमासाद्य प्रसन्नास्ते तपोधना ॥
सुविदितं पितरं सोऽपि यथावद्भूतमानयत् ।
योगमास्थाय सुचिरं मैत्रावरुणिरात्मवान् ॥"
अन्यच्च ।
"मित्रावरुणयोरेव कुम्भतो वै परिप्लुता ।
इत्यार्षेयाः प्रवराश्च वशिष्ठा नाम विश्रुताः ॥
एते यथा वशिष्ठानां ख्याता कौलावपेन तु ।
अष्टादशैते समाख्याता ब्रह्मणो माधवान्तराः ॥"
इति वशिष्ठवंशे इतरेषां मुखविधिकाराद्ध्याये ॥

वशीकरणं, क्ली (वश + कृ + भावे ल्युट् । अभूततद्भावे च्वि ।) मणिमन्त्रौषधैरायत्तीकरणम् । इति भरतधराधरौ ॥ अस्य पर्यायः वशक्रिया इत्यमरः ॥ ७ ॥ तत्प्रयोगमन्त्रादि यथा,—
"अक्षमाली यथा कृत्वा पिष्टमङ्गुलामर्दितरम् ।
तेनानामूलमङ्गुले ललाटे सर्वेषु सङ्गमम् ॥"
ओं नारायणाय स्वाहेति ।
"नानेन होमी यस्य च वशो स्यान्न संशयः ।"
ओं हरि हरि स्वाहा । १ ।
"गोरोचनं हरितालञ्च मधुर्तं काकजिह्वया ।
चूर्णं कृत्वा यस्य शिरे दीयते च वशो भवेत् ॥ २ ॥
अमृतेऽस्य भोजनं मधुना सह दैवतम् ।
अनुरक्तं भोजयेत् पुरुषो रामनामिकात् ॥ ३ ॥
अश्वत्थ कुसुमं सैव मौलोत्पलसमन्वितम् ।
पुष्पेन धूपितं तु राजद्वारे प्रियो भवेत् ॥ ४ ॥
श्वेतापराजितामूलं पिष्ट्वा रोचनया युतम् ।
य पश्येत्तत्क्षेनैव वशीकुर्यात् स्वालये ॥ ५ ॥
काकजिह्वा यथा कृत्वा विमर्दं मकुङ्कुमम् ।
आज्ञारक्तं समालेपं वशो भवति मानवः ॥ ६ ॥
ओं नमः सर्वलोकेभ्यो नमः । किञ्चु कुरु कुरु स्वाहा ।
कमभिमन्त्रितं कृत्वा करवीरस्य पुष्पकम् ।
भीतानामपि आयाति यस्यापि वा यथा भवेत् ॥ ७ ॥
कुसुमश्री यथा वर्षं मधुना सह दैवतम् ।
अतःकैरात्र हरिता मार्द्रं मर्दयित्वाप्ति ॥ ८ ॥
गर्भं अतःपरं यत्नेन कस्तूरी करदम् ॥ ९ ॥
कुङ्कुमाक्त चन्दनं विष चूर्णेन संयुतम् ।
अनिलो चान्वितया तु वशीकुर्यात् किल ॥ १० ॥
अपराजितास्त्रिबलीं दत्वातेजाश्रमर्द्दितम् ।
तत्पुनः करराजं वशीकरणमुत्तमम् ॥ ११ ॥
श्वेतवर्णिका श्वेता कामराजो वशीकरः ।
आज्ञापूर्वाद्य कृत्वा कुमारीदेवीश्वरः ॥
१२ ॥
रोचनां मातुलुङ्गेन तिलकं विलेपयेत् ।
कुङ्कुमं चन्दनेनैव तिलकेन वशङ्करी ॥ १३ ॥
कुम्भरिका यथा कृत्वा कुङ्कुमं सुमनादिनी ।
तिलकेनैव सहस्र मैं येनेव वशो भवेत् ॥ १४ ॥

विमर्दाद्रूप यत्र सूर्यदिशा मन क्षिप ।
शुभदा प्राप्य वा च वक्र वशिकारो भविष्यति ॥
१५ ॥
मालिक मनसोमध कृत्वा मधुपादिका ।
सौभाग्यं भगवता आप्य वशिकारो भवेत्स्त्रा ॥
१६ ॥
मय रक्तानि पुष्पाणि पुष्परक्ता समन्वितैः ।
कुङ्कुमेन समायुक्तमामरहणसंयमम् ।
धूपेन तु च शिवा च रोचनायां वशेष्वर ।
स्त्रियो दृष्ट्वा सन्ती वद तिलकोर्द्ध वशीकरः ॥
१७ ॥
अपराजी तु धूपेन यानै पाले वशीकरः ॥ १८ ॥
ओं क्ष क्षद्यनाय स्वाहेति ।
अथ मलयतीर्थो यदविद्यापरायण ।
रसमरहणवश कथा वद्य स्त्रियां सन ।
अपराधे अप वजन्ति द्रवाभ्यामस्त्र्यां प्रिय ।
१९ ॥
तिलमानु कृतानावी सम्यक् वद श्रोभवेत् ।
बहीकरणचान्तु रामा वशाभिविक्षे ॥ २० ॥
ह्रींकारं वशिनैव पाप सर्वजनदुतिम् ।
श्रेष्ठी ललाटे तिलकं वशत्वं भवति ध्रुवम् ॥
२१ ॥
सप्त सुगुमारवुन सुवि प्रवरात्रयं ।
हरिताले नदा तस्य वशमायाति योषितः ॥ २२ ॥
मनःशिला यनकस्य वशीरोचनकुङ्कुमम् ।
एभिः कृते च तिलके नरस्त्री वशमानियात् ॥
२३ ॥
यत्र दैवो भवराजः शिवापराजिता यथा ।
तेनैव तिलकं कृत्वा त्रैलोक्य वशमानियात् ॥ २४ ॥
गोरोचना नीलविलम्बाम्बरास्य समन्वितम् ।
स पुमांस्तिलकं कुर्याद् रामाणं कन्दयदा ।
स करोति वशं सर्वं त्रैलोक्य धाम संशयः ।
२५ ॥
गोरोचना महादेव कुङ्कुमोऽञ्जनमालिनी ।
तेन कृतेन तिलकं स्थाने वेदिनी ।
तत्र वर्षं वद कुर्वाणां कामी विषादकः ॥
२६ ॥
कालीनाथ स्वेदं सह मनस वशीकरः ।
चन्दन नागकेसरा रसनामिवभ्रमा ।
बलौदी वदकर कारयेत इदंवर ॥ २७ ॥
रतिकाले महादेव सर्वभीतिप्रद्रुत ।
विश्वचूर्णं यवीयान् तु सामग्रेण च पुमान् ।
कामिनीवशं सार्थ त्रियेत् न जातु किम
किम ॥ २८ ॥
वेष्टनं महादेव मादनमल वसु ।
दर्शनिकतु प्रिया वै कार्यवशीकरणं भवेत् ॥ २९ ॥
पुष्पाणि पञ्चवर्णानि मूल्यन दापि यदि च ।
सतत्वं त्रियतुल्य वैदेहीवशीकृत ।
सर्वैव त्रियतिलकं कन्यको वशमानयाः ॥"
१ ॥
इति गारुडे १८५ । १८६ । १८७ अध्यायाः ॥
"अथान्यत् संप्रवक्ष्यामि वशीकरणमुत्तमम् ।

येन विद्यागमामेव मन्त्रा सिद्ध्यन्ति तत्पयात्।
प्रतिमां कारयेद्देवि। पर्णेन रजतस्य च।
पलाष्टेन महेशानि! साध्यस्य प्रतिमां प्रिये।
हरितालं पलाष्टञ्च हरिद्रापूर्वकं तथा।
मर्दं कृत्वा सान्द्रहस्तं यत्र नि पिष्य सुन्दरि!।
रक्तासने तत्र दत्त्वा विप्रो तद्गतमानसः।
चतुर्दिक्षु महेशानि! पताका विनिवेशयेत्।
रक्तासने चोपविश्य पूर्व्वास्यो जपमारभेत्।
पूजायां नियमं देवि! जानीहि नगनन्दिनि।
तिलपूर्णघटं तत्र स्थापयेत्तत्र देशिकः।
प्राणप्रतिष्ठामन्त्रेण प्राणान् संस्थापयेद्बुधः।
ध्यानं कृत्वा पूजयित्वा प्रवालमालया जपेत्।
एतद्धावसथापेन प्रयोगार्हो भवेत्ततः।
प्रणवं पूर्व्वमुच्चार्य्य मायाबीजं द्वितीयकम्।
का स्त्रमलाकिनीयुक्तं वामकर्णेन्दुभूषितम्।
ततो रक्तपदं मुख्याख्याद्ये तदनन्तरम्।
साध्यनाम ततो न्यस्य वशमानय तत्परम्।
वह्निजायावधिर्मन्त्रो जपेदयुतसङ्ख्यकम्।
दशांशाग्निप्रमाणेन होमादीश्च समाचरेत्।
प्रातः स्नात्वा हविष्याशी शुचिभूत्वा जिते

न्द्रिय।

प्रातःकालं समारभ्य जपेन्मध्यन्दिनावधि।
जपे समाप्ते देवेशि! कुर्य्याद्दिने दिने शुभे।
जातीपुष्पस्य होमेन वशयेन्नात्र संशयः।
कर्पूरमिश्रितैस्तोयैस्तर्पयेत् परदेवताम्।
पूर्व्वं प्रणवमुद्धृत्य चामुण्डां प्रवदेत्ततः।
तर्पयाम्यभिधायाथ मन्त्रं जानीहि सुन्दरि!।
अनेनैव विधानेन संतर्प्य परदेवताम्।
सिद्धिः प्रयोगाद्देवेशि! जायते नात्र संशयः।
अभिषेकं ततः कुर्य्यात् प्रहरे प्रथमक्षणे।
प्रणवञ्च महेशानि! चामुण्डां तदनन्तरम्।
अभिषिञ्चामि तत्पश्चात् कुम्भेनाभिषिचेत्।
तद्दशांशेन देवेशि! ब्राह्मणान् भोजयेत्ततः।
एवं कृते महेशानि! वशीकरणमुत्तमम्।
जायते नात्र सन्देहः सत्यं सत्यं न संशयः।
कामतुल्यश्च नारीणां रिपूणां यमसन्निभः।
यावज्जीवमसंशयं कुरङ्गाक्ष शर्व्वरि!।
जायते नात्र सन्देहः सत्यं सुरगणार्च्चिते।
श्वेतापराजितामूलं पेषयेद्रोचनायुतम्।
एतेनाभिमतं कृत्वा तिलकं कारयेत्ततः।
वशयेन्नात्र सन्देहः सत्यं सत्यं महेश्वरि!।
अकस्मात् यदि दृष्ट्वा तदा निष्फलतामभवेत्।
तत्पश्चाच्च चामुण्डां तोषयेद्बुधसत्तमः।
सुवर्णं दक्षिणां देया नित्यानुसारतः प्रिये!।
आद्यन्ते सकलां पूजां कुर्य्यात्तस्याः वरानने!।
पञ्चाङ्गप्रयोगेण राजानं वशमानयेत्।
तव स्नेहे महादेवि! कथितं भुवि दुर्लभम्।"

इति हरमौलितन्त्रम्।

वशीभूतः, त्रि, वशतां प्राप्तः। अवशो वशो भूत इत्यर्थे च्विप्रत्ययेन निष्पन्नः।

वशीरः, पुं, (वश्+ईरन्।) समुद्रलवणम्। इति जटाधरः।

वश्य, स्त्री, (वशाय वशीकरणाय साधु। "तत्र साधुः।" ४।४।९८। इति यत्।) लवङ्गम्। इति शब्दचन्द्रिका।

वश्य, त्रि, (वशमधीनत्वं गत इति। वश्+"वशं गतः।" ४।४।८६। इति यत्।) आयत्तो गतः। तत्पर्य्यायः। प्रणेयः २। इत्यमरः। वश्यः ३। इति शब्दरत्नावली। (यथा, मार्कण्डेयपुराणे। ३८।१७।

"मृदुला यमाज्ञायां शिखण्ड्यादद्रक्षुरा।
यथा यान्ति तथा प्राणो वश्यो भवति

योगिनः।"

अग्निध्रस्य पञ्चमः पुत्रः। यथा, मार्कण्डेये। ५३।२४।

"हरिवर्षस्तृतीयस्तु चतुर्थोऽभूदिलावृतः।
वश्यश्च पञ्चमः पुत्रो हिरण्यः षष्ठ उच्यते।")

वश्यका, स्त्री, (वश्या+स्वार्थे कन्।) वश्यगा स्त्री। इति शब्दरत्नावली।

वश्या, स्त्री, (वश्य+टाप्।) वशीभूता नारी। तत्पर्य्यायः। वश्यगा २ वशास्था ३ वश्यका ४। इति शब्दरत्नावली। (यथा, उत्तररामचरिते १ अङ्के। १।

"यं ब्राह्मणमियं देवी वागवश्येवानुवर्त्तते।
उत्तरं रामचरितं तत्प्रणीतं प्रयोक्ष्यते।")

वष वधे। इति कविकल्पद्रुमः। (भ्वा०-पर०-सक०-सेट्।) वषति। इति दुर्गादासः।

वषट्, अ, देवोद्देशकहविस्त्यागमन्त्रः। इत्यमरः। स्वाहा श्रौषट् वौषट् वषट् स्वधा एते पञ्चशब्दा देवहविर्दाने वह्निसम्प्रयुक्ते वर्त्तन्ते। देवाय हविषो दानं देवहविर्दानं तत्र देवा इन्द्रादयः। अथ पितरो देवता इति श्रुतेस्तेऽपि देवाः हविर्दाने इत्यनेन स्वधा मन्त्रा इति सूचितम्। इति भरतः। (यथा, ऋग्वेदे। १।१२०।१८।

"इति सापि हविर्होमं पुरा
उपश्रुताय कण्वोऽवोचत्।
तांश्च पा च यज्ञस्य कारोत्
वषट् वषड्ढिकृतां यो नमत्
नमो नम इन्द्रायो नमश्च।")

वषट्कारः, पुं (वषट् इत्यस्य कारः करणं यत्र।) देवोद्देशकयागः। तत्पर्य्यायः। देवदत्तः २ आहुतिः ३ होमः ४ होमम् ५। इति हेमचन्द्रः। (यथा कात्यायने स्वधाकारवषट्कारैः कारशब्देन वा समासः। यथा वषट्कारः। स्वाहाकारः।)

वषट्कृतं, त्रि (वषडिति मन्त्रेण कृतम्।) हुतम्। इत्यमरः।

"अग्नौ हुतञ्च यद्यत्र तत् स्याद्विद्यु वषट्

कृतम्।"

इति शब्दरत्नावली च।

वष्क ङ गतौ। इति कविकल्पद्रुमः। (भ्वा०-आत्म०-सक०-सेट्।) दिदि सेट्। ङ, वष्कते। इति दुर्गादासः।

वष्कय, पुं, (वष्कते इति। वष्क गतौ+बाहुलकात् अयन।) एकहायनो वत्सः। इत्यमरटीकायां रायमुकुटधृतशाकटायनः।

वष्कयणी } स्त्री, (वष्कय एकहायनो वत्सः।
वष्कयिणी, } तेन नीयते इति। नी+क्विप्।
गौरादित्वात् ङीष्। "पूर्व्वपदात् संज्ञायामगः।" ८।४।३। इति णत्वम्। वष्कयिणीति पाठे। वष्कयोऽस्त्यस्या इति। "अत इनिठनौ।" इति इनिः। अट् कुप्वादिति णत्वम्।) चिरप्रसूता गौः। इत्यमरः। "वष्कते परिक्रामति वष्कयश्चिरकालीनवत्सः वृषभः इति ख्यातः। वष्क ङ गतौ नाम्नीति अय वष्कयस्तरुणहायनो वत्सः इति कोषः तद्योगात् वष्कयिणी नैकारान्तेति हस्। वष्कयणीति पाठे गोष्टमैषादिकामामादित्वात् ङ अन्तादिवारोप। दुग्धसुषती स्तम्बितवष्कयिणीति बहुव्रचनमध्ये मन्दविद्।" इति तट्टीकायां भरतः।

वस, ऐ श्रै निरासे। इति कविकल्पद्रुमः। (भ्वा०-पर०-अक०-अनिट्।) ऐ, वस्तात्। श्रौ अवासीत्। इति दुर्गादासः।

वस श स्नेहच्छेदोपे। इति कविकल्पद्रुमः। (चुरा०-पर०-सक०-अक०-च सेट्।) स्नेह इह प्रीतिः। क, वासयति बन्धुः। चकारात् वधे च। इति दुर्गादासः।

वस, तृ क वासे। इति कविकल्पद्रुमः। (अदन्तचुरा०-पर०-अक०-सेट्।) वसयति। इति दुर्गादासः।

वस, य उ इर् स्तम्भे। इति कविकल्पद्रुमः। (दिवा०-पर०-अक०-सेट्। उदित्वात् क्वावेट्।) य वस्यति। उ, वसित्वा वस्त्वा। इर् अवसत् अवासीत् अवसीत्। अयमात् पुषादिकामिन्न इ, स्तम्भे। स्तम्भ इह वासताराहित्यमात्रः। यो वस्यत्यरिम्यिति हलायुधः। इति दुर्गादासः।

वस व ङ स्तौ। इति कविकल्पद्रुमः। (अदा०-आत्म०-सक०-सेट्।) स्तुतिरिह आच्छादनपूर्व्वकधारणम्। व ङ, वस्ते कोषः वस्त्रम्। इति दुर्गादासः।

वसतिः, स्त्री (वस निवासे+"वहिवस्यर्त्तिभ्यश्चित्।" उणा० ४। ६०। इति अतिः स च कारकार्थे)। वासः। (यथा, अमरुशतके। ११।

"धीरं वारिधरस्य वारि किरतः श्रुत्वा निशीथे ध्वनिं
दीर्घोच्छ्वासमुदश्रुणा विरहिणीं बालां चिरं

ध्यायता।
अध्वन्येन विमुक्तकण्ठमखिलां रात्रिं तथा क्रन्दितं
ग्रामीणैर्व्रजतो जनस्य वसतिर्ग्रामे निषिद्धा

यथा।")

शर्व्वरी। निशीथम्। इति मेदिनी। ते ६१। (यथा, कुमारे। ४।११।

"रक्ताशोकितिमिरायद्ध्वजे
दुःसमीरे वनद्ध्वांक्षिताभा ।
वसन्ते प्रिय! कामिनी प्रिया
सहते प्राणमिनु न द्रुमर ।")

वसन्ती स्त्री (वसन्त+गौरादित्वात् ङीष् ।) यूथी । माधवी । विजयम् । इति मेदिनी । ते, १६ ।

वसन, क्ली (वस्यते आच्छाद्यतेऽनेनेति । वस्+ल्युट् ।) वस्त्रम् । इत्यमरः । (यथा, मेघदूते । १ । १२ ।
"वसधि वसुधि विहरे वसन सलज्जां
वनवनिभीतिमिलितपतुमामम् ।
वैमनवदवधरदप !
अव वसरीद वदे ।")
वसनमिति । वस्+भावे ल्युट् ।) छादनम् । इति मेदिनी । ने,१५१ (वस+आधारे ल्युट् ।) निवासः । (यथा, महाभारते । ५ । ३६ । ६ ।
"मौनात् न मुनिर्भवति नारण्यवसनान्मुनिः ।
स्वलक्षणम् यो वेद स मुनिः श्रेष्ठ उच्यते ।")
स्त्रीकटीभूषणम् । इति शब्दरत्नावली ।

वसना स्त्री (वस+युच् ।) स्त्रीकटीभूषणम् । यथा —
"सारसनं साप्तनं वसना वसना तथा ।
वसन रसनेति स्त्रीकटीभूषणे भवेत् ।"
इति शब्दरत्नावली ।

वसन्त पुं, (वसन्त्यत्र मदनोत्सवा इति । वस + "तॄभूवहिवसिभासिसाधिगडिमण्डिजिनन्दिभ्यश्च ।" उणा ३ । १२८ । इति झच् ।) ऋतुविशेषः । स च चैत्रवैशाखात्मकः । यथा । मधुश्च माधवश्च वासन्तिकावृतू । इति सदमालतज्ञवा श्रुतिः । (फाल्गुनचैत्रात्मक इति केचित् ; वसन्त कुसुमोत्थादिरिति ... ।) तत्पर्यायः । पुष्पसमयः २ सुरभिः ३ । इत्यमरः । मधुः ४ । इति शब्दरत्नावली । माधवः ५ कान्तः ६ । इति जटाधरः । ऋतुराज ७ पुष्पमास ८ पिकानन्द ९ काम १० कामसखः ११ । फलाकोमलवशुषा । वसन्त मधु । मधुरसम् । ऋतुनाथ । इति राज निघण्टः । (यथा ऋतुसंहारे । ६ । २ ।
"द्रुमाः सपुष्पाः सलिलं सपद्मं
स्त्रियः सकामाः पवनः सुगन्धिः ।
सुखाः प्रदोषा दिवसाश्च रम्याः
सर्वं प्रिये ! चारुतरं वसन्ते ।"
तथा च ।
"हैमन्ते शैशिरे चैत्रे वसन्ते च मधुव्रते ।
प्राविष मदन्ते वानि वसन्ते च मनोरमे ।
शरत्काले वसन्ते च नित्य पापदुनो भव ।"
इत्यद्भुतरामायणे त्रितीयोऽध्याये द्वाविंशतिवर्णनम् ।
"मुदितमधुकरकुलविकृतमदं
मदनवचनमुदितकोकिलम् ।
सुदृक्पीनस्तनभूषण ;
न वसन्तवसुन्धरावलम् ।

मकरकेतनवायद्यतसुर्णं
सुरिमलैव समरमिव भवेत् ।
समधरादनवकलसुवासित
वपवदी हि वसन्तमनुभवेत् ।
कवनकामविहारवनाकुल
वसनमाल्यमदमन्दिरवहम् ।
विविध सुगन्धिनद सघन सपत्रक ।
कटुकाराच्छका ईशा यौवन मधवसावे ।
वायामपमर्दयोर्धनत्वो ग्रियामसमायक ।
एवं क्रियावमापरी नरः भोज सखी भवेत् ।"
इति वसन्त,पचारः ।
इति वाग्भटे प्रथमस्थाने चतुर्थेऽध्याये ।०।
"अथविलो हि विदिरे वसन्तोऽनुवासित ।
प्रयापि भुक्ति रोमाननदः सरया भवेत् ।
तोल्लेशेवमलादेसङ्गदेख मास्ते ।
आयामोद्वर्तनाभ्यां क्रिमा द्वियामानुलवम् ।
चागोदुमिन्न कटु रसदवापुष्टकुसुमे ।
पुराणयवगोधूमचौरमांसन्तनाम्युक ।
सहकाररसोऽकिमालामात् प्रियमाविनाम् ।
प्रियास्त्रमलदुरभोग प्रियावेलोलमादृतम् ।
मीनमलयजमो मुद्गान् वसन्ते सदनो दिवेत् ।
विनद्यामवारिद्रबोधुमाद्योचमायकान् ।
मधुवेराम् मारामु गवम् मनरामु चा ।
दक्षिणानिलशीतेषु परितो जलवाहिषु ।
भाद्ररत्रदषु मणिपुष्पमञ्जिषु ।
मधुपदविधुमेषु कामकामालमुक्तषु ।
विविधपुष्परथेषु काननषु सुगन्धिषु ।
गोष्ठीकथाभिश्चित्राभिर्मध्याह्नं गमयेत् सुखी ।
गुरुशीतदिवास्वप्नस्निग्धाम्लमधुरांस्त्यजेत् ।"
इति वाग्भटे सूत्रस्थाने तृतीयेऽध्याये ।
"हेमन्ते निचित श्लेष्मा दिनकृद्भाभिरीरित ।
कायाग्निं बाधते रोगांस्ततः प्रकुरुते बहून् ।
तस्माद्वसन्ते कर्माणि वमनादीनि कारयेत् ।
गुर्वम्लस्निग्धमधुरं दिवास्वप्नं च वर्जयेत् ।
व्यायामोद्वर्तनं धूमं कवलग्रहमञ्जनम् ।
सुखाम्बुना शौचविधिं शीलयेत् कुसुमागमे ।
चन्दनागुरुदिग्धाङ्गो यवगोधूमभोजनः ।
शारभं शाशमैणेयं मांसं लावकपिञ्जलम् ।
भक्षयेन्निर्गदं सीधु पिबेन्माध्वीकमेव वा ।
वसन्तेऽनुभवेत् स्त्रीणां काननानां च यौवनम् ।"
इति चरके सूत्रस्थाने षष्ठेऽध्याये ।
"मधुमाधवौ वसन्त । वातप्रकोपो वसन्त, ता हरीतकी आदर्शकोमान पर्यन्तयोर्वा वसन्ते हैमन्ते सश्लेष्मणि दृष्टा स्निग्धा भवति दुर्बलो अपशुष्कमाध्या सम्बरिसय सन्तापः अनुवासयतस्वरूपमिन्तदायां देवि भागिनेया केसावेशानुमोदेदुग्धवाय वैदन वसन्तानारभ्य च वसन्ते वसन्ते ज्येष्ठ आषाढमास ऐराजम वैशाखो दिवसे वैदवार कालेषु भवति ।" "दुर्मेधे हवमध्य विद्युम् ।"
"रक्षो वसन्ते विमदः मारवैरस्वोभितः ।

किशुकाम्भोजबकुलचन्दनाशोकतिर्युनाम्ने ।
कालिकायदपदमवेदर्पमौता मनोहरा ।
दक्षिणानिलसम्भव ता गुणधर्मा सलक्ष्मणा ।"
इति सुश्रुते सूत्रस्थाने षष्ठेऽध्याये ।०।)
अस्याधिष्ठातृदेवतोत्पत्तिर्यथा,—
मदन उवाच ।
"करिष्येऽहं तव विभो वचनात्सुरमोहनम् ।
किन्तु योषिन्महास्त्रं मे तत् कान्तां भवान्
सृज ।
यथा मयोच्यते शम्भौ यथा तत्सुरमोहनम् ।
कार्ये मनोरमा कान्ता तां विदेहय मोहनम् ।
तामहं नहि पश्यामि यथा तत्सुरमोहनम् ।
कणनमधुना धातश्चेताधर्ये तत्र कुरु ।
मार्कण्डेय उवाच ।
एवमुक्ते तु कन्दर्पे धाता लोकपितामहः ।
यथा मंसोपभोगास्यामिति चिन्ता समाप च ।
चिन्ताविष्टस्य तस्याथ निःश्वासो योऽभि
वन् ।
तस्मात्पन्न वसन्तः पुष्पव्रातविभूषितः ।
भृङ्गाङ्कुरकोकिलालापशब्दी विकसद्वदनः ।
किंशुकाद् यानको रेजे प्रफुल्ल इव पादपः ।
कोकिलाकोलबाहुल्य कुसुमाकारशेखरः ।
अन्वाधिनायकस्त्वप्रतिमास्य सुधाविध ।
सुरवनस्थ्यविचरे ज्ञायमुखिनन्दन ।
मध्याह्नमानिवदग्ध कुलवतुमयसिन ।
प्रभवतारमवविवेकोज्ञवरुणस्य ।
पीवरबाहुसुभुज कठोरकरवृन्ध ।
सुगन्धिरकटीवृत्त ककुद्मोत्तोलनाभक ।
गद्गदवयु पीनस्य ककुभ समीपस्थे ।
ताडाकिय पद्गुप्त वस्त्रं कुसुमाकरे ।
यो वायु वहरमि नारदा अपि पुनिता ।
विवाद वेदु नगर्ने मधुरं मधुरस्वरा ।
मधुकण्ठा चमभव वदनं मञ्जुस्वरा ।"
इति कालिकापुराणे ३ अध्याये ।०।
वसन्तोत्सव च भाष्य कर्तव्यं यथा —
"मधुकः कुरुते कम्, मधुमदन विमोहने ।
पिः प्रथम महामान विभ तच वितर्द पुर ।
चन्दनात् वैदिकानात् नवदान पादन
भवेत् ।
पाचवेरदुःशमाय विद्वदन वैतवान
वसन्त ।
माधवीमनानहवाराय पुरदाचिन्था ।
कर्मकुमुदन तथ क दम विन न वै सर ।
भरोतुन्दुरकदम्ब पोवरच मनरामिवे ।
तुरवि सनवाव वनाय वसन्त मधुरामयम् ।
ततः सर्वा पुलकयो ववरापुरववदा ।
पुष्पाय दक्षिणापेव वैदमिन च मधव ।
तत्र कुसुमारपुष्पांशको दर्शनवते ।
कदुर चन्दनद वानि च सम गुन्दयन ।
तदरा भव वोत्तिव नरयाम हृदोगवे ।
दम्भि च दुरा विदार वासि नरवेदर ।
न तम पुरदकाविर ई वोरच च रवत् ।

भार्गे च कुरुते काम कार्योत्थमपि यत्नतः ।”
इति कालिकापुराणे ७ अध्यायः ॥ १ ॥
वसन्ते वसन्तीपादि यथा,—
“सुरभौ दोला कोकिलमारुतसूर्य्यगतिनव
दलोद्भिदा ।
जातीतरपुष्पचयाम्रमञ्जरीभ्रमरझङ्कारा ॥”
इति कविकल्पलतायां प्रथमस्तबकः ॥ ३ ॥
अनिवारः । इति शब्दरत्नावली ॥ षड्रागान्त-
र्गतद्वितीयरागः । यथा,—
“रागा षडेव तु प्रोक्ता रागिण्यस्त्रिंशदेव तु ।
भैरवोऽथ वसन्तश्च नटनारायणस्तथा ॥”
इत्यादि ॥ तस्य पञ्चरागिण्यो यथा —
“आन्दोलिता च देशाक्षा लोला प्रथममञ्जरी ।
मल्लारी चेति रागिण्यो वसन्तस्य वरानुगाः ॥”
अस्य ध्यानं यथा,—
“शिखण्डिवर्होच्चयबद्धचूड़
पुष्णन् पिकं चूतलताङ्कुरेण ।
भ्रमन् मुदा राममनोज्ञमूर्त्ति
र्मतङ्गमत्तः स वसन्तरागः ॥”
अस्य गानसमयो यथा,—
“श्रीपञ्चम्याः समारभ्य यावत् स्याच्छयनं हरेः ।
तावद्वसन्तरागस्य गानमुक्तं मनीषिभिः ॥”
इति सङ्गीतदामोदरः ॥
कल्लिनाथमते अस्य षड्रागिण्यो यथा ।
आन्धुली १ गमकी २ पटमञ्जरी ३ गौड़करी
४ धामकली ५ देवशाखा ६ ॥ हनुमन्मते
हिन्दोलरागपुत्रनामभागोऽस्यादौ पुत्राः । किन्तु
तेषां मध्ये विभाषस्थाने हिन्दोल इति लिखि
तम् ॥ सोमेश्वरमते तस्य षड्रागिण्यो यथा ।
देशी १ देवगिरी २ वैराटी ३ टोड़िका ४
ललिता ५ हिन्दोली ६ ॥ तन्मते अस्य रागस्य
रागिणीरहितस्य वसन्तगानसमयः । इति
सङ्गीतशास्त्रम् ॥ ७ ॥ तालविशेषः । यथा,—
“अयमुत्तालमर्म्ममकरन्दविमङ्गला ।
इन्द्रताले वसन्तश्च जगणोऽथ मागणः ॥”
इत्यादि ॥
“वसन्ताख्ये कर्त्तव्यो नगणो मगणस्तथा ।
लघुश्चान्ते गुरुश्चैको विरामान्तश्च सद्गमः ॥”
इति सङ्गीतदामोदरः ॥
वसन्तक, पुं, (वसन्त+सञ्ज्ञायां कन् ।) शोणाक
वृक्षः । इति राजनिर्घण्टः ॥ (वसन्तो नर्म्म
सखः पुत्रः । यथा कथासरित्सागरे । ८ । १३ ।
“सुप्रतीकस्य पुत्रश्च वसन्ताभिव्यजायत ।
योऽस्य नर्म्मसुहृत्तस्य पुत्रोऽपि वसन्तकः ॥”)
वसन्तकुसुम, पुं (वसन्ते कुसुमं यस्य ।) वृक्ष
विशेषः । यथा —
“वसन्तकुसुमं चैत्रं ग्रन्थिलो हिमकुञ्चिकः ॥”
इति शब्दमाला ॥
वसन्तकुसुमाकर, पुं औषधविशेषः । यथा,—
“प्रवालरसमौक्तिकाभ्ररसमिदं चतुर्भागिकं
पृथक् पृथगथ द्वयोः रजतहेमतो द्वावपि ।
अयोऽभ्रकतदुद्भवं त्रितयकं विमर्द्याखिलं
सुभावितमिदं विभावयेत् भिषगिदं धिया यत्नतः ।
इक्षुवरिसोत्पलैः कमलमालतीपुष्पजैः
पयः कदलिकन्दजैर्मलयजैश्च भाव्यं त्वदः ।
वसन्तकुसुमाकरो रसपतिर्द्विवल्लोऽशित
समस्तगदहृद्भवेत् किल सितासुपाजैरयम् ॥”
इति रसयोगतरङ्गिणी ॥
(अपाप्यत्र ।
“द्विभागं शाटकं चन्द्र श्रयो वङ्गाहिकान्तकाः ।
चतुर्भागं शुद्धमभ्रं प्रवालं मौक्तिकं तथा ॥
भावयेदाज्यदुग्धेन भावनेक्षुरसेन च ।
वासारम्भाम्बुपुष्पाम्बुमालतीपुष्पकैः ।
शतपत्ररसेनैव मालत्याः कुसुमोदकैः ।
पश्चान्मृगमदेनाथ सुगन्धिरसभावना ॥
कुसुमाकरविख्यातो वसन्तपदपूर्ब्बकः ।
गुञ्जाद्वयेन सेवितः सितामध्वाज्ययुतः ।
मेहघ्नः कान्तिदश्चैव कामदः पुष्टिदस्तथा ।
वलीपलितनाशश्च पुष्टिश्च विनाशयेत् ।
पुष्टिदो बलदश्चायुष्यः पुत्रप्रसवकारकः ।
प्रमेहान् विंशतिश्चैव चाप्येकादशनाशया ।
तथा सोमरोगं हन्ति साध्यासाध्यमथापि
वा ॥”
इति भैषज्यरत्नावल्यां रसायनाधि
कारे ॥)
वसन्तघोषी [न्], पुं, (वसन्ते वसन्तकाले घोषति
शिरौति वसन्तं घोषयति विज्ञापयतीति वा ।
घुष+णिनि ।) कोकिलः । इति केचित् ॥
वसन्तजा, स्त्री, (वसन्ते जायते इति । जन+ड ।)
माधवीलता । इति राजनिर्घण्टः ॥ (वसन्त
कालोद्भवे, त्रि ॥)
वसन्ततिलक, क्ली, (वसन्तस्य तिलकमिव ।)
पुष्पविशेषः । चतुर्दशाक्षरपादच्छन्दोविशेषः ।
यथा,—
“ज्ञेयं वसन्ततिलकं त भ जा ज गौ ग ॥
पुत्र वसन्ततिलकं तिलकं वहाल्या
लोलापरं पिककुलं कलमत्र रौति ।
वात्येष पुष्पसुरभिर्मलयाद्रिवातो
यातो हरिः स मथुरां विधिना हताः स्म ॥”
इति छन्दोमञ्जरी ॥ ● ॥
औषधविशेषः । यथा —
“अक्षारसूतकनकैर्मृतवङ्गमिश्र-
चूर्णं कराम्रमपिष्टं मधुनैव पीतम् ।
वेदं प्रमेहमपि गुल्मसमन्वितेन
क्षयं वसन्ततिलकेऽपि हरत्यवश्यम् ॥”
इति रसरत्नावल्यां गुल्मरोगाधिकारः ॥
(अन्यद्विधमौषधम् । यथा,—
“द्व्यंशो भस्मकमभ्रक द्विगुणितं लौहांशक
मारदं
अस्मारो द्विगुणं वसुकमतेलैभीलितं मर्द्दयेत् ।
मुक्ताविद्रुमको रसेन च सता गोक्षुरसद्भिद्वक
चर्णे वसकरीरसेन सुहृदं द्विषं दरेत् यत्नतः ॥
कर्पूरीरसचारमाद्भरत पश्चात् पुनर्गोलको
भवेत् ।
गाधगायचमितवालकपश्चिमाङ्कुरयारोगान्
हरेत्
मूत्रादिजनग्रीं विनादिदरकी मेहानाथा
विंशतिम् ।
कासोग्गादिशरीं ज्वरादिशमनी श्वासो वलोच्छेदन
यैव पुष्टिकरो वसन्ततिलको भनुष्यैर्नोदितः ॥”
इति भैषज्यरत्नावल्यां रसायनाधिकारे ॥)
वसन्तदूत, पुं, (वसन्तस्य दूत इव ।) आम्रवृक्षः ।
कोकिलः । पञ्चमरागः । इति विश्वमेदिन्यौ ॥
वसन्तदूती, स्त्री, (वसन्तस्य दूतीव ।) पाटली
वृक्षः । माधवीलता । इति मेदिनी । तै, १११ ॥
गणिकारी । पिकी । इति राजनिर्घण्टः ॥
वसन्तद्रु, पुं (वसन्तस्य द्रुमः ।) आम्रवृक्षः ।
इति शब्दमाला ॥
वसन्तपञ्चमी, स्त्री, (वसन्तस्य पञ्चमी ।)
श्रीपञ्चमी । यथा —
“मकरस्थे सहस्रांशौ शुक्लपक्षे यथाविधि ॥”
इत्यारभ्य ।
“पञ्चम्यां च कुहामौ प्रातरेव महोत्सवे ।
आपणिता खलम्योली कुम्भैर्मारकैरपि ।
वसन्तपञ्चमी नाम सर्व्वपापप्रमोचनी ।
वसन्तश्च समभ्यर्च्य कन्दर्पं सरति प्रिये ! ॥
वसन्तरागमश्चरत् प्रियमात्मोत्सवीकिताम् ।
वह्निभोग्य, क्ली, (वह्नेरग्नेर्भोग्यं भोगार्थं द्रव्यं स्यात् ।) घृतम् । इति शब्दचन्द्रिका ॥
वह्निमन्थ, पुं, (वह्नये अग्न्युत्पादनार्थं मथ्यते इति । मन्थ+घञ् ।) गणिकारिकावृक्षः । इति जटाधरः । (अस्य पर्य्यायो यथा,—
"तर्कारी वैजयन्ती च श्रीपर्णी च गणिकारिका ।
वह्निमन्थोऽग्निमन्थश्च जयन्ती गणिकारिका ॥"
इति वैद्यकरत्नमालायाम् ।)
अग्निमन्थ । इति राजनिर्घण्टः ॥
वह्निमारक, क्ली (वह्निं मारयति विनाशयतीति । मृ+णिच्+ण्वुल ।) जलम् । इति शब्दचन्द्रिका ॥
वह्निमित्र, पुं, (वह्निर्मित्रं यस्य ।) वायुः । इति शब्दचन्द्रिका ॥
वह्निरेता [स्] पुं, (वह्नौ रेतो यस्य । अग्निनिक्षिप्तवीर्य्यत्वादेवास्य तथात्वम् ।) शिवः । इति हलायुधः ॥
वह्निलोहक क्ली, (वह्निदेवताकं लोहकम् ।) कांस्यम् । इति राजनिर्घण्टः ॥
वह्निवर्ण, क्ली (वह्नेरिव रक्तो वर्णो यस्य ।) रक्तोत्पलम् । इति शब्दचन्द्रिका ॥
वह्निवल्लभ, पुं, (वह्नेर्वल्लभः प्रियः उद्दीपकत्वात् ।) सर्ज्जरसः । इति त्रिकाण्डशेषः ॥
वह्निशिख, क्ली, (वह्निरिव शिखा यस्य ।) कुङ्कुमम् । इत्यमरः ॥ (अस्य पर्य्यायो यथा,—
"स्यात् कुङ्कुमं वह्निशिखं वाह्लीकमभिधानि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
वह्निशिखर पुं, (वह्निरिव शिखरं यस्य ।) लोहितगाङ्गेयक । इति शब्दरत्नावली ॥
स्त्री (वह्निरिव शिखा यस्याः ।)
। इति जटाधरः । कलिकारी । धातकी ।
राजनिर्घण्टः ॥ (लाङ्गलिकी । लाङ्गलिका
।) तत्पर्य्यायो यथा,—
... वह्निशिखा अग्निशिखा ।
... च या ॥"
... प्रथमे भागे ॥)

वह्निसंज्ञक, पुं, (वह्नेः संज्ञा यस्य । तत् कन् ।) चित्रकः । इत्यमरः ॥

वह्निसख पुं, (वह्नेरग्नेः सखा । टच् समासान्तः ।) जीरकः । इति राजनिर्घण्टः ॥ (वह्नेः सखा ।) वायुः । इति वह्निमित्रशब्ददर्शनात् ॥

वह्य, क्ली, (वहतीति । वह + "अघ्न्यादयश्च ।" उणा० ४ । ११२ । इति यक्-प्रत्ययेन साधु ।) वाहनम् । इति हेमचन्द्रः ॥ (वहत्यनेनेति । वह + "वह्यं करणम् ।" ३ । १ । १०२ । इति यत् ।) शकटम् । इत्युणादिकोषः ॥ (यथा, अथर्ववेदे । ४ । ७ । ३ ।
"या भूमिमा यरोहिथ वह्यं श्रान्ता वधू रिव ॥")

वह्या स्त्री, मुनिपत्नी । इत्युणादिकोषः ॥

वा, ऋ सुखाभिगतिसेवासु । इति कविकल्पद्रुमः ॥ (चुरा० पर० सुखार्थो अक० अन्यत्र सक० सेट् ।) ऋ, वापयति । इति दुर्गादासः ॥

वा, ल गमनहिंसयोः । इति कविकल्पद्रुमः ॥ (अदा० पर० सक० सेट् ।) ओष्ठ्यादिरयम् इति केचित् । गमनमिह वायुकर्त्तृकमेव । ल, वाति वायुः । हिंसनं सूचनमिति चतुर्भुजः । इति दुर्गादासः ॥

वा, व्य, (वा + क्विप् ।) विकल्पः । (यथा, मनुः । २ । ११२ ।
"धर्म्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा ।
तत्र विद्या न वप्तव्या शुभं बीजमिवोषरे ॥")
उपमा । (इवार्थे । यथा, रघुः । १८ । ५१ ।
"सोम पश्चिमकलास्थितेन्दु वा
पङ्कशेषमिव घर्म्मपल्वलम् ॥")
वितर्कः । (यथा, महाभारते । १ । १५४ । २२ ।
"किं ते हिडिम्ब एतैर्वा सुखसुप्तैः प्रबोधितैः ।
मामासादय दुर्ब्बुद्धे तरसा त्वं नराशन ॥")
पादपूरणम् । (यथा, रामायणे । १ । २९ । ३ ।
"देवासुरगणान् वापि समस्तर्षिगणान् ऋषिः ।
वेदमिवात् प्रधानात्मा यथोक्तं जगिष्यति ॥")
समुच्चयः । इति मेदिनी । वे, ७४ ॥ एवार्थे । इति विश्वः ॥ (यथा, किराते । ३ । १२ ।
"शुभा न पूर्वं किमु तस्य राजन्
सुयोधनं वा न गुणैरतीताः ॥")

वांश, त्रि, वंशसम्बन्धी । वंशस्येदमित्यर्थे अण् (ठक्) प्रत्ययेन निष्पन्नः ॥

वांशिक, पुं, (वंशीवादनं शिल्पमस्येति । वंश + ठक् ।) वंशीवादकः । इति जटाधरः ॥ (भार भूतान् वंशान् हरति वहति आवहति वा । "तद्धरति वहत्यावहति भाराद्वंशादिभ्यः ।" ५ । १ । ५० । इति ठन् । भारभूतवंशहारके तद्वाहके च त्रि ।)

वांशी, स्त्री, (वंशे भवा + वंश + अण् । ङीप् ।) वंशरोचना । इति राजनिर्घण्टः ॥ (तत्पर्य्यायो यथा,—
"तुगाक्षीरी शुभा वांशी वैणवा वंशरोचना ।"
इति वैद्यकरत्नमाला ॥
"त्वाक्क्षीरी वंशजा वांशी तुगाक्षीरी शुभा शुभा ।
तुगक्षीरी वंशजा शुभा वंशक्षीरी च वैणवी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वा [र्], स्त्री, (वार्य्यते तृषानेनेति । वृ + णिच् + क्विप् । यद्वा, "वृञ् वरणे । स्वादिकोऽयं छान्दसः । तस्मात् क्विप् । अपि लोपः । हल ङ्यादिलोपः । रेफस्य विसर्ज्जनीयः ।" इति सिद्धान्तकौमुद्यां देवराजयज्वा । १ । १२ । ८ ।) जलम् । इत्यमरः ॥ (यथा भागवते । ३ । १३ । १४ ।
"अजनो मे पितरो भि भ्राम्यमाणा रसा
कृता ॥")

वा:किटि पुं वारो जलस्य किटिः शूकरः । शिशुमारः । इति केचित् ॥

वा:सदन, क्ली, (वारो जलस्य सदनम् ।) जलाधारः । इति त्रिकाण्डशेषः ॥

वाक [च] स्त्री, (उच्यतेऽसौ अनया वेति । वच + "क्विप् वचिप्रच्छीति ।" उणा० २ । ५७ । इति क्विप् दीर्घोऽसम्प्रसारणञ्च ।) वाक्यम् । (यथा, मनुः । २ । १५९ ।
"अहिंसयैव भूतानां कार्य्यं श्रेयोऽनुशासनम् ।
वाक चैव मधुरा श्लक्ष्णा प्रयोज्या धर्म्म
मिच्छता ॥")
सरस्वती । इत्यमरः ॥ (यथा, कथासरित् सागरे । १ । ३ ।
"प्रणम्य वाचं निःशेषपदार्थोद्योतदीपिकाम् ।
बृहत्कथायाः सारस्य सङ्ग्रहं रचयाम्यहम् ॥")

वाक, त्रि, (वकस्येदमिति । वक + "तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) वकसम्बन्धि । वक खेद इत्यर्थे अप्रत्ययेन निष्पन्नम् ॥ (क्ली, वकस्य समूहः । "तस्य समूहः ।" ४ । २ । ३७ । इत्यण् । वकसमूहः ॥ उच्यतेऽसौ अनेनेति वा । वच् + घञ् । वाक्यम् । यथा उत्तररामचरिते । १ । १ ।
"इदं कविभ्यः पूर्व्वेभ्यो नमो वाकं प्रशास्महे ॥"
वेदभागविशेषः । यथा, महाभारते । १२ । ४७ । २५ ।
"यं वाकेष्वनुवाकेषु निषत्सूपनिषत्सु च ।
गृणन्ति सत्यकर्म्माणं सत्यं सत्येषु सामसु ॥"
पुं वकस्यापत्यं विकारो वा । भाक्तिवादण् । ऋषिविशेषः ॥)

वाकुची, स्त्री, (वातीति वा वायुस्तं कुचति वक्रो भवति पूतिगन्धित्वात् । कुच + क । गौरादि त्वात् ङीष् ।) ओषधिविशेषः । वाकुच इति भाषा ॥ तत्पर्य्यायः । सोमराजी १ सोमवल्ली २ सुवल्लिका ३ शिता ४ शितावरी ५ चन्द्रलेखा ६ चन्द्री ७ सुप्रभा ८ कुष्ठघ्नी १० कालमेषी ११ पूतिफला १२ वल्गुजा १३ चन्द्रराजी १४ कालमेषी १५ अवल्गुजा १६ कान्तिदा १७ वाकुचा १८ सोमलता १९ ॥ अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कृमिकुष्ठकफश्लेष्मकण्डूविषादिनाशित्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः ।
"अवल्गुजो वाकुची स्यात् सोमराजी सुपर्णिका ।
शशिलेखा कृष्णफला सोमा पूतिफलीति च ॥
सोमवल्ली कालमेषी कुष्ठघ्नी च प्रकीर्त्तिता ।
वाकुची मधुरा तिक्ता कटुपाका रसायनी ॥
विष्टम्भघ्नी हिमा रुच्या सरा श्लेष्मास्रपित्तनुत् ।
रूक्षा हृद्या श्वासकुष्ठमेहज्वरकृमिप्रणुत् ॥
तत्फलं पित्तलं कुष्ठकफानिलहरं कटु ।
केश्यं त्वच्यं कृमिश्वासकासशोथामपाण्डुनुत् ॥"
इति भावप्रकाशः ॥

वाकुल क्ली, (वकुलस्येदमिति । वकुल + "तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) वकुलफलम् । अस्य गुणाः ।
"वाकुलं मधुरं ग्राहि दन्तस्थैर्य्यकरं परम् ॥"
इति राजवल्लभः ॥

वाकोर पुं (वाचि कौतुकवाक्ये कीरः शुक इव प्रियत्वात् ।) श्यालकः । इति शब्दरत्नावली ॥

वाक्छल क्ली (वाचा छलम् ।) वाक्प्रपञ्चः । यथा । वचनविघातोऽर्थविकल्पोपपत्त्या छलम् । तत्त्रिविधम् । वाक्छलम् । सामान्यच्छलम् । उपचारच्छलञ्च । अविशेषाभिहितेऽर्थे वक्तुरभि प्रायादर्थान्तरकल्पना वाक्छलम् ॥ १ ॥ सम्भवतोऽर्थस्यातिसामान्ययोगात् असद्भूतार्थ कल्पना सामान्यच्छलम् ॥ २ ॥ धर्म्मविकल्प निर्द्देशे अर्थसद्भावप्रतिषेध उपचारच्छलम् ॥ ३ ॥ इति गौतमसूत्रम् ॥ अस्यैवायमभिप्रायः । नानार्थकशब्दस्य प्रयोगे वक्त्रभिप्रेतार्थभिन्नार्थकल्पनया दूषणाभिधानं वाक्छलम् । यथा । नेपालादागतोऽयं नवकम्बलवत्त्वात् । इत्युक्ते कुतोऽस्य नव कम्बला इत्यादि ॥ १ ॥ सामान्य विशिष्टसम्भवाभिप्रायेण उक्तस्य सामान्य योगादसम्भवकल्पनया दूषणाभिधानं सामान्यच्छलम् । यथा । ब्राह्मणोऽयं विद्या चरणसम्पन्न इत्युक्ते ब्राह्मणत्वेन विद्याचरण सम्पद् साध्यते इति कल्पयित्वा परो वदति कुतो ब्राह्मणत्वेन विद्याचरणसम्पत् व्रात्ये व्यभि चारात् ॥ २ ॥ शक्तिलक्षणयोरेकतरवृत्त्या प्र युक्तस्य प्रतिषेध उपचारच्छलम् । यथा । मञ्चाः क्रोशन्ति इत्युक्ते मञ्चस्थाः पुरुषाः क्रोशन्ति न तु मञ्चाः । इदं चार्थ भिन्न इति शब्दाः प्रकृते अन्यथानुपपत्तेः तत्र भिन्न इति प्रतिषेधोऽनुप चारच्छलम् ॥ ३ ॥ इति तट्टीका ॥ अपि च ।
"कर्म्मभयविरोधेषु वाक्छलं नाचरेदिति ।
यद्यस्मिन् व्यवहारे वाक्छलं न चरेत् ॥"
इति व्यवहारतत्त्वम् ॥

वाक्पति, पुं, (वाचां पतिः ।) बृहस्पतिः ॥ इति शब्दरत्नावली ॥ (यथा, हरवंशे विष्णुपर्व्वणि । ७ । १९ ।
"बृहस्पतिरुदारधीर्वाक्पतिरुत्
भानवम् ॥")

वाक्पटु, त्रि, (वाचां पटुरिव पटुत्वम् ।) वक्तृत्वसम्पन्नः । इति राजनिर्घण्टः ॥ वाक्पटो-

ग्मी । पटुवचन । इति भरतः ॥ अनुद्गा वाक्यरचक । इति सारसुन्दरी ॥ पटुवचन । इति मुग्धबोधटीका ॥ वक्तृवाग्मिन् । इति गौड़ः । तत्पर्याय । वागीशः २ । इत्यमरः । अनवद्योऽमवचा ३ । इति जटाधरः ॥ "वाग्मी वाग्मिवावदूको वाचो युक्तिपटुस्तथा । वागीशो वाक्पतिश्चेति वदेत् सद्भाषकं हरिः ॥" इति शब्दरत्नावली ॥ (यथा, हरिवंशे । २१५ । १४ । "समार्थं धर्मशास्त्रस्य विन्धानि स वाक्पतिः ॥")

वाक्पारुष्य क्ली, (वाचा कृतं पारुष्यम् ।) अप्रियवाक्योच्चारणम् । तत्तु अष्टादशव्यवहारान्तर्गतव्यवहारविशेषः । यथा — 'जगत्याच्च स्वयं पार्श्वं वाक्पारुष्यापदूषयी । दण्डपारुष्यमित्येतत्ज्ञेयं अपनयक्रमम् ॥" इति हेमचन्द्रः ॥ ॥ तल्लक्षणं नारदेनोक्तम् । 'देशजातिकुलादीनामाक्रोशन्यङ्गसंयुतम् । यद्वचः प्रतिकूलार्थं वाक्पारुष्यं तदुच्यते ॥' देशादीनां आक्रोशन्यङ्गसंयुतम् । उच्चैर्भाषणं आक्रोशः न्यङ्गमवद्यं तदुभययुक्तं यत्प्रतिकूलार्थं उद्वेजनफलं वाक्यं तद्वाक्पारुष्यं कथ्यते । तस्य च दण्डतारतम्यार्थं निष्ठुरादिभेदेन त्रैविध्यमभिधाय तल्लक्षणं तेनैवोक्तम् ।
"निष्ठुराश्लीलतीव्रत्वात्तदपि त्रिविधं स्मृतम् ।
गौरवानुक्रमात्तस्य दण्डोऽपि स्यात् क्रमाद्गुरुः ॥
साक्षेपं निष्ठुरं ज्ञेयमश्लीलं न्यङ्गसंयुतम् ।
पतनीयैरुपाक्रोशैस्तीव्रमाहुर्मनीषिणः ॥" इति ।
तत्र निष्ठुराक्रोशे अर्थविषये दण्डमाह ।
"सत्यासत्यान्यथास्तोत्रैर्न्यूनाङ्गेन्द्रियरोगिणाम् ।
क्षेपं करोति चेद्दण्ड्यः पणानर्द्धत्रयोदश ॥
काणं वाप्यथवा खञ्जमन्यं वापि तथाविधम् ।
तथ्येनापि ब्रुवन् दाप्यो दण्डं कार्षापणावरम् ॥"
इति मनुवचनं तदनिष्ठुरत्वविषयम् । यत्र पुनः प्रमादतो मात्रादीन् शपन्ति तत्र शत दण्डनीया इति तेनैवोक्तम् ।
"मातरं पितरं जायां भ्रातरं श्वशुरं गुरुम् ।
आक्षारयन् शतं दाप्यः पन्थानञ्चाददद्गुरोः ॥"
इति च ।
एतच्च वाक्पारुष्ये मात्रादिषु गुणवत्सु निरपराधेषु ज्ञातव्यम् । ॥ । अश्लीलाक्षेपे दण्डमाह ।
"अभिगन्तास्मि भगिनीं मातरं वा तवेति च ।
शपन्तं दापयेद्राजा पञ्चविंशतिकं दमम् ॥
दण्डप्रणयनं कार्यं वर्णजात्युत्तराधरैः ।
प्रातिलोम्यापवादेषु द्विगुणत्रिगुणा दमाः ॥
वर्णानामानुलोम्येन तस्मादेवार्द्धहानितः ॥" ॥
मनुः ।
"शतं ब्राह्मणमाक्रुश्य क्षत्रियो दण्डमर्हति ।
वैश्योऽप्यर्द्धशतं द्वे वा शूद्रस्तु वधमर्हति ॥
पञ्चाशद्ब्राह्मणो दण्ड्यः क्षत्रियस्याभिशंसने ।
मैत्रे स्यादर्द्धपञ्चाशच्छूद्रे द्वादशको दमः ॥
बाहुग्रीवानेत्रसक्थिविनाशे वाचिके दमः ।
शत्यस्तदर्द्धिकः पादनासाकर्णकरादिषु ॥
अशक्तस्तु वदन्नेवं दण्डनीयः पणान् दश ।
तथा शक्तः प्रतिभुवं दाप्यः क्षेमाय तस्य तु ॥
पतनीयकृते क्षेपे दण्डो मध्यमसाहसः ।
उपपातकयुक्ते तु दाप्यः प्रथमसाहसम् ॥
त्रैविद्यनृपदेवानां क्षेप उत्तमसाहसः ।
मध्यमो जातिपूगानां प्रथमो ग्रामदेशयोः ॥"
इति मिताक्षरा ॥ ॥

वाक्पारुष्ये अभियोगमनिस्तीर्य प्रत्यभियोगो न प्रतिपन्नो यथा —
"कुर्यात् प्रत्यभियोगञ्च कलहे साहसेषु च ।"
वाक्पारुष्ये प्रत्याभियोगार्थञ्च यथा पूर्व्वं अहमप्यनेनाक्रुष्टः पश्चाच्च हत इत्यपराधाभावाय प्रत्यभियोगं कुर्यात् । इति व्यवहारतत्त्वम् ॥

वाक्य क्ली, (उच्यते इति । वच् + ण्यत् । "चजोः कु घिण्ण्यतोः ।" ७ । ३ । ५२ । इति कुत्वम् । शब्दसंज्ञात्वात् "वचोऽशब्दसंज्ञायाम् ।" ७ । ३ । ६७ । इति निषेधो न ।) पदसमुदाय । इति व्याकरणम् ॥ तिङन्तचय । सुबन्तचयः । कारकान्विता क्रिया । इत्यमरः ॥ इह श्रुतिलोकयोस्त्रिविधं निरुक्तं वाक्यलक्षणम् । तिङ्सुबन्तयोश्च समुदाय कारकान्विता क्रिया च वाक्यम् । तिङन्तेन तिबादीनि श्रूयन्ते प्रत्ययान्तानि वचनानि उच्यन्ते । एवं सुबन्तेन स्वादीन्येकविंशतिरुच्यन्ते इन्द्वात् परं य श्रूयते समतोऽन्तो प्रत्येकं अभिसम्बध्यते इत्यन्त शब्द उभयोरपि सम्बध्यते । अत्र तिङन्तसमूहो यथा । पचति भवति पाको भवति इत्यत्र । एतच्छान्दसमेव । सुबन्तसमूहो यथा । प्रकृतिसिद्धमिदं हि महात्मनाम् । धात्वर्थः क्रिया कारकैः कर्त्रादिभिरन्विता सम्बद्धा कारकान्विता अन्वितत्वञ्च क्रियाकारकाणां आकाङ्क्षायोग्यतासन्निधिवशात् ज्ञेयम् । तिङ्सुबन्तचया ह्यतोऽपि समस्तायता बोध्या असमस्तार्थस्याप्यो मात् अतएव परस्पराभिसम्बन्ध पदसमूहो वाक्यमिति वृद्धाः । कारकान्विता क्रिया यथा । देवदत्तो ग्रामं गच्छति । इति तट्टीकायां भरतः ॥ ॥ वाक्यस्वरूपमाह ।
"वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः ।
वाक्योच्चयो महावाक्यमित्थं वाक्यं द्विधा मतम् ॥"
उक्तञ्च ।
"स्वार्थबोधसमाप्तानामङ्गाङ्गित्वव्यपेक्षया ।
वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते ॥"
इति ।
अत्र वाक्यं यथा । शून्यं वासगृहं विलोक्य । महावाक्यं यथा । रामायणमहाभारतरघुवंशादि । इति साहित्यदर्पणे २ परिच्छेदः ॥ ॥

अप्रियवाक्यभाषणनिषेधो यथा —
"न हिंस्यात् सर्व्वभूतानि नानृतञ्च वदेत् क्वचित् ।
नाहितं नाप्रियं वाक्यं न स्तेनः स्यात् कथञ्चन ॥ ॥"
पाषण्ड्यादिभिर्भाषणनिषेधो यथा,—
"पाषण्डिनो विकर्मस्थान् वामाचारांस्तथैव च ।
पञ्चरात्रान् पाशुपतान् वाङ्मात्रेणापि नार्च्चयेत् ॥"
इति कौर्म्मे उपविभागे १६ अध्यायः ॥ ॥
शुभाशुभवाक्यानि यथा —
"नैव राज्येन महता न वै पापेन रागिभिः ।
प्राप्यते मानवेन परलोकसुखावहम् ।
कामापवर्गसिद्ध्यर्थेभाषितं यत् सुधाभवत् ।
वाक्यं सुविदितं प्राज्ञैस्तदविद्येय सुभाषितम् ॥
रागद्वेषानृतक्रोधकामतृष्णानुसारि यत् ।
वाक्यं निरयहेतुत्वात् तद्भाषितमुच्यते ॥
संस्कृतेनापि किं तेन मृदुना ललितेन वा ।
अविद्या रागवाक्येन दुःखसंक्लेशहेतुना ॥
यत् श्रुत्वा जायते पुण्यं रागादीनाञ्च सङ्क्षयः ।
विरूपमपि तद्वाक्यं विज्ञेयमतिशोभनम् ॥"
इति वह्निपुराणे वैष्णवधर्म्मे शुभाशुभवाक्यनामाध्यायः ॥ (अथ वाक्यदोषो यथा —
'वाक्यदोषो नाम यथा खल्वस्मिन्नर्थे न्यूनमधिकमनर्थकमपार्थकं विरुद्धं चेति । तत्र हेतूदाहरणोपनयनिगमनानामन्यतमेनापि न्यूनं न्यूनं भवति यद्वा बहूपदिष्टहेतुकमेकेन हेतुना तच्च न्यूनं एतानि ह्यनेन प्रकृतोऽर्थः ॥ प्रतिपन्नः ।" इति चरके विमानस्थानेऽष्टमेऽध्याये ।)

वाघ, ढ काङ्क्षे । इति कविकल्पद्रुमः ॥ (भ्वा-पर-अक-सेट ।) ढ, वाङ्घति । गणपाठे नैवेद्यविहो इन्द्रचन्द्रौ वेदपूजायमिन्वाद । इति तट्टीकायां दुर्गादासः ॥

वाग्गर, पुं (वाचा इवणि गच्छतीति । गृ + अच ।) वारक । शाख । निर्भय । वाड्व । दम । सुहृद् । मनिन । मरिमल्लभय । इति हेमचन्द्रः ॥

वागाघ, त्रि, (वाचि आघातकारि आह ककच इव मर्म्मच्छेदकत्वात् ।) आशाभङ्गा । यथा,
"आशां बलवतीं दत्त्वा यो हन्ति पिशुनो नरः ।
स चौरावोऽपि वागाघ इति वाग्वृत्तु दारुणः ॥"
इति शब्दमाला ॥

वागात्मनि, पुं बुध । इति शब्दरत्नावली ॥

वागीश, पुं, (वाचां ईशः ।) बृहस्पतिः । इति शब्दरत्नावली ॥ (यथा, ऋक्संहितायाम् १०।९७ ।
"अयं विप्रोऽभिहितो ब्राह्मणानां कुलश्रेष्ठोऽमितायुषाम् ॥"
ब्रह्मा । यथा, कुमारे । २ । ३ ।
"वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे ॥")

वागीश, त्रि, (वाचामीशः ।) वाग्मी । सद्वक्ता इति यावत् । इत्यमरः । (यथा, महाभारते । १ । ७ । ३१ ।
"(स)नकाद्यपप्रणिदिना वागीशा वीतमत्सरा ॥")

वागीशा, स्त्री, (वाचामीशा ।) सरस्वती । यथा,
"वागीशा यस्य वदने लक्ष्मीर्यस्य च वक्षसि ।
यस्यास्ते हृदये संवित् तं नृसिंहमहं भजे ॥"
इति श्रीमद्भागवतटीकायां श्रीधरस्वामी ।

वागीश्वर, पुं, (वाचामीश्वर इव ।) मञ्जुघोषः । इति त्रिकाण्डशेषः । (जिनविशेषः । इति च त्रिकाण्डशेषः । १ । १ । २९ ॥ दृश्यादि । ब्रह्मा । इति व्युत्पत्तिलभ्योऽर्थः ।) वाचामीश्वरे त्रि । यथा गारुडे १८९ अध्याये ।
"वदामलकचूर्णं वै मधुतैलसमन्वितम् ।
अश्नन् मासं युवा स्याच्च नरो वागीश्वरो भवेत् ॥"

वागीश्वरी, स्त्री (वाचामीश्वरी ।) सरस्वती । इति त्रिकाण्डशेषः ॥ (यथा, तन्त्रसारे । "वागीश्वरीं चतुर्भुजाम् ॥")

वागुजी, स्त्री, सोमराजी । इत्यमरः । २।४।९८ ॥ (यथा, वैद्यकचक्रपाणिसंग्रहे कुष्ठाधिकारे ।
"धर्मसेवी कटुत्रयेण वारिणा वागुजीं पिबेत् ।
क्षीरभोजी त्रिसप्ताहात् कुष्ठरोगाद्विमुच्यते ॥")

वागुण, पुं, कर्मरङ्गः । इति शब्दमाला ॥

वागुरा स्त्री, (वातीति । वा गतिगन्धनयोः + "मद्गुरादयश्च ।" उणा० १।४१ । इति उरच्-प्रत्ययेन गुगागमेन च साधुः ।) मृगबन्धनाय जालविशेषः । इत्यमरः । २।१०।२६ ॥ (यथा, कथासरित्सागरे । २१ । ११ ।
"व्याल व्याधा वने तस्मिंस्तस्य बबंधु वागुराः ॥')

वागुरिक, पुं (वागुरया चरतीति । वागुरा+ "चरति ।" ४ । ४ । ८ । इति ठक् ।) व्याधः । वागुरया मृगादीन् बध्नाति यः । इत्यमरः । २ । १० । ११ ॥ (यथा, रघुः । ९ । ५३ ।
"श्वगणिवागुरिकैः प्रथमास्थितं
व्यपगतानलदस्यु विवेश सः ॥")

वागुद, पुं, (वाचा गोदते क्रीडतीवेति । गुद क्रीडायाम्+क ।) पक्षिविशेषः । इति त्रिकाण्डशेषः ॥ एतद्योनिकारणं यथा,—
"कांस्यं तित्तिरिर्हृत्वा क्षौमं हृत्वा तु दर्दुरः ।
कार्पासतान्तवं क्रौञ्चो गोधा गां वागुदो गुडम् ॥"
इति मानवे १२ अध्याये ॥

वागुलि, पुं, (वाचा गुडति रक्षतीति । गुड+ "इगुपधात् कित् ।" उणा ४ । ११९ । इति इन् । चस्य किः ।) ताम्बूली । राज्ञां ताम्बूलदाता । इति शब्दमाला ॥

वागुलिक पुं (वागुलि+स्वार्थे कन् ।) ताम्बूलदः । इति त्रिकाण्डशेषः ॥

वाग्दरिद्र, त्रि, (वाचि दरिद्र इव ।) मितभाषी । तत्पर्यायः । वाचंयमः २ । इति शब्दमाला ॥

वाग्दलं, क्ली, (वाचां दलमिव ।) ओष्ठाधरौ । इति त्रिकाण्डशेषः ॥

वाग्दुष्ट, पुं, (वाचा वाक्यमात्रेण दुष्टः ।) ब्रात्यः । इति जटाधरः ॥

वाग्दुष्ट, त्रि (वाचा शुद्धेऽपि वस्तुनि अशुद्धरूपव्यदुर्वाक्येन दुष्टः ।) वाचा दोषयुक्तः । यथा —
"वागभावदुष्टाश्च तथा दुष्टैश्चोपहतास्तथा ।
वाससा चावधूतानि वर्ज्यानि श्राद्धकर्मणि ॥"
इति श्राद्धतत्त्वम् ॥ * ॥
तद्भक्षणप्रायश्चित्तम् । तत्र शङ्खः ।
"वाग्दुष्टं भावदुष्टञ्च भाजने भावदूषिते ।
भुक्त्वान्नं ब्राह्मणः पश्चात् त्रिरात्रन्तु व्रती भवेत् ॥"
एतदभ्यासे व्रती पावकेन सह द्वादशपणा देया । इति प्रायश्चित्तविवेकः ॥

वाग्देवता, स्त्री, (वाचां देवता ।) सरस्वती । यथा —
"पञ्चाशल्लिपिभिर्विभक्तमुखदोःपन्मध्यवक्षः-
स्थलां
भास्वन्मौलिनिबद्धचन्द्रशकलामापीनतुङ्ग-
स्तनीम् ।
मुद्रामक्षगुणं सुधाढ्यकलसं विद्याञ्च हस्ता-
म्बुजै-
र्बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवता-
माश्रये ॥"
इति तन्त्रसारः ॥

वाग्देवी, स्त्री, (वाचां देवी ।) सरस्वती । इति त्रिकाण्डशेषः ॥ (यथा, राजतरङ्गिण्याम् । ५ । १६१ ।
"द्विजस्त्रयोनीयकाख्यो गौरीशसुरसद्मनोः ।
चातुर्विद्यं शतस्यैव वाग्देवी कुलमन्दि-
रम् ॥")

वाग्मी [न्] त्रि, (प्रशस्ता वागस्यास्तीति । "वाचो ग्मिनिः ।" ५ । २ । १२४ । इति ग्मिनिः ।) वक्ता । इत्यमरः ॥ (यथा, कामन्दकीयनीतिसारे । ४ । १६ ।
"वाग्मी प्रगल्भः स्मृतिमानुदग्रो बलवान्
वशी ॥")
पटुः । इति मेदिनी । ने १६ ॥

वाग्मी, [न्] पुं (प्रशस्ता वागस्यास्तीति । वाच+ ग्मिनि ।) सुराचार्यः । इति मेदिनी । ने,१६ ॥ (पुरुवंशीयमनस्योः पुत्रविशेषः । यथा महाभारते । १ । ९४ । ७ ।
"प्रवीरः स्वजनो वाग्मी सौवीरीतनयास्त्रयः ।
मनस्योरभवन् पुत्राः शूराः सर्वे महारथाः ॥")

वाग्य, त्रि, (वाचं परिमितवाक्यं याति गच्छतीति । या+क ।) वाग्दरिद्रः । इति शब्दमाला ॥ विनीतः । सत्यः । इत्यजयः ॥

वाग्यत त्रि, (वाचि वाक्ये यतः संयतः ।) वाक्यसंयतः । यथा,—
"ब्रह्मचर्य्यं चरेत् कालमासन्नो भक्षमारभेत् ।
प्रायश्चित्तसमाप्तौ वा वाग्यतः संयतः शुचिः ॥"
इति प्रायश्चित्ततत्त्वधृतदक्षवचनम् ॥

वाग्याम त्रि, अङ्गहीनादिना वाचं यच्छति यः । इति सिद्धान्तकौमुदी ॥

वाङ्, पुं समुद्रः । इति त्रिकाण्डशेषः ॥

वाङ्मती, स्त्री, (स्तुतिरूपा वागस्त्यस्या इति । वाच्+मतुप् । ङीप् ।) नदीविशेषः । यथा —
"हिमाद्रेस्तुङ्गशिखरात् प्रोद्भूता वाङ्मती नगे ।
भागीरथ्याः शतगुणं पवित्रं तज्जलं स्मृतम् ।
तत्र स्नात्वा हरेर्लोकमुपस्पृश्य निषेवते ।
ब्रह्मा दश सदा यान्ति मम लोके न संशयः ॥"
इति वाराहे गोकर्णमाहात्म्ये नन्दीश्वरमाहात्म्यवर्णननामाध्यायः ॥

वाङ्मय त्रि, (वाक्स्वरूपम् । वाच्+मयट् ।) वाक्यात्मकम् । यथा,—
"व्यरचयद्भूरिलोकैरभिद्युमिरक्षरैः ।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ॥'
अपि च ।
"पद्यं गद्यमिति प्राहुर्वाङ्मयं द्विविधं बुधाः ।
प्रागुक्तलक्षणं पद्यं गद्यं सम्प्रति गद्यते ॥"
पद्यं यथा,—
"पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा ।
वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत् ।
सममर्द्धसमं वृत्तं विषमञ्चेति तत्त्रिधा ।
समं समचतुष्पादं भवत्यर्द्धसमं पुनः ।
आदितस्तृतीयवद्यस्य पादस्तुर्य्यो द्वितीयवत् ।
भिन्नचिह्नचतुष्पादं विषमं परिकीर्त्तितम् ॥"
गद्यं यथा ।
"अपादः पदसन्तानो गद्यं तच्च त्रिधा मतम् ।
वृत्तकोत्कलिकाप्रायचूर्णकप्रविभेदतः ।
अकठोराक्षरं स्वल्पसमासं चूर्णकं विदुः ।
तत्तु वैदर्भरीतिस्थं गद्यं हृद्यतरं भवेत् ।
भवेदुत्कलिकाप्रायं समासाढ्यं दृढाक्षरम् ।
वृत्तैकदेशसम्बन्धाद्वृत्तगन्धि पुनः स्मृतम् ॥"
इति छन्दोमञ्जरी ॥ * ॥
वाङ्मयपापानि यथा,—
"पारुष्यमनृतञ्चैव पैशुन्यञ्चापि सर्व्वशः ।
असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् ॥"
तथा परुषवचनमपवादः पैशुन्यमनृतं तथा वाग्यो निष्ठुरवचनं इति वाङ्मयानि षट् । परेषां दैन्याभिक्षणविद्यादिस्वच्छन्दताकार-परिच्छेदशरीरकर्मकोविदां प्रलयपरोपकर्षं वदनम् ।
"यथान्यत् क्रोधवत्कायवाचार्थवक्त्र वचः ।
पठत तत्र विद्विष यथान्यच तथाविधम् ।
अस्तुवानिति गुणान् वाचार्थं ख्यापयेति च ।
धर्मवाक्स्वरूपं देवान् यदकाम विन्दयती ॥"
तेनैव पदवचनानां परोक्षगुणान्तरं अपवादः । गुरुरुपतिरुचुद्धाक्षमिचकादि अयोग्यतार्थं दोषोद्घाटनं पैशुन्यम् । अनृतं द्विविधं वचनमकारणकमिति ।
"देवदादुषद्रव्यं परावपरिदर्शनात् ।
कर्मणाचव्यवृत्य मार्दवं वचमानयत् ।
दुष्टादुष्टमित्यन्त्यं मार्दवं निष्ठुरं विदुः ।
यदन्यत्र यथा नीचकर्मुष्टीभिर्दुर्वाचकम् ।
इत्येते षड्विधास्तु दुष्टवाक्य भवन्ति ।
इह वाङ्मय चतुष्पद प्रतिपद्यते ॥"

प्रबंधयो विरुद्धं प्रयुक्ताभिरुद्धम् । अत्र चतु र्भिप्रवरविषयोरविरोधः । समसत्तावमयाव भेदाभावादेव वाच्यावाचकयोरैक्यात् निरुद्धस्य पवमानभीवाव । अवसमुक्षणानामयेभाव कार्यं पर्याप्तलामापानरम् । इति तिथ्यादि तत्त्वम् ॥

वाग्मयी स्त्री, (वाङ्मय + + ङीप ।) सरस्वती । इति केचित् ॥

वाक्सुखा स्त्री, (वाचां सुखमिव ।) उपन्यासः । इत्यमरः । १ । ६ । ९ ॥

वाचयम पुं (वाचो वाक्यात् यच्छति विर मतीति । यम उपरमे + "वाचि यमो व्रते ।" ३ । २ । ४ । इति खच् । "वाचंयमपुरन्दरौ च ।" ६ । ३ । ६९ । इति अमन्तत्व निपा त्यते ।) मुनिः । इत्यमरः । २ । ७ । ४२ । मौन व्रती । इति केचिदिति भरतः । (यथा, छान्द ग्योपनिषदि । ५ । २ । ८ ।
"वाचंयमोऽप्रत्याह स यदि स्त्रियं पश्येत् समृद्धं कर्म्मेति विद्यात् ।")

वाच पुं, (वाचयति गुणानिति । वच + णिच + अच ।) मत्स्यविशेषः । वाचा इति भाषा । (यथा,—
"ईलिशो मिलपोखो वाचो वाचामगोचरः ।
रोहितो मो हित श्रोक्तो मद्गुरो मद्गुरो प्रियः ।"
इन्दुहट ॥)
अस्य गुणाः । स्वादुत्वम् । गुरुत्वम् । स्निग्धत्वम् । श्लेष्मलत्वम् । वातपित्तनाशित्वञ्च । इति राज वल्लभः ॥

वाचक पुं, (वक्ति अभिधावृत्त्या बोधयत्यर्थान् इति । वच् + ण्वुल ।) शब्दः । यथा । शक्ति शब्दस्तु वाचकः । इत्यमरः । वे वाचके । प्रकृतिप्रत्ययद्वारेणायस्य वाचको गवादिरूप शक्ति आकरपि तत्पणी च शब्द उच्यते । लोके तु वक्तृत्वेषक्तृत्वं शब्द उच्यते । वक्तीति वाचकः शब्दः । इति भरतः ॥ तत्पर्य्यायः । यथा । शब्दाभिधायी अभिधाभिधानः वाचको ध्वनिः । शक्त शुद्धादिश्चेति त्रिकाण्ड शेषः ॥ (७ ॥ (तत्तपश्च यदुक्त सुग्धबोधटीकायां दुर्गादासः ।
"वाचाद् सद्ग्रीति योऽयमभिधत्त च
वाचकः ॥"
वाचयतीति । वच् + णिच + ण्वुल ।) वाचकः । पुराणादिपाठकः । यथा,—
"मात्मन वाचक द्विजाग्न्यश्च जनादराग् ।
सुवाच्यरुप नारायणम् वाचकाग्रक भजेत् ॥"
तथा ।
"देवालमयत्र कृत्वा वाचकानां विधिवतः ।
नक्षित्र स्थितिर्व क्रियादायन श्रवणच्छन्न ॥
पुनर्भूमीन तत्र सर्व न शुद्ध । धारयत् कांचन ।
हिरण्य स्वर्ण गाव तथा वाक्योपरोदना ।
दत्ता तु वाचकायैव पुस्तकस्यापि तद्यथा ॥"
वाक्षोपरोदना वाक्शोटा ।

"वाचकः पूजितो येन प्रसन्नास्तस्य देवता ।"
तथा ।
"श्राद्धा सर्व्वसमाविष्य पूजयेद्वाचकं बुधः ।
व्यासासनमपि निक्षीय च दद्यात् सकलं क्रतुम् ॥"
तथा ।
"विधवमङ्गल श्राद्ध वाचकायैव तथा ।
कलशरसमायुक्तं रथभाग्यसमन्वितम् ॥
बुधश्चेन सदाक्षरं यन्थार्थं प्रवक्ताय शुभ ।
श्राद्धादिषु सर्व्वेषु यन्थार्थं चार्पयेन्नृप ॥
य एवं वाचयेद्भक्त्या स विप्रो व्यास उच्यते ॥"
तथा ।
"सप्तमरसमायुक्त काले काले विधानवित् ।
ग्रन्थयेत् रसान् सर्व्वान् वाचयेद्वाचको नृप ॥"
इति तिथ्यादितत्त्वम् ॥

वाचन, क्ली, (वच + णिच + ल्युट ।) पठनम् । यथा —
"शुद्धेनानन्यचित्तेन पठितव्यं प्रयत्नतः ।
न कार्य्यमन्तरा कार्य्यं स्तोमस्य वाचनम् ॥"
इति वाराहीतन्त्रम् ॥
तथा ।
"दानवाचनान्वारम्भवरणव्रतसमाधिषु वचनाच प्रतीयात् ॥" इति कात्यायनसूत्रम् ॥ (प्रति पादनम् । यथा साहित्यदर्पणे १० परिच्छेदे ।
"शब्दैः स्वभावादेकार्थैः श्लेषोऽनेकार्थवाच नम् ॥")

वाचनक, स्त्री (वाचनेन कायतीति । कै + क ।) प्रहेलिका । इति हारावली ॥ १ ५९ ॥

वाचस्पति पुं (वाचसां सर्व्वविद्यात्मकवाक्यानां पतिः । अभिधानात् षष्ठ्या अलुक ।) वृह स्पतिः । इति शब्दरत्नावली ॥

वाचस्पति पुं (वाचः पतिः । "षष्ठ्याः पति पुत्रेति ।" ८।३।५३ । इति षष्ठीविसर्गस्य सः ।) बृहस्पतिः । इत्यमरः । १ । १ । २४ । (यथा कुमारे । २ । ३ ।
"वाचस्पतिरुवाचेदं प्राञ्जलिर्जलजासनम् ॥"
शब्दप्रतिपालके त्रि । यथा, ऋग्वेदे । १ । १६१ । ९ ।
"वाचस्पते निषेधेमान्यथा मन्धर यन्नाम् ।"
"ये वाचस्पते वाच शब्दस्य पालयितः ।"
इति तद्भाष्ये सायणः ।)

वाचा स्त्री, (वाच + भागुरिमते टाप ।) वाक । इति त्रिकाण्डशेषः । (यथा, कातन्त्रे ।
"वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।
टापञ्चापि हलन्तानां यथा वाचा निशा दिशा ॥"
यथा च, पञ्चतन्त्रे । ४ । ४० । "तत् कृत्वा मारकेन शुचीभूय तिष्ठन्तीभामि अत्रो वितार्क इत्ते ॥")

वाचाट , त्रि, (कुत्सितं बहु भाषते इति । वाच् + "आलजाटचौ बहुभाषिणि ।"५ । २ । १२५ । इति आटच् ।) वाचालः । इत्यमरः ।३।१।३५। (यथा, मनुः । ३ । ८ ।

"नोद्वहेत् कपिलां कन्यां नाधिकाङ्गीं न रोगि णीम् ।
नालोमिकां नातिलोमां न वाचाटां न पिङ्ग लाम् ॥")

वाचाल , त्रि, (बहु कुत्सितं भाषते इति । वाच + "आलजाटचौ बहुभाषिणि ।" ५।२।१२५ । इति आलच् ।) बहुकुत्सितभाषी । तत्पर्य्यायः । जल्पाकः २ वाचाटः ३ । इत्यमरः ॥ बहु भाषित्वेऽपि जल्पाकादयस्त्रयो वर्त्तन्ते वाचाटो वाचालो जल्पाकः कुत्सितभाषी वाग्मीति श्लोकार्द्धपर्य्याये बोपालितः । त्रिकाण्डशेषस्य वाचालान्मुपरिष्टे वक्ष्यतीम् । इति सरादि रिति तट्टीकायां भरतः । (यथा, कथा सरित्सागरे । ४ । १४ ।
"वाचाले सकल कौवैशपावशाद्युपाति नाम् ।")

वाचिक, त्रि, (वाच + ठक ।) वाचा कृतम् । यथा,—
"शरीरजैः कर्म्मदोषैर्याति स्थावरतां नरः ।
वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम् ॥"
इति प्रायश्चित्ततत्त्वम् ॥
अपि च ।
"कायिकं वाचिकञ्चैव मानसं यच्च दुष्कृतम् ।
दर्शनादेव तत् सर्व्वं प्रणश्यति समाधवः ।"
इति वामनपुराणे कूर्म्मोत्तरम् ॥
अन्यच्च । कायिकं मानसञ्च नमस्कारं विना आचार्य्यैश्च कथं वाचिको नमस्कारः कृतः । इति मुग्धबोधटीकायां दुर्गादासः ॥ (शारीरं । वाक + "वाचो व्याहृतार्थायाम् ।" ५ । ४ । ३५ । इति ठक । सन्देशोक्ती, स्त्री । इति हारावली । १६६ । यथा, राजतरङ्गिण्याम् । ६ । ११ ।
"प्रजामेक वणिजदेव प्राहिणोद्वाचिकम् ।")

वाचिक , पुं, (वाचा निर्वृत्तः । वाच् + ठक ।) वाक्यारम्भः । यथा,—
"आलापश्च विलापश्च संलापश्च प्रलापक ।
अनुलापोऽपलापश्च सन्देशश्चातिदेशकः ।
अपदेशोपदेशौ च निर्देशो व्यपदेशक ।
कीर्त्तिता वचनारम्भा द्वादशामी मनी षिभिः ॥"
इत्युज्ज्वलनीलमणिः ॥

वाचिकपत्र, क्ली (वाचिकस्य सन्देशस्य पत्रम् ।) लिपिः । पत्रादयवम् । इति केचित् ॥

वाचिकहारक , पुं (वाचिकस्य सन्देशस्य हारकः ।) लेखनम् । इति त्रिकाण्डशेषः । (दूतः । इति-शुत्पत्तिलब्धोऽर्थः ॥)

वाचोयुक्ति त्रि, (वाचि वाक्ये युक्तिर्यस्य ।) वाग्मी । इत्यमरटीकायां रामाश्रमः ॥ (स्त्री वाचो वचसो युक्तिः । "वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु ।" ६ । ३ । २१ । इत्यस्य वार्त्तिकोक्त्या षष्ठ्या अलुक । वाग्दण्डिनत्वाच ।)

वाचोयुक्तिपटु त्रि, (वाचोयुक्तौ वाक्यविन्यासे पटुः ।) वाग्मी । इत्यमरः । ३ । १ । ३४ ।

वाच्य, त्रि (उच्यते इति । वच + ण्यत् । "वचो ऽशब्दसंज्ञायाम् ।" इति न कुत्वम् ।) कुत्सितम् । हीनम् । वचनार्हम् । इति मेदिनी । ये, ९५ । (वक्तव्यम् ।
"मुखोऽपि गुणा वाच्या दोषा वाच्या गुरो रपि ।")
प्रकृतम् । यथा,—
"न वाच्यलक्षणाभ्यां प्रयोगाणां विभिद्यते ।
वाच्यवाचकभावोऽयमथपादादिशब्दवत् ।
विभीतकेऽप्ययमशब्दो यद्यप्यर्थे प्रयुज्यते ।
तथापि वाचकत्वस्य ज्ञायते प्रकटाश्रयः ।"
इति मलमासतत्त्वधृतभट्टवार्त्तिकवचनम् ।
अपि च ।
"अर्थो वाच्यश्च लक्ष्यश्च व्यङ्ग्यश्चेति त्रिधा मतः ।"
तत्र वाच्यलक्षणमाह ।
"वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः ।
व्यङ्ग्यो व्यञ्जनया ता स्युस्तिस्रः शब्दस्य शक्तयः ।"
इति साहित्यदर्पणे २ परिच्छेदः ।
वाच्यं, क्ली (वच + ण्यत् ।) प्रतिपादनम् । दूषणम् । इति धरणिः । (यथा,—
"परवाच्येषु निपुणः सर्व्वो भवति सर्व्वदा ।")
वाछ इ कांक्षे । इति कविकल्पद्रुमः । (भ्वा० पर० सक० सेट् ।) इ, वाञ्छति । इति दुर्गादासः ।
वाज क्ली, घृतम् । (यथा, वाजसनेयसंहितायाम् । ९ । १ ।
"वाचस्पतिर्वाजं नः स्वदतु ।")
यज्ञः । अन्नम् । (यथा, ऋग्वेदे । ४ । २५ । ३ ।
"यो देवो देवतमो जायमानो
महो वाजेभिर्महद्भिश्च शुष्मैः ।"
"वाजेभिरन्नैः ।" इति तद्भाष्ये सायणः ।)
वारि । इति मेदिनी । जे १३ । (संग्रामः । यथा ऋग्वेदे । ५ । ३५ । १ ।
"अस्माभ्यं चर्षणीसहं सस्निं वाजेषु दुष्टरम् ।")
बलम् । यथा तत्रैव । ५ । ७५ । २ ।
"अनेहः शतारिर्न तताव वाजमर्व्वपुष यथ उक्षियाः ।")
वाजः पुं, शरपक्षः । इत्यमरः । २ । ८ । ८७ ।
(यथा, भागवते । १ । १५ । १६ ।
"विविधवाजैर्निहते निर्व्वीतरे ।")
निस्वनः । पक्षः । वेगः । इति मेदिनी । जे, १६ ।
मुनिः । इति विश्वः ।
वाजपेयं, क्ली पुं (वाजमन्नं घृतं वा पेयमत्र ।) यागविशेषः । इत्यमरभरतौ । स तु श्रौतयज्ञसंस्थान्तर्गतपञ्चमयागः । यथा । अग्निष्टोमो ऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयकः । इत्यादि ... सप्तसंस्था ।
वाजभोजी [न्] पुं (वाजं घृतं भुङ्क्ते इति । भुज + णिनि ।) वाजपेययागः । इति शब्दरत्नावली ।
वाजसनेयः, पुं, यजुर्व्वेदवक्तृवेदार्थमन्त्रः । स तु वैशम्पायनप्रसादादुत्पन्नः । इति मत्स्यपुराणम् । (वाजसनेः सूर्य्यस्य छात्रः । वाजसनि + ढक् । याज्ञवल्क्यः । यथा, बृहदारण्यके । "आदित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते ।")
वाजसनेयी, [न्] पुं, (वाजसनेयेन प्रोक्तं वेदमस्त्यस्येति । इनि ।) यजुर्व्वेदी । यथा —
"आवश्यमेव सर्व्वत्र शूद्रा वाजसनेयिनः ।"
इति महाजनपरिगृहीतवचनात् यजुर्व्वेदविधिनैव कर्म्म कुर्य्युः । इति मलमासतत्त्वम् । (यथा हरिवंशे । १४ । २ ।
"ब्राह्मणो याज्ञवल्क्यस्य शिष्यो धर्म्मगुणान्वितः ।
अश्मदत्तेति विख्यातो विप्रो वाजसनेयिनाम् ।")
वाजिगन्धा, स्त्री (वाजिनो घोटकस्य गन्धोऽस्यस्यामिति । अच् । टाप् ।) अश्वगन्धा । इति रत्नमाला । (यथा, सुश्रुते चिकित्सितस्थाने १७ अध्याये ।
"सरला गुडविल्वाश्च वाजिगन्धापि हंसिभिः ।")
वाजिदन्तः, पुं (वाजिनो दन्त इव पुष्पं यस्य ।) वासकः । इति रत्नमाला ।
वाजिदन्तकः, पुं (वाजिदन्त इव । स्वार्थे कन् ।) वासकः । इत्यमरः । २ । ४ । १ १ ।
वाजिन, क्ली, आमिक्षामस्तु । इति हेमचन्द्रः त्रिकाण्डशेषौ । छानार जल इति भाषा । (यथा वाजसनेयसंहितायाम् । १९ । २१ ।
"सोमस्य रूपं हविष आमिक्षा वाजिनं मधु ।"
अस्य गुणा प्रसृतिविधयश्च यथा,—
"दधि सक्षिप्त वा नष्ट दुग्ध बद्धं सुवाससा ।
तद्दुग्धभवनीरं मोरटं स्यात्तोऽभवेत् ।
सुखमोचकदाहघ्नरक्तपित्तज्वरप्रणुत् ।
अत्युर्व्वलकरी वर्ष्यो मोरटं स्यात् सितायुतः ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
हविः । यथा, वाजसनेयसंहितायाम् । ९ । ९ ।
"वाजी वहन् वाजिनम् ।"
"वाजिनं हविः ।" इति तद्भाष्ये महीधरः ।)
पुं, अश्वः । यथा, ऋग्वेदे । १ । ७१ । ५ ।
"नैनं हिन्वन्त्यपि वाजिनेषु ।"
"वाइ इमा ईश्वरा येषाम् ।" इति सायणः ।)
वाजिनी स्त्री अश्वगन्धा । घोटकी । द्विपत्रपर्य्यायः । वहुधा २ सामो १ प्रयता ३ आर्त्तवी १ । अस्या गुणाः ।
"अश्वगन्धोऽन्ना कषाय कटुक तीक्ष्ण च तु ।
दीपनमेकर वय भोरवं वातिलं परम् ।"
तद्विधिगुणाः ।
"अम्ल दधि ग्राम्यकृत कषायं
कफानिलघ्नं मिषदाहि रूक्षम् ।
वाताभ्र तीक्ष्णवाहि मैव
रोचनद्ध तत्रु कफेर्ग हरितम् ।"
तज्जवीतगुणा ।
"आयम ननीरं स्यात् कषाय कफवातजित् ।
पथ्यं कटुकषायोष्णमीषद्वातापहारकम् ।"
तद्दृग्धगुणाः ।
"अश्वगन्धादिषु कटुकं मधुरञ्च कषायकम् ।
ईषद्दीपनद मर्द्दाशादि वाताश्लदं गुरु ।"
इति राजनिर्घण्टः । ० ।
अपि च ।
"अश्वीक्षीरं बृहणीयं बल्यं वाताविकारापहम् ।
अम्लं कटु लघु स्वादु शर्म्मैकशफजं तथा ।"
इति भावप्रकाशः ।
वाजिपृष्ठ, पुं (वाजिनः पृष्ठमिव आकृतिरस्येति ।) अम्लानवृक्षः । इति शब्दचन्द्रिका ।
वाजिभक्ष, पुं (वाजिभिर्भक्ष्यते इति । भक्ष + कर्म्मणि घञ् ।) चणकः । इति राजनिर्घण्टः । (विवरणमस्य चणकशब्दे ज्ञातव्यम् ।)
वाजिभोजनः, पुं, (वाजिभिर्भुज्यते इति । भुज + कर्म्मणि ल्युट् ।) मुद्गः । इति राजनिर्घण्टः ।
वाजिमाष [ष] पुं पटोलः । इति रत्नमाला ।
वाजिशाला स्त्री (वाजिनां शाला गृहम् ।) घोटकगृहम् । आस्ताबल इति पारसी भाषा । तत्पर्य्यायः । मन्दुरा २ । इत्यमरः । (यथा, राजतरङ्गिण्याम् । ३ । १६६ ।
"कामोचानां वाजिशाला आयत्ते च कपोलभित्ता ।")
वाजी [न्] पुं, (वाजो वेगोऽस्त्यस्येति । वाज + इनि ।) घोटकः । (यथा, रघुः । १ । ४१ ।
"स्निग्धगम्भीरनिर्घोषमेकं स्यन्दनमास्थितौ ।
... हरिभिश्च वाजिभिः ।"
वाजः पक्षोऽस्त्यस्येति ।) वाणः । पक्षी । इत्यमरः । वासकः । इति शब्दरत्नावली । (वजति गच्छतीति । वज + णिनि । सि चङ्क्रमणात् यथा, वाजसनेयसंहितायाम् । ९ । १ ।
"वाजो वहन्वाजिनं जातवेदो देवानां वक्षि प्रियमासधस्थम् ।"
"वजति वाजी । वजनवान् वजनवान् ।" इति तद्भाष्ये महीधरः । ० । वाजमन्नमस्त्यस्येति अन्नवान् । यथा, ऋग्वेदे । १ । २ । १३ ।
"तमीमहे समना वाजिनं इन्द्रम् ।"
"वाजिनं अन्नवन्तम् ।" इति तद्भाष्ये सायणः ।
वाजः पक्षोऽस्त्यस्येति । पक्षविशिष्टः । यथा, भागवते । ३ । ७ । १६ ।
"तज्जलेन उपागताश्चैव कोऽत्र वाजिना ।")
वाजीकरण, क्ली, (अवाजी वाजीव क्रियतेऽनेनेति । कृ + ल्युट् । अभूततद्भावे च्विः ।) शुक्रवर्द्धकम् । इति राजनिर्घण्टः । वाजीकरणस्य लक्षणमाह ।
"यद्द्रव्यं पुरुषं कुर्य्याद् वाजिवत् सुरतक्षमम् ।
तद्वाजीकरणमाख्यातं मुनिभिर्भिषजां वरैः ।"
अथ प्रसङ्गात् शुक्रस्य अपत्यं शुक्रस्य विवरणमाह ।
"क्षीरं सर्पिर्भक्षणात् कामदाः शुक्रवृद्धये ।
तथ चर्व्वणं क्षीरं दिनार्द्धं तथ ..."

शब्दं यया निष्पन्नं शब्दार्थनिष्पन्नम्। अत्र वस्तु निश्चयविषयोरविरोधः। समस्तावयवत्व भेदाभावादेव प्रत्यक्षप्रमाणयोरैक्यात् विरुद्धत्व प्रसङ्गासम्भवाच्च। अथवा शब्दप्रमाणप्रभाव जयोः पर्यायत्वमप्रमाणान्तरम्। इति तिथ्यादि तत्त्वम्॥

वाङ्मयी स्त्री, (वाङ्मय + ङीप्।) सरस्वती। इति केचित्॥

वाचःस्रुक् स्त्री (वाचां स्रुगिव।) उपन्यास। इत्यमर। १। ६। ८॥

वाचंयम पुं (वाचं वाक्यं यच्छति नियमयतीति। यम उपरमे + "वाचि यमो व्रते।" ३। २। ४०। इति खच्। "वाचंयमपुरन्दरौ च।" ६। ३। ६९। इति अमन्तत्वं निपात्यते।) मुनिः। इत्यमरः। २। ७। ४२॥ मौनव्रती। इति केचिदिति भरतः। (यथा, छान्दोग्योपनिषदि। ४। १६। २।
"वाचंयमोऽप्रवादे स यदि क्रियमाणेऽत् यज्ञ कर्मेति विद्यात्।")

वाच, पुं, (वाचयति शुभानिति। वच + णिच् + अच्।) मत्स्यविशेषः। वाचा इति भाषा। (यथा,—
"इलिशो नितपीयूषो वाचो वाचामगोचरः।
रोहितो मोचितः शोको मद्गुरो मद्गुरो प्रियः॥"
इत्युद्भटः।)
अस्य गुणाः। स्वादुत्वम्। गुरुत्वम्। स्निग्धत्वम्। श्लेष्मलत्वम्। वातपित्तनाशित्वञ्च। इति राजवल्लभः॥

वाचक पुं, (वक्ति अभिधावृत्त्या बोधयत्यर्थान् इति। वच् + ण्वुल्।) शब्दः। यथा। शास्त्रे शब्दस्तु वाचकः। इत्यमरः। ३। ३। वाचके। प्रकृतिप्रत्ययादिरूपस्य वाचको यथाविवक्ष शास्त्रे व्याकरणे तदर्थे च शब्द उच्यते। लोके तु सकृतोऽर्थकृत शब्द उच्यते। वक्तीति वाचकं वाक्। इति भरतः॥ तत्पर्यायः। यथा। शब्दाभिधायी अभिधाभिधानं वाचको ध्वनिः। वाच कृत्कृतेति त्रिकाण्ड शेषः। ४। (तद्यथा मदुक्त मुग्धबोधटीकायां दुर्गादासः।
"वाचात् वर्ण्णितं योऽपरमिध स वाचक॥"

वाचयतीति। वच + णिच् + ण्वुल्।) कथकः। पुराणादिपाठकः। यथा,—
"ब्राह्मण वाचक विद्वान् सर्वांलमारयात्।
शुद्धान्वयकमाराधन् वाचकाधम भवेत्॥"
तथा।
"देवाश्रमगता कथा वाचकानां विशेषतः।
भक्तिश्च श्रियत्व कुम्भोदायच कुबलक्रयः।
पुनर्भवोन तन वस्त्र नराः धारयेत् यान्नम्।
हिरण्य रजतं गाव यथा कांस्योपदोहनाः।
दत्वा तु वाचकायैव मुक्तप्राप्नोति तत्फलम्॥"
कांस्योपदोहना कांस्यदोहा।
"वाचकः पूजितो येन प्रसन्नास्तस्य देवताः॥"
तथा।
"शास्त्रं सर्वस्वमाश्रित्य पूजयेद्वाचकं बुधः।
आत्मानमपि विक्रीय य इच्छेत् सफलं क्रतुम्॥"
तथा।
"विशदक्षरत प्राज्ञ स्पष्टाक्षरपद तथा।
कलस्वरसमायुक्तं रसभावसमन्वितम्॥
बुध्यमानः सदार्थं यत्नार्थं शान्तधीर्नृप।
ब्राह्मणादिषु सर्वेषु यत्नार्थं वाचयेन्नृप॥
य एवं वाचयेद्ब्रह्मन् स विप्रो व्यास उच्यते॥"
तथा।
"सप्तस्वरसमायुक्तं काले काले विशाम्पते।
प्रदर्शयन् रसान् सर्वान् वाचयेद्वाचको नृप॥"
इति तिथ्यादितत्त्वम्॥

वाचन, क्ली, (वच + णिच् + ल्युट्।) पठनम्। यथा,—
"गुह्लेनान्यलिखितेन पठितस्य प्रयत्नतः।
न कार्यं वत्समनया कार्यं लोकस्य वाचनम्॥"
इति वाराहीतन्त्रम्॥
तथा।
"दानवाचनमात्रादावरव्रतसमाधिषु यजमानं प्रतीयात्॥" इति कात्यायनसूत्रम्॥ (प्रतिपादनम्। यथा, साहित्यदर्पणे १ परिच्छेदे।
"शब्दे स्वभावादेकार्थे श्लेषोऽनेकार्थवाचनम्॥")

वाचनकं, क्ली (वाचनेन कायतीति। कै + क।) प्रहेलिका। इति हारावली॥ १ ५९॥

वाचस्पति पुं (वाचां सर्वविद्यारूपवाक्यानां पतिः। अभिधानात् षष्ठ्या अलुक्।) बृहस्पतिः। इति शब्दरत्नावली॥

वाचस्पति, पुं (वाचः पतिः। "षष्ठ्याः पतिपुत्रेति।" ८।३।५३। इति षष्ठीविसर्गस्य सः।) बृहस्पतिः। इत्यमरः। १। ३। २४॥ (यथा कुमारे। २। १।
"वाचस्पतिरुवाचेदं प्राञ्जलिर्जलजासनम्।"
शब्दप्रतिपादके त्रि। यथा, ऋग्वेदे। १०। १६६। ३।
"वाचस्पते निषेधि मान्यथा मदधर वदाम॥"
"हे वाचस्पते वाच शब्दस्य पालयितः॥"
इति तद्भाष्ये सायणः।)

वाचा स्त्री, (वच् + भाषुरिमति टाप्।) वाक्। इति त्रिकाण्डशेषः। (यथा, कातन्त्रे।
"वदि भाषुरिदमोमवाचाद्योभयतोर्थो।
टापप्यापि हलन्तानां यथा वाचा निशा दिशा॥"
यथा च, पञ्चतन्त्रे। ३। ६८। "तत् श्रुत्वा ब्राह्मणेन सुखोभूय तिमिरमर्थाभिः पत्नी विताडिं यतौ॥")

वाचाट, त्रि, (कुत्सितं बहु भाषते इति। वाच् + "आलजाटचौ बहुभाषिणि।" ५। २। १२५। इति आटच्।) वाचालः। इत्यमरः। ३।१।३६॥ (यथा, मनुः। ३। ८।
"नोद्वहेत् कपिलां कन्यां नाधिकाङ्गीं न रोगिणीम्।
नालोमिकां नातिलोमां न वाचाटां न पिङ्गलाम्॥")

वाचाल, त्रि, (बहु कुत्सितं भाषते इति। वाच् + "आलजाटचौ बहुभाषिणि।" ५।२।१२५। इति आलच्।) बहुकुत्सितभाषी। तत्पर्यायः। जल्पाकः २ वाचाटः ३। इत्यमरः। बहु भाषितेऽपि जल्पाकादयश्च वर्त्तन्ते वाचाटो वाचालो जल्पाकः स्युर्बहुभाषी कथितः शोकाद्येषपर्याये वीप्सातिः। त्रिकाण्डश्च वाचालादपगतिहेः अरस्वतीम्। इति मुरारि रिति लट्टीकायां भरतः। (यथा, कथासरित्सागरे। ६०। ६४।
"वाचालेः कलहः स्त्रीवैषम्पानतयामात्रिणाम्॥")

वाचिक, त्रि, (वाच + ठक्।) वाचा कृतम्। यथा,—
"शरीरजैः कर्मदोषैर्याति स्थावरतां नरः।
वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम्॥"
इति प्रायश्चित्ततत्त्वम्॥
अपि च।
"कायिकं वाचिकञ्चैव मानसं यच्च दुष्कृतम्।
एकजन्मनि तत् सर्वं प्रणश्यति समाचरेत्॥"
इति ब्रह्मपुराणे धर्मतीर्थम्॥
अन्यच्च। कायिकं मानसञ्च नमस्कारं विना आचार्येण कृत वाचिको नमस्कारः कृतः। इति मुग्धबोधटीकायां दुर्गादासः॥ (वाचैः वाक् + "वाचो व्याहृतार्थायाम्।" ५। ४। ३५। इति ठक्। सन्देशोक्तिः, क्ली। इति हारावली। १६६॥ यथा, राजतरङ्गिण्याम्। ६। ६६।
"प्रश्नमेके सन्धिदेशार्थं वाचिकोऽदूतवाचिकम्॥")

वाचिक, पुं, (वाचा निर्वृत्तः। वाच् + ठक्।) वाक्यारम्भः। यथा,—
"आलापश्च विलापश्च संलापश्च प्रलापकः।
अनुलापोऽपलापश्च सन्देशश्चातिदेशकः।
अपदेशोपदेशौ च निर्देशो व्यपदेशकः।
कीर्त्तिता वचनारम्भा द्वादशामी मनीषिभिः॥"
इत्युज्ज्वलनीलमणिः॥

वाचिकपत्र, क्ली (वाचिकस्य सन्देशस्य पत्रम्।) लिपि। समाचारपत्रम्। इति केचित्॥

वाचिकहारक, पुं, (वाचिकस्य सन्देशस्य हारकः।) लेखकम्। इति त्रिकाण्डशेषः॥ (दूतः। इति-न्यायविलासभोज॥)

वाचोयुक्ति, त्रि, (वाचि वाक्ये युक्तिर्यस्य।) वाग्मी। इत्यमरटीकायां रामाश्रमः॥ (स्त्री, वाचो वचनस्य युक्तिः। "वाग्दिग्पश्यद्भ्यो युक्तिदण्ड हरेषु।" ६। ३। २१। इत्यस्य वार्त्तिकोक्त्या षष्ठ्या अलुक्। वाक्यविन्यासः।)

वाचोयुक्तिपटु, त्रि, (वाचोयुक्तौ वाक्यविन्यासे पटुः।) वाग्मी। इत्यमरः। ३। १। ३४॥

वाच्य, त्रि (उच्यते इति । वच+ण्यत् । "वचो ऽशब्दसंज्ञायाम् ।" इति न कुत्वम् ।) कुत्सितम् । हीनम् । वचनार्हम् । इति मेदिनी । ये, ५५ । (यदुक्तम् ।
"लघोरपि गुणा वाच्या दोषा वाच्या गुरो-रपि ।")
मुख्यम् । यथा,—
"न वाच्यलक्षणाभ्यां प्रयोगाणां विभिद्यते ।
वाच्यवाचकभावोऽयमपादादिशब्दवत् ॥
विभीतकेऽप्ययं शब्दो यथाक्ष्ये प्रयुज्यते ।
तथापि वाचकस्तस्य ज्ञायते प्रकटाक्षवत् ॥"
इति मल्लमाधवतत्त्वप्रदभट्टवार्त्तिकवचनम् ॥
अपि च ।
"अर्थो वाच्यश्च लक्ष्यश्च व्यङ्ग्यश्चेति त्रिधा मतः ।"
तत्र वाच्यस्वरूपमाह ।
"वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः ।
व्यङ्ग्यो व्यञ्जनया ता स्युस्तिस्रः शब्दस्य शक्तयः ॥"
इति साहित्यदर्पणे २ परिच्छेदः ।
वाच्यं, क्ली (वच+ण्यत् ।) प्रतिपादनम् । दूषणम् । इति धरणिः ॥ (यथा,—
"परवाच्येषु निपुणः सर्व्वो भवति सर्व्वदा ।")
वाछ इ कामे । इति कविकल्पद्रुमः ॥ (भ्वा० पर०-सक०-सेट् ।) इ, वाञ्छति । इति दुर्गादासः ॥
वाज, क्ली, घृतम् । (यथा, वाजसनेयसंहितायाम् । ९ । १ ।
"वाचस्पतिर्वाजं नः स्वदतु ।")
यज्ञः । अन्नम् । (यथा, ऋग्वेदे । ४ । २४ । ३ ।
"या देवी देवमनो जायमानो
मघो वाजेभिर्महद्भिश्च शुष्मैः ।"
"वाजेभिरन्नैः ।" इति तद्भाष्ये सायनः ॥)
वारि । इति मेदिनी । जे, १३ ॥ (संग्रामः । यथा ऋग्वेदे । ५ । ३५ । १ ।
"अस्माभ्यं चर्षणीसहं सस्निं वाजेषु दुष्टरम् ॥"
बलम् । यथा, तत्रैव । ५ । ८६ । २ ।
"यजेषु धर्णसिं ततान वाजमर्व्वत्सु पयउस्रियासु ।")
वाज पुं, शरपक्ष । इत्यमरः । २ । ८ । ८७ ॥
(यथा भागवते । १ । ५८ । १६ ।
"विविधवाजैर्निशितैः शिलीमुखैः ।")
निस्वनः । पक्षः । वेगः । इति मेदिनी । जे, १६ ॥
मुनिः । इति विश्वः ॥
वाजपेयं, क्ली पुं (वाजमन्नं घृतं वा पेयमत्र ।) यज्ञविशेषः । इत्यमरभरतौ ॥ स तु श्रौतसप्तयज्ञान्तर्गतपञ्चमयागः । यथा । "अग्निष्टोमो-ऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयः । इत्यादयः सप्तसंस्थाः ।" येन पौण्डरीकवेति समयामाः ॥
वाजपेयी [न्] पुं, (वाजपेयं यष्टवान् इति । इष्ट+इनिः ।) वाजपेययाजी । इति शब्दरत्नावली ॥
वाजसनेय पुं, यजुर्व्वेदशाखाप्रवर्त्तकः । स तु वैशम्पायनशिष्यात् । इति मत्स्यपुराणम् ॥ (वाजसने कर्म्मस्य छात्रः । वाजसनि+ढक् । याज्ञवल्क्यः । यथा, बृहदारण्यके । "आदित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते ।")
वाजसनेयी, [न्] पुं, (वाजसनेयेन प्रोक्तं वेदमध्येतीति । इनिः ।) यजुर्व्वेदी । यथा —
"आवृत्तमेव सर्व्वत्र सूत्रा वाजसनेयिनः ।"
इति महार्णवपरिगृहीतवचनात् यजुर्व्वेदविधिनैव कर्म्म कुर्य्यात् । इति मलमासतत्त्वम् ॥ (यथा हरिवंशे । १४ । २ ।
"ब्राह्मणो याज्ञवल्क्यस्य शिष्यो धर्म्मगुणान्वितः ।
ब्रह्मर्षिरिति विख्यातो विप्रो वाजसनेयिनाम् ।")
वाजिगन्धा, स्त्री (वाजिनो घोटकस्य गन्धोऽस्त्यस्यामिति । अच् । टाप् ।) अश्वगन्धा । इति रत्नमाला ॥ (यथा, सुश्रुते चिकित्सितस्थाने ३० अध्याये ।
"हरेणुं गुडूच्याञ्च वाजिगन्धाग्नि-वर्द्धिभिः ।")
वाजिदन्त, पुं (वाजिनो दन्त इव पुष्पं यस्य ।) वासकः । इति रत्नमाला ॥
वाजिदन्तक, पुं (वाजिदन्त इव । स्वार्थे कन् ।) वासकः । इत्यमरः । २ । ४ । १ ३ ॥
वाजिन, क्ली, आमिक्षामस्तु । इति हेमचन्द्रविकाण्डशेषौ ॥ छानार जल इति भाषा ॥ (यथा वाजसनेयसंहितायाम् । १९ । २१ ।
"सोमस्य रूपं हविष आमिक्षा वाजिनं मधु ।")
अस्य गुणाः प्रस्तुतिभिदमत्र यथा,—
"दध्ना तक्रेण वा सह दुग्धं बद्धं सुधावधा ।
तद्दुग्धमपरीरं मोरटं ब्रुवतोऽवदीत् ॥
सुलघोपश्वसादाहरक्तपित्तज्वरप्रणुत् ।
मधुरं बलकरं वृष्यो मोरटः स्यात् हितावृत ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
हविः । यथा, वाजसनेयसंहितायाम् । ५८ । ११ ।
"वाजी वहन् वाजिनम् ।"
"वाजिनं हविः ।" इति तद्भाष्ये महीधरः । ८ ।
पुं, अश्वः । यथा, ऋग्वेदे । १ । ७१ । ५ ।
"नैनं हिन्वन्त्यपि वाजिनेषु ।"
"वाज इला ईश्वरा येषाम् ।" इति सायनः ।)
वाजिनी स्त्री, अश्वगन्धा । घोटकी । विस्तपर्य्यायः । वडवा २ वामी ३ प्रसवा ४ आर्त्तवी ५ । अस्याः क्षीरगुणाः ।
"वाजाश्वीरञ्च रूक्षाञ्च बलदं दीपनं लघु ।
देहस्थैर्य्यकरं बल्यं क्षीरं वाजिनजं परम् ॥"
तद्दधिगुणाः ।
"वाजं दधि लघूष्णं कषायं
वातप्रशमनं दीपनं कफदम् ।
वाताम्लरं दीपनकारि नैव
दोषापहं तत् कथितं दधितानाम् ।"
तत्तक्रगुणाः ।
"वाजिनं तक्रं रौक्ष्यं स्यात् वताव वसकावकृत् ।
वचनं कटुकषायोष्णमीषद्वातापहारकम् ।"
तद्घृतगुणाः ।
"वाजाश्वपिस्तु कटुकं मधुरञ्च कषायकम् ।
ईषद्दीपनदं मूर्च्छाहारि वातापहं गुरु ।"
इति राजनिर्घण्टः ॥ ७ ॥
अपि च ।
"कषायं मधुराशीरं बल्यं वातापहं परम् ।
चक्षुष्यं कटु लघु स्वादु वर्म्मैबल्यं तथा ।"
इति भावप्रकाशः ॥
वाजिपृष्ठ, पुं (वाजिनः पृष्ठमिव आकृतिरस्येति ।) वनगनृत्तक । इति शब्दचन्द्रिका ॥
वाजिभक्ष, पुं (वाजिभिर्भक्ष्यते इति । भक्ष+कर्म्मणि घञ् ।) चणकः । इति राजनिर्घण्टः ॥ (विवरणमस्य चणकशब्दे ज्ञातव्यम् ॥)
वाजिभोजन पुं, (वाजिभिर्भुज्यते इति । भुज+कर्म्मणि ल्युट् ।) मुद्गः । इति राजनिर्घण्टः ॥
वाजिमान् [त्] पुं, पटोलः । इति रत्नमाला ॥
वाजिशाला, स्त्री (वाजिनां शाला सद्म ।) घोटकसद्म । आस्ताबल इति पारसी भाषा ॥ तत्पर्य्यायः । मन्दुरा २ । इत्यमरः ॥ (यथा, राजतरङ्गिण्याम् । ३ । १६६ ।
"कामोपानां वाजिशालां आत्मने स न्यवेशयत ।")
वाजी [न्] पुं, (वाजो वेगोऽस्त्यस्येति । वाज+इनिः ।) घोटकः । (यथा, रघुः । ३ । ११ ।
"प्रतेसमस्थामभिषङ्गिताभि
र्हरिं विदित्वा हरिभिश्च वाजिभिः ।")
वाजः पक्षोऽस्त्यस्येति ।) वाणः । पक्षी । इत्यमरः ॥ वासकः । इति शब्दरत्नावली ॥ (वजति गच्छतीति । वज+णिनिः । त्रि बलवान् यथा, वाजसनेयसंहितायाम् । २८ । १ ।
"वाजी वहन्वाजिनं जातवेदो देवानां वक्षि प्रियमासधस्थम् ।"
"वजति वाजी । बलवतो बलवान् ।" इति तद्भाष्ये महीधरः ॥ ७ ॥ वाजमन्नमस्त्यस्येति अन्नवान् । यथा, ऋग्वेदे । १ । २ । १४ ।
"तमीमहे नमसा वाजिनं बृहत् ।"
"वाजिनं अन्नवन्तम् ।" इति तद्भाष्ये सायनः ॥ वाजः पक्षोऽस्त्यस्येति । पक्षविशिष्टः । यथा, भागवते । ३ । ७ । १६ ।
"हत्वेव उपनीतवार्ण्णेन कोश-वाजिना ।")
वाजीकरण, क्ली, (अवाजी वाजीव क्रियतेऽनेनेति । कृ+ल्युट् । अभूततद्भावे च्विः ।) वीर्य्यवर्द्धिकरम् । इति राजनिर्घण्टः ॥ वाजीकरणस्य प्रयोजनमाह ।
"बहूनां दुर्बल कुर्य्यात् वाजिवत् सुरतक्षमम् तदावीकरमाख्यातं मुनिभिर्भेषजां वरैः ।"
अथ रत्नसार भेषजं वाजीकरणं विधाय आह ।
"क्षीरं माषं दशनायनकरान् भेषजाणि ।
तच वर्द्धयेत् वीर्यं विराजं तस्य वयः

तैस्तैर्भावैरहृद्यैस्तु रिरंसोर्मनसि क्षते ।
ध्वजः पतत्यतो नृणां क्लैब्यं समुपजायते ॥
द्वेष्यस्त्रीसम्प्रयोगाच्च क्लैब्यं तन्मानसं स्मृतम् ॥"
तैस्तैर्भावैर्भयशोकक्रोधादिभिः । अहृद्यैः हृद-याहितैः तु मनस्ताने । क्षते पीडिते अवसन्ने इति यावत् । ध्वजः लिङ्गः । पतति न गृह्णाति । सम्प्रयोगो मैथुनम् ॥ १ ॥
"कटुकाम्लोष्णलवणैरतिमात्रोपसेवितैः ।
पित्ताच्छुक्रक्षयो दृष्टः क्लैब्यं तस्मात् प्रजायते ॥"
कटुकादिनातिमात्रेण प्रवृद्धेन पित्तेन शुक्रस्य दग्धत्वात् क्लैब्यं भवति । पित्तजमेतद्द्वितीयम् ॥ २ ॥
"अतिव्यवायशीलो यो न च वाजीक्रियारतः ।
ध्वजभङ्गमवाप्नोति स शुक्रक्षयहेतुकम् ॥"
शुक्रक्षयजं तृतीयम् ॥ ३ ॥
"महता मेढ्ररोगेण चतुर्थी क्लीवता भवेत् ॥ ४ ॥
वीर्य्यवाहिसिराच्छेदान्मेहनानुन्नतिर्भवेत् ॥ ५ ॥
बलिनः क्षुब्धमनसो निरोधाद्ब्रह्मचर्य्यतः ।
षष्ठं क्लैब्यं स्मृतं तत्तु शुक्रस्तम्भनिमित्तकम् ॥"
बलिनः दृढस्य पुरुषस्य क्षुब्धमनसः कामात् चञ्चलितस्य । ब्रह्म ब्रह्मचर्य्यतो निरोधात् क्लैब्यं भवति ॥ ६ ॥
"जन्मप्रभृति यत् क्लैब्यं सहजं तद्धि सप्तमम् ॥"७
असाध्यं क्लैब्यमाह ।
"असाध्यं सहजं क्लैब्यं मर्मच्छेदाच्च यद्भवेत् ।"
मर्मच्छेदात् वीर्य्यवाहिसिराच्छेदात् ।" ● ।
अथ क्लैब्यस्य चिकित्सायां वाजीकरणविधिमाह ।
"नरो वाजीकरान् योगान् सम्यक् शुद्धो निरामयः ।
सप्तत्यन्तं प्रकुर्व्वीत वर्षादूर्द्ध्वन्तु षोडशात् ॥
न च वै षोडशादर्व्वाक् सप्तत्याः परतो न च ।
आयुष्कामो नरः स्त्रीभिः संयोगं कर्त्तुमर्हति ॥
समवृत्तपरम्पराद्या घोरवातोपद्रुतमया ।
अकालमरणञ्च स्याद्भजतः स्त्रियमन्यथा ॥
विवाधिनामथवतां रूपयौवनशालिनाम् ।
वराणां बहुभार्य्याणां विधिर्वाजीकरो हितः ॥
स्थविराणां रिरंसूनां स्त्रीणां वाल्लभ्यमिच्छताम् ।
योषित्प्रसङ्गात् क्षीणानां क्लीवानामल्परेतसाम् ॥
हिता वाजीकरा योगाः प्रीणना बलदाश्च ये ।
एतेऽपि पुष्टदेहानां सेव्याः कालाद्यपेक्षया ॥"
वाजीकराण्याह ।
"भोजनानि विचित्राणि पानानि विविधानि च ।
वाचः श्रोत्राभिरामाश्च त्वचः सुखावहाः ।
यामिनी चन्द्रतिलका कामिनी नवयौवना ।
गीतं श्रोत्रमनोहारि ताम्बूलं मदिरा स्रजः ॥
गन्धा मनोज्ञा रूपाणि चित्राण्युपवनानि च ।
मनसश्चाप्रतीघातो वाजीकुर्व्वन्ति मानवम् ॥
माषं कथातुमधुपारदलोहचूर्णं
मध्वाज्यमानतुषिङ्गुडनानि लिह्येत् ।
एकाम्यविंशतिदिनानि मदान्वितोऽपि
योऽशीतिकोऽपि रमयेत् प्रमदा युवेव ॥
मधौ विदग्धमात्मानं सिद्धं पयसि पायसम् ।
गोधूमचूर्णञ्च तथा सितामधुघृतान्वितम् ।
भुक्त्वा हृष्यति जीर्णोऽपि दशदारान् व्रजत्यपि ॥"
अथ रसाला ।
"दध्नोऽर्द्धाढ़कमीषदम्लमधुरं खण्डस्य चन्द्रद्युतेः प्रस्थं क्षौद्रपलञ्च पञ्च हविषः शुण्ठ्याश्चतुर्माष-काान् ।
एलामाषचतुष्टयं मरिचतः कर्षं लवङ्गं तथा धृत्वा शुभ्रपटे घने करतलेनोन्मथ्य विस्रा-वयेत् ॥
मृद्भाण्डे मृगनाभिचन्द्रनखरप्रधूपितेऽगुरुधूपिते कर्पूरेण सुगन्धितं तदखिलं यत्नेन संस्था-पयेत् ।
स्वस्थार्थं मधुरेश्वरेण रचिता श्रीमद्रसाला स्वयं भोक्तुर्मन्मथदीपनी सुखकरी कान्तेव नित्यं प्रिया ॥ ● ॥
गोक्षुरेक्षुरबीजानि वाजिगन्धा शतावरी ।
मुषली वानरीबीजं यष्टी नागबला बला ॥
एषां चूर्णं दुग्धसिद्धं गव्येनाज्येन भर्जितम् ।
सितया मोदकं कृत्वा भक्ष्यं वाजीकरं परम् ॥
चूर्णाद्द्विगुणं क्षीरं घृतं चूर्णसमं स्मृतम् ।
सर्व्वतो द्विगुणं खण्डं मोदकं विदधे यथा ॥
वाजीकराणि भूरीणि सन्त्यत्र रचितानि नः ।
तस्मादस्य तु योगस्य योगोऽयं प्रवरो मतः ॥"
इतिवङ्गेशो मोदकः ॥ ● ॥
"पिप्पलीलवणोपेतौ बस्ताण्डौ घृतसाधितौ ।
भक्ष्यपक्षाथ वा खादेत्ते तु वाजीकरे भृशम् ॥
पूर्णं दधिच्छदग्धेन दमयन्तोक्तं भृष्टं कर्णयेत् तच्छिन्नं लवयोगतो मृदुतरं मधुरं चूर्णं घृतम् ।
तच्चूर्णं पटशोधितं घृतयुते गोक्षुरदुग्धे पचेत् मन्दाग्न्याशनिषण्णेऽतिनिविड़े दद्याद्गुडाढ्यां सिताम् ॥
पश्चात् तत्क्रमशात् चितिं प्रतिनयेत् तस्मिन् पुनः प्रक्षिपेत् दद्यात्तत्पुरतश्चरामि बहुधा ब्रह्मादरात् सहिता ।
एला नागबला बला चपला जातीफला निम्बिका जातीपत्रलवङ्गचित्रककुलं तच त्वचा सुगन्धम् ॥
विश्वावीरणबालिकादिदवरा वांशी वरी वानरी द्राक्षा श्वेतकगोक्षुराश्च मधुनी खर्ज्जूरिका चोरिका ।
मांसाख्यं चन्दनयुगं धान्यकं ससपुष्कं मञ्जिष्ठं कोरकं प्रस्तीरापरमालिका वराटिका मांसी मिषि मेथिका ॥
कर्पूरञ्च विदारिका च मुषली गन्धर्वगन्धा तथा कस्तूरी केतकीसारं घर्मादेवदारुञ्च दीर्घं परम् ।
बीजं कन्द्राक्षिरूपमञ्च कारिका बीजञ्च रात्रौ तत्र
चैत चन्दनमत्र इलमपि च श्रीखण्डचूर्णं समम् ।
सर्व्वमेतित पृथक् पृथक् पलमितं सच्चूर्णं तत्र क्षिपेत्
सत भङ्गभुजङ्गलोहगगनं सम्मर्दितं स्वेच्छया ।
कस्तूरी घनसारचूर्णमपि च प्राज्ञं यथा प्रक्षिपेत्
पश्चादस्य तु मोदकान् विरचयेदिक्षुप्रमाणा नव ।
तान् भोक्तादि सदा यथाबलबलं शुद्धेन चाज रसं
पूर्व्वं सिन्धुमिते गते परिणते ग्रासभोजनात् भक्षयेत् ।
नित्यं क्षीरतिलकभावकमिमं च पूगपाकं भवेत्
स स्यादीर्घविस्रम्भसमन्नो वाजीव मत्तो रतौ ॥
दीप्ताग्निर्बलवान् बली निरवधिर्दृष्टः स युवा जनः
वृद्धोऽपि युवेव योऽपि वधिरः पूर्व्वेन्दुवत् सुन्दरः ॥"
वसुयुगे अष्टयुगे । चतुर्लितहूँधरावम् । तुलाद्वा पञ्चाशत्पलमिताम् । मंखिता सुश्रूता । कामवला गुरुबकरी गुरुखसी इति च लोके । बला बलविया तस्याः मूलमूल । चपला पिप्पली । जातीफल जायफली । विश्वा शुण्ठी । वीरण एतस्य मूलं उशीरं वाहनम् । वारि सुगन्धवाला । वारिद मुस्तक । वरा त्रिफला वांशी वंशरोचना । वरी शतावरी । वानरी कपिकच्छूस्तस्या बीजं ग्राह्यम् । इक्षुर कोकिलाक्ष तस्य बीजम् । गोक्षुरस्यापि बीजम् । मधुनी खर्ज्जूरिका छोहारा । चोरिका चोरी । दुम्बीका भारती मगरेला इति लोके । वराटिका वरै इति लोके । मालूक मेथी कन्द स्याद्विभज्योबी वराटिका । मांसी जटामांसी । मिषि सौंफ । गन्धर्वगन्धा एरण्ड गन्धा तस्याः मूलम् । श्रीखण्ड चन्दनम् । घन सारः कर्पूर । विल्वप्रमाणान् मध्यप्रमाणान् ।
इतिचक्रभाण्डपूगपाक ॥ ● ॥
"एतत्किमूलितपक्षी धनि पुष्प सम्यक् सुरा प्राशिता
मुस्तूरस्य तु बीजमत्कटमा याष्टिमधीव साधा ।
ससाक्षूपलकं तथा शतपत्रलय वारि नि चि मयी
चूर्णाद्री विचया सदा न हि भवेत् कामेश्वरः क्षयाम ॥"
इति महाकामेश्वरः ॥०॥
"रक्तपित्ताधिकारोक्तं खण्डकूष्माण्डकं भवेत् ।
रक्तपित्तादिरोगघ्नो महावाजीकरः स्मृतः ॥०॥
पञ्चाशत्पलं दधि क्षौद्रं सितामाढ़कमिश्रिताम् ।
घृतप्रस्थमिदं दद्यादाढ़कम् प्रस्थाढकम् ।
मरिचं कुङ्कुमोन्मादं पिप्पलीदिग्धमिश्रितम् ।
सर्व्वमेतत् समं कृत्वा सम्मर्द्य कारयेत् ।
मध्वेतत्सुवसुधे प्राश्ये दाशरथ्या प्रदर्शयेत् ।

चूर्णान्येषां विपेषेण घनीभूतेऽवतारयेत् ।
धान्यकं जीरकं चव्यं चित्रकं मुस्तकं त्वचम् ।
कृष्णजीरकमय्यञ्च धन्यिकं नागकेशरम् ।
एलाबीजं लवङ्गञ्च पृथक् जातीफलं पलम् ।
सिद्धे शीते प्रदद्याच्च मधुनः कुडवद्वयम् ।
भक्षयेद्दोलमाद्भोक्तं पलमात्रमिदं नरः ।
अथवा नियता मात्रा मात्रा खादेद्यथानलम् ।
मासेन सेवनादस्य वाजीव सुरती भवेत् ।
समर्थो बलवान् पुष्टो हृष्टो नित्यं निरामयः ।
पञ्चशो नाशयेदेष क्षयं श्वासमरोचकम् ।
अम्लपित्तञ्च पित्तञ्च रक्तपित्तञ्च मानुताम् ॥"
कृष्णजीरकं कालाजीरा । इति आम्रपाकः ।
"धमयति गोक्षुरचूर्णं छागक्षीरेण भावितं समन्तु ।
शुक्रं जनयति जाता मञ्जनितं कुप्रयोगेण ।
स्थाने चन्दनादिस्तु चन्दनं रक्तचन्दनम् ।
पतङ्गमथ कालीयागुरुश्चागुरुक्षितं च ।
देवद्रुमं सरलं पद्मकं तुम्बिकोऽपि च ।
कर्पूरो मृगनाभिश्च लताकस्तूरिकापि च ।
शिल्हकं कुङ्कुमं नखं जातीफलकमथ च ।
जातीपत्रं लवङ्गञ्च सूक्ष्मैला महती च या ।
कङ्कोलफलकं त्वक् च पत्रकं नागकेशरम् ।
बालकञ्च तथोशीरं मांसी दारु सिताभिधा ।
मुरा कर्पूरकञ्चापि शैलेयं भद्रमुस्तकम् ।
रेणुका च प्रियङ्गुश्च श्रीवासो गुग्गुलुस्तथा ।
लाक्षा नखञ्च रालञ्च धातकीकुसुमं तथा ।
मञ्जिष्ठा च मल्लिका तगरं सिक्थकं तथा ।
एतानि शाणमात्राणि कल्कीकृत्य प्रस्थे पचेत् ।
तैलं प्रस्थमितं सम्यक् एतत्पात्रे शुभे क्षिपेत् ।
अनेनाभ्यक्तगात्रस्तु वृद्धोऽशीतिसमोऽपि यः ।
युवा भवति शुक्राढ्यः स्त्रीणामत्यन्तवल्लभः ।
वन्ध्यापि लभते गर्भं षण्ढोऽपि तरुणायते ।
अपुत्रः पुत्रमाप्नोति जीवेच्च शरदां शतम् ।
चन्दनादिमहातैलं रक्तपित्तं क्षयं ज्वरम् ।
दाहप्रस्वेददौर्गन्ध्यं कुष्ठं कण्डूं विनाशयेत् ॥"
पतङ्गं बकम् इति लोके । कालीयं कलम्बक इति लोके । लताकस्तूरिका मुष्कदाना इति लोके । कङ्कोलफलाभावे जातीपुष्पं ग्राह्यम् । तदभावेऽपि लवङ्गं ग्राह्यम् । दारुसिता दारचिनी । शैलेयं छरा इति लोके । श्रीवासः गुगुरी इति लोके । मञ्जिष्ठा मजिठ् इति लोके । अशीतिसमः अशीतिवार्षिकः । इति चन्दनादितैलम् ॥ * ॥
"कोलादि कोलकर्षा कुडवमितानि खण्डे पृथक्के ।
प्रस्थे गोमयदुग्धे दुग्धं पाचयेद्बीजाढ्यम् ।
मन्दहितानि च क्रमात् मन्दं वर्धयेत्तानि ।
विटिकां मधुवटिकां प्रातः भक्षे भवेद्दर्पः ।
त्रिगुणितशर्करया वा वटिका शतशो विधा ।
वटिका मासिकमध्ये मन्मथवीर्योऽयमेवा च ॥

पञ्चटङ्कमितास्तास्तु सायं प्रातश्च भक्षयेत् ।
अनेन यौवनस्थो यो वृद्धः स्यात् मतिविभ्रमः ।
सोऽपि प्राप्नोति सुरते सामर्थ्यमिति वाञ्छितम् ।
नानेन सदृशं किञ्चित् द्रव्यं वाजीकरं परम् ॥"
इति वानरीवटिका ॥ * ॥
"आकारकरभः शुण्ठी लवङ्गं कुङ्कुमं कणा ।
जातीफलं जातिपुष्पं चन्दनं कार्षिकं पृथक् ।
चूर्णयेदहिफेनस्य तथा दद्यात् पलोन्मितम् ।
सर्वमेकीकृतं माषमात्रं चौद्रेण भक्षयेत् ॥"
शुक्रस्तम्भकरं पुंसामिदमानन्दकारकम् ।
नारीणां प्रीतिजननं सेवेत निशि कामुकः ॥"
इति भावप्रकाशः ॥
(यथा च ।
"विदारीकन्दो शुभतीक्ष्णश्च ।
काकोलिकाक्षीरयुतञ्च द्वे ।
शृङ्गाटकं मागधिका बला च
चूर्णं सिताढ्यं सितया प्रयोज्यम् ।
क्षीरेण पयः पायसमेव योज्य
करोति पुंसां बलमेवमोज ।
स्त्रीणां शतञ्च भजतोऽपि वक्तो
मासद्वयेनापि च सेवमानः ॥"
इति हारीते चिकित्सास्थाने ४६ अध्यायः ॥
"वाजीकरणमन्विच्छेत् सततं विषयी पुमान् ।
तुष्टिः पुष्टिरपत्यञ्च गुणवत्तत्र संश्रितम् ।
अपत्यसन्तानकरं यत् सद्यः संप्रहर्षणम् ।
वाजीवातिबलो येन यात्यप्रतिहतोऽङ्गना ।
भवत्यतिप्रियः स्त्रीणां येन येनोपचीयते ।
तद्वाजीकरणं तद्धि देहस्योर्जस्करं परम् ।
धर्म्यं यशस्यमायुष्यं लोकद्वयरसायनम् ।
अनुमोदामहे ब्रह्मचर्यमेकान्तनिर्मलम् ।
अल्पसत्त्वस्य तु क्लेशैर्बाध्यमानस्य रागिणः ।
शरीरक्षयरक्षार्थं वाजीकरणमुच्यते ।
कल्पस्योन्मयतो वाजीकरणसेविनः ।
सर्वेऽप्यतुसमारम्भाः वाजीकरणसेविनः ।
सर्वेष्वृतुष्वहरहर्व्यवायो न विरुध्यते ।
अथ स्निग्धविशुद्धानां निरूहान् सानुवासनान् ।
घृततैलपयोरसशर्करोत्सेधयुतान् ।
योगविद्योजयेत् पूर्वं क्षीरमांसरसाशिनाम् ।
ततो वाजीकरान् योगान् शुक्रापत्यविवर्धनान् ।
अवपीड़ प्रतिकूलं सेवेत रक्तौ द्रुमः ।
यथैकश्चैकशाखश्च निरपत्यस्तथा नरः ।
छायाद्रुममसन्तानं धूमिषधरम् ।
अपि नानाविधगुणं हृदयानन्दकारकम् ।
अपत्यं तुष्टये केन हर्षे दर्शयति ।
विद्युत्पदृश्यधौषधैर्मानमिन्द्रियवर्धनम् ।
शुद्धकायो यथान्याय्यं द्रव्यं योगान् प्रयोजयेत् ।
शतावरीक्षुरकामाषा विदारी क्षीरकञ्च च ।
गन्धादि कटुकार्याश्च जीवकर्षभकौ बलाम् ।
मेदे द्वे द्वे च काकोल्यौ मुद्गपर्णी शतावरीम् ।
अश्वगन्धामतिबलामात्मगुप्तां पुनर्नवाम् ।
वीरां पयस्यां जीवन्तीं ऋद्धिं रास्नां त्रिकण्टकम् ।
मधुकं शालिपर्णीञ्च भागांशिकान् पृथक् ।

माषाणामाढकञ्चैतद्द्विद्रोणे साधयेदपाम् ।
रसेनाढकशेषेण पचेत्तेन घृताढकम् ।
दत्त्वा विदारीधात्रीक्षुरसानामाढकाढकम् ।
घृतात्चतुर्गुणं क्षीरं पेष्याजीवनानि चावपेत् ।
वीरां स्वगुप्तां काकोल्यौ यष्टीं मधुयष्टीं विध्य-
सीम् ।
द्राक्षां विदारीं खर्जूरं मधुकानि शतावरीम् ।
सद्विषिकपूरं चूर्णैः पृथक् पृथक् योजयेत् ।
शर्करायास्तुगायाश्च पिप्पल्याः कुडवेन च ।
मरिचस्य प्रसृतेन पृथगर्धपलोन्मिते ।
नागकेशरैः स्पष्टं चौद्रात्कुडवेन च ।
पलमात्रं ततः खादेत् प्रत्यहं रसदुग्धभुक् ।
तेनारोहति वाजीव कुलिङ्ग इव हृष्यति ।
विदारीपिप्पलीशालिप्रियालेक्षुरकामजः ।
पृथक् स्वगुप्ताम्लकाच कुडवाद्यं यथा मधु ।
तुलार्धं शर्करायुक्तात् प्रस्थार्धं नववारिणः ।
सोऽध्यमानमतः खादेद् यस्य रामायते वशे ।
मांसगुप्तापलान् क्षीरे गोधूमान् मधितान्
विपात् ।
माषान् वा अश्वगन्धान् खादेत् यदिपयो
ऽनुप ।
जानाति रात्रि सकलामतिसन्ति नरो निशि ।
स्वस्ताङ्गसिद्धे पयसि भावितानसकृत्तिलान् ।
यः खादेत् सहितान् गच्छेत् स स्त्रीशतमपूर्ववत् ।
चूर्णं विदार्या बहुशः स्वरसेनैव भावितम् ।
चौद्रसर्पिर्युतं लीढ्वा प्रमदाशतमृच्छति ।"
"कृष्णाधात्रीफलरसं खरसेन सुभावितम् ।
शर्करामधुसर्पिर्भिर्लीढ्वा योऽनुपयः पिबेत् ।
स नरोऽशीतिवर्षोऽपि युवेव परिहृष्यति ।
गर्भं मधुकचूर्णस्य घृतचौद्रसमन्वितम् ।
पयोऽनुपानं यो लिह्यान्नित्यवेगः स ना भवेत् ।"
"उच्चटाचूर्णमप्येवं घृतक्षीरेण योजयेत् ।
धात्रीफलस्वरसेन भावितं वटिकीकृतम् ।
षष्टि शुभान्वितं शुक्रं वृद्धोऽपि तरुणायते ।"
"भावयेत् सकलां रतिकर्मां
कामप्रायविहितामकलाम् ।
हैमकालकमकन्दुरोधाद्
वैदलकमयोग्यविश्रामः ।
चन्द्रपीतमनदीकाञ्च
चकचकाभरणदारा ।
कान्दर्भकाचारिकया गौरवा
चमत्मभाता बद्धापनका ।
दीर्घिका कमलकान्तविहिता
घटीकमधुमत्तविहङ्गा ।
जीवनार्यविरहितरुचिमि
चापचापि पुरवनतापि ।
हरिदुम्बा रेणिका तरुका नि-
र्जनगृह नकुलोदकधारः ।
चन्द्रकलार्कवद्विशिकृता
विच्छुकु वक्षा वनिताः ।
ताम्बूलमधुमदिरा कान्ता कान्ता मिद-
इङ्गितः ।

मदृष्टश्च विश्विदिदं मनसो वाजीकरं तत्तत् ।
मधुरमर्समिव वीत्यर्न प्रियाया
कलरवभाषरिवादिनी प्रियेव ।
कुसुमचयमनोरमा च शय्या
किशलयिनी लतिकेव पुष्पितायाः ॥
देवी शरीरे च न काचिदर्थि
रर्थैः माल्योऽपि मनोविकार ।
वाजीकरा सन्निहिताश्च योग्य
कामस्य कामं परिपूरयन्ति ॥"
इति वाभटे उत्तरस्थाने ४० अध्यायः ।
तथाच ।
"वाजीकरणमन्विच्छेत् पुरुषो नियमात्मवान् ।
तन्नायत्तौ हि धर्म्मार्थौ प्रीतिश्च यश एव च ।
पुत्त्रस्यायतनञ्चैतद्गुणाश्चैते सुताश्रयाः ।
वाजीकरणमग्र्यञ्च क्षेत्रं स्त्री वा प्रहर्षिणी ।
इष्टा ह्येकैकशोऽप्यर्था परं प्रीतिकरा स्मृता ।
किं पुनः स्त्रीशरीरे ये सङ्घातेन व्यवस्थिताः ।
सङ्घातो हीन्द्रियार्थानां स्त्रीषु नान्यत्र विद्यते ।
स्त्र्याश्रयो हीन्द्रियार्थो यः सप्रीतिजननो-
ऽधिकः ।"
"विनष्टोऽपि सर्वगुप्तस्य धातुर्गतिर्मम ।
विमलश्चलपुलीति मातश्च पुष्पाकृति ॥
अपतिश्च भवश्च स्पृश्चैकेन्द्रियश्च वा ।
मनापो निष्क्रियश्चैव यस्यापत्यं न विद्यते ।
बहुमूर्त्तिर्बहुमुखो बहुव्यूहो बहुक्रियः ।
बहुचक्षुर्बहुज्ञानो बह्वात्मा च बहुप्रजः ।
मङ्गल्योऽयं प्रशस्तोऽयं धन्योऽयं वीर्य्यवानयम् ।
बहुपत्यो।ऽयमिति च स्तूयते वा बहुप्रजः ।
प्रीतिर्बलं सुखं वृत्तिर्विस्तारो विपुलं कुलम् ।
यशोलोकाः सुखोदर्कास्तुष्टिश्चापत्यसंश्रिता ।
तस्मादपत्यमन्विच्छन् गुणांश्चापत्यसंश्रितान् ।
वाजीकरविधिं नित्यं सेवेत कामसुखानि च ।
मात्राकालप्रयुक्ताया बोजानामादृतं बलम् ।
वीर्यवर्णकलोत्साहै मेदार्दितं प्रतापवीन् ।
मधुकाद्यानलब्धाच्च तापयेत् कुक्कुटीविलाम् ।
दधि सर्पिश्च स्तवकं शय्यश्च श्रम च ।
विदारीकां रसभक्ष्य प्रशस्तिपुरस्सरं च ।
इत्थं मदविधावाध्यं वृद्धं कपिविधापयेत् ।
प्रकैरावाप्तमायोभ्यां चीरस्य च पृथक्
पृथक् ।
भावितानुच्छ्रिताश्च पिप्पल्याश्चापयेत् पदम् ।
यथं पुष्टिमतो बोधा ततोऽश्नुमयोप्त्येत् ।
न दृष्टेरश्वं शुक्रं पिबसोहिमं बलम् ।"
इति वाजीकरणे घृतम् ।०।
"चटकानो बहुनां हंसानां द्विविधा
माषा ।
शिशुमारस्य मकरस्य भिषक् शुक्राणि सङ्गरेत् ।
गव्यं सर्पिर्वराहस्य कुलिङ्गस्य वसामपि ।
चटिकाभाच्च पूर्वाणि पूर्वं गोधूममेव च ।
भर्जि पुपलिका भार्ग्गा मूत्त्रयो वर्त्तिका
च्यवा ।
पूपावानाश रिंज्या भक्ष्याश्चापि पपलिका ।
एवं पयोमाषमाघं कर्षमात्रं पूर्व्वैरेतत् ।
पिपन्ते वाजिवद्याति यावदिच्छेत् स्त्रियो
नरः ।"
इति उत्पूपलिकायोगः ।०।
"मत्स्यैर्भातिकल्पस्य तस्य एव पयःप्रतम् ।
अपत्यजननं सिद्धं श्रुत्रशोणितकरम् ।"
"आर्द्राणि मत्स्यमांसानि भक्षाश्च प्रचरीच वा ।
तप्ते सर्पिषि यः खादेत् स गच्छेत् स्त्रीषु न
क्षयम् ।
इत्यशठात् रसे कृष्णे रोहितान् मलर्णाहिते ।
अनुपीतरसान् सिद्धान् पयार्थी प्रयोजयेत् ।"
इति गर्भाधानकरी योगः ।०।
"सर्व्वं वै वीर्य्यमाहरेत् धमता परतो नरः ।
अप्रमत्तो भवेत् स्त्रीभिः सर्व्वतो मनुजर्द्धिरि ।
अतिवायो ह्यसम्पूर्णसर्वधातुः स्त्रियो व्रजन् ।
उपतप्येत सहसा तडागमिव काननम् ।
शुष्करुपं यथा काष्ठं जन्तुदग्धं विजर्ज्जरम् ।
स्पृष्टमाशु विशीर्य्येत तथा वृद्धः स्त्रियो व्रजन् ।
जरया चिन्तया शुक्रं व्याधिभिः कर्म्मकर्षणात् ।
क्षयं गच्छत्यनशनात् स्त्रीणाञ्चातिनिषेवणात् ।
क्षयाद्भयादविश्रम्भाच्छोकात् स्त्रीदोषदर्शनात् ।
नारीणामरसज्ञत्वादविचारादसेवनात् ।
स्वस्थानामपि स्त्रियो यत्र न प्रसिद्ध्यति ।
देवगन्धर्वसत्येषी सर्वे प्रतिषेचयेत् ।'
इति चरके चिकित्सितस्थाने द्वितीयेऽध्याये ।)
वाञ्छा, स्त्री (वाञ्छनमिति । वाछि इच्छायाम् ।
गुरोश्चेति । टाप् ।) आत्मवृत्तिगुणविशेषः ।
सा च द्विविधा यथा । उपायविषयिणी फल
विषयिणी वा । फल सुख दुःखाभावश्च । तत्र
फलेच्छां प्रति फलज्ञानं कारणम् । उपायेच्छां
प्रति इष्टसाधनताज्ञानं कारणम् । इति
सिद्धान्तमुक्तावली । तत्पर्य्यायः । इच्छा २
काङ्क्षा ३ स्पृहा ४ ईहा ५ तृट् ६ लिप्सा ७
मनोरथः ८ कामः ९ अभिलाषः १० तर्षः ११ ।
इत्यमरः ।१।७।२७। आकाङ्क्षा १२ कान्तिः १३
अभ्यर्थ १४ दोहदः १५ अभिलाषः १६ ।
इति शब्दरत्नावली । रुचि १७ वाक् १८
मतिः १९ दोहदम् २० छन्दः २१ । इति
जटाधरः । (यथा कथासरित्सागरे ।११।२०।
"अभिन्दैव च यदीक्षि वाञ्छा मच्छ्रभ्यमिति प्रति ।
मनुष्याणामहद्दैवैषा मनसा स्थितामिति ।")
वाञ्छितं, त्रि, (वाञ्छ + क्त ।) अभिलषितम् ।
यथा,—
"अभिच्छेद यतेनोभयात् ध्याता देवी वरप्रदीम् ।
मुक्ताम्बरधरां देवीं मुक्ताभरणभूषिताम् ।
वाञ्छितं फलमाप्नोति स जीवे नात्र संशयः ।
इति सन्ध्या सर्वे सदा परत्त्वा सर्वं शुभम् ।"
इति तन्त्रसारः ।
वाञ्छिनी, स्त्री, (वाञ्छतीति । वाञ्छ + णिनि ।
ङीप् ।) वाञ्छयोषा नारी । तत्पर्य्यायः ।
कामुका २ कामुकिका ३ । इति त्रिकाण्ड-
शेषः । वाञ्छायुक्तमात्रे, त्रि ।
वाट, स्त्री, मरकः । मार्गभेदः । इत्यमरटीका ।
यथा,—
"वाट पथि वृतौ वाटं वरकं मार्गभेदयोः ।"
इति शेषः ।
वाट, पुं, (वटयते वेष्ट्यते इति । वट + घञ् ।)
मार्गः । वृत्तिस्थानम् । इति मेदिनी । टे, १८ ।
अपि च ।
"मुक्ते नि सरपि पाटे प्राचीनावेष्टनो वृतिः ।"
इति हेमचन्द्रः ।
(वास्तु । मकन । यथा, भागवते । ७।१८।२१ ।
"हृत्वं सदस्य सवर्णं कमकश्च
विवेश विधूयमेधवाटम् ।"
मन्त्रोक्तमिति । वट + घञ् । वटघनार्थिनि
त्रि । यथा मनुः ।८।३५ ।
"ब्राह्मणो वैश्यपाकाशौ अर्थिनो वाटका
दिशी ।
मैत्रयोदुम्बरौ वैश्यो दण्डानर्हन्ति धर्म्मतः ।")
वाटप्रचला, स्त्री, (वाटरोपिता प्रचला ।
शाकपार्थिवादिवत् मध्यपदलोपः ।) पक्षीविशेष
प्रचला । तत्पर्य्यायः । व्यभा २ । इति शब्दा
वली ।
वाटिका, स्त्री, (वटयते वेष्ट्यते प्राचीरादिभि
रिति । वट वेष्टने + घञ्न्यायामिति ण्वुल् । टाप् ।
अत इत्वम् ।) वास्तु । (यथा कथासरित्
सागरे ।७२।१६ ।
"सा तामाद यदि तथित् प्राकार्य्यं प्राकवाटि
काम् ।
प्रविष्टा धावकारं ग्रामस्य पाकमेघत ।")
वाट्यालक । इति शब्दरत्नावली । हिङ्गुपत्री ।
इति शब्दचन्द्रिका ।
वाटी, स्त्री (वटयते वेष्ट्यते इति । वट वेष्टने +
घञ् । गौरादित्वात् ङीष् ।) वाट्यालकः ।
इति शब्दरत्नावली । कुटी । वास्तु । इति
मेदिनी । टे, १८ । प्रियङ्गु पर्य्यायः ।
"वास्तव्यो वेश्म भूमिष्ठो वाटिका यत्पोतक ।"
इति शब्दरत्नावली ।
तस्या यथाविधेया,—
विश्वकर्म्मवचनम् ।
"के वै तथा प्रयन्ताश्च विविधानादि वेदम ।
मठा मनप्रदाश्चादि तानु वच्म यमदूरी ।
वैशाममस्थितमश्च द्विविधं प्रमाणभम् ।
द्विमि कुम वर्षं मरमहुभक्ष भर पभो ।
हाराश्च यथाकाश प्राकारानां प्रमाणकम् ।
भगपद्म को दधो द्विपि कुम प्रयोति ।
विप्रमार्य यथाकाश प्राङ्गणानां प्रमद्दुरी ।
मझक कुलमोवार्थं द्विधि कुम तरोत्तया ।
प्राकारं विंशमानश्च भरिकानां हुरेच्छ ।
हाराश्च यथाकाश प्राकारानां प्रमाणकम् ।
वस्य वस्य ततो काष्ठ प्रमाणं द्विपिरे पभो ।
अमहव वा वैशां वा वर्णं मां वस्तुमर्षेव ।०।
श्रीभगवानुवाच ।
श्वायमे वाटिकैश्च प्राङ्गणाश्च प्रमाण ।

शिविरस्य यदीशाने पूर्व्वे पुष्पप्रदस्तरुः ।
सर्व्वत्र मङ्गलाढ्यश्च नगराणां मनोहरः ।
रसालश्च पूर्व्वस्मिन् पुंसां धन्यप्रदस्तथा ।
शुभप्रदश्च सर्व्वत्र सुरकारो निशामय ।
बिल्वश्च पनसश्चैव जम्बीरो बदरी तथा ।
प्रजाप्रदश्च पूर्व्वस्मिन् दक्षिणे धनदस्तथा ।
सम्पत्प्रदश्च सर्व्वत्र यतो हि वहते यत्नी ।
जम्बुश्च दाडिम कदल्याम्रातकस्तथा ।
बन्धुप्रदश्च पूर्व्वस्मिन् दक्षिणे मित्रदस्तथा ।
सर्व्वत्र शुभदश्चैव धनपुत्रशुभप्रदः ।
धनप्रदो गुवाकश्च दक्षिणे पश्चिमे तथा ।
ईशाने सुखदश्चैव सर्व्वत्रैवं निशामय ।
सर्व्वत्र चम्पकः शुद्धो शुभे भद्रप्रदस्तथा ।
अलाबुश्चापि कुष्माण्डं मालाम्बुश्च सुकासुकः ।
खर्ज्जूरो कर्कटी चापि शिविरे मङ्गलप्रदा ।
मालूरः कारवेल्लश्च वार्त्ताकुश्च शुभप्रदाः ।
लतावल्ली शुभदं सर्व्वं सर्व्वत्र निश्चितम् ।
प्रशस्तं कथितं वाटी निषिद्धञ्च निशामय ।
अश्वत्थो निषिद्धश्च शिविरे नगरेऽपि च ।
वटो निषिद्धः शिविरे निम्बः पौरभयं ततः ।
नगरेषु प्रसिद्धश्च दमनात् पुण्यदस्तथा ।
हि वाटी निम्बकोऽप्यत्र यत्नात् परिवर्ज्जय ।
शरेभ्यो धनहानिः स्यात् प्रजाहानिर्भवेद् ध्रुवम् ।
शिविरेऽतिनिषिद्धश्च नगरे किञ्चिदेव च ।
न निषिद्धः प्रसिद्धश्च नगरेषु तथा पुरे ।
ग्राम्यामतिनिषिद्धश्च प्राशस्त्यं परिवर्ज्जयेत् ।
खर्ज्जूरश्च चतुर्थैव निषिद्धः शिविरे तथा ।
न निषिद्धः प्रसिद्धश्च ग्रामेषु नगरेषु च ।
इत्थञ्च चम्पकादीनां धान्यञ्च मङ्गलप्रदम् ।
ग्रामेषु नगरे चापि शिविरे च तथैव च ।
इक्षुश्चैव शुभदः सन्ततं शुभदस्तथा ।
अशोकश्च शिरीषश्च कम्बश्च शुभप्रदः ।
वचा हरिद्रा शुभदा शुभदश्चार्द्रकस्तथा ।
हरीतकी च शुभदा ग्रामेषु नगरेषु च ।
न वाप्यां मदनो निम्बं तथा चामलकी ध्रुवम् ।
अन्यानामपि शुभदमन्यानाञ्च तथैव च ।
कल्याणसूत्रैरबद्धा वाटी स्थापनकारिणाम् ।
न शुभप्रमन्येषाञ्च मङ्गलकारकं परम् ।
वानराणां वराहाणां गर्द्दभानां गवामपि ।
कुक्कुराणां शृगालानां मार्ज्जाराणामभक्ष्यम् ।
भेकानां शूकराणां सर्व्वेषाञ्चाशुभप्रदम् ।
ईशाने चापि पूर्व्वस्मिन् पश्चिमे च तथोत्तरे ।
शिविरस्य जलं भवनस्याशुभमेव च ।
दीर्घे प्रस्थे समानञ्च न न्यूनाधिकं बुध ।
चतुरस्रे यदि वाटी यदि सा धनदायकम् ।
दीर्घप्रस्थे परिमितौ भेदाद्वेदाञ्च मङ्गलम् ।
मूर्द्धेन रहितं भद्रं न्यूनं न्यूनपदं ध्रुवम् ।
प्रस्थे दशहस्तात् पूर्व्वं दीर्घे चतुर्व्वर्षं तथा ।
पश्चिमं शुभदं द्वारं प्राकारस्य गृहस्य च ।
न मध्यदेशे कर्त्तव्यं किञ्चिन्न्यूनाधिके शुभम् ।
चतुरस्रं चैव शिविरं मङ्गलप्रदम् ।
अधरं तथैवेदं शिविरं मङ्गलप्रदम् ।
अमङ्गलं ह्यन्यदेशं ग्रामाद्यं तथैव च ॥
शिविराभ्यन्तरे भद्रा स्थापिता तुलसी ध्रुवम् ।
धनपुत्रप्रदात्री च पुण्यदा हरिभक्तिदा ।
प्रभाते तुलसीं दृष्ट्वा स्वर्णदानफलं लभेत् ।
मालती यूथिका कुन्दमाधवी केतकी तथा ।
नागेश्वरं मल्लिका च काञ्चनं वकुलं शुभम् ।
अपराजिता च शुभदा शिवासुतामभीप्सितम् ।
पूर्व्वे च दक्षिणे चैव शुभं नात्र संशयः ।
ऊर्द्धं षोडशहस्तेभ्यो नैवं कुर्य्याद्गृहं गृही ।
ऊर्द्धं विंशतिहस्तेभ्यः प्राकारं न शुभप्रदम् ॥
सूत्रधारं तैलकारं स्वर्णकारञ्च चौरकम् ।
वाटीमध्ये ग्राममध्ये न कुर्य्यात् स्थापनं बुध ।
ब्राह्मणं क्षत्रियं वैश्यं सच्छूद्रं गणकं शुभम् ।
भट्टं वैद्यं पुष्पकारं स्थापयेत् शिविरान्तिके ॥
भित्तौ च परिखामानं शतहस्तं प्रशस्तकम् ।
परितः शिविराणाञ्च गम्भीरं दशहस्तकम् ।
सङ्केतपूर्व्वकञ्चैव परिखाद्वारमीप्सितम् ।
शत्रोरगम्यं मित्राणां गम्यमेव सुखेन च ॥
ब्राह्मणीनां तिलिकीनां छिन्नाणानां
तथैव च ।
निम्बानां सिन्धुवाराणामुडुम्बराणाममङ्गलम् ।
शुष्कराणां वटानाञ्चाप्येरण्डानामवाञ्छितम् ।
एतेषामतिरिक्तानां शिविरे कारमीप्सितम् ।
इत्थञ्च कथनं तत्र दूरतो वर्ज्जयेद्बुधः ।
पुण्यदाधर्मं वक्ष्यात् इत्याह कमलोद्भवः ।
कथितं लोकशिक्षार्थं कुरु वाचं विना पुरीम् ।
शुभक्षणं चाप्यधुना गच्छ वत्स यथासुखम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अः ॥

वाटीगोर्द्द पुं, (वाट्यां वास्तुभूमौ रोह सर्व्वो यस्मात् ।) इक्कटश्च । इति रत्नमाला ॥

वाड्क, क्ली, भद्रदर । इति शब्दचन्द्रिका ॥

वाट्यपुष्पी, स्त्री (वाट्य वाट्यां वास्तु वेष्टनीयं वा पुष्पं यस्याः । गौरादित्वात् ङीष् ।) वाट्यालकः । इति रत्नमाला ॥

वाट्या स्त्री, (वट्यते वेष्ट्यते इति । वट वेष्टने + ण्यत् । यद्वा, वाट्यां वास्तुप्रदेशे हिता । वाटी + यत् ।) वाट्यालकः । इति रत्नमाला ॥

वाट्याल पुं, (वाटीं अलति भूषयतीति । अल + अच् ।) वाट्यालकः । इति शब्दरत्नावली । (गुणादयोऽस्य वाट्यालकशब्दे ज्ञातव्याः ॥)

वाट्यालक, पुं (वाट्याल एव । स्वार्थे कन् । वाटीं अलति भूषयतीति । अल + ण्वुल् वा ।) क्षुपविशेषः । बाडियाला इति भाषा । तत्पर्य्यायः । शीतपाकी २ वाट्या ३ भद्रौदनी ४ खरा ५ वाटी ६ विलया ७ वाट्याली ८ वाटिका ९ । इति शब्दरत्नावली । अस्य पर्य्यायान्तरं गुणाश्च बलाशब्दे द्रष्टव्याः ॥

वाट्याली, स्त्री (वाटीमलति भूषयतीति । अल + अच् । गौरादित्वात् ङीष् ।) वाट्यालकः । इति शब्दरत्नावली ॥

वाड, ऋ ङ आप्लावे । इति कविकल्पद्रुमः । (भ्वा-आत्म-अक-सेट् ।) ऋ, अववाडत् । ङ, वाडते लोकः । आप्लावः स्नानम् । उक्तस्नानम् । इत्यन्ये । इति दुर्गादासः ॥

वाड पुं, (धातूनामनेकार्थत्वात् वाड वेष्टने + भावे घञ् ।) वेष्टनम् । इति शब्दमाला ॥

वा(वा)णि, स्त्री (वण + णिच् + "शमादिभ्य इन् ।" उणा ४ । ११७ । इति इन् ।) वानम् । तत्पर्य्यायः । स्यूति २ । इत्यमरः । २ । १० । २८ । स्यूति ३ । इति तट्टीकायां भरतः ॥ (करणे इन् ।) वायन्त्रः । इति हेमचन्द्रः । ३ । ५७७ ॥

वा(वा)णिनी स्त्री (वण शब्दे + णिनि । ङीप् ।) नर्त्तकी । छेका । मत्ता स्त्री । इति हेमचन्द्रः ॥ (यथा, रघुः । ६ । ७५ ।
"यस्मिन् महीं शासति वाणिनीनां
निद्रां विहारार्द्धपथे गतानाम् ।
वातोऽपि नास्रंसयदंशुकानि
को लम्बयेदाहरणाय हस्तम् ॥"
षोडशाक्षरच्छन्दोविशेषः । तल्लक्षणं यथा —
"नजभजरैर्यदा भवति वाणिनी गयुक्तैः ।")

वा(वा)णी स्त्री, (वण + इञ् ङीष् ।) सरस्वती । इत्यमरः । १ । ६ । १ ॥ वचनम् । (यथा, माघे । ११ । १ ।
"चक्षुःपूतं न्यसेत् पादं वस्त्रपूतं पिबेज्जलम् ।
सत्यपूतां वदेद्वाणीं बुद्धिपूतञ्च चिन्तयेत् ॥")
वचनम् । इति शब्दरत्नावली ॥

वात, म ऋ गतिसेवयोः । सुखे । इति कविकल्पद्रुमः । (अद-पर-सक-सेट् ।) अववातत् । अवातयत् । रमानाथस्तु गति सुखसेवयोरिति मत्वा गतौ सुखे गतिसुखम् । वातयति मान्द्यं वात भक्तः सुखयतीत्यर्थः । इत्याह । सुखसेवनयोरिति कौमुदी । इति दुर्गादासः ॥

वात पुं, (वातीति । वा + क्त ।) पञ्चभूतान्तर्गतभूतविशेषः । बातास इति भाषा । तत्पर्य्यायः । गन्धवह २ वायु ३ पवमान ४ महाबल ५ पवन ६ स्पर्शन ७ गन्धवाह ८ मरुत् ९ आशुग १० नभस्वान् ११ मातरिश्वा १२ सदागति १३ मारुत १४ अनिल १५ समीरण १६ [illegible] १७ [illegible] १८ [illegible] १९ [illegible] २० पृषदश्व २१ तरस्वी २२ प्रभञ्जन २३ [illegible] २४ [illegible] २५ [illegible] २६ मोटन २७ ध्वज २८ । अस्य गुणाः । भेदनम् । लघुत्वम् । शोषणम् । कम्पनम् । उन्नमनम् । संचालकत्वम् । शैत्यकारित्वञ्च । तस्य कोपकारणं यथा । [illegible] । [illegible] । [illegible] । [illegible] । इति राजनिघण्टुः ॥ (वैद्यके यथा, अथ वातव्याधिकारः । तत्र वातव्याधीनां सामान्यतो निदानपूर्व्वरूपाण्याह ।
"रूक्षशीताल्पलघ्वन्नव्यवायातिप्रजागरैः
[illegible] ।

हिमान्नपानतया निम्नखनाच्च भानुमयात
मनानिलधारणात् मन्दाग्नौषधिमाभये ।
अतिमत्तनमौरमयात् मन्दतातिमौरनयात्
एतैश्च वमनात्प्रतामनिविरेचनाद्रामत ।
पर्योदयमये निनघनपोस्तृतीयाप्रयो
र्ध्वंरामनिमलोऽपिते ग्रिग्रिरर्धप्रकाशेऽपि च ।
देहे स्रोतांसि रिक्तानि पूरयित्वानिलो बली ।
करोति विविधान् रोगान् सर्वाङ्गैकाङ्गसंश्र
यान् ।”
प्रमितधान चैपदीर्घे प्रोपघमतेन पार्यरिमित
मित्यर्थः । प्रकर्षेण मितमद्यस्य च अश्वम
मतिपुराण ग्राल्यानि । कतिचिदन्नानि मया
न्यपि वातलानि । तत्र आह । गुरुद्रव्यमाला
याम् ।
नीवारश्चिपुटं ग्रलीनवमकग्रामामकसुराफकी
निष्पावाश्च मकुष्टकश्च वरटा मङ्गल्यक
कोमय ।
एते वातकरा इति शेष । नीवारं प्रसाधिका
तीन्नो इति लोके । त्रिपुटं मसारी । ग्रलीन
ग्रलायं । निष्पावो राजमाष । शोका इति
लोके । मकुष्टक मोठ इति लोके । वरटा
वरटिका बरटे इति लोके । मङ्गल्यक मसूरी
इति लोके । पूरंपवन प्रामात । आमत
आमेन मार्गावरोधात् । तत्र उक्तम् ।
वायोर्धातुक्षयात कोपो मार्गस्यावरणेन वा ।
पर्योदयमये वर्षासु । जरामतिगतेऽपि ग्रले
उपेत ओषत्राद्धते । देहे स्रोतांसोऽन्तिमा
समाप्रिताः । कषायादिभिर्हेतुभिर्मर्दोदी
समये हेतुभूते वली अनिल प्रवृद्धो वायु
करोति विविधान् रोगान् । ते रोगा कथ्यन्ते ।
“शिरोग्रहोऽथकेशस्थं जृम्भाकर्णं शुषक ।
जिह्वास्तम्भो गद्गदत्वं मिन्मिनत्वञ्च मूकता ।
वाचालता प्रलापश्च रसाज्ञानमभिज्ञता ।
बाधिर्यं कर्णनादश्च श्रवणं मयाहृतम् ।
मन्यास्तम्भोऽथ नाशिता बाहुशोषोऽपवाहुक ।
अर्दितं चैव विश्वाची कम्पवात उदीरित ।
आक्षेपश्च प्रलापश्च वाताष्ठीला प्रत्यष्ठीला ।
तूनी च प्रतितूनी च तर्षश्चैवमथैव च ।
आटोप पार्श्वशूलश्च त्रिकशूल तथैव च ।
गृध्रसी खञ्ज पङ्गुलिपदौ मममाहृता ।
गुदोऽध्मानमुदितिस्य प्रस्थौ च तल पर ।
कलायखञ्जता चापि खञ्जता पङ्गुता तथा ।
वातुपीवत्वतो च वातकण्टक एव च ।
पादहर्ष पादवाह आक्षेपो दण्डकाभिध ।
वातपित्तहृताधिदमया दण्डापतानक ।
अभिघातहतायेव आयामो द्विविध स्मृत ।
आनाहश्च तथा बाह्यौ धनुर्वातश्च कुब्जक ।
अपतन्त्रोऽपतानश्च पक्षाघातोऽस्थिचाङ्गक ।
कम्प खञ्जी यथा तोदो भेदश्च स्फुरणं तथा ।
रौद्य काठ्यश्च कार्श्यञ्च मैव शोषश्च एव
च ।
अङ्गमर्दोऽङ्गविभ्रंश शिरास्वापस्तथैव च ।

अङ्गशोषश्च शोषश्च शोषकम्पनविस्तृता ।
निद्रानाशः स्वेदनाशो गात्राणिस्फुरणं च ।
शुक्रक्षयो रजोनाशो गर्भनाशः परिश्रम ।
एते ह्यशीतिसंख्याता रोगा योगेन कीर्तिता ।
वातव्याधीति नामानो मुनिभि परि
कीर्तिता ।”
एत एव शिरोग्रहादय एव । योगेन पातेन ।
वातादा व्याधिर्वातव्याधिरिति निरुक्त्या तत्
वातज्वरादिष्वपि प्रवृत्त स्यादत आह
रूढ्या प्रसिद्धा । शिरोग्रहाद्योऽशीतिरेव
वातव्याधिनामा प्रसिद्धा न तु वातज्वरादय ॥ ० ॥
अथ वातव्याधेः सामान्यचिकित्सामाह ।
“मधुराम्लकषायलवणस्निग्धानि
गुरुरुक्षविरोधहरणपथ्यानि ।
दधिक्षत्त्रदीप्ताम्लद्रव्याणि
प्रभुक्तवतस्वमार्गे प्रान्तरतानि कुर्य ।”
इति भावप्रकाश ॥ ० ॥
अपि च ।
“बलपुष्टिकराण्येव वायुरोग निराकरेत् ।
भोजनानन्तर घटी गमनं धावनं तथा ।
हिरन्यपि बहुलापश्च मत्स्यदुग्धमथमैथुनम् ।
गुडक्षीरमन्थश्चैव भरणमाप एव च ।
अतिरूक्षमनाहार शुष्क कलह एव च ।
कटुवाक्य भयं शोक चैव वायुकारकम् ।
आमाशयपक्वे पाक्वे निराकरेण वातौषधम् ।
घृतस्निग्धाश्चैव बलोर्ज प्रकरोदकम् ।
नारिकेलोदकश्चैव मद्यपानं सुमितकम् ।
माहिषं दधि मिश्रं चैव वा मधुकरम् ।
तथा पार्श्वबिलाशयं सौवीरं शीतलोदकम् ।
पक्वतैलादिधिश्च तिक्ततैलञ्च चैवकम् ।
तण्डुलोपनाहमर्दनमापकषोदकम् ।
शीतलोष्णोद्वर्तनं रुचिरचन्दनद्रवम् ।
स्निग्धमधुपानतन्त्रं सुक्तिस्नपनादिकम् ।
एतत्ते कथितं ब्रह्मन् घटी वातप्रशान्तकम् ।
वायवश्चतुर्विधा पुंसां व्यसनापकामका ।”
इति श्रीब्रह्मवैवर्ते ब्रह्मखण्डे १६ अध्याय ॥ ० ॥
अन्यच्च ।
“विश्वादिसमस्तयन्नीनाकषायकपाकादिभरकम् ।
प्रयाशस्थूलपाना च कुशतो कष्टकारिका ।
बला चातिबला रास्ना श्वदंष्ट्रा च पुनर्नवा ।
एरण्डमादिसो पर्णीगुडूचीविपक्वञ्च ।
एषां दशपविभागान् भागान् क्वाथयेत् कृतिके
ऽमृते ।
तेन पानविधिश्च तिल पादे विपाचयेत् ।
आर्द्रे वा यदि वा तथ क्षीरे दत्त्वा चतुर्गुणम् ।
प्रलापदीरघैव तैलतुल्य प्रदापयेत् । ० ।
मलानि यानि दैव्यानि तानि पक्वानि
सम्पूर्ण ।
प्रतपुष्पा देवदारु प्राणनर्वा वचाद्रुद ।
कुष्ठमांसी हैमवच वचामेतं पुनर्नवा ।
यानि यानि तथान्यानि तैलमेतत् प्रदापयेत् ।
स्वत्पूर्वं पार्श्वशूलञ्च गात्रमायास्व नाशयेत् ।

अपस्मारं वातरक्तमाद्यवाञ्च पुमान् भवेत् ।
गतमन्यतरो विन्यात् कि पुनर्मानुषो प्रिय ।
अन्यानो वातभग्नानो कुब्जरात्री हुतां तथा ।
तैलमेतत् प्रदातव्य सर्ववातविकारिणाम् ।”
पुनश्च ।
“धनञ्जय सैन्धवश्च सुप्तौ निष्कपञ्चकम् ।
मध्यमप्य आरनाल तैलमर्धं पचेत्तत ।
अत्ययप्रभवशीघ्रमर्धवातविकारहृत् ।”
इति गारुडे १६८ अध्याय ।
(तथास्य गुणादय ।
“वातस्तु रूक्षलघुचलबहुशीघ्रशीतपरुषविशदः
तस्य रौक्ष्याद्वातला कृशा अल्पाल्पशरीरा
प्रततरूक्षक्षामभिन्नसक्तजर्जरस्वरा जागरू
काश्च लघुत्वाच्च लघुचपलगतिचेष्टाहारव्य
हारा चलत्वादनवस्थितसन्ध्यक्षिभ्रूहन्वोष्ठजिह्वा
शिर स्कन्धपाणिपादा बहुत्वाद्बहुप्रलापकण्डरा
सिराप्रताना शीघ्रत्वात् शीघ्रसमारम्भक्षोभ
विकारा शीघ्रोत्रासरागविरागा श्रुत
ग्राहिणोऽल्पस्मृतयश्च शैत्यात् शीतासहिष्णव
प्रततशीतकोद्वेपकस्तम्भा पारुष्यात् परुष
केशश्मश्रुरोमनखदशनवदनपाणिपादाङ्गा वैश
द्यात् स्फुटिताङ्गावयवा सततसन्धिशब्दगामिन
श्च भवन्ति एवं गुणयोगात् वातला प्रायेणाल्पबला
श्चाल्पायुषश्चाल्पापत्याश्चाल्पसाधनाश्चाल्पधनाश्च।
इति चरके विमानस्थानेऽष्टमेऽध्याये । अस्य
वृद्धिलक्षणं यथा ।
“तत्र वातवृद्धौ त्वक्पारुष्यं कार्श्यं कार्ष्ण्यं
गात्रस्फुरणमुष्णकामिता निद्रानाशोऽल्पबल
गाढवर्चस्त्वञ्च ।”
“तत्र वातक्षये मन्दचेष्टताल्पवाक्त्वमप्रहर्षो
मूढसंज्ञता च ।” इति सुश्रुते सूत्रस्थाने पञ्च
दशेऽध्याये । ० । आमविशिष्टस्यास्य
चिकित्सा यथा,—
“विश्वसतस्तु कोष्ठस्थे वाते वाचं पिबेन्नर ।
आमाशयस्थे शुद्धस्य यथा दोषहरी क्रिया ।
आमाशयगते वाते छर्दिताय यथाक्रमम् ।
देय षड्धरणो योग सप्तरात्रं सुखाम्बुना ।”
“पक्वाशयगते वाते हितं स्नेहविरेचनम् ।
बस्तय शोधनीयाश्च प्राशाश्च लवणोत्तरा ।”
स्नेहनस्यम् ।
“मूर्धोन्दयरक्तगते वातो स्नेहे पटे हरेत् ।
श्रोत्रगते स्वेदनञ्च तत्परे वातनाशनम् ।
कर्णे स्थितवते वाते विशिरःकिणितिव ।
मदमांनायसस्थिरा प्राप्तं कुर्यादिव
विशोधनम् ।
स्वेदोपनाहादिकर्मोन्मर्दनानि च ।
स्नायुसन्धिशिरा प्राप्ते कुर्याद्वाते विचक्षण ।
स्वेदाभ्यङ्गावगाहांश्च उपनाहांश्च कारयेत् ।
शोता प्रदेहा रक्तस्थे विरेको रक्तमोक्षणम् ।
विरेको मांसमेदस्थे निरूहा शमनानि च ।
बाह्याभ्यन्तरत स्नेहैरस्थिमज्जगतं जयेत् ।
हर्षोऽन्नपानं शुक्रस्थे बलशुक्रकरं हितम् ।

विवृद्धमार्गं शुक्रन्तु दृष्ट्वा दद्याद्विरेचनम् ।
गर्भे शुष्के तु वातेन बालानाञ्चापि शुष्यताम् ।
सितामधुककाश्मर्य्यैर्हितमुत्थापने पयः ॥"
इति वैद्यकचक्रपाणिसङ्ग्रहे वातव्याध्यधिकारः ।)

वातकः पुं, (वात इव चञ्चलः । इवार्थे कन् । यद्वा, वातं करोतीति । कृ + "अन्येभ्योऽपीति" डः ।) अश्मन्तकः । इत्यमरः । २ । ४ । १४८ ॥

वातकर्म्म [न्], (वातस्य कर्म्म ।) अपानवायुक्रिया । पर्द्दनम् । यथा,—

वराह उवाच ।
"भुक्त्वा यदन्नं मे भूमे । वातकर्म्म प्रमुञ्चति ।
एवं हि पुरुषो मूर्खो वातपीडितमानसः ॥
मक्षिका पञ्च वर्षाणि चीणि वर्षाणि मूषकः ।
श्वा चैव त्रीणि वर्षाणि कूर्म्मो वै जायते नवः ॥
एष वै तापनः देवि । मेध्यन मम प्रशंसति ।
यो वै शास्त्रं विजानाति मम कर्म्मपरायणः ।
श्रुत्वा वाक्यं भगवतो प्रत्युवाच वसुन्धरा ॥
धरण्युवाच ।
अशुभं लभते पापं तव कर्म्मपरायणः ।
तस्य देव सुखार्थाय विशुद्धिं वक्तुमर्हसि ॥
वराह उवाच ।
यस्तु कायेन मे देवि । कथमार्त्तं मयानघे ।
अपराधमिमं कृत्वा चरेद्दुःखेन कर्म्मणा ॥
याबकेन दिनान्त्रीणि वर्त्तेन च पुनस्त्रयः ।
कर्म्म चैवं ततः कृत्वा स च मे नापराध्यति ॥
सर्व्वसङ्गं परित्यज्य मम लोकाय गच्छति ।
एतत्ते कथितं भद्रे मदत्कर्म्मापराधिनः ॥
दोषश्चैव गुणश्चैव यत्त्वया परिपृच्छितम् ॥"
इति वराहपुराणे भक्तकर्म्मप्रायश्चित्तम् ॥

वातकी, [न्] त्रि (वातोऽतिशयितोऽस्यास्तीति । वात + "वातातीसाराभ्यां कुक् च ।" ५ । २ । १२९ । इति इनि । कुक् च ।) वातरोगयुक्तः । तत्-पर्य्यायः । वातरोगी २ । इत्यमरः । ३ । १ । ५९ ॥

वातकुम्भः पुं (वातस्य कुम्भ इव ।) गजकुम्भाधो-भागः । इति हेमचन्द्रः । ४ । २९६ ॥

वातकेतुः, पुं (वातस्य केतुरिव ।) धूलिः । इति त्रिकाण्डशेषः ॥

वातकेलिः, पुं, (वात नु स सुरते + भावे घञ् । वातेन सुखेन केलिर्यत्र ।) कलालापः । विटस्य दन्तक्षतः । इति मेदिनी । ले, १६१ ॥

वातगामी, [न्] पुं (वातेन वायुना सह गच्छतीति । गम + णिनि ।) पक्षी । इति केचित् ॥

वातगुल्मः, पुं, वातुलः । यथा,—
"वातुलो वातगुल्मः स्यादाकारवाक्प्रबलादिकः ।
अन्धालिका प्राकृतिको वातलो मरुपालिका ॥"
इति त्रिकाण्डशेषः ॥
(वातेन जातो गुल्मः ।) रोगविशेषः । (यथा, माकण्डेये । १८ । ५० ।
"वातगुल्मप्रमालम्बपवनदारणं तयोरदे ।
वराम् वापि पयः सानुमांस्तु प्रतिपिवेत् ॥"
अस्य चिकित्सा यथा —
"यवानीचित्रकदन्तीदारुदेवदारुचूर्णं समम् ।
क्षारपञ्चोऽपि हितं पाने धान्यनागरकोऽथवा ।
वातगुल्मेषु सर्व्वेषु ज्वरेषु विषमेषु च ।
रास्नाद्यपञ्चक वापि वातगुल्मस्य पाचनम् ।
पाठी सौवर्च्चलं शुण्ठी पाचनं वातगुल्मिने ॥"
"भागं त्रिमितिकृत् पथ्या त्रिवृता त्रिगुणा स्मृतम् ।
चूर्णं गुडान्वितं देयं वातगुल्मविरेचनम् ॥
दन्त्यास भाग एकस्तु द्वौ भागौ च हरीतकी ।
त्रिवृतायास्त्रिभागाः स्यात् शुण्ठ्याश्चत्वार एव च ।
प्रक्षिप्य सर्व्वमेकत्र सर्व्वतुल्यगुडेन तु ।
वटकं भक्षयेत् प्रातस्तस्योपरि जलं पिवेत् ।
अचिराद्वा विनेकत्र वातगुल्मोपशान्तये ॥"
इति वातगुल्मचिकित्सा । इति हारीते चिकित्सितस्थाने चतुर्द्दशोऽध्याये ।) तस्य निदानादिर्गुल्म-शब्दे द्रष्टव्यः ॥

वातघ्नी, स्त्री, (वातं हन्तीति । हन + टक् । ङीप ।) शालपर्णी । अश्वगन्धा । सिंहली-स्तुपः । इति राजनिर्घण्टः ॥

वातूलं स्त्री, (वातेन उड्डीयमानं तूलम् ।) आकाशोड्डीयमानतूलम् । बुढ़िर सूता इति भाषा । तत्पर्य्यायः । ब्रह्मतूलकम् २ इन्द्रतूलम् ३ श्रीपुष्पकम् ४ वैधकचम् ५ मरुद्ध्वजम् ६ । इति हारावली । २१ ॥

वातध्वजः, पुं, (वातो वायुर्ध्वजो यस्य ।) मेघः । इति शब्दमाला ॥

वातपित्तशूलं, स्त्री, (वातपित्ताभ्यां जायते इति । जन + ड । तच्च तत् शूलञ्चेति ।) शूल-रोगविशेषः । तस्य औषधं यथा,—
"मातुलुङ्गस्य निर्यासं गुडाद्येन समन्वितम् ।
वातपित्तशूलानि हन्ति वै पावकोपमः ॥"
इति गारुडे १८८ अध्यायः ॥
(तथास्याश्च चिकित्सा । यथा,—
"दुरालभा पर्पटकञ्च त्रिवृत्
पटोलनिम्बामृतातिक्तरोहिकम् ।
क्वाथं वा कल्कमिदं प्रयोज्यं
सपित्तवातोद्भवशूलशान्त्यै ॥"
इति हारीते चिकित्सितस्थानेऽष्टमेऽध्याये ।)

वातपुत्रः पुं (वातस्य पुत्रः ।) भीमसेनः । हनु-मान् । महाधूर्त्तः । इति मेदिनी । रे ८१ ॥

वातपोथः, पुं (वातं वातरोगं पुथ्यति हिन-स्तीति । पुथ + अण् ।) पलाशवृक्षः । इत्य-मरः । २ । ४ । २९ ॥ (अस्य पर्य्यायो यथा —
"वातपोथः पलाशः स्यात् क्षारश्रेष्ठश्च किंशुकः ।
राजादनो ब्रह्मवृक्षो याज्ञिको रक्तपुष्पकः ॥"
इति वैद्यकरत्नमालायाम् ।)

वातप्रमीः, पुं स्त्री (वातं प्रमिमीते वातानु-सृतं प्रगच्छतीति । वात + प्र + मा माने + "वातप्रमीः ।" उणा ४ । १ । इति ईप्रत्यये-नाधुः ।) वातमृगः । इत्यमरः । २ । ५ । ७ ॥ हरिणभेद इति भाषा । नकुलः । अश्वः ।
इति अभिधानरत्नमाला ॥ (वायुवद्गम-नाभिनि, त्रि । यथा, ऋग्वेदे । ४ । ५८ । ७ ।
"सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पत-यन्ति यह्वाः ॥")

वातफुल्लान्त्रं, स्त्री (वातेन फुल्लं विकसितं यद-न्त्रं तत् ।) फुप्फुसः । इति भूरिप्रयोगः ॥

वातमजः, पुं, (वातमभिमुखीकृत्य अजति गच्छ-तीति । वात + अज + "वातशुनीतिलशर्द्धेष्वज-धेट्तुदजहातीनां उपसंख्यानम् ।" ३ । २ । २८ । इत्यस्य वार्त्तिकोक्त्या खश् । "अरुर्द्विषद-जन्तस्य मुम् ।" ६ । ३ । ६७ । इति मुम् ।) वातमृगः । इति जटाधरः ॥ (वातगामिनि, त्रि । यथा, भट्टि । २ । १० ।
"मेघात्ययापात्तचमोपशोभ
कदम्बकं वातमजं मृगाणाम् ॥")

वातमण्डली स्त्री, (वातस्य मण्डली ।) वात्या । इति त्रिकाण्डशेषः ॥

वातमृगः पुं (वाताभिमुखगामी मृगः ।) वात-प्रमीः । इत्यमरः । २ । ५ । ७ ॥

वातरक्तं स्त्री, (वातदूषितं रक्तं यत्र ।) रोग-विशेषः । तस्य विप्रकृष्ट निदानमाह ।
"लवणाम्लकटुक्षारस्निग्धोष्णाजीर्णभोजनैः ।
क्लिन्नशुष्काम्बुजानूपमांसपिण्याकमूलकैः ॥
कुलत्थमाषनिष्पावशाकादिपललेक्षुभिः ।
दध्यारनालसौवीरशुक्ततक्रसुरासवैः ॥
विरुद्धाध्यशनक्रोधदिवास्वप्नातिजागरैः ।
प्रायशः सुकुमाराणां मिष्टान्नसुखभोजिनाम् ।
स्थूलानां सुखिनां चापि प्रकुप्यते वातशोणितम् ॥
अभिघातादशुद्ध्या च
नृणामसृजि दूषिते ॥"
कारो यवक्षारादिः । अजीर्णभोजने अजीर्णे सति भोजने । अतिमात्रभोजनैरित्यर्थः । क्लिन्नादीनि मांसस्य विशेषणानि । क्लिन्नं क्वथि-तम् । शुष्कमातपे शोषितम् । अम्बु जलं तदादि-मांसम् । आनूपं मांसादिदूषितदुष्टं मांसम् । पिण्याकं तिलकल्कः । मूलकं प्रसिद्धमेव । निष्पावः शिम्बीधान्यम् । शाकं पत्रशाकम् । आदिग्रहणेन धान्याकादीनि शाकानि गृह्यन्ते । पललं शुद्धतिलादिरोपदर्शितमपि मांसं वात-शोणितं प्रकोपयेत् । सुरादीनि तु मांस-विशिष्टो वातशोणितं प्रकोपयेत् । आरनालं धान्याम्लम् । शुक्तं धान्याम्लम् । सौवीरं धान्याम्लम् । तक्रं चतुर्थांशजलयुक्तं मथितम् । सुरा मद्यभेदः । आसवं मद्य-भेदः । विरुद्धं क्षीरमत्स्यादि । अध्यशनम् । अजीर्णे भुञ्जते यत् तदध्यशनमुच्यते । अतिजागरो निद्रा । प्रायः बाहुल्येन । सुकु-माराणां मृदुकायानां मृदुचारिणाम् । अथवा मिष्टान्नसुखभोजिनाम् । अथवा आरनालैः दध्नां स्थूलानां मुण्डवाच इत्यर्थः । वस्य नोद्वेगेऽनुभवेन कश्चित् वायुर्भवति रक्तस्य प्रकृतिः । इत्यादि कायस्थैव । यद्वा

मन्दानि यानानि । अत्यन्तं दिवास्वप्नम् । विदाहि विष्टम्भकृन्मत्स्यपयआदि । अविदाहाद्युष्णस्य । अविश्रमेऽपि यस्य भुक्ते विदग्धे सत्युपरि भुक्तमशनमेव । अध्यशनमुक्तापेक्षितव्यम् विरुद्धाध्यशनस्य विशेषतो हेतुत्वाभावम् । पश्चात् वातशोणितं प्रकुप्येदित्यनेनान्वयः । एतेषां कारणानां मध्ये केनचिदपि केन चिदुभयमपि प्रकुप्येत् ॥ * ॥ सम्प्राप्तिमाह ।

"कृत्स्नं रक्तं विदहत्याशु तच्च
दुष्टं स्रस्तं पादयोश्चीयते तु ।
तत् सम्पृक्तं वायुना दूषितेन
तत्प्राबल्यादुच्यते वातरक्तम् ॥"

पूर्व्वोक्तैर्हेतुभिः कृत्स्नं समस्तं रक्तं विदहति अत्र दग्धधातुरविवक्षितकर्म्मकः । तेन विदहति विदग्धं भवतीत्यर्थः । तच्च दुष्टं रक्तम् । स्रस्तं अधोगतम् । पादयोश्चीयते सञ्चितं भवति । तद्रुधिरं दूषितेन स्वहेतुवायुना संपृक्तं मिलितं वातरक्तमुच्यते । अत्र चैतस्य सम्प्राप्तिरुक्ता सुश्रुतेन ।

"प्रायो रक्तं दुष्टिमायाति तच्च
वायोर्मार्गं संवृणोत्याशु यातम् ।
क्रुद्धोऽत्यर्थं मार्गरोधात् स वायु-
रत्युद्रिक्तं दूषयेद्रक्तमाशु ॥"

अत्र प्रथमं रक्तस्य दुष्टत्वात् रक्तवातमिति व्यपदेशमुचितं भवतु तथापि । तत्प्राधान्यान्निति । तत्र वातस्य दोषबलेन प्राधान्यात् वातरक्तमिति व्यपदिश्यते ॥ * ॥ पूर्व्वरूपमाह ।

"स्वेदोऽत्यर्थं न वा कार्ष्ण्यं स्पर्शाज्ञत्वं क्षतेऽति- रुक् ।
सन्धिशैथिल्यमालस्यं सदनं पिड़कोद्गमः ॥
जानुजङ्घोरुकट्यंसहस्तपादाङ्गसन्धिषु ।
निस्तोदः स्फुरणं भेदो गुरुत्वं सुप्तिरेव च ॥
कण्डूः सन्धिषु रुग्भूत्वा भूत्वा नश्यति चास- कृत् ।
वैवर्ण्यं मण्डलोत्पत्तिर्वातासृक्पूर्व्वलक्षणम् ॥"

अथाधिकवातस्य वातरक्तस्य लक्षणमाह ।

"वातेऽधिकेऽधिकं तत्र शूलस्फुरणतोदनम् ।
शोथस्य रौक्ष्यं कृष्णत्वं श्यावतावृद्धिहानयः ॥
धमन्यङ्गुलिसन्धीनां सङ्कोचोऽङ्गग्रहोऽतिरुक् ।
शीतद्वेषानुपशयौ स्तम्भवेपथुसुप्तयः ॥"

तत्र वातस्य शूलादिकमधिकम् । यत आह सुश्रुतः ।

"वाताधिक्ये तोदभेदप्रशोषौ
स्वापोपेतौ वातरक्तेन पादौ ॥" इति ।

अत्र सुप्तिः स्पर्शाज्ञता ॥ * ॥ अधिकरक्तवातरक्तमाह ।

"रक्ते शोथोऽतिरुक्तोदस्ताम्रश्चिमिचिमा- यते ।
स्निग्धरूक्षैः शमं नैति कण्डूक्लेदसमन्वितः ॥"

अत्रापि तथाह ।

"रक्ते विदाहः सतोदः शोथो रक्तो भृशं मृदु- स्तुदः ।
स्पर्शासहत्वं रुग्दाहः शोथपाकौ भृशोष्मता ।
विशेषश्च मादाधिक्ये बोद्धव्यः । यत आह सुश्रुतः ।

"पित्तासृग्भ्यां परदाहौ भवेतां
सवर्णौ रक्तशोथौ मृदू च ।"

पादाविति शेषः । अधिककफं तमाह ।

"कफे स्तैमित्यगुरुतासुप्तिस्निग्धत्वशीतता ।"

गुरुतादयः पादयोरेव । यत आह सुश्रुतः ।

"कण्डूमन्तौ श्वेतशीतौ सशोथौ
पीनस्तब्धौ श्लेष्मदुष्टे तु रक्ते ॥ * ॥"

अभिक्रियमाणवातरक्तस्य उपद्रवानाह ।

"अस्वप्नारोचकश्वासमांसकोथशिरोग्रहाः ।
मूर्च्छा च मदरुक्तृष्णा ज्वरमोहप्रवेपकाः ॥
हिक्कापाङ्गुल्यवीसर्पपाकतोदभ्रमक्लमाः ।
अङ्गुलीवक्रतास्फोटदाहमर्म्मग्रहार्ब्बुदाः ॥"

मांसकोथो मांसगलनम् ॥ * ॥ असाध्यत्वादिक- माह ।

"एतैरुपद्रवैर्वर्ज्यं मोहेनैकेन वापि यत् ।
असम्पूर्णोपद्रवं याप्यं साध्यं स्यान्निरुपद्रवम् ॥
एकदोषानुगं साध्यं नवं याप्यं द्विदोषजम् ।
त्रिदोषजमसाध्यं स्याद्यस्य च स्युरुपद्रवाः ॥"

अथ वातरक्तस्य चिकित्सामाह ।

"वातशोणितिनो रक्तं स्निग्धस्य बहुशो हरेत् ।
अल्पाल्पं रक्षयेद्वायुं यथादोषं यथाबलम् ॥
रुग्रागतोददाहेषु जलौकोभिर्विनिर्हरेत् ।
शृङ्गतुम्बैश्चिमिचिमाकण्डूरुग्दाहान्वितम् ॥
प्रच्छानेन शिराभिर्वा देशाद्देशान्तरं व्रजेत् ।
अङ्गे ग्लाने न तत् स्राव्यं रूक्षे वातोत्तरे च यत् ॥
गम्भीरं श्वयथुं स्तम्भं कम्पं स्नायुशिरा- गतान् ।
रोगानन्यांश्च वातोत्थान् कुर्य्याद्वायुरतिस्रुतः ॥
विविधान् वातरोगान् वा अथवा वातसञ्चितम् ।
रक्तं कुर्य्यात्ततः स्निग्धान्तु प्रस्राव्य निर्हरेत् ॥
विरेचयेत् पित्ताढ्यं स्नेहयुक्तैर्विरेचनैः ।
बाह्यमार्गगताभ्यङ्गपरिषेकोपनाहनैः ॥
विरेकास्थापनस्नेहपानैर्गम्भीरमाचरेत् ॥
दिवास्वप्नं कोपनं च व्यायामं मैथुनं तथा ।
कट्वम्लं गुर्व्वभिष्यन्दि लवणान्नं च वर्जयेत् ॥
पुराणा यवगोधूमनीवाराः शालिषष्टिकाः ।
भोजनार्थे रसार्थे तु विष्किरा प्रतुदा हिताः ॥
आढकीचणका मुद्गा मसूराः समकुष्ठकाः ।
यूषार्थं बहुसर्पिष्काः प्रशस्ता वातशोणिते ॥
सुनिषण्णकवेत्राग्रकाकमाचीशतावरी ।
वास्तूकोपोदिकाशाकं शाकं सौवर्च्चलं तथा ॥
घृतमांसरसैर्भृष्टं शाकमल्पं च दापयेत् ।
हिमो गोधूमचूर्णश्च क्षारपीतपलङ्कषे ॥
यवकाहलिका धत्रा मिश्रा पयसि हिमजा ।
क्षीरविदारिकाभिश्च बहुमानमथेरति ॥
दुग्धमिदं प्रशस्तं स्याद्धितं मसवशोणिते ।
गुडूचीसारकल्काभ्यां पयसा पक्वं सर्पिरुत्तमम् ।
वातरक्तं निहन्त्याशु कुष्ठं हरति दुस्तरम् ॥"

गुडूचीघृतम् ॥ * ॥

"कृत्वा भवेद्गुडूच्यास्तु बन्दीकन्थयुते ।
पादशेषः कषायस्तु गोदुग्धं द्रोणसम्मितम् ।
तिलतैलाढकं ताभ्यां पचेन्मृद्वग्निना भिषक् ॥
वक्ष्यमाणैस्तथा द्रव्यैः सम्यक्कल्कीकृतैः पचेत् ।
मञ्जिष्ठा मधुकं कुष्ठं जीवनीयगणस्तथा ॥
एलागुरु च नलिका मांसी चाश्मभिदा वचा ।
हरेणु सारिवे चैव स्थिरा चामलकी तथा ॥
मधुरी माषी शताह्वा च विडङ्गमाला च पञ्चकम् ।
माणकैरण्डपद्मकोत्पलचन्दनम् ॥
एतानि कल्कवस्तूनि कथितानीह कोविदैः ।
पानेऽभ्यङ्गेऽनुवासे च तैलमेतत्प्रयोजयेत् ॥
वातरक्तं तदुद्भूतोपद्रवांश्च नाशयेत् ।
अस्य पुंसवनं स्त्रीणां गर्भदं वातपित्तनुत् ॥
श्वित्रकुष्ठव्यथामर्दं कफाहितामयान् ।
हन्यादसाध्यान् दोषान् गुडूचीतैलमुत्तमम् ॥"

इति गुडूचीतैलम् । इति भावप्रकाशः ॥

(यथा च ।

"कुपितौ वातरक्ते च विमार्गे पृथगाश्रयम् ।
हृद्भागे गुरुमेकाग्रामपि वेधोऽभिवर्द्धनम् ॥
अधिमात्रतनुत्वस्य वर्णस्यालिवारणात् ।
हेतुलक्षणभेदाभ्यां यथावद्गुरुरब्रवीत् ॥"

"अभिघातादशुद्ध्या च प्रदुष्टे शोणिते नृणाम् ।
कषायकटुतिक्ताल्परूक्षाहारादभोजनात् ॥
अभीक्ष्णयानयानाद्युष्ट्राश्ववाहनात् ।
उष्णे चाध्वगमनाद्व्यायामादतिमैथुनात् ॥
वायुर्विवृद्धो वृद्धेन रक्तेनावारितः पथि ।
क्रुद्धः सन्दूषयेद्रक्तं तज्ज्ञेयं वातशोणितम् ॥
तस्य स्थानं करौ पादावङ्गुल्यः सर्व्वसन्धयः ।
कृत्वादौ हस्तपादे तु मूलं देहे विधावति ॥
सौक्ष्म्यात् सर्व्वसरत्वाच्च पवनस्यासृजश्च तत् ।
सर्व्वविभिन्नं सूक्ष्मं चक्रवान्निविशते ॥
स्थितं पित्तादिसंसृष्टं तास्ता वच्छति वेदनाः ।
करोति दुःखं तेषां तु तथा प्रायेण सन्धिषु ॥"

"बहुत्वमथ गम्भीरं द्विविधं तत् प्रचक्षते ।
त्वङ्मांसाश्रयमुत्तानं गम्भीरं त्वन्तराश्रयम् ॥
कण्ड्वादिदाहरागायामतोदस्फुरणकुञ्चनैः ।
अन्विता श्यावरक्ता त्वग्बाह्ये ताम्रा तथेष्यते ॥
गम्भीरे श्वयथुः स्तब्धः कठिनोऽन्तर्भृशार्त्तिमान् ।
श्यावस्ताम्रोऽथवा दाहतोदस्फुरणपाकवान् ॥
रुग्विदाहान्वितो भीतो वायुः सन्धिष्वलं [illegible] ।
खञ्जमिव चरत्यन्तः कुब्जं चैव [illegible] ॥
करोति खञ्जं पङ्गुं वा शरीरे सर्व्वतश्चरन् ।
सर्व्वैर्लिङ्गैश्च विज्ञेयं वाताद्यधिकतोऽपि वा ॥"

"रक्तमार्गं निहन्त्याशु शाखासन्धिषु मारुतः ।
निवेश्यान्योन्यमावार्य वेदनाभिर्हरेदसून् ॥
तत्र त्वचि स्थिते चैव तत्कालं [illegible] ।
दुष्टमेव सिराभिर्वा यथादोषं यथाबलम् ॥
कण्डूदाहरुजाशोथरक्तकार्ष्ण्यं [illegible] ।
प्रलेपैरभ्यङ्गपरिषेकैश्चिमिचिमायताम् ॥
देशादेव बहुशो बाह्यं सिराभिः पुष्पितैः शरैः ॥"

"[illegible]

सद्योऽथवैकपक्षाद्वैव वातोत्तरमुपाचरेत् ।
विरेचनघृतक्षीरपानैः सेकैः सवस्तिभिः ।
शीतैर्निर्वापणैश्चापि रक्तपित्तोत्तरं जयेत् ।
वमनं मृदुनात्यर्थं स्नेहसेकादिलङ्घनम् ।
कोष्णलेपाश्च शस्यन्ते वातरक्ते कफोत्तरे ।
कफवातोत्तरे शीतैः प्रलिप्ते वातशोणिते ।
विदाहः शोथरुक्कण्डूविवृद्धिः स्तम्भमाप्नुयात् ।
पित्तरक्तोत्तरे दाहः क्लेदोऽवदरणं भवेत् ।
उष्णैस्तस्माद्विपर्यासदोषबलं बुद्ध्वाचरेत् क्रियाम् ।"
"द्राक्षामलकखर्जूरकाश्मर्यैर्मधुरसैः समाः ।
पृथग्विदार्याश्च रसः तथा क्षीरचतुर्गुणम् ।
एतत् प्रायौगिकं सर्पिः पारूषकमिति स्मृतम् ।
वातरक्ते क्षते क्षीणे वीसर्पे पैत्तिके ज्वरे ।'
इति पारूषकं घृतम् ॥
"मधुपर्ण्याः पलं पिष्ट्वा तैलप्रस्थं चतुर्गुणे ।
क्षीरे साध्यं शतगुणमित्येवं मधुकात् शते ।
सिद्धमेतच्च निर्गोपे स्यात् वातासृक्श्वासकासनुत् ।
हृत्पाण्डुरोगवीसर्पकामलादाहनाशनम् ।
बलाकषायकल्काभ्यां तैलं क्षीरसमं तथा ।
सहस्रशतपाकं वा वातासृग्वातरोगनुत् ।
रसायनं श्रेष्ठतमं इन्द्रियाणां प्रसादनम् ।
जीवनं बृंहणं स्वर्यं शुक्रासृग्दोषनाशनम् ।"
"चन्द्रपादाम्बुसंसिक्ते सौमत्स्यन्दच्छदे ।
शयने पुलिनस्पर्शे शीतमारुतवीजिते ।
चन्दनाङ्कतराद्राङ्ग्यः प्रिया नार्यः प्रियंवदाः ।
स्पर्शात् शीताः सुखस्पर्शाः घ्नन्ति दाहं रुजं क्लमम् ।"
'गम्भीरे रक्तमाक्रान्तं स्थायित्वात्तु निमज्जतः ।
रक्तपित्ताभिभूतत्वात् पाकमाशु नियच्छति ।
भिन्नं स्रवति वा रक्तं विदग्धं पूयमेव वा ।
तयोः क्रिया विधातव्या व्रणशोधनरोपणी ।
कुष्ठादुपद्रवाश्चैव क्रिया स्यात् व्याधिकित्
सिताः ॥"
इति चरके चिकित्सास्थाने २९ अध्यायः ।
'शतकं पारदं लौहं चर्म तालं मनःशिला ।
शिलाजतु पुरं सह समभागं विचूर्णयेत् ।
विडङ्गं त्रिफला चैव बाकुची च पुनर्नवा ।
चित्रकं देवकाष्ठं च दार्व्यौ चैलापराजिता ।
चूर्णमेषां समं शुद्धं धन्वमेकत्र कारयेत् ।
त्रिफलाभृङ्गराजस्य रसेनैव पृथक् पृथक् ।
विभाव्य भक्षयेत् मासमात्रं दिने दिने ।
क्रमादनुपानं त्रिफला पत्र पुष्प फलं यमम् ।
मासमात्रं प्रदद्यात् सर्ववातविकारहृत् ।
वातरक्तं महाघोरं गम्भीरं सर्वसम्भवम् ।
सर्वाङ्गपक्षयुक्तं साध्यासाध्यं निकृन्तति ।"
इति वातरक्तान्तको रसः ॥
"अथ शुद्धेन तालेन समं तुत्थेन मेलयेत् ।
द्रवेण गुडूच्याः क्वाथकेनाथ बालुकायन्त्रके पचेत् ।
अयं तालेश्वरो नाम रसः परमदुर्लभः ।
हन्यात् कुष्ठानि सर्वाणि वातरक्तमथापि वा ।
शूलमष्टविधं चैव रसस्तालेश्वरो महान् ।"
इति महातालेश्वरो रसः ।
इति वैद्यकरसेन्द्रसारसंग्रहे वातरक्ताधिकारः ।

अथास्य पथ्यापथ्यविधिः ।
"दयोरससुतिः सद्योजम्बीकायज्ञाङ्गभिः ।
घृतधौतघृताभ्यङ्गो मेषीदुग्धावसेचनम् ।
यवषष्टिकनीवारकलमा वयशालयः ।
गोधूमाश्चणका मुद्गास्तुवर्योऽपि मकुष्टकाः ।
अजानां महिषीणाञ्च गवामपि पयांसि च ।
लावतित्तिरिबर्हिणहारीतचूडादिविष्किराः ।
मसुराः शुकनासाकपोतकटकान्य ।
उपोदिकाकाकमाची वेत्राग्रं सुनिषण्णकम् ।
वास्तुकं कारवेल्लञ्च तण्डुलीयं प्रसारकौ ।
खर्जूरी द्राक्षामलकं अपि धान्याकमस्तकम् ।
पटोलं तुत्थञ्च दन्तीकाचिकशर्करा ।
नवनीतं सोमवल्ली कस्तूरी सितचन्दनम् ।
त्रिफलागुरुदेवाह्वपत्रं स्नेहमर्दनम् ।
तिक्तञ्च पवनसृष्टं वातरक्तगदे नृणाम् ।
दिवास्वप्नाग्निसन्तापव्यायामातपमैथुनम् ।
माषाः कुलत्था निष्पावाः कलायाः क्षारसेवनम् ।
अम्बुपानं पर्याषानि विरुद्धानि दधीनि च ।
इक्षवो मूलकं मद्यं पिण्याकोऽम्लानि काञ्जिकम् ।
कटुष्णं गुर्वभिष्यन्दि लवणानि च सर्वशः ।
इत्यपथ्यं निर्दिष्टं वातरक्तगदे नृणाम् ।"
इति वैद्यकपथ्यापथ्यविधिग्रन्थे वातरक्ताधिकारः ।)

वातरक्तघ्न पुं (वातरक्तं रोगविशेषं हन्तीति । हन+टक् ।) कुकुरद्रुः । इति शब्दचन्द्रिका । कुकुरसुंडा इति भाषा ।

वातरक्तारि पुं, (वातरक्तस्य अरिर्नाशकः ।) गिलोयी लता । इति शब्दचन्द्रिका । गुलञ्च इति भाषा ।

वातरङ्ग, पुं, (वातेन वायुना रङ्गो यस्य । चिरमारुतचलत्वात्तस्य तथात्वम् ।) अश्वत्थः । इति शब्दरत्नावली ।

वातरथ पुं, (वातो वायू रथो यस्य ।) मेघः । इति त्रिकाण्डशेषः । (वातो रथ प्रापको यस्येति वायुप्रापके, त्रि । यथा, भागवते । ३ । २८ । २ ।
'यथा वातरथो घ्राणमावृङ्क्ते गन्ध आशयात् ।
एवं योगरतं चेत आत्मानमविकारि यत् ॥")

वातरायण पुं (वातेन वायुजनितरोगेण रायति शब्दायते इति । रै शब्दे+ल्यु ।) उन्मत्तः । निष्प्रयोजनपुरुषः । काण्डम् । करपत्रम् । कूटः । शरक्षेपः । इति मेदिनी । ने, ११६ । सरलद्रुमः । इति शब्दरत्नावली ।

वातरूष, पुं (वातेन रूष्यते भूष्यते इति । रूष+घञ् ।) वातूलः । उत्कोचः । शक्रधनुः । इति मेदिनी । षे ५० ।

वातरोग पुं (वातजनितो रोगः ।) वायुव्याधिः । तत्पर्यायः । वातव्याधिः २ चलातङ्कः ३ अनिलामयः ४ । इति राजनिर्घण्टः । (यथा,
"वातरोगं निहन्त्याशु कहितं वातनाशनम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे वातव्याधौ रसोनपिण्डे ।)

वातरोगिन् [न्] त्रि, (वातरोगोऽस्यास्तीति । वातरोग+इनि ।) वातरोगयुक्तः । तत्पर्यायः । वातकी २ । इत्यमरः । (यथा, बृहत्संहितायाम् । ८७ । ११ ।
"परतोऽपि द्रव्यं वातरोगिणां चन्द्रगुरुप्राप्तिः ।")

वातर्हि, पुं काष्ठलौहोभयनिर्मितपात्रम् । तत्पर्यायः । काष्ठलौही २ । इति त्रिकाण्डशेषः ।

वातल पुं, (वातं लातीति । ला+क ।) चणकः । इति शब्दचन्द्रिका । वायुकारके त्रि । (यथा, सुश्रुते सूत्रस्थाने ४६ अः ।
"वातला शीतमधुरा सकषाया विरूक्षणा ।
कफशोणितपित्तघ्ना पुंस्त्वनाशना ।")

वातलमण्डली, स्त्री, याता । इति भूरिप्रयोगः ।

वातवान् [त्] त्रि, वायुयुक्तः । वातो विद्यतेऽस्य इत्यर्थे मतुप्प्रत्ययेन निष्पन्नः ।

वातवैरी [न्] पुं, (वातस्य वैरी ।) वातारिः । इति राजनिर्घण्टः । वायुशत्रौ, त्रि ।

वातव्याधि, पुं (वातजनितो व्याधिः ।) वातरोगः । इति राजनिर्घण्टः । (यथा
"शूलं गुल्मञ्च भग्नं कम्पाध्मानविमोक्षणम् ।
रक्ताभिभूतश्च नरः वातव्याधिविनाशयेत् ।"
इति माधवकरकृत रुग्विनिश्चये वातरोगाधिकारे शेषांशे ।)

वातशीर्ष, क्ली (वातस्य शीर्षमिव ।) वस्तिः । इति राजनिर्घण्टः ।

वातशोणित क्ली, (वातेन शोणितं दुष्टरक्तं यत्र ।) वातरक्तरोगः । इति भावप्रकाशः । (अस्य सनिदानसम्प्राप्तिकं पूर्वरूपं लक्षणं यथा,—
"विदाहि विरुद्धञ्च लवणाम्लकटूष्णम् ।
भजतां विरुद्धानि मद्यमांसमैथुनम् ।
प्रायेण सुकुमाराणामचङ्क्रमणशीलिनाम् ।
अभिघातादशुद्ध्या च नृणामसृजि दूषिते ।
वातलैः शीतलैर्वायुर्वृद्धः क्रुद्धो विमार्गगः ।
तादृशेनासृजा रुद्धः प्राक् तदेव प्रदूषयेत् ।
आढ्यरोगं खुडं वातबलासं वातशोणितम् ।
तदाहुर्नामभिस्तच्च पूर्वं पादौ प्रधावति ।
विशेषाद्यानयानाद्यैः प्रलम्बौ तस्य लक्षणम् ।
भविष्यतः कुष्ठसमं तथा स्वेदः प्रवाधते ।
जानुजङ्घोरुकट्यंसहस्तपादाङ्गसन्धिषु ।
कण्डूस्फुरणनिस्तोदभेदगौरवसुप्तता ।
भूत्वा भूत्वा प्रणश्यन्ति मुहुराविर्भवन्ति च ।
पादयोर्मूलमास्थाय कदाचिद्धस्तयोरपि ।
आखोरिव विषं क्रुद्धं तत्तु देहं विधावति ।
उत्तानमथ गम्भीरं द्विविधं तत् प्रचक्षते ।
कालान्तरेण गम्भीरं सर्वधातूनभिद्रवेत् ।
कण्डूदाहरुजायामतोदस्फुरणकुञ्चनैः ।
श्यावा ताम्रत्वगुत्ताने दाहतोदाद्युग्रवेदनाः ।
गम्भीरे श्वयथुः स्तब्धः कठिनोऽन्तर्भृशार्तिमान् ।
त्रिक ... ।

करोति सरुजं पाकं वा शरीरे सर्व्वतश्चरन् ।
वातेऽधिकेऽधिकं तत्र शूलस्फुरणतोदनम् ।
शोथस्य रौक्ष्यकृष्णत्वश्यावतावृद्धिहानयः ।
धमन्यङ्गुलिसन्धीनां सङ्कोचोऽङ्गग्रहोऽतिरुक् ।
शीतद्वेषानुपशयौ स्तम्भवेपथुसुप्तयः ।
रक्ते शोथोऽतिरुक् तोदस्ताम्रश्चिमिचिमायते ।
स्निग्धरूक्षैः शमं नैति कण्डूक्लेदसमन्वितः ।
पित्ते विदाहः सम्मोहः स्वेदो मूर्च्छामदः स तृट् ।
स्पर्शाक्षमत्वं रुग्रागः शोथपाको भृशोष्णता ।
कफे स्तैमित्यगुरुता सुप्तिस्निग्धत्वशीतता ।
कण्डूर्मन्दा च रुग्द्वन्द्वसर्व्वलिङ्गञ्च सङ्करे ।
एकदोषानुगं साध्यं नवं याप्यं द्विदोषजम् ।
त्रिदोषजं त्यजेत् स्रावि स्तब्धमर्व्वुदकारि च ।
रक्तमार्गं निहन्त्याशु शाखासन्धिषु मारुतः ।
निविश्यान्योऽन्यमावार्य्य वेदनाभिर्हरेदसून् ॥”
इति वाभटे निदानस्थाने षोड़शेऽध्याये ।
“वातशोणितिनो रक्तं स्निग्धस्य बहुशो हरेत् ।
अल्पाल्पं पालयन् वायुं यथादोषं यथाबलम् ।
चिकित्सितं हितं यच्च प्रायश्चित्तं भिषग्जितम् ।
सेवेत प्रवरं यच्च पर्य्याये स्वातमौषधम् ॥”
इति च वाभटे चिकित्सितस्थाने द्वाविंशतितमेऽध्याये । अस्य चिकित्सान्तरं वातरक्तशब्दे ज्ञातव्यम् ॥)

वातसह, त्रि, (वातं वातजनितरोगं सहते । सह+अच् ।) वातव्याधियुक्तः । यथा,—
“वातामयी वातसहो वातुलो वातुकोऽपि च ।”
इति शब्दरत्नावली ॥
(वायुवेगसहनशीले । यथा, महाभारते । १ । १४८ । ५ ।
“ततो वातसहां नावं यन्त्रयुक्तां पताकिनीम् ।
ऊर्म्मिक्षमां दृढां कृत्वा कुन्तीमिदमुवाच च ॥”)

वातसारथि, पुं, (वातः सारथिः सहायो यस्य ।) वह्निः । इति केचित् ॥

वातस्कन्ध, पुं, (वातस्य स्कन्ध इव ।) आकाशस्य स्थानविशेषः । यत्र वायुर्वहति । इति केचित् ॥

वातहा [न्] त्रि, (वातं हन्ति । हन्+क्विप् ।) वातघ्नः । वायुनाशकौषधम् । इति वैद्यकम् ॥

वाताट, पुं, (वात इव अटति गच्छतीति । अट+अच् ।) सूर्य्याश्वः । इति त्रिकाण्डशेषः ॥ वातमृगः । इति शब्दरत्नावली ॥

वाताण्ड, पुं, (वातदूषितौ अण्डौ यस्मात् ।) मुष्करोगविशेषः । तस्य लक्षणं यथा,—
“द्रवतो दूषयेदाशु चेष्टया यस्य मुष्कयोः ।
तस्य मुष्कवहो ह्येको रोगो वाताण्डकस्तु सः ॥”
इति माधवकरः ॥

वाताद, पुं, (वाताय वातनिवृत्तये अद्यते इति । अद्+घञ् ।) फलवृक्षविशेषः । बादाम इति भाषा । तत्पर्य्यायः । वातवैरी २ नेत्रोपमफलः ३ वातामः ४ । अस्य गुणाः । उष्णत्वम् । सुस्निग्धत्वम् । वातघ्नत्वम् । शुक्रकारित्वम् । गुरुत्वञ्च । अस्य मज्जगुणाः । मधुरत्वम् । वृष्यत्वम् । पित्तानिलापहत्वम् । स्निग्धत्वम् । उष्णत्वम् । कफकारित्वम् । रक्तपित्तविकारिणां नेष्टत्वञ्च । इति भावप्रकाशः ॥

वातापि, पुं, असुरविशेषः । स च ह्रादस्य धमन्यां पत्न्यां जातः । अगस्त्येन भक्षितः । इति श्रीभागवतमतम् ॥ कथान्तरे तु विप्रचित्तेः सिंहिकायां जातः । यथा —
“सिंहिकायामथोत्पन्ना विप्रचित्तिसुतास्त्रयः ।
ग्रसः ग्रसनाभश्च यत्र शाल्वस्तथैव च ।
इल्वलो नमुचिश्चैव वातापी द्वयो स्मृतः ।
हरकल्प कालनाभो भौमश्च नरकस्तथा ।
राहुर्ज्येष्ठश्च तेषां वै चन्द्रसूर्य्यप्रमर्दनः ।
इत्येते सिंहिकापुत्रा देवैरपि दुरासदाः ॥”
इति वह्निपुराणे काश्यपीयवंशः ।
अन्यच्च ।
“विप्रचित्तेः सैंहिकेयाः सिंहिकायामथो भवन् ।
हिरण्यकशिपोर्वै भागिनेयास्त्रयोदश ।
वंशः शल्यश्च राजेन्द्रो नभो वातापिरेव च ।
इल्वलो नमुचिश्चैव श्वसृमश्चाञ्जनस्तथा ।
नरकः कालनाभश्च सरमाणस्तथैव च ।
कल्पवीर्य्यश्च विख्यातो दनुवंशविवर्द्धनः ॥”
इति मात्स्ये ६ अध्यायः ।
(सुविस्तरोऽस्य एष अगस्त्येन भक्षितवान् । एतद्वृत्तान्तस्तु महाभारते वनपर्व्वणि ९९ अध्यायमारभ्य द्रष्टव्यः ।)

वातापिद्विट्, [ष्] पुं, (वातापिं द्वेष्टीति । द्विष+क्विप् ।) अगस्त्यमुनिः । इति हेमचन्द्रः । २ । ३६ ।

वातापिसूदन, पुं (वातापिं सूदयते इति । सूद्+ल्यु ।) अगस्त्यः । इति त्रिकाण्डशेषः ॥

वातापिहा [न्] पुं (वातापिं हन्तीति । हन+क्विप् ।) अगस्त्यः । इति त्रिकाण्डशेषः ॥

वातामोदा स्त्रि (वातेन प्रवहन् आमोदो यस्याः ।) कस्तूरी । इति शब्दमाला ॥

वातायन, क्ली, (वातस्य अयनं गमनागमनमार्गं ।) गवाक्षः । इत्यमरः ॥ (यथा, आर्य्यासप्तशत्याम् । ३१ ।
“लीलावातायनस्य पतिः यस्तीव्रपवनात्तिपो भवति प्रियया ।
प्रकटीकृत वातायने कथयनम् ॥”)
तैव पदव्यापारविशेषो यथा —
“पदव्यापाश्च कुर्व्वीत वातवातायनादिभिः ।
वारयित्वा तु कर्माणि कार्य्याणि यथा न चल
मितुः ॥”
इति कौर्म्मे उपविभागे ११ अध्यायः ॥

वातायु, पुं (वातमेव अयनं गतिर्यस्य ।) घोटकः । इति त्रिकाण्डशेषः ॥

वातायु, पुं (वातमयते इति । अय+बाहु लकात् उण् ।) हरिणः । इत्यमरः ॥

वातारि, पुं, (वातस्य वातरोगस्य अरिः ।) एरण्डवृक्षः । इति शब्दरत्नावली ॥ (अस्य पर्य्यायो यथा,—
“शुक्रदश्च वातकफघ्नो भग्नसन्धानकारकः ।
प्रचालुकुष्ठो वर्द्धमानो दीर्घदण्डोऽप्यदण्डकः ।
वातारिस्तरुणश्चापि रुबूकश्च निगद्यते ॥ १ ॥
रक्तोऽपरो रुबूकः स्यादुरुबूको रक्तकस्तथा ।
व्याघ्रपुच्छश्च वातारिश्चञ्चुरुत्तानपत्रकः ॥ २ ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
शतमूली । इति शब्दचन्द्रिका ॥ स्नुहवृक्षः ॥ शेफालिका । यवानी । भार्गी । जन्तुः । विडङ्गम् । शूरणः । भल्लातकः । अजमोदा । इति राजनिर्घण्टः ॥

वातालो, स्त्री, (वातस्य आली श्रेणी ।) वात्या । इति त्रिकाण्डशेषः ॥

वाताश, पुं, (वात इव शीघ्रगोऽश्वः ।) कुली नाश्वः । तत्पर्य्यायः । ययोलम २ वाम ३ अश्वानीक ४ । इति त्रिकाण्डशेषः ॥ (यथा कथासरित्सागरे । ६४ । १०३ ।
“सद्यम् मां विशानीहि सन्धोक्षित वराननि ।
आनीतमिह वाताश्वैमारुतिरपि निर्मितम् ॥”)

वातासह, त्रि, (वातं वातजनितरोगं आसहते इति । आ+सह+अच् ।) वातुलः । इति शब्दरत्नावली ॥

वाति, पुं (वाति गच्छतीति । वा+“वातेर्णित् ।” उणा० ४ । ६ । इति अति ।) वायुः । यथा
“वातिर्वाप्रमवरात अश्वम पवनोऽनिल ।”
इत्यमरटीकायां भरतधृतधातुः ॥
सूर्य्यः । यमः । यथा । वातिरादित्यसोमयो । इति रभसः ॥

वातिक, पुं, (वातादागतः । वात+ठञ् ।) वायुजव्याधिः । यथा —
“वातिको वातजो व्याधिः पैत्तिकः पित्तसम्भवः ।
श्लैष्मिकः श्लेष्मसम्भूतः सर्व्वजः सान्निपातिकः ॥”
इति हारीतः ॥
(त्रि, वातस्य प्रशमनं कोपनं वा । “वातिक-श्लैष्मिकं प्रशमनकोपनयोरयवर्णलक्षणम् ।” १ । १ । ३० । इत्यस्य वार्त्तिकं ठञ् । वातिकरोगाक्रान्ते वाताढ्ये, त्रि । यथा, महाभारते । १ । २१ । ६ ।
“अपरे प्रवदेयान्ये वातिकास्य मतीयतम् ।
शुचिरस्य पठीत च यतो भीत्वा वै प्रभु ॥”)

वातिङ्ग, पुं (वाति वायुं गच्छतीति । गम्+ड ।) भण्टाकी । वायुवाहिनि, त्रि । इति मेदिनी । गे, १८ ॥

वातिगम, पुं (वाति वायु गमयतीति प्रापयति । गमि+अच् ।) वार्त्ताकु । इति शब्दरत्नावली ॥

वातिङ्गण, पुं वार्त्ताकुः । इति त्रिकाण्डशेषः ॥

वातीय, क्ली, (वाताय वातशमनाय हितं । वात+छ ।) काञ्जिकम् । इति शब्दचन्द्रिका ॥

वातुल, पुं वात्या । इत्यमरटीकायां भरतः ॥

वातुल त्रि, वातविकारवान् । उन्मत्तः । इत्यमरटीकायां भरतः ॥

वातुलि, स्त्री, वल्गुलिका । इति शब्दरत्नावली ॥ बादुड़ इति भाषा ॥

वातूल, पुं, (वातानां समूहः। "वातादूलः।" ४।२।४२। इत्यस्य वार्त्तिकोक्त्या उलच्। यद्वा, वाताः सन्त्यस्मिन्निति। वात+"सिध्मादिभ्यश्च। ५।२।९७। इति लच्। "वातदन्तबलेति।" ऊङ्। यद्वा, वातानां समूहं वातं न सहते इति वा। वात+"वातात् समूहे च। वातं न सहते इति च।" ५।२।१२२। इत्यस्य वार्त्ति उलच्।) वात्या। वातासहे, त्रि। इत्यमरः॥ "वात्या वातसमूहः। अत्र वनखलादि गोरथवातादिति उलः। वाताधश्चो वात स्त्रियामकः। वातया इति ख्यात। अत्र गो त्रिकादिना उलः वातूल। वातिर्नास्तीति सुधी रूलोकारपाठमपि वातुलः। वातूलो वातुलोऽपि स्यादिति द्विरूपकोषः। उन्मत्तेऽपि वातूलः।" इत्यमरटीकायां भरतः॥

वातोमा, स्त्री, (वातमूनयतीति। ऊन+अच्।) गोजिह्वाक्षुपः। इति राजनिर्घण्टः॥ वायुहीने, त्रि॥

वात्या, स्त्री, (वातानां समूहः। वात+"पाशादिभ्यो यः।" ४।२।४९। इति यः।) वातसमूहः। यथा,—
"आवर्त्तिनी च वातालौ स्यात् वात्या वातसन्ततौ।"
इति त्रिकाण्डशेषः॥
(यथा, भागवते। १।१०।५।
"ययौ वायुः सुदुःस्पर्शः सिकताकारोऽयं रजः।
उन्मूलयन्नगपतीन् वात्यानीको रजोध्वजः॥")

वात्सकं, क्ली, (वत्सानां समूहः। वत्स+"गोत्रोक्षोष्ट्रेति।" ४।२।३९। इति वुञ्।) वत्ससमूहः। इत्यमरः॥ (वत्सकस्येदमिति। वत्सक+अण्। कुटजसम्बन्धिनि इन्द्रयवसम्बन्धिनि च त्रि। यथा, सुश्रुते। ६।४।
"नागरातिविषामुस्तनिम्बको वात्सकं फलम्॥")

वात्सल्य, पुं (वत्सल एव। स्वार्थे ष्यञ्।) रसविशेषः। यथा,—
"वात्सल्यमान्तौ तु रसौ प्रश्नार कौशिक ख्यात॥"
इति त्रिकाण्डशेषः॥
एतदधिकारो यथा,—
"शान्ते ब्राह्मण एव स्यात् प्रीते दास प्रकीर्त्तितः।
प्रेयसि तु सखायो हि यशोदा बल्लवे च्युताः।
मधुरे राधिका प्रेया हास्ये स्यात् सुबलस्तथा।
यशोमूर्त्तोऽद्भुते प्रेयो वीरे चारुमतिस्तथा।
करुणे वाग्रहचान्पिष्टलादास्तु रौद्रके।
गोबर्द्धनोऽभिमन्युश्च भयानक उन्नतौ।
नर्म्मविभागयो इन्द्र बीभत्से परिकीर्त्तिता।
प्रणया निवृता प्रेया ध्वानन्दपरिभावका॥"
इत्युज्ज्वलनीलमणिः॥
(वत्सलस्य भावः। वत्सल+ष्यञ्।) वत्सलस्य भावे, क्ली॥ (स्नेहः। यथा, मार्कण्डेये। ३।६।११।
"वात्सल्यमिच्छामि वाक्यं कालोकमत्तमम्॥")

वात्सीपुत्र, पुं, नापितः। इति त्रिकाण्डशेषः॥

वात्स्य, पुं (वत्सस्य गोत्रापत्यम्। वत्स+"गर्गादिभ्यो यञ्।" ४।१।१०५। इति यञ्।) मुनिविशेषः। यथा। वात्स्यवाधिमौत्रयो रौर्म्यवनभार्गवजामदग्न्याप्नुवनवराः। इत्युद्वाहतत्त्वम्॥

वात्स्यायन, पुं, (वत्सस्य गोत्रापत्यं युवा। वत्स+यञ्। ततो यूनि फक्।) मुनिविशेषः। तत्पर्य्यायः। मल्लनागः १ पक्षिलः २ स्वामी ३। इति त्रिकाण्डशेषः॥ (अयं हि कामसूत्रकर्त्ता। यथा, कुट्टनीमते। ७७।
"वात्स्यायनमयमबुध
बाभ्राव्यरेव दत्तकाचार्य्यान्।
गणयति गण्यपतत्री
पश्यतु रायभुवनं॥")

वाद, पुं, (वद्+घञ्।) यथार्थबोधेच्छोर्वाक्यम्। यथा,—
"विजिगीषोः कथा जल्पो वादस्तत्त्वविविदिषोः॥"
इति जटाधरः॥
अस्य लक्षणं यथा। प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः। इति गौतमसूत्रम्॥ ०॥ अपि च।
"सर्गाणामादिरन्तश्च मध्यञ्चैवाहमर्ज्जुन।
अध्यात्मविद्या विद्यानां वादः प्रवदतामहम्॥"
इति भगवद्गीतायाम् १० अध्यायः॥
"प्रवदतां वादिनां सम्बन्धिनो वादजल्पवितण्डाख्यास्त्रिविधाः कथाः प्रसिद्धास्तासां मध्ये वादोऽहम्। यत्र द्वाभ्यामपि प्रमाणतर्काभ्यां स्वपक्षः स्थाप्यते परपक्षश्च जातिनिग्रहस्थानैर्दूष्यते स जल्पो नाम। यत्र त्वेकः स्वपक्षं स्थापयति अपरस्तु छलजातिनिग्रहस्थानैस्तं पक्षं दूषयति न तु स्वपक्षं स्थापयति सा वितण्डा नाम कथा। तत्र जल्पवितण्डे विजिगीषमाणयोर्वादिनोः शक्तिपरीक्षामात्रफले। वादस्तु वीतरागयोः शिष्याचार्य्ययोरन्ययोर्वा तत्त्वनिर्णयफलः। अतोऽसौ ममैव विभूतिरित्यर्थः।" इति तट्टीकायां श्रीधरस्वामी॥ ("तत्र वादः। वादो नाम यः परस्परेण सह शास्त्रपूर्ब्बकं विगृह्य कथयति। स वादो द्विविधः सङ्ग्रहेण जल्पो वितण्डा च। तत्र पक्षाश्रितयोर्वचनं जल्पः। जल्पविपर्य्ययो वितण्डा।" इति चरके विमानस्थानेऽष्टमेऽध्याये॥)

वादक, त्रि, (वादयतीति वद्+णिच्+ण्वुल्।) वादकरः। (यथा भागवते। १०।१८।११।
"क्वचित् प्लवद्भिर्न्नृत्यद्भिर्गायकौ वादकौ स्वयम्।
शशंसतुर्महाराज साधु साध्विति वादिनौ॥")
वक्ता। वदतीति कर्त्तरि अक(ण्वुल्)प्रत्ययेन निष्पन्नः॥

वादनं, क्ली, (वद्+णिच्+ल्युट्।) वादनम्। (यथा [illegible]।११।
"वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः।
तालज्ञश्चाप्रयासेन मोक्षमार्गं नियच्छति॥")

वा(बा)दरं, त्रि (बदरात् बदराकारकार्पासफलाज्जातम्। बदर+अञ्।) कार्पासनिर्म्मितवस्त्रादि। इत्यमरः। २।६।१११॥ बादरा कार्पासी तत्र जात इत्यर्थे अण्प्रत्ययेन निष्पन्नम्॥

वा(बा)दर, पुं, (बदर+स्वार्थे अण्।) कार्पासवृक्षः। इति हेमचन्द्रः॥ (बदरीवृक्षः। कुलगाछ इति भाषा॥)

वादरङ्ग, पुं अश्वत्थवृक्षः। इति त्रिकाण्डशेषः॥

वा(बा)दरा, स्त्री, (बदरवत् फलमस्त्यस्याः। बदर+अण्। ततष्टाप्।) कार्पासवृक्षः। तत्पर्य्यायः। कार्पासी २ समपुष्पा ३ बदरी ४ बहुमाला ५ तुण्डिकेरी ६ कार्पासिका ७। इति शब्दरत्नावली॥ अस्याः पर्य्यायान्तर गुणाश्च कार्पासीशब्दे द्रष्टव्याः॥

बादरायण, पुं, (बदरायणे बदरिकाश्रमे निवसतीति। बदरायण+अण्।) व्यासदेवः। इति शब्दरत्नावली॥

बादरायणि, पुं (बादरायण एव। स्वार्थे इञ्।) व्यासदेवः। इति शब्दरत्नावली॥ (बादरायणस्यापत्यमिति अपत्यार्थे इञ्। शुकदेवः॥)

वादरिक, त्रि, बदरचयनकर्त्ता। बदर चिनोति अर्थे ठक्प्रत्ययेन निष्पन्नः॥

वादल, स्त्री मधुयष्टिका। इति शब्दचन्द्रिका॥

वादवादी [न्] पुं, (वादं वदतीति। वद्+णिनि।) जिनभेदः। तत्पर्य्यायः। स्याद्वादः २। इति हेमचन्द्रः॥

वादाम, क्ली स्वनामख्यातफलम्। तस्य गुणाः। उष्णत्वम्। सुस्निग्धत्वम्। वातघ्नत्वम्। शुक्रकारित्वञ्च। इति राजवल्लभः॥

वादाम्ल, त्रि, (बदाम्ल एव। स्वार्थे अण्।) बदाम्लः। बहुमदः। इति भरतद्विरूपकोषः॥

वादाल, पुं, मत्स्यभेदः। बोयालि इति भाषा। तत्पर्य्यायः। सहस्रदंष्ट्रः २। इति हेमचन्द्रः॥

वादिः, त्रि, (वादयति शास्त्रमुच्चारयतीति। वद्+णिच्+"वसिवपियजीति।" उणा० ४।१२४। इति इञ्।) विद्वान्। इत्युणादिकोषः॥

वादित्रं, क्ली, (वाद्यते। वद्+णिच्+"भूवादिगृभ्यो णित्रन्।" उणा० ४।१७०। इति णित्रन्।) वाद्यम्। इत्यमरः॥ (यथा, भागवते। ३।२३।७।
"चक्रादर्शं तदा बोधि वादित्राणि समाददा॥"
वादित्रोऽपि दृश्यते इति। वे+क। आत्त्व इन्द्रे त्रि। यथा कथासरित्सागरे। ७८।
"इत्थं तां पुनरपि यद्धि गदा दूतेन च प्रोक्ता
देवानां वयं यतो दुःखं गिरा दूतो विप्र सभा।
किं वादित्रैरवनाथ यदेते को वादित्राणि
कथा किञ्चनैरासाद्य इन्द्रकान्त
पूर्णे॥")

वादिर, क्ली बदरीवृक्षफलसम्भवजलम्। इति शब्दरत्नावली॥
वादिराट् [ज्] पुं, (वादिषु मध्ये राजते इति। राज+क्विप्।) मञ्जुघोषः। इति त्रिकाण्डशेषः॥
वादिश, त्रि साधुवादी। इति शब्दमाला॥
वादी, [न्] त्रि, (वदतीति। वद्+णिनि।) वक्ता। (यथा, मनुः। ७। ९१।
"न च हन्यात् स्थलारूढं न क्लीवं न कृताञ्जलिम्।
न मुक्तकेशं नासीनं न तवास्मीति वादिनम्॥")
अर्थी। विवादकर्त्ता। फरियादी इति पारस्य भाषा॥ यथा सभापते कात्यायनः।
"अथ चेत् प्रतिभूर्नास्ति वादयोग्यस्तु वादिनः।
स रक्षितो दिनस्यान्ते दद्याद्भृत्याय वेतनम्॥"
वादिनो भाषावादिन उत्तरवादिनश्च॥ * ॥
अथ विवादासक्तौ प्रतिनिधिमाह नारदः।
"अर्थिना सन्नियुक्तो वा प्रत्यर्थिप्रहितोऽपि वा।
यो यस्यार्थे विवदते तयोर्जयपराजयौ॥"
तयोर्व्वादिप्रतिवादिनोः। कात्यायनः।
"मनुष्यमारणे स्तेये परदाराभिमर्षणे।
अभक्ष्यभक्षणे चैव कन्याहरणदूषणे॥
पारुष्ये कूटकरणे नृपद्रोहे तथैव च।
प्रतिवादी न दातव्यः कर्त्ता तु विवदेत् स्वयम्॥"
अशास्त्रीयस्य पक्षान्तरस्य दण्डमाह नारदः।
"यो न भ्राता पिता वापि न पुत्रो न नियोजितः।
परार्थवादी दण्ड्यः स्यात् व्यवहारेषु विब्रुवन्॥"
नारदः।
"पूर्व्ववादं परित्यज्य योऽन्यमालम्बते पुनः।
वादसंक्रमणाज्ज्ञेयो हीनवादी स वै नरः॥"
प्रत्यर्थी यदि कश्चित् कालं प्रार्थयते स लभते। अर्थी तु कालं प्रार्थयन् अर्थिनमेव इत्यादि नैव कालो न प्राप्यते। तथाह।
"प्रत्यर्थी लभते कालं त्र्यहं सप्ताहमेव च।
अर्थी तु प्रार्थयन् कालं नृपमावेद्य हीयते॥"
क्वचित् प्रत्यर्थी कालं न लभते। कात्यायनः।
"साहसस्तेयपारुष्यगोऽभिशापात्यये स्त्रियाम्।
विवादयेत् सद्य एव कालोऽन्यत्रेच्छया स्मृतः॥"
अथ भाषापादः। तत्र भाषालक्षणमाह कात्यायनः।
"प्रतिज्ञादोषनिर्मुक्तं साध्यं सत्कारणान्वितम्।
निश्चितं लोकसिद्धञ्च पक्षं पक्षविदो विदुः॥
स्वल्पाक्षरः प्रभूतार्थो निःसन्दिग्धो निराकुलः।
विरोधिकारणैर्मुक्तो विरोधिप्रतिरोधकः॥
यदा त्वेवंविधः पक्षः कल्पितः पूर्व्ववादिना।
दद्यात्तत्पक्षसम्बद्धं प्रतिवादी तदोत्तरम्॥"
बृहस्पतिः।
"मूलन्तु व्यवहाराणां प्रतिज्ञा समुदाहृता।
तद्धानौ हीयते वादी तरंस्तामुत्तरो भवेत्॥"
तत्त्वबोधकमाह स एव।
"यावन्नोत्तरं दद्यात् तावद्वादी विशोधयेत्।
न दद्यादुत्तरं यावत् प्रत्यर्थी सभ्यसन्निधौ॥"
इति व्यवहारतत्त्वम्॥

वाद्य क्ली, (वद्+णिच्+यत्।) वाद्यन्ते ध्वनन्ति यत्। बाजना इति भाषा। तत्पर्य्यायः। वादित्रम् २ आतोद्यम् ३। तच्चतुर्व्विधं यथा,
"ततं वीणादिकं वाद्यमानद्धं मुरजादिकम्।
वंशादिकन्तु सुषिरं कांस्यतालादिकं घनम्॥"
इत्यमरः॥
"इदं ततादि चतुर्व्विधं चतुःप्रकारं वाद्यानीत्यमर इत्यवाच्यम्।
'इदं चतुर्व्विधं वाद्यं वादित्रादिद्विनामकम्।
वाद्यमित्येतस्य प्रथमान्तं विशेष्यपदम् इति कलिङ्गादयः। चक्रो न विशेष्य।" इति टीकायां भरतः॥ * ॥

अथ वाद्यानि।
"ताडवं रावसी गीतं नालो वान्त्रिकभाण्डम्।
महोपलैव वाद्यञ्च सचतुर्व्विधमुच्यते॥
ततं सुषिरमानद्धं घनमित्थं चतुर्व्विधम्।
ततं तन्त्रीगतं वाद्यं वंशाद्यं सुषिरं तथा॥
चर्म्मावनद्धमानद्धं घनं तालादिकं मतम्॥" * ॥
तत्र ततं यथा,—
"अलावणी ब्रह्मवीणा किन्नरी लघुकिन्नरी।
विपञ्ची वल्लकी ज्येष्ठा चित्रा घोषवती जया॥
स्थायधर्म्मतनयदुर्लभितो
नाकनायकपुरोहितः शुभः ।
विषदन्मूहजनविवेशेन्ना
विधते मानदादिभिरदि ॥
आपूनादिमनमोयथापतो
विह वास्तु विरक्तोभवः फलन् ।
भैरवापातनुकर्म्मधर्म्मणो
नाभवोदियधनकुलेरेरे ॥”
इति ज्योतिस्तत्त्वम् ॥
वामा स्त्री, (वमति सौन्दर्य्यं इति । वम + ज्वल ।
दित्वात् णः । टाप् । यद्वा वमति प्रतिकूल-
मेवार्थं वचयति । यद्वा, वाम काम्योऽस्त्यस्याः
इति अर्श आदित्वोऽच इत्यच ।) वामाङ्गी
स्त्री । इत्यमरः । २ । ६ । २ । (यथा श्रीम
गोविन्दे । १ । ३६ ।
“श्रियति वामपि चुम्बति वामपि कामपि
रमयति रामाम् ।
पश्यति सस्मितचारुपरामपरामनुगच्छति
रामाम् ॥”)
दुर्गा । यथा —
“वामं विरुद्धरूपन्तु विपरीतन्तु गीयते ।
वामेन सुखदा देवी वामा तेन मता बुधैः ॥”
इति देवीपुराणे ४५ अध्यायः ॥
अपि च ।
“वामात्तु वाञ्छितमर्थमाप्नुयात् पूजनेन ।
समारमेरत्नै देवीहरितारौ सचेव च ।
बन्धिरमैरत्तौ यज्ञी तारौ विद्रुमैरपि ॥

आसीत् धुन्धुरिति ख्यातः कश्यपस्यौरसः सुतः ।
दनुगर्भसमुद्भूतो महाबलपराक्रमः ॥
स समाराध्य वरदं ब्रह्माणं तपसासुरः ।
अवध्यत्वं सुरैः सर्व्वैः प्रार्थयत् स तु नारद ! ॥
ददौ तस्य च प्रादात् तपसा परितोषितः ।
स लब्ध्वा स च वरो निर्जगाम त्रिविष्टपम् ॥
चतुर्दश कर्णरादौ जित्वा देवान् सवासवान् ।
धुन्धुः शक्रमकरोत् हिरण्यकशिपौ सति ॥
तस्मिन् काले स बलवान् हिरण्यकशिपुः सुतः ।
चचार मन्दरगिरौ दैत्यो धुन्धुः समाश्रितः ॥
ततोऽसुरा यथाकामं विहरन्ति त्रिविष्टपे ।
ब्रह्मलोके च निर्भीता वसन्ति दुःखसंयुता ॥
तथाऽसुरान् ब्रह्मसभानिवासिन
शुत्वा च धुन्धुर्दितिजानुवाच च ।
गच्छाम ऐत्था सममेव यत्र
सन्ते विभुत् त्रिदशान् नमस्कान् ॥
ते धुन्धुवाक्यन्तु निशम्य दैत्याः
प्रोचुर्न नो विद्यति लोकपाल ।
गतिर्यथा याम पितामहाजिरं
सुदुर्गमोऽयं यतो हि मार्गः ॥
इत सहस्रैश्च तपोबलाढ्यै
र्लोको महर्नाम महर्षिजुष्टः ।
यस्मिं हि मायापरमोऽन्वितेन
ह्युत्रीना देवाः सहसाऽपितेन ॥
तेषां वचनमाकर्ण्य धुन्धुः प्रोवाच दानवान् ।
गन्तुकामः स सदनं ब्रह्मणो वेतुमीश्वरान् ॥
कथन्तु दनुजाः तत्र गम्यते दानवर्षभाः ।
कथं तत्र सदयाथ समाप्त सह दैवतैः ॥
इति धुन्धुवचः श्रुत्वा दानवाः प्रोचुरो विभुम् ।
कथं तत्र वयं विप्र शुक्रस्तेनाथ श्रुतम् ॥
दैत्यानां वचनं श्रुत्वा धुन्धुर्दैत्यपुरोहितम् ।
पप्रच्छ शुक्र किं कर्म्म कृत्वा ब्रह्मसदो गतिः ॥
ततोऽसौ कथयामास दैत्यानाम् कालिप्रियः ।
शक्रस्य चरितं धीमान् पुरा वृत्रारिपो द्विज ॥
शक्रः शतन्तु पुण्यानां क्रतूनामयजत् पुरा ।
ऐन्द्रं दाश्वमेधानां तेन ब्रह्मसदो गतः ॥
तदास्य दानवेन्द्रो शुत्वा शुक्रस्य धीमतः ।
पहुं सुरनिमन्त्री चकार मतिमुत्तमाम् ॥
आमन्त्र्य दानवगुरुं दानवानां चमूपतिः ।
प्रोवाच गत्वेदं यज्ञैश्चमेधैर्यजिष्ये ॥
आहूयन्ताथ निधयश्चाप्याहूयन्ताथ गुरुका ।
प्रयाहो मुनिका यत्र गच्छा प्राचीमवाप्नुतो ॥
सा हि पुण्या सरिच्छ्रेष्ठा सर्व्वसिद्धिकरी शिवा ।
यत्र प्राचीनमाधाय वाजिमेधान् यजामहे ॥
इत्यं सुरारिवचनं निशम्यासुरयाजकः ।
वाद्गमित्यब्रवीद्दृष्टो निषद मन्दिरेषु सः ॥
ततो धुन्धुर्देविकाया प्राचीने मायनामने ।
भार्गवेन्द्रेण शुक्रेण वाजिमेधाय दीक्षितः ॥
ततोऽश्वमेधैर्गतो यज्ञैः
यजा दिति द्विः सिन्धुपुर्णाः ।
तेनोयजन्तैव हिमाश्रमैन
तत्सदौ ब्रह्मलोक सर्व्वैः ॥
स यज्ञमाधाय सुरा विभक्ता
जानन्त धुन्धुः स्वयमेवदीक्षितम् ।
तत प्रपेत्य प्ररण समाहृत
जग्मुः सशक्रा जगतः परायणम् ॥
प्रणम्य वरदं देवं पद्मनाभं सनातनम् ।
प्रोचुः सर्व्वे सुरगणा भयादुद्भ्रया गिरा ॥
भगवन् देवदेवेश ! चराचरपरायण ! ।
विज्ञप्तिः श्रूयतां विष्णो सुराणामार्त्तिनाशन ॥
धुन्धुनाम्ना सुरपतिर्भजयान् बलादपि न ।
शुक्रस्य मतमास्थाय सोऽश्वमेधाय दीक्षितः ॥
मत क्रतुनामिच्छाथो ब्रह्मलोक महासुरः ।
आरोढुमिच्छति वशी त्रिदिवं त्रिदशानपि ॥
तस्मान्नारादनं विचिन्त्य जगद्गुरो ।
उपाय मखविध्वंसे भवतो येन निष्ठता ॥
शुत्वा सुराणां वचनं भगवान् मधुसूदनः ।
दत्त्वाभयं महाबाहुः प्रेषयामास सोऽथ तान् ॥
विसृज्य दैवताः सर्व्वां मत्वा वैतु महासुरम् ।
मखनाश मतिश्चक्रे स धुन्धोर्ध्वस्य वै ॥
ततः स कृत्वा भगवान् वामनं रूपमीश्वरः ।
देहं कृत्वा विरामस काष्ठवद्गुप्तविकालये ॥
यथाकाष्ठवत्प्रोक्ताख्यकांसो यदृच्छया ।
स्फुटोऽथ दैत्यपतिना दैत्येत्याख्ये सुरद्विषि ॥
तत पश्य परित्यज्य पतिय बाष्पलोचना ।
समुत्तारयितुं विप्रमदबन्धे समाकुलाः ॥
सरस्या यनमासाद्य चलितत्वं महौजसः ।
निमज्जमानसुसर्व्वं ते वामनं द्विजम् ॥
समुत्तार्य्य समानीय यच्छन्त भवन्त इदि ।
किमर्थं पतितोऽसौ वा क्षिप्तोऽपि वा वद ॥
विशामासम्य यतन कम्पमाना सुदुर्भेहु ।
प्राह धुन्धुपुरोगोक्तान् श्रूयतामत्र कारणम् ॥
ब्राह्मणो गुणवानासीत् प्रभास इति विश्रुतः ।
तस्य पुत्रद्वयं जातं मन्दप्रज्ञ सुदु खितम् ॥
तस्य ज्येष्ठो मम भ्राता कनीयानपरस्त्वहम् ।
नेत्रभास इति ख्यातो ज्येष्ठो भ्राता तथा

ऽसुरा ॥
मम नाम पिता चक्रे इति भार्गो निकौतुकात् ।
तत कालेन महता ख्यातयो म पिता गतः ।
मत्तौष्ठदेविक गत्वा एदमात्तौ समागतः ।
ततो मय त्वं स भ्राता विभजामो मया धनम् ।
तेनोक्तो नैव भवता विदिते भाग इत्यहम् ॥
कुब्जवामनखञ्जानां क्लीवानां श्वित्रिणामपि ।
उन्मत्तानां तथान्यानां धनभागो न विद्यते ॥
एवमुक्ते मया सोऽथ किमर्थं पतकादयम् ।
धनाहमागमयामि वाद आयत कव मे ॥
इत्युक्तवति वाक्येऽसौ भ्राता मे कोपसंयुतः ।
समुत्क्षिप्याक्षिपदयामस्यां माभिति कारणात् ॥
ममास्यां निम्नगायान्तु मध्ये च पुरतो मता ।
काल सवत्सरास्तु प्रयाभिरिक्षे चोद्धृत ।
के भवन्त सुप्रमा सर्व्वे वा यान्वा इव ।
ते वामनवचः श्रुत्वा भामता द्विजसत्तमा ।
प्रोचुर्दैत्यपतिं सर्व्वे वामनार्थकरं वचः ॥
इति द्विजानां वचनं श्रुत्वा दैत्यपतिर्वच ।
प्राह द्विज ददामीति यावदिच्छसि वै धनम् ॥
तदाक्य दानवपते श्रुत्वा देवोऽथ वामनः ।
प्राहासुरपतिं धुन्धुं स्वार्थसिद्धिकरं वचः ॥
कोटरेऽपि हि भ्राता त्रियते यस्य सम्भव ।
तस्यासमस्त यद्दत्त किमन्यो न हरिष्यति ॥
मम पदत्रयमालोक्य मामकञ्च क्रमत्रयम् ।
स प्रयच्छस्व दैत्येन्द्र नाधिक रक्षितु धनम् ॥
इत्येवमुक्ते वचने महात्मा
विहस्य दैत्याधिपतिः सवलिश ।
प्रादात्त्रिविक्राय पदत्रय तदा
यदा स वाप्यत् जलदे च विप्र ॥
क्रमत्रये तोयमदेत्य यत्र
महासुरेन्द्रेण विधुर्यपन्नी ।
चक्रे ततो सद्धर्यितु त्रिलोकीं
त्रिविक्रम रूपमनन्तशक्तिः ॥
कृत्वा तु रूप त्रिविक्रमाख्य तथा
प्रणम्य चर्यान् प्रथमक्रमेण ।
मही महाद्रिं सहितां सदार्णवां
जहार रत्नाकरपत्तनैर्युताम् ॥
भुवं सनाक त्रिदशाधिवास
सोमार्कऋक्षैरभिमण्डित नभ ।
देवो द्वितीयेन जहार वेगात्
क्रमेण दृष्टप्रियलोकमीश्वरः ॥
क्रमं तृतीय न यदास्य पूरित
तदातिकोपाद्धमुग्रयस्य ।
पपात पृष्ठे भगवांस्त्रिविक्रमो
मेरुप्रमाणेन तु विग्रहेण ॥
पतता वासुदेवेन दानवोपरि नारद ! ।
त्रिंशद्योजनसाहस्री भूमिभूता पटीकृता ॥
ततो दैत्यं समुत्पाट्य तस्यां प्रक्षिप्य वेगत ।
ववर्षिताभिरुष्णा तां गर्भभूमिमपूरयत् ॥
तत पूर्णे सदाभ्रो वासुदेवप्रसादतः ।
सुराच सर्व्वे त्रैलोक्यमवापुर्निर्वृताः ॥
भगवानपि दैत्येन्द्रं प्रक्षिप्य सिकतार्णवे ।
कालिन्द्यां रूपमाधाय तत्रैवान्तरधीयत ॥"

इति वामने ७५ अध्याय ॥

वामन, त्रि, (वामयतीति । वम + णिच् + ल्यु ।) खर्व्वः । तत्पर्य्यायः । न्यक् २ नीच ३ खर्व्व ४ ह्रस्व ५ । इत्यमरः ॥ अगुर्व्व ६ सदावल ७ । इति जटाधरः ॥ (यथा, नैषधे । २२ । ५० ।

"विधिस्तुषारद्युतिमानि कर्ण
कर्णं विनिर्मातिमतत्कमित्रे ।
ज्योत्स्नीश चेतु लघुतिमा इमा वा
कथ कथं तानि न वामनानि ॥")

वामनव्रत, क्ली, (वामनदेवताकं व्रतम् ।) यथा
द्वादशीकर्त्तव्यो वामनदेवता व्रतविधिः ।

अथ श्रीवामनव्रतविधि ।

"कृत्वा गुरुसमुद्दाप्य यथाविधिमनाचरेत् ।
न हि सिद्धिर्गुरोर्भक्तिं नियमश्च विना भवेत् ।"

नियममन्त्र ।

"एकादश्यां निराहारः स्थित्वा चैवापरेऽहनि ।

इति उक ।) माद्रीविशेषः । इति मुग्धबोधव्याकरणम् । (यथा, माघे । ८ । २४ ।
"सख्यन्नो चलश्रफरीविघट्टितोरू वामोरूरतिशयमाप विभ्रमस्य ।
क्षुभ्यन्ति प्रसभमहो विनापि हेतो र्लीलाभिः किमु सति कारणे तरुण्यः ॥")

वायक, पुं, (वयतीति । वे + ण्वुल् ।) समूहः । इति शब्दचन्द्रिका । (तन्तुवायः । यथा, भागवते । ५ । २६ । ३६ ।
"यस्त्विह वै विस्तम्भात् पापपुरुषः धर्मराजपुरुषा वायका इव सर्व्वतोऽङ्गेषु सूत्रैः परिवयन्ति ।")

वायदण्डः, पुं, (वायस्य दण्डः । यद्वा, वायतेऽनेनेति वायः । वाय एव दण्डः इति कर्म्मधारयः ।) वायदण्डः । इति भरतद्विरूपकोषः ।

वायनं क्ली, पिष्टकविशेषः । तत्पर्य्यायः । सतो वायनम् २ । सदेवकम् ३ । इति त्रिकाण्डशेषः ।

वायवी स्त्री, (वायोरियमिति । वायु + अण् । ङीप् ।) उत्तरपश्चिमदिक् । इति जटाधरः । (कार्त्तिकेयस्यानुचरमातृगणभेदः । यथा, महाभारते । ९ । ४६ । १७ ।
"वायव्यथाय कौमार्य्यो ब्राह्मणीच भारतर्षभ ।
वैष्णवी च तथा सौर्य्यो वाराही च महाबला ॥")

वायव्य त्रि, (वायुर्द्देवताऽस्येति । वायु + "वाय्वृतु पित्रुषसो यत् ।" ४ । २ । ३१ । इति यत् ।) वायुसम्बन्धिदिगादि । यथा । विप्लुश्रुतमुपक्रम्य गवायुतम्भे ।
"वायव्यस्य नैऋतस्य न यजेत् कदाचन ।" इति तिथ्यादितत्त्वम् ॥
(वायुदेवताकपशुहविरादि । यथा, ऋग्वेदे । १ । ९ । ८ ।
"तस्माद्यज्ञात् सर्व्वहुतः सम्भृतं पृषदाज्यम् ।
पशून्ताँश्चक्रे वायव्यानारण्यान् ग्राम्याश्च ये ॥"
"वायव्यान् वायुदेवताकान् ।" इति तद्भाष्ये सायनः ।) क्ली, अष्टसप्ताधिकचतुर्विंशति सहस्रश्लोकात्मकवायुपुराणम् । यथा, देवीभागवते । १ । ३ । ७ ।
"श्रुतं वामनञ्चैव वायव्यं षट्शतानि च ।
चतुर्विंशति संख्यातं सहस्राणि तु शौनक ॥"
अस्त्रविशेषः । यथा, महाभारते । १ । १३६ । १९ ।
"आग्नेयेनाथ जलदं वारुणेनाग्निसन्ततिम् ।
वायव्येनाथ मेघांश्च पार्ज्जन्येनाथ पर्व्वतान् ॥")

वायसः, पुं, (वयते इति । वय गतौ । "वयश्च ।" उणा १ । १२९ । इति असच् । स च णित् ।) अगुरुवृक्षः । श्रीवासः । काकः । इति मेदिनी । से १८ । (यथा, महाभारते । १ । १०७ । ११ ।
"नयनकथनकाकोलभावश्रीमान्मन्दवाच्चकाः ।
जयश्च पीडनाश्चैव कृथ्यजेतुर्सैवबिहः ॥")
अस्योत्पत्तिर्यथा —
"बरबद्दा भार्य्या श्येनी श्येनकन्नी महाबली ।
सम्पातिश्च जटायुश्च प्रसूतौ पक्षिसत्तमौ ।
सम्पातिवंशजाता काकाः पुत्रा जटायुषः ॥"
इति वह्निपुराणे वाराहप्रादुर्भावे ३० ।
अस्य एकाक्षिनाशकारणं यथा,—
मार्कण्डेय उवाच ।
"गते तु भरते तस्मिन् रामः कमललोचनः ।
लक्ष्मणेन सह भ्रात्रा भार्य्यया सीतया सह ।
शाकमूलफलाहारो विचचार महावने ।
एकदा लक्ष्मणरहितो रामदेवः प्रतापवान् ।
चित्रकूटे वने देशे वैदेह्या सह भावितः ।
सुष्वाप सुखपूर्व्वञ्च तत्र काको दुरात्मवान् ।
सीताभिमुखमभ्येत्य विददार स्तनान्तरम् ।
विदार्य्य वृक्षमारुह्य स्थितोऽसौ वायसाधमः ।
ततः प्रबुद्धो रामोऽसौ दृष्ट्वा रक्तं स्तनान्तरम् ।
शोकाविष्टान्तु सीतां तामुवाच कमलेक्षणः ।
किमिदं स्तनान्तरे भद्रे तव रक्तस्य कारणम् ।
इत्युक्ता सा च तं प्राह भर्त्तारं विनयान्विता ।
पश्य राजेन्द्र वृक्षाग्रे वायसं दुष्टचेष्टितम् ।
येनैतच्च कृतं कर्म्म सुप्ते त्वयि महामते ।
रामोऽपि दृष्ट्वा तं काकं तस्मिन् क्रोधमथा-करोत् ।
ऐषिकास्त्रं समादाय ब्रह्मास्त्रेणाभिमन्त्रितम् ।
काकमुद्दिश्य चिक्षेप सोऽव्यधावद्भयान्वितः ।
स निन्द्रस्य सुतो राजन् इन्द्रलोकं विवेश ह ।
रामास्त्रं प्रज्वलं दीप्तं तस्यानुप्रविवेश वै ।
विदितार्थश्च देवेन्द्रो देवैः सर्व्वैः समन्वितः ।
निष्कासयामास तं दुष्टं राघवस्यापकारिणम् ।
ततोऽसौ सर्व्वदेवेषु देवलोकाद्बहिष्कृतः ।
पुनः सोऽभ्येत्य रामञ्च राघवं शरणं गतः ।
त्राहि राम महाबाहो ह्यज्ञानादपकारि-णम् ।
इति ब्रुवन्तं स प्राह रामः कमललोचनः ।
अमोघस्य ममास्त्रस्य वधि एकं प्रयच्छ मे ।
ततो जीवसि दुष्टात्मन् मेऽपराधो महान् कृतः ।
इत्युक्तोऽसौ स्वकं नेत्रमेकमत्राय दत्तवान् ।
अस्त्रञ्च नेत्रमेकन्तु भक्षयित्वा शमं ययौ ।
ततः प्रभृति सर्व्वेषां काकानामेकनेत्रता ।
चक्षुषैकेन पश्यन्ति हेतुनानेन पार्थिव ॥"
इति नरसिंहपुराणे ५२ अध्यायः ॥
(वायससम्बन्धिनि, त्रि । यथा, महाभारते । १२ । ८२ । ७—८ ।
"स काकः पञ्जरे बद्धा चित्रं चौरविवेश ।
सर्व्वं पर्य्यचरत्तत्र प्रहसन्नपरे पुनः ।
अधीतं वायसी विद्या शंसन्ति मम वायसाः ।
अनागतमतीतञ्च यच्च सम्प्रति वर्त्तते ॥")

वायसादनी स्त्री, (वायसैरेव अद्यते इति । अद + कर्म्मणि ल्युट् + ङीप् ।) महाज्योतिष्मती । काकतुण्डी । इति राजनिर्घण्टः ॥

वायसाराति पुं (वायसस्य अरातिः ।) पेचकः । इत्यमरः । २ । ५ । १६ ।

वायसाह्वा, स्त्री (वायसस्य आह्वा नाम यस्याः ।) काकनासा । काकमाची । इति राजनिर्घण्टः ।

वायसी, स्त्री, (वायसानामियमिति तत्प्रियत्वात् । वायस + अण् । ङीष् ।) काकोडुम्बरिका । काकमाची । इति मेदिनी । से, १८ । महाज्योतिष्मती । काकनासा । काकतुण्डी । इति राजनिर्घण्टः ॥

वायसेक्षुः, पुं, (वायसानामिक्षुरिव प्रियत्वात् ।) काशः । इति राजनिर्घण्टः ॥

वायसोलिका स्त्री (वायसोली + स्वार्थे कन् ।) काकोली । इति शब्दरत्नावली ।

वायसोली स्त्री, (वायसान् कोलयतीति । कोलृ ह्रि उत्क्षेपे + "अन्येष्वपि दृश्यते ।" इति डः । पृषोदरादित्वात् ककारलोपः ।) काकोली । इत्यमरः । २ । ४ । १३४ ॥

वायुः, पुं, (वातीति । वा गतिगन्धनयोः + "कृवापाजिमिस्वदिसाध्यशूभ्य उण् ।" उणा १ । १ । इति उण् । "आतो युक् चिण्कृतोः ।" ७ । ३ । ३३ । इति युक् ।) उत्तरपश्चिमकोणाधिपतिः । वाति यः । वाताश इति भाषा । स च पञ्चभूतान्तर्गतभूतविशेषः । तद्विवरणं यथा । वायवः प्राणापानव्यानोदानसमानाः । प्राणो नाम प्राग्गमनवान् नासाग्रस्थानवर्त्ती । अपानो नाम अवाग्गमनवान् पाय्वादिस्थानवर्त्ती । व्यानो नाम विष्वग्गमनवानखिलशरीरवर्त्ती । उदानः कण्ठस्थानीय ऊर्द्ध्वगमनवानुत्क्रमणवायुः । समानः शरीरमध्यगताशितपीतान्नादिसमीकरणकरः । समीकरणन्तु परिपाककरणं रसरुधिरशुक्रपुरीषादिकरणम् । केचित्तु नागकूर्म्मकृकरदेवदत्तधनञ्जयाख्याः पञ्चान्ये वायवः सन्तीत्याहुः । तत्र नागः उद्गिरणकरः । कूर्म्मः निमीलनादिकरः । कृकरः क्षुधाकरः । देवदत्तः जृम्भणकरः । धनञ्जयः पोषणकरः । एतेषां प्राणादिष्वन्तर्भावात् प्राणादयः पञ्चैवेति केचित् । इदं प्राणादिपञ्चकं आकाशादिगतरजोंऽशेभ्यो मिलितेभ्य उत्पद्यते । इदं प्राणादिपञ्चकं कर्म्मेन्द्रियसहितं सत् प्राणमयकोषो भवति । अस्य क्रियात्मकत्वेन रजोंऽशकार्य्यत्वम् । एतेषु कोषेषु मध्ये विज्ञानमयो ज्ञानशक्तिमान् कर्त्तृरूपः । मनोमयः इच्छाशक्तिमान् करणरूपः । प्राणमयः क्रियाशक्तिमान् कार्य्यरूपः । इति वेदान्तसारः । तत्पर्य्यायः । श्वसनः १ स्पर्शनः २ मातरिश्वा ३ सदागतिः ४ पृषदश्वः ५ गन्धवहः ६ गन्धवाहः ७ अनिलः ८ आशुगः ९ समीरः १० मारुतः ११ मरुत् १२ जगत्प्राणः १३ समीरणः १४ नभस्वान् १५ वातः १६ पवनः १७ पवमानः १८ प्रभञ्जनः १९ । इत्यमरः । अजगत्प्राणः २० खश्वासः २१ वाहः २२ धूलिध्वजः २३ फणिप्रियः २४ वातिः २५ नभःप्राणः २६ भोगिकान्तः २७ स्वकम्पनः २८ अक्षतिः २९ कम्पलक्ष्मा ३० शसीनिः ३१ आवकः ३२ हरिः ३३ । इति शब्दरत्नावली । वासः ३४ सुखाशः ३५ मृगवाहनः ३६ सारः ३७

एतास्तु वामभावेन यजेत्त्रिपुरभैरवीम् ।
यत्र पिष्टकवारो यस्माद्भवति दक्षिणः ।
देवी च दक्षिणा यस्मात्तस्मात् दक्षिणमुच्यते ।
या पुनः पूज्यमाना तु देवादीनान्तु पूर्व्वतः ।
वामभागं स्वयं धत्ते सा वामा तु प्रकीर्त्तिता ॥"
इति कालिकापुराणे ७७ अध्यायः ॥

वामाचि स्त्री, (वाममर्च्चि ।) वामचक्षुः । (बथ न्यासे नस्य नाममर्चि येन ।) दीर्घ ईकारः । यथा —
"कर्पूरं मध्यमान्त्यस्वरपररहितं सेन्दु वामाक्षियुक्तं
बीजन्ते मातरेतत्त्रिपुरहरवधु त्रिःकृतं ये जपन्ति ।"
इत्यादिकर्पूरादिस्तोत्रम् ॥

वामाक्षी स्त्री, (वामे मनोहरे अक्षिणी यस्याः । षच् । ङीष् ।) वामलोचना । इति हेमचन्द्रः ॥

वामाचार, पुं, (वामो विपरीतो वेदविरुद्धो वा आचारः ।) आचारविशेषः । यथा —
"पञ्चतत्त्वं खपुष्पञ्च पूजयेत् कुलयोषितम् ।
वामाचारो भवेत्तत्र वामा भूत्वा यजेत् पराम् ॥"
इत्याचारभेदतन्त्रम् ॥
तन्त्राचारवतां नरकगमनं यथा,—
"स्वधर्म्मरहिता विप्रा वेदान्यविधिनः सदा ।
भ्रष्टाचाराश्च वामाश्च ते यान्ति नरकं ध्रुवम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २४ अध्यायः ॥
तन्मतं यथा,—
"चत्वारो देवि वेदाद्याः पशुभावे प्रतिष्ठिताः ।
वामाद्याश्च आचारा दिव्ये वीरे प्रतिष्ठिताः ॥"
इति निबातन्त्रम् ॥
"सर्व्वेभ्यश्चोत्तमा वेदा वेदेभ्यो वैष्णवं महत् ।
वैष्णवादुत्तमं शैवं शैवाद्दक्षिणमुत्तमम् ॥
दक्षिणादुत्तमं वामं वामात् सिद्धान्तमुत्तमम् ।
सिद्धान्तादुत्तमं कौलं कौलात् परतरं नहि ॥"
इति कुलार्णवतन्त्रे २ खण्डम् ॥ * ॥
तदाचारयुक्तस्य निषिद्धकर्म्माणि यथा —
"न दद्यात् ब्राह्मणो मद्यं महादेव्यै कथञ्चन ।
वामकामो ब्राह्मणो हि मद्यं मांसं न भक्षयेत् ॥"
तदनुकल्पो यथा । कुलचूडामणौ ।
"यथाचमनमात्रन्तु ब्राह्मणो विधिवत ।
तत्र गुडार्द्रकं दद्यात् ताम्रे वा विन्यसेत्ततः ।
देशाच्च दक्षिणे भागे चक्रपार्श्वे निवेशयेत् ।
एतद्वस्तु शूद्रस्य माध्वीकन्तु वरानने ॥
वैश्यस्य माक्षिकं मुख्यं क्षत्रियस्य तु साप्यकम् ।
ब्राह्मणस्य तथा क्षीरं ताम्रे वा विन्यसेत्ततः ।
नारिकेलोदकं कांस्ये सर्व्वेषां मद्यशोधनम् ॥"
क्षत्रियवैश्ययोस्तु गौडी माध्वी च दातव्या तत्र तयोरधिकारात् तदभावे अनुकल्पविधानम् । तथा च ।
"गोक्षीरं ब्राह्मणो दद्यात् मध्वमाध्यञ्च बाहुजः ।
वैश्यश्च माक्षिकं मद्यं शूद्रः पैष्ट्यादिकं पुनः ॥"
तेन शूद्रस्य नानुकल्पः ॥ * ॥ कुलार्णवे ।
"जलं क्षीरं घृतं दधि मधु मैरेयमैक्षवम् ।
पौष्पं तालभवं धान्यसम्भवं तक्रमिश्रितम् ॥
खर्ज्जूरभवं देवि त्रिविधं बहुभेदकम् ।
मादकं यमाद्यभेदात् सर्व्वमाचरेत् कुलेश्वरि ॥
ज्ञानेन संस्कृतन्तत्तु महापातकनाशनम् ।
तद्दाने पातकाभावो न्यभावनिषयं वा ॥ * ॥
मादकद्रव्यस्य द्रव्यं देव शिव द्विजातिभिः ।
अमादकत्वाद्वैवपि पेयं सेव्यत बुधैः ॥"
एतेन क्षत्रियादिभिरमादकं द्रव्यं सेव्यं मादकस्य पापहेतुत्वमुक्तम् । भैरवतन्त्रे ।
"मद्यं मांसं विना यस्य यत्किञ्चित् कुलसाधनम् ।
यक्षे दत्त्वा ततः शेषं गुरवे तन्निवेदयेत् ।
तदनुज्ञां गृहीत्वा प्रथमात्मनि योजयेत् ॥"
तेन क्षत्रियादीनां सुरापाने अधिकारः न पाने । यत्तु ।
"पीत्वा पीत्वा पुनः पीत्वा पतित्वा च महीतले ।
उत्थाय च पुनः पीत्वा पुनर्जन्म न विद्यते ॥"
तत्तु चतुर्थाभिषिक्तपरम् ॥ * ॥ तद्ग्रहणे जातिचिन्तां न कुर्यात् ।
"मदिरायां मैथुने च जातिचिन्तां न कारयेत् ॥"
एतेषां शोधनस्यावश्यकत्वम् । तथा च ।
"अशोधनमनाचर्य्य कौलं मद्यं तु साधक ।
आचार्य्यं सिद्धिहानिः स्यात् क्रुद्धा भवति सुन्दरी ॥"
मद्येषु सुराशुद्धकल्पेषु ॥ * ॥ तथा कुलपूजायां मांसावश्यकत्वम् । तथा च ।
"मधु मांसं विना देवि कुलपूजां समाचरेत् ।
अन्धकाररतस्तस्य सुकृतं तस्य नश्यति ॥" * ॥
अथ मांसादिशोधनम् ।
"मांसन्तु त्रिविधं प्रोक्तं जलखेचरभूचरम् ।
मांसन्तु त्रिविधं प्रोक्तं देवताप्रीतिकारकम् ॥
मत्स्यश्च त्रिविधो देवि उत्तमाधममध्यमम् ।
उत्तमं त्रिविधं मत्स्यं शालपाठीनरोहितम् ॥
मध्यमं कण्टकैर्हीनं तैलाक्तं पक्वसंयुतम् ।
देव्याः प्रीतिकरश्चैव मध्यमं तच्चतुर्व्विधम् ।
क्षुद्राणि तानि सर्व्वाणि अधमानि विदुर्बुधाः ॥"
भूचरमांसञ्च ।
"गोमेषाजकुलापीत्यगोधाशोद्भवगोद्भवम् ।
महामांसादिकं प्रोक्तं देवताप्रीतिकारकम् ॥"
मांसाभावे अनुकल्पः । समयाचारे ।
"लवणार्द्रकपिण्याकतिलगोधूममाषकम् ।
लशुनञ्च महादेवि मांसप्रतिनिधिः स्मृतः ॥" * ॥
मुद्रा तु द्विविधा । कुलार्णवे ।
"शफरं मत्स्याकारं चन्द्रपद्मनिभं शुभम् ।
चारु मधुमनोहारि प्रकाराद्यैश्च पूरितम् ।
पूजाकाले देवताया सुदेशा परिकीर्त्तिता ॥"
यामले ।
"भक्ष्यान्नादिकं यावत् सर्व्वञ्चैव प्रकल्पयेत् ।
तेषां सभा तथा सुधा महामोदप्रदायिनी ॥"
तेषां शोधनन्तु स्वतन्त्रतन्त्रे । ॐ प्रतद्विष्णु रित्यादिना मांसम् । त्र्यम्बकमित्यादिना मीनम् । तद्विष्णोरित्यादिना मुद्राम् ॥ * ॥ अथ शक्तिशोधनम् । तत्र भावचूडामणौ ।
"अदीक्षितकुलाधारात् सिद्धिहानिः प्रजायते ।
तस्मात् पानवधे चेत् स्यात् तत्क्षणमनयन्ति ।
स कुलीनः स्वयं देवि पूजयेत् परमेश्वरीम् ॥"
श्रीक्रमे । मन्त्रशोधनमनाचर्य्येति । कौलिकतन्त्रे ।
"अभिषेकाद्वयेक्षुद्धिर्मन्त्रोच्चारविन्दुभिः ।
बलाद्वा यत्नतो वापि अभिषिच्य समाचरेत् ॥"
अभिषेकमन्त्रस्तु ।
"आन्ते वाणीं समुच्चार्य्य त्रिपुरायै समुद्धरेत् ।
नम इन्द्रं समुच्चार्य्य इमां शक्तिं ततो वदेत् ।
पवित्रीकुरु शब्दान्ते मम सिद्धिं कुरु प्रिये ।
मायायां समुच्चार्य्य सुद्धिमन्त्रं सुरेश्वरि ।
तस्याः कर्णेऽभिषुद्धात् मायाबीजं समुद्धरेत् ॥"
इति शक्तिशोधनम् ॥ * ॥
तत शोधितद्रव्यमर्घ्यं विदेत् । श्रीक्रमे अर्घ्यविधौ ।
"पूर्व्वशोधितद्रव्यन्तु गुरुमेव च सन्निवेत् ॥"
स्वतन्त्रतन्त्रे ।
"आदावर्घ्यमध्यपात्रे नि शिष्य प्रयत सुधीः ।
कुलगोलोद्भवं द्रव्यं स्वयम्भुकुसुमं तथा ।
अर्घ्यं दत्त्वा मनुः ध्यानि सर्व्वसिद्धीश्वरो भवेत् ॥
सुरया चार्घ्यदानेन योगिनीनां भवेत् प्रियः ।
महायोगी भवेद्देवि पीठस्थानानिवेशने ॥"
भैरवतन्त्रे ।
"पञ्चमात्तु परं नास्ति शाक्तानां सुलभोपयो ।
केवलं पञ्चमेनापि सिद्धो भवति साधकः ॥"
तेन पञ्चमकारेण पूजा कार्य्या । इति तन्त्रसारः ॥

वामापीडन, पुं, पीलुवृक्षः । इति शब्दचन्द्रिका ॥

वामिका, स्त्री, (वामा + स्वार्थे कन् । टापि अत इत्वम् ।) चण्डिका । यथा,—
"कदाचिच्चण्डिका देवी वामिका मनोज्ञा स्मृता ।
अष्टमाञ्च वामिका गर्व्विता दक्षभैरवी ।
भाविदार्द्धं पुरयामसन्दिरेषु करोम्यहम् ।
अपूजिता महालक्ष्म्यादिभिर्या स्तां पूजयेत् ।
वामभैरवी च वामिका परिकीर्त्तिता ।
तस्या मन्त्रपुरा प्रोक्तं मुक्तकर्णा तु वा स्मृता ॥"
इति कालिकापुराणे ७७ अध्यायः ॥

वामिक, त्रि, (वाम + ठञ् ।) दक्षिण । वामः । इति मेदिनी । के, १९१ ॥

वामी स्त्री, शृगाली । वडवा । (यथा, रघौ । ५ । ६२ ।
"अघोद्धृवामोद्धतवाहिताश्वं
प्रवन्नर प्रीतमना महर्षिः ॥")
रासभी । करभी । इति मेदिनी । मे, १ ॥

वामोरू, स्त्री, वामौ सुन्दरौ ऊरू यस्याः । ("वंहितगजकवामोरुः ।" ॥ १ । ८ ।

तामसस्यान्तरे ये च मरुतोऽप्यभवन् पुरा ।
तांश्च कीर्त्तयिष्यामि यौवनाश्वकुलप्रिय ! ॥
तामसस्य मनोः पुत्त्रः ऋतध्वज इति श्रुतः ।
स पुत्त्रार्थी जुहावाग्नौ स्वमांसं रुधिरं तथा ॥
अस्थीनि रोम केशांश्च स्नायुमज्जा यकृद्धनम् ।
शुक्रञ्च विमलो राजा सुतार्थी चेति नः श्रुतम् ॥
सप्तार्च्चिर्म्मेध्याच्च तत्र शुक्रपातादनन्तरम् ।
मा मे क्षिपस्त्वितरत् शब्दः कोऽपि नृपोत्तम ॥
ततस्तस्माद्धुतवहात् सप्त तत्तेजसोपमाः ।
शिशवः समजायन्त वै रुदन्तश्च तत्क्षणे ॥
तेषान्तु ध्वनिमाकर्ण्य भगवान् पद्मसम्भवः ।
समागम्य निवार्य्याथ स चक्रे मरुतः सुतान् ॥
ते तामसान्तरे ब्रह्मजातास्ते देवतागणाः ।०।
येऽभवन् यत्र तांश्च प्रशृणुष्व तपोधन ॥
रैवतस्यान्तरे तु राजासीद्रिपुजिद्वशी ।
रिपुजिन्नाम स ख्यातो न तस्यासीत् सुतः किल ॥
स समाराध्य तपसा भास्करं तेजसां निधिम् ।
अवाप कन्यां सुरतिं तां प्रगृह्य गृहं ययौ ॥
तस्याः पित्रर्थे ब्रह्मन् ममत्वाच्च पिता मृतः ।
सापि दुःखपरीताङ्गी स्वां तनुं त्यक्तुमुद्यता ॥
ततस्तां वारयामासुः सर्व्वे च सप्त मानसाः ।
तस्याश्रमपदभिगतास्तु सर्व्व एव तपोधनाः ॥
अपारयन्ती सद्दुःखं प्रज्वालाग्निं विवेश च ।
ते चापश्यन्त स्वयमस्थितामाविशतास्तथा ॥
तां मृतां ऋषयो दृष्ट्वा कष्टं कष्टेति वादिनः ।
प्रजग्मुश्च सनाथापि समाजायन्त दारकाः ॥
ते च माता विना भूता रुरुदुश्चान् पितामहः ।
निवारयित्वा ख्यातवान् लोकनाथो महायशाः ॥
रैवतस्यान्तरे जाता मरुतोऽमी तपोधन ।०।
प्रत्युष कीर्त्तयिष्यामि चाक्षुषस्यान्तरे मनोः ।
पार्थिवाद्वीति विख्यातो तपस्वी सत्यवाक् शुचिः ।
सप्त सारस्वते तीर्थे योऽतप्यत महत्तपः ॥
विघ्नार्थं तस्य तपसो देवाः संप्रेरयन् वधूम् ।
सा चाभ्येत्य नदीतीरे क्षोभयामास भामिनी ॥
ततोऽस्य प्राच्यवच्छुक्रं सप्त सारस्वते जले ।
तां चेत्याप्यशपन्मूढां मुनिर्म्मोहाद्विमो वधूम् ॥
गच्छालब्धेति हृदि मे पापस्यास्य फलं महत् ।
विध्वंसयिष्यति यतो भवती मत्तपस्त्विह ॥
एवं शप्ता च सा भीमान् जलमाय समाश्रयम् ।
सारस्वतस्थ सामस्थ तत्र वै मरुतोऽभवन् ॥
एते तवोक्ता मरुतः पुरा यथा
जाता विभक्तास्त्रिदशान् महर्षे ।
येषां श्रुते चापि पापहानि
र्भवेच्च धर्म्माभ्युदयो महांश्च वै ॥"
इति वामने मरुतोत्पत्तिर्नाम ४८ अध्यायः ।०।
अन्यच्च ।
"अथ, परं प्रवक्ष्यामि मरुतोऽभवन् द्विज यथा ।
मायाद्वौ विरहश्चैव जहार च कश्यपा ।

विवह प्रवहश्चैव परिवाहस्तथैव च ।
आवहोद्वहश्च वाहो ते एवन्नामाविचारिणः ।
महेन्द्रप्रविभक्ताङ्गा मरुतः सप्त कीर्त्तिताः ।०।
सूर्य्यामिव सुचित्रांशा वैद्युतः पावकः स्मृतः ।
निर्म्मेघः पवमानोऽपि विश्वः प्रोक्ता इमेऽपरे ।
अमीषां पुत्त्रपौत्राश्च चत्वारिंशन्नवैव तु ।
मरुतामपि सर्व्वेषां विज्ञेयाः सप्त सप्तकाः ॥"
इति देवीपुराणे कालचक्राख्यानामाध्यायः ।०।
ऊनपञ्चाशद्वायुनामानि यथा,—
"एकज्योतिश्च द्विज्योतिस्त्रिज्योतिर्ज्योतिरेव च ।
एकशक्रो द्विशक्रश्च त्रिशक्रश्च महाबलः ॥
इन्द्रश्च सम्मदृश्यश्च ततः प्रतिसकृत्परः ।
मितश्च सम्मितश्चैव सुमितश्च महाबलः ॥
ऋतजित् सत्यजिच्चैव सुषेणः सेनजित्तथा ।
अन्तिमित्रोऽनमित्रश्च पुरुमित्रोऽपराजितः ॥
ऋतश्च ऋतवाहश्च धर्त्ता च धरुणो ध्रुवः ।
विधारणो नाम तथा देवदेवो महाबलः ॥
ईदृक्षश्चादृक्षश्च एते दश मिताशिनः ।
प्रतिमः प्रसभश्चैव सभरश्च महायशाः ॥
धाता दुर्गो धृतिर्भीमस्त्वभियुक्तस्त्वपात् सहः ।
द्युतिर्वपुरनाधृष्यो वासः कामो जयो विराट् ।
इत्येकोनाश्च पञ्चाशन्मरुतः पूर्व्वसम्भवाः ॥"
इति वह्निपुराणे गणभेदनामाध्यायः ।०।
वायोर्विकारहेतुर्यथा,—
"व्यायामादपतर्पणात् प्रपतनाद्भङ्गात् क्षयाज्जागरात्
वेगानाञ्च विधारणादतिशुचः शैत्यादति त्रासतः ।
रूक्षक्षोभकषायतिक्तकटुकैरेभिः प्रकोपं व्रजेत्
वायुर्म्मेघघनागमे परिणते चान्नेऽपराह्णेऽपि च ॥"०।
तस्य लक्षणम् ।
"व्यावासतन्वरौक्ष्यस्फुटनविमथनक्षोभकम्पप्रतोदा
कण्ठध्वंसावसादौ भ्रमकविलपनं संधभूत्रप्रभेदाः ।
पारुष्यं रुक्षवादो विषमपरिणतिर्भ्रंशहर्षप्रमोहा
विश्लेषोद्वर्त्तनारिस्वपनममनन ताडनं पीडनञ्च ।
श्यामोऽरुणो विकारो मुखपरिवरसं कूजनं रोमहर्षो
निर्व्वेदाक्षेपशोषप्लवनमुषिरता हिक्कवेगश्च ।
यत्र प्रायोऽव्यक्तो वा मधुरपि च मरुतो नाम रिङ्गवृन्दा
विद्यात् कर्म्माण्यमथ प्रकुपितमरुतः कार्य्यं कषायो रसश्च ॥"०।
अन्यच्च ।
"रूक्षविरसत्वा स्तम्भकं कम्पनञ्च
भवति कटुकं कायं तापविदाहविरति ।
मधि च परुषा स्नायु स्तम्भ वैवर्ण्यमपि
इति पवनविकारे कर्म्म मात्रमेतत् ॥"०।

तस्य प्रशमनकारणम् । यथा,—
"स्वच्छदोत्तो लघुः सूक्ष्मश्चोऽथ विशदः खरः ।
विपरीतगुणैर्द्रव्यैर्मारुतः सम्प्रशाम्यति ॥
स्निग्धोष्णस्थिरगुरुद्रवपिच्छिलसान्द्रप्राज्ञैर्म्मैतातप
स्नानाभ्यङ्गावगाहाक्षिमर्द्दनपरिषेकाङ्गमर्द्दनैरोदनैः ।
स्निग्धस्वेदविरूक्षणोपशमनं वैद्योपनाहानिल
मांसाहारविहारभेदकमिदं वातं प्रशाम्यं भवेत् ॥"०।
ऋतुभेदेन विकारादिना च तस्य चयप्रकोप
प्रशमनानि यथा,—
"ग्रीष्मे सञ्चीयते वायुः प्रावृट्काले प्रकुप्यति ।
प्रायेणोपशमं याति शरदेव समीरणः ॥
ग्रीष्मकाले वसन्ते च पित्तं प्रावृषि च कफः ।
चयकोपशमान्येषां विहाराहारसेवनैः ।
समानैर्यान्ति कालेऽपि विपरीतैर्विपर्य्ययम् ॥"०।
स च प्राणादिभेदेन पञ्चविधः । यथा,—
"पित्तं पङ्गु कफः पङ्गुः पङ्गवो मलधातवः ।
वायुना यत्र नीयन्ते तत्र गच्छन्ति मेघवत् ॥
वायुरायुर्बलं वायुर्वायुर्धाता शरीरिणाम् ।
वायुर्विश्वमिदं सर्व्वं प्रभुर्व्वायुः प्रकीर्त्तितः ॥
ब्रह्मक्षत्रयज्ञेषु यथा राजा प्रशस्यते ।
तथा शरीरमध्येऽपि वायुरेकः परो स्थितः ॥
वायुः प्राणादिभेदेन स च पञ्चविधः स्मृतः ।
हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले ।
उदानः कण्ठदेशे तु व्यानः सर्व्वशरीरगः ॥
योऽनिलो रक्तसञ्चारी स प्राणो नाम देहधृक् ।
सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चैवावलम्बते ।
कुपितः कुरुते रोगान् हिक्काश्वासादिकानपि ॥
उदानो नाम यस्तूर्द्ध्वमुपैति पवनोत्तमः ।
तेन भाषितगीतादिविशेषोऽपि प्रवर्त्तते ।
ऊर्द्ध्वजत्रुगतान् रोगान् करोति कुपितश्च सः ॥
आमपक्वाशयचरः समानोऽग्निसहायवान् ।
अन्नं पचति तज्जांश्च विकारान् विविनक्ति च ।
गुल्माग्निसादातीसारान् कुपितश्च करोति सः ॥
पक्वाशयस्थोऽपानस्तु काले कर्षति चाप्यधः ।
वातमूत्रपुरीषाणि शुक्रगर्भार्त्तवानि च ॥
क्रुद्धश्च कुरुते रोगान् घोरान् वस्तिगुदाश्रयान् ।
सर्व्वदेहचरो व्यानो रसवहनचेष्टितः ॥
स्वेदासृक्स्रावकश्चापि पञ्चधा चेष्टयत्यपि ।
क्रुद्धश्च कुरुते रोगान् प्रायशः सर्व्वदेहगान् ॥
युक्तदोषाः पवित्राश्च यामायामप्रकाशकाः ।
दूषयन् हन्ति ताः कामी देहं सन्तु रेचक ॥"०।
तस्य हितकञ्च यथा —
"स्वस्वेदः स्नेहो रूक्षो शाल्यादिकमपाच ।
आचारश्चारो सन्धु वातशमनो नरः ॥"०।
प्राणादिपञ्चवायूनां यथाक्रमं वर्णमाह ।
"प्राणोऽपानः समानश्चोदानव्यानौ च वायवः ।
नागः कूर्म्मश्च कृकरो देवदत्तो धनञ्जयः ।०।
प्राणस्तु प्रथमो वायुरक्तवर्णः स मतः ।
निजमरणपदेषु वर्णात् प्रसवहृदयेष्विव ।
दिव्याकोशकवत्येव दध्यो चोरं वर्त्तमानः ।
प्रवालाभवर्णो दर्भ दधातो मरकतवत् ।

३८ चपलः ३९ विद्युत् ४० प्रकम्पनः ४१ प्रभञ्जनः ४२ निर्घातकः ४३ ध्वजः ४४ पृषतांपतिः। इति जटाधरः ॥ ॥ स च सृष्टिकाले आकाशाज्जातः। यथा। तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः आकाशाद्वायुः। इत्यादि तैत्तिरीयश्रुतिः ॥ ॥ जन्मधारणाद्वायुरदितेः पुत्राः। ते सर्व्वे अप्रजाः। इन्द्रेण देवत्वं प्रापिताः। शरीरान्तःस्थभेदेन दशधा। यथा। प्राणः १। तस्य कर्म्म बहिर्गमनम्। अपानः २। तस्य कर्म्म अधोगमनम्। व्यानः ३। तस्य कर्म्म आकुञ्चनप्रसारणादि। समानः ४। तस्य कर्म्म अशितपीतादीनां समं नयनम्। उदानः ५। तस्य कर्म्म ऊर्द्ध्वनयनम्।

"उद्गारे नाग ६ आख्यातः कूर्म्म ७ उन्मीलने स्मृतः।
कृकरः ८ क्षुत्करो ज्ञेयो देवदत्तो ९ विजृम्भणे।
न जहाति मृतञ्चापि सर्व्वव्यापी धनञ्जयः १० ॥"

इति भागवतटीकायां श्रीधरस्वामी ॥ ॥

अपरञ्च।

"द्वितीयं मारुतो भूतं त्वगध्यात्मञ्च विश्रुता।
स्प्रष्टव्यमधिभूतञ्च विद्युत्तत्राधिदैवतम् ॥"

इति महाभारते आश्वमेधिकपर्व्व।

तस्य गुणाः। यथा —

"वायोरनियमस्पर्शो वाग्वादः स्वतन्त्रता।
बलं शैघ्र्यञ्च मोक्षञ्च कर्म्म चेष्टात्मता भवः ॥"

इति महाभारते मोक्षधर्म्मः ॥ ॥

अनियमस्पर्शः। अनुष्णाशीतस्पर्शः १। नादस्थानम्। नाडिश्वासगोलकानि २। स्वतन्त्रता। गमनादौ ३। बलम् ४। शैघ्र्यम् ५। मोक्ष उत्सर्गे ६। कर्म्म। उत्क्षेपणादि ७। चेष्टा श्वासप्रश्वासादि ८। आत्मता प्राणरूपेण विदाधिलम् ९। भवः। जन्ममरणे १०। इति तट्टीका ॥ ॥ न्यायमते अस्य गुणादिर्यथा,—

"अपाकजोऽनुष्णाशीतस्पर्शस्तु पवने मतः।
तिर्य्यग्गमनवानेष ज्ञेयः स्पर्शादिलिङ्गकः ॥
पूर्व्ववन्नित्यताद्युक्तं देहव्यापि त्वगिन्द्रियम्।
प्राणादिस्तु महावायुपर्य्यन्तो विषयो मतः ॥"

इति भाषापरिच्छेदः।

"वायुं निरूपयति अपाकज इति। अनुष्णाशीतस्पर्शस्य पृथिव्यामपि सत्त्वात् अपाकज इति। अपाकजस्पर्शस्य जलादावपि सत्त्वात् उक्तमनुष्णाशीत इति। एतेन वायोर्भिन्ना शीतस्पर्शो दर्शितः। तन्मात्रतावच्छेदकं वायुत्वमिति भावः। एष वायुः स्पर्शादिलिङ्गकः। वायुर्हि अप्रत्यक्षस्त्वगिन्द्रियैरनुमीयते। किन्तु स्पर्शेन भिन्नाश्रयकत्वेन कम्पानां वृक्षादीनां कम्पनेन च वायोरनुमानात्। तथा च वायुर्न प्रत्यक्षधार्मिवत्ते। वायुर्नित्योऽनित्यो वा परमाणुरूपो नित्यस्तदन्योऽनित्य अमनेनच। सोऽपि त्रिविधः शरीरेन्द्रियविषयभेदात्। तत्र शरीरमयोनिज पिशाचादीनाम्। देवलोकेति। शरीरव्यापक स्पर्शग्राहकमिन्द्रियं त्वक्। तच्च वायवीयं रूपादिषु मध्ये स्पर्शस्यैव व्यञ्जकत्वात्। अङ्गसङ्गिसलिलशैत्यव्यञ्जकव्यजनवातवत्। विषयं दर्शयति प्राणादिरिति। यद्यप्येको वायुश्चतुर्विधः तच्च चातुर्विध्यं प्राणादिना उक्तमाकरे। तथापि सङ्क्षेपात् अत्र त्रैविध्यमुक्तं प्राणस्यैक एव हृदादिनानास्थानवशात् मुखनिर्गमादिनानाक्रियावशाच्च नानासंज्ञां लभते इत्यर्थः।" इति सिद्धान्तमुक्तावली ॥ ॥ अथोत्पत्तिर्यथा,—

पुलस्त्य उवाच।

"प्रविश्य जठरं शक्रो दैत्यमातुः पुरन्दरः।
ददर्शोर्द्ध्वमुखं बालं कटिन्यस्तकरं महत्।
तस्यैव गर्भं दितिज वज्रेण शतपर्व्वणा।
चिच्छेद सप्तधा ब्रह्मन् स च रुरोद सुविस्वरम् ॥
शक्रोऽपि प्राह मा रुद रुदस्वेति वचवरम्।
इत्येवमुक्त्वा चैकैकं भूयश्चिच्छेद सप्तधा।
ते जाता मरुतो नाम देवा दिव्याः शतक्रतोः।
मातुर्दोषापचारेण वज्रपाणेः पुरस्कृताः ॥"

इति वामने ३८ अध्यायः।

"यदेते भवता प्रोक्ता मरुतो दितिजन्मनः।
तत् केन पूर्व्वमासन् वै मरुतामर्थं कथ्यताम् ॥"

पुलस्त्य उवाच।

श्रूयतां पूर्व्वमरुतामुत्पत्तिं कथयामि ते।
स्वायम्भुवं समारभ्य यावन्मन्वन्तरं त्विदम् ॥
स्वायम्भुवस्य पुत्रोऽभूत् नाम्ना प्रियव्रतः।
तस्यासीत् सवनो नाम पुत्रस्त्रैलोक्यपूजितः ॥

स्वमुत्पपाताय च कामचारी
सम महिष्या वसुमानयुक्ता।
रराम तस्या सह कामचारी
ततोऽमरात् प्राप्य सुतस्य शुक्रम् ॥

पतिभिः समनुप्राप्ता वपुः पुष्करसंस्थितम्।
तं शुक्रं पार्थिवेन्द्रस्य भस्ममाकाशदाम्बरम् ॥
पीतमात्रेण शुक्रेण पार्थिवेन्द्रोऽग्निरेव च।
भर्त्तृशोकविहीनाश्च जाताः पक्षरूपक्षिणाम् ॥
सुषुवुः सप्त तनयांस्ते वदन्तोऽथ भैरवम्।
तेषां वन्दितशब्देन धर्म्मसापूरितं जगत् ॥
अथाजगाम भगवान् ब्रह्मलोकात् पितामहः।
समभ्येत्याब्रवीदाशान् मा रुदध्वं महाबलाः ॥
मरुतो नाम यूयं वै भविष्यध्वं वियच्चराः।
इत्येवमुक्त्वा देवेशो ब्रह्मा लोकपितामहः ॥
तानादाय दिवञ्चारी मारुतानादिदेश ह।
ते चासन् मरुतश्चाद्या मनोः स्वायम्भुवान्तरे ॥ ॥
स्वारोचिषे तु मरुतो वक्ष्यामि शृणु नारद।
स्वारोचिषस्य पुत्रश्च श्रीमानासीत् क्रतुध्वजः ॥
तस्य पुत्रा भवन् सप्त सप्तर्षिप्रतिमाः शुभे।
तपोऽर्थं ते गताः शैलं महामेरुं नभश्चराः ॥
आराधयन्तो ब्रह्माणं पञ्चेन्द्रमपेक्षयन्।
ततो विपश्चित्रामाथ सहस्राक्षो भयातुरः ॥
पूतनामप्सरोमुख्यां प्राह नारद वाक्यवित्।
यथा हि तपसो विघ्नं तेषां भवति सुन्दरि ॥
तथा कुरुष्व मा तेषां सिद्धिर्भवतु वै यथा।
इत्येवमुक्ता शक्रेण पूतना रूपशालिनी ॥
तत्राजगाम त्वरिता यत्र तप्यन्ति ते तपः।
आश्रमस्याविदूरे तु नदी मन्दोदवाहिनी ॥
तस्यां स्नातुं समायाता सर्व्वे एव सहोदराः।
सा तु स्नातुं सुचार्व्वङ्गी समतीर्णा महानदीम् ॥
ददृशुस्ते शुभा स्नातुं ततस्तुस्रुविरे शुभे।
तेषाच्च प्राच्यवत् शुक्रं तत् पपौ जलचारिणी ॥
ग्राहिणी पाशहस्तस्य महाशङ्खस्य वल्लभा।
ते वै विनष्टतपसो जग्मू राज्यश्च पैतृकम् ॥
अथ सा मनुतिष्ठे काले सा याक्षी शङ्खरूपिणी।
संवृता महाजालैर्मत्स्यवन्धेन मानिनी ॥
स तां दृष्ट्वा महाग्राही स्वजक्षा मत्स्यजीवकः।
निवेदयामास तदा भक्तुस्तद्वृत्तिं वै ॥
तथाप्येष महामायी योगिनी योगपारग।
नीत्वा स्वमन्दिरं सर्व्वे पुत्रायामृतसञ्ज्ञा ॥
तत् क्रमात्सखिनी सा सुषुवे सप्त वै शिशून्।
जातमात्रेषु पुत्रेषु मोक्षमाप समाप सा ॥
अमातृपितृका बाला अरण्यस्थविचारिणः।
स्तन्यार्थिनो वै रुरुदुस्तथास्थान् पितामहः ॥
मा रुदध्वमिति प्राह मारुतो नाम पुत्रकाः।
यूयं देवा भविष्यध्वं वायवोऽम्बरचारिणः ॥
इत्येवमुक्त्वाऽप्यादाय सर्व्वांस्तान् देवलोकं प्रति।
नियोज्य च मरुन्मार्गे वैराजभवनं गतः ॥
एवमार्यक्ष मरुतो मनो स्वारोचिषान्तरे ॥ ॥
औत्तमे मरुतो ये च तान् शृणुष्व तपोधन।
औत्तमस्यान्ववाये च राजासीत्प्रियपार्थिव ॥
वपुष्मानिति विख्यातो वपुषा भास्करोपमः।
तस्य पुत्रो गुणश्रेष्ठो ज्योतिष्मान धार्म्मिको ऽभवत् ॥
स पुत्रार्थी तपस्तेपे नदीं मन्दाकिनीमनु।
तस्य भार्य्या च सुश्रोणी देवाचार्य्यसुता शुभा ॥
तपश्चरणयुक्तस्य बभूव परिचारिका।
वेदोक्ता सुचार्व्वङ्गी द्रष्टा समिधिसिद्धये ॥
तौ तथा चादयन्नोऽङ्गी तस्थाय तपसा तथा।
पद्मश्रुसनयौ वैतुल्यस्यासन्नतोरेव च ॥
शाकवीतमयार्थाय आयाभ्यां वै तपःक्रिया।
ते चाद्ये वरदा ब्रह्मन् जाता सप्त महर्षयः ॥
प्रजाश्च तपसा सप्त भविष्यन्ति न संशयः।
द्वयोर्गुणयुक्ता महर्षीणां प्रसादतः ॥
इत्येवमुक्त्वा जग्मुस्ते सर्व्वे एव महर्षयः।
सोऽपि राजर्षिरागमत् सभार्य्यो नगरं निजम् ॥
ततो बहुतिथे काले सा राज्ञी महिषी प्रिया।
अवाप गर्भं तन्वङ्गी तस्मादृषितपस्तमात् ॥
गुर्व्विण्यामथ भार्य्यायां ममारासौ नराधिपः।
सा चाप्यारोढुमिच्छन्ती भर्त्तारं वै पतिव्रता ॥
निवारिता तन्त्रामात्यैर्न तथापि व्यतिष्ठत।
सत्यामात्यानिवृत्ता भर्त्तारं चिताग्निमारुरोह सा ॥
ततोऽग्निमध्यात् पतिते सा गर्भः सप्तधा भुवि।
कामदा मृतसंवलिता सप्तधामजन् ॥
तेऽन्ये च मरुतः पौत्तमस्यान्तरे मनोः ॥ ॥

वार, स्त्री, (वार्य्यतेऽनेनेति। वृ+णिच्+घञ्।) मदिरापात्रम्। इति हेमचन्द्रः॥

वारवारं, अ, पुनःपुनः। यथा। वारवारं मुहु-र्मुहुरिति शब्दरत्नावली॥

वार, पुं (वारयति व्रियते वेति। वृ+णिच्+अच्। वृ+घञ् वा।) समूहः। अवसरः। इत्यमरः॥ (यथा महाभारते।१।१६१।७।
"एकैकश्चापि पुरुषस्तत्प्रयच्छति भोजनम्।
स वारो बहुभिर्वर्षैर्भवत्यसुतरो नरैः॥")
सूर्य्यादिवासरः। द्वारः। हरः। कुब्जवृक्षः। शरः। इति मेदिनी। रे ४५॥ *॥ अथ वाराणां वधाः।
"चरः सौम्यो गुरुः क्षिप्रो मृदुः शुक्रो रविर्ध्रुवः।
शनिश्च दारुणो ज्ञेयो भौम उग्रः प्रकीर्त्तितः॥
चरेऽपि प्रयातव्यं प्रवेष्टव्यं मृदुध्रुवे।
दारुणोग्रे च योद्धव्यं क्षिप्रे चैवाभिषेचनम्॥
कृपाभिषेकोऽग्निकार्य्यं सूर्य्यवारे प्रशस्यते।
सोमे तु लेपयानञ्च कुर्य्याच्चैव गृहादिकम्॥
सेनापत्यं शौर्य्ययुद्धं शस्त्राभ्यासं कुजे तथा।
सिद्धिकार्य्यं मन्त्रयात्रा चैव बुधे स्मृता॥
पठनं देवपूजा च वस्त्राद्याभरणं गुरौ।
कन्यादानं गजारोहं शुक्रे स्यात् सर्व्वयत्नतः।
स्थाप्यं गृहप्रवेशञ्च गजबन्धः शनौ शुभः॥"
इति गारुडे ६१ अध्यायः॥
वासरदिनवारप्रवृत्तिः सूर्य्योदयावधिरेव। सूर्य्यसिद्धान्ते।
"लङ्कादिसमरेखायां दिनमासाब्दपास्तथा।
मध्यमार्कोदये ज्ञेया मानेन प्रकीर्त्तिताः॥"
अत्र दिनाधिपस्य रव्यादेर्भौमान्तं वारस्य वासरगणनोक्तमवधारणेऽपि तादृशं। तिथि-विवेकेऽपि। भवतु वारयोगो वस्तुतस्तस्य तत्र दिनद्वयेऽपि कर्म्मवादिनिरुक्तम्। वासरदिन माह सूर्य्यसिद्धान्ते।
"उदयादुदयं भानोर्भौमसावनवासरः॥"
भानोरिति पित्रादिदिवसव्यावृत्त्यर्थम्। यत्तु रेखा पूर्व्वपरयोर्दिवादिना ज्योतिषे वारप्रवृत्तिरुक्ता तत्तु शास्त्रोक्तकार्य्येषु तदनुसारावगमायेति ज्योतिस्तत्त्वे बहुधा विस्तृतम्।
"वैशाखमघमासस्य कृष्णे भौमेन सर्व्वदा।
चरत्वात् सर्व्वकार्य्ये हि यच्छत्याशु शुभं ध्रुवम्॥
येषाञ्च दशनीभांशान्वयेन वैवाहिकं शुभम्॥"
इति विष्णुपुराणात् अत्र दशमपर्व्वयोश्चाऽनादेव वारदोषकर्म्मेषु न भय वाच्यः। इति ज्योतिस्तत्त्वम्। *। अथ शोभनवाराः।
"रवि सोमौ मङ्गलश्च बुधो जीवः सितः शनिः।
सतां वामतो वारा विज्ञाता कर्म्मकर्म्मसु॥
विशेषतु शुभेऽतानां वाराः सर्व्वे च शोभनाः।
आवश्यकेषु सर्व्वेषु शुभकर्म्मसु कर्म्मसु॥"
इति ज्योतिःसारः।
अथ वारवेला।
"अतह विषमद्दारसमूह
दामतुः भास्करादिवासरे।
प्रभवति हि वारवेला
न शुभाशुभकार्य्यकरणाय॥"
अथ कालवेला।
"कालस्य वेला रविवे प्रदोषे
कालानलाशास्तुधनौ गवेन्दुः।
दिने निशायामनुवेन्तेन
भगीशु रामा विधुरग्निभौ च॥"
इति ज्योतिस्तत्त्वम्॥ *॥
तयोर्मित्र्यं यथा—
"रवौ वर्ज्यं चतु पञ्च सोमे सप्ताष्ट तथा।
कुजे षष्ठद्वयञ्चैव बुधे वाणतृतीयकम्॥
गुरौ सप्ताष्टकं चैव त्रिपञ्चादि च भार्गवे।
प्रथमाद्यञ्च षष्ठञ्च शौरौ च परिवर्ज्जयेत्॥ *॥
रवौ षष्ठ विधौ वेद कुजवारे द्वितीयकम्।
बुधे सप्त गुरौ पञ्च भृगुवारे तृतीयकम्।
प्रथमाद्यं तथा चान्त्यं रात्रौ काल विवर्ज्जयेत्॥"
इति सारसंग्रहः॥ *॥
अथ स्त्रीणां प्रथमरजस्वलायां वारफलम्।
"आदित्ये विधवा नारी सोमे चैव पतिव्रता।
वेश्या मङ्गलवारे च बुधे सौभाग्यमेव च॥
ईश्वरी पति श्रीमान् शुक्रे पुत्रवती भवेत्।
शनौ वन्ध्या तु विज्ञेया प्रथमस्त्री रजस्वला॥"
इति मयूरचित्रकसारसंग्रहः॥
(वालः। यथा, ऋग्वेदे। १।३२।१।
"वियोभिरश्वैर्वर्धति विद्वान्
मह्यो न रथ्यो दोधवीति वारान्॥"
"रथ्यो रथार्होऽश्वोन यथा यथा वारान् स्वस्य वालसाधनान् बालान् दोधवीति कम्पयति॥"
इति तद्भाष्ये सायनः। वरणीये, त्रि,। यथा ऋग्वेदे। १।१२८।६। [इच्छति॥"
"विश्वस्मा इत्सुकृते वारमृण्वत्यग्निर्द्वारा
"वारं सर्व्वैर्वरणीयम्॥" इति तद्भाष्ये सायनः॥)
वारकं, स्त्री, (वारयतीति। वृ+णिच्+ण्वुल्।) कष्टस्थानम्। इति शब्दमाला। १६८॥ शरीरम्। इति हेमचन्द्रः। ३। २२६॥
वारक, पुं, (वृ+णिच्+ण्वुल्।) अश्वविशेषः। इति त्रिकाण्डशेषः। अश्वगतिः। निषेधके, त्रि। इति मेदिनी। के, १११॥ (यथा, महाभारते।१२।
११।१६।
"इदं च कर्म्मफलमुक्तिं प्राणन्निरोधकं।
तथैव कीर्त्तिं यशो न चास्ति तस्य वारकः॥")
वारकी [न्] पुं, (वारकोऽस्त्यस्येति। इनि।) विपक्षः। शत्रुः। वन्यौषधी। वर्षोपि। इति मेदिनी। ने, १२५॥
वारकीर, पुं (वारो वरणीयः कीरः शुकः। यद्वा, वारे अवसरे किरति कौतुकवाक्यमिति। कृ+कः। निपातनात्साधुः। यद्वा वारे अवसरे कीर्त्यते कौतुकार्थं हस्ताः प्रेम्णा वा। कील+अच्। वस्य रत्वम्।) श्यालकः। इति त्रिकाण्डशेषः। वारग्राही। वाडवः। युका। वैवाहिकः। नीराजितहयः। इति मेदिनी। रे, २८८॥
वारङ्गः, पुं, मत्स्यः। इति त्रिकाण्डशेषः॥
वारङ्ग पुं (वारयतीति व्रियते इति वा। वृ+"वृञ्बोरङ्गच्।" उणा १। १२०। इति अङ्गच्। धातोर्ह्रस्वः।) खड्गादिमुष्टिः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः। मुठ बाँट इति च भाषा॥ (यथा, सुश्रुते। १। ७।
"तत्र स्वस्तिकयन्त्राणि ****** मूलेऽङ्कुशवदावृत्तवारङ्गाणि अस्थिविलग्नशल्योद्धरणार्थमुपदिश्यन्ते॥")
वारट, स्त्री, (वार् जलमटतीति प्राप्नोतीति। अट+अच्।) क्षेत्रम्। इति त्रिकाण्डशेषः। क्षेत्रसमूहः। इति शब्दरत्नावली॥
वारटा, स्त्री, (वारि जले अटतीति। अट+अच्+टाप्।) हंसी। इति हेमचन्द्रः। ४।४१०॥
वारण, स्त्री, (वृ+णिच्+ल्युट्।) प्रतिषेधः। इति मेदिनी। णे, ६६॥ (यथा हरिवंशे।१८।३५।
"अबलानां वारणार्थं बाहवोऽप्यायुधं स्मृतम्॥")
हस्तिवारकम्। इति जटाधरः॥ *॥ वारणनिषेधो यथा —
"न देवगुरुविप्राणां दीयमानन्तु वारयेत्।
न बाधाय प्रवर्त्तेत परस्याप्यनुगत्यैव॥"
इति कौर्म्मे उपविभागे १६ अध्यायः॥
वारण पुं (वारयति शत्रुमिति। वृ+णिच्+ल्युः।) हस्ती। इत्यमरः। २।८।३४॥ (यथा कुमारे। ६। ७।
"इयं च तेऽन्या पुरतो विडम्बना
यदूढया वारणराजहार्य्यया।
विलोक्य वृद्धोक्षमधिष्ठितं त्वया
महाजनः स्मेरमुखो भविष्यति॥")
सन्नाहः। इति शब्दरत्नावली॥ (यथा महाभारते। ३। ६। ८।
"वारणा यत्र दृश्यन्ते पृष्ठे मार्ग्गा रथिमार्गाः।
सुपार्श्वे सुपक्षश्चैव सर्व्वैरेतैरलङ्कृतम्॥"
वारि जले रतमिति वारयतीति। वार+रम+अच्। अश्वमात्रे त्रि। यथा हरिवंशे। ३।११८।
"ततो वैभाण्डं कटकं वारणं परमारकम्।
अवगाहार्याय महीं तद्गोष्ठं वमुन्नतम्॥"
"वारि जले रमत इति वारणः अश्वोत्तम इत्यर्थः।" इति तट्टीकायां नीलकण्ठः॥)
वारणबुषा स्त्री, (बुसेति इति। बुस उत्सर्गे+क। वारणानां बुषा। यद्वा, वारणान् बुस्यतीति। बुस+क। पृषोदरादित्वात् साधुः।) कदली। इत्यमरः। २। ४। ११२॥
वारणवल्लभा स्त्री (वारणानां वल्लभा प्रिया।) कदलीवृक्षः। इति त्रिकाण्डशेषः॥
वारणसी, स्त्री (वरणा च असी च नद्यौ तयोः अदूरे भवा। "अदूरभवश्च।" ४।२।७०। इत्यण्। पृषोदरादित्वात् साधुः।) वाराणसी। काशी। इति हेमचन्द्रः॥
वारणीय, त्रि, (वृ+णिच्+अनीयर्।) वारणयोग्यम्। तत्पर्य्यायः। आलोच्यविषयप्रतिषेध्यम्। (यथा महाभारते। ५। ७।

प्राणश्चैवमिह कुर्य्यात् प्राणिनां प्राणधारकः ।
प्राणेन कुरुते यस्मात् तस्मात् प्राणः प्रकीर्त्तितः ॥
प्राणो हि भगवान् ईशः प्राणो विष्णुः पितामहः ।
प्राणेन धार्य्यते लोकः सर्व्वं प्राणमयं जगत् ॥
इन्द्रियाणि प्रवर्त्तन्ते यावत् प्राणानिलो हृदि ।
नष्टे न दृश्यते नष्टं तस्मात् प्राणन्तु रक्षयेत् ॥
रज्जुबद्धो यथा श्येनो गतोऽप्याकृष्यते पुनः ।
गुणबद्धस्तथा जीवः प्राणापानेन कृष्यते ॥
अपानयस्तथाहारं मलभावं गतोऽधमः ।
शुक्रमूत्रवहं वायुरपानस्तेन कीर्त्तितः ॥ * ॥
पीतं भक्षितमाघ्रातं रक्तपित्तकफानिलान् ।
समं नयति गात्रेषु समानो नाम मारुतः ॥
समानोऽविषमोपस्थः कोष्ठे च चरति सर्व्वतः ।
अन्नं गृह्णाति पचति विवेचयति मुञ्चति ॥ * ॥
स्पन्दयत्यधरं वक्त्रं नेत्रगात्रप्रकोपनम् ।
उद्वेजयति मर्म्माणि उदानो नाम मारुतः ॥ * ॥
व्यानो विनामयत्यङ्गं व्यानो व्याधिप्रकोपनः ।
प्रीतैर्न्निनाशकश्चाय बलैकोपान्तकस्तथा ॥" * ॥
वायूनां स्थानानि ।
"हृदये नाभिशाखाग्नानुस्थानस्तूच्यते ।
नाभे पादतलं यावदपानस्य प्रकीर्त्तितम् ॥
शरीरव्यापको व्यानः प्राणः सकलनायकः ।
उद्गारे नाग इत्युक्तः कूर्म्मश्चोन्मीलने स्थितः ॥
कृकरः क्षुधिते चैव देवदत्तो विजृम्भिते ।
धनञ्जयः स्थितो मेढ्रे मृतस्यापि न मुञ्चति ।
भूतावासित्वतत्त्वज्ञानादवैक्रियतोषदान् ॥ * ॥
उत्ताडोच्छ्वासनि श्वासनेत्राधातुगति समाः ।
समो मोऽपि गतिमतां वायोः कर्म्मविकारणम् ॥'
इति सुखबोधः ॥ * ॥
अथ दिग्भववायुगुणाः ।
"प्राग्वातो मधुरः क्षारो वह्निमान्द्यकरो गुरुः ।
वैरस्यगौरवोध्मानि करोत्यपक्वोपघोष्ठ च ॥
भयोत्पित्तरक्तादेष्टु रागन्वयपुष्टावहः ।
सन्निपातज्वरश्वासमन्दोषार्शोविषक्रिमीन् ।
कार्पयेदामवातञ्च व्रणव्रातकारणम् ॥
दाक्षिणो मारुतो वक्ष्यचक्षुष्यः प्रस्यापकः ।
मधुरश्चाम्लपाकी च कषायानुरसो लघुः ॥
रक्तपित्तप्रशमनो न च मारुतकोपनः ।
गलव्रश्लेष्मकीटानां जनकः प्राणकारकः ॥
पाश्चिमोऽपित्तवृद्धेयबलरोगविवर्द्धनः ।
कषायः शोषकः स्वर्यो रोषणो विषनो लघुः ॥
अर्पो लघुत्वबैशद्यश्चैमत्व्यकारकः ।
बर्म्मदर्भ्यभिपत्तप्रभावश्चेपीभिर्हतः ।
प्रत्यर्थ रोपवलस्थो दाहशोषकचापशः ॥
औत्तरो मारुतः स्निग्धो मृदुमधुर एव च ।
कषायानुरसः शीतः सर्व्वेषोषप्रकोपनः ॥
श्लेष्मतविघातानां स्थितो दाहक्षापहः ।
शीतादिज समीहारः कविमुत्तस्त्वधिगुणात् ।
विश्वापुरस्त्वापुष्प प्राणिनां नैकदोषहृत् ।
समेत्तुदिक्को इला क्षीप्यातपुर धरः ॥" * ॥

अजलवायुगुणाः ।
"मृत्स्नाभ्यञ्जस्वावृत्त्यमनो धनानिलः ।
सातङ्कालमयो वातस्त्रिदोषघ्नमनो लघुः ॥
वंशजनको वामो रूक्षोष्णो वातपित्तकः ।
वालयजनमोदस्ठ मन्थिकादौनु यपोहति ।
मायूरं मण्डलं वैना वाता दोषत्रयापहा ॥"
इति राजवल्लभः ॥ * ॥
अपि च । तत्र वायोः स्वरूपमाह ।
"दोषधातुमलादीनां नेता शीघ्रः समीरणः ।
रजोगुणमयः सूक्ष्मो रूक्षः शीतो लघुश्चलः ॥"
नेता स्थानान्तरे प्रापयिता । शीघ्रः आशु-
कारी । अन्यच्च ।
"उत्साहोच्छ्वासनिःश्वासचेष्टावेगप्रवर्त्तनैः ।
सम्यग्गत्या च धातूनामिन्द्रियाणाञ्च पाटवैः ॥
अनुगृह्णात्यविकृतो हृदयेन्द्रियचित्तधृक् ।
रजोगुणमयः सूक्ष्मः रूक्षः शीतो लघुश्चलः ॥
खरो मृदुर्योगवाही संयोगादुभयार्थकृत् ।
दाहकृत्तेजसा युक्तः शीतकृत् सोमसंश्रयात् ॥
विभागकरणाद्वायुः प्रधानं दोषसंग्रहे ।
पक्वाशयकटीसक्थिश्रोत्रास्थिस्पर्शनेन्द्रियम् ।
स्थानं वातस्य तत्रापि पक्वाधानं विशेषतः ॥"
एको वायुः पित्तश्लेष्मणोः स्थानकर्म्मभेदैः पञ्च-
विधः ॥ * ॥ तेषां वायूनां नामान्याह ।
"उदानश्चैव प्राणः समानोऽपान एव च ।
व्यानश्चेमानि नामानि वायोः स्थानप्रभेदतः ॥"
अथोत्पन्नादीनां स्थानान्याह ।
"कण्ठे हृदि तथा स्थाने कोष्ठवह्निमलाशये ।
सकलेऽपि शरीरेऽसौ क्रमेण पवनो वसेत् ॥"
अथ तेषां कर्म्माण्याह ।
"उदानो नाम यस्तूर्द्ध्वमुपैति पवनोत्तमः ।
तेन भाषितगीतादिविशेषाभिप्रवर्त्तते ॥ कुपितस्तु सः ।
ऊर्द्ध्वजत्रुगतान् रोगान् करोति च विशेषतः ॥
यो वायुः प्राणनामासौ मुखे गच्छति देहधृक् ।
सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चाप्यवलम्बते ॥
प्रायशः कुरुते दुष्टो हिक्काश्वासादिकान्
गदान् ।
आमपक्वाशयचरः समानो वह्निसङ्गतः ।
सोऽन्नं पचति तज्जांश्च विशेषान् विविनक्ति
हि ॥"
तज्जानित्यादि अन्नजान् । रसमलमूत्रादीन्
पृथक्करोतीत्यर्थः ।
"स दुष्टो वह्निमान्द्यातिसारगुल्मान् करोति हि ।
पक्वाशयालयोऽपानः काले कर्षति चाप्यधः ॥
समीरणः शकृन्मूत्रशुक्रगर्भार्त्तवान्यधः ।
क्रुद्धस्तु कुरुते रोगान् घोरान् वस्तिगुदाश्रयान् ॥
शुक्रदोषप्रमेहांश्च व्यानापानप्रकोपजान् ॥"
स च ।
"कृत्स्नदेहचरो व्यानो रससंवहनो यतः ।
स्वेदासृक्स्रावश्चापि पञ्चधा चेष्टयत्यपि ॥
ग्रहमन्थिपर्णोत्क्षेपनिमेषोन्मेषणादिकाः ।
प्रायः सर्व्वाः क्रियास्तस्मिन् प्रतिबद्धाः शरी-
रिणाम् ॥

प्रस्पन्दनं चोद्वहनं पूरणञ्च विरेचनम् ।
धारणञ्चेति पञ्चेताश्चेष्टाः प्रोक्ता मनस्वतः ॥
क्रुद्धः स कुरुते रोगान् प्रायशः सर्व्वदेहगान् ।
युगपत् कुपिता एते दह भिन्द्युरसंशयम् ॥"
देहं भिन्न कुर्य्युर्मारयेयुरित्यर्थः । इति भाव-
प्रकाशः ॥ * ॥ (असुरविशेषः । यथा, हरि-
वंशे । २ । ८५ ।
"दीर्घजिह्वोऽर्कनयनो मृदुचापो मृदुप्रियः ।
वायुर्गरिष्ठो नमुचि शम्बरो विजयो महान् ॥")
वायुकेतुः स्त्री, (वायुः केतुर्ध्वजो ज्ञापको वा
यस्याः ।) धूलिः । इति हारावली । १९८ ॥
वायुगण्डः पुं, अजीर्णम् । इति त्रिकाण्डशेषः ॥
वायुगुल्मः पुं (वायुना कृतो गुल्म इव ।) वात्या-
भ्रमः । इति त्रिकाण्डशेषः ॥
वायुदारः, पुं, (वायुना दीर्य्यते इति । दृ + अच् ।)
मेघः । इति त्रिकाण्डशेषः ॥
वायुपुत्रः, पुं, (वायोः पुत्रः ।) भीमः । इति
धनञ्जयः ॥ हनूमान् । यथा,—
"हनूमानञ्जनासूनुर्वायुपुत्रो महाबलः ।"
इति तस्य द्वादशनामस्तोत्रम् ॥
वायुफला, स्त्री, (वायुना फलति प्रतिफलतीति ।
फल + अच् ।) शक्रधनुः । (वायोः फलमिव ।)
करका । इति मेदिनी । ले १६३ ॥
वायुभक्षः, पुं, (वायुर्भक्ष्योऽस्येति ।) सर्पः ।
इति राजनिर्घण्टः ॥ वातभक्षके, त्रि ॥ (यथा,
मो॰ रामायणे । ३ । १५ । १९ ।
"स हि तैर्वै तपस्तीव्रं मन्दकर्णिर्महामुनिः ।
दशवर्षसहस्राणि वायुभक्षो जलाश्रयः ॥")
वायुवर्त्म, [न्] क्ली, (वायोर्वर्त्म ।) आकाशम् ।
इति शब्दचन्द्रिका ॥
वायुवाहः, पुं, (वायुना उह्यते इति । वह +
घञ् ।) धूमः । इति हेमचन्द्रः । ४ । १६८ ॥
वायुवाहिनी स्त्री, (वायुं वहतीति । वह +
णिनि । ङीप् ।) वायुवाहिनी शिरा । इति
वैद्यकम् ॥
वायुषः पुं, मत्स्यविशेषः । वालवायुषमोना इति
भाषा । तस्य गुणाः ।
"वायुषो कफदो रुच्यो मधुरो धातुवर्द्धनः ।"
इति राजवल्लभः ॥
वायुसखः, पुं, (वायोः सखा । "राजाहःसखिभ्य-
ष्टच् ।" ५ । ४ । ९१ । इति टच् ।) अग्निः ।
इति भरतः ॥
वायुसखा [खि] पुं (वायुः सखा यस्येति विग्रहे
टजभावात् । "अनङ् सौ ।" ७ । १ । ९३ । इति
अनङादेशः ।) अग्निः । इत्यमरः ॥ १ । १ । ५७ ॥
वायुसमं, क्ली, (वायुनामाश्रयः सहस्रकाम् ।)
आकाशम् । इति धनञ्जयः ॥
वार्, क्ली, (वारयतीति । वृ + णिच् + क्विप् ।)
जलम् । इत्यमरः । १ । १ । १० ॥ (यथा,
भागवते । १ । ११ । २९ ।
"गमनस्पर्शादिनिरहुताश्रयावार्द्रकाः
आसां मनोभिरिभराजविमेषयुः ।")

उपासते मां सततं देवदेवं पितामह ।
महापातकिनो ये च ये च वै पापकृत्तमाः ।
वाराणसीं समासाद्य ते यान्ति परमां गतिम् ।
तस्मान्मुमुक्षुर्नियतो वसेद्वै मरणान्तिकम् ॥
वाराणस्यां महादेवाज्ज्ञानं लब्ध्वा विमुच्यते ।
किन्तु विघ्ना भविष्यन्ति पापोपहतचेतसः ॥
यथा नारायणः श्रेष्ठो देवानां पुरुषोत्तमः ।
यथेश्वराणां गिरिशः स्थानानां वै तदुत्तमम् ॥
ये समाराधिनो रुद्रं पूर्व्वस्मिन्नेव जन्मनि ।
ते विन्दन्ति परं क्षेत्रमविमुक्तं शिवालयम् ॥
ये स्मरन्ति सदा कालं वसन्ति च पुरीमिमाम् ।
तेषां विनश्यति क्षिप्रमिहामुत्र च पातकम् ॥
आचक्षध्वमिदं स्थानं सेवितं मोक्षकाङ्क्षिणाम् ।
स्नानाच्च पुनर्जन्म न भूयो भवसागरे ॥
तस्मात् सर्व्वप्रयत्नेन वाराणस्यां वसेन्नरः ।
योगी वाप्यथवायोगी पापी वा पुण्यकृत्तमः ॥"
इति कौर्म्मे २९ अध्यायः ॥ ● ॥
अन्यच्च ।
"वाराणसी नाम पुरी गङ्गातीरे मनोहरे ।
वरणायास्तथा चासेर्मध्ये चायान्ति सदा ॥
स्वयं तत्र [illegible] नित्यं वसति योगिनाम् ।
सदा प्रीतिकरो योगी स्वयं चाध्यात्मचिन्तकः ॥
त्रियुगस्था सा पुरी नित्यं भर्गयोगबलाद्धृता ।
नित्यं स्नानं ददानेन तत्र यो म्रियते नरः ॥
तस्मै स्वयं महादेवः संसारपरिशान्तये ।
स भूत्वा परमो योगी स्वतन्त्रं भवान्तरे ॥
सुखेनैव निर्व्वाणमाप्नोति चारुहासिनि ।
योगयुक्तो महादेवः पार्व्वत्या सहितः सदा ॥
देवगन्धर्व्वयक्षाणां मानुषाणाञ्च विस्मयः ।
येयो हरः प्रकाशश्च शिवं तत्र प्रकाशितम् ॥
न तत्र कामदो देवो न विरोधः प्रसीदति ।
आराधितोऽपि परं भक्त्या निर्व्वाणाय प्रसीदति ॥
गौर्य्यादिसहितैता सा तु पुरी तत्र न गच्छति ।
योगस्थानं महादेव कदाचिदपि शाङ्करी ॥
आयतं सुखदो लोकमिदं वाराणसी तु यत् ।
कथितं नातिदूरे च वर्त्ततेऽमरसत्तमौ ॥"
इति कालिकापुराणे ५१ अध्यायः ॥ ● ॥
अथ काशीयात्राविधिः ।
सूत उवाच ।
"यात्रापरिक्रमं ब्रूहि यथावत् हितकाम्यया ।
यथावत् सिद्धिकामानां व्यक्तया सूनो मम ॥
व्यास उवाच ।
निशामय महाभाग लोमहर्षण वच्मि ते ।
यथा प्रथमतो यात्रा कर्त्तव्या चक्रकेऽर्बुदे ।
सचैलमादौ स्नात्वाथ चक्रपुष्करिणीजले ।
सन्तर्प्य देवान् सपितॄन् ब्राह्मणांश्च तथार्थिनः ॥
आदित्यं द्रौपदीं विष्णुं दण्डपाणिं महेश्वरम् ।
नमस्कृत्य ततो गच्छेत् द्रष्टुं ढुण्ढिविनायकम् ॥
ज्ञानवापीमुपस्पृश्य नन्दिकेशं ततोऽर्च्चयेत् ।
तारकेशं समभ्यर्च्य महाकालेश्वरं ततः ॥
ततः पुनर्दण्डपाणिमित्येषा पञ्चतीर्थिका ।
दैनन्दिनी विधातव्या महाफलसमीप्सुभिः ॥८॥

ततो वैश्वेश्वरी यात्रा कार्य्या सर्व्वार्थसिद्धये ।
दिवसायतनानाञ्च कार्य्या यात्रा प्रयत्नतः ॥
कृष्णां प्रतिपदं प्राप्य भूतावधि यथाविधि ।
अथवा प्रतिभूतञ्च क्षेत्रसिद्धिमभीप्सुभिः ॥
तत्तीर्थकृतस्नानस्तल्लिङ्गकृतार्च्चनः ।
मौनेन यात्रां कुर्व्वाणः फलं प्राप्नोति यात्रिकः ॥
ओङ्कारं प्रथमं पश्येत् मत्स्योदर्य्यां कृतोदकः ।
त्रिविष्टपमहादेवं ततो वै कृत्तिवाससम् ॥
रत्नेशञ्चाथ चन्द्रेशं केदारञ्च ततो व्रजेत् ।
धर्म्मेश्वरञ्च वीरेशं गच्छेत् कामेश्वरं ततः ॥
विश्वकर्म्मेश्वरञ्चाथ मणिकर्णीश्वरं ततः ।
अविमुक्तेश्वरं दृष्ट्वा ततो विश्वेशमर्च्चयेत् ।
एषा यात्रा प्रयत्नेन कर्त्तव्या क्षेत्रवासिभिः ॥
यस्तु क्षेत्रमुषित्वापि नैतां यात्रां समाचरेत् ।
विघ्नास्तस्योपजायन्ते क्षेत्रोच्चाटनसूचकाः ॥६॥
अष्टायतनयात्रान्या कर्त्तव्या विघ्नशान्तये ।
दक्षेशः पार्व्वतीशश्च तथा पशुपतीश्वरः ।
गङ्गेशो नर्म्मदेशश्च गभस्तीशः सतीश्वरः ॥
अष्टमस्तारकेशश्च प्रत्यष्टमि विशेषतः ।
द्रष्टव्यानि लिङ्गानि महापापप्रशान्तये ॥७॥
अपरापि शुभा यात्रा योगक्षेमकरी सदा ।
सर्व्वविघ्नोपशान्त्यै च कर्त्तव्या क्षेत्रवासिभिः ॥
शैलेशं प्रथमं वीक्ष्य वरणास्नानपूर्व्वकम् ।
स्नात्वा सङ्गमे स्नात्वा द्रष्टव्यः सङ्गमेश्वरः ॥
स्वर्लीनतीर्थे सुस्नातः पश्येत् स्वर्लीनमीश्वरम् ।
स्नात्वा मन्दाकिनीतीर्थे द्रष्टव्यो मध्यमेश्वरः ॥
पश्येद्धिरण्यगर्भाख्यं तत्र तीर्थे कृतोदकः ।
पञ्चचूडाह्रदे स्नात्वा ईशानं ततोऽर्च्चयेत् ॥
चतुःसमुद्रकूपे तु स्नात्वा देवं ततोऽर्च्चयेत् ।
देवस्यापि तु या वापी तत्रोपस्पर्शने कृते ।
शुक्रेश्वरं ततः पश्येत्तत्कूपविहितोदकः ।
दण्डखाते नरः स्नात्वा व्याघ्रेशं पूजयेत्ततः ॥
शौनकेश्वरकुण्डे तु स्नानं कृत्वा ततोऽर्च्चयेत् ।
जम्बुकेशं महालिङ्गं कृत्वा यात्रामिमां नरः ॥
[illegible] जायते भूयः संसारे दुःखसागरे ।
समारभ्य प्रतिपदं यावत् कृष्णां चतुर्द्दशीम् ॥
एतत्क्रमेण कर्त्तव्यान्येतान्यायतनानि वै ।
इमां यात्रां नरः कृत्वा न भूयोऽप्यभिजायते ॥
अन्या यात्रा प्रकर्त्तव्या [illegible] ।
वापीकुण्डकृतस्नानः पश्येदघोरमीश्वरम् ॥
कर्म्मतीर्थे ततो गच्छेत्ततस्तु नकुलीश्वरम् ।
आषाढीशं ततो दृष्ट्वा भारभूतीश्वरं ततः ॥
लाङ्गलीशमथाभ्यर्च्य ततस्तु त्रिपुरान्तकम् ।
ततो मनःप्रकामेशं प्रीतिकेशमथो व्रजेत् ॥
मदालसेश्वरं तस्मात् तिलपर्णेश्वरं ततः ।
[illegible] कार्य्या प्रयत्नतः ॥
इमां यात्रां प्रकुर्व्वाणो दुःखं नाप्नुयान्नरः ॥७॥
अतः परं प्रवक्ष्यामि गौरीयात्रामनुत्तमाम् ।
शुक्लपक्षतृतीयायां या यात्रा विश्वदृष्टिदा ॥
गोप्रेक्षतीर्थे सुस्नाय मुखनिर्म्मालिकां व्रजेत् ।
ज्येष्ठवाप्यां नरः स्नात्वा ज्येष्ठां गौरीं समर्च्चयेत् ॥
सौभाग्यगौरीं संपूज्य ज्ञानवाप्यां कृतोदकः ।

ततः शृङ्गारगौरीञ्च तत्रैव च कृतोदकः ।
स्नात्वा विशालगङ्गायां विशालाक्षीं ततो व्रजेत् ॥
सुस्नातो ललितातीर्थे ललितामर्च्चयेत्ततः ।
स्नात्वा भवानीतीर्थे तु भवानीं परिपूजयेत् ॥
मङ्गला च ततोऽभ्यर्च्या बिन्दुतीर्थकृतोदकैः ।
ततो गच्छेन्महालक्ष्मीं स्थिरलक्ष्मीसमृद्धये ॥
इमां यात्रां नरः कृत्वा क्षेत्रेऽस्मिन् [illegible] ।
न दुःखैरभिभूयेत इहामुत्रापि कुत्रचित् ॥८॥
कुर्य्यात् प्रतिचतुर्थीह पूजां विघ्नजितः सदा ।
[illegible] मोदका शुभैः ॥
भौमे भैरवयात्रा च कार्य्या पातकहारिणी ।
रविवारे रवेर्यात्रा षष्ठ्यां वा रविसंयुजि ॥
तथैव रविसप्तम्यां सर्व्वविघ्नोपशान्तये ।
नवम्यामथवा षष्ठ्यां चण्डीयात्रा शुभावहा ॥९॥
अन्तर्गृहस्य यात्रा वै कर्त्तव्या प्रतिवत्सरम् ।
प्रातः स्नात्वा विधायाह्निं नत्वा पञ्चविनायकम् ॥
नमस्कृत्य च विश्वेशं स्थित्वा निर्व्वाणमण्डपे ।
अन्तर्गृहस्य यात्रां हि करिष्येऽघौघशान्तये ॥
सङ्कल्प्य नियमं चेति गत्वा च मणिकर्णिकाम् ।
स्नात्वा मौनेन चागत्य मणिकर्णीशमर्च्चयेत् ॥
कम्बलाश्वतरौ चाथ वासुकीशं प्रणम्य च ।
पर्व्वतेशं ततो दृष्ट्वा गङ्गाकेशवमर्च्च्य च ॥
ततस्तु ललितां दृष्ट्वा जरासन्धेश्वरं ततः ।
ततो वै सोमनाथञ्च वाराहञ्च ततो व्रजेत् ॥
ब्रह्मेश्वरं ततो नत्वा अगस्त्येश्वरं ततः ।
कश्यपेशं नमस्कृत्य हरिकेशवमस्य च ॥
वैद्यनाथं ततो गत्वा ध्रुवेशमथ गौतमं च ।
गोकर्णेशं ततोऽभ्यर्च्य हाटकेशमथो व्रजेत् ॥
अस्थिक्षेपतडागेऽथ दृष्ट्वा वै कीकसेश्वरम् ।
भारभूतं ततो नत्वा चित्रगुप्तेश्वरं ततः ॥
चित्रघण्टां प्रणम्याथ ततः पशुपतीश्वरम् ।
पितामहेश्वरं नत्वा ततस्तु कलशेश्वरम् ॥
चन्द्रेशञ्चाथ वीरेशं विद्येशोऽग्नीश एव च ।
नागेश्वरो हरिश्चन्द्रचिन्तामणिविनायकः ॥
सेनाविनायकश्चाथ द्रष्टव्यः सर्व्वसिद्धये ।
वसिष्ठवामदेवौ च [illegible]ादुभौ ॥
द्रष्टव्यौ यत्नतः काश्यां महाविघ्नविनाशकौ ।
सीमाविनायकं नत्वा करवीरं ततो व्रजेत् ॥
विश्वेश्वरो विशालाक्षी धर्म्मेशो विश्वबाहुका ।
आशाविनायकश्चाथ वृद्धादित्यस्ततः परः ॥
चतुर्व्वक्त्रेश्वरं लिङ्गं ब्राह्मेशस्तु ततः परम् ।
ततो मनःप्रकामेश ईशानेशस्ततः परम् ॥
चण्डीचण्डीश्वरौ दृष्ट्वा भवानीशङ्करौ ततः ।
ढुण्ढिं प्रणम्य च ततो राजराजं समर्च्चयेत् ॥
लाङ्गलीशस्ततोऽभ्यर्च्यस्ततस्तु नकुलीश्वरः ।
परान्नेशमथो नत्वा परद्रव्येश्वरं ततः ॥
प्रतिग्रहेश्वरश्चापि निष्कलङ्केश एव च ।
मार्कण्डेशमथाभ्यर्च्य ततः अप्सरसेश्वरम् ॥
[illegible] ज्ञानवाप्यां स्नानं समाचरेत् ।
नन्दिकेशं तारकेशं महाकालेश्वरं ततः ॥
दण्डपाणिं महेशञ्च मोक्षेशं समर्च्चयेत् ।
वीरभद्रेश्वरं नत्वा अविमुक्तेश्वरं ततः ॥

"भवारणीय रिपुभिवारणीय कर शुभ ।
वैरमस्य यविन्दरमपि दूरमपच्छिदम् ।")
वारश्च स्त्री, धर्मरत्नकी । इति केचित् ।
वारवधू, स्त्री, (वाराणां जनसमूहानां वधू ।)
वारमुख्या । इति हेमचन्द्रः । ३ । १९७ ।
(यथा आर्यासप्तशत्याम् । १०८ ।
"निपतन्ति निर्बिधेयस्यापितमपि वारमखिल-
मादाय ।
निर्मोकस्य मुक्तौ मुचति पुरुषस्य वारवधूः ।")
वारवाण पुं, क्ली (वारं वारणीय वाणं
यस्मात् ।) कञ्चुकः । इत्यमरः । २ । ८ । ६३ ।
(यथा, माघे । १५ । ८४ ।
"पीनकुचतटनिपीडनदल-
द्वरवारवाणमुरसा विविक्षिरे ।")
वारबुषा, स्त्री, (वारान् कालकान् पुष्यातीति ।
पुष+क । पृषोदरादित्वात् षत्वं च ।) कदली ।
इति शब्दरत्नावली ।
वारमुख्या स्त्री (वारेषु वेश्यासमूहेषु मुख्या
श्रेष्ठा ।) गणे प्रधानता वेश्या । इत्यमरः । २ ।
६ । १९ । (यथा, भागवते । १ । ११ । २० ।
'वारमुख्याश्च शतशो यानैस्तद्दर्शनोत्सुकाः ।")
वारयिता, पुं, (वारयति दुर्नीतेरिति । वृ+णिच्
+तृच् ।) पतिः । इति हलायुधः ।
वारला, स्त्री, (वारं लातीति । ला+क ।)
वरटा । हंसी । इति हेमचन्द्रः । ४ । ३९६ ।
वारलीक, पुं, बल्वजा । इति शब्दरत्नावली ।
बाबुइ इति ख्यातः ।
वारवाणि, पुं, (वारं शब्दसमूहं वणति इति ।
वण+इण ।) वंशीवादकः । इति त्रिकाण्ड-
शेषः । गानप्रधानः । इति शब्दरत्नावली ।
धर्माध्यक्षः । वत्सरः । इत्यजयपालः । एते
व्याते पद्यार्थयादि ।
वारवाणि, स्त्री, (वारे अपेक्षावसरे वाणि-
र्विधानादौ यस्याः ।) वेश्या । इति त्रिकाण्ड-
शेषः ।
वारवाणी स्त्री (वारवाणि+पक्षे ङीष ।) वार-
मुख्या । इति शब्दरत्नावली ।
वारविलासिनी, स्त्री, (वाराणां जनसमूहानां
विलासिनी स्त्री । यद्वा, वारान् विलासयतीति ।
वि+लस+णिच्+णिनि । ङीप ।) वेश्या ।
इति शब्दरत्नावली । (यथा कथासरित्-
सागरे । १२ । ७८ ।
"अस्तीह मथुरा नाम पुरी कंसारिजन्मभूः ।
तस्यां रूपणिकेत्यासीत् ख्याता वारविला-
सिनी ।")
वारवृषा, स्त्री, (वारान् सलिलसमूहान् वर्षतीति ।
वृष+क । टाप् । सलिलभरसमन्वितत्वात्
तथा ।) कदली । इति शब्दरत्नावली ।
वारसुन्दरी, स्त्री (वाराणां नरसमूहानां
सुन्दरी ।) वेश्या । इति हारावली । १८४ ।
वारसेवा स्त्री (वारे अवसरे सेवा ।) वेश्यानां
समूहः । तासां गणः । इति जटाधरः ।

वारस्त्री, स्त्री, (वाराणां जनसमूहानां स्त्री ।)
वेश्या । इत्यमरः । २ । ६ । १९ ।
वारांनिधि, पुं, (वारां जलानां निधिः । अलुक्
समासः ।) समुद्रः । इति शब्दरत्नावली ।
वाराणसी, स्त्री (वरणा च असी च । तयोर्नद्यो-
रदूरे भवा । "अदूरभवश्च ।" ४ । २ । ७० ।
इत्यण । ङीप । पृषोदरादित्वात् साधुः । अस्या
निरुक्तिर्यथा,—
"वरणासी च नद्यौ द्वे पुण्ये पापहरे उभे ।
तयोरन्तर्गता या तु सैषा वाराणसी स्मृता ।")
शिवपुरीविशेषः । बनारस् इति हिन्दी
भाषा । तत्पर्यायः । वाराणसी २ काशी ३
शिवपुरी ४ । इति हेमचन्द्रः । त्रिपुरी ५
तप स्थली ६ वरणसी ७ तीर्थराजी ८ काशिका
९ । इति शब्दरत्नावली । तस्या माहात्म्यं
यथा —

ईश्वर उवाच ।
"परं गुह्यतमं क्षेत्रं मम वाराणसी पुरी ।
सर्वेषामेव भूतानां संसारार्णवतारिणी ।
तत्र भक्ता महादेवि ! मदीयं व्रतमाश्रिताः ।
निवसन्ति महात्मानः परं नियममास्थिताः ।
उत्तमं सर्वतीर्थानां स्थानानामुत्तमञ्च यत् ।
ज्ञानानामुत्तमं ज्ञानं अविमुक्तं परं मम ।
स्थानान्तरं पवित्राणि तीर्थान्यायतनानि च ।
श्मशानसंस्थितान्येव दिव्यभूमिगतानि च ।
भूर्लोके नैव संलग्नमन्तरीक्षे ममालयम् ।
अयुक्तास्तन्न पश्यन्ति युक्ताः पश्यन्ति चेतसा ।
श्मशानमेतद्विख्यातमविमुक्तमिति श्रुतम् ।
कालो भूत्वा जगदिदं संहराम्यत्र सुन्दरि ! ।
देवीदं सर्वगुह्यानां स्थानं प्रियतरं मम ।
मद्भक्तास्तत्र गच्छन्ति मामेव प्रविशन्ति ते ।
दत्तं जप्तं हुतं चेष्टं तपस्तप्तं कृतञ्च यत् ।
ध्यानमध्ययनं ज्ञानं सर्वं तत्राक्षयं भवेत् ।
जन्मान्तरसहस्रेषु यत् पापं पूर्वसञ्चितम् ।
अविमुक्तं प्रविष्टस्य तत्सर्वं व्रजति क्षयम् ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा ये वर्णसङ्कराः ।
स्त्रियो म्लेच्छाश्च ये चान्ये सङ्कीर्णाः पाप-
योनयः ।
कीटाः पिपीलिकाश्चैव ये चान्ये मृगपक्षिणः ।
कालेन निधनं प्राप्ता अविमुक्ते वरानने ! ।
चन्द्रार्द्धमौलयस्त्र्यक्षा महावृषभवाहनाः ।
शिवे मम पुरे देवि ! जायन्ते तत्र मानवाः ।
नाविमुक्ते मृतः कश्चिन्नरकं याति किल्बिषी ।
ईश्वरानुगृहीता हि सर्वे यान्ति परां गतिम् ।
मोक्षं सुदुर्लभं मत्वा संसारञ्चातिभीषणम् ।
अश्मना चरणौ हत्वा वाराणस्यां वसेन्नरः ।
दुर्लभा तपसा चापि मृतस्य परमेश्वरि ! ।
यत्र तत्र विपन्नस्य गतिः संसारमोक्षणी ।
प्रसादाज्जायते ह्येतन्मम शैलेन्द्रनन्दिनि ! ।
अप्रबुद्धा न पश्यन्ति मम मायाविमोहिताः ।
अविमुक्तं न पश्यन्ति मूढा ये तमसावृताः ।
विण्मूत्ररेतसां मध्ये तेषां वासः पुनः पुनः ।

हन्यमानोऽपि यो विद्वान् वसेद्विघ्नशतैरपि ।
स याति परमं स्थानं यत्र गत्वा न शोचति ।
जन्ममृत्युजरामुक्तं परं यान्ति शिवालयम् ।
अपुनर्मरणानां हि सा गतिर्मोक्षकाङ्क्षिणाम् ।
यां प्राप्य कृतकृत्यः स्यादिति मन्यन्ति पण्डिताः ।
न दानैर्न तपोभिश्च न यज्ञैर्नापि विद्यया ।
प्राप्यते गतिरुत्कृष्टा या विमुक्ते तु लभ्यते ।
नानावर्णा विवर्णाश्च चाण्डालाद्या जुगुप्सिताः ।
किल्बिषैः पूर्णदेहा ये विशिष्टैः पातकैस्तथा ।
भेषजं परमं तेषामविमुक्तं विदुर्बुधाः ।
अविमुक्तं परं ज्ञानमविमुक्तं परं पदम् ।
अविमुक्तं परं तत्त्वमविमुक्तं परं शिवम् ।
कृत्वा वै नैष्ठिकीं दीक्षामविमुक्ते वसन्ति ये ।
तेषां तत् परमं ज्ञानं ददाम्यन्ते परं पदम् ।
प्रयागं नैमिषं पुण्यं श्रीशैलोऽथ हिमालयः ।
केदारं भद्रकर्णञ्च गया पुष्करमेव च ।
कुरुक्षेत्रं रुद्रकोटिर्नर्मदा आम्रकेश्वरम् ।
शालग्रामञ्च कुब्जाम्रं कोकामुखमनुत्तमम् ।
प्रभासं विजयेशानं गोकर्णं भद्रकर्णकम् ।
एतानि पुण्यस्थानानि त्रैलोक्ये विश्रुतानि तु ।
न यास्यन्ति परं मोक्षं वाराणस्यां यथा मृताः ।
वाराणस्यां विशेषेण गङ्गा त्रिपथगामिनी ।
प्रविष्टा नाशयेत् पापं जन्मान्तरकृतं शतम् ।
अन्यत्र सुलभा गङ्गा श्राद्धं दानं तपो जपः ।
व्रतानि सर्वमेवैतत् वाराणस्यां सुदुर्लभम् ।
यजेत जुहुयान्नित्यं ददात्यर्चयतेऽमरान् ।
वायुभक्षश्च सततं वाराणस्यां स्थितो नरः ।
यदि पापो यदि शठो यदि वा धार्मिको नरः ।
वाराणसीं समासाद्य पुनाति सकलं नरः ।
वाराणस्यां महादेवं येऽर्चयन्ति स्तुवन्ति वै ।
सर्वपापविनिर्मुक्तास्ते विज्ञेया गणेश्वराः ।
अन्यत्र योगज्ञानाभ्यां संन्यासादथ वान्यतः ।
प्राप्यते तत् परं स्थानं सहस्रेणैव जन्मना ।
ये भक्ता देवदेवेशे वाराणस्यां वसन्ति वै ।
ते विन्दन्ति परं मोक्षमेकेनैव तु जन्मना ।
यत्र योगस्तथा ज्ञानं मुक्तिरेकेन जन्मना ।
अविमुक्तं तदासाद्य नान्यद्गच्छेत्तपोवनम् ।
ज्ञानाज्ञानाभिनिष्ठानां परमानन्दमिच्छताम् ।
या गतिर्विहिता सुभ्रु अविमुक्ते मृतस्य तु ।
यानि चैवाविमुक्तस्य देहे तूक्तानि कृत्स्नशः ।
पुरी वाराणसी तेभ्यः स्थानेभ्यो ह्यधिका शुभा ।
यत्र साक्षान्महादेवो देहान्ते स्वयमीश्वरः ।
व्याचष्टे तारकं ब्रह्म तत्रैव ह्यविमुक्तके ।
तत् परं परतरं तत्त्वमविमुक्तमिति श्रुतम् ।
एकेन जन्मना देवि वाराणस्यां तदाप्नुयात् ।
भ्रूमध्ये नाभिमध्ये च हृदये चैव मूर्द्धनि ।
यथाविमुक्तमादित्ये वाराणस्यां व्यवस्थितम् ।
वरणायास्तथा चास्या मध्ये वाराणसी पुरी ।
तत्रैव संस्थितं तत्त्वं नित्यमेवाविमुक्तकम् ।
वाराणस्याः परं स्थानं न भूतं न भविष्यति ।
यत्र नारायणो देवो महादेवो दिवीश्वरः ।
तत्र देवाः सगन्धर्वाः सयक्षोरगराक्षसाः ।

उपासते मां सततं देवदेवः पितामह ।
महापातकिनो ये च ये च वै पापकृत्तमाः ।
वाराणसीं समासाद्य ते यान्ति परमां गतिम् ।
तस्मान्मुमुक्षुर्नियतो वसेद्वै मरणान्तिकम् ।
वाराणस्यां महादेवाज्ज्ञानं लब्ध्वा विमुच्यते ।
किन्तु विघ्ना भविष्यन्ति पापोपहतचेतसः ।
यथा नारायणः श्रेष्ठो देवानां पुरुषोत्तमः ।
यथेश्वराणां गिरिशः स्थानानां वै तदुत्तमम् ।
यैः समाराधितो रुद्रः पूर्व्वस्मिन्नेव जन्मनि ।
ते विन्दन्ति परं क्षेत्रमविमुक्तं शिवालयम् ।
ये स्मरन्ति सदा कालं वदन्ति च पुरीमिमाम् ।
तेषां विनश्यति क्षिप्रमिहामुत्र च पातकम् ।
आचक्ष्वमिदं स्थानं सेवितं मोक्षकाङ्क्षिणाम् ।
मृतानाञ्च पुनर्जन्म न भूयो भवसागरे ।
तस्मात् सर्व्वप्रयत्नेन वाराणस्यां वसेन्नरः ।
योगी वाप्यथवायोगी पापी वा पुण्यकृत्तमः ।”
इति कौर्म्मे २८ अध्यायः ॥ * ॥
अन्यच्च ।
“वाराणसी नाम पुरी गङ्गातीरे मनोहरे ।
वरणायासया यासिमध्ये पापाहसि सदा ।
तत्र पुष्पजलस्तत्र नित्यं वसति योगिनाम् ।
सदा प्रीतिकरो योगी तत्र चाप्यात्मचिन्तकः ।
त्रिपुण्ड्रा या पुरी नित्यं भगयोगबलाद्धृता ।
स्थित्वा तत्र दशाहेन तत्र यो म्रियते जनः ।
तस्मै स्वयं महादेवः संचारयति तत्क्षये ।
स भूत्वा परमो योगी स्वतस्तत्र भवान्तरे ।
सुलभेनैव निर्व्वाणमाप्नोति स्वाश्रयाश्रमः ।
योगयुक्तो महादेवः पार्व्वत्या सहितः सदा ।
देवगन्धर्व्वयक्षाणां मानुषाणाञ्च नित्यशः ।
श्रेयो हरः प्रयात्येव येन तत्र प्रकाशितम् ।
न तत्र कामदो देवो न विरागः प्रवर्त्तते ।
आराधितश्चिरं भक्त्या निर्व्वाणाय प्रमोदति ।
शीर्षाङ्घ्रिर्विष्णिता या तु पुरी तत्र न गच्छति ।
योगस्थानं महाश्रेष्ठं कल्पान्तेऽपि शाङ्करी ।
आयान्ति मुनयः क्षेत्रमिदं वाराणसी तु यत् ।
कथितं नातिदूरे च सर्व्वतोऽमलमानसौ ।”
इति कालिकापुराणे ५ अध्यायः ॥ * ॥
अथ काशीयात्राविधिः ।
स्कन्द उवाच ।
“यात्रापरिक्रमं ब्रूहि अत्राणां शिवकाश्यपः ।
यथावत् सिद्धिकामानां यथाकथा शृणोमि तम् ।
व्यास उवाच ।
निशामय महाप्राज्ञ लोमहर्षण वच्मि ते ।
यथा प्रथमतो यात्रा कर्त्तव्या चाविकेऽर्व्वुदे ।
सचैलस्नानं प्रथमं चक्रपुष्करिणीजले ।
सन्तर्प्य देवान् सपितॄन् ब्राह्मणांश्च तथार्थिनः ।
आदित्यं द्रौपदीं विष्णुं दण्डपाणिं महेश्वरम् ।
नमस्कृत्य ततो गच्छेत् द्रष्टुं ढुण्ढिविनायकम् ।
ज्ञानवापीमुपस्पृश्य नन्दिकेशं ततोऽर्च्चयेत् ।
तारकेशं समभ्यर्च्य महाकालेश्वरं ततः ।
ततः पुनर्दण्डपाणिमित्येषा पञ्चतीर्थिका ।
दैनन्दिनी विधातव्या महाफलमभीप्सुभिः ॥ * ॥
ततो वैश्वेश्वरी यात्रा कार्य्या सर्व्वार्थसिद्धये ।
दिवसायतनानाञ्च कार्य्या यात्रा प्रयत्नतः ।
कृष्णां प्रतिपदं प्राप्य भूतावधि यथाविधि ।
अथवा प्रतिभूतञ्च क्षेत्रसिद्धिमभीप्सुभिः ।
तत्तत्तीर्थकृतस्नानस्तत्तल्लिङ्गकृतार्च्चनः ।
मौनेन यात्रां कुर्व्वाणः फलं प्राप्नोति यात्रिकः ।
ओँकारं प्रथमं पश्येत् मत्स्योदर्य्यां कृतोदकः ।
त्रिविष्टपमहादेवं ततो वै कृत्तिवाससम् ।
रत्नेशञ्चाथ चन्द्रेशं केदारञ्च ततो व्रजेत् ।
धर्म्मेश्वरञ्च वीरेशं गच्छेत् कामेश्वरं ततः ।
विश्वकर्म्मेश्वरञ्चाथ मणिकर्णीश्वरं ततः ।
अविमुक्तेश्वरं दृष्ट्वा ततो विश्वेशमर्च्चयेत् ।
एषा यात्रा प्रयत्नेन कर्त्तव्या क्षेत्रवासिभिः ।
यस्तु क्षेत्रमुषित्वापि नैतां यात्रां समाचरेत् ।
विघ्नास्तस्योपजायन्ते क्षेत्रोच्चाटनहेतवः ॥ * ॥
अष्टायतनयात्रान्या कर्त्तव्या विघ्नशान्तये ।
दक्षेशः पार्व्वतीशश्च तथा पशुपतीश्वरः ।
गङ्गेशो नर्म्मदेशश्च गभस्तीशः सतीश्वरः ।
अष्टमस्तारकेशश्च प्रत्यष्टमि विशेषतः ।
दृष्टान्येतानि लिङ्गानि महापापप्रशान्तये ॥ * ॥
अपरापि शुभा यात्रा योगक्षेमकरी सदा ।
सर्व्वविघ्नोपशान्त्यै च कर्त्तव्या क्षेत्रवासिभिः ।
शैलेशं प्रथमं वीक्ष्य वरणास्नानपूर्व्वकम् ।
जाह्नव्यां सङ्गमे स्नात्वा दृष्ट्वा सङ्गमेश्वरम् ।
स्वर्लीनतीर्थे सुस्नातः पश्येत् स्वर्लीनमीश्वरम् ।
स्नात्वा मन्दाकिनीतीर्थे दृष्ट्वा मध्यमेश्वरम् ।
पश्येद्धिरण्यगर्भाख्यं तत्र तीर्थे कृतोदकः ।
पञ्चचूड़ह्रदे स्नात्वा ज्येष्ठस्थानं ततोऽर्च्चयेत् ।
चतुःसमुद्रकूपे तु स्नात्वा देवं ततोऽर्च्चयेत् ।
देवस्याग्रे तु या वापी तत्रोपस्पर्शने कृते ।
शुक्रेश्वरं ततः पश्येत्तत्कूपविहितोदकः ।
दण्डखाते नरः स्नात्वा व्याघ्रेशं पूजयेत्ततः ।
शौनकेश्वरकुण्डे तु स्नानं कृत्वा ततोऽर्च्चयेत् ।
जम्बुकेशं महालिङ्गं कृत्वा यात्रामिमां नरः ।
क्वचिन्न जायते भूयः संसारे दुःखसागरे ।
समारभ्य प्रतिपदं यावत् कृष्णचतुर्द्दशीम् ।
एतत्क्रमेण कर्त्तव्यायतनयात्राणि वै ।
इमां यात्रां नरः कृत्वा न भूयोऽप्यभिजायते ।
अन्या यात्रा प्रकर्त्तव्यैकादशायतनोद्भवा ।
आग्नीध्रकुण्डे सुस्नातः पश्येदाग्नीध्रमीश्वरम् ।
उर्व्वशीशं ततो गच्छेत्ततस्तु नकुलीश्वरम् ।
आषाढ़ीशं ततो दृष्ट्वा भारभूतेश्वरं ततः ।
लाङ्गलीशमथाभ्यर्च्च्य ततस्तु त्रिपुरान्तकम् ।
ततो मनःप्रकामेशं प्रीतिकेशमथो व्रजेत् ।
मदालसेश्वरं तस्मात् तिलपर्णेश्वरं ततः ।
यात्रैकादशलिङ्गानामेषा कार्य्या प्रयत्नतः ।
इमां यात्रां प्रकुर्व्वाणो रुद्रत्वं प्राप्नुयान्नरः ॥ * ॥
अतः परं प्रवक्ष्यामि गौरीयात्रामनुत्तमाम् ।
शुक्लपक्षतृतीयायां या यात्रा विश्ववन्दिता ।
गोप्रेक्षतीर्थे सुस्नाय मुखनिर्म्मालिकां व्रजेत् ।
ज्येष्ठवाप्यां नरः स्नात्वा ज्येष्ठां गौरीं समर्च्चयेत् ।
सौभाग्यगौरी संपूज्या ज्ञानवाप्यां कृतोदके ।
ततः शृङ्गारगौरीञ्च तत्रैव च कृतोदकः ।
स्नात्वा विशालगङ्गायां विशालाक्षीं ततो व्रजेत् ।
सुस्नातो ललितातीर्थे ललितामर्च्चयेत्ततः ।
स्नात्वा भवानीतीर्थे तु भवानीं परिपूजयेत् ।
मङ्गला च ततोऽभ्यर्च्या बिन्दुतीर्थकृतोदकैः ।
ततो महालक्ष्मीं स्थिरलक्ष्मीसमृद्धये ।
इमां यात्रां नरः कृत्वा क्षेत्रेऽस्मिन्मुक्तिजन्मनि ।
न दुःखैरभिभूयेत इहामुत्रापि कुत्रचित् ॥ * ॥
कुर्य्यात् प्रतिचतुर्थीषु पूजां विघ्नजितः सदा ।
माघशुक्लचतुर्थ्यां वै मोदकाः शुभे ।
भौमे भैरवयात्रा च कार्य्या पातकहारिणी ।
रविवारे रवेर्यात्रा षष्ठ्यां वा रविसंयुजि ।
तथैव रविसप्तम्यां सर्व्वविघ्नोपशान्तये ।
नवम्यामथवाष्टम्यां चण्डीयात्रा शुभावहा ॥ * ॥
अन्तर्गृहस्य यात्रा वै कर्त्तव्या प्रतिवत्सरम् ।
प्रातः स्नात्वा विधायादौ नत्वा पञ्च विनायकान् ।
नमस्कृत्य च विश्वेशं स्थित्वा निर्व्वाणमण्डपे ।
अन्तर्गृहस्य यात्रां हि करिष्येऽघौघशान्तये ।
सङ्कल्प्य नियमश्चेति गत्वाथ मणिकर्णिकाम् ।
स्नात्वा मौनेन चागत्य मणिकर्णीशमर्च्चयेत् ।
कम्बलाश्वतरौ नागौ वासुकीशं प्रणम्य च ।
पर्व्वतेशं ततो दृष्ट्वा गङ्गाकेशवमप्यथ ।
ततस्तु ललितां दृष्ट्वा जरासन्धेश्वरं ततः ।
ततो वै सोमनाथञ्च वराहञ्च ततो व्रजेत् ।
ब्रह्मेश्वरं ततो नत्वागस्तीश्वरं ततः ।
कश्यपेशं नमस्कृत्य हरिकेशवनं तथा ।
वैद्यनाथं ततो गत्वा ध्रुवेशमथ वीक्ष्य च ।
गोकर्णेशं ततोऽभ्यर्च्य हाटकेशमथो व्रजेत् ।
अस्थिक्षेपतड़ागेऽथ दृष्ट्वा वै कीकसेश्वरम् ।
भारभूतं ततो नत्वा चित्रगुप्तेश्वरं ततः ।
चित्रघण्टां प्रणम्याथ ततः पशुपतीश्वरम् ।
पितामहेश्वरं गत्वा ततस्तु कलशेश्वरम् ।
चन्द्रेशञ्चाथ वीरेशो विद्येशोऽग्नीश एव च ।
नागेश्वरो हरिश्चन्द्रश्चिन्तामणिविनायकः ।
सेनाविनायकश्चाथ द्रष्टव्यः सर्व्वसिद्धये ।
वसिष्ठवामदेवौ च लिङ्गद्वयवराशुभौ ।
द्रष्टव्यौ यत्नतः काश्यां महाविघ्नविनाशनौ ।
सीमाविनायकं नाम कर्द्दमीशं ततो व्रजेत् ।
विघ्नेशो विनायको धर्म्मेशो विश्वबाहुका ।
आशाविनायकश्चाथ वृद्धादित्यः पुनः ।
चतुर्व्वक्त्रेश्वरं लिङ्गं ब्रह्मेशस्तु ततः परम् ।
ततो मनःप्रकामेशं ईशानेशस्ततः परम् ।
चण्डीचण्डेश्वरौ दृष्ट्वा भवानीशङ्करौ ततः ।
ढुण्ढिं प्रणम्य च ततो राजराजं समर्च्चयेत् ।
लाङ्गलीशस्ततोऽभ्यर्च्यस्ततस्तु नकुलेश्वरः ।
परान्नेशमथो नत्वा परद्रव्येश्वरं ततः ।
प्रतिग्रहेश्वरञ्चापि निष्कलङ्केशमेव च ।
मार्कण्डेयेशमभ्यर्च्य ततोऽप्सरसेश्वरम् ।
गङ्गेशं पूजयित्वा ज्ञानवाप्यां स्नानं समाचरेत् ।
नन्दिकेशं तारकेशं महाकालेश्वरं ततः ।
दण्डपाणिं महेशञ्च मोक्षेशं वीरभद्रकम् ।
अविमुक्तेश्वरं नत्वा विश्वेश्वरं ततः ।

शिवायतनानि यत्र विश्वनाथ ततो व्रजेत् ।
ततो मोक्ष विश्वनाथ मल्लमेशसुदर्शयेत् ॥
अन्नपूर्णस्य यामेव यथावद्यस्तथा तथा ।
भवानि दक्षिणा शम्भुं पोषणामनया विभुं ॥
इति मत्स्य समुत्थाय यत्र वै मुक्तिमण्डपे ।
विश्राम्य यायाद्भवन विधाय पुण्यवासर ॥७॥
अथाद्य वासर विश्वेविश्वतीर्थेषु सर्वत ।
कार्या यात्रा प्रयत्नेन महापुण्यफलप्रदे ॥
अवश्यं पञ्चदशा च कुलक्षम समर्थयेत् ।
दुःखवदपिपासमे न भवेदस्य पूजनात् ॥
शुभा पूर्वमिमा यात्रा कर्तव्यात्तीर्थवासिभि ।
पर्वस्वपि विशेषेण कार्या यात्राच सर्वत ॥
न यस्य दिवस कुर्यात् विना यात्रा क्वचित् सती ।
यात्रादर्यं प्रयत्नेन कर्तव्य प्रतिवासरम् ।
आदौ स्नानरात्रिपयोत्तमो विश्वेशिनुर्भुवम् ॥
यस्य स्नम्य दिनं जातं कास्यां नियत यत ।
विराया मिनरक्षस्य तत्क्षणेन दिनःभवत् ।
स एव कालरूपेण स एवो मनुना स्फुटम् ।
स सुदक्षत्र िनशि विश्वेशो यत्र नैष्ठिक ॥
कल्पतीर्थेषु यजी स सर्वयात्रा यथान् स च ।
मणिकर्णयां स यातो यो विशेषं निरेचत ॥
तत्र सर्व पुन तत्र यत्र तत्र पुन पुन ।
इत्यो विश्वेश्वरो निग्र यातया मविकर्णिका ॥
व्यास उवाच ।
एत स्नान्दिमिमं श्रुत्वा काशीमाहात्म्यमुत्तमम् ।
नरो न निरय याति तत्कप्ययनवमम् ॥"
इति काशीखण्डे १ ० अध्याय ॥

वाराणसेय त्रि, (वाराणसी + "नद्यादिभ्यो ढक ।" ४।२।९७। इति ढक ।) वाराणसीजात । वाराणसी सम्बन्धि चेत्यादयेन निष्पन्न ॥

वारायण, क्ली (वारां आयनम् ।) जलाधार । तत्पर्याय । वारंवरम् २ । इति त्रिकाण्ड शेष ॥

वाराह, पुं, महापित्तैतकरध । इति राजनिघण्ट ॥ वराह एव (वराह + स्वार्थे अण् ।) वाराह । (कल्पभेद । यथा, भागवते । ३ । ११ । ३७ ।
"अयन्तु कथित कल्पो द्वितीयस्यापि भारत ।
वाराह इति विख्यातो यत्रासीत् सूकरो
हरि ॥"
वराहस्येदमिति । वराह + तस्येदमित्यण् ।) तत्सम्बन्धिनि, त्रि । (यथा, महाभारते । १।१।९।
"वाल्मीक पायवेवेव मनुना मिश्रितेन च ।
अल्पेन वै पयेनैव मांसैर्वाराहवारिणै ॥"
तीर्थ लोकभेद । यथा महाभारते । ३।८३।१७
"ततो गच्छेत धर्मज्ञ । वाराहं तीर्थमुत्तमम् ।
विष्णुर्वाराहरूपेण पूर्वं यत्र स्थितोऽभवत् ॥"
पुराणविशेष । यथा श्रीभागवते । १२।१३।८ ।
"चतुर्विंशतिसाहस्रं वाराहं परमाद्भुतम् ॥")

वाराहकर्णी, स्त्री, (वाराहकर्णे इव पत्रमस्याः । वाराहकर्ण + अच् । गौरादित्वात् ङीष् ।) अश्वगन्धा । इति राजनिर्घण्ट ॥

वाराहपत्री, स्त्री, (वाराहस्यकर्णे इव पत्र मस्यास्था । अच् । गौरादित्वात् ङीष् ।) अश्वगन्धा । इति राजनिर्घण्ट ॥

वाराहाङ्गी, स्त्री (वाराहमिवाङ्गमस्या । ङीष् ।) दन्तीवृक्ष । इति भावप्रकाश ॥

वाराही, स्त्री, (वाराह + ङीष् ।) मत्स्याख्या वसुमातृकान्तर्गतमातृकाविशेष । यथा,—
"वराहरूपधारी च वराहोपम उच्यते ।
वाराहजननी चाथ वाराही वरवाहना ॥"
इति देवीपुराणे देवीनिरुक्ताध्याय ४५ ॥
योगिनीविशेष । यथा —
"दुर्गा चण्डेश्वरी चण्डी वाराही कार्त्तिकी
तथा ।
हरसिद्धा तथा काली इन्द्राणी वैष्णवी तथा ।
भद्रकाली विशालाक्षी भैरवी कामरूपिणी ।
एता अन्याश्च योगिन्यो मण्डले चापयन्तु मे ॥"
तीर्थविशेष । यथा —
"वाराही यमुना गङ्गा करतोया सरस्वती ।
कावेरी चन्द्रभागा च सिन्धुर्भैरवसागरा ।
पशुपातविधानाय सान्निध्यमिह कल्पय ॥"
इति हवमन्दिकेश्वरपुराणोक्तदुर्गापूजापद्धति ॥
वराहदेवस्य शक्ति । यथा —
"यज्ञवाराहमतुलं रूपं या बिभ्रती हरे ।
शक्ति साप्यागमत्तत्र वाराहीं बिभ्रती
तनुम् ॥"
इति चण्डी ॥
अपि च ।
"वाराहरूपिणीं देवीं दंष्ट्रोद्धतवसुन्धराम् ।
शुभदां सुप्रभां शुभ्रां वाराहीं तां नमाम्यहम् ॥"
इति हवमन्दिकेश्वरपुराणोक्तदुर्गापूजापद्धति ॥
वराहक्रान्ता । चामाषु इति ख्यात । तत् पर्याय । विष्वक्सेनप्रिया २ गृष्टि ३ वन्दरा ४ । क्षमर । मदि ५ । इति भरत ॥ सूकरी ६ क्रोडकन्या ७ विष्वकसेनकान्ता ८ वराही ९ कौमारी १० त्रिनेत्रा ११ ब्रह्मपुत्री १२ क्रोडी १३ कन्या १४ शर्करा १५ माधवेष्टा १६ सूकरकन्द १७ क्रोड १८ वनवासी १९ कुष्ठनाशन २० वल्य २१ अमृत २२ महावीर्य २३ महौषधम् २४ शम्बरकन्द २५ वराहकन्द २६ वीर २७ वाराहीकन्द २८ सुकन्द २९ हरिप्रिय ३० आदिवला ३१ । अस्य गुणा । तिक्तत्वम् । कटुत्वम् । विषपित्तकफकुष्ठमेह क्रिमिनाशित्वम् । वृष्यत्वम् । बल्यत्वम् । रसायनत्व । इति राजनिर्घण्ट ॥ अपरञ्च ।
"वाराहीकन्द एवान्यैर्चर्मकारालुको मत ।
अनूपे स भवेद्देशे वाराह इव लोमवान् ॥"
इति भावप्रकाश ॥
ग्रामाघाती । इति राजनिर्घण्ट ॥ मेदिनीमते पक्षीविशेषकारादिरयं शब्द ॥

वारि, क्ली, (वारयति तृषामिति । वृ + णिच् + "वसिवपियजिराजिव्रजिसदिहनिवाशिवादिवारिभ्य इञ् ।" उणा ४ । १२४ । इति इञ् ।) जलम् । इत्यमर । १ । १० । ३ ॥ (यथा, मनौ । ४ । ४५ ।
"न कुर्वीत वृथा चेष्टां न वार्यञ्जलिना पिबेत् ।
नोत्सङ्गे भक्षयेद्भक्ष्यान् जातु स्यात् कुतूहली ॥")
निशिशौचे तस्य निषेधविधिर्यथा,—
"ईशाने चापि पूर्वस्मिन् पश्चिमे च तथो
त्तरे ।
शिविरस्थं जलं मलमूत्राशुभमेव च ॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ८० अध्याय ॥
जलक्रीडायां तस्य तोयानि यथा —
"जलकेलौ परं चोभयकरकृतापवर्षणम् ।
प्रत्यम्बानिपयोविकुण्डयाता भूपकलुति ॥"
इति कविकल्पलतायाम् १ स्तवके १ कुसुमम् ॥
ह्रीवेरम् । इति हेमचन्द्र ॥

वारि, स्त्री, (वारयतीति । वारि + इन् ।) वाक् । सरस्वती । गजबन्धनी । हस्तिबन्धन भूमि । (यथा, रघौ । ५ । ४५ ।
"तथाविधीस्तत्कूलभिदेव
त्यक्तेन सोराभिमुख समन्तम् ।
तस्थौ स भिन्दन् हवनलताङ्गान्
वान्येविलाभ्य इव प्रदत्त ॥")
कलशि । कलसीति भाषा । इति मेदिनीकार हेमचन्द्रौ ॥ (वरणीये त्रि । यथा, वाजसनेय संहितायाम् । २१ । ६१ ।
"वह्नुत्व वा यह्नुत्व एव मे देवेषु वसु वार्या यक्षते ।"
"यशोऽसिभिर्मक्ष देवेषु वारि वरेषु सोम वारि वरणीय वसु धनमायच्छते ।" इति तद्भाष्ये महीधर ॥)

वारिकण्टक, पुं (वारिस्थ कण्टक इव ।) शृङ्गाटक । इति जटाधर त्रिकाण्डशेषश्च ॥

वारिकर्णिका, स्त्री, (वारिणि कर्णो इव यस्याः । गौरादित्वात् ङीष् । स्वार्थे कन् । टाप् पूर्वह्रस्वश्च ।) शैवाली । इति शब्दरत्नावली ॥ पाना इति भाषा ॥

वारिकपूर, पुं (वारिणि कपूर इव ।) इल्लिश मत्स्य । इति त्रिकाण्डशेष ॥

वारिकुब्ज, पुं, (वारिणि कुब्ज इव जलमार्गः ।) शृङ्गाटक । इति शब्दरत्नावली ॥

वारिकुब्जक पुं (वारिकुब्ज + स्वार्थे कन् ।) शृङ्गाटक । इति त्रिकाण्डशेष ॥

वारिकृमि पुं (वारिणि कृमि ।) जलौका । इति त्रिकाण्डशेष ॥

वारिचत्वर, पुं, (वारिणि चत्वर इव ।) कुम्भिका । इति त्रिकाण्डशेष ॥

वारिचर पुं (वारिणि चरतीति । चर + ट ।) मत्स्य । इति धनञ्जय ॥ (यथा माघे । ६ । ६५ ।
"यशोऽक्षमङ्गे जगती जगाद
मधुमेयाज्य तताम् तुङ्गम् ।
स एव पक्षाद्भयादुद्गच्छन्त्
चात्तापिनान् वारिचरोऽपि कृमम् ॥")

जलचरजन्तुमात्रे, त्रि । (यथा, महाभारते । १२ । २४७ । १८ ।
"यथा वारिचरः पक्षी न लिप्यति जले चरन् । विमुक्तात्मा तथा योगी गुणदोषैर्न लिप्यते ॥")

वारिचामर, क्ली, (वारिणश्चामरमिव तदाकारत्वात् ।) शैवाल । इति त्रिकाण्डशेषः ॥

वारिज, क्ली, (वारिणि जायते इति । जन+डः ।) लौहीलवणम् । गौरसुवर्णम् । पद्मम् । (यथा, अध्यात्मरामायणे । २ । ८ । २ ।
"स तत्र पद्माङ्कुशवारिजाङ्कित-
ध्वजादिचिह्नानि पदानि सर्वतः ।")
लवङ्गम् । इति राजनिर्घण्टः ॥ (वारिजातमात्रे त्रि । यथा महाभारते ।१।८०।१४।
"केनास्यर्थेन नृपते ! इम देशमुपागतः । जिहीर्षुर्वारिजं किञ्चिदथवा मृगलिप्सया ॥"
"वारिजं मीनपद्मादि वेति ।" तट्टीकायां नीलकण्ठः ॥)

वारिज पुं, (वारिणि जायते इति । जन+डः ।) शङ्खः । इति हेमचन्द्रः ॥ शम्बूकः । इति शब्दमाला ॥

वारितस्कर पुं (वारिणस्तस्करः । चलजिनभावेन तत्पहारकत्वात्तथात्वम् ।) मेघः । इति शब्दमाला ॥ वारिशोषककर्त्तरि, त्रि । यथा,
'मयूखधारिणौ वेसामासिताय विभावसम् ।
यथा भार्य्या प्रीतिमती भास्करो वारितस्करः ॥" इति मार्कण्डेयपुराणम् ॥

वारित्रा स्त्री, (वारिणस्त्रायते इति । त्रै+क । टाप् ।) छत्रम् । इति त्रिकाण्डशेषः ॥

वारिद, क्ली, वाला । इति शब्दरत्नावली ॥

वारिद पुं, (वारि ददातीति । दा+"आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) मेघः । (यथा मृच्छकटिके । ५ अङ्के ।
'विद्युद्वारिदगर्ज्जितैः सचकिता त्वद्दर्शनाकाङ्क्षिणी ।
पादौ नूपुरलग्नकर्द्दमधरौ प्रक्षालयन्ती स्थिता ॥")
मुस्तकः । इत्यमरः ॥ (यथा सुश्रुते चिकित्सितस्थाने । १८ अध्याये ।
"रास्नारग्वधनागराट्रुषोवीरवारिदैः ।
क्वाथमामनारग्वधयस्तमिश्रीतके ॥"
वारिदातरि त्रि । यथा, मनौ । ४ । २२९ ।
'वारिदस्तृप्तिमाप्नोति सुखमक्षय्यमन्नदः ।
तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम् ॥")

वारिधि पुं (वारीणि धीयन्तेऽस्मिन्निति । धा+"कर्म्मण्यधिकरणे च ।" ३ । ३ । ९३ । इति किः ।) समुद्रः । इति शब्दरत्नावली ॥ (यथा, कथासरित्सागरे । १८ । २१ ।
"तत्त्रोऽस्मात्तारितं वारिधौ न विलुप्तकः ।
न चालक्ष्यते ग्रामे नगराज्ञयोरपि ॥")

वारिनाथ, पुं (वारीणां नाथः ।) वरुणः । समुद्रः । मेघः । इति केचित् ॥

वारिनिधि पुं (वारीणि निधीयन्तेऽस्मिन्निति । नि+धा+कि ।) समुद्रः । इति शब्दरत्नावली ॥ (यथा, राजतरङ्गिण्याम् । ६ । ७८ ।
"पाराद्वारिनिधेः प्राप्ताः काश्मीरेष्वधुनापि ये । राज्ञो यात्रासु निर्यान्ति ख्याता वारिभवाः पुरः ॥")

वारिपथिक, त्रि, (वारिपथेन गच्छतीति । वारिपथ+'उत्तरपथेनाहृतञ्च ।' ५ । १ । ७७ । इत्यत्र 'आहृतप्रकरणे वारिजङ्गलस्थलकान्तारपूर्व्वादुपसंख्यानम् ।" इति वार्त्तिकवचनात् ठञ् ।) जलपथगामी । वारिपथं गच्छतीत्यर्थे त्रिकप्रत्ययेन निष्पन्नः । (वारिपथेन आहृतम् । इति काशिका ।)

वारिपर्णी स्त्री, (वारिणि पर्णान्यस्या इति । वारिपर्ण+"पाककर्णपर्णपुष्पेति ।" ४ । १ । ६४ । इति ङीष् ।) कुम्भिका । इत्यमरः । १ । १० । ३८ ॥ अस्या गुणाः ।
"वारिपर्णी हिमा तिक्ता लघ्वी स्वाद्वी सरा पटुः ।
दोषत्रयकरी रूक्षा शोणितज्वरशोषहृत् ॥"
इति राजवल्लभः ॥

वारिपालिका स्त्री, (वारीणि पालयति रक्षति तत्रस्थाम्भो रक्षतीति । पालि+ण्वुल् । टाप् । अत इत्वम् ।) शम्भलिका । इति शब्दमाला ॥

वारिप्रवाह, पुं (वारिणः प्रवाहः ।) निर्झरः । इति शब्दमाला ॥

वारिप्रश्नी स्त्री, (वारिजाता प्रश्नी ।) वारिपर्णी । इति शब्दमाला ॥

वारिबदर, स्त्री, (वारिपरिपूर्णं बदरेव ।) प्राचीनामलकम् । इति त्रिकाण्डशेषः ॥

वारिबालक, क्ली (वारिजो बालकम् ।) ह्रीवेरम् । इति हारावली । १०८ ॥

वारिभव, क्ली, (वारिणि वैकृतत्वात् भवति प्रभवतीति । भू+अप् ।) स्रोतोञ्जनम् । इति राजनिर्घण्टः ॥ (जलभवमात्रे त्रि ।)

वारिमसि, पुं, (वारि मसिरिव श्यामतावह यस्य । जलमसिवर्णेन श्यामत्वात् तथात्वम् ।) मेघः । इति त्रिकाण्डशेषः ॥

वारिमुच् [च्] पुं (वारि मुञ्चतीति । मुच+क्विप् ।) मेघः । इति शब्दरत्नावली ॥ (यथा रघौ । ४ । ८६ ।
"स विश्वजितमाजह्रे यज्ञं सर्वस्वदक्षिणम् ।
आदानं हि विसर्गाय सतां वारिमुचामिव ॥")

वारिमूली, स्त्री, (वारिणि मूलं यस्याः । "पाककर्ण..." ४ । १ । ६४ । इति ङीष् ।) वारिपर्णी । इति शब्दरत्नावली ॥

वारिरथ पुं (वारिषु रथ इव गमनसाधनत्वात् ।) भेलकः । इति त्रिकाण्डशेषः ॥

वारिराशि, पुं (वारीणां राशयो यत्र ।) समुद्रः । इति त्रिकाण्डशेषः ॥ (यथा, कथासरित्सागरे । ६३ । ८१ ।
"तस्य मध्यतो बालाग्रास्त्रमेकमद्भुतम् ।
अथाप शिशुमारोऽत्र वारिराशिरिवाद्भुतः ॥"
वारीणां राशिः । जलसमूहः । यथा, रघौ । ४ । ४६ ।
"शैलोपम शैवलमञ्जरीणां
जालानि कर्षन्नुरसा स पश्चात् ।
पूर्व्वं तदुत्पीडितवारिराशिः
सरित्प्रवाहस्तटमुत्ससर्प ॥")

वारिरुह क्ली (वारिणि रोहति जायते इति । रुह+"इगुपधज्ञाप्रीकिरः कः ।" ३।१।१३५ । इति कः ।) कमलम् । इति रत्नमाला ॥ (यथा किरातार्ज्जुनीये । ५ । १३ ।
"विकचवारिरुहं दधतं सरः
सकलहंसगणं शुचिमानसम् ।
शिवमगात्मजया च कृतेर्ष्यया
सकलहंसगणं शुचि मानसम् ॥")
जलजाते, त्रि ॥

वारिलोमन् [न्] पुं (वारिणि लोमानि यस्य । यद्वा, वारि लोमनि यस्य ।) वरुणः । इति जटाधरः ॥

वारिवदर, क्ली, (वारिपूर्णं बदरं यत्र । तद्विवेचने ... ।) प्राचीनामलकम् । इति भूरिप्रयोगः ॥

वारिवर, क्ली, करमर्द्दकम् । इति जटाधरः ॥

वारिवल्लभा स्त्री, (वारि वल्लभमस्याः । जलवत्त्वात् ।) विदारी । इति राजनिर्घण्टः ॥

वारिवास, पुं, (वारिणमपि वासोऽस्य । यद्वा, वारि मधुजिनादिकं वासयति सुगन्धीकरोतीति । वास+अण् ।) शौण्डिकः । इति हेमचन्द्रः । ३ । ४६६ ॥

वारिवाह, पुं (वारि वहतीति । वह+"कर्म्मण्यण् ।" ३ । २ । १ । इति अण् ।) मेघः । मुस्ता । इत्यमरः ॥

वारिवाहन, पुं (वाहयतीति । वाहि+ल्युः । वारीणां वाहनः ।) मेघः । इति शब्दरत्नावली ॥

वारिश, पुं (वारिणि जलमध्ये शेते इति । शी+डः ।) विष्णुः । इति त्रिकाण्डशेषः ॥

वारिसम्भव क्ली (वारिप्रधानदेशेषु सम्भव उत्पत्तिर्यस्य ।) लवङ्गम् । स्रोतोञ्जनम् । उशीरम् । इति राजनिर्घण्टः ॥

वारिसार पुं (वारिप्रधानदेशेषु सारः श्रेष्ठ उत्पत्तिर्यस्य ।) कारवल्लकः । इति राजनिर्घण्टः ॥ (वारिषु सम्भवोऽस्य । वारिजातमात्रे त्रि । यथा रामायणे । ६ । ११ । ८ ।
"तस्तु किं दुष्प्रकर तेभ्य वारिसम्भवम् ।
न च यत्रा न कौशिके देवतो ...
मिता ॥")

वारी स्त्री (वार्य्यतेऽनयेति । वृ+णिच्+"वसिवपियजिराजिव्रजिसदिहनिवाशिवादिवारिभ्य इञ् ।" उणा० ४ । १२४ । इति इञ् । वा ङीष् ।) गजबन्धनी । (यथा, रघौ ।१।१।

"वमौ स भिन्दन् हृदयानि तासाम्
मध्यगतोभाण्ड इव प्रवृत्तः ॥")
कन्यपी। इति धरणिः ॥

वारोट पुं, (वार्यां गजबन्धनभूम्यामटतीति। टट्+क ।) हस्ती। इति शब्दमाला ॥

वारीश पुं (वारीणामीशः ।) समुद्र । इति हेमचन्द्रः । ४ । १३८ ॥

वारु, म, (वारयति रिपूनिति। वृ+णिच्+बाहुलकात् उण् ।) विजयकुञ्जर । इति शब्दार्णवः । २६ ॥

वारुट, पुं, क्लीं । अन्तशय्या । इति त्रिकाण्डशेषः ॥

वारुण, क्ली (वरुणो देवतास्येति। वरुण+अण् ।) जलम् । इति राजनिर्घण्टः ॥ (शत-भिषानक्षत्रम् । यथा तिथितत्त्वे ।
"वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी ।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा ॥"
उपपुराणविशेषः । यथा, देवीभागवते । १ । ३ । १५ ।
'वारुणं कालिकाख्यञ्च साम्बं नन्दिकृतं शुभम् ।
सौरं पाराशरप्रोक्तमादित्यं चातिविस्तरम् ॥'
पुं भारतस्य खण्डविशेषः । यथा विष्णुपुराणे । २ । ३ । ६ ।
इन्द्रद्वीपः कसेरुश्च ताम्रवर्णो गभस्तिमान् ।
नागद्वीपस्तथा सौम्यो गन्धर्वस्त्वथ वारुणः ॥')
वरुणसम्बन्धिनि, त्रि । यथा,—
"पश्चिमे पुष्पदन्तस्य वारुणस्य प्रशस्यते ।
उत्तरेण तु भल्लाट सोम्यस्य शुभदं भवेत् ॥
उदुम्बरस्तथा याम्ये वारुणे पिप्पलः शुभः ।
प्रक्षश्चोत्तरतो धन्यो विपरीतास्त्वसिद्धये ॥"
इति मात्स्ये २०४ अध्यायः ॥
(यथा च महाभारते । १ । १ २ । १ ।
समुद्रं ते समासाद्य वारुणं निधिमम्भसाम् ।
काश्यपा यदवर्तन्त त्रैलोक्यस्य विनाशने ॥")

वारुणकर्म्म क्ली (वारुणं जलसम्बन्धि कर्म्म ।) जलाशयखननादि । तस्य शुभाशुभकालादि यथा,—
यम उवाच ।
"सुभिक्षे श्रवणपुष्ये चन्द्रताराबलैर्युते ।
वरुणस्य भवद्भागं काले ज्ञेयं विधिं शृणु ।
वहता तु जलं कुर्य्यात् अपूर्णमकाशोदरम् ।
कर्कटे पूर्णमायस्तु मीने तु मकरे भवेत् ॥
मीनं तथोदयान्भस्तु कुम्भे च वृषपूरकम् ।
वृषे च मिथुने वृद्धिर्वृश्चिके निर्जलं भवेत् ॥
सिंहे चेदिस्तु कन्यायां तुलायां सम्भवन्ति
लिङ्गे देवि धर्मं नाम जनाश्च भवन्ति द्विज ।
तथा चैतत् समस्तं वारुणं कर्म यो न्यसेत् ॥"
इति वह्निपुराणे वारुणारामप्रतिष्ठानामाध्यायः ॥

वारुणि, पुं (वरुणस्यापत्यं पुमान् । वरुण+इञ् ।) अगस्त्यमुनिः । इति त्रिकाण्डशेषः ॥ (यथा महाभारते । १ । ६ ६ । ६ ।
"वरुणस्य सुतं विप्रं शुक्रस्य तु महामतिः ।
उवाच सहितान् दृष्ट्वा सर्वानेव समागतान् ।
अहं लोकहिताय वै विज्ञामि वरुणालयम् ॥"
वसिष्ठः । यथा, महाभारते । १ । ९९ । ७ ।
"स वारुणिस्तपस्तेपे तस्मिन् भरतसत्तम ।
वने पुण्यकृतां श्रेष्ठ स्वादुमूलफलोदके ॥"
त्रिशिरापुत्रभेदः । यथा महाभारते ।१।६५।४०।
'नाग्न्यादिदमनिलं तथैव गरुडावरौ ।
व्याचक्षीरन्नन्दिश्चैव वैनतेया प्रकीर्तिता ॥'
भृगुः । यथा, शतपथब्राह्मणे । ११ । ६ । १ ।
"भृगुर्ह वै वारुणिः । वरुणं पितरं विद्ययाति मेने । तद्ध वरुणो विदाञ्चकार ॥")

वारुणी, स्त्री, (वरुणस्येयम् । "तस्येदम् ।" ४ । ३ । १२० । इत्यण् । ङीप् ।) सुरा । (यथा मनौ । ११ । १५० ।
'अज्ञानाद्वारुणीं पीत्वा संस्कारेणैव शुध्यति ।
मतिपूर्वमनिर्देश्यं प्राणान्तिकमिति स्थितिः ॥'
समुद्रोत्पन्ना देवी । यथा विष्णुपुराणे । १ । ९ । ९३ ।
"विमलन्ति तदा नौ दिवि विस्मयन्तो गताः ।
बभूव वारुणी देवी मदाघूर्णितलोचना ॥"
"वारुणी मदिराधिष्ठात्री देवी ।" इति तट्टीकायां श्रीधरस्वामी ॥ वरुणपत्नी । वारुणी वरुणस्य इन्द्राणीव । यथा, महाभारते । २ । ९ । ६ ।
"शुभामाला स वरुणो वारुण्या च समन्वितः ।
दिव्यरत्नाम्बरधरो दिव्याभरणभूषितः ॥"
नदीविशेषः । यथा, गौ रामायणे ।२।७।१२।
"पूर्व्वेण वारुणीं तीर्त्वा कुरुक्षेत्रे सरस्वतीम् ।
महीनि च प्रयुक्तानि नदीश्च विमलोदकाः ॥")
पश्चिमदिक् । इत्यमरः । १ । ३ । ९१ ॥ (यथा, नैषधचरिते । ४ । ६० ।
'यदि विधुम्नसाति सरीसृते
उदयति हि द्विजराजधिया रिपुम् ।
किमु न्विव पुनरेति पदीक्षया
पतित एव निषेव्य हि वारुणीम् ॥'
विद्याविशेषः । यथा, तैत्तिरीयोपनिषदि । ३ तृतीयप्रपाठके ६ षष्ठानुवाके । "आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते । आनन्द प्रयन्त्यभिसंविशन्तीति । सैषा भार्गवी वारुणी विद्या ॥"
अध्यात्मविद्याविशेषः । यथा, अथर्ववेदे । २ । १०३ ।
"सुदर्शनाङ्कसम्प्राप्ता सुखिका चैव वारुणी ॥")
शतभिषानक्षत्रम् । इति हेमचन्द्रः ॥ गण्डदूर्वा । इति मेदिनी । ण, ६८ ॥ इन्द्रवारुणी । दूर्वा । इति राजनिर्घण्टः ॥ शतभिषानक्षत्र-युक्तचैत्रकृष्णत्रयोदशी । यथा स्कन्दपुराणे ।
"वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी ।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा ॥"
वारुणं शतभिषा ।
"शुभयोगसमायुक्ता सा महावारुणी स्मृता ।
गङ्गायां यदि लभ्येत कोटिसूर्य्यग्रहैः समा ।
शुभयोगसमायुक्ता शनौ शतभिषा यदि ।
महामहेति विख्याता त्रिकोटिकुलमुद्धरेत् ॥
अत्र सर्व्वत्रैव वारुणत्वाय शतभिषायोग आव-श्यकः । अत एवं महावारुणीमहामहा-वारुण्यामुक्तिर्वर्तते । तत्र चैत्रे मासि कृष्ण-पक्षे त्रयोदश्यां तिथौ महावारुण्यां महा-महावारुण्यां यथायथं प्रयोज्यम् । न चात्र ।
"स्नानं कुर्वन्ति या नार्य्यश्चन्द्रे शतभिषां गते ।
सप्तजन्म भवेयुस्ता दुर्भगा विधवा ध्रुवम् ॥"
इति ।
"त्रयोदश्यां चतुर्दश्यामष्टम्याञ्च विशेषतः ।
शुक्रदिवसे च तथा स्नानं भास्करेषु वर्जयेत् ॥"
इति प्रचेतोवाक्यात् निषिद्धकाले कथं स्त्रीणां शूद्राणां वा स्नानमिति वाच्यम् ।
"भोगाय क्रियते यत्तु स्नानं यादृच्छिकं नरैः ।
तन्निषिद्धं दशम्यादौ नित्यं नैमित्तिकं न तु ॥"
इति देवलादिवचनेन रागप्राप्तस्नान एव निषेधात् सप्तम्यामपि तथा कथनात् । अत त्रयोदश्यां पूजायां पुष्पाद्येतत्कार्यं सम्भवति तथैव परदिने पूर्वोक्तं निषिद्धमन्तामीऽपि पूर्वे-द्युरेव स्नानम् । रात्रावपि वारुण्यादिषु गङ्गायां स्नानम् ।
"दिवा रात्रौ च सन्ध्यायां गङ्गायाञ्च प्रयत्नतः ।
स्नात्वाश्वमेधजं पुण्यं दृश्याद्दर्शनतत्क्षणे ॥"
इति ब्रह्माण्डपुराणे सामान्यतः प्रतिप्रसवात् ।
इति तिथ्यादितत्त्वम् ॥ * ॥ वरुणप्रेरितस्कन्ध-वनस्थकदम्बतरुकोटरनिःसृतबलदेवपीतवारुणी । यथा —
पराशर उवाच ।
"वने विचरतस्तस्य सह गोपैर्महात्मनः ।
मानुषच्छद्मरूपस्य शेषस्य धरणीभृतः ।
निष्पादितोरुकार्यस्य कार्य्येणोर्वीविचारिणः ।
उपभोगार्थमत्यर्थं वरुणः प्राह वारुणीम् ।
अभीष्टा सर्वदा यस्य मदिरे त्वं महौजसः ।
अनन्तस्योपभोगाय तस्य गच्छ मुदे शुभे ।
इत्युक्ता वारुणी तेन सन्निधानमथाकरोत् ।
वृन्दावनसमुत्पन्नकदम्बतरुकोटरे ।
विचरन् बलदेवोऽपि मदिरागन्धमुत्तमम् ।
आघ्राय मदिरातर्षमवापाथ पुरातनम् ।
ततः कदम्बात् सहसा मद्यधारां स लाङ्गली ।
पतन्तीं वीक्ष्य मैत्रेय प्रययौ परमां मुदम् ।
पपौ च गोपगोपीभिः समवेतो मुदान्वितः ।
उपगीयमानो ललितं गीतवाद्यविशारदैः ॥"
इति विष्णुपुराणे ५ अंशे २५ अध्यायः ।

वारुणीवल्लभ पुं (वारुण्या वल्लभः । वारुणी वल्लभा यस्येति वा ।) वरुणः । इति शब्दमाला ॥

वारुण्ड, पुं फणिनां राजा । इति मेदिनी । डे, ११ ॥ सन्ताने पर्य्यायेऽपि । किन्तु सर्व्वासां दक्ष प्रजापतिकन्यकानां कश्यपादौ भिन्नत्वात् ।

वारुक पुं क्ली, (वृ+उकञ् ।) नौकासेचनम् । नेत्रमलम् । सेचनम् । इति मेदिनी । डे, ११ ।

वाराही, स्त्री, (वाराह + गौरादित्वात् ङीष् ।) हारविशेषः । इति वैजयन्ती । ते, ३३ ।

वारेन्द्री स्त्री, देशविशेषः । इति शब्दरत्नावली ॥ यथा —

"प्राच्यां मागधशोणौ च वारेन्द्रीगौडराढ़काः ।
वर्द्धमानतमोलिप्तप्राग्ज्योतिषोदयाद्रयः ॥"

इति ज्योतिस्तत्त्वम् ॥

अधुना राजशाहीनामकदेशैकदेशः ॥

वार्क्ष, क्ली, (वृक्षाणां समूह इति । वृक्ष + "तस्य समूहः ।" ४ । २ । ३७ । इति अण् ।) वनम् । इति हेमचन्द्रः ॥ (वृक्षस्येदमित्यण् ।) वृक्षसम्बन्धिनि, त्रि । यथा,—

"वार्क्षं निषधदं लिङ्गं स्फाटिकं सर्वकामदम् ।"

इति तिथ्यादितत्त्वम् ॥

वार्क्षी स्त्री, (वृक्षाणामपत्यं स्त्री । वृक्ष + अण् । ङीप् ।) स्त्रीविशेषः । (यथा, महाभारते । १ । १९७ । १५ ।

'तथैव मुनिजा वार्क्षी तपोभिर्भावितात्मनः ।
सङ्गताभूद्दश भ्रातॄनेकनाम्नः प्रचेतसः ॥"

इयं हि मारिषापरनाम्नी कण्डुमुनेरौरसात् प्रम्लोचागर्भजाता सती पश्चात् वृक्षेभ्य उत्पन्ना । तत्कथा यथा, विष्णुपुराणे । १ । १५ । १—५९ ।

पराशर उवाच ।

"तपश्चरत्सु पृथिवीं प्रचेतःसु महीरुहाः ।
अरक्ष्यमाणामावव्रुर्बभूवाथ प्रजाक्षयः ॥
नाशकन्मारुतो वातुं वृतं खमभवद्द्रुमैः ।
दशवर्षसहस्राणि न शेकुश्चेष्टितुं प्रजाः ॥
तद्दृष्ट्वा जलनिष्क्रान्ताः सर्वे क्रुद्धाः प्रचेतसः ।
मुखेभ्यो वायुमग्निं च तेऽसृजन् जातमन्यवः ॥
उन्मूलानथ तान् वृक्षान् कृत्वा वायुरशोषयत् ।
तानग्निरदहद्घोरस्तत्राभूद्द्रुमसंक्षयः ॥
द्रुमक्षयमथो दृष्ट्वा किञ्चिच्छिष्टेषु शाखिषु ।
उपगम्याब्रवीदेतान् राजा सोमः प्रजापतीन् ॥
कोपं यच्छत राजानः शृणुध्वं च वचो मम ।
सन्धानं वः करिष्यामि सह क्षितिरुहैरहम् ॥
रत्नभूता च कन्येयं वार्क्षेयी वरवर्णिनी ।
भविष्यं जानता पूर्वं मया गोभिर्विवर्द्धिता ॥
मारिषा नाम नाम्नैषा वृक्षाणामिति निर्मिता ।
भार्या वोऽस्तु महाभागा ध्रुवं वंशविवर्द्धिनी ॥
युष्माकं तेजसोऽर्द्धेन मम चार्द्धेन तेजसः ।
अस्यामुत्पत्स्यते विद्वान् दक्षो नाम प्रजापतिः ॥
मम चांशेन संयुक्तो युष्मत्तेजोमयेन वै ।
तेजसाग्निसमो भूयः प्रजाः संवर्द्धयिष्यति ॥
कण्डुर्नाम मुनिः पूर्वमासीद्वेदविदां वरः ।
सुरम्ये गोमतीतीरे स तेपे परमं तपः ॥
तत्क्षोभाय सुरेन्द्रेण प्रम्लोचाख्या वराप्सराः ।
प्रयुक्ता क्षोभयामास तमृषिं सा शुचिस्मिता ॥
क्षोभितः स तया सार्द्धं वर्षाणामधिकं शतम् ।
अतिष्ठन्मन्दरद्रोण्यां विषयासक्तमानसः ॥
तं सा प्राह महाभाग गन्तुमिच्छाम्यहं दिवम् ।
प्रसादसुमुखो ब्रह्मन्ननुज्ञां दातुमर्हसि ॥
तयैवमुक्तः स मुनिस्तस्यामासक्तमानसः ।
दिनानि कतिचिद्भद्रे स्थीयतामित्यभाषत ॥
एवमुक्ता ततस्तेन साग्रं वर्षशतं पुनः ।
बुभुजे विषयांस्तन्वी तेन साकं महात्मना ॥
अनुज्ञां देहि भगवन् व्रजामि त्रिदशालयम् ।
उक्तस्तयेति स पुनः स्थीयतामित्यभाषत ॥
पुनर्गते वर्षशते साधिके सा शुभानना ।
यामीत्याह दिवं ब्रह्मन् प्रणयस्मितशोभनम् ॥
उक्तस्तयैवं स मुनिरुपगुह्यायतेक्षणाम् ।
प्राहास्यतां क्षणं सुभ्रु चिरकालं गमिष्यसि ॥
तच्छापभीता सुश्रोणी सह तेनर्षिणा पुनः ।
शतद्वयं किञ्चिदूनं वर्षाणामन्वतिष्ठत ॥
गमनाय महाभागो देवराजनिवेशनम् ।
प्रोक्तः प्रोक्तस्तया तन्व्या स्थीयतामित्यभाषत ॥
तस्य शापभयाद्भीता दाक्षिण्येन च दक्षिणा ।
प्रोक्ता प्रणयभङ्गार्त्तिवेदिनी न जहौ मुनिम् ॥
तया च रमतस्तस्य महर्षेस्तदहर्निशम् ।
नवं नवमभूत्प्रेम मन्मथाविष्टचेतसः ॥
एकदा तु त्वरायुक्तो निश्चक्रामोटजान्मुनिः ।
निष्क्रामन्तञ्च कुत्रेति गम्यते प्राह सा शुभा ॥
इत्युक्तः स तया प्राह परिवृत्तमहः शुभे ।
सन्ध्योपास्तिं करिष्यामि क्रियालोपोऽन्यथा भवेत् ॥
ततः प्रहस्य सुदती सा तं प्राह महामुनिम् ।
किमद्य सर्वधर्मज्ञ परिवृत्तमहस्तव ॥
बहूनां विप्र वर्षाणां परिवृत्तमहस्तव ।
गतमेतन्न कुरुते विस्मयं कस्य कथ्यताम् ॥

मुनिरुवाच ।

प्रातस्त्वमागता भद्रे नदीतीरमिदं शुभम् ।
मया दृष्टासि तन्वङ्गि प्रविष्टा च ममाश्रमम् ॥
इयञ्च वर्त्तते सन्ध्या परिणाममहो गतम् ।
उपहासः किमर्थोऽयं सद्भावः कथ्यतां मम ॥

प्रम्लोचोवाच ।

प्रत्यूषस्यागता ब्रह्मन् सत्यमेतन्न तन्मृषा ।
किन्त्वद्य तस्य कालस्य गतान्यब्दशतानि ते ॥

सोम उवाच ।

ततः ससाध्वसो विप्रस्तां पप्रच्छायतेक्षणाम् ।
कथ्यतां भीरु कः कालस्त्वया मे रमतः सह ॥

प्रम्लोचोवाच ।

सप्तोत्तराण्यतीतानि नववर्षशतानि ते ।
मासाश्च षट् तथैवान्यत् समतीतं दिनत्रयम् ॥

ऋषिरुवाच ।

सत्यं भीरु वदस्येतत् परिहासोऽथ वा शुभे ।
दिनमेकमहं मन्ये त्वया सार्द्धमिहासितम् ॥

प्रम्लोचोवाच ।

वदिष्याम्यनृतं ब्रह्मन् कथमत्र तवान्तिके ।
विशेषेणाद्य भवता पृष्टा मार्गानुवर्त्तिना ॥

सोम उवाच ।

निशम्य तद्वचः सत्यं स मुनिर्नृपनन्दनाः ।
धिग्धिङ्मामित्यतीवेत्थं निनिन्दात्मानमात्मना ॥

मुनिरुवाच ।

तपांसि मम नष्टानि हतं ब्रह्मविदां धनम् ।
हृतो विवेकः केनापि योषिन्मोहाय निर्मिता ॥
ऊर्म्मिषट्कातिगं ब्रह्म ज्ञेयमात्मजयेन मे ।
मतिरेषा हृता येन धिक् तं काममहाग्रहम् ॥
व्रतानि वेदविद्याप्तिकारणान्यखिलानि च ।
नरकग्राममार्गेण सङ्गेनापहृतानि मे ॥
विनिन्द्येत्थं स धर्म्मज्ञः स्वयमात्मानमात्मना ।
तामप्सरसमासीनामिदं वचनमब्रवीत् ॥
गच्छ पापे यथाकामं यत्कार्य्यं तत्कृतं त्वया ।
देवराजस्य मत्क्षोभं कुर्व्वन्त्या भावचेष्टितैः ॥
न त्वां करोम्यहं भस्म क्रोधतीव्रेण वह्निना ।
सतां साप्तपदं मैत्रमुषितोऽहं त्वया सह ॥
अथवा तव को दोषः किं वा कुप्याम्यहं तव ।
ममैव दोषो नितरां येनाहमजितेन्द्रियः ॥
यया शक्रप्रियार्थिन्या कृतो मे तपसो व्ययः ।
त्वया धिक् तां महामोहमञ्जूषां सुजुगुप्सिताम् ॥

सोम उवाच ।

यावदित्थं स विप्रर्षिस्तां ब्रवीति सुमध्यमाम् ।
तावद्गलत्स्वेदजला सा बभूवातिवेपथुः ॥
प्रवेपमानां सततं स्विन्नगात्रलतां सतीम् ।
गच्छ गच्छेति सक्रोधमुवाच मुनिसत्तमः ॥
सा तु निर्भर्त्सिता तेन विनिष्क्रम्य तदाश्रमात् ।
आकाशगामिनी स्वेदं ममार्ज तरुपल्लवैः ॥
वृक्षाद्वृक्षं ययौ बाला तदग्रारुणपल्लवैः ।
निर्म्मार्ज्जमाना गात्राणि गलत्स्वेदजलानि वै ॥
ऋषिणा यस्तदा गर्भस्तस्या देहे समाहितः ।
निर्ज्जगाम स रोमाञ्चस्वेदरूपी तदङ्गतः ॥
तं वृक्षा जगृहुर्गर्भमेकं चक्रे तु मारुतः ।
मया चाप्यायितो गोभिः स तदा ववृधे शनैः ॥
वृक्षाग्रगर्भसम्भूता मारिषाख्या वरानना ।
तां प्रदास्यन्ति वो वृक्षाः कोप एष प्रशाम्यताम् ॥
कण्डोरपत्यमेवं सा वृक्षेभ्यश्च समुद्गता ।
ममापत्यं तथा वायोः प्रम्लोचातनया च सा ॥
स चापि भगवान् कण्डुः क्षीणे तपसि सत्तमः ।
पुरुषोत्तमाख्यं मैत्रेय विष्णोरायतनं ययौ ॥
तत्रैकाग्रमतिर्भूत्वा चकाराराधनं हरेः ।
ब्रह्मपारमयं कुर्व्वन् जपमेकाग्रमानसः ।
ऊर्द्ध्वबाहुर्महायोगी स्थित्वासौ भूपनन्दनाः ॥")

वार्द्ध, पुं, [illegible] । वारि [illegible] इति शब्दार्थचिन्तामणिः ॥

वार्द्धक, त्रि, (वृद्धानां समूहः । वृद्ध + वुञ् ।) [illegible] । इति [illegible] ॥

वार्त्तं क्ली, अनामयम् । आरोग्यम् । इत्यमरः । ३ । ३ । ४७ ॥

वार्त्त, त्रि, (वृत्तिरस्त्यस्येति । "ज्योत्स्नादिभ्य उपसंख्यानम् ।" ५ । २ । १०३ । इत्यण् ।) निरामयः । इत्यमरः । ३ । १ । ५७ । इति शब्दरत्नावली ॥

वार्त्तक, पुं, कपिञ्जलः । [illegible] । इति [illegible] । यथा,—

"वार्त्ताकी वातकफघ्नस्तस्मोऽन्या वर्त्तका स्मृता ।
वर्त्तकोऽपिकर प्रोक्तो ज्वरदोषभयापह ।
गुरुच शुक्रदो बल्यो वर्त्ताकाल्पगुणा सत ॥"
इति भावप्रकाश ॥

१
वार्त्ता स्त्री, (वृत्तिरस्या अस्तीति । "प्रज्ञाश्रद्धा अर्चाभ्यो ण ।" ५ । २ । १ १ । इति ण । ततष्टाप ।) कृषि । यथा,—
"पश्चादिपालनादेवी कृषिकर्मान्तकारणात् ।
वर्त्तनाद्वारणाच्चापि वार्त्ता सा एव गीयते ॥"
इति देवीपुराणे ४५ अध्याय ।
वृत्ति । जनश्रुति । इत्यमर । १ । ६ । ६ ॥
उदन्त । (यथा गीतगोविन्दे । ८ ।
"वार्त्तापि ह्रीपात्रनयन
तापनिषयपरिहारे इत ।
तदपि न मरणो नश्यन्ति
वार्त्ता कोऽपि न पृच्छति मे ॥")
वार्त्तिक्र । स्थाज्या । इति मेदिनी । ते ५६॥
(यथा, मनौ । ८ । ३४६ ।
"वैश्यस्तु कृतसंस्कार कृत्वा दारपरिग्रहम् ।
वार्त्तायां नित्ययुक्त स्यात् पशूनाञ्चैव रक्षणे ॥"
वार्त्तेय चतुर्विधा । यथा भागवते ।१० ।२४।२१।
कृषिवाणिज्यगोरक्षाकुसीदं तुर्यमुच्यते ।
वार्त्ता चतुर्विधा तत्र वय गोवृत्तयोऽनिशम् ॥")
वार्त्ताक, पु (वृत्तेऽनेनेति । वृत्+"वृतेश्च ह्रिच ।" उणा ३ । ७८ । इति काकु । "वाहुलकात् धकारस्थार्त्वे वार्त्ताकवार्त्ताकी ।" इत्युज्ज्वलदत्तोक्ता सिद्धम् ।) वार्त्ताकु । इति त्रिकाण्डशेष । वार्त्तकपक्षी । इति भाव प्रकाश ।
वार्त्ताकी, [न] पु, वार्त्ताकु । इत्यमरटीकायां भरत ।
वार्त्ताकी, स्त्री, बृहती । इति भावप्रकाश ॥
वार्त्ताकु । इत्यमर । २ । ४ । ११३ ।
वार्त्ताकु, स्त्री (वर्त्तते इति । वृत्+"वृते श्च ह्रिच ।" उणा ३ । ७८ । इति काकु ।) स्वनामख्यातफलवृक्ष । बेगुन इति भाषा । तत्पर्याय । सिंहली २ सिंही ३ भण्टाकी ४ दुष्प्रधर्षिणी ५ वार्त्ताकी ६ वार्त्ता ७ वार्त्ति प्रक ८ वार्त्ताक ९ शाकबिल्व १० राज कुष्माण्ड ११ । इति जटाधर । वार्त्तिक १२ वार्त्तिगम १३ इन्नाक १४ वङ्गण १५ अङ्गण १६ । इति शब्दरत्नावली । कण्टवृन्ताकी १७ कण्टालु १८ कण्टपत्रिका १९ निद्रालु २० मांसफला २१ इन्नाकी २२ मकटिका २३ चित्रफला २४ कण्टकिनी २५ महती २६ कटफला २७ मिश्रवर्णफला २८ नीलफला २९ रक्तफला ३० शाकश्रेष्ठा ३१ उत्तफला ३२ कृष्णप्रियफला ३३ । अस्या गुणा कटुत्वम् । रुच्यत्वम् । मधुरत्वम् । पित्तना शित्वम् । बलपुष्टिकारित्वम् । हृद्यत्वम् । गुरु त्वम् । वातत्र (न) श्लतत्वञ्च । इति राजनिर्घण्ट ॥ अ ० व ।

"वह्निप्रदा मारुतनाशिनी च
शुक्रप्रदा शोणितवर्द्धिनी च ।
हृल्लासकासारुचिनाशिनी च
वार्त्ताकुरेषा गुणसप्रयुक्ता ॥
सा बाला कफपित्तघ्नी वृद्धा सक्षारपित्तला ।
सदाफला त्रिदोषघ्नी रक्तपित्तप्रसादनी ॥
अङ्गारपक्वा वार्त्ताकु किञ्चित्पित्तकरी मता ।
कफमेदोऽनिलहरा अत्यर्थं लघुरेव च ॥"
इति राजवल्लभ ।
अपरञ्च ।
"इन्नाक स्वादु तीक्ष्णोष्णा कटुपाकमपित्तलम् ।
ज्वरवातबलासघ्नं दीपनं शुक्रलं लघु ॥
तद्बाल कफपित्तघ्नं वृद्धं पित्तकरं गुरु ।
इन्नाक पित्तल किञ्चिदङ्गारपरिपाचितम् ॥
कफमेदोऽनिलामघ्नमत्यर्थं लघु दीपनम् ।
तदेव हि गुरु स्निग्धं सतैलं लवणान्वितम् ॥
अपर श्वेतइन्नाक कुक्कुटाण्डसमं भवेत् ।
तदर्शःसु विशेषेण हितं हीनञ्च पूर्व्वत ॥"
इति भावप्रकाश ।
वार्त्ताक, पु (वृत+काकु ।) वार्त्ताकी । इति त्रिकाण्डशेष ।
वार्त्तायन पु (वार्त्तानामयनमनेनेति ।) प्रवृत्तिज्ञ । तत्पर्याय । चैरिक २ गूढपुरुष ३ प्रणिधि ४ यथार्हवर्ण ५ अपसर्प ६ मन्त्रवित् ७ चर ८ स्पश ९ चार १० । इति हेमचन्द्र । ३ । ३९८ ॥
वार्त्तावह, पु, धान्यतण्डुलादेर्वार्त्तां वहति य । पसारी इति भाषा । तत्पर्याय । वैवधिक २। इत्यमरभरतौ । वार्त्तावह ३ । इति शब्द रत्नावली । अवाग्वाहके त्रि ।
वार्त्तिक, पु, (वृत्तिं वेत्तीति । वृत्ति+उक्थादित्वात् ठक् ।) प्रवृत्तिज्ञ । चर । इति त्रिकाण्ड शेष । (यथा, कथासरित्सागरे । ३४ । ७६ ।
"दूतेतो वार्त्तिकजनो गोमान् किं नाम वा चरेत् ॥"
(वार्त्ता कृष्यादिस्तत्र साधु । ठक् ।) वैश्य । (वार्त्ते आरोग्ये साधुरिति । ठक् ।) वर्त्तिक पक्षी । इति राजनिर्घण्ट । वार्त्ताकी । इति शब्दरत्नावली । (वृत्तौ साधुरिति । वृत्ति+ "कथादिभ्यष्ठक् ।" ४ । ४ । १०२ । इति ठक् । वृत्तसम्बन्धिनि, त्रि ।)
वार्त्तिक, क्ली (वृत्तिर्ग्रन्थस्तत्रविवृति । तत्र साधु । वृत्ति+"कथादिभ्यष्ठक ।" ४।४।१ २ । इति ठक् ।) उक्तानुक्तदुरुक्तार्थव्यक्तिकारक ग्रन्थ । यथा —
"उक्तानुक्तदुरुक्तार्थचिन्ताकारि तु वार्त्तिकम् ।"
इति हेमचन्द्र ।
वार्त्तिका, स्त्री (वार्त्तिक+टाप् ।) पक्षिविशेष । बटेर इति भाषा । तत्पर्याय । विकुविकिरी २। इति शब्दावली ।
वार्त्म, पु (वृत्तत इत्याद्युपदेश धूमात् । वृत्वन् +अच् ।) अध्वन । इति त्रिकाण्डशेष ।

नयन । इत्युपपद्यमर्थिनि, त्रि । (यथा, माघ काव्ये । ६ । ६२ । ३४ ।
"तन्वी च ते दुष्टभयो विनेदु
र्गम्भीरवेदा समदविवृत्ता ।
वाक्शलिङ्गैरमभिद्रुवाना
मनैर्मुदा कुसुमैरभ्यवर्षन् ॥")
वार्दर, क्ली, दक्षिणावर्त्तशङ्ख । काकपिच्छा । भारती । इति मेदिनी । रे २११॥ कृमिजम् । जलम् । आम्रबीजम् । इति विश्व ।
वार्दल क्ली, (वार्भि सलिलैर्दलतीति । दल+ अच् । यद्वा मेघाच्छन्नदिनपातालयामम् ।) दुर्दिनम् । इति मेदिनी । ले,११९ । तस्यै पर्य्यायादि ॥ (बादल इति भाषा ।)
वार्दल पु, (वारजातोऽमेति । दल+"पुंसि संज्ञायां घ प्रायेण ।" ३ । ३ । ११८ । इति घ ।) मेलान्दा । सा तु मस्याधार । इति मेदिनी । ले, ११९ ।
वार्द्धक, क्ली (वृद्धानां समूह । "गोत्रोक्षोष्ट्र इति ।" ४ । २ । ३९ । इत्यत्र "वृद्धाच्चेति ।" कात्यायनोक्ते वुञ् ।) वृद्धसमूह । (वृद्धस्य भाव कर्म्म वेति । मनोज्ञादित्वात् वुञ् ।) वृद्धस्य भाव । वृद्धस्य कर्म्म । इति मेदिनी । के, ५६ । (यथा, मार्कण्डेयपुराणे । १०९ । २७ ।
"बाल्ये बालक्रिया पूर्व्वं तरुण कौमारके च या ।
यौवने चापि या यौन्या वार्द्धके यचयथा ॥"
त्रि, वृद्ध । यथा, नैषधे । १ । ७७ ।
"फलानि पुष्पाणि च पल्लवे करे
वयोऽतिपातोद्गतवातवेपिते ।
स्थिते समादाय महर्षिवार्द्धकाद्
वने तदातिथ्यमशिक्षि शाखिभि ॥"
"मधर्षीणां मुनिश्रेष्ठानां मध्ये यो वार्द्धको वृद्ध तस्मात् । किं स्याद्वाद्धको वृद्धे वार्द्धं तद्भाव कर्म्मणोरिति बल ।" इति तट्टीका ।)
वार्द्धक्य, क्ली, (वार्द्धकमेव । वार्द्धक+चतुर्वर्णादि त्वात् स्वार्थे ष्यञ् ।) वृद्धावस्था । तत्पर्याय । वार्द्धकम् २ वृद्धत्वम् ३ स्थाविरम् ४ । इति जटाधर । (यथा महाभारते । १।१०१।८ ।
"आत्मान सर्व्वभागानि कृतवर्द्धं समन्वित ।
वार्द्धक्येन च राजेन्द्र । तपसा चैव कर्षित ॥)
वार्द्धि पु (वारि जलानि धीयन्तेऽस्मिन्निति । वा+ धि ।) समुद्र । इति त्रिकाण्डशेष । (यथा देवीभागवते । ८ । २ । ११ ।
"लोकभक्तो भगवान् देवोऽनन्ताख्यो महाशय ।
अवलम्ब्य गतिस्त्वाहिश्च वार्द्धिपो महाद्युत ॥")
वार्द्धिभव, क्ली, (वार्द्धौ समुद्रे भवतीति । भू+ अच् ।) द्वीपान्तरवचम् । इति राजनिर्घण्ट ।
वार्द्धुषि, पु (वार्द्धुषिक । पृषोदरादित्वात् कलोप ।) वृद्ध्याजीव । इत्यमर ।२ । ९ । ५ ।
(यथा, मनौ । ३ । १५३ ।
"प्रेष्यो ग्रामस्य राज्ञश्च कुनखी श्यावदन्तक ।
प्रतिरोद्धा गुरोश्चैव त्यक्ताग्निर्वार्द्धुषिस्तथा ॥")

वार्द्धुषिक, पुं, (वृद्ध्यर्थं द्रव्यं वृद्धिः तां प्रयच्छतीति। "प्रयच्छति गर्ह्यम्।" ४।४।३०। इति ठक्। "वृद्धेर्वृधुषिभावो वक्तव्यः।" इति वार्त्तिकोक्तेः वृधुषिभावः।) वृद्धिजीवी। अधमर्ण। वाढि खोर इति सुदखोर इति च भाषा। तत्पर्य्यायः। कुसीदकः २ वृद्ध्याजीवः ३ वार्द्धुषिः ४। इत्यमरः। कुसीदः ५ कुसीदिकः ६। इति शब्दरत्नावली। तस्य लक्षणं यथा,—
"समर्घं धान्यमादाय महार्घं यः प्रयच्छति।
स वै वार्द्धुषिको नाम ब्रह्मवादिविगर्हितः॥"
इति स्मृतिः।
तस्य वृद्धिग्रहणनियमो यथा, मनुः।
"अशीतिभागं गृह्णीयात् मासाद्वार्द्धुषिकः
शते।
द्विकं शतं वा गृह्णीयात् सतां धर्म्ममनुस्मरन्।
द्विकं शतञ्च गृह्णानो न भवत्यर्थकिल्विषी।
शतकार्षापणे ह्यशीतिभागं विंशतिका यथा॥"
इति पुराणद्वयम्। एवंविधं नियममतिक्रम्य अनापदि स्वयमन्यद्वारा वा शास्त्रान्यथा यो व्यवहरति तस्यैव प्रायश्चित्तम्। आपदि तु स्वयं करणे नियमातिक्रमे च न दोषः। इति प्रायश्चित्तविवेकः। दत्ताह्निकतत्त्वम्॥

वार्द्धुष्य, क्ली, (वार्द्धुषेर्भावः। वार्द्धुषि+ष्यञ्।) धान्यवृद्ध्युपजीवनम्। इति सिद्धान्तकौमुदी। (यथा, मनौ। ११। ६२।
"कन्याया दूषणञ्चैव वार्द्धुष्यं व्रतलोपनम्।
तडागारामदाराणामपत्यस्य च विक्रयः॥")

वार्द्धेय क्ली, (वार्द्धि अनुदन्तेदमिति। वार्द्धि+ढञ्।) मौक्तिकचूर्णम्। इति राजनिर्घण्टः॥

वार्द्ध्र, क्ली,स्त्री (वर्द्ध्रं इदमिति। वर्द्ध्र+"चर्म्मणोऽञ्।"५।१।१५। इति अञ्।) चर्म्मरज्जुः। इत्यमरटीकायां रायमुकुटः॥

वार्द्धीणस, पुं, (वार्द्धीव नासिकाऽस्येति। "अच् नासिकायाः संज्ञायां नस चास्थूलात्।" ५।४।११८। इति अच् नसादेशश्च। "पूर्व्वपदात् संज्ञायामगः।" ८।४।३। इति णत्वम्।) पशुविशेषः। यथा,—
"त्रिपिबं त्विन्द्रियक्षीणं श्वेतं वृद्धमजापतिम्।
वार्द्धीणसं प्रोच्यते सो हव्ये कव्ये च सुपूजितः॥"
पक्षिविशेषः। यथा,—
"नीलग्रीवो रक्तशीर्षः कृष्णपादः सितच्छदः।
वार्द्धीणसः स्यात् पक्षीशो मम विष्णोरपि
प्रियः॥"
तैर्थिकविशेषवचनम्। यथा,—
"रोहितस्य तु मांसेन वार्द्धीणसस्य च।
अभिमानोति वर्षाणां शतानि त्रीणि भैरव।
माक्षिकाणां मधूनां वार्द्धीणसस्य च
मांसम्।
अभिमानोति परमां प्रीतिं भक्तिविशेषतः॥"
इति कालिकापुराणे ६६ अध्यायः १०।
तल्लक्षणं मिताक्षरायां यथा,—
"वार्द्धीणसामिषं लौहं कालशाकं तथा मधु।
दौहित्रामिषमन्यच्च यच्च तत् कुलोद्भवे॥
अनन्तां तां प्रयच्छन्ति तृप्तिं गौरीसुतस्तथा।
पिण्डानां नाम सन्देहो ह्यगाधाह्न च पुत्रक॥"
इति मार्कण्डेयपुराणे श्राद्धकल्पाध्यायः॥
"त्रिपिबं त्विन्द्रियक्षीणं श्वेतं वृद्धमजापतिम्।
वार्द्धीणसन्तु तं प्राहुर्याज्ञिकाः श्राद्धकर्म्मणि॥
रक्तपादो रक्तशिरा रक्तचञ्चुर्विहङ्गमः।
कृष्णवर्णश्च तथा पक्षी वार्द्धीणसो मतः॥"
लौहं रक्तच्छागः।
"लौहित्य शुक्लमथिवाप्युरपत्य दुहितुस्तथा।
कपिलायाः घृतञ्चैव दौहित्रमिति चोच्यते॥"
गौरीसुतः दधव(?)। इति तट्टीका॥

वार्द्धी(द्धि)नस पुं, वार्द्धीव नासिकाऽस्य। नासाया नसादेशः।) गण्डक। गण्डार इति भाषा। यथा,—
"वार्द्धीनसखड्गिकचरौ गवीनाश्च गण्डकः॥"
इति त्रिकाण्डशेषः॥

वार्भट पुं (वारि अर्थे भट इव।) कुम्भीरः। इति त्रिकाण्डशेषः॥

वार्म्मण,क्ली,(वर्म्मिणां समूहः। वर्म्मिन्+"भिक्षादिभ्योऽण्।"४।२।३८ इति अण्।)वर्म्मिसमूहः। इत्यमरटीकायां सारसुन्दरी॥

वार्म्मिण क्ली, (वर्म्मिणां समूहः। वर्म्मिन्+अञ्।) वर्म्मिसमूहः। इत्यमरटीकायां स्वामी॥

वार्म्मुच, [च] पुं, (वाः वारि मुञ्चतीति। मुच+क्विप्।) मेघः। इति शब्दरत्नावली॥ (यथा, भागवते। १।२४।८।
"स तान् । नवमर्च्यं च वार्म्मुचां पतिमीश्वरम्।
मयोक्तदिशया विद्वेयजन्म बहुभिर्नरा॥")

वार्म्मुद्भव, क्ली, (वारिणि उद्भव उत्पत्तिर्यस्य।) पद्मम्। इति धरणिः। जलजे, त्रि॥

वार्य्य, त्रि, (वारि+ष्यञ्।) वारिसम्बन्धि। वारि शब्दात् ष्यञ्प्रत्ययेन निष्पन्नम्। (वृङ् वरणे+"ऋहलोर्ण्यत्।"३।१।१२४। इति ण्यत्।) वरणीये, त्रि। यथा, ऋग्वेदे। १।२१।२।
"वरुणसम्मीन् देवतया तेन नो धेहि वार्य्यम्॥"
निवारणीयः। यथा, महाभारते ।१।१५८।६।
"कौमारे परिनिर्म्मिता पुत्रार्थं हस्तिनाकुला।
भोक्तुं प्रतिपक्षीभावं मातृर्वार्य्यां न वै पुनः॥")

वाराटि पुं, (वाराः टाभिर्वेव।) वराहः। इति पुराणम्। (वाराहकल्पात् प्राकृतं स्यात्।)

वार्ष्टक, पुं (वार्भिर्धर्मरे वेष्टयति इति। वट+ण्वुल् च।) वहित्रम्। इति त्रिकाण्डशेषः॥

वार्षिका स्त्री मौक्तिकमालिका। इति शब्दरत्नावली॥

वार्ष, क्ली (वर्षस्येदम्। वर्ष+अण्। वार्षं वर्षम्।) शुक्लप्रतिपदादिचान्द्रमासत्रयमासविशेषः। यथा —
"इदमर्चा विभवं देवदारोः दर्शिता मिमाम्।
इन्द्राद्युर्ध्वैः दारादौ अवरेष्वमहानुरम्।
कोटदे वार्षं देव दक्षिणे ह्यपुर च॥"
इति वह्निपुराणे वार्षदीनादत्ताध्यायः॥

वार्षभानवी, स्त्री, (वृषभानोरपत्यं स्त्री। वृषभानु+अण्।) वृषभानुकन्या। श्रीराधा। यथा,—
"यथा परात्परः कृष्णस्तथैव वार्षभानवी॥"
इति नारदपञ्चरात्रे १० अध्यायः॥

वार्षिक, क्ली, (वर्षासु जातमिति। वर्षा+"वर्षाभ्यष्ठक्।" ४।३।१८। इति ठक्।) त्रायमाणा। इति मेदिनी। के, १६६॥

वार्षिक, त्रि (वर्षे भवः। वर्ष+"कालात् ठञ्।" ४।३।११। इति ठञ्।) वर्षभवः। वात्सरिकः। इति मेदिनी। के १६६। (यथा, भागवते। ११।११।४०।
"यात्राबलिविधानञ्च सर्व्ववार्षिकपर्व्वसु॥")
यथाच।
"शरत्काले महापूजा क्रियते या च वार्षिकी।
तस्यां ममैतन्माहात्म्यं पठितव्यं समाहितैः॥"
इति मार्कण्डेयपुराणम्।
वर्षाकालोद्भवः। (यथा अध्यात्मरामायणे। ४।४।१।
"तत्र वार्षिकदिनानि राघवो
लीलया मणिगुहासु चावसत्।
पक्वमूलफलभोगतोषितो
लक्ष्मणेन सहितोऽवसत् सुखम्॥")

वार्षिकी, स्त्री, (वर्षासु भवा। वर्ष+"वर्षाभ्यष्ठक्।"४।३।१८। इति ठक्। ङीप्।) त्रायमाणा। इति राजनिर्घण्टः॥

वार्षिका, स्त्री, (वर्षास्विव दृश्यते। "प्राक्वादिवाहिकायणरूपेण उत्तरपदलोपश्च।"४।३।१०। इत्यत्र वार्त्तिकोक्त्या प्राक्पादिवाहितम् समासः। पृषोदरादित्वात् साधुः।) करवा। इति शब्दचन्द्रिका॥

वार्षुक त्रि, वर्षणशीलः। वृषधातोर्भुकप्रत्ययेन निष्पन्नो वर्षुकः। ततः स्वार्थे अण्प्रत्ययः॥

वा(बा)र्हत, क्ली, (बृहत्याः फलमिति। "फलादिभ्योऽञ्।"४।३।१६३। इति अञ्। बिल्वादित्वादणो न लुक्।) बृहतीफलम्। इत्यमरः॥

वा(बा)र्हद्रथ पुं (बृहद्रथस्यापत्यं पुमान्। बृहद्रथ+अण्।) जरासन्धः। इति शब्दरत्नावली॥ (यथा देवीभागवते। ४।१८।१६।
"अथ कुशान बार्हद्रथकं
बार्हद्रथो बलकोतरमोह्नहुता॥"
बृहद्रथस्येदमिति अण्।) बृहद्रथसम्बन्धिनि त्रि॥

वा(बा)र्हस्पत्य पुं (बृहस्पतेरपत्यं पुमान्। बृहस्पति+ण्य।) चार्व्वाकः। इति त्रिकाण्डशेषः॥

वा(बा)ल, पुं स्त्री अर्भकः। पञ्चवर्षीयः। शिशुः। इति मेदिनी। ले, ११३। अज्ञाः। अर्वाचीनदृष्टे वर्णविचारी। अर्भकः। (इत्युक्त दयादिपि,पृ। यथा, रघुवंशे।...
"मधुरैर्वाक्यैस्तु वशारजनेत्युपाते।
देहदेवं वर्द्धन्ते तं मत्पर्षे च्युतत्वात्॥")

वालव, पुं, ववादिकाण्यकरणान्तर्गतद्वितीयकरणम् । तत्र जातफलम् ।

"कामस्य कर्त्ता मननस्य भर्त्ता
तीर्थाश्रयीता कुलधर्म्मयुक्तः ।
उदारबुद्धिर्बलवान् मनुष्यः
स्याद्बालवाख्ये जनने हि यस्य ॥"

इति कोष्ठीप्रदीपः ॥

वाल्क, त्रि, (वल्कस्य वल्कलस्य विकारः । वल्क + "तस्य विकारः ।" ४।३।१३४ । इति अण् ।) वल्कलनिर्म्मितम् । क्षौमादि । इत्यमरः ॥ (यथा, मार्कण्डेयपुराणे । १५ । २८ ।
"तथैवाजाविकं हृत्वा वस्त्रं क्षौमञ्च जायते ।
कार्पासिके हृते क्रौञ्चो वाल्कहर्त्ता बकस्तथा ॥")

वाल्कल, त्रि, वल्कलनिर्म्मितम् । वल्कलस्येदमित्यर्थे अण्प्रत्ययेन निष्पन्नम् ॥

वाल्कली स्त्री मदिरा । इति त्रिकाण्डशेषः ॥

वाल्मिकि, पुं (वल्मीके भवः । वल्मीक + इञ् ।) वाल्मीकिमुनिः । इति द्विरूपकोषः ॥

वाल्मीक, पुं (वल्मीके भवः । वल्मीक + अण् ।) रामायणकर्त्ता मुनिः । तत्पर्य्यायः । प्राचेतसः २ वाल्मीकिः ३ कविज्येष्ठः ४ कुशीलवः ५ वल्मीकः ६ । इति त्रिकाण्डशेषः ॥ कविः ७ आदिकविः ८ । इति जटाधरः ॥

वाल्मीकि, पुं, (वल्मीके भवः । वल्मीक + इञ् ।) भृगुवंशोद्भवमुनिविशेषः । इति त्रिकाण्डशेषः ॥ यथा —
"रावणानुजकरो राजा रघूणां वंशवर्द्धनः ।
वाल्मीकिरस्य चरितं चक्रे भार्गवसत्तमः ॥"
इति मात्स्ये १२ अध्यायः ॥
(यथा च काव्यप्रभूमिकायाम् ।
'जाते जगति वाल्मीकौ कविरित्यभिधाभवत् ।
कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि ॥")

वावदूक, त्रि (पुनः पुनरतिशयेन वा वक्तीति । वच् + यङ् लुक् + "उलूकादयश्च ।" उणा० ४ । ४१ । इति ऊक । 'वर्त्तते तु 'वचन्यद इत्यासिति । ६ । २ । १६६ । इति बहुलवचनादन्यतोऽपि भवत्प्रत्यय इति कृत्वा वावदूक इति साधितम् ।" इत्युणादिवृत्तौ उज्ज्वलदत्तः ।) अतिशयवक्ता । तत्पर्य्यायः । वाचोयुक्तिपटुः २ वाग्मी ३ वक्ता ४ । इत्यमरः ॥ वचस्वी ५ सुवचा ६ प्रवाक ७ । इति जटाधरः ॥ (यथा, महाभारते । १२ । १८ । ३४ ।
"अनृतस्यावमन्तारो वक्तारो जनसंसदि ।
चरन्ति वसुधां कृत्स्नां वावदूका बहुश्रुताः ॥")

वावय, पुं तुलसीविशेषः । इति शब्दचन्द्रिका ॥ श्वेतबाबुइ इति भाषा ॥

वावुट पुं वहित्रम् । इति शब्दरत्नावली ॥

वावृत य ङ उ वरणे । वर्त्ते । इति कविकल्पद्रुमः ॥ (दिवा० आत्म० सक० सेट् । क्त्वावेट् ।) य ङ वावृत्यते । उ, वावर्त्तित्वा वावृत्त्वा । सं० लि० वेदनम् । इति दुर्गादासः ॥ ("ततो वावृत्यमानासीत् भर्त्तुः ॥")

वावृत्त, त्रि, वृतवरणः । इत्यमरः । ३।१।१०२ ॥

वाश य ङ ऋ शब्दे । इति कविकल्पद्रुमः ॥ (दिवा० आत्म० अक० आह्वाने सक० सेट् ।) शब्द इह तिरश्चामेव । तिरश्चां वाशितं रुतमित्यमरात् । य ङ, वाश्यते पक्षी । ऋ, अववाशत । उच्चाशमानं पितरं च राममिति भट्टिः । अनेकार्थत्वादाह्वानार्थे । वाशित सुरभीस्तते । आश्रमार्थे सुमारावे वाशितं यज्ञवेदिके । इति विश्वप्रकाशादर्थान्तरेऽप्ययमस्तीति । इति दुर्गादासः ॥

वाशा, स्त्री, (वाश्यते इति । वाशि शब्दे + "गुरोश्च हलः ।" ३ । ३ । १०३ । इति अः । स्त्रियां टाप् ।) वासकः । इति शब्दरत्नावली ॥

वाशि पुं, (वाश्यते इति । वश + णिच् + "वसिवपियजिराजिव्रजिसदिहनिवाशिवादीति ।" उणा० ४ । १२४ । इति इञ् ।) अग्निः । इत्युणादिकोषः ॥

वाशिका, स्त्री (वाशा + स्वार्थे कन् । टाप् । अत इत्वम् ।) वासकः । इति शब्दरत्नावली ॥

वाशित, क्ली, (वाश शब्दे + भावे क्तः ।) पशुपक्ष्यादीनां शब्दः । इत्यमरः ॥ (यथा, महाभारते । ८ । ३१ । ५३ ।
"आर्त्तप्रलापास्ता तात । वाशितस्य प्रभा-
विधाः ।
नैतत् समस्ति मे राजन् । वाशितं प्रकृते-
रिव ॥")

वाशित त्रि, (धातूनामनेकार्थत्वात् वाश सुरभीकरणे + क्तः ।) सुरभीकृतः । इत्यमरटीकायां स्वामी ॥

वाशिता, स्त्री, (वाश + क्तः । टाप् ।) स्त्रीमात्रम् । करिणी । इत्यमरः ॥

वाशिष्ठ, त्रि, वशिष्ठसम्बन्धी । वशिष्ठस्येदमित्यर्थे अण्प्रत्ययेन निष्पन्नः ॥ (यथा, महाभारते । १ । ११५ । २ ।
"सोमश्रवास्तान् सर्व्वानायान्तौ तस्य तात-
चान् ।
भृगुशिरसश्चैव वाशिष्ठानपि काश्यपान् ॥")
क्ली, उपपुराणविशेषः । यथा, देवीभागवते । १ । ३ । १६ ।
"माहेश्वरं भागवतं वाशिष्ठञ्च सविस्तरम् ।
एतान्युपपुराणानि कथितानि महात्मभिः ॥"
तीर्थभेदः । यथा, महाभारते । ३ । ८४ । ५५ ।
"ऋषिकुल्यां समासाद्य वाशिष्ठञ्चैव भारत ।
वाशिष्ठं समतिक्रम्य सर्व्वे वर्णा द्विजातयः ॥")

वाशिष्ठी, स्त्री, (वशिष्ठस्येयमिति । वशिष्ठ + अण् । ङीप् ।) गोमतीनदी । इति हेमचन्द्रः ॥

वाशुरा स्त्री, (वाश्यते अस्यामिति । वाश शब्दे + "मन्दिवाशिमथिचतिचङ्क्यङ्किभ्य उरच् ।" उणा० १ । ३८ । इति उरच् । टाप् ।) रात्रिः । इत्युणादिकोषः ॥

वाश्र क्ली, (वाश्यतेऽस्मिन्निति । वाश + "स्फायितञ्चीति ।" उणा० २ । १३ । इति रक् ।) मन्दिरम् । चतुष्पथः । इति मेदिनी । रे, ८६ ॥

वाश्र, पुं (वाश्यतेऽस्मिन्निति । वाश + "स्फायि तञ्चीति ।' उणा० २ । १३ । इति रक् ।) दिवसः । इति मेदिनी । रे, ८६ ॥

वाष्प, पुं (वाधते इति । बाधृ लोडने + "खष्पशिल्पशष्पवाष्परूपपर्पतल्पाः ।" उणा० ३ । २८ । इति पप्रत्यये धस्य षत्वं निपात्यते ।) उष्मा । (यथा, रघौ । ७ । ६८ ।
"तस्याः प्रतिद्वन्द्विभवाद्विषादात्
सद्यो विमुक्तं मुखमावभासे ।
निश्वासवाष्पापगमात् प्रपन्नः
प्रसादमात्मीयमिवात्मदर्शः ॥")
लोहः । इति मेदिनी । पे ११ ॥ अश्रु । इत्यमरः ॥ (यथा, आर्य्यासप्तशत्याम् । ४८३ ।
"प्राङ्गण एव कदा मां विनयतो मन्युकलि-
कुचकलशाः ।
अतिविषमलुठन्तो वा चालयति वाष्पैस्तव
एकम् ॥")

वाष्पक, पुं, (वाष्प + स्वार्थे कन् ।) मारिषः । मरिया शाक इति भाषा । यथा,—
"मारिषो वाष्पको मार्षः श्वेतो रक्तश्च स स्मृतः ।
मारिषो मधुरः शीतो विष्टम्भी पित्तदृष्टुकः ।
वातश्लेष्मकरो रक्तपित्तदुर्विषमाग्निजित् ।
रक्तमार्षो गुरुः किञ्चित् सक्षारो मधुरः सरः ।
श्लेष्मलः कटुकः पाके स्वल्पदोष उदीरितः ॥"
इति भावप्रकाशः ॥

वाष्पका, स्त्री, (वाष्प + स्वार्थे कन् । टाप् । अभिधानादित्वम् ।) हिङ्गुपत्री । इति शब्दरत्नावली ॥

वाष्पिका, स्त्री, (वाष्प + स्वार्थे कन् टाप् अत इत्वम् ।) हिङ्गुपत्री । तत्पर्य्यायः । कारवी २ पृथ्वी ३ कवरी ४ पृथुः ५ । इत्यमरः ॥ बाष्पकपत्री ६ वाष्पीका ७ कबरी । इति तट्टीका ॥

वाष्पी, स्त्री (वाष्प + गौरादित्वात् ङीष् ।) वाष्पिका । इति शब्दरत्नावली ॥

वाष्पीका स्त्री, हिङ्गुपत्री । इति राजनिर्घण्टः ॥ राधुनी इति ख्याता । अस्या गुणाः । कटुत्वम् । तीक्ष्णत्वम् । उष्णत्वम् । कृमिघ्नत्वञ्च । इति राजवल्लभः ॥

वास कृ ङ उपसेवायाम् । इति कविकल्पद्रुमः । (चुरा० पर० सक० सेट् ।) उपसेवा तु सुगन्धाद्याधानम् । अवबासयति वस्त्रं । इति दुर्गादासः ॥

वास, पुं (वसन्त्यत्रेति । वस निवासे + "हलश्च ।" ३ । ३ । १२१ । इति घञ् ।) गृहम् । इत्यमरः ॥ (यथा हरिवंशे । १०७ । ९३ ।
"उत्तिष्ठोत्तिष्ठ भद्रं ते विषादं मा कृथा मुने ।
नैवं विधेषु वासेषु भयमस्ति कदाचन ॥"
वासयति इति । वास + अच् ।) वस्त्रम् । इति तट्टीका । (वस + भावे घञ् ।) अवस्थानम् ।

इति हेमचन्द्रः । (यथा, महाभारते । १ । १२८ । ५ ।
“विहारावसथेष्वेव वीरा वासमरोचयन् ।”)
वासकः । इति शब्दरत्नावली । सुगन्धिः । इति वासधात्वर्थदर्शनात् ॥ * ॥ स्नानविधिषु वासस्य कर्त्तव्याकर्त्तव्यत्वं यथा —
दूर्वासा उवाच ।
“वेदाङ्ग तात वासांसि काम्याद्याम्नु गतागतिम् ।
क्रोधे चैवाभिवादे वा येद वापि बलाबलम् ॥
शिष्यस्याशिष्यदृत्तेर्वा न लभस्व शुभूषता ।
तस्मात् सद्भोर्न्हस्तेषु वासो मम न रोचते ॥
पुंसो येनाभिमन्यन्ति वृत्तेनाभिजनेन च ।
न तेषु च वसेत् प्राज्ञ श्रेयोऽर्थी पापबुद्धिषु ॥
ये त्वेवमभिजानन्ति वृत्तेनाभिजनेन च ।
तेषु साधुषु वस्तव्यं स वासः श्रेय उच्यते ॥”
इति मात्स्ये ९८ अध्यायः ॥ * ॥
अपि च ।
“धार्म्मिकैरावृते ग्रामे न व्याधिबहुले भृशम् ।
न शूद्रराज्ये निवसेत् न पाषण्डजनैर्वृते ॥
हिमवद्विन्ध्ययोर्मध्ये पूर्व्वपश्चिमयोः शुभम् ।
मुक्त्वा समुद्रयोर्देशं नान्यत्र निवसेत् द्विज ॥
कृष्णो वा यत्र चरति मृगो नित्यं स्वभावतः ।
पुण्याश्च विश्रुता नद्यस्तत्र वा निवसेत् द्विजः ॥
अर्द्धक्रोशान्नदीकूलं वर्ज्जयित्वा द्विजोत्तमः ।
नान्यत्र निवसेत् पुण्ये नान्त्यजग्रामसन्निधौ ॥
न संवसेच्च पतितैर्न चण्डालैर्न पुक्कशैः ।
न मूर्खैर्नावलिप्तैश्च नान्त्यैर्नान्त्यावसायिभिः ॥”
इति कौर्म्मे उपविभागे १५ अध्यायः ।
वास', [स्] क्ली (वस्यतेऽनेनेति । वस आच्छादने + “वसेर्णित् ।” उणा० ४ । २१७ । इत्यसुन् । स च णित् ।) वस्त्रम् । इत्यमरः ॥ (यथा मनौ । ४ । ६६ ।
‘ उपानहौ च वासश्च धृतमन्यैर्न धारयेत् ।”)
पत्रकम् । इति राजनिर्घण्टः ॥
वासक पुं, (वासयतीति । वासि + ण्वुल् ।) वृक्षविशेषः । बाकस इति भाषा । तत्पर्य्यायः । वैद्यमाता २ सिंही ३ वासिका ४ वृषः ५ आटरूषः ६ सिंहास्यः ७ वाजिदन्तकः ८ । इत्यमरः ॥ वासा ९ वासिका १० वृषः ११ आटरूषः १२ वासकः १३ । इति तट्टीका ॥ वासा १४ वासः १५ वासी १६ वैद्यसिंही १७ मातृसिंही १८ । इति शब्दरत्नावली ॥ वाशका १९ सिंहपर्णी २० । इति जटाधरः ॥ सिंहिका २१ भिषङ्माता २२ वसादनी २३ सिंहमुखी २४ कण्ठीरवी २५ सितकर्णी २६ वाजिदन्ती २७ नासा २८ पञ्चमुखी २९ सिंहपर्णी ३० मृगेन्द्राणी ३१ । अस्य गुणाः । तिक्तत्वम् । कटुत्वम् । शीतत्वम् । कासरक्त-पित्तकामलाकफवैकल्यज्वरश्वासक्षयापहत्वञ्च । तद्गुणाः । कटुपाकित्वम् । तिक्तत्वम् । वात-प्रकोपकत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
“ वासको वाजिका वासा भिषङ्माता च
सिंहिका ।
सिंहास्यो वाजिदन्ता स्यादाटरूषोऽटरूषकः ।
आटरूषो वृषस्ताम्रा सिंहपर्णश्च स स्मृतः ।
वासको वातकृत् स्वर्य्यः कफपित्तास्रनाशनः ।
तिक्तस्तुवरको हृद्यो लघुः शीतस्तृडर्त्तिहृत् ।
श्वासकासज्वरच्छर्द्दिमेहकुष्ठक्षयापहः ॥”
इति भावप्रकाशः ॥ * ॥
रागाङ्गविशेषः । यथा,—
“मनोहरोऽथ कन्दर्पश्चाथ नन्दन एव च ।
चत्वारो वासकाः प्रोक्ता मल्लारेश्च पुरा ॥”
केचित्त्वन्यमते नामान्यपि पृथक् ।
“विनोदो वरदश्चैव मन्दः कुमुद एव च ।
चत्वारो वासकाः प्रोक्ता गीतवाद्यविशारदैः ॥”
इति सङ्गीतदामोदरः ॥
(वासरः । इति वासकसज्जाशब्दार्थे व्याख्या रिका ॥)
वासकर्णी स्त्री यज्ञशाला । इति शब्दरत्नावली ॥
वासकसज्जा स्त्री, (वासके प्रियसमागमवासरे सज्जतीति । सज्ज + अच् । टाप् । यद्वा, वासकं वासवेश्म सज्जयतीति । सज्जि + अच् । टाप् ।) स्त्रीयान्नायिकाभेदः । (यथा, गीतगोविन्दे । ६ । ८ ।
“भवति विलम्बिनि विगलितलज्जा
विलपति रोदिति वासकसज्जा ॥”)
तस्या लक्षणं यथा । अद्य मे प्रियवासर इति निश्चित्य या सुरतसामग्रीं सज्जीकरोति सा वासकसज्जा । वासको वासरः । अस्याश्चेष्टा मनोरथसखीपरिहासदूतीप्रश्नसामग्रीविधानमार्गविलोकनादयः । मुग्धावासकसज्जा यथा
“द्वारं गुम्फति तारकानिकरितं मन्दाति
काञ्चीगता
दीर्घं व्यस्यति किन्तु तत्र वकुलं चेत्र न दत्ते
पुनः ।
चालीनामिति वासकस्य रजनौ कामाम्बुधा
क्रिया
वाचिक्षेरसुखी मनोभवसुखी दूरात् समुद्गी
क्षते ॥”
मध्या वासकसज्जा यथा —
“शिल्पं दर्शयितुं करोति कुतुकात् कक्कार
हारस्तनं
विन्यस्य स्तनकेलिवेन किमपि द्वारं मनुद्योयते ।
शय्याभरणं वर्न सञ्चरी भूमाविमोचानिना
नित्यं पटहतः प्रतीक्ष्य चरति कोरामयोऽभून्
सार ॥”
प्रौढा वासकसज्जा यथा —
“तल्पं सुधि भूषणं विकुरयोरको पुष्पिता
लता स्तबकलिनी मधुकरी गच्छाधन्ने ।
अकारि परिजोऽपरा भवनेन देहलिनां
अनुरङ्गकराक्रमोत्तुङ्गमभाक्षि अद्य दिनम् ॥”
परकीया वासकसज्जा यथा —
“आवयोरन्धकारेऽपि भूयो विरहभञ्जन ।
सरेतं च विलम्बेन न कान्दाकारणं च
कम् ॥”
परकीया वासकसज्जा यथा —
“मञ्जु स्वापयितु हलेन च तिरोधने परोपा
कुरान्
यत्ने चीनकपातपोतविवरे शाङ्कनिक
चेतिनम् ।
शय्यावृन्दान्तविर्द्धितामङ्गनिक लोलत्कपोल
स्तुति
श्वासि श्वासि कराम्बुजं प्रियधिया सख्यानिक
व्यस्यति ॥”
इति रसमञ्जरी ॥
(तथाच साहित्यदर्पणे । ३ । ८५ ।
“कुरुते मण्डनं यस्याः सज्जिते वासवेश्मनि ।
सा तु वासकसज्जा स्याद्विदितप्रियसङ्गमा ॥”)
वासका स्त्री, (वासक + टाप् ।) वासकवृक्षः । इति जटाधरः ॥
वासगृहं क्ली, (वासाय गृहम् ।) सभागारम् । इत्यमरः । “ द्वे गृहमध्यभागे शयनगृहे च मध्यागारे इत्येके निर्भागमात्रं सभा इत्यागार गर्भागारम् । वासाय गृहं वासगृहम् । वास वेश्मादि चाप ।” इति भरतः ॥ (यथा बृहत् संहितायाम् । ५३ । ७ ।
“वासगृहाणि च विन्द्यात्
विप्रादीनामुदग्दिशाद्यानि ।
विशताच यथा भवनम्
भवन्ति तान्येव दलितानि ॥”)
वासतः, पुं (वासयति इति । वास शब्दे + बाहुलकात् अतच् ।) गर्द्दभः । इति शब्दरत्नावली ॥
वासतेयी, स्त्री (वसतौ साध्वीति । वसति + “पथ्यतिथिवसतिस्वपतेर्ढञ् ।” ४ । ४ । १०४ । इति ढञ् ।) रात्रिः । इति त्रिकाण्डशेषः ॥ (वसतियोग्यमात्रे, त्रि । यथा, भट्टौ । ४ । ८ ।
“वसन् वासतेयीषु निवसन् पर्णसंस्तरे ।
प्रमोदश्च नयान् विद्यारातिर्या विच्छदे ॥”)
वासन, क्ली (वासयति इति । वासि + ल्युट् ।) धूपनम् । वारिधानी । वस्त्रम् । इति मेदिनी ॥ ने, १२८ ॥ वासः । इति शब्दरत्नावली ॥ ज्ञानम् । इति धरणिः ॥ निक्षेपाधारः । यथा, याज्ञवल्क्ये ।
“व्याधिचौराग्निदैवादिवहस्तानपनैर्विना ।
तथोपनिधिरावर्त्तो भोगविनाशे धर्मतः ॥”
उपनिधिरस्तु ।
“वासनस्थमनाख्याय हस्तेऽन्यस्य यदर्प्यते ॥”
इति नारदोक्तः ॥
वासनं निक्षेपाधारभूतं सम्पुटादिकं मञ्जूषापद्मादिकञ्च । इति मिताक्षरायाम् ॥ वासनसम्बन्धि त्रि ॥ (वासेन क्रीतमिति । वासन + “तेन क्रीतम् ।” ५ । १ । ३७ । इति अण् । वासेन क्रीते च, त्रि ॥)
वासना, स्त्री (वासयति कर्म्मणा योजयति जीवं मनोऽनेन । वस + णिच् + युच् । टाप् ।) प्रत्याशा । (यथा भागवते । ३ । २ । २ ।
“शाश्वत्यं हि कल्याणं एवं इत्या
कदाचिदवश्य चेत्स्यते ॥

परिभ्रमंस्तत्र च विस्मृतेऽर्थान्
मायामये वासनया शयान ।")

वासनम् । इति मेदिनी । ने, ११० ॥ ज्ञातिहेतुः । तत्पर्य्याय । संस्कारः २ भावना ३ । इति जटाधरः ॥ इदानीमनुभूयमानमिथ्यासंस्कारः । इति न्यायशास्त्रम् ॥ दुर्गा । यथा,—

"वसत्यदृष्टा सर्व्वेषु भूतेष्वन्तर्हिताथ च ।
वासुर्व्वेव निवासेति वासना तेन सा स्मृता ॥"

इति देवीपुराणे ४५ अध्यायः ॥

(अर्कस्य भार्य्या । यथा, भागवते । ६।६।१३ ।

"अर्कस्य वासना भार्य्या पुत्त्रास्तर्षादय

स्मृता ॥")

वासन्त, पुं (वसन्ते भवः । वसन्त+"सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण् ।" ४।३।१६ । इति अण् ।) उष्ट्रः । इति मेदिनी । ते, १५२ । कोकिलः । इति राजनिर्घण्टः ॥ मलयवायुः । शुक्रः । इति त्रिकाण्डशेषः । कृष्णमुद्गः । इति हेमचन्द्रः ॥ मन्मथद्रुमः । इति शब्दमाला ॥ अवहितः, त्रि । इति मेदिनी । ते १५२ । (वसन्तेऽपि च त्रि । इति सिद्धान्तकौमुदी । ४ । ३ । ४६ ।)

वासन्तक, त्रि वसन्तसम्बन्धि । वसन्तस्येदमित्यर्थे कालप्रत्ययेन निष्पन्नम् । (वसन्ते उप्तम् । वसन्त+"ग्रीष्मवसन्तादन्यतरस्याम् ।" ४ । ३ । ४६ । इति वुञ् । (वसन्तेऽपि, त्रि । इति सिद्धान्तकौमुदी ।)

वासन्तिक त्रि, (वसन्तमधीते वेद वेत्ति । वसन्त+"वसन्तादिभ्यष्ठक् ।" ४।२।६३ । इति ठक् ।) विदूषकः यथा । वासन्तिकः केलिकिलो वैहासिको विदूषकः । इति हेमचन्द्रः ॥ (वसन्तस्येदमिदि । "वसन्तात् च ।" ४ । ३ । २ । इति ठञ् । वसन्तसम्बन्धिनि, त्रि । यथा, भागवते । ५ । ८ । ५ ।

"नवदवशिशिरस्थित्यन्ते वासिनी वैश्रवासन्तिकान् मासानधीयानमध्यसमवेतरूपं मादयन्

माध ॥")

वासन्ती, स्त्री, (वसन्तस्येयमिति । वसन्त+अण् । ङीप् ।) माधवी । यूथी । इति मेदिनी । ते, १५२ ॥ (यथा रामायणे । ४ । १ । ७७ ।

माधवीमल्लिकाषण्डकरवीराश्च पुष्पिताः ।
केतक्यः सिन्धुवाराश्च वासन्त्यश्च सुपुष्पिताः ॥)

पाटला । इति विश्वः ॥ कामोत्सवः । तत्पर्य्यायः । चैत्रावली २ मधूत्सवः ३ सुवसन्तः ४ कामसखः ५ कट्भी ६ । इति त्रिकाण्डशेषः ॥ अतिमुक्तः । पुष्पलताविशेषः । तत्पर्य्यायः । प्रहसन्ती २ वसन्तजा ३ माधवी ४ महाजातिः ५ शीतसहा ६ मधुबहुला ७ वसन्तदूती ८ । अस्या गुणाः । शिशिरत्वम् । कटुत्वम् । सुरभित्वम् । मनोहारित्वम् । श्रमिकामोदित्वम् । सन्मनीत्व…न्यायितत्वञ्च । इति राजनिर्घण्टः ॥ नवमल्लिका । बेहारि इति हिन्दी भाषा । यथा —

"वासन्ती कथिता नवमल्लिका वसना नवमालिका ।
वासन्ती शीतला लघ्वी तिक्ता दोषत्रयापहा

स्मृता ॥"

इति भावप्रकाशः ॥ * ॥

अथ वासन्तीदुर्गापूजाप्रमाणम् । तत्र भविष्यपुराणम् ।

"मीनराशिस्थिते सूर्य्ये शुक्लपक्षे नराधिप ।
सप्तमीं दशमीं यावत् पूजयेदम्बिकां सदा ॥"

भविष्योत्तरे ।

"चैत्रे मासि सिते पक्षे सप्तम्यादिदिनत्रये ।
पूजयेद्विधिवद्दुर्गां दशम्याञ्च विसर्ज्जयेत् ॥"

कालकौमुदी आचालि ।

"चैत्रे मासि सिते पक्षे सप्तम्यादिदिनत्रये ।
पूजयेद्विविधैर्व्वैर्गन्धपुष्पैस्तथा ॥
नानाविधैश्च बलिभिर्नैवेद्यैर्दीपवर्ज्जितैः ।
विविधाभरणैः पाद्यैः मद्यमांसादिभिस्तथा ॥
एवं यः कुरुते पूजां वर्षे वर्षे विधानतः ।
ईप्सितान् लभते कामान् पुत्त्रपौत्रादिकान्नृप ॥"

अत्र भविष्योत्तरे निबन्धदर्शितात् अस्मिन्पुराणवचने मीनराशिस्थित इति मीनस्थरव्यारम्भचान्द्रमासीयविधिपरम् । मीनरव्यारम्भे कदाचित् सप्तम्यादितिथित्रयाणामभावात् तद्वर्षे तत्कृत्यलोपः स्यात् । न चेदापत्तिः भविष्यपुराणे सदाम्नायाद्दानात् अवार्षिकपक्षे वर्षे वर्षे इत्युपादानाच्च नित्यत्वम् । एतद्विस्तृत कालविवेके । यद्वा अत्राश्विनीवपरार्द्धे पुत्त्रादिरूपफलश्रवणात् काम्यमेव । ततश्च काम्यतया पूजने कृते प्रत्यवाय नित्यत्वसिद्धिः ।

"चित्राद्यायां चैत्रस्य पुष्यैस्तत्कालसम्भवैः ।
अशोकैरपि च कुर्य्यात् मन्त्रेणानेन पूजनम् ।
न तस्य जायते शोको रोगो वाप्यथ दुर्गतिः ॥"

इति कालिकापुराणवचनात् केवलाष्टमीकल्प उक्तः । चैत्रमासमधिकृत्य ।

"अष्टम्यां पूजयेद्देवीं महिषासुरमर्द्दिनीम् ।
कुङ्कुमागुरुकस्तूरीधूपान्नजलतर्पणैः ।
दमनैर्मरुपत्रैश्च विजयात्मकम् लभेत् ॥"

इत्यनेन केवलनवमीकल्प उक्तः । अनयोस्तु शारदीयपूजाप्रकरणोक्ता व्याख्या । विल्ववृक्ष बोधनप्रक्रिया नास्ति बोधिताया बोधनायोगात् । इति पाक विवृतम् । वीरमादिकञ्च पूर्व्ववदृश्यमिति दिक् । इति दुर्गोत्सवविवेकः ॥ * ॥

अपि च ।

वीणाराधन उवाच ।

"पुरा स्तुता या गोलोके कृष्णेन परमात्मना ।
संपूज्य मधुमासे च प्रीतेन रासमण्डले ॥
मधुकैटभयोर्युद्धे द्वितीये विष्णुना पुरा ।
तत्रैव काले सा दुर्गा ब्रह्मणा प्राणसङ्कटे ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६६ अध्यायः ॥

(चतुर्दशाक्षरवृत्तिविशेषः । इति छन्दोमञ्जरी । अस्या लक्षणादिकं छन्दःशब्दे द्रष्टव्यम् ।)

वासन्तीपूजा स्त्री, (वासन्ती तदाख्या पूजा ।) चैत्रमासीयदुर्गापूजा । यथा —

"चैत्रे मासि सिते पक्षे नवम्यान्दिनत्रये ।
प्रातः प्रातमहादेवीं दुर्गां भक्त्या प्रपूजयेत् ॥"

इति ॥

तथाष्टम्यां अशोकपूजा यथा,—

"तथाष्टम्यामशोकाख्यां पूर्व्वाह्णे साधकोत्तमः ।
दक्षपादे रक्तपुष्पैरष्टभिः पूजयेच्छिवाम् ॥"

इति च मायातन्त्रे ७ पटलः ॥

अपि च ।

"चित्रितां चैत्रमासस्य या तिथिः स्यात् सिता

हमी ।

तस्यां च पूजयेदम्बां यथावदति मां ध्रुवम् ॥"

इति शाम्भवीतन्त्रे १८ पटलः ॥

वासयोग, पुं, (वासाय सुगन्धार्थे युज्यते इति । युज+घञ् ।) चूर्णम् । इत्यमरः ॥ "द्वे आबिर इति ख्याते । पटवासो गोड़े इत्यर्थे । चूर्णमेतत् सुगन्धि गन्ध द्रव्ये च । यावैहारिकौ करणे पुष्पन्ते उपयुज्यते इति बलि वास योग ।" इति तट्टीकायां भरतः । तत्पर्य्यायः । गन्धचूर्णम् २ पटवासम् ३ चूर्णकम् ४ । इति शब्दरत्नावली ॥

वासर, पुं क्ली, (वासयतीति । वस्+णिच्+"अर्त्तिकमिभ्रमिचमिदेविवासिभ्यश्चित् ।" उणा ३ । १३२ । इति अरः ।) दिवसः । इत्यमरः ॥ (यथा कथासरित्सागरे । ३ । ४१ ।

"प्रवृत्ते वासवोत्सवे प्रयाता यत्र वासराः ।") नागभेदः पुं । इति मेदिनी । रे, २११ ।

वासव, पुं, (वसुरेव । प्रज्ञाद्यण् ।) इन्द्रः । इत्यमरः । (यथा महाभारते । १ । ६१ । २५ ।

"वासवात्तन्नियोगात् च पार्थ सञ्जातः पथः ।
अधारम्भेयात्मा द्वितीय इव वासवः ॥")

वासवी, स्त्री, (वसोरपत्यं स्त्री । वसु+अण् । ङीप् ।) व्यासमाता । यथा —

"व्यासमाता सत्यवती वासवी गन्धकालिका ।
योजनगन्धा दाशेयी शालि कायनगोदश ॥"

इति हेमचन्द्रः ॥

(यथा, महाभारते । १ । ६१ । ७ ।

"दिष्टा तां वासवीं कन्यां रमीकं सुविस्तरम् ।
शृणु मम कन्याया । कुरुवंशस्य भारत ॥")

वासकसज्जा, स्त्री (वासं गृहं सज्जयतीति । सज्ज+क्विप्+अच् । टाप् ।) नायिकाभेदः । यथा

"सज्जितोल्लसिता शय्या तया प्रोषितभर्त्तृका ।
कल्पान्तारिता वासकसज्जा स्वाधीनभर्त्तृका ॥
अभिसारिकाष्टौ ता नायिका प्रकीर्त्तिताः ॥"

इति जटाधरः ॥

अस्या विवरणं वासकसज्जाशब्दे द्रष्टव्यम् ॥

वासा, स्त्री, (वासयतीति । वस+णिच्+अच् । टाप् ।) वासकः । इति शब्दरत्नावली ॥ (यथा, वैद्यके ।

"वासायां विद्यमानायामाशायां जीवितस्य च ।
रक्तपित्ती क्षयी कासी किमर्थमवसीदति ॥")

वासागार क्लीं (वासाय वासस्य वा आगारम् ।) वासगृहम् । शय्यागृहम् । शोभनम् ०४।८-१

३ पलाट ४ निष्कुट ५। इति त्रिकाण्डशेषः ॥

वासि, पुं, (वसन्निवासे + "वसिवपियजिराजि" उणा ४।१२४। इति इञ्।) कुठारभेदः। वाइस इति भाषा। इत्युणादिकोषः ॥

वासिका, स्त्री, (वासैव। स्वार्थे कन्। टाप्। अत इत्वञ्च।) वासकः। इति शब्दरत्नावली ॥

वासितं, क्ली (वास्यते स्मेति। वास + क्त।) रुतम्। इति मेदिनी। ते, १५२॥ ज्ञानमात्रम्। इति हेमचन्द्रः ॥ खगरवः। इति विश्वः ॥

वासित, त्रि, (वास्यते स्मेति। वासि सुरभीकरणे + क्त।) सुरभीकृतः। तत्पर्य्यायः। भावितः २। इत्यमरः ॥ द्वे सुगन्धिपुष्पादिवासितद्रव्ये। भाव्यते प्राप्यते भावितः भू + णिच् प्राप्तौ कर्म्मणि क्तः। वासं सौरभं करोति इति ण्यन्तात्। कर्म्मणि क्ते वासितम्। इति तट्टीकायां भरतः ॥ वस्त्रादौ वासितः। इति शब्दरत्नावली ॥ ख्यातः। वस्त्रवेष्टितः। इति धरणिः ॥

वासिता, स्त्री, (वासयतीति वस निवासे + णिच् + क्त। टाप्।) स्त्रीमात्रम्। करिणी। इत्यमरः ॥

वासिनी, स्त्री, (वासोऽस्या अस्तीति। वास + इनि।) शुक्लझिण्टी। इति शब्दचन्द्रिका ॥

वासिष्ठं क्ली, रुधिरम्। इति हेमचन्द्रः ॥

वासिष्ठ त्रि, वसिष्ठस्यापत्यादि। वसिष्ठेन कृतमित्यर्थे (अण्) प्रत्ययेन निष्पन्नम्। वसिष्ठसम्बन्धि च ॥

वासी स्त्री (वासयतीति वासि अच्। गौरादित्वात् ङीष्।) तक्षणी। वाइस इति ख्याताऽस्त्रम्। इति त्रिकाण्डशेषः ॥

वासुः पुं, (सर्व्वाण्यत्र वसन्ति सर्व्वत्रासौ वसतीति वा। वस + बाहुलकात् उण्। इति १।१ संक्षिप्तसारोणादिवृत्तौ उज्ज्वलदत्तः।) नारायणः। इति त्रिकाण्डशेषः ॥ श्रीनिवासोऽप्यथो वासुः। इति जटाधरः। विश्वरूपः। पुनर्वसुः। इत्युणादिकोषः ॥

वासुकिः पुं वसुकस्यापत्यमिति। वसुक + इञ्।) अहिपतिः। तत्पर्य्यायः। सर्पराजः २। इत्यमरः ॥ वासुकेयः ३। इति शब्दरत्नावली। तस्योत्पत्तिर्यथा —

"सुरसा चाजिरं यद्योगी राजा तु तक्षकः।
वासुकिश्चैव नामानो नवा क्रोधतमोऽधिकः॥"
इति वह्निपुराणे काश्यपीयवंशः ॥

(जरत्कारुमुनिपत्नी मनसादेवी तु अस्यैव भगिनी।
"आस्तीकस्य मुनेर्माता भगिनी वासुकेस्तथा।
जरत्कारुमुनेः पत्नी मनसादेवि नमोऽस्तु ते॥"
इति मनसाध्यानमन्त्रः।)

वासुकेयः पुं (वसुकस्यापत्यमिति। वसुक + ढक्।) वासुकिः। इति शब्दरत्नावली ॥

वासुकेयस्वसा [ऋ] स्त्री, (वासुकेयस्य वासुकेः स्वसा भगिनी।) जरत्कारुः। इत्यमरः ॥

वासुदेव, पुं, (वसुदेवस्यापत्यमिति। वसुदेव + "ऋष्यन्धकवृष्णिकुरुभ्यश्च।" ४। १। ११४। इति अण्। यद्वा, सर्व्वत्रासौ वसत्यात्मरूपेण विश्वम्भरत्वादिति। वस् + बाहुलकात् उण्। वासुः। वासुश्चासौ देवश्चेति कर्म्मधारयः। अस्य नामनिरुक्तिस्तु परतो ज्ञेया।) श्रीकृष्णः। इत्यमरः। तत्पर्य्यायः। वसुदेवभूः २। इति हेमचन्द्रः ॥ [illegible] ३ शुभद ४ वासुभद्र ५ षड्बिन्दुः ६ षड्बिन्दु ७ पृश्निशृङ्ग ८ पृश्निभद्र ९ गदाग्रज १० मार्ज्ज ११ बभ्रु १२ लोहिताक्ष १३ परमात्मक १४। इति शब्दमाला। अस्य तु कृष्णशब्दे द्रष्टव्यम्। श्रीकृष्णशरीरस्य नित्यत्वं यथा,—

श्रीसनत्कुमार उवाच।

"भद्र भो सुनय प्रश्नमेतत्त्वां ममाभीप्सितम्।
छायस्य कृष्णभक्तस्य श्रीवशोजस्य निष्फलम्॥
साम्प्रतं कुशलं नाथ दर्शनं परमात्मनः।
भक्तानुरोधाद्देहस्य परस्य प्रकृतेरपि॥
निर्गुणस्य निरीहस्य सर्व्वबीजस्य वैभव।
भारावतारणायैव चाविर्भूतस्य साम्प्रतम्॥

श्रीकृष्ण उवाच।

शरीरधारिणस्तावत् कुशलप्रश्नमीप्सितम्।
तन्नाथ कुशलप्रश्न मयि विप्र न विद्यते॥

सनत्कुमार उवाच।

शरीरे प्राकृते नाथ सनातन शुभाशुभम्।
नित्यदेहे चेमबीजे प्रश्नमनर्थकम्॥

श्रीभगवानुवाच।

यो यो विग्रहधारी च स च प्राकृतिकः स्मृतः।
देहो न नित्यो विप्र त्वं नित्यो प्रकृतिं विना॥

सनत्कुमार उवाच।

रक्तबिन्दूद्भवा देहास्ते च प्राकृतिकाः स्मृताः।
कथं प्रकृतिनाथस्य जीवस्य प्राकृतं वपुः॥
सर्व्वबीजस्य सर्व्वादिर्भवांश्च भगवान् स्वयम्।
सर्व्वेषामवताराणां प्रधानं बीजमव्ययम्॥
त्वां वदन्ति वेदाश्च नित्यं नित्यं सनातनम्।
ज्योतिःस्वरूपं परमं परमात्मानमीश्वरम्॥
मायया सगुणश्चैव मायेशं निर्गुणं परम्।
प्रवदन्ति च वेदाज्ञास्तथा वेदविदः प्रभो॥

श्रीकृष्ण उवाच।

साम्प्रतं वासुदेवोऽहं भक्तोर्म्मीमिव वपुः।
कथं न प्राकृतो विप्र द्विजप्रश्नमभीप्सितम्॥

सनत्कुमार उवाच।

नाथ सर्व्वनिवासश्च निवासि यस्य योगिनः।
तस्य देव परं ब्रह्म वासुदेव इतीरितम्॥
वासुदेवेति यन्नाम वेदेषु च चतुर्षु च।
पुराणेष्वितिहासेषु यात्रादिषु च दृश्यते॥
वसतीश्वरियो देव सर्व्वे वेदे निवसति।
वासिनो सुरवराः सर्व्वे सर्व्वस्य यत्र हि॥
आदिसौ मम देवाय दत्तिच्छायो च साम्प्रतम्॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७० अध्यायः॥

तस्य नामव्युत्पत्तिः।

"सर्व्वत्रासौ समस्तञ्च वसत्यत्रेति वै यतः।
ततः स वासुदेवेति विद्वद्भिः परिगीयते॥"

इति विष्णुपुराणे १ अंशे २ अध्यायः ॥

अपि च।

"सर्व्वाणि तत्र भूतानि वसन्ति परमात्मनि।
भूतेष्वपि च सर्व्वात्मा वासुदेवस्ततः स्मृतः॥
खाण्डिक्यजनकायाह पृष्टः केशिध्वजः पुरा।
नामव्याख्यामनन्तस्य वासुदेवस्य तत्त्वतः॥
भूतेषु वसते सोऽन्तर्व्वसन्त्यत्र च तानि यत्।
धाता विधाता जगतां वासुदेवस्ततः प्रभुः॥"

इति तत्रैव। ६। ५। ८०—८२॥

(तथा च महाभारते। ५। ७०। ३।
"वसनात् सर्व्वभूतानां वसुत्वाद्देवयोनितः।
वासुदेवस्ततो वेद्यो बृहत्त्वाद्विष्णुरुच्यते॥")

अस्य ध्यानप्रकारो यथा,—

"श्रीवत्सं वासुदेवस्य पुरैव प्रतिपादितम्।
तदङ्गमन्त्र रामस्य दाशरथ्युच्यते॥
ॐ नमो भगवते वासुदेवाय वै परम्।
अष्टमन्त्र तथैतस्य वासुदेवस्य कीर्त्तितम्॥
अस्य पञ्चरूपन्तु दधिवामनमद्भुतम्।
तस्य मन्त्रं नरसिंह प्रमुखा भाषितं प्रभुः॥
ॐ नमो विष्णवे पूर्व्वं पदं तस्य प्रकीर्त्तितम्।
पश्चात् सुरपतये चतुष्पत्ता महाबलम्॥
स्वाहान्तं सुरपावक प्रवर्त्तं वैष्णवं मतम्।
मन्त्रराजस्तु यो वेद वीर्य्यं पञ्चाङ्गमक्षकम्॥
स पूजां देवकायस्तु न स भूयोऽभिजायते।
सर्व्वसूत्रान्तकोश क्रमो याज्य प्रपूजने॥
नित्य मर्त्त्येषु च बुधो विधेय मन्त्र भूपते।
रूपन्तु जीवमनाख्य प्रथमं प्रथ भूपते॥
पूर्व्वेन्दुलोचनं शुभ्रं परिदायोनिरीक्षितम्।
चतुर्भुजं पीनवक्षोऽक्षिमिं ब्रह्मोनदरभृत्॥
दक्षिणार्द्धे गदां धत्ते तदधो निजवामुजम्।
वामोर्द्धे चक्रमत्युग्र तदधो शङ्खमेव च॥
पीतवस्त्रा धनन कौस्तुभं हरि चाङ्गुलम्।
वने बधे च्युतो वामे मृगेन्द्र वाक्यपूरितम्॥
दधिवं कोमलं स्पृष्टं वक्षकं भद्रासनम्।
पीठे किरीटं बध्नन्त वदनो कुण्डलद्वयम्।
आवामदाग्निमिनी विभ्रो चञ्चमालां दधाति
नाम्॥
दक्षिणं दक्षिणे देवी नित्यं पार्श्वे तु निम्नगम्।
वरदानौ वामपार्श्वे विन्ध्येश्वर वरिम्॥
मकाख बीजवदनन्तु वर्ण्यं तव वादिव।
हारद्वायनरमवज्र वामन्दन् मधुक है॥
बीजोन्मदवधार्यं तथैव च चतुर्भुजम्।
दक्षिणार्द्धे किल्ल पद्ग दराचार्य्य स्वरेषु॥
वामोद्वयद्यमन्नमद्रे दक्ष विमन्यु।
विन्ध्येश्वर देवं वर्त्तिमन्व पूर्वकर॥
अदाश्वद्धायरत्नाद्य वक्षकृष्ण च विजयम्।
प्रद्य दायरक्षी दाविक्रजवद्वणम्॥
पूर्व्वेश्वरं वामं कृष्णवा दिव्यवीर॥
बरे नित्यमन्दिरे श्रीवत्सपूर्णं वरद।
स्पर्शप्रजल्प हर्ष द्रश्च अववायद।
बद्रावजर्दं देव सप्तकलयाक्षरम्॥

शुक्लवस्त्रधरं देवं प्रसन्नवदनं तथा ।
इत्यङ्गानसमायुक्तं चिन्तयेत् त्रिविक्रमम् ।
चिन्तयेद्धरिं देवं सर्व्वकामफलप्रदम् ॥"
इति कालिकापुराणे ८२ अध्यायः ॥ * ॥
मूर्त्तिर्यथा,—
"वसन्तु प्रथमे मासि विधौ शुक्लचतुर्द्दशी ।
अश्विन्यामहराणौ च तस्यां जातो जनार्द्दनः ॥
इन्दीवरदलश्याम पद्मपत्रायतेक्षण ।
चतुर्भुज सुन्दराङ्ग दिव्याभरणभूषित ॥
श्रीवत्सकौस्तुभोरस्को वनमालाविभूषित ।
वसुदेवस्य भार्य्यायां वासुदेव सनातन ॥"
इति पाद्मोत्तरखण्डे ६ अध्यायः ॥ * ॥
तस्य चतुर्द्धा मूर्त्तिर्यथा,—
"एकोऽपि भगवान् कृष्ण आद्यो नारायणः स्मृतः ।
चतुर्द्धाऽस्तौ व्यापी सगुणो निर्गुणोऽपि सः ॥
एका भगवतो मूर्त्तिर्ज्ञानरूपा शिवामला ।
वासुदेवाभिधाना सा गुणातीता सुनिष्कला ॥
द्वितीया कालसंज्ञान्या तामसी शेषसंज्ञिता ।
निहन्ति सकलांश्चान्ते वैष्णवी परमा तनुः ॥
सत्त्वोद्रिक्ता तृतीयान्या प्रद्युम्नेति च संज्ञिता ।
जगत् स्थापयते सर्व्वं सा विष्णुप्रकृतिर्ध्रुवा ॥
चतुर्थी वासुदेवस्य मूर्त्तिर्ब्राह्मी सुसंज्ञिता ।
राजसी चानिरुद्धाख्या प्राद्युम्नी सृष्टि-
कारिका ॥
यः स्वपितीव जगत् प्रद्युम्नेन सह प्रभुः ।
नारायणाख्यो ब्रह्मासौ प्रजासर्गं करोति सः ॥
या सा नारायणतनुः प्रद्युम्नाख्या शुभेश्वरा ।
तया सम्मोहयेद्विश्वं सदेवासुरमानुषम् ॥
सैव सर्व्वजगत्सूतिः प्रकृतिः परिकीर्त्तिता ।
वासुदेवो ह्यनन्तात्मा केवलो निर्गुणो हरिः ॥
प्रधानं पुरुषः कालस्तत्त्वत्रयमनुत्तमम् ।
वासुदेवात्मकं नित्यमेतत् विज्ञाय मुच्यते ॥
एकश्चैव चतुर्व्यूहश्चतुर्द्धा पुनरच्युतः ।
भिन्नः स सुदर्शनोऽथ प्रद्युम्नो हरिरव्ययः ॥"
इति कूर्म्मपुराणे ४८ अध्यायः ॥

वासुदेवप्रियङ्करी, स्त्री, (वासुदेवस्य प्रियङ्करी ।) शतावरी । इति राजनिर्घण्टः ॥ श्रीकृष्णप्रियकारिणी च ॥

वासुपूज्य, पुं (वासवीरायस्य इव पूज्य ।) जिनविशेष । इति हेमचन्द्र । १ । २७ ॥

वासुभद्र पुं श्रीकृष्ण । इति शब्दमाला ॥ (यथा, शिशुपालादि कथाक्षेपकोषे । ११ ।
"यो वाचा वाग्विभूत्यात् चरति सविकला भाव
मानावमाना
सार्द्धं वासस्त्वमीश चरति विरथतो वासुभद्र
शुभदम् ॥")

वासुरा स्त्री, स्त्रीमात्रम् । करिणी । रात्रिः । भूमिः । इति हेमचन्द्रः ॥

वासू स्त्री, (वासयति सदर्थे इति । वस+वाहु लकात् ऊ ।) नाट्योक्तौ बाला । इत्यमरः ॥

वासौकः, [स्] क्ली (वासाय ओकः स्थानम् ।) वासगृहम् । यथा,—
"सभागारोऽपवरको वासौकः शयनास्पदम् ।"
इति हेमचन्द्रः ॥

वास्तवं क्ली (वस्तेव । वस्तु+अण् ।) यथार्थभूतम् । यथा,—
"धर्म्मः प्रोज्झितकैतवोऽत्र परमो निर्म्मत्सराणां
सतां
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ।"
इत्यादि श्रीभागवते प्रथमस्कन्धे १ अध्याये ॥
"वास्तवं परमार्थभूतं वस्तु । यद्वा, वास्तवशब्देन वस्तुनोंऽशो जीवः वस्तुनः शक्तिर्माया तत् सर्व्वं वस्त्वेव न ततः पृथक् ।" इति तट्टीकायां श्रीधरस्वामी ॥

वास्तविक, त्रि, (वस्तव वस्तु+ठक् ।) परमार्थभूत वस्तु । वास्तवमेव इत्यर्थे वास्तवशब्दात् स्वार्थिकप्रत्ययेनापि सिद्धम् ॥

वास्तवेया स्त्री, रात्रि । इति त्रिकाण्डशेषः ॥ किन्तु वास्तव्या ज्या इति नामद्वयमिति साधु पाठः ॥

वास्तव्य त्रि, वसतीति वस+"वसेस्तव्यत् कर्त्तरि णिच ।" ३ । १ । ९६ । इत्यस्य वार्त्तिकोक्त्या वासकर्त्ता । कर्त्तरितव्यत् । इति सिद्धान्तकौमुदी । (यथा, कथासरित्सागरे । ९८ । १०७ ।
"इहैवासि महीराज वास्तव्यो नगरे द्विज ॥")
वासयोग्यश्च । वसतौ, पुं ॥

वास्तु स्त्री वास्तुकशाकम् । इति राजनिर्घण्टः ॥

वास्तु, क्ली पुं (वसन्ति प्राणिनो यत्र । वस निवासे +"वसेरगारे णित् ।" उणा० १ । ७० । इति तुन् । स च णित् ।) गृहकरणयोग्यभूमिः । तत्पर्य्यायः । वेश्मभूः २ । इत्यमरः ॥ भाति ३ माटी ४ । इति जटाधरः ॥ वाटिका ५ गृहपोतकः ६ । इति शब्दरत्नावली ॥ वास्तुकरणप्रमाणादि यथा,—
श्रीहरिवंशे ।
"वास्तु सङ्क्षेपतो वक्ष्ये गृहादौ विघ्ननाशनम् ।
ईशानकोणादारभ्य ह्येकाशीतिपदे यजेत् ॥
ईशाने च शिरःपादौ नैरृतेऽग्न्यानिले करौ ।
आवासवासवेश्मादौ पुरे ग्रामे वणिक्पथे ॥
प्रासादारामदुर्गेषु देवालयमठेषु च ।
द्वात्रिंशत् सुरान् बाह्ये तदन्तश्च त्रयोदश ॥
ईशश्चैवाथ पर्जन्यो जयन्तः कुलिशायुधः ।
सूर्य्यः सत्यो भृशश्चैव आकाशो वायुरेव च ॥
पूषा च वितथश्चैव गृहक्षतयमावुभौ ।
गन्धर्व्वो भृङ्गराजश्च मृगः पितृगणस्तथा ॥
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो गणाधिपः ।
असुरः शेषपादौ च रोगोऽहिर्मुख्य एव च ॥
भल्लाटः सोमसर्पौ च अदितिश्च दितिस्तथा ।
बहिर्द्वात्रिंशदेते तु तदन्तश्चतुरः शृणु ॥
ईशानादिचतुष्कोणसंस्थितान् पूजयेद् बुधः ।
आपश्चैवाथ सावित्रो जयो रुद्रस्तथैव च ॥
मध्ये नवपदे ब्रह्मा तस्याष्टौ च समीपगान् ।
देवानेकोऽन्तरितान् पूर्व्वादौ नामतः शृणु ॥
अर्य्यमा सविता चैव विवस्वान् विबुधाधिपः ।
मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः क्रमात् ॥
अष्टमश्चापवत्सश्च परितो ब्रह्मणः स्मृताः ।
ईशानकोणादारभ्य ह्येकैको वंश उच्यते ॥
आग्नेयकोणादारभ्य वंशो भवति दुर्द्धरः ।
अदितिं हिमवन्तञ्च जयन्तञ्च इदं पदम् ॥
मालिका कालिका नाम शक्राद्यास्त्वेता पुन ।
वास्तुदेवान् पूजयित्वा यथाधारतले यजेत् ॥
सुरेभ्यः पुरतः कार्य्यं दिव्यायैर्मधुरान्नकम् ।
रूपनिगमयो यैश्च पूर्व्वैस्त समुच्चयम् ॥
गन्धपुष्पैश्च कार्य्यं स्यात् प्राच्यां पद्मवनम् ।
भाण्डागारञ्च कौवेर्य्यां गोष्ठागारञ्च वायवे ॥
उन्नतञ्च नारदयं मानायतसमन्वितम् ।
अग्निकुण्डमीशानस्थानमायुधागारञ्च नैरृते ॥
अभ्यागतालयं रम्यं शय्यावसथपादुकाम् ।
तोयाग्निदीपसद्भृत्ययुक्तं रचयतो भवम् ॥
गृहान्तराणि सर्व्वाणि सर्व्वत्र कदलीगृहे ।
पञ्चवर्णैश्च कुसुमैः शोभितानि प्रकल्पयेत् ॥
प्राकारं तद्बहिर्दद्यात् पञ्चहस्तं प्रमाणतः ।
एवं विधाभवनं कृत्वा देवेशोपवनैर्व्वृतम् ॥
चतुःषष्टिपदो वास्तु प्राकारादौ सुपूजितः ।
मध्ये चतुष्पदो ब्रह्मा द्विपञ्चार्य्यमादयः ॥
कर्णे चैवाथ पञ्चाशत्तथा देवाः प्रकीर्त्तिताः ।
तेभ्योऽप्युभयतः सार्द्धा अर्द्धोऽपि दिग्गताः सुराः ॥
चतुःषष्टिपदे देवा इतीरं परिकीर्त्तिताः ।
चरकी च विदारी च पूतना पापराक्षसी ॥
ईशानाद्याश्च ताः बाह्ये देवाश्च हेतुकादयः ।
हेतुकस्त्रिपुरान्तश्च अग्निर्वेतालको यमः ॥
अग्निजिह्वः कालकश्च करालो एकपादकः ।
ईशान्यां भीमरूपस्तु पाताले प्रेतनायकः ॥
आकाशे गन्धमाली स्यात् क्षेत्रपालास्तथा
यजेत् ।
पिष्टादिभिर्बलिं दीर्घं राक्षसादेभ्य आचरेत् ॥
षड्भिर्भागैस्तु हित्वा वै ग्रीवाद्यादानमादिशेत् ।
पूर्व्वं वितस्तिमात्राभिश्चतुर्भागेन भावयेत् ॥
पश्चिमे तद्वदेकस्मिन् भागे मृद्वस्त्र यत् भवेत् ।
अथ चतुर्थं हस्ता यत्र भूमिभागाद्विवर्जयेत् ॥
विश्वमर्द्धं विभागोत्थाद् दैवतस्य मतं यथा ।
घटाभिर्भित्तिं पिष्टं बहिर्भागमवारितम् ॥
पश्चिमस्तु भवेच्चैवं मध्ये भूतवारितम् ।
वास्तुतोऽपि यथा कुर्य्यात् न एकं गृहं यथा ॥
वामपार्श्वे स्थितं नाम कार्य्या विचारका ।
पिण्डमध्ये तु भागाय द्वारं सुदृढयोजनम् ॥
एवञ्च दक्षिणादौ स्यात् पूर्व्वादिक्रमयोजनम् ।
द्वारं दौवारिकादीनां द्वारादौ स्थानानि च ॥
सूत्रव्याप्तेरयोरेव सुगाढं सम्यगूहनम् ।
पुष्पदन्तस्तु दौवारे सौम्यं दक्षिणे यथा ॥
बहोऽश्वकाष्ठसंहिते पुष्पदन्तमथादिशेत् ।
घटरं प्रतीहारमध्ये रोगरं चेत् ॥
सुभीमिन्द्रजयस्य चाग्रतश्च वैरम् ।
अचलं चापरेषु चैव वीरं दुर्व्वकुलम् ।
द्वारादग्रतश्च द्वारि पूर्व्वाद्यारोहिः वपुन्नदम् ।

अग्निभीतिमनुकन्या धनधान्यादिकोपनम् ।
राजन्न कोपनं पूर्ब्बे चलतो द्वारमीरितम् ।
इन्द्रावाग्नौ भवेत् पूर्ब्बे आग्नेयादौ तु दक्षिणे ।
नैरृत्यादौ पश्चिमे स्यात् वायव्यादौ तु चोत्तरे ।
अष्टभागे कृते भागे द्वाराणाञ्च फलाफलम् ।
अश्वत्थप्लक्षन्यग्रोधाः पूर्ब्बादौ स्यादुदुम्बरः ।
प्लक्षस्य शोभनं प्रोक्तं ईशाने चैव शाल्मलिः ।
पूर्ब्बतो विप्रद्वारौ स्यात् प्रासादस्य गृहस्य च ।"

इत्याग्नेये महापुराणे वास्तुमानलक्षणम् ४६ अध्यायः ।
प्रासादलक्षणन्तु प्रासादशब्दे द्रष्टव्यम् । * ।
अपि च ।

मत्स्य उवाच ।
"प्रासादभवनादीनां निवेशं विस्तरान्नृप ।
कुर्य्यात् केन विधानेन कश्च वास्तुरुदाहृतः ।

सूत उवाच ।
भृगुरत्रिर्वशिष्ठश्च विश्वकर्म्मा मयस्तथा ।
नारदो नग्नजिच्चैव विशालाक्षः पुरन्दरः ।
ब्रह्मा कुमारो नन्दीशः शौनको गर्ग एव च ।
वासुदेवोऽनिरुद्धश्च तथा शुक्रबृहस्पती ।
अष्टादशैते विख्याता वास्तुशास्त्रोपदेशकाः ।
संक्षेपेणोपदिष्टं यन्मनवे मत्स्यरूपिणा ।
तदिदानीं प्रवक्ष्यामि वास्तुशास्त्रमनुत्तमम् ।
पुरान्धकवधे घोरे घोररूपस्य शूलिनः ।
ललाटस्वेदसलिलमपतद्भुवि भीषणम् ।
करालवदनं तस्मात् भूतमुद्भूतमुल्बणम् ।
ग्रसमानमिवाकाशं सप्तद्वीपां वसुन्धराम् ।
ततोऽन्धकानां रुधिरमपिबत् पतितं क्षितौ ।
तेन तत्समरे सर्व्वं पतितं यन्महीतले ।
तथापि तृप्तिमगमन्नद्भुतं न तदा यतः ।
सदाशिवस्य पुरतस्तपश्चक्रे सुदारुणम् ।
क्षुधाविष्टस्तदूतमाहर्त्तुं जगतां चयम् ।
ततः कालेन सन्तुष्टो भैरवस्तस्य चादरात् ।
वरं वृणीष्व भद्रं ते यदभीष्टं तवानघ ।
तमुवाच ततो भूतं त्रैलोक्यग्रसनक्षमम् ।
भवामि देवदेवेश तथेत्युक्तश्च शूलिना ।
ततस्तत् त्रिदिवं सर्व्वं भूमण्डलमधीश्वर ।
स्वदेहेनावरोधयत् पपात प्रणतद्भुवि ।
भीतभीतैस्ततो देवैर्ब्रह्मणा चाथ शूलिना ।
दानवासुररक्षोभिरवष्टब्धं समन्ततः ।
येन यत्रैव चाक्रान्तं स तत्रैवावसत् पुनः ।
निवासात् सर्व्वदेवानां वास्तुरित्यभिधीयते ।
अवष्टब्धेन तेनापि विज्ञप्ताः सर्व्वदेवताः ।
प्रसीदध्वं सुराः सर्व्वं युष्माभिर्निश्चलीकृतः ।
स्थास्यामि किं मयाहारमवष्टब्धमधोमुखम् ।
ततो ब्रह्मादिभिः प्रोक्तं वास्तुमध्ये तु यो बलिः ।
आहारो वैश्वदेवान्ते ध्रुवमस्मिन् भविष्यति ।
वास्तूपशमनो यज्ञस्तवाहारो भविष्यति ।
इत्युक्तो हृष्टः स वास्तुरभवत्तदा ।
वास्तुयज्ञः स्मृतस्तस्मात् प्रभृति शान्तये ।"
इति मात्स्ये वास्तुभूतोद्भवो नाम २५२ अध्यायः । * ।

सूत उवाच ।
"अथातः सम्प्रवक्ष्यामि गृहकालविनिर्णयम् ।
यथाकालं शुभं ज्ञात्वा सदा भवनमारभेत् ।
चैत्रे व्याधिमवाप्नोति यो गृहं कारयेन्नरः ।
वैशाखे धनरत्नानि ज्यैष्ठे मृत्युं तथैव च ।
आषाढ़े भृत्यरत्नानि पशुवर्गमवाप्नुयात् ।
श्रावणे भृत्यलाभन्तु हानिं भाद्रपदे तथा ।
पत्नीनाशोऽश्वयुजे विन्द्यात् कार्त्तिके धनधान्यकम् ।
मार्गशीर्षे तथा भक्तं पौषे तस्करतो भयम् ।
लाभञ्च बहुशो विन्द्यादग्निं माघे विनिर्द्दिशेत् ।
फाल्गुने काञ्चनं पुत्त्रानिति कालबलं स्मृतम् ।
अश्विनी रोहिणी मूलमुत्तरात्रयमैन्दवम् ।
स्वाती हस्तानुराधा च गृहारम्भे प्रशस्यते ।
आदित्यभौमवर्ज्जन्तु सर्व्वे वाराः शुभावहाः ।
वज्रव्याघातशूलेषु व्यतीपातातिगण्डयोः ।
विष्कम्भगण्डपरिघवर्ज्जं योगेषु कारयेत् ।
श्वेते मैत्रेऽथ माहेन्द्रे गान्धर्व्वाभिजिद्रौहिणे ।
तथा वैराजसावित्रे मुहूर्त्ते गृहमारभेत् ।
चन्द्रादित्यबलं लब्ध्वा लग्नं शुभनिरीक्षितम् ।
स्तम्भोच्छ्रायादि कर्त्तव्यमन्यत्र परिवर्ज्जयेत् ।
प्रासादेष्वेवमेव स्यात् कूपवापीषु चैव हि ।
पूर्व्वं भूमिं परीक्षेत पश्चाद्वास्तु प्रकल्पयेत् ।
श्वेता रक्ता तथा पीता कृष्णा चैवानुपूर्व्वशः ।
विप्रादेः शस्यते भूमिरतः कार्य्यं परीक्षणम् ।
विप्राणां मधुरास्वादा कषाया क्षत्रियस्य च ।
कषायकटुका तद्वद्वैश्यशूद्रेषु शस्यते ।
रत्निमात्रे ततो गर्त्ते अनुलिप्ते तु सर्व्वतः ।
घृतमामशरावस्थं कृत्वा वर्त्तिचतुष्टयम् ।
ज्वालयेद्भूपरीक्षार्थं पूर्णं तत् सर्व्वदिङ्मुखम् ।
दीप्तौ पूर्व्वादि गृह्णीयाद्वर्णानामनुपूर्व्वशः ।
वास्तु सार्व्वणिकं तस्य दीप्यते सर्व्वतश्च यः ।
शुभदः सर्व्ववर्णानां प्रासादेषु गृहेषु च ।
रत्निमात्रमधो गर्त्तं परीक्ष्य खातपूरणे ।
अधिके श्रियमाप्नोति न्यूने हानिः समे समम् ।
कृष्टरोऽथवा देशे सर्व्वबीजानि वापयेत् ।
त्रिपञ्चसप्तरात्रेण यत्र रोहन्ति तान्यपि ।
ज्येष्ठोत्तमा कनिष्ठा भूर्वर्ज्जनीयेतरा सदा ।
पञ्चगव्यौषधिजलैः परीक्षित्वा च सेचयेत् ।
एकाशीतिपदं कृत्वा रेखाभिः कनकेन तु ।
पश्चात् पिष्टेन चालिप्य सूत्रेणालोड्य सर्व्वतः ।
दश पूर्व्वायता रेखा दश चैवोत्तरायताः ।
सर्व्वा वास्तुविभागेषु विज्ञेया नवका नव ।
एकाशीतिपदं कृत्वा वास्तुवित् सर्व्ववास्तुषु ।
पदस्थान् पूजयेद्देवांस्त्रिंशत् पञ्चदशैव तु ।
द्वात्रिंशद्बाह्यतः पूज्याः पूज्याश्चान्तस्त्रयोदश ।
नामतस्तान् प्रवक्ष्यामि स्थानानि च निबोधत ।
ईशानकोणादिषु तान् पूजयेद्धविषा नरः ।
शिखी चैवाथ पर्ज्जन्यो जयन्तः कुलिशायुधः ।
सूर्य्यः सत्यो भृशश्चैव आकाशो वायुरेव च ।
पूषा च वितथश्चैव गृहक्षतयमावुभौ ।
गन्धर्व्वो भृङ्गराजश्च मृगः पितृगणस्तथा ।
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलाधिपः ।
असुरः शोषपापौ च रोगो हिमुख्य एव च ।
भल्लाटः सोमसर्पौ च अदितिश्च दितिस्तथा ।
बहिर्द्वात्रिंशदेते तु तदन्तश्चतुरः शृणु ।
ईशानादिचतुष्कोणे संस्थितान् पूजयेद्बुधः ।
आपश्चैवाथ सावित्रो जयो रुद्रस्तथैव च ।
मध्ये नवपदो ब्रह्मा तस्याष्टौ च समीपगान् ।
साध्या नैकान्तरान् विद्यात् पूर्व्वाद्यान् नामतः शृणु ।
अर्य्यमा सविता चैव विवस्वान् विबुधाधिपः ।
मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः क्रमात् ।
अष्टमश्चापवत्सस्तु परितो ब्रह्मणः स्मृताः ।
आपश्चैवापवत्सश्च पर्ज्जन्योऽग्निर्दितिस्तथा ।
पदिकानाञ्च वर्गोऽयमेवं कोणेष्वशेषतः ।
तन्मध्ये तु बहिर्विंशत् द्विपदास्ते तु सर्व्वशः ।
अर्य्यमा च विवस्वांश्च मित्रः पृथ्वीधरस्तथा ।
ब्रह्मणः परितो दिक्षु त्रिपदास्ते तु सर्व्वतः ॥
वंशानिदानीं वक्ष्यामि ऋजूनपि पृथक् पृथक् ।
वायुं यावत्तथा रोगात् पितृभ्यः शिखिनं पुनः ।
मुख्याद्भृशमथो शोषात् वितथं यावदेव तु ।
सुग्रीवाददितिं यावत् मृगात् पर्ज्जन्यमेव च ।
एते वंशाः समाख्याताः क्वचिज्जयन्त एव च ।
एतेषां यस्तु सम्पातः पदं मध्यं समन्ततः ।
मर्म्म चैतत् समाख्यातं त्रिशूलं कोणगञ्च यत् ।
स्तम्भन्यासेषु वर्ज्ज्यानि तुलाविधिषु सर्व्वदा ।
कीलोच्छिष्टोपघातादि वर्ज्जयेद्यत्नतो नरः ।
सर्व्वत्र वास्तुर्निर्द्दिष्टः पितृवैश्वानरायतः ।
मूर्द्धन्यग्निः समादिष्टो मुखे चापः समाश्रिताः ।
पृथ्वीधरोऽर्य्यमा चैव स्तनयोस्तावदाश्रितौ ।
वक्षःस्थले चापवत्सः पूजनीयः सदा बुधैः ।
नेत्रयोर्दितिपर्ज्जन्यौ श्रोत्रेऽदितिजयन्तकौ ।
सर्पेन्द्रौ स्कन्धगौ च पूजनीयौ प्रयत्नतः ।
सूर्य्यसोमादयस्तद्वद्बाह्वोः पञ्च च पञ्च च ।
रुद्रश्च राजयक्ष्मा च वामहस्ते समाश्रितौ ।
सावित्रः सविता तद्वद्धस्तं दक्षिणमाश्रितौ ।
विवस्वानथ मित्रश्च जठरे संव्यवस्थितौ ।
पूषा च पापयक्ष्मा च हस्तयोर्मणिबन्धने ।
तथैवासुरशोषौ च वामपार्श्वं समाश्रितौ ।
पार्श्वे तु दक्षिणे तद्वद्वितथः सगृहक्षतः ।
ऊर्व्वोर्यमाम्बुपौ ज्ञेयौ जान्वोर्गन्धर्व्वपुष्पकौ ।
जङ्घयोर्भृङ्गसुग्रीवौ स्फिक्स्थौ दौवारिको मृगः ।
जयशक्रौ तथा मेढ्रे पादयोः पितरस्तथा ।
मध्ये नवपदो ब्रह्मा हृदये स तु पूज्यते ।
चतुःषष्टिपदो वास्तुः प्रासादे ब्रह्मणा स्मृतः ।
ब्रह्मा चतुष्पदस्तत्र कोणेष्वर्द्धपदास्तथा ।
बहिष्कोणेषु वास्त्वन्ते सार्द्धोभयपदास्तथा ।
विंशतिर्द्विपदाश्चैव चतुःषष्टिपदे स्मृताः । * ।
गृहारम्भे तु कण्डूतिः स्वाम्यङ्गे यत्र जायते ।
शल्यं त्वपनयेत्तत्र प्रासादे भवने तथा ।
अशल्यं भवनं नित्यं सशल्यं दुःखदायकम् ।
हीनाधिकाङ्गतां वास्तोः सर्व्वथा तु विवर्ज्जयेत् ।
नगरग्रामदेशेषु सर्व्वत्रैवं विवर्ज्जयेत् ।

गाङ्गेयाख्यं हृदं प्रमाणाद्दामभं ततः ।
इन्द्रासनमासाद्य विशोकस्य निवेदनम् ।
विजयद्वारे देव सर्वकामफलप्रदम् ॥"

इति कालिकापुराणे ८२ अध्यायः ॥*॥

तस्योत्पत्तिर्यथा,—

"ततस्तु प्रथमे मासि तिथौ प्रथमपञ्चमे ।
अदृश्यामद्भुतायां च तस्यां जाता चतुर्भुजः ।
इन्दीवरदलश्यामः पद्मपत्रायतेक्षणः ।
चतुर्भुजः सुन्दराङ्गो दिव्याभरणभूषितः ।
श्रीवत्सकौस्तुभोरस्को वनमालाविभूषितः ।
वसुदेवस्य जातोऽसौ वासुदेवः सनातनः ॥"

इति पाद्मोत्तरखण्डे ६ अध्यायः ॥*॥

तस्य चतुर्धा मूर्त्तिर्यथा,—

"एकोऽपि सन् जगत्स्वामी नारायण इति स्मृतः ।
चतुर्द्धा संस्थितो धत्ते सगुणो निर्गुणोऽपि वा ।
एका भगवतो मूर्त्तिर्ज्ञानरूपा शिवामला ।
वासुदेवाभिधाना सा गुणातीता सुनिष्कला ।
द्वितीया कालसंज्ञान्या तामसी शेषसंज्ञिता ।
निहन्ति सकलांश्चान्ते वैष्णवी परमा तनुः ।
सत्त्वोद्रिक्ता तृतीयाख्या प्रद्युम्नेति च संज्ञिता ।
जगत् स्थापयते सर्वं सा विष्णोः प्रकृतिर्ध्रुवा ।
चतुर्थी वासुदेवस्य मूर्त्तिर्ब्राह्मी गुणाश्रिता ।
राजसी चानिरुद्धाख्या प्रद्युम्नी सृष्टिकारिका ।
यः स्वपित्यखिलं हत्वा प्रद्युम्नेन सह प्रभुः ।
नारायणाख्यो ब्रह्मासौ प्रजासर्गं करोति सः ।
या सा नारायणतनुः प्रद्युम्नाख्या मुनीश्वराः ।
तया सम्मोहयेद्विश्वं सदेवासुरमानुषम् ।
सैव सर्वजगत्सूतिः प्रकृतिः परिकीर्त्तिता ।
वासुदेवो ह्यनन्तात्मा केवलो निर्गुणो हरिः ।
प्रधानं पुरुषः कालस्तत्त्वत्रयमनुत्तमम् ।
वासुदेवात्मकं नित्यमेतद्विज्ञाय मुच्यते ।
एकश्चैव चतुर्द्धाऽसौ चतुर्द्धा पुनरच्युतः ।
विभेद वासुदेवोऽसौ प्रद्युम्नो हरिरव्ययः ॥"

इति कूर्म्मपुराणे १८ अध्यायः ॥

वासुदेवप्रियङ्करी, स्त्री (वासुदेवस्य प्रियङ्करी ।) शतावरी । इति राजनिर्घण्टः ॥ श्रीकृष्णप्रियकारिणी च ॥

वासुपूज्य, पुं (वासुभिरिन्द्रैः पूज्यः ।) जिनविशेषः । इति हेमचन्द्रः । १ । २७ ॥

वासुभद्र, पुं श्रीकृष्णः । इति शब्दमाला ॥ (यथा, विष्णुदासादि [illegible] । ४१ ।

"या [illegible] यरति [illegible] माया
[illegible] भवति [illegible] वासुभद्र सुमहत् ॥")

वासुरा, स्त्री, [illegible] । वाशिता । रात्रिः । भूमिः । इति हेमचन्द्रः ॥

वासू, स्त्री, (वासते शब्दायते इति । वास + बाहुलकात् ऊ ।) बालोक्तौ बाला । इत्यमरः ॥

वासौक, [स्] क्ली (वासाय ओकः आलयम् ।) वासगृहम् । यथा,—

"गम्भारीपत्रको वासौकः सुमनसाम् ।"

इति हेमचन्द्रः ॥

वास्तव, क्ली (वस्त्वेव । वस्तु + अण् ।) यथार्थभूतम् । यथा,—

"धर्म्मः प्रोज्झितकैतवोऽत्र परमो निर्म्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ।"

इति श्रीभागवते प्रथमस्कन्धे १ अध्याये ।

"वास्तवं परमार्थभूतं वस्तु । यद्वा, वास्तवशब्देन वस्तुनोंऽशो जीवः वस्तुनः शक्तिः माया वस्तुनः कार्यं जगच्च तत् सर्वं वस्त्वेव न ततः पृथक् ।" इति तट्टीकायां श्रीधरस्वामी ॥

वास्तविक, त्रि, (वस्तु + ठक् ।) परमार्थभूतं वस्तु । वास्तवमेव इत्यर्थे वास्तवशब्दात् [illegible] ॥

वास्तवेया, स्त्री, रात्रिः । इति त्रिकाण्डशेषः ॥ किन्तु वास्तवा क्षपा इति नामद्वयमिति साधु पाठः ॥

वास्तव्य, त्रि, वसतीति वस + "वसेस्तव्यत् कर्त्तरि णिच्च ।" ३ । १ । ९६ । इत्यस्य वार्त्तिकोक्त्या तव्यत् । कर्त्तरि णित् । इति सिद्धान्तकौमुदी ॥ (यथा, कथासरित्सागरे । १८ । १०० ।

"इहैवास्मि महाराज वास्तव्यो नगरे द्विज ॥")

वासयोग्यञ्च । वसती, पुं ॥

वास्तु, क्ली वास्तूकशाकम् । इति राजनिर्घण्टः ॥

वास्तु, क्ली पुं (वसन्ति प्राणिनो यत्र । वस निवासे + "वसेरगारे णिच्च ।" उणा १ । ७ । इति तुन् । स च णित् ।) गृहकरणयोग्यभूमिः । तत्पर्य्यायः । वेश्मभूः २ । इत्यमरः ॥ पोतः ३ वाटी ४ । इति जटाधरः ॥ वाटिका ५ गृहपोतकः ६ । इति शब्दरत्नावली ॥ वास्तुकरणप्रमाणादिर्यथा,—

[illegible] ।

"वास्तु संक्षेपतो वक्ष्ये गृहादौ विघ्ननाशनम् ।
ईशानकोणादारभ्य ह्येकाशीतिपदे यजेत् ।
ईशानञ्च शिरःस्थाने पैत्र्येऽपां निवेशयेत् [illegible] ।
आपावत्सावैश्वानरौ पुरे ग्रामे वणिक्पथे ।
प्रासादारामदुर्गेषु देवालयमठेषु च ।
द्वात्रिंशत् सुरान् बाह्ये तदन्तश्च त्रयोदश ।
ईशश्चैव पर्जन्यो जयन्तः कुलिशायुधः ।
सूर्य्यः सत्यो भृशश्चैव आकाशो वायुरेव च ।
पूषा च वितथश्चैव गृहक्षतयमावुभौ ।
गन्धर्वो भृङ्गराजश्च मृगः पितृगणस्तथा ।
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलाधिपः ।
असुरः शोषपापौ च रोगोऽहिर्मुख्य एव च ।
भल्लाटः सोमसर्पौ च अदितिश्च दितिस्तथा ।
बहिर्द्वात्रिंशदेते तु तदन्तश्चतुरः शृणु ।
ईशानादिचतुष्कोणसंस्थितान् पूजयेद्बुधः ।
आपश्चैवाथ सावित्रो जयो रुद्रस्तथैव च ।
मध्ये नवपदो ब्रह्मा तस्याष्टौ च समीपगान् ।
एकान्तरान्वितान् पूर्व्वादौ नामतः शृणु ।

अर्य्यमा सविता चैव विवस्वान् विबुधाधिपः ।
मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः क्रमात् ॥
अष्टमश्चापवत्सश्च परितो ब्रह्मणः स्मृताः ।
ईशानकोणादारभ्य दुर्गेयो वंश उच्यते ।
आग्नेयकोणादारभ्य वंशो भवति दुर्ज्जयः ।
प्राणेन हिमवत्पाद नवकोष इव स्मृतम् ।
चरकी विदारी नाम पूतनाख्यास्तथा पुनः ।
वासुदेवान् पूजयित्वा गृहप्रासादसद्धनैः ।
सुरेभ्यः पुरतः कार्य्यं दिक्पालेभ्यो महाबलम् ।
स्वर्णनिधनद्वे चैव पूर्व्वतः सकलापम् ।
मध्यपुष्पयुतं कार्य्यं मध्ये ब्रह्मा पद्मसंस्थितम् ।
भाण्डागारं च कौवेर्य्यां गोशालाञ्चैव वायवे ।
उदग्भागस्थं वायव्यां वातायनसमन्वितम् ।
अभिषेकशालामग्नेः आयुधागारञ्च नैरृते ।
अभ्यागतालयं रम्यं मध्यावलम्बपाद्कान् ।
तोयाग्निदीपसद्भृत्ययुक्तं दक्षिणतो भवेत् ।
गृहान्तरालि सर्व्वाणि सर्व्वे करवीरके ।
नवस्वैव कुसुमे धीधितानि प्रकल्पयेत् ।
प्राकारं तद्बहिः स्यात् पञ्चहस्तं प्रमाणतः ।
एवं विष्णालयं कृत्वा देवेश्वरं मन्दिरेषु चिन्तम् ।
चतुःषष्टिपदो वास्तुः प्रासादादौ प्रपूजितः ।
मध्ये चतुष्पदो ब्रह्मा दिग्वास्तुसमाहितः ।
कर्णे चैवाथ षष्ठाद्धास्तथा देवाः प्रकीर्त्तिताः ।
ईशोऽग्निमयसः बाह्ये कोणेऽपि दिग्पदाः सुराः ।
चतुर्भिर्द्विपदैर्देवा स्थिता परिकीर्त्तिताः ।
चरकी च विदारी च पूतना पापराक्षसी ।
ईशानाद्यास्तथा बाह्ये देवाद्या पितृवारिणः ।
हेतुकत्रिपुरान्तक अग्निवेतालको यमः ।
अग्निजिह्वः कालकश्च करालो ह्येकपादकः ।
ईशान्यां भीमरूपस्तु पाताले प्रेतनायकः ।
आकाशे गन्धमालो स्यात् क्षेत्रपालोस्तथा यजेत् ।

विस्तारादष्टगुणं दैर्घ्यं प्रासादादौ कारयेत् ।
बहुभिर्भित्तिसंयुक्तं प्रासादावामादिशेत् ।
पूर्वं दक्षिणतः भावतः [illegible] भावयेत् ।
पश्चिमेऽपि गृहे तद्वच्च भागे वृद्धं न दर्शयेत् ।
अथ चतुर्भिश्च शाला गर्भमानमपारितम् ।
ईशमधं दिक्कालौपाद ईशकश्च मतं यथा ।
कराभित्तिरुक्त पिण्डं बहिर्भागमपारितम् ।
यम्ये भेत भवेत् नौर मध्य धनहारितम् ।
वायुकोणे यद कुर्य्यात् न गृहे मानव क्वचित् ।
वामपार्श्वेन अर्पितं वाम बाह्या विनाश्यका ।
विंशत्यङ्गुलकामाथ द्वारं सुदीर्घतोत्तरम् ।
एतच्च दक्षिणा स्यात् पूर्णमदनवर्ज्जिनम् ।
द्वारं दैर्घ्यार्द्धविस्तारं द्वारान्तं शोभनं च ।
सुवर्णकैश्चमयीचर्मं सुगन्धं कलभूषणम् ।
पुष्पदीपञ्च दीपिकं वेश्म दक्षिणे तथा ।
[illegible] पुष्पापमर्ज्जिते ।
प्रथमं पुनरौत्तरीयं [illegible] वर्णं ।
पुष्पतिलस्नानपात्राः अञ्चनञ्च शैशवम् ।
स्वरं कार्य्यं वास्तुं दीर्घं पूर्वकस्थितम् ।
द्वारान्तरालमर्द्धहस्ति पूर्वभागादि वर्ज्जयेत् ।

अग्निभीतिर्बहुरूपा धनसम्मानकोपनम् ।
राजन्न कार्यं पूर्व्वं यत्नतो द्वारमीरितम् ।
ईशानाग्नी भवेत् पूर्व्वं आग्नेयादौ तु दक्षिणे ।
नैरृत्यादौ पश्चिमे स्यात् वायव्याग्नौ तु चोत्तरे ।
अष्टभाग कृते भागे द्वाराणाञ्च फलाफलम् ।
अश्वत्थप्लक्षन्यग्रोधा पूर्व्वादौ स्यादुडुम्बरः ।
एतस्य शोभन प्रोक्त ईशाने चैव शाल्मलि ।
पूर्व्वाद्यौ विघ्नदारौ स्यात् प्रासादस्य गृहस्य च ।"

इत्यादि गारुडे वास्तुमानं नाम ४६ अध्यायः ।
प्रासादलक्षणन्तु प्रासादशब्दे द्रष्टव्यम् ॥ * ॥
अपि च ।

मत्स्य उवाच ।

"प्रासादभवनादीनां निवेशं विस्तरान्नृप ।
कुर्य्यात् केन विधानेन कश्च वास्तुरुदाहृतः ।

सूत उवाच ।

भृगुरत्रिर्वशिष्ठश्च विश्वकर्म्मा मयस्तथा ।
नारदो नग्नजिच्चैव विशालाक्षः पुरन्दरः ।
ब्रह्मा कुमारो नन्दीशः शौनको गर्ग एव च ।
वासुदेवोऽनिरुद्धश्च तथा शुक्रबृहस्पती ।
अष्टादशैते विख्याता वास्तुशास्त्रोपदेशकाः ।
संक्षेपेणोपदिष्टं यन्मनवे मत्स्यरूपिणा ।
तदिदानीं प्रवक्ष्यामि वास्तुशास्त्रमनुत्तमम् ।
पुरान्धकवधे घोरे घोररूपस्य शूलिनः ।
ललाटस्वेदसलिलमपतद्भुवि भीषणम् ।
करालवदनं तस्मात् भूतमुद्भूतमुल्बणम् ।
ग्रसमानमिवाकाशं सप्तद्वीपां वसुन्धराम् ।
ततोऽन्धकानां रुधिरमपिबत् पतितं क्षितौ ।
तेन तत्समरे सर्व्वं पतितं यन्महीतले ।
तथापि तृप्तिमगमत्तद्भूतं न यदा तदा ।
सदाशिवस्य पुरतस्तपश्चक्रे सुदारुणम् ।
क्षुधाविष्टन्तु तद्भूतमाहर्त्तुं जगतीत्रयम् ।
ततः कालेन सन्तुष्टो भैरवस्तस्य भास्कर ।
वरं वृणीष्व भद्रं ते यदभीष्टं तवानघ ।
तदुवाच ततो भूतं त्रैलोक्यग्रसनक्षमम् ।
भवामि देवदेवेश तथेत्युक्तञ्च शूलिना ।
ततस्तत् त्रिदिवं सर्व्वं भूमण्डलमथान्तरम् ।
स्वदेहेनावरोध्यैव न्यपतत् प्रापतद्भुवि ।
भीतभीतैस्ततो देवैर्ब्रह्मणा चाथ शूलिना ।
दानवासुररक्षोभिरवष्टब्धं समन्ततः ।
येन यत्रैव चाक्रान्तं स तत्रैवावसत् पुनः ।
निवासात् सर्व्वदेवानां वास्तुरित्यभिधीयते ।
अवष्टब्धस्तदा तैर्वै विज्ञापयत् सर्व्वदेवताः ।
प्रसीदध्वं सुराः सर्व्वे युष्माभिर्निश्चलीकृतः ।
स्थास्यामि किं यदा चाहमवाङ्मुखमधोमुखम् ।
ततो ब्रह्मादिभिः प्रोक्तं वास्तुमध्ये तु यो बलिः ।
आहारो वैश्वदेवान्ते युष्माकञ्च भविष्यति ।
वास्तूपशमनो यज्ञस्तवाहारो भविष्यति ।
एवमुक्तस्ततो हृष्टः स वास्तुरभवत्तदा ।
वास्तुयज्ञः स्मृतस्तस्मात् ततः प्रभृति मानवैः ।"

इति मात्स्ये वास्तुभूतोद्भवो नाम २५१ अध्यायः ॥ * ॥

सूत उवाच ।

"अथातः सम्प्रवक्ष्यामि गृहकालविनिर्णयम् ।
यथाकाले शुभं ज्ञात्वा सदा भवनमारभेत् ।
चैत्रे व्याधिमवाप्नोति यो गृहं कारयेन्नरः ।
वैशाखे धेनुरत्नानि ज्यैष्ठे मृत्युं तथैव च ।
आषाढे भृत्यरत्नानि पशुवर्गमवाप्नुयात् ।
श्रावणे भृत्यलाभन्तु हानिं भाद्रपदे तथा ।
पत्नीनाशोऽश्वयुजे विन्द्यात् कार्त्तिके धनधान्यकम् ।
मार्गशीर्षे तथा भक्तं पौषे तस्करतो भयम् ।
लाभञ्च बहुशो विन्द्यादग्निं माघे विनिर्दिशेत् ।
फाल्गुने काञ्चनं पुत्रानिति कालबलं स्मृतम् ।
अश्विनी रोहिणी मूलमुत्तरात्रयमैन्दवम् ।
स्वाती हस्तानुराधा च गृहारम्भे प्रशस्यते ।
आदित्यभौमवर्ज्जन्तु सर्व्वे वाराः शुभावहाः ।
वज्रव्याघातशूलेषु व्यतीपातातिगण्डयोः ।
विष्कम्भगण्डपरिघवर्ज्जं योगेषु कारयेत् ।
श्वेते मैत्रेऽथ माहेन्द्रे गान्धर्व्वाभिजिदौहिणे ।
तथा वैराजसावित्रे मुहूर्त्ते गृहमारभेत् ।
चन्द्रादित्यबलं लब्ध्वा लग्नं शुभनिरीक्षितम् ।
स्तम्भोच्छ्रायादि कर्त्तव्यमन्यत्र परिवर्ज्जयेत् ।
प्रासादेष्वेवमेवं स्यात् कूपवापीषु चैव हि ।
पूर्व्वं भूमिं परीक्षेत पश्चाद्वास्तु प्रकल्पयेत् ।
श्वेता रक्ता तथा पीता कृष्णा चैवानुपूर्व्वशः ।
विप्रादेः शस्यते भूमिरतः कार्य्यं परीक्षणम् ।
विप्राणां मधुरास्वादा कषाया क्षत्रियस्य च ।
कषायकटुका तद्वद्वैश्यशूद्रेषु शस्यते ।
रत्निमात्रे तु वै गर्त्ते त्वनुलिप्ते तु सर्व्वतः ।
घृतमामसरावस्थं कृत्वा वर्त्तिचतुष्टयम् ।
ज्वालयेद्भूपरीक्षार्थं पूर्णं तत् सर्व्वदिङ्मुखम् ।
दीप्तौ पूर्व्वादि गृह्णीयाद्वर्णानामनुपूर्व्वशः ।
वास्तुः साधारणो नाम दीप्यते सर्व्वतस्तु यः ।
शुभदः सर्व्ववर्णानां प्रासादेषु गृहेषु च ।
रत्निमात्रमधो गर्त्तं परीक्ष्य खातपूरणे ।
अधिके श्रियमाप्नोति न्यूने हानिः समे समम् ।
फालकृष्टेऽथवा देशे सर्व्वबीजानि वापयेत् ।
त्रिपञ्चसप्तरात्रेण यत्र रोहन्ति तान्यपि ।
ज्येष्ठोत्तमा कनिष्ठा भूर्व्वर्ज्जनीयेतरा सदा ।
पञ्चगव्यौषधिजलैः परीक्षित्वा च सेचयेत् ।
एकाशीतिपदं कृत्वा रेखाभिः कनकेन तु ।
पश्चात् पिष्टेन चालिप्य सूत्रेणालोड्य सर्व्वतः ।
दश पूर्व्वायता रेखा दश चैवोत्तरायताः ।
सर्व्वा वास्तुविभागेषु विज्ञेया नवका नव ।
एकाशीतिपदं कृत्वा वास्तुवित् सर्व्ववास्तुषु ।
पदस्थान् पूजयेद्देवांस्त्रिंशत् पञ्चदशैव तु ।
द्वात्रिंशद्वाह्यतः पूज्याः पूज्याश्चान्तस्त्रयोदश ।
नामतस्तान् प्रवक्ष्यामि स्थानानि च निबोधत ।
ईशानकोणादारभ्य पूर्व्वदिक्स्थितः परः ।
जयन्तश्च महेन्द्रश्च आदित्यः सत्य एव च ।
भृशश्चैवान्तरिक्षश्च आकाशो वायुरेव च ।
पूषा च वितथश्चैव गृहक्षतयमावुभौ ।
गन्धर्व्वो भृङ्गराजश्च मृगः पितृगणस्तथा ।
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलाधिपः ।
असुरः शेषपापौ च रोगोऽहिर्मुख्य एव च ।
भल्लाटः सोमसर्पौ च अदितिश्च दितिस्तथा ।
बहिर्द्वात्रिंशदेते तु तदन्तश्चतुरः शृणु ।
ईशानादिचतुष्कोणसंस्थितान् पूजयेद्बुधः ।
आपश्चैवाथ सावित्रो जयो रुद्रस्तथैव च ।
मध्ये नवपदो ब्रह्मा तस्याष्टौ च समीपगान् ।
साध्यानेकान्तरान् विद्यात् पूर्व्वाद्यान् नामतः शृणु ।
अर्य्यमा सविता चैव विवस्वान् विबुधाधिपः ।
मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः क्रमात् ।
अष्टमश्चापवत्सस्तु परितो ब्रह्मणः स्मृताः ।
आपश्चैवापवत्सश्च पर्ज्जन्योऽग्निर्दितिस्तथा ।
पदिकानाञ्च वर्गोऽयमेवं कोणेष्वशेषतः ।
तन्मध्ये तु बहिर्विंशत् द्विपदास्ते तु सर्व्वतः ।
अर्य्यमा च विवस्वांश्च मित्रः पृथ्वीधरस्तथा ।
ब्रह्मणः परितो दिक्षु त्रिपदास्ते तु सर्व्वतः ॥
वंशानिदानीं वक्ष्यामि ऋजूनपि पृथक् पृथक् ।
वायुं यावत्तथा रोगात् पितृभ्यः शिखिनं पुनः ।
मुख्याद्भृशमथो विद्यात् वितथं यावदेव तु ।
सुग्रीवाददितिं यावत् मृगात् पर्ज्जन्यमेव च ।
एते वंशाः समाख्याताः क्वचिज्जयन्त एव च ।
एतेषां यस्तु सम्पातः पदं मध्यं समं तु यत् ।
मर्म्म चैतत् समाख्यातं त्रिशूलं कोणगञ्च यत् ।
स्तम्भन्यासेषु वर्ज्यानि तुलाविधिषु सर्व्वदा ।
कीलोच्छिष्टोपघातादि वर्ज्जयेद्यत्नतो नरः ।
सर्व्वत्र वास्तुनिर्द्दिष्टः पितृवैश्वानरायतः ।
मूर्द्धन्यग्निः समादिष्टो मुखे चापः समाश्रितः ।
पृथ्वीधरोऽर्य्यमा चैव स्तनयोस्तावधिष्ठितौ ।
वक्षःस्थले चापवत्सः पूजनीयः सदा बुधैः ।
नेत्रयोर्दितिपर्ज्जन्यौ श्रोत्रेऽदितिजयन्तकौ ।
सर्पेन्द्रौ स्कन्धसंस्थौ च पूजनीयौ प्रयत्नतः ।
सूर्य्यसोमादयस्तद्वद्बाह्वोः पञ्च च पञ्च च ।
रुद्रश्च राजयक्ष्मा च वामहस्ते समाश्रितौ ।
सावित्रः सविता तद्वत् हस्तं दक्षिणमाश्रितौ ।
विवस्वानथ मित्रश्च जठरे संव्यवस्थितौ ।
पूषा च पापयक्ष्मा च हस्तयोर्मणिबन्धने ।
तथैवासुरशोषौ च वामपार्श्वे समाश्रितौ ।
पार्श्वे तु दक्षिणे तद्वद्वितथः सगृहक्षतः ।
ऊर्व्वोर्यमाम्बुपौ ज्ञेयौ जान्वोर्गन्धर्व्वपुष्पकौ ।
जङ्घयोर्भृङ्गसुग्रीवौ स्फिक्स्थौ दौवारिको मृगः ।
जयशक्रौ तथा मेढ्रे पादयोः पितरस्तथा ।
मध्ये नवपदो ब्रह्मा हृदये स तु पूज्यते ।
चतुःषष्टिपदो वास्तुः प्रासादे ब्रह्मणा स्मृतः ।
ब्रह्मा चतुष्पदस्तत्र कोणेष्वर्द्धपदास्तथा ।
बहिष्कोणेषु वास्तौ तु सार्द्धाश्चोभयतः स्थिताः ।
विंशतिर्द्विपदाश्चैव चतुःषष्टिपदे स्मृताः ॥ * ॥
गृहारम्भे तु कण्डूतिः स्वाम्यङ्गे यत्र जायते ।
शल्यन्त्वपनयेत् तत्र प्रासादे भवने तथा ।
सशल्यं भयदं यस्मात् अशल्यञ्च शुभावहम् ।
हीनाधिकाङ्गता वास्तोः सर्व्वथा तु विवर्ज्जयेत् ।
नगरग्रामदेशेषु सर्व्वत्रैवं विवर्ज्जयेत् ।

चतुःशालं विमानञ्च द्विशालञ्चैकशालकम् ।
नामतस्तानि वक्ष्यामि स्वरूपेण द्विजोत्तमाः ॥"
इति मात्स्ये एकाशीतिमद्वास्तुनिर्णयो नाम २२० अध्यायः ॥ ० ॥

सूत उवाच ।

"चतुःशालं प्रवक्ष्यामि स्वरूपान्नामतस्तथा ।
चतुःशालं चतुर्द्वारैरलिन्दैः सर्वतोमुखम् ।
नाम्ना तत् सर्वतोभद्रं शुभं देवनृपालये ।
पश्चिमद्वारहीनञ्च नन्द्यावर्त्तं प्रचक्षते ।
दक्षिणद्वारहीनन्तु वर्द्धमानमुदाहृतम् ।
पूर्वद्वारविहीनन्तु स्वस्तिकं नाम विश्रुतम् ।
रुचकं चोत्तरद्वारविहीनं तत्प्रचक्षते ।
सौम्यशालाविहीनन्तु त्रिशालं धान्यकञ्च तत् ।
क्षेमवृद्धिकरं नृणां बहुपुत्रफलप्रदम् ।
शालया पूर्वया हीनं सुक्षेत्रमिति विश्रुतम् ।
धन्यं यशस्यमायुष्यं शोकमोहविनाशनम् ।
शुक्ले तु याम्यया हीनं विशालं शालया तु यत् ।
कुलक्षयकरं नृणां सर्वव्याधिभयावहम् ।
हीनं पश्चिमया यत्तु पक्षघ्नं नाम तत् पुनः ।
मित्रबन्धुसुतान् हन्ति तथा सर्वभयावहम् ।
याम्यापराभ्यां शालाभ्यां धनधान्यफलप्रदम् ।
क्षेमवृद्धिकरं नृणां तथा पुत्रफलप्रदम् ।
यमसूर्यञ्च विज्ञेयं पश्चिमोत्तरशालकम् ।
राजाग्निभयदं नृणां कुलक्षयकरञ्च तत् ।
उदक्पूर्वे तु शाले द्वे दण्डाख्यं यत्र तद्भवेत् ।
अकालमृत्युभयदं परचक्रभयावहम् ।
धनाख्यं याम्यपूर्वाभ्यां शालाभ्यां यद्द्विशालकम् ।
तच्छस्त्रभयदं नृणां पराभवभयावहम् ।
चुल्ली पूर्वापराभ्यान्तु सा भवेन्मृत्युसूचनी ।
वैधव्यदं स्त्रीणामनेकभयकारकम् ।
कार्य्युत्तरयाम्याभ्यां शालाभ्यां भयदं नृणाम् ।
सिद्धार्थवर्ज्जं कर्त्तव्यं द्विशालानि सदा बुधैः ॥ ० ॥
अथातः संप्रवक्ष्यामि भवनं पृथिवीपतेः ।
पञ्चप्रकारं तत् प्रोक्तमुत्तमादिविभेदतः ।
अष्टोत्तरं हस्तशतं विस्तारश्चोत्तमो मतः ।
चतुर्ष्वन्येषु विस्तारो हीयते चाष्टभिः करैः ।
चतुर्थांशाधिकं दैर्घ्यं पञ्चस्वपि निगद्यते ।
युवराजस्य वक्ष्यामि तथा भवनपञ्चकम् ।
षड्भिः षड्भिस्तथाशीतिर्हीयते तत्र विस्त-
रात् ।
त्र्यंशेन चाधिकं दैर्घ्यं पञ्चस्वपि निगद्यते ॥ ० ॥
सेनापतेः प्रवक्ष्यामि तथा भवनपञ्चकम् ।
चतुःषष्टिस्तु विस्तारात् षड्भिः षड्भिस्तु
हीयते ।
पञ्चस्वेतेषु दैर्घ्यञ्च षड्भागेनाधिकं भवेत् ॥ ० ॥
मन्त्रिणामथ वक्ष्यामि तथा भवनपञ्चकम् ।
चतुश्चतुर्भिर्हीना स्यात् करषष्टिः प्रविस्तरे ।
अष्टांशेनाधिकं दैर्घ्यं पञ्चस्वपि निगद्यते ॥ ० ॥
सामन्तामात्यलोकानां वक्ष्ये भवनपञ्चकम् ।
चत्वारिंशत्तथाष्टौ च चतुर्भिर्हीयते क्रमात् ।
चतुर्थांशाधिकं दैर्घ्यं पञ्चस्वेतेषु शस्यते ॥ ० ॥
शिल्पिनां कञ्चुकीनाञ्च वेश्यानां गृहपञ्चकम् ।
चत्वारिंशत् कराणान्तु हीनं विस्तरेण तत् ।
त्रिगुणं दैर्घ्यमेवोक्तं मध्यमेष्वेवमेव तु ॥ ० ॥
दूतकर्म्मान्तिकादीनां वक्ष्ये भवनपञ्चकम् ।
चतुर्थांशाधिकं दैर्घ्यं विस्तारो द्वादशैव तु ।
अर्द्धार्द्धकरहानिः स्यात् विस्तारात् पञ्चसु
क्रमात् ॥ ० ॥
दैवज्ञगुरुवैद्यानां सभास्तारपुरोधसाम् ।
तेषामपि प्रवक्ष्यामि तथा भवनपञ्चकम् ।
चत्वारिंशच्च विस्ताराच्चतुर्भिर्हीयते क्रमात् ।
पञ्चस्वेतेषु दैर्घ्यञ्च षड्भागेनाधिकं भवेत् ॥ ० ॥
चातुर्वर्ण्यस्य वक्ष्यामि सामान्यं गृहपञ्चकम् ।
द्वात्रिंशकं कराणान्तु चतुर्भिर्हीयते क्रमात् ।
आषोडशादिति परं नूनमन्त्यावसायिनाम् ।
दशांशेनाथ भागेन त्रिभागेनाथ पादिकम् ।
अधिकं दैर्घ्यमित्याहुर्ब्राह्मणादेः प्रशस्यते ।
सेनापतेर्नृपस्यापि गृहयोरन्तरेण तु ।
नृपवासगृहं कार्य्यं भाण्डागारन्तथैव च ।
सेनापतेर्गृहस्यापि चातुर्वर्ण्यस्य चान्तरम् ।
वासकोशगृहं कार्य्यं राजपूज्येषु सर्व्वदा ।
अन्तरप्रभवाणाञ्च स्वपितुर्यदिहेष्यते ।
तथा हस्तशतादर्द्धं गदितं वनवासिनाम् ।
सेनापतेर्नृपस्यापि सप्तत्या सहितेऽन्विते ।
चतुर्दशहृते व्यासे शालाव्यासः प्रकीर्त्तितः ।
पञ्चत्रिंशद्धृते तस्मिन्नलिन्दः समुदाहृतः ।
तथा षट्त्रिंशद्धस्तानु सप्ताङ्गुलसमन्विता ।
विप्रस्य महती शाला न दैर्घ्यं परतो भवेत् ।
दशाङ्गुलाधिका तद्वत् क्षत्रियस्य विधीयते ।
पञ्चत्रिंशत् करा वैश्ये अङ्गुलानि त्रयोदश ।
तावत्करैव शूद्रस्य युता पञ्चदशाङ्गुलैः ।
शालायास्तु त्रिभागेन यस्याग्रे वीथिका भवेत् ।
सोष्णीषं नाम तद्वास्तु पश्चाच्छ्रायोपमं भवेत् ।
पार्श्वयोर्वीथिका यत्र सावष्टम्भन्तदुच्यते ।
समन्ताद्वीथिका यत्र सुस्थितं तदिहोच्यते ।
शुभदं सर्व्वमेतत् स्यात् चातुर्वर्ण्ये चतुर्व्विधम् ।
विस्तारात् षोडशो भागस्तथा हस्तचतुष्टयम् ।
प्रथमो भूमिकोच्छ्राय उपरिष्टात् प्रहीयते ।
द्वादशांशेन सर्व्वासु भूमिकासु तथोच्छ्रयः ।
पक्वेष्टके भवेद्भित्तिः षोडशांशेन विस्तरात् ।
दारवैरपि कल्प्या स्यात् तथा मृण्मयभित्तिका ।
गर्भमानेन मानन्तु सर्व्ववास्तुषु शस्यते ।
गृहव्यासस्य पञ्चाशदष्टादशभिरङ्गुलैः ।
संयुतो द्वारविष्कम्भो द्विगुणश्चोच्छ्रयो भवेत् ।
द्वारशाखासु बाहुल्यमुच्छ्रायकरसम्मिते ।
अङ्गुलैः सर्व्ववास्तूनां पृथुत्वं शस्यते बुधैः ।
उडुम्बरोत्तमाङ्गे च तदर्द्धं प्रविस्तरे ॥"
इति मात्स्ये वास्तुविद्यायां गृहमानवर्णनो
नाम २५८ अध्यायः ॥ ० ॥

सूत उवाच ।

"अथातः सम्प्रवक्ष्यामि
द्वारा ... चतुर्थं युग
चतुर्थे भव
... यच उच्यते ।

त्रिंशच्च षोडशाद्यास्तु द्वादशान्ताः प्रकीर्त्तिताः ।
मध्यप्रदेशे च स्तम्भो वस्त्रो वृत्त इति स्मृतः ।
एते पञ्च महास्तम्भाः प्रशस्ताः सर्व्ववास्तुषु ।
पद्मवल्लीलता कुम्भपत्रदर्पणरूपिता ।
स्तम्भस्य नवमांशेन पद्मकुम्भान्तराणि च ।
स्तम्भतुल्या तुला प्रोक्ता हीनाश्चोपतुला तथा ।
त्रिभागेनेह सर्व्वत्र चतुर्भागेन वा पुनः ।
हीनं हीनं चतुर्थांशात्तथा सर्व्वासु भूमिषु ।
वासगेहानि सर्व्वेषां प्रविशेद्दक्षिणेन तु ॥ ० ॥
द्वाराणि तु प्रवक्ष्यामि प्रशस्तानीह यानि तु ।
पूर्व्वेणेन्द्रं जयन्तञ्च द्वारं सर्व्वत्र शस्यते ।
याम्यञ्च वितथञ्चैव दक्षिणेन विदुर्बुधाः ।
पश्चिमे पुष्पदन्तञ्च वारुणञ्च प्रशस्यते ।
उत्तरेण तु भल्लाटं सौम्यञ्च शुभदं भवेत् ।
तथा वास्तुषु सर्व्वत्र वेधं द्वारस्य वर्ज्जयेत् ।
द्वारे तु रथ्यया विद्धे भवेत् सर्व्वकुलक्षयः ।
तरुणा दोषबाहुल्यं शोकं पङ्केन जायते ।
अपस्मारो भवेन्नूनं कूपवेधेन सर्व्वदा ।
व्यथा प्रस्रवणेन स्यात् कीलेनाग्निभयं भवेत् ।
विनाशो देवताविद्धे स्तम्भेन स्त्रीकृतो भवेत् ।
गृहभर्त्तुर्विनाशः स्यात् गृहेण च गृहे कृते ।
अमेध्यावस्करैर्विद्धे गृहिणी बन्धकी भवेत् ।
तथा पुत्रभयं विद्यादन्त्यजस्य गृहेण तु ।
उच्छ्रायाद्द्विगुणां भूमिं त्यक्त्वा वेधो न विद्यते ।
स्वयमुद्घाटिते द्वारे उन्मादो गृहवासिनाम् ।
स्वयं वा पिहिते विद्यात् कुलनाशं विचक्षणः ।
मानाधिके राजभयं न्यूने तस्करतो भयम् ।
द्वारोपरि च यद्द्वारं तदन्तकमुखं स्मृतम् ।
अध्वानं मध्यदेशे तु न च यस्य विस्तरः ।
वज्रञ्च सङ्कटं मध्ये सद्यो भर्त्तुर्विनाशनम् ।
तथान्यपीडितं द्वारं बहुदोषकरं भवेत् ।
मूलद्वारं तथान्यैस्तु नाधिकं शोभनं भवेत् ।
कुम्भश्रीपर्णिवल्लीभिर्मूलद्वारन्तु शोभयेत् ।
पूजयेच्चापि तन्नित्यं बलिना चाक्षतोदकैः ॥ ० ॥
भवनस्य वटः पूर्व्वे दिग्भागे सार्व्वकामिकः ।
उदुम्बरस्तथा याम्ये वारुणे पिप्पलः शुभः ।
प्लक्षश्चोत्तरतो धन्यो विपरीतास्तु विद्धये ।
कण्टकी क्षीरवृक्षश्च आसन्नः सफलो द्रुमः ।
भार्य्याहानिं प्रजाहानिं कुर्व्वन्ति क्रमशस्तथा ।
न च्छिन्द्याद्यदि तानन्यानन्तरे स्थापयेत्
शुभान् ।
पुन्नागाशोकबकुलशमीतिलकचम्पकान् ।
दाडिमीपिप्पलीद्राक्षास्तथा कुसुममण्डपम् ।

जम्बीरपूगपनसद्रुमकेतकीभि-
र्जातीसरोजशतपत्रिकमल्लिकाभिः ।
यन्नारिकेलकदलीदलपाटलाभि-
र्युक्तं तदत्र भवनं श्रियमातनोति ॥"

इति मात्स्ये वास्तुविद्यायां वेधादिवर्णनो नाम
अध्यायः ॥ ० ॥

सूत उवाच ।

[illegible]

न देवधर्म्मसचिवचत्वराणां समीपतः ।
कारयेद्भवनं प्राज्ञो दुःखशोकभयं यतः ।
तस्य प्रदेशाश्चत्वारस्तथोत्सङ्गोऽग्रतः शुभः ।
पृष्ठतः पृष्ठभङ्गस्तु सव्यावर्त्तः प्रशस्यते ।
अपसव्यो विनाशाय दक्षिणे शीर्षकस्तथा ।
सर्व्वकामफलो नॄणां सम्पूर्णो नाम वामतः ।
एवं प्रदेशमालोक्य यत्नेन गृहमारभेत् । ● ।
अथ संवत्सरे पूर्णे मुहूर्त्ते शुभलक्षणे ।
रत्नोपरि शिलां न्यस्य सर्व्वबीजसमन्विताम् ।
चतुर्भिर्ब्राह्मणैस्तम्भं कृत्वालङ्कारपूजितम् ।
शुक्लाम्बरधरः शिल्पी सहितो वेदपारगैः ।
स्थापयेत् विन्यसेत् तद्वत् सर्व्वौषधिसमन्वितम् ।
नानावस्त्रघोषेण वन्दितामङ्गलैर्युतम् ।
ब्रह्मघोषेण वाद्येन गीतमङ्गलनिस्वनैः ।
पायसं भोजयेद्विप्रान् होमस्तु मधुसर्पिषा ।
वास्तोष्पते प्रतिजानीहि मन्त्रेणानेन सर्व्वदा ।
सूत्रपाते तथा कार्य्यमेवं स्तम्भोदये पुनः ।
द्वारवंशोच्छ्रये तद्वत् प्रवेशसमये तथा ।
वास्तूपशमने तद्वत् वास्तुयज्ञस्तु पञ्चधा ।
ईशाने सूत्रपातः स्यादाग्नेये स्तम्भरोपणम् ।
प्रदक्षिणञ्च कुर्व्वीत वास्तोः पदविवेशनम् ।
स्थिरा शालपर्णी । तामलकी भूम्यामलकी । शिवा
हरीतकी । हवो बाला ॥ ० ॥
"अगस्तिपत्रस्य रसेन नस्य
निहन्ति चातुर्थकमुग्रवीर्यम् ।
शिरीषपुष्पस्य निशाद्वयस्य
कल्केन वा तद्धृतसंयुतेन ।"
तत् नस्यम् ॥ ० ॥
"ज्वरस्य वेगकालञ्च चिन्तयन् ज्वरितं तु यः ।
सन्देहैरद्भुतैश्चापि विषयैर्नाशयेत् स्मृतिम् ।
सन्तत विषमस्यापि चोक्तस्य सुचिरोत्थितम् ।
ज्वरं समीक्ष्य पश्यैर्ज्वरघ्नैः समुपाचरेत् ।" ० ॥
सततादिविषमव्यतिरिक्तानां विषमज्वराणां चिकित्सा
सततादीनामिव कर्त्तव्या ।
"शीताभिभूते पुरुषे कुर्याच्छीतहरीं क्रियाम् ।
दाहाभिभूते तु विधिं विन्ध्याद्दाहनाशनम् ।
आच्छादनैर्बहुतरैर्गुरुभिः कम्बलादिभिः ।
तूलवस्त्रा महाशीत शीतादिज्वरितो हरेत् ।"
तूलपटी तुलाई इति लोके ।
"तं स्तनाभ्यां सुपीनाभ्यां पीवरोरुनितम्बिनी ।
युवतिर्गाढमालिङ्गेत्तेन शीतं प्रशाम्यति ।
कान्ताङ्गवष्ट्टनात्तस्य शीते निवारिते ।
प्रज्ञाद चास्य विज्ञाय पृथक् तां कारयेत्
प्रियम् ।
ततो दाहे तु सञ्जाते पश्चेरेरक्तभावे ।
शीतजैर्धारितैर्दाहं तस्यापनोदयेत् ।
तावक पुलिकापूर्वं तुल्यं तत्सम्भोदयेत् ।
सरमांसं तुल्य स्यात् मर्दयेत् जम्बीरकम् ।
तत तु सुखम्बहुपक्वैश्चैमपुटे पचेत् ।
शीत तद्रूपमेव पूर्वं गुञ्जामात्र सिताशृतम् ।
प्रभाते भक्षयेत्तेन याति शीतज्वरव्ययम् ।
नाग्निर्भवति कस्यापि कस्यापि न भवत्यपि ।
शक्रेण निर्मितेनैव शीतज्वरहरं परम् ।
मध्याह्नसमये पथ्यं विनाशकिंशो मस्तकं च ।" ० ॥
शीतज्वरे मुनयैरमृतकम् ।
"दया कातीपत्र जीर्णविपक्वजीरकं धन ।
वपिष्टा पितावृतं पूर्वं शीतज्वरापहम् ।
कायसारावाग्भौतिताचनस्यादुरवोरवे ।
षष्टदेवपत्राङ्गे शीतार्त पदेपने ।
दलेदीपवे पिष्टैस्तपस्वारवज्ञने ।
काञ्जिमाधितं तैलमन्यद्याच्छीतनाशनम् ।"
कायस्था हरीतकी । काकुची राधा । सिंहकाई
इति लोके । वयस्था गुडूची । पुरो गुग्गुलुः ।
चोरक । भटिउर । अरुणाभ पत्रम् । बद

[illegible]

[illegible]

[illegible]

तत्तदुपभोगः साक्षात्परम्परया जनयन्नेव नहि जीवप्रयोजनार्थं विना कस्यचिदुत्पत्तिरस्ति तेन स्रक्चन्दनादिभक्ष्याकाशान्तं सर्व्वमेव विषयो भवतीत्यर्थः । इति सिद्धान्तमुक्तावली ॥ * ॥ विषयीवित । इति भरतधृताजयः ॥ अयस्कः । शुक्रः । इन्द्रियग्राह्यः । जनपदः । इति मेदिनी ॥ कान्तादिः । इति शब्दरत्नावली ॥ नियामकः । यथा,—

"विधिशब्दो हि विध्यर्थं विनीतैर्मन्त्र उच्यते ।
विधेर्विषयं विनोतीति विषयोऽसौ नियामकः ॥"

इति भट्टकारिका ॥ * ॥

आरोपाश्रयः । यथा,—

"आरोपाख्या तु यत्रोक्तौ विषयी विषयस्तथा ।
विषयन्तु कृतेऽन्यस्मिन् सा स्यात् साध्यवसानिका ॥"

यथा, गौर्व्वाहीकः । इति काव्यप्रकाशे २ उल्लासः ॥ ("भोगसाधनं विषयः ।" इति तर्क्ककौमुदी ॥)

विषयाज्ञान, स्त्री, (विषयस्याज्ञानं यस्याम् ।) तन्द्रा । इति राजनिर्घण्टः ॥

विषयायी, [न्] पुं (विषयान् अयते प्राप्नोतीति । अय गतौ + णिनिः ।) राजा । वैषयिकजनः । इन्द्रियः । कामदेवः । विषयासक्तपुरुषः । इति मेदिनी । ने २३६ ॥

विषयि, [न्] क्ली, (विषयाः सन्त्यस्येति । विषय + इनिः ।) इन्द्रियम् । इति मेदिनी । ने २११ ॥

विषयी [न्] त्रि, (विषयोऽस्त्यस्येति । इनिः ।) विषयासक्तः । इति मेदिनी । न, २११ ॥

विषयी, [न्] पुं, (विषयोऽस्यास्तीति । इनिः ।) नृपतिः । कामदेवः । वैषयिकः । इति मेदिनी । ने, २११ ॥ ध्वनिः । इन्द्रियग्राह्यः । आरोप्यमाणः । यथा,—

"विषयन्तः कृतेऽन्यस्मिन् सा स्यात् साध्यवसानिका ॥"

विषयिणा आरोप्यमाणेन अन्तःकृते निगीर्णेऽन्यस्मिन् आरोपविषये सति सा स्यात् साध्यवसानिका । इति काव्यप्रकाशः ॥

विषल्या स्त्री अतिविषा । इति राजनिर्घण्टः ॥

विषवं, क्ली, विषम् । इति शब्दचन्द्रिका ॥

विषलता, स्त्री, (विषस्य लता ।) इन्द्रवारुणी । इति राजनिर्घण्टः ॥ (विषप्रधानलतामात्रे । यथा, गीतायां श्रीधरः । २ । ४२ । "विषलता यदापातरमणीयाम् ॥")

विषविद्या, स्त्री, विषमन्त्रः । इति विषवैद्यशब्दटीकायां भरतः ॥

विषवैद्य, पुं, (विषस्य वैद्यः ।) विषमन्त्रवेत्ता । ओझा इति ख्यातः । यथा । विषविद्यां वेत्ति अधीते वा विषवैद्यः अनुशतिकादित्वात् पदवृद्धिः । विषस्य वैद्यश्चिकित्सक इति वा । इति भरतः ॥ तत्पर्य्यायः । जाङ्गुलिकः २ । इत्यमरः ॥ जाङ्गलिकः ३ नरेन्द्रः ४ कौशिकः ५ व्यालग्राहः ६ चक्राटः ७ । इति जटाधरः ॥ व्यालग्राही ८ जाङ्गुलिः ९ जाङ्गलिः १० अहितुण्डिकः ११ व्यालग्राहः १२ गारुडिकः १३ । इति शब्दरत्नावली ॥

विषवैरिणी स्त्री (विषस्य वैरिणी ।) निर्व्विषा । इति राजनिर्घण्टः ॥

विषशालूकः पुं (विषस्य शालूकः ।) पद्मकन्दः । अस्य गुणाः । गुरुत्वम् । विष्टम्भित्वम् । शीतलत्वञ्च । इति राजवल्लभः ॥

विषशूकः पुं (विषं शूके यस्य ।) भृङ्गरोलः । इति भूरिप्रयोगः ॥

विषशृङ्गी [न्] पुं (विषं विषयुक्तं शृङ्गं तदस्यास्तीति । विषशृङ्ग + इनिः ।) भृङ्गरोलः । इति हारावली ॥

विषसूचक, पुं (विषं सूचयति विषयुक्तान्नादिदर्शने स्वतः मदं प्रापयतीति । सूच + णिच् + ण्वुल् ।) चकोरपक्षी । इति हेमचन्द्रः ॥

विषसृक्वा, [न्] पुं, (विषं सृक्वणि यस्य ।) भृङ्गरोलः । इति त्रिकाण्डशेषः ॥

विषहन्त्री, स्त्री, (विष + हन + तृच् । स्त्रियां ङीप् ।) अपराजिता । निर्व्विषा । इति राजनिर्घण्टः ॥

विषहरः, त्रि, (हरतीति । हृ + अच् । विषस्य हरः ।) गरलनाशकौषधादिः । यथा । ॐ ह्र च ।

"मन्त्रोऽयं हरते वह सर्व्ववृश्चिकजं विषम् ।
पिप्पली मरिचञ्चैव शृङ्गवेरञ्च सैन्धवम् ।
मरीचं दधि कुष्ठञ्च नस्ये पाने विषं हरेत् ॥
त्रिफला टङ्कणञ्चैव चन्दनं घृतसंयुतम् ।
एतत्पानाच्च लेपाच्च विषनाशो भवेद्ध्रुवम् ॥
मार्गं वनस्य वाल्मीकि हरितालं मनःशिला ।
एष योगो विषं हन्ति वैनतेय इवोरगान् ॥
सैन्धवं सुवर्चं चूर्णं दधिमध्वाज्यसंयुतम् ।
वृश्चिकस्य विषं हन्ति लेपोऽयं वृषध्वज ॥"

इति गारुडे १८९ अध्यायः ॥

विषहरा, स्त्री, मनसादेवी । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । ९ । ४७ । ५९ ।
"जरत्कारुप्रियास्तीकमाता विषहरेति च ॥")

विषहरी, स्त्री, मनसादेवी । इति शब्दरत्नावली ॥ (यथा देवीभागवते । ९ । ४७ । ४७ ।
"विषं संहर्त्तुमीशा या तस्माद्विषहरी स्मृता ॥")

विषहा, स्त्री, (विष + हन + टाप् ।) देवदालीलता । निर्व्विषा । इति राजनिर्घण्टः ॥

विषा, स्त्री अतिविषा । इत्यमरः ॥ बुद्धिः । इत्युणादिकोषः ॥ (अस्याः पर्य्यायो गुणाश्च यथा,

"काश्मीरातिविषा श्वेता श्यामा शुक्ला विषा स्मृता ॥"

इति वैद्यकरत्नमालायाम् ॥

"विषा त्वतिविषा विश्वा शृङ्गी प्रतिविषारुणा ।
शुक्लकन्दा चोपविषा भङ्गुरा घुणवल्लभा ॥
विषा सोष्णा कटुस्तिक्ता पाचनी दीपनी हरेत् ।
कफपित्तातिसारामविषकासवमिकृमीन् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

विषाङ्कुरः, पुं, (विषस्याङ्कुरः ।) शल्यास्त्रम् । इति त्रिकाण्डशेषः ॥

विषाण, क्ली, कुष्ठौषधम् । पशुशृङ्गम् । (यथा साहित्यदर्पणे । १० ।

"पिबसि शुकं रदकवदने
स्मरमर्पयसि स्मरादरदने ।
वितरसि सुरभ मदिरविषाणे
विदधासि नो भोगविधाने ॥")

हस्तिदन्तः । इति मेदिनी । णे, ७७ ॥ (यथा, शिशुपालवधे । १ । ६ ।

"न जातु वैनायकमेकमुद्धृतं
विषाणमद्यापि पुनः प्ररोहति ॥")

कोलदन्तः । इति हेमचन्द्रः ॥ (विशेषेण मद दातरि, त्रि । यथा ऋग्वेदे । ५ । ४४ । ११ ।

"विषाणं परिपानमन्ति ते ।"

'विषाणं विशेषेण मदस्य दातारम् ।' इति तद्भाष्ये सायनः ॥)

विषाणिका, स्त्री, मेषशृङ्गी । इति रत्नमाला ॥ (अस्याः पर्य्यायो यथा —

"शृङ्गी कर्कटशृङ्गी स्यात् कुलीरश्च विषाणिका ।
अजशृङ्गी च रक्ता च कर्कटाख्या च कीर्त्तिता ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) सातला । कर्कटशृङ्गी । आवर्त्तकी । इति राजनिर्घण्टः ॥

विषाणी, स्त्री क्षीरकाकोली । अजशृङ्गी । इति मेदिनी । णे, ७७ ॥ वृश्चिकाली । इति राजनिर्घण्टः ॥ तिन्तिड़ी । इति शब्दचन्द्रिका ॥

विषाणी, [न्] पुं, (विषाणमस्यास्तीति । विषाण + इनिः ।) हस्ती । शृङ्गी । ऋषभः । (यथा, हरिवंशे । २ । ४ । २२ ।
"सहसा विषाणिनश्चैव वृषभाश्च महाबलाः ॥")
ऋषभनामौषधम् । शृङ्गाटकः । इति राजनिर्घण्टः ॥

विषादः पुं, (वि + सद + घञ् ।) अवसादः । यथा,—

"साधु मौक्ष्यं विषादोऽवसादः सादो विषण्णता ॥"

इति हेमचन्द्रः ॥

(यथा, भागवते । १ । ११ । १ ।
"दध्मौ दरवरं तेषां विषादं शमयन्निव ॥")

विषादनी, स्त्री, पलाशीलता । इति राजनिर्घण्टः ॥

विषानन, पुं, (विषमानने यस्य ।) सर्पः । इति शब्दमाला ॥

विषान्तकः, पुं, (विषस्य अन्तकः नाशकः । पीतविषत्वात् ।) शिवः । इति हेमचन्द्रः ॥ विषनाशके त्रि ॥

विषापहः, पुं (विषं अपहन्तीति । हन + डः ।) मुष्ककवृक्षः । इति राजनिर्घण्टः ॥ (विषनाशके त्रि । यथा मनौ । ७ । २१७ ।
"सुपरीक्षितमन्नाद्यमद्यान्मन्त्रैर्विषापहैः ॥")

विषापहा स्त्री, इन्द्रवारुणी । निर्व्विषा । इति राजनिर्घण्टः ॥ नागदमनी । इति भावप्रकाशः ॥

[illegible]

[illegible]

[illegible]

"विड्विरा मधुरा शीता कषाया कटु
पाकिन ।
वल्या श्यामश्लेष्मदोषघ्नी पथ्याक्ते लघव स्मृता ।"
इति भावप्रकाशः ।
("लावतित्तिरिकपिञ्जलवर्त्तीरवर्त्तिकावर्त्तक
मयूरकालतीक्षकोरकलविङ्कमयरककरोपचक
कुक्कुटवारङ्ग्रशतपत्रकङ्कनिनिरिकुरवालुकयव
लवप्रभृतयश्चाहत्ता विष्किरा कथम्‌ शीत
मधुरा कषाया दोषप्रशमनाश्च ।" इति सुश्रुते
सूत्रस्थाने ४६ अध्यायः । ● । दर्व्वीकरान्तर्गत
सर्पविशेषः । यथा,— "पुण्डरीको भृकुटी
मुखो विष्किरः पुष्पाभिकीर्णो गिरिसर्प ऋजु
सर्पः श्वेतोदरो महाशिरा अलगर्द्दो आशी
विष इति ।" इति च सुश्रुते कल्पस्थाने चतुर्थे
ऽध्याये ।)

विटः त्रि, प्रविष्टः । विशधातोः सम्प्रत्ययेन
निष्पन्नमिदम् ।

विटपं, क्ली, ("विटपविटपविटपिमोलया ।" इत्यु
क्तम्निरुक्ते विटपस्थाने विटपपाठेन विशधातोः
कपनुप्रत्ययेन साधुः इति केचित् ।) खतम् ।
श्रमरः । विटपं विटपः । इति टङ्कीकायां
रूपद्वयम् । (यथा, रघुः । ११ । ६८ ।
"यामभिमृदया निपेतुषी
सा खकाननमुपं न केवलाम् ।
विटपचयपराजयविहारी
रावकश्रियमपि व्यकम्पयत् ।")

विटम्भः, पुं, (वि+स्तम्भ+घञ् ।) प्रतिबन्धः ।
(यथा, भागवते । ५ । २२ । १२ ।
"स इष्टिविटम्भयपशोपशमनः ।"● ।
आक्रमणम् । यथा भारवि । १२ । १६ ।
"प्रविकर्षविशादभिमरन्
परविटम्भविपीडितस्थदावीम् ।")
रोगविशेषः । इति मेदिनी । भे २ । स तु
आनाहरोगः । तस्य लक्षणमाह ।
"आमं शकृद्वा निचितं क्रमेण
भूयो विबद्धं विगुणानिलेन ।
प्रवर्त्तमानं न यथास्वमेनं
विकारमानाहमुदाहरन्ति ।"
आमम् अपक्वमाहारघारं शकृत् पुरीषं वा
क्रमेण निचितं सञ्चितम् । भूयो विगुणानिलेन
दुष्टवायुना विबद्धं आमशोणितं वा यथास्व
पूर्ववत्प्रवर्त्तमानं एवं विकारं आनाहं
आहुः । ● । तस्यामपक्वमानाहमाह ।
"तस्मिन् भवत्यामसमुद्भवे तु
तृष्णा प्रतिश्यायशिरोविदाहाः ।
आमाशये शूलमथो गुरुत्वं
हृत्स्तम्भ उद्गारविघातनञ्च ।"
विघातनं अप्रवृत्तिः ।●। पक्वमुपलक्षणमाह ।
"स्तम्भ कटीपृष्ठपुरीषमूत्रे
शूलोऽथ मूर्च्छा शकृतो वमिश्च ।
श्वासश्च पक्वाशयजे भवन्ति
तथालसोक्तानि च लक्षणानि ।"
पक्वाशयजे पक्वाशयजे । अलसोक्तानि
आध्माननातनिरोधादीनि । ● । आनाहोदा
वर्त्तयोश्चिकित्सायास्तुल्यत्वादुभयचिकित्सा अत्र
लिख्यते । अथोदावर्त्तानां चिकित्सा ।
"अधोवातनिरोधोत्थे सुदावर्त्ते हितं मतम् ।
स्नेहपानं तथा स्वेदो वस्तिर्यच्चानुलोमनम् ।
विड्विघातसमुत्थे तु विड्भेदान्नं तथौषधम् ।
वर्त्त्याभ्यङ्गावगाहश्च स्वेदो वस्तिर्हितो मतः ।"
वर्त्तिः फलवर्त्तिः ।
"मूत्रावरोधजनिते क्षीरवारिसितां पिबेत् ।
दुःस्पर्शास्वरसं चापि कषायं ककुभस्य च ।
दुःस्पर्शा कण्टकारी दुरालभा च सुश्रुतमतात् ।
एर्व्वारुबीजं तोयेन पिबेद्वा लवणीकृतम् ।
सितामिक्षुरसं क्षीरं द्राक्षारसमथापि वा ।
सर्व्वथैव प्रकुर्व्वीत मूत्रकृच्छ्राश्मरीविधिम् ।
जृम्भाभिघातजे स्नेहं स्वेदं चापि प्रयोजयेत् ।
अश्रूणामपि मुञ्चीत समीरणहरान् विधीन् ।
नेत्रनीरावरोधोत्थे सुप्तेदुग्धेन शोचनम् ।
सुप्यात् सुखेन तस्यापि कथयेच्च कथाः प्रियाः ।
क्षिवाभिघातजे तीक्ष्णाञ्जनघ्राणकर्म्मणे ।
प्रवर्त्तयेत् ध्रुवं वक्रं स्नेहस्वेदौ प्रयोजयेत् ।"
तीक्ष्णं मरीचराजिकादि ।
"उद्गारस्यावरोधे तु स्नैहिकं धूममाचरेत् ।
छर्द्दिनिग्रहसञ्जाते वमनं लङ्घनं हितम् ।
विरेचनं चाथ मतं तैलेनाभ्यञ्जनं तथा ।
वस्तिशुद्धिकरे सिद्धं चतुर्गुणजलं पयः ।
आमारिनायात् क्वथितं पीतवन्तं प्रकामतः ।
रमयेयुः प्रिया नार्य्यः शुक्रोदावर्त्तिनं नरम् ।
तस्याभ्यङ्गोऽवगाहश्च मदिरा चरणायुधः ।
शालिः पयो निरूहश्च हितं मैथुनमेव च ।
क्षुद्विघातसमुद्भूते स्निग्धमुष्णं तथा लघु ।
रूच्यमल्पं हितं भक्ष्यं पुष्पं सेव्यं सुगन्धि यत् ।
तृषाविघातसम्भूते शीतः सर्व्वो विधिर्हितः ।
कर्पूरशिशिरं स्वच्छं पिबेत्तोयं घने घने ।
श्रमश्वासे धृते श्रान्तो विश्रामः सरसोदनः ।
निद्रावेगविघातोत्थे पिबेत् क्षीरं सितायुतम् ।
सुवाङ्गं सुसम्यक् च हिता स्नोतस्विनी कथाः ।"
वातादिप्रविघातजनितानामुदावर्त्तानां चिकि
त्सामभिधाय कफादिकुपितवातजनितस्य उदा
वर्त्तस्य चिकित्सामाह ।
"हिङ्गुमाक्षिकसिन्धूत्थैः पिष्टैर्वर्त्तिं विनिर्म्मिताम् ।
एतां न्यस्तां गुदे व्यक्तोदावर्त्तविनाशिनीम् ।"
फलवर्त्तिः ।
"मदनं पिप्पली कुष्ठं वचा गौराश्च सर्षपाः ।
गुडक्षीरसमायुक्ता फलवर्त्तिरुदीरिता ।"
मदनफलादिवर्त्तिः । ● ।
"स्नुकपयः सितालाक्षा श्यामावर्त्त्ये द्रवोक्तिकम् ।
प्रातर्भोजनकाले मधुना विडालपदकं नरो
लिह्यात् ।
एतस्मादुदरीषि देये विमेदरात्र्यै ।
मधुरं वरपत्तिवोमं चूर्णं नाराचकं नाम्ना ।"
इति नाराचचूर्णम् । ● ।
"शचीन पिप्पलीमूलं त्रिवृद्दन्ती च चित्र-
कम् ।
तत्तर्षं गुडसमिश्रं भक्षयेत् प्रातरुत्थितः ।
एतद्गुडाष्टकं नाम्ना बलवर्णाग्निवर्द्धनम् ।
उदावर्त्तप्लीहगुल्मशोथपाण्ड्वामयापहम् ।"
इति गुडाष्टकम् । ● ।
"मूलकं शुष्कमार्द्रं च वर्षाभूपञ्चमूलकम् ।
आरनालयुतं चापि पक्वा तैलं घृतं
पचेत् ।
तत् पीतं शमयेत् क्षिप्रमुदावर्त्तमशेषतः ।"
पञ्चमूलकमत्र हवनम् । शुष्कमूलकाद्यघृतम् । ● ।
अथ आनाहस्य चिकित्सा ।
"तुल्यकारणकार्य्यत्वादुदावर्त्तहरीं क्रियाम् ।
आनाहेऽपि च कुर्व्वीत विशेषश्चाभिधीयते ।
त्रिवृत्कृष्णाहरीतक्यो द्विपञ्चपञ्चभागिकाः ।
गुडेन तुल्या वटिका हरन्त्यानाहमुल्वणम् ।
वर्त्तिस्त्रिकटुसैन्धवसर्षपगृहधूमकुष्ठमदनफलैः ।
मधुनि गुडे वा पक्त्वैर्विहिता साङ्गुष्ठपरि
माणाः ।
वर्त्तिरियं दृष्टफला शनैः प्रणिहिता गुदे घृता-
भ्यक्ते ।
आनाहोदावर्त्तौ शमयति जठरं तथा
गुल्मम् ।"
त्रिकट्वाद्या वर्त्तिः । इति भावप्रकाशः ।
(त्रि विशेषेण स्तम्भयिता । यथा, ऋग्वेदे ।
८ । ८६ । ४५ ।
"दिवो विटम्भ उपमो विचक्षणः ।")

विटम्भी, [न्] त्रि, (विटम्भयतीति । वि+स्तम्भ
+णिनि ।) विटम्भरोगजनकः । यथा —
"वैदला गुरवो भक्ष्या विटम्भिशटमाहताः ।"
इति राजवल्लभः ।
(यथा च सुश्रुते । १ । ४५ ।
"प्रायः पामालिकं क्षीरं गुरु विटम्भि शीत
लम् ।"
विटम्भोऽस्यास्तीति । विटम्भ+इनि ।)
विटम्भरोगविशिष्टश्च ।

विटरः पुं (विस्तीर्य्यते इति । वि+स्तृ+अप् ।
"वृक्षासनयोर्विष्टरः ।" ८ । ३ । ९३ । इति
निपातनात् षत्वम् ।) विटपी । वृक्षः ।
पीठाद्यासनम् । इत्यमरः । आदिना कुशा
सनादिग्रहः । इति भरतः । ● । (यथा,
भागवते । १ । १८ । १६ ।
"वाचोद्गुणेऽभ्युत्थितेन हृदयाश्रीयविष्टरम् ।
इम्रनीवतर्ण स्थान मनोवचनवृन्दम् ।")
विष्टरलक्षणमाह । विष्टरस्तु वाहुसंख्यकाभ्यः
वर्णविनाधोदह्यया अथ आत्मभी । तथा
च यज्ञपार्श्वः ।
"अद्दैको भवेद्ब्रह्मा ब्रह्मणैस्तु विष्टरः ।
दक्षिणावर्त्तको ब्रह्मा वामावर्त्तस्तु विष्टरः ।"
इति ।
छन्दोगपरिशिष्टम् ।
"इभवक्त्रा च विज्ञिता विष्टरासनयैमवि ।"

कटुकाः। हैमवत्यः इति भाषा। इति शब्द-चन्द्रिका। (अस्याः पर्यायो यथा,—
"अतिविषा सुगन्धा स्यात् [illegible] विषा।"
इति वैद्यकरत्नमालायाम्।)
अशेषक्षार्थिका। इति रत्नमाला।

विषाभावा, स्त्री, (विषस्याभावो यत्र सा।) निर्विषा। इति राजनिर्घण्टः।

विषायुधः, पुं, (विषमेवायुधं यस्य।) सर्पः। इति शब्दरत्नावली। विषयुक्तास्त्रे त्रि।

विषारः पुं (विषेण ऋच्छतीति। ऋ+अण्। उप समम्।) सर्पः। इति शब्दचन्द्रिका।

विषारातिः, पुं, (विषस्यारातिः नाशकः।) कृष्ण-धुस्तूरः। इति राजनिर्घण्टः।

विषारिः, पुं, (विषस्यारिः।) महाचञ्चुशाकः। घृतकरञ्जः। इति राजनिर्घण्टः। (विषनाशक-मात्रे, त्रि।)

विषास्यः, पुं (विषमास्ये यस्य।) सर्पः। इति शब्दरत्नावली। विषयुक्तमुखे, त्रि।

विषाह्वा, स्त्री, महाकन्दः। इति शब्दचन्द्रिका। (महाकन्दशब्देऽस्या विवृतिर्ज्ञेया।)

विषु, अ, साम्यम्। इति सिद्धान्तकौमुद्यां भरतः। नानारूपम्। इति रामाश्रमः।

विषुणः, पुं (विषु साम्यं सनोतीति। "कोमा दीति।" १।२।१०। इति णः। षत्वात् णत्वम्।) विषुवम्। यथा। "विषु नानारूपं समत्वं विषुणः तत्साध्योऽनेन विषुवे अस्मिन् अहोरात्रयोर्विषुवत्त्वमिति नामानि तुल्यत्वे च कालम्।" इत्यमरटीकायां रामाश्रमः। (नानारूपम्। यथा, ऋग्वेदे।१।२३।८।
"वहन्ति विषुणं विचायत्।"
"विषुणं विरूपं नानारूपम्।" इति तद्भाष्ये सायणः। पर्याय। यथा, ऋग्वेदे।१०।१।१।
"अधुरेको विषुणः।"
"विषुणः विलक्षणः।" इति तद्भाष्ये सायणः। विपरीतः। यथा, ऋग्वेदे।१।११।१।
"सहावद्धि विषुणा रूप एते।"
"विषुणा विरूपौ वर्णभावा।" इति तद्भाष्ये सायणः। पराङ्मुखः। यथा ऋग्वेदे। १।१३।६।
"विषुणः नमसां सकाशाद्धी
अहनो विषुणः समनो दधः।"
"विषुणः पराङ्मुखः।" इति तद्भाष्ये सायणः।)

विषुव क्ली, विषुवम्। इत्यमरटीकायां भरतः।

विषुवं, क्ली, समरात्रिन्दिवकालः। तत्पर्यायः। विषुवत् २। इत्यमरः। विषुवम् ३ विषुण ४ विषुव ५। इति शब्दरत्नावली। विषुणः ६। इति रामाश्रमः। विषुवः ७। इति जटाधरः। तत्तु मेषतुलयोः सङ्क्रान्तौ। यथा —
"मेषतुलासङ्क्रान्तौ तु तु वृषदिवसानां।
विषुवतौ तुल्ये देवे होरात्रं समापयेत्।"
इति तिथ्यादितत्त्वम्।०।
तेषु मेषादिसङ्क्रमणं विषुवसामध्यं यथैव स्यात्। यथा,—
"विषुवाख्यो ग्रहः स्यादिति शब्दविनिर्णयम्।
महाविषुवमाख्यातं वासवमिषेवधिविषुवम्।
तथा स्यान्महाविषुवं जलाशाधिपविषुवम्।"
इति शब्दरत्नावली।०।
विषुवारम्भकालो यथा,—
"मकरक्रान्तितः पूर्वं यथाद् तारा दिगन्तरे।
एकतः चतुर्णवतमासमब्देन तु।
घटर्कयक्षरार्ककार्येणैश्च आदाय रवेः।
एव चतुर्थर्णमप्यनाद्यं क्रमात्।
तुल्यतेव च वहन् स्यादुन्नतात् रवेर्ध्रुवम्।
कर्केऽभ्रमके मतान्तरो द्विमासादयम्।
चरमोद्यपदेनैव विषुवारम्भकं यथा।
रविसङ्क्रान्तितो मेषतुलयोर्भिन्न एव।
विषुवं मीनकन्याद्ये मेषाद्येऽन्ते यथाक्रमे।
दिनमानात् मीनादौ कन्यादौ चाधिकं ध्रुवम्।
ततो मेषादितुलादौ मध्यमाविषौ।
विषुवाद्यं चतुर्थमतस्थायी वहते क्रमात्।
चकटाद्यं घटमिथुनकियाद्यं युक्तयोरपि।
मध्यादिष्टे दिवसाद् क्रमाद् युक्तवत् वासरे।
मध्याह्नमयनीमान्त बीज पूर्वक्रमेण हि।
दिने दिने मानहाराश्चाम बीज दिवानिशि।
सममानं द्वन्द्वदा क्रान्तिमानविवर्जं।
घटर्कयक्षरार्कैः तत्र स्यात् वीक्षयोदके।
पुष्पादक्षरोदयात् एतं धाम्नोदन्ति।"
इति ज्योतिषतत्त्वम्।०।
अपि च
"मेषक्रमतः पूर्वं मध्याह्ना दिनान्तरे।
प्राग्दिवसाद्युत्कोचितेन विषुवारम्भं भवेत्।
अधोऽन्तरे सौरे देवे भगविधौ धवे।
विषुवारम्भ तत्र तत मासं निशाविधौ।
तत्र प्रतिदिनं देवा मदादिनिपर्यायका।
वहते मेषविषुवप्रयुक्तमुत्तरमार्गेण।
तथा मेषतुलादायक पादेनैर्विषुवाधिका।
तात्कालिकोत्पन्नेन चतुर्घटिका मता।
तत कर्कटमीनाद्युपवर्णे वहते क्रमात्।
तदादिवसमानेन देवा कुर्वन्ति विश्रितम्।
दाहसमाहाराणपर्यन्त माडीवर्णिकामिका।
ताडमानिमविशाल घटकैकपर्यन्तिका।
दिवामान द्वन्द्वरेखका राशि प्रमाणकम्।
वैराग्यशाली निशामनं रात्रिमानं तुलादिषु।
घटर्कयक्षरार्कैः तत्र स्यात् रात्र्याद्यके।
पुष्पादक्षरोदयात् तत्र पवार्दयादिके।"
इति मलमासतत्त्वम्।

विषुवत् क्ली, विषुवम्। इत्यमरः। (यथा, महा-भारते। ३।१६८।२१।
"अहन्ति मघवायुज निशा रात्रौ
विषुवन्ति चाषाढमुखे समम्।"
पाण्डव। यथा ऋग्वेदे। १।९१।१०।
"आदित्याङ्गिरसो मध्ये विषुवन्त्येव।"
"विषुवत् स्थानमेव धारयित्वा मध्ये वक्षिं मध्ये वर्तमानम्।" ... विषुवत् मध्ये वक्षः

दौवारिकस्य मुखम्। तथो मधुना कुक्कुट-स्याधिकृत्ये मधुर उत्पन्नम्। अस्येन्मन्द्र तथा इति वर्तिकायां दीप आवृत्तेन मयोक्तम्।" इति तद्भाष्ये सायणः।)

विषौषधी, स्त्री, (विषस्यौषधी।) नागदन्ती। इति रत्नमाला।

विष्कम्भ, पुं, सप्तविंशतियोगान्तर्गतप्रथमयोगः। तुम्बवर्णेन तस्य प्रथमघटिकात्रयं त्याज्यम्। यथा —
"प्रथमे पञ्च विष्कम्भे वज्रे शूले च सप्तकाः।
गण्डव्याघातयोः षट् च नव व्यतिपातयोः।
वैधृतिकर्कयोर्योगौ च सकलौ परिवर्जयेत्।"
इति ज्योतिषसारसंग्रहः।०।
तत्र जातफलम्।
"विष्कम्भयोगे यदि जन्मलाभे
नार्थैर्युतो मनुजस्तरामेम्।
सुरूपभाग्यधनवीर्ययुक्तः
स्यात् निर्जितारिः कर्मठः।"
इति कोष्ठीप्रदीपः।०।
विस्तारः। (यथा, कुमारसम्भवे।१।२४।
"उच्चैःशिरःस्तुङ्गः स्थावरानाम् विष्कम्भः।")
प्रतिबन्धः। रूपकाङ्गविशेषः। योगिनां बन्ध-विशेषः। इति मेदिनी। भे, १८। वृक्षः। इति शब्द-रत्न। अर्गला। इति भरतः।

विष्कम्भी [न्] पुं, (विष्कम्भयति स्तम्भयतीति। वि+स्कम्भ+णिनि।) अर्गला। यथा। "तद्विष्कम्भो-ऽर्गलं च ना।" इत्यमरटीकायां रायमुकुटधृत-वचनं नपुंसकत्वे इति ज्ञातम्। तद् यथार्थं विष्कम्भीति वर्णम् इति महाभाष्यादिषु नैव काली प्रदृश्यते वाचस्पत्येषु विष्कम्भीति नाम च दृष्टे। अविष्कम्भोऽयमित्यत्र पाठः। विष्कम्भी चक्ररक्षामेद्रकः। इति मञ्जुः। इति मुकुटः।
"विष्कम्भो योगभेदे स्यात् विस्तारप्रतिबन्धयोः।
रूपकाङ्गविशेषे च।" इति मेदिनीकारात्
विष्कम्भ इति पाठः।" इति भरतः।

विष्करः, पुं, (विष्किरति भक्षयति अन्यानीति। कृ+अच्।) बालकपक्षी। इति राज-निर्घण्टः।

विष्किरः पुं, (विकिरतीति। वि+कॄ विक्षेपे+ इगुपधेति कः। "विष्किरः शकुनिर्विकिरो वा।" ६।१।१५०। इति सूत्रेण सुडागम इति ज्ञानम्।) पक्षी। इत्यमरः। विष्किरादिविशेष मयूरकुक्कुटादयः।
"लावाद्या विष्किरा एव मयूरा कुक्कुटाः कटाः।
तत्र तित्तिरमयूरा मध्यमा तिन्दुकामिताः।"
इति राजवल्लभः।०।
अथ विष्किराणां प्रकरणं कुर्वाण।
"स्थलजाः विष्किरा विष्किरा [illegible]।
कपिञ्जलकुक्कुटाद्याश्च विष्किराः चकोरकुलाः।
विकिरेऽपि प्रसन्नेति प्रभावकाल विष्किराः।
वाजिरेण इति प्राहुः कपिञ्जलो मयूरादिरिति।"
कुक्कुट मयूर इति कोषे।

"पिच्छिला मधुरा शीता कषाया कटु
पाकिनः ।
मत्स्या रुच्यास्त्रिदोषघ्नाः पथ्याश्च लवणः स्मृताः ।"
इति भावप्रकाशः ॥
("वार्मिमत्स्यकपिञ्जलवर्णीरवर्मिकावर्मिक मद्गुकामातीरकचकोरकजिह्वमयरककरोचक कुक्कुटवाग्गुद्रवतपनककुलिपिरिकुरवाङ्कवव जलप्रभृतयस्त्वाद्यता पिच्छिला गुरवः शीत मधुराः कषाया दोषघ्नश्च ।" इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥ * ॥ दर्व्वीकरान्तर्गत सर्पविशेषः । यथा,— "कृष्णसर्पो भुकुटी मुखो पिच्छिलः पुष्पाभिकीर्णो गिरिसर्प अनु सर्पः श्वेतोदरो महाशिरा अलगर्द्दो आशी विष इति ।" इति च सुश्रुते कल्पस्थाने चतुर्थे ऽध्याये ॥)

विट्, त्रि, प्रविष्टः । विशधातोः क्तप्रत्ययेन निष्पन्नमिदम् ॥

विष्टप, क्ली, ("विष्टपविष्टपशिपिविष्टमा ।" इत्यु णादिसूत्रे विष्टपस्थाने विष्टपपाठेन विशधातोः कपन्प्रत्ययेन साधु इति केचित् ।) भुवनम् । इत्यमरः ॥ पिष्टपं पिष्टपः । इति तट्टीकायां रूपभेदम् ॥ (यथा, रघुः । ११ । ८५ ।
"वाचमिमपृथ्वया निपेतुषी
सा स्वकामवशुषं न केवलाम् ।
विष्टपत्रयपराजयस्थिरां
रावणश्रियमपि व्यकम्पयत् ।")

विष्टम्भः, पुं, (वि + स्तम्भ + क्त ।) प्रतिबन्धः । (यथा, भागवते । ५ । २२ । १९ ।
"स हरिविष्टम्भपश्चोपशमनः ।"*।
आक्रमणम् । यथा भारवि । १२ । १६ ।
"प्रविकचविमानाभिसरन्तु
पञ्चविष्टम्भविपीडितसन्धीम् ।")
रोगविशेषः । इति मेदिनी । भे ९ । स तु आनाहरोगः । तस्य लक्षणमाह ।
"आमं शकृद्वा निचितं क्रमेण
भूयो विबद्धं विगुणानिलेन ।
प्रवर्त्तमानं न यथास्वमेन
विकारमानाहमुदाहरन्ति ।"
आमं अपक्वमाहारधातुं शकृत् पुरीषं वा क्रमेण निचितं सञ्चितम् । भूयो विगुणानिलेन दुष्टवायुना विबद्धं आमस्योपरि वा पथास्य पुम्बवत्प्रवर्त्तमानं एवं विकारं आनाह माहुः ॥ * ॥ तस्यामजमानाहमाह ।
"तस्मिन् भवत्यामसमुद्भवे तु
तृष्णा प्रतिश्यायशिरोविदाहाः ।
आमाशये शूलमथो गुरुत्वं
हृत्स्तम्भ उद्गारविघातनञ्च ।"
विघातनं अप्रवृत्तिः ॥*॥ शकृज्जमानाहमाह ।
"स्तम्भः कटीपृष्ठपुरीषमूत्रे
शूलोऽथ मूर्च्छा शकृतो वमिश्च ।
श्वासश्च पक्वाशयजे भवन्ति
तथालसोक्तानि च लक्षणानि ।"

पक्वाशयजे शकृज्जन्ये । अलसोक्तानि आध्मानवातनिरोधादीनि ॥ * ॥ आनाहोदा वर्त्तयोश्चिकित्सायास्तुल्यत्वादुभयचिकित्सा अत्र लिख्यते । अथोदावर्त्तानां चिकित्सा ।
"अधोवातनिरोधोत्थे सुदावर्त्ते हितं मतम् ।
स्नेहपानं तथा स्वेदो वर्त्तयश्चानुलोमनम् ।
विड्विघातसमुत्थे तु विड्भेदान्नं तथौषधम् ।
वस्त्यभ्यङ्गावगाहश्च स्वेदो वर्त्तिर्हितो मतः ।"
वर्त्तिः फलवर्त्तिः ।
"मूत्रावरोधजनिते क्षीरवारिसिता पिबेत् ।
दुःस्पर्शास्वरसं चापि कषायं ककुभस्य च ।
दुःस्पर्शा कण्टकारी दुरालभा च तुल्यगुणत्वात् ।
एर्व्वारुबीजं तोयेन पिबेद्वा लवणीकृतम् ।
सितामिक्षुरसं क्षीरं द्राक्षारसमथापि वा ।
सर्व्वमेव प्रकुर्व्वीत मूत्रकृच्छ्राश्मरीविधिम् ।
जृम्भाभिघातजे स्नेहं स्वेदं चापि प्रयोजयेत् ।
अश्रुमोक्षोद्भवे कुर्य्यात् स्नेहस्वेदौ तथा नरः ।
अथ नेत्राम्बुमोक्षे तु तीक्ष्णनस्याञ्जनं हितम् ।
सुप्यात् सुखेन तस्याथ कथयेच्च कथाः प्रियाः ।
क्षवाभिघातजे तीक्ष्णघ्राणप्रधमनादयः ।"
...
"प्रवर्त्तयेत् क्षुतं सक्तं स्नेहस्वेदौ प्रयोजयेत् ।"
तीक्ष्णं मरीचराजिकादि ।
"उद्गारस्यावरोधे तु स्नैहिकं धूममाचरेत् ।
छर्द्दिनिग्रहसम्भूते वमनं लङ्घनं हितम् ।
विरेचनं चात्र मतं सेकेनाभ्यञ्जनं तथा ।
वस्तिशुद्धिकरैः सिद्धं चतुर्गुणजलं पयः ।
आवारिनाशात् क्वथितं पीतवन्तं प्रकामतः ।
रमयेयुः प्रियाः नार्य्यः शुक्रोदावर्त्तिनं नरम् ।
तस्याभ्यङ्गोऽवगाहश्च मदिरा चरणायुधाः ।
शालिः पयो निरूहश्च हितं मैथुनमेव च ।
क्षुद्विघातसमुद्भूते स्निग्धमुष्णं तथा मधु ।
रुच्यमल्पं हितं भक्ष्यं मुष्णं शीघ्रं सुगन्धि यत् ।
तृष्णाविघातसम्भूते शीतं सर्व्वं विधिर्हितः ।
कषायं लघु शीतं च पिबेत्तोयं पुनः पुनः ।
श्रमश्वासे घृते भक्तो विश्रामः सरसौदनः ।
निद्राविघातजोत्थे पिबेत्क्षीरं सिताग्रुतम् ।
सुखासनं सम्भजेत निद्रा मोदप्रिया कथाः ।"
वातादिजैर्विघातश्चिताभाष्टुदावर्त्तानां चिकि त्सामभिधाय रूक्षादिकुपितवातजनितस्य उदा वर्त्तस्य चिकित्सामाह ।
"हिङ्गुमाक्षिकसिन्धूत्थैः पिष्टैर्वर्त्तिर्विनिर्मिताम् ।
घृताभ्यक्तां गुदे न्यस्येदुदावर्त्तविनाशिनीम् ।"
वर्त्तिरिति ।
"मदनं पिप्पली कुष्ठं वचा गौराश्च सर्षपाः ।
गुडक्षीरसमायुक्ता फलवर्त्तिरितीरिता ।"
मदनफलादिवर्त्तिः ॥ * ॥
"स्नुक्पत्र निष्कास्य तुल्यार्द्धं हरीतकम् ।
प्रातर्भोजनस्य मधुना लिह्यात्पञ्चक चरो
विशुद्ध्यति ।
एतस्मात्पुरीषे देयं विरेचनौषधम् ।
मधुरं वचपलिकोद्भूतं धारायन्त्रकम् ।"
इति नाराचचूर्णम् ॥ * ॥

"हरीतकी पिप्पलीमूलं त्रिवृद्दन्ती च चित्र-
कम् ।
तच्चूर्णं गुडसमितं भक्षयेत् प्रातरुत्थितः ।
एतद्गुडाष्टकं नाम्ना बलवर्णविवर्द्धनम् ।
उदावर्त्तप्लीहगुल्मशोथपाण्ड्वामयापहम् ।"
इति गुडाष्टकम् ॥ * ॥
"स्नुक्क्षीरं पुष्करमार्द्दवं पलाशमूलजलेकम् ।
शतमात्रपलं वापद्य पक्त्वा तैलं घृतं
पचेत् ।
तत् पीतं शमयेत् क्षिप्रमुदावर्त्तमधोपगः ।"
पचमूलकमथ इत्यत् । पुष्करमूलकाद्युष्णम् ॥ * ॥
अथ आनाहस्य चिकित्सा ।
"तुल्याः तारकवचायवादुदावर्त्तहरीं क्रियाम् ।
आनाहेऽपि च कुर्व्वीत विशेषश्चाभिधीयते ।
पिप्पल्यस्त्वाहरीतक्यो त्रिवृत् पञ्चभागिकाः ।
गुडेन तुल्या वटिका चरेच्चानाहसूदनम् ।
वर्त्तिस्त्रिकटुसैन्धवसर्षपगृहधूमकुष्ठमदनफलैः ।
मधुनि गुडे वा पक्वैर्विहिता अङ्गुष्ठपरि-
माणाः ।
वर्त्तिरियं दृष्टफला शनैः प्रणिहिता गुदे स्नेहा-
भ्यक्ते ।
आनाहोदावर्त्तौ शमयति जठरं तथा
गुल्मम् ।"
त्रिकटुकाद्या वर्त्तिः । इति भावप्रकाशः ॥
(त्रि विशेषेण स्तम्भयिता । यथा, ऋग्वेदे ।
८ । ८६ । ३६ ।
"दिवो विष्टम्भ उपमो विचक्षण ।")

विष्टम्भी, [न्] त्रि, (विष्टम्भातीति । वि + स्तम्भ + णिनि ।) विष्टम्भरोगजनकः । यथा,—
"वेष्टका गुरवो भक्ष्या विष्टम्भिकरमाहृताः ।"
इति राजवल्लभः ॥
(यथा च सुश्रुते । १ । ४६ ।
"प्रायः पामातिकं क्षीरं गुरु विष्टम्भि शीत-
लम् ।"
विष्टम्भोऽस्त्यस्मिन्निति । विष्टम्भ + इनि ।)
विष्टम्भरोगविशिष्टश्च ॥

विष्टरः पुं (विस्तीर्य्यते इति । वि + स्तृ + अप् ।
"वृक्षासनयोर्विष्टरः ।" ८ । ३ । ९३ । इति निपातनात् षत्वम् ।) विष्टपी । वृक्षः ।
पीठाद्यासनम् । इत्यमरः । आदिना कुशा-
ष्टकादिग्रहः । इति भरतः ॥ * ॥ (यथा,
भागवते । १ । १८ । १६ ।
"काश्यपुत्रोऽनृषिरपि कुरुकाश्योपविष्टरम् ।
दृष्ट्वौजसं प्राप्त अध्योदयपदम् ।")
विष्टरलक्षणमाह । विष्टरस्तु कार्शस्तवका
पञ्चविंशतिदर्भरचिता वस्त्राद्वरूपा । तथा
च मत्स्यपुराणम् ।
"सर्वैर्योर्भवेद्ब्रह्मा तत्कैदस्तु विष्टरः ।
इति द्वाविंशको ब्रह्मा पञ्चाशता विष्टरः ।"
इति ।
छन्दोगपरिशिष्टम् ।
"दर्भसंख्या न निर्दिष्टा विष्टरास्तरणेष्वपि ।"

अर्कमूला । ईशुरमूल इति भाषा । इति शब्द-
चन्द्रिका । (अस्याः पर्य्यायो यथा,—
"अर्कपत्रा सुनन्दा स्यादर्कमूला विषापहा ।"
इति वैद्यकरत्नमालायाम् ॥)
सर्पदंष्ट्राख्यिका । इति रत्नमाला ॥
विषाभावा, स्त्री, (विषस्याभावो यत्र यस्याः ।)
निर्विषा । इति राजनिर्घण्टः ॥
विषायुध, पुं, (विषमेवायुधं यस्य ।) सर्पः । इति
शब्दरत्नावली ॥ विषयुक्ताख्ये, क्ली ॥
विषार पुं (विषेण ऋच्छतीति । ऋच्छ+अच् ।
पक्षे रलम् ।) सर्पः । इति शब्दचन्द्रिका ॥
विषाराति, पुं, ((विषस्याराति र्नाशकः ।) कृष्ण
धत्तूरकः । इति राजनिर्घण्टः ॥
विषारि पुं, (विषस्यारिः ।) महाचञ्चुशाकः ।
घृतकरञ्जः । इति राजनिर्घण्टः ॥ (विषनाशक
मात्रे, त्रि ।)
विषाश्व, पुं, (विषमास्ये यस्य ।) सर्पः । इति
शब्दरत्नावली ॥ विषयुक्तास्ये, त्रि ॥
विषाख्या, स्त्री, भल्लातकः । इति शब्दचन्द्रिका ॥
(भल्लातकशब्देऽस्या विवृतिर्ज्ञेया ॥)
विषु, अ, साम्यम् । इति विषुवच्छब्दटीकायां
भरतः ॥ नानारूपम् । इति रामाश्रमः ॥
विषुव, पुं, (विषु साम्यमस्त्यस्मिन्निति । "अोम
ादीति ।" ५ । २ । १० । इति वः । यद्वा
समम् ।) विषुवम् । यथा । "विषु नानारूप
समत्वं विषुवं तदस्यास्तीति विषुवी अग्निषु
भावपल्लोपश्चाप्यतर्षेरिति पाणिनि सूत्रेण
च समम् ।" इत्यमरटीकायां रामाश्रमः ॥
(नानारूपम् । यथा, ऋग्वेदे । १ । ५४ । ८ ।
"यस्यतप्ति विषुव विजानम् ॥"
"विषुव विभक्त नानारूपम् ।" इति तद्भाष्ये
सायनः । सर्व्वम् । यथा, ऋग्वेदे । ८ । ९१ । १ ।
"इन्दुरेको विषुवः ।"
"विषुवः विश्वगमन ।" इति तद्भाष्ये सायनः ॥
विप्रकीर्णः । यथा, ऋग्वेदे । ५ । १२ । ५ ।
"ब्रह्मायन्ते विषुवा समप्ते ।"
"विषुवा विप्रकीर्णा सर्व्वगामा ।" इति तद्
भाष्ये सायनः ॥ पराङ्मुखः । यथा ऋग्वेदे ।
५ । २५ । ६ ।
"विष्वञ्चः सवनौ च सामाशो
प्रमुखो विषुवः सुमनो हव ।"
"विषुवः पराङ्मुखः ।" इति तद्भाष्ये सायनः ॥)
विषुवं क्ली, विषुवम् । इत्यमरटीकायां भरतः ॥
विषुवं, क्ली, ममरात्रिन्दिवकालः । तत्पर्य्यायः ।
विषुवत् २ । इत्यमरः ॥ विषुवम् ३ विषव ४
विषुवक ५ । इति शब्दरत्नावली । विषुव ६ ।
इति रामाश्रमः ॥ विषुव ७ । इति मुकुटः ॥
तत्तु मेषतुलयोः सङ्क्रान्तौ । यथा,—
"मृगकर्कटसङ्क्रान्ती द्वे तूदग्दक्षिणायने ।
विषुवती तुलामेषे गोलमध्ये तथापरे ।"
इति सिद्धान्तशिरोमणिः ॥
हेतु सदा विषुवद्विषुवनामधेयं ज्ञेयं स्यात् ।
यथा,—
"विषुवाख्यो भवेच्चरः स्यादिति शब्दविदां मतम् ।
महाविषुवमाख्यातं सतिभिर्वेदविद्विदम् ।
तथा स्यात्स्मृतिविषुवं क्रमादाश्विनचैत्रिकम् ।"
इति शब्दरत्नावली ॥
विषुवारम्भकालो यथा,—
"मेषतुलक्रान्तितः पूर्व्वं पश्चात् तारा दिनान्तरे ।
एकवर्षे चतुःपञ्चषष्ठमासकमेव तु ।
षट्षष्टिमस्रराशेर्वर्धं स्यादपम दवे ।
एवं चतु पञ्चदिनमयनारम्भः क्रमात् ।
मुनुक्रमेण च तद्वत् स्यात्तत्तयनं रवेर्बुधम् ।
वर्द्धितक्रमशो नक्षत्रितो दक्षिणायनम् ।
अयनांशक्रमेणैव विषुवारम्भः तथा ।
रविसङ्क्रान्तितो मेषतुलयोरभितः पुनः ।
विषुवं मीनकन्यार्हे सिंहाचौऽक्वसूर्य्यादके ।
दिनमानाय मीनार्द्धाङ्गिराद्धैः पादिक मतम् ।
ततो वृषार्द्धपर्य्यन्तमधीति पञ्चभाविषौ ।
मिथुनार्द्धे चतुर्विंशपलकाले वर्द्धते क्रमात् ।
कर्कटार्द्धेषु षट्चिपञ्चविशांशमुत्तमोत्तमम् ।
पञ्चार्द्धेषु ह्रिसयति क्रमात् तुषाति सायरे ।
कन्यार्द्धमित्यधीमायं धीय पूर्व्वक्रमेण हि ।
दिने दिने भागहारान्नायं बोध्यं दिवानिशोः ।
एकमासं दण्डपञ्चा सहान्यमानदिवेव ।
षट्षष्टिमस्रराशेर्वर्धं तत्र स्यात् मीनमासके ।
पुनश्चतुर्दशोत्तरात् एवं मासमादिके ।"
इति ज्योतिषतत्त्वम् ॥
अन्यच्च
"मेषसङ्क्रमतः पूर्व्वं पञ्चातारा दिनान्तरे ।
प्राप्तिज्योत्स्याद्वर्षोन्येन विषुवारम्भकं भवेत् ।
अयोदशदिने सौरे चैत्रे नक्षत्रिको प्रके ।
विषुवारम्भक तच यम मासं दिवानिशो ।
ततः प्रतिदिनं वेला वपान्निपलात्मिका ।
वर्द्धते मेषविन्दोर्पर्य्यन्तां स्थूलमानतः ।
तथा ज्येष्ठान्तपर्य्यन्तं पादोनविपलात्मिका ।
आषाढावधिपर्य्यन्तं पलैकप्रमिता मता ।
तत्र कर्कटविन्दोर्पर्य्यन्तं प्राय क्रमात् ।
अपादपञ्चमासेन वेला नुदति निश्चितम् ।
भाद्रभाद्रपदपर्य्यन्तं पादोनविपलात्मिका ।
भाद्रमाश्विनदिवान्तं वर्द्धैकपलात्मिका ।
दिवामान दण्डवर्द्धिता रात्रि प्रमाणकम् ।
वैशाखादौ दिवामानं रात्रिमानं तुलादिष्ठ ।
षट्षष्टिमस्रराशेर्वर्धं तत्र स्यात् दारमासके ।
पुनश्चतुर्दशोत्तरात् तत पञ्चादमासिके ।"
इति ग्रहलाघवलक्षावली ॥
विषुवत् क्ली, विषुवम् । इत्यमरः ॥ (यथा, महा
भारते । १ । १४४ । १५१ ।
"भवति सवस्तुयं दिवस रात्रौ
विषुवति चाक्षसमद्धे यज्ञम् ।"
व्यापकः । यथा, ऋग्वेदे । १ । ७२ । ६ ।
"नारोदित्यादिषुवतो मध्यः विषणि भ्रंशैः ।"
"विषुवत इत्यनेन प्रकारेण सर्व्वत्र व्याप्त
व्यापिभुवनस्य * * * विषुवः सर्व्वं व्याप्ता
दौवारिकः कुम्भधनः । ततो मधुर इत्यादि
ध्यायेद्धुत्विति मधुर उदासनम् । अन्येषामपि
कथ्यत इति संहितायां दौवः अत्रैव सर्व्वो
क्तम् ।" इति तद्भाष्ये सायनः ॥)
विषौषधी, स्त्री (विषघ्नौषधी ।) नागदन्ती ।
इति रत्नमाला ॥
विष्कम्भ, पुं, सप्तविंशतियोगान्तर्गतप्रथमयोग ।
शुभकर्म्मणि तस्य पञ्च दण्डास्त्याज्याः । यथा,—
"प्रथमादौ पञ्च विष्कम्भे सप्त शूले च गाहिता ।
गण्डव्याघातयोः षट् च नव हर्षणवज्रयो ।
वैधृतिव्यतीपातौ च समस्तौ परिवर्ज्जयेत् ।"
इति ज्योतिषसारसंग्रहावली ॥ ० ॥
तत्र जातफलम् ।
"विष्कम्भयोगे यदि जन्मकाले
भार्य्यं स्वतन्त्रो मधुमस्तराधीम् ।
धनसमन्वितः
मनस्य भिन्नौषधिविद् समर्थः ।"
इति कोष्ठीप्रदीपः ॥ ० ॥
विस्तारः । (यथा, कुमारसम्भवे । १४ । २४ ।
"उष्णायोऽहूर्यमुख्यो दारत्यागेन विष्कम्भः ।")
प्रतिबन्धः । चपकाष्ठमेदः । योगिनां बन्ध-
भेदः । इति मेदिनी । भ, १८ । वृक्षः । इत्य
जयः । अर्गला । इति भरतः ॥
विष्कम्भी [न्] पुं, (विष्कम्भ्राति वहतीति । वि+
स्कम्भ+णिनि ।) अर्गला । यथा । "तद्विष्कम्भी
उमर्त्त न ना । इत्यमरटीकायां कपाटावरोधार्थ
अर्गलं कुड्यादन्यु इति स्यातम् । तत् कपाटं
विष्कम्नाति वर्ज्जयति इति पाणिनिकाव्येन यदि
अस्मी रहस्यपत् व्यापकमेत् विष्कम्भीति
नाम च दृश्यते । तद्विष्कम्भोऽर्गलमिति पाठ
पाठः । विष्कम्भो दण्डविशेषदण्डः । इति
भट्टः । इति मुकुटः ॥
'विष्कम्भो योगभेदे स्यात् विस्तारप्रतिबन्धको ।
कपाटादिप्रभेदे च । इति मेदिनीदर्शनात्
विष्कम्भ इति पाठः ।" इति तट्टीकायां भरतः ॥
विष्कलः, पुं, (विष विषं कलयति भक्षयतीति ।
कल+अच् ।) ग्रामशूकरः । इति राज
निर्घण्टः ॥
विष्किर पुं (विकिरतीति । वि+कॄ विक्षेपे+
इगुपधेति कः । "विष्किरः शकुनिर्विकिरो वा ।"
६ । १ । १५० । इति सूत्र । परिनिपातः इति
ककम् ।) पक्षी । इत्यमरः ॥ विष्किरादिविवर-
गपूरकुक्कुटादयः ।
"लावाद्याः वैष्किरो वर्गः प्रतुदा जाङ्गला जगाः ।
मध्ये प्रोक्तमधुरा कषाया तिक्तावृषाः ।"
इति राजवल्लभः ॥ ० ॥
अथ विष्किराख्यो गणका गुणाश्च ।
"लावकतित्तिरकपिञ्जलकतित्तिराः ।
वर्त्तिककुक्कुटाद्याश्च विष्किराः समुदाहृताः ।
विकीर्य्य भक्षयन्तेऽह यस्मात्तस्मात् विष्किराः ।
कपिञ्जल इति प्राक्ते कथितो गौरतित्तिरा ।"
कृमिश्र गाव्ये या दति शीघ्र ।

कैटभजित् ३७ विष्णुः ३८ श्रीवत्सलाञ्छनः ३९ । रथमरः । पुराणपुरुषः ४० वृष्णिः ४१ शतधामा ४२ गदाग्रजः ४३ एकशृङ्गः ४४ जगन्नाथः ४५ विश्वरूपः ४६ सनातनः ४७ मुकुन्दः ४८ राहुभेदी ४९ वामनः ५० शिवकीर्त्तनः ५१ श्रीनिवासः ५२ अजः ५३ वासुः ५४ । इति जटाधरः । श्रीहरिः ५५ कंसारिः ५६ नृहरिः ५७ विष्णुः ५८ मधुजित् ५९ मधुसूदनः ६० कान्तः ६१ पुरुषः ६२ श्रीगर्भः ६३ श्रीकरः ६४ श्रीमान् ६५ श्रीधरः ६६ श्रीनिकेतनः ६७ श्रीकान्तः ६८ श्रीशः ६९ प्रभुः ७० सुरकीधरः ७१ जगदीशः ७२ गदाधरः ७३ नन्दात्मजः ७४ नरसिंहः ७५ हरेशः ७६ गोपालः ७७ नन्दनन्दनः ७८ नरकजित् ७९ सामगः ८० अजितः ८१ जितामित्रः ८२ सत्यधामा ८३ प्रश्निगर्भः ८४ पुनर्वसुः ८५ आदिदेवः ८६ श्रीवराहः ८७ सहस्रवदनः ८८ त्रिपात् ८९ अहंदेवः ९० हरिः ९१ यदुः ९२ यादवः ९३ अरिसूदनः ९४ पूतनारिः ९५ सत्ययोगी ९६ ध्रुवः ९७ चाणूरसूदनः ९८ दैत्यघ्नः ९९ सत्यवर्त्ती १०० कालनेमिरिपुः १०१ धेनुकारिः १०२ भीमविक्रमः १०३ विरिञ्चिः १०४ धरणीधरः १०५ बहुमर्द्दी १०६ वर्द्धमानः १०७ प्रतापवान् १०८ कृष्णात्मकः १०९ मधुरेशः ११० द्वारकेशः १११ रन्तिदेवः ११२ वृषाकपिः ११३ । इति शब्दरत्नावली । जिष्णुः ११४ दामोदरः ११५ अच्छिन्नपक्षः ११६ इन्द्रानुजः ११७ नरायणः ११८ जलशयः ११९ यज्ञपुरुषः १२० तार्क्ष्यध्वजः १२१ बहुविन्दुः १२२ पद्मेशः १२३ मार्गः १२४ जिनः १२५ कुमोदकः १२६ जहुः १२७ वसुः १२८ शतावर्त्तः १२९ सुप्रकेशी १३० बभ्रुः १३१ वेधाः १३२ प्रश्निश्रृङ्गः १३३ आत्मभूः १३४ लोकनायकः १३५ सुवर्णविन्दुः १३६ श्रीवत्सः १३७ देवकीसुतः १३८ गोविन्दः १३९ गोवर्द्धनधरः १४० यदुनाथः १४१ गदाभृत् १४२ शार्ङ्गभृत् १४३ चक्रभृत् १४४ श्रीवत्सभृत् १४५ शङ्खभृत् १४६ ।०। अस्य ध्यानादयो यथा,—

"मधुधिक्कचाचूरपूतनायमलार्ज्जुनाः ।
कालनेमिहयग्रीवशकटारिष्टकैटभाः ॥
कंसः केशिमुरौ शाल्वमैन्दद्विविदराहवः ।
हिरण्यकशिपुर्बाणः कालीयो नरको बलिः ॥
शिशुपालश्चास्य वध्या वैनतेयश्च वाहनम् ।
कृष्णोऽस्य पाञ्चजन्योऽब्जं श्रीवत्सोऽपि च
वक्षसः ॥
गदा कौमोदकी चाप शार्ङ्गं चक्रं सुदर्शनम् ।
मणिः स्यमन्तको हस्ते सुखमध्ये तु कौस्तुभः ॥"
इति हैमचन्द्रः ।०।

तस्य शतनामानि पाद्मोत्तरखण्डे ११२ अध्याये सहस्रनामानि च महाभारतीयानुशासनपर्व्वणि १४९ अध्याये द्रष्टव्यानि ।०। अस्य मन्त्रो वर्णश्च यथा,—

"वरमाद्य द्वितीयश्च तपावश्च वामसेव च ।
वासुदेवो बल कामो ह्यनिरुद्धो यथाक्रमम् ॥
प्रद्युम्नस्तु यदि व्रीनः तु चौ भूरनिमयका ।
नारायणस्तथा ब्रह्मा विष्णुः सिंहो वराह
राट् ।
शितारक्तहरिद्राभा नीलश्यामललोहिता ।
मेघाग्निमधुपिङ्गाभा वर्णतो नव नायका ॥"०॥
अस्याङ्गानि तैषां मतश्चाज्ज यथा,—
"क ट पं शं गरुत्मानं स्यात्ख छ वं सुदर्शनम् ।
खं च फ ष गदादेवो ठ ण म चाथ शङ्खकम् ॥
घं ट भ हं भवेच्छ्रीश्च ग ज वं चाथ पुष्टिकम् ।
घ थं षं वनमाला स्याच्छ्रीवत्सं दं च भं भवेत् ॥
छं त य कौस्तुभः प्रोक्तश्चाथवा ह्यहमेव च ।
इत्यङ्गानि यथायोगं देवदेवस्य वै दश ॥०॥
गरुडोऽम्बुजवर्णाभो गदा चैवासिताकृतिः ।
पुष्टिः शिरीषपुष्पाभा लक्ष्मीः काञ्चनसन्निभा ।
पूर्णचन्द्रनिभः शङ्खः कौस्तुभस्तरुणद्युतिः ।
चक्रं सूर्य्यसहस्राभं श्रीवत्सः कुन्दसन्निभः ॥
पञ्चवर्णा मता माला श्यामो मेघसन्निभः ।
विद्युद्रूपाणि चास्त्राणि यानि नोक्तानि वर्णतः ॥"
इति गारुडे ११ अध्यायः ।०।

तस्य नामव्याख्यादिर्यथा —
"रजोगुणमयं चान्यद्रूपं तस्यैव धीमतः ।
चतुर्मुखः स भगवान् जगत्सृष्टौ प्रवर्त्तते ॥
सृष्टञ्च पाति सकलं विश्वात्मा विश्वतोमुखः ।
सत्त्वं गुणमुपाश्रित्य विष्णुर्विश्वेश्वरः स्वयम् ॥
अन्तकाले स्वयं देवः सर्व्वात्मा परमेश्वरः ।
तमोगुणं समाश्रित्य रुद्रः संहरते जगत् ॥
एकोऽपि सन्महादेवस्त्रिधासौ समवस्थितः ।
सर्गरक्षालयगुणैर्निर्गुणोऽपि निरञ्जनः ॥
एकधा स द्विधा चैव त्रिधा च बहुधा पुनः ।
त्रिधा विभज्य चात्मानं त्रैलोक्ये सम्प्रवर्त्तते ॥
सृजते ग्रसते चैव वीक्षते च विशेषतः ।
यस्मात् सृष्ट्वानुगृह्णाति ग्रसते च पुनः प्रजाः ॥
गुणात्मकत्वात्त्रैकाल्ये तस्मादेकः स उच्यते ।
अग्रे हिरण्यगर्भः स प्रादुर्भूतः सनातनः ॥
आदित्वादादिदेवोऽसावजातत्वादजः स्मृतः ।
देवेषु च महादेवो महादेव इति स्मृतः ॥
पाति यस्मात् प्रजाः सर्व्वाः प्रजापतिरिति
स्मृतः ।
बृहत्वाच्च स्मृतो ब्रह्मा परत्वात् परमेश्वरः ॥
वशित्वादप्यवश्यत्वादीश्वरः परिभाषितः ।
ऋषिः सर्व्वत्रगत्वेन हरिः सर्व्वहरो यतः ॥
अनुत्पादाच्च पूर्व्वत्वात् स्वयम्भुरिति स स्मृतः ।
नराणामयनं यस्मात् तेन नारायणः स्मृतः ॥
हरः संसारहरणाद्विभुत्वाद्विष्णुरुच्यते ।
भगवान् सर्व्वविज्ञानादवनादोमिति स्मृतः ॥
सर्व्वज्ञः सर्व्वविज्ञानात् सर्व्वः सर्व्वमयो यतः ।
शिवः स्यान्निर्म्मलो यस्माद्विभुः सर्व्वगतो
यतः ।
तारणात् सर्व्वदुःखानां तारकः परिगीयते ।
बहुनात्र किमुक्तेन सर्व्वं विष्णुमयं जगत् ॥"
इति कौर्म्मे ४ अध्यायः ।०।

अपि च ।

मत्स्य उवाच ।
"महाप्रलयकालान्त एतदासीत्तमोमयम् ।
प्रसुप्तमिव चातर्क्यमप्रज्ञातमलक्षणम् ॥
अविज्ञेयमविज्ञातं जगत् स्थास्नु चरिष्णु च ।
ततः स्वयम्भूरव्यक्तः प्रभवः पुण्यकर्म्मणाम् ॥
व्यञ्जयन्नेतदखिलं प्रादुरासीत्तमोनुदः ।
योऽतीन्द्रियः परो व्यक्तादणुर्ज्यायान् सनातनः ॥
नारायण इति ख्यातः स एव स्वयमुद्बभौ ।
स्वशरीरादभिध्यायन् सिसृक्षुर्विविधं जगत् ॥
अप एव ससर्ज्जादौ तासु वीजमवासृजत् ।
तदेवाण्डं समभवद्धेमरूप्यमयं महत् ॥
संवत्सरसहस्रेण सूर्य्यायुतसमप्रभम् ।
प्रविश्यान्तर्महातेजाः स्वयमेवात्मसम्भवः ॥
प्रभावादपि तद्व्याप्त्या विष्णुत्वमगमत् पुनः ॥"
इति मात्स्ये २ अध्यायः ।०।

अस्य त्रिमूर्त्तयो यथा ।
"सृष्टिस्थित्यन्तकरणात् ब्रह्मविष्णुशिवात्मिकाः ।
स संज्ञां याति भगवान् एक एव जनार्द्दनः ॥
ब्रह्मत्वे सृजते चैव विष्णुत्वे पाति निश्चयः ।
रुद्रत्वे चैव संहर्त्ता एको देवस्त्रिधा स्थितः ॥
स एव सृज्यः स च सर्गकर्त्ता
स एव पाता स च पाल्यते च ।
ब्रह्माद्यवस्थाभिरशेषमूर्त्ति-
र्विष्णुर्वरिष्ठो वरदो वरेण्यः ॥"
इति वह्निपुराणे सर्गानुकीर्त्तननामाध्यायः ।०।

नारायणस्य मूर्त्तिविशेषो यथा ।
"योऽसौ नारायणो देवः परात् परतरो नृप ।
तस्य चिन्ता समुत्पन्ना सृष्टिं प्रति नरोत्तम ॥
सृष्ट्वा चैव महासृष्टिं पालनीया मयैव च ।
कर्म्मकाण्डस्वरूपेण कर्त्तुं नैवेह शक्यते ॥
तस्मात् मूर्त्तिं सकार्य्यिकां यया पालयामि
जगत् ।
एवं चिन्तयतस्तस्य सदाभिध्यायिनो नृप ॥
प्राक्सृष्टिकाले राजन् वै मूर्त्तिमत्पुरतो बभौ ।
पुरोभूते तस्मिन् देवो नारायणः स्वयम् ॥
प्रविभज्य द्विधात्मानं त्रैलोक्यं यस्य देवतः ।
तनः ससार भगवान् वरदानं पुरातनम् ॥
नारायणी ततस्तेन प्रादाच्च पुनर्व्वरम् ।
सर्व्वज्ञः सर्व्वकर्त्ता च सर्व्वलोकनमस्कृतः ॥
त्रैलोक्यप्रतिपालश्च भव विष्णु सनातन ।
देवानां सर्व्वदा कार्य्यं कर्त्तव्यं त्वया तथा ॥
सर्व्वज्ञश्च भवतु त्वं देव न संशयः ।
एवमुक्त्वा ततो देवः प्रकृतिस्थो बभूव ह ॥
विष्णुरप्यमुना पूर्व्वां बुद्धिं चकार स प्रभुः ।
तदा स चिन्तयामास भगवान् योगविद्वां महातपाः ॥
तस्यां वसाय भगवान् इन्द्रियार्थैर्विना
प्रभाः ॥
ध्यात्वा योगेन रूपेण ततः सुष्वाप वै प्रभुः ।
तस्य सुप्तस्य चोदराद्भूत् पद्मं विनिर्गतम् ।
तस्मिन्पद्मे ह्यभवद्ब्रह्मा चतुर्वक्त्रश्चतुर्भुजः ।
तस्य चक्षुः श्रितमायं धातात्मव स्थितम् ॥

ग्रथच ।
“पञ्चाशद्भिर्भवेद्ब्रह्मा तदर्द्धेन तु विष्टरः ।”
इति यदि सम्यक् तदा ग्राह्यमादरणीयम् । एतेन विष्टरः पञ्चविंशतिकुशा भवदेवभट्टोक्ता निरस्ता । एवं विष्टरपदार्थं कुशाभ्यामपि यदुक्तं तदपि निरस्तम् ।
“यत्रोपदिश्यते कर्म्म कर्त्तुरङ्गं न चोच्यते ।
दक्षिणस्तत्र विज्ञेयः कर्म्मणां पारगः करः ॥”
इति छन्दोगपरिशिष्टात् । इति श्राद्धतत्त्वम् ।

विष्टरश्रवाः, [स्] पुं, (“विष्टराविव श्रवसी यस्येति ।” शिशुपालवधस्य १४ । १२ । टीकायां मल्लिनाथः । “विष्टरोऽश्वत्थवृक्षे सुपर्णे निम्न तल श्वसतीति ।” उज्ज्वल ४ । २२५ । इत्यत्र उज्ज्वलदत्तः ।) विष्णुः । इत्यमरः ॥ (यथा, हरिवंशे भविष्यपर्व्वणि । ११ । १७ ।
“उत्थाय तत्र देवेन प्रशस्तः समभिष्टुतम् ।
तेन च पीयमानेव विष्टरश्रवसं प्रभुम् ।”)

विष्टरा, स्त्री, गुड़ाखिनी । इति राजनिर्घण्टः ।

विष्टरस्था, स्त्री, लम्बकेतकी । इति राजनिर्घण्टः । विटारस्था इति च क्वचित् पाठः ।

विष्टार, पुं, छन्दोविशेषः । यथा, विष्टार पङ्क्तिश्छन्दः । इति समासप्रकरणे दुर्गादासः ।

विष्टिः, स्त्री, (विष + क्तिन् ।) वेतनं विना बलात् कारितकर्म्मादि । बेगार इति भाषा । तत्पर्य्यायः । आजूः २ । इत्यमरः । हठात् प्रतिकर्म्म क्रोधी विकालरूपी विष्टिरिति प्रसिद्धा । इ वैतनमन्तरेण कर्म्मकारयितुं कर्म्म कारयिति वैतन्ये । विष्टकर्म्मकरे विष्टि स्त्रिया मर्भविकर्म्मकोति वद । इति भरतः ॥ (यथा रामायणे । २ । ८२ । २ ।
“विष्टिकर्म्मान्तिकाः सर्व्वे मार्गशोधक रक्षकाः ।”)
प्रेषणम् । कर्म्म । इति मेदिनी । टे, ५८ । (यथा, माघे । ७ । ८ । ११ ।
“दयनीयविष्टरमपास्तवाहना
द्विविधेन विष्टिमितवाहनान्तरा ।”)
भद्रा । करणम् । इति त्रिका । प्रेषणम् । इति हेमचन्द्रः । सा च भद्रा बवादिकादशकरणमध्ये सप्तमकरणं पञ्चिकायां तस्याः अशुभत्वम् । यथा,—
“ववबालवकौलवतैतिल
गरवणिजा विष्टिस्य चराः ।
शकुनिचतुष्पदनाग
किन्तुघ्न स्थिराणि करणानि ।
शुक्लादितिथिद्विगुणात् पक्षे तदुरोपरि ।
आयनाद्यात् कथेन सारकारता कवाद्य ।
एकादश्याश्चतुर्थ्या च दिनार्द्धे शुक्लपक्षके ।
अष्टम्यां पञ्चदश्यां च पूर्व्वार्द्धे विष्टिरिता ॥
कृष्णपक्षे तृतीयायां दशम्यां च परार्द्धके ।
सप्तम्यां चतुर्दश्यां पूर्व्वार्द्धे विष्टिरुच्यते ।
विष्टौ विष्टरोमापि विष्टिं कर्म्मेव वर्ज्जयेत् ।
विष्टिप्रेषे विच्छेद हि पुच्छे कार्य्यं जयावहम् ।”
अन्यत्रापि ।
“नाभ्यां पञ्च वदने गलकच्छपेका
वक्षो दशैकचटिका विषय शनत्र ।
नाभि कटि वक्ष पुच्छवता च विष्टौ
विष्टेर्व्वै नियतितोऽङ्गविभाग एषः ॥
मुखे कार्य्यक्षतिर्भवति मरणं चास्य गलके
धनक्षतिर्वक्षसि स्थाच्च कटितटे बुद्धिविलयः ।
कलिर्नाभौ देशे विजयमथ पुच्छे च सकल
शरीरे भद्राया एवमिति फल पूर्व्वमुनयः ॥
मध्वसुसमितिपिपुरदश॰
चिवगुणर्षव्याद् तिथिषु पूर्व्वायामौ ।
१४।८।७।१४।१३।२०।११।१३
आयाति विष्टिरेका पृष्ठे शुभदा पुरस्त
शुभदा ।”
पूर्व्वापरौ पूर्व्वापरार्द्धदिनगतौ भवति इत्यर्थः ।
“एकैन स्रोता द्विगुणा तिथिस्तु
समार्थिता करच वदादि ।
पूर्व्वे परोऽष्टिनमथ विष्टिरो
द्विगुणा च सविवर्ज्जिता च ॥
किन्तुघ्नं करण प्रदिष्ट
मादौ निशि पराद्वये चैव ।
उपान्त्ये शकुनिस्तु दर्शे
पूर्व्वे चतुष्पादपरे च नाग ॥
इत्यक्षमगणविचार्य्यमनुभिय वयमा वदाद्रे ।
कलिद्धवक्रियासना मतम प्रकुर्य्यादै ।”
तथाधिपकथनम् ।
“पौष्टिकस्थिरशुभानि बवाख्ये
बालवे द्विजहितान्यपि कर्म्म ।
कौलवे प्रमदामथ विधानं
तैतिले शुभगतायपकर्म्म ॥
गरे च बीजाश्रयकर्म्माणि
वाणिज्ये स्थैर्य्यविवक्रिया च ।
न विष्टिमाप्नोति कृतञ्च विष्टौ
विषाभिघातादिषु तत्र सिद्धिः ॥
स्कन्धेषधानि शकुनौ च मन्त्रसिद्धिः
गोविप्रराज्यपितृकर्म्म चतुष्पदे तु ।
सौभाग्यदारुणनिधुवकर्म्मनागे
किन्तुघ्नमाहि शुभपौष्टिकमङ्गलानि ।”
इति ज्योतिस्तत्त्वम् ।
(यथा कथासरित्सागरे । २ । ११ ।
“कार्व्यटिके त्वं हविर्व्वि विष्टिस्त्वं
प्रस्तावि ।
आत यदि धनाति विष्टिदिनं किं करोम्यत ।”)

विष्टिः, त्रि, (विष् + क्तिन् ।) कर्म्मकरः । इति मेदिनी । टे ५८ ।

विष्ठलं क्ली, (विदूर स्थलम् ।) दूरस्थानम् । यथा । विष्ठलमिमविशिष्य साधवः । दूरस्थानस्य स्थानन्तु मनस्तु न स्यात् । विष्ठलं कुर्व्वन् मतिकर्म्म मलिनवम् । इति विद्यासागरोद्धृते ।

विष्ठा, स्त्री (विविधप्रकारेण तिष्ठति उदरे इति । वि + स्था + क । अम्बाम्बेति षत्वम् ।) विविधप्रकारेणोदरे तिष्ठति वा । तत्पर्य्यायः । उच्चारः २ अवस्करः ३ शमलम् ४ शकृत् ५ गूथम् ६ पुरीषम् ७ वर्च्चस्कम् ८ विट् ९ । इत्यमरः । वर्च्चः १० । इति जटाधरः । अमेध्यम् ११ दूष्यम् १२ मलम् १३ मलम् १४ । इति शब्दरत्नावली । विट्कम् १५ पूतिकम् १६ । इति राजनिर्घण्टः । (यथा,—
“गुरोर्हितं प्रकर्त्तव्यं वाङ्मनः कायकर्म्मभिः ।
अहिताचरणाद्देव विष्ठायां जायते कृमिः ॥”
इति तत्त्वसन्दीपनकथायां ।)
तद्ग्रहणनिषेधो यथा —
“न गच्छेत् क्रिमभीक्षितं पुरुषं वा कदाचन ।
न च स्पृशेत् पुरीषं वा न च सन्दर्शमैथुनम् ।”
अत्र तद्भक्षणनिषेधो यथा,—
“काये क्रोधेन पतित मापुर्य्य विकल्पनात
रेतः ।
योऽश्नाति पतितेनियमेन तस्य आमगाचरैः ।”
इति कौर्म्मे उपविभागे १५ अध्यायः ।
तद्गुणाः पुरीषस्थाने प्राणिभिर्लक्षणीयम् ।

विष्णुः पुं अग्निः । इति शब्दमाला । शुक्रः । वसुदेवता । इति धरणिः । (सारस्वतीया सामवेदः । यथा, महाभारते । १ । ६५ । १६ ।
“सहस्रतमया भद्रा द्वादशो विष्णुरुच्यते ।
जघन्यजस्तु सर्व्वेषामादित्यानां गुणाधिकः ।”)
धर्म्मशास्त्रकर्त्तृमुनिविशेषः । यथा,—
“मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः ।
यमापस्तम्बसंवर्त्ताः कात्यायनबृहस्पती ॥
पराशरव्यासशङ्खलिखिता दक्षगौतमौ ।
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः ॥”
इति याज्ञवल्क्यसंहिता ।
सर्व्वव्यापी परमेश्वरः । तस्य व्युत्पत्तिर्यथा । वेवेष्टि व्याप्नोति विश्वं इति । वेशति विश्वति व्याप्नोति विश्वमिति वा । विष्णाति विश्वानि भूतानि मायामयावरणेन संहारादिषु वा । विशति सर्व्वभूतानि विशन्ति सर्व्वभूतानि अत्रेति वा ।
“यस्माद्विष्टमिदं सर्व्वं तस्य शक्त्या महात्मनः ।
तस्मादेवोच्यते विष्णुर्व्विशधातोः प्रवेशनात् ॥”
इति विष्णुपुराणम् । इत्यमरटीकायां भरतः ॥
(“बृहत्त्वाद् विष्णुरुच्यते ।” इति महाभारते । ५ । ७० । १३ ।) तत्पर्य्यायः । नारायणः २ कृष्णः ३ वैकुण्ठः ४ विष्टरश्रवाः ५ दामोदरः ६ हृषीकेशः ७ केशवः ८ माधवः ९ स्वभूः १० दैत्यारिः ११ पुण्डरीकाक्षः १२ गोविन्दः १३ गरुडध्वजः १४ पीताम्बरः १५ अच्युतः १६ शार्ङ्गी १७ विष्वक्सेनः १८ जनार्दनः १९ उपेन्द्रः २० इन्द्रावरजः २१ चक्रपाणिः २२ चतुर्भुजः २३ पद्मनाभः २४ मधुरिपुः २५ वासुदेवः २६ त्रिविक्रमः २७ देवकीनन्दनः २८ शौरिः २९ श्रीपतिः ३० पुरुषोत्तमः ३१ वनमाली ३२ बलिध्वंसी ३३ कंसारातिः ३४ अधोक्षजः ३५ विश्वम्भरः ३६

गौरवभिया नोक्ता ॥ * ॥ ततो ध्यायेत् ।
"उद्यत्कोटिदिवाकराभमनिशं शङ्खं गदां पङ्कजं
चक्रं बिभ्रतमिन्दिरावसुमतीसंशोभिपार्श्वद्वयम् ।
कोटीराङ्गदहारकुण्डलधरं पीताम्बरं कौस्तुभो-
द्दीप्तं विश्वधरं स्ववक्षसि लसच्छ्रीवत्सचिह्नं भजे ॥"
एवं ध्यात्वा मानसैः सम्पूज्य शङ्खस्थापनं कुर्य्यात् । तत्र वैष्णवपात्रं गौतमीये ।
"ताम्रपात्रन्तु विप्रेन्द्र विष्णोरतिप्रियं मतम् ।
तथैव धर्म्मपात्राणां शुद्धं शङ्खं प्रकीर्त्तितम् ॥
मत्पात्रञ्च तथा प्रोक्तं स्वर्णं वा राजतं तथा ।
पद्मपात्रं हरेः शुद्धं नान्यत्तत्र नियोजयेत् ॥"
नैवेद्यदाने तु तथैव ।
"स्वर्णे वा ताम्रपात्रे वा रौप्ये वा पद्मपत्रके ॥"
आगमकल्पद्रुमे ।
"हैरण्यं राजतं कांस्यं ताम्रं मृण्मयमेव वा ।
पात्रार्थं श्रीहरेः पात्रं नैवेद्ये कल्पयेद्बुधः ॥"
पुरश्चरणचन्द्रिकायाम् । सुवर्णे राजते रैत्ते इत्यादि ॥ * ॥ ततः सामान्यपीठपूजानन्तरं विमलादिशक्तिवेष्टितपीठमभ्यर्च्य पूजां कृत्वा पुनर्ध्यात्वा मूलेन कल्पितमूर्त्तावावाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधाय आवरणपूजां कुर्य्यात् । अग्न्यादिचतुष्कोणेषु दिक्षु च ॐ क्रुद्धोल्काय हृदयाय नमः इत्यादिना पूजयेत् ॥ * ॥ ततः केशरेषु पूर्व्वादि ॐ अं नमः मों नमः भं नमः दं नमः थं नमः क्षां नमः यं नमः । ततो दलेषु पूर्व्वादिदिक्षु ॐ वासुदेवाय नमः । एवं सङ्कर्षणाय प्रद्युम्नाय अनिरुद्धाय । अग्न्यादिकोणदलेषु ॐ शान्त्यै नमः एवं श्रियै सरस्वत्यै रत्यै । ततः पत्राग्रेषु पूर्व्वादि ॐ चक्राय नमः एवं शङ्खाय गदायै पद्माय कौस्तुभाय मुषलाय खड्गाय वनमालायै । तद्बहिरग्रे ॐ गरुडाय नमः । दक्षिणे ॐ शङ्खनिधये नमः । वामे ॐ पद्मनिधये नमः । पश्चिमे ॐ ध्वजाय नमः । अग्निकोणे ॐ विघ्नाय नमः । नैरृते ॐ आर्य्यायै नमः । वायुकोणे ॐ दुर्गायै नमः । ईशाने ॐ सेनान्यै नमः । एवं सर्व्वत्र । तद्बहिरिन्द्रादीन् वज्रादींश्च पूजयित्वा धूपदीपौ दत्त्वा नैवेद्यं दद्यात् ॥ * ॥ यथा । नैवेद्यमादौ देवतायै मूलेन पाद्याचमनीयं दत्त्वा वह्निति मन्त्रेण नैवेद्यं संप्रोक्ष्य चक्रमुद्रयाभिरक्ष्य यमिति मन्त्रेण दोषसमूहं संशोष्य रमिति दोषं संदह्य वामकरपीयूषधाराभिपूर्णं वमिति मन्त्रेण अमृतीकृत्य मूलमन्त्रमष्टधा जपेत् । ततो वमिति धेनुमुद्रयामृतीकृत्य गन्धपुष्पाभ्यां सम्पूज्य कृताञ्जलिः सन् हरिं प्रार्थयेत् । अत्र सम्मतो मन्त्रः प्रपद्येदिति विभाव्य आदाय मूलमुच्चार्य्य नैवेद्यं तत्र दद्यात् । ततो मूलमुच्चार्य्य एतन्नैवेद्यं अमुकदेवतायै नमः । ततो नैवेद्यं हस्ताभ्यां समुत्थाप्य ॐ निवेदयामि भवते जुषाणेदं हविर्हरे इति नैवेद्यं सामान्ये अमुकदेवतायै एतच्च मन्त्रेणोपस्तरणमसीति जलं दत्त्वा वामहस्ते ग्रासमुद्रां प्रदर्श्य दक्षिणहस्तेन प्राणादिमुद्रा प्रदर्शयेत् ॥ * ॥ यथा । ॐ प्राणाय स्वाहेति कनिष्ठानामिके अङ्गुष्ठेन स्पर्शयेत् । ॐ अपानाय स्वाहेति तर्ज्जनीमध्यमे अङ्गुष्ठेन स्पर्शयेत् । ॐ व्यानाय स्वाहेति मध्यमानामे अङ्गुष्ठेन स्पर्शयेत् ॐ उदानाय स्वाहेति तर्ज्जनीमध्यमानामा अङ्गुष्ठेन स्पर्शयेत् । ॐ समानाय स्वाहेति सर्व्वाङ्गुलीरङ्गुष्ठेन स्पर्शयेत् । तत अङ्गुष्ठाभ्यामनामिकाग्रं स्पृशन् मौं नमः पराय अन्तरात्मने अनिरुद्धाय नैवेद्यं कल्पयामीति नैवेद्यमुद्रां प्रदर्श्य मूलमुच्चार्य्य अमुकदेवतां तर्पयामीति चतुर्वारं सन्तर्प्य अमुकदेवतायै एतज्जलममृतापिधानमसि इति जलं दत्त्वा आचमनीयादिकं दद्यात् ॥ * ॥ वैष्णवे तु नैवेद्यदाने सर्व्वत्रायमेव विधिः । ततः सामान्यपूजापद्धत्युक्तक्रमेण विष्वक्सेनान्तं कर्म्म समापयेत् । अत्र पुरश्चरणं षोडशलक्षजपः । तथा च ।
"विकारलक्षं प्रजपेन्मनुमेनं समाहितः ।
तद्दशांशं सरसिजैर्जुहुयान्मधुराप्लुतैः ॥"
इति तन्त्रसारः ।

अन्यत्र विष्णुपूजा आह्निकतत्त्वादौ द्रष्टव्या ॥ * ॥ शिवरात्र्यादिपूजानन्तरं तत्रैव विष्णोरष्टमूर्त्तिपूजा यथा,—
"कृता पूजा मया देवि अष्टमूर्त्तेः शिवस्य च ।
यथा हि परमेशानि तच्छृणुष्व वरानने ॥"
इत्युपक्रम्य ।
"कृत्वा पूजां महेशानि शुक्लया ताम्रवेदने ।
अष्ट विष्णोर्महेशानि नामानि शृणु कामिनि ॥
उग्रं विष्णुं महाविष्णुं ज्वलन्तं सप्रतापनम् ।
नृसिंहं भीषणं भीमं महाबलं प्रकीर्त्तितम् ॥
एतान् विष्णून् महेशानि यथा संपूज्य तच्छृणु ।
वसुदारादिकमादेवि पूजयेद्विष्णुमव्ययम् ।
तत्राथ प्रथमं चार्च्ये नामधारं वरानने ॥"
ॐ उग्राय विष्णवे नमः । ॐ महाविष्णवे नमः । ॐ ज्वलन्ताय विष्णवे नमः । ॐ सप्रतापनाय विष्णवे नमः । ॐ नृसिंहाय विष्णवे नमः । ॐ भीषणाय विष्णवे नमः । ॐ भीमाय विष्णवे नमः । ॐ महाबलाय विष्णवे नमः ।
"इति पूजां महेशानि कृत्वा हि परमेश्वरि ।
विष्णुनाम मया प्रोक्तं कथयामि समन्वितम् ॥"
इति विश्वसारतन्त्रे ४ पटलः ।

तस्य नमस्कारस्तवादिकं यथा —
व्यास उवाच ।
"तुलितेतुमनाद्यन्तमजमव्ययम् ।
यो नमेत् सर्व्वलोकस्य नमस्यो जायते नरः ॥
विष्णुमानन्दमद्वैतं विज्ञानं सर्व्वगं प्रभुम् ।
प्रणमामि सदा भक्त्या चेतसा हृदयालयम् ॥
योऽन्तस्तिष्ठन्नशेषस्य पश्यतीशः शुभाशुभम् ।
तं सर्व्वसाक्षिणं विष्णुं नमस्ये परमेश्वरम् ॥
नाम्नेनापि नमस्कारप्रयुक्तेनाच्युताय वै ।
संसारजन्ममरणाद्विमुक्तो भवति ध्रुवम् ।
ह्यर्थे स्फुरन्मधुरोदरधारकम्ब्वि-
कीलाभिकारिपुरुषे परमेऽप्रमेये ।
एकोऽपि नाथ शुभभावकृतप्रणामः
सद्यः श्वपाकमपि शोधयितुं समर्थः ॥
प्रणम्य दण्डवद्भूमौ नमस्कारेण योऽर्च्चयेत् ।
स यां गतिमवाप्नोति न तां क्रतुशतैरपि ॥
दुर्गसंसारकान्तारापारमभिधावताम् ।
एकः कृष्णनमस्कारः मुक्तितीरस्य देशकः ॥
आसीनो वा शयानो वा तिष्ठन् वा यत्र तत्र वा ।
नमो नारायणायेति मन्त्रैकशरणो भवेत् ॥
नारायणेति शब्दोऽस्ति वागस्ति वशवर्त्तिनी ।
तथापि नरके घोरे पतन्तीति किमद्भुतम् ॥
चतुर्मुखायुर्यदि कोटिवक्त्रो
भवेन्नरः कोऽपि विशुद्धचेताः ।
सर्व्वं गुणानामयुतैकदेश-
र्वदेत वा दैवतस्य विष्णोः ॥
व्यासाद्या मुनयः सर्व्वे स्तुवन्तो मधुसूदनम् ।
मतिक्षयान्निवर्त्तन्ते न गोविन्दगुणक्षयात् ॥
अवशेनापि यन्नाम्नि कीर्त्तिते सर्व्वपातकैः ।
पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव ॥
सकृदुच्चरितं येन हरिरित्यक्षरद्वयम् ।
बद्धः परिकरस्तेन मोक्षाय गमनं प्रति ॥
स्वप्नेऽपि नामस्मृतिरादिपुंस
क्षयं करोत्यशेषपापराशिम् ।
प्रत्यक्षतः किं पुनरत्र पुंसां
संकीर्त्तिते नाम्नि जनार्द्दनस्य ॥
नमः कृष्णाच्युतानन्त वासुदेवेत्युदीरितम् ।
यैर्भावभावितैर्विप्र न ते यमपुरं ययुः ॥
शमायालं जलं वह्नेस्तमसो भास्करोदयः ।
शान्तिः कलेरघौघस्य नामसङ्कीर्त्तनं हरेः ॥
न नारायणमर्च्चं पुनरायाति कश्चन ।
न अपी वासुदेवेति मुक्तिबीजमनुत्तमम् ।
प्रमत्तो दूरमभ्यर्य्य दृश्याग्निरिव तेजसाम् ।
यदेव पुण्डरीकाक्षनामसङ्कीर्त्तनामृतम् ॥
नम इत्येव यो ब्रूयात् मद्भक्तः श्रद्धयान्वितः ।
तस्याक्षयो भवेल्लोकः श्वपाकस्यापि योगिन ॥
संसारघटदुःखस्य भिषगेकमिदं स्मृतम् ।
कलौ तु केशवं भक्त्या ध्यात्वा मुक्तो भवेन्नरः ॥
ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्च्चयन् ।
यदाप्नोति तदाप्नोति कलौ सङ्कीर्त्य केशवम् ॥
नूनं तत्कण्ठशालूकमथवा प्रतिजिह्विका ।
रोगाधारा न सा जिह्वा या न वक्ति हरेर्गुणान् ॥
कुमस्तेनैव हि तस्य कामा वा प्राणिकेन वा ।
जिह्वाग्रे वर्त्तते यस्य हरिरित्यक्षरद्वयम् ॥
विमातृदुग्धस्तनपानतोऽपि
यैव नरस्तु परिदृष्टिमभीप्समानः ।
जन्मान्तरेऽपि हि योनिभय न याति
नारायणस्तुतिपरो मनुजः ॥"
इत्यादि नारदे नारायणनमस्कारो नाम
२१९ अध्यायः ॥ * ॥

कर्णिकायां तथा मेरुकल्पाभो ब्रह्मणो भव ।
एवं दृष्ट्वा परं तस्य शरीरस्य तु सम्भवम् ।
सुगुप्ते तच्छरीरस्थो वासुदेवस्तमं वचत् ।
अनिर्दिष्टविनयरूपेमं एकरूपञ्च धारय ।
अनाद्यन्तेश्वरायापि शङ्खं तेऽस्तु तथा करे ।
कालचक्रमयं घोरं चक्रञ्च धारयाद्भुत ।
अधर्मोदारधारार्थं गदां धारय केशव ।
मालेयं भूतमाला ते कण्ठे तिष्ठतु सर्वदा ।
श्रीवत्सकौस्तुभौ चेमौ चन्द्रार्कप्रतिमौ च ते ।
मारुतस्ते गतिर्वीर्य गरुडोऽस्तु महाबल ।
त्रैलोक्यगामिनी देवी लक्ष्मीस्तेऽस्तु सदा प्रिया ।
द्वादशी च तिथिस्तेऽस्तु कामरूपी च जायते ।
एतावन्तो भवेद्यस्तु द्वादश्यां तत्परायणः ।
स्वर्गभागी च भवतु पुमान् स्त्री वा विशेषतः ।
एवं विष्णुस्तदाख्यातो ब्रह्मणा देवराजकः ।
यानि यानि शरीराणि स्वजन्मान्यपि चाक्रम ।
युगे युगे सर्वलोके वैष्णवी पुरुषो क्रमम् ।
न क्षीणपुण्या वक्ष्यन्ति मनुष्योऽयं कदाचन ॥"

इति वाराहे महापराजितसंज्ञनामाध्यायः ॥०॥

अथ विष्णोर्दिव्यनामकर्म यथा —
"ततो महा शरीरं तत् त्रिधा भक्ते महेश्वर ।
प्रधानेऽश्वत्थवाच्यमीशेऽव्युग्र विष्णुरीश्वरम् ।
तद्रूपमाद्यं धनञ्जयश्चतुर्भुजं चतुर्भुजं ।
स्फटिकाभस्तत्र काय शुभ्रं च चन्द्रशेखर ।
ईशरतो महाकाये स्फटिकाभिवपुरभवत् ।
अपर्मेशाभवत् यत्र महद्रूपेण लोकभृत् ।
क्षितिसंज्ञस्य विश्वा माया पञ्चवक्त्रो भयो
अभवत् ।
मध्ये देवे काये मानसाच्च शिवा तथा ।
क्षितिसंज्ञाभवद्विष्णुरूपमेव महेश्वर ।
सर्वेश्वराङ्गिनियोगेन यदा तद्रूपता मम ।
अमार्ष्टि तदा काये शम्भवे च व्यजोऽभवत् ।
अनन्तगर्भिरूपमु च एव परमेश्वर ।
आत्मनिष्ठ शरीरेषु पद्ममेव प्रकाशते ।
मायाख्यं परं ज्योतिरव्यग्रमव्ययं प्रभुं ।
स्फटिकाभस्तत्र देवो एव महेश्वर ।
ब्रह्मा विष्णुः शिवश्चेति मद्धामानि पृथक्
पृथक् ।
अतस्त्रिधा विधाता च तथाहमपि भो पृथक् ।
एवं शरीरं स्वयं वामभागाक्रमकरात् ॥"

इति कालिकापुराणे १९ अध्यायः ॥०॥

अन्यच्च ।

"गुणातीतश्च भगवान् वामनः पुरुषः परः ।
अनन्तभोगशायी च सर्वाभिकमलाद्भवः ।
विष्णुश्च स च गोविन्द ईश्वरश्च सनातनः ।
यस्य देव महात्मानं च श्रीवत्सं वक्षसि ॥"

इति वामनपुराणे ६२ अध्यायः ॥०॥

तेन ब्रह्मणोत्पन्नं यथा —

पुलस्त्य उवाच ।

"भक्तिं सञ्जाय संचिन्त्य नामरूपस्त्वमेवमेव ।
ततोऽपि नाभिसम्भूतः श्रीरसं कमलं मातरः ।
वासिताः कल्पमात्र तस्मिन् वर्तत केशवः ।
महद्भूतो जगन्नाथो लोकाधारस्तमोघन ।
पादपद्म शयेन्न स गर्भ पार्श्वं यथाव्ययात् ।
उन्मादारात्मयोग्यात्मा तरसा मधुसूदन ।
स्वर्गस्य दारयामास पादं चक्रेण माधव ।
मोक्षयामास नागेन्द्र पापेभ्यः शरण्यागतम् ।
स हि देवप्रभवः कुङ्कुमवर्णसमप्रभः ।
पाहि मामनघ स्वाङ्गरं प्राप्य दिव्यगत ।
यथोऽपि विष्णुना स्पृष्टो जातो दिव्यवपु
पुमान् ॥"

इति वामनपुराणे ८१ अध्यायः ॥०॥

अस्य मन्त्रपूजादिर्यथा,—
"अथ वक्ष्ये महामन्त्रान् विष्णोः सर्वार्थसाध-
कान् ।
यस्य संस्मरणात् जन्तोर्भवाब्धेः पारगामिता ।
तारं नम पदं ब्रूयात् ततो दोषसमन्वितो ।
पञ्चो वायु सम्बोऽयं प्रोक्तो वसुधरः परः ।"
अस्य पूजाप्रयोगः । प्रातः स्नानादिपञ्चाङ्ग-
कर्म कृत्वा पूजामध्यमासाद्य वैष्णवाचमनं
कुर्यात् । तद्यथा गौतमीये ।
"केशवाद्यैस्त्रिभिः पीत्वा द्वाभ्यां प्रक्षालयेत्
करौ ।
द्वाभ्यामोष्ठौ च सम्मृज्य द्वाभ्यां स्पृष्ट्वा शुभ
तत ।
एकेन हस्तं प्रक्षाल्य पादावपि तथैकतः ।
शिरोऽर्थेकेन सम्प्रोक्ष्य ततः सङ्कर्षणादिभिः ।
आस्यनासाक्षिकर्णांश्च नाभ्युरस्कं शिरौ क्रमात् ।
स्पृशेद्वै भवेदाचमनञ्च वैष्णवाभिधं ।
एवमाचमनं कृत्वा साक्षान्नारायणो भवेत् ।"
केशवादयस्तु केशवनारायणमाधवगोविन्द-
विष्णुमधुसूदनत्रिविक्रमवामनश्रीधरहृषीकेश-
पद्मनाभदामोदरसङ्कर्षणवासुदेवप्रद्युम्नानिरुद्ध-
पुरुषोत्तमाधोक्षजनृसिंहाच्युतजनार्दनोपेन्द्र-
हरिकृष्णाः । वाक्यन्तु प्रणवादि केशवाय नम
इत्यादि । तथा च ।
"अचतुर्थीनमोऽन्तैश्च नामभिर्विन्यसेत् सुधीः ।"
तत आसनाद्युपविश्य न्यासान् विधाय
केशवकीर्त्यादिन्यास कुर्यात् । अस्य अन्यादि
न्यासः । शिरसि प्रजापतये ऋषये नमः । मुखे
गायत्र्यै छन्दसे नमः । हृदि अष्टाक्षरीहरये
देवतायै नमः ॥०॥ ततः कराङ्गन्यासौ । श्री
अङ्गुष्ठाभ्यां नम इत्यादि । श्री हृदयाय नम
इत्यादि । तथा च गौतमीये ।
"ऋषिः प्रजापतिश्छन्दो गायत्री देवता हरि ।
अष्टाक्षरी हरिः प्रोक्तः श्रीबीजेन षडङ्गकम् ।"
ततो ध्यानम् ।
"उद्यत्प्रद्योतनशतरुचिं तप्तहेमावदात
पार्श्वद्वन्द्वे जलधिसुतया विश्वधात्र्या च जुष्टम् ।
नानारत्नोल्लसितविविधाकल्पमापीतवस्त्रं
विष्णुं वन्दे दरकमलकौमोदकीचक्रपाणिम् ।"
एवं ध्यात्वा न्यसेत् । यथा । अं केशवाय कीर्त्यै
नमः ललाटे । एवमुक्ता वाक्यक्रमात् पुरस्ता-
दिवामादिरूपतो न्यसेत् । तद्यथा । आं
नारायणाय कान्त्यै नमो मुखे । इं माधवाय
तुष्ट्यै नमो दक्षनेत्रे । ईं गोविन्दाय पुष्ट्यै नमो
वामनेत्रे । उं विष्णवे धृत्यै दक्षकर्णे । ऊं
मधुसूदनाय शान्त्यै वामकर्णे । ऋं त्रिविक्रमाय
क्रियायै दक्षनासापुटे । ॠं वामनाय दयायै
वामनासापुटे । ऌं श्रीधराय मेधायै दक्षगण्डे ।
ॡं हृषीकेशाय हर्षायै वामगण्डे । एं पद्म-
नाभाय श्रद्धायै ओष्ठे । ऐं दामोदराय लज्जायै
अधरे । ओं वासुदेवाय लक्ष्म्यै ऊर्द्ध्वदन्तपङ्क्तौ ।
औं सङ्कर्षणाय सरस्वत्यै अधोदन्तपङ्क्तौ । अं
प्रद्युम्नाय प्रीत्यै मस्तके । अः अनिरुद्धाय रत्यै
मुखे । कं चक्रिणे जयायै । खं गदिने दुर्गायै ।
गं शार्ङ्गिणे प्रभायै । घं खड्गिने सत्यायै ।
ङं शङ्खिने चण्डायै दक्षबाहुमूलसन्धिचतुष्टये । चं
हलिने वाण्यै । छं मुषलिने विलासिन्यै । जं
शूलिने विजयायै । झं पाशिने विरजायै । ञं
अङ्कुशिने विश्वायै वामबाहुमूलसन्ध्यग्रेषु । टं
मुकुन्दाय विनदायै । ठं नन्दजाय सुनन्दायै ।
डं नन्दिने स्मृत्यै । ढं नराय ऋद्ध्यै । णं नरक-
जिते समृद्ध्यै दक्षपादमूलसन्ध्यग्रेषु । तं हरये
शुद्ध्यै । थं कृष्णाय बुद्ध्यै । दं सत्याय भुक्त्यै ।
धं सात्वताय मत्यै । नं शौरये क्षमायै वाम-
पादमूलसन्ध्यग्रेषु । पं शूराय रमायै दक्ष-
पार्श्वे । फं जनार्दनाय उमायै वामपार्श्वे । बं
भूधराय क्लेदिन्यै पृष्ठे । भं विश्वमूर्त्तये क्लिन्नायै
नाभौ । मं वैकुण्ठाय वसुधायै उदरे । यं त्वगा-
त्मने पुरुषोत्तमाय वसुधरायै हृदि । रं असृ-
गात्मने बलिने परायै दक्षांसे । लं मांसात्मने
बलानुजाय परायणायै ककुदि । वं मेदआत्मने
बलाय सूक्ष्मायै वामांसे । शं अस्थ्यात्मने वृष-
घ्नाय सन्ध्यायै हृदादिदक्षकरे । षं मज्जात्मने
वृषाय प्रज्ञायै हृदादिवामकरे । सं शुक्रात्मने
हंसाय प्रभायै हृदादिदक्षपादे । हं प्राणात्मने
वराहाय निशायै हृदादिवामपादे । ळं जीवा-
त्मने विमलाय अमोघायै हृदाद्युदरे । क्षं
क्रोधात्मने नृसिंहाय विद्युतायै हृदादिवदने ।
इति न्यसेत् ॥०॥ तथा च । गौतमीये ।
"केशवादिरयं न्यासो न्यासमात्रेण देहिनाम् ।
अच्युतत्वं ददात्येव तत्र तत्र न संशयः ।
मातृकार्णं यथार्थं केशवाय इति न्यसेत् ।
कीर्त्तिं च तथा शक्तिमात्रादि न्यासमाचरेत् ।
केशवाय तत कीर्त्त्यै कान्त्यै नारायणाय च ।"
इत्यादिक्रमेणोक्तदिव्यावयवार्थं क्रमः । अत्र
केशवकीर्तिभ्यां नम इति । तथा शक्तिमात्रात्मा
मिथुनता अर्थं वाक्यं क्रमेण प्रणवादिकं ।
यथा । श्रीं अं केशवाय कीर्त्त्यै नम इत्यादि ।
तथा च गौतमीये ।
"इदं तत्त्वन्यासकार्यं सर्वदेवोपसंश्रयम् ।
स्वं च पूर्णं महाविष्णोर्मन्त्राणि धारयेत्
सुधीः ।"
ततस्तत्त्वन्यासपीठन्यासादिन्यासांश्च कृत्वा
दिव्यार्चन कुर्यात् । तत्त्वन्यासस्तु यथा

सद्यः पापानि सर्व्वाणि योगाभ्यासरतं नरम् ।
यस्य यावांश्च विश्वासस्तस्य सिद्धिश्च तावती ।
एतावानिति तस्यास्य प्रभावः परिमीयते ॥
विदेशादपि गोविन्द इमचौघात्तव स्मरन् ।
छिन्नपापो भवत्यत्र किं पुनस्तत्परायणः ॥
अयं देवो मुनिवर्य्य एष भक्तान् रक्षति ।
इत्याख्या जायते तावद्यावत्सार्च्चयते हरिम् ॥"
इति मार्कण्डे विष्णुमाहात्म्ये २३५ अध्यायः ॥
तस्य पादोदकपानादिफलम् ।
"हन्ति स्य मुखे नाम नैवेद्यमुदरे हरेः ।
पादोदकञ्च निर्म्माल्यं मस्तके यस्य सोऽच्युतः ॥
नैवेद्यमन्नं तुलसीविमिश्रं
विशेषतः पादजलेन विष्णोः ।
योऽश्नाति नित्यं पुरतो मुरारेः
प्राप्नोति सुप्रेमयुतां च भक्तिम् ।
क्षयं हन्ति मदादिविषघ्नतुलसी तोयञ्च पादोदकं
नैवेद्यं बहुमद्यपानदुरितं गुर्व्वङ्गनासङ्गमम् ।"
इति पाद्मोत्तरखण्डे १ अध्यायः ॥ ० ॥
तस्य नाम्नां व्युत्पत्ती यथा,—
ऋषिरुवाच ।
"जातेषु येषो भवति तस्माच्छेदोऽपि कीर्त्तितः ।
अघजोत्पत्तियुक्तेषु मखेन्द्रवरुणादिषु ।
यस्माच्च च्यवते स्थानात्तस्मात् कीर्त्त्यतेऽच्युतः ।
ब्रह्माणमिन्द्रं रुद्रञ्च यमं वरुणमेव च ।
निगृह्य हरते यस्मात्तस्माद्धरिरिहोच्यते ।
सम्भावयति भूतानि वपुषा यशसा श्रिया ।
विवेश वपुषा देव तस्माच्चापि स वामनः ।
यस्माद्ब्रह्मादयो देवा मुनयश्चोग्रतेजसः ।
न तेऽन्तं अधिगच्छन्ति तेनानन्तस्तु उच्यते ।
न चीयते न क्षरते कल्पकोटिशतैरपि ।
तस्मात्त्वमक्षरत्वाच्च विष्णुरिति प्रकीर्त्त्यते ॥
विष्टब्धञ्च यया सर्व्वं जगत् स्थावरजङ्गमम् ।
जगद्विष्टम्भनाच्चैव विष्णुरिति प्रकीर्त्त्यते ॥
विष्टभ्य तिष्ठते नित्यं त्रैलोक्यं सचराचरम् ।
यक्षगन्धर्व्वनगरं समहद्भूतपन्नगम् ।
व्याप्य मामेव तिष्ठते त्रैलोक्यं सचराचरम् ।
तस्माद्विष्णुरिति प्रोक्तः स्वयमेव स्वयम्भुवा ।
नारा इत्युच्यते आपः ऋषिभिस्तत्त्वदर्शिभिः ।
अयनं तस्य ताः पूर्व्वं तेन नारायणः स्मृतः ।
युगे युगे प्रनष्टां गां विष्णो विन्दसि तत्त्वतः ।
गोविन्देति ततो नाम्ना प्रोच्यसे ऋषिभिस्तथा ।
हृषीकाणीन्द्रियाण्याहुस्तत्त्वज्ञानविशारदाः ।
ईशिता वर्त्तसे तेषां हृषीकेशस्ततोच्यसे ॥
वसन्ति त्वयि भूतानि ब्रह्मादीनि युगक्षये ।
त्वं वा वससि भूतेषु वासुदेवस्ततोच्यसे ॥
सङ्कर्षयसि भूतानि कल्पे कल्पे पुनः पुनः ।
ततः सङ्कर्षणः प्रोक्तस्तत्त्वज्ञानविशारदैः ॥
प्रद्युम्नेन च तिष्ठन्ति यद्देवासुरराक्षसाः ।
प्रतिद्युः सर्व्वधर्म्माणां प्रद्युम्नस्तेन चोच्यते ॥
निरोधो विद्यते यस्मान्न ते भूतेषु कश्चन ।
अनिरुद्धस्ततः प्रोक्तः पूर्व्वमेव महर्षिभिः ॥"
इति मात्स्ये २४२ अध्यायः ॥ ० ॥

विष्णुलोकगमनकारणं यथा,—
"कर्म्मभोगी सकामः स्यान्निष्कामो निरुपद्रवः ।
स याति देहं त्यक्त्वा च पदं विष्णोर्निरामयम् ।
पुनरागमनं नास्ति तेषां निष्कामिनां सति ॥
ये सेवन्ते च द्विभुजं कृष्णमात्मानमेव च ।
गोलोकं ते नरा यान्ति दिव्यरूपविधारिणः ॥
ये च नारायणं भक्त्या सेवन्ते च चतुर्भुजम् ।
वैकुण्ठं यान्ति ते सर्व्वे दिव्यरूपविधारिणः ॥
सकामिनो वैष्णवाश्च गत्वा वैकुण्ठमेव च ।
भारतं पुनरायान्ति तेषां जन्म द्विजातिषु ।
कालेन ते च निष्कामा भवन्त्येव क्रमेण च ।
भक्तिञ्च निर्म्मलां बुद्धिं तेभ्यो दास्यति निश्चितम् ॥
हरिभक्ताश्च निष्कामाः स्वधर्म्मरहिता द्विजाः ।
तेऽपि यान्ति हरेर्लोकं क्रमाद्भक्तिबलादहो ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २४ अध्यायः ॥

विष्णुव्रत, क्ली, (विष्णुर्धिदेवताकं व्रतम् ।) श्रवणाव्रतम् । यथा,—
"उपोष्य द्वादशीं पुण्यां विष्णुऋक्षेण संयुताम् ।
एकादश्युद्भवं पुण्यं नरः प्राप्नोत्यसंशयः ॥"
इति तिथ्यादितत्त्वम् ॥

विष्णुकन्दः, पुं, (विष्णुप्रियः कन्दः ।) कन्दविशेषः । तत्पर्य्यायः । विष्णुगुप्त २ सुपुट ३ बहुसम्पुटः ४ जलवासः ५ हस्तिकन्दः ६ दीर्घपत्र ७ हरिप्रियः ८ । अस्य गुणाः । मधुरत्वम् । शिशिरत्वम् । पित्तदाहशोषहरत्वम् । रुच्यत्वम् । सन्तर्पणकारित्वञ्च । इति राजनिर्घण्टः ॥

विष्णुक्रान्ता, स्त्री, अपराजिता । इत्यमरः । अपराजितायाः अन्या स्त्रुपजातिः । तत्पर्य्यायः । हरिक्रान्ता २ नीलपुष्पा ३ अपराजिता ४ नीलक्रान्ता ५ सुनीला ६ विक्रान्ता ७ छर्दिका ८ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । कफवातामयविषदोषनाशित्वम् । मेधाकारित्वम् । पावनत्वम् । शुभदत्वञ्च । इति राजनिर्घण्टः ॥

विष्णुगुप्तः, पुं, (विष्णुना गुप्तः ।) वात्स्यायनमुनिः । यथा,—
"विष्णुगुप्तस्तु कौटिल्यश्चाणक्यो द्रोमिलोऽङ्गुलः ।
वात्स्यायनो मल्लनागः पक्षिलस्वामिनावपि ॥"
इति त्रिकाण्डशेषः ॥
विष्णुकन्दः । इति राजनिर्घण्टः ॥

विष्णुगुप्तक, क्ली, चाणक्यमूलकम् । इति राजनिर्घण्टः ॥

विष्णुगृह, क्ली (विष्णवे प्रतिष्ठितं गृहम् ।) विष्णुमन्दिरम् । कामपुरम् । इति हेमचन्द्रः ॥
विष्णुगृहकरणफलं यथा,—
"अष्टेष्टकासमायुक्तं यः कुर्य्याद्वैष्णवं गृहम् ।
न तस्य फलसम्पत्तिर्वक्तुं शक्येत केनचित् ॥"
इति हरिभक्तिविलासे । २० । १३ ॥
"येषु देवालयं विष्णोः कुर्व्वन्ति ह्यमयं नराः ।
कारयेन्मृण्मयं वापि नरः तस्य फलं शृणु ॥
अहन्यहनि योगेन यजतो यत्तु यापनम् ।
प्राप्नोति तत् फलं विष्णोर्यः कारयति मन्दिरम् ॥
कुलानां शतमागामि समतीतं तथा शतम् ।
कारयेद्भगवद्धाम नयत्यच्युतलोकताम् ॥
सप्तजन्मकृतं पापं स्वल्पं वा यदि वा बहु ।
विष्णोरालयविन्यासप्रारम्भादेव नश्यति ॥
सप्तलोकमयो विष्णुर्यस्तस्य कुरुते गृहम् ।
प्रतिष्ठां समवाप्नोति स नरः सार्व्वलौकिकीम् ॥
प्रशस्तदेशे भूभागे प्रशस्तं भवनं हरेः ।
कारयन्नर्थलाभान् लोकान् स नरः प्रतिपद्यते ॥
इष्टकानाञ्च विन्यासो यावद्वर्षाणि तिष्ठति ।
तावद्वर्षसहस्राणि तत्कर्त्ता दिवि तिष्ठति ॥
चिकीर्षोरपि तत्कर्त्तुं मन्दिरं पुण्यकारिणः ।
नरस्य क्षयमायाति पापं जन्मशतोद्भवम् ॥
ये ध्यायन्ति सदा कृत्वा करिष्यामि हरेर्गृहम् ।
तेषां विलीयते पापं पूर्व्वजन्मशतोद्भवम् ॥
येऽनुमोदन्ति मनुजाः क्रियमाणं हरेर्गृहम् ।
तेऽपि पापविनिर्म्मुक्ता वैष्णवं लोकमाप्नुयुः ॥
कनिष्ठं मध्यमं श्रेष्ठं कारयित्वा हरेर्गृहम् ।
स्वर्गञ्च वैष्णवं लोकं मोक्षञ्च लभते क्रमात् ॥
समतीतं भविष्यञ्च कुलानामयुतं नरः ।
विष्णुलोकं नयत्याशु कारयित्वा हरेर्गृहम् ॥
दुष्प्राप्यं यत् फलं विप्रा वाजिमेधादिभिर्मखैः ।
प्राप्यते तत् सुखेनैव निवेश्य भवनं हरेः ॥
ये हताभिमुखाः शूरा गोविप्रार्थे रणाजिरे ।
स तत्फलमवाप्नोति कारयित्वा हरेर्गृहम् ॥
पक्वेष्टकचितं रम्यं पञ्चप्रासादसंयुतम् ।
कारयित्वा हरेर्धाम धूतपापो भवेन्नरः ॥
नवेष्टकामयस्यैव शतगुणं वा हरेः ।
तुल्यं फलं समाप्नोति तद्दीनतरदारुणः ॥
पतितं पतमानन्तु तथार्द्धपतितं तथा ।
समुद्धृत्य हरेर्धाम द्विगुणं फलमाप्नुयात् ॥"
इति वह्निपुराणे वैष्णवक्रियायोग समाहृतास्तन नामाध्यायः ॥

विष्णुचक्र, क्ली, (विष्णोश्चक्रमिव ।) हस्तस्थरेखामयचक्रविशेषः । यथा —
"विष्णुचक्रं करे चिह्नं सर्व्वेषां चक्रवर्त्तिनाम् ।
भवत्यव्याहतो यस्य प्रभावस्त्रिदशैरपि ॥"
इति विष्णुपुराणे १ अंशे १३ अध्यायः ॥
रेखाकाराकुलं रेखामयचक्रम् । इति तट्टीका ॥
सुदर्शनचक्रञ्च ॥

विष्णुतैल, क्ली (विष्णुनामकं तैलम् ।) अश्विनीकुमारकृततप्ततैलविशेषः । यथा —
"अश्विनीभ्यां विष्णुतैलञ्च धर्म्मदेन विनिर्म्मितम् ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे १६ अध्यायः ॥ ० ॥
अथ स्वल्पविष्णुतैलम् ।
"शतावरीशतविषमौलि शतागोरक्षलता ।
एरण्डस्य च मूलानि इन्द्रवा पूतिकस्य च ॥
शतावरी सहचरं यवेदन्ते यवोक्षिते ।
तैलप्रस्थं पयो दत्त्वा तस्य वार्यं चतुर्गुणम् ॥
अस्य तैलस्य पक्वस्य शृणु वीर्य्यमनः परम् ।
वातार्त्ता नरनारीश्च योगा नश्यन्ति च ॥
कुर्य्याच्छमूले वातार्त्ते सम्पदोऽहिते च वै ।
मूत्रदोषादियोनिशूलवातात्मदाहरे ॥

सूत उवाच ।

"यथारमूर्त्ते धनारे नारदेन विनिर्दिष्टेन् ।
यथाराधितमीशस्य नारदमाराधन हरेः ॥
दद्यात् पुष्पफलेन यः पुष्पाय्याय एव वा ।
अर्चितं स्यात्तदा चैव तेन सर्वं चराचरम् ॥
मार्जनं परिरम्भनं स्थितिनाराकारकम् ।
यो न पूजयते विष्णुं स विद्याद्ब्रह्मघातकम् ॥
यत्र प्रवृत्तिभूतानां येन सर्वमिदं ततम् ।
तमनभ्यर्च्य सिद्धिं विन्दन्ति मानवाः ॥
नरके पच्यते यस्तु येन परिभावितः ।
किं मया नार्चितो देव केशव क्लेशनाशन ॥
उद्देशनाप्यभावेन दयानामार्चितः प्रभुः ।
यो ददाति भक्त कोर्ब्बं स मया किं न चार्चितः ॥
न तत् करोति वा माता न पिता नापि बान्धवाः ।
यत् करोति सुसंतुष्टः जगत्प्रभुरर्चितः ॥
वर्णाश्रमाचारवता पुरुषेण परः पुमान् ।
विष्णुराराध्यते पन्था नान्यस्तत्तोषकारकः ॥
न दानैर्विविधैर्दत्तैर्न पुष्पैर्नानुलेपनैः ।
तोषमेति महात्मासौ यथा भक्त्या जनार्दनः ॥
सम्पदैश्वर्यमाहात्म्यसन्ततिकर्म्मणाम् ।
विशुद्धिश्चैव सततं तत्समाराधनं हरेः ॥
यथामिष्टूयते विष्णुस्तद्वै परमं पदम् ।
अन्यथा वा विदधेत कस्तमर्चितुमर्हेति ॥"
इति नारदे पूजास्तुतिः ३११ अध्यायः ॥०॥

सूत उवाच ।

"यावोऽस्य मनुष्यास्याधि विपाके च पुनः पुनः ।
इन्द्रेश सुनिम्यत ध्येयो नारायणः सदा ॥
किं तस्य दानैः किं तीर्थैः किं तपोभिः किमध्वरैः ।
यो नित्यं ध्यायते देवं नारायणमनन्यधीः ॥
अहितीयमभयाय अहितीयमतादि च ।
नारायणप्रणामस्य कलां नार्हन्ति षोडशीम् ॥
प्रायश्चित्तान्यशेषाणि तपःकर्म्मादिकानि वै ।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥
कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते ।
प्रायश्चित्तन्तु तस्यैव हरिसंस्मरणं परम् ॥
मुहूर्त्तमपि यो ध्यायेन्नारायणमतन्द्रितः ।
सोऽपि तद्गतिमाप्नोति किं पुनस्तत्परायणः ॥
जाग्रत्स्वप्नसुषुप्तेषु योगस्थस्य च योगिनः ।
या काचिन्मनसो वृत्तिः सा भवत्यच्युताश्रया ॥
उत्तिष्ठंश्चिन्तयिष्यन् स्वपन् वै विचरंस्तथा ।
भुञ्जन् जपंश्च मानव गोविन्दं माधवं स्मरेत् ॥
स्वे स्वे कर्म्मण्यभिरतः कुर्य्याच्चित्तं जनार्दने ।
एवा शास्त्रानुसारोक्तिः किमन्यैर्बहुभाषितैः ॥
ध्यानमेव परो धर्म्मो ध्यानमेव परं तपः ।
ध्यानमेव परं शौचं तस्माद्ध्यानपरो भवेत् ॥
नास्ति विष्णोः परं ध्येयं तपो नानशनात् परम् ।
तस्मात् प्रधानमत्रोक्तं वासुदेवस्य चिन्तनम् ॥
यद्दुर्लभं परं प्राप्यं मनसो यन्न गोचरम् ।
तदप्यप्रार्थितं ध्यातो ददाति मधुसूदनः ॥
प्रमादात् कुर्वतां कर्म्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥
ध्यानेन सदृशं नास्ति शोधनं पापकर्म्मणाम् ।
श्वपाकादिषु भोक्तॄणां दाहकोऽग्निरिव पावकः ॥
विनिघ्नवमथाधिस्थ हत्तिमनैव पश्यति ।
प्राप्नोति योगी योगाग्निदग्धकर्म्मचयोऽचिरात् ॥
यथाग्निरुद्धतशिखः कक्षं दहति सानिलः ।
तथा चित्तस्थितो विष्णुर्योगिनां सर्वकिल्बिषम् ॥
यथाग्निदाहात् कनकमपदोषं प्रजायते ।
संशिष्टं वासुदेवेन मनुष्याणां तथा मनः ॥
गङ्गास्नानसहस्रेषु पुष्करस्नानकोटिषु ।
यत् पापं विलयं याति स्मृते नश्यति तद्धरौ ॥
प्राणायामसहस्रैस्तु यत् पापं नश्यति ध्रुवम् ।
क्षणमात्रेण तत् पापं हरेर्ध्यानात् प्रणश्यति ॥
एकस्मिन्नप्यतिक्रान्ते मुहूर्त्ते ध्यानवर्ज्जिते ।
दस्युभिर्मुषितेनेव युक्तमाक्रन्दितं भृशम् ॥
कलिप्रभावो दुष्टोक्ति पाषण्डानां तथोदय ।
न क्लेशदं मनस्तस्य यस्य चेतसि केशवः ॥
सा निमित्तदवोराय स योग स च चक्षमा ।
यत्र तदेव विन्यास यत्र प्रस्तूयते हरिः ॥
सा हानिस्तन्महच्छिद्रं सा चान्धजडमूकता ।
यन्मुहूर्त्तं क्षणं वापि वासुदेवो न चिन्त्यते ॥
कलिः कृतयुगं तस्य कलिस्तस्य कृते युगे ।
हृदये यस्य गोविन्दो यस्य चेतसि नाच्युतः ॥
यस्याग्रतस्तथा पृष्ठे गच्छतस्तिष्ठतोऽपि वा ।
गोविन्दे नियतं चित्तं कृतकृत्यः सदैव सः ॥
वासुदेवे मनो यस्य जपहोमार्च्चनादिषु ।
तस्यान्तरायो मैत्रेय देवेन्द्रत्वादिकं फलम् ॥
सर्व्वभूतहितं यस्य माधवमत्ता च सर्वदा ।
हिनस्ति दैत्यान् मायां वैष्णवानिलमाधवः ॥
यमो कुर्व्वन्ति अधिष्ठ दयो नरकेषु मानवा ।
सारयन्ति धनाढ्योषु गोविन्दे हृदयस्थिते ॥
ध्यायेन्नारायणं देवं स्नानादिषु च कर्म्मसु ।
प्रायश्चित्तं हि सर्वस्य दुष्कृतस्येति वै श्रुतिः ॥
कामक्रोधौ लोभमोहौ मदमात्सर्य्यमेव च ।
पैशाचिन्द्रौदयोगामो कृष्णमयो जनार्दनः ॥
कीटपक्षिमृगाणाञ्च हरौ संन्यस्तचेतसाम् ।
ऊर्द्ध्वमेव गतिं मन्ये किं पुनर्ज्ञानिनां नृणाम् ॥
वासुदेवतरुच्छाया नातिशीता न घर्म्मदा ।
नरकाङ्गारशमनी सा किमर्थं न सेव्यते ॥
न च दुर्व्वाससः शापो वज्रञ्चापि शचीपतेः ।
हन्तुं समर्थो हि सखे हृत्स्थे मधुसूदने ॥
वदतस्तिष्ठतोऽन्यद्वा स्वेच्छया कर्म्म कुर्व्वतः ।
नापयाति यदा चिन्ता सिद्धां मन्ये च तां सदा ॥

क्षितेः सदा सकलमकलमनस्वी
नारायण सरसिजासनसन्निविष्टः ।
केयूरवान् कनककुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥

विमल मनुष्योऽपि दुराचारमुपा चरेत् ।
ध्यानाद्वस्य विष्णुमिदमुत्तरपदम् ॥
न हि ध्यानेन सदृशं पवित्रमिह विद्यते ।
श्वपाकेष्वपि भुञ्जान पाप नैवात्र लिप्यते ॥
यदा चित्त समायत्तं सर्व्वोर्म्मिसमीपतः ।
यदि नारायणेऽपि स्यात् को न मुच्येत बन्धनात् ॥
प्रशस्तमितरमिदं यत् सत्तामानमगोचरम् ।
कथनामात्रचैष्टं तत्समार्थं समर्पितम् ॥
तथापरा प्रारब्धा योगिनो यान्ति मे क्षयम् ।
कर्मारब्धकर्म्मकोऽप्येते यान्ति निर्वाणिता दिवा ॥"

इति नारदे ध्यानस्तुतिः ३१२ अध्यायः ।

तस्य माहात्म्यं यथा,—

सूत उवाच ।

"विष्णुचित्तो भवेद्यस्तु सर्व्वत्र भवेत् सदा ।
तमेवैष्यति मुक्तैश्वमात्रार्थं हरितत्परः ॥
तदर्थं यत्र गोविन्द या कथा यत्र केशव ।
तत् कर्म्म यत्तदर्थाय किमन्यैर्बहुभाषितैः ॥
सा जिह्वा या हरिं स्तौति तच्चित्तं यत्तदर्पितम् ।
तावेव केवलौ श्लाघ्यौ यौ तत्पूजाकरौ करौ ॥
प्रणाममीशस्य शिरःफलं विदु-
स्तदर्चनं प्राणिफलं दिवौकसः ।
मनःफलं तद्गुणकर्म्मचिन्तनं
वाचस्तु गोविन्दगुणस्तवं फलम् ॥
मेरुमन्दरमात्रोऽपि राशिः पापस्य कर्म्मणः ।
केशवं वैद्यमासाद्य दुर्व्याधिरिव नश्यति ॥
यत्किञ्चित् कुरुते कर्म्म पुरुषः साध्वसाधु वा ।
सर्व्वं नारायणे न्यस्य कुर्व्वन्नपि न लिप्यते ॥
अज्ञानिनः सुरवरस्य भूतपात्रं चतुर्व्विधम् ।
चराचरं जगत् सर्व्वं प्रसुप्तं मायया यत ॥
यत्किञ्चित्समतिवे याति नरक सर्व्वोऽपि दधि सवे,
विष्णो यत्र निवेशितात्ममनसो भ्रान्तोऽपि लोकोत्तमः ।
हर्त्तुं नैतदिह यास्यति तदधिपो दृष्टो ह्यहा प्रमदः
विविधं दुरितं प्रयाति विलयं तथाप्युते कौन्तेय ॥
महता पुण्यपण्येन क्रीतेयं कायनौस्त्वया ।
तस्य विष्णोः प्रसादेन हरे कश्चित् प्रवृत्तिः ॥
अधिकार्थं यत्र तत्रं विष्णोश्चार्च्चनं पूजनम् ।
तत्र दुःखोदधि पारं कुर्व्वन्तु यावन्न भिद्यते ॥
रोहण मरणं दानं पितरौ बान्धवस्य च ।
पतेत्व कर्म्मभेदानां धर्म्मस्य मरणं हरिः ॥
ये नमन्ति जगद्योनिं वासुदेवं सनातनम् ।
न तेभ्यो विद्यते तीर्थमधिकं मुनिसत्तम ॥
अप्रकाशमूलाच्च कुर्व्वाद् ध्यानाच्चैव च ।
तं कर्त्तुस्थ गोविन्दं ध्यान विस्मृतचित्तः ॥
भूत वा भवद्भवद्वा विचार्य्य चरणं तथा ।
हिमवान्तिनरसं स्मरे न याति नरकं नरः ॥
नारदेव सदा भक्तिः प्रसन्नं कर्मकृतः ।
तथा दुःखेन कर्त्तारं को न मुच्येत बन्धनात् ॥
क्षयार्थ नारवतो सर्व्वदेवसमाश्रयोऽनपद ।
तथापि सद्ध्यानो विष्णोः कीर्त्तनं कर्म्मकिल्बिषम् ।
प्रशेषं क्षेत्र यत्र नारायण स्मरणः ।

"इति व्यवच्छिद्य स पाण्डवेयः
प्रायोपवेशं प्रति विष्णुपद्याम्।
दध्यौ मुकुन्दाङ्घ्रिमनन्यभावो
मुनिव्रतो मुक्तसमस्तसङ्गः॥")

अस्याः कारणं यथा,—

नारद उवाच।

"कल्पे पञ्चसहस्राब्दे समतीते सुरेश्वरी।
क्व गता सा महाभाग तन्मे व्याख्यातुमर्हसि॥

नारायण उवाच।

गङ्गा सरस्वती लक्ष्मीश्चैतास्तिस्रो हरेः प्रियाः।
तुलसीसहिता ब्रह्मन् चतस्रः कीर्त्तिताः श्रुतौ॥

नारद उवाच।

बभूव सा मुनिश्रेष्ठ गङ्गा नारायणप्रिया।
अहो केन प्रकारेण तन्मे व्याख्यातुमर्हसि॥

नारायण उवाच।

पुरा बभूव गोलोके गङ्गा सा द्रवरूपिणी।
राधाकृष्णाङ्गसम्भूता तदंशा तत्स्वरूपिणी॥
द्रवाधिष्ठातृदेवी सा रूपेणाप्रतिमा भुवि।
सा सकामा कृष्णपार्श्वे समुवास सलज्जिता॥
प्रफुल्लवदना श्यामवदनपद्ममवेक्षया।
मूर्च्छिता प्रभुरूपेण पुलकाङ्कितविग्रहा॥
एतस्मिन्नन्तरे तत्र विद्यमाना च राधिका।
गोपीभिस्त्रिंशत्कोटिस्था कोटिचन्द्रसमप्रभा॥
कोपेन रक्तपद्मास्या रक्तपङ्कजलोचना।
सुधाधरागयुक्तोष्ठं कम्पयन्ती रुषा॥
साच दृष्ट्वा जगन्नाथं शय्यां सादरपूर्व्वकम्।
उत्थाय गङ्गा सहसा सम्भाषाञ्च चकार सा॥
कुशलं परिपप्रच्छ भीतातिविनयेन च।
ध्यानेन प्रस्तापन्ना श्रीकृष्णचरणाम्बुजे॥
तद्धृत्पद्मस्थितो विष्णुर्भीतायै चाभयं ददौ।
बभूव स्थिरचित्ता सा सर्व्वेश्वरवरेण च॥
ऊर्द्ध्वसिंहासनस्थाञ्च राधां गङ्गा ददर्श सा।
एतस्मिन्नन्तरे राधा जगन्नाथमुवाच सा॥
केयं प्राणेश कल्याणी सस्मिता त्वन्मुखाम्बुजम्।
पश्यन्ती सस्मिता पार्श्वे सकामा वक्रलोचना॥
त्वञ्चापीमां सन्निरीक्ष्य सकामं सस्मितं मुदा।
मयि जीवति गोलोके भूता दुर्व्वृत्तिरीदृशी॥
त्वमेवेत्थं दुर्वृत्तं वारंवारं करोषि च।
क्षमां करोमि प्रेम्णा च स्त्रीजातिः स्निग्ध-
मानसा॥
सम्प्रहीमां प्रियामिष्टां गोलोकाद्गच्छ लम्पट।
अन्यथा न हि ते भद्रं भविष्यति व्रजेश्वर॥
इत्येवमुक्ता सा राधा रक्तपङ्कजलोचना।
गङ्गां वक्तुं समारेभे नम्रास्यां लज्जितां सतीम्॥
गङ्गा रहस्यं विज्ञाय योगेन सिद्धयोगिनी।
तिरोभूय सभामध्यात् स्वजलं प्रविवेश सा॥
राधा योगेन विज्ञाय सर्व्वव्यापिस्थिताञ्च ताम्।
पानं कर्त्तुं समारेभे गण्डूषात् सिद्धयोगिनी॥
गङ्गा रहस्यं विज्ञाय योगेन सिद्धयोगिनी।
श्रीकृष्णचरणाम्भोजं विवेश शरणं ययौ॥
गोलोकञ्चैव वैकुण्ठं ब्रह्मलोकादिकं तथा।
ददर्श राधा सर्व्वत्र नैव गङ्गां ददर्श सा॥
ब्रह्मविष्णुशिवानन्तधर्म्मेन्द्रेन्दुदिवाकराः।
मनवो मुनयः सर्व्वे देवाः सिद्धास्तपस्विनः॥
गोलोकञ्च समाजग्मुः शुष्ककण्ठोष्ठतालुकाः।
सर्व्वे प्रणेमुर्गोविन्दं सर्व्वेशं प्रकृतेः परम्॥
विज्ञाय तदभिप्रायं तानुवाच सुरेश्वरः॥

श्रीभगवानुवाच।

आगताः सुमहाभागा गङ्गानयनकारणात्।
गङ्गा मच्चरणाम्भोजे भयेन शरणं गता॥
राधेमां पातुमिच्छन्ती दृष्ट्वा मां सन्निधानतः।
दास्यामीमां बहिष्कृत्य यूयं कुरुत निर्भयाम्॥
श्रीकृष्णस्य वचः श्रुत्वा सस्मितः कमलोद्भवः।
तुष्टाव सर्व्वाराध्यां तां राधां श्रीकृष्णपूजिताम्॥
वक्त्रैश्चतुर्भिः संस्तूय भक्तिनम्रात्मकन्धरः।
धाता चतुर्णां वेदानामुवाच चतुराननः॥
गङ्गा त्वदङ्गसम्भूता प्रभोश्च रासमण्डले।
युवयोर्द्रवरूपा सा मुग्धयोः शङ्करस्वरात्॥
कृष्णांशा च त्वदंशा च त्वत्कन्यासदृशी प्रिया।
त्वन्मन्त्रग्रहणं कृत्वा करोतु पूजनं तव॥
भविष्यति पतिस्तस्या वैकुण्ठेशश्चतुर्भुजः।
ब्रह्मणो वचनं श्रुत्वा स्वीचकार च सस्मिता॥
बहिर्बभूव सा कृष्णपादाङ्गुष्ठनखाग्रतः।
तत्रैव संस्थिता शान्ता तस्थौ तेषाञ्च मध्यतः॥
उवाच तोयादुत्थाय तदधिष्ठातृदेवता।
तत्तोयं ब्रह्मणा किञ्चित् स्थापितञ्च कमण्डलौ॥
किञ्चिद्दधार शिरसि चन्द्रार्द्धं चन्द्रशेखरः।
गङ्गायै राधिकामन्त्रं प्रददौ कमलोद्भवः॥
गङ्गा तामेव सम्पूज्य वैकुण्ठं प्रययौ सती।
गोलोके च स्थिता गङ्गा वैकुण्ठे शिवलोकके॥
ब्रह्मलोके तथान्यत्र यत्र तत्र पुरा स्थिता।
तत्रैव सा गता गङ्गा चाज्ञया परमात्मनः॥
निर्गता विष्णुपादाब्जात् तेन विष्णुपदी स्मृता॥"

इति श्रीब्रह्मवैवर्त्ते प्रकृतिखण्डे गङ्गोपाख्याने ८ अध्यायः॥०॥ वृषसिंहवृश्चिककुम्भसङ्क्रान्तयः। यथा, भविष्यमात्स्यज्योतिषेषु।

"धनुर्मिथुनकन्यासु मीने च षडशीतयः।
वृषवृश्चिककुम्भेषु सिंहे विष्णुपदी स्मृता॥"

अपि च।

"एतच्च षडशीत्यादिस्वकालमलमासकम्।
चत्वारः षोडश विज्ञेया नाड्यः पश्चाच्च षोडश।
काले पुण्योऽर्कसंक्रान्तेर्विद्वद्भिः परिकीर्त्तितः॥"

इति शातातपीयं दिवा विष्णुपदीविषयम्। अतएव जाबालोऽहदइमिष्टौ।

"पुण्यायां विष्णुपद्याञ्च प्राक् पश्चादपि षोडश।"

तत्र व्यासादिमतम्।

"अयने कोटिगुणितं लक्षं विष्णुपदीषु च।
षडशीतिसहस्रन्तु षडशीत्यामुदाहृतम्॥"

इति तिथ्यादितत्त्वम्।

विष्णुपदीचक्रं, क्ली, (विष्णुपदाख्यचक्रम्।) ज्योतिषोक्तमहापदभावमातृगुणसाधनविद्युत्तमकादीन नक्षत्रविन्यासेन शुभाशुभज्ञापकनराकारचक्रम्। यथा —

"अर्द्धे चक्रमनं यत्र विष्णुपद्यां शुभे तु तत्।
चत्वारि दक्षिणे बाहौ जानौ जानौ च पञ्चके।
चत्वारि वामबाहौ च हृदये पञ्च निर्द्दिशेत्।
चक्षुषोर्द्वय योन्यां मूर्द्ध्नि द्वौ चैकं गुदे॥"

फलं यथा —

"रोगी भोगस्तथा यानं बन्धनं लाभ एव च।
ऐश्वर्य्यं राजपूजा च अपमृत्युरिति क्रमात्॥"

इति ज्योतिस्तत्त्वम्।

विष्णुभक्तिः, स्त्री, (विष्णौ भक्तिः।) भगवत्सेवा। यथा,—

सूत उवाच।

"विष्णुभक्तिं प्रवक्ष्यामि यया सर्व्वमवाप्यते।
यथा भक्त्या हरिस्तुष्येत् तथा नान्येन केनचित्॥
महतः श्रेयसो मूलं प्रचयः पुण्यसन्ततेः।
जीवितस्य फलं स्वादु नियतं स्मरणं हरेः॥
भज इत्येष वै धातुः सेवायां परिकीर्त्तितः।
तस्मात् सेवा बुधैः प्रोक्ता भक्तिसाधनभूयसी॥
ते भक्ता लोकनाथस्य नामकर्म्मादिकीर्त्तने।
मुञ्चन्त्यश्रूणि संहर्षाद् ये च हृष्टतनूरुहाः॥
जगद्धातुर्म्महेशस्य स्निग्धाः परवाचया।
इत्थं निश्चक्रिया कुर्युः स्निग्धा ये वैष्णवास्तु ते॥
प्रणामपूर्व्वकं ज्ञात्वा यो वदेद्वैष्णवो हि सः।
तद्भक्तजनवात्सल्यं पूजायाञ्चानुमोदनम्॥
तत्कथाश्रवणे प्रीतिः स्वरनेत्राङ्गविक्रिया।
येन सर्व्वात्मना विष्णौ भक्त्या भावो निवेशितः॥
विप्रेन्द्रीश्वरदयित महाभागवतो हि सः।
विष्णोश्च कारयेन्नित्यं तन्मना दम्भवर्ज्जितम्॥
स्वयमभ्यर्च्चयेद्यो वै विष्णुं नोपजीवति।
भक्तिरष्टविधा ह्येषा यस्मिन् म्लेच्छेऽपि वर्त्तते॥
स विप्रेन्द्रो मुनिः श्रीमान् स यतिः स च पण्डितः।
तस्मै देयं ततो ग्राह्यं स च पूज्यो यथा हरिः॥
स्मृतः सम्भाषितो वापि पूजितो वा द्विजोत्तमः।
पुनाति भगवद्भक्तश्चाण्डालोऽपि यदृच्छया॥
प्रपन्नाय प्रपन्नाय तवास्मीति च यो वदेत्।
अभयं सर्व्वभूतेभ्यो दद्यादेतद्व्रतं हरेः॥
मन्त्रवादिसहस्रेभ्यः सर्व्ववेदान्तपारगः।
सर्व्ववेदान्तवित्कोट्या विष्णुभक्तो विशिष्यते॥
ऐकान्तिकाश्च पुरुषा गच्छन्ति परमं पदम्।
एकान्तिनामयो विष्णुप्रसादैकपरायणः॥
तस्मादेकान्तिनः प्रोक्ता ब्रह्मज्ञानप्रदायकाः।
प्रियाणामपि सर्व्वेषां देवदेवस्य सुप्रियः॥
आपत्स्वपि सदा यस्य भक्तिरव्यभिचारिणी।
या प्रीतिरविवेकानां विषयेष्वनपायिनी॥
विष्णुं संस्मरतः सा मे हृदयान्मापसर्पतु।
अनार्य्यतोऽपि येनायं सर्व्वस्मादादरादपि॥
यो न सर्व्वेश्वरे भक्तस्तं विद्यात् पुरुषाधमम्।
नायोऽन्यस्याश्रयोऽपि न ज्ञानाम्बरकारकः॥
यो भक्तिं कुरुते विष्णौ तेन सर्व्वं कृतं भवेत्।
महतां ब्रह्मज्ञानां सर्व्वेषां परमा गतिः॥
न तां यान्ति गतिं भक्त्या यां यान्ति मुनिसत्तमाः।
स धर्म्मो ह्यपरो लोके मिथ्याचारोऽप्यनर्थकः॥
पुनाति सकलान् लोकान् सहस्रांशुरिवोदितः।
ये दुर्द्दान्ता दुराचाराः पापाचाररतास्तथा।

चीचीकिटेऽमरद्रो च भराभव्योदितं हितम् ।
श्रीवामनचरीवाक् गर्भस्त्रावकरं परम् ।
एतद्वर्धनं तैलं विष्णुना परिकीर्तितम् ॥"
सबुण मौरपणचुण । हरमोहंदवीवत्त वार्ष्णी । पुनिकी पाटावरम् । बङ्चरो मिरटी । अत्र मापान्तराभावात् चौरस्य चतुर्थं चर्णं भविदर्शति ।
"यत्रमचौरमाङ्गये पादो यत्रेरिह क्वचित् ।
तत्र चतुर्गुणं तत्र चौराचामादमारपेत् ॥"
इति परिभाषावचनात् ।
कषिरिति पाठात् मापान्तररहिते केवल चौरादिग्वर्धनतैलादिपाके प्रातव्य न तु सर्वत्र ।
"एकाचम्दनकुङ्कुमागुरुमुरामांसीमुरामीरटो मौरावध्वदपत्रिपर्णमवर्षरुचौवीयमोदी रकम् ।
कर्पूरिबालपुतिश्लवणमृगमदैचैलवल्लादिकं
मानन्दनमिद प्रदैयमखिलं श्रीविष्णुतैलादिक ॥"
अथ हरविष्णुतैलम् ।
"अश्वगन्धाग्निर्वाच्चमची च टी ।
काकोली चीरकाकोली चीवनी मधुयष्टिका ।
मधूरिका देवदाह पद्मकाष्ठं सेलवम् ।
मांसी चेला त्वच कुष्ठं रक्तचन्दनमेव च ।
मञ्जिष्ठा कसकाभिध चैलवल्लकुङ्कुमम् ।
पर्णी कुन्दरु लोहित पत्रिकच नखी तथा ।
एतेषां पलिकैर्भागैर्गोलकाापि तथाढकम् ।
प्रदापरोत्पलं कुम्भचापि चर्म भवेत् ।
विष्णुतैलवर पैत्र सर्वंवातविकारनुत् ।
सर्वोवाते चयोवाते चाक्षविपद एव च ।
शिरोमध्यगता ये च मन्या सार्णे गतादयः ।
यस्य तुम्यति चैकाङ्गं गतिमङ्ग च विहता ।
ये वातप्रभवा रोगा ये च पित्तसमुद्भवाः ।
सर्वास्तामाशयत्याशु सूर्यस्तम इवोदितः ॥"
इति भैषज्यरत्नावली ।

विष्णुदैवतं, } त्रि (विष्णुर्दैवतं देवता या यस्य ।) विष्णुदैवत्यं, } विष्णुदेवतादवताकम् । यथा,—
"श्रावणस्य च सर्वं कथितं सर्वदैवतम् ।
मयस्तु सर्वदैवस्य तद्धि द्विजोत्तमा ।
तस्यैवं विष्णुदैवस्य सर्वं वा विष्णुदैवतम् ॥"
इति वह्निपुराणे विष्णुमाहात्म्यम् ।
श्री अवशालनमम् । इति ज्योतिषम् ।
विष्णुदैवत्या स्त्री, (विष्णुर्दैवतमस्याः ।) एका दश्यतिथि । हादशीतिथि । यथा,—
"एकादशी द्वादशी च प्रोक्ता वैष्णवदैवत ।
त्रयोदशी मदनस्य शिवप्रोक्ता चतुर्दशी ॥"
इति स्मृतिः ।
"एकादशीसुतोषैव द्वादशीं समुपोषयेत् ।
न चात्र विधिलोपः स्यादुभयोर्देवता हरि ॥"
इति तिथ्यादितत्त्वम् ।
विष्णुधर्मः पुं (विष्णुप्रोक्तो धर्मो यत्र ।) ग्रन्थविशेषः । यथा । "श्रवणादिकानोक्ते संवादपुराणम् ।
"अष्टादश पुराणानि रामस्य चरितं तथा ।
विष्णुधर्मादिशास्त्राणि शिवधर्माश्च भारत ।
कार्ष्णञ्च पञ्चमो वेदो यन्महाभारतं स्मृतम् ।
सौराश्च धर्मा राजेन्द्र मानवोक्ता महीपते ।
जयेति नाम एतेषां प्रवदन्ति मनीषिण ।
जयमेव कर्त्तव्यमिति जयस्तस्माद्भवत्यतः ॥" इति तिथ्यादितत्त्वम् ॥ विद्याविशेषः । यथा,—
"भगवान् यमा नैष्ठिक विष्णुधर्माख्यविद्यया ।
धर्मात् प्राप्य विविधेश योन पल्लो महीश्वर ।
पादयोर्जानुनोरूर्वोर्हृदि स्कन्धयोरपि ।
तथैव सर्वमुख्यारादिविधिर्वदेत् ।
ॐ नमो नारायणायेति विपर्ययमथापि वा ।
करन्यासं ततः कुर्यात् द्वादशाक्षरविद्यया ।
प्रणवादियकारान्तमङ्गुल्यङ्गुष्ठपर्वसु ।
न्यसेत् हृदय ओंकार वकार मम मूर्धनि ।
षोकारञ्च भ्रुवोर्मध्ये शिखायां दिग्बन्धनेत् ।
ॐ विष्णवे नम इति इम मन्त्रमुदाहरेत् ।
आत्मानं परमं ध्यायेद्ध्येयं षट्शक्तिभिर्युतम् ।
मम रक्षां ततः कुर्यादमृतच्छन्नभिरक्षतु ।
त्रिविक्रमस्तथाकाशे शत्रौ रक्षतु वामन ।
अटव्यां नरसिंहस्तु रामो रक्षतु पर्वते ।
भूमौ रक्षतु वाराहो जले नारायणोऽवतु ।
सर्वमस्माच्च कामित्वान्मो योगात्तु रक्षतु ।
दत्तात्रेयो देवतात्मा कुमारो मकरध्वजात् ।
नारदोऽभ्यर्थनात् पापात् कूर्मो वै नैर्ऋते
सदा ।
धन्वन्तरिरपथ्याच्च नाम क्रोधवशात् शिव ।
यज्ञपुरुषः कालाद्वामात्रे च रक्षतु ।
बुद्ध पाषण्डसङ्घातात् कल्किरव्यात् कलेः समम् ।
पापात्मना दिने विष्णुर्हातमी नारायणोऽवतु ।
मधुहा चापराह्णे च सायं रक्षतु माधव ।
हृषीकेशः प्रदोषेऽव्यात् प्रत्यूषेऽव्याज्जनार्दन ।
श्रीधरोऽव्यान्निशार्धे पद्मनाभो निशान्तके ।
चक्रकौमोदकीचक्रा हन्तु शत्रूंश्च राघवान् ।
शङ्खपद्मच भगवान् मां वै सदकुलपा ।
कुर्वन्ति परमा भवानां पान्तु पार्षदभूषणा ।
दिशो दशर्षयश्चैव यदा सर्वत्र पान्तु माम् ।
विदिक्षु दिक्षु च यदा नरसिंहश्च रक्षतु ।
एतद्धारयमाणस्य यं यं पश्यति चक्षुषा ।
स वश्यो जायते नाम च रोगान्मुच्यते नि
भवेत् ॥"
इति मार्कण्डेये ९ । १ अध्याय ।
विष्णुधर्मोत्तरं, क्ली, उपपुराणविशेषः । तत्र प्रथ कर्ता वेदव्यासः । वज्रार प्रोक्तवान् पाठम् । तत्र १ ० इत्याद्यध्यायाः ।
विष्णुपञ्जरं, क्ली (विष्णुरेव पञ्जरमिव यस्मात् । तद्धारणे विष्णुरक्षकत्वात्तथात्वम् ।) विष्णुकवचविशेषः । यथा,—
"प्रवक्ष्याम्यधुना ह्येतद्वैष्णवं पञ्जरं शुभम् ।
नमो नमस्ते गोविन्द चक्रं गृह्य सुदर्शनम् ।
प्राच्यां रक्षस्व मां विष्णो त्वामहं शरणं गत ।
गदां कौमोदकीं गृह्ण पद्मनाभ नमोऽस्तु ते ।
याम्यां रक्षस्व मां विष्णो त्वामहं शरणं गत ।
हलमादाय सौनन्दं नमस्ते पुरुषोत्तम ।
प्रतीच्यां रक्ष मां विष्णो भवन्तं शरणं गतम् ।
मुसलं शातनं गृह्य पुण्डरीकाक्ष रक्ष माम् ।
उत्तरस्यां जगन्नाथ भवन्तं शरणं गत ।
खड्गमादाय चर्माथ अस्त्रशस्त्रादिकं हरे ।
नमस्ते रक्षोघ्न ऐशान्यां शरणं गत ।
पाञ्चजन्यं महाशङ्खमनुघोषञ्च पङ्कजम् ।
प्रगृह्य रक्ष मां विष्णो आग्नेय्यां यज्ञसूकर ।
चन्द्रसूर्यं समागृह्य खड्गं चान्द्रमसं तथा ।
नैर्ऋत्यां मां च रक्षस्व दिव्यमूर्ते नृकेसरिन् ।
वैजयन्तीं प्रगृह्य त्वं श्रीवत्सं कण्ठभूषणम् ।
वायव्यां रक्ष मां देव हयग्रीव नमोऽस्तु ते ।
वैनतेयं समारुह्य अन्तरीक्षे जनार्दन ।
मां त्वं रक्षाजित सदा नमस्तेऽस्त्वपराजित ।
विशालाक्षं समारुह्य रक्ष मां त्वं रसातले ।
अकूपार नमस्तुभ्यं महामीन नमोऽस्तु ते ।
करशीर्षाद्यङ्गुलीषु सत्य त्वं बाहुपञ्जरम् ।
कृत्वा रक्षस्व मां देव नमस्ते पुरुषोत्तम ।
एतदुक्तं भगवता वैष्णवं पञ्जरं महत् ।
पुरा रक्षार्थमीशेन कात्यायन्या द्विजोत्तम ।
यदा सा नाशयामास दानवं महिषासुरम् ।
चामरं रक्तबीजञ्च तथान्यान् सुरकण्टकान् ॥"
इति वामने १७ अध्याय ।
विष्णुपदं क्ली, (विष्णोः पदम् ।) आकाशम् । इत्यमरः । (यथा, रघुवंशे । १६ । ८८ ।
"वसुन्धराविष्णुपदं द्वितीय
मध्यारुरोहेव रजश्छलेन ॥")
चीरोदः । इति मेदिनी । पद्मम् । इति हेम चन्द्रः । (तीर्थविशेषः । यथा, महाभारते । ७ । ८१ । ६१ ।
"तत्र विष्णुपदे स्नात्वा अर्चयित्वा च वामनम् ।
सर्वपापविशुद्धात्मा विष्णुलोकं स गच्छति ॥"
कैलासपर्वतस्य स्थानविशेषः । यथा, महा भारते । ५ । १११ । २९ ।
"अत्र विष्णुपदं नाम क्रमता विष्णुना कृतम् ॥"
पर्वतविशेषः । यथा, हरिवंशे । ९१ । ७९ ।
"तेन विमर्दनेनाथ तदा विष्णुपदे गिरौ ॥")
विष्णोः स्थानम् । यथा
"अनुष्ठानपरिमाणे चोत्ताबनिवासितम् ।
यत्र गत्वा न शोचन्ति तद्विष्णोः परमं पदम् ।
धर्मेणुपासादिकृतिन यत्र ते योजना अत्र ।
तद्वास्तोनायाचिद्वादिष्णोः परमं पदम् ।
यत्रैतद्दोषं शोतं च अमृत अक्षराक्षरम् ।
भावत्र निर्भं मैत्रेय तद्विष्णोः परमं पदम् ।
द्वितीय चतुरानन निर्म तत्परमानाम् ।
निर्देशमानाहृश यदि विष्णोः परं पदम् ॥"
इति विष्णुपुराणे २ अंशे ८ अध्याय ।
भूमध्यम् । यथा —
"अरुन्धती ध्रुवश्चैव विष्णोस्त्रीणि पदानि च ।
आयुर्हीना न पश्यन्ति चतुर्थं मातृमण्डलम् ।
अरुन्धती भवेज्जिह्वा ध्रुवो नासाग्रमुच्यते ।
विष्णोः पदानि भ्रूमध्ये नेत्रयोर्मातृमण्डलम् ॥"
इति काशीखण्डे ४९ अध्याये १२ । १३ श्लोकौ ।
विष्णुपदी, स्त्री, (विष्णोः पद स्थानं यस्याः । गौरादित्वात् ङीष् ।) गङ्गा । इत्यमरः । (यथा, भागवते । ६ । १९ । ७ ।

"इति व्यवच्छिद्य स पाण्डवेय
प्रायोपवेशं प्रति विष्णुपद्याम् ।
दध्यौ मुकुन्दाङ्घ्रिमनन्यभावो
मुनिव्रतो मुक्तसमस्तसङ्गः ॥")

अस्या कारणं यथा,—

नारद उवाच ।

"कथं पद्मसहस्राब्दे समतीते सुरेश्वरी ।
जगाम सा महाभाग तन्मे व्याख्यातुमर्हसि ॥

नारायण उवाच ।

गङ्गा सरस्वती लक्ष्मीश्चैतास्तिस्रो हरेः प्रियाः ।
तुलसीसहिता ब्रह्मन् चतस्रः कीर्त्तिताः श्रुतौ ॥

नारद उवाच ।

बभूव सा मुनिश्रेष्ठ गङ्गा नारायणप्रिया ।
अहो केन प्रकारेण तन्मे व्याख्यातुमर्हसि ॥

नारायण उवाच ।

पुरा बभूव गोलोके गङ्गा सा द्रवरूपिणी ।
राधाकृष्णाङ्गसम्भूता तदंशा तत्स्वरूपिणी ॥
द्रवाधिष्ठातृदेवी सा रूपेणाप्रतिमा भुवि ।
सा सकामा कृष्णपार्श्वे समुवास सलज्जिता ॥
प्रफुल्लवक्त्रा सुधासवसङ्गमलालसा ।
स्मिता प्रभुरूपेण पुलकाङ्कितविग्रहा ॥
एतस्मिन्नन्तरे तत्र विद्यमाना च राधिका ।
गोपीत्रिंशत्कोटियुता कोटिचन्द्रसमप्रभा ॥
कोपेन रक्तपद्मास्या रक्तपङ्कजलोचना ।
सुचारुदशनाशुक्लोष्ठं कम्पयन्ती रुषा ॥
सा च दृष्ट्वा समुत्तस्थौ कृष्णः सादरपूर्व्वकम् ।
उत्थाय गङ्गा सहसा सम्भाषाञ्च चकार सा ॥
कुशलं परिपप्रच्छ भीतातिविनयेन च ।
ध्यानेन प्रत्यापन्ना श्रीकृष्णचरणाम्बुजे ॥
तद्धृत्पद्मस्थितो विष्णुर्भीतायै चाभयं ददौ ।
बभूव स्थिरचित्ता सा सर्व्वेश्वरवरेण च ॥
ऊर्द्ध्वं सिंहासनस्थाञ्च राधां गङ्गा ददर्श सा ।
एतस्मिन्नन्तरे राधा जगन्नीशमुवाच सा ॥
केयं प्राणेश कल्याणी सस्मिता त्वन्मुखाम्बुजम् ।
पश्यन्ती सस्मिता पार्श्वे सकामा वक्रलोचना ॥
त्वञ्चापीमां सस्मितास्य सकामं सस्मितं मनः ।
मयि जीवति गोलोके भूता दुर्व्वृत्तिरीदृशी ॥
त्वमेवेत्थं दुर्वृत्तं वारंवारं करोषि च ।
क्षमां करोमि प्रेम्णा च स्त्रीजाति स्निग्ध
मानसा ॥
सङ्गृहीणां प्रियामिष्टां गोलोकाद्गच्छ लम्पट ।
अन्यथा न हि ते भद्रं भविष्यति व्रजेश्वर ॥
इत्येवमुक्त्वा सा राधा रक्तपङ्कजलोचना ।
गङ्गां वक्तुं समारेभे वचसा लज्जितां सतीम् ।
गङ्गा रहस्यं विज्ञाय योगेन सिद्धयोगिनी ।
तिरोभूय सभामध्यात् स्वजलं प्रविवेश सा ॥
राधा योगेन विज्ञाय सर्व्वत्रावस्थिताञ्च ताम् ।
पानं कर्त्तुं समारेभे गण्डूषात् सिद्धयोगिनी ॥
गङ्गा रहस्यं विज्ञाय योगेन सिद्धयोगिनी ।
श्रीकृष्णचरणाम्भोजं विवेश शरणं ययौ ॥
गोलोकञ्चैव वैकुण्ठं ब्रह्मलोकादिकं तथा ।
ददर्श राधा सर्व्वत्र नैव गङ्गां ददर्श सा ॥
ब्रह्मविष्णुशिवानन्तधर्म्मेन्द्रेन्दुदिवाकराः ।
मनवो मुनयः सर्व्वे देवाः सिद्धास्तपस्विनः ॥
गोलोकञ्च समाजग्मुः शुष्ककण्ठोष्ठतालुकाः ।
सर्व्वे प्रणेमुर्गोविन्दं सर्व्वेशं प्रकृतेः परम् ।
विज्ञाय तदभिप्रायं तानुवाच सुरेश्वरः ॥

श्रीभगवानुवाच ।

आगता सुमहाभागा गङ्गानयनकारणात् ।
गङ्गा मच्चरणाम्भोजे भयेन शरणं गता ॥
राधिमां पातुमिच्छन्ती दृष्ट्वा मां सन्निधानतः ।
दास्यामीमां बहिष्कृत्य यूयं कुरुत निर्भयाम् ॥
श्रीकृष्णस्य वचः श्रुत्वा सस्मितं कमलोद्भवः ।
तुष्टाव सर्व्वाराध्यां तां राधां श्रीकृष्णपूजिताम् ॥
वक्त्रैश्चतुर्भिः संस्तूय भक्तिनम्रात्मकन्धरः ।
धाता चतुर्णां वेदानामुवाच चतुराननः ॥
गङ्गा त्वदङ्गसम्भूता प्रभोश्च रासमण्डले ।
युवयोर्द्रवरूपा सा मुग्धयोः शङ्करस्वरात् ॥
कृष्णांशा च त्वदंशा च त्वत्कन्यासदृशी प्रिया ।
त्वन्मन्त्रग्रहणं कृत्वा करोतु पूजनं तव ॥
भविष्यति पतिस्तस्या वैकुण्ठेशश्चतुर्भुजः ।
ब्रह्मणो वचनं श्रुत्वा स्वीचकार च सस्मिता ॥
बहिर्बभूव सा कृष्णपादाङ्गुष्ठनखाग्रतः ।
तत्रैव सहसा प्राप्ता तस्थौ तेषाञ्च मध्यतः ॥
उवास तोयादुत्थाय तदधिष्ठातृदेवता ।
तत्तोयं ब्रह्मणा किञ्चित् स्थापितञ्च कमण्डलौ ॥
किञ्चिद्दधार शिरसि चन्द्रार्द्धं चन्द्रशेखरः ।
गङ्गायै राधिकामन्त्रं प्रददौ कमलोद्भवः ॥
गङ्गा तामेव संपूज्य वैकुण्ठं प्रययौ सती ।
गोलोके च स्थिता गङ्गा वैकुण्ठे शिवलोकके ।
ब्रह्मलोके तथान्यत्र यत्र तत्र पुरा स्थिता ।
तत्रैव सा गता गङ्गा चाज्ञया परमात्मनः ॥
निर्गता विष्णुपादाब्जात् तेन विष्णुपदी स्मृता ॥"
इति श्रीब्रह्मवैवर्त्ते प्रकृतिखण्डे गङ्गोपाख्याने ८-अध्यायः ॥०॥ सिंहवृश्चिकवृषकुम्भसङ्क्रान्तयः ।
यथा, भविष्यमात्स्यज्योतिषेषु ।
"धनुर्मिथुनकन्यासु मीने च षडशीतयः ।
वृषवृश्चिककुम्भेषु सिंहे विष्णुपदी स्मृता ॥"
अपि च ।
"एतच्च षडशीत्यादिचतुष्कायनमानम् ।
अर्व्वाक् षोडश विज्ञेया नाड्यः पश्चाच्च षोडश ।
कालः पुण्योऽर्कसङ्क्रान्तेर्विद्वद्भिः परिकीर्त्तितः ॥"
इति शातातपीये दिवा विष्णुपदीविषयम् ।
अतएव जाबालोक्तद्वयसिद्धौ ।
"पुण्यार्थं विष्णुपद्याञ्च प्राक् पश्चादपि षोडश ।"
तत्र व्यासादिवचनम् ।
"अयने कोटिगुणितं लक्षं विष्णुपदीषु च ।
षडशीतिसहस्रन्तु षडशीत्यामुदाहृतम् ॥"
इति तिथ्यादितत्त्वम् ।

विष्णुपञ्जरं, क्ली (विष्णुपञ्जरात्मकम् ।) स्तोत्र ग्रहापहभारपापग्रहभयाधीरविषमग्रहकालीन भयभवाद्भकष्टभावमत्रयापकस्ताकार चक्रम् । यथा —
"अग्रे चक्रमर्द्धं पद्मं विष्णुपद्मं स्मृतं तु तत् ।
चत्वारि दक्षिणे बाहौ जीवि जीवि पदद्वये ।
चत्वारि वामबाहौ च हृद्ये पञ्च विनिर्द्दिशेत् ।
अस्तोदये द्वय योन्य मध्ये द्वौ चैकक गुदे ॥"
फलं यथा —
"रोगो भोगस्तथा धात बन्धनं लाभ एव च ।
ऐश्वर्य्यं दानपूजा च अपमृत्युरिति क्रमात् ॥"
इति ज्योतिस्तत्त्वम् ।

विष्णुभक्तिः, स्त्री, (विष्णौ भक्तिः ।) भगवत्सेवा । यथा,—

सूत उवाच ।

"विष्णुभक्तिं प्रवक्ष्यामि यया सर्व्वमवाप्यते ।
यथा भक्त्या हरिस्तुष्येत्तथा नान्येन केनचित् ॥
महतः श्रेयसो मूलं प्रसवः पुण्यसन्ततेः ।
जीवितस्य फलं स्वादु नियतं स्मरणं हरेः ॥
भज इत्येष वै धातुः सेवायां परिकीर्त्तितः ।
तस्मात् सेवा बुधैः प्रोक्ता भक्तिसाधनभूयसी ॥
ते भक्ता लोकनाथस्य नामकर्म्मादिकीर्त्तने ।
मुञ्चन्त्यश्रूणि संहर्षात् ये च हृष्टतनूरुहाः ॥
जगद्धातुर्म्महेशस्य निष्पापा चरणाश्रयाः ।
इह नित्यक्रिया कुर्य्युः स्निग्धा ये वैष्णवास्तु ते ॥
प्रणामपूर्व्वकं चान्या यो वदेद्वैष्णवो हि सः ।
तद्भक्तजनवात्सल्यं पूजायाञ्चानुमोदनम् ॥
तत्कथाश्रवणे प्रीतिः स्वरनेत्राङ्गविक्रिया ।
येन सर्व्वात्मना विष्णौ भक्त्या भावो निवेशितः ॥
विप्रेभ्यश्चरहस्येव महाभागवतो हि सः ।
विष्णोश्च कारणं नित्यं तन्त्र इत्यर्च्चितम् ॥
स्वयमभ्यर्च्चनञ्चैव यो विष्णुं चोपजीवति ।
भक्तिरष्टविधा ह्येषा यस्मिन् म्लेच्छेऽपि वर्त्तते ॥
स विप्रेन्द्रो मुनिः श्रीमानृषवान् स च पण्डितः ।
तस्मै देयं ततो ग्राह्यं स च पूज्यो यथा हरिः ॥
स्मृतः सम्भाषितो वापि पूजितो वा द्विजोत्तम ।
पुनाति भगवद्भक्तश्चण्डालोऽपि यदृच्छया ॥
प्रणताय प्रपन्नाय तवास्मीति च यो वदन् ।
अभयं सर्व्वभूतेभ्यो दद्यादेतद्व्रतं हरेः ॥
मन्वयाभिरतश्रेष्ठः सर्व्ववेदान्तपारगः ।
सर्व्ववेदान्तवित्कोट्या विष्णुभक्तो विशिष्यते ॥
ऐकान्तिकाश्च पुरुषा गच्छन्ति परमं पदम् ।
एकान्तिनाधमो विष्णुयजादेशी नरायण ॥
तस्मादैकान्तिनः प्रोक्ताः तद्भागवतचेतसः ।
प्रियाणामपि सर्व्वेषां देवदेवस्य सुप्रियः ॥
आपत्स्वपि सदा यस्य भक्तिरव्यभिचारिणी ।
या प्रीतिरविवेकानां विषयेष्वनपायिनी ॥
विष्णुं संस्मरतः सा मे हृदयान्मापसर्पतु ।
चण्डालोऽपि वैरागी कर्म्मसाध्यादवेद्यं च ॥
यो न सर्व्वेश्वरे भक्तस्तं विद्यात् पुरुषाधमम् ।
बालोऽतवेन्द्राक्षोऽपि न तत्त्वाभ्यन्तरः ॥
यो भक्तिं वहते विष्णौ तेन सर्व्वं कृतं भवेत् ।
यज्ञानां क्रतुमुख्यानां सर्व्वेषां मारणा अपि ॥
न तां शान्तिं मर्त्त्य भक्ता यां शान्तिं मुद्गमनम् ।
स क्लेशदेवो लोके भिक्षाचारोऽप्यनन्यधर्म्मी ॥
पुनाति सत्वरान् लोकान् बद्धवानरिरोगिणः ।
ते हृदया दुराचार

इदमपि शान्ति पर ध्यात्वा नारायणपरायणाः ।
इदं जनार्दने भक्तिर्येन पापाभिचारिणी ।
मन्ये किमत्र बहुना सैव निर्वाणहेतुकी ॥
आपन्नो तव संसारे घोरायां कर्म्मदुर्गमे ।
भक्तावलम्बनो लोको भक्तियुक्तो जनार्दन ॥
न प्राप्नोति पुमान् स्थानं देवदेवस्य चक्रिणः ।
न यतो चरितो नैव सर्व्वधर्म्मबहिष्कृतः ।
नास्ति यज्ञोऽपि विष्णोर्यस्य पुत्रो न जायते ।
शरीरं पुण्यकीटादपि गृह्णीयात् कृष्णयोगजम् ॥
यस्मिन् पतति विश्वेऽपि मुक्तिरप्यचिराद्भवेत् ।
विष्णौ निविष्टमनसां किं पुनर्विनयस्य ॥
मधुरिपुमभिवीक्ष्य माधवार्च्चां
वदति यस्य किं तस्य धर्म्मशक्तेः ।
परिचर मधुसूदनप्रणामान्
प्रभुरहमप्यनृणो न मैत्रयामाम् ॥
अपि देवं गुरुराचारो भवति मामनन्यभाक् ।
धातुदेव च समस्त सम्प्रदायविनो हि सः ॥
स्थित भवति धर्मात्मा प्रपन्नानि विपश्यति ।
विप्रेन्द्र प्रतिभानोऽपि विष्णुभक्तो न नश्यति ॥
धर्म्मविद्यामे विष्णोः शालिकाल करे स्थिता ।
ममसंयतानां मूर्ध्ने यस्य भक्तिः स्थिरा सती ॥
देवो हृष्टा गुणमयी हरेर्माया दुरत्यया ।
तमेव वै प्रपद्यन्ते मायामेतां तरन्ति ते ॥
विष्णुनारायणे पूजाभिरता हरिमेधसः ।
अनन्यनारायणे विष्णुमन्त्रजापकारकम् ॥
न दानैर्विविधैरत्नैर्न पुष्पैर्नानुलेपनैः ।
तोषमेति महात्मासौ यथा भक्त्या जनार्दनः ॥
मनाग्विवशस्य हि पत्ते स्वल्पतोयमे ।
कस्मिंश्चित् दैवते भक्तिस्तद्भक्तेर्मां समागमः ॥
पत्रेषु पुष्पेषु फलेषु तोये
अक्रयलभ्येषु सदैव सत्सु ।
भक्त्यैकलभ्ये पुरुषे पुराणे
मुक्तौ कथं न क्रियते प्रयत्नः ॥
आस्फोटयन्ति पितरः प्रनृत्यन्ति पितामहाः ।
वैष्णवो नः कुले जात स नः सन्तारयिष्यति ॥
कल्पाद्रिव सुदर्पं समर्थितपर्वत
वै पापिनोऽपि विष्णुपादपयोजभाजा ।
मुक्तिं मना करकमलानुभूतमाया
न जयन्ति परमगतिमपि प्रयाताम् ॥
सर्वं न प्रयता वै व्यापकोऽत्रविचिन्तिता ।
देवैरपि मनुष्यैस्तस्य नास्ति तदैवार्च्चं परम् ॥
अमोहनक्षेमपदावलम्बना
मतिश्च मेऽभिविष्टस्यते मते ।
विचक्षता माधव मे मनोरथ
कारणप्रियनुष्ठो हृदभिसन्नते ॥
विष्णोरेव परं तत्त्व कर्म्मवृक्षमिव पश्यते ।
देवविहाराभासार्थे तं च यान्ति मोहिताः ॥
ब्रह्मा तु हि जगत्पते च तस्मिन्
भवति पुमान् जगतोऽस्य मोक्षपदः ।
विविधसत्कर्म्मविशेषमायाम्
प्रपद्यन्ते कारणमेव मानवाः ॥"
इति पाद्मे २११ अध्यायः ।

विष्णुमाया, स्त्री, (विष्णोर्माया ।) दुर्गा । यथा —
नारद उवाच ।
"दुर्गा नारायणीशाना विष्णुमाया शिवा सती ।
नित्या सत्या भगवती सर्व्वाणी सर्व्वमङ्गला ॥
अम्बिका वैष्णवी गौरी पार्व्वती च सनातनी ।
नामानि कौतुमीशानि शुभानि शुभदानि च ॥
अर्थं षोडशनाम्नाञ्च सर्व्वेषामीप्सितं परम् ।
ब्रूहि वेदविदां श्रेष्ठ वेदोक्तं सर्व्वसम्मतम् ॥
नारायण उवाच ।
सृष्टा माया पुरा यस्मै विष्णुना परमात्मना ।
मोहितं मायया विश्वं विष्णुमाया च
कीर्त्तिता ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५७ अध्यायः ।
अपि च ।
ब्रह्मोवाच ।
"विष्णुमायाकृते दत्त महामायां जगन्मयीम् ।
याभ्यां तमोवश्यौ स्यात् यस्या कालिका
प्राप्तिका ॥
तस्मादियं विष्णुमाया योगनिद्रा जगन्मयम् ।
कोटि वा यावदेव मधुरं मोहयिष्यति ॥
महीव एव तावत् यथा विश्वरूपिणीम् ।
यथा तव प्रीता भूत्वा वरदाया भविष्यति ॥"
इति कालिकापुराणे ६ अध्यायः ।
विष्णुयशाः, [स्] पुं, (विष्णु नामके यशो यस्य ।
नारायणविष्णवादेवाद्य यथाक्रम । यद्वा,
विष्णुवा यशोरूपभूता यशो यस्य ।) ब्रह्म
यश पुत्र । स च कल्किपिता । यथा,—
नारद उवाच ।
"अतो भगवती माया सर्व्वधर्म्ममयी शुभा ।
पितरं मातरं विष्णोर्ग्गैव शृणोति कश्चित् ॥
पूर्व्वो नारायणो यस्य पुत्र कल्किरजायत ।
स विप्राय विष्णुयशा मनो मुक्तिमभीप्सति ॥
विविधैस्य भगवान् प्राह भवद्यशः पुत्रम् ।
विचिन्ते विष्णुयशं भगवत्यदिवहम् ॥"
इति कल्किपुराणे १० अध्यायः ।
विष्णुरथः, पुं, (विष्णो रथः ।) गरुडः । इत्यमरः ।
विष्णोः स्यन्दनञ्च ।
विष्णुरातः, पुं (विष्णुना रातो दत्तः ।) परी-
क्षिद्राजः । यथा,—
"दैवेनापतिघातेन शुक्ले संस्थामुपेयुषि ।
रातो वोऽनुग्रहार्थाय विष्णुना प्रभविष्णुना ॥
तस्मान्नाम्ना विष्णुरातो लोके ख्यातिं गमिष्यति ।
न सन्देहो महाभाग महाभागवतो महान् ॥"
इति श्रीभागवते १ स्कन्धे १२ अध्यायः ।
विष्णुलिङ्गी, स्त्री, वर्त्तिकापक्षी । इति त्रिकाण्ड-
शेषः ॥
विष्णुवल्लभा, स्त्री, (विष्णोर्वल्लभा ।) तुलसी ।
इति राजनिर्घण्टः । लक्ष्मीः । यथा,—
"चैत्रोत्सवे यथा माघ वसन्ते विष्णुवल्लभे ।
यथा लक्ष्मणया कृष्णे तथा मम मनः स्थिरम् ॥"
इति तन्त्रसारः ।
अग्निशिखावृक्षः । इति शब्दचन्द्रिका ।

विष्णुवाहनं, क्ली, (विष्णोर्वाहनम् ।) गरुडः ।
इति हेमचन्द्रः । ४ । १४४ ॥
विष्णुवाह्यः, पुं, (विष्णुर्वाह्यो येन ।) गरुडः ।
इति शब्दरत्नावली ॥
विष्णुशिला, स्त्री (विष्णुर्वाधिष्ठिता शिला ।)
शालग्रामशिला । अस्याः स्तव शिलशिलायां
यथा,—
"मथुरायां तर्पयीत यदि विष्णुशिला भवेत् ।
तदहोभाग्ययोगोऽयं वदति हि नाशिला ॥"
इति मैत्रपद्मे ५ अध्यायः ॥
विष्णुशृङ्खलः, पुं, योगविशेषः । यथा, मात्स्ये ।
"द्वादशी श्रवणयुक्ता स्पृशेदेकादशीं यदा ।
स एव वैष्णवो योगो विष्णुशृङ्खलसंज्ञितः ॥
तस्मिन्नुपोष्य विधिवन्नरः सङ्क्षीणकल्मषः ।
प्राप्नोत्यनुत्तमां सिद्धिं पुनरावृत्तिदुर्लभाम् ॥"
इति ।
विष्णुधर्म्मोत्तरे द्वितीयविष्णुशृङ्खलयोगमाह ।
"एकादशी द्वादशी च वैष्णव्यपि च भवेत् ।
तद्विष्णुशृङ्खलं नाम विष्णुसायुज्यकृद्भवेत् ।
तस्मिन्नुपोषणात् कर्म्मविद्यूतदीपम् शुभम् ॥"
इति श्रीहरिभक्तिविलासे १६ विलासः ॥
विष्फारः, पुं (वि + स्फुर स्फुरणे + घञ् । "स्फुरति
स्फुलत्योर्घञि ।" ६।१।४७। इत्यात्वम् । "स्फुरति
स्फुलत्योर्निर्न्निविभ्यः ।" ८।३।७६। इति षत्वम् ।)
धनुर्ध्वनिः । इत्यमरः ॥ धनुर्ध्वस्य ध्वान
इत्यर्थः । विष्फारः । स्फुर इति च स्फुर्जौ पत्रो
बलस्य देवायोऽपि इति विरात । किंवा स्फुरणो
रूप विश्वनिर्वाणिना माधिकवाम् विष्फारो
इत्यन्यो मन्त्रेषु । इति भरतः ॥
विष्व, त्रि, (विविधं वक्ष्यः । विष + "शीङ्शपो
क्कर्म्मणि ।" ३ । ३ । ८१ । इति वन् ।) विविध यो
व्यथः । इत्यमरः ॥ (विविधं शोभ । विहाय
हिन इति वा । इत्यर्थे "उणादिभ्यो वन् ।"
१ । १ । २ । इति वन् ।)
विष्वः, त्रि, विष्व । इत्युणादिकोषः ॥
विष्वक्, अ, सहितः । सर्व्वतः । इत्यमरः ॥ (यथा,
भागवते । ३ । ८ । १६ ।
"कुलाल इव लोकानां कुलालकयोगे यथा ।
(धर्म्मनिरताहंमायं नतिप्रमाणं दिवे दिवे ॥")
विष्वक्, स्त्री विशुन् । इति शब्दरत्नावली ॥
विष्व अचति इत्यर्थे विशिष्टम् । (यथा, माघ
काव्ये । १ । ८ । ५० ।
"कुन्द मुकुन्दमोदविष्वविष्वक्
जनपुष्पितमसारनैवसुधा ॥")
विष्वक्सेनः, पुं, विष्णुः । इत्यमरः ॥ (यथा, किञ्च
मालती । १० । २२ ।
"वत्सेनाय नमःपादार्थिविष्वक्
पीताविष्णुमासकोऽपि ॥")
विष्णोर्व्वैमात्रधारी । यथा —
"विमानचारी विष्णोस्तु विष्वक्सेनस्तु मुख्यः ।
शङ्खचक्रगदापद्मकिरीटकुण्डलान्वितः ।
इन्द्रनीलसुवर्णं च विचित्राभरणाञ्चितः ।

पञ्चतीय स्वरान्तेन संयुतो बिन्दुनेन्दुना ।
कीर्त्तितस्तस्य मन्त्रोऽयं तेन तं परिपूजयेत् ॥"
इति कालिकापुराणे ८२ अध्यायः ॥
त्रयोदशमनुः । यथा,—
"ततश्च मेरुसावर्णो ब्रह्मसूनुर्मनुः स्मृतः ।
ऋतुश्च ऋतुधामा च विष्वक्सेनो मनुस्तथा ॥"
इति मात्स्ये ९ अध्यायः ॥

विष्वक्सेनप्रिया, स्त्री, (विष्वक्सेनस्य प्रिया ।) वाराही । इत्यमरः ॥ चामर आलु इति भाषा ॥ लक्ष्मीः । इति मेदिनी । ये, १३४ ॥

विष्वक्सेना, स्त्री, प्रियङ्गुः । इत्यमरः ॥

विष्वण, क्ली भोजनम् । इति जटाधरः ॥ शब्दकरणम् । यथा । विष्वणति वीणा । इति मुग्धबोधव्याकरणम् ॥

विष्वद्रच् [ञ्] त्रि, (विष्वगञ्चतीति । अञ्च + क्विप् । "विष्वग्देवयोश्चेति ।" ६।३।९२। इति टेः स्थाने अद्र्यादेशः ।) सर्व्वतोगामी । इत्यमरः ॥ (यथा, माघे । १८ । २५ ।
"विष्वद्रीचीर्विक्षिपन् सैन्यवीची-
राजावज्ञां क्वापि दूरं प्रयातम् ॥")

विष्वाणः पुं, भक्षणम् । इति हेमचन्द्रः ॥

विस, क्ली, मृणालम् । इत्यमरः ॥ (यथा, कलाविलासे । ६ ।
"नवविसकिसलयकवल-
कषायकलहंसकलरवो मन्द्रः ।
कमलवनेषु प्रचरति
लक्ष्म्या इव नूपुरारावः ॥")

विसंवादः, पुं, (वि + सम् + वद + घञ् ।) विप्रलम्भः । इत्यमरः ॥ (यथा महाभारते । १२ । २५८ । ११ ।
"अद्रोहमविसंवादं प्रवर्त्तन्ते तदाश्रयाः ॥")

विसकण्ठिका, स्त्री, (विसमिव शुभ्रः कण्ठो यस्याः इति बहुव्रीहौ कप् टापि अत इत्वम् ।) बलाका । इत्यमरः ॥

विसकुसुम, क्ली, (विसस्य कुसुमम् ।) कमलम् । इति राजनिर्घण्टः ॥

विसकूटः पुं, विसः । इति शब्दचन्द्रिका ॥ [illegible] । इति राजनिर्घण्टः ॥

विसज, क्ली, (विसाज्जायते इति । जन् + ड ।) पद्मम् । विस मृणाले तत्र जातत्वात् ॥

विसनाभिः, पुं, (विसं नाभिरूपमिवास्य यस्य ।) पद्मिनी । पद्मसमूहः । इति त्रिकाण्डशेषः ॥

विसप्रसूनं, क्ली पद्मम् । इत्यमरः ॥ (यथा शिशुपालवधे । ५ । २८ ।
"अम्बुभिश्च धुतविकाशिविसप्रसूना ॥")

विसरः, पुं, (विसरतीति । वि + सृ + अच् ।) समूहः । इत्यमरः ॥ प्रसरः । इति मेदिनी । रे २१० ॥

विसर्गः, पुं, (वि + सृज + घञ् ।) दानम् । (यथा, रघुवंशे । ४ । ८६ ।
"आदानं हि विसर्गाय सतां वारिमुचामिव ॥")
[illegible] (यथा महाभारते । १ । २२ । १२ ।
"नानाप्रकारविसर्गैर्व्वध्यमानं समन्ततः ॥")
मलत्यागः । विसर्जनीयः । (यथा, भागवते । ६ । ८ । १ ।
"सविसर्गं पदन्तं तत् सर्व्वदिक्षु विनिर्द्दिशेत् ॥")
सूर्य्यस्यायनभेदः । इति मेदिनी । गे, ५ ॥ मोक्षः । इति हलायुधः ॥ विरहः । इति शब्दरत्नावली ॥ विशेषसृष्टिः । यथा,—
"पुरुषानुगृहीतानामेतेषां वासनामयः ।
विसर्गोऽयं समाहारो बीजाद्बीजं चराचरम् ॥"
इति श्रीभागवतम् ॥
विसर्जनीयस्य पर्य्यायः ।
"अः सर्गो रसना वक्त्रं विसर्गश्च द्विबिन्दुकः ।
शान्तोऽर्द्धेन्दुरहमाया कला रात्री सदाशिवः ।
चतुरास्या तुरीया च विश्वमातृकला परा ॥"
इति वीजाभिधानम् ॥
अपि च ।
"अः कण्ठको महासेनः कला पूर्णामृता हरिः ।
इच्छा भद्रा गणेशश्च रतिविद्यामुखी सुखम् ॥
द्विबिन्दुरसना सोमोऽभिवह्नो द्युलक्षकः ।
द्विजिह्वः कुण्डलं वक्त्रं सर्गः शक्तिर्निशाकरः ।
सुन्दरी सुयशानन्दा गजनाथो महेश्वरः ॥"
इति वीजवर्णाभिधानान्तरम् ॥
अन्यच्च ।
"विसर्गः सर्गमायातो विसर्गाद्वयमात्मकः ।
अनिरुद्धो महेशानि कालशोऽपि रमापि च ॥"
इति वर्णाभिधानम् ॥
(प्रयोगः । यथा, भागवते । १ । ५ । ११ ।
"तद्वाग्विसर्गो जनताघविप्लवः ॥")

विसर्जन, क्ली, (वि + सृज + ल्युट् ।) दानम् । परित्यागः । इत्यमरः ॥ (यथा रघुवंशे । ८ । २५ ।
"गुरुदेहविसर्जनात् पितु-
श्चिरमश्रूणि विमुच्य राघवः ॥")
सम्प्रेषणम् । इति मेदिनी । ने, २५ ॥ (पुं यदुवंशीयानामन्यतमः । यथा भागवते । ११ । २ । १८ ।
"विसर्जनः कुकुराः कुन्तयश्च
मिथस्तु बभ्रुः सुविदन्त्य वीरदम् ॥"
विशेषेण सृज्यते इति । वि + सृज + कर्म्मणि ल्युट् । उत्पादिते त्रि । यथा, भागवते । १ । १६ । ५० ।
"त्वया दृष्टमिदं विश्वं धातुर्भूतविसर्जनम् ॥")

विसर्पः पुं (वि + सृप + घञ् ।) रोगविशेषः । तत्पर्य्यायः । विसर्पिः २ सर्व्वामयः ३ । इति राजनिर्घण्टः ॥ अथ विसर्पस्य निदानं निरुक्तिश्चाह ।
"लवणाम्लकटूष्णादिसेवनाद्दोषकोपनः ।
विसर्पः सप्तधा ज्ञेयः सर्व्वतः परिसर्पणात् ॥"
[illegible] ॥ ● ॥ सप्तधात्वं विवृणोति ।
"पृथक् त्रयस्त्रिभिश्चैको विसर्पा द्वन्द्वजास्त्रयः ।
वातिकः पैत्तिकश्चैव कफजः सान्निपातिकः ।
चत्वार एते वीसर्पा वक्ष्यन्ते द्वन्द्वजास्त्रयः ।
आग्नेयो वातपित्ताभ्यां ग्रन्थ्याख्यः कफवातजः ।
यस्तु कर्द्दमको घोरः स पित्तकफसम्भवः ॥" ● ॥
विसर्पदोषदूष्याणि संग्रहादाह ।
"रक्तं लसीका त्वङ्मांसं दूष्यं दोषास्त्रयो मलाः ।
विसर्पाणां समुत्पत्तौ विज्ञेयाः सप्त धातवः ॥"
त्रयो मलाः वातपित्तकफाः । दोषाः दूषकाः इत्यर्थः । अन्यथा दोषाः मलाः इत्येवं पुनरुक्तिदोषोऽवगन्तव्यः ॥ ● ॥ वातिकस्य लक्षणमाह ।
"तत्र वातात् परीसर्पो वातज्वरसमव्यथः ।
शोफस्फुरणनिस्तोदभेदायामार्त्तिहर्षवान् ॥"
परीसर्पो विसर्पः । वातज्वरसमव्यथः शिरोहृद्गात्रोदरशूलादियुक्तः । भेदः विदारणमिव व्यथा । आयामः आकर्षणमिव व्यथा ॥ ● ॥ पैत्तिकमाह ।
"पित्ताद्द्रुतगतिः पित्तज्वरलिङ्गोऽतिलोहितः ।"
द्रुतगतिः शीघ्रप्रसरणशीलः ॥ ● ॥ श्लैष्मिकमाह ।
"कफात् कण्डुयुतः स्निग्धः कफज्वरसमानरुक् ॥"
सान्निपातिकमाह ।
"सन्निपातसमुत्थश्च सर्व्वरूपसमन्वितः ॥" ● ॥
वातपैत्तिकस्याग्निविसर्पाख्यस्य च लक्षणमाह ।
"वातपित्ताज्ज्वरच्छर्द्दिमूर्च्छातीसारतृड्भ्रमैः ।
अस्थिभेदाग्निसदनतमकारोचकैर्युतः ।
करोति सर्व्वमङ्गञ्च दीप्ताङ्गारावकीर्णवत् ।
यं यं देशं विसर्पश्च विसर्पति भवेत् स सः ।
शान्ताङ्गारासितो नीलो रक्तो वा श्वपचीयते ।
अग्निदग्ध इव स्फोटैः शीघ्रगत्वात् द्रुतञ्च सः ।
मर्म्मानुसारी वीसर्पः स्याद्वातोऽतिबलस्ततः ।
व्यथेताङ्गं हरेत् संज्ञां निद्राञ्च श्वासमीरयेत् ।
हिक्काञ्च स गतोऽवस्थामीदृशीं लभते नरः ।
क्वचिच्छर्म्मारतिग्रस्तो भूमिशय्यासनादिषु ।
चेष्टमानस्ततः क्लिष्टो मनोदेहश्रमोद्भवाम् ।
दुष्प्रबोधोऽश्नुते निद्रां सोऽग्निवीसर्प उच्यते ॥"
स्फोटैः उपचीयत इत्यन्वयः । मर्म्मानुसारी हृदयानुसारी । हरेत् वीसर्प इत्यन्वयः । निद्रां हिक्काम् । ईरयेत् उत्पादयेत् प्रेरयेत् । मनोदेहसमुद्भवां निद्रां मरणरूपाम् । अश्नुते प्राप्नोति ॥ ● ॥ वातश्लैष्मिकग्रन्थिविसर्पमाह ।
"कफेन रुद्धः पवनो भित्त्वा तं बहुधा कफम् ।
रक्तं वा वृद्धरक्तस्य त्वक्शिरास्नायुमांसगम् ।
दूषयित्वा तु दीर्घाणुवृत्तस्थूलखरात्मनाम् ।
ग्रन्थीनां कुरुते मालां रक्तानां तीव्ररुग्ज्वराम् ।
श्वासकासातिसारास्यशोषहिक्कावमिभ्रमैः ।
मोहवैवर्ण्यमूर्च्छाङ्गभङ्गाग्निसदनैर्युतः ।
इत्ययं ग्रन्थिवीसर्पो वातश्लेष्मप्रकोपजः ॥"
कफेन अवरुद्धः पवनोऽपि अवरुद्धः । तेनायं वातश्लैष्मिकः । तं कफं बहुधा भित्त्वा रक्तं वा दूषयित्वा इत्यन्वयः । समानार्थमिति रक्तविशेषणम् ॥ ● ॥ पित्तश्लैष्मिकं कर्द्दमाख्यं विसर्पमाह ।
"कफपित्तज्वरस्तम्भो निद्रातन्द्राशिरोरुजाः ।
अङ्गावसादविक्षेपप्रलापारोचकभ्रमाः ।
मूर्च्छाग्निहानिर्भेदोऽस्थ्नां पिपासेन्द्रियगौरवम् ।

व्यायोपदेशेन चेपयोत्तथाच विदधानि ।
प्रायेणाग्रतये यथामेकदर्शं न चालितक ।
पिङ्कैरवयोर्मेनि पीतवर्णाविषपाकुरै ।
क्षिप्रोऽथितो मेचकाभो मलिनः शोथवान् गुरुः ।
मन्थीरपाक प्रायोया क्षिप्र क्षिप्रो विनोषेति ।
पद्मकं शीर्षमांसञ्च स्नायुप्रियराजाव ।
प्रगाशियत शोथयं कर्दमाख्यमुदाहृतं तम् ।"
न च गर्दति एकदेशमित्यमय । पिङ्के
पिङ्कानि । यरणीव श्याव । श्वेत
वत्व । मेचक कृष्णवर्ण । प्रायोगा यत्र
रोगा । यह क्षिप्रोऽवदीमेती भूद प्रायो
भवति विरोधतेत च । यहस्तक कर्दमवर्षा मम
पञ्च च । शीर्षमांस अभितमांस । स्नायव
स्नाय्वाग्नियराजव । ● । सन्निपातिक-
माह ।
"सन्निपातसमुत्थञ्च सर्वरूपसमन्वित ।"●।
क्षतजञ्च विसर्पमाह ।
"बाह्यहेतोः क्षतात् क्रुद्धः सरक्तं पित्तमीरयन् ।
वीसर्पं मारुतः कुर्यात् कुलत्थसदृशैश्चितम् ।
स्फोटैः शोथज्वररुजा दाहाढ्यं श्यावशोणितम् ।"
बाह्यहेतो प्रहारप्रहारादिव्यवलम्बनयायात्
हेतो । कुलत्थैरिति कुलत्थवरलम् ।●।
उपद्रवानाह ।
"ज्वरातीसारवमथुस्त्वङ्मांसदरणक्लमा ।
अरोचकविपाकौ च विसर्पाणामुपद्रवा ।"●।
साध्यासाध्यमाह ।
"सिध्यन्ति वातकफपित्तकृता विसर्पाः
सर्वात्मकः क्षतकृतश्च न सिद्धिमेति ।
पित्तात्मकोऽञ्जनवपुश्च भवेदसाध्यः
कृच्छ्राश्च सम्यगवगन्तियं च सर्वं एव ।"
पित्तात्मकोऽञ्जनवपु पित्तज यत् कृष्णवर्ण ।
सर्वे कृच्छ्राख्याः स्युः ।●। अथ विसर्पस्य
चिकित्सा ।
"विरेकवमनालेपसेचनासृग्विमोक्षणैः ।
उपाचरेद्यथादोषं विसर्पानविदाहिभिः ।
दाक्षा धात्रीफलं रास चन्दनं अशुचं वचा ।
पूर्णं पौष्कलं वैसो वातवीसर्पनाशनः ।"
चन्दनञ्च रक्तं ग्राह्यम् ।
"कुस्तुम्बुरुस्तण्डुलककम्
पटोलकं चोलवकदम्बम् ।
कषायमेतं विलिखेद्विसर्पं
सेको विसर्पं यावत् प्राप्त ।●।
किञ्चायसद्योऽस्य मधुरस्यदकम् ।
नवागचन्दनदाखा च तैल दत्तविसर्पेषु ।
अमृता चत्ताहु ।
"वातपित्तप्रशमनमविरोधवेशि पितम् ।
वातर्ष्टवहरं कर्मं सर्वमेव विसर्पितम् ।
विसर्दघ्नमर्दं श्लेष्मं कर्मसर्वसुखदे ।
पिरोधमसिनां कुर्यात् विसर्पं विनाशदक्षाम् ।●
सिरोधमोक्षानधनेका
सोमेन्द्रनिम्बाघृतदारे ।

प्रेमो दद्यान्न तथा प्रदोषो
विसर्पकुष्ठज्वरशोथकारी ।"
तत्र सारम् । चन्दनञ्च रक्तं ग्राह्यम् ।
दग्धाङ्गो चेव ।●।
"हरिद्राद्वयमञ्जिष्ठा मुस्तामलकपद्मकैः ।
पत्रकोशीरमधुकं चन्दनेन विपाचितैः ।
अमृतवल्ली कटुका पटोल
मस्तकं चन्दनमिश्रितम् ।
विसर्पदाहज्वरशोषकण्डू-
विस्फोटतृष्णावमिनुत् कषाय ।
कुष्ठानि यानि कथितानि प्रमेह पिडिकेषु च ।
विसर्पं तानि योज्यानि सेकालेपनभोजने ।●।
करञ्जपत्त्रपदवाङ्कुरीक
गुडूचिदूर्वामलकं पुराणे ।
नैनं विदार्यस्त्रविनेशित
विसर्पविस्फोटविनाशिकाग्रम् ।
इति करञ्जादितैलम् ।●।
"कुष्ठामयस्फोटमसूरिकोत्थ
चिकित्सया वाप्य चरेद्विसर्पान् ।
अर्मान् विकारान् परिशोध्य धीमान्
अत्र क्रमेणोपचरेदुपेतम् ।"
इति विसर्पविकार ।●। इति भावप्रकाश ।
(वेग । यथा, उत्तरचरिते ।
"प्रमोदो निद्रा वा किमु विषविसर्पः किमु मद ।"
सात्त्विकारविशेष । तल्लक्षणादिर्यथा,
साहित्यदर्पणे । ६ । ३७५ ।
"विसर्पो यत्रमारब्धं कमादिप्रपञ्चम् ।"
यथा वेण्याम् । एतच्च नाटकेष्वपि
स्यात् ।)
विसर्पणं, क्ली (वि+सृप+ल्युट् ।) प्रसर ।
इत्यमर । तत्पर्याय विसर्पणम् । इति
भरत । (विसर्पण । यथा, महाभारते । ७ ।
५ । ११ ।
"शोथवं वायव्याहेव मेरोरिव विसर्पणम् ।
पतनं भास्करस्येव न मर्त्ये दोषयातनम् ।")
विसर्पि पुं विसर्प । इति राजनिर्घण्ट ।
विसर्ज क्ली (विसं कालीति । सा+क ।) पदार्थ ।
इति त्रिकाण्डशेष ।
विसार, पुं (विशेषेण सरतीति सृ गतौ+
"व्याधिमत्स्यबलेष्विति वक्तव्यम् ।" ३।३।१७।
इत्यस्य वार्त्तिकोक्त्या णः ।) मत्स्य । इत्यमर ।
(भावे घञ् । विसरम् । यथा,ऋग्वेदे ।१।७९।१।
"हिरण्यकेशो रजसो विसारे
ऽहिर्धुनिर्वात इव ध्रजीमान् ।"
"रजस उदकस्य विसारे विसरणे ईशानमिव
रजे ।" इति तद्भाष्ये सायण ।)
विसारिणी, स्त्री (विशेषेण सरतीति । सृ+
णिनि । ङीप् ।) माषपर्णी । इति राज
निर्घण्ट ।) प्रसारणीलता । यथा, राजवल्लभ
निघण्टौ । ८ । ५८ ।
"प्रसूनक विसारिणो माषा बलवती
रजः ।")

विसारित , त्रि, प्रसारित । विसूचिकाभ्यागमयातो
सापक्षयेन विस्मृतमिन्द्रम् ।
विसारी, [न्] त्रि (वि+सृ+णिनि ।) प्रसरण
शील । तत्पर्याय । विसृमर २ विसृत्वर ३
प्रसारी ४ । इत्यमर । (यथा, रघु ।१२।९१।
"परिश्रमप्तौ परितो विसारिणा
रजसा .... विवेश सैन्यम् ।")
विसिनी, स्त्री, (बिसमस्त्यस्या इति । बिस+
"पुष्करादिभ्यश्च ।" इति इनि । ङीप् ।)
पद्मिनी । इत्यमर । अब्जानाम् । इति राज
निर्घण्ट ।
विसर्पिका, स्त्री, (विसर्पी+स्वार्थे कन् ।)
क्षुद्ररोगविशेष । इति भावप्रकाश ।
(अस्या निदानचिकित्सादि क्षुद्ररोगे
बोद्धव्या ।)
विसूची, स्त्री, (विशेषेण सूचयति मृत्युमिति ।
वि+सूच+अच् । स्त्रियां ङीष् । यद्वा, विविधा
सूचीव ।) क्षुद्ररोगविशेष । ओलाउठा
इति भाषा । तस्य निदानपूर्वा,—
"सूचीभिरिव गात्राणि तुदन् सन्तिष्ठतेऽनिल ।
यस्याजीर्णेन सा वैद्यैर्विसूचीति निगद्यते ।"
तस्या निदानमाह ।
"न तां परिमिताहारा लभन्ते विदितागमा ।
मूढास्तामजितात्मानो लभन्तेऽशनलोलुपा ।"
विदितागमा ज्ञातायुर्वेदा ।●।
तस्या लक्षणमाह ।
"मूर्च्छातिसारौ वमथु पिपासा
शूलं भ्रमोद्वेष्टनजृम्भदाहा ।
वैवर्ण्यकम्पौ हृदये रुजश्च
भवन्ति तस्यां शिरसश्च भेद ।"
उद्वेष्टन हस्तपादयो । शिरसो भेद शिर
शूलम् ।●। तस्या उपद्रवानाह ।
"निद्रानाशोऽरति कम्पो मूत्राघातो विसं-
ज्ञता ।
अमी उपद्रवा घोरा विसूच्या पञ्च दारुणा ।"
अमी उपद्रवा घोरा अमी निद्रानाशाद्य
उपद्रवा अपि क्षमेव रोगोऽपि घोरा भयङ्करा ।
विसूच्या पञ्च दारुणा विसूच्यास्तु पञ्चापि
यदि स्युस्तदा दारुणा प्राणसंहरा ।●।
तस्या अरिष्टमाह ।
"य श्यावदन्तौष्ठनखोऽल्पसंज्ञ
श्छर्द्यर्दितोऽभ्यन्तरयातनेत्र ।
क्षामस्वर सर्वविमुक्तसन्धि
र्यायान्नर सोऽपुनरागमाय ।"
अर्थ .... सर्वं विमुक्ता विविधेमुक्ता
यान्ति .... । इति भावप्रकाश ।●।
अस्यार्श्चिकित्सा अजीर्णशब्दे द्रष्टव्या ।
विसृत्वरं क्ली बहुत्वम् । इति शब्दमाला ।
विसृत त्रि (वि+सृ+क्त ।) विस्तृत । इत्य
मर ।
विसृमर, त्रि (विसरति यच्छील । वि+सृ+
"सृघस्यदः क्मरच् ।" ३।२।१६०।

इति करणे । इण्ग्रहणेति गुणः ।) प्रसरणशीलः । इत्यमरः । "विसरणम् । गतिविशेषः । विसृमरो मरः । विसृमरी मरी । विसृमर तैलमित्यादि । विसरति विसृमरः सृ गतौ सृघस्यदोऽमरजिति सृघस्य सृ धातोः परिति तत्र ।" इति भरतः ।

विस्मर, त्रि (विशेषेण स्मरति सन्धौ । वि+स्म+"सृघस्यदः क्मरच् ।" ३ । २ । १६० । इति क्मरच् ।) प्रसरणशीलः । इत्यमरः ।

विसृष्ट, त्रि, (वि+सृज+क्तः ।) निक्षिप्तः । इति जटाधरः । (यथा, मृच्छकटिके । १मङ्के ।
"उद्भिन्नपक्षमणकटाक्षविसृष्टदृष्टि-
र्व्याधानुसारचकिता हरिणीव यासि ॥")
विशेषेण सृष्टश्च । (व्यक्त । यथा, भागवते । १ । १६ । २४ ।
"यन्तात्हितस्य भारती विसृष्टा
कर्माणि निर्व्वाणविलम्बितानि ।"
प्रेषित । यथा, रघुः । ५ । ३९ ।
"व्याम कुमारानयनोत्सुकेन
भोजेन दूतो रघवे विसृष्टः ॥"
पुं विसर्गः । बिन्दुद्वयरूपः । यथा, कातन्त्रे । ८ । २ ।
"रघकारयोर्विसृष्टः ।")

विस्त, पुं, क्ली, (विस उत्सर्गे+क्तः ।) कर्षोऽच । अशीतिरक्तिकापरिमितसुवर्णम् । इत्यमरः ॥

विस्तर, पुं, (वि+स्तॄ+"प्रथने वावशब्दे ।" ३।३।३३ । इति अप् प्रतिषेधे "ऋदोरप् ।" इत्यप् ।) शब्दस्य विस्तारः । इत्यमरः । (यथा शिशुपालवधे । २ । २४ ।
"सुविस्तरतरा वाचो भाष्यभूता भवन्तु मे ।"
वैराग्यम् । यथा, भागवते । ३ । २ । ९ ।
"आन्वीक्षिके यत्नोक्तब्रह्मज्ञानसविस्तरम् ।")
विस्तारः । (यथा, गीतायाम् । १० । १९ ।
"प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे ।)
प्रणयः । इति मेदिनी । पीठ । समूह । इति शब्दरत्नावली । (त्रि, बहुः । यथा साहित्यदर्पणे । ६ । ३१८ ।
"अपेक्षित परित्यज्य नीरसं वस्तु विस्तरम् ।
यदा सन्दर्शयेच्छेषमामुखानन्तरं तदा ।")

विस्तार, पुं, (वि+स्तॄ+"प्रथने वावशब्दे ।" ३ । ३ । ३३ । इति घञ् ।) विटपः । विस्तीर्णता । तत्पर्य्यायः । विग्रहः २ व्यासः ३ । इत्यमरः । (यथा, आर्य्यासप्तशत्याम् । ५५८ ।
"वंशावलम्बनं यद्यो विस्तारो गुणस्य यत्र
नतिः ।
तज्जालस्य खलस्य च निजाङ्गसंकोचनायैव ॥")
स्तम्बः । इति मेदिनी । रे, २१९ ।

विस्तीर्ण त्रि, (वि+स्तॄ+क्तः । "रदाभ्यां निष्ठातो नः" ८ । २ । ४२ । इति नः ।) विपुलम् । विस्तृतम् । यथा,—
"विस्तीर्णं विकटं बहु विशालं विपुलं पृथु ।"
इति जटाधरः ।
(यथा,—
"यथानि खण्डयानि विस्तीर्णाकर्णलोचने ।
तूर्णमानीयतां चूर्णं पूर्णचन्द्रनिभानने ॥"
इत्युद्भटः ।)

विस्तीर्णपर्णी, स्त्री (विस्तीर्णं पर्णं यस्याः ।) माषकम् । इति शब्दचन्द्रिका ।

विस्तृत, त्रि, (वि+स्तृ+क्तः ।) लब्धविस्तारः । तत्पर्य्यायः । विततम् २ ततम् ३ । इत्यमरः । (यथा, भागवते । २ । २४ । ६ ।
"तस्य ब्रह्मपदं ज्योतिराकाशमिव विस्तृतम् ।")

विस्पष्ट, त्रि (विशेषेण स्पष्टः ।) सुस्पष्टः । यथा,
"विस्पष्टमद्भुतं ब्राह्मं सदाचारपदं तथा ।
कथयस्व महाप्राज्ञ स्वभावसमन्वितम् ॥"
इति तिथ्यादितत्त्वम् ॥

विस्फार, पुं, (वि+स्फुर+घञ् । "स्फुरति स्फुलत्योर्घञि ।" ६।१।४७ । इत्यात्वम् ।) धनुर्गुणशब्दः । इत्यमरः । अस्य विवरणं गर्ड्डल्य वकारमध्यविस्फारशब्दे द्रष्टव्यम् । (यथा, महाभारते । ३ । २७९ । १६ ।
"विस्फारस्तस्य धनुषो वज्रस्येव तदा बभौ ।"
विस्फूर्ति । यथा, साहित्यदर्पणे । ३ । २० ।
"विस्फारश्चेतसो यस्तु स विस्मय उदाहृतः ।")

विस्फारित, त्रि, प्रकाशितः । चलितः । विपूर्व्वकात् स्फारधातोः क्तप्रत्ययेन निष्पन्नमिदम् ॥ (यथा, महाभारते । ३ । ११ । २ ।
"स महामायोऽतिबलो क्रोधविस्फारितेक्षणः ।
कामरूपधरः क्रूरः कालकल्पो व्यदृश्यत ॥"
निर्घोषित । यथा, किराते । १४ । १ ।
"उदूढवक्षःस्थगितैकदिङ्मुखो
विकृष्टविस्फारितचापमण्डलः ।")

विस्फुरित त्रि, (वि+स्फुर+क्तः ।) स्फूर्त्तिविशिष्ट । चपलः । यथा—
"रक्तरक्तोत्पलाक्षश्च रक्तविस्फुरितेक्षणम् ।
वेष्टितं नागपाशैश्च भ्रुकुटीभीषणाननम् ॥"
इति रामशयादुर्गाध्यानैकदेशः ।

विस्फुलिङ्ग पुं, विषभेदः । इति हेमचन्द्रः । (विशिष्ट स्फुलिङ्गः ।) अग्निकणा च ॥

विस्फोट पुं, (विस्फोटयतीति । वि+स्फुट+णिच्+अच् ।) विषस्फोटकः । विस्फोड़ा इति भाषा । तत्पर्य्यायः । पिठकः २ पिटका ३ पिटकम् ४ । इत्यमरः । पिटकः ५ पिटका ६ पिटकम् ७ । इति शब्दरत्नावली । स्फोटकः ८ स्फोटः ९ । इति राजनिर्घण्टः । (यथा, कथासरित्सागरे । ५९ । १० ।
"किमेतन्निति सभ्रान्तं मनुष्येऽपि ददर्श सः ।
उत्थाय राजा विस्फोटानङ्गे तस्यां विनि-
र्गतान् ॥")
तस्य निदानपूर्व्विका संप्राप्तिमाह ।
"कट्वम्लतीक्ष्णोष्णविदाहिरूक्ष-
क्षारैरजीर्णाध्यशनातपैश्च ।
तथर्त्तुदोषेण विपर्य्ययेण
कुप्यन्ति दोषाः पवनादयस्तु ।
त्वचमाश्रित्य ते रक्तमांसास्थीनि प्रदूष्य च ।
घोरान् कुर्व्वन्ति विस्फोटान् सर्व्वान् ज्वरपुर-
सरान् ॥"
ऋतुरोषेण ऋतुहेतुकशीतोष्णादीनामतियोगेन । ऋतुविताचारविहारवैपरीत्येन त्वचमाश्रित्य विस्फोटान् कुर्व्वन्तीत्यर्थः । ज्वरपुरःसरान् ज्वरपूर्व्वान् । ० । रूपमाह ।
"अग्निदग्धनिभाः स्फोटाः सज्वरा रक्तपित्तजाः ।
क्वचित् सर्व्वत्र वा देहे विस्फोटा इति ते
स्मृताः ॥"
रक्तपित्तजाः एतेन सर्व्वेषु विस्फोटेषु रक्तपित्तयोः प्रधानकारणत्वम् । यथा सूचेषु वातस्य तथा वाताद्युर्मतिरपि बोद्धव्या । तथा च भोजः ।
"यदा रक्तञ्च पित्तञ्च वातेनाद्युगतं त्वचि ।
अग्निदग्धनिभान् स्फोटान् कुरुतः सर्व्वदेह-
गान् ॥" ० ।
वातिकमाह ।
"शिरोरुक्शूलभूयिष्ठं ज्वरतृट्पर्व्वभेदनम् ।
सकृष्णवर्णता चेति वातविस्फोटलक्षणम् ॥"
शूलमत्र तोदरूपम् । ० । पैत्तिकमाह ।
"ज्वरदाहरुजापाकस्रावतृष्णासमन्वितम् ।
पीतलोहितवर्णश्च पित्तविस्फोटलक्षणम् ॥"
रुजादिरत्र स्फोटेषु । ० । वातपैत्तिकमाह ।
"वातपित्तकृतो यस्तु तत्र स्युर्वेदनाः ।
स्तैमित्यं गौरवं कण्डूर्भवन्त्यत्र कफात्मके ।" ० ।
पित्तश्लैष्मिकमाह ।
"कण्डूर्दाहो ज्वरश्छर्दिरेतैर्युक्तं कफपैत्तिके ।"
सान्निपातिकमाह ।
"मध्ये निम्नोन्नतान्ते कठिनः स्वल्पपाकवान् ।
दाहरागतृषामोहच्छर्द्दिमूर्च्छारुजाज्वराः ।
प्रलापो वेपथुस्तन्द्रा सोऽसाध्यश्च त्रिदोषजः ।"
मोहो विपरीतज्ञानम् । मूर्च्छा सर्व्वथा ज्ञानशून्यता । ० रक्तजमाह ।
"वेदितव्यश्च रक्तेन पैत्तिकेन च हेतुना ।
गुञ्जाफलनिभा रक्ता रक्तजास्ते विदाहिनः ।
न ते सिद्धिं समायान्ति सिद्धैर्योगशतैरपि ॥"
पैत्तिकेन च हेतुना पित्तस्य हेतुना कट्वादिना रक्तस्य पित्तस्य तुल्यत्वात् न च ते साध्याः ।
"एवं चाष्टविधा साध्या साध्यतोऽपि मसूरकम् ।
तस्मिन्नमर्म्मगाः तीव्रा ज्वरयुक्ताभिघातजे ।
तस्मिन् बहिस्तथैव साध्यास्तु यावत्त बहिस्थिति ।
तत्र वातिकविस्फोटजिता कार्य्या चिकित्सा ॥"
उपद्रवानाह ।
"हिक्काश्वासोऽरुचिस्तृष्णा अङ्गमर्द्दो हृदि व्यथा ।
विषमज्वरदोषाश्चैतावता उपद्रवाः ।"
मांसव्रणे मांसस्य क्लिन्नत्वम् । मर्म्मगदोषो मर्म्मव्यथा । इति विस्फोटानाम् । ० ।
वैद्यकचक्रपाण्याद्यमतेऽप्याह ।
"हिक्का श्वासोऽरुचिस्तृष्णा अङ्गमर्द्दो हृदि
व्यथा ।
विषमज्वरकुष्ठाश्च विस्फोटानामुपद्रवाः ॥"
चिकित्सामाह ।

"दग्धदोषोत्थित चाग्नि तत्तुल्याश्च त्रिदो
षजः ।
सर्वरूपान्वितो घोरो सर्पाद्यो भूरिमलदः ।"
अथ विस्फोटस्य चिकित्सा ।
"विस्फोटे लङ्घनं कार्यं वमनं पथ्यभोजनम् ।
यथादोषबलं सेव्य मयुञ्जाच्च विरेचनम् ॥१॥
चौर्य प्रावियवा सुरा मधुरावाद्गणो तथा ।
कनाव्यकानि विस्फोटे हितानि गुणयोगतः ।
हे मधुनसी दाक्षा च दाडिमोरं दुरालभा ।
गुडूची धान्यक मुस्तमेवां क्वाथ पिबेन्नर ।
विस्फोटामावपकाशु वर्तीवधविनिमितान् ।
दारुहरिद्रापर्पटकच्छूरपटोलारिष्टवाकेः ।
कटुकाबानदुपर्णं पेषितैः चलितं घृतम् ।
भूनिम्बवचावालाविषघेन्द्रयवमूर्वके ।
पिचुमर्दपटोलाभ्यां कल्के मञ्जुकं घृतम् ॥३॥
किरातनिम्बवारिदमदनाभामुस्ताब्दे ।
पटोलपर्पटोशीरविफलाकोटजान्विते ।
क्वथितेऽद्यासायन्तु सर्वविस्फोटनाशनम् ॥४॥
विस्फोटनाशिनायाप तक्रुलाजुदर्शितैः ।
धौते कुटजशल्यस्य कार्या विधावता ॥५॥
छिन्ना पटोलभूनिम्बरास्नावादिवपर्पटैः ।
खदिरासनपुते कार्यां बलि विस्फोटकं ज्वरम् ।
चन्दन नागपुष्पञ्च सारिवा तण्डुलीयकम् ।
शिरीषवल्कलं जाती पैस्त्य आहादवनाशनम् ।"
"पाषाणं चन्दनं लोध्रमुशीरं सारिवाद्वयम् ।
जलेन पिष्ट्वा लेपेन स्फोटदाहार्तिनाशनम् ॥६॥
द्रुमपौत्रस्य मज्जानं वधे पिष्ट्वा प्रलेपयेत् ।
बालस्फोट विस्फोटे दग्धे दग्धाद्यवेदनम् ।
करावंस्य कदम्बस्य चार्जुनस्य च वारयेत् ।
चन्दन स्फोटकं नाम्ना गुणकोषो विनाशयेत् ।"
इति विस्फोटकाधिकारः । इति भावप्रकाशः ।
अन्यञ्च ।
"मसीय विहत कुरु क्षतिनाशं मक्त्रिका ।
दिवसात् परिषे दे कुरु मांसो च चन्दनम् ।
विस्नाता कर्पूरवश्च पर्णोरं ससानलम् ।
शताश्च लाविको आमो विस्फोटार्तं भवेत् ।
प्रस्व लघुवसिद्ध गोमयैर्हृष्टि यदितं ।
अन्यावि शोषयावि वा पद्मोद्भवपियाः पयेत् ।
नामा निवधिका चैव शर्करीस्फोटकावि च ।
अनबह्निप्रदाहानि श्रोमरुक्च आचरी ।
अग्नप्रावादि विचावि सेवितानैव नाशयेत् ।
चिरोत्थितमपि चिन्त्यं विस्फं तद्वचनात्
भवेत् ।"
अपि च ।
"मूर्च्छानिम्बनिम्बत्वनपटैश्च मस नरम् ।
पद्मोलगुल्काभ्याव रालकैच च पाययेत् ।
विस्फोटकानि नश्यन्ति चाव कार्बा विचा
रणा ।"
इति गारुडे १८८ अध्यायः ॥६॥
(विस्फोटसा भवन् पथा आरण्यादि ।
"स्वप्नदा साधारचामावा विस्फोटा मुक्ता
जन ।"

विस्मय, पुं (वि+स्मि+"एरच ।" इत्यच ।)
आश्चर्यम् । तत्पर्यायः । अद्भुतो २ च्छो ३ ।
इत्यमरः । "अस्यन्मृतमद्वै प्रदच्छम ।
'अद्भुतो विस्मयसामिमावो गम्यमर्दैवत ।
पीतवर्णो वस्तु लोकातिगमालम्बन मतम् ।
इति भावरत्नयोः पर्यायस्य अद्भुतस्य विस्मय
स्थायिभावात्मकत्वात् ।" इति भरतः ॥७॥
तस्य लक्षणम् । यथा,—
"विविधेषु पदार्थेषु लोकसीमातिवर्तिषु ।
विस्फारश्चेतसो यस्तु स विस्मय उदाहृत ।"
इति साहित्यदर्पणम् ।
(असाधारणदर्शने भवति । यथा मनुः । ४।२३७।
"यज्ञोऽनृतेन क्षरति तपः क्षरति विस्मयात् ।")
दर्पः । इति मेदिनी । सन्देहः । इति शब्द
रत्नावली । (विगत स्मयो गर्वो यस्मादिति ।
मदगर्वहीन त्रि । यथा, भागवते । १।१७।१०।
"स वीरमाराधयितुं विस्मय
प्रविवेश वीरप्रवे अभितः ।")
विस्मयान्वित, त्रि, (विस्मयेन अन्वित युक्त ।)
विस्मययुक्त । आश्चर्यविशिष्ट । तत्पर्यायः ।
विलक्ष २ । इत्यमरः ।
विस्माप(य)न, पुं (विस्माप(य)यतीति । वि+
स्मि+णिच्+ल्यु ।) कुहक । गन्धर्वनगरम् ।
कामदेव । इति मेदिनी । त्रि, विस्मापनम् ।
(यथा हरिवंशे । १८६।४६ ।
"पारिजाततरो पुष्पं तस्य दर्शं मयाच्च ।
विस्मापनार्थं देवेषु मत्तोपानवमन्वितः ।"
विस्मयकारके त्रि । यथा, भागवते । १।
११।६ ।
"यस्तिव्यद्य महाराज हरिणा धनुष्मता ।
येन मेयमूर्ति तिष्ठो देवविस्मापनं महत् ।")
विस्मित, त्रि (वि+स्मि+क्त ।) विस्मयान्वित ।
यथा —
"मयानामुपत्तात् दृष्ट्वा महताय महेश्वर ।
सर्वविस्मापन भर्तु दि पश्येन्मेघेश्वरम् ।
सव्यादमुतनं दृष्ट्वा सर्वमहेश्वरा ।
मुनिश्चिन्तवासादा मया विस्मितपविनाति ।
विस्मितोऽपि मयाद् दृष्ट्वा पाविदोविस्मितम् ।
प्राह प्रहृत दैवेशं मूर्तावावं मयाभव ।
विस्मिताः सदा देव सर्वं वद महेश्वर ।
महामायापार्को हि वा मयाविमुक्ते जनम् ।"
इति वामने ६१ अध्यायः ।
विस्मिति, स्त्री विस्मरणम् । विस्मृतिः शब्दो माने
विस्मृतवैव विस्मयमिदम् ।
विस्मृत, त्रि, (वि+स्मृ+क्त ।) धर्मकालविश्रव ।
तत्पर्यायः । प्रस्मृतम् २ । इत्यमरः । (यथा
"पञ्चला मर्त्यमहाला विस्मृतानामपदा'म ।
नाद्ये विस्मिन यत्र पान्ने इतीमत्रु दश्यते ।"
इत्युक्तः ।)
विस्मृति, स्त्री विस्मरणम् । विस्मृतिशब्दे सदर्थो
हिन् इत्यादीव विस्मृतिवरम् । (यथा, तथा
रघुवंशे । ११।८६।

"आमातरच ए यथा सर्वसम्हृतवाचरत् ।
यथा तस्य विना भोगा' सर्वे विस्मृ'ति
मागत ।")
विस्र स्त्री, आमगन्धः । इत्यमरः । दर्दे विना
मूमादिगन्धे आपकगन्धे इत्यर्थे । इति
भरतः । (यथा वाचस्पतिवर्णने ।७१।१६।
"कनादिमेधक यातिका विश्वः समाधि'म
च तम् ।
मीनोच्चैस्तरौषाविष प्रवाहवसिव ।"
तद्विशिष्टे त्रि । यथा, कथासरित्सागरे ।
७२।७ ।
"घातसैर्न न भ्रकोमि वर्जितुं विस्नपिशितम् ।")
विस्रगन्धा, स्त्री, (विस्र गन्धो यस्या ।) हपुषा ।
इति राजनिर्घण्टः ।
विस्रगन्धि पुं, (विस्रमिव गन्धो यस्य ।) हरि
तालम् । इति हेमचन्द्रः ।
विस्रब्ध, त्रि, (वि+सम्भ+क्त ।) विश्वस्त ।
इति मेदिनी । (यथा, शाकुन्तले । १।७।
"विस्रब्ध परिचुम्बतां भवतृजमानमोक्ष
कजलयोन ।")
विस्रम्भ, पुं, (वि+सम्भ+घञ् ।) विश्वास ।
(यथा, उत्तरचरिते । १ ।
"विस्रम्भादुरसि निपत्य लब्धनिद्राम् ।")
प्रणय । इत्यमरः । प्रणय परिचय प्रसार
प्रार्थना वा ।
परिचयप्रणयो प्रणय परिकीर्तित ।
इत्यमरमाला ।
प्रणय क्रीडापारस्वतान् । इति रमानाथ ।"
इति तट्टीकायां भरत । (यथा, रामायणे ।
२।६।७।
"विस्रम्भे दि यथे लोका वार्षे प्राप पर्वविव ।
विस्रम्भ समवेयोता रामे विस्रम्भमायता ।")
केलिकलह । बध । इति हेमचन्द्रः ।
विस्रम्भी, [न्] त्रि (विस्रम्भते विश्वसितीति ।
वि+स्रम्भ+"वौ कषलसकत्थस्रम्भ ।"३।२।
१४३। इति विनुण् ।) विश्वासी । (यथा
भागवते । ६।१।२ ।
"कथं तदनुरूपाय गुणविस्रम्भ्युपाकरेत् ।")
प्रणयी । विस्रम्भघट्टनादयोग्ये विस्रम्भमेव
विस्रम्भिनम् ।
विस्रवा स्त्री चरा । इत्यमरः ।
विस्रा स्त्री, (विस्रं गन्धाऽस्त्यस्या इति । अच्
तत्वात् ।) हपुषा । इति राजनिर्घण्टः ।
विस्रुत, त्रि (वि+स्रु+क्त ।) विश्रुत । विस्र
वेदुत्रुपाती सम्ययेव विस्रवणम् ।
विहग पुं (विहायसा गच्छतीति, गम+"विह
यसो'न ।"१।२।३८। इत्यस्य "डेच विहायसो
विहादेशो वक्तव्यः।"इति वार्तिकोक्तेः डक्ष्यके
विहायसः विहादेश ।) पक्षी । इत्य
मरः । (यथा, भागवते । ३।१८।६१ ।
"द्वृणीरवहा विहगपवयावादि च ।")
वाण । (यथा महाभारते । ७।१६३।।

"यथोत्सुकेन विहगैर्विविधैर्मुहरयान्।")
सूर्य्यः। चन्द्रः। इति शब्दरत्नावली। यज्ञः। इति मेदिनी।

विहङ्ग, पुं (विहायसा गच्छतीति। ३।२।३८। इत्यत्र "गमे सुपीति।" खच्। "विहायसो विह च।" इति विहादेशः। "खच्च डिद्वा वक्तव्यः।" इति डिच्।) पक्षी। इत्यमरः। (यथा, रघुवंशे। १। ५१।
"सेकान्ते मुनिकन्याभिस्तत्क्षणोज्झितवृक्षकम्।
विश्वासाय विहङ्गानामालवालाम्बुपायिनाम्।")
बाणः। (यथा महाभारते। ८। ६६। ६५।
"स्वर्णपुङ्खैरशिलाशितैर्विहङ्गैः।")
मेघः। चन्द्रः। सूर्य्यः। इति शब्दरत्नावली। (नागविशेषः। १। ५७। ११।
"विहङ्गः शरभो मेदः प्रमोदः संहतापनः।")

विहङ्गम, पुं, (विहायसा गच्छतीति। ३।२।३८। इत्यत्र। "खच्प्रकरणे गमे सुप्युपसंख्यानम्।" इति काशिकोक्त्या खच्। "विहायसो विह च।" इति विहादेशः।) पक्षी। इत्यमरः। (यथा, महाभारते। ३। २०४। ३६।
"आक्रम्य रत्नाकरकामरूपी विहङ्गमः।")
सूर्य्यः। यथा मार्कण्डेये। १०९। ६७।
"छन्दोभिरश्वरूपैश्च महद्युक्तैर्विहङ्गमम्।")

विहङ्गमा, स्त्री भारयष्टिः। इति शब्दरत्नावली। बाँक इति भाषा।

विहङ्गराज, पुं, (विहङ्गानां राजा। समासान्तः टच्।) गरुडः। इति हलायुधः। (यथा, शिशुपालवधे। १। ७।
"विहङ्गराजाङ्गरुहैरिवायतै-
र्हिरण्मयोर्व्वीरुहवल्लितन्तुभिः।")

विहङ्गिका, स्त्री, भारयष्टिः। इत्यमरः। बाँक इति भाषा।

विहत, स्त्री गर्भोपघातिनी गौः। इति धर्म्मशास्त्रोक्तिरिति।

विहत, त्रि, विशेषेण हतः। विनष्टः। विपूर्व्वक-हनधातोः क्तप्रत्ययेन निष्पन्नमिदम्।

विहनन, क्ली, (वि+हन+ल्युट्।) विघ्नः। हिंसा। तूलपिञ्जनम्। इति मेदिनी। ने, ९९।

विहर, पुं (वि+हृ+अप्।) वियोगः। इति हलायुधः।

विहरण, क्ली विहारः। विपूर्व्वकहृधातोर्ल्युट्प्रत्ययेन निष्पन्नमिदम्। (यथा भागवते। १। ११। १।
"विहरणं ते श्यामसुन्दरम्।"
प्रसारणम्। यथा, पाणिनौ। १। ३। २०।
"आङो दोऽनास्यविहरणे।"
आहरणम्। यथा मार्कण्डेये। ९६। ६०।
"नाभिविहरणेनैव क्रमभावश्च कल्पते।
बहाप्यायनमतापि विना होमेन जायते।")

विहसित, क्ली, (वि+हस्+क्त।) मध्यमहासम्। इत्यमरः।

विहस्त त्रि, व्याकुलः। इत्यमरः। (यथा, रघु। ५। ४९।
"रामापरित्राणविहस्तयोधं
सेनानिवेशं तुमुलं चकार।")
पण्डितः। इति मेदिनी। (यथा, हरिवंशे। २६७। २८।
"नानायुधविहस्तानां त्वरितानां प्रधावताम्।
पुंक्तिनोत्कृष्टनिनदैर्व्वहुहितनिखने।")
विकलः। (यथा, विद्वानविजये। ९ अङ्के।
"विगलदधिविहस्तव्यस्तसंस्थप्रमत्त
स्खलितगतिभयार्त्तान् नैव जातु प्रहर्त्ता।")
षण्ढे, पुं। इति शब्दरत्नावली।

विहा, अ, (ओहाक त्यागे+"विधाविहा।" उणा ४। ६६। इति निपातनात् आ।) स्वर्गः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः।

विहापित, क्ली, (वि+हा+णिच्+क्तः।) दानम्। इत्यमरः।

विहायः [स्] क्ली पुं, आकाशः। इत्यमरः। (यथा, साहित्यदर्पणे। १०।
"कान्तायते सत्प्रसुखेन वारि
वारीयते स्वच्छतया विहायः।")
त्रि, महान्। यथा निरुक्ते। ४। १५। "विहायसर्त्तिभिरिन्द्रम्।" "विहायसो महान्।" इति यास्कः। यथा च निघण्टुटीकायाम्। ३। ३।१२। "विहायाः। वहिहाधाञ्भ्यश्छन्दसि। उणा ४। २१५। इति असुन्प्रत्ययः। आकुलकाल् इवभावेऽपि युगागमो निपात्यते।" यथा, ऋग्वेदे। ४। ११। ४।
"त्वद्वाजी वाजम्भरो विहायाः।"
"विहाया महान्।" इति तद्भाष्ये सायणः।)

विहाया [स्] पुं, पक्षी। इत्यमरः।

विहायस, क्ली पुं, आकाशः। इत्यमरटीकायां मथुरेशः। (यथा, महाभारते। १। ८९। १४।
"आतिष्ठस्व रथं राजन् विक्रमस्व विहायसम्।")

विहायस, पुं पक्षी। इत्यमरटीकायां भरतः।

विहायसा, अ, आकाशम्। इत्यमरटीकायां मथुरेशः हेमचन्द्रश्च। (पाणिनौ च "स्वरादि-निपातमव्ययम्।" १।१।३७। इत्यत्र गणितम्।)

विहार, पुं (वि+हृ+घञ्।) क्रीडार्थं पद्भ्यां गमनम्। तत्पर्य्यायः। परिक्रमः २। इत्यमरः। (यथा, गीतायाम्। ११। ४२।
"यच्चावहासार्थमसत्कृतोऽसि
विहारशय्यासनभोजनेषु।")
भ्रमणम्। स्कन्धः। लीला। (यथा रघुवंशे। ६। ४८।
"प्रस्थानभिन्नादिविहारकाले।")
सुगतालयः। इति मेदिनी। बिम्बरेसकपक्षी। इति शब्दचन्द्रिका। वैजयन्तः। इति शब्दमाला।

विहारी [न्] त्रि, (विहर्त्तुं शीलमस्येति। वि+हृ+णिनिः।) परिक्रमी। विहारकर्त्ता। विहारशब्दान्मत्वर्थे इनप्रत्ययेन निष्पन्नमिदम्। (यथा नैषधे। ३। १५।
"धार्य्यः कथङ्कारमहं भवद्भ्या
वियद्विहारी वसुधैकगत्या।")

विहित, त्रि, (वि+धा+क्तः।) विधेयः। यथा,
"विहितस्याननुष्ठानात् निन्दितस्य च सेवनात्।
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति।"
इति प्रायश्चित्ततत्त्वम्।

विहिति स्त्री, (वि+धा+क्तिन्।) विधानम्। यथा —
"क्षितिविजितिस्थितिविहितिव्रतरतयः पर-गतयः।
उरु रुरुधुर्गुरुदुधुवुर्युधि कुरवः स्वमरिकुलम्।"
इति दण्डी।

विहीन, त्रि (वि+हा+क्त।) विशेषेण हीनः। यथा तत्त्वसारे।
"षोडशाद्यार्णविहीनो यः प्रजपेद्विश पार्व्वतीम्।
सोऽचिरात् मृत्युमाप्नोति नरकञ्च प्रपद्यते।"
त्यक्तः। यथा,—
"विहीनश्च धनैर्दारैः पुत्रैराप्य मे धनम्।
वनमभ्यागतो दुःखी निरस्तश्चाप्तबन्धुभिः।"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम्।

विहृत क्ली (वि+हृ+क्त।) स्त्रीणां स्वाभाविकदशविधालङ्कारान्तर्गतालङ्कारविशेषः। यथा,
"लीला विलासो विच्छित्तिर्व्विब्बोकः किलकिञ्चितम्
मोट्टायितं कुट्टमितं ललितं विहृतं तथा।
विभ्रमश्चेत्यलङ्काराः स्त्रीणां स्वाभाविका दश।"
इति हेमचन्द्रः।

विहृति, स्त्री विशेषेण हरणम्। विशेषेण बलात्कारः। विपूर्व्वहृधातोः क्तिप्रत्ययेन निष्पन्नमिदम्।

विहेठ पुं (वि+हेठ+अच्।) विहेठनम्। विपूर्व्वहेठधातोरच्प्रत्ययेन निष्पन्नमिदम्।

विहेठन क्ली, (वि+हेठ+ल्युट्।) हिंसा। मर्द्दनम्। विडम्बनम्। इति मेदिनी। विबाधा। इति त्रिकाण्डशेषः।

विह्वल त्रि, (वि+ह्वल+अच्।) भयादिना विभूतः। स्वाङ्गधारणायत्तः। तत्पर्य्यायः। विक्लवः २। इत्यमरः। (यथा रघुः। ८। ३७।
"पवमानवलक्षो दयितो
वनयोषामवलोक्य विह्वलाः।
निमिमील नरोत्तमप्रिया
हृतचन्द्रा तमसेव कौमुदी।")
विलीनम्। इति हेमचन्द्रः।

वी, क ईरणम्। कान्तिगतिक्षेपणप्रजनखादनेषु। इति कविकल्पद्रुमः। (अदा० पर० सक० अनिट्।) क, वेति। इति दुर्गादासः।

वी, पुं (वयतीति। वी गतौ+क्विबादिभ्यः शोषे डिच्। अभिधानात् दैर्घ्यम्।) गमनम्। इति एकाक्षरकोषः।

वीक, पुं, (अजतीति। अज+"अजियमिशीङ्भ्यश्च।" उणा० ३।४७। कन्। अजेर्वीभावः।) वायुः। पक्षी। इत्युणादिकोषः। मनः। इति संक्षिप्तसारोणादिवृत्तिः।

वीकाश, पुं, (विकाशनमिति। वि+काश+घञ्। "इक काशे।" ६।३।१२३। इति वैकल्पिकदीर्घः।) रहः। प्रकाशः। इत्यमरः।

वीङ्ख पुं क्ली, हरिः। विभूतिपरपादोत्क्षेपणपूर्वकेण विचरणमित्यर्थः।

वीङ्खा, स्त्री, विविधेन ईषणम्। इङ्गितम्। विद्युन्मयपादोत्क्षेप(कूट)प्रबन्धेन विचरणम्। (यथा, भागवते। ६।१८।२८।
"मनो बलाद्य भारता वाजिनामङ्गुष्ठीङ्खेन।")

वीङ्खायन त्रि, (वीङ्खामायन।) विक्रमादयः। इति हेमचन्द्रः।४।३०।(वीङ्खायनः। इत्यमरः।)

वीक्षित, त्रि, (वि+ईक्ष+क्त।) विशेषेण ईक्षितः। दृष्टः। यथा,—
"मायमेव प्रजलसे तु मायमंशुमतोक्षिती।
नयेन वाममन्यासे रोक्षितो भरतं दिदेन।"
इति दीपिका।

वीक्षा स्त्री, (वीक्षणं इति। वि+ईक्ष+भावे अ।) विस्मयः। ज्ञानम्। इति मेदिनी। षे, ५६।

वीक्ष्य पुं, (वि+ईक्ष दर्शने+ण्यत्।) लास्यः। घोटकः। इति मेदिनी। दृश्ययोग्ये, त्रि।

वीङ्खा स्त्री (वीङ्खनमिति। वि+इङ्ख+"गुरोश्च हलः।" इति अ। टाप्।) नृत्यविशेषः। गतिभेदः। सौन्दर्यम्। इति हेमचन्द्रः। अश्व गतिभेदः। वल्गा। इति शब्दरत्नावली।

वीचि पुं,स्त्री, (वयति वर्णं तटे यातमिति। वे+"वेञो डिच्।" उणा० ४।७२। ईचि। स च डित्।) तरङ्गः। इत्यमरः। (यथा रघुवंशे।
१।४२।
"सरसीष्वरविन्दानां वीचिविक्षोभशीतलम्।
आमोदमुपजिघ्रन्तौ स्वनिश्वासानुकारिणम्।")
अल्पतरङ्गः। अवकाशः। सुखम्। इति मेदिनी। चि, १०। अल्पः। इति हेमचन्द्रः। किरणः। इति शब्दार्णवः।

वीची स्त्री, (वीचि+कृदिकारादिति ङीष्।) वीचिः। इत्यमरटीकायां भरतः। (यथा कुमारसम्भवे। १६।८।
"सरःसु चलितोर्मिव्यतिकरविघूर्णिषु।
चक्रवाकविहङ्गानां वीचीभिरवतारिषु।")

वीचीतरङ्ग पुं न्यायविशेषः। स तु वीचिषु शब्दस्य उत्पत्तिकारणम्। यथा—
"वीचीतरङ्गन्यायेन तदुत्पत्तिस्तु कीर्तिता।
कदम्बमुकुलन्यायादुत्पत्तिः कस्यचिन्मते।"
इति भाषापरिच्छेदः।

अस्य अर्थः यथा वीचिमध्ये शब्दे जाते तत्तदाश्रय शब्दान्तरं जायते ... तथा वीचीतरङ्गन्यायेन शब्दान्तरोत्पत्तिरिति।

[illegible] ...स्तु तत्र शब्दा उत्पद्यन्ते तैः अपरे तत्र शब्दा उत्पद्यन्ते इति भावः। कदम्बमुकुलन्यायेन दशदिक्षु शब्दा उत्पद्यन्ते इति। इति सिद्धान्तमुक्तावली।

वी(वी)ज, क्ली (विशेषेण कार्यरूपेण च जायते इति। वि+जन+"उपसर्गे च संज्ञायाम्।" इति ड। "अन्येषामपि दृश्यते।" इति उपसर्गस्य दीर्घः। यद्वा विशेषेण ईजति क्षुधि गच्छति शरीरं वा। ईज गतिकुत्सनयोः+पचाद्यच्। यद्वा, वीजते गच्छति गर्भाशयमिति। वीज्+अच्। यद्वा "वीजयन्त्यनेन काम्यकर्मादिकेषु।" इत्यमरटीकायां भरतः। तथा च भोजराजवृत्तौ विषयो वीज इति पुराणविदः।) शस्योत्पत्तिः। इति प्रमाणे मध्ये वीजपाचकार्थे विशेषे वा। अत्र क्षीरस्वामी वीज्यते वैति वा वीजं तालव्यादिरिति। वीजिः स्यात् विरलविरलः इति माधवः। "वीरुधे द्विकार्यं कारणं वा वीजम्।" इति निघण्टौ वैद्यरामपत्ने। २।२।१५।) कारणम्। (यथा, गीतायाम्। ७।१०।
"वीजं मां सर्वभूतानां विद्धि पार्थ सनातनम्।"
यथा च मनौ। १।९६।
"महाद्युतिमानुषानो भूत्वा वीजं तस्य चरिष्णु च।")
शुक्रम्। इत्यमरः। (यथा मनौ। १।८।
"अप एव ससर्जादौ तासु वीजमवासृजत्।"
वीजं शुक्रम्। इति मेधातिथिः। वीजं शक्तिरूपम्। इति कुल्लूकः। यथा च तत्रैव। १०।७२।
"वीजस्य चैव योन्याश्च वीजमुत्कृष्टमुच्यते।
सर्वभूतप्रसूतिर्हि वीजलक्षणलक्षिता।")
वीजमन्त्र अर्थात्मन्त्रादिवीजं यथा —
हाससरवाच।
"चतुष्पथं तज्ज्ञतस्मृतं परिपूर्णतमं जगत्।
सर्वेषां बीजमन्त्राणां वीजरूपं सनातनम्।"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ६२ अध्यायः।
अङ्कुरः। (यथा महाभारते। ३।१२।१८।
"न तस्य वीजं रोहति वीजकाले
न चास्य वर्षं वर्षति वर्षकाले।
भीतं प्रपन्नं प्रददाति शत्रवे
न सत्राणं लभते त्राणमिच्छन्।")
तत्त्वावधानम्। इति मेदिनी। मज्जा। इति राजनिर्घण्टः। अङ्कुरविशेषः। यथा —
"अन्तस्तरेण धरणीमिव शुद्धि
संविदितं मनुदूरेण वीजाः।
जलनाल अङ्कुरं तरङ्गेण
उपशमौषधं अथ च नष्टे।
पूर्वं ग्रहेषु वल्कलपर्यङ्केण
अन्यः प्रथम्यो दिनाः कलङ्किताः।
शालिः इक्ष्वा भस्महाचिन्दनार्णं
कलपत्रकास्त्रेष्विमवीजविराव।"
इति भास्कराचार्यविरचिते सिद्धान्तशिरोमणौ वीजगणिताध्याये स्वस्वस्त्रविवर्णे।७।
मन्त्रः। यथा। अथ एकैकवीजम्।

"चतुर्मन्त्रोऽभिमालचन्द्रौ वामनेत्राब्जचन्द्रयुक्।
वीजं तस्याः समाख्यातं सौम्यं विद्धि
वरानने।"
मकरभावे रमादि। अपरो देवः। स्वारमेव मोकारः। यहंकारोऽरुपादि। ह्रीं।७।
भुवनेश्वरीवीजम्। ह्रीं नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा।७। अथ त्रिपुटावीजम्। श्री ह्रीं क्लीं।७। महिषमर्दिनीवीजम्। ॐ ह्रीं हूं मै च दे च स्वो दु मे ह्रीं फट्।७। अथ विलासीवीजम्। ऐं ह्रीं तिरस्कृते महती स्वाहा।७। वज्रप्रस्तारिण्याः। ऐं ह्रीं त्रिम क्लिन्ने महते स्वाहा।७। अथ दुर्गावीजम्। ॐ ह्रीं दुं दुर्गायै नमः।७। महिषमर्दिनीवीजम्। ॐ महिषमर्दिनि स्वाहा।७। अथ जयदुर्गावीजम्। ॐ दुर्गे दुर्गे रक्षणि स्वाहा।७। शूलिनीवीजम्। ज्वल ज्वल शूलिनि दुष्टग्रह हूं फट् स्वाहा।७। वागीश्वरीवीजम्। वद वद वाग्वादिनि स्वाहा।७। पारिजातसरस्वतीवीजम्। ॐ ह्रीं ह्सौं ॐ ह्रीं सरस्वत्यै नमः।७। गणेशवीजम्। गं।७। हेरम्बवीजम्। ॐ गूं नमः।७। हरिद्रागणेशवीजम्। ग्लौं।७। लक्ष्मीवीजम्। श्रीं।७। महालक्ष्मीवीजम्। ॐ ऐं ह्रीं श्रीं क्लीं हसौं जगत्प्रसूत्यै नमः।७। सूर्यवीजम्। ॐ घृणि सूर्य आदित्य।७। श्रीरामवीजम्। रां रामाय नमः। जानकीवल्लभाय हूं स्वाहा।७। विष्णुवीजम्। ॐ नमो नारायणाय।७। श्रीकृष्णवीजम्। गोपीजनवल्लभाय स्वाहा।७। वासुदेवस्य। ॐ नमो भगवते वासुदेवाय।७। बालगोपालस्य। ॐ क्लीं कृष्णाय।७। लक्ष्मीवासुदेवस्य। ॐ ह्रीं ह्रीं श्रीं श्रीं लक्ष्मीवासुदेवाय नमः।७। दधिवामनस्य। ॐ नमो विष्णवे सुरपतये महाबलाय स्वाहा।७। हयग्रीवस्य।
ॐ उद्गिरत्प्रणवोद्गीथसर्ववागीश्वरेश्वर।
सर्ववेदमयाचिन्त्य सर्वं बोधय बोधय।७।
नृसिंहस्य।
उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम्।
नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम्।७।
नारायणीवीजम्। श्रीं ह्रीं क्लीं हूं फट्।७। वराहस्य। ॐ श्री ह्रीं वराहरूपाय नमः ह्रीं श्री ॐ।७। वराहस्य। ॐ नमो भगवते वराहरूपाय भूर्भुवःस्वःपतये भूपतित्वं मे देहि ददापय स्वाहा।७। शिवस्य। ह्रौं।७। मृत्युञ्जयस्य। ॐ जूं सः।७। दक्षिणामूर्तिवीजम्। ॐ नमो भगवते दक्षिणामूर्तये मह्यं मेधां प्रज्ञां प्रयच्छ स्वाहा।७। चिन्तामणिवीजम्। क्ष म र य ऊं।७। नीलकण्ठस्य। प्रीं प्रीं ठः नमः शिवाय।७। चण्डस्य। चण्डेश्वराय हुं फट्।७। क्षेत्रपालस्य ॐ क्षौं क्षेत्रपालाय नमः।७। बटुकभैरवस्य। ॐ ह्रीं बटुकाय आपदुद्धारणाय कुरु कुरु बटुकाय

ह्रीं ॥०॥ त्रिपुरायाः । ह्सरैं । ह्सकलरीं । ह्सरौः ॥०॥ सम्पत्प्रदाभैरव्याः । ह्सरैं । ह्सकलरीं । ह्सरौः ॥०॥ कौलेशभैरव्याः । सहरैं । सहकलरीं । सहरौः ॥०॥ भयविध्वंसिनीभैरव्याः । ह्सैं । ह्सकलरीं । ह्सौः ॥०॥ सकलसिद्धिदाभैरव्याः । सहैं । सहकलरीं । सहौः ॥०॥ चैतन्यभैरव्याः । सहैं । सकलह्रीं । सहरौः ॥०॥ कामेश्वरीभैरव्याः । सहैं । सकलह्रीं । नित्यक्लिन्ने मदद्रवे सहरौः । षट्कूटाभैरव्याः । डरलकसहैं । डरलकसहीं । डरलकसहौः ॥०॥ नित्याभैरव्याः । ह्सकलरडैं । ह्सकलरडीं । ह्सकलरडौः ॥०॥ रुद्रभैरव्याः । ह्सखफ्रैं । ह्सकलरीं । ह्सौः ॥०॥ भुवनेश्वरीभैरव्याः । ह्सैं । ह्सकलह्रीं । ह्सौः ॥०॥ सकलेश्वर्य्याः । सहैं । सहकलह्रीं । सहौः ॥०॥ त्रिपुराबालायाः । ऐं क्लीं सौः ॥०॥ नवकूटाबालायाः । ऐं क्लीं सौः । ह्सैं । ह्सकलरीं । ह्सौः । ह्सरैं ह्सकलरीं ह्सरौः ॥०॥ अन्नपूर्णाभैरव्याः । ॐ ह्रीं श्रीं क्लीं नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा ॥०॥ श्रीविद्यायाः । कएईल ह्रीं । हसकहलह्रीं । सकलह्रीं ॥०॥ छिन्नमस्तायाः । श्रीं क्लीं ह्रूं ऐं वज्रवैरोचनीये हूं हूं फट् स्वाहा ॥०॥ श्यामायाः । क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं दक्षिणे कालिके क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा ॥०॥ गुह्यकालिकायाः । क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं गुह्ये कालिके क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा ॥०॥ भद्रकाल्याः । क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं भद्रकाल्ये क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा ॥०॥ श्मशानकालिकायाः । क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं श्मशानकालि क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा ॥०॥ महाकाल्याः । क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं महाकालि क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा ॥०॥ तारायाः । ह्रीं स्त्रीं हूं फट् ॥०॥ चण्डोग्रशूलपाणेः । ॐ ह्रीं हूं शिवाय फट् ॥०॥ मातङ्ग्याः । ॐ ह्रीं क्लीं हूं मातङ्ग्यै फट् स्वाहा ॥०॥ उच्छिष्टचाण्डालिन्याः । उच्छिष्टचाण्डालिनी सुमुखीदेवी महापिशाचिनी ह्रीं ठः ठः ठः ॥०॥ धूमावत्याः । धूं धूं स्वाहा ॥०॥ भद्रकाल्याः । ह्रौं कालि महाकालि किलि किलि फट् स्वाहा ॥०॥ उच्छिष्टगणेशस्य । ॐ हस्ति पिशाचि लिखे स्वाहा ॥०॥ धनदायाः । धं ह्रीं श्रीं रति रतिप्रिये स्वाहा ॥०॥ श्मशानकालिकायाः । ऐं ह्रीं श्रीं क्लीं कालिके ऐं ह्रीं श्रीं क्लीं ॥०॥ बगलायाः । ॐ ह्लीं बगलामुखि सर्व्वदुष्टानां वाचं मुखं स्तम्भय जिह्वां कीलय कीलय बुद्धिं नाशय ह्लीं ॐ स्वाहा ॥०॥ कर्णपिशाच्याः । ॐ कर्णपिशाचि वदातीतानागतशब्दं ह्रीं स्वाहा ॥०॥ मञ्जुघोषस्य । क्लीं ह्रीं श्रीं ॥०॥ तारिण्याः । क्लीं क्लीं तारदेवि ह्रीं क्लीं ऐं ॥०॥ सारस्वतबीजम् । ऐं ॥०॥ कामाख्यायाः । ऐं ह्रीं श्रीं क्लीं चण्डिकायै नमः ॥०॥ दुर्गायाः । दूं ॥०॥ विशालाक्ष्याः । ॐ ह्रीं विशालाक्ष्यै नमः ॥०॥ गौर्य्याः । ह्रीं गौरि रुद्रदयिते योगेश्वरि हूं फट् स्वाहा ॥०॥ महागौरीमन्त्रः । ह्रीं नमो ब्रह्मश्रीराजिते राजपूजिते जये विजये गौरि गान्धारि त्रिभुवनवशङ्करि सर्व्वलोकवशङ्करि सर्व्वस्त्रीपुरुषवशङ्करि सुदुर्घोररावे ह्रीं स्वाहा ॥०॥ इन्द्रस्य । इं इन्द्राय नमः ॥०॥ गरुडस्य । क्षिप ॐ स्वाहा ॥०॥ विषहरादिबीजम् । ख ख ॥०॥ वृश्चिकविषहरबीजम् । ॐ सरह स्फु । ॐ हिलि हिलि चिलि स्फु । ॐ हिलि हिलि चिलि चिलि स्फु । मचये पु । सर्व्वेभ्यो देवेभ्यस्तु ॥०॥ मूषिकविषहरबीजम् । ॐ गे च ठ । व्याघ्रचर्म्मिकायाः ॐ ग गां ठ ॥०॥ मूषिकनाशमन्त्रः । ॐ सरथे पु असरथे पु विसरथे पु । एतन्मन्त्रं जपन् श्वेतसर्षपप्रक्षेपात् मूषिकनाशो भवति ॥०॥ लूताविषहरमन्त्रः । ॐ ह्रीं ह्रीं हूं भवतु ॐ स्वाहा गरुड हूं फट् ॥०॥ सर्व्वकीटविषहरबीजम् । ॐ नमो भगवते विष्णवे सर सर हन हन हुं फट् स्वाहा ॥०॥ सुखप्रसवमन्त्रः । ॐ मन्मथ मन्मथ वाहि वाहि लम्बोदर मुञ्च मुञ्च स्वाहा । ॐ मुक्ताः पाशा विपाशाश्च मुक्ताः सूर्य्येण रश्मयः । मुक्त सर्व्वभयाद्गर्भ एह्येहि मारीच मारीच स्वाहा । एतयोरन्यतरेणाष्टवारं जलमभिमन्त्र्य देयं पीत्वा सुखप्रसवा भवति ॥०॥ हनूमन्मन्त्रः । हं हनूमते रुद्रात्मकाय हुं फट् ॥०॥ वीरसाधनस्य । ह पवनमन्दनाय स्वाहा ॥०॥ अथ चाण्डमटी । ॐ नमो भगवति चामुण्डे रक्तवाससि ज्वलति ज्वलन्रूपपराक्रमे अमुकवधाय विचेतसे स्वाहा । चाण्डालपटेनावृतः समुद्रगामिनीनदीतटे श्मशानभूमौ वा दक्षिणास्यः जपेत् । यावत् पटः शुष्यति तावत् प्राणाः शुष्यन्ति शत्रोः ॥०॥ श्मशानभैरव्याः । श्मशानभैरवि नररुधिरास्थिवसाभक्षिणि सिद्धिं मे देहि मम मनोरथान् पूरय हुं फट् स्वाहा ॥०॥ ज्वालामालिन्याः । ॐ नमो भगवति ज्वालामालिनि गृध्रगणपरिवृते हुं फट् स्वाहा ॥०॥ महाकाल्याः । ॐ धूं धूं क्रीं क्रीं पशून् गृहाण हुं फट् स्वाहा ॥०॥ अथ त्रिमधुबन्धमोचनस्य । ॐ नम चले विचले तिष्ठन्ती बन्धं छित्त्वा बन्धमेतं यथैव दत्तं तस्याश्च विदा मोचये माके चापोपोऽवेरम् ॥०॥ अथ चिटिमन्त्रः । ॐ चिटि चिटि चाण्डालि महाचाण्डालि अमुकं मे वशमानय स्वाहा ॥०॥ कामकला ।

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् ।
उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात् ।
अथ मृतसञ्जीवनीमन्त्रः । ह्रौं ॐ जुं सः ॐ भूर्भुवः स्वः ।
त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् ।
उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात् ॥
ॐ भूर्भुवः स्वः । इत्यादि तन्त्रसारः । आकर्षणादिवीजानि बाहुल्यभयान्नोक्तानि ॥)

(अथ वीजाभिधानम् । यथा, —
“वीजवर्णैस्तदीयाद्यमाहृत्य तन्त्रशास्त्रतः ।
वीजनामानि कतिचित् वक्ष्यामि विदुषां मुदे ॥
माया लज्जा परा शक्तिस्त्रिगुणा भुवनेश्वरी ।
हृल्लेखा शम्भुवनिता शक्तिर्देवीश्वरी शिवा ॥
महामाया पार्व्वती च संस्थानसमरूपिणी ।
परमेश्वरी च शुभदा धात्री बीजमथोच्यते ॥ ह्रीं ॥
वह्निनीरक्षयुक्ताया शिरमाया प्रकीर्त्तिता ॥
क्रों ॥
प्राणविद्याग्निविन्दुनादेशाघीशमक्ष उच्यते ।
वीजश्रीर्विष्णुवनिता रमा चौरसमुद्रजा ॥ श्रीं ॥
योऽक्षयत्वम वह्निमायास्थितविन्दुसमुत्तम् ।
चन्द्रवीजसमारूढ वधूवीजमिदं स्मृतम् ।
वधूमायेश्वरा योनिर्देवाद्यो कौचकामिनी ॥ स्त्रीं ॥
नादविन्दुसमायुक्तो ह्रादशस्तुस्वरो भवम् ।
योनि सरस्वतीवीजमथर वाग्भवच वाक् ॥ ऐं ॥
हकारो वामकर्णाढ्यो नादविन्दुविभूषितः ।
कूर्च्चं क्रोध उमन्यों दीर्घहुङ्कार उच्यते ।
ध्वन्स्व दीपकश्च तारा प्रणव इत्यपि ॥ हूं ॥
कामाक्षरं वह्निमस्थं रतिविन्दुविभूषितम् ।
कालीवीजमिदं प्रोक्तं रतिवीजं तदेव हि ॥ क्रीं ॥
कामाक्षरं धरासंस्थं रतिविन्दुविभूषितम् ।
गुह्यकालीवीजमिदं गोपालवीजमित्यपि ॥
तत्कामबीजं कामेशी वीजं शक्तिकलो परा ॥ क्लीं ॥
सद्यान्तयुक्तो मर्द्धचन्द्रश्चैव प्रासादमुच्यते ॥ सौं ॥
कलादिवह्निनीवीजं क्रोङ्कारश्चाङ्कुशाभिध ॥ क्रों ॥
आकारो विन्दुमान् पाशः शिवश्च समुदीरितः ।
सकला भुवनेशानी कामेशी वीजमुच्यते ॥
नमस्तु हृदय स्वाहा दिठठयुगल ठठ ॥
नम । स्वाहा ॥
चन्द्रयुग्म शिरो वेदमाता ज्वलनसुन्दरी ।
स्वाहा परा देवभोज्य ठद्वय चन्द्रयुग्मकम् ॥
स्रुचो वह्निर्वेदमाता देवास्य वह्निसुन्दरी ॥ स्वाहा ॥
शिखा वषट् शिरोमध्य ब्रह्ममाता वरप्रिया ।
शिखा वषट् च । वषट् कवच क्रोधी वर्म्महृमि मपि ।
क्रोधाञ्चोर्द्ध तनुस्त्र प्रणादौ दिग्वदाव ॥ हूं ॥
चक्रनिकृन्तं वौषट् । वौषट् । वह्नि प्रन्न- मानुपम् । फट् ।
नार्थार्थम् वर्णो प्रेतवीजम् ॥ ह्सौः ॥ ह्सौः
ऽप्रयासयु । कथ ॥
मकारो विन्दुमान् पिशाचीवीजं मनीश्वरीवीजम् ॥ गं ॥
स्मृतिर्मोक्षलक्ष्मीविप्रयुक्तं भूमिवीजमीरितम् ॥ ग्लौं ॥
ठान्त इन्द्रनैर्वेन्दुयुक्तं विष्णुवीजकम् ॥ धीं ॥
अथ कामकलाचामुण्डा विद्याक्षरम् ।
चकमायाकबालाकोमारोहिणी वराहिका ।
चतुर्थार्मतुरीयी च त्रिकमाह्निका परा ॥ ।
सार ॥

[illegible] बीजमाला [illegible]

बीजक, पुं, [illegible] इति शब्दार्थः । [illegible] तत्पर्य्यायः । बीजपूरः २ बीजकः ३ [illegible]

बीजकृत्, क्ली, (बीजं बीजं करोति वर्द्धनीति । [illegible]) [illegible] इति राजनिर्घण्टः ।

बीजकोश [illegible] पुं, (बीजानां कोश आधार इव ।) पद्मबीजाधारपत्रिका । [illegible] इति ख्यातः । इति भरतः । तत्पर्य्यायः ।

[illegible] वराटकः २ । [illegible] कर्णिका ३ । इति [illegible] । इति शब्दरत्नावली ।

बीजगर्भः, पुं, (बीजानि गर्भेऽभ्यन्तरे यस्य ।) पटोलः । इति राजनिर्घण्टः ।

बीजगुप्तिः, स्त्री, (बीजानां गुप्तिर्यत्र ।) शिम्बी । इति राजनिर्घण्टः ।

बीजधान्य, क्ली, (बीजप्रधानं धान्यम् ।) धान्यकम् । इति राजनिर्घण्टः ।

बीजनं, क्ली, (बीज्यतेऽनेनेति । वि + ईज + करणे ल्युट् ।) व्यजनम् । [illegible]

बीजपादप, पुं, (बीजप्रधानः पादपः ।) भल्लातकः । इति राजनिर्घण्टः ।

बीजपुष्पं, क्ली, (बीजप्रधानं पुष्पं यस्य ।) मरुवकः । मदनद्रुमः । इति मेदिनी ।

बीजपूरः, पुं, (बीजानां पूरः यत्र ।) बीजपूरः । [illegible] इति भाषा । तत्पर्य्यायः । बीजपूर्णः २ पूर्णबीजः ३ सुकेसरः ४ बीजकः ५ केसराम्लः ६ मातुलुङ्गः ७ सुपूरकः ८ रुचकः ९ बीजपूरक १० अम्लकेसर ११ [illegible] १२ पूरक १३ दीप्यक १४ । [illegible] इति राजनिर्घण्टः ।

[illegible] इति भावप्रकाशः ।

बीजपूर्ण, पुं, (बीजैः पूर्णः ।) बीजपूरः । इति राजनिर्घण्टः ।

बीजपेशिका, स्त्री, (बीजस्य पेशिका [illegible]) अण्डकोषः । इति राजनिर्घण्टः ।

बीजफलक, पुं, (बीजप्रधानं फलं यस्य ।) बीजपूरः । इति राजनिर्घण्टः ।

बीजमातृका, स्त्री, (बीजानां मातृका [illegible]) पद्मबीजम् । यथा,— "[illegible] बीजमातृका ।" इति शब्दरत्नावली ।

बीजरत्न, पुं, (बीजं रत्नमिव यस्य ।) माष । इति हैमचन्द्रः ।

बीजरुह, पुं, (बीजात् रोहतीति । बीज + रुह + क ।) शाल्यादिः । यथा,— [illegible] इति हैमचन्द्रः ।

बीजरेचन, क्ली, (बीजं रेचनं रेचकं यस्य ।) जयपालः । इति राजनिर्घण्टः ।

बीजवपनं, क्ली, (बीजानां वपनम् ।) क्षेत्रे बीजस्य वपनम् । [illegible]

[illegible]

"ईशानमथवा हस्तबीजं स्नातो मन्त्रेण रोपयेत्।
वसुधेति सुशीतेति पुण्यदेति धरेति च।
नमस्ते सुभगे नित्यं द्रुमोऽयं वर्द्धतामिति॥"

इति ज्योतिस्तत्त्वम्॥

बीजरुह पुं, (बीजादेव रुहो यस्य। बीजप्रधानो रुहो वा।) धान्यम्। इति राजनिर्घण्टः॥

बीजसञ्चय पुं, (बीजानां सञ्चयः।) बीजसंग्रहः। तच्छुभाशुभदिनादिर्यथा,—
"हस्ताश्विचित्रादितिस्वातीरेवत्यां श्रवणद्वये।
स्थिरे लग्ने गुरौ शुक्रे बीजं धान्यं प्रवासरे।
माघे वा फाल्गुने वापि सर्व्वबीजानि सञ्चयेत्।
शोषयेदातपेऽहोनि रात्रौ चोपनिधापयेत्॥
ततश्च पुटिकां बद्ध्वा शोषयेच्च पुनः पुनः।
स्थापयेच्च प्रयत्नेन यथा भूमिश्च न स्पृशेत्॥
दीपाग्निना च संस्पृष्टं दृष्ट्वा चोपहतञ्च यत्।
सर्व्वबीज तथा बीजं यत् स्यात् कीटसमन्वितम्॥०॥
याम्याहिवह्निपितृविशाखपूर्व्वा-
मघेन्द्रपित्र्योत्तरभे शुभाहे।
धान्यादिकस्थापनमेषु शस्त-
मगाधिरङ्ग्यब्दोदयेषु॥
बौम्यादितिमघाश्विन्युत्तरेषु च कारयेत्।
सौम्ये लग्ने शुभे चन्द्रे निधनग्रहवर्ज्जिते।
चैत्रस्य कोष्ठके धान्यं गर्गो वदति सर्व्वदा।
धनदाय सर्व्वलोकहिताय देहि मे धान्यं
स्वाहा।
मम ईशाने ईशादेवी सर्व्वलोकविवर्द्धनी कामरूपिणि धान्य देहि स्वाहा।
लेखयित्वा इमं मन्त्रं धान्यागारे विनिक्षिपेत्॥"
पुराणसर्व्वस्वे।
"मत्र लिखित्वा पत्रे च मध्ये धान्यस्य धारयेत्।
मघासु धान्यराशेस्तु न विकारो भवेत्तथा।
दक्षिणदिक्सुखममर्त्यं स्यादभिषवाद् भारत।
श्रवणोदि ग्रहपचाना न बुधो बुधवासरे
कुर्यात्॥
शिवपूरेषु रेवत्यां धनिष्ठावारुणेषु च।
एतेषु वदन्ति दिनेषु धान्यनिश्चयच बुधैः॥
अवसानच विशाखासु मघापौष्णवर्ज्जमस्तनि पुष्यच।
अश्विन्यच ज्येष्ठा धनधान्यविवर्द्धिनी कथिता।"

इति ज्योतिस्तत्त्वम्॥

बीजसूः, स्त्री (बीजानि सूते इति। सू+क्विप्।) पृथ्वी। इति हेमचन्द्रः॥

बीजाकृतं त्रि (बीजेन सह कृतं कृष्टमिति। "कृञो द्वितीयतृतीयशम्बबीजात् कृषौ।"५।४।५८। इति डाच्।) उप्तकृष्टम्। इत्यमरः॥ द्वे बीजेन सह कृष्टे क्षेत्रे। बीजेन सह कृतं कृष्टं बीजाकृतम्। बीजप्रधानेनेति डाच्। आदौ पुनः पश्चात् कृष्टं उप्तकृष्टम्। इति भरतः॥

बीजाढ्य, स्त्री, (बीजे आढ्यो रसो यस्य।) मधुपुष्पम्। इति राजनिर्घण्टः॥

बीजी, [न्] पुं, (बीजमस्यास्तीति। बीज+इनि।) पिता। इति हेमचन्द्रः॥ (यथा, उद्वाहतत्त्वे।
"अत एव देवलिकयेऽपि मातापितृस्थानीयने बीजिनं मारभ्येत्युक्तम्।" यथा च गौतमसंहितायाम्। ४।१।
"असमानप्रवरैर्विवाह ऊर्द्धं सप्तमात् पितृबन्धुभ्यो बीजिनश्च मातृबन्धुभ्य पञ्चमात्॥")
बीजविशिष्टे, त्रि॥ (यथा मनौ। ८।५१।
"तथैवाक्षेत्रिणो बीजं परक्षेत्रप्रवापिणः।
कुर्व्वन्ति क्षेत्रिणामर्थं न बीजी लभते फलम्॥")

बीजोन्क, स्त्री, (बीजमिव कठिनमुदकम्। तस्य कठिनत्वात्तथात्वम्।) करका। इति त्रिकाण्डशेषः॥

बीजोप्तिचक्र स्त्री, (बीजानामुप्तये शुभाशुभसूचकं चक्रम्।) बीजवपनकर्तृशुभाशुभज्ञानार्थं नरकारचक्रम्। यथा,—
"सूर्य्यभाद्गणयेत् स्वाश्विनाद्यं कान्तरकमात्।
मुखे त्रीणि गले त्रीणि भानि द्वादश तूदरे।
पुच्छे चतुर्व्विदि पञ्च निभाच फलं वदेत्।
सर्ग्गे चोपकं विद्यात् गलकेऽङ्गारकस्तथा।
उदरे धान्यवृद्धिः स्यात् पुच्छे धान्यक्षयो
भवेत्।
ईतिदोषभयं राज्ये चक्रे बीजोप्तिसम्भवे॥"
सूर्य्यभात् सूर्य्ययुक्तनक्षत्रात्। त्रिनाडी-कानारकमादिति यद्यस्मिन् रविस्तदा तामारभ्य गणयेत्। त्रिनाडीषु अश्विनीभरणीकृत्तिकासु दत्ता रोहिणी यदि कार्या च्मगशिरश्चाद्रीपुनर्व्वसुनाडीषु दत्ता पुष्यो यदि कार्य। एवं क्रमेणान्या लेख्या। चोपकं शस्यशून्यताम्। ईतयः।
"अतिवृष्टिरनावृष्टिः शलभा मूषिकाः खगाः।
प्रत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः॥"

इति ज्योतिस्तत्त्वम्॥

बीज्य, त्रि, (विशेषेण इज्यः पूज्यः। अथवा बीजाय हितः इति। "उगवादिभ्यो यत्।"५।१।२। इति यत्।) यस्य कस्यचित् कुलभवः। तत्पर्य्यायः। कुलसम्भवः २। इत्यमरः॥ बंश्यः ३ कौलेयः ४ कुलजः ५। इति शब्दरत्नावली॥ कुलीनः ६ कुल्यः ७ कुलभवः ८। इति जटाधरः॥

बीटि, स्त्री, (विशेषेण इटति छायानिरासात् सह्याद्रि वेष्टयित्वा प्रसरति। वि+इट+"इगुपधात् कित्।" उणा ४।११९। इति इन्। स च कित्।) ताम्बूलवल्ली। इति केचित्॥ सुपत्त्रीयुतताम्बूलम्। पानेर बीड़ा इति भाषा। इति केचित्॥

बीटिका, स्त्री (बीटिरेव। स्वार्थे कन् स्त्रियामाप्।) ताम्बूलवल्ली। इति केचित्॥ सुपत्त्रीयुतताम्बूलम्। पानेर बीड़ि इति भाषा। इति केचित्॥ (यथा, राजतरङ्गिण्याम्। ४। ४२।
"धूपदपापि कस्य त्वं ददासि इति मधुरं।
ददस्या बीटिकास्तस्या बुतामाहुपचक्रमान्॥")

बीटी स्त्री, (बीटि+वा ङीष्।) ताम्बूलवल्ली। इति केचित्॥ सुपत्त्रीयुतताम्बूलम्। पानेर बीड़ि इति भाषा। इति केचित्॥

बीणा स्त्री (वेति वृद्धिमात्रमपगच्छतीति। वी गतौ+"रास्नासास्नास्थूणावीणा।" उणा ३।१५। इति न निपातनाद्गुणाभावो णत्वञ्च।) विद्युत्। इति मेदिनी। णे २८॥ (वेति कौतुकञ्च आप्नोतीति। वी आप्नौ+न।) स्वनामख्यातवाद्यम्। तत्पर्य्यायः। वल्लकी २ विपञ्ची ३। सा तु सप्तभिस्तन्त्रीभिर्युक्ता परिवादिनी ४। इत्यमरः॥ कण्ठकुणिका ५। इति जटाधरः। घोषवती ६ विपञ्चिका ७। इति शब्दरत्नावली। घोषवती ८ कच्छकुणिका ९। (यथा, महाभारते। ९।१९३।१३।
"सामकं तत्र चाध्यज्ञानि
वसन्तश्री प्रदिता चैव बीणा॥")
सङ्गता यथा। शिवस्य वीणा लम्बी १ सरस्वत्या कच्छपी २ नारदस्य महती ३ गणानां प्रभावती ४ विश्वावसो र्बृहती ५ तुम्बुरोः कलावती ६ चाण्डालानां कण्डोलवीणा चाण्डालिका च ७। तस्याङ्गादीनां नामादि यथा। तस्याः कायः कोलम्बकः। तस्या निबन्धनं उपनाहः। तस्याः दण्डः प्रवालः। तस्याः प्रान्तवक्रकाष्ठं ककुभः प्रसेवकश्च। तस्या मध्ये वंशशलाका कलिका कुणिकापि च। तस्या वादनं कोणः। इति हेमचन्द्रादयः॥ अस्या विवरणं वाद्यशब्दे द्रष्टव्यम्॥

बीणादण्ड, पुं, (बीणाया दण्डः।) बीणाश्रिताबूपरिन्याहम्। तत्पर्य्यायः। प्रवालः २। इत्यमरः॥

बीणानुबन्ध, पुं (बीणाया अनुबन्धः।) उपनाहः। इति हारावली॥

बीणावाद, त्रि (बीणां वादयतीति। वद्+णिच्+अण्।) बीणावादकः। तत्पर्य्यायः। वैणिकः २। इत्यमरः॥ (यथा, याज्ञवल्क्यसंहितायाम्। ३।११५।
"शब्दानापाद्याक्षरापात मद्रपी बीणावादमिति।")

बीणावादक, पुं (बीणाया वादकः।) बीणावादकर्त्ता। इति शब्दरत्नावली॥

बीणास्य, पुं, (बीणा आस्यमिव यस्य। तयैव सकृट गानकरत्वात्।) नारदः। इति जटाधरः॥

बीत, स्त्री (वीतं स्म। वी+क्तः। अथवा अपगतं स्म। अप+गतमिति स्म।) अशान्तहस्त्यश्वम्। युद्धायसमस्तिकः। इत्यमरः॥ अङ्कुशकर्म्म। इति मेदिनी। ते १८॥ (यथा, माघे। ९।४७।
"निर्द्धूतवीतमपि बालकमुच्चपत्री
वन्ना क्रमेण परिकाल्यवतश्च नाभिः॥")
तोक्षोत्साहमात्रविहीन। यथा शिशुपाल-बधे। १।
"प्रथमं तावदिव वीतमतश्च। अष्ट-सुखेन प्रवर्त्तमानं विधायकं वीतम्॥" अस्य विशेषविवरणं तत्रैव द्रष्टव्यम्। त्रि। कमनीयः। यथा, ऋग्वेदे। ४।७।६।
"तं शश्वतीषु मातृषु वन आ वीतमश्रितम्॥"
"वीतं कान्तम्॥" इति तद्भाष्ये सायणः॥)

वीतंस पुं (विविधैश्च तंस्यन्ते अलङ्क्रियन्ते मृगादयो यैरिति । वि+तन्स+घञ् । "उपसर्गस्य घञ्यमनुष्ये बहुलम् ।" ६ । ३ । १२२ । इति दीर्घः ।) मृगपक्ष्यादिबन्धनोपकरणम् । इत्यमरः । मृगपक्षिणां विश्वासहेतौ प्रान्तरम् । इति मेदिनी । से ३० ॥

वीत, त्रि, (विहितम् इति वा । वि+इण्+क्त ।) गतः । इति हेमचन्द्रः । यथा । विरूपं प्राणो उपशमेन विगतमिदम् । (यथा, रघौ । ३ । ७ ।
"न मक्षुये वीतभिदं मनुनाथ
पार्श्वे विधाय स्मरमर्धयोश ॥")

वीतदम्भ त्रि, (वीतः गतः दम्भो येन सः ।) अदम्भः । तत्पर्यायः । अकल्कनः २ । इति जटाधरः ॥

वीतन, पुं कण्ठपार्श्वद्वयम् । यथा, हेमचन्द्रे ।
"तद्वत् कण्ठनामध्ये कण्ठपार्श्वौ तु वीतनौ ॥"

वीतभय, पुं, (वीतं भयं यस्य यस्मात् वा ।) विष्णुः । यथा,—
"अमृतः शैलजो दृष्टो दृश्चिक श्रीमिकोदरः ।
विज्वरो वीतभयः पुण्यश्रवणकीर्त्तनः ॥"
इति तस्य सहस्रनामस्तोत्रम् ॥

वीतराग, पुं (वीतो रागो विषयवासना यस्य ।) बुद्धः । इति त्रिकाण्डशेषः । विगतरागे, त्रि । यथा —
"दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥"
इति भगवद्गीता ॥
(यथा च महाभारते । १२ । २१८ । ३० ।
"वीतरागश्च मुक्तो परमात्मा भविष्यति ।
सर्वेषामपवादेन नैतदन्यत्समन्यथा ॥")

वीतशोक पुं, अशोकवृक्षः । इति शब्दमाला ॥ (वीतः शोको यस्मात् । अशोकाद्यास्तम्बाकृत शोकनाशकत्वात् तथात्वम् । तथा च लिखितम् ।
"त्वामशोक वराभीष्ट मधुमाससमुद्भव ।
पिबामि शोकसन्तप्तो मामशोकं सदा कुरु ॥"
विगतः शोको यस्य ।) विगतशोके, त्रि । (यथा, महाभारते । १ । १०१ । १६ ।
"सर्वकामसमृद्धेन वीतशोकभयः सदा ॥")

वीचि, स्त्री (वयति सन्ततं गच्छतीति । वे+डिच् ।) तरङ्गः । वीचिः । (यथा, कौ० रामायणे । ४ । १ । ३० ।
"मुक्ताशुक्तिसरिन्मार्गे मदकलहंसकसमा ।
इयं विभाति पम्पा कुमुदोत्पलसमा विमला ॥")
अवकाशः । अल्पम् । स्वल्पम् । इति मेदिनी । चि, २८ । (आनन्दः । यथा ऋग्वेदे । १ । ३ ।
"प्रवामन्धि विशेषमनुरत्न मर्त्यं भुवो
वीचये मे ॥"
"ऋतस्य वीचये यागाय ।" इति तद्भाष्ये सायणः ।
प्रापणं । यथा, ऋग्वेदे । ६ । १६ । ११ ।
"स नः पृथो अग्नेऽभिवीतये दिवस्पृथु हव्यदाते ॥"
"वीतये भक्षणाय देवेभ्योऽस्माभिर्दत्तं हविः ।

वीतं ।" इति तद्भाष्ये सायणः । यथा । यथा, ऋग्वेदे । ८ । २ । ३ ।
"अस्मयमद्यानी मैनस्य वीतिमश्वया ॥"
"वीति यज्ञ अश्वया मायादयित यज्ञ अश्वयं अभिगच्छ ।" इति तद्भाष्ये सायणः ।)

वीति, पुं, घोटकः । इति हेमचन्द्रः । (यथा रामायणे । ७ । १०० ।
"अथ पुण्ये वीतिमान्त्रेष्ठे वीतिहोत्रसमे द्युते ।
अश्वात्मा च महीपालो ब्रह्मवादिव प्रति
याम् ॥")

वीतिहोत्र, पुं (वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु + क्तिन् । वीतिः पुरोडाशादि भुङ्क्ते यस्यैवम्विधेः । "हव्यवाहानुमतिश्च ऋत् ।" यथा । ३ । १४० । इति वक्ष्यमाणे वीतये भक्षणाय होत्रं यस्य ।) अग्निः । इत्यमरः । सूर्यः । इति मेदिनी । त्रि, १८० । (यथा, रामायणे । ७ । १०० ।
"अथाग्नेर्वीतिमान्त्रेष्ठे वीतिहोत्रसमे द्युते ॥"
विश्वनाथपुत्रान्तरम् । यथा, भागवते । ९ । १७ । ६ ।
"अप्रतिरथे विष्णुमहासुरभ्यातीतहेहयरसौ ज्ञाततत्त्वम मायानिर्भावीतिहोत्रोऽभवत्तव इति धर्म प्रस्तावितामाम ।" इत्यर्थवृत्तिः । यथा महाभारते । ७ । ६८ । १० ।
"दशैवाश्रयात् वीतिहोत्राद् विमलानि सर्वाणि
पावनात् ॥"
हैहयवंशोद्भवराजविशेषः । यथा, हरिवंशे । ३३ । ५ ।
"तेषां कुले महाराज हैहयानां महात्मनाम् ।
वीतिहोत्राः सुजाताश्च भोजाश्चावन्तयस्तथा
स्मृताः ॥"
त्रि प्राप्तयज्ञः । यथा, ऋग्वेदे । १।१४८।१९ ।
"कर्त्ते युवा आदत्तवान् वीत-
वो भवति वीतिहोत्र प्रदेय ।"
"वीतिहोत्र प्राप्तयज्ञ । ० ० ० । वीतिहोत्र वीतयाग इव अस्मात् कर्माणि अत्र गृहीतानि लिङ् च वोदात्त । वीयं चोर्य युवाभ्याम् प्रतिपन्नवान् इति मनुमदनः । वीत प्राप्तो होत्रो यैस्त वहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ।" इति तद्भाष्ये सायणः । कामयज्ञः । यथा, ऋग्वेदे । ५ । २६ । ३ ।
"स्वं देवेभ्यो विश्वानि वस
मनानप्नवीतिहोत्र आवो ॥"
"वीतिहोत्रं कामयमानं हव्यमानं सखी भवि वर्ह्य ईडे च आयमदानमेव सहोत्र ।" इति तद्भाष्ये सायणः ।)

वीथि, स्त्री (विथ्यतेऽसौ । विथ+इगुपधात् किदितीन् । बाहुलकात् दीर्घः ।) वीथी । यथा,—
"प्रासादवीथीषु वीथ्यन्तरे च वीथिका ।"
इति शब्दरत्नावली ।
(यथा रामायणे । ४ । ४९ ।
"तं देवा मुनयः सिद्धाः दूरतः सूर्य ।
सुमेरुं विमुक्तपिढ़ा वीथावन्तरिक्षे ॥"

यथाच यथा, रामायणे । ६ । ७ ।
"विरे तत्तु त्रिलोक्या क्षमपैरव वीथय ।
धीर वर्मैव न भातु तथाऽरो नति दृष्टः ॥")

वीथिका, स्त्री, (वीथिरेव । स्वार्थे कन् ततः टाप् ।) वीथि । इति शब्दरत्नावली । (यथा, कथा सरित्सागरे । ७२ । ९ ।
"अथ दर्शितनिजाम्भी प्रावृट् चमत्कृतेव ।
विद्युताजुं वनपातां मेघानामवीथिकाः ॥")

वीथी स्त्री (वीथि+वा ङीष् ।) पङ्क्तिः । यथा कुम । (यथा, हरिवंशे । ८२ । १० ।
"तास्तुयुर्मो दृढवता नमस्तुभाकारयाव ।
वीथीं सात्वातमात्र वे नवातानो दिवौकसः ॥")
वाचालकं । वर्त्म । इति मेदिनी । थे, ११ ॥
(यथा महाभारते । ३ । ११ । १३ ।
"वीथी कुर्मेण महाबाहुर्वीरं मम बाहि
वीन ।
कृतविज महाप्रतिष्ठाना दर्शयिमपि ॥" ८१)
अथ वीथी ।
"वीथ्यामेको भवेदङ्कः कश्चिदेकोऽत्र कल्प्यते ।
आकाशभाषितैरुक्तैश्चित्रां प्रत्युक्तिमाश्रितः ।
सूचयेद्भूरि शृङ्गारं किञ्चिदन्यान् रसानपि ।
मुखनिर्वहणे सन्धी अर्थप्रकृतयोऽखिलाः ।
अस्मिन्नङ्गमनो भवतो वा सङ्गारसमुखमायाकाङ्क्षा वीथ्यङ्गानि च वुनमम् ॥ ० ॥
अत्रास्याः सन्ध्यङ्गानि विधानि प्रत्यासन ।
उद्घात्यकावलगिते प्रपञ्चत्रिगते छलम् ।
वाक्केल्यधिबले गण्डमवस्यन्दितनालिके ।
असत्प्रलापव्याहारमृदवानि च तानि तु त्रयः
त्रयोदशाङ्गाननिर्दिष्टानि प्रस्तावनाङ्गानि कोश
चापि वक्तव्याः पदिवै ॥ ० ॥
निर्दिष्टानामुद्घात्यकं प्रपञ्च प्रस्तुत यावन्तस्तान ।
यथा, विक्रमोर्वश्याम् । सहयोगाद्भिरुपर्वगया
दृश्यावगमम् । ० ।
विसर्गं स्यात् हैवावद्योतर्षं पुनिराश्वन ।
यथा । तत्रैव राजा ।
कर्मनिर्मितस्य यात्र हरा सन्ध्यारागः ।
राजा दृष्ट्वा वचस्यैः किन्नु सदा विरहिता भवत ।
नैवर्ते तदेव वनितावः राजा अथ चलितः ।
अथ प्रस्तुतवैनीनरत्वाक्रमेव वीथिनम ।
चानुदित अथ वैदेहीस्थिति अथित ॥ ० ॥
विवाभिः सर्वेश्वरः सदैवीत्वोक अश्ववार कृतम् ।
यथा वेण्यां भीमार्जुनौ ।
कृतो शस्त्रवहस्ताः अङ्कुमधृतकारौरैचिन
कौरवामात्
राजा दुःशासनद्वैश्ववहुलमुल्लिपुरालव
सिवत्र ।
कृष्णाकेशोत्तरीयव्यपनयनपटुः पाण्डवा यस्य
दासाः
कास्ते दुर्योधनोऽसौ कथयत न रुषा द्रष्टु
मभ्यागतौ स्वः ।
कर्ण आदृश्यं विलिष्ठ कर्णके दृश्य कथ
चित् ।

उन्मीलिते यद्द्वच वचनाद्वास्यरोधनम् ।●।
वाक्केलिर्हास्यसम्बन्धो द्वित्रिप्रत्युक्तितोभवेत् ।
द्वित्रोक्त्युपलक्षणं यथा,—
भिक्षो मांसनिषेवनं प्रकुरुषे किन्तेन मद्यं विना
मद्यञ्चापि तव प्रियं प्रियमहो वाराङ्गनाभिः सह ।
तासामर्थरुचिः क्कतस्तव धनं द्यूतेन चौर्य्येण वा
चौर्य्यद्यूतपरिग्रहोऽपि भवतो नष्टस्य कान्या गतिः ।
केचित् प्रक्रान्तवाक्यस्य साकाङ्क्षस्यैव निवृत्ति र्वाक्केलिरित्याहुः । अन्ये चानेकस्य प्रश्नस्य एकमुत्तरम् ।●।
अन्योन्यवाक्याधिक्योक्तिः स्पर्द्धयाधिबलं मतम् ।
यथा, मम प्रभावत्यां वज्रनाभः ।
अस्य वक्षः क्षणेनैव निर्मथ्य गदयानया ।
लीलयोन्मूलयिष्यामि भुवनद्वयमद्य च ॥
प्रद्युम्नः । अरे रे असुरापसद अलमहुना बहु प्रलापेन मम खलु ।
अद्य प्रचण्डभुजदण्डसमर्पितोरु
कोदण्डनिर्गलितकाण्डसमूहपातैः ।
आस्तां समस्तदितिजक्षततोक्षितेयं
पीतो घनेन पिशिताशनलोभनीया ।●।
गण्डः प्रस्तुतसम्बन्धि भिन्नार्थं सत्वरं वचः ।
यथा वेण्यां राजा ।
अध्यासितुं तव चिराज्जघनस्थलस्य
पर्य्याप्तमेव करभोरु ममोरुयुग्मम् ।
अनन्तरं प्रविश्य कञ्चुकी देव भग्नं भग्नमित्यादि । अत्र रथकेतनभङ्गार्थं वचनमूरुभङ्गार्थे सम्बन्धे सम्बद्धम् ।●।
व्याख्यानं स्वरसोक्तस्यान्यथावस्यन्दितं भवेत् ।
यथा छलितरामे सीता । जाद काल्लं क्खु उ अज्झा एव गन्तव्वं तहिं सो राआ विणएण पणमिदव्वो । लवः । अथ किमावाभ्यां राजो पजीविभ्यां भवितव्यम् । सीता । जादा सो तुह्माण पिदा । लवः । किमावयो रघुपतिः पिता । सीता । साशङ्कं मा अण्णधा सङ्कधं ण क्खु तुम्हाणं ण सअलाए ज्जेव पुहवीएत्ति ।●।
प्रहेलिकैव हास्येन युक्ता भवति नालिका ।
संवरणकार्य्युत्तरं प्रहेलिका । यथा रत्नावल्याम् । सुसङ्गता सहि जस्स करे तुमं आअदा सो एथ्येव चिट्ठदि धाअरिआ कस्स कदे अह आअदा सुसङ्गदे चित्तफलअस्स । अत्र त्वं राज्ञः कृते आगतेत्यर्थः संवृतः ।●।
असम्बद्धकथाप्रायोऽसत्प्रलापो यथोत्तरम् ।
अगृह्णतोऽपि मूर्खस्य पुरो यच्च हितं वचः ।
तत्राद्यं यथा मम प्रभावत्याम् । प्रद्युम्नः सह कारवल्लीमवलोक्य सानन्दं अहो कथमिहैव ।
अलिकुलमञ्जुलकेशी
परिमलबहुला रसावहा तन्वी ।
किसलयपेशलपाणिः
कोकिलकलभाषिणी प्रियतमा मे ।

एवमसम्बन्धोत्तरेऽपि । द्वितीय यथा । वेण्यां दुर्य्योधनं प्रति गान्धारीवाक्यम् ।
व्याहारो यत् परस्यार्थे हास्यलोभकरं वचः ।
यथा मालविकाग्निमित्रे । लास्यप्रयोगावसाने मालवी निर्गन्तुमिच्छति विदूषकः मा दाव उव देशसुद्धा गमिस्ससि । इत्युपक्रमेण दास । विदूषकं प्रति आर्य्ये उच्यतां यस्त्वया क्रमभेदो लक्षितः । विदूषकः पढमं बम्हणपूआ भोदि सा इमाए लङ्घिदा मालवी स्मयते इत्यादिना । नायकस्य विश्रब्धनायिकादर्शनप्रयुक्तेन हास लोभकारिणा वचसा व्याहारः ।●।
दोषा गुणा गुणा दोषा यत्र स्युर्मृदवं हि तत् ।
क्रमेण यथा —
प्रियजीवितता क्रौर्य्यं निःस्नेहत्वं कृतघ्नता ।
भूयस्त्वद्दर्शनादेव ममैते गुणतां गताः ॥
तस्यास्तद्रूपसौन्दर्य्यं भूषितं यौवनश्रिया ।
सुखैकायतनं जातं दुःखायैव ममाधुना ॥
एतानि चाङ्गानि नाटकान्तिषु सम्भवन्त्यपि वीथ्यामवश्यं विधेयानि स्पष्टतया नाटकादिषु विनिविष्टान्यपि उदाहृतानि । वीथी च नानारसानाञ्च मालारूपतया स्थितत्वाद् वीथीयम् । यथा मालविका ।" इति साहित्य दर्पणम् ।●।●। ऋक्षगमनपथः । यथा —
"नागवीथ्युत्तरा वीथी अजवीथ्याश्च दक्षिणा ।
उभे आषाढमूलस्तु अजवीथ्युदयाश्रयः ।
अभिजित् पूर्वतः स्वाती नागवीथ्युत्तराश्रया ।
अश्विनी कृत्तिका याम्या नागवीथ्युत्तराः स्मृताः ।
रोहिण्यार्द्रा मृगशिरो नागवीथिरिति स्मृता ।
पुष्याश्लेषापुनर्वस्वोर्वीथिरैरावती स्मृता ।
तिस्रस्तु वीथयो ह्येता उत्तरो मार्ग उच्यते ।
पूर्व्वा उत्तरफल्गुन्योर्मघा चैरावती भवेत् ।
पूर्व्वोत्तरे प्रोष्ठपदे गोवीथी रेवती स्मृता ।
श्रवणा च धनिष्ठा च वारुणञ्च जरद्गवम् ।
एताश्च वीथयस्तिस्रो मध्यमो मार्ग उच्यते ।
हस्ता चित्रा तथा स्वाती नागवीथिरिति स्मृता ।
विशाखामित्रपैत्राश्च नागवीथिरिहोच्यते ।
मूलपूर्वोत्तराषाढा वीथिर्वैश्वानरी तथा ।
स्मृतास्तिस्रस्तु वीथ्यस्ता मार्गे वै दक्षिणे बुधैः ।"
इति मात्स्ये १ १ अध्यायः ।●।
अपि च ।
"उत्तरं यदगस्त्यस्य अजवीथ्याश्च दक्षिणम् ।
पितृयानः स वै पन्था वैश्वानरपथाद्बहिः ।
तत्रासते महात्मान ऋषयो येऽग्निहोत्रिणः ।"
इति विष्णुपुराणे २ अंशे ८ अध्यायः ।●।
तत्र ज्योतिषोक्तो वीथीक्रमो यथोक्तः ।
"सर्व्वग्रहाणां वीथ्यस्तु स्याद्वाथि द्विजसत्तमाः ।
सार्द्धं वारद्वयं सर्व्वं यथैरावतमुत्तरम् ।
वैश्वानरं दक्षिणतो विद्धिमिद तथात ।"
तदेव मध्यमोत्तरदक्षिणमार्गभेदं प्रत्येकं वीथि त्रयेण त्रिधा भिद्यते । यथा हि निम्नमित्रि दक्षिणादिक्रमपैत्रोऽजवीथी नागवीथी ऐरावती चेत्युत्तरमार्गे वीथित्रयम् । आर्षभी गोवीथी जारद्गवी चेति वैष्णव मध्यमार्गे वीथित्रयम् । अजवीथी मृगवीथी वैश्वानरी चेति दक्षिण मार्गे वीथीत्रयम् । तदुक्तं तत्रैव ।
"अश्विनी कृत्तिका याम्या नागवीथीति शब्दिता ।
रोहिण्यार्द्रा मृगशिरो गजवीथ्यभिधीयते ।
पुष्याश्लेषे तथादित्या वीथी चैरावती स्मृता ।
एतास्तु वीथयस्तिस्र उत्तरो मार्ग उच्यते ।
तथा द्वे चापि फल्गुन्यौ मघा चैवार्षभी मता ।
हस्ता चित्रा तथा स्वाती गोवीथीति तु शब्दिता ।
ज्येष्ठा विशाखानुराधा वीथी जारद्गवी मता ।
एतास्तु वीथयस्तिस्रो मध्यमो मार्ग उच्यते ।
मूलाषाढोत्तराषाढा अजवीथीति शब्दिता ।
श्रवणश्च धनिष्ठा च मार्गी शतभिषक्तथा ।
वैश्वानरी भाद्रपदे रेवती चैव कीर्त्तिता ।
एतास्तु वीथयस्तिस्रो दक्षिणो मार्ग उच्यते ।"
याम्या भरणी । आग्नेया अदितिदैवताका पुनर्वसुः । मार्गी मृगवीथी । एवं स्थिते अगस्त्यादुत्तरमजवीथ्यास्तु दक्षिणम् । किन्तु अगस्त्यनिरूढ़वर्त्तिनो वैश्वानरपथाद्बहिर्वैश्वा नरवीथी विहाय मृगवीथीमाश्र पितृयान मित्यर्थः । इति तट्टीकायां श्रीधरस्वामी ।

वीथ्यङ्ग, क्लि, (वीथ्या अङ्गमिवाङ्गं यस्य ।) नाटकभेदः । इति हेमचन्द्रः । अस्य विवरणं वीथीशब्दे द्रष्टव्यम् ॥

वीध्र, क्ली, (विशेषेण इन्धते दीप्यते इति । वि+इन्ध+"स्फायितञ्चि ।" उणा० २।१३। इति रक् ।) नभः । (यथा अथर्व्ववेदे ।५।२।७।
"वीध्रे सूर्य्यमिव सर्पन्तं मा पिशाच तिर स्करः ।")
वायुः । अग्निः । इति संक्षिप्तसारोणादि वृत्तिः ॥

वीध्र, त्रि, (वि+इन्ध+रक् ।) विमलः । इत्यमरः ॥

वीनाह, पुं, (विशेषेण नह्यते इति । वि+नह+घञ् । उपसर्गस्य दीर्घः ।) कूपस्य मुखबन्धनम् । इत्यमरः । अस्य कूपस्य मुखबन्धनेन मुखं बध्यते तत्र वीनाहः शब्दोऽयं इति ख्यातः । विशेषेण नह्यते कूपमुखमनेन । वीनाहः । णह बन्धे घञ् नहोधादित्वात् नेम्या दीर्घं विनाय वीनाहः कूपमुखबन्धनम् इति स्वामी । इति भरतः ॥

वीपा, स्त्री, विद्युत् । इति शब्दरत्नावली ॥

वीप्सा, स्त्री, क्रियागुणद्रव्यैर्व्याप्तुमिच्छा । यथा —
"हरिर्हरिं भुक्तोपास्ति मूलं मूलमपि वृक्षः ।
भक्तो विश्वम्भरं प्राप्तो कौस्तुभं भक्तिन्त्रः ।"
अनुनीयास्ते यतिं हरिर्वे कार्त्तिकं । प्रदक्षिणं मूलं मूलं अपि दर्शनाद्यं चाख द्रवत । वीप्सायां प्रत्युदाहरणं द्विर्भावः । इति मुग्धबोधटीकायां दुर्गादासः ॥

वीर श क शौर्ये। इति कविकल्पद्रुमः। (अदन्त-चुरा० आत्म० अक० सेट्।) क अपि वीरयते। शौर्यमुद्यमः। इति दुर्गादासः।

वीरं, क्ली, (अज+"स्फायितञ्चिवञ्चीति।" उणा० २।१३। इत्यादिना रक्। अजे- र्वीभावः। वीर+अच् वा।) नडी। मद्। इति मेदिनी। रे, ५७। मरिचम्। पुष्कर- मूलम्। काञ्जिकम्। उशीरम्। आरुकम्। इति राजनिर्घण्टः। वीरतरौ मेदिन्यां पन् ओषधवाटादौ करोति वीरवाटोऽस्त्य आरका- रादौ इत्येतस्य लिखितः।

वीरः, पुं, (वीरयतीति। वीर विक्रान्तौ+पचा- द्यच्। यद्वा, विशेषेण ईरयति दूरीकरोति शत्रून्। वि+ईर+इगुपधात् कः। यद्वा, अजति क्षिपति शत्रून्। अज+स्फायितञ्चीत्या- दिना रक्। अजेर्वी।) शौर्यविशिष्टः। तत्- पर्यायः। शूरः २ विक्रान्तः ३। इत्यमरः।२।८। ७७। भटः। नटः ५। इति जटाधरः। (यथा, महाभारते। १। १९१। ४६। "कस्ताभ्यो इत्येव पुंदमावपि मूर्धिन। निर्ज्जिता वनता वीरासवप्राकीरनरौ महान्।" यथा च ऋग्वेदे। १। ११४। ८। "वीरान्मा नो रुद्र भामितो वधी हविष्मन्तः सदमित् त्वा हवामहे।" "वीरान् वीर्यवतः।" इति भाष्य। पुत्रः। यथा ऋग्वेदे। १। ५। १। "वीरं धाम पञ्चमाय।" "वीरे पुत्रेण समस्य सश्रमानेन सह तथा जुष।" इति तद्भाष्ये सायनः।७। अपि। पुरुषः। यथा, मार्कण्डेये। ११। ९१। "न चाहमन्मर्दितो वीरवीरौ तथा त्विहम्। अन्यादृक्षरविध्वस्तारातिभिः दिवैश्चिरैः।" यथा च वीरेण विष्णुरूपता। इत्यमरटीका- याम्।७। इन्द्रवैद्युतः। यथा, महाभारते। १। १६। १९। "इन्द्रगुप्त पुत्र इन्द्राणामग्नेन्धनरहत्या। विप्रा इन्धीरौव इन्धनैः महाद्रुतः।") जिनः। नटः। इति हेमचन्द्रः। विष्णुः। यथा, वीरोत्तमो वमनः। इति विष्णुसहस्रनाम। अङ्गुरात्रादस्त्रनामऽर्थतन्त्रेषु। तत्पर्यायः। कार्पासविशेषः। इत्यमरः। "वक्ष्यमाणैरपि प्रकारान्तरविभाग। मरीचलेखो दिव्यवीर्यैः सहाद्रुतम्।" प्रकार्यं पठन्ति इति प्रकारभेदेन अन्यानि आहुः। रागसेवुहेन पञ्चाव्यवीचार कारी इत्यो वीरः। वीरस्त्री अथ वीरः। वीर गत्त्व शौर्यं वन् अत्यन्तवे वन्तरी इति सर्व- ङ्कनचरं वक्ष्यनियम्। इति भरत।७। तान्त्रिकभावविशेषः। यथा,— "तन्त्रेषु त्रिविधो भावो दिव्यवीरपशुक्रमः। दिव्यवीरौ च वीरेण वर्णीयोऽशक्यतः।" इति नरहरिसंहितायां ११ पटलः।

अपि च। "भावस्तु त्रिविधो ज्ञेयो दिव्यवीरपशुक्रमात्। गुरवश्च त्रिधा ज्ञात तथैव मन्त्रदेवताः।" इति तत्रैव ६ पटलः।

अन्यच्च। "पशुभावं हि प्रथमे द्वितीये वीरभावकम्। तृतीये दिव्यभावञ्च इति भावत्रयं क्रमात्। आदौ षडब्दकेन पशुभावमथापि वा। मध्ये षडब्दकेन वीरभावमनुत्तमम्। पादान्ते षडब्दके तु दिव्यभावं शुभप्रदम्।" इति च तत्रैव ११ पटलः।

कान्तारं महारण्यं तत् गच्छन्तीति कान्तारगाः ते वृद्ध्या धनं गृहीत्वा अधिकलाभार्थं अति-गहनं प्राणधनविनाशशङ्कास्थानं प्रविशन्ति ते दशकं शतं दद्युः । ये च समुद्रगास्ते विंशकं शतं मासि मासीत्येव । एतदुक्तं भवति कान्तारगेभ्यो दशकं शतं सामुद्रेभ्यश्च विंशकं शतं उत्तमर्ण आददीत । मूलविनाशस्यापि शङ्कितत्वात् इति । * । इदानीं वाहितां वृद्धि-माह ।
"दद्युर्वा स्वकृतां वृद्धिं सर्वे सर्वासु जातिषु ।"
सर्वे ब्राह्मणादयोऽधमर्णा अबन्धके सबन्धके वा स्वकृतां स्वाभ्युपगतां वृद्धिं सर्वासु जातिषु दद्युः । कारितवापि वृद्धिर्भवति यथाह नारदः ।
"न वृद्धिः प्रीतिदत्तानां स्यादनाकारिता क्वचित् ।
अनाकारितमप्यूर्द्ध्वं वत्सरार्द्धाद्विवर्द्धते ॥" इति ।
यत्तु याचितक यच्चोक्तं देशान्तर गतस्य प्रति कात्यायनेनोक्तम् ।
"यो याचितकमादाय तमदत्त्वा दिशं व्रजेत् ।
ऊर्द्ध्वं संवत्सरात्तस्य तद्धनं वृद्धिमाप्नुयात् ॥"
इति ।
यच्च याचितकमादाय याचितोऽप्यदत्त्वा देशा-न्तरं याति तं प्रति तेनैवोक्तम् ।
"कृतोद्धारमदत्त्वा यो याचितस्तु दिशं व्रजेत् ।
ऊर्द्ध्वं मासत्रयात्तस्य तद्धनं वृद्धिमाप्नुयात् ॥"
इति ।
यः पुनः स्वदेशे स्थित एव याचितो याचितकं न ददाति तं याचनकालादारभ्य वृद्धिं दापयि-तव्यः । यथाह ।
"स्वदेशेऽपि स्थितो यस्तु न दद्याद्याचितः क्वचित् ।
तं ततोऽकारितां वृद्धिमनिच्छन्तं च दापयेत् ॥"
इति ।
अनाकारितवृद्धेरपवादो नारदेनोक्तः ।
"पण्यमूल्यं भृतिस्तुष्ट्या दण्डो यश्च प्रकल्पितः ।
वृथादानाक्षिकपणा वर्द्धन्ते नाविवक्षिताः ॥"
अविवक्षिता अनाकारिता इति । * । अधुना द्रव्यविशेषे वृद्धिविशेषमाह । सन्ततिस्तु पशु-स्त्रीणाम् । पशूनां स्त्रीणाञ्च सन्ततिरेव वृद्धिः । पशूनां स्त्रीणां पोषणासमर्थस्य तत्पुष्टिकामस्य प्रयोगः सम्भवति । [illegible] परिचर्यार्थिनः । अधुना प्रयुक्तस्य द्रव्यस्य वृद्धिग्रहणमन्तरेण (चिरकालावस्थितस्य कस्य द्रव्यस्य कियती परा वृद्धिरित्यपेक्षित आह । रसस्याष्टगुणा परा ।
"वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणा परा ॥"
रसस्य तैलघृतादेर्वृद्धिग्रहणमन्तरेण चिर-कालावस्थितस्य प्रयुक्तस्य वर्द्धमान-स्याष्टगुणा वृद्धिः परा नातःपरं वर्द्धते । तथा वस्त्रधान्यहिरण्यानां यथाक्रमं चतुर्गुणा त्रिगुणा द्विगुणा च वृद्धिः परा । वसिष्ठेन तु रसस्य त्रैगुण्यमुक्तम् । द्विगुणं हिरण्यं त्रिगुणं धान्यं धान्येनैव रसा व्याख्याताः पुष्पमूल-फलानि च । तुला धृतं मिततमष्टगुणमिति । मनुना तु धान्यस्य पुष्पमूलफलादीनाञ्च पञ्च-गुण्यमुक्तम् । "धान्ये शदे लवे वाह्ये नातिक्रामति पञ्चतामिति ।" शदः क्षेत्रफलं पुष्पमूल-फलादि । लवो मेषलोमचमरीकेशादि । वाह्यो बलीवर्दतुरगादि । धान्यशदलववाह्यविषया वृद्धिः पञ्चगुण्यं नातिक्रामतीति । तच्चाधमर्णयोग्य-तावशेन दुर्भिक्षादिकालवशेन च व्यवस्था द्रष्टव्या । एतच्च सकृत्प्रयोगे सकृदाहरणे च वेदितव्यम् । पुरुषान्तरसंक्रमणेन प्रयोगान्तर-करणे तस्मिन्नेव वा पुरुषे अन्येन प्रयोगा-न्तरकरणे रसादिकं द्वैगुण्याद्यतिक्रम्य पूर्व्व-वद्वर्द्धते । असकृत्प्रयोगेऽपि प्रतिदिनं प्रति-मासं प्रतिसंवत्सरं वा वृद्ध्याहरणेऽसमग्रदेयस्य द्वैगुण्याभावात् । पूर्व्वाहृतवृद्ध्या सह द्वैगुण्यम-तिक्रम्य वर्द्धत एव । यथाह मनुः । कुसीद-वृद्धिर्द्वैगुण्यं नात्येति सकृदाहृता । असकृदाहृते-त्यपि पाठोऽस्ति । उपचयार्थं प्रयुक्तं धनं कुसीदं तस्य वृद्धिः कुसीदवृद्धिर्द्वैगुण्यं नात्येति नातिक्रामति । यदि सकृदाहृता सकृत्प्रयुक्ता पुरुषान्तरसंक्रमणादिना प्रयोगान्तरकरणे द्वैगुण्यमत्येति असकृदाहृतेति पाठे शनैः शनैः प्रतिदिनं प्रतिमासं प्रतिसंवत्सरं वाधमर्णाद्वा हृता द्वैगुण्यं नात्येतीति व्याख्येयम् । तथा गौतमेनाप्युक्तम् । चिरस्थाने द्वैगुण्यं प्रयोग-स्येति प्रयोगस्यैकवचननिर्द्देशात् प्रयोगान्तर-करणे द्वैगुण्यातिक्रमोऽभिमतः । चिरस्थान इति निर्द्देशात् शनैः शनैर्वृद्धिग्रहणे द्वैगुण्याति-क्रमो दर्शितः । इति मिताक्षरा । कुसी-दोऽस्य । इव । इति हेमचन्द्रः । सम्पत् । इति शब्दचन्द्रिका । ओषधम् । धनम् । इति राजनिर्घण्टः । * ।

वृद्धिका, स्त्री, (वृद्धिरेव स्वार्थे कन् ।) ऋद्धिना-मौषधम् । इति शब्दमाला ।

वृद्धिजीविका, स्त्री, (वृद्ध्या जीविका ।) कुसीदेन जीविका । तत्पर्य्यायः । अर्थप्रयोगः २ कुसी-दम् ३ । इत्यमरः । कलान्तिका ४ । इति शब्दरत्नावली ।

वृद्धिद पुं, (वृद्धिं ददातीति । दा+क ।) जीवक-मूलकन्दः । इति राजनिर्घण्टः । वृद्धिदातरि, त्रि । (यथा [illegible] । ५६ । १० ।
"प्राकप्राचमा [illegible] सर्वेश वृद्धिदं वान्तु ।")

वृद्धिश्राद्ध क्ली, (वृद्धये यत् श्राद्धम् ।) वृद्धिनिमि-त्तकश्राद्धम् । तत्तु अभ्युदयनिमित्तं विवाहादौ स्व-सहस्रव कर्त्तव्यम् । तत्कर्मविशेषात् पूर्व्वं कर्त्तव्यं यथा । विशेषाख्यानं मत्स्यपुराणम् ।
"अन्नप्राशे च सीमन्ते पुत्रोत्पत्तिनिमित्तके ।
पुंसवने निषेके च नववेश्मप्रवेशने ।
देववृक्षजलादीनां प्रतिष्ठायां विशेषतः ।
तीर्थयात्रावृषोत्सर्गे वृद्धिश्राद्धं प्रकीर्त्तितम् ॥"
इत्यादि कूर्म्मपुराणम् ।
"तीर्थयात्राव्रतारम्भे तीर्थात् प्रत्यागमेऽपि च ।
वृद्धिश्राद्धं प्रकुर्व्वीत बहुधापि समन्वितम् ॥"
इति श्राद्धतत्त्वम् ।

आभ्युदयिकश्राद्धम् । नान्दीमुखश्राद्धम् ।
यथा,—
"वृद्धिश्राद्धं प्रवक्ष्यामि पूर्व्ववत् विधिक्रमम् ।
मातृपूर्व्वत्रयवर्गकादौ वृद्धिश्राद्धम् । पूर्व्वाभि-मुखेन दक्षिणोपवीतिना मधुघृतदधिपूर्व्व-दैवतीर्थेन यवसहितसलिलेन दक्षिणोपचारेण कर्त्तव्यम् । दक्षिणमाह मन्त्रो ओं अद्य कार्य्यामुकगोत्राः अमुकशर्म्मणाममुकमातृपि-तामहीप्रपितामही मातामहप्रमातामहवृद्ध-प्रमातामह्यः अमुकदेवशर्म्मी सपत्नीका नान्दीमुखाः श्राद्धे कर्त्तव्ये वसुसत्यसंज्ञका विश्वेदेवाः श्राद्धं पिण्डादीन प्रीताः मया कर्त्तव्यमिति देवमात्रानामकरणम् । ओं करिष्य-सीति तैरुक्ते इत्यनेन मातृपितामहीप्रपिता-मह्यः देवश्राद्धनामकरणम् । तत ओं अद्य अमुकगोत्राया मातृपितामह्याः अमुकीदेव्याः नान्दीमुख्याः श्राद्धे पिण्डादीन प्रयाण मया कर्त्तव्यमिति प्रपितामह्यादिनामकरणम् । करिष्यसीति तैरुक्ते इत्यनेन मातामहादि-नामकरणम् । देवभिक्षुमर्घ्यदेवश्राद्धमाह-करणाद्यावाहनम् । आसने ओं विश्वेदेवास आगत शृणुता म इमं हवं यद बर्हिर्निषीदत । ओं विश्वेदेवाः शृणुतेमं हवं मे ये अन्तरीक्षे य उपद्यवि ष्ठ ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन् बर्हिषि मादयध्वम् । ओं आगच्छन्तु इति विश्वेदेवावाहनं गन्धादिदानं अर्च्च-नादावाहनम् । तत प्रपितामह्योङ्क्ली नामग्रहणम् । आसनम् आवाहन गन्धादि-दानञ्च । अग्निकरणाद्यावाहनम् । इत्थं पितामह्या मातुः । तत प्रपितामह्यादीनाम आवाहनाद्यन्नाहनं गन्धादिदानम् । एवं वृद्धप्रपितामहादीनां अग्निमाणनादिकरणम् । ओं वसुसत्यसंज्ञकेभ्यो विश्वेभ्यो देवेभ्य इदमन्नं सघृतं सपानीयं स्वाहा प्रति-पिण्डनिर्वपणं मम । इति आमन्त्रणम् । ओं अमुकगोत्रे मातृपितामहि अमुकि देवि नान्दीमुखि एतत्ते अन्नं स्वधा नम । एवं मातामहप्रमातामहादिभ्य ।" इति गारुडे १९९ अध्यायः । अन्यच्च ।
"इष्टौर्त्ताभ्युदयिकं वृद्धिश्राद्धं प्रकुर्व्वते ।
उद्वाहादिसंस्कारे यज्ञोद्वाहादिमङ्गले ।
मातरः प्रथमं पूज्याः पितरस्तदनन्तरम् ।
ततो मातामहा राजन् विश्वेदेवास्तथैव च ।
प्रदक्षिणोपचारेण दध्यक्षतफलोदकैः ।
प्राङ्मुखो निर्वपेत् पिण्डान् दूर्व्वया बदरैर्युतान् ।
सम्पन्नमित्यभ्युदये दद्यादर्घ्यं द्वयोर्द्वयो ।

शुभ्रा हि भावतः पूज्या यज्ञकार्य्येश्वरादिका ।
तिलार्थेषु यवैः कार्य्या नान्दीश्रद्धादिपूर्व्वकम् ।
मन्त्राणि च सर्व्वाणि वाचयेत् द्विजपुङ्गवान् ।
एवं शूद्रोऽपि सामान्य वृद्धिश्राद्धञ्च सर्व्वदा ।
नमस्कारेण मन्त्रेण कुर्य्यादामान्नवत् बुधः ।
दानप्रधानः शूद्रः स्यादित्याह भगवान् प्रभुः ।
दानेन सर्व्वकामाप्तिरस्य सञ्जायते यतः ।”
इति मात्स्ये साधारणाभ्युदयकीर्त्तनो नाम १७ अध्यायः । विस्तारस्तु श्राद्धतत्त्वे श्राद्धविवेके च द्रष्टव्यः ।

वृद्धोक्ष, पुं (वृद्धश्चासौ उक्षा चेति । “अचतुरेत्यादि ।” ५ । ४ । ७७ । इत्यादिना अच् प्रत्ययः ।) वृद्धवृषः । तत्पर्य्यायः । जरद्गवः २ । इत्यमरः । (यथा, कुमारसम्भवे । ५ । ७० ।
“विलोक्य वृद्धोक्षमधिष्ठितं त्वया
महाजनः स्मेरमुखो भविष्यति ॥”)

वृद्धाजीव, त्रि, (वृद्धान् आजीवतीति । आ + जीव + अच् ।) वृद्ध्युपजीवी । तत्पर्य्यायः । वार्द्धुषिः २ वार्द्धुषिकः ३ कुसीदः ४ कुसीदिकः ५ । इति शब्दरत्नावली । वार्द्धुषः ६ । इति जटाधरः ।

वृध उ ङ वृद्धौ । इति कविकल्पद्रुमः । (भ्वादिं आत्म अक सेट् । क्त्वावेट् ।) उ, वर्द्धित्वा वृद्ध्वा । ङ, वर्द्धते जनः । न वर्त्स्यति विवर्द्धिष्यति । द्य, अवृधत् । इति दुर्गादासः ।

वृध, क दीप्तौ । इति कविकल्पद्रुमः । (चुरा पर -अक सेट् ।) क, वर्द्धयति । इति दुर्गादासः ।

वृधसान, पुं (वृध + “ऋञ्जिवृधीति ।” उणा २ । ८७ । इत्यनेन आनच् । स च कित् ।) मनुष्यः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (वर्द्धमाने, त्रि । यथा ऋग्वेदे । २ । २ । ५ ।
“हरिशिप्रो वृधसानासु जर्भुरत् ।”
“वृधसानासु प्रवर्द्धमानासु ।” इति तद्भाष्ये सायनः ॥ यथा च तत्रैव । ४ । २ । ६ ।
“अद्रिय्याद्वृधसानो
यस्मै कृणोत् प्रतपनं शुभं गोः ॥”
“वृधसानः घृताद्याहुतिभिर्वर्द्धमानः ।” इति तद्भाष्ये सायनः ॥)

वृधसानु, पुं, (वृध + बाहुलकात् असानुच् । स च कित् ।) पुरुषः । पत्रम् । कर्म्म । इत्युणादिकोषः ।

वृध्न, त्रि (वृध + “बहुलमन्यत्रापि ।” इति अच् ।) मूलम् ।
वृद्धाद्यो बन्धनमेव विश्लथमिदम् ।

वृन्त, क्ली पत्रपुष्पफलादीनां बन्धनं यत् । बोटा इति भाषा । तत्पर्य्यायः । प्रसवबन्धनम् २ । इत्यमरः । (यथा रघुवंशे । ५ । ६९ ।
“वृन्तश्लथं हरति पुष्पमनोकहानाम् ।”)
घटीधारा । कुचाग्रम् । इति मेदिनी ।

वृन्ताक, पुं, वार्त्ताकी । इति शब्दरत्नावली ।

वृन्ताकी, स्त्री, वार्त्ताकी । इति राजनिर्घण्टः ।

वृन्तिता, स्त्री, कटुका । इति शब्दचन्द्रिका ।

वृन्द, क्ली, (वृन् + “वन्द्रान्यवचेति ।” उणा ४ । ९८ । इति दन् गुणाभावश्च निपात्यते ।) समूहः । इत्यमरः । (यथा, भागवते । ३ । २८ । ३० ।
“भ्रत्या स्वया कुटिलकुन्तलवृन्दजुष्टम् ।”)

वृन्द, पुं दशार्व्वुदः । शतकोटिरिति यावत् । इति ज्योतिषम् । अस्य नामान्तरं महार्व्वुदः ।

वृन्दा, स्त्री, तुलसी । इति शब्दरत्नावली । अस्य स्वरूपम् । अस्या विवरणं तुलसीशब्दे द्रष्टव्यम् । केदारराजकन्या । राधायोडशनामान्तर्गत नामविशेष । एतद्विवरणं वृन्दावनशब्दे द्रष्टव्यम् ।

वृन्दार, त्रि मनोज्ञम् । इति शब्दमाला ।

वृन्दारक पुं (वृन्दमस्त्यस्येति । वृन्द + “शृङ्ग-वृन्दाभ्यामारकन् वक्तव्यः ।” ५ । २ । १२२ । इत्यस्य वार्त्तिकोक्त्या आरकन् ।) देवता । इत्यमरः । (यथा भागवते । ६ । १ । ३० ।
“अपि वृन्दारका यूयं न जानीथ शरीरिणाम् ।”)
यूथपाता । यथा —
“वृन्दारक सुरे श्रेष्ठे मनोज्ञे यूथपादरि ।”
इति भरतधृतव्याडिः ।

वृन्दारक त्रि (वृन्दार + स्वार्थे कन् ।) मनोज्ञः । (यथा महाभारते । ११ । १८ । ५ ।
“युवा वृन्दारक शूरो विकच पुरुषर्षभ ।”)
श्रेष्ठः । इति मेदिनी । तन्मते पर्गौयादिः । वृन्दारकौ रूपिमुख्यौ । इत्यमरः ।

वृन्दावन क्ली, वृन्दाया वनमिदम् । तन्नामकारणं यथा,—

श्रीनारायण उवाच ।

“पुरा केदारनृपतिः सप्तद्वीपपतिः स्वयम् ।
आसीत् सत्ययुगे ब्रह्मन् सत्यधर्म्मरतः सदा ।
स रेमे सह नारीभिः पुत्रपौत्रगणैः सह ।
पुत्रानिव प्रजाः सर्व्वाः पालयामास धार्म्मिकः ।
शतां यज्ञकृत राजा रेमे निष्कण्टकोऽपि सन् ।
शतां नानाविधं पुण्यं चकाराहो न च स्वयम् ।
नित्यं नैमित्तिकं सर्व्वं श्रीकृष्णप्रीतिपूर्व्वकम् ।
केदारतुल्यो राजेन्द्रो न भूतो भविता पुनः ।
पुत्रेषु राज्यं संन्यस्य प्रिया त्रैलोक्यमोहिनी ।
जैगीषव्योपदेशेन जगाम तपसे वनम् ।
हरेराराधकोभक्तो ध्यायते सततं हरिम् ।
प्रस्थाय सुदर्शनं चक्रमपि यस्यान्तिके सदा ।
चिरं तप्त्वा नृपेन्द्रो गोलोकञ्च जगाम सः ।
केदारनामकं तीर्थं तपसोऽस्य च बभूव ह ।
अद्यापि तत्र प्राणी यस्तीर्थं मुक्तो भवेत् ध्रुवम् ।
तत्कन्यापि तस्य कन्या नाम्ना वृन्दा तपस्विनी ।
न वव्रे या वरं कञ्चित् योगशास्त्रविशारदा ।
दत्त दुर्व्वाससा तस्यै हरेर्मन्त्रं सुदुर्लभम् ।
सा विरक्ता गृहं त्यक्त्वा जगाम तपसे वनम् ।
षष्टिवर्षसहस्राणि तपस्तेपे सुनिर्जने ।
आविर्बभूव श्रीकृष्णस्तद्बरो भक्तवत्सलः ।
प्रसन्नवदनः श्रीमान् वरं वृणीष्व वाच सः ।
दृष्ट्वा सा राधिकाकान्तं शान्तं सुन्दरविग्रहम् ।
मूर्च्छां सम्प्राप सा सद्यः कामबाणप्रपीडिता ।
सा च वव्रे वरं वक्त्रे पतिस्त्वं मे भवेति च ।
ओमित्युक्त्वा च रहसि चिरं रेमे तया सह ।
सा जगाम च गोलोकं सार्द्धं तेन च कौतुकात् ।
राधासमा सा सौभाग्यात् गोपीश्रेष्ठा बभूव सा ।
वृन्दा यत्र तपस्तेपे तत्तु वृन्दावनं स्मृतम् ।
वृन्दा यत्र कृता क्रीडा तेन वा मुनिपुङ्गव ॥ ० ॥
अथान्यदितिहासञ्च शृणुष्व वत्स पुण्यदम् ।
येन वृन्दावनं नाम निबोध कथयामि ते ।
कुशध्वजस्य कन्ये द्वे धर्म्मशास्त्रविशारदे ।
तुलसी वेदवती च विरक्ते भवकर्म्मणि ।
तपस्तप्त्वा वेदवती प्राप नारायणं परम् ।
सीता जनककन्या सा सर्व्वत्र परिकीर्त्तिता ।
तुलसी च तपस्तप्त्वा कान्त्वा ब्रह्मा हरिं पतिम् ।
दैवाद्दुर्व्वाससः शापात् प्राप्य शङ्खचूडं पतिम् ।
पश्चात् संप्राप कमलाकान्तं कान्तं मनोहरम् ।
तद्वाक्य तपस्यास्यां उदितञ्च तपोधन ।
तेन वृन्दावनं नाम प्रवदन्ति मनीषिणः ॥ ० ॥
अथवा ते प्रवक्ष्यामि परं हेत्वन्तरं शृणु ।
येन वृन्दावनं नाम पुण्यक्षेत्रञ्च भारते ।
राधाषोडशनाम्नाञ्च वृन्दा नाम श्रुतौ श्रुतम् ।
तस्याः क्रीडावनं रम्यं तेन वृन्दावनं स्मृतम् ।
गोलोके प्रीतये तस्याः कृष्णेन निर्म्मितं पुरा ।
क्रीडार्थं भुवि तन्नाम्ना वनं वृन्दावनं स्मृतम् ।”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे वृन्दावनप्रस्तावे १७ अध्यायः ॥ ० ॥
अथ वृन्दावनवर्णनम् ।

ईश्वर उवाच ।

“गुह्याद्गुह्यतरं रम्यं परमानन्दकारकम् ।
अद्भुतं रहस्याद्रहस्यं परमं परम् ।
दुर्लभानाञ्च परमं दुर्लभं मोहनं परम् ।
सर्व्वशक्तिमयं देवि सर्व्वस्थानेषु गोपितम् ।
सान्नतां स्थानमूहश्च नित्योत्सवमनभम् ।
नित्यं वृन्दावनं नाम ब्रह्माण्डोपरि संस्थितम् ।
पूर्णब्रह्मसुखैश्वर्य्यं नित्यमानन्दमव्ययम् ।
वैकुण्ठादि तदंशांशं स्वयं वृन्दावनं भुवि ।
गोलोकैश्वर्य्यं यत्किञ्चित् गोकुले तत्प्रतिष्ठितम् ।
वैकुण्ठादिवैभवं यत् द्वारकायां प्रकाशयेत् ।
यद्ब्रह्मपरमैश्वर्य्यं नित्यं वृन्दावनाश्रयम् ।
तस्मात् वैलोक्यमध्ये तु पृथ्वी धन्येति विश्रुता ।
यत् स्थानमाथुरं नाम विष्णोरेकान्तवल्लभम् ।
स्वस्थानमधिकं नामधेयं माथुरमण्डलम् ।
निगूढं परमं स्थानं पूर्व्वमन्तर्गतं स्थलम् ।
सहस्रपत्रकमलाकारं माथुरमण्डलम् ।
विष्णुचक्रपरिभ्रामधाम वैष्णवमद्भुतम् ।
कर्णिकापत्रविस्तारं रहस्यक्रमसंस्थितम् ।
प्रधानं द्वादशारण्यं माहात्म्यं कथितं क्रमात् ।
भद्रश्रीलोहभाण्डीरमहातालखदीरकाः ।
बहुलं कुमुदं काम्यं मधु वृन्दावनं तथा ।
द्वादशैता वने संख्याः कालिन्द्याः सप्त पश्चिमे ।

पूर्वे पञ्चवनं प्रोक्तं तत्रास्ति गुह्यमुत्तमम् ।
महावनं गोकुलाख्यं रम्यं मधुवनं तथा ।
पूर्वे तु पञ्च महात्याख्यानादौ अथ पश्चिमे ।
काम्यकोपवनं प्रोक्तं कृष्णक्रीडारसस्थलम् ।
कन्दमखण्डिकं नन्दवनं नन्दीश्वरं तथा ।
नन्दनानन्दखण्डञ्च पलाशाशोककेतकम् ।
सुगन्धिमादनं कैलासममृतभोजनस्थलम् ।
सुखप्रसाधनं वत्सहरणं शेषशायनम् ।
श्यामपूर्वं दधिग्रामं चक्रभानुपुरं तथा ।
सङ्केतं विह्वलञ्चैव बालक्रीडञ्च धर्षणम् ।
कैसुदम स्तरो वीरसगृहकञ्चापि नन्दनम् ।
इत्यमेव वने कश्याखिद्यचोपवनं स्मृतम् ।
पूर्वोक्तं द्वादशारण्यं प्रधानं वनमुत्तमम् ।
तन्मोपरि चतुष्पत्रं वनञ्च सतुन्नाद्भुतम् ।
नानाविहारसङ्क्रीडानानालीलामयस्थलम् ।
दलविस्तारविस्तारवसन्यक्षमकीर्त्तितम् ।
षोडशमत्तकमलं गोकुलाख्यं महत् पदम् ।
कर्णिका तस्य हृद्धाम गोविन्दस्थानमुत्तमम् ।
तस्योपरि स्वर्णपीठे मणिमण्डपमण्डितम् ।
तत्र तत्र क्रमाद्दिक्षु विदिक्षु दलमीरितम् ।
यद्दलं दक्षिणे प्रोक्तं परं गुह्यतमोत्तमम् ।
तस्मिन् दले महापीठं निगमागमदुर्गमम् ।
योगीन्द्रैरपि दुष्प्रापं सर्वात्मा यत्र गोकुलम् ।
द्वितीयं दलमारेय तस्य च नितास्थल ।
निकुञ्जकुटीरे कुटीरौ तद्दले स्थितौ ।
पूर्व्वदलं तृतीयं यत् प्रधानं स्थानमुच्यते ।
तत्राप्नियमैर्लीला यद्यातस्तयुत भवेत् ।
चतुष्पदन्तमैद्याख्यं सिद्धपीठेप्सितप्रदम् ।
कामयन् कन्यका गोपी तत्र कात्यायनी यजेत् ।
वस्त्रालङ्कारहरणं तद्दले महदद्भुतम् ।
उत्तरे पञ्चमं प्रोक्तं दलं सर्व्वदलोत्तमम् ।
द्वादशादित्यमत्रैव दलञ्च कर्णिकासमम् ।
वायव्यां दलं षष्ठं तत्र कालीह्रदं स्मृतम् ।
दलोत्तमोत्तमञ्चैव प्रधानस्थानमुच्यते ।
सर्व्वोत्तमदलं श्रेष्ठं पश्चिमे सप्तमं दलम् ।
यज्ञपत्नीगणानाञ्च तदीप्सितवरप्रदम् ।
अघासुरस्य निर्वाणं यत्र ब्रह्मविमोहनम् ।
ब्रह्ममोहनमत्रैव दलं व्योमासुरान्तकम् ।
नैर्ऋत्यान्तु दलं प्रोक्तमष्टमं व्योमघातकम् ।
शङ्खचूडवधस्थानं नानाक्रीडारसस्थलम् ।
अष्टमदलस्य प्रोक्तं वृन्दारण्यान्तरस्थितम् ।
श्रीमद्वृन्दावनं धाम सदा मायाप्रदक्षिणम् ।
प्रियनिकुञ्जमध्यस्था यत्र गोपीश्वराभिधः ।
तद्बाह्ये षोडशदलं श्रिया पूर्णं तदीरितम् ।
तन्मध्ये दिक्षु यत् प्रोक्तं भाद्रपदाद्व्ययाकमम् ।
महत् पदं मयोक्तं प्रधानं षोडशं दलम् ।
प्रथमेऽष्टदलं श्रेष्ठं माहात्म्यं कर्णिकासमम् ।
तस्मिन् मधुवनं प्रोक्तं यत्र प्रादुरभूत् स्वयम् ।
चतुर्भुजो महाविष्णुः सर्व्वकारणकारणम् ।
तत्राधिष्ठितदेवं हरिमीशं सनातनम् ।
दलं द्वितीयमाख्यातं खदिरक्रीडारसस्थलम् ।
खादिरारण्यमत्रैव दलञ्च महदद्भुतम् ।
सर्व्वश्रेष्ठदलं प्रोक्तं माहात्म्यं कर्णिकासमम् ।
तत्र गोवर्द्धने रम्ये नित्यानन्दरसाश्रये ।
कर्णिकायां महालीला तल्लीला रत्नाकरे ।
यत्र हस्तौ निजच्छन्दाद्राजच्छत्रं प्रतिष्ठितम् ।
कृष्णो गोविन्दतां प्राप किमन्यैर्बहुभाषितैः ।
दलं तृतीयमाख्यातं सर्व्वश्रेष्ठोत्तमोत्तमम् ।
चतुर्थन्तमाख्यातं महाद्भुतरसस्थलम् ।
दक्षिणस्य पश्चि भाषाश्रिता गोवर्द्धन स्वयम् ।
कादम्बखण्डी तत्रैव पूर्णानन्दरसाश्रयः ।
षिष्ठं भवप्रिय रम्यं दलञ्च महदद्भुतम् ।
नन्दीश्वरश्च रम्यं तत्र नन्दालयः स्मृतः ।
कर्णिकादलमाहात्म्यं पञ्चमं दलमुच्यते ।
अधिष्ठात्रा च गोपालो धेनुपालनतत्परः ।
दलं षष्ठं समाख्यातं वनं नन्दवनं स्मृतम् ।
सप्तमं बकुलारण्यं दलं रम्यं प्रकीर्त्तितम् ।
दलाष्टमं तालवनं तत्र धेनुवधः स्मृतः ।
नवमं कुमुदारण्यं दलं रम्यं प्रकीर्त्तितम् ।
काम्यारण्यं दलं श्रेष्ठं दशमं सर्व्वकारणम् ।
ब्रह्मप्रसादनं तत्र विष्णुश्चन्द्र प्रदर्शितम् ।
कृष्णक्रीडारसस्थानं प्रधानं दलमुच्यते ।
दलमेकादशं प्रोक्तं भक्तानुग्रहकारकम् ।
निर्व्वाणं सेतुबन्धस्य नानारसमयस्थलम् ।
भाण्डीरं द्वादशदलं वनं रम्यं मनोहरम् ।
कृष्णक्रीडारसञ्च श्रीदामादिभिरावृतः ।
त्रयोदशदलं श्रेष्ठं तत्र भद्रवनं स्मृतम् ।
चतुर्द्दशदलं प्रोक्तं सर्व्वसिद्धिप्रदं स्थलम् ।
श्रीवनं तत्र रुचिरं सर्व्वैश्वर्य्यस्य कारणम् ।
कृष्णलीलामयदलं श्रीकीर्त्तिकान्तिवर्द्धनम् ।
पञ्चदशदलं श्रेष्ठं तत्र लोहवनं स्मृतम् ।
कथितं षोडशदलं माहात्म्यं कर्णिकासमम् ।
महावनं तत्र गीतं तत्रास्ति गुह्यमुत्तमम् ।
बालक्रीडारसस्तत्र वत्सपालैः समावृतः ।
पूतनान्तिमघञ्चाथ यमलार्ज्जुनभञ्जनम् ।
अधिष्ठाता तत्र बालगोपालः पञ्चमाब्दिकः ।
नाम्ना दामोदरः प्रोक्तः प्रेमानन्दरसार्णवः ।
दलं प्रसिद्धमाख्यातं सर्व्वश्रेष्ठदलोत्तमम् ।
कृष्णक्रीडा च किङ्कर्ता विहारस्तमथोच्यते ।
सिद्धप्रधानं किन्नरं दलञ्च महदद्भुतम् ॥ ७ ॥

पार्व्वत्युवाच ।

वृन्दावनस्य माहात्म्यं रहस्यं परमाद्भुतम् ।
तदहं श्रोतुमिच्छामि कथयस्व महाप्रभो ॥

ईश्वर उवाच ।

कथितं ते प्रियतमे गुह्याद्गुह्यतमोत्तमम् ।
रहस्यानां रहस्यं यद्दुर्ल्लभानाञ्च दुर्ल्लभम् ।
त्रैलोक्यगोपितं देवि ! देवेश्वरसुपूजितम् ।
ब्रह्मादिवाञ्छितं स्थानं सुरसिद्धादिसेवितम् ।
योगीन्द्रादिसुदुःखेन ... शालयनुग्रहम् ।
अप्सरोभिश्च गन्धर्व्वैर्नृत्यगीतनिरन्तरम् ।
श्रीमद्वृन्दावनं रम्यं पूर्णानन्दरसाश्रयम् ।
भूमिश्चिन्तामणिस्तोयममृतं रसपूरितम् ।
वृक्षाः सुरद्रुमास्तत्र सुरभिवृन्दसेविता ।
स्त्री लक्ष्मी पुरुषो विष्णुर्दशांशसम्भवः ।
तत्र कैशोरवयसं नित्यमानन्दविग्रहम् ।
गतिर्नाट्यं कथा गानं स्मितवक्त्रं निरन्तरम् ।
शुद्धसत्त्वैः प्रेमपूर्णैर्वैष्णवैस्तद्धनाश्रयम् ।
पूर्णब्रह्मसुखे मग्नं स्फुरत्तन्मूर्त्तितन्मयम् ।
मत्तकोटिभृङ्गाद्यैः कूजत्कलमनोहरम् ।
कपोतशुकसङ्गीतमुन्मत्तालिसहस्रकम् ।
भुजङ्गशत्रुनृत्याढ्यं सदामोदविभ्रमम् ।
नानावर्णैश्च कुसुमैस्तद्रेणुपरिपूरितम् ।
सुखिरङ्गैरमासाद्यमुमनोहरमनोज्ञत्तनन्मयम् ।
मन्दमारुतसंसिक्तसलिलस्वस्तानुसेवितम् ।
पूर्णेन्दुनित्याभ्युदयं सूर्य्यमन्दांशुसेवितम् ।
अदुःखसुखविच्छेदं जरामरणवर्ज्जितम् ।
अक्रोधगतमात्सर्य्यमभिन्नमनहङ्कृतम् ।
पूर्णानन्दामृतरसं पूर्णप्रेमसुखार्णवम् ।
गुणातीतं परं धाम पूर्णप्रेमस्वरूपकम् ।
यत्र वृक्षादिपुलकैः प्रेमानन्दाश्रुवर्षितम् ।
किं पुनश्चेतनायुक्तैर्विष्णुभक्तैः किमुच्यते ।
गोविन्दाङ्घ्रिरजःस्पर्शान्नित्यं वृन्दावनं भुवि ।
सहस्रदलपद्मस्य वृन्दारण्यं वराटकम् ।
यस्य स्पर्शनमात्रेण पृथ्वी धन्या जगत्त्रये ।
गुह्याद्गुह्यतमं रम्यं मध्यं वृन्दावनस्थितम् ।
अक्षरं नित्यमानन्दं गोविन्दस्थानमव्ययम् ।
गोविन्ददेहतोऽभिन्नं पूर्णब्रह्म सुखाश्रयम् ।
मुक्तिस्तत्र यतः स्पर्शात्तन्माहात्म्यं किमुच्यते ।
तस्मात् सर्व्वात्मना देवि ! हृदिस्थं कुरु तद्वनम् ।
वृन्दावनविहारेषु कृष्णः कैशोरविग्रहः ।
अप्सराण्येषु स्थानेषु बाल्यपौगण्डयौवनम् ।
कालिन्दीमकरन्दोऽस्य कर्णिकायाः प्रदक्षिणम् ।
नानाविर्मोक्षगम्भीरं जलवीरमनोहरम् ।
आनन्दामृततन्निजमकरन्दघनाश्रयम् ।
पद्मोत्पलादिकुसुमैर्नानावर्णैः समुज्ज्वलम् ।
चक्रवाकादिविहगैर्मञ्जुनानाकलस्वनैः ।
शोभमानं जलं रम्यं तरङ्गातिमनोहरम् ।
तस्योभयतटी रम्या शुद्धकाञ्चननिर्म्मिता ।
गङ्गाकोटीगुणैः प्रोक्तो यत्र स्पर्शवराटकः ।
कर्णिकायां कोटिगुणो यत्र क्रीडारतो हरिः ।
कालिन्दीकर्णिकाकृष्णमभिन्नमेकविग्रहम् ।”

इति पाद्मे पातालखण्डे ९ अध्यायः ।

(इदमेव भगवतः पीठस्थानानामुत्तमम् ।
यथा देवीभागवते । ७ । ३ । ३८ ।
“रुक्मिणी द्वारवत्यान्तु राधा वृन्दावने वने ।”)

वृन्दावनेश्वरः पुं, (वृन्दावनस्य ईश्वरः ।) श्रीकृष्णः ।
यथा,—
“यमस्तैन्द्रवर्षपिमेव धैर्यं ब्रह्मादिभिः सुरैः ।
गुणत्रयमतीतं तं वन्दे वृन्दावनेश्वरम् ।”
अपि च ।
“वृन्दे प्रकृतिविषाद्यौ राधावृन्दावनेश्वरी ।
प्रकृतिर्विलसति सर्व्वे विना वृन्दावनेश्वरम् ।”
इति पाद्मे पातालखण्डे ८ अध्यायः । ७ ।
अन्यच्च ।
“अहं नित्यं स्वयं श्यामः सच्चिदानन्दविग्रहः ।
मम गुणानां पोषी तु मम वन्द्यः सर्वदा हि ।

नित्यधामा गुणातीतः साक्षाद्वृन्दावनेश्वरः ।
असौ प्रकटलीलायां वासुदेवोऽभवत् प्रभुः ॥
गोपीनां कामपूर्णाय नित्यानां रमणाय च ।
गोपालानां विनोदाय स्वयं नन्दसुतोऽभवत् ॥"
इति पाद्मोत्तरखण्डे ६० अध्यायः ॥

वृन्दावनेश्वरी, स्त्री, (वृन्दावनस्येश्वरी ।) राधा । यथा,—
"राघवत्वेऽभवत् सीता रुक्मिणी कृष्णजन्मनि ।
आत्मरूपास्तु विज्ञेया प्राकृतेष्वेव पार्व्वति ! ॥
वृषभानुसुता या तु नित्यानन्दस्वरूपिणी ।
गान्धर्व्विकाख्यलीलायां श्रीः श्यामा कृष्णवल्लभा ।
वृन्दावनेश्वरी राधा साक्षात् कृष्णात्मिका परा ॥"
इति पाद्मोत्तरखण्डे ६० अध्यायः ॥

वृन्दिष्ठः, त्रि, (अयमेषामतिशयेन वृन्दारकः श्रेष्ठः । वृन्दारक + इष्ठन् । "प्रियस्थिरेति ।" ६।४।१५७ । वृन्दादेशः ।) अयमनयोरेषां वा अतिशयेन वृन्दारको देवो मुख्यो वा । इति मुग्धबोधटीकायां दुर्गादासः ॥

वृन्दीयान्, [स्] त्रि, (अयमनयोरतिशयेन वृन्दारकः । वृन्दारक + ईयसुन् । प्रियस्थिरेति वृन्दादेशः ।) वृन्दिष्ठः । अयमनयोरेषां वा अतिशयेन वृन्दारकः इत्यर्थे ईयसुप्रत्ययेन निष्पन्नम् । इति मुग्धबोधव्याकरणम् ॥

वृश, इ र व वृत्याम् । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् ।) इर्, अवृशत् अवर्शीत् । अवृशत् पुष्पाण्यलिमिव इत्यर्थः । व, वृश्यति वरं कन्या । इति दुर्गादासः ॥

वृशः, पुं, (वृ + "वलिमदाभ्युषस्तृमदीति ।" उणा० ४ । १४ । इति शक ।) उन्दुरः । इति शब्दरत्नावली ॥ वासकः । इत्यमरटीकायां भरतः ॥

वृशा, स्त्री, ओषधीविशेषः । इत्युणादिकोषः ॥

वृश्चिकः, पुं, (व्रश्च छेदने + "वृश्चिकृष्योः किकन् ।" उणा० २ । ४० । इति किकन् ।) शूककीटः । इत्यमरः ॥ शुयापोका इति भाषा ॥ तत्पर्य्यायः । शूककीटकः २ । इति शब्दरत्नावली ॥ कीटविशेषः । विछा इति भाषा । तत्पर्य्यायः । अलिः २ द्रोणः ३ द्रुणः ४ । इति राजनिर्घण्टः ॥ द्रुणः ५ । इति शब्दरत्नावली ॥ पृदाकुः ६ अदकः ७ अली ८ । इति जटाधरः ॥ ॥ वृश्चिकविषस्य लक्षणमाह ।
"दहत्यग्निरिवादौ च भिनत्तीवोर्द्ध्वमाशु च ।
वृश्चिकस्य विषं याति पश्चाद्दंशेऽवतिष्ठते ॥"
असाध्यवृश्चिकदष्टस्य लक्षणमाह ।
"दष्टोऽसाध्यैस्तु हृद्घ्राणरसनोपहतो नरः ।
मांसैः पतद्भिरत्यर्थं वेदनार्त्तो जहात्यसून् ॥"
असाध्यैर्वृश्चिकैर्जातिभेदादुक्तैः । हृदादिषु अहतः स्वस्वकार्य्यरहितो भवति । अत्यर्थं वेदनार्त्तः इत्यन्वयः ॥ ॥ अथ चिकित्सा ।
"चौरकस्य दलं कस्त्री पुनर्नवार्कबन्धुनः ।
कुसेम्भो मधुना पेयाद्वृश्चिकस्य विषं हरेत् ।
नरमादाय [illegible]

वृश्चिकेन नरो विद्धः पयसाद्भवति विज्वरः ॥"
इति भावप्रकाशः ॥ ॥
अथ वृश्चिकविषहरमन्त्रः । ॐ वर स्फु फ ॐ हिलि मिलि चिलि चिलि स्फु स्वाहा स्फु सर्व्वेभ्यो देवेभ्यः स्फु । इति तन्त्रसारः ॥ ॥ (यथा ऋग्वेदे । १ । १९१ । १६ ।
"वृश्चिकस्यारसं विषमरसं वृश्चिक ते विषम् ॥"
"वृश्चिकस्यैतद्विषमरसमसारं बाधकं न भवति ।" इति तद्भाष्ये सायणः ॥ विषस्य विशेषविवरणन्तु अस्यैव १—१६ मन्त्रेषु द्रष्टव्यम् ॥ ॥) मेषादिद्वादशराश्यन्तर्गताष्टमराशिः । अस्याधिष्ठात्री देवता वृश्चिकः । विशाखाशेषपादानुराधाज्येष्ठासमुदायेनैतद्राशिर्भवति । स च स्त्रीराशिः । श्वेतवर्णः । जलराशिः । उत्तरदिक्पतिः । कफप्रकृतिः । जलचरः । बहुपुत्रः । बहुस्त्रीसङ्गः । चित्रतनुः । विप्रवर्णः । सूक्ष्मविशेषसत्त्वः । सौम्यः । अङ्गना । शुभ्रम् । समः । स्थिरः । पुष्करः । सरीसृपजातिः । तद्राश्याश्रित एतादृशो भवति । मौनी । मन्दगतिः । क्षमालुः । कुबुद्धिः । नीचसङ्गः । इति बृहज्जातकादयः ॥ ॥ तद्राशिजातफलम् ।
"वृश्चिकोदयजातः स्यात् स्त्रीजनासक्तिदूषितः ।
भवेद्विख्यातधर्म्मा निपुणः सुभगः सुधीः ॥"
इति कोष्ठीप्रदीपः ॥ ॥
ओषधीभेदः । इति मेदिनी ॥ कालिकः । छागः । इति [illegible] ॥ मदनवृक्षः । कर्कटः । गोमयकीटः । इति भरतः ॥ अग्रहायणमासः । इति सारसुन्दरी ॥

वृश्चिकप्रिया, स्त्री, (वृश्चिकस्य प्रिया ।) पूतिका । इति शब्दमाला ॥

वृश्चिकर्णी, स्त्री आखुकर्णी । इति राजनिर्घण्टः ॥

वृश्चिका, स्त्री क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । नलपर्णी २ पिच्छिला ३ अलिपत्रिका ४ । अस्या गुणाः । पिच्छिलत्वम् । अम्लत्वम् । अत्यर्थदाहादिरोगनाशित्वञ्च । इति राजनिर्घण्टः ॥

वृश्चिकाली, स्त्री, (वृश्चिकानामालिर्यत्र ।) क्षुपविशेषः । विछाटी इति भाषा । तत्पर्य्यायः । वृश्चिपत्री २ विषघ्नी ३ नागदन्तिका ४ सर्पदंष्ट्रा ५ अमरा ६ काली ७ उष्ट्रधूसरपुच्छिका ८ । इति रत्नमाला ॥ विषाणी ९ मेषरोमहा १० छर्द्दिका ११ अलिपर्णी १२ दक्षिणावर्त्तकी १३ कालिका १४ आमलावर्त्ता १५ देवलाङ्गलिका १६ करभी १७ भूरिदुग्धा १८ चक्रमा १९ [illegible] २० युग्मफला २१ चौरविषालिका २२ भासुरपुष्पा २३ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । शुद्धिकारित्वम् । रक्तपित्तविषार्त्तिदोषनाशकत्वम् । बन्धनत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"वृश्चिकाली विषघ्नी तु कासमारुतनाशिनी ।"
इति राजवल्लभः ॥

वृश्चिपत्री, स्त्री, वृश्चिकाली । इति रत्नमाला ॥

वृश्चीरः, पुं श्वेतपुनर्नवा । इति रत्नमाला ॥

वृष उ सेचने । प्रजनैश्वर्य्ये । इति कविकल्पद्रुमः ॥ (भ्वा-पर-सक-अक च-सेट् । क्त्वावेट् ।) उ, वर्षित्वा वृष्ट्वा । इति दुर्गादासः ॥

वृष, क ङ प्रजनैश्वर्य्ये । इति कविकल्पद्रुमः ॥ (चुरा-आत्म-अक-सेट् ।) क ङ वर्षयते । अस्य प्रथमस्वरानुबन्धो [illegible] सुधीभिर्ह्येयः । [illegible] दायिकत्वात् । न च प्राणावरोधात् पाठ इति वाच्यम् । तर्हि [illegible] । क ङ वङ्क गमने । इत क ङ दीप्तौ । णिच क ङ परिकूजने । कण वर्हे । वृष क ङ शक्तिबन्धे । मघक वधेऽनादरे । इत्येषामष्टानामपि प्रथमस्वरानुबन्धापत्तेः वस्तुतस्तु एषां प्रथमस्वरानुबन्ध प्राचीनपठितोऽप्यनर्थः । अतएव रमानाथोऽपि एषामनुबन्धस्य पूर्व्वपठितत्वात्तयो ऽर्थान्तरेषु चुरादयः स्युर्नलेति पठ्यते इति माधवमाते स्यात् । प्रजनो गर्भग्रहणम् ऐश्वर्य्यमैश्वर्य्यम् । इति दुर्गादासः ॥

वृष, क्ली, (वृष ऐश्वर्य्ये + कः ।) वज्रम् । इति शब्दमाला ॥

वृषः, पुं (वर्षति सिञ्चति रेत इति । वृष सेचने + कः ।) पुङ्गवः । एँड़े इति भाषा । तत्पर्य्यायः । उक्षा २ भद्रः ३ बलीवर्दः ४ ऋषभः ५ वृषभः ६ अनड्वान् ७ सौरभेयः ८ गौः ९ । इत्यमरः ॥ उक्षी १० ककुद्मान् ११ । इति शब्दरत्नावली ॥ शृङ्गी १२ [illegible] १३ प्रवृषः १४ । इति जटाधरः ॥ ॥ अस्य लक्षणानि यथा,—
"धर्म्मभस्तकौ [illegible] चतुष्पदः ।
[illegible] कथमेव कथम्भुवः ।
[illegible] चतुर्व्विधा ॥
[illegible] गृहेषु च ।
[illegible] वृषभा [illegible] ॥
[illegible] स्थितिभो भवेत् ।
[illegible] विगुणः स [illegible] ॥
पीताङ्गा [illegible] गृहा [illegible] भारवाहिनः ।
[illegible] वृषभा [illegible] ॥
[illegible] वृषभा [illegible] ।
[illegible] वृषभाः शूद्रजातयः ॥
[illegible] भवेत् ॥" ॥
[illegible] ।
"एवीतस्ते [illegible] चतुष्पदाः ।
[illegible] भवेत् ।
एतज्ज्ञात्वा [illegible] प्राह महीपतिः ॥
ये गुणाः शुभदाः शुभ्राः [illegible] अपि ।
[illegible] कालिका
[illegible] ॥
[illegible] शुभ्रा [illegible] शुभाः ।
[illegible] राजका [illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] भवेत् ।

विलम्बनसमाविष्टात् निर्गुण च वृषाधमः ।”॥
अथ गुणाः ।
“नील शुभो भवो नाम क्षेमो भद्र प्रिय स्थिरः ।
भोजदेवेन लिखिता ह्यष्टौ वृषभे गुणाः ।”
तद्यथा,—
“श्वेतादन्यतरो वर्ण श्वेत उदरविषाणयोः ।
ललाटपुच्छयोः श्वेत स नील शुभमावहेत् ॥१॥
यो वृहत्पुष्टो रम्यात्मा सुविभक्ततनुः शुभः ।
कुरुते धनवृद्धिं स रोमभिर्लो यदा भवम् ॥२॥
सर्व्वेषु यस्य पुच्छो रक्तश्च भव उच्यते ।
भर्त्तुः कुल धन धान्य विवर्द्धयति निश्चयम् ॥३॥
पूर्व्वार्द्धे चोन्नतो यस्तु परार्द्धे चैव नीचकः ।
निर्द्दोषो नाम स ह्येव कुरुते विपुलधनम् ॥४॥
चक्राङ्कं दृश्यते यस्य ललाटे दर्शनीयकम् ।
क्षेमनामा स च कुर्याद् धनधान्यविवर्द्धनम् ॥५॥
आवर्त्तश्च शुभो यस्य शुक्लश्चापि वा शुभः ।
भद्रनामा स च कुर्यात् भर्त्तुः सर्व्वार्थसाधनम् ॥६॥
आवर्त्तत्रितयं यस्य हृदये वृषभेष्वपि ।
पादाः शङ्खनिभा यस्य पुच्छभागो सितो तथा ।
अधोभागे चायते नेत्रे कर्णौ चातिलघू शिरः ।
शृङ्गयोः लघुता चैव स्कन्धे चातिशुभं दृढ़ः ।
लघुरोमा महावेगः स्निग्धगम्भीरनिस्वनः ।
प्रिय एष कथितः प्रियं प्रकुरुते ध्रुवम् ॥७॥
चरणाः पक्षराः स्थूलाः स्थिरं शुभ्रं भवेत्तु ।
आपुच्छादायता शुभ्रा रेखा मस्तकगामिनी ।
रक्तताल्वोष्ठजिह्वस्तु स्थिर क्षेमकर प्रिया ।
नाम्नापूर्व्वेण सर्व्वोऽयं वृषभः शुभलक्षणः ।”८॥
अन्येत्तु ।
“मधुरस्य बहुलाभस्य पुष्टता भारवाहिता ।
कुमारकमनिष्ठत्वं वृषभाणां गुणा मताः ।”॥
अथ दोषाः ।
“कृष्णो विवर्णो विषमः श्वित्रो धूम्रश्च खरः ।
एते सप्त महादोषा वृषभाणां हि कीर्त्तिताः ।
विवर्णो विषमो यस्य खुराश्च विषमास्तथा ।
नैकवर्णोऽथवा गात्रे पक्षरे चैकल भवेत् ।
यस्तु स ह्येव कथितो धनधान्यविनाशनः ॥१॥
पूर्व्वार्द्धमन्यरक्तस्तु परार्द्धं चाप्यधःकम् ।
एष क्रोडो विवर्णो वा विरूक्षः कुलनाशनः ॥२॥
परार्द्धमुन्नतं यस्य पूर्व्वार्द्धं चातिनीचकम् ।
सङ्कुलचरणो यश्च ह्रस्वायते खरस्वरः ।
विषमो नाम वृषभः सम्पत्तिनाशकारकः ॥३॥
हिमकुन्देन्दुसङ्काशः गात्रेषु ताम्रविन्दवः ।
श्वित्रो नाम महादोषो दूरतः परिवर्ज्जयेत् ॥४॥
धूम्राभो दीपिकाकार ज्वलत् केकरे नेत्रौ ।
कपिलः पुच्छभागे तु स धूम्रो मधुमावहेत् ॥५॥
रक्तशृङ्गखुरादीनां यद्वर्णोऽपि चरेत् खलम् ।
शुष्का वा चलते यस्य च खलः पुरुषोत्तम ॥६॥
आवर्त्तं गलयो रेखा विषमाश्च विचक्षिता ।
शूलाधिका प्रहारास्तु खराश्च विषमास्तथा ।
गुदाक्षिद्वारे आवर्त्ता कठिन दृश्यते ।
निखाते विषमे चोच्चे निम्ना चैवाधिका भवेत् ।
स खरो दूरतस्त्याज्यो भर्त्तुः सर्व्वार्थनाशनः ॥७॥
अल्पता दीर्घरोमत्वं क्षीणता भारवाहिता ।
चतुष्कं सारकाद्यश्च वृषदोषा उदाहृताः ॥८॥
अशक्तादिनामनिर्दिष्टाः चत्वारो ये वृषा मताः ।
चतुर्विधानां लोकानां त एव तु शुभावहाः ।
यो नीलवृषभात्तीय कुरुते वृषभं वरम् ।
तस्य नश्यन्ति वित्तानि धनमायुः कुलं बलम् ।
वातपित्तकफोद्रेका व्याधयो ये हि ये मताः ।
तैरायुप्रशमं याति यथाशास्त्रं विधिना शुभे ।”
इति वृषपरीक्षा । इति श्रीभोजराजकृतयुक्तिकल्पतरुः ॥*॥ अथ तस्य उत्सर्गविधिश्च यथा,—

मनुरुवाच ।

“भगवन् श्रोतुमिच्छामि वृषभस्य च लक्षणम् ।
वृषोत्सर्गविधिं चैव तथा पुण्यफलं महत् ॥

मत्स्य उवाच ।

धेनुमादौ परीक्षेत सुशीलां लक्षणान्विताम् ।
अव्यङ्गामपरिक्लिष्टां जीववत्सामरोगिणीम् ॥
स्निग्धवर्णां स्निग्धखुरां स्निग्धशृङ्गीं तथैव च ।
मनोहरामतिक्षीणां सुप्रमाणाममुद्धताम् ॥
आवर्त्तैर्दक्षिणावर्त्तैरङ्कितां दक्षिणतश्च या ।
वामावर्त्तैर्वामतश्च निरीक्ष्यलक्षणा तथा ।
मृदुसंहतताम्रौष्ठीं रक्ताक्षीं सुपूजिताम् ।
अश्वावरोधस्फुटिता रक्तजिह्वा तथा च या ।
अश्वासाविलनेत्रा च पद्मैरविरलैर्दृढैः ।
वैदूर्य्यमधुवर्णैश्च जलबुद्बुदसन्निभे ।
रक्तशिरैश्च नयनैस्तथा रक्तकनीनिके ।
सम चतुर्दश दन्ताश्च ताम्रामलानुगा ।
सकुन्नता सुपार्श्वोरू इषु पञ्च समायता ।
षडायता शिरोग्रीवाधराणस्यसुकम्बला ।

मनुरुवाच ।

सकुन्नता के भगवन् ! के च पञ्च समायताः ।
आयताश्च षडेवाद्यौ धेनूनां के शुभावहाः ।

मत्स्य उवाच ।

उर पृष्ठ शिर कुक्षि श्रोणी च वसुधाधिप ।
सकुन्नतानि धेनूनां पूजयन्ति विचक्षणाः ।
कर्णनेत्रललाटश्च पञ्च भास्करनन्दन ॥
समायतानि प्रशस्तानि पुच्छ सास्ना च सक्थिनी ।
चत्वारश्च समा दाश्च तैरमदौ महीक्षितिः ।
शिरोग्रीवायताश्चैव भूमिपाल च्छता वृषम् ।
तस्या सुतं परीक्षेत वृषभं लक्षणान्वितम् ।
उन्नतस्कन्धककुदमृजुलाङ्गूलकम्बलम् ।
महाकटितटस्कन्धं वैदूर्य्यमणिलोचनम् ।
प्रवालगर्भशृङ्गाग्रं सुदीर्घपृथुवालधिम् ।
नवाद्यतिरिक्तकर्णौ तीक्ष्णाग्रैर्दशनैः शुभे ।
मल्लिकाक्षश्च मोक्षार्थी यत्नोऽपि प्रशस्यते ।
वक्षस्त्राभकपिलो माद्यकश्च प्रशस्यते ।
श्वेतो रक्तश्च शबलो गौरः पाटल एव च ।
महिषश्च पाण्डुरश्चैव वर्णः पञ्चकालकः ।
एणुवर्णो महाकायः ह्रस्वरोमा च यो भवेत् ।
रक्ताक्ष कपिलो यस्तु रक्तशृङ्गतलो भवेत् ।
श्वेतोदरः कृष्णपृष्ठो ब्राह्मणस्य प्रशस्यते ।
स्निग्धरक्तेन वर्णेन क्षत्रियस्य प्रशस्यते ।
काञ्चनाभेन वैश्यस्य कृष्णेनाप्यन्त्यजन्मनः ।
यस्य प्रागायते शृङ्गे भ्रूमुखाभिमुखे सदा ।
सर्व्वेषामेव वर्णानां स च सर्व्वार्थसाधकः ।
मार्ज्जारपादः कपिलो धन्यः कपिलपिङ्गलः ।
श्वेतोमार्ज्जारपादस्तु धन्यो मणिनिभेक्षणः ।
करटः पिङ्गलश्चैव श्वेतपादस्तथैव च ।
सर्व्वपादसितो यस्तु द्विपार्श्वेन एव च ।
कपिञ्जलनिभो धन्यस्तथा तित्तिरिसन्निभः ।
आकर्णमूलात् श्वेतन्तु मुखं यस्य प्रकाशते ।
नन्दीमुखः स विज्ञेयो रक्तवर्णो विशेषतः ।
श्वेतञ्च जठरं यस्य भवेत् पृष्ठञ्च गोपते ।
वृषभः स समुद्राख्यः सततं कुलवर्द्धनः ।
मल्लिकापुष्पचित्रस्तु धन्यो भवति पुङ्गवः ।
कमलैर्मण्डलैश्चापि चित्रो भवति भाग्यदः ।
अतसीपुष्पवर्णस्तु तथा धन्यतरः स्मृतः ॥*॥
एते धन्यास्तथाधन्यान् कीर्त्तयिष्यामि तेऽनघ ।
कृष्णताल्वोष्ठयुता रूक्षशृङ्गखुराश्च ये ।
अव्यक्तवर्णा ह्रस्वाश्च व्याघ्रसिंहनिभाश्च ये ।
ध्वाङ्क्षगृध्रसवर्णाश्च तथा मूषिकसन्निभाः ।
कुण्ठाः काणास्तथा खञ्जाः केकराक्षास्तथैव च ।
विषमश्वेतपादाश्च उद्भ्रान्तनयनास्तथा ।
नैते वृषाः प्रमोक्तव्या न च धार्य्यास्तथा गृहे ।
मोक्तव्यानाञ्च धार्य्याणां भूयो वक्ष्यामि लक्षणम् ॥*॥
स्वस्तिकाकारशृङ्गाश्च मेघौघसदृशस्वनाः ।
महाप्रमाणाश्च तथा मत्तमातङ्गगामिनः ।
महोरस्का महोत्साहा महाबलपराक्रमाः ।
शिरः कर्णौ ललाटञ्च वालधिश्चरणानि च ।
नेत्रे पार्श्वे च कृष्णानि शस्यन्ते चन्द्रमासि च ।
श्वेतान्येतानि शस्यन्ते कृष्णस्य तु विशेषतः ।
भूमौ कर्षति लाङ्गूलं प्रलम्बस्थूलवालधिः ।
पुरस्तादुन्नतो नीलवृषभश्च प्रशस्यते ।
शक्तिध्वजपताकाभा येषां राजी विराजते ।
अनड्वाहश्च ते धन्याः वित्तसिद्धिजयावहाः ।
प्रदक्षिणं निवर्त्तन्ते स्वयं ये विनिवर्त्तिताः ।
समुन्नतशिरोग्रीवा धन्यास्ते यूथवर्द्धनाः ।
रक्तशृङ्गाग्रनयनः श्वेतवर्णो भवेद्यदि ।
शफैः प्रवालसदृशैर्नास्ति धन्यतरस्ततः ।
एते धार्य्याः प्रयत्नेन मोक्तव्या यदि वा वृषाः ।
धारिता यदि वा मुक्ता धनधान्यविवर्द्धनाः ।
चरणानि मुखं पुच्छं यस्य श्वेतानि गोपतेः ।
लाक्षारससवर्णश्च तं नीलमिति निर्द्दिशेत् ।
वृष एष स मोक्तव्यो न स धार्य्यो गृही भवेत् ।
तदर्थमेषा चरति लोके गाथा पुरातनी ।
एष्टव्या बहवः पुत्त्रा यद्येकोऽपि गयां व्रजेत् ।
गौरीं वाप्युद्वहेद्भार्य्यां नीलं वा वृषमुत्सृजेत् ।
एवं इह वत्सवर्षप्रवृत्तं
यथोक्तं मोक्षणञ्चापि राजन् ।

सुप्ता च प्रीतिकरस्य महात्मा
मोदते मतिमाधमतोऽभिधास्ये ॥"
इति मात्स्ये वृषभलक्षणं नाम १८१ अध्यायः ॥
जलपानार्थमागतवृषस्य निवारणे दोषो यथा,
"मत्तो तृष्णाभिभूतानां पानार्थमभिधावताम् ।
अन्तरायो भवेद्यस्तु स भवेद्ब्रह्मघातकः ॥"
इति कर्म्मलोचनम् ॥ * ॥
अस्य दानविधिर्यथा,—
वशिष्ठ उवाच ।
"धनेश्वरो दरिद्रो वा करोति विधिना नृप ।
दानं सर्व्वगुणोपेतं तच्छृणुष्व यथाक्रमम् ।
भारादिनिपलान्तञ्च वृषं कृत्वा विधानतः ।
स्वर्णं धेन्वा तथा दद्याच्छक्तितो नृपसत्तम ।
अन्यया धेनवः प्रोक्ता वृषास्तावन्त एव हि ।
दरापीठे नियोज्याः सुवराय च तथा नृप ।
सर्व्वाभावात्ततो राजन् तिलपात्राणि निःक्षिपेत् ।
सर्व्वपापविनाशाय दीयन्ते नृपसत्तम ।
गोमयेन समालिप्य पञ्चवर्णसमाहते ।
तत्र हैममयं तत्र रौप्यं वा रक्तसुप्तकम् ।
तस्य कौशमये शृङ्गे मौक्तिकान्यथवो दृढाः ।
दाडिमप्रभवान्यपि विद्रुमौष्ठौ सुनासिका ।
मारकतौ विनिर्द्दिष्टौ कर्णौ वैणावकौ मतौ ।
पद्मरागस्य वै पादाः खुरा रौप्यमयास्तथा ।
राजताश्चास्य रोमाणि चाँमरस्त्वेव कम्बलम् ।
पट्टेन पुच्छसदृशं सर्व्वेषामप्ययं विधिः ।
वृषभो स्फटिकस्यापि लिङ्गे भवति प्रकीर्त्तितः ।
यथा पीतस्तथावर्णान् सुवर्णस्य तु कारयेत् ।
अन्याशां बलमाप्नोति धेनूनां वृषभप्रदः ।
दानं च विभवाद्दान भक्त्या च प्रतिपादयेत् ।
वृषभस्याप्यशक्तौ वि सदवस्त्रपत्न खतम् ।
वि धो दाप्येवमेवं चि कृत्वा प्रणमतन्द्रित ।
ततुक्त समवाप्नोति कल्पदानात सं शय ॥"
इति वह्निपुराणे वृषदानाध्याय ॥ * ॥
तद्दानफलं यथा —
"कन्यादान वृषोत्सर्गं तीर्थसेवां श्रुतं तथा ।
ये कुर्व्वन्ति महाप्राज्ञा न ते सद्विपयोपगाः ॥"
इति तत्रैव कन्यादाननामाध्यायः ॥ * ॥
अपि च ।
ब्रह्मोवाच ।
वृषभायो समादाय सुवर्णो कनकान्वितौ ।
हैमशृङ्गौ प्रदौ रौप्यौ सवत्सौ पूर्णयेत्तुगे ॥
प्रियोमां पूर्णिमायां तु तादृशे यः प्रयच्छति ।
प्रियभक्ताय विप्राय रौप्यपूर्णां वा स्त्रीका दा ।
न वियोगो भवेत्तस्य सप्तकल्पेष्वपि सत ।
यावद्वृषवेमाचेमेन्द्रोक्ष्यपुरं द्विज ।
तत्र भोगाश्चिरं भुक्त्वा दश आयस आवते ।
धर्म्मद्रो धनधान्याभ्यां पुत्रमित्रसमाकुलः ।
को वा रमणमाफुल्ल शोभुग पूर्णचन्द्रमुखे ।
प्रयच्छति प्रियोमा च प्रोषतो भाविनाङ्गनाः ।
स सर्व्वपापद्राभ्यां निमुक्तः क्रीडते सदा ।
इह लोके भवेद्धन्यो दैवाग्ने परमं पदम् ॥"
इति देवीपुराणे भोरेप्रवतनामाध्यायः ॥ * ॥

शिववृषकारणं यथा —
गौर्य्युवाच ।
"अथ गर्व्वान्वितो रुद्रो हत्वा त्रिपुरमुल्बणम् ।
मत्वा मनसि सद्दर्पो सर्व्वेषां जगतामिति ।
कोऽस्य यत्नश्चरेदेष्य इति मत्वा ययौ रथम् ।
विहाय शूलं सद्यः सन्नोध कवचं परम् ।
चिरं बभूव समरं यष्टव्य दिवानिशम् ।
न कोऽपि जेतुं क्षमो द्वौ सर्व्वो समरे
सदा ॥
पृथिव्याञ्च रथं कृत्वा दैत्येन्द्रो मायया प्रिये ।
अभूच्च चतुर्व्वक्त्रो पञ्चाशत्कोटियोजनम् ।
उत्तस्थौ शङ्करस्तत्र हन्तुं दैत्यं जगत्प्रभुः ।
जघान सुचिरं रुद्रो दानवेन्द्रं प्रकोपतः ।
वज्रमुष्टिप्रहारेण यक्षो मूर्च्छामवाप सः ।
चर्व्वेण चेतनां प्राप्य कोपाद्दानवपुङ्गवः ।
शिवं धनान्यसुतोऽस्य पातयामास भूतले ।
सम्प्राप्ते कथया प्रोष वृषरूपं विधाय च ।
दधार शङ्करं पृष्ठा विनाय्यामासुपक्रमम् ।
ददौ तस्मै स्वकवचं स्वशूलमरिमर्द्दनम् ।
मया दत्तेन शूलेन जघान त्रिपुरं हरः ।
मामेव दयहनारं सुरान् प्रौढिताः पुनः ।
तथापि शङ्करो दर्पं विहाय नैव ततो विभुः ।
शाश्वानन्दस्वरूपश्च निर्गुणः सर्व्वकर्म्मसु ।
सतोऽहं वृषरूपेण वहामि तेन तं प्रियम् ।
मम प्रियतमो नास्ति त्रैलोक्येषु शिवात् परः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११ अध्यायः ।
मेषादिद्वादशराशयन्तर्गतद्वितीयराशिः । तस्य
आयः । तारिः २ । अस्य विशेषणानि ।
सौम्यः । अङ्गना । युग्मम् । समः । स्थिरः ।
पुष्करः । अथ चतुष्पात् । निशाख्य याम्यः ।
दिवा यमः । दृस्वाख्यः । दक्षिणदिक्पतिः ।
निशाख्य । एतोस्माख्यः । अस्याधिपो दैत्या
इव । हलिकापार्श्वपरोधिमोषमन्यपर्य्यधि
रोऽद्वेनैतदाप्रिभवति । स च प्रोक्तमार्गः ।
सुन्दरभूमिवासी । वातप्रकृतिः । चैतन्यः ।
वैश्यजातिः । मतान्तरे अस्य मध्यमप्रोवक्षः ।
मध्यमदन्तान्तः । एतदाशियात एतादृश
भवति । दाता । मायदुःखरः । निर्भयः । पर
दारामिलाषी । इति वृषभ्यादिकारकम् ॥ * ॥
एतद्राशिजातफलम् ।
"शिरमति सुमति कमनीयतां
कुसुमतां वि बृषासुपभोगताम् ।
वृषगतो हिमगुर्भ्रममादिशेत्
सुलतिन कृतिकच सुखाञ्चपि ॥" * ॥
तद्दशाफलम् ।
"वृषभे भविष्यतो पुरुषस्त द्विजः ।
सुखी सतो धनी सुख्य मूर्खः सर्व्वजनप्रियः ॥"
इति कोष्ठीप्रदीपः ॥ * ॥
चतुर्व्विंशतिसमाप्ते पुरुषविशेषः । (यथा —
"शशको विविधो चैव शाङ्करो वाजिनो सदा ।
अश्वो धनो वृषोऽथ च कोचुपोषादिकल्पनम् ।"
इति रतिमञ्जरी ।)

तस्य लक्षणं यथा,—
"बहुगुणबहुवस्य धीमद्वामो महान्
सकलतरितरदेहः सत्यवादी वृषोऽयम् ।"
इति च रतिमञ्जरी ॥ * ॥
एकादशमन्वन्तरीयेन्द्रः । यथा —
"अनुपुत्रस्य तु पुत्रान् यस्याश्चैकादशस्य तु ।
सर्व्वधर्म्मा ग्रहर्म्मा च देवानीकः पुरर्गुरुः ।
क्षेत्रवर्णा दृढायुश्च आदर्कः पुत्रकास्तथा ।
विहङ्गमाः कामगमा निर्म्माणरुचयस्तथा ।
एकैकस्त्रिंशकस्तेषां गणाश्चेन्द्रश्च वै वृषः ।
इन्द्रपोषो रिपुस्तस्य भोरूपो घातयिष्यति ॥"
इति गारुडे ८७ अध्यायः ।
(काममुत् वर्षतीति । वृष + क ।) धर्म्मः ।
(यथा, मनुः । ८ । १६ ।
"वृषो हि भगवान् धर्म्मस्तस्य यः कुरुते ह्यलम् ।
वृषलं तं विदुर्द्देवास्तस्माद्धर्म्मं न लोपयेत् ॥")
शृङ्गी । उत्तरपदस्थश्चेत् श्रेष्ठः । (यथा, हरि
वंशे । १३१ । ३८ ।
"प्रारद पर्व्वत वहन् नवेद्धीरो गणाधिपः ।
तद्दृषवृषभ शीघ्रं पावकसरिद्विम ॥")
मूषिकः । शुक्रः । वास्तुस्थानभेदः । इति
मेदिनी । वासकः । इति विश्वः । शीघ्रः ।
इति त्रिकाण्डशेषः । शत्रुः । इति जटाधरः ।
कामः । बलवान् । इत्यनेकार्थकोषः । वृषभे
गायोत्तमम् । इति राजनिर्घण्टः । (पतिः ।
यथा, काशीखण्डे ।
"स्वतन्त्र या परित्यज्य परस्त्री सुखायते ।
वृषली सा हि विज्ञेया न शूद्री वृषली भवेत् ॥")
वृषकर्णी, स्त्री सुदर्शना । इति रत्नमाला ।
सुदर्शनगुल्म इति भाषा ।
वृषगन्धा, स्त्री (वृषस्य गन्धो यस्याः ।) वृद्धदारुः ।
इति राजनिर्घण्टः ।
वृषचक्र, क्ली, (वृषाकारं चक्रम् ।) शुभिकर्म्मोत-
फलाफलज्ञानम् । यथा —
"वृषचक्रं वृषाकारं सर्व्वावयवसंयुतम् ।
विलिख्य विन्यसेद्धानि वृषमाद्यपूर्व्वकम् ।
मुखादिषत्कयोर्वेद्ध मध्ये स्कन्धे स्थितं स्थिरम् ।
कौशि पृष्ठे दश पुच्छेऽष्टो दश हृदये स्थिरम् ।
चक्रस्थानस्थितोऽपिधारम्भादिविकल्पितम् ।
सम्यक् स्थितं तत्फलावलि कर्म्म शुभाशुभम् ।
आस्ये हानि शुभ्रे मैत्रे कर्म्म निघातनं तथा ।
शोर्व्वे वलिताना मध्ये भीतः कर्म्मेच संशयम् ।
पृष्ठे कष्टं शुभं पुच्छे श्रम पादे सुखं ध्रुवम् ।
जनलोमादिन प्रीतं वृषचक्र यत् सुखे ॥"
इति ज्योतिस्तत्त्वम् ।
वृषणः, पुं अण्डकोषः । तत्पर्यायः । तत्र लक्षणं
यथा —
"अद्भूतिज्ञो दरिद्रः स्यादुद्रुष्णितवृषणो भवेत् ।
विषमे चञ्चलो वै स्यात् अन्यकवृषे ।
प्रलम्बवृषणो चान्यवृषणो भवितायुः ।"
अपि च ।
"बल्मीकवृषणे वृषणाभ्यां यत् सुखाय

समाप्यां चितिप मोक्षं प्रलभेत प्रतान्द्वान् ।”

इति मार्कण्डे ६१।६५ अध्यायौ ।

वृषणकच्छू, स्त्री, (वृषणस्य कच्छूः ।) क्षुद्ररोग-विशेषः । तल्लक्षणं यथा,—

“स्नानोत्सादनहीनस्य मलो वृषणसंस्थितः ।
प्रक्लिद्यते यदा स्वेदात् कण्डूं जनयते तदा ॥
तत्र कण्डूयनात् क्षिप्रं स्फोटः स्रावश्च जायते ।
प्राहुर्वृषणकच्छूं तां श्लेष्मरक्तप्रकोपजाम् ॥

उत्सादनं उद्वर्त्तनम् । मलः मैल इति लोके । प्रक्लिद्यते आर्द्रो भवति ॥ * ॥ तच्चिकित्सा यथा,—

“सर्ज्जादिचूर्णतैलमथवितथिद्वार्थे प्रक्षालितो योगः ।
उद्वर्त्तनेन नियतं प्रशमयति वृषणस्य कच्छूतिम् ।
भिषगाद्वृषणकच्छ्वां चिकित्सेत् पामरोगवत् ।
अपिपूर्वनिर्दिष्टक्रिययापि च तां हरेत् ॥”

इति भावप्रकाशः ॥

वृषणश्व, पुं, इन्द्रस्य घोटकः । इति त्रिकाण्डशेषः । (एतन्नामकनृपविशेषः । यथा, ऋग्वेदे । १ । ५१ । १३ ।

“मेनाभवो वृषणश्वस्य सुक्रतो ।”
“वृषणश्वस्य एतन्नाम्नः राज्ञः मेनाभवो मेनानाम कन्या भूः ।” इति तद्भाष्ये सायणः ॥ * ॥ सेचनसमर्थाश्वयुक्ते, त्रि । यथा, ऋग्वेदे । ८ । २ । १ ।

“वृषणश्वेन मरुतो वृषप्सुना रथेन वृषनाभिना ।”
“वृषणश्वेन वृषभिः सेचनसमर्थैरश्वैर्युतेन ।”
इति तद्भाष्ये सायणः ॥)

वृषण्वसु, क्ली इन्द्रस्य धनम् । इति जटाधरः ॥ — (त्रि धनवर्षकः । यथा, ऋग्वेदे ।२।४१।८।

“न यः परो नान्तर आदधर्षद्वृषण्वसू ।”
“वृषण्वसू हे धनस्य वर्षितारौ ।” इति तद्भाष्ये सायणः ॥)

वृषदंश, पुं, (वृष मूषिकं दशतीति । दंश + अण् ।) बिडालः । इत्यमरः ॥ (यथा साहित्य-दर्पणे १० परिच्छेदे ।

“(चिर्पति मुखं वृषदंशकवन्नि ।”)

वृषध्वज, पुं (वृषो ध्वजो वाहनं यस्य ।) शिवः । इत्यमरः ॥ (यथा, काव्यादर्शे २ समाधा-नाने ।

“जटाभिस्तिग्धताम्राभिराविरासीद्वृषध्वजः ॥”) गणेशः । पुण्यकर्म्मेरः । इति विश्वः ॥

वृषध्वाङ्क्षी, स्त्री, नागरमुस्ता । इति राज-निर्घण्टः ॥

वृषनाशनः, पुं, (वृषस्य नाशनं यस्मात् ।) विडङ्गः । इति शब्दमाला ॥

वृषपतिः, पुं (वृषस्य पतिः ।) षण्डः । शिवः । इति मेदिनी ॥

वृषपत्रिका, स्त्री, गन्धाली । इति राज-निर्घण्टः ॥

वृषपर्णी स्त्री (वृषस्य मूषिकस्य कर्ण इव पर्णं यस्याः । ङीष् ।) आखुपर्णी । इति रत्नमाला ॥ वृषविशेषः । पुराणी इति भाषा । तत्पर्य्यायः । स्थाणी २ चक्राङ्गी ३ सुदर्शना ४ । इति राजनिर्घण्टः ॥

वृषपर्व्वा [न्] पुं शिवः । दैत्यभेदः । (यथा, महाभारते । १ । ६० । २६ ।

“वृषपर्व्वेति विख्यातः श्रीमान् यस्तु महा-सुरः ॥”

अस्य विवरणन्तु तत्रैव द्रष्टव्यम् ॥ * ॥) भृङ्गा मदनः । कशेरुः । इति विश्वः ॥ (विष्णुः । यथा, महाभारते । १३ । १४९ । ३१ ।

“वृषाही वृषभो विष्णुर्वृषपर्व्वा वृषोदरः ।”
राजविशेषः । यथा, मार्कण्डेयपुराणे ।१६३।५।
“जयाय नरराजस्य यज्ञाद्वृषपर्व्वणः ॥”)

वृषभ, पुं, (वृष सेचने । वृष + “ऋषिवृषिभ्यां कित् ।” उणा ३ । १२३ । इति अभच् । स च कित् ।) वृषः । (यथा, मनौ । ८ । ५ ।

“यद्यपि गोषु वृषभो वत्सानां जनयेच्छतम् ।”);
श्रेष्ठः । (यथा, महाभारते । १ । ६६ । ८० ।
“ऋषभे सह कैकेय्याः ते वृषभेव च ।”)
वैदर्भरीतिभेदः । इति मेदिनी ॥ आदित्यः । इति हेमचन्द्रः ॥ कर्णरन्ध्रम् । नययभामोच-धम् । ऋषभादिकौषः ॥ * ॥ (चतुर्विधपुरु-षान्तर्गतपुरुषविशेषः । यथा,—

“शशके पद्मिनी तुष्टा चित्रिणी रमते मृगम् ।
वृषभे शङ्खिनी तुष्टा हस्तिनी रमते हयम् ॥”

इति रतिमञ्जरी ॥)

गोमध्ये कपिलगाव प्रधानत्वं आदिश्वेद-गोहत्या लिख्यते ।

“ग्रामाहार प्रवृत्तेन पिवतो यो निवारयेत् ।
याति गोविप्रयोर्मध्ये गोहत्यां लभेत् स ॥
दण्डैर्गोस्ताडयन्मूढो यो विप्रो वृषवाहनः ।
दिने दिने गवां हत्यां लभते नात्र संशयः ॥
ददाति गोभ्य उच्छिष्टं भोजयेद्वृषवाहकम् ।
भोजयेद्वृषवाहाय स गोहत्यां लभेद्ध्रुवम् ॥
वृषलीपतिं याजयेद्यो भुङ्क्तेऽन्नं तस्य यो नरः ।
गोहत्याशतकं सोऽपि लभते नात्र संशयः ॥
पादं ददाति वह्नौ यो गाश्च पादेन ताडयेत् ।
गृहं विशेन्नधौताङ्घ्रिः स्नात्वा गोवधमाप्नुयात् ॥
यो भुङ्क्तेऽस्निग्धपादेन शेते स्निग्धाङ्घ्रिरेव च ।
सूर्योदये च द्विर्भोजी स गोहत्यां लभेद्ध्रुवम् ॥
अवीरान्नं यो भुङ्क्ते योनिजीवी च ब्राह्मणः ।
यस्त्रिसन्ध्याविहीनश्च स गोहत्यां लभेद्ध्रुवम् ॥
पितॄंश्च पर्व्वकाले च तिथिकाले च देवताः ।
न सेवतेऽतिथिं यो हि स गोहत्यां लभेद्ध्रुवम् ॥
स्वभर्त्तरि च कान्ते वा भेदबुद्धिं करोति या ।
कटूक्त्या ताडयेत् कान्तं सा गोहत्यां लभेत् ध्रुवम् ॥
गोमार्गं खननं कृत्वा ददाति शस्यमेव च ।
तडागे वा तदूर्द्ध्वे वा स गोहत्यां लभेद् ध्रुवम् ॥
प्रायश्चित्तं गोवधस्य यः करोति व्यतिक्रमम् ।
अर्थलोभादथाज्ञानात् स गोहत्यां लभेत् ध्रुवम् ॥
राजके दैवके यत्नाद्गोस्वामी गां न पालयेत् ।
दुःखं ददाति यो मूढो गोहत्यां लभते ध्रुवम् ॥
प्राणिनं लङ्घयेद्यो हि देवार्च्चामनलं जलम् ।
नैवेद्यं पुष्पमन्नं च स गोहत्यां लभेद्ध्रुवम् ॥
शश्वन्नास्तीति यो वादी मिथ्यावादी प्रतारकः ।
देवद्वेषी गुरुद्वेषी स गोहत्यां लभेद्ध्रुवम् ॥
देवताप्रतिमां दृष्ट्वा गुरुं वा ब्राह्मणं सति ।
न सम्भ्रमान्नमेद्यो हि स गोहत्यां लभेत् ध्रुवम् ॥
न ददात्याशिषं कोपात् प्रणताय च यो द्विजः ।
विद्यार्थिने च विद्यां स गोहत्यां लभेत् ध्रुवम् ॥
गोहत्या ब्रह्महत्या च कथिता चातिदेशिकी ।
यथा श्रुतं सूर्य्यवक्त्रात् किं भूयः श्रोतुमिच्छसि ॥”

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥

वृषभगतिः, पुं (वृषभेण गतिर्यस्य ।) शिवः । इति हारावली ॥

वृषभध्वज, पुं, (वृषभः ध्वजो वाहनं यस्य ।) शिवः । इति मेदिनी ॥ (यथा, रघु ।२।३६।

“अमुं पुरः पश्यसि देवदारुं
पुत्रीकृतोऽसौ वृषभध्वजेन ॥”)

वृषभाक्षी, स्त्री, इन्द्रवारुणी । इति राजनिर्घण्टः ॥
वृषभस्तुति स्त्री ॥

वृषभानु पुं, सुरभानपुत्रः । स च राधिकापिता । यथा —

“सुचन्द्रो वृषभानुश्च लेभाते जन्म गोकुले ।
महावंशाच्च जठरे सुरभानस्य वैश्यतः ॥
जातिस्मरो हरेरंश सुबुद्धिश्च यथा प्रभोः ।
बभूवतुर्नृप तत्र प्रजागोपे प्रजाधिपः ॥
कलावती कान्यकुब्जे बभूवायोनिसम्भवा ।
जातिस्मरा महासाध्वी सुन्दरी कमला कला ॥
कान्यकुब्जे नृपश्रेष्ठो भलन्दन उदारकः ।
स तां संप्राप योगाग्नेर्यज्ञकुण्डसमुत्थिताम् ॥
कृत्वा कन्यां राजेन्द्र कन्यकायै ददौ मुदा ।
मालावती च या ददौ तां पुत्रीव प्रहर्षिता ।
ददर्श नन्दः पथि तां मन्दतोषप्रहर्षितः ॥

नन्द उवाच ।

अहो राजेन्द्र वक्ष्यामि विशेषवचनं शुभम् ।
अमन्तं कृपं कन्याया विशिष्टेन च साम्प्रतम् ॥
सुरभानसुतः श्रीमान् वृषभानुर्व्रजाधिपः ।
नारायणांशो गुणवान् सुन्दरश्च सुपण्डितः ॥
कन्या हैमयोनिसम्भूता यज्ञकुण्डसमुद्भवा ।
त्रैलोक्यमोहिनी मान्या कमलांशा कलावती ॥
स च योग्यस्तु विदुषां योग्या सा च कन्यका ॥

भलन्दन उवाच ।

समस्तो हि विधिरयो न मे वाञ्छा प्रजाधिप ।
प्रजापतिर्विधाता त्वं कन्यादाताहमेव च ॥
वृषभानुप्रिया भार्या लिखिता येन सुता मम ।
पुरा मूर्खेण को वार्ष्णे कैवल्येन विवार्य्यते ॥
नृपाश्रयात्प्रादाय नन्दनो गर्भं मम ।
गत्वा च त्वद्धामाय सुरभानस्य मन्दिरं ॥
सुरभानस्य यत्नेन नन्देन च समादरम् ।
समर्प्य गोवधामा मनोहरा च मन्दिरम् ॥
वृषभानुसुता कृत्वा प्राप्य ताञ्च कलावतीम् ।

देवे सुनिश्चले दृष्टे बुबुधे न निराकृतम् ।
तयोः कन्या च कालेन राधिका या बभूव ह ।
दैवात् श्रीदामशापेन श्रीकृष्णस्याश्रया पुरा ।
अयोनिसम्भवा सा च कृष्णप्राणाधिका सती ।”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १७ अध्यायः ॥

वृषभाषा, स्त्री, (वृषेण धर्म्मेण भाषते इति । भाष + अच । स्त्रियां टाप् ।) अमरावती । इति त्रिकाण्डशेषः ॥

वृषय, पुं, (वृ + “वृङ्शीङ्भ्यामयः ।” उणां ३ । १ । इति अयन् गुणागमश्च ।) आश्रयः । इत्युणादिकोषः ॥

वृषल, पुं, यवनः । शूद्रः । (यथा, मनौ । ४ । १४ ।
“नाश्नीयात् सह मर्त्त्यैरेको न वृषलैः सह ।”
अस्य नामनिरुक्तिर्यथा, तत्रैव । ८ । १६ ।
“वृषो हि भगवान् धर्म्मस्तस्य यः कुरुते ह्यलम् ।
वृषलं तं विदुर्देवास्तस्माद्धर्म्मं न लोपयेत् ॥”)
चन्द्रगुप्तराजः । चाणक्यः । इति मेदिनी ॥ अधार्म्मिकः । इति जटाधरः ॥

वृषलाञ्छन, त्रि, (वृषलस्य लाञ्छनम् ।) अधार्म्मिकजनः । इति केचित् । शूद्रोद्भवः ।

वृषली, स्त्री, पित्रगृहे अविवाहिता रजस्वला कन्या । यथा । अत्रिकाश्यपौ ।
“पितुर्गेहे च या कन्या रजः पश्यत्यसंस्कृता ।
भ्रूणहत्या पितुस्तस्या सा कन्या वृषली स्मृता ।”
इत्युद्वाहतत्त्वम् ।
स्वपतिं परित्यज्य या परपतिगामिनी । यथा —
“स्वपतिं या परित्यज्य परस्थे वृषायते ।
वृषली सा हि विज्ञेया न शूद्री वृषली भवेत् ।”
इति काशीखण्डः ।
(वृषलस्य भार्य्या । ङीष् ।) शूद्री च । (यथा, महानिर्व्वाणतन्त्रे । ११ । ४० ।
“शूद्रान्नभोजिनः क्रूरा वृषलीरतिकामुकाः ।”)

वृषलीपतिः, पुं (वृषल्याः पतिः ।) वृषलीविवाहकर्त्ता । यथा,—
“यस्तु तां वरयेत् कन्यां ब्राह्मणो ज्ञानदुर्ब्बलः ।
अश्राद्धेयमपाङ्क्तेयं तं विद्याद्वृषलीपतिम् ॥”
इत्युद्वाहतत्त्वम् ।
“यदि शूद्रां व्रजेत् विप्रो वृषलीपतिरेव सः ।”
इति ब्रह्मवैवर्त्तपुराणम् ।

वृषलोचन, पुं (वृषस्य लोचने इव लोचने यस्य ।) मूषिकः । इति हेमचन्द्रः । वृषदंशे स्त्री ।

वृषवाहन, पुं (वृषो वाहनं यस्य ।) शिवः । इति केचित् ॥

वृषशत्रु, पुं (वृषस्यासुरविशेषस्य शत्रुः ।) विष्णुः । इति त्रिकाण्डशेषः ॥

वृषसृक्की, [न्] पुं, भ्रमरीभः । इति शब्दमाला ।

वृषस्यन्ती, स्त्री, (वृषं नरं शुक्रं वा इच्छति मैथुनाय । वृष + “सुप आत्मनः क्यच् ।” ३ । १ । ८ । इति क्यच् । “अश्वक्षीरेति ।” ७ । १ । ५१ । इति सुगागमः । ततः । “लट् शत्रृशानचाविति ।” ३ । २ । १२४ । इति शतृ ।

“उगितश्च ।” ४।१।६ । इति ङीप् ।) कामुकी । इत्यमरः ॥ वृषेण वृषभमिच्छन्ती गौः । इति व्याकरणम् ॥ तथा च ।
“तस्याः स्म दृश्यतां मध्ये शौरिश्चारुमत् ।
भ्रमराणुषपातयन्ममाममति पुनः ॥”
इति भट्टिः ॥

वृषा स्त्री मूषिकपर्णी । इत्यमरः ॥ कपिकच्छूः । इति हेमचन्द्रः ॥

वृषा, [न्] पुं, (वर्षतीति । वृष सेचने + “कनिन् युवृषितक्षीति ।” उणां० १ । १५६ । इति कनिन् ।) इन्द्रः । (यथा रघुः । ३ । ५९ ।
“प्राजापत्योपनीत तत् अश्वं प्रत्यग्रहीत्तदा ।
वृषेव पयसां सारमाविष्कृतमुदन्वता ॥”)
कर्णः । वेदनामकम् । सुखम् । इति मेदिनी ॥ वृषः । (यथा, ऋग्वेदे । १० । ४३ । ८ ।
“वृषा न क्रुद्धः पतयत् रजःसु ।”
“रजःसु लोकेषु वृषा न यथा वृषभः क्रुद्धः सन् प्रतिवृषभवधाय पतयन् गच्छति ।” इति तद्भाष्ये सायनः ।) घोटकः । इति हेमचन्द्रः ॥ (यथा ऋग्वेदे । ७ । ६८ । १ ।
“आवां रथो रोदसी बद्बधानो
हिरण्ययो वृषभिर्यात्वश्वैः ।”
“हे अश्विनौ वां रथो वृषभिः युवभिरश्वैर्युक्तः समायातु ।” इति तद्भाष्ये सायनः ॥ पिता । यथा ऋग्वेदे । ७ । २ । ५ ।
“वृषा अजाना वृषणः रथाय ।”
“वृषा सेक्ता पिता कश्यपो वृषणः कामानां वर्षितारमिन्द्रम् ।” इति तद्भाष्ये सायनः ।
त्रि, वर्षकः । यथा, ऋग्वेदे । १ । ६७ । ७ ।
“सखभिःसतिवृषभिर्वराहैः ।”
“वृषभिर्वर्षितृभिर्वराहैर्वराहारैः ।” इति तद्भाष्ये सायनः ।)

वृषाकपायी, स्त्री (वृषाकपेः विष्णोः शिवस्य अग्नेरिन्द्रस्य वा भार्य्या । वृषाकपि + “वृषाकप्यग्नीति ।” ४।१।३७। इति ङीष् । ऐकारादेशश्च ।) लक्ष्मीः । गौरी । इत्यमरः ॥ स्वाहा । इति भरतः ॥ शची । इति स्वामी । (यथा ऋग्वेदे । १० । ८६ । १३ ।
“वृषाकपायि रेवति सुपुत्र आदु सुस्नुषे ।”
“हे वृषाकपायि कामानां वर्षकस्याभीष्टदेवस्य समर्थस्येन्द्रस्य वृषाकपिस्तस्य पत्नि ।” इति तद्भाष्ये सायनः ।) जीवन्ती । शतावरी । इति मेदिनी ॥

वृषाकपि, पुं (“वृष अपिरक्तेन । अवर्षा मपीति दीर्घे ।” इति उणां ४ । १४४ । वृषस्य वृषो उष्णुकरः ।) विष्णुः । (यथा हरिवंशे । २१६ । ४० ।
“ततो विदुः प्रवरवराहलक्षणं
वृषाकपिं प्रसभमथैकशृङ्गिणा ।”)
शिवः । (यथा हरिवंशे । १ । ५९ ।
“वृषाकपिश्च शम्भुश्च कपर्दी रैवतस्तथा ।”)
अग्निः । इति मेदिनी ॥ इन्द्रः । इति वृषाकपायीशब्दस्य मध्येऽपान्तरदर्शनात् ॥ (यथा भागवते । ६ । ६ । १ ।

“एवं ययौ स्तौ विविधमत्स्यान्वयसम्भवम् ।
महदाद्या पते नक्षत्रगणाः वृषाकपिम् ॥”
सूर्य्यः । यथा महाभारते । ३ । ३ । ६१ ।
“स एव सविता भानुरंशुमाली वृषाकपिः ।”)

वृषाकर, पुं माषः । इति राजनिर्घण्टः ॥

वृषाङ्क, पुं, (वृषोऽङ्कोऽस्य ।) शिवः । (यथा भागवते । ८ । ८ । १ ।
“पीते गरे वृषाङ्केण प्रीतास्तेऽमरदानवाः ।”)
साधुः । भल्लातकः । षण्डः । इति मेदिनी ॥

वृषाङ्कज, पु, डमरुः । इति शब्दरत्नावली ॥

वृषाञ्चन पुं, (वृषेण अञ्चति गच्छतीति । अञ्चु गतौ + ल्युः ।) शिवः । इति त्रिकाण्डशेषः ॥

वृषाय्यक, पुं, शिवः । इति त्रिकाण्डशेषः ॥

वृषान्तक, पुं, (वृषस्यासुरस्यान्तकः ।) विष्णुः । इति शब्दरत्नावली ॥

वृषायण, पुं, चटकः । इति हारावली ॥ (वृषेण अयनं गमनं यस्य ।) शिवश्च ॥

वृषाहार, पुं, (वृष उन्दुर आहारो यस्य ।) विडालः । इति हारावली ॥

वृषी, [न्] पुं, मयूरः । इति शब्दमाला ॥

वृषी, स्त्री, व्रतिनां कुशासनमयासनम् । इत्यमरः ॥ (यथा देवीभागवते । ९ । १२ । ३ ।
“(ग्रन्थो नदी वृषी तत्र गुरवः योऽपि तत्र कदा ।”)

वृषोत्सर्ग पुं (वृषस्योत्सर्गः ।) अशौचान्त द्वितीयदिनादिश्राद्धविशेषकार्य्यलक्षणवृषभादि चतुष्पदयुक्तभृत्यागः । वृषाभावे तत्प्रतिनिधि यथा,—
“एकादशेऽह्नि सम्प्राप्ते वृषाभावो भवेद्यदि ।
दर्भैः पिष्टैस्तु कृत्वाद्ध तं वृषं मोचयेद्बुधः ॥
वृषोत्सर्ग्गस्य या नावा वृषाभावे कथञ्चन ।
मृत्तिकाभस्तु दर्भैर्वा वृष कृत्वा विमोचयेत् ॥”
इति गारुडे प्रेतकल्पे ६ अध्यायः ॥
तस्य निषिधया । कालविवेकधृतविष्णुपुराणम् ।
“एकादशाहे प्रेतस्य यस्य चोत्सृज्यते वृषः ।
प्रेतलोकं परित्यज्य स्वर्गलोकं स गच्छति ।
आद्यमासि शिपते वा पष्ठे मासि च वत्सरे ।
वृषोत्सर्गस्तु कर्त्तव्यो यावत् स्यात् सपिण्डना ।
सपिण्डीकरणादूर्द्ध्वं कालोऽयं प्राक्तनोदितः ।”
अत्र प्रेतश्रुतिः सामान्यतः मृते पितृभातृ स्वापि वृषोत्सर्गं प्रतीयते ॥ ० ॥ अथ वृषोत्सर्गे कालाकालम् । कार्त्तिक्यां पौर्णमास्यां रेवत्यामाश्वयुज्यां चरमे मते संवत्सरोऽनेन वैति । अथ नक्षत्रमासादिभेदं संवत्सरेणैव वृषोत्सर्गविधिः । इत्यादि इति आद आह इति अशौचान्तादिनादिनिर्णयः ।
“अशौचान्तादिनेऽपि प्रसी रयां देवदानम् ।
आश्व पुरुष तत्र अनन्तकर्म्मकम् ।
वंशूल्य द्विपराम्यक पाणिभरवसूक्तैः ।
वृषोत्सर्गश्च कर्त्तव्यो वदा च वनिता शुभा ।”
इति ब्रह्मपुराणवैवर्त्तवाक्यात् ।
प्रेतस्योपरि द्विमाह च कर्त्तव्यम् ।

"नाम्नाक नवसहस्रावशिष्टभोज्यर्गं विधीयते ।
सर्पशीकरकाद्दूर्ध्वं इष्टिमार्ग विधीयते ।"
इत्यग्निपुराणम् । ० ।
तडागवापमाह कात्यायन ।
"अथातो जलाशयाया प्रतिष्ठा शुभो भवेत् ।
एकवर्णा स्त्रियो वा यो वा स्यादृत्कारान्त ।
यथाद्भुतमरा यस्तु धर्मो वा मीन एव वा ।
प्रासादान् यत्र पराद्धत्कारयेद्बुध ।"
अथ कोऽसौ अदृष्टाह वाप । तामयिष्णुप्रभ
तिष्ठ मत्स्यपुराणम् ।
"वरुणादि दृष्टं पुण्यं यत्र चैतानि मोचति ।
नानारत्नचन्द्र तं गोलमिति निर्दिशेत् ।
तत्र यत्र च मोहनो न कल्पार्थो यदि भवत् ।
तदर्धमेवा भवति नानि शाखा पुरातनी ।
एकेन वत्स पुत्रा यदिकोऽपि यथा भवेत् ।
गौरी वासुदेवाद्याभ्यां भालका इत्युद्दिशेत् ।"
ततस्तदीर्धिपयानि ।
'आपनो मोहिता पश्चापाम्भा भोमयाक्तरे ।
एवमव भवेत् तस्मा दशभक्त च मोदसि ।"०।
मेधकर्मायमत्स्यपाणिन्यानसर्व पपाधिपथ
दानम् । "भवेन पितृसत्वेन पिताम शतधे
गुच ।" अन्य च ।
"शुक्राणां तु चिभूता ब्राह्मणान् कविताप्य
च ।
कोतयेद्दाराम्बैव तथा श्रावणय इति ।"
इति दानधर्मप्रपद्योत्सर्गप्रकरणोपदर्शनात्
आदानवपितृत्रामेव स्थितिमाप्नुयादस्ति भार
तचाभोदारय कामम् ।
"यदह्ना कुरुते पाप ब्राह्मणस्तिष्ठिरेवतत् ।
अभ्यासपालनमाय पूर्णा सन्ध्या विमुच्यति ।"
इत्यादि पुराणोक्त प्रातमहाभारतोद्धारवत्
तादृदेशीयास्तु विराटपर्व पातयन्ति । भविष्ये।
"इष्टोत्सर्गेण द्विविधो भोजनी वा जनस्य च ।"
इत्युपक्रम्य ।
"वाटुकी यत्र च पुष्करिणीं पूजयेद्घटे ।
यद्यान्येन वयित् पश्चात् विष्णु संपूजयेत् तत ।"
इत्युपरिदिष्टम् ।
"गोसारार्था प्रभोपाधि संस्कृत सौहित्सु
लाम् ।
वनिपूर्ति च्छेन्द्रदो निम्नदेषु पापप पचम् ।"
गोद्वारापानिति प्रधानतन्त्र । तत्र इत्युप
क्रम ।
"वृषभस्थो विमानेन श्रुतिष्ठानिविदर्शनात् ।
पाशुपतादर्थं देवि समोहि निर्मेथे वने ।"
घाहृत्वावकार यजमान एव प्रथमं जलाधरो
स्नेहं कुर्यात् तत्र प्रजवदत्त प्रथमत । ज्योति
र्दोषे जलोत्साहदोषभाद्गुं इत्यादिदर्शनेन ।
प्रसूयते ।
'दृष्ट च यज्ञारे च प्रजते यदाक्रमेति ।
यानि पत्रप्रभृत्यामोना कर्मा तानि न पतन्ति ।
दक अन्य नयुक्त स्यात् दितीयस्तत्प्रदान ।
अनाथ शूद्रयान प्रर्थ तत्र कर्म समाचरेत् ।"

परमात्मनार कुर्यात्काको उवाच यथाविधिना
चरुपाकश्च हुत्वा चरुहोमं कुर्यात् । तत
स्विष्टकृद्धोममहाव्याहृतिहोमौ कार्यौ ।०।तत
"इदस्य दक्षिणे पार्श्वे भित्त्वाङ्कं समालिखेत् ।
तथा चाश्रोणि यथेष्टस्य चक्राङ्कमपि दर्शयेत् ।
तस्मिन् पश्चात्तथा वस्त्रौ तावेव कारयेत् ।
अर्थेन ब्रह्मसूत्राणिर्दृक्चैको सूचितच वर ।
सर्वौषधिसुगन्धीभि स्नापयेद्वत्सिका अपि ।
परिधाप्यावृते शुक्ले वाससी हेमपङ्कजम् ।
ब्रह्मनिम्यापितस्तोमभावमन्त्रा धिरसि न्यसेत् ।"
ततो यजमानसदोनामकड़ालादिक दत्त्वा विलेष
नपुलकिनितपुष्पे उपपुष्पे च वस्त्रा यथं गुडाभं इति
मन्त्र पठित्वा वत्सतरीचतुष्टयसहित इव तत्र
फलकामो यथोक्तादिवाक्यैपोत्सृजेत् ।०। ततो
यूपादृश्रित्य वत्सतरीचतुष्टयसहितं तमेवाज्ञो
चालयित्वा मापयेत् । यथा,—
"न स्वाद्येत् परद्रव्याणि नाकामेहूलभिकोष
माम् ।
धर्मोऽसि त्व चतुष्पादस्तस्याः प्रियाक्षमा ।
चतुर्णा पोषणार्थाय मयोत्सृष्टान्वया सह ।
इमाञ्च पिष्टाख मनुष्याणां च यो हित ।
भूतानां हृन्निकृष्टमपारा शाई प्रतिमा ।
नमो ब्रह्मण्यदेवेश पितृभूतर्षिपोषक ।
मयि शक्तोऽथवा लोके मम शत्रु निरामया ।
मा मे अयोऽस्तु दैवोऽय पैत्रो भौतोऽथ
मानुष ।
धर्मेश्वर मतपमस्य या मति शास्तु मे शुभा ।
यत्किञ्चित् दुष्कृतं कर्म लोभमोहात् हत
भवेत् ।
यस्मादूर्ध्व देवेश पितृ वयं प्रयच्छ मे ।
यावन्ति तव लोमानि शरीरे सम्भवन्ति च ।
तावद्वर्षसहस्राणि स्वर्गे वासोऽस्तु मे पितृ ।"
इति मत्स्यपुराणोक्त पठेत् । तत आचाराद्
इष्टपुण्याग्निगोरथैव वस्तुपुराणोक्तवचन कुर्यात्
तत प्रशस्तदक्षिणां हुत्वा कर्मकारयितृभ्यो
दक्षिणां दद्यात् । इति वृषोत्सर्गतत्त्वम् ।०।
अपि च ।
"कार्त्तिक्यां कारयेत् पूर्वा तत्र दैवीप्रियं
सदा ।
शोत्सर्ग पुष्करेण शीत वा समुत्सृजेत् ।
अन्यथापक्व वत्स प्राशुयादविचारणम् ।
मत्स्यवाच ।
अश्वमेधसम पुण्यं वृषोत्सर्गाद्वाप्नुते ।
देवलोकमिनि नास्ति नानिक्या कामिकस्य
वा ।
मोदिनर्थोऽथवा कार्यो रम्यां वै कामसु
ऽपि वा ।
त्रिरोमागत्सखेवे तृतीयायां महाफलम् ।
अष्टमोत्सृष्टारोहार्थं विवाहविधिना भवेत् ।
अन्वारेष्य मरतोर्थे चतुर्थो शोभनोऽपि वा ।
चरमो वृषिका प्रदा हो वा समपत्नोऽपि वा ।
चतुर्थ पन्वाह्नपूर्वं कृत्वा वा वृषिका भवेत् ।

अथवाश्च यथायोभसुत्सर्गं कारयेच्छुभे ।
विवाहमेकवृषोयमोतेन भवति सदा ।
इतीन अन्यमेयस्य पासक्ष प्रवदाम्यहम् ।
कारयेत् वत्स पुत्रा यद्वैकोऽपि यथा भवेत् ।
प्रतिष्ठा अन्यथैव चीर्णं वा इत्युत्सृजेत् ।
रोहितो यस्तु वर्णेन शुक्लपर्वतरो हव ।
लाङ्गूलशिरस्येव स वै नीलवृष उच्यते ।
आहितोत्सृष्टस्याहि पूर्वं गात्रावास्त्य पश्चात ।
तस्मिन् वामतश्च वाम्यं मूलं समालिखेत् ।
धातुना हैमतारेण आयसेनाथवाहूयेत् ।
एवं हुत्वा आप्नोति फलं वाजिमखोदितम् ।
यत्राहितोऽनृत्येदूयत्सर्ग स्वभेतारिचार
यात् ।
यथा त्रिलोमना अश्वा पूर्विका सर्वकामदा ।
सर्वं देवमयं कृत्वा अथवा जायते सदम् ।
अमृतालिखित सह सह गोदानं सदम् ।
सर्वप्रदत्तफलेन वृषोत्सर्गाद्वाप्नुयात् ।"
इति देवीपुराणे पूजाविधि नामाध्याय ।
इष्टि, स्त्री, (इष्+क्तिन् ।) वेदाम्नायविहितय
ज्ञम् । तत्पर्याय । यजनम् २ । इत्यमर ।
मोहनम् ३ यजामहम् ४ यज्ञनम् ५ । इति
शब्दरत्नावली । तत्कारणं यथा,—
"अमनादिषये यत्र भवन्ति सर्वसिद्धय ।
तदा इष्टि क्रमाज्ज्ञेया प्रजाकेत्रप्रवासदे ।"
इति काशीखण्ड ।०।
अपि च ।
"गुप्त परमार्थच किम्बिलादृष्टिरेव च ।
सर्वाह्नि आयते लोके तासां प्रशान्ति
स्थिति ।
विष्णोऽप्रति यथार्थेन तिस्रो जीवन्ति जीवित ।
सर्वेषाञ्च योऽस्मि लाभे तस्मात् अच्युत ।
प्राग्यो मेधादय कर्मं विधाता वै निरूपिता ।
यथाग्ने यो जलधरो गगन धारको महत् ।
प्रख्यापितो दृष्टो मत्वो विधाता वै निरू
पिता ।
जनाद्ग्राणो प्रस्थानो ब्रह्मानाथ निरूपितम् ।
अस्मिन्नेवोऽथवैन तत् सर्वं कल्पे कल्पे युगे युगे ।
इष्टो यदुमादायोद करेण जनमोदितम् ।
एवमादाय तदुपदातिथ दीरिको धन ।
स्थाने स्थाने दृष्टिषाय काले काले यथोचितम् ।
ईश्वरोऽपयादिभूत पूर्वं मूलं प्रतिपच्चकम् ।
भूत भव्य भविष्याच्च सदा यत्न सध्यमम् ।
तथा निरूपितं कर्म केन यात निवार्यते ।"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे २१ अ ।
आत्मकर्मदिनकर्त्तारि यथा,—
"समृद्ध स्वधिमूर्ति प्रस्तेन प्रपिता तह ।
देवादयस्ति प्रतिमे वार्ता प्रदिक्षका ।
देवोद्भवाना मद्गृहवात्सका मनोहर ।
मुख्यामतिप्रमाणो प्रदिकत्रिनिकशक ।
अर्थ प्रमाणविन तत साम्प्रतमाक्रन् ।
प्रारार्थमर्व कार्यं दिन प्रति यथोदत ।"
इति कालिकापुराणे ११ अध्याय ।०।

वृष्टिश्च यथा,—
"पतिव्रताया माहात्म्यान्नोद्गच्छति दिवाकरः।
सूर्य्योदयं विना नैव स्नानदानादिकाः क्रियाः॥
अग्नेर्विहरणञ्चैव यज्ञाभावश्च जायते।
वेदाध्ययनमप्याद्यं विना होमेन जायते॥
यज्ञमाप्यायिता मर्त्त्यैर्यज्ञभागैर्यथोदितैः।
वृष्ट्यादिनानुगृह्णीमो मर्त्त्यान् शस्यादिसिद्धये॥
निष्पादितास्वोषधीषु मर्त्त्या यज्ञैर्यजन्ति नः।
ते वयं प्रयच्छामः कामान् यज्ञादिपूजिताः॥
अधो हि वर्षाम वयं मर्त्त्याश्चोर्द्ध्वप्रवर्षिणः।
तोयवर्षेण हि वयं हविर्वर्षेण मानवाः॥
येऽस्माकं न प्रयच्छन्ति नित्या नैमित्तिकीः
क्रियाः।
क्रतुभागं दुरात्मानः स्वयं येऽश्नन्ति लोलुपाः॥
विनाशाय वयं तेषां तोयसूर्य्याग्निमारुतैः।
क्षितिञ्च सन्दूषयामः पापानामपकारिणाम्॥
दुष्टतोयादिभोगेन तेषां दुष्कृतकारिणाम्।
उपसर्गाः प्रवर्त्तन्ते मरणाय सुदारुणाः॥
ये चास्मान् प्रीणयित्वा तु भुञ्जते शेषमात्मना।
तेषां पुण्यांस्तथा लोकान् वितरामो महा-
त्मनाम्॥"
इति मार्कण्डेयपुराणे पतिव्रतामाहात्म्यनामा-
ध्यायः॥*॥ वृष्टिजलगुणाः।
"गगनाम्बु त्रिदोषघ्नं गृहीतं यत् सुभाजने।
बल्यं रसायनं मेध्यं पात्रापेक्षि च तत्परम्॥
दिवार्ककिरणैर्जुष्टं निशीन्दुकिरणैर्निशि।
अरूक्षमनभिष्यन्दि तत्तुल्यं गगनाम्बुना॥
यत्र चरन्ति वने यत्रोरगा विषकीट
लूताश्च।
तद्दिव्यमुदकमेवं सकलसमस्तदोषदायि पूर्णम्।
कालेन पक्वं निर्दोषमगस्त्येनाविषीकृतम्।
शरदोदकमित्याख्यातं शारदं विमलं जलम्॥"
इति राजवल्लभः॥*॥
अथ तस्य भेदाः।
"पानीयं मुनिभिः प्रोक्तं दिव्यं भौममिति
द्विधा।
दिव्यं चतुर्विधं प्रोक्तं धारजं करकाभवम्॥
तौषारञ्च तथा हैमं तेषु धारं गुणाधिकम्॥"*
तत्र धारस्य लक्षणं गुणाश्च।
"धाराभिः पतितं तोयं गृहीतं स्फीतवाससा।
शिलायां वसुधायां वा धौतायां पतितञ्च यत्॥
सौवर्णे राजते ताम्रे स्फाटिके काचनिर्मिते।
भाजने मृन्मये वापि स्थापितं धारमुच्यते॥
धारनीरं त्रिदोषघ्नमनिर्द्देश्यरसं लघु।
सौम्यं रसायनं बल्यं तर्पणं ह्लादि जीवनम्॥
पाचनं मतिकृन्मूर्च्छातन्द्रादाहश्रमक्लमान्।
तृष्णां हरति तत् पथ्यं विशेषात् प्रावृषि
स्मृतम्॥"*॥
अथ धारजलस्य भेदौ।
"धाराजलञ्च द्विविधं गाङ्गसामुद्रभेदतः।"
तत्र गाङ्गसामुद्रयोर्लक्षणं गुणाश्च।
"आकाशगङ्गासम्बन्धि जलमादाय दिग्गजाः।
मेघैरन्तरिता वृष्टिं कुर्व्वन्तीति वचः सताम्।
गाङ्गमाश्वयुजे मासि प्रायो वर्षति वारिदः।
अन्यथा तज्जलं देयं तदेव परके वच॥
स्थापितं हैमने पात्रे राजते मृन्मयेऽपि वा।
शाल्यन्नं येन संसिक्तं भवेदक्लेदिवर्णवत्॥
तत् गाङ्गं सर्व्वदोषघ्नं ज्ञेयं सामुद्रमन्यथा।
तत्तु क्षारलवणञ्च शुक्रदृष्टिबलापहम्॥
विस्रञ्च दोषलं तीक्ष्णं सर्व्वकर्म्मसु गर्हितम्।
सामुद्रं आश्विने मासि गुणैर्गाङ्गवदादिशेत्॥
यतोऽगस्त्यस्य विधिवदुदयात् सकलं जलम्।
निर्म्मलं निर्व्विषं स्याद्धि शुक्लञ्च शारदोदकम्॥"*
अन्यच्च।
"कुल्याभिवर्षपातेन भावानां योगधारिणाम्।
वर्षासु सर्व्वं तोयं दिव्यमध्याभ्रिकं विना॥"
इति भावप्रकाशः॥

वृष्टिघ्नी, स्त्री, क्षुद्रपर्णिका। इति शब्दचन्द्रिका॥ गुजराटी एलाइच इति भाषा। वृष्टिनाशके, त्रि॥

वृष्टिजीवनः, पुं, (वृष्ट्या वृष्टिर्वा जीवनं यस्मिन्।) देवमातृकदेशः। इति हेमचन्द्रः। वृष्टिजीवने, त्रि॥

वृष्टिभूः, पुं, (वृष्टौ वर्षाकाले भूरुत्पत्तिर्यस्य।) भेकः। इति हारावली। वृष्टिभवे, त्रि॥

वृष्णिः, पुं, (वृष+"सृवृषिभ्यां कित्।" उणा० ४। ४८। इति निः। स च कित्।) मेषः। इत्यमरः। यादवः। इति शब्दरत्नावली। (यथा, महाभारते। १। ८९। ४।
"यथा हि धर्म्मसत्यपुत्रः पाति वृष्णीनरिन्दम।
तथा ते पाण्डवा रक्ष्याः पाण्डवान्धवा
भयात्॥")
छागः। इति त्रिकाण्डशेषः॥

वृष्णिः, त्रि, पाषण्डः। चण्डः। इति शब्दरत्नावली॥

वृष्णिगर्भः, पुं, श्रीकृष्णः। इति हारावली॥

वृष्यं, क्ली, (वृष+"विभाषा कृवृषोः।" ३। १। १२०। इति क्यप्।) वाजीकरणम्। इति राजनिर्घण्टः॥

वृष्यः, पुं, (वृषाय हितः। वृष+यत्।) माषः। इति हेमचन्द्रः॥

वृष्यः, त्रि, (वृषाय वाजीकराय हितः। वृष+"खलयवमाषेति।" ५। १। ७। इति यत्।) शुक्रवृद्धिकारकौषधादिः। इति भावप्रकाशः॥

वृष्यकन्दा, स्त्री, (वृष्यं वाजीकरणं कन्दं यस्याः।) विदारी। इति राजनिर्घण्टः॥

वृष्यगन्धा, स्त्री, (वृष्यो गन्धो यस्याः।) वृद्धदारकः। इति शब्दरत्नावली॥

वृष्यगन्धिका, स्त्री, (वृष्यो गन्धो यस्याः। स्वार्थे कन्। टापि अत इत्वम्।) अतिबला। इति राजनिर्घण्टः॥

वृष्यवल्लिका, स्त्री, विदारी। इति राजनिर्घण्टः॥

वृष्या, स्त्री, ऋद्धिनामौषधम्। इति रत्नमाला॥ शतावरी। आमलकी। इति राजनिर्घण्टः॥

वृह, वृद्धौ। इति कविकल्पद्रुमः॥ (भ्वा० पर० सक० सेट्।) वृहति। वृहिर्वृद्धावित्यत्र वेदे एव दृष्टोऽस्य पाठो वृद्धौ इत्यनुक्तत्वात्। किन्तु अनेनैवेष्टसिद्धे तत्र इहि पठद्य परस्मै शुद्धतापमेव। अयं धातु केचिन्न मन्यते। इति दुर्गादासः॥

वृह इ भने। वृद्धौ। अयमन्वरो। (भ्वा० पर० सक० सेट्।) इ, वृंहति। वृषु हिंसे गजगमन। इति माघः। आत्मनेपदं प्रमादान्निति वल्लभः। अनयेति हस्तिकर्णकः। इ दित करिगर्जित मित्यमरविश्वात्। इ दित करिगर्जितो शब्द मात्रेऽपि कम्पते। इति शब्दमहाकवान्। कदाचिदात्मनेपदोऽपि। तेन श्रीहर्षेणापि विवृंह हितमिति वाबभूप्रयोगः। इति दुर्गादासः॥

वृह, इ कि शिवि। इति कविकल्पद्रुमः॥ (चुरा० पक्षे भ्वा० पर० अक० सेट्।) अयमन्वरो। इ, वृंहते। कि, वृंहयति वृंहति। इति दुर्गादासः॥

वृह इ उ वृद्धौ। इति कविकल्पद्रुमः॥ (भ्वा० आत्म० अक० सेट्।) इ, वृंहते। उ, वृहते। इति दुर्गादासः॥

वृह, इर भ्रमे। वृद्धौ। इति कविकल्पद्रुमः॥ (भ्वा० पर० अक० सेट्।) इर, अवृहत्। अवर्हीत्। भ्रमः शब्दः। अर्ह्युहि। इति दुर्गादासः॥

वृह, श ऊ उद्यमे। इति कविकल्पद्रुमः॥ (तुदा० पर० अक० सेट्।) श, वृहति। ऊ, अवर्हीत्। अवृक्षत्। इति दुर्गादासः॥

बृ(वृ)हच्चञ्चुः, पुं, (बृहती चञ्चुः शाकविशेषः।) महाचञ्चुशाकः। इति राजनिर्घण्टः॥ (बृहती चञ्चुर्यस्येति दीर्घचञ्चुयुक्ते, त्रि॥)

बृ(वृ)हच्चित्तः, पुं, जम्बीरः। इति शब्दचन्द्रिका॥

बृ(वृ)हच्छल्कः, पुं, (बृहत् शल्को यस्य।) चिङ्गट मत्स्यः। इति जटाधरः॥

बृ(वृ)हज्ज्योतिष्मती, स्त्री, वृहज्ज्योतिष्मताया-स्तत्पर्य्यायः। अनलप्रभा २ स्निग्धदर्शी ३ मधुरा ४ पीतपुष्पा ५ बृहज्ज्योतिः ६ सुवर्णकारी ७। अस्या गुणाः। वह्नितेजोवर्धनम्। मूत्रविकारनाशनम्। वैवर्ण्यविनाशकत्वञ्च। इति राजनिर्घण्टः॥

बृ(वृ)हड्ढक्का, स्त्री, (बृहती ढक्का।) ढक्का-विशेषः। यथा —
"बृहड्ढक्का तु भेरी स्त्री दुन्दुभिः पुन-
रन्यः।
दमदः प्रतिपत्तूर्य्यमानकः पटहोऽस्त्रियाम्॥"
इति जटाधरः॥

बृ(वृ)हतिका, स्त्री, (बृहती+"इवार्थे ज्ञाप्या रवे।" ५। ३। ९६। इति कन्।) उत्तरीय-वसनम्। इत्यमरः॥ बृहती। इति रत्नमाला॥

बृ(वृ)हती, स्त्री, (बृहत्+"षिद्गौरादिभ्यश्च।" इति ङीष्।) क्षुद्रवार्त्ताकी। व्याकुड इति भाषा। तत्पर्य्यायः। महती २ कान्ता ३ वार्त्ताकी ४

कुली ६ राष्ट्रिका ७ स्थूलकण्टा ८ महती ९ महोटिका १० बहुपत्री ११ बालतनु १२ काण्डाङ्ग १३ कण्टफला १४ कारटी १५ वनवृन्ताकी १६। इति राजनिर्घण्टः॥ सिंही १७ प्रसहा १८ रक्तपाकी १९ सन्तापदलिका २०। इति रत्नमाला॥ अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। वातज्वरारोचकामकासश्वासहृद्रोगनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"बृहती पाचनी ग्राह्या व्याधिनी वात-
नाशिनी॥"

इति राजवल्लभः॥ ●॥

महती। इत्यमरः॥ (इयन्तु नारदस्य वीणा। कश्चित्तु विश्वावसोर्गन्धर्वराजस्य वीणा बृहती इत्याह। तथा च।

"विश्वावसोस्तु बृहती तुम्बुरोस्तु कलावती।
महती नारदस्य स्यात् सरस्वत्यास्तु कच्छपी॥"

इति माघटीकायां मल्लिनाथधृतवचनम्। १। १० ॥) उत्तरीयवस्त्रम्। वारिधानी। वाक्। कण्टकारी। इति मेदिनी॥ (मर्मस्थानविशेषः। यथा, सुश्रुते। ३। ६।

"कामदुगादुभयतः पृष्ठवंशस्य बृहती नाम तत्र शोणितातिप्रवृत्तिनिमित्तैरुपद्रवैर्म्रियते॥") छन्दोभेदः। स तु नवाक्षरपादः। यथा,—

"उक्थात्युक्था तथा मध्या प्रतिष्ठान्या सुप्र-
तिष्ठा।
गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरेव च॥
इत्यादि"। महीशमाह। बृहती नवाक्षरा यथा,
भुजगशिशुसृता नौ मः।

कुन्तलविलसत्पीनश्रोणी भुजगशिशुसृता यासीत्।
यदरिपुञ्जिवहे नारी प्रचलनमुसलम्बा भूत्॥
पूर्वैरिव सम्मुखप्रचलितु मात्र। अर्हत्निमायु
निभा पतन्ति। स्थानाधिमध्य पैद्गमया।
कालियभोगा भोगतलक्षणकलिमध्यक्षौतवया।
विधयदा भो मध्यसुतवाक्य वर्णो कोरहस्य।
मङ्गलैर्भुजगसुता।
तरला नरद्रुरिद्विसैर्वैसुभा भुजगसुता।
कथमेतु मल्लवारकवपन वन्दैरा हरि॥"

इति छन्दोमञ्जरी॥

बृहतीपतिः, पुं, (बृहतीनां वाचां पतिः।) बृहस्पतिः। इति हेमचन्द्रः॥

बृहत्, त्रि (बृह वृद्धौ + "वर्त्तमाने पृषद्बृहन्महज्जगच्छतृवच्च।" उणा० २। ८४। इति अतिप्रत्ययेन निपातनात् साधुः।) महत्। इत्यमरः॥ (यथा, माघे। २। १०।

"बृहत्सहायः कार्य्यान्तं क्षोदीयानपि गच्छति।
सम्भूयाम्भोधिमभ्येति महानद्या नगापगा॥")

बृहत्कः त्रि (इयत्प्रकारः। बृहत् + "चञ्चद्बृहतोरुपसंख्यानम्।" ५।४।३। इत्यस्य वार्त्तिकोक्त्या कन्।) बृहत्। बृहच्छब्दात् कप्रत्ययेन निष्पन्नमिदम्॥

बृहत्कन्दः, पुं (बृहत् कन्दो यस्य।) गृञ्जनः। इति रत्नमाला॥ विष्णुकन्दः। इति राजनिर्घण्टः॥

बृहत्कालशाकः, पुं, (बृहन् महान् कालशाकः।) शाकविशेषः। इति त्रिकाण्डशेषः॥ बड्कालकासुन्दिया इति भाषा॥

बृहत्कायः, पुं, (बृहन् कायः।) सङ्कुमटः। इति हारावली॥ खाम्‌का इति भाषा॥

बृहत्कुक्षि, त्रि, (बृहन् कुक्षिर्यस्य।) तुन्दिलः। इत्यमरः॥

बृहत्तालः, पुं, (बृहन् तालः।) हिन्तालः। इति राजनिर्घण्टः॥

बृहत्तिक्ता, स्त्री, (बृहन् तिक्तो यस्याः।) पाठा। इति राजनिर्घण्टः॥

बृहत्तृणः, पुं, वंशः। इति शब्दचन्द्रिका॥ (क्वचित् क्लीवेऽपि दृश्यते।)

बृहत्त्वक्, [च्] पुं (बृहती त्वक् यस्य।) सप्तच्छदवृक्षः। इति रत्नमाला॥ छातियान् इति भाषा॥

बृहत्पत्रः, पुं, (बृहत्पत्रं यस्य।) हस्तिकन्दः। इति राजनिर्घण्टः॥

बृहत्पत्रा, स्त्री (बृहत्पत्रं यस्याः।) त्रिपर्णिका। इति राजनिर्घण्टः॥

बृहत्पाटलिः, पुं, धुस्तूरः। इति त्रिकाण्डशेषः॥

बृहत्पादः पुं (बृहन् पादो यस्य।) वटवृक्षः। इति शब्दचन्द्रिका॥

बृहत्पारेवतं, क्ली (बृहत् महत् पारेवतम्।) महापारेवतम्। इति राजनिर्घण्टः॥

बृहत्पाली, [न्] पुं, वनजीरः। इति राजनिर्घण्टः॥

बृहत्पीलुः, पुं, (बृहन् पीलुः।) महापीलुः। इति राजनिर्घण्टः॥

बृहत्पुष्पी, स्त्री, (बृहत् पुष्पं यस्याः। ङीप्।) घण्टारवा। इति जटाधरः॥

बृहत्फलः, पुं, (बृहत् फलं यस्य।) चचेण्डा। इति राजनिर्घण्टः॥

बृहत्फला, स्त्री, (बृहत् फलं यस्याः।) कटुतुम्बी। महेन्द्रवारुणी। कुष्माण्डी। महाजम्बूः। इति राजनिर्घण्टः॥

बृहद्रहः, पुं, (बृहद्रहं यस्य।) मलदूषः। इति शब्दचन्द्रिका॥

बृहदम्लः, पुं, (बृहन् अम्लो यस्य।) कर्म्मरङ्गः। इति शब्दचन्द्रिका॥ कामराङ्गा इति भाषा॥

बृहदेला स्त्री (बृहती एला।) स्थूलैला। इति राजनिर्घण्टः॥

बृहद्गृहः, पुं (बृहद्गृहस्य पतिः।) कारूषदेशः। स तु विन्ध्यपर्वतस्य पश्चात् मालवदेशस्य निकटे वर्त्तते। इति हेमचन्द्रः॥ विन्ध्याद्रिपृष्ठे बृहद्गृह इति ख्यातः॥

बृहद्गोलं, क्ली (बृहत् गोलं गोलाकारफलं यस्य।) कालिन्दकम्। इति शब्दचन्द्रिका॥ तरमुज इति भाषा॥

बृहद्दलः, पुं, (बृहद्दलं यस्य।) पट्टिकालोध्रः। हिन्तालः। इति राजनिर्घण्टः॥

बृहद्दला, स्त्री, (बृहत् दलं यस्याः।) महालज्जालुः। लज्जालुपर्य्यायः। पक्षि २। इति त्रिकाण्डशेषः॥

बृहद्दीर्घः पुं, (बृहन् दीर्घं यस्य।) आम्रातकः। इति शब्दचन्द्रिका॥

बृहद्वारिका स्त्री, दुर्गा। इति शब्दमाला॥

बृहद्भानुः पुं, (बृहन्तो भानवो रश्मयो यस्य।) वह्निः। (यथा, महाभारते। ३। २९। ८।

"तपश्च मनुः पुत्रं भानुश्चाप्यङ्गिरा सृजत्।
बृहद्भानुन्तु वै प्राहुर्ब्राह्मणा वेदपारगाः॥")

चित्रकवृक्षः। इत्यमरः॥ (सत्यभामापुत्रः। यथा भागवते। १०। ६१। ९।

"चन्द्रभानुर्बृहद्भानुरतिभानुस्तथाष्टमः॥"

सत्रायणपुत्रः। यथा, भागवते। ८।१३।३५।

"सत्रायणस्य तनयो बृहद्भानुस्तदा हरिः॥"

पृथुलाक्षस्य पुत्रः। यथा, भागवते। ९।२३।११।

"चतुरङ्गो रोमपादात् पृथुलाक्षस्तु तत्सुतः।
बृहद्रथो बृहत्कर्म्मा बृहद्भानुश्च तत्सुताः॥"

बृहद्दीप्तिविशिष्टे, त्रि। यथा, ऋग्वेदे। १। ३६। १९।

"बृहद्भानो यविष्ठ्य॥"

"हे यविष्ठ हे बृहद्भानो बृहन्तो भानवो यस्य तादृश।" इति तद्भाष्ये सायनः॥)

बृहद्रथः, पुं (बृहन् रथो यस्य।) इन्द्रः। यज्ञपात्रम्। मन्त्रविशेषः। सामवेदांशः। बृहती विधेति, स्त्री। इति केचित्॥ (तिग्मपुत्रः। यथा मात्स्ये। ५०। ८९।

"तिग्माद्बृहद्रथो भावी वसुदामा बृहद्रथात्॥"

शतधनुपुत्रः। यथा, भागवते। १२।१।१४।

"शतधन्वा ततस्तस्य भविता तद्बृहद्रथः॥"

देवरातपुत्रः। यथा, भागवते। ९। १३। १४।

"तस्माद्बृहद्रथस्तस्य महावीर्य्यः सुधृतपिता॥"

तिमिराजपुत्रः। यथा, तत्रैव। ९। २२। ४१।

"तिमेर्बृहद्रथस्तस्मात् शतानीकः सुदासजः॥"

पृथुलाक्षपुत्रः। यथा, तत्रैव। ९।२३।११।

"बृहद्रथो बृहत्कर्म्मा बृहद्भानुश्च तत्सुताः॥"

प्रभूतरथे त्रि। यथा ऋग्वेदे। १। ८। ९।

"बृहद्रया बृहती विश्वमिन्वा॥"

"बृहद्रथा प्रभूतरथा।" इति तद्भाष्ये सायनः॥)

बृहद्वादी [न्] पुं, (बृहद्वदतीति। वद + णिनि।) कृष्णालुकः। इति राजनिर्घण्टः॥

बृहद्वल्कः, पुं, (बृहद्वल्कं वल्कलं यस्य।) पट्टिकालोध्रः। इति राजवल्लभः॥

बृहद्वातः, पुं, (बृहन् वातो यस्मात्।) यावनालः। इति रत्नमाला॥ देधान इति भाषा॥

बृहद्वारुणी, स्त्री महेन्द्रवारुणी। इति राजनिर्घण्टः॥

बृहन्नलः, पुं (बृहन् नलः।) महापोटगलः। इति मेदिनी॥ अर्जुनः। यथा —

"प्राप्ते किरीटी गाण्डीवी गुडाकेशो बृहन्नलः।
अर्जुनः फाल्गुनो जिष्णुर्विजयश्च धनञ्जयः॥"

सव्यसाची सुभद्रश्च प्रम्लभेदी कपिध्वजः ।
वर्णोपत्यापि बीभत्सुः ।” इति त्रिकाण्डशेषः ।
अपि च ।
“अर्ज्जुनः फाल्गुनः पार्थः सव्यसाची धनञ्जयः ।
राधावेधी किरीटीन्द्री जिष्णुः श्वेतहयो नरः ।
बृहन्नलो गुडाकेशः सुभद्रेशः कपिध्वजः ।
बीभत्सुः कर्णजित्तस्य गाण्डीवं गाण्डिवं धनुः ॥”
इति हेमचन्द्रः ।

बृहन्नला, स्त्री, अर्ज्जुनः । इति मेदिनी । द्वादशवर्षवनवासानन्तरमज्ञातवासे विराटभवने विराटकन्यायाः नृत्यगीतादिशिक्षार्थं स्त्रीवेशेऽर्ज्जुनो बृहन्नलेति नाम्ना ख्यातोऽभूत् । यथा,
अर्ज्जुन उवाच ।
“गायामि नृत्याम्यथ वादयामि
भद्रोऽस्मि नृत्ये कुशलोऽस्मि गीते ।
त्वमुत्तरायै प्रदिशस्व मां स्वयं
भवामि देव्या नरदेव ! नर्त्तकः ॥
इदन्तु रूपं मम येन किन्तव
प्रकीर्त्तयित्वा भृशशोकवर्द्धनम् ।
बृहन्नलां मां नरदेव विद्धि
सुतं सुतां वा पितृमातृवर्ज्जिताम् ॥
विराट उवाच ।
ददामि ते हन्त वरं बृहन्नले
सुतां च मे नर्त्तय याश्च तादृशीः ॥”
इति महाभारते विराटपर्व्व ।

बृ(वृ)हस्पति, पुं (बृहतां वाचां पतिः । “पारस्करेति ।” ६ । १ । १५७ । इति सुट् निपातश्च ।) अङ्गिरसः पुत्त्रः । स च देवानां गुरुः धर्म्मशास्त्रप्रयोजकः नवग्रहमध्ये पञ्चमग्रहश्च । तत्पर्य्यायः । सुराचार्य्यः २ गीष्पतिः ३ धिषणः ४ गुरुः ५ जीवः ६ आङ्गिरसः ७ वाचस्पतिः ८ चित्रशिखण्डिजः ९ । इत्यमरः ॥ उतथ्यानुजः १० गोविन्दः ११ वाक्पतिः १२ द्वादशार्च्चिः १३ गिरीशः १४ दिदिवः १५ पूर्व्वफल्गुनीभवः १६ । इति जटाधरः । सुरगुरुः १७ वाक्पतिः १८ वचसाम्पतिः १९ इज्यः २० देवेज्यः २१ बृहताम्पतिः २२ इज्यः २३ वागीशः २४ जीवः २५ दीदिविः २६ द्वादशकरः २७ प्राक्फाल्गुनः २८ गौरवः २९ । इति शब्दरत्नावली ॥ स च पीतवर्णः । ऐशानकोणपुष्करमध्यश्वकाम्बोजदेशवासगुणमधुररसवनुर्मीनराशिपुष्पभचन्द्रमधुपद्मरागमणिसिन्धुदेशानां अधिपतिः । मकुटधरशरीरः । मधुरः । चतुर्भुजः । अभयवरकमण्डलुदण्डधारी । अस्याधिदेवता ब्रह्मा । प्रत्यधिदेवता इन्द्रः । स तु कर्म्मात्तः । आङ्गिरोद्विजपुत्त्रः । प्रातःकाले प्रबलः । शुभग्रहः । देवदत्तस्वामी । हहः । रक्तफलस्वामी । वातपित्तकफात्मकः । सत्त्विककर्म्मकर्त्ता । आङ्गिरोगोत्रः । इति ग्रहयागतत्त्वादयः ॥ ७ ॥ तद्वारजातफलम् ।
“गुरोर्ज्जमको हृष्टकामो
विद्याविनोदो चतुरः प्रगल्भः ।
आचार्य्यपूज्यो मधुरस्वभावो
वारे भवेद्देवगुरोर्मनुष्यः ॥”
इति कोष्ठीप्रदीपः ॥ ७ ॥

स च शिवस्य गुरुपुत्त्रः यथा —
महेन्द्र उवाच ।
“कथं वा देवकर्त्तुश्च विद्वानो योगिनां गुरो ।
कल्पान्तरस्य धर्म्मेण गुरुपुत्त्रो बृहस्पतिः ।
ततो भावी महादेव कथं शिष्यो गुरो पितुः ।
महोवाच ।
कथयेममतिगुह्यं च पुरावृत्तं पुरन्दर ।
इमां पुरा प्रवृत्तिञ्च कथयामि निशामय ॥
ब्रतवनुधा कर्म्मदोषात्तार्था अङ्गिरस पुरा ।
व्रतं चकार महाकालात् त्वष्टुः परमात्मनः ॥
व्रतं पुंसवनं नाम वत्सरैकं चकार या ।
सनत्कुमारो भगवान् कारयामास तां व्रतम् ॥
स्वेच्छामयं परं ब्रह्म भक्तानुग्रहविग्रहः ।
तदागत्य च गोलोकात् परमात्मा कृपामयः ॥
स व्रतान्तप्रसन्नोऽसौ तामुवाच कृपानिधिः ।
प्रणतां साश्रुनेत्राञ्च विनीताञ्च तथा स्तुताम् ॥
श्रीकृष्ण उवाच ।
गृहाणेदं यथाकालं मम तेजःसमन्वितम् ।
सुन्दरं मदपुत्रस्ते भविष्यति महाव्रते ॥
मतिर्न्देवश्च देवानां बृहतां ज्ञानिनां वरः ।
पुत्रस्ते भविता साध्वि ! महदेव भविष्यति ।
महदेव भवेद्भूयो हि स च महत्पुत्रकः ।
स्वशेषे मम पुत्रोऽयं चिरजीवी भविष्यति ॥
वरतो वीर्य्यमेवेश देवश्च पालकस्तथा ।
विद्यामन्त्रगुणानाञ्च प्रवीरः प्रथमः सुतः ॥
इत्युक्त्वा राधिकानाथः जगाम च ययौ पुरा ।
श्रीकृष्णवरपुत्रोऽयं भावी सुरगुरुः स्वयम् ॥
जगुहुय महामायं शिवाय प्रददौ पुरा ।
दिव्य वर्षशिवसख तपःवर्षे हिमालये ।
सुयोगध्यानमस्तं तेन मात्मा मम परम् ।
सम्प्राप्तविष्णुमायाश्च ओमीश वाक्यं हृदम् ॥
अमूल्यं सकवचं समन्तं ज्ञानमाचरम् ।
कृपामयं स्तुतस्तेन श्रीकृष्णश्च परात्परः ॥
शिवलोके शिवा या च विष्णुमाया शिव
प्रिया ।
शक्तिर्नारायणक्षेत्रे तेन नारायणो स्मृता ।
तेन तु सर्व्वदेवानां आविर्भूता सनातनी ।
प्रदान देवविकरं देवेभ्यः प्रददौ परम् ॥
कल्पान्ते इयकन्या च या जनग्रहीत ततो ।
विद्यया तत्तु ब्रह्मा योगेन विद्ययोनितो ।
ततः प्रबलन्या वा वाणी च मनुविन्दता ।
बालेन ब्रह्मतपसा प्रहर्द्धं माय प्रहरी ।
श्रीकृष्णो हि गुरुः शम्भोः परमात्मा परात्परः ।
तस्यैव वरपुत्रोऽयं स्वयमेव बृहस्पतिः ।
अतो देवो सुरगुरुर्गुरुपुत्त्रः शिवस्य च ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६६ अध्यायः ।
(पुरोहितः । मन्त्रावर्ति पु वि । यथा, ऋग्वेदे । ३ । ६ । ८ ।
“बृहस्पतिं वः सुयजं विर्णेव ।”
“बृहस्पतिं बृहतां महतां मन्त्राणां पालयितारं देवं उक्तगणस्य पुरोहितं वा ।” इति तद्भाष्ये सायणः ।)

बृ(वृ)हस्पतिचक्र, क्ली, (बृहस्पतेः चक्रम् ।) नृणां शुभाशुभज्ञानार्थं बृहस्पतिसञ्चारकालीनअश्विन्यादिसप्तविंशतिनक्षत्रनराकारचक्रम् । यथा —
“शीर्षे चत्वारि राज्यं वदनजदिरपि करे दक्षिणे
चापि सौख्यं
येक कण्ठे विभूतिं मदनमदनमितं वक्षसि
प्रीतिदत्तम् ।
पादस्थाः षट् च पीड़ां पुनरपि वामहस्ते
च मृत्युं
नेत्रे सौखि प्रदत्तं सुखमथ निधने वाक्पतेः
सञ्चरन्ति ।”
इति ज्योतिस्तत्त्वम् ।

बृ, शि न वृत्याम् । इति कविकल्पद्रुमः ॥ (स्वा०-उभ० सक० सेट् ।) शि न, बृणाति बृणीते । भूष । भूषि । इति दुर्गादासः ।

बे, ऐ न सूतौ । इति कविकल्पद्रुमः ॥ (भ्वा० उभ० सक० अनिट् ।) स्वतिसन्तानम् । ऐ, अयात् । न, वयति वयते तन्तु तन्तवायः । इति दुर्गादासः ।

बेकट, पुं वैकटिकः । मणिभेदः । भेटको इति भाषा । युवा । इति मेदिनी । विदूषकः । इति शब्दरत्नावली । तत्र पवर्गीयवकारादौ लिखितः ।

वेग, पुं (विज + घञ् ।) प्रवाहः । तत्पर्य्यायः ओघः २ रयो ३ धारा ४ । इति हेमचन्द्रः ॥ जवः । तत्पर्य्यायः । रंहः २ तरः ३ रयः ४ स्यदः ५ । इत्यमरः ॥ (यथा, मनौ । ५ । १०८ ।
“नदी वेगेन शुध्यति शोधं नदी वेगेन शुध्यति ॥”)
महाकालफलम् । इति मेदिनी । रेतः । इति हेमचन्द्रः । मलविष्ठादिनिर्गमप्रवृत्तिः । इति भरतः । वक्ष्यारोपितः । यथा,—
“अधारणीयोऽष्टौ वेगावक्षारी भवतो
गुणाः ।
अष्टौ धारणीयो रूपं द्वौ वेगश्च वेगाय ।
धार्य्यणीयोऽष्टौ वेगश्च दशमञ्च तु वमथुम् ।
रूपं इक्षणा वेगो धारित्वेत चतुर्दश ॥”
इति भावप्रकाशे । ७ ।
(यथा भागवते । ७ । ८ । २६ ।
“ततोऽभिपद्याभ्यहनन्महासुरो
बला नृसिंहं गदयोरुवेगया ।”)
वेगधारणनिषेधो यथा —
“वेगरोधो न कर्त्तव्यश्च कोपवेगतः ।”
इति आह्निकतत्त्वधृतविष्णुधर्म्मोत्तरवचनम् ।
अपि च ।
“वमनान्न वहनाच्च मन्दाशीती विषमीविषु ।
न वेगधारणमेषोऽपि च चामावीर्यस्य भारतेषु ॥”
इति रामचन्द्रः ॥

वेगनाशन, पुं, (वेगस्य नाशनं येन ।) श्लेष्मा । इति शब्दरत्नावली ॥

वेगसर, पुं, (वेगेन सरति गच्छतीति । सृ + अच् ।) वेगगामिखरः । तत्पर्य्यायः । वेसरः २ अश्वतरः ३ । इति हेमचन्द्रः ॥

वेगित, त्रि, (वेगः सञ्जातोऽस्य । तारकादित्वात् इतच् ।) वेगविशिष्टः । यथा आयुर्व्वेददीपे ।
"न वेगितोऽन्यकार्य्यः स्यात् नाजित्वा साध्यमामयम् ॥"
इत्याह्निकतत्त्वम् ॥

वेगिहरिण पुं (वेगी वेगवान् हरिणः ।) सीकारो मृगः । इति राजनिर्घण्टः ॥

वेगी [न्] त्रि (वेगोऽस्यास्तीति । वेग + इनि ।) वेगवान् । तत्पर्य्यायः । जङ्घाकारिकः २ जाङ्घिकः ३ तरस्वी ४ त्वरितः ५ प्रजवी ६ जवनः ७ जवः ८ । इत्यमरः ॥ (यथा, हरिवंशे भविष्यपर्व्वणि । २० । १४ ।
"अश्वाश्च वेगिनः सन्ति रथा वायुजवा मम ॥")
श्येनपक्षी । इति राजनिर्घण्टः ॥

वेचा, स्त्री, (विच पृथग्भावे + अच् । टाप् ।) भृत्यम् । विचिर्धौ न पृथक्त्वे इत्यस्मात् अच् तत आप् । यथा । वेचा भृत्यश्च वेतनम् । इति हलायुधः ॥

वेचाणी, स्त्री, (विच + अच् । तमानयतीति । आ + नी + ड । गौरादित्वात् ङीष् ।) सोमराजी । इति शब्दचन्द्रिका ॥

वेट, स्त्री (विट् + अच् ।) खण्डविच्छिन्नचन्दनम् । इति राजनिर्घण्टः ॥

वेटा, स्त्री, (वेट + टाप् ।) नौका । इति हेमचन्द्रः । वेडेति क्वचित् पाठः ॥

वेड्मिका, स्त्री, रोटिकाविशेषः । यथा,—
"माषपिष्टिकया पूर्णगर्भा गोधूमचक्रकम् ।
रचिता रोटिका सैव प्रोक्ता वेड्मिका बुधैः ॥
अथ वेड्मिका बल्या वृष्या रुच्यानिलापहा ।
उष्णा सन्तर्पणी गुर्व्वी बृंहणी शुक्रला परम् ।
भिन्नमूत्रमलास्तन्यमेदःपित्तकफप्रदा ।
गुदकीलार्द्दितश्वासपक्षशूलानि नाशयेत् ॥"
इति भावप्रकाशः ॥

वेण ऋ ङ निशामने । वादित्रग्रहणे ज्ञाने चिन्तायां च । इति कविकल्पद्रुमः ॥ (भ्वा-उभ-सक-सेट् ।) ऋ अविवेणत् । ङ वेणते वेणति । निशामनं चाक्षुषज्ञानम् । वादित्र हरणादि ग्रहणादानं वादित्रादानम् । वादित्रं वाद्यविषयक्रिया इत्येकोऽर्थ इत्यन्ये । इति दुर्गादासः ॥

वेण, पुं (वेण + अच् ।) वर्णसङ्करजातिविशेषः । स तु अम्बष्ठ्यां वैदेहकाज्जातः । यथा,—
"वैदेहकेन त्वम्बष्ठ्यामुत्पन्नो वेण उच्यते ।"
इति मानवे । १० । १९ ॥
[illegible] । स तु पृथुराजपिता । यथा, विष्णुपुराणे ।
"स पुत्त्रेण तु जातेन वेणोऽपि त्रिदिवं ययौ ।
पुन्नाम्नो नरकात्त्रातः स तेन सुमहात्मना ॥"
तेन सुपुत्त्रेण [illegible] पृथुना । इति शुद्धितत्त्वम् ॥

वेणि स्त्री (वी + "वीज्याज्वरिभ्यो निः ।" उणा० ४ । ४८ । इति निः । पृषोदरादित्वात् णत्वम् ।) प्रोषितभर्त्तृकादिधार्य्यकेशरचनाविशेषः । इति भरतः ॥ विरहिणीकेशबन्धः । इति जटाधरः ॥ (यथा, माघे । १४ । ३ ।
"तत्र नित्यविहितोपहूतिषु
प्रोषितेषु पतिषु द्युयोषिताम् ।
गुम्फिता शिरसि वेणिरभवन्
न प्रफुल्लसुरपादपस्रजा ॥")
तत्पर्य्यायः । प्रवेणिः २ । इत्यमरः ॥ वेणी ३ प्रवेणी ४ । इति भरतः ॥ वेणिका ५ । इति शब्दमाला ॥ जलप्रवाहः । इति जटाधरः ॥ यथा । प्रयागे गङ्गायमुनासरस्वतीसङ्गमः त्रिवेणी ॥

वेणिका स्त्री, (वेणि + कन् । टाप् ।) केशबन्धनविशेषः । इति शब्दमाला ॥

वेणिवेधनी स्त्री जलौका । इति त्रिकाण्डशेषः ॥

वेणिमाधव, पुं, प्रयागस्थमाधवाख्यचतुर्भुजदेवताविशेषः । इति लोकप्रसिद्धिः ॥

वेणी स्त्री, (वेणि + वा ङीष् ।) प्रवेणी । चुलेर बिनुनी इति भाषा । इति भरतः । तत्पर्य्यायो वेणिशब्दे द्रष्टव्यः । (यथा, कुमारे । २ । ६१ ।
"तस्यात्मा शितिकण्ठस्य सैनापत्यमुपेत्य वः ।
मोक्ष्यते सुरबन्दीनां वेणीर्वीर्य्यविभूतिभिः ॥")
देवताडवृक्षः । इत्यमरः ॥ मेषी । प्रवाहः । इति हेमचन्द्रः ॥ नदीविशेषः । इति मेदिनी ॥ तस्या उत्पत्तिर्यथा,—

पृथुरुवाच ।
"कृष्णावेण्योस्तटाद्रूपमाश्रितविष्णुमुखे पुरा ।
ब्रह्मशरीरात् कृष्णा निरता कथिता मया ॥
प्रभावस्तु तयोर्मध्ये किंवा भेदस्तयोर्वा ।
तन्मे कथय धर्म्मज्ञ । विस्मयोऽत्र महान् मम ॥

नारद उवाच ।
ब्रह्मा सञ्चक्रतुः यायाजिको यागान्नीश्वरः ।
तत्प्रभावस्तु नाल वक्तुं चतुर्म्मुखः ।
तथापि तदुत्पत्तिं कीर्त्तयिष्यामि ते प्रभो ।
चाक्षुषस्यान्तरे पूर्व्वं सर्व्वदेवपितामहः ।
स ह्यद्रिशिखरे रम्ये यज्ञार्थोपगतोऽभवत् ।
स ब्रह्मा यज्ञसम्भारान् सर्व्वदेवसमन्वितः ।
कृत्वा हरिहराभ्यां हि तद्गिरेः शिखरं ययौ ।
अस्मादयो मुनिगणा मुहूर्त्ते वरवेदिके ।
तस्य दीक्षाविधानाय यथार्थ चक्रुरादरात् ।
अथ ज्येष्ठां सतीं पत्नीमाहूयाचक्रुरीश्वराः ।
सा स्वरेणागमत् तावत् भृगुर्विष्णुमुवाच ह ॥

भृगुरुवाच ।
स्त्रियो स्वरा तथाहूता आगमिष्यति नाधि
परम् ।
मुहूर्त्तोऽतिक्रमेत् चेत् भार्य्यां दीक्षाविधिः कथम् ॥

विष्णुरुवाच ।
नायाति चेत् स्वरा शीघ्रं गायत्र्याश्च विधीयताम् ।
यथापि न भवेदस्य भार्य्या हि पुण्यकर्म्मणि ॥

नारद उवाच ।
एवमेव हि रुद्रोऽपि विष्णुवाक्यमन्वत ।
तच्छ्रुत्वा स भृगुर्ब्रह्मा गायत्रीं प्रकृतादरात् ।
निवेश्य दक्षिणे भागे दीक्षाविधिमथाकरोत् ।
यावद्दीक्षाविधिं तस्य विधिज्ञास्तु वीश्वराः ।
तावदभ्यागमत् तत्र स्वरा यज्ञस्थले नृप ।
सपत्नीं दीक्षितां दृष्ट्वा गायत्रीं ब्रह्मणा सह ।
सपत्नी सा परा क्रोधात् स्वरा वचनमब्रवीत् ॥

स्वरोवाच ।
अपूज्या यत्र पूज्यन्ते पूज्यानाञ्च व्यतिक्रमः ।
त्रीणि तत्र भविष्यन्ति दुर्भिक्षं मरणं भयम् ।
ममासने कनिष्ठेयं भवद्भिः सन्निवेशिता ।
तस्मात् सर्व्वे जडीभूता नदीरूपा इव निश्चितम् ।
इयञ्च दक्षिणे भागे स्थापिता मद्वासने ।
तस्माल्लोके यथाद्रष्टा तद्रूपास्तु निम्नगा ॥

नारद उवाच ।
तच्छ्रुत्वा शापमाकर्ण्य गायत्री कम्पिताधरा ।
समुत्थायाशपद्वैर्य्यमित्याखापि तां स्वराम् ।

गायत्र्युवाच ।
यथ भर्त्ता यथा ब्रह्मा ममापीश तथा प्रभुः ।
तथा त्वमपि यस्मात्त्वं भव त्वमपि निम्नगा ॥

नारद उवाच ।
ततो हाहाकृता सर्व्वे शिवविष्णुसुरेश्वराः ।
प्रणम्य दक्षवत् भूमौ स्वरां तत्र विनिन्युः ॥

देवा ऊचुः ।
देवि अस्मा यत् धर्म्मं ब्रह्मादयाः यथाद्युता ।
यदि सर्व्वे जडीभूता भविष्यामोऽत्र निम्नगाः ।
तदा त्रैलोक्यं चैतत् विनङ्क्ष्यति न निश्चितम् ।
अविवेककृतस्तस्मात् शापोऽयं विनिवर्त्त्यताम् ॥

स्वरोवाच ।
नाद्यैतो हि मखाध्यक्षो भवद्भिर्वै सुरोत्तमाः ।
तस्माद्भि भवत्सम्मतोऽयमवितथं खलु ।
नापि महच्च शैलदेवा यथा स्वापि ।
तस्मात् स्वांशेनैकीभूता यूयं भवत निम्नगाः ।
आवामपि स्वपत्नी च स्वांशाभ्यामपि निम्नगे ।
भविष्यावोऽत्र भो देवाः पश्चिमाभिमुखावहे ॥

नारद उवाच ।
इति तद्वचनं श्रुत्वा ब्रह्मविष्णुमहेश्वराः ।
स्वरूपाभवन्स्तत्र स्वांशेनैव तदा नृप ।
तत्राद्विष्णुरभूत् कृष्णा वेणी देवो महेश्वरः ।
ब्रह्मा ककुद्मिनी नाम्ना पृथगेव बभूव ह ॥"
इति पाद्मोत्तरखण्डे ११६ अध्यायः ॥
अन्यच्च ।
"सरस्वती रजोरूपा तमोरूपा कलिन्दजा ।
सत्त्वरूपा च गङ्गात्र नयन्ति ब्रह्मनिर्गुणम् ॥
एवं वेणी हि नि वेणी ब्रह्मणं समाश्रयन्ति ।
कर्म्मोर्म्मिगुहदेवाश्च यत्र महाद्भुताश्च ह ॥
कामीति कामदपदा सुखमिह प्रदा
मोक्षार्थेन्यत्र मोक्षविमोक्षदा च ।

तद्दोर्युगं मम वरस्यासिदिदं तदीया
वेणीति याच मदिरात्ययसम्भ्रमि ।"
इति काशीखण्डे ७ अध्यायः ।

वेणीर, पुं आरिष्टवृक्षः । इति शब्दचन्द्रिका ।

वेणीसंहारः पुं (वेण्याः द्रौपदीवेणिकायाः संहारो भीमेन मारितदुर्य्योधनशोणितेन मोचनं यत्र ।) भट्टनारायणकृतवयस्ताङ्कसुत्तनाटकविशेषः । तत्र दुर्य्योधनकर्त्तृकद्रौपदीकेशाकर्षणावधि सहधारणान्तर तस्या वेणीबन्धनपर्य्यन्तविवरणमस्ति । तस्यायमाद्यश्लोकः ।
'निषिद्धैरप्येभिर्लुलितमकरन्दो मधुकरैः
करैरिन्दोरन्तश्छुरित इव सम्भिन्नमुकुलः ।
विधत्तां सिद्धिं नो नयनसुभगामस्य सदसः
प्रकीर्णः पुष्पाणां हरिचरणयोरञ्जलिरयम् ।"

वेणु पुं, (अज+"अजिवृरीभ्यो निच ।" उणा ३। ३८ इति णुः । सच नित् । अजर्वीभावो गुणश्च ।) वंशः । इत्यमरः । (यथा, रामायणे ।४।४३।१७।
"तं तु देशमतिक्रम्य शैलोदा नाम निम्नगा ।
उभयोस्तीरयोस्तस्याः कीचका नाम वेणवः ।")
वंशी । इति शब्दरत्नावली । वेणोरुत्पत्ति र्यथा,—
"वेणुर्वे श्रृणु त्वं विप्र तथापि विदितं त्वया ।
हिम चाचीच्छान्तमना तत्तपोभ्यामनादिभिः ।
नाम्ना देवव्रतो राजा कर्म्मकाण्डविशारदः ।
अग्निश्चवणमात्रमध्यवर्त्ती क्रियापरः ।
एकदापि न शुभाय यस्मिञ्छ्रौतीति भूपते ।
तस्य गेहमथाभ्यागादिन्द्रान्तशततिमयः ।
महान् कोऽपि पूर्णो य सुवर्णोदकधारिकाः ।
तत्पार्श्वस्तु यदि किञ्चित् फलमूल न्यवेदयत् ।
आगमादि पत्र किञ्चित् तस्मै प्रौढा ददौ सुधीः ।
अमङ्गलाभिस्त ततः सोऽप्ययशात् हिमवन् ।
तेन पापेन सञ्जात वेणुत्वमतिदारुणम् ।
तेन पुण्येन तस्यार्थो नदीपथिमतो गतः ।
अधुना सोऽपि राजैव केतुमाले विराजते ।
युगान्ते तु विष्णुपरो भूत्वा ब्रह्मत्वमाप्स्यति ।"
इति पाद्मे पातालखण्डे ५ अध्यायः ।
नृपविशेषः । इति मेदिनी ।

वेणुक, क्ली, तोत्रम् । इति हेमचन्द्रः । (पुं, वंशो वेणुः । "संज्ञायां कन् ।" ५।३।८७। इति कन् । स्व"वेणुः । यथा, हरिवंशे भविष्यपर्व्वणि । ६८ । ६८ ।
"पश्येद बहुधा देव भिन्न भिन्न सहस्रशः ।
शृङ्गाणि दारवं पाव हैमवान् वेणुकान् बहून् ।)

वेणुकर्करः पुं, करीरवृक्षः । इति त्रिकाण्डशेषः ।

वेणुज , पुं (वेणोर्जायते इति । जन+ड ।) वेणुयवः । इति राजनिर्घण्टः । (वेणुजात मात्रे, त्रि । यथा, भागवते । १ । १ । २ ।
"वने यथा वेणुजवह्निसंश्रयम् ।")

वेणुध्मः पुं (वेणुं धमतीति । ध्मा+क ।) वेणुवादकः । इत्यमरः ।

वेणुनं क्ली मरिचम् । इति रत्नमाला । वेणुज मिति च पाठः ।

वेणुपत्री, स्त्री, (वेणोरिव पत्र यस्याः ।) वंशपत्रीतृणः । तत्पर्य्यायः । हिङ्गुपत्री २ नाडी ३ हिङ्गुशिराटिका ४ । इति रत्नमाला ।

वेणुबीज, क्ली, (वेणोर्बीजम् ।) वेणुयवः । इति राजनिर्घण्टः ।

वेणुयव , पुं, (वेणोर्यवः ।) वंशयवम् । चाउल इति भाषा । (यथा,विष्णुपुराणे ।१।६।२५।
"तथा वेणुयवा प्रोक्तास्तद्वन् मर्कटका मुने ।",
तत्पर्य्यायः । वेणुज २ वेणुबीजम् ३ वंशज ४ वंशतण्डुलः ५ वंशधान्यम् ६ वंशाङ्कुरः ७ । अस्य गुणाः । रूक्षत्वम् । कषायत्वम् । कटुपाकित्वम् । बद्धमलत्वम् । कफघ्नत्वम् । वातपित्तकरत्वम् । सारकत्वञ्च । इति राजनिर्घण्टः । अपि च ।
"तद्यवास्तु सरा रूक्षा कषाया कटुपाकिनः ।
वातपित्तकरा उष्णा बद्धमूत्रा कफापहाः ।"
इति भावप्रकाशः ।

वेणुवादः, पुं, (वेणुं वादयतीति । वद+णिच+अण ।) वैणवः । इति रत्नमाला ।

वेत, पुं, वेत्र । इति राजनिर्घण्टः ।

वेतनं, क्ली, (वी+"वीपतिभ्यां तनन् ।" उणा० ३ । १५ । इति तनन् ।) कर्म्मदक्षिणा । माहिना इति मजुरि इति च भाषा । तत् पर्य्यायः । कर्म्मण्या २ विधा ३ भृत्या ४ भृतिः ५ भर्म्म ६ भरण्यम् ७ भरणम् ८ मूल्यम् ९ निर्व्वेशः १० पणः ११ । इत्यमरः । विष्टिः १२ । इति जटाधरः । (यथा मनौ । ७ । १२६ ।
"पणो देयोऽवकृष्टस्य षडुत्कृष्टस्य वेतनम् ।")
जीवनोपायः । तत्पर्य्यायः । आजीवः २ जीवनम् ३ वार्त्ता ४ जीविका ५ वृत्तिः ६ । इति हेमचन्द्रः । रूप्यम् । इति शब्दचन्द्रिका ।

वेतस, पुं, (वि+"वेञस्तुट् च ।" उणा ३।११८ इति असच् । तुडागमश्च ।) लताविशेषः । वयसा इति भाषा । इति भरतः । वेति चञ्चलतां गच्छति इति वेतसः । नीचः स्यात् वेतसवत् । वाप्नोति तत् । इत्यमरटीकायां भरतः । तत् पर्य्यायः । रथः २ अभ्रपुष्पः ३ विदुलः ४ शीतः ५ वानीरः ६ वञ्जुलः ७ । इत्यमरः । निचुलः ८ । इति रत्नमाला । मधुपुष्पः ९ रथाभ्रः १० वेतसी ११ । इति शब्दरत्नावली । निचुलः १२ दीर्घपत्रकः १३ कलनः १४ मञ्जरीनम्रः १५ सुषेणः १६ गन्धपुष्पकः १७ । (यथा, भागवते ।१।१०।१७।
"कदम्बवेतसनलनीपवञ्जुलकैर्वृतम् ।")
अस्य गुणाः । स्वादुकटुत्वम् । शीतत्वम् । भूतरक्षःपित्तास्रदाहरोगकुष्ठदोषनाशित्वञ्च । इति राजनिर्घण्टः । अस्य पर्य्यायगुणाः ।
"वेतसो नम्रकः प्रोक्तो वानीरो रक्तपल्लवः ।
अभ्रपुष्पश्च विदुलो रथः शीतश्च कीर्त्तितः ।
वेतसः शीतलो दाहशोथार्शोयोनिरुक्प्रणुत् ।
हन्ति वीसर्पकृच्छ्रास्रपित्ताश्मरिकफानिलान् ।"
इति भावप्रकाशः ।
जलवेतसस्य पर्य्यायगुणाः । अथ जलवेतसः ।
"निकुञ्जकः परिव्याधो नादेयो जलवेतसः ।
जलजो वेतसः शीतः संग्राही वातकोपनः ।"
इति भावप्रकाशः ।
(जलजातामिः । यथा, ऋग्वेदे । ४ । ५८ । ५ ।
"हिरण्ययो वेतसो मध्य आसाम् ।"
"वेतसोऽपसम्भवोऽग्निः ।" इति तद्भाष्ये सायनः ।")

वेतसाम्लः पुं, (वेतसप्रधानोऽम्लः ।) अम्लवेतसः । इति जटाधरः ।

वेतसी, स्त्री वेतसः । इति शब्दरत्नावली । (यथा साहित्यदर्पणे । १ ।
"रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते ।")

वेतस्वान्, [त्] त्रि (वेतसाः सन्त्यत्र ।"कुमुदनडवेतसेभ्यो ड्मतुप ।"४ । २ । ८७। इति ड्मतुप । "मादुपधायाः ।" ८ । २ । ९ । इति मस्य वत्वम् ।) वेतसलताबहुलदेशः । इत्यमरभरतौ ।

वेताल, पुं, द्वारपालकः । इति शब्दरत्नावली । भूताधिष्ठितशवः । इत्यमरः । मल्लभेदः । इति भरतः । शिवगणाधिपविशेषः । यथा —
सगर उवाच ।
"कोऽसौ भैरवनामाभूत् को वा वेतालसंज्ञक ।
कथं वा तौ शरीरेण मानुषेण गणाधिपौ ।
अभूतां द्विजशार्द्दूल तन्मे वद महामुने ।
और्व्व उवाच ।
शृणु राजन् प्रवक्ष्यामि महाकालस्य भृङ्गिणः ।
भैरवस्यापि चरितं वेतालस्य महात्मनः ।
योऽसौ भृङ्गी हरसुतो महाकालोऽपि भूपते ।
तावेव गौरीशापेन सम्भूय नरयोनितः ।
वेतालभैरवौ जातौ पृथिव्यां नृपवेश्मनि ।"
इति कालिकापुराणे ४५ अध्यायः ।
तस्योत्पत्त्यादि यथा —
श्रीदेव्युवाच ।
"ममैव मानुषो गर्भोऽयं इवमेतेन ।।
बिभर्मि तेऽत्र वचनादुत्पादय सुतद्वयम् ।
प्रविवेश ततो देवी स्वयं तारावतीतनौ ।
महादेवोऽपि तस्यास्तु कामार्थं समुपस्थितः ।
तत आपतिताविच्छा देवी तारावती सती ।
कामयामं महादेवं स्वयमेवाभवत्तदा ।
तस्मिन् कालेऽभवद्गर्भं कापाली चान्द्रिमान्
सुतः ।
कामादनान्ते तस्याद्य सद्यो जात सुतद्वयम् ।
असवत्तपनाद्दू च तथा शाखामृगाननम् ।
अथ तारावती देवी सुतौ दृष्ट्वा विनिर्गतौ ।
भूमौ भक्तिविशेषेण मन्युना समुपाविशत् ।
भर्त्तुरागमन प्रवत् वाञ्छती मर्म्माविलम् ।
अथ चन्द्रशेखरः च राजा चन्द्रशेखरः ।
प्रासादपृष्ठे चागच्छदुत् तारावती तदा ।
ददर्श पतितौ भूमौ सुतवेशौ विकृताननौ ।
सुतौ च पतितौ भूमौ चन्द्रशेखरनन्दनौ ।
वानरास्यौ च न्यस्य परमोभ ववाच च ।
तत च राजा कन्दरत् न तौ प्रत्यक्षमुखा ।
मार्कण्डेये श्मशानेऽपि वर्जितुं त्यक्तुं न श्क्यौ ।
विस्मितो तविशाद्दू"

और्व्व उवाच ।
"तत्रत्ययोर्नाम चक्रे नारदो भगवानृषिः ।
ज्येष्ठो भैरवनामाभूत् वीरः पुत्रो भयङ्करः ।
वेतालवदनः कश्चित् वेतालोऽभूत्तथापरः ।
इति चक्रे तयोर्नाम देवर्षिर्भगवान् सुत ॥"
इति कालिकापुराणे ४८ अध्यायः ॥

वेतालभट्टः, पुं, राजविक्रमादित्यस्य नवरत्नान्तर्गतरत्नविशेषः । यथा —
"धन्वन्तरिः क्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य ॥"
इति नवरत्नश्लोकः ॥

वेत्ता, [ऋ]-त्रि ज्ञाता । वेत्तीति विद्धातोस्तृच्प्रत्ययेन सिद्धमिदम् ॥ (यथा हितोपदेशे ।
"यथा खरश्चन्दनभारवाही
भारस्य वेत्ता न तु चन्दनस्य ॥")

वेत्र पुं, (वी+"गुधृवीपचिवचि ।" उणा ४ । १६६ । इति त्र ।) स्वनामख्यातवृक्षः । तत्पर्य्यायः । वेतः २ योगिदण्डः ३ सुदण्डः ४ बहुपर्व्वकः ५ ॥ (यथा, शाकुन्तले । ५ ।
"आचार इत्यवहितेन मया गृहीता
या वेत्रयष्टिरवरोधगृहेषु राज्ञः ॥")
स तु पञ्चविधः । तस्य गुणाः । शीतत्वम् । कषायत्वम् । भूतपित्तहरत्वञ्च । इति राजनिर्घण्टः ॥ तत्राग्र वेताग्र इति ख्यातम् । तद्गुणाः । दीपनत्वम् । रुच्यत्वम् । तिक्तत्वम् । पित्तकफादिघ्नत्वञ्च । तत्फलगुणाः । वातपित्तकारित्वम् । अम्लत्वञ्च । इति राजवल्लभः ॥ असुरविशेषः । तस्य प्रमाणं वेत्रासुरशब्दे द्रष्टव्यम् ॥

वेत्रकीय, त्रि, (वेत्र+"नडादीनां कुक् च ।" ४ । २ । ९१ । इति छ कुक् च ।) वेत्रयुक्तदेशादिः । इति सिद्धान्तकौमुदी ॥ (एकचक्रा नगरी तु वैत्रकीयगृहत्वेन तदाख्ययापि प्रसिद्धा । यथा, महाभारते । १ । १६१ । ८ ।
"वैत्रकीयगृहे राजा नायं नयमिहास्थितः ।
उपायं तं न कुरुते यत्नादपि स मन्दधीः ॥")

वेत्रधरः, पुं (वेत्रस्य धरः ।) द्वारपालः । इति हलायुधः ॥ यष्टिधारके, त्रि ॥

वेत्रधारकः, पुं, (वेत्रस्य धारकः ।) द्वारपालः । इति जटाधरः ॥

वेत्रवती, स्त्री, नदीविशेषः । इत्यमरः ॥ सा तु मालवदेशात् कालपीनामनगरे यमुनायां मिलिता । वेत्राहुर भाषा । यथा, वराहपुराणे ।
"वेत्रवत्युदरे जातो नाम्ना वेत्रासुरोऽभवत् ॥"

वेत्रहा [न्] पुं, (वेत्रं हतवान् । हन+क्विप् ।) इन्द्रः । इत्यमरः ॥

वेत्रावती, स्त्री, वेत्रवती नदी । यथा —
"तस्यास्ते दृश्यते यत्र समधुरं कामिमदं पुष्टिदं
स्वच्छं शीतलमामदं स्वकरं वेत्रावती वाहिनी ॥"
इति राजनिर्घण्टः ॥

वेत्रासन, क्ली (वेत्रस्यासनम् ।) वेत्रनिर्म्मितासनम् । तत्पर्य्यायः । आसन्दी २ । इति हेमचन्द्रः ॥

वेत्रासुरः, पुं, (वेत्रनामकोऽसुरः ।) स्वनामख्यातासुरः । तस्योत्पत्तिर्यथा,—
महातपा उवाच ।
"आसीद्राजा पुरा राजन् सिन्धुद्वीपः प्रतापवान् ।
वारुणांशो महाराजोऽधीरोऽरण्ये तपसि स्थितः ।
पुत्रो मे इन्द्रनाशाय भवेदिति नराधिप ।
एवं कृतमतिः सोऽथ महता तपसा स्वकम् ।
कलेवरं कृशो भूत्वा शोषयामास सुव्रत ॥
प्रजापाल उवाच ।
कथं तस्य द्विजश्रेष्ठ शक्रेणापकृतं भवेत् ।
येनासौ तद्विनाशाय पुत्रमिच्छन् व्रते स्थितः ॥
महातपा उवाच ।
योऽन्यजन्मनि पुत्रोऽभूत् त्वष्टुर्बलवतां वरः ।
अवध्यः सर्व्वशस्त्रौघैरपां फेनेन वाहितः ।
जलफेनेन निहितस्त्विन्द्रेणमथाप्नुयात् ।
पुत्रजन्मार्थयोगात सिन्धुद्वीपस्तपःस्थितः ॥
स तेपे परमं तीव्रं शक्रवैरमनुस्मरन् ।
तत्र कालेन महता नदी वेत्रवती शुभा ।
मानुषं रूपमास्थाय चारुहासा मनोरमम् ।
आजगाम यतो राजा तेपे परमकं तपः ॥
तां दृष्ट्वा रूपसम्पन्नां स राजा क्षुब्धमानसः ।
उवाच कासि सुश्रोणि सत्यं कथय भामिनि ॥
नद्युवाच ।
अहं जनपतेः पत्नी वरुणस्य महात्मनः ।
नाम्ना वेत्रवती पुण्या त्वामिच्छन्तीह आगता ।
साभिलाषां परस्त्रीं यो भजमानां विवर्ज्जयेत् ।
स पापपुरुषो ज्ञेयो ब्रह्महत्याञ्च विन्दति ॥
एवं ज्ञात्वा महाराज भजमानां भजस्व माम् ।
एवमुक्तस्तया राजा साभिलाषोऽभजत्तदा ॥
तस्य सद्योऽभवत् पुत्रो द्वादशार्कसमप्रभः ।
वेत्रवत्युदरे जातो नाम्ना वेत्रासुरोऽभवत् ॥
स बालोऽतिबलो राजा प्राग्ज्योतिषपतिर्भवेत् ।
स कालेन युवा जातो बलवान् दृढविक्रमः ।
महावीर्य्येण संयुक्तो जिगाय च वसुन्धराम् ।
सप्तद्वीपवतीं पश्चाद्यमं तमपि चाजयत् ।
तथेन्द्रं प्रथमं जित्वा पश्चादपि यमं ततः ॥"
इति वराहपुराणे वेत्रोत्पत्तिनामाध्यायः ॥

वेत्री, [न्] पुं, (वेत्रोऽस्त्यस्येति । वेत्र+इनि ।) द्वारपालकः । इति हेमचन्द्रः ॥ वेत्रयुक्ते, त्रि ॥

वेथ, ऋ ङ याचे । इति कविकल्पद्रुमः ॥ (भ्वा-आत्म०-द्वि०-सेट् ।) ऋ, वेथते । इति दुर्गादासः ॥

वेदः, पुं, (विद+घञ् ।) विष्णुः । यथा,—
"वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित् कविः ॥"
इति विष्णुसहस्रनामस्तोत्रम् ॥
कुशम् । इति मेदिनी ॥ क्वचित् पुस्तके वित्तमित्यपि पाठः । यज्ञाङ्गम् । इति नानार्थरत्नमाला ॥ मोक्षधर्मोपायवेदेन भगवज्ज्ञानम् । इति न्यायशास्त्रम् ॥ धर्म्मब्रह्मप्रतिपादकमपौरुषेयवाक्यम् । इति वेदान्तशास्त्रम् ॥ ब्रह्ममुखनिर्गतधर्म्मज्ञापकशास्त्रम् । इति पुराणम् ॥ तत्पर्य्यायः । श्रुतिः २ आम्नायः ३ । इत्यमरः ॥ छन्दः ४ ब्रह्म ५ निगमः ६ । इति शब्दरत्नावली ॥ प्रवचनम् ७ । इति जटाधरः ॥ ७ ॥ वेदस्य प्रादुर्भावो यथा । कदाचित् कथं सृजामीति ध्यायतो ब्रह्मणो मुखचतुष्टयेभ्यश्चत्वारो वेदाः प्रादुरासन् । यथा । एकविंशतिशाखात्मक-ऋक् १ एकशतशाखात्मकयजुः २ सहस्रशाखात्मकसाम ३ नवशाखात्मकाथर्व्व ४ । इति पुराणम् ॥ अपि च ।
श्रीमार्कण्डेय उवाच ।
"तस्माद्ब्रह्माण्डभिन्नाद्ब्रह्मणोऽव्यक्तजन्मनः ।
ऋचो बभूवुः प्रथमं प्रथमाद्वदनान्मुने ॥
जवापुष्पनिभाः सद्यस्तेजोरूपा ह्यसंहताः ।
पृथक् पृथग्विभिन्नाश्च रजोरूपा महात्मन ॥
यजूंषि दक्षिणाद्वक्त्रादनिबद्धानि कानिचित् ।
यादृग्वर्णं तथा वर्णान्यसंहतिपराणि वै ॥
पश्चिमं यद्विभोर्व्वक्त्रं ब्रह्मणः परमेष्ठिनः ।
आविर्भूतानि सामानि ततः कुन्दनिभान्यथ ॥
अथर्व्वाणमशेषेण भृङ्गाञ्जनचयप्रभम् ।
घोराघोरस्वरूपं तदाभिचारिकशान्तिमत् ॥
उत्तरात् प्रकटीभूतं वदनात्तु वेधसः ।
सुखं सत्त्वतमःप्रायं सौम्यासौम्यस्वरूपवत् ॥
ऋचो रजोगुणाः सत्त्वं यजुषाञ्च गुणो मुने ।
तमोगुणानि सामानि तमःसत्त्वमथर्व्वसु ॥
एतानि ज्वलमानानि तेजसाप्रतिमेन वै ।
पृथक् पृथगवस्थानं भाति पूर्व्वमिवाभवत् ॥
ततस्तदाद्यं यत्तेज ओमित्युक्ताभिसंज्ञितम् ।
तस्यानुभावात्तत्तेजस्तमोऽकारेण व्यापितम् ॥
यथा यजुर्मयं तेजो यच्च साम्नां महामुने ।
एकत्वमुपयातानि परतेजसि संक्षयात् ॥
शान्तिकं पौष्टिकञ्चैव तथा चैवाभिचारिकम् ।
अथादिशत् त्रयं भक्त्या त्रिवर्गाख्यमभूत् ॥
ततो विश्वमिदं सदसन्मोहनाद्यात् सुनिर्म्मलम् ।
समाहतैव विपर्य्ये तिरस्कोऽसमवस्थया ॥
ततस्तत्सकलीभूतं छान्दसं तेज उत्तमम् ।
परेण तेजसा सम्यगेकत्वमुपगम्य तत् ॥
आदित्यसंज्ञामगमदाद्यन्तेन ततोऽभवत् ।
विश्वस्यास्य महाभाग कारणत्वमथाक्षयम् ॥
प्रातर्मध्याह्ने चैव तथा चैवापराह्णके ।
ऋचो तपति वा प्राची नानायजुःसामसंस्थिता ॥
यजूंष्यपि पूर्व्वाह्णे मध्याह्ने च यजूंषि वै ।
सामानि चापराह्णे तु तपन्ति मुनिसत्तम ॥
शान्तिकं ऋक्षु पूर्व्वाह्णे यजुः मध्ये च पौष्टिकम् ।
अपराह्णे स्थितं नित्यं सामस्वेवाभिचारिकम् ॥
मध्ये च चक्षुषो ब्रह्मा स्थितो विष्णुर्यजुःषु च ।
रुद्रः साममयोऽसौ च तस्मात्तस्याशुचिर्ध्वनिः ॥
तदेवं भगवान् भास्वान् वेदात्मा वेदसंस्थितः ।
वेदविद्यात्मकश्चैव परः पुरुष उच्यते ॥
सर्गस्थित्यन्तहेतुश्च रजःसत्त्वादिकैर्गुणैः ॥

आमिश्र ब्रह्मविष्ण्वादिरूपाणाम्यै(?)ति शाश्वत ।
वेदे च वेदाः स तु वेदमूर्त्ति
रूर्ज्ञानि रावोऽखिलविश्वमूर्त्तिः ।
विश्वाश्रयं ज्योतिरवेद्यवर्म्मा
धर्म्मान्विदात्मा परमः परेभ्यः ॥"
इति श्रीमार्कण्डेयपुराणे सूर्य्यमाहात्म्ये सूर्य्यो
त्पत्तिनामाध्यायः ॥ * ॥ अन्यच्च ।
"अष्टाविंशे युगे प्राप्ते ह्यस्मिन् वै द्वापरे द्विजाः ।
पराशरसुतो व्यासः कृष्णद्वैपायनोऽभवत् ॥
स एव सर्व्ववेदानां पुराणानां प्रदर्शकः ।
पाराशर्य्यो महायोगी कृष्णद्वैपायनो हरिः ॥
आराध्य देवमीशानं दृष्ट्वा साम्बं त्रिलोचनम् ।
तत्प्रसादादसौ व्यासो वेदानामभवत् प्रभुः ॥
अथ शिष्यान् प्रजग्राह चतुरो वेदपारगान् ।
जैमिनिञ्च सुमन्तुञ्च वैशम्पायनमेव च ॥
पैलं तेषां चतुर्थञ्च पञ्चमं मां महामुने ।
ऋग्वेदश्रावकं पैलं प्रजग्राह महामुनिः ॥
यजुर्व्वेदप्रवक्तारं वैशम्पायनमेव च ।
जैमिनिं सामवेदस्य श्रावकं सोऽन्वपद्यत ॥
तथैवाथर्व्ववेदस्य सुमन्तुमृषिसत्तमम् ।
इतिहासपुराणानि प्रवक्तुं मामयोजयत् ॥
एक आसीद्यजुर्व्वेदस्तं चतुर्द्धा व्यकल्पयत् ।
चातुर्होत्रमभूद्यस्मिंस्तेन यज्ञमथाकरोत् ॥
आध्वर्य्यवं यजुर्भिः स्यादृग्भिर्होत्रं द्विजोत्तमाः ।
औद्गात्रं सामभिश्चक्रे ब्रह्मत्वञ्चाप्यथर्व्वभिः ॥
ततः स ऋच उद्धृत्य ऋग्वेदं कृतवान् प्रभुः ।
यजूंषि च यजुर्व्वेदं सामवेदञ्च सामभिः ॥
एकविंशतिभेदेन ऋग्वेदं कृतवान् पुरा ।
शाखानान्तु शतेनाथ यजुर्व्वेदमथाकरोत् ॥
सामवेदं सहस्रेण शाखानाञ्च विभेदतः ।
अथर्व्वाणमथो वेदं बिभेद नवकेन तु ॥
भेदैरष्टादशैर्व्यासः पुराणं कृतवान् प्रभुः ।
सोऽयमेकश्चतुष्पादो वेदः पूर्व्वं पुरातनात् ॥
ओङ्कारो ब्रह्मणो जातः सर्व्वदोषविशोधनः ।
वेदवेद्यो हि भगवान् वासुदेवः सनातनः ॥
स गीयते परो वेदैर्यो वेदैनं स वेदवित् ।
एतत् परतरं ब्रह्मज्योतिरानन्दमुत्तमम् ॥
वेदवाक्योदितं तत्त्वं वासुदेवं परं पदम् ।
वेदवेद्यमिदं वेत्ति वेदं वेदपरो मुनिः ॥
अवेदं परमं वेत्ति वेदनिष्ठः परेश्वरः ।
स एव वेदो वेद्यश्च तमेवाश्रित्य मुच्यते ॥
इत्येतदक्षरं वेद्यमोङ्कारं वेदमव्ययम् ।
अवेदञ्च विजानाति पाराशर्य्यो महामुनिः ॥"
इति कौर्म्मे ४८ अध्यायः ॥*॥
वेदाध्ययनार्थं यथा,—
व्यास उवाच ।
"एवं दण्डादिभिर्युक्तः शौचाचारसमन्वितः ।
आहूतोऽध्ययनं कुर्य्याद्वीक्षमाणो गुरोर्मुखम् ॥
नित्यमुद्यतपाणिः स्यात् सन्ध्याचारः सुसंयतः ।
आस्यतामिति चोक्तः सन्नासीताभिमुखं
गुरोः ॥
प्रतिश्रवणसम्भाषे शयानो न समाचरेत् ।
नासीनो न च भुञ्जानो न तिष्ठन्न पराङ्मुखः ॥
नीचं शय्यासनं चास्य सर्व्वदा गुरुसन्निधौ ।
गुरोस्तु चक्षुर्विषये न यथेष्टासनो भवेत् ॥
नोदाहरेदस्य नाम परोक्षमपि केवलम् ।
न चैवास्यानुकुर्व्वीत गतिभाषितचेष्टितम् ॥
गुरोर्यत्र परीवादो निन्दा वापि प्रवर्त्तते ।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः ॥
दूरस्थो नार्च्चयेदेनं न क्रुद्धो नान्तिके स्त्रियाः ।
न चैवास्योत्तरं ब्रूयात् स्थिते नासीत सन्निधौ ॥
उदकुम्भं कुशान् पुष्पं समिधोऽस्याहरेत् सदा ।
मार्ज्जनं लेपनं नित्यमङ्गानां वै समाचरेत् ॥
नास्य निर्म्माल्यशयनं पादुकोपानहावपि ।
आक्रमेदासनञ्चास्य छायादीन् वै कदाचन ॥
साधयेद्दन्तकाष्ठादीन् लब्धञ्चास्मै निवेदयेत् ।
अनापृच्छ्य न गन्तव्यं भवेत् प्रियहिते रतः ॥
न पादौ धावयेदस्य सन्निधाने कदाचन ।
जृम्भितं हसितञ्चैव कण्ठप्रावरणं तथा ॥
वर्ज्जयेत् सन्निधौ नित्यमवस्फोटनमेव च ।
यथाकालमधीयीत यावन्न विमना गुरुः ॥
आसीताधो गुरोर्दक्षे पाणौ वा समाहितः ।
आसने शयने याने नैव तिष्ठेत् कदाचन ॥
धावन्तमनुधावेत गच्छन्तमनुगच्छति ।
गोऽश्वोष्ट्रयानप्रासादप्रस्तरेषु कटेषु च ॥
आसीत गुरुणा सार्द्धं शिलाफलकनौषु च ।
जितेन्द्रियः स्यात् सततं वश्यात्माक्रोधनः
शुचिः ॥
प्रयुञ्जीत सदा वाचं मधुरां हितकारिणीम् ।
गन्धं माल्यं रसं कन्यां शुक्तं प्राणिविहिंसनम् ॥
अभ्यङ्गञ्चाञ्जनोपानच्छत्रधारणमेव च ।
कामं लोभं भयं निद्रां गीतं वादित्रनर्त्तनम् ॥
आतञ्जनं परीवादं स्त्रीप्रेक्षालम्भनं तथा ।
परोपघातपैशुन्यं प्रयत्नेन विवर्ज्जयेत् ॥
उदकुम्भं सुमनसो गोशकृन्मृत्तिकाकुशान् ।
आहरेद्यावदर्थानि भैक्ष्यञ्चाहरहश्चरेत् ॥
कृतञ्च लवणं सर्व्वं वर्ज्ज्यं पर्य्युषितञ्च यत् ।
अनृत्यदर्शी सततं भवेद्गीतादिनिःस्पृहः ॥
नादित्यं वै समीक्षेत नाचरेद्दन्तधावनम् ।
एकान्तमशुचिस्त्रीभिः शूद्रान्त्यैरभिभाषणम् ॥
गुरूच्छिष्टं भेषजार्थं प्रयुञ्जीत न कामतः ।
कलापकर्षणं स्नानं नाचरेद्धि कदाचन ॥
न कुर्य्यान्मानसं विप्र गुरोस्त्यागे कदाचन ।
मोहाद्वा यदि वा लोभात्त्यक्तेन पतितो भवेत् ॥
लौकिकं वैदिकञ्चापि तथाध्यात्मिकमेव वा ।
आददीत यतो ज्ञानं तं न द्रुह्येत् कदाचन ॥
गुरोरप्यवलिप्तस्य कार्य्याकार्य्यमजानतः ।
उत्पथप्रतिपन्नस्य मनुस्त्यागं समब्रवीत् ॥
गुरोर्गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेत् ।
न चातिसृष्टो गुरुणा स्वान् गुरूनभिवादयेत् ॥
विद्यागुरुष्वेतदेव नित्या वृत्तिः स्वयोनिषु ।
प्रतिषेधत्सु चाधर्म्माद्धितञ्चोपदिशत्स्वपि ॥
श्रेयःसु गुरुवद्वृत्तिं नित्यमेव समाचरेत् ।
गुरुपुत्त्रेषु दारेषु गुरोश्चैव स्वबन्धुषु ॥
बालः समानजन्मा वा शिष्यो वा यज्ञकर्म्मणि ।
अध्यापयन् गुरुसुतो गुरुवन्मानमर्हति ॥
उत्सादनं वा गात्राणां स्नापनोच्छिष्टभोजने ।
न कुर्य्याद्गुरुपुत्त्रस्य पादयोः शौचमेव च ॥
गुरुवत् प्रतिपूज्यास्तु सवर्णा गुरुयोषितः ।
असवर्णास्तु संपूज्याः प्रत्युत्थानाभिवादनैः ॥
अभ्यञ्जनं स्नापनञ्च गात्रोत्सादनमेव च ।
गुरुपत्न्या न कार्य्याणि केशानाञ्च प्रसाधनम् ॥
गुरुपत्नीन्तु युवतीं नाभिवादेह पादयोः ।
कुर्व्वीत वन्दनं भूमावसावहमिति च ब्रुवन् ॥
विप्रोष्य पादग्रहणमन्वहञ्चाभिवादनम् ।
गुरुदारेषु कुर्व्वीत सतां धर्म्ममनुस्मरन् ॥
मातृष्वसा मातुलानी श्वश्रूश्चाथ पितुः स्वसा ।
संपूज्या गुरुपत्नी च समास्ता गुरुभार्य्यया ॥
भ्रातुर्भार्य्योपसंग्राह्या सवर्णाहन्यहन्यपि ।
विप्रोष्य तूपसंग्राह्या ज्ञातिसम्बन्धियोषितः ॥
पितुर्भगिन्यां मातुश्च ज्यायस्याञ्च स्वसर्य्यपि ।
मातृवद्वृत्तिमातिष्ठेन्माता ताभ्यो गरीयसी ॥
एवमाचारसम्पन्नमात्मवन्तमदाम्भिकम् ।
वेदमध्यापयेद्धर्म्मं पुराणाङ्गानि नित्यशः ॥
तथा चिरोषिते शिष्ये गुरुर्ज्ञानमनिर्दिशन् ।
हरते दुष्कृतं तस्य शिष्यस्यैव ततो गुरुः ॥
आचार्य्यपुत्त्रः शुश्रूषुर्ज्ञानदो धार्म्मिकः शुचिः ।
आप्तः शक्तोऽर्थदः साधुः स्वाध्याप्या दश धर्म्मतः ॥
कृतज्ञश्च तथाद्रोही मेधावी शुभकृन्नरः ।
आप्तः प्रियोऽथ विधिवत् षडध्याप्या द्विजातयः ॥
एतेषु ब्रह्मणो दानमन्यत्र तु यथोदितात् ॥"*॥
वेदाध्ययनविधिर्यथा —
"आचम्य संयतो नित्यमधीयीत उदङ्मुखः ।
उपसंगृह्य तत्पादौ वीक्षमाणो गुरोर्मुखम् ॥
अधीष्व भो इति ब्रूयाद्विरामोऽस्त्विति चारमेत् ।
प्राक्कूलान् पर्य्युपासीत पवित्रैश्चैव पावितः ॥
प्राणायामैस्त्रिभिः पूतस्तत ओङ्कारमर्हति ।
ब्राह्मणः प्रणवं कुर्य्यादन्ते च विधिवद्द्विजाः ॥
कुर्य्यादध्ययनं नित्यं स ब्रह्माञ्जलिपूर्व्वकम् ।
सर्व्वेषामेव भूतानां वेदश्चक्षुः सनातनम् ॥
अधीतानध्ययनिष्ठ ब्राह्मण्याद्धीयतेऽन्यथा ।
अधीयीत ऋचो नित्यं क्षीराहुत्या सदैवताः ॥
प्रीणाति तर्पयन्त्येनं कामैस्तृप्ताः सदैवताः ।
यजूंष्यधीते नियतं दध्ना प्रीणाति देवताः ॥
सामान्यधीते प्रीणाति घृताहुतिभिरन्वहम् ।
अथर्व्वाङ्गिरसो नित्यं मध्वा प्रीणाति देवताः ॥
धर्म्माङ्गानि पुराणानि मांसैस्तर्पयते सुरान् ।
अपां समीपे प्रयतो नैत्यिकं विधिमाश्रितः ॥
गायत्त्रीमप्यधीयीत गत्वारण्यं समाहितः ।
सहस्रपरमां देवीं शतमध्यां दशावराम् ॥
गायत्त्रीं वै जपेन्नित्यं जपयज्ञः प्रकीर्त्तितः ।
गायत्त्री चैव वेदांश्च तुलयामास तत् प्रभुः ।
एकतश्चतुरो वेदान् गायत्त्रीञ्च तथैकतः ।
ओङ्कारमादितः कृत्वा व्याहृतीस्तदनन्तरम् ।
ततोऽधीयीत सावित्त्रीमेकाग्रः श्रद्धयान्वितः ।
पुराकल्पे समुत्पन्ना भूर्भुवःस्वः सनातनाः ।

महाव्याहृतयश्चैव सर्व्वाशुभनिवर्हणाः ।
प्रधानं पुरुषः कालो ब्रह्मविष्णुमहेश्वराः ।
सत्त्वं रजस्तमश्चैव क्रमाद्व्याहृतयः स्मृताः ।
ओङ्कारस्तत्परं ब्रह्म सावित्री स्यात्तदक्षरम् ।
एष मन्त्रो महायोगः सारात्सार उदाहृतः ॥
योऽधीतेऽहन्यहन्येतां सावित्रीं वेदमातरम् ।
विज्ञायार्थं ब्रह्मचारी स याति परमां गतिम् ॥
गायत्री वेदजननी गायत्री लोकपावनी ।
न गायत्र्याः परं जप्यमेतद्विज्ञाय मुच्यते ॥
श्रावणस्य च मासस्य पौर्णमास्यां द्विजोत्तमाः ।
आषाढ्यां प्रौष्ठपद्यां वा वेदोपकरणं स्मृतम् ॥
उत्सृज्य ग्रामनगरं मासान् विप्रोऽर्द्धपञ्चमान् ।
अधीयीत शुचौ देशे ब्रह्मचारी समाहितः ॥
पुष्ये तु छन्दसां कुर्य्याद्बहिरुत्सर्जनं द्विजाः ।
माघशुक्लस्य तु प्राप्ते पूर्व्वाह्णे प्रथमेऽहनि ॥
छन्दांस्यूर्द्ध्वमतोऽभ्यस्येच्छुक्लपक्षे तु वै द्विजः ।
वेदाङ्गानि पुराणानि कृष्णपक्षे तु मानवः ॥७॥
इमान्नित्यमनध्यायानधीयानो विवर्जयेत् ।
अध्यापनञ्च कुर्व्वाणो ह्यनध्यायानपि यत्नतः ॥
कर्णश्रवेऽनिले रात्रौ दिवा पांशुसमूहने ।
विद्युत्स्तनितवर्षेषु महोल्कानाञ्च संप्लवे ॥
आकालिकमनध्यायमेतेष्वाह प्रजापतिः ।
एतानभ्युदितान् विद्याद्यदा प्रादुष्कृताग्निषु ॥
तदा विद्यादनध्यायमनृतौ चाभ्रदर्शने ।
सन्ध्योतिः स्तनितध्वाने येभ्ये रात्रौ यथा दिवा ॥
नित्यानध्याय एव स्याद्ग्रामेषु नगरेषु च ।
धर्म्मनैपुण्यकामानां पूतिगन्धेषु नित्यशः ॥
अन्तःशवगते ग्रामे वृषलस्य च सन्निधौ ।
अनध्यायो रुद्यमाने समवाये जनस्य च ॥
उदके मध्यरात्रे च विण्मूत्रस्य विसर्जने ।
उच्छिष्टः श्राद्धभुक् चैव मनसापि न चिन्तयेत् ॥
प्रतिगृह्य द्विजो विद्वानेकोद्दिष्टस्य केतनम् ।
त्र्यहं न कीर्त्तयेद्ब्रह्म राज्ञो राहोश्च सूतके ॥
यावदेकोऽनुदिष्टस्य स्नेहो गन्धश्च तिष्ठति ।
विप्रस्य विदुषो देहे तावद्ब्रह्म न कीर्त्तयेत् ॥
शयानः प्रौढपादश्च तथा चैवावसक्थिकः ।
नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव च ॥
नीहारे बाणशब्दे च सन्ध्ययोरुभयोरपि ।
अमावास्यां चतुर्द्दश्यां पौर्णमास्यष्टमीषु च ॥
उपाकर्म्मणि चोत्सर्गे त्रिरात्रं क्षपणं स्मृतम् ।
अष्टकासु त्वहोरात्रमृत्वन्तासु च रात्रिषु ॥
मार्गशीर्षे तथा पौषे माघमासे तथैव च ।
तिस्रोऽष्टकाः समाख्याताः कृष्णपक्षेषु सूरिभिः ॥
श्लेष्मातकस्य छायायां शाल्मलेर्मधुकस्य च ।
कदाचिदपि नाध्येयं कोविदारकपित्थयोः ॥
समानविद्ये तु मृते तथा सब्रह्मचारिणि ।
आचार्य्ये संस्थिते वापि त्रिरात्रं क्षपणं स्मृतम् ॥
छिद्राण्येतानि विप्राणां येऽनध्यायाः प्रकीर्त्तिताः ।
हिंसन्ति राक्षसास्तेषु तस्मादेतान् विवर्जयेत् ॥
नैत्यके नास्त्यनध्यायः सन्ध्योपासन एव च ।
उपाकर्म्मणि कर्म्मान्ते होममन्त्रे तथैव च ॥
एकामृचमथैकं वा यजुः सामाथवा पुनः ।
अष्टकाद्यास्वधीयीत मारुते चातिवायति ॥
अनध्यायस्तु नाङ्गेषु नेतिहासपुराणयोः ।
न धर्म्मशास्त्रेष्वन्येषु पर्व्वस्वेतानि वर्ज्जयेत् ॥७॥
एष धर्म्मः समासेन कीर्त्तितो ब्रह्मचारिणाम् ।
ब्रह्मणाभिहितः पूर्व्वमृषीणां भावितात्मनाम् ॥
योऽन्यत्र कुरुते यत्नमनधीत्य श्रुतिं द्विजाः ।
स सम्मूढो न सम्भाष्यो वेदबाह्यो द्विजातिभिः ॥
न वेदपाठमात्रेण सन्तुष्टो वै भवेद्द्विजः ।
पाठमात्रावसन्नस्तु पङ्के गौरिव सीदति ॥
अधीत्य विधिवद्वेदं वेदार्थं न विचारयेत् ।
स चान्धः शूद्रकल्पस्तु पात्रतां न प्रपद्यते ॥
यदि त्वात्यन्तिकं वासं कर्त्तुमिच्छति वै गुरौ ।
युक्तः परिचरेदेनमाशरीरविमोक्षणम् ॥
गत्वा वनं वा विधिवज्जुहुयाज्जातवेदसम् ।
अधीयीत सदा नित्यं ब्रह्मनिष्ठः समाहितः ॥
सावित्रीं शतरुद्रीयं वेदान्तांश्च विशेषतः ।
अभ्यसेत् सततं शुद्धो भस्मस्नानपरायणः ॥

एतद्विधानं परमं पुराणं
वेदागमे सम्यगिहेरितञ्च ।
पुरा महर्षिप्रवराभिपृष्टः
स्वायम्भुवो यन्मनुराह देवः ॥
एवमीश्वरसमर्पितान्तरो
योऽनुतिष्ठति विधिं विधानवित् ।
मोहजालमपहाय सोऽमृतो
याति तत्पदमनामयं शिवम् ॥"

इति कौर्म्मे उपविभागे १४ अध्यायः ॥

अथ ऋग्वेदस्य संहिता ।
"ऋग्वेदं प्रथमं विप्र पैल ऋग्वेदपादपम् ।
इन्द्रप्रमितये प्रादाद्वाष्कलाय च संहिते ॥
चतुर्द्धा स बिभेदाथ वाष्कलोऽपि हि संहिताम् ।
बोध्यादिभ्यो ददौ ताश्च शिष्येभ्यः स महामतिः ॥
बोध्याग्निमाठरौ तद्वद्याज्ञवल्क्यपराशरौ ।
प्रतिशाखास्तु शाखायास्तस्यास्ते जगृहुर्मुने ॥
इन्द्रप्रमितिरेकान्तु संहितां स्वसुतं ततः ।
माण्डूकेयं महात्मानं मैत्रेयाध्यापयत्तदा ॥
तस्य शिष्यप्रशिष्येभ्यः पुत्त्रशिष्यक्रमाद्ययौ ।
वेदमित्रस्तु शाकल्यः संहितां तामधीतवान् ॥
चकार संहिताः पञ्च शिष्येभ्यः प्रददौ च ताः ।
तस्य शिष्यास्तु ये पञ्च तेषां नामानि मे शृणु ॥
मुद्गलो गालवश्चैव वात्स्यः शालीय एव च ।
शिशिरः पञ्चमश्चासीन्मैत्रेय सुमहामतिः ॥
संहितात्रितयं चक्रे शाकपूर्णिस्तथेतरः ।
निरुक्तमकरोत्तद्वच्चतुर्थं मुनिसत्तम ॥
क्रौञ्चो वैतालिकस्तद्वद्बलाकश्च महामतिः ।
निरुक्तकृच्चतुर्थोऽभूद्वेदवेदाङ्गपारगः ॥
इत्येताः प्रतिशाखाभ्योऽप्यनुशाखा द्विजोत्तम ।
वाष्कलश्चापरास्तिस्रः संहिताः कृतवान्
द्विज ॥
शिष्यः कालायनिर्गार्ग्यस्तृतीयश्च तथाजकः ।
इत्येते बह्वृचाः प्रोक्ताः संहिता यैः प्रव-
र्त्तिताः ॥"

इति विष्णुपुराणे ३ अंशे वेदविभागकीर्त्तने ४
अध्यायः ॥ यजुर्वेदस्य संहिता यथा,—
"यजुर्वेदतरोः शाखाः सप्तविंशन्महामतिः ।
वैशम्पायननामासौ व्यासशिष्यश्चकार वै ॥
शिष्येभ्यः प्रददौ ताश्च जगृहुस्तेऽप्यनुक्रमात् ।
याज्ञवल्क्यस्तु तस्याभूद्ब्रह्मरातसुतो द्विज ॥
शिष्यः परमधर्म्मज्ञो गुरुवृत्तिपरः सदा ।
ऋषिर्योऽद्य महामेरौ समाजे नागमिष्यति ॥
तस्य वै सप्तरात्रात्तु ब्रह्महत्या भविष्यति ।
पूर्व्वमेवं मुनिगणैः समयोऽयं कृतो द्विज ॥
वैशम्पायन एकस्तु तं व्यतिक्रान्तवांस्तदा ।
स्वस्रीयं बालकं सोऽथ पदा स्पृष्टमघातयत् ॥
स शिष्यानाह भोः शिष्या ब्रह्महत्यापहं
व्रतम् ।
चरध्वं मत्कृते सर्व्वे न विचार्य्यमिदं तथा ॥
अथाह याज्ञवल्क्यस्तं किमेभिर्भगवन् द्विजैः ।
क्लेशितैरल्पतेजोभिश्चरिष्येऽहमिदं व्रतम् ॥
ततः क्रुद्धो गुरुः प्राह याज्ञवल्क्यं महामतिम् ।
मुच्यतां यत्त्वयाधीतं मत्तो विप्रावमन्यक ॥
निस्तेजसो वदस्येतान् यस्त्वं ब्राह्मणपुङ्गवान् ।
तेन शिष्येण नार्थोऽस्ति ममाज्ञाभङ्गकारिणा ॥
याज्ञवल्क्यस्ततः प्राह भक्त्यैतत्ते मयोदितम् ।
ममाप्यलं त्वयाधीतं यन्मया तदिदं द्विज ॥
श्रीपराशर उवाच ।
इत्युक्त्वा रुधिराक्तानि सरूपाणि यजूंषि च ।
छर्द्दयित्वा ददौ तस्मै ययौ च स्वेच्छया मुनिः ॥
यजूंष्यथ विसृष्टानि याज्ञवल्क्येन वै द्विज ।
जगृहुस्तित्तिरा भूत्वा तैत्तिरीयास्तु ते ततः ॥
ब्रह्महत्याव्रतं चीर्णं गुरुणा चोदितैस्तु यैः ।
चरकाध्वर्य्यवस्ते तु चरणान्मुनिसत्तम ॥
याज्ञवल्क्योऽपि मैत्रेय प्राणायामपरायणः ।
तुष्टाव प्रयतः सूर्य्यं यजूंष्यभिलषंस्ततः ॥
श्रीयाज्ञवल्क्य उवाच ।
नमः सवित्रे द्वाराय मुक्तेरमिततेजसे ।
ऋग्यजुःसामभूताय त्रयीधामवते नमः ॥
श्रीपराशर उवाच ।
इत्येवमादिभिस्तेन स्तूयमानः स्तवै रविः ।
वाजिरूपधरः प्राह व्रियतामभिवाञ्छितम् ॥
याज्ञवल्क्यस्तदा प्राह प्रणिपत्य दिवाकरम् ।
यजूंषि तानि मे देहि यानि सन्ति न मे गुरौ ॥
श्रीपराशर उवाच ।
एवमुक्तो ददौ तस्मै यजूंषि भगवान् रविः ।
अयातयामसंज्ञानि यानि वेत्ति न तद्गुरुः ॥
यजूंषि यैरधीतानि तानि विप्रैर्द्विजोत्तम ।
वाजिनस्ते समाख्याताः सूर्य्योऽश्वः सोऽभवद्-
यतः ॥
शाखाभेदास्तु तैर्व्वै दश पञ्च च वाजिनाम् ।
काण्वाद्याः सुमहाभाग याज्ञवल्क्यप्रवर्त्तिताः ॥"
इति श्रीविष्णुपुराणे ३ अंशे वाजिनामोत्पत्तिर्नाम
५ अध्यायः ॥ सामवेदस्य संहिता यथा,—
"सामवेदतरोः शाखा व्यासशिष्यः स जैमिनिः ।
क्रमेण येन मैत्रेय बिभेद शृणु तन्मम ॥

सुमन्तुस्तस्य पुत्रोऽभूत् सुकर्म्मास्याप्यभूत् सुतः ।
अधीतवन्तावेकैकां संहितां तौ महामती ॥
सहस्रसंहिताभेदं सुकर्म्मा तत्सुतस्ततः ।
चकार तच्च तच्छिष्यौ जगृहाते महाव्रतौ ॥
हिरण्यनाभः कौशल्यः पौष्यिञ्जिश्च द्विजोत्तम ।
उदीच्याः सामगाः शिष्यास्तस्य पञ्चशताः स्मृताः ।
हिरण्यनाभात्तावत्यः संहिता यैर्द्विजोत्तम ।
गृहीतास्तेऽपि चोच्यन्ते पण्डितैः प्राच्यसामगाः ।
लोकाक्षिः कुथुमिश्चैव कुशीदिर्लाङ्गलिस्तथा ।
पौष्यिञ्जिशिष्यास्तद्भेदैः संहिता बहुलीकृताः ॥
हिरण्यनाभशिष्यश्च चतुर्व्विंशतिसंहिताः ।
प्रोवाच कृतिनामासौ शिष्येभ्यः सुमहामतिः ॥
तैश्चापि सामवेदोऽसौ शाखाभिर्बहुलीकृतः ॥" ●
अथर्व्ववेदस्य संहिता यथा,—
"अथर्व्वाणमथो वक्ष्ये संहितानां समुच्चयम् ।
अथर्व्ववेदं स मुनिः सुमन्तुरमितद्युतिः ॥
शिष्यमध्यापयामास कबन्धं सोऽपि तं द्विधा ।
कृत्वा तु वेददर्शाय तथा पथ्याय दत्तवान् ॥
वेददर्शस्य शिष्यास्तु मौदो ब्रह्मबलिस्तथा ।
शौल्कायनिः पिप्पलादस्तथान्यो मुनिसत्तम ॥
पथ्यस्यापि त्रयः शिष्याः कृता यैर्द्विज संहिताः ।
जाजलिः कुमुदादिश्च तृतीयः शौनको द्विज ॥
शौनकस्तु द्विधा कृत्वा ददावेकान्तु बभ्रवे ।
द्वितीयां संहितां प्रादात् सैन्धवायनसंज्ञिने ॥
सैन्धवा मुञ्जकेशाश्च भिन्नभेदास्त्रिधा पुनः ।
नक्षत्रकल्पो वेदानां संहितानान्तथैव च ॥
चतुर्थः स्यादाङ्गिरसः शान्तिकल्पश्च पञ्चमः ।
श्रेष्ठास्त्वथर्व्वणामेते संहितानां विकल्पकाः ॥"
इति विष्णुपुराणे ३ अंशे ६ अध्यायः ॥
अस्य कूर्म्मपुराणवत् ॥ ● ॥ अपरञ्च ।
"वेदो हरेर्व्वाक् सावित्री वेदमाता प्रतिष्ठिता ।
त्रिगुणश्च त्रिवृच्चैव तेन विप्रः प्रतिष्ठितः ॥
दशपञ्च संस्कृता ये सामगा ब्रह्मवादिनः ।
तत्र वेदाश्च लोकानां सर्व्वार्थमिह पोषकाः ॥
ब्रह्माध्ययनदानादितपःस्वाध्यायसंयमैः ।
प्रीणयन्ति हरिं भक्त्या वेदतत्त्वविचारकाः ॥"
इति वह्निपुराणे २ अध्यायः ॥ ● ॥
वेदोक्तकर्म्म कर्त्तव्यं यथा —
"श्रुतिस्मृतिसदाचारविहितं कर्म्म केवलम् ।
वैदिकञ्च चतुर्व्वर्गसंसिद्धिं केशवं सदा ॥
अन्यथा निरयं याति कुमार्गगमनादिवत् ।
अतो वेदविहितार्थं शास्त्रोक्तं कर्म्म समाचरेत् ॥"
इति पाद्मोत्तरखण्डे १७ अध्यायः ॥ ● ॥
वेदाचाराल्लौकिकाचारो बलवान् यथा,—
मार्त्तण्ड उवाच ।
"केवलं वेदमाश्रित्य न करोति विनिश्चयम् ।
बलवान् लौकिको वेदाल्लोकाचारञ्च पालयेत् ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ७ अध्यायः ॥ ● ॥
अथ वेदस्य स्थितिस्थानं ।
"सर्व्ववेदाश्च तत्रान्ते यत्र ब्रह्मा हरेः पदम् ।
वेदाश्च पुराणानि शास्त्राणि चाङ्गमयम् ॥
वेदोक्तानि च कर्म्माणि यत्रास्ते साङ्गमेव च ।
हरिपूजा हरेर्नाम तत्कीर्त्तिगुणकीर्त्तनम् ॥
वेदाङ्गानि च शास्त्राणि यत्रास्ते साङ्गमेव च ।
सत्यञ्च धर्म्मः सत्यञ्च वेदाश्च धामदेवताः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६ अध्यायः ॥ ● ॥
आयुर्व्वेदस्योत्पत्तिकथनं यथा —

"षडङ्गेभ्यः पञ्चवक्त्रागतेभ्यो
वेदा जाता ऋग्यजुःसामभेदाः ।
आयुर्व्वेदोऽथर्व्ववेदश्चेति क्रमात् ॥
अस्ति वेदः पञ्चमो वैद्यकाख्यो
वैद्या कश्चित्तस्य नास्ति मर्त्यभावात् ।
तस्माज्ज्ञाताध्वेन तस्माद्गुरोरपाठ-
सत्कारणज्ञात्वा वक्तुमर्हामि शास्त्रम् ॥"
इति गूढ़बोधः ।

"हिताहितं सुखं दुःखमायुस्तस्य हिताहितम् ।
मानञ्च तच्च यत्रोक्तमायुर्व्वेदः स उच्यते ॥"
इति सुखबोधः ॥ ● ॥ ● ॥
चतुर्व्वेदशाखा विवरणं यथा । अथातश्चरणव्यूहं व्याख्यास्यामः । तत्र यदुक्तं चातुर्व्वेद्यम् । चत्वारो वेदा विज्ञाता भवन्ति । ऋग्वेदो यजुर्व्वेदः सामवेदोऽथर्व्ववेदश्चेति । तत्र ऋग्वेदस्याष्टौ स्थानानि भवन्ति । चर्च्चाश्रावकः १ चर्च्चकः २ श्रवणीयपारः ३ क्रमपारः ४ क्रमरथः ५ क्रमजटः ६ क्रमघटः ७ क्रमदण्डश्चेति ८ । चतुष्पारायणमेतेषाम् । शाखाः पञ्चविधा भवन्ति । आश्वलायनी १ साङ्ख्यायनी २ शाकला ३ बाष्कला ४ माण्डूकेयाश्चेति ५ । तेषामध्ययनम् । अध्यायाश्चतुःषष्टिः । मण्डलानि च दशैव तु ।
"एकञ्च एकसौत्रारैकञ्च मवकस्तथा ।
द्वौ वर्गौ द्वे ऋचौ मेघे सौत्रि अध्ययन-
स्थानम् ॥
चतुश्च समाख्यातं षट्सप्तत्युत्तरं शतम् ।
मध्ये द्वाभ्यां शताभ्यां दाविंशोत्तराणि च ॥
शतत्रयं षड्भेव सप्तपञ्चाशदुत्तरम् ।
पञ्चमेकान्निपञ्चाशत् शतमेककम् ॥
अद्यार्द्धपञ्चचाशतं स्मृताविंशोत्तरा ।
वर्गाणां परिसंख्यातं द्वे सहस्रे षडुत्तरे ॥
सहस्रमेकं सूक्तानां निर्व्विशङ्कं विकल्पनाम् ।
दशसहस्र पञ्चान्ते सङ्ख्यातं वै पदक्रमम् ॥
एकशत वहच वा द्विपञ्चाशत् पदयाद्देम ।
शतानि च चतुर्द्देव वासिष्ठानाम् । इत्येषां
पञ्चाशीतिश्च शाकल्ये तु वेदयम् । चतुःशतम्
सहस्राणि द्विशतानां सहस्राणां द्वाविंशत्
षोडशोत्तरा । चत्वारिंशत्सहस्राणि द्वाविं
शत्यक्षरसहस्राणि ।
ऋचां दशसहस्राणि ऋचां पञ्चशतानि च ।
ऋचामशीतिः पादश्चैतत् पारायणं उच्यते ॥
एष ऋग्वेदसमेच द्वाच्च महकल्पा ।
द्वौ वर्गौ द्वे ऋचौ त्रिषे षौत्रि षौत्रि स्मृत
स्मृता ॥
ऋग्वेदस्य शाकल्यं पदानां लक्षमात्रेऽपि ।
सप्तकानां द्वे च षष्ट्युत्तरे शते । चतुर्थ्ये चोक्ष शतानि षट्कानां चोक्षा षडिरदकानाम् ॥ ● ॥ यजुर्व्वेदस्य षडशीतिर्भेदा भवन्ति । तत्र चरकाणां द्वादशभेदा भवन्ति । चरका १ आह्वरका २ कठा ३ प्राच्यकठा ४ कपिष्ठलकठा ५ औपमन्यवा ६ आरलकठा ७ चारायणीया ८ वारायणीया ९ वार्त्तान्तवेया १० श्वेताश्वतरा ११ श्वेताश्वतरा इति वा पाठः । मैत्रायणीयाश्चेति १२ । तत्र मैत्रायणीयानां सप्तभेदा भवन्ति । मानवा १ दुन्दुभा २ चैकेया ३ वाराहा ४ हारिद्रवेया ५ श्यामा ६ श्यामायनीयाश्चेति ७ । तेषामध्ययनमष्टौ । यजु सहस्राण्यधीत्य शाखापारो भवति । तान्येव द्विगुणान्यधीत्य पदपारो भवति । तान्येव त्रिगुणान्यधीत्य क्रमपारो भवति । षडङ्गान्यधीत्य षडङ्गविद्भवति । शिक्षा १ कल्पो २ व्याकरणम् ३ निरुक्तम् ४ छन्दो ५ ज्योतिषमित्यङ्गानि ६ । तत्र प्राच्योदीच्यां नैऋत्यां निर्द्देश्य । तत्र वाजसनेयानां सप्तदशभेदा भवन्ति । जाबाला १ बौधेया २ काण्वा ३ माध्यन्दिना ४ शापीया ५ तापायनीया ६ कापाला ७ पौण्ड्रवत्सा ८ आवटिका ९ परमावटिका १० परमावटिकाश्चि पाठः । पाराशरीया ११ वैधेया १२ वैनेया १३ औधेया १४ गालवा १५ वैजवा १६ कात्यायनीयाश्चेति १७ । प्रतिपदमनुपदं छन्दो भाषा धर्म्मो मीमांसा न्यायतर्क इत्युपाङ्गानि । उपज्योतिषम् । साङ्गलक्षणम् । प्रतिज्ञानुवाक्यम् । परिसंख्या । चरणव्यूहम् । श्राद्धकल्पः । प्रवराध्यायश्च । शुल्वम् । क्रतुसंख्यानम् । आयम । यज्ञम् । पार्श्वम् । होमकम् । पारस्याद्यहोमकमपि पाठः । मयद । उक्थानि । कूर्म्मलक्षणमित्यष्टादश परिशिष्टानि ।
"द्वे सहस्रे शते न्यूने मन्त्रे वाजसनेयके ।
इत्युक्तं परिसंख्यातमेतत् सर्व्वं सशुक्रियम् ॥
पन्थाश्च परिसंख्यातं ब्राह्मणञ्च चतुर्गुणम् ।
आदावारभ्य वेदान्तं सलक्षाङ्गादिपूर्व्वकम् ।
वेदमध्याप्य एवैषां सोमान्ते तु समारभेत् ॥"
तत्र तैत्तिरीयकाणाम् द्विभेदा भवन्ति । औख्या १ खण्डोऽपि पाठः । खाण्डिकेयाश्चेति २ । तत्र खाण्डिकेयानाम् पञ्चभेदा भवन्ति । आपस्तम्बी १ बौधायनी २ सत्याषाढी ३ हिरण्यकेशी ४ औधेयाश्चेति ५ औधेयी च पाठः । तत्र कलापानुगमाद्विशेषाः । चतुश्चत्वारि सङ्गुपद्धताम् ।
"मन्त्रब्राह्मणयोर्व्वेदस्त्रिगुणं यत्र पठ्यते ।
यजुर्व्वेदः स विज्ञेयः शेषाः शाखान्तराः
स्मृताः ॥" ● ॥
सामवेदस्य किल सहस्रभेद आसीत् । अनध्यायेष्व-
धीयाने किल इति माधवकल्पः । शक्रवज्रेण
मध्ये पापसे इन्द्रवज्रेणाभिहता नष्टाः ।

तेषां प्रवरसाम्यात्तुरायणीया शाट्यायनीया सार्त्यमुग्रेया प्राञ्जला आर्षेयभेदा प्राचीन योग्या शामयोग्या राणायनीयाश्चेति। तत्र राणायनीयानां नव भेदा भवन्ति। राणाय नीया। शाट्यायनीया। शाखायनीया इति सात्यमुग्र्या इति च पाठः। शालका। शाल्यमुग्र्या इति वा पाठः। मौद्गला। इति तु भाष्ये नास्ति। खल्वला। महाखल्वला। लाङ्गला। कौथुमा। गौतमा। जैमिनीया- श्चेति। तेषामध्ययनमष्टौ सामसहस्राणि सामानि च चतुर्दश अष्टौ शतानि। दशोत्तरशतमष्टौ शाखाश्रिता यतुपर्वश्रेय। कचित् पुस्तके नवविदग्धनिकाशालिका यतुपर्वश्रेया इति च पाठः। एतत् सामगाथ स्मृतम्॥०॥ अथर्ववेदस्य नव भेदा भवन्ति। पैप्पला। दान्ता। प्रदान्ता। स्नाता। श्रौता इति च पाठः। ब्रौता। ब्रह्मदावला। शौनकी। देविदर्शती। चरणविद्याश्चेति। दान्ता प्रदान्ता श्रौता ब्रह्मदीपश्री वेदश्री इति भाष्ये नामा न्तरम्। तेषामध्ययनं पञ्च कल्पानि भवन्ति। नक्षत्रकल्पो विधानकल्पो विधिविधानकल्प संहिता शान्तिकल्पश्चेति। सर्वेषामेव वेदाना सुपवेदा भवन्ति। ऋग्वेदस्यायुर्वेदः। यजु र्वेदस्य धनुर्वेद उपवेदः। सामवेदस्य गान्धर्व वेद उपवेदः। अथर्ववेदस्य शस्त्रशास्त्राणि भवन्ति॥०॥ (अथर्ववेदस्य तत्त्वशास्त्राणीति चतु भवति। तथा च शुक्रनीतौ। ४। ३। २०। "ऋग्यजुःसामाथर्वाख्या वेदा आयुर्धनुः क्रमात्। गान्धर्वश्चैव तन्त्राणि उपवेदाः प्रकीर्तिताः॥") ऋग्वेदस्यात्रेयगोत्रं ब्रह्मदेवत्यं गायत्रं छन्दः। ऋग्वेदो रक्तवर्णः पद्मपत्रायताक्षः सुविभक्तग्रीवः कुञ्चितकेशः श्मश्रुधरोऽयं द्विरत्निप्रमाणः॥०॥ यजुर्वेदस्य भारद्वाजगोत्रं रुद्रदैवत्यं त्रैष्टुभं छन्दः। यजुर्वेदः कृशो दीर्घः कपालो ताम्रवर्णः चालनयन आदित्यवर्णो वर्णेन पञ्चारत्नि मात्र॥०॥ सामवेदस्य काश्यपगोत्रं विष्णुदैवत्यं जागतं छन्दः। सामवेदो नित्यसमो शुचिः शुची वाची शुचिवासा इति च पाठः। सोमो दर्शयि पाठः। दान्तो चर्मी दण्डी कार्त्तस्वर आदित्यवर्णो वर्णेन षड्रत्निमात्रः॥०॥ अथर्व वेदस्य वैतानगोत्रं इन्द्रदेवत्यं आनुष्टुभं छन्दः। अथर्ववेदस्तीक्ष्णचण्डः कामरूपी क्षुद्र कर्मा पोषक शाखा क्षुद्रकर्मिष्ठो शाखा इति वा पाठः। परिपक्षा स्वभावा मर्षी मायक महाबलश्च परस्थिमात्रश्चेति सप्तरत्निमात्रः। अन्यान्तरे विश्वात्मा विश्वकर्मा क्षमाधाता आपो। प्राज्ञो महानीलोत्पलवर्णो वर्णेन दश रत्निमात्र इति च पाठः॥०॥ अथ ध्यानम्।

"ध्यायामि त्वां मधुवचनाधराक्ष
कुञ्चितकेशं ब्रह्मदैवतमात्मम्।
गायत्रं ऋग्वेदमात्रेयगोत्र
रक्तवर्णं पद्मपत्रप्रमाणम्॥

वन्दे रौद्र त्रैष्टुभ ताम्रवर्णं
भारद्वाज यज्ञनेत्रं प्रमाणम्।
यजुर्वेद दीर्घमादित्यवर्ण
कापालिक पञ्च चारत्निमात्रम्॥"०॥

य इदं वेदस्य रूपं गोत्रमात्र छन्दोवर्णं मध्येयति स विद्यां लभते स विद्यां लभते। अस्य अस्य वेदपाठो भवति अव्रती व्रती भवति अप्रयतः प्रयतो भवति अब्रह्मचारी ब्रह्मचारी भवति जातिस्मरो जायते॥०॥

"य इद चरणव्यूहं सर्वेषु श्रावयेद्विजः।
गौतपाप्मा शुचिर्विप्रो ब्रह्मभूयाय कल्पते॥
य इद चरणव्यूहं श्राद्धकाले पठेद् यः।
अक्षयमभवत् श्राद्ध पितृणामुपतिष्ठते॥
योऽधीते चरणव्यूहं स विप्र पङ्क्तिपावनः।
पावयन्निखिलान् पूर्वान् पुत्रान् सप्त सप्त च॥
स इमां विपुलां देवीं अन्ततश्च गच्छति।
लोकातीतं महाप्राज्ञ अक्षरमव्ययं गच्छति॥"

गच्छन्ती नम इत्याह भगवान् व्यास पारा शरीयो व्यासः पाराशरीय। इति व्यासरचितं चरणव्यूहं समाप्तम्॥ (धनम्। यथा, ऋग्वेदे। ८। ७१। २।

"न्यपि रथ न वेदम्।"

"वेद वेदो धनम् धनवितम्।" इति तद्भाष्ये सायनः॥ चतु सज्ञापकः। यथा, पाणिनि दर्शने। ३। २८३।

"तदेवमेतमस्माद्वेदात्सत्त्व अनेकैतां।
सङ्केत विकल्पेन यदृष्टा वेदकल्पना।
वेदलाभिधेयार्थ गुरुविद्वराज्ञापितस्य।"

दर्भमुष्टिः। यथा मनुः। ४। ३६।

"वैणवीं धारयेद्यष्टिं सोदकं च कमण्डलुम्।
यज्ञोपवीतं वेदं च शुभे रौक्मे च कुण्डले॥")

वेदगर्भः, पुं, (वेदा गर्भे अन्तरे यस्य।) ब्रह्मा। (यथा, भागवते। ३। ४। २४।

"एतद्वेदाक्षरं राजन् मारदाय विपृच्छते।
वेदगर्भोऽभ्यधात् साक्षाद्यदाह हरिरात्मनः॥")

ब्राह्मणः। इति हेमचन्द्रः॥

वेदगुप्ति स्त्री (वेदानां गुप्तिः।) ब्राह्मणादि कर्तृकवेदरक्षा। इति वैदिक्॥

वेदनं } क्ली स्त्री (विद्+ल्युट्। यथा। "बहि
वेदना, } र्व्यासिदिभ्यश्च उपसंख्यानम्।" ३। ३।
१०७। इत्यस्य वार्त्तिकोक्त्या युच्।) अनुभवः। तत्पर्यायः। चेतः २। दुःखम् ३। ज्ञानम्। दुःखम्। इति मेदिनी। विवाहः। यथा,—

"पाणिग्रहणसंस्कारः सवर्णास्त्पदिश्यते।
असवर्णास्वयं ज्ञेयो विधिरुद्वाहकर्मणि॥
शरः क्षत्रियया ग्राह्यः प्रतोदो वैश्यकन्यया।
वसनस्य दशा ग्राह्या शूद्रयोत्कृष्टवेदने॥"

इति मानवे ३ अध्यायः॥

पादोऽपि।
यदब्रवीच।
यते।
कर्मेति

वद्यमानो विधिर्वेदः। शर इति। क्षत्रियया पाणिग्रहणस्थाने ब्राह्मणविवाहे ब्राह्मणस्य परिगृहीतस्यैकदेशो ग्राह्यः। वैश्यया ब्राह्मणक्षत्रियविवाहे ब्राह्मणक्षत्रियविहित प्रतोदैकदेशो ग्राह्यः। शूद्रया पुनर्द्विजातिजन्य विवाहे प्रावरणवसनस्य दशा ग्राह्या। इति कुल्लूकभट्टः॥

वेदनिन्दकः, पुं, (वेद निन्दतीति। निन्द+ण्वुल्।) नास्तिकः। इति जटाधरः॥ (यथा मनः। २।
"कुत्सितो हि तथा यज्ञः पापको वेदनिन्दकः॥")
बुद्धश्च॥

वेदपारगः, त्रि, (वेदस्य पारं गच्छतीति। गम+ डः।) वेदवेत्ता। ब्रह्मज्ञानी। यथा,—

"चक्रवाका प्रदोषे हंसा शरदि मानसे।
तेऽभिजाता कुरुक्षेत्रे ब्राह्मणा वेदपारगाः॥"

इति भारतीयं पित्र्यमाहा॥

वेदमाता, [ऋ] स्त्री, (वेदानां माता।) गायत्री। यथा,—

"योऽधीतेऽहन्यहन्येतां गायत्रीं वेदमातरम्।
विज्ञायार्थं ब्रह्मचारी स याति परमां गतिम्॥
गायत्री वेदजननी गायत्री लोकपावनी।
न गायत्र्याः परं जप्यं एतद्विज्ञाय मुच्यते॥"

इति कौर्म्मे उपविभागे १४ अध्यायः॥०॥

दुर्गा। यथा,—

"अक्षिका वेदमातृकमाद्यामयो भरतायया।
वैदेव चरते यज्ञार्धेन या ब्रह्मचारिणी॥"

इति देवीपुराणे ३५ अध्यायः॥

वेदवती, स्त्री, (वेदं ज्ञानमस्त्यस्या इति। वेद +मतुप्। मस्य व। स्त्रियां ङीप्।) कुश ध्वजराजकन्या। सा जन्मान्तरे सीता। यथा,

ब्रह्मवैवर्त्ते।

"स गच्छ तपसे देवि। पुष्करेण तपस्यताम्।
कृत्वा तपस्या तत्रैव सर्वेसयोभवेष्यति॥
सा च तद्वचनं श्रुत्वा प्रतस्थे पुष्करे तपः।
दिव्य निरन्तरकाल स्वत्वकर्मैन्द्रियस्तु च॥
सा च कायेन तपसा मत्कृष्णकृतमक्षा।
शालिनी मातृनामाद्य सौपदी इयताम्बा॥
कृते युगे वेदवती कुशध्वजसुता शुभा।
त्रेतायां रामपत्नी सा सीतेति जनकात्मजा॥
तच्छाया द्रौपदी देवी द्वापरे द्रुपदात्मजा।
त्रिहायणीति सा प्रोक्ता विद्यमानयुगत्रये॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १४ अध्यायः॥

(नदीविशेषः। तत्पर्य्याय नदीविशेषः। यथा, मार्क ण्डेये। ५७। १८।

"वेदस्मृतिर्वेदवती वृत्रघ्नी सिन्धुरेव च॥")

वेदवर्त्म, क्ली, (वेदानां वर्त्मेव।) वाक्यपथम्। यथा,—

"यो वेद वेदवर्त्म वदनं हि समस्त
न वेदमपि वेद विमन्दधाराम।
ब्रह्मदैवताऽऽग्नेय धीमान्
॥"

(वेदा अन्ते यस्येति विग्रहे सप्तमि, पं । यथा, देवीभागवते । ७ । ३ । ८१ ।
"गायत्री वेदजननी पार्व्वती शिवसन्निधौ ।")
वेदान्तास, पु (वेदानां वासो यस्मिन् ।) ब्राह्मण । इति शब्दरत्नावली ।
वेदवित [द्] पु (वेदान् वेत्तीति । विद्+क्विप् ।) विष्णुः । यथा —
"वदो वेदविदव्यङ्गो वेदाङ्गो वेदवित् कविः ।"
इति तस्य सहस्रनामस्तोत्रम् ।
वेदज्ञे त्रि । (यथा मनुः । २ । ७८ ।
'एतदक्षरमेतां च जपन् व्याहृतिपूर्व्विकाम् ।
सन्ध्ययोर्वेदविद्विप्रो वेदपुण्येन युज्यते ।')
वेदव्यास पुं (वेदं व्यस्यति पृथक् करोतीति । वि+अस+अण । निरुक्तिस्तु परत्र द्रष्टव्या ।) मुनिविशेषः । तत्पर्य्याय । माठरः २ द्वैपायन ३ पाराशर्य्य ४ कानीन ५ बादरायण ६ व्यास ७ । इति हेमचन्द्र । कृष्णद्वैपायन ८ सत्यभारत ९ पाराशरि १० सात्यवत ११ । इति त्रिकाण्डशेष । बादरायणि १२ सत्यवतीसुत १३ सत्यरत १४ पाराशर १५ । इति शब्दरत्नावली । (यथा विष्णुपुराणे ।
"वेदमेकं चतुर्भेदं कृत्वा शाखाशतैर्विभुः ।
करोति बहुलं भूयो वेदव्यासस्वरूपधृक् ।
द्वापरे तु युगे विष्णुर्व्यासरूपी महामुने ।
वेदमेकं स बहुधा कुरुते जगतो हितः ।
यथा च कुरुते तत्वा वेदमेकं पृथक् प्रभुः ।
वेदव्यासाभिधाना तु सा सा मूर्त्तिर्मधुद्विषः ।")
अस्याख्यान् विवरणं व्यासशब्दे द्रष्टव्यम् ।
वेदव्यक्री, स्त्री, (वेदानामध्यक्षी ।) सरस्वती । इति राजनिर्घण्टः ।
वेदाङ्ग, क्ली (वेदस्य अङ्गम् ।) श्रुत्यवयवषट्प्रकारशास्त्रम् । तद्यथा । शिक्षा १ कल्प २ व्याकरणम् ३ निरुक्तम् ४ ज्योतिषम् ५ छन्दः ६ । यदुक्तम् ।
"शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गणः ।
छन्दोविचितिरित्येतैः षडङ्गो वेद उच्यते ।" इति ।
तत्र अकारादिवर्णानां स्थानकरणप्रयत्नबोधिका अकृ ए ह विसर्जनीया जिह्वा इत्यादिका शिक्षा । यज्ञक्रियाणामुपदेशः कल्पः । साधुशब्दान्वाख्यानं व्याकरणम् । वर्णागमो वर्णविपर्य्ययश्च इत्यादिका निरुक्तिर्निरुक्तम् । यज्ञादिकालज्ञानार्थं ज्योतिः । श्रुतिच्छन्दसां ज्ञापकं शास्त्रं छन्दोविचितिः । इत्यमरभरतौ । (यथा मनुः । ४ । ९८ ।
"वेदाङ्गानि च सर्व्वाणि कृष्णपक्षेषु सम्पठेत् ।")
वेदादि, क्ली (वेदानामादिः । "अविद्योपचारिका शब्दाः स्वलिङ्गमपि जहतीति" व्याकरणोक्तत्वम् ।) प्रणवम् । यथा,—
"वेदादि भुवनेशीं च मीबीजं द्वयुतं भृगुम् ।
कारयित्वा वदेकन्तं शुक्रस्य च षडक्षरम् ।"
इति रुद्रयामलम् ।

(वेदस्य पूर्व्वे, पुं । यथा, तैत्तिरीयारण्यके ।
"यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।")
वेदादिबीज, क्ली (वेदस्यादौ प्रयुक्तं बीजम् ।) प्रणवम् । यथा,—
"वेदादि भुवनेशीं च श्रीबीजं द्वयुतं भृगुम् ।
कारयित्वा वदेकन्तं शुक्रस्य च षडक्षरम् ।
ॐ ह्रीं श्रीं शुक्राय । इति रुद्रयामलम् ।
"वेदादिबीजं हूँ बीजं स्त्रीबीजं सन्निकेतनम् ।
शक्तिराज रमाबीजं मायाबीजं सुखाकरम् ।"
इति राघवाचार्य्यरीतम् ।
वेदाधिप, पुं, (वेदानामधिपः ।) यजुर्व्वेदाधिपतिग्रह । यथा,—
"ऋग्वेदाधिपतिर्जीवो यजुर्व्वेदाधिपः सितः ।
सामवेदाधिपो भौमः शशिजोऽथर्व्ववेदराट् ।"
इति ज्योतिस्तत्त्वम् ।
वेदान्त, पुं (वेदानां अन्तः ।) उपनिषत् । इति हेमचन्द्रः । वेदव्यासप्रणीतदर्शनशास्त्रविशेषोऽपि । यथा । वेदान्तो नाम उपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च । इति परमहंसपरिव्राजकाचार्य्यश्रीसदानन्दयोगीन्द्रविरचितवेदान्तसारः । * । "इन्द्रियाणां सर्व्वस्यापि वस्तुविचारोद्देशपूर्व्वकत्वात् प्रतिज्ञातं वेदान्तं नामतो निर्दिशति वेदान्त इति । उपनिषदः एव प्रमाणं उपनिषत्प्रमाणम् । उपनिषदो यत्र प्रमाणमिति वा । तदुपकारीणि वेदान्तवाक्यसमन्वायकानि शारीरकसूत्रादीनि च । शरीरमेव शारीरं तत्र भवो जीवः शारीरकः तस्य यथात्म्येन निरूप्यते यैः तानि शारीरकसूत्राणि अथातो ब्रह्मजिज्ञासा इत्यादीनि । आदिशब्दो भाष्यादिसङ्ग्रहार्थः । चशब्दो वेदान्तशब्दानुषङ्गार्थः । यद्वा शारीरकसूत्राणि तदुपयोगवादिवेदान्तवाक्यसङ्ग्राहकाणि । 'अथातो ब्रह्मजिज्ञासा इत्यादिसूत्राणीति । आदिशब्देन भगवद्गीताद्यध्यात्मशास्त्राणि गृह्यन्ते । तेषामपि उपनिषच्छब्दवाच्यत्वादिति भावः ।" इति नृसिंहसरस्वतीकृता सट्टीका सुबोधनी । अस्य नामान्तरं उत्तरमीमांसा । तत्र चत्वारः अध्यायाः । तत्र ब्रह्मनिरूपणम् । तद्विवरणं यथा,—
"अथ तत्त्वमस्यादिमहावाक्यार्थ ...
मायामयो भ्रमति भ्रमयति पुनः पुनः
जगत् ।
मायामयोऽप्यमीता गुणकरणगणः करोति
कर्म्माणि ।
तदधिष्ठाता देवो यद्यपि न करोति
किञ्चिदपि ।
यद्वच्चेतनमपि सन्निकटस्थं भ्रामकं भ्रमति
लोकम् ।
तद्वत् करणगणश्चेतति चिदधिष्ठितो देवः ।
तद्वत् सन्निधिमात्रेण करोति कर्म्माणि जीव
लोकोऽयम् ।

न च तानि करोति दविनं कारयति तदन्यानि ।
मतमोऽहङ्कारविमूढचित्तस्य चैतन्योऽभिरूढेह ।
पुरुषाभिमानयुक्तः स्वभावतो भवति मूढस्य ।
कर्त्ता भोक्ता दातास्मि कर्म्मणामुपमानानाम् ।
इति तत्त्वभावविमूढोऽभिमन्यते सर्व्वगोप्यात्मा ।
नानाविधवर्णानां वर्णान् धत्ते यथामलस्फटिकः ।
तद्वदुपाधिगुणभावितस्य भावं विभुर्धत्ते ।
गच्छति गच्छति सलिले दिनकरबिम्बं स्थिते
स्थिति याति ।
चलकरणे गच्छति गच्छत्यात्मापि तदन्विह ।
राहुरदृश्योऽपि यथा शशिबिम्बस्थः प्रकाशते
जगति ।
सर्व्वगतोऽपि तथात्मा बुद्धिस्थो दृश्यतामेति ।
आदर्शे मलरहिते यद्वद्रूपं विलोकते लोकः ।
आलोकयति तथात्मा विमलबुद्धौ स्वमात्मानम् ।
सर्व्वगतं तत् निरुपममद्वैतं तत्त्व चैतन्यं शश्वत् ।
यद्बुद्धिगतं सत्योपलभ्यते शिष्यबोधाय तत ।
बुद्धिमनोऽहङ्कारात्मकेन्द्रियगणा भ्रमन्ति
गणाः ।
संसारमहापरिवर्त्तमानात्मा प्राग्लब्ध्वा दैवात् ।
धर्म्माधर्म्मौ सुखदुःखकल्पना स्वर्गनरकवासश्च ।
उत्पत्तिनिधनवर्णाश्रमा न सन्तीह परमार्थे ।
मृगतृष्णायामुदकं शुक्तौ रजतं भुजङ्गमो
रज्ज्वाम् ।
तैमिरिकचन्द्रयुगवत् भ्रान्तं निखिलं जगद्रूपम् ।
यद्वद्दिनकर एको विभाति सलिलाशयेषु सर्व्वेषु ।
तद्वत् सकलोपाधिष्ववस्थितो भाति परमात्मा ।
स्वमिव घटादिष्वम्बरमिह सर्व्वं ब्रह्म सर्व्व
विश्वेषु ।
देहोऽहमिति यदात्मनि बुद्धिः समारभ्यते ।
सर्व्वविकल्पविहीनः शुद्धोऽशुद्धोऽजरोऽमर
आत्मा ।
अमल सहजिमानचेतन आत्मा सर्व्वदायी ।
एषा नित्यशर्व्वरिका शुद्धतका विलसतो
महेशस्य ।
तद्रूपाभिन्न परमात्मैव बहुरूपा ।
विश्वाकारनिराकारविराटरूपभाति
विश्वात्मा ।
व्यवहारतोऽज्ञानमय एवोऽस्मानिवेशिता ज्ञः ।
दर्शो नास्ति भुजङ्ग जपमयः भवति वेदतः
वेद ।
सदद्वैतविकल्पज्ञानिरविद्या च वर्त्तितम् ।
एतत्प्रकार ज्ञानान्तरात्मनाधास्या ।
न हि नि वासुदेवे कल्याकाशं धरा गङ्गा ।
प्राणाद्यन्तर्भिरात्मनि भवितव्य आत्मनि ।
संहरति वायुरिव सर्व्वभूता मोहमान इव ।
विभिरेव दिग्भेदविकल्पादिभिरात्मभवित
मावे ।
कालत्रयप्रसङ्गमपेहमनेकान्निर्गतं दुर्लभम् ।
मोहवत् नाशाय सहायता वैष्णवया दैव ।
उत्तमार्थं सद्भावं तुष्टाकर्षं पुरुषं प्राप्य ।

ज्वलनाद्धूमोद्गतिभिर्विविधाद्भिरम्बरे यथा भाति ।
तद्वदिन्द्रो ऽविद्याप्रमायया द्वैतविस्तारो भाति ॥
व्योम इव नभसि भान्ति घटे घट इव मठ इव मठे ।
अवधार्यो न पुनः परमार्थेन ईश्वरो भवति ॥
जलधरधूमोद्गतिभिर्मलिनीक्रियते यथा न गगनतलम् ।
तद्वत् प्रकृतिविकारैरपरामृष्टः परः पुरुषः ॥
एकस्मिन्नपि च घटे धूमादिमलावृते घटाः पीताः ।
न भवन्ति मलोपेता यद्वज्जीवोऽपि तद्वदिह ॥
देहेन्द्रियेषु नियताः कर्मगुणाः कुर्वते स्वभोगार्थम् ।
नाहं कर्ता न ममेति जानतः कर्म नैव बध्नाति ॥
अन्यशरीरैः सर्वं कर्मं भवेद्येन देहः उत्पन्नः ।
तद्वाप्य भोक्तव्यं भोगादेव क्षयोऽस्य निर्दिष्टः ॥
प्राक् ज्ञानोत्पत्तिचितं यत् कर्म ज्ञानशिखिनिर्दग्धं नष्टम् ।
बीजमिव न्यग्दग्धं नश्यत्यसर्वं न तद्भवति ॥
ज्ञानोत्पत्त्यूर्ध्वं क्रियमाणं कर्म यत्तदपि ।
न श्लिष्यति कर्तारं पुष्करपर्णं यथा वारि ॥
यावद्देहमात्मेन्द्रियं कर्मैव क्रियत इति बुधाः प्राहुः ।
यतोऽपि नाशमेवां कर्ता तत्कर्मणामस्ति ॥
कर्मफलभोगनाशाच्चास्ति विनाशो न चात्र सन्देहः ।
बुद्धेरपगततमाः सवितेव विभाति मोक्षणः ॥
यद्दिग्मोहात्पूर्वं पश्चाद्दिश एव दिशो याति ।
तद्वदविद्यानाशेन कर्माणि तत्त्वविदः ।
चौराद्यभयमाप्य निभ यद्वत् पूर्वमाश्रितम् ।
प्रकृतिगुणैरभ्यस्तात् पृथक्त्वचेतनोऽप्यात्मा ॥
गुणमयमायागतं निर्द्वैतं यथा तमः पश्यामि ।
बाह्याभ्यन्तरचारी देवश्च यथा भवेत् पुरुषः ॥
बहुदेहोऽपि यथा मृदः तथा विकारजातानि ।
तद्वत् स्थावरजङ्गममद्वैतं द्वैतवद्भाति ।
एकवत् पीयमानः पीयमानयो नाना ।
जीवगतानिव दृश्याः सम्यगपि विभुनिह कल्पाः ॥
तं पुरुषकृतमरीचिकादिसदृशा इव प्राप्यमानाः स्फुरन्ति ।
अथ बाधते तावद्यावन्न ज्ञानवह्निना दग्धाः ॥
त्रिगुणः चेतन्याद्भिन्नं सर्वगतोऽपि चिन्मात्रसारे ।
कुरुते कल्पितविद्या धर्मं च आत्मनि तथा माया ।
दन्तौ हृदयकृतौ प्रभवविनाशौ यथा न स्तः ।
न जन्मनितिविनाशौ न च कारणमस्ति तदिह ।
जन्मविनाशगमनागमनमले सङ्गवर्जिनो विश्वम् ।
आकाश इव घटान्तेषु सर्वात्मा सर्वतोऽपि सन् ।
कर्मशुभाशुभफलितैः संसृष्टः कैर्नो भवत्युपायेन धीमान् ।
तद्वद्याद्विश्वजन्मप्रकृतिरस्मद्वत् ।
दैवगुणकरणैः परकृतात् पुरुषस्य यावदिह भावाः ।
तावन्मायामाये संसारे चक्र इव भाति ।
आत्मपिण्डवान्यदपि भोगमय ।
जन्मजरामरणमये चक्र इव भ्राम्यते जन्तुः ॥
मोक्षपदद्वारतः प्रदत्ता विद्यानुपायतो नष्टा ।
तं जगदसदात्मधर्माणो ज्ञानमनैत निरन्तं ।
निमग्नमदृश्या इव भस्म धूमो यथा वह्नेः ।
तद्वत् स्वभावभूता मायेन कीर्तिता विष्णोः ॥
एवं द्वैतविकल्पां भ्रमकल्पां विमोहिनीं मायाम् ।
उत्सृज्य सकलं निष्कलमद्वैतं भावयेदात्मा ।
यद्वत् सलिले सलिलं क्षीरे क्षीरं समीरणे वायुः ।
तद्वदात्मनि विमले भावनया तन्मयत्वमुपयाति ॥
इत्थं द्वैतसमृद्धे भावनया ब्रह्मभूयमुपयाति ।
को मोहः कः शोकः सर्वं ब्रह्मावलोकयतः ॥
विमलोपाधिस्फटिकः स्वप्रभया भाति निर्मलो यद्वत् ।
निर्दोषः स्वप्रभया तथा विभातीह निरुपाधिः ॥
गुणकरणगणशरीरप्राणेन्द्रियमानजातिसुखदुःखे ।
अपरामृष्टो ज्ञानी चिन्मोऽयं सदा विमलः ॥
द्रष्टा श्रोता घ्राता स्पर्शयिता रसयिता प्रयोक्ता च ।
देहो देहेन्द्रियधीविषये स्वात्म कर्ता ॥
एको नैकस्थितो मद्वैर्यं योगतो ज्ञानः ।
आकाशवद्रहितमिदं न कश्चिद्यस्य सन्देहः ॥
आत्मैवेदं सर्वं निष्कलकलं सदैव भावयति ।
मोक्षमनादविद्यातत्त्वैव परमेश्वरीभूतः ॥
यद्यत् विज्ञानमनतर्कं प्रथमन्ति रामाच्याः ।
बहुमोहमसत्पदां सर्वाश्रमवादिविधाम् ।
सर्वाकारो भगवानुपास्यते येन येन भावेन ।
तं तं भावं भूत्वा चिन्तामणिवत् समभ्येति ॥
नारायणमाकारं ज्ञात्वा पश्यन्ति तत्वनिदेशम् ।
सर्वेषां सर्वगतः सर्वं सर्वेश्वरो भवति ।
आत्मन्यकरणि शुद्धं यथाविद्वान् विभेति कुर्वन्नपि ।
अश्वोरपि मरणमय न भयमन्दुर्भयं कुलद्वयम् ।
स्वपरहितदायकवस्तुपराधीनैर्निरस्य विषयम् ।
परमार्थतत्त्वमेतत् परतोऽस्यन्नुस कर्मम् ।
एवं प्रकृतिपुरुष विज्ञाय निरस्तकल्पनाजालः ।
आत्मारामः प्रशम समाश्रित्य कैवल्यमेति ।
कनकरत्नैर्नृपाणां नश्यन्ति यथा कदृष्ट भावात् ।
सदसत्स्वभावभूता स्वभावतो प्राप्य नश्यन्ति ।
भित्ते प्रारब्धौ छिन्ने संशयानि शुभाशुभे क्षीणे ।
दृष्टे च परमात्मनि परमानन्दं दधि याति ।
मोक्षस्य नैव किञ्चिद्धामास्ति न चापि गमनमस्य ।
अज्ञानमयग्रन्थेर्भेदो यस्य विदुर्मोक्षम् ।
बुद्धेरस्थितिमिव विद्योमायात्मक आवृतम् ।
विगतद्वन्द्वोपाधिकभोगाङ्गो भवेज्ज्ञानात् ।
बुद्धा विमलां प्रकृतिं पुरुषः संसारमध्यगो भवति ।
निर्मल सर्वकर्माभिरन्वयश्च यथा सलिले ।
अवगत्य तथा संयोगो येन केनचिज्ज्ञानात् ।
यत्र क्वचन च प्राप्तो विशुध्यति सर्वभूतात्मा ।
अश्वमेधशतसहस्राण्यपि कुरुते ब्रह्मघात कृत्यानि ।
परमार्थविन्न पुण्यैर्न च पापैः स्पृश्यते विमलः ।
मदलोपदमनसङ्कटविषादभयसंशयलक्षणान्या बुद्धिः ।
निर्लोभनाटकारो अहङ्कृतिपरित्यागमति ।
उत्पत्तिनाशवर्जितमेव परमार्थसुमन्दः ।
तत्त्वज्ञ सकलमङ्गं सर्वगतं शिवमिति पश्येम् ।
व्यापिनमभिन्नमित्यं सर्वात्मानं विगतकामम् ।
निजमपरमात्मानं यो वेद स तन्मयो भवति ।
तीर्थे श्वपचगृहे वा नष्टस्मृतिरपि परित्यजन् देहम् ।
ज्ञानसमकाल मुक्तः कैवल्यं याति हतशोकः ।
पुण्याय तीर्थसेवा निरयाय श्वपचसदननिधनगतिः ।
पुण्यापुण्यकृतदुःखाभावे तु निर्लेपः ।
स्वर्गापवर्गपातो यदि निष्कर्मः चितो पतति ।
तद्वन्मुनिपुरुषोऽपि निष्कलमपि नैकोभवति ।
परमार्थमात्मभावममात्मज्ञाय योऽभयमपि नाम ।
सर्वलोकभोगभोगी सुदितमना मोदते सुखं ब्रह्म ।
विषयेषु सार्वभौमः सर्वजनैः पूज्यते यथा राजा ।
सुरभेषु सर्वदेवैर्योगिजनस्तथा पूज्यः ।
महता कालेन महान् प्राप्य चौरसम्बाधः ।
प्राप्नोति दिव्यमचलं यत् परमं पदं विष्णोः ।
वैराग्यप्राप्तमखिल त्रिलोक्य शिवोऽसिताकारः ।
आर्यापञ्चाशीत्या यत्र परमार्थसारमिदम् ।"
इति श्रीशेषनागविरचितं परमार्थसारं समाप्तम् ॥

वेदान्ती [न्] पुं (वेदान्तोऽस्यास्तीति । वेदान्त + इनि ।) वेदान्तशास्त्रवेत्ता । तत्पर्यायः । ब्रह्मचारी च । इति जटाधरः ॥
वेदार, पुं, कृकलास । इति त्रिकाण्डशेषः ॥

वेदाभ्यास, पुं, (वेदस्य अभ्यासः ।) वेदानुशीलनम् । स च पञ्चविधः । यथा दक्षः ।
"द्वितीये च तथा भागे वेदाभ्यासो विधीयते ।
वेदाभ्यासो हि विप्राणां परमं तप उच्यते ॥
ब्रह्मयज्ञः स एव स्यात् षडङ्गसहितस्य च ।
वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः ।
तद्दानञ्चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधा ॥
समुत्थितो । न वेदमनधीत्यान्यां विद्यामधीयीत अन्यत्र वेदाङ्गस्मृतिभ्यः ।" इत्याह्निकतत्त्वम् ॥

वेदि, स्त्री (विद्+इन् ।) अभिज्ञा । इति शब्दचन्द्रिका ॥

वेदि स्त्री, (विद्यते पुण्यमस्यामिति । विद्+"कृपिविदिभिदिच्छिदिभ्य इन् ।" उणा ४ । ११८ । इति इन् ।) परिष्कृता भूमिः । इत्यमरः । परिष्कृता यज्ञार्थं पशुबन्धनाय यज्ञपात्रासादनाय चातिसंस्कारा भूमिर्वेदिरुच्यते । सा च डमरुकाद्याकारा पिण्डिका । वेदयति निवारयति दुःखजातं वेदिः । विदि ङ क ल चेतनाख्याने वासवादे नाम्नोति ६ । वेदिः स्त्री वेदी च । इति भरतः ॥ (यथा, रघुः । ११ । २५ ।
"बीजवेदिमथ रक्तबिन्दुभिः
२. बन्धुजीवपृथुभिः प्रदूषिताम् ।")
अङ्गुलिमुद्रा । इति मेदिनी ॥ (यज्ञोपकरणविशेषः । यथा, भागवते । १ । ६१ । २१ ।
"वैदूर्य्यस्थामलनीलविद्रुमैः
संस्थापरिह्निर्वेलभीषु वेदिषु ।")

वेदि, पुं, (वेत्तीति । विद्+इन् ।) पण्डितः । इति मेदिनी ॥

वेदिका, स्त्री, (वेदिरेव । स्वार्थे+कन् ।) मङ्गलकर्मार्थं निर्म्मितवेदिः । तत्पर्य्यायः । वितर्द्दिः २ । इत्यमरः । वितर्द्दी ३ वेदिः ४ वेदी ५ । इति तट्टीका । १ आरामाङ्गनादिमध्यस्थवेदिकायाम् । देवागारादौ काष्ठादिचतुष्किकाया मित्यन्ये । रत्नपरिष्कृता चतुरस्रा विश्रामभूमिर्वितर्द्दिरित्यपरे । स्तम्भयुक्तमण्डपीठिका वितर्द्दिरिति केचित् । मङ्गलार्थमण्डपाद्यङ्गचतुष्किकेति केचित् । मङ्गलस्नानार्थं निर्म्मितचत्वरिकेति केचित् । अशुभं वितर्द्दयति वितर्द्दिः । तर्द हिंसे वाच्नोति ९ । वेदिका स्याद्वर्त्मनि स्त्री इत्यन्तात् पक्षे ईप् वितर्द्दी च । वितर्द्दिः काष्ठलोहौ स्यादिति रूपे । वितर्द्दिरयीति मधु । विद्यन्ते विद्यते वा अस्यामिति वेदिः पूर्व्ववदिः स्वार्थे कः । अतएव वेदिर्वेदी च । इति भरतः । (यथा, कुमारे । ३ । ४४ ।
"स देवदारुद्रुमवेदिकायां
शार्द्दूलचर्म्मव्यवधानवत्याम् ।")

वेदिजा, स्त्री (वेद्या जायते इति । जन+ड ।) द्रौपदी । इति हेमचन्द्रः ॥

वेदित, त्रि, ज्ञापितः । ज्ञानविषयतां प्रापितः इत्यर्थेन विज्ञप्तमिदम् ॥

वेदितव्य, त्रि (विद्+तव्य ।) वेद्यम् । ज्ञातव्यम् । यथा,—
"आर्षं छन्दश्च दैवत्यं विनियोगस्तथैव च ।
वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः ॥"
इति तिथ्यादितत्त्वम् ॥

वेदिता, [ऋ] त्रि, (विद्+तृच ।) ज्ञाता । तत्पर्य्यायः । विदुरः २ विन्दुः ३ । इति हेमचन्द्रः । यथा, महाभारते । ५ । ४३ । ५२ ।
"न वेदानां वेदिता कश्चिदस्ति
वेदेन वेदं न विदुर्न वेद्यम् ।")

वेदी, [न्] पुं, (वेत्तीति । विद्+णिनि ।) पण्डितः । इति शब्दरत्नावली ॥ ब्रह्म । इति केचित् ॥ ज्ञातरि त्रि ॥ (यथा, रघुः । ८ । २७ ।
"स महार्हासनसंस्थितोऽध्वरे
पितुर्विधिना यज्ञवेदिभिः ।")

वेदी, स्त्री, (वेदि+कृदिकारादक्तिन इति वा ङीष् ।) वेदिः । इत्यमरटीकायां भरतः ॥ सरस्वती । इति शब्दमाला ॥

वेदीश, पुं, (वेदीनां पण्डितानामीशः ।) ब्रह्मा । इति त्रिकाण्डशेषः ॥

वेदोक्त, त्रि, (वेदे उक्तः ।) श्रुतिकथितः । यथा,
"वेदोक्तमेव कुर्व्वाणो निःसङ्गोऽर्पितमीश्वरे ।
नैष्कर्म्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः ॥"
इति मलमासतत्त्वम् ॥

वेदोदय, पुं, (वेद विषयज्ञानमुदये यस्य ।) सूर्य्यः । इति त्रिकाण्डशेषः ॥

वेदोदित, त्रि (वेदे उदितः ।) वेदोक्तः । यथा,—
"वेदोदितानां नित्यानां कर्म्मणां समतिक्रमे ।
स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम् ॥"
इति मलमासतत्त्वम् ॥

वेद्य त्रि, (विद्+ण्यत् ।) वेदितव्यम् । यथा —
"धर्म्मः प्रोज्झितकैतवोऽत्र परमो निर्म्मत्सराणां सताम्
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ।
श्रीमद्भागवते महामुनिकृते किम्वा परैरीश्वरः
सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ॥"
इति श्रीभागवते १ स्कन्धे १ अध्यायः ॥
(धनाय हितम् । यथा, ऋग्वेदे । २ । २ । १ ।
"हविभिर्वेद्यं शुक्रशोचिषमध्वरम् ।"
"वेद्य वेदो धनम् । तस्मै हितम् ।" इति तद्भाष्ये सायनः । सुखम् । तथा तत्रैव । ५ । ११ । १ ।
"प्रवेद्यसि कवये वेद्याय गिरम् ।"
"वेद्याय सुखाय ।" इति तद्भाष्ये सायनः ॥ लभ्यम् । यथा, वाजसनेयसंहितायाम् । १८ । ११ ।
"वित्त च मे वेद्यञ्च मे ।"
"वेद्यं लभ्यम् ।" इति तद्भाष्ये महीधरः । वेदाय हितमिति । वेद+यत् । वेदहितम् । वेदप्रतिपाद्यम् । यथा, महाभारते । १३ । १४९ । १४ ।
"वेदाश्च यत् वेदयति च वेद्यं
विधिश्च यश्चाश्रयते विधेयम् ।
धर्म्मे च वेदे च बले च सर्व्वं
चराचरं केशवं त्वं प्रतीहि ।")

वेध, पुं (विध+घञ ।) वेधनम् । बेंधा इति भाषा । तत्पर्य्यायः । व्यधः २ । इत्यमरः । (यथा, महाभारते । १२ । १६८ । ३६ ।
"शब्दवेधी पर पञ्चमक्षरोपमेव गौतम ।")
गभीरता । गहरा इति गाढ़ा इति च भाषा । यथा,—
"गणयित्वा विस्तारं बहुधा ध्यानेन तद्गुणि-
भाज्या ।
खातफलमित्याद्यमभितिरेवं वेधो च वेधे च ।
दिक्सूत्रं वेधगुणं खाते घनहस्तसंख्या स्यात् ।"
इति लीलावत्यां खातव्यवहारः ॥ ० ॥
अथ सप्तशलाकावेधः ।
"कृत्तिकादिचतुःसप्तरेखाराशौ प्रदिक्षणम् ।
पञ्चवेदैकरेखास्थो वेधः सप्तशलाकजः ॥"
इति दीपिका ॥ ० ॥
अथ खर्ज्जूरवेधः ।
"एकाम्बरगतां मध्योदग्रां तथा तिर्य्यगताः
स्थापयेत्
रेखाश्चतस्रिः सुधीरभिहितं खार्ज्जूरिकं तच्च तु ।
धाताताहि तु मध्ये भवत् कथितं तच्चैकरेखा-
स्थयो
सूर्य्यचन्द्रमसोर्मिथो निगदिता हकपात एका
र्गलः ।"
इति रत्नमाला ॥ ० ॥
अथ तुलवेधः ।
"मासात् सप्तम पक्षौ यदि भवेत् मासेन वा
चन्द्रतो
पक्षात् परिवर्ज्जयेत् सुनिमतो दोषो महान्
कथ्यते ।"
अथ यामित्रवेधः ।
"रविमन्दकुजाक्रान्ता सप्तमात् सप्तम त्यजेत् ।
विवाहयात्राचूडासु गृहकर्म्मप्रवेशने ।"
इति रत्नमाला ।
यामदण्डिकवेधौ यामवेधप्रभृतौ द्रष्टव्यौ ॥

वेधक, स्त्री, (विध+ण्वुल ।) धान्यकम् । इति राजनिर्घण्टः ॥

वेधक, पुं (विध+ण्वुल् ।) कर्पूरः । इति त्रिकाण्डशेषः । अम्लवेतसः । इति राजनिर्घण्टः ॥ (मणिमुक्तादिवेधनकारी । यथा, रामायणे । २ । ८३ । ११ ।
"मायूरिकाः क्राकचिका वेधका रोचकाः
तथा ।")

वेधकर्त्तरि, त्रि । (यथा, महाभारते । ११ । ३१ । ८० ।
"प्रासादस्येव बाणानां वेधकाश्च वै ।
बन्धवाश्च मनूनां वै ते वै नियन्तारिन ।")

वेधनिका, स्त्री (विध्यतेऽनयेति । विध+करणे ल्युट् । तत स्वार्थे कन् ।) मणिमुक्तादिवेधनोपकरणम् । भोमरी इति भाषा । तत्पर्य्यायः । आस्फोटनी । इत्यमरः । आस्फोटनी १ स्फोटनी २ उत्करिका ३ । इति भरतधृतकात्यः ॥

वेधनी, स्त्री, (विध्यतेऽनयेति । विध + ल्युट् । स्त्रियां ङीप् ।) मणिकाष्ठवेधनास्त्रम् । इति शिल्पशास्त्रम् । मेथिका । इति भावप्रकाशः ।

वेधमुख्य, पुं (वेधे वधने मुख्यः श्रेष्ठः ।) कच्चूर । इति राजनिर्घण्टः ।

वेधमुख्यक पुं, (वेधमुख्य + स्वार्थे कन् ।) हरिद्रा इव । काँचा बल्दि इति ख्यात । तत्पर्य्यायः । जन्तुघ्न १ द्राविडक २ काल्पक ३ कारवक ४ । इत्यमरभरतौ ।

वेधमुख्या, स्त्री, (वेधे मुख्या ।) कस्तूरी । इति राजनिर्घण्टः ।

वेधस क्ली, ब्राह्मतीर्थम् । अङ्गुष्ठमूलम् । इति शब्दचन्द्रिका ।

वेधा, [स्]पुं (विदधातीति । वि + धा + "विधाञो वेध च ।" उणा ४ । २२७ । इति असि । वधादेशश्च धोपसर्गधातो ।) ब्रह्मा । (यथा, रघु । १ । २९ ।
"स वेधा विन्ध्ये पूर्वं महाभूतसमाधिना ।
तथाहि सर्व्वे तस्यासन् परार्थैकफला गुणाः ॥")
विष्णुः । इत्यमरः ॥ (शिवः । यथा, हरिवंशे भविष्यपर्व्वणि । १५ । १२ ।
"नमस्ते स्थितिकर्त्रे च लोकपोषाय वेधसे ॥")
सूर्य्यः । इति शब्दरत्नावली । पण्डित । इति विश्वः । श्वेतार्कवृक्ष । इति शब्दचन्द्रिका ॥
वामनपुत्रः । यथा,—
"इत्याकुर्य्यैहृदयादो मध्यदेशमथागमत् ।
सुतुष्टस्य पतिष्टात तस्य पुत्र पुरूरवाः ।
नरिष्यन सुता पुत्रा प्रार्थ पाण्डुराङ्गतम् ।
नाभागस्यामरीषोऽभूत् धृष्टस्य पार्थिवं तत ।
कोशवे पार्थवं पर्त्रं रम्भहर्निमभूष च ।
सुतोऽपि मेघुमस्यायोदवत्तो नाम विश्रुतः ।
सुकन्या नाम कन्या च या पत्नी धारवस्य च ।
अमलस्य च पुत्रोऽभूत् वेधो नाम महायशः ।
स्वामनैनिवधे तेन पुरी कुशावती कृता ॥"
इति वह्निपुराणे वामरोपाख्याननामाध्यायः ॥
(प्रजापतिरेंप्यादि । यथा, कुमारे । २ । १३ ।
"परमोऽपि परस्यापि विधाता वेधसामपि ।"
त्रि मेधावी । इति निघण्टुः । ३ । १५ । विविध कर्म्मा । यथा ऋग्वेदे । १ । ३१ । १२ ।
"त्वं वेधसं नीलहस्त हसनम् ।"
"वोढारं वेदवेधसं विविधकर्तारम् ।" इति तद्भाष्ये सायणः ॥)

वेधित, पुं (विध + णिच् + क्त ।) कारित विद्धं । छिद्रित । इत्यमरः ॥

वेधिनी स्त्री, (विध्यति अनयेति । विध छिद्रीकरणे + णिनि । ङीप् ।) जलूका । इति शब्दरत्नावली । जोँक इति भाषा । मेथिका । इति राजनिर्घण्टः ॥

वेधी [न्] त्रि (विध्यतीति । विध छिद्रीकरणे + णिनि ।) वेधकर्त्ता । (यथा महाभारते । ५ । ८६ । १० ।
"वेधामपोऽपि बलेन नाविकाथेन मायया ।
बिभिन्नवेधी च हन्रिरोधोभिर्भि समर्पयत् ॥")
वेधविशिष्ट । विधधातोर्णिनूप्रत्ययेन वेधशब्दात् इत्यर्थे इनुप्रत्ययेन वा निष्पन्न । अम्लवेतसे, पुं । इति राजनिर्घण्टः ॥

वेध्य क्ली (विध + ण्यत् ।) लक्ष्यम् । इति जटाधरः । (यथा मार्कण्डेये । ४२ । ७ ।
"प्रणवो धनुः शरो ह्यात्मा ब्रह्म वेध्यमनुत्तमम् ।
अप्रमत्तेन वेद्धव्यं शरवत् तन्मयो भवेत् ॥")
वेधनीये त्रि । यथा,—
"षट्कर्णात्रितिमायस्य मासी शुद्धा कर्मेऽपि च ।
कर्णौ वेध्यौ न दोषः स्यादन्यथा मरणं भवेत् ॥"
इति मलमासतत्त्वम् ॥

वेन, पुं (अजतीति । अज गतौ + "धाप्रभ्य अवितिभ्यो नः ।" उणा ३ । ६ । इति नः । अजतेः वीभावः ।) प्रजापतिः । इत्युणादिकोषः ॥ (पृथुराजपिता । यथा, मार्कण्डेये । १०७ । १४ ।
"इलमेलं तथा लोभात् प्रजाशिन ह्रिवेतनम् ।"
अस्यान्यद्विवरणं सहस्रपाण्डवेनशब्दे द्रष्टव्यम् ॥) देवविशेषः । इति निघण्टुः । ५ । ४ । २१ । यथा, ऋग्वेदे । १ । १९१ । १ ।
"अयं वेनश्चोदयत् पृश्निगर्भा ।"
"वेनः कान्त एतन्नामा माध्यमस्थानो देवः ।"
इति तद्भाष्ये सायणः । ०। अर्चति शब्दकर्मेव स्तुतिविति । यज्ञ । इति निघण्टुः । ३ । १७२ । त्रि, मेधावी । इति निघण्टुः । ३ । १५ । ६ । यथा वाजसनेयसंहितायाम् । ११ । १ ।
"सोमस्य सुवनो वेन आवः ।"
"वेनः कान्तनीयो मेधावी वा ।" इति तद्भाष्यम् ॥
कामयमानः । यथा, ऋग्वेदे । ८ । ९८ । १ ।
"आयन्नुमा वेना अरुहत्नृतस्य ।"
"वेनाः कामयमानाः ।" इति तद्भाष्ये सायणः ॥)

वेना, स्त्री, (वन शब्दे संभक्तौ वा + "वनेरिच्चो पधायाः ।" उणा १ । ८ । इति न उपधाया इत्वञ्च ।) नदीविशेषः । इति सिद्धान्तकौमुद्या मुणादिवृत्तिः । (यथा महाभारते । ३ । ८८ । ३ ।
"वेणा भीमरथी चोभे नद्यौ पापभयापहे ॥")

वेप ट प ङ कम्पे । इति कविकल्पद्रुमः । (भ्वा आत्म अक सेट् ।) पञ्च कम्पनम् । ट, वेपथुः । प, अविवेपत् । ङ वेपते वायुना तरुः । इति दुर्गादासः ॥

वेपः, [स्] क्ली (वेप कम्पने + "सर्व्वधातुभ्योऽसुन् ।" उणा ४ । १८८ । इत्यसुन् ।) कम्पनम् । यथा —
"स्नान्यन्योनिसो अर्थ वचो वाचस पातुम् ।
तेरो वेपोऽयवद्दीव सभायाञ्च वशो न वा ॥"
इत्युणादिकोषः ।
(विदेः । इति सायनः । ऋग्वेद । ३ । ५८ । ७ । कर्म्म । इति निघण्टुः । २ । १ । ६ । यथा, ऋग्वेदे । १० । ३६ । ८ ।
"प्रविक्तुका मरुतो वेपो अग्नि ।"
"वेपः कर्म्मोद्यतेस्तु ।" इति तद्भाष्ये सायणः ।)

वेपथु, पुं, (वेपनमिति । वेप + "ट्वितोऽथुच् ।" ३ । ३ । ८९ । इति अथुच् ।) कम्पः । इत्यमरः ॥ (यथा, गीतायाम् । १ । २९ ।
"वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥")

वेपन क्ली (वेप + ल्युट् ।) कम्पनम् । इति शब्दरत्नावली ॥ (यथा सुश्रुते शारीरस्थाने १० अध्याये । "तत्र विहङ्ग शोणितविमद मोहनमूर्च्छाविषमाणि मरणं वा भवति ॥")

वेम, पुं वायदण्डः । यथा,—
"वायदण्ड पुंसि वेमा वेमो वा वेम न द्वयोः ॥"
इति शब्दरत्नावली ॥

वेमा [न्] पुं (वयन्त्यनेनेति । वे + "वेञ सर्व्वत्र ।" उणा ४ । १४९ । इति मनिन् ।) वायदण्डः । इत्यमरभरतौ ॥ (यथा नैषधे । १ । १२ ।
"सितांशुवर्णैर्वयति स्म तद्गुणै-
र्महासिवेम्नः सहकृत्वरी बहुम् ॥"
अकारान्तोऽप्ययं दृश्यते । यथा वाजसनेयसंहितायाम् । १९ । ८३ ।
"नग्नहुर्धीरस्तसरं न वेम ॥")

वेर क्ली, शरीरम् । वार्त्ताकुः । कुङ्कुमम् । इति मेदिनी ॥

वेरक क्ली, कर्पूरम् । इति हारावली ॥

वेल, ऋ चाले । इति कविकल्पद्रुमः । (भ्वा पर सक सेट् ।) ऋ, अविवेलत् । इति दुर्गादासः ॥

वेल ग क कालार्थे । इति कविकल्पद्रुमः । (अदन्त चुरा० पर अक सेट् ।) कालार्थ काली पदेश । अविवेलत् । कालमियत्तया गणक एतावानी वेलति कथितवानित्यर्थः । इति दुर्गादासः ॥

वेल, क्ली, उपवनम् । यथा नैषधे ।
"अशोकाभ्यां वर्ज वेलमारामं जनिमे वनी ॥"

वेला, स्त्री, (वेलतीऽनयेति । वेल + गुरोश्च हलः इत्य । तनटाप् ।) कालः । तत्पर्य्यायः । समयः २ वेला ३ वारः ४ अवसरः ५ प्रस्तावः ६ प्रक्रमः ७ अन्तरम् ८ । इति हेमचन्द्रः ॥
तत्परिमाणानि यथा —
"अधिपश्चार्द्धविघ्नो निमेष परिकीर्त्तितः ।
द्वौ निमेषौ त्रुटिर्ज्ञेया द्वे त्रुटी तु लव स्मृत ।
द्विलवं चैव दृष्टुं काष्ठा पञ्च दश कला ।
दश काष्ठा त्रिंशा नाम तदर्द्धश्च स्मृता नाडिका ।
घटिके द्वे मुहूर्त्तः स्यात्तेस्त्रिंशता दिवानिशम् ।
चतुर्विंशतिवेलाभिरहोरात्रं प्रचक्षते ।
यमौद्यादि विशेयो मुहूर्त्तानां क्रम स्थराः ।
पञ्चिमाद्वेरशाद्वि चोराशी विशी क्रम ।
वोर्द्ध त्रिंशामुहोरात्रं पक्षो लक्षणिनाधिनी ।
विंशता च दिनैर्मासो द्विमास ऋतुरुच्यते ।
भवेद्विषुमतोयाम दक्षिणोत्तरायणे ।
वर्षं द्वादशभिर्मासैर्मासाश्चयोश्च ॥"
इति वह्निपुराणे अक्षदिवसनामाध्यायः ॥ ० ॥
मर्य्यादा । इत्यमरः ॥ (यथा महाभारते । ५ । ११ । १८ ।

"धिगस्तु नष्टं खलु भारतानां
धर्म्मं तथा क्षत्रविदाञ्च वृत्तम् ।
यत्र प्रतीतां कुरुधर्म्मवेलां
प्रेक्षन्ति सर्व्वे कुरवः सभायाम् ॥")

समुद्रकूलम् । (यथा, रघुः । १ । ३० ।
"स वेलावप्रवलयां परिखीकृतसागराम् ।
अनन्यशासनामुर्व्वीं शशासैकपुरीमिव ॥")
समुद्रजलविकारः । (यथा, रघुः । १२ । ३६ ।
"तस्य मैथिलीहाय क्षयसौम्यां निजाय
ताम् ।
निशान्तस्तिमितां वेलां चन्द्रोदय इवोदधिः ॥")
अक्लिष्टमरणम् । रागः । ईश्वरस्य भोजनम् ।
इति मेदिनी ॥ अथ पवर्गीयवकारादौ
बिल्लिता । रागस्थाने रोगः । वाक् । बुधस्त्री ।
इति विश्वः ॥ दन्तमांसम् । इति हारावली ॥

वेलाकूलं, क्ली, (वेला एव कूलं यस्य ।) ताम्रलिप्त
देशः । यथा —
"वेलाकूलं ताम्रलिप्तं ताम्रलिप्ती तमालिका ॥"
इति त्रिकाण्डशेषः ॥
(समुद्रकूलम् । यथा, भागवते । १ । ६७ । ५ ।
"क्वचित् समुद्रमध्यस्थो दोर्भ्यामुत्क्षिप्य तज्जलम् ।
देशान् नाशयत् प्राप्तो वेलाकूले व्यमज्जयत् ॥")

वेलिभुक्प्रियः, पुं, घोरभयत्ताम्रः । यथा —
"—————इत्याद्ये स्मृतिगौरभे ।
महाकालश्च किम्पाकः उर्व्वटो वेलिभुक्प्रियः ॥"
इति शब्दरत्नावली ॥
(बलिभुक्प्रिय इत्येव पाठः साधुः ।)

वेल्ल श्व चाले । इति कविकल्पद्रुमः ॥ (भ्वा-
पर-अक-सेट् ।) ऋ, अविवेल्लत् । चाल
चलनम् । उद्वेल्लद्भुजवल्लिकङ्कणझणत्कार
श्च श्रूयताम् । गतावित्यन्ये । इति दुर्गादासः ॥

वेल्ल, क्ली पुं (वेल्लतीति । वेल्ल चलने+पचाद्यच् ।)
विडङ्गः । इत्यमरः ॥ (भावे घञ् ।) गमने, पुं ।
इति वेल्लधात्वर्थदर्शनात् ॥

वेल्लजं, क्ली (वेल्लात् जायते इति । जन+ड ।)
मरिचम् । इत्यमरः ॥

वेल्लनं क्ली, (वेल्ल+ल्युट् ।) भूमौ अश्वस्य
लुठनम् । तत्पर्य्यायः । लुठनम् २ । इति
त्रिकाण्डशेषः ॥ (चलनम् । यथा, राज
तरङ्गिण्याम् । ८ । ११८३ ।
"धरा वरित्रं सरयवीर्च्चलमिपदेशे
वेल्लोर्म्मिवेल्लनवशैव विवर्त्तमाना ॥")
रोटिकादिनिर्म्माणार्थसूक्ष्मवर्त्तुलकाष्ठविशेषः ।
इति भावप्रकाशः ॥ वेलन् इति भाषा ॥

वेल्लनी, स्त्री, (वेल्लति लुठति अश्वादिरनेनेति ।
वेल्ल+ल्युट् । ङीप् ।) गण्डदूर्व्वा । इति
राजनिर्घण्टः ॥

वेल्लन्तरः पुं वीरतरुः । यथा, भावप्रकाशे ।
"वेल्लन्तरो भवति वीरतरुः प्रदिष्ट
श्चेतासिताख्यविधोवितलोपमुख्यः ।
छान्यातिमुक्तकुसुमः शमिपत्रपत्रः
स्यात् कटकौ च शरदेश्म एव रूपः ॥"
अस्य गुणाः ।
"वेल्लन्तरो रसे पाके तिक्तस्तुष्णाकषायकः ।
मूत्राघाताश्मजिद्ग्राही योनिमूत्रानिलार्त्ति-
जित् ॥"

वेल्लहल, पुं, केलिनागरः । इति जटाधरः ॥

वेल्लि स्त्री, (वेल्लति चलतीति । वेल्ल+इन् ।)
लता । इति शब्दरत्नावली ॥

वेल्लिकाख्या स्त्री (वेल्लिका आख्या यस्याः ।)
क्षुपविशेषः । वेलसुठा इति भाषा । यथा,—
"मत्स्याक्षी वेल्लिकाख्या विल्लपत्री स्वरा
मता ॥"
इति शब्दचन्द्रिका ॥

वेल्लित क्ली, (वेल्ल+क्त ।) गमनम् । इति मेदिनी ॥

वेल्लित त्रि, (वेल्ल+क्त ।) कुटिलः । आविद्धः ।
इत्यमरः ॥

वेवी, ङ य ऌ ङ कान्तिगतिव्याप्तिक्षेपप्रजनखादने ।
इति कविकल्पद्रुमः ॥ (अदा-आत्म-कान्तौ
अक-अन्यत्र सक-सेट् ।) ङ वैदिकः ।
य, अवेव्य । बहुलं छन्दसीति परस्मैपदे
अडुस् सिद्धे अदिवान् उस् ग्रहणस्याभिति गुणः ।
ऌ ङ वेवीते । इति दुर्गादासः ॥

वेश, पुं, (विशन्ति नयनमनांस्यस्मिन्निति । विश्+
अधिकरणे घञ् । यद्वा, विशति अङ्गमिति ।
"पदरुजविशस्पृशो घञ् ।" ३ । ३ । १६ । इति घञ् ।)
अलङ्कारवस्त्रादिकृतशोभा । तत्पर्य्यायः ।
आकल्पः २ नेपथ्यम् ३ प्रतिकर्म्म ४ प्रसा
धनम् ५ । इत्यमरः ॥ वषः ६ । इति तट्टीकायां
भरतः ॥ (यथा, भागवते । १ । १७ । ५ ।
"नरदेवोऽसि वेशेन नटवत् कर्म्मणाद्विजः ॥" ॥
विशन्ति कामुका यत्रेति । अधिकरणे घञ् ।)
वेश्यागृहम् । गृहमात्रम् । इति मेदिनी ॥
(वश्यगृहम् । तांबु इति भाषा । यथा,
महाभारते । ५ । १५१ । ५३ ।
"शकटापणवेशाश्च यानयुग्यञ्च सर्व्वशः ।
• • •
तत्र यद्वापरो राजा ये चापि परिचारकाः ॥")
प्रवेशः । इति विशधात्वर्थदर्शनात् ॥ (भृत्य
स्थापा भृतिः । यथा, मनुः । ४ । ८४—८५ ।
"न राज्ञः प्रतिगृह्णीयाद्राजन्यप्रसूतितः ।
सूनाचक्रध्वजवतां वेशेनैव च जीवताम् ॥
दशसूनासमं चक्रं दशचक्रसमो ध्वजः ।
दशध्वजसमो वेशो दशवेशसमो नृपः ॥")

वेशक, पुं (वेश एव । स्वार्थे कन् ।) गृहम् । इति
शब्दरत्नावली । वेशकारके त्रि ॥

वेशदान, पुं सूर्य्यशोभा । इति शब्दचन्द्रिका ॥

वेशधारी, [न्] पुं (वेशं नायकचिह्नं धरतीति ।
धृ+णिनि ।) छद्मवेशी । इति शब्दरत्ना
वली ॥ (बहुरूपादिविशेषः । यथा, ब्रह्म
वैवर्त्ते प्रकृतिखण्डे । १ अध्यायः ।
"मल्लाद्भवस्य कन्यायां शौण्डिके वेशधारिकः ।
बभूव वेशधारी च पुत्रो दुष्टो प्रकीर्त्तितः ॥")
वेशधारके, त्रि ॥

वेशन्तः, पुं, (विशन्त्यत्र भेकादय इति । विश+
"झृविशिभ्यां झच् ।" उणा ३ । १२६ । इति
झच् ।) क्षुद्रसरोवरः । इत्यमरः ॥ अपि
इत्युणादिकोषः ॥

वेशरः, पुं, अश्वतरः । इति त्रिकाण्डशेषः ॥

वेशवारः पुं, वेसवारः । इत्यमरटीकायां राय
मुकुटः ॥

वेशीवाता, स्त्री, पुत्रनागीलता । इति राज
निघण्टः ॥

वेश्म, [न्] क्ली, (विशन्त्यस्मिन्निति । विश+मनिन् ।)
गृहम् । इत्यमरः ॥ (यथा, मनुः । ४ । ७३ ।
"अद्वारेण च नातीयात् ग्रामं वा वेश्म वा वृ
तम् ॥")

वेश्मकलिङ्ग, पुं (वेश्मनः कलिङ्ग ।) चटकः ।
अस्य मांसगुणाः । सन्निपातनाशित्वम् । अति
शुक्रकारित्वञ्च । इति राजवल्लभः ॥

वेश्मकूलः, पुं, (वेश्म एव कूलयतीति । कूल+क ।)
चविका । इति राजनिघण्टः ॥

वेश्मनकुल, पुं, (वेश्मनः गृहस्य नकुलः ।) छुच्छ
न्दरिका । यथा,—
"[illegible] गृहनकुलश्छिका च गन्धमूषिका ।
गन्धमूषी मल्लमूषी शिरिका च्छुच्छुन्दरी ॥"
इति शब्दरत्नावली ॥

वेश्मभूः, स्त्री, (वेश्मनो भूः ।) गृहकरणयोग्य
भूमिः । तत्पर्य्यायः । वास्तु २ । इत्यमरः ॥

वेश्य, क्ली, (वेशे भवम् । वेश+"दिगादिभ्यो
यत् ।" ४ । ३ । ५४ । इति यत् । यद्वा, वेशाय
हितम् । वेश+यत् ।) वेश्यालयः । इति
मेदिनी ॥ (प्रवेश्ये, त्रि । यथा ऋग्वेदे ।
४ । २६ । ३ ।
"शततमं वेश्यं सर्व्वताता दिवोदासमतिथिग्वं
यदावम् ॥"
"वेश्यं दिवोदासनाम्ने प्रवेश्यम् ।" इति
तद्भाष्ये सायनः ॥)

वेश्या स्त्री, टुलुकाश्च । आकनादि इति भाषा ।
इति शब्दचन्द्रिका ॥ (वेशमर्हति वेशेन
दीव्यत्याचरति वेशेन पण्ययोगेन जीवति वा ।
वेश+यत् ।) [illegible]नारी । खानकी
इति भाषा । तत्पर्य्यायः । वारस्त्री २
गणिका ३ रूपाजीवा ४ । इत्यमरः ॥ वेश्या ५ ।
इति तट्टीका । क्षुद्रा ६ भोगभण्डिका ७ ।
इति जटाधरः । भञ्जरा ८ शूता ९ वार
विलासिनी १० वारवधू ११ भक्ष्यगामिनी
१२ । इति शब्दरत्नावली ॥ लञ्जिका १३
कञ्जुरा १४ कुम्भा १५ कामलेखा १६ नर्त्तकी
१७ । इति शब्दमाला ॥ साधारणस्त्री १८
भक्षाङ्गना १९ भवाङ्गना २० दर्शिका २१
वारवधूः २२ । इति हेमचन्द्रः ॥ भोगः २३
नागरीविका २४ । इति राजनिर्घण्टः ॥ तस्याः
अवस्थाभेदेन संज्ञा यथा —
"[illegible] देवसभो [illegible] कुम्भा [illegible] ।
[illegible] वेश्या [illegible] ॥

वेधनी, स्त्री, (विध्यतेऽनयेति । विध + ल्युट् । स्त्रियां ङीप् ।) हस्तिकर्णवेधनास्त्रम् । इति त्रिकाण्डशेषः । मेथिका । इति भावप्रकाशः ॥

वेधमुख्य, पुं, (वेधे वेधने मुख्यः श्रेष्ठः ।) कर्चूरः । इति राजनिर्घण्टः ॥

वेधमुख्यक पुं, (वेधमुख्य + स्वार्थे कन् ।) हरिद्रा-द्रुमः । "काचा हलदि" इति ख्यातः । तत्पर्य्यायः । अमृतक २ द्राविडक ३ कल्पक ४ कार्य्यक ५ । इत्यमरभरतौ ॥

वेधमुख्या, स्त्री, (वेधे मुख्या ।) कस्तूरी । इति राजनिर्घण्टः ॥

वेधस, क्ली अङ्गुलीमूलम् । अङ्गुष्ठमूलम् । इति शब्दचन्द्रिका ॥

वेधाः, [स्] पुं (विदधातीति । वि + धा + "विधाञो वेध च ।" उणा ४ । २२५ । इति असिः वेधादेशश्च धातोः ।) ब्रह्मा । (यथा, रघुः । १ । २९ ।
"स वेला वप्रवलयां परिखीकृतसागराम् ।
तथाहि सर्व्वे तस्यासन् परार्थैकफला गुणाः ।")
विष्णुः । इत्यमरः । (शिवः । यथा, महाभारते अनुशासनपर्व्वणि । १७ । १२ ।
"नमस्ते त्रिदिवस्थाय नीलग्रीवाय वेधसे ।")
सूर्य्यः । इति शब्दरत्नावली । पण्डितः । इति विश्वः । श्वेतार्कश्च । इति शब्दचन्द्रिका । अथर्व्वपुत्रः । यथा,—
"इक्ष्वाकुर्व्वैवस्वतात्तु मध्यदेशमवाप्तवान् ।
शूरुवत्तु प्रतिष्ठाने तस्य पुत्रः पुरूरवाः ।
महीध्रस्य सुता पुत्रा याज्ञवल्क्यसुतस्तथा ।
भार्गवस्यान्तरीपोऽभूत् वत्सश्च पार्थिवो नृप ।
कीर्त्तये वाहक शीर्ष उपदर्शितमृग च ।
भार्य्या तेषां सुतस्तस्यापि अथर्वणः ।
सुमन्तुर्नाम कन्या च धर्मी पारदश्च ।
आत्मजस्य च सुताऽभूद् वेधो नाम महायशाः ।
व्यावर्त्तितवती वेधपुत्री कुशस्थली पुरा ।"
इति वह्निपुराणे वासरीयाक्षेपनामाध्यायः ॥
(प्रजापतिरन्यतमः । यथा, कुमारे । २ । १३ ।
"परस्यापि परश्चासि विधाता वेधसामपि ।")
त्रि मेधावी । इति निघण्टुः । ३ । १५ । विधिविधाता । यथा, ऋग्वेदे । १ । ३६ । १२ ।
"त्वं वैधर्मं मीढ्वस्क्षमान् ।"
"कीदृशं देवं वेधसं विविधकर्त्तारम् ।" इति तद्भाष्ये सायणः ।)

वेधितः, पुं (विध + णिच् + क्त ।) छादितं विद्धं । छिद्रितः । इत्यमरः ॥

वेधिनी स्त्री, (विध्यति वेधयतीति । विध छिद्रीकरणे + णिनि । ङीप् ।) जलौका । इति शब्दरत्नावली । "जोंक" इति भाषा । मेथिका । इति राजनिर्घण्टः ॥

वेधी [न्] त्रि (विध्यतीति । विध छिद्रीकरणे + णिनि ।) वेधकर्त्ता । (यथा, महाभारते । ३ । ८६ । १९ ।
"वेधास्योऽपि यथाक्ष व्याधितान्येव मायया ।
निमित्तवेधी स सुविदीर्णोत्कारेऽभि समग्रयन् ।")
वेधविशिष्टः । विधधातोर्णिन्प्रत्ययेन वेधशब्दात् इन्प्रत्ययेन वा निष्पन्नः । अम्लवेतसः, पुं । इति राजनिर्घण्टः ॥

वेध्य क्ली, (विध + ण्यत् ।) लक्ष्यम् । इति जटाधरः । (यथा मार्कण्डेये । ४२ । ७ ।
"प्राणो धनुः शरो ह्यात्मा ब्रह्म वेध्यमनुत्तमम् ।
अप्रमत्तेन वेद्धव्यं शरवत् तन्मयो भवेत् ।")
वेधनीये त्रि । यथा,—
"वटकर्ण्णविलामध्ये भागी शुद्धा समेऽपि च ।
कर्णौ वेध्यौ न दोषः स्यादन्यथा मरणं भवेत् ।"
इति मलमासतत्त्वम् ॥

वेन, पुं (अवतीति । अव गतौ + "धातोस्तन्नियः" स्वार्थिभ्यो न ।" उणा ३ । ६ । इति नः । अवतेः यौभावः ।) प्रजापतिः । इति शब्दरत्नावली । (पृथुराजपिता । यथा, मार्कण्डेये । १०७ । १४ ।
"वेनमेव तथा लोभान्मन्त्रैव द्विजैर्हतम् ।"
अन्तरिक्षस्थाने मध्यमस्थानदेवतासु पद्यम् । ७ । देवविशेषः । इति निघण्टुः । ५ । ४ । २४ ।
यथा, ऋग्वेदे । १० । १२३ । १ ।
"अयं वेनश्चोदयत् पृश्निगर्भाः ।"
"वेनः कान्तः एतन्नामको मध्यमस्थानो देवः ।"
इति तद्भाष्ये सायणः । ७ । अर्थात गत्यर्थकमेव ज्ञानमिति । यज्ञः । इति निघण्टुः । ३ । १७ । १ । त्रि, मेधावी । इति निघण्टुः । ३ । १५ । १ । यथा वाजसनेयसंहितायाम् । १६ । १ ।
"सोमन सुत्या वेन आह ।"
"वेनः कामयमानो मेधावी वा ।" इति तद्भाष्यम् । कामयमानः । यथा, ऋग्वेदे । ४ । ५८ । ६ ।
"आयजुमा वेना अदसमूनः ।"
"वेनाः कामयमानाः ।" इति तद्भाष्ये सायणः ।)

वेना, स्त्री, (वन शब्दे संभक्तौ वा + "वनेरिश्चोपधायाः ।" उणा ३ । ७ । इति न उपधाया इत्वञ्च ।) नदीविशेषः । इति सिद्धान्तकौमुद्या-मुणादिवृत्तिः । (यथा महाभारते । ३ । ८८ । ३ ।
"वेणा भीमरथी चोभे नद्यौ पापभयापहे ।")

वेप, ट ङ ह कम्पे । इति कविकल्पद्रुमः । (भ्वा-आत्म-अक-सेट् ।) पञ्च कम्पनम् । टु, वेपथुः । ङ, अविवेपत् । ह वेपते वायुना द्रुमः । इति दुर्गादासः ॥

वेपः, [स्] क्ली (वेप कम्पने + "सर्व्वधातुभ्योऽसुन् ।" उणा ४ । १८८ । इत्यसुन् ।) कम्पनम् । यथा —
"सान्द्रकान्तोऽमिथो कोऽयं वेपो मारुत धारया ।
मिद्रो वेगोऽपरत्राय समासाद्य घरो न वा ।"
इत्युणादिकोषः ।
(विशेषः । इति माधवः । उणादिसूत्र । ४ । १८८ । ७ । कर्म्म । इति निघण्टुः । २ । १ । यथा, ऋग्वेदे । १ । ६१ । ३ ।
"प्रविश्रवा महते वेपो ष्वमि ।"
"वेपः कर्म्मकामेन ।" इति तद्भाष्ये सायणः ।)

वेपथु, पुं, (वेपनमिति । वेप + "ट्वितोऽथुच् ।" ३ । ३ । ८९ । इति अथुच् ।) कम्पः । इत्यमरः । (यथा, गीतायाम् । १ । २९ ।
"वेपथुश्च शरीरे मे रोमहर्षश्च जायते ।")

वेपन क्ली (वेप + ल्युट् ।) कम्पनम् । इति शब्दरत्नावली । (यथा सुश्रुते शारीरस्थाने १० अध्याये । "तत्र विहस्य क्रोधकम्पनमोहवधमुखवेपनानि भवन्ति वा भवति ।")

वेम, पुं वायदण्डः । यथा —
"वायदण्डः पुंसि वेमा वेमो ना वेम न द्वयोः ।"
इति शब्दरत्नावली ॥

वेमा [न्] पुं (वयत्यनेनेति । वे + "वेञः सर्व्वत्र ।" उणा ४ । १४९ । इति मनिन् ।) वायदण्डः । इत्यमरभरतौ । (यथा नैषधे । १ । १२ ।
"सितांशुवर्णैर्व्वयति स्म तद्गुणै-
र्महासिवेम्नः सहकृत्वरी बहुम् ।"
अकारान्तोऽप्ययम् । यथा वाजसनेयसंहितायाम् । १९ । ८३ ।
"नग्नहुर्धीरस्तसरं न वेम ।")

वेर क्ली, शरीरम् । वार्त्ताकुः । कुङ्कुमम् । इति मेदिनी ॥

वेरक क्ली कर्पूरम् । इति हारावली ॥

वेल, ऋ चाले । इति कविकल्पद्रुमः । (भ्वा-पर-अक-सेट् ।) ऋ, अविवेलत् । इति दुर्गादासः ॥

वेल, त कालार्थे । इति कविकल्पद्रुमः । (अदन्त-चुरा-पर-अक-सेट् ।) कालाय कालोपदेशः । अविवेलत् । कालमियत्तया गणकः एतावती वर्त्तते इति दर्शयतीत्यर्थः । इति दुर्गादासः ॥

वेलं, क्ली उपवनम् । यथा, हैमचन्द्रे ।
"अपोभाभो यत्र वेलमाराम कामिनो यत्र ।"

वेला स्त्री, (वेल्यतेऽनयेति । वेल + गुरोश्च हल इत्यः । ततष्टाप् ।) कालः । तत्पर्य्यायः । समयः २ क्षण ३ वार ४ अवसर ५ प्रस्ताव ६ प्रक्रम ७ अन्तरम् ८ । इति हेमचन्द्रः ॥
तत्परिमाणादि यथा —
"अथापच्चमरिच्छेदो विधेय परिकीर्त्तितः ।
द्वौ निमेषौ त्रुटिर्नाम द्वे त्रुटी तु लवः स्मृतः ।
द्विलवं क्षण इत्युक्तं काष्ठा योज्या दश क्षणाः ।
दश काष्ठाः कला नाम तत्पञ्चकस्तु कालिका ॥
वर्ण्णिते द्वे मुहूर्त्तः स्यात्त्रिंशत्ता दिवानिशम् ।
चतुर्व्विंशतिवेलाभिरहोरात्रं प्रवर्त्तते ।
यामास्याः तिस्रस्तु मुहूर्त्ता क्रम यथा ।
मध्याह्नाहोरात्रादि होरा तिथयः क्रमः ।
यथा विधानमहोरात्र यथा प्रवर्त्तितास्तथा ।
नियमा च दिनैर्मासो विभाग ऋतुवत्सरैः ।
अहोरात्रमहोरात्र पक्षमिश्रागतवत्सरैः ।
वर्षं ह्रासप्रभिन्नं च सम्वत्सरोदयम् ।"
इति वह्निपुराणे अक्षमेधनामाध्यायः ॥ ७ ॥
मर्यादा । इत्यमरः । (यथा, महाभारते । ५ । ६९ । १८ ।

"धिगस्तु नृप खलु भारताना
धर्मस्तथा चत्रविनाद्य वृत्तम् ।
यत्र व्यतीतां कुरुधर्मवेलां
प्रेचन्ति सर्व्वे कुरव सभायाम् ॥")
समुद्रकूलम् । (यथा रघु । १ । ३० ।
"स वेलावप्रवलयां परिखीकृतसागराम् ।
अनन्यशासनामुर्व्वीं शशासैकपुरीमिव ॥")
समुद्रजलविकार । (यथा, रघु । १२ । ३६ ।
"तस्य मैथिलीवाय चययौस्यां निनाय
साम् ।
निद्यानस्तिमितां वेलां चन्द्रोऽस्य इवोन्धि ॥")
अक्लिष्टमरणम् । राग । ईश्वरस्य भोजनम् ।
इति मेदिनी । अत्र पवर्गीयवकारादौ
खिलित । रागस्थाने रोग । वाक । बुधश्ची ।
इति विश्व । दन्तमांसम् । इति हारावली ।
वेलाकूल, क्ली, (वेला एव कूलं यस्य ।) ताम्रलिप्त
देश । यथा —
"वेलाकूल ताम्रलिप्त तामलिप्ती तमालिका ।"
इति त्रिकाण्डशेष ।
(समुद्रकूलम् । यथा, भागवते । १ ।६।७४।
"क्वचित् समुद्रमध्यस्थो दोर्भ्यामुत्क्षिप्य तज्जलम् ।
देशान् नागायुतप्राणो वेलाकूले न्यमज्जयत् ॥")
वेलिसुकप्रिय पुं, धीरभद्रसाज्ञ । यथा —
"—————रसाख ललितसौरभे ।
महाकालक किम्पाक उर्म्मटो वेलिसुकप्रिय ॥"
इति शब्दरत्नावली ।
(वलिसुकप्रिय इत्येव पाठ साधु ॥)
वेल्ल चले । इति कविकल्पद्रुम । (भ्वा
पर सक सेट ।) ल्ल, अवेल्लीत् । चाल
कम्पनम् । उद्वेल्लदुत्कलिकल्पद्रुमनत्कार
घत्र वार्य्यताम् । मतान्तरे । इति दुर्गादास ।
वेल्ल, क्ली पुं (वेल्लतीति । वेल्ल चलने+पचाद्यच ।)
विडङ्ग । इत्यमर ॥ (भावे घञ् ।) गमने, पुं ।
इति वेल्लधात्वर्थदर्शनात् ॥
वेल्लजं, क्ली (वेल्लवत् जायते इति । जन+ड ।)
मरिचम् । इत्यमर ।
वेल्लन क्ली, (वेल्ल+ल्युट ।) भूमौ अश्वस्य
लुण्ठनम् । तत्पर्य्याय ; लुण्ठनम् २ । इति
त्रिकाण्डशेष । (चालनम् । यथा, राज
तरङ्गिण्याम् । ८ । १६८५ ।
"धरा चरित् लवणवेल्लसिपर्वेधी
वेलोर्म्मिवेल्लनवशेन विवर्त्तमाना ॥")
रोटिकादिनिर्म्माणार्थसूक्ष्मदीर्घकाष्ठविशेष ।
इति भावप्रकाश । वेलन् इति भाषा ।
वेल्लनी स्त्री, (वेल्लति लुठति अश्वादिरत्रेति ।
वेल्ल+ल्युट । ङीष ।) माषपर्ण्णी । इति
राजनिर्घण्ट ।
वेल्लन्तर पुं वीरतरु । यथा, भावप्रकाशे ।
"वेल्लन्तरो वसति वीरतरु प्रदिष्ट
श्चित्राभिलाष अरिको विलनीविनुत्य ।
चाण्डालितुलकुसुम शमितप्रपञ्च
स्तात् वरुणी च चक्रदेयश्च एव वृष ॥"

अस्य गुणा ।
"वेल्लन्तरो रसे पाके तिक्तस्तुवरकषायक ।
मूत्राघाताश्मजिद्ग्राही योनिमूत्रानिलार्त्ति-
जित् ॥"
वेल्लहल, पुं, केलिनागर । इति जटाधर ।
वेल्लि स्त्री, (वेल्लति सञ्चलतीति । वेल्ल+इन् ।)
लता । इति शब्दरत्नावली ।
वेल्लिकाख्या स्त्री (वेल्लिका आख्या यस्या ।)
क्षुपविशेष । वेलसुठा इति भाषा । यथा,—
"मत्स्याख्या वेल्लिकाख्या चिल्लपर्णी ज्वरा
पहा ॥"
इति शब्दचन्द्रिका ।
वेल्लित क्ली, (वेल्ल+क्त ।) गमनम् । इति मेदिनी ।
वेल्लित त्रि, (वेल्ल+क्त ।) कुटिल । कम्पित ।
इत्यमर ।
वेवी, ङ ल सु ङ कान्तिगतिव्याप्तिक्षेपणजननखादने ।
इति कविकल्पद्रुम । (भ्वा आत्म कान्तौ
अक अन्यत्र सक सेट ।) ङ वेविक ।
ल, अवेवयु । वकुर्त्त अवश्योति परस्मैपदे
अद्रस् विद रिस्थन् उस् अवस्थामिति गुण ।
लु ङ वेवीते । इति दुर्गादास ।
वेश, पुं, (विशन्ति जयनमर्त्तस्यमिति । विश्+
अधिकरणे घञ । यद्वा, विशति अङ्गमिति ।
"पदरुजविशस्पृशो घञ ।" ३।३।१६। इति घञ ।)
अलङ्कारचनादिकृतशोभा । तत्पर्य्याय ।
आकल्प २ नेपथ्यम् ३ प्रतिकर्म्म ४ प्रसा
धनम् ५ । इत्यमर । वेष ६ । इति तट्टीकायां
भरत । (यथा भागवते । १ । १० । ५ ।
"नटदेवोऽपि वेशेन नटवत् कर्म्मणा द्विज ॥")
विशन्ति कामुका यत्रेति । अधिकरणे घञ ।)
वेश्यागृहम् । गृहमात्रम् । इति मेदिनी ।
(वणिग्गृहम् । तांबू इति भाषा । यथा,
महाभारते । ५ । १५१ । ५३ ।
"शकटापणवेशाश्च यानयुग्यं च सर्व्वश ।
•   •   •
तत् ययुर्नृपतौ राजा ये चापि परिचारका ॥")
प्रवेश । इति विशधात्वर्थदर्शनात् । (यथा
ख्यपा भक्ति । यथा मनु । ४ । ८४—८५ ।
"न राज्ञ प्रतिगृह्णीयादराजन्यप्रसूतित ।
सूनाचक्रध्वजवतां वेशेनैव च जीवताम् ॥
दशसूनासमं चक्र दशचक्रसमो ध्वज ।
दशध्वजसमो वेशो दशवेशसमो नृप ॥)
वेशक, पुं (वेश एव । स्वार्थे कन् ।) गृहम् । इति
शब्दरत्नावली । वेशकारके त्रि ।
वेशदान, पुं, सूर्य्यशोभा । इति शब्दचन्द्रिका ।
वेशधारी, [न्] पुं (वेशं तापसचिह्नं धरतीति ।
धृ+णिनि ।) छद्मतपस्वी । इति शब्दरत्ना
वली । (बहुरूपातिविशेष । यथा, ब्रह्म
वैवर्त्ते ब्रह्मखण्डे । १ अध्याय ।
"मल्लाङ्गुलस्य कन्यायां वीर्य्येण वेशधारिण ।
बभूव वेशधारी च पुत्रो युवी प्रकीर्त्तित ॥")
वेशधारके, त्रि ।

वेशन्त, पुं (विशन्त्यत्र भेकादय इति । विश+
"तृविशिभ्यां झच ।" उणा । ३ । १२६ । इति
झच ।) क्षुद्रसरोवर । इत्यमर । अग्नि
इत्युणादिकोष ।
वेशर, पुं, अश्वतर । इति त्रिकाण्डशेष ।
वेशवार पुं, वेसवार । इत्यमरटीकायां राय
मुकुट ।
वेशवाता, स्त्री, पुत्रदात्रीलता । इति राज
निर्घण्ट ।
वेश्म, [न्] क्ली, (विशन्त्यत्रेति । विश+मनिन् ।)
गृहम् । इत्यमर । (यथा, मनु । ४ । ७३ ।
"अद्वारेण च नातीयात् ग्राम वा वेश्म वाऽऽवृ
तम् ॥")
वेश्मकलिङ्ग पुं, (वेश्मन कलिङ्ग ।) चटक ।
अस्य मांसगुणौ । सन्निपातनाशित्वम् । अति
शुक्रकारित्वञ्च । इति राजवल्लभ ।
वेश्मकूल, पुं, (वेश्म गृह कूलयतीति । कूल+क ।)
चविका । इति राजनिर्घण्ट ।
वेश्मनकुल, पुं (वेश्मनो गृहस्य नकुल ।) छुच्छु
न्दरिक । यथा,—
"छुच्छु स्यात् गृहनकुलश्चिक्का गन्धमूषिका ।
गन्धसूची गन्धमूषी गिरिका स्वात् छुछुन्दरी ॥"
इति शब्दरत्नावली ।
वेश्मभू, स्त्री, (वेश्मनो भू ।) गृहकरणयोग्य
भूमि । तत्पर्य्याय । वास्तु २ । इत्यमर ।
वेश्य, क्ली, (वेशे भवम् । वेश+"दिगादिभ्यो
यत् ।" ४ । ३ । ५४ । इति यत् । यद्वा वेशाय
हितम् । वेश+यत् ।) वेश्यालय । इति
मेदिनी । (प्रवेशार्हे, त्रि । यथा ऋग्वेदे ।
४ । २६ । ३ ।
"शततम वेश्य सर्व्वताता दिवोदासमतिथिग्व
यन्नावम् ॥"
"वेश्य दिवोदासनाम्ने प्रवेशनम् ।" इति
तद्भाष्ये सायण ॥)
वेश्या, स्त्री, टुङ्खपत्र । आकनादि इति भाषा ।
इति शब्दचन्द्रिका । (वेशमर्हति वेशेन
दीव्यत्याचरति वेशेन पण्ययोगेन जीवति वा ।
वेश+यत् ।) रूपाजीवा । गणिका
इति भाषा । तत्पर्य्याय । वारस्त्री २
गणिका ३ रूपाजीवा ४ । इत्यमर । वेश्या ५ ।
इति तट्टीका । जुरा ६ भोगभङ्गिका ७ ।
इति जटाधर । लञ्जिका ८ सूला ९ वार
विलासिनी १० वारवाणि ११ भञ्जिनी
१२ । इति शब्दरत्नावली । कामिनी १३
कञ्चुरा १४ क्षुमा १५ कामरेखा १६ नर्त्तकी
१७ । इति शब्दमाला । वाराङ्गना १८
पण्याङ्गना १९ पणाङ्गना २० शूलिका २१
वारवधू २२ । इति हेमचन्द्र । भोग्या २३
खरशोषिणी २४ । इति राजनिर्घण्ट । अस्या
लक्षणमप्सरसादि यथा —
"दर्पिणिका देवयशी दिने दिने कुमारी भक्षा ।
हनीवे इरणी देवा कर्मदे ग्रहणी कल्पा ।

वेश्या च यवनी चैव पुंश्चली च चतुर्थके ।
तत ऊर्द्धं महावेश्या सा प्रोक्ता सर्वजातिषु ॥ १ ॥
यो द्विजः कुलटां गच्छेत् इवनीं पुंश्चलीमपि ।
शूद्रीं वेश्यां महावेश्यां चण्डालीं प्रयाति सः ।
शतान्दं कुलटागामी षट्यागामी चतुर्गुणम् ।
षड्गुणं पुंश्चलीगामी वेश्यागामी गुणाष्टकम् ।
शू द्रागामी दशगुणं वदन्तीह न संशयः ।
महावेश्यागामिनश्च तत शतगुणं भवेत् ॥
तद्वत् सर्वगामी वेश्येवमाह पितामहः ।
तस्येव मानवो भुङ्क्ते यमदूतेन ताडितः ॥
तिन्तिडि कुलटागामी इवनीगामी च वायसः ।
कोकिलः पुंश्चलीगामी वेश्यागामी शृगालकः ।
शूद्रीगामी सूकरः स्यात् सप्तजन्मसु भारते ।
महावेश्यागामिनश्च जायते शाल्मलिस्तरुः ॥"
इति ब्रह्मवैवर्ते प्रकृतिखण्डे २८ अध्यायः ॥ ०॥
वेश्यागमनपापं प्रकीर्णकम् । तस्य प्रायश्चित्तम् ।
तत्र स्मृतिः ।
"पशुवेश्याभिगमने प्राजापत्यं विधीयते ।"
तेन वेश्यागमने प्राजापत्यम् । तत्प्रत्याम्नाये
दश । इत्यादि बहुगमने । अभ्यासे तु । पान्ना
यश्चैव वेशेन कन्यापायमयो भवेन्निति न्याय
समासक्तसमाव्यावर्त्तनम् । इति प्रायश्चित्त
विवेकः ॥ ० ॥ तत्फलादिकं विविधम् । यथा,—
"पुंश्चल्यन्नञ्च यो भुङ्क्ते पुंश्चल्यामोदमोहितः ।
श्लोकमानावर्षञ्च कालसूत्रे वसेद्ध्रुवम् ।
ताडितो यमदूतेन तस्मात्तत्र तिष्ठति ।
ततश्चिरमादि भवेत् तत्पापे पशु ध्रुवम् ।
विनमासि भवेत्यामसतो भवेत् तत्र स्थिरं ।
ततश्च शूकरोऽसौ तत्र शुद्ध क्रमेण च ।"
इति ब्रह्मवैवर्ते प्रकृतिखण्डे २७ अध्यायः ॥०॥
अपि च ।
"पुंश्चल्यन्नञ्च यो भुङ्क्ते वेश्यान्नञ्च यतिर्द्विजः ।
तदन्नमेव द्विजो यो हि कालसूत्रं प्रयाति सः ।
शतवर्षं कालसूत्रे स्थित्वा शूद्रो भवेद्ध्रुवम् ।
तत्र जन्मनि रोगी च तत शुद्धो भवेदिह ।"
इति तत्रैव २८ अध्यायः ॥ ०॥
वाक्यार्थे तस्या दर्शनं शुभम् । यथा —
"वेदुर्वेश्यायुक्ता कन्यानुपदरथा दधिमाषलैलांशु-
दिक्चापूर्णकुम्भा विमपकमलिका पूर्णमाला
मताला ।
वन्दोमांस घृतं वा दधि मधु रजत काञ्चनं
शुक्लधान्यं
दृष्ट्वा श्रुत्वा पठित्वा फलमिह लभते मानवो
मन्युकाम ।"
इति वसन्तराजीयः ।
वेश्याश्रयः, पुं, (वेश्यानां आश्रयः ।) वेश्याजनसमाश्रयः ।
तत्पर्यायः । वेश्यावासः २ । इति शब्द
माला ।
वेश्याचार्यः, पुं (वेश्यानां आचार्यः ।) पीठ
मर्द । इति हेमचन्द्रः ।
वेश्याजनसमाश्रयः, पुं, (वेश्याजनानां समाश्रयः
आश्रयस्थानम् ।) वेश्यावासः । तत्पर्यायः ।
वेशः २ । वेशवासः ३ । पुरम् ४ ।
इति हेमचन्द्रः । वेश्मम् ५ । इति जटा
धरः ।
वेश्वरः, पुं अश्वतरः । यथा । वेश्वरोऽश्वतर
खरः । इति भूरिप्रयोगः । विलाक्षराग्रे वेसर
इति पाठः ।
वेष, पुं वेवेष्टि आप्नोति अङ्गं वेष पचाद्यच्
नेपथ्यम् । विप्रलि सथमसङ्कल्पे वेशाधारे
वर्त्ति वेशस्थालयाल्लय । इति भरतः । वेष
धारम् । (यथा, मनुः । ८ । २ ।
"विनीतवेषाभरणः पश्येत्कार्याणि कार्यि
णाम् ।")
वेशाकनामपि । "वे दारिकार्थी विशालपाणे ।
विशति सूपी अपि आतुको वा वेश, यो विश
प्रवेश अच् ।
'वेषश्च यश्चापि च वेशो वेश्याजनवेशेऽपि च ।
इति तालव्यादौ दमनः ।
'यत्स्यापि प्रतिकायां वपुषि वेषो भवतु
तालव्यः ।
तालव्यो मध्येऽपि दन्त्यस्पि अयित आचार्यैः ।'
इत्यूष्मविवेकः ।
वेविषति व्याप्नुवन्ति अवमनाङ्गेनेति अच् वेषो
नाट्यालोऽपि इत्येके तत्तु न चारु तद्व्यापितेह
सर्वेष भोवादेरपुषायामादिति मुकुटः ।" इति
च भरतः । (अवस्थानविशेषः । यथा, रामा
यणे । ६ । १७ । १८ ।
"यस्य देवस्य मयूर्वे वेशो यत्र पराक्रमः ।"
"वेशः संस्थानविशेषः ।" इति तट्टीका । ० ।
वेवेष्टि व्याप्नोति अग् विति । पचाद्यच् । कर्मः ।
इति निघण्टुः । २ । १ । ० । विष व्याप्तौ+
अच् । व्याप्ति । यथा, वाजसनेयसंहितायाम्
१ । ६ ।
"कर्मणे वां वेषाय वाम् ।"
"वेषाय । विष्लृ व्याप्तौ । अच् वेषो व्याप्ति ।
कर्मविस्तरस्तु व्यापत्यै च वां युष्मान्
आददे ।" इति तद्भाष्ये महीधरः ।)
वेषण पुं (विष व्याप्तौ+ल्युट् ।) कासमर्दः ।
इति शब्दावली । (स्त्री विष+ल्युट् ।)
प्रवेशनम् । (परिचर्या । यथा, ऋग्वेदे । ६ ।
७ । १ ।
"अवक्रमयन्त वेषणे क्षेत्रं यविष्ठ सुकृति ।"
"वक्रादिवेषणे परिचर्यायाम् ।" इति तद्भाष्ये
सायणः ।)
वेषका, स्त्री, (वेवेष्टि व्याप्नोतीति । विष+वुन् ।
टाप् ।) विष्णुक्रान्तः । इति रत्नमाला ।
मनसा इति भाषा ।
वेसवारः, पुं वेशवारः । इत्यमरटीकायां राम
मुकुटः ।
वेष्ट ङ वेष्टे । इति कविकल्पद्रुमः । (भ्वा आत्म
अक सेट ।) ङ, वेष्टते । इति दुर्गादासः ।
वेष्टः, पुं (वेष्ट+घञ् ।) वेष्टनम् । इति शब्द
माला । (यथा, महाभारते । ७ । ४१ । १० ।
"श्रीरामयो वेष्टप्रवेशे च मणी बहुभेदत ।
अरवेष्ट भीमसेनो धर्मं दृष्ट्वा धर्मोत्सवम् ।")
श्रीवेष्टः । इति राजनिघण्टुः । निर्यासः ।
आटा इति भाषा । इति वैद्यकम् । (राग
दोषविशेषः । यथा सुश्रुते । २ । १६ ।
"इन्तावर्णानि वेष्टमधारु च परस्परोऽम्भे ।")
वेष्टकं, क्ली,(वेष्टते इति । वेष्ट+ण्वुल् ।) उष्णीषः ।
इति शब्दरत्नावली । निर्यासः । इति शब्द
माला । श्रीवेष्टः । इति राजनिघण्टुः ।
वेष्टकः, पुं (वेष्टते इति । वेष्ट+ण्वुल् ।) प्राचीरः ।
यथा प्राचीनावेष्टको वृतिः । इति हेमचन्द्रः ।
कूष्माण्डः । यथा —
"कुष्माण्डके पुष्पफलो पलपालच वेष्टकः ।"
इति शब्दावली ।
श्रीवेष्टः । इति राजनिघण्टुः । वेष्टनकारके,
त्रि । (यथा, महाभारते । ७ । १६६ । २१ ।
"कवचेर्पर्वैश्च तथैवाङ्गुलिवेष्टकैः ।")
वेष्टनं, क्ली, (वेष्टते इति । वेष्ट+ल्युट् ।) कर्ण
शष्कुली । उष्णीषः । (यथा रघुः । ८ । १२ ।
"तमरण्यसमाश्रयोन्मुखं
शिरसा वेष्टनशोभिना सुतः ।")
मुकुटः । वृतिः । इति मेदिनी । गुग्गुलुः ।
इति शब्दचन्द्रिका । (वेष्ट+ल्युट् । वलयम् ।
यथा, रघुः । ४ । ४५ ।
"भोगिवेष्टनमार्गेषु चन्दनानां समर्पितम् ।")
वेष्टवंश पुं, (वेष्टेन वायतीति । वै+क ।)
रतिबन्धविशेषः । यथा —
"उत्तानं नारीयुग्मं सुताभ्यामङ्गवेष्टयेद्यदि ।
भ्रामकवाञ्छितां नारीं वधो वेष्टवंशः स्मृतः ।"
इति रतिमञ्जरी ।
वेष्टवेष्टकः पुं (वेष्टेन वेष्टते इति । वेष्ट+
ण्वुल् ।) रतिबन्धविशेषः । यथा,—
"उरू पाददयं नार्या हस्ताभ्यां वेष्टयेद्यदि ।
करोच्ये कण्ठमालिङ्गय बन्धो वेष्टवेष्टकः ।"
इति रतिमञ्जरी ।
वेष्टवंशः पुं (वेष्ट वेष्टनकारी वंशः ।) वक्र
वंश । इति शब्दचन्द्रिका । वेयूबाँश इति
भाषा ।
वेष्टसारः, पुं (वेष्टानां सारो यत्र ।) श्रीवेष्टः ।
इति राजनिर्घण्टः ।
वेष्टितं, क्ली (वेष्ट+क्त ।) चक्रे । बाधनम् ।
मरकतमयम् । इति मेदिनी ।
वेष्टित, त्रि (वेष्ट+क्त ।) वद्वेष्टनाधारसंज्ञा
कतवेष्टनः । घेरा इति भाषा । तत्पर्यायः ।
रुद्धम् २ । वलयितम् ३ । वृतम् ४ । आवृतम् ५ ।
इत्यमरः ।
वेष्प, पुं, (वेवेष्टीति । विष व्याप्तौ+"पानी
विटपिभ्य स ।" उणा १ । ५६ । इति प ।)
पानीयम् । इत्युणादिकोषः ।
वेस ज गतौ । इति कविकल्पद्रुमः । (भ्वा -
पर सक-सेट ।) ज वसितः, वेसिता ।
इतो गतवान् । इति दुर्गादासः ।

वेसन क्ली, (वेस + ल्युट् ।) द्विदलचूर्णम् । यथा,—
"द्विदलयवककानान्तु निस्तुषा यन्त्रपेषिता ।
सचूर्णं वेसनं प्रोक्तं पाकशास्त्रविशारदैः ॥"
तद्वटिकागुणाः ।
"वटिका वेसनस्यापि क्वथितायां निमज्जति ।
कथ्यते विष्टम्भजननी बल्या पुष्टिकरी स्मृता ॥"
इति भावप्रकाशः ॥

वेसर पुं, अश्वतरः । इति हेमचन्द्रः ॥ (यथा, माघे । १२ । १६ ।
"तूर्णं प्रणेत्रा कृतनादमुच्चकै-
र्यतोदितं वेसरयुग्ममध्वनि ॥")

वेसवार, पुं, धन्याकसर्षपादिपिष्टः । वेसार इति बाटना इति च ख्यातः । तत्पर्य्यायः । उपस्करः २ । इत्यमरः । वेषवारः ३ । इति भरतः । वेश्रवारः ४ । इति मुकुटः ॥ (यथा सुश्रुते । १ । ४६ ।
"सुहृत्स्विन्नवाराणां पूज्या विष्टम्भिनो मताः । वेसवारे सपिष्टैते सम्पूर्णा गुरवः हिताः ॥")
मांसविशेषः । यथा,—
'निरस्थि पिशितं पिष्टं सिद्धं गुड़घृतान्वितम् । कृष्णामरिचसंयुक्तं वेसवार इति स्मृतम् ॥"
अस्य गुणाः ।
"वेसवारो गुरुः स्निग्धो बलोपचयवर्द्धनः ॥"
इति राजवल्लभः ॥
हिङ्ग्वार्द्रकमरीचजीरकहरिद्राधन्याकाः क्रमेण द्विगुणपरिमाणेनैकमीलिताः । इति पाकराजेश्वरे पाकपरिभाषा ॥

वेह, ऋ ङ यत्ने । इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-अक-सेट् ।) ऋ, अविवेहत् । ङ, वेहते । विघते । इति दुर्गादासः ॥

वेहत्, स्त्री, (विशेषेण हन्ति गर्भमिति । वि + हन् + "वर्त्तमाने पृषद्बृहन्महज्जगच्छतृवच्च ।" उणा २ । ८५ । इति अतिप्रत्ययेन निपातनात् साधुः ।) गर्भोपघातिनी गौः । इत्यमरः । ऋतौ वृषोपगमनादिवशात् यस्या गर्भपातो भवति सा । विहन्ति गर्भं प्रष्ठन्तु वेहत् । वध गौ गतौ वधे हिंस निपात । इति भरतः । (यथा, वाजसनेयसंहितायाम् । १८ । २७ ।
"वशा च मे ऋषभश्च मे वेहच्च मे ऽनड्वांश्च मे ॥")

वैहार, पुं, मगधमध्यस्थदेशः । यथा,—
"वैहारे चैव मैवर्त्ते कोमले चकनिर्झरे ।
अष्टादशभुजा काम्या माहेन्द्रे च हिमालये ॥"
इति मत्स्यसूक्ते १ पटलः ॥

वेह्ल, ऋ चाले । इति कविकल्पद्रुमः ॥ (भ्वा-पर-अक-सेट् ।) ऋ, अविवेह्लत् । चरड़ चलन वेदेबुधारक्रमेदाः । चाल स्पन्दन प्रतारिकेके । इति दुर्गादासः ॥

वै, ओ शोषे । इति कविकल्पद्रुमः ॥ (भ्वा-पर-अक-अनिट् ।) पकारादिः । वायति । ओ, वानः । इति दुर्गादासः ॥

वै, व, पादपूरणम् । यथा । तु हि च स्म ह वै पादपूरणे । इत्यमरः ॥ (यथा, भागवते । ३ । १ । ९८ ।
"यत्तु प्रद्युम्नस्य ते भवान् । यद्वै ध्यायति ते वधम् ॥")
सम्बोधनम् । अनुनयः । इति मेदिनी ॥ (निश्चयः । यथा मनुः १ । १ ।
'सर्व्वं स्वं ब्राह्मणस्येदं यत्किञ्चिज्जगतीगतम् । श्रैष्ठ्येनाभिजनेनेदं सर्व्वं वै ब्राह्मणो
ऽर्हति ॥")

वैशतिक त्रि, विंशत्या क्रीतः । विंशतिक शब्दात् ठञ्प्रत्ययेन निष्पन्नमिदम् । इति सिद्धान्तकौमुदी ॥ (पा ५ । १ । २७ ।)

वैकक्ष क्ली, (विशिष्टं कक्षं विकक्षं उरस्तत्र भवम् । विकक्ष + अण् ।) तिर्य्यग्वक्षोलम्बिमाल्यम् । इति हेमचन्द्रः ॥

वैकक्षक, क्ली, (वैकक्षमेव । स्वार्थे कन् ।) उरसि तिर्य्यक् उपवीतवत् कण्ठात् निप्रमाल्यम् । इत्यमरः ॥

वैकङ्कत पुं, (विकङ्कत एव । स्वार्थे अण् ।) वृक्षविशेषः । बैँच इति भाषा । तत्पर्य्यायः । दन्तिकुर ३ सुवाद्रुम ३ यज्ञियः ४ स्वादुकण्टकः ५ यात्रपात् ६ कण्टिकारी ७ विकङ्कतः ८ । इति शब्दरत्नावली ॥ (विकङ्कतस्यावयवो विकारो वा । "पलाशादिभ्यो वा ।" ४ । ३ । १४१ । इत्यण् । विकङ्कतनिर्म्मितस्रुवादौ, त्रि । यथा, शतपथब्राह्मणे । ५ । २ । ३ । १५ ।
"स पालाशे वा स्रुवे वैकङ्कते वा ॥")

वैकतिक, पुं, मणिकारः । इति हेमचन्द्रः ॥

वैकर्त्त, पुं, (विकर्त्तस्यापत्यमिति । विकर्त्त + "विकर्णशुङ्गच्छगलात् वत्सभरद्वाजात्रिषु ।" ४ । १ । ११७ । इत्यण् ।) वात्स्यमुनिः । इति सिद्धान्तकौमुदी ॥ (जनपदविशेषः । यथा, मार्के । ७ । १८ । ११ ।
"वैकर्णयोर्जनाङ्गानां यथा ।"
"वैकर्णयोर्जनपदयोर्विद्यमानान् ।" इति तट्टीकायाम् ॥)

वैकल्पिक, त्रि, विकल्पेन भवः । विकल्पशब्दात् ठञ्प्रत्ययेन निष्पन्नमिदम् ॥

वैकल्य क्ली, विकलत्वम् । विकलस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नमिदम् ॥ (यथा, कथासरित्सागरे । ७४ । ११ ।
"कथमाद्य पदसाधित्वं वपुर्वैकल्यमागतम् ॥")

वैकुण्ठ, पुं, हरिः । (यथा, भागवते । १ । ११ । ४६ ।
"है बालुगतस्मैयां श्यामाद्धितममाभर ।
मनसा धारयामासुर्वैकुण्ठचरणाम्बुजम् ॥")
इन्द्रः । इति मेदिनी ॥ धिनाथकः । इति राजनिर्घण्टः ॥ अस्य व्युत्पत्तिर्यथा । "विकुण्ठाया अपत्यं वैकुण्ठः शुभ्राद्वत इति शिवादित्वात् अण् ।
"वाष्कलस्यान्तरे देवो वैकुण्ठः पुरुषोत्तमः । विकुण्ठायामसौ जज्ञे वैकुण्ठैर्देवतैः सह ॥
इति विष्णुपुराणम् ॥
किं वा कुण्ठत्वमया कुण्ठा माया । कुटि लोम्य वैकल्यार्थस्य शैमसाप्य सरादित्वं च । विगता कुण्ठा माया यस्मादसौ वैकुण्ठः विकारमधीन अत्यन्तं च । विष्णुसहस्रनामटीकायां शङ्कराचार्य्यस्तु विविधा कुण्ठा गतेः प्रतिहतिस्तस्याः कर्त्ता इति वैकुण्ठः । जगदारम्भे विविक्तानि भूतानि परस्परं संश्लेषयन् तेषां गतिं प्रतिबध्नातीति वा वैकुण्ठः ।
'मायानशेषिता भूमिरद्भिर्व्योम्ना च वायुना ।
वायुश्च तेजसा सार्द्धं वैकुण्ठत्वं ततो मम ॥
इति शान्तिपर्व्वणीति ॥"
इत्यमरटीकायां भरतः ॥ * ॥ अपि च ।
'कुण्ठं जड़ञ्च विज्ञेयं विशिष्टञ्च करोति या ।
विकुण्ठा प्रकृतिर्वेदे ख्यातास्य मन्त्रिणाम् ॥
गुणात्मकेन भगवान् तस्यां जातः स्वयं हरिः ।
परिपूर्णतम इव वैकुण्ठश्च विदुर्बुधाः ॥' * ॥
अस्य नाम्नो माहात्म्यम् । यथा —
"राम नारायणानन्त मुकुन्द मधुसूदन ।
कृष्ण केशव कंसारे हरे वैकुण्ठ वामन ॥
इत्येकादश नामानि पठेद्वा पाठयेद्यदि ।
जन्मकोटिसहस्राणां पातकादपि मुच्यते ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११ अध्यायः ॥
'साङ्ख्या पाटिचार्य्या वा स्तोभं हेलनमेव वा ।
वैकुण्ठनामग्रहणमशेषाघहरं विदुः ॥'
इति श्रीभागवते अजामिलोपाख्यानाध्यायः ॥ * ॥
विष्णुधामविशेषः । तद्वर्णनं यथा —
"उपरिष्टात्सत्यलोकाद्वीरा कोटयः सद्भमीरितम् ।
सत्यादुपरि वैकुण्ठो योजनानां प्रमाणतः ।
भूर्लोकात् परिसङ्ख्यात वा कोटिरष्टश्च ग्रभा ।
यत्रास्ते श्रीपतिः साक्षात् सर्व्वेषामभयप्रदः ।
वैकुण्ठादुत्तरे भागे लोकः कोटिप्रकोटयः ।
निर्म्मितेव महाराज कैलासादूर्ध्व पर्व्वतः ।
पार्श्वेन्ना वह्निना ग्रभुवस्ति तद्भवेमतः ॥"
इति पाद्मे स्वर्गखण्डे ६ अध्यायः ॥ ० ॥
अपि च ।
"अथास्त प्राप्नं नित्यममलं परमं पदम् ।
हिरण्मयं मोक्षपदं ब्रह्मानन्दसुखावहम् ॥
समानादिगुणोपेतं तद्विष्णोः परमं पदम् ।
यद्गत्वा न निवर्त्तन्ते तद्धाम परमं हरेः ॥
नहि वर्णयितुं शक्यं कल्पकोटिशतैरपि ।
अपि इदमखण्ड्य तद्गुणाढ्यादिदैवतैः ॥
ज्ञानेन ज्ञात्वमार्गेण दृश्यते योगिपुङ्गवैः ।
तत् ज्ञानसुखभोगस्वभावानां द्विषाम् ॥
\ श्रीधाराविभक्तिविरोधाभोगदितन्त्वता ।
सहाभागो महाभागा भक्तानन्दपुरःसरा ॥
तद्विष्णोः परमं धाम पाति ब्रह्मघनप्रदम् ।
नानाजनपदाकीर्णं वैकुण्ठं तद्धरेः परम् ॥
प्राकारैश्च विमानैश्च सौधै रत्नमयैर्वृतम् ।
तन्मध्ये नगरी दिव्या साकोशीति प्रकीर्त्तिता ॥
मणिप्राकारसंयुक्ता हेमतोरणसंयुता ।
चतुर्द्वारसमायुक्ता गोपुरैः समलङ्कृता ।
चण्डप्रचण्डौ प्राग्द्वारे याम्ये भद्रसुभद्रकौ ॥

वायव्यां वसतिकर्या सौम्ये धाढविधातरौ ।
कुमुदः कुमुदाक्षश्च पुण्डरीकोऽथ वामनः ।
शङ्कुकर्णः सर्वनेत्रः सुमुखः सुप्रतिष्ठितः ।
सामिन् स्तम्भविनिमत्ता माघन्ति सहर्षं पदम् ।
न प्राप्य च निवर्त्तन्ते सनकाद्या उदाहृताः ।
भान्ति पदं पदं निर्मलं विष्णुमन्दिरम् ।
शाश्वतं परमं धाम वैकुण्ठं शाश्वतं परम् ।
नित्यं परमशोभं सर्वावृतं सनातनम् ।
सत्यामृतजलाम्यं पदं प्राप्तोऽनुगच्छ हि ।"
इति पाद्मे उत्तरखण्डे ४८ अध्यायः ॥
अन्यच ।
"अथ पुरविभातिस्थ सर्वलक्षणसंयुता ।
नाभि परिहृतो देव शुभे परमे पुमान् ।
तं वैकुण्ठनाथोऽसौ भाषते परमे पदे ।
तद्वाक्यमिन्द्रलोकेभ्यः वक्ष्यामि निर्दिशे शुभे ।
प्राप्तो वैकुण्ठलोकस्य वासुदेवस्य मन्दिरम् ।
व्यापिनी लक्ष्मीलोकस्तु प्राप्तो सङ्कर्षणाय च ।
नारायणस्य वैकुण्ठो प्राद्युम्नः पश्चिमे तथा ।
इतिलोकस्तु वायव्यानिरुद्धस्याभिमतप्रभुः ।
वैष्णवी प्राणिनां स्थानं प्रथमावरणं
स्थानम् । १ ।
वैश्वकोर्मादिलोका द्वितीयावरणं तथा । २ ।
महाकुम्भादिलोकस्तु तृतीयावरणं परम् । ३ ।
मत्स्यकूर्मवराहनृसिंहवामनात्मकाः ।
सहस्रविर्धीशाकाचतुर्थावरणं स्थानम् । ४ ।
व्यासदत्तनामादयाको लोकादिषु मत्स्येषु च ।
शान्तिमा विद्याधरश्च ब्रह्मा च सुमनाश्च च ।
पञ्चमावरणे गोलकमध्ये सर्वं स्थानम् । ५ ।
प्रजापतयस्तत्त्वप्रदायकाः सप्तावरणं तथा ।
सौनकाद्या तथा लोका धर्मश्चापास्वर्गतः ।
षष्ठमावरणे सोऽपि प्रवादप्रमथमचयम् । ६ ।
वैष्णवपरकवत्पद वैकुण्ठं परमं तथा ।
वदन्ति सौम्यमेदार्थे परमं सुनिमि स्थानम् ।
मायया मध्यमापेन ते नाम्ने च दिवौकसः ।
निखा धर्मं परं यान्ति विष्णोर्दत्तमेव च ।
ते वै यानमवाकेऽपि न नियान्ति दिवेश्वरा ।
तेनाख वसति माने च पाचिका इति वै
स्मृतिः ।
एवं पर वदेदिवि वैकुण्ठे श्रीमत्पदमम्भे ।
निधानमिमद्विजोऽपि च शाश्वते विष्णुरोचिरि ।
न तद्भासयते सूर्यो न शशाङ्को न पावकः ।
यद्गत्वा न निवर्त्तन्ते तद्धाम परमं मम ।
वर्षेश्वमधिका ये ते वै यान्ति तत्पदम् ।
न वैराग्याश्रयेण वैरं प्राप्ते शुभे ।
न तपोभिर्दानदारैर्न च व्रतकर्मभिः ।
एकेन भक्तियोगेन तथा भक्त्या अनन्यया ।
लभ्यं प्राप्यं हि तत्पदं वै सनातनम् ।"
इति पाद्मोत्तरखण्डे ६ अध्यायः ॥
(तत्कल्पे दैवते पुं ४ प्र । यथा भागवते ।
८ । ५ । ४ ।
"पत्नी विकुण्ठा शुभ्रस्य वैकुण्ठैः सुरसत्तमैः ।
तस्य स्वांशेन कृष्णो वैकुण्ठः भगवान् स्वयम् ।")

वैखरी, स्त्री (विशेषेण खं राति ददातीति । "आतोऽनुपसर्गे कः" ३ । २ । ३ । इत्यस्य वार्त्तिकोक्त्या कः । ततो ङीष् । यथा, रामायणे । ६ । ४८ । १९ ।
"प्रायेण गलमार्गस्थो वृषणाख्यो मताश्रयाम् ।
कण्ठमाश्रित्य वर्णेषु पर भवति वैखरीम् ।"
पुनिश्चितम् । यथा, रघुः । ११ । ६९ ।
"तपसीपरवनाद्वैखरीं
प्रेक्ष्य प्रार्थितमधिक्षय सत्यवित् ।"
तथाच महाभारते । ९ । १९० । ३ ।
"वैखरी सम्मितत्रेत्रे च सचमिमा महातपाः ।
तमस्य मूकमासीन यशवालमपातयत् ।")
वीभत्सरूपः । तदात्मके सापशोणिताद्यौ, त्रि । इत्यमरटीकायां भरतः । तथाच ।
"विश्व वैखरीं स्तवत्र वैलक्षण्यतौ ।"
इति भरतद्विरूपकोषः ॥
(विकारान्तरे । यथा, भागवते । ९ । १ । ३५ ।
"यथा वदाम कथा भविकस्य तदाश्रुत ।
विधिः साधारको यत्र यतः प्राप्तवैखरी ।")
वैखर्य्यं स्त्री, (विखरमेव । स्वार्थे ष्यञ् ।) वीभत्सरूप । तदात्मके, त्रि । यथा,—
"निवृ वीभत्सविस्तर वैखर्य्य विततवाचा ।"
इति शब्दरत्नावली ॥
वैखानसी, स्त्री, (विखानसा दीव्यति । विखानस + अण् ।) मणिविधयः । तत्पर्यायगुणौ ।
"वैखानसेव विखानसं मोचकं कुचकम् ।
मोक्षाय सुदर्शनं मोक्षकच्च मानस ।
पञ्चाभावे च वैखानसं रक्तौघादिक सप्तम् ।
पारदकल्पविशेष वृहद सुरधामकम् ।
वैखानस अष्टधातुक अष्टकम्पनीकरम् ।
तथाप्यभावे वयस्य पाद वैखानसगुणमम् ।
शताधारवतोऽपि पञ्चम हरणाय मनोरोगाकाम् ।
मदिकाणि यतो वैखानसं सुपेरिदं कथितम् ।"
इति राजनिर्घण्टः ॥
वैखरो स्त्री, मुद्गलितकल्पनवरकल्पवत्से ।
यथा,—
"सनाधारात् प्रथमसुदितो यश्च भाव परास्यः
पश्चात् पश्यन्त्य हृदयगो बुद्धियुङ्मध्यमाख्यः ।
वक्त्रे वैखर्यथ रुरुदिषोरस्य जन्तोः सुषुम्ना
बद्धस्तस्माद्भवति पवनप्रेरितो वर्णसङ्घः ।"
इति शारदातिलकम् ॥
अस्यार्थः । यश्च नादो भाव स्वरूप अ भाविकरणप्रभावात् प्रथमसुदितस्तामर्थेन् पर इति व्याख्या संज्ञा यत्र तथाभूतो भवति । अथानन्तरं च एव शब्दं विना मनसैव दीयमानो भवति बाह्यकाशादा यथाकथञ्चित् भवति । मध्यदेशोत्पन्नोपानाम मध्यमा गमनदृश्यावधाता मध्य तथा च वाक्शादौ वह्नादप्रेरित वायुरूपस्य प्रसङ्गवत्पतीकात् । तस्माद् वैखरीदक्षमयात् सारात् पवनेरितो वर्णसङ्घो यस्य वर्णेषु तत्सद्विषयी भवतीत्यर्थः । परा पश्यन्ती इत्याद्यन्तस्य तु श्रोत्रिन्द्रियेण ग्रहणं न तु वर्णस्य विवक्षितं बोध्यम् । इति टीका ॥

वैखानस पुं, (विखनस ब्रह्मा । तेन प्रोक्तम् । विखनस् + अण् ।) वानप्रस्थः । यथा, वानप्रस्थो वैखानसोऽथ च । इति त्रिकाण्डशेषः । (यथा, हरिवंशे । १ । १८ । १० ।
"वैखानसा ये सुतपो मिताहारा जितव्रताः ।
तेऽपि सुप्रानि यथावत् पावकोऽपि सुतपस्तान्
गाम् ।"
वैखानसकर्त्तृत्वनिर्वर्त्ताधि वैखानसधर्मावि
त्रि । यथा, शाकुन्तले । १ ।
"वैखानस किमनया व्रतमाप्रदानात्
व्यापाररोधि मदनस्य निषेवितव्यम् ।")
वैगुण्य, क्ली (विगुणस्य भाव । विगुण + ष्यञ् ।) विगुणत्वम् । विगुणस्य भाव । यथा,—
"धाभावमर्थेति यत्र वैगुण्यात् प्रापकस्य च ।
तत्र यामो भवत्कर्त्तु किंचापि हिमते हम ।"
मनुः ।
वैचक्षण्य, क्ली, विचक्षणत्वम् । विचक्षणस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नमिदम् । (यथा, साहित्यदर्पणे । १ ।
"चतुर्वर्गफलप्राप्तिर्हि वैचक्षण्य कलासु च ।")
वैचित्र्य क्ली, विचित्रता । विचित्रस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नमिदम् । (यथा राधिकाकल्पद्रुमे । ४० ।
"वैचित्र्य विनयोऽपि वाचकविधौ वाचकौ
रसिके
देव भद्गुणवत्त्याय कुरुते किं किं न याम
देवता ।")
वैजयन्त, पुं (विजयतेऽसौ इति । जि + आधारे ल्युट् । तत स्वार्थे अण् ।) इन्द्रप्रासादः । तत्पर्यायः । पुलिमाथः ४ । इत्यमरः ॥ (यथा, रामचरितकाव्ये । २ । ७३ ।
"अथ वैजयन्ते गाति वा देवी विमानवरम् ।
विरचिततन्मणिवरदायुर्मुचे सुखम् ।")
वैजयन्त, पुं (वैजयन्तो ध्वजविशेष । अर्शआदित्वादच् ।) इन्द्रप्रासादः । इत्यमरः । इन्द्रध्वजः । इति मेदिनी । (यथा महाभारते । ९ । ६४ । १६ ।
"एष शोभो वैजयन्तो गुणेभिर्भ समाहितः ।
दिव्याभरणान् वराभिर समाचनिश्चयतु ।")
मुख । इति वैजयन्त ।
वैजयन्तिक त्रि, (वैजयन्तीं धारयतीति । ठक् ।) यथा, वैजयन्ती पताका, वि । धर तीति ठक् ।) पताकाधारी । इत्यमरः ।
वैजयन्तिका स्त्री, (वैजयन्ती + कार्य कन् ।) जयन्तीवृक्ष । पताका । इत्यमरः । (यथा,
"विधर्त्तविविधनैवमोदेवो-
कारालम्भादिविलम्बिनीकवा ।
चौडवाध विभिता विचित्रिता
देव एव च वैजयन्तिका ।"
रघुवंश ।)
अग्निमन्थ । इति राजनिर्घण्टः ।
वैजयन्ती, स्त्री पताका । इत्यमरः । (यथा,
रघु । ६ । ८ ।

"यथारिते चारुदयारयोगो
यये समुद्रपर्यन्ति वैजयन्ती ।")
जयन्तीवृक्षः । इति मेदिनी । अग्निमन्थवृक्षः । इति हेमचन्द्रः । पञ्चवर्णमयी जानुपर्यन्त लम्बिता माला । यथा,—
"उपनीयमानं उपाहरन् वनिताद्यलङ्कृतम् ।
मालां बिभ्रद्वैजयन्तीं व्यचरन् मण्डयन् वनम् ॥"
इति श्रीभागवते १० स्कन्धे ३१ अध्यायः ।
वैजयि, पुं मघवा । स तु जिनपक्षधर्मिविशेषः । इति हेमचन्द्रः ।
वैजयिक, त्रि (विजयस्य निमित्तं विजयिना सयोग इति वा । विजय+'तस्य निमित्तमिति ।' ५।१।३८। इति ठञ ।) विजयसम्बन्धि । इति सिद्धान्तकौमुदी । (यथा हरिवंशे ।२४२।३१।
"इयं मनेश्वरस्य कर्म वैजयिकं कृतम् ।")
वै(बै)जिक, क्ली, (बीजादुत्पन्नम् । बीज+ठक ।) शिग्रुतैलम् । हेतु । इति मेदिनी । आत्मा । इति शब्दमाला ।
वै(बै)जिक, पुं, सद्योऽङ्कुरः । इति मेदिनी । बीजसम्बन्धिनि, त्रि । (बीजसम्बन्धिनि च त्रि । यथा, मनौ । २ । २७ ।
"गार्भैर्होमैर्जातकर्मचौडमौञ्जीनिबन्धनैः ।
बैजिकं गार्भिकञ्चैनो द्विजानामपमृज्यते ॥")
वैज्ञानिक, त्रि, (विज्ञाने युक्तः । विज्ञान+"तत्र नियुक्तः । ४।४।६९। इति ठक ।) निपुणः । इत्यमरः ।
वै(बै)डालव्रतं क्ली, (वैडालं बिडालसम्बन्धि व्रतम् ।) दुराचारविशेषः । यथा,—
"यस्य धर्मध्वजो नित्यं सुरध्वज इवोच्छ्रितः ।
प्रच्छन्नानि च पापानि वैडालं नाम तद्व्रतम् ॥"
इति दानसागरे यमवचनम् ।
वै(बै)डालव्रति पुं, अश्रुमादभावात् छद्मव्रत धर्मः । इति जटाधरः ।
वै(बै)डालव्रतिक पुं, (विडालव्रतेन चरतीति । विडालव्रत+ठक ।) छद्मतपस्वी । तत्पर्यायः । छद्मतापस २ धर्मध्वजी ३ । इति त्रिकाण्डशेषः । तल्लक्षणमाख्यातं यथा,—
"पापण्डिनो विकर्मस्थान् वैडालव्रतिकान् शठान् ।
हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत् ॥"
इति विष्णुपुराणे ३ अंशे १८ अध्यायः ।
"यस्य धर्मध्वजो नित्यं सुरध्वज इवोच्छ्रितः ।
प्रच्छन्नानि च पापानि वैडालं नाम तद्व्रतम् ॥"
तद्वान् वैडालव्रतिकः । इति तट्टीका ।
वै(बै)डालव्रती, [न्] पुं, (वैडालव्रतमस्यास्तीति । इनि ।) छद्मतापसः । विडालतपस्वी । इति भाषा । यथा, काशी उत्तरविभागे ५ अध्याये ।
"छद्मना चरितं यच्च व्रतं इच्छति गच्छति ।
व्रतिनो लिङ्गवेषेण यो लिङ्गमुपजीवति ।
स लिङ्गिनां हरेदेनस्तिर्यग्योनौ च जायते ॥
वैडालव्रतिनः पापा लोकधर्मविनाशकाः ।
सद्यः पतन्ति पापेषु कर्मणस्तस्य तत्फलम् ।
पाषण्डिनो विकर्मस्थान् वामाचारांस्तथैव च ।
पञ्चरात्रान् पाशुपतान् वाङ्मात्रेणापि नार्चयेत् ॥"
वैण, पुं वेणुजीवी । वस्त्रशब्दान्तप्रत्ययेन उच्चारणस्य लोपेन च निष्पन्नमिदम् । इति सिद्धान्तकौमुदी । (यथा याज्ञवल्क्ये । १ । २६१ ।
"वैणाभिशस्तवार्द्धुषिविगायिका मखदीक्षिताम् ॥")
वैणव, क्ली (वेणोरिदम् । वेणु+अण्) वेणुफलम् । इत्यमरः । वेणुसम्बन्धिनि त्रि । (यथा भागवते । ११ । २ । २४ ।
'प्रजाश्रावोपप्रष्ठानां लक्ष्मायावृतात्मनाम् ।
सत्रक्रोध यथा निम्नं वैणवोऽयिवया वनम् ॥")
वैणव, पुं (वेणोरवयवो विकारो वा । वेणु+"बिल्वादिभ्योऽण् ।" ४ । ३ । १३६ । इत्यण् ।) उपनयने वेणुदण्डः । तत्पर्यायः । दाम्भ २ । इत्यमरः । (वेणुः । यथा, महाभारते । ५ । ८ । १६ ।
"भेरीमृदङ्गनिनदैः शङ्खवैणवनिस्वनैः ।")
वैणविक, त्रि, (वेणुर्वेणुवादनं शिल्पमस्य । वैणव+"शिल्पम् ।" ४ । ४ । ५५ । इति ठक ।) वेणुवादकः । तत्पर्यायः । वेणुध्मः २ । इत्यमरः । वैणुकः ३ । इति शब्दरत्नावली ।
वैणवी, स्त्री, (वेणोर्विकृतिः । वेणु+"बिल्वादिभ्योऽण् ।" ४ । ३ । १३६ । इत्यण् । ततो ङीप् ।) वंशलोचना । इति राजनिर्घण्टः । (वेणुसम्बन्धिनी । यथा, मनुः । ४ । ३६ ।
"वैणवीं धारयेद्यष्टिं सोदकञ्च कमण्डलुम् ॥")
वैणिक त्रि, (वीणावादनं शिल्पमस्य । वीणा+"शिल्पम् ।" ४ । ४ । ५५ । इति ठक ।) वीणावादकः । इत्यमरः । (यथा, कथासरित्सागरे । ३३ । ११२ ।
"तच्छ्रुत्वा विहतायोऽपि दयिता वैणिको ययौ ।")
वैणुक, क्ली गजस्य तोदनदण्डम् । तत्तु हस्तिचालनार्थं लौहमुखवंशदण्डकम् । तत्पर्यायः । तोत्रम् २ । इत्यमरः । वैणवम् ३ । इति भरतः ।
वैणुक, पुं, (वेणुना कायति शब्दायते इति । कै+क । ततः स्वार्थे अण् ।) वेणुवादकः । इति शब्दरत्नावली ।
वैणुकीय, त्रि, (वेणुकस्यायमिति । "वेण्वादिभ्यश्छण् ।" ४ । २ । १३८ । इत्यस्य वार्त्तिकोक्त्या छः ।) वेणुसम्बन्धीय । इति सिद्धान्तकौमुदी ।
वैण्य, पुं (वेनोरपत्यमिति । वेन+ष्यञ् ।) पृथुः । स तु सूर्यवंशीयचक्रवर्त्ती राजा । यथा —
"आदिराजः पृथुर्वैण्यो मान्धाता नहुषात्मजः ।"
इति जटाधरः ।
वैतंसिक त्रि (वीतंसो मृगपक्ष्यादिबन्धनोपाय स्तेन चरतीति । वितंस+"चरति ।" ४ । ४ । ८ । इति ठक ।) मांसविक्रेता । तत्पर्यायः । कौटिक २ मांसिक ३ । इत्यमरः । कौटिक ४ । इति शब्दरत्नावली । मृगपक्ष्यादिबन्धनोपायो वीतंसः तेन चरतीति वैतंसिकः । इति भरतः । (यथा, महाभारते । १ । ६६ । ११ ।
"इमान् प्रकृतकालान् हन्ति वैतंसिको यथा ।
एतद्रूपमधर्मस्य भूतेषु हि विहिंसता ॥")
वैतनिक, त्रि, (वेतनेन जीवतीति । वेतन+"वेतनादिभ्यो जीवति ।" ४ । ४ । १२ । इति ठक ।) वेतनभुग्भृत्यः । तत्पर्यायः भृतक २ भृतिभुक् ३ कर्मकरः ४ । इत्यमरः । (यथा, उपदेशशतक । २ ।
"चौरो वैतनिकः खनित्रकटकनारीवितः क्रमा
दीशाम् ।
कर्णेनिशान्त्यज आसीत् भक्षैरवस्थोचितां
दशाम् ॥")
वैतरणि } स्त्री, नरकनदी । इत्यमरः । "वितरणेन दानेन लभ्यत वैतरणी । वा
वैतरणी, }
बिल्वादीय स्त्री वैतरणिः । घटादिमटिपाटो-
वैतरण्यविशुद्धीरिति धृत्वायं घः । ततो ऽपि पाप्त्वोपानीति वा रूप् । विनष्ट तरणं वितरणं तदस्यामस्तीति वैतरणीत्यन्ये । वितरणौ विसर्गे प्रतापे भवा वैतरणीत्यन्ये । वितरणिविमोका तरणमूल्यमर्थं कार्ये वै वैतरणीर्थके । विष्णुपदी ।
'नारका अल्पवः प्रेता नदी वैतरणी स्मृता ।
इति त्रिकाण्डम् ॥"
इति भरतः ॥ ॥ सा नदी दुर्गन्धा तप्तजला महावेगा अस्थिकेशरक्तपरिपूर्णा यमद्वारे वर्त्तते । यथा —
"नदी वैतरणी नाम दुर्गन्धा रुधिरावहा ।
उष्णतोया महावेगा अस्थिकेशतरङ्गिणी ॥"
इति प्रायश्चित्तविवेकधृतयमदूतवचनम् ॥ ॥
अस्य उत्पत्तिर्यथा,—
मार्कण्डेय उवाच ।
"ततो ब्रह्मादयो देवा सर्वे ते शङ्करान्तिकम् ।
गत्वा चरं चंततद्य योगाख्या योगमायया ॥
शम्बरोऽपि भूतग्रामाद्यान्तहितस्तदा ।
शाम्भवीं दुराधर्षामत्यपायम् मायया ॥
यदा च मायकन्यान् कन्याविमुनच ।
तदा महागिरौ पिप्रा सान्ध्ये अवधारवे ॥
लोकालोकस्य निकटे अवधारामयो गिरि ।
दुष्करदेवहृदयस्तोयशातरवर्षिते ॥
न तु सर्वप्रमाणेन मेवपनसवलिय ।
तस्मिन् विमलात् सान्धात् च मधु च
रमितु ॥
विरोधकेषु सान्धोवैमधमधोऽभवद्रतम् ।
ते सान्धा पर्वतं भित्वा स्तनितुल्योदकाकरम् ॥
सानरोऽपि यथे तात प्रमाण प्रराणति ।
ततस्तु सागर मध्ये भित्वा सान्धा समागता ॥
तोयधे प्राप्यभवो देवी सहमाणदेवीर ताम् ।
तिमिद देवी ते ताततः पुष्करे दमधता ॥
नदी वैतरणी भूता दुर्धनाकरमाभवत् ।
अवधारस्त देवेन बभ्रुवि बाहरख च ॥
नराम बोलती ति चराधाज्ञ चामिरत
तिष्ठतु ॥
महाम्बयाकुला हृष्टो देवी च जाह

वाहल्यो बयंत्र्यमयी नौव्दि धाद्दविमानरी ।
कुसुम कुसुमान्य पुष्परीकोदय वासम ।
सतूक्त सर्वन्दि सुरा सुप्रनिष्ठित ।
समिद्ध सर्वविमला प्राच्यमे सुसम्र यन्म ।
श प्राप्य न निवर्तन्ते तथाक्रोध उदाहृतः ।
मान्य पर पद विष्णुमर्न विष्णुमन्दिरम् ।
अमरं परम धाम वैकुण्ठ शाश्वत परम् ।
नित्य परमधीम सर्वात्मृषदं सनातनम् ।
पर्यायवाचकान्यस्य पद धाम्नोऽस्मनस्य वि ।"
इति पाद्मे उत्तरखण्डे २८ अध्यायः ॥
अन्यच्च ।
"अनन्तपुरनिवासिन्य सर्वलक्षणभूषिता ।
नामि परिहसी दर सुसुभि परम पुमान् ॥
एवं वैकुण्ठनाथाख्यो नाथरी परमे पदे ।
मद्व्रतमैलोकीश्च वदामि निर्दिन मुने ॥
प्राप्यो वैकुण्ठलोकस्य वासुदेवस्य मन्दिरम् ।
आर्येषा ब्रह्मीलोकस्तु प्राप्यो वक्ष्यमाणम् ॥
वारलक्ष्यमैव्वश्या पादुभ पञ्चमी तथा ।
इतिलोकस्तु वायपादुदीर्घामनिवहभ्, ।
वैद्यरम्या हानिमीक समायु प्रथमावरर्णे
स्थानम् । १ ।
बैमुवन्धोनैशदिलोका द्वितीयावरणं तथा ॥२॥
ब्रह्मकुम्भादिलोकस्तु तृतीयावरणं परम् । ३ ।
तत्सृतामद्दुग्धादिमवहिवसवावना ।
ब्रह्मपद्मनिधीनोकाचतुर्थावरणे स्थानम् । ४ ।
चमयनु धामापर्मायो लाकादियु मयगृत च ।
वारिचाः विद्यागुहा प्रमत्र च सुखस्य च ।
प्रथमावरणे प्रोक्तमस्य बर्जन स्वापम् । ५ ।
प्राचकमदापसृनयाप्रदर्श तथा ।
मोहवक्ष तथा लोका सर्वप्रधानावर्तुना ।
षष्ठमावरणे प्रोक्त प्रधानामधमणयम् । ६ ।
श्रीमदाविकयान्यय मेखलं परम तथा ।
वायप धोन्यमैशार्थ सहम सुविमि स्थानम् ।
मार्गा महद्भावेत दे पार्थ्वे च द्वितीयम ।
तेषा कर्म पर धाम त्रिवेदवास्थैव च ।
ते वै प्रारब्धवात्र्यग्राम निर्वाणितिक्रमता ।
तेषां वर्णमि मार्गे न शक्यते इति वै
श्रुति ।
एवं पर यदेतिमैर्हेतुमीभिपरावके ।
दिव्यामितांश्च वेदेश रावते विष्णुरीश्वरे ।
न तद्भासयते सूर्यो न शशाङ्को न पावकः ।
अश्मा च निवर्तन्ते पार्थिव धर्मितहता ।
सर्वेषामर्चितः ये ते वै यान्ति तत्पदम् ।
न वैदबाह्यमपेन केवलं ज्ञाने मुने ।
न तपोभिर्वेदाचारैर्न चावनर्धर्मिभि ।
केवल पुरुषमेन तथा भक्त्या सनातन ।
तत्सर्वं प्राप्यते विष्णु धनं वै सनातनम् ॥"
इति पाद्मोत्तरखण्डे ६० अध्यायः ।
(तत्सम्बन्धिनि तु त्रि । यथा, भागवते।
८।५।४।
"तत्रो विकुण्ठा इत्यस्य वैकुण्ठे सुरसत्तमे ।
तयो भवेत्सदा भवत्वैकुण्ठो भगवान् स्वयम्॥")

वैकृत क्ली, (विकृतमेव । "प्रज्ञादिभ्यश्चेति।" ५।४।३८। इत्यस्य वार्त्तिकोक्त्या अण् । विकार । यथा, रामायणे । ६।४८।१२।
"प्रायेण गतसत्त्वानां पुरुषाणां गतायुषाम् ।
दृश्यमानं न पश्यन्ति पर भवति वैकृतम् ॥"
दुर्निमित्तम् । यथा, रघुः । ११।६२।
"तत्प्रतीपपवनादिवैकृतं
प्रेक्ष्य शान्तिमधिकृत्य शान्तिवित् ॥"
तथाच महाभारते । ३।१६०।३।
"वैकृतं भविष्यति च तत्पिता महात्मना ।
तस्य भूतमार्गीणं यत्पातमयाजयीन् ॥")
बीभत्सरस । तद्वालम्बने मांसशोणितादौ, त्रि ।
इत्यमरटीकायां भरतः ॥ तथाच ।
"विकृतं वैकृतञ्च स्याद्वैकृतञ्चाद्भुते ॥"
इति भरतधृतकोषः ॥
(विकारजाते । यथा, भागवते । ९।१।३५।
"अथाणु मयम कस्य वविवतन्य उपाहृत ।
त्रिविष धावादयो यत्र यत्र प्राकृतवैकृता ॥")
वैकृत्य क्ली, (विकृतमेव । स्वार्थे ष्यञ् ।) बीभत्सरस । तद्वालम्बने, त्रि । यथा,—
"विष्णु बीभत्सविकृतं वैकृत्यं विकृतं तथा ॥"
इति शब्दरत्नावली ॥
वैक्रान्त, क्ली, (विक्रान्ता दीप्तिः । विक्रान्त+अण् ।) मणिविशेष । तत्पर्यायगुणौ ।
"वैक्रान्तमेव विक्रान्तं नीचवज्रं कुवज्रकम् ।
गौरीज कुरुविन्द गोणवज्ज गोनस ॥
चमासे च वैक्रान्तं वज्रीयादिदिष्टकम् ।
अपकृतनिवारणं पुष्टिरं सुरमालकम् ॥
वैक्रान्तं वज्रवद्धीर्य वज्रवद्दोषकम् ।
तदाभावे वज्रस्य प्राह वैक्रान्तमुत्तमम् ॥
वजाकारतयैव मधुत वर्णाप सर्वरोगाणाम् ।
यद्विक्रान्ति धत्ते तद्वैक्रान्तं बुधैरुक्तं कथितम् ॥"
इति राजनिर्घण्टः ॥
वैखरी स्त्री, सुषुम्नास्थितवर्णसमूहादृश्यमाने । यथा,—
"मूलाधारात् प्रथममुदितो यस्तु तारः पराख्यः
पश्चात् पश्यन्त्यथ हृदयगा बुद्धियुङ्मध्यमाख्या ।
वक्त्रे वैखर्यथ रुरुदिषोरस्य जन्तोः सुषुम्ना
बद्धस्तस्माद्भवति पवनप्रेरितो वर्णसङ्घः ॥"
इत्यष्टादशकौमुदी ॥
अन्याय । यस्तु तारो नादः स्वरूपं च नाभिस्थपूर्णाधारात् प्रथममुदयमायाति स पर इति आख्या यस्य यस्य तथाभूतो भवति । पश्यन्त्याख्यं च एव हृदयं गत मनोयुक्त दीप्त-समये वाक्त्रिवादा पश्यन्तीति भवति । वक्त्रे वैखरीवाच्यमानस्त्रुतानात्मा मध्या । तथा च शब्दाद्यैर्वैखरी भवति वागित्याख्यं प्रसन्नवागीरित । तस्मात् वैखरीभावमात् नादात् पवनप्रेरितो वर्णसमूहो वहि वर्णैश्च सङ्घविवरो भवतीत्यर्थः । परा पश्यन्ती इत्यादिकं तु योगिभिरेव ज्ञायते न तु सर्वैरा मित्रैर्बोध्यम् । इति टीका ॥

वैखानस पुं, (विखनसं ब्रह्माणं वेत्ति तपसा । विखनस्+अण् ।) वानप्रस्थः । यथा, वानप्रस्थो वैखानसः । इति त्रिकाण्डशेषः ॥ (यथा, श्रीभागवते । ३।१२।४०।
"वैखानसा ये सुतपा मिताहारा जितक्लमाः ।
तेऽपि सुखानि यथावद् भजन्तोऽपि सुखाय
ताम् ॥"
वैखानसऋषिभिर्युक्तः वैखानसमिति वि । यथा शाकुन्तले । १ ।
"वैखानस किमनया व्रतमाप्रदानात्
व्यापाररोधि मदनस्य निषेवितव्यम् ॥")
वैगुण्य, क्ली (विगुणस्य भावः । विगुण+ष्यञ् ।) विगुणत्वम् । विगुणस्य भावः । यथा,—
"पापापवर्तते युग्म वैगुण्यात् प्राक्तनस्य च ।
तत्र त्यागी भवेद्धन्यो दिवायां द्विगुणं हम ॥"
मनुः ।
वैचक्षण्य क्ली, विचक्षणत्वम् । विचक्षणस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नमिदम् ॥ (यथा, साहित्यदर्पणे । १ ।
"धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ॥")
वैचित्र्य क्ली, विचित्रता । विचित्रस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नमिदम् ॥ (यथा राधिकाकर्पूरे । ८० ।
"वैचित्र्य वितनोति वाचकविधौ वाचयाते
इत्यादि
सैव मद्गुणवर्णनाय कुरुते किं किं न याम
देवता ॥")
वैजनन, पुं (विजायतेऽस्मिन्निति । वि+जन+आधारे ल्युट् । तत अर्थे अण् ।) प्रसवकालः । तत्पर्यायः । अभिमान च । इत्यमरः ॥ (यथा, रघुवंशे प्रायम् । १।७१।
"अथ वैजनने मासि च देवी दिक्पालवम् ।
निरन्तरान्वयमतिरेपूर्व सुतं सुतम् ॥")
वैजयन्त पुं (वैजयन्ती अस्त्यस्येति । अर्शआद्यच् ।) इन्द्रप्रासादः । इत्यमरः ॥ इन्द्रध्वजः । इति मेदिनी ॥ (यथा महाभारते । ७।७१।१८।
"एष द्रोणो वैजयन्तो गृहीत्वा समाश्रित ।
प्रासादात् प्रदाभिरक्ष यतन्तिमहतम् ॥")
गृहः । इति हेमचन्द्रः ।
वैजयन्तिक त्रि (वैजयन्त्यस्यास्तीति । व्रीह्यादिभ्यश्चेति ठन् । यद्वा वैजयन्तीं वहतीति । वह इति ठक् ।) पताकाधारी । इत्यमरः ॥
वैजयन्तिका स्त्री, (वैजयन्ती+स्वार्थे कन् ।) जयन्तीवृक्षः । पताका । इत्यमरः ॥ (यथा,
"विपर्व विपरीतवीर्यौ
कारागारविहारिणा ।
बोधयाम लिखिता विनिर्मित
देव इव मार्गे वजन्तिका ॥"
इत्युद्भटः ॥)
अग्निमन्थ । इति राजनिर्घण्टः ।
वैजयन्ती, स्त्री, पताका । इत्यमरः ॥ (यथा, रघुः । ६।८।

"बर्हारिते चारुबर्हारथोर्मी
धूपे सतृतुसमेति वैजयन्तौ ॥")
जयन्तीध्वज । इति मेदिनी ॥ ध्वजिमन्यध्वज । इति हेमचन्द्र ॥ पञ्चवर्णमयी जानुपर्यन्तलम्बिनी माला । यथा,—
"उपगीयमान उद्गायन् वनिताशतयूथप ।
मालां बिभ्रद्वैजयन्तीं व्यचरन् मण्डयन् वनम् ॥"
इति श्रीभागवते १० स्कन्धे ३१ अध्याय ॥

वैजयि, पुं मघवा । स तु जिनचक्रवर्त्तिविशेष । इति हेमचन्द्र ॥

वैजयिक, त्रि, (विजयस्य निमित्तं विजयिना संयोग इति वा । विजय+"तस्य निमित्तमिति ।" ५।१।३८। इति ठञ ।) विजयसम्बन्धि । इति सिद्धान्तकौमुदी ॥ (यथा हरिवंशे ।२४२।३१।
"इमे प्रवेशसदृश कर्म्म वैजयिक ततम् ॥")

वै(बै)जिक, क्ली, (बीजाद्‌ुत्पन्नम् । बीज+ठक ।) शिग्रुतैलम् । हेतु । इति मेदिनी ॥ आत्मा । इति शब्दमाला ॥

वै(बै)जिक, पुं, सद्योऽङ्कुर । इति मेदिनी ॥ बीजसम्बन्धिनि, त्रि ॥ (बीजसम्बन्धिनि च त्रि । यथा, मनौ । २।२७ ।
"गार्भैर्होमैर्जातकर्म्मचौडमौञ्जीनिबन्धनै ।
बैजिक गार्भिकञ्चैनो द्विजानामपमृज्यते ॥")

वैज्ञानिक, त्रि, (विज्ञाने युक्त । विज्ञान+"तत्र नियुक्त ।"४।४।६९। इति ठक ।) निपुण । इत्यमर ॥

वै(बै)डालव्रतं क्ली, (वैडालं बिडालसम्बन्धि व्रतम् ।) दुराचारविशेष । यथा —
"यस्य धर्म्मध्वजो नित्य शक्रध्वज इवोच्छ्रित ।
प्रच्छन्नानि च पापानि वैडाल नाम तद्व्रतम् ॥"
इति दानसागरे मनुवचनम् ॥

वै(बै)डालव्रति पुं, धर्म्मशाठ्यभावात् छलतस्य धर्म्म । इति जटाधर ॥

वै(बै)डालव्रतिक पुं (बिडालव्रतेन चरतीति । बिडालव्रत+ठक ।) छद्मतपस्वी । तत्पर्याय । छद्मतापस २ धर्म्माभिमानी ३ । इति त्रिकाण्डशेष ॥ तस्याश्रयभोज्यत्वं यथा,—
"पाषण्डिनो विकर्म्मस्थान् वैडालव्रतिकान्
शठान् ।
हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्च्चयेत् ॥"
इति विष्णुपुराणे ३ अंश १८ अध्याय ॥
"यस्य धर्म्मध्वजो नित्य सुरध्वज इवोच्छ्रित ।
प्रच्छन्नानि च पापानि वैडालं नाम तद्व्रतम् ॥"
तद्वान् वैडालव्रतिक । इति तट्टीका ॥

वै(बै)डालव्रती, [न्] पुं, (वैडालव्रतमस्यास्तीति । इनि ।) भण्डतापस । बिडालतपस्वी । इति भाषा । यथा, कार्म्मे उपविभागे ५ अध्याये ।
"छद्मना चरितं यच्च व्रत रक्षांसि गच्छति ।
व्याजक्षो लिङ्गवेषेण यो लिङ्गमुपजीवति ।
स लिङ्गिनां हरेदेनस्तिर्य्यग्योनौ च जायते ।
वैडालव्रतिन पापा लोके धर्म्मविनाशका ।
सद्य पतन्ति पापेषु कर्म्मणस्तस्य तत्फलम् ।
पाषण्डिनो विकर्म्मस्थान् वामाचारांस्तथैव च ।
पञ्चरात्रान् पाशुपतान् वाङ्मात्रेणापि नार्च्चयेत् ॥"

वैण, पुं वंशजीवी । वेणुशब्दान्तकप्रत्ययेन उकारस्य लोपेन च निष्पन्नमिदम् । इति सिद्धान्तकौमुदी ॥ (यथा याज्ञवल्क्ये । १ । १६१ ।
"वैणाभिशस्तवार्द्धुषिगणिका गणदीक्षिणाम् ॥")

वैणवं, क्ली (वेणोरिदम् । वेणु+अण्) वेणुफलम् । इत्यमर ॥ वंशसम्बन्धिनि त्रि ॥ (यथा भागवते । ११ । ३ ।२४ ।
"अश्वग्रामोपस्कारो लब्धमायाश्रतात्मनाम् ।
अज्ञानबोध्य यच्च नित्यं वैणवोऽपि यथा वनम् ॥")

वैणव, पुं (वेणोरवयवो विकारो वा । वेणु+"बिल्वादिभ्योऽण् ।"४।३।१३६। इत्यण् ।) उपनयने वैणवदण्ड । तत्पर्याय । दाण्ड २ । इत्यमर ॥ (वेणु । यथा, महाभारते । ५ । ९ । १६ ।
"भेरीपणवनिनदे शङ्खवैणवनिःस्वने ॥")

वैणविक, त्रि, (वैणवो वेणुस्तद्वादनं शिल्पमस्य । वैणव+"शिल्पम् ।" ४।४।५५। इति ठक ।) वेणुवादक । तत्पर्याय । वेणुध्म २ । इत्यमर ॥ वैणुक ३ । इति शब्दरत्नावली ॥

वैणवी, स्त्री, (वेणोर्विकृति । वेणु+"बिल्वादिभ्योऽण् ।" ४।३।१३६। इत्यण् । ततो ङीप् ।) वंशलोचना । इति राजनिघण्ट ॥ (वेणुसम्बन्धिनी । यथा मनु । ४ । ३६ ।
"वैणवीं धारयेद्यष्टिं सोदकञ्च कमण्डलुम् ॥")

वैणिक त्रि, (वीणावादनं शिल्पमस्य । वीणा+"शिल्पम् ।" ४ । ४ । ५५ । इति ठक ।) वीणावादक । इत्यमर ॥ (यथा, कथासरित्सागरे । ६३ । १६२ ।
"तच्छ्रुत्वा विहतायोऽपि हर्षिता वैणिको ययौ ॥")

वैणुक, क्ली, गजस्य तोदनदण्डकम् । तत्तु हस्तिचालनार्थं लौहमुखवंशदण्डकम् । तत्पर्याय । तोत्रम् २ । इत्यमर ॥ वैणुकम् ३ । इति भरत ॥

वैणुक, पुं (वेणुना वादयति शब्दायते इति । वेणु+क । तत स्वार्थे अण् ।) वेणुवादक । इति शब्दरत्नावली ॥

वैणुकीय, त्रि, (वैणुकस्यायमिति । "वेण्वादिभ्य श्छ ।" ४ । २ । ११८ । इत्यस्य वार्त्तिकोक्त्या छ ।) वैणुसम्बन्धीय । इति सिद्धान्तकौमुदी ।

वैण्य, पुं, (वेनोरपत्यमिति । वेन+ष्यञ् ।) पृथु । स तु सूर्य्यवंशीयचक्रवर्त्ती । यथा —
"आदिराज पृथुर्वैण्यो मान्धाता नीरनाभक ।"
इति जटाधर ॥

वैतसिक, त्रि (वीतसो मम्मपत्रादिरूपाया लेख चरतीति । वितस+"चरति ।" ४ । ४ । ८ । इति ठक ।) मांसविक्रेता । तत्पर्याय । कौटिक २ मांसिक ३ । इत्यमर ॥ कौटकिक ४ । इति शब्दरत्नावली ॥ अमरटीकायां वीतसो वीतक तेन चरतीति वैतसिक । इति भरत ॥ (यथा, महाभारते । ३ । १३ । ११ ।
"इमान् शकुनकान् हन्ति वैतसिको यथा ।
एतद्दुष्पमधर्मश्च भूतेषु हि विहिसता ॥")

वैतनिक, त्रि, (वेतनेन जीवतीति । वेतन+"वेतनादिभ्यो जीवति ।" ४ । ४ । १२ । इति ठक ।) वेतनभुग्भृत्य । तत्पर्याय भृतक २ भृतिभुक् ३ कर्म्मकर ४ । इत्यमर ॥ (यथा, उपदेशशतके । २० ।
"वीरो वैतनिक बलिराटनगरोचित कुमारीणाम् ।
कर्म्मविताख्यश्च भयेद्‌ भवेश्वरोचितो
हृतिम् ॥")

वैतरणि } स्त्री, नरकनदी । इत्यमर ॥ "वितरणेन दानेन तीर्य्यते वैतरणी । स्वार्थे वैतरणी, } विस्तारादीप स्त्री वैतरणिश्च । अटविमटिवाटौ वैतरण्यधिपुष्पोरिति हस्वान्तोऽपि सन्द । तत्राऽपि पाप्मानोऽपीति वा ईप् । विवह तरङ्ग वितरण्य तदस्यामस्तीति वैतरण्यस्यै । वितरणौ विसर्गे पातात भवा वैतरण्यौर्ण । वितरणिविशेषोक्ता तरणमूल्यमर्थं स्वार्थे वैतरण्येव । विष्णुनदी ।
'नारका जनतः पेता नदी वैतरणी स्मृता ।
इति त्रिकाण्डम् ॥"
इति भरत ॥०॥ सा नदी दुर्गन्धा तप्तजला महावेगा अस्थिकेशरक्तपरिपूर्णा यमद्वारे वर्त्तते । यथा —
"नदी वैतरणी नाम दुर्गन्धा रुधिरावहा ।
उष्णतोया महावेगा अस्थिकेशतरङ्गिणी ॥"
इति प्रायश्चित्तविवेकधृतयमदयितवचनम् ॥०॥
अस्या उत्पत्तिर्यथा,—
मार्कण्डेय उवाच ।
"ततो ब्रह्मादयो देवा सर्व्वे ते प्रशशंसिरे ।
ममात्र वर ईशस्तु स्वर्गाथा सोममाधवी ।
सर्व्वेश्वरोऽपि भूतग्रामायातान्नदितस्ततः ।
वाष्पवृष्टि दुराधर्षामत्र यान्ति मायया ।
यत्र स्नात्वा नराः यान्ति अमरपितुमण्डलम् ।
तदा महाशिरो निशा वाप्याख्ये जलधारके ।
लोकालोकस्य निकटे जलधाराख्यो गिरि ।
पुष्करोदपरिक्लोदसमरणी निवे ।
स तु कर्म्मप्रभावेण गैरवर्णतयामिव ।
तस्मिन् विषयावान् वाम्यान् न यन्तु यम
स्थितु ।
विरोचनोऽस्तु वाचौ वैभवमधोऽमरन्दतम् ।
ते वाप्या सर्व्वतं भित्त्वा निविष्टकोपवासरम् ।
वासरोऽपि यदेनु तात्र द्रवाव तरावनि ।
तनस्तु वासर साकं भित्त्वा वाप्यं समागता ।
सोमपि प्राणभवा वैता छद्‌मनार्द्दयत तम् ।
विभिन्न वैता ते वाप्या पुष्करोदमथ्वा ।
नदी वैतरणी भूत्वा पूर्व्वभावमाभवत् ।
अवतारस्य देवेन वैकर्ण्य मात्रस्य च ।
वाराह वाम्यनी विविदानां मा भवत्
विविनम् ।
महानद्यानुत्पा इत्यो वरोव कारवैपर्ण ।

वैतानिक पुं, (वितान + ठञ् ।)

वैदर्भ पुं,

वैदर्भी स्त्री,

क्रीडायामुत्कलिकेऽपि कोमलैरबद्धुलितोद्धता यथ
मालय । पाञ्चालिकाद्यपोदाहृते । सत्र
व्याधूयमानेत्यादौ । ० । प्रबन्धेष्विप्यादृयथा ।
नाटकादौ रौद्रेऽप्यभिनयप्रतिकूलत्वेन न दीर्घ
समासादय । एवमाख्यायिकायां शृङ्गारेऽपि
न मसृणवर्णादय । कथायां रौद्रेऽपि नात्यन्त
मुद्धता । एवमन्यदपि ज्ञेयम् । इति साहित्य
दर्पणे रीतिविवेको नाम ९ परिच्छेदः । ० ।
अगस्त्यपत्नी । इति शब्दरत्नावली । दमयन्ती ।
यथा —
"वैदर्भीं विपुलानुरागकलना सौभाग्यभङ्गा
त्रिया
नीलीचक्रानक्रमौ निजगदे मदृशस्तनाक्रमे ।
किलाभाकनरेन्द्रभूम्नभगमा स्वभूतये नमर्के
देवेन्द्राधरतप्रधानिनद्रानीविद्याधिताश्रीर्मेच ।
इति उत्तरनैषधे १५ सर्गः ।
रुक्मिणी । यथा,—
"वैदर्भ्या स तु सन्देशं निशम्य यदुनन्दन ।
प्रगृह्य पाणिना पाणिं प्रहसन् इदमब्रवीत ।"
इति श्रीभागवते १० स्कन्धे ५३ अध्यायः ।
वैदल, क्ली, भिक्षुकस्य भक्तस्यान्नपात्रम् । यथा,
"पात्रञ्च दारवाख्यापूस्यस्यापि वैदलम् ।"
इति जटाधरः ।
वैदल पुं (विदलो दालिरतस्मात् जातः । विदल
+अण ।) पिष्टकः । यथा —
"पूपोऽपूपः पिष्टकः स्याद्वैदलो विन्दलोऽपि च ।"
इति शब्दचन्द्रिका ।
विदलो दालिस्तन्निर्मितपिष्टको वैदलः । तद्
गुणाः ।
"वैदला गुरवो भल्या विष्टम्भिन्दलमोचकाः ।"
इति राजवल्लभः ।
वैदिक पुं (वेद जानातीति । वेद+ठञ ।)
वेदपारगः । वेदोक्ते त्रि । यथा तन्त्रसारे ।
"वैदिकी तान्त्रिकी सन्ध्या यथानुक्रमयोगतः ।"
वैदिश, त्रि, विदिशाया अदूरभवं नगरम् । इति
सिद्धान्तकौमुदी ।
वैदुष्य, क्ली, (विदुषः कर्म भावो वा । विद्वस्+
ष्यञ ।) विदुषो भावः । विद्वस्शब्दात् ष्या
प्रत्ययेन निष्पन्नमिदम् । (यथा राजतरङ्गि
ण्याम् । १ । १२ ।
"पाटवे दृष्टवैदुष्यलीला मुकतभारती ।")
वैदूर्य्य, क्ली (विदूरात् प्रभवतीति । विदूर+
"विदूरात् ञ्यः ।" ४ । ३ । ८४ । इति ञ्यः ।)
मणिविशेषः । स तु श्यामपीतवर्णः । लहसुनीया
इति हिन्दी भाषा । अस्य देवता केतुः ।
तत्पर्य्यायः । वालवायजम् २ । इति हेमचन्द्रः ।
केतुरत्नम् ३ केतवम् ४ प्राहव्यम् ५ अभ्र
रोहम् ६ खराब्दाङ्कुरजम् ७ विदूररत्नम् ८
विदूरजम् ९ । अस्य गुणाः । अम्लत्वम् । उष्ण
त्वम् । कफवातघ्नाशित्वम् । गुल्मशूलप्रशमन
त्वम् । भूषितधृत् शुभावहत्वञ्च । इति राज
निघण्टः । अपि च ।

"मुक्ताविद्रुमवज्रेन्द्रवैदूर्य्यस्फटिकादिकम् ।
मणिरत्नं सरं शीतं कषायं स्वादु लेखनम् ।
चाक्षुष्यं धारणात्तच्च पापालक्ष्मीविनाशनम् ।"
इति राजवल्लभः । ० ।
तच्छायालक्षणं यथा —
"एकं वेणुपलाशकोमलरुचा मायूरकण्ठत्विषा
मार्जारेक्षणपिङ्गलच्छविमुधा ज्ञेयं त्रिधा
छायया ।
यद्गात्रे गुरुतां दधाति नितरां स्निग्धन्तु
दोषोज्झित
वैदूर्य्यं विमलं वदन्ति सुधियः स्वच्छञ्च तच्छो
भनम् ।"
तस्य कुलक्षणं यथा,—
"विच्छायं मृच्छिलागर्भं लघु रूक्षञ्च सक्षतम् ।
सत्रासं परुषं कृष्णं वैदूर्य्यं दूरतस्त्यजेत् ।"
तत्परीक्षा यथा,—
"घृष्टं यन्निजकान्ति स्वच्छं स्वच्छायां निकषाश्मनि ।
स्फुटं प्रदर्शयेदेतद्वैदूर्य्यं जात्यमुच्यते ।"
इति राजनिघण्टः । ० ।
सूत उवाच ।
"वैदूर्य्यपुष्परागाणां कर्केतनभीष्मके वदे ।
परीक्षां भक्तया प्रोक्तां व्यासेन कथितां द्विज ।
कल्पान्तकालक्षुभिताम्बुराशि
निर्ह्रादकल्पादुदितिस्वनाद्यद्
वैदूर्य्यमुत्पन्नमनेकवर्णं
शोभाभिरामं द्युतिवर्णबीजम् ।
अविदूरे वैदूर्य्यस्य गिरेर्नुङ्गरोधसः ।
कामभूतिकसीमानमनु तस्याकरोऽभवत् ।
तस्य नादसमुत्थत्वादाकरः सुमहागुणः ।
अभूदुत्तरितो लोके लोकत्रयविभूषणः ।
तस्यैव दानवपतेर्निनदादनल्प-
प्रावृट्पयोदरवदर्शितचारुरूपा ।
वैदूर्य्यरत्नमणयो विविधावभासा
स्तस्मात् स्फुलिङ्गनिवहा इव सम्बभूवुः ।
पद्मरागसमानाय मणिवर्णा हि ये क्षितौ ।
सर्व्वांस्तान् वर्णशोभाभिर्वैदूर्य्यमनुगच्छति ।
तेषां प्रधानं शिखिकण्ठनील
यद्वा भवेद्वेणुदलप्रकाशम् ।
चाषाग्रपत्रप्रतिमद्युतो ये
न ते प्रशस्ता मणिशास्त्रविद्भिः ।
गुणवान् वैदूर्य्यमणिर्योजयति स्वामिनं वरभाग्यैः ।
दोषैर्युक्तो दोषैस्तस्माद्यत्नात् परीक्षेत ।
गिरिकाचशिशुपालौ काचस्फटिकाश्च भूमि
निर्भिन्ना ।
वैदूर्य्यमणेरेते विजातयः सन्निभाः सन्ति ।
लिख्याभावात् काचं लघुभावाच्चैव शैशुपालं
विद्यात् ।
गिरिकाचमदीप्तित्वात् स्फाटिकं वर्णोज्ज्वलत्वेन ।
यदिन्द्रनीलस्य महागुणस्य
सुवर्णसंख्याकलितस्य मूल्यम् ।
तदेव वैदूर्य्यमणेः प्रदिष्टं
पलद्वयोन्मानितगौरवस्य ।
यानस्य यत्नेऽपि मणेस्तु याहृग्
विजातयः सन्ति समानरूपाः ।
तथापि नानाकरणानुमेय
भेदप्रकारः परमः प्रदिष्टः ।
स्नेहोपलेपप्रभवा विजातीं
छाया प्रभेदो विदुषा परेन ।
क्षेत्रप्रभेदो लघुता गुरुत्वं
विजातिलिङ्गं खलु सार्वजन्यम् ।
कुरुविन्दजाः प्रभूतप्रमाणा-
प्रतिबद्धाः प्रतिवस्तुक्रियाप्रयोगे ।
गुणदोषसमुद्भवं लभन्ते
मणयोऽर्थान्तरमूल्यमेव भिन्नाः ।
क्रमशः समतीतवर्त्तमानाः
प्रतिबद्धा मणिवन्धकेन यस्मात् ।
यदि नाम भवन्ति दोषहीना
सकलं बहुगुणमाप्नुवन्ति मूल्यम् ।
आकरात् समतीतानामुदधेस्तीरसन्निधौ ।
मूल्यमेतत्समस्तानां न सर्व्वत्र महीतले ।
सुवर्णो मनुना यस्तु प्रोक्तः षोडशमाषकः ।
तस्य सप्ततिमो भागः सञ्ज्ञारूपं करिष्यति ।
माषकचतुर्भागमाषो माषकः पञ्चकस्तु ।
पलस्य दशमो भागो धरणः परिकीर्त्तितः ।
इति मानविधिः प्रोक्तो रत्नानां मूल्यनिश्चये ।"
इति गारुडे वैदूर्य्यपरीक्षा ७२ अध्यायः । ० ।
अन्यच्च ।
"सितश्च धूम्रधूम्राभपीतमक्षतिवर्णितं भवेत् ।
वैदूर्य्यं नाम तदन्तं रक्तविन्दुविदाहुतम् ।
सक्षतं चिपिटं रूक्षं तत्तिर्यक् चतुर्विधम् ।
चित्रयोगो भवेदिभ चित्राङ्गस्तु वाहुणः ।
पीतालीनस्तु वैश्यः स्यात् नील एव हि शूद्रकः ।"
अथ गुणाः ।
"मार्जारनयनप्रख्यं दधोनयनिभं हि वा ।
कठिनं निर्म्मलं चारु वैदूर्य्यं देवभूषणम् ।
गुरुत्वं समस्तपर्णं कठिनं बहुलेन च ।
वैदूर्य्याणां समाख्याता एते पञ्च महागुणाः ।"
तद्यथा,—
"उद्गिरन्निव दीप्तिं योऽन्तो गुरुः इति कथ्यते ।
समानमार्द्रं गुरु यत् तस्मिन्नभिधीयते ।
कषघातैर्विवर्णं मधुमच्छिमिति कीर्त्तितम् ।
मध्ये सूर्य्यं कलाकारेणवत्रो वर्णं इष्यते ।
कठिनं नाम तद्रत्नं धर्षणस्याविकारकम् ।
विविधाकृतं वैदूर्य्यं बहुभिरभिधीयते । ० ।
कर्करं कर्क्कशं त्रासं कलङ्को देह इत्यपि ।
एते पञ्च महादोषा वैदूर्य्याणां प्रकीर्त्तिताः ।
सर्व्वेरङ्गमिव यत् प्रतिभाति च कर्करम् ।
करेऽपि च कलङ्कोऽयं कर्क्कशं समुदाहृतम् ।
भिन्नमिलिकरत्नाकः स च कुर्य्यात् कुबर्ण
यम् ।
विदूरजो वालाद्रिं कनकं चक्रधारकं ।
सर्वस्य दशमांश दैवो दैवविचारकः ।
अपीत वर्णं सुवर्णं माक्षीकं वरा वा
चतुर्विधम् श्वरी मूल्यतः कर्षितः ।

स्वरापि धनदीव भाग्र वैदूर्य्यरत्न
प्रत्यग्रनववल्लव्य भातमेव्यमदरम् ।"
इति युक्तिकल्पतरौ वैदूर्य्यपरीक्षा ।
अस्य गरुड़पुराणम् ।

वैदेह, पुं वणिक् । इत्यमरटीकायां भरतः । (विदेहस्यापत्यमिति । विदेह + अण् ।) विदेहराजपुत्रः । अश्वोत्पत्तियथा । अमृतस्य तस्य मृतस्य शरीरमराजकभीरवस्ते मुनयः अरण्यां ममन्थुः । तत्र च कुमारो जज्ञे । जनकाज्जनकः स्मृतो नाम्ना । अमूर्द्विदेहात्तस्य विदेहो वैदेहः । मथनात्मिथिरभूत्तस्येश्वस्य पुत्रो ऽभवत् । इति विष्णुपुराणे ४ अंशे मिथिवंशवर्णनं नाम ५ अध्यायः । तस्य विदेहनाम कारणं निमिशापो द्रष्टव्यः । (वर्णसङ्करजातिविशेषः । स तु वैश्यात् ब्राह्मण्यां जातः । यथा, मनुः । १० । ११ ।
वैश्यान्मागधवैदेहौ राजविप्राङ्गनासुतौ ।")

वैदेहक, पुं (वैदेह एव । स्वार्थे कन् ।) वणिक् । इत्यमरः । शूद्रात् वैश्यासुतः । इति मेदिनी । (वैश्याद्ब्राह्मण्यां जातो वर्णसङ्करविशेषः । यथा, मनुः । १० । १३ ।
"वैदेहकेन त्वम्बष्ठ्यामुत्पन्नो वेण उच्यते ।"
अन्त्यावसायी दुर्वृत्त ... कर्म्मिणः । यथा, तत्रैव । १० । ३७ ।
"वैदेहकानां स्त्रीकार्यं मागधानां वणिक्पथः ।")

वैदेहिक, पुं वणिक् । इत्यमरटीकायां रायमुकुटः । (वर्णसङ्करविशेषः । यथा, मनुः । १० । ३६ ।
"वैदेहिकादन्ध्रमेदौ बहिर्ग्रामप्रतिश्रयौ ।")

वैदेही, स्त्री (विदेहेषु भवा विदेहस्यापत्यं स्त्री वा । विदेह + अण् । ङीप् ।) रोचना । सीता । (यथा, रघुः । १३ । ९ ।
"रामोऽपि सह वैदेह्या वने वन्येन वर्त्तयन् ।
चचार सानुजः शान्तो वृद्धेक्ष्वाकुव्रतं युवा ।"
तथा च ।
"वैदेहि ! पश्य मलयाद्विभक्तं
मत्सेतुना फेनिलमम्बुराशिम् ।
छायापथेनेव शरत्प्रसन्न-
माकाशमाविष्कृतचारुतारम् ॥"
रघुः १३ ।)
वंशलोचना । पिप्पली । इति मेदिनी । (वैदेहस्त्री । यथा, मनुः । १० । ३७ ।
"चाण्डालात्पाण्डुसोपाकस्त्वक्सारव्यवहारवान् ।"
विदेहदेशोत्पन्नस्त्री च । यथा, महाभारते । १ । ९५ । ४३ । "देवातिथिश्च खलु वैदेहीमुपयेमे तस्यां ऋक्षं नाम पुत्रमजनयत् ।")

वैद्य, पुं (विद्या वेदोऽस्य । विद्या + "तदधीते तद्वेद ।" ४ । २ । ५९ । इति अण् ।) पण्डितः । यथा, माघे ।
"आगमादिव तमोपहादितः सम्भवन्तमथ दैवतं जयम् ।
... ... ।"

वैदिक विद्वान् । इति रायमुकुटः । वाचस्पत्यम् । इति शब्दचन्द्रिका । आयुर्वेदवेत्ता । चिकित्सकः । तत्पर्य्यायः । रोगहारी २ अगदङ्कारः ३ भिषक् ४ चिकित्सकः ५ । इत्यमरभरतौ । वैद्यः ६ भिषक् ७ चिकित्सकः ८ आयुर्वेदी ९ । इति राजनिर्घण्टः । स चतुर्विधः । रोगहरः १ विषहरः २ शल्यहरः ३ कृत्याहरः ४ । इति महाभारते राजधर्मे । अस्योत्पत्तिर्यथा —
"वैद्योऽश्विनीकुमारेण जातश्च विप्रयोषिति ।
वैद्यवीर्य्येण शूद्रायां बभूवुर्बहवो जनाः ।
ते च ग्रामगुणज्ञाश्च मन्त्रौषधिपरायणाः ।
तेभ्यश्च जाताः शूद्रायां ये व्यालग्राहिणो भुवि ।"
शौनक उवाच ।
कथं ब्राह्मणपत्न्यां सूर्य्यपुत्रोऽश्विनीसुतः ।
अहो केन विपाकेन वीर्य्याधानं चकार सः ।
सौतिरुवाच ।
गच्छन्तीं तीर्थयात्रायां ब्राह्मणीं रविनन्दनः ।
ददर्श कामुकः शान्तां पुष्पोद्याने मनोहरे ।
तया निवारितो यत्नात् बलेन बलवान् सुरः ।
अतीव सुन्दरीं दृष्ट्वा वीर्य्याधानं चकार सः ।
द्रुतं तत्याज गर्भं सा पुष्पोद्याने मनोरमे ।
सद्यो बभूव पुत्रश्च तप्तकाञ्चनसन्निभः ।
सपुत्रा स्वामिनो गेहं जगाम व्रीड़िता तदा ।
स्वामिनं कथयामास यन्मार्गे दैवसङ्कटम् ।
विप्रो रोषेण तत्याज तञ्च पुत्रं स्वकामिनीम् ।
सरिद्बभूव योगेन सा च गोदावरी स्मृता ।
पुत्रं चिकित्साशास्त्रञ्च पाठयामास यत्नतः ।
नानाशिल्पञ्च मन्त्रञ्च स्वयं स रविनन्दनः ।
विप्रश्च ज्ञानिमन्त्राद्वै वैद्यत्वं विरराज ह ।
वैद्यवंशोद्भवाः सर्वे बभूवुर्बहवो भुवि ।"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥
परशुरामप्रोक्ता वैद्यस्य यथा,—
"स ब्राह्मणात् वैश्यकन्यायामुत्पन्नो भवेत् ।
प्रतिलोमः ... ... ।
सर्वं ... ... ।
... ... ।
ततो ... ... ।
तयोः ... ... ।
तत्र ... ... ।
मालाकारो ... ... ।
ततो ... ... ।
ततो ... ... ।
विप्रो वैश्याञ्च वैद्यकं ... ।"
अपि च ।
"कर्म्मणा ... ... ।
न ... ... ।
... ... ।
... ... ।
... ... ।"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥
राजवैद्यस्य लक्षणं यथा,—
"यः पाठं गतो न ... ।
... ... ।
... ... ।
... ... ।"
इति मात्स्ये १८९ अध्यायः ॥
ग्रामस्थवैद्यलक्षणं यथा —
"चिकित्सां कुरुते यस्तु न चिकित्सक उच्यते ।
न च ... ... ।
... ... ।
... ... ।
... ... ।
... ... ।"
... ... चिकित्सा ... ।
... ... ।
... ... ।
... ... यथा,—
"... ... ... ।
... ... ।"
... ... ।
... ... ॥ ७ ॥
अथ वैद्यस्य कर्म्म चाह ।
"... ... ... ।
... ... ।"
... ... ।
... ... ।
... ... ।
... ... ।
... ... ॥ ८ ॥
अथ वैद्यानामपूजनस्य फलम् ।
"... ... ... ।
... ... ।
... ... ।
... ... ।
... ... ।
... ... ।"
... ... ।
"... ... ... ।" ॥
अथ ... ।
"... ... ... ।
... ... ।"
... ... ।
... ... ।
"... ... ... ।"
अथ ... ... ।
... ।
"... ... ... ।
... ... ।
... ... ।
... ... ।"

अथ दक्षप्रादुर्भावः ।
"अथ दक्षः क्रियादक्षः स्वर्वैद्यौ वेदमायुषः ।
वेदयामास विद्वांसौ सूर्य्यांशौ सुरसत्तमौ ॥"●

अथाश्विनीसुतप्रादुर्भावः ।
"दक्षादधीत्य दस्रौ वितनुत संहितां स्वीयाम् ।
सकलचिकित्सकलोकप्रतिपत्तिविवृद्धये धन्याम् ॥
स्वयम्भुवः शिरश्छिन्नं भैरवेण रुषाथ तत् ।
अश्विभ्यां संहितं तस्मात् जातौ यज्ञभागिनौ ॥
देवासुररणे देवा दैत्यैर्ये च क्षताः कृताः ।
अक्षतास्ते कृताः सद्यो दस्राभ्यामद्भुतं महत् ॥
वज्रिणोऽभूद्भुजस्तम्भः स दस्राभ्यां चिकित्सितः ।
सोमात्प्रपतितश्चन्द्रस्ताभ्यामेव सुखीकृतः ॥
विशीर्णा दशनाः पूष्णो नेत्रे नष्टे भगस्य च ।
ब्रह्मणो राजयक्ष्माभूदश्विभ्यां ते चिकित्सिताः ॥
भार्गवश्च्यवनः कामी वृद्धः सन् विकृतिं गतः ।
वीर्य्यवर्णस्वरोपेतः कृतोऽश्विभ्यां पुनर्युवा ॥
एतैश्चान्यैश्च बहुभिः कर्म्मभिर्भिषजौ वरौ ।
बभूवतुर्भृशं पूज्याविन्द्रादीनां दिवौकसाम् ॥"●

अथेन्द्रप्रादुर्भावः ।
"सहस्रो दस्रयोरिन्द्रः कर्म्माण्येतानि यत्नवान् ।
आयुर्वेदं विदित्वैतौ ययाचे प्रणतोऽपि सः ॥
नासत्यौ सत्यसन्धेन शक्रेण किल याचितौ ।
आयुर्वेदं यथाधीतं ददतुः शतमन्यवे ॥
नासत्याभ्यामधीत्यैव आयुर्वेदं शतक्रतुः ।
अध्यापयामास बहूनात्रेयप्रमुखान् मुनीन् ॥"●

अथात्रेयप्रादुर्भावः ।
"एकदा भगवानात्रेयः शोकाकुलमितस्ततः ।
चिन्तयामास भगवानात्रेयो मुनिपुङ्गवः ॥
किं करोमि क्व गच्छामि कथं लोका निरामयाः ।
भवन्ति चामयानेतान् शक्नोमि न निरोधितुम् ॥
दयालुत्वमसामर्थ्यं स्वभावो दुरतिक्रमः ।
एतेषां दुःखतो दुःखं ममापि हृदयेऽधिकम् ॥
आयुर्वेदं पठिष्यामि वैद्यत्वाय शरीरिणाम् ।
इति निश्चित्य मनसा नाकेशं सदयाशयम् ॥
गत्वा मन्दिरमिन्द्रस्य गत्वा यत्र ददर्श तम् ।
सिंहासनसमासीनं स्तूयमानं सुरर्षिभिः ॥
भासयन्तं दिशो भासा भास्करप्रतिमं स्थिरम् ।
आयुर्वेदमहाचार्य्यं विरोधार्य्यं दिवौकसाम् ॥
शक्रस्तु तं निरीक्ष्यैव मत्वा विश्वासतो ययौ ।
तमपि पूजयामास अर्घ्यभूरितपःश्रमम् ॥
कुशलं परिपप्रच्छ तथागमनकारणम् ।
स मुनिर्मुनिकुमारेभ्यो निजागमनकारणम् ॥
देवराज त्वं राजासि दिवि सद्य यतो भवान् ।
विधाता त्रिदिवो यज्ञाधिकोऽसौ लोकपालकः ॥
व्याधिभिर्व्याधिता लोका लोकाकुलितचेतसः ।
भूत्वैव सन्ति नश्यन्ति तेषां कर्त्तुं कृपां कुरु ॥
आयुर्वेदोपदेशं मे कुरु कारुणिको भवान् ।
तदेवं श्रुत्वा सहस्राक्षोऽध्यापयामास तं मुनिम् ॥
मुनीन्द्र एनं ग्राह्ममायुर्वेदमधीष्व च ।
अभिवन्द्य नमस्कृत्य आत्रेयस्तु पुरन्दरम् ॥
अथात्रेयो मुनिश्रेष्ठो भगवान् करुणाकरः ।
धराधाम्नि गतो यच्चे चरकाद्यनुगम्यता ॥

ततोऽग्निवेशं भेडञ्च जातूकर्णं पराशरम् ।
क्षीरपाणिञ्च हारीतमायुर्वेदमपाठयत् ॥
तन्त्रस्य कर्त्ता प्रथममग्निवेशोऽभवत् पुरा ।
ततो भेडादयश्चक्रुः स्वं स्वं तन्त्रं कृतानि च ॥
श्रावयामासुरात्रेयं मुनिवृन्देन वन्दितम् ।
श्रुत्वा च तानि तन्त्राणि हृष्टोऽभूदत्रिनन्दनः ॥
यथावत् सूचितं तस्मात् प्रहृष्टा मुनयोऽभवन् ।
दिवि देवर्षयो देवाः श्रुत्वा साध्विति चाब्रुवन् ॥"

अथ भरद्वाजप्रादुर्भावः ।
"एकदा हिमवत्पार्श्वे देवानाञ्च समागताः ।
मुनयो बहवस्तांश्च नामभिः कथयाम्यहम् ॥
भरद्वाजो मुनिवरः प्रथमं समुपागतः ।
ततोऽङ्गिरास्ततो गर्गो मरीचिर्भृगुभार्गवौ ॥
पुलस्त्योऽगस्तिरसितो वशिष्ठः सपराशरः ।
हारीतो गौतमः सांख्यो मैत्रेयश्च्यवनोऽपि च ॥
जमदग्निश्च गार्ग्यश्च काश्यपः कश्यपोऽपि च ।
नारदो वामदेवश्च मार्कण्डेयः कपिष्ठलः ॥
शाण्डिल्यः सहकौण्डिन्यः शाकुनेयः सशौनकः ।
आश्वलायनसांकृत्यौ विश्वामित्रः परीक्षितः ॥
देवलो गालवो धौम्यः काम्यकात्यायनावुभौ ।
काङ्कायनो वैजवापः कुशिको बादरायणिः ॥
हिरण्याक्षश्च लोकाक्षिः शरलोमा च गोभिलः ।
वैखानसा वालखिल्यास्तथैवान्ये महर्षयः ॥
ब्रह्मज्ञानस्य निधयो यमस्य नियमस्य च ।
तपसस्तेजसा दीप्ता हूयमाना इवाग्नयः ॥
सुखोपविष्टास्ते तत्र सर्व्वे चक्रुः कथामिमाम् ।
धर्म्मार्थकाममोक्षाणां मूलमुक्तं कलेवरम् ॥
तत्र सर्व्वार्थसिद्ध्यर्थं भवेद्यदि निरामयम् ।
तत्स्वास्थ्यधर्म्माणां बलवच्छतायुषाम् ॥
शरीरं प्रभवा रोगा यत्र तत्र च सर्व्वतः ।
रोगाः कार्श्यकरा बलक्षयकरा देहस्य चेष्टाहरा
दृष्टा इन्द्रियशक्तिसंक्षयकराः सर्व्वाङ्गपीडाकराः ।
धर्म्मार्थाखिलकामसिद्धिमहाविघ्नस्वरूपा बलात्
प्राणानाशु हरन्ति सन्ति यदि ते क्षेमं कुतः प्राणिनाम् ॥
तेषां प्रशमाय कश्चन विधिश्चिन्त्यो भवद्भिर्बुधै-
र्योगैरित्यभिधाय संसदि भरद्वाजं मुनिं तेऽब्रुवन् ।
त्वं योग्यो भगवान् सहस्रनयनं याचस्व गत्वा क्रमा-
दायुर्वेदमधीत्य च त्वमथ नस्तस्माद्भवामो वयम् ॥
इत्थं स मुनिभिर्योग्यैः प्रार्थितो विश्वकाङ्क्षिभिः ।
भरद्वाजो मुनिश्रेष्ठो जगाम त्रिदशालयम् ॥
तत्रेन्द्रभवनं गत्वा सुरर्षिगणमध्यगम् ।
ददर्श वृत्रहन्तारं दीप्यमानमिवानलम् ॥
स दृष्ट्वा तं मुनिं प्राह भगवान् मधुरा गिरा ।
उवाच स्वागतं तेन मुनिं तं समपूजयत् ॥

सोऽभिगम्य जयाशीर्भिरभिनन्द्य सुरेश्वरम् ।
ऋषीणां वचनं सम्यक् श्रावयत् सत्तमम् ॥
व्याधयो हि समुत्पन्नाः सर्व्वप्राणिभयङ्कराः ।
तेषां प्रशमनोपायं यथावद्वक्तुमर्हसि ॥
तमुवाच मुनिं साङ्गमायुर्वेदं शतक्रतुः ।
नातिदुर्घटवाक्यानि देवो बोधयति स्म यत् ॥
सोऽनन्तपारं त्रिस्कन्धमायुर्वेदं महामतिः ।
यथावदचिरात् सर्व्वं बुबुधे तन्मना मुनिः ॥
तेनायुः सुचिरं लेभे भरद्वाजो निरामयम् ।
अन्यानपि मुनींश्चक्रे नीरुजः सुचिरायुषः ॥
ततश्च मुनयस्तज्ज्ञा ज्ञानचक्षुषयोऽखिलाः ।
गुणान् द्रव्याणि कर्म्माणि दृष्ट्वा तद्विधिमास्थिताः ॥
आरोग्यं लेभिरे दीर्घमायुश्च सुखमद्भुतम् ।
आयुर्व्वेदोक्तविधिनान्येऽपि स्युर्यथो यथा ॥"

अथ चरकप्रादुर्भावः ।
"यदा मत्स्यावतारेण हरिणा वेद उद्धृतः ।
तदा शेषश्च तत्रैव वेदं साङ्गमवाप्तवान् ॥
"दुर्गालङ्घितविग्रहो मनसिजं संमीलयंस्तेजसा
प्रोद्यद्राजकलो गृहीतगरिमा विष्वग्वृतो
भोगिभिः ।
नक्षत्रेशकृतेक्षणो गिरिगुरौ गाढां रुचिं
धारयन्
गामाक्रम्य विभूतिभूषिततनू राजत्युमावल्लभः ॥"
अत्र प्रकरणेनाभिधया उमावल्लभशब्दस्य उमानाम्नी महादेवी तद्वल्लभभानुदेवनृपतिरूपेऽर्थे नियन्त्रिते व्यञ्जनयैव गौरीवल्लभरूपो-

र्थो बोध्यते। एवमन्यत्। ०। लक्षणामूला
माह।
"लक्षणोपास्यते यस्य कृते तत्तु प्रयोजनम्।
यया प्रत्याय्यते सा स्याद्व्यञ्जना लक्षणाश्रया॥"
गङ्गायां घोष इत्यादौ जलमयाद्यर्थबोधकादभि
धायां विरतायां तटाद्यर्थबोधकाच्च लक्षणायां
विरतायां यया शीतत्वपावनत्वाद्यतिशयादि
र्बोध्यते सा लक्षणामूला व्यञ्जना। ०। एवं
शाब्दीं व्यञ्जनामुक्त्वा आर्थीं व्यञ्जनामाह।
"वक्तृबोद्धव्यवाक्यानामन्यसन्निधिवाच्ययोः।
प्रस्तावदेशकालानां काकोश्चेष्टादिकस्य च।
वैशिष्ट्यादन्यमर्थं या बोधयेत् सार्थसम्भवा॥"
व्यञ्जना इति संबध्यते। तत्र वक्तृवाक्यप्रस्ताव
देशकालवैशिष्ट्ये यथा मम।

"कालो मधुः कुपित एष च पुष्पधन्वा
धीरा वहन्ति रतिखेदहराः समीराः।
केलीवनीयमपि वञ्जुलकुञ्जमञ्जु
र्दूरे पतिः कथय किं करणीयमद्य॥"

अत्र एतं देशं प्रति शीघ्रं प्रच्छन्नकामुकस्त्वया
प्रेषयितव्य इति सखीं प्रति कयाचिद् द्योत्यते। ०।
बोद्धव्यवैशिष्ट्ये यथा,—
"निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः।
मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडा
गमे
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्या
न्तिकम्॥"
अत्र तदन्तिकमेव गतासीति विपरीतलक्षणया
लक्ष्यं तस्य च रन्तुमिति व्यङ्ग्यं प्रतिपाद्यं दूती
वैशिष्ट्याद्बोध्यते। ०। अन्यसन्निधिवैशिष्ट्ये
यथा —
"उअ णिच्चल णिप्पन्दा भिसिणीपत्तम्मि रेहइ
बलाआ।
णिम्मलमरगअभाअणपरिट्ठिआ सङ्खसुत्ति व्व॥"
अत्र बलाकाया निस्पन्दत्वेन विश्वस्तत्वं तेनास्य
देशस्य विजनत्वम् अतः सङ्केतस्थानमेतदिति
कयापि सन्निहितप्रच्छन्नकामुकं प्रत्युच्यते।
अत्रैव स्थाननिर्जनत्वरूपव्यङ्ग्यार्थवैशिष्ट्यं प्रयो
जनम्।
"भिन्नकण्ठध्वनिर्धीरैः काकुरित्यभिधीयते॥"
इत्युक्तप्रकाराया काकोर्भेदा आकारादिभ्यो
ज्ञातव्याः। ०। एतद्वैशिष्ट्ये यथा —

"गुरुपरतन्त्रतया बत
दूरतरं देशमुद्यतो गन्तुम्।
अलिकुलकोकिलललिते
नैष्यति सखि! सुरभिसमयेऽसौ॥"

अत्र नैष्यत्येवापि तर्हि एष्यत्येव इति काका
व्यज्यते। ०। चेष्टावैशिष्ट्ये यथा —
"सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया।
हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम्॥"
अत्र सन्ध्या सङ्केतकाल इति पद्मनिमीलनादि
चेष्टया कयाचित् द्योत्यते। एवं वक्त्रादीनां
व्यस्तसमस्तानां वैशिष्ट्ये बोद्धव्यम्। ०।
"त्रैविध्यादियमर्थानां प्रत्येकं त्रिविधा मता॥"
अर्थानां वाच्यलक्ष्यव्यङ्ग्यत्वेन त्रिरूपतया सर्वा
अप्यनन्तरोक्ता व्यञ्जनास्त्रिविधा। तत्र वाच्या
र्थस्य व्यञ्जना यथा। कालो मधुरित्यादि।
लक्ष्यार्थस्य यथा। निःशेषच्युतचन्दनमित्यादि।
व्यङ्ग्यार्थस्य यथा। उअ णिच्चल इत्यादि। ०।
प्रकृतिप्रत्ययादिव्यञ्जकत्वन्तु प्रपञ्चयिष्यते।
"शब्दबोध्यो व्यनक्त्यर्थः शब्दोऽप्यर्थान्तराश्रयः।
एकस्य व्यञ्जकत्वे तदन्यस्य सहकारिता॥"
यत्र शब्दो व्यञ्जकत्वेऽर्थान्तरमपेक्षते। अर्थो
ऽपि शब्दं तदेकस्य व्यञ्जकत्वेऽन्यस्य सहकारि
त्वमवश्यमङ्गीकरणीयम्।
"अभिधादित्रयोपाधिवैशिष्ट्यात्त्रिविधो मतः।
शब्दोऽपि वाचकस्तद्वल्लक्षको व्यञ्जकस्तथा॥"
अभिधोपाधिको वाचकः। लक्षणोपाधिको
लक्षकः। व्यञ्जनोपाधिको व्यञ्जकः। किञ्च।
"तात्पर्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने।
तात्पर्यार्थं तदर्थञ्च वाक्यं तद्बोधकं परे॥"
अभिधाया एकैकपदार्थबोधनविरमाद्वाक्यार्थ
रूपस्य पदार्थान्वयस्य बोधिका तात्पर्यं नाम
वृत्तिस्तदर्थश्च तात्पर्यार्थस्तद्बोधकञ्च वाक्यमित्य
भिहितान्वयवादिनां मतम्। इति साहित्यदर्पणे
वाक्यस्वरूपनिरूपणो नाम द्वितीयः परि
च्छेदः॥

व्यड्मक, पुं एरण्डः। इत्यमरः॥

व्यतिकर, पुं (वि+अति+कृ+अप।) व्यसनम्।
(यथा कथासरित्सागरे। ७४। ८८।
"अस्मिन् व्यतिकरे इन्त शकुनाविव तौ मत॥")
व्यतिषङ्गः। इति मेदिनी। (विनाशः। यथा,
भागवते। १। ७। ५९।
प्रत्नोपहतमात्मस्य शोकव्यतिकरञ्च तम्।
मतश्च वासुदेवस्य सव्यहाराज्जुनो हयम्॥"
मिश्रणम्। यथा, माघे। ३। ५६।
"अन्योन्यव्यतिकरचारुभिर्विचित्रै
रत्रस्यन्नवमणिजन्मभिर्मयूखैः॥")

व्यतिक्रम, पुं (वि+अति+क्रम+घञ्।) क्रम
विपर्ययः। यथा —
"धर्मेण प्राड्विवाको दाता यष्टा च यदृच्छया।
यत्र तत्र विविदाने विवादे च व्यतिक्रमः॥"
इत्युद्वाहतत्त्वम्॥

व्यतिरिक्त, त्रि व्यतिरेकविशिष्टः। भिन्नः। इ
ति पूर्व्वमेदिनीकारो अव्ययदेव विव्ययमेव॥
(अधिकः। यथा, कालकचतुरस्य प्रथमा
विभक्तिलिङ्गपरिमाणवचने इत्यस्य सूत्रे। "(विशेष)
मात्रातिरिक्तोऽधिको व्यतिरिक्तः॥")

व्यतिरेक, पुं (वि+अति+रिच+घञ्।) विना।
अभावः। यथा। तदभिरेकदार्थं बहुव्रीहि
प्रतिबन्धं तत् प्रतिबन्धकाभावम्। इति भरत
मल्लिनाथः। (यथा, कथासरित्सागरे। ३८।
१११।
"न पतिव्यतिरेकेण स्त्रीणामपरा गतिः॥")
अलङ्कारविशेषः। यथा —
"व्यतिरेको विशेषश्चेदुपमानोपमेययोः।
शैला इवोन्नताः सन्तः किन्तु प्रकृतिकोमलाः॥"
इति चन्द्रालोके॥

व्यतिषङ्ग, पुं (वि+अति+षञ्ज+घञ्।) पर
स्परमेलनम्। (यथा, महाभारते। १२। ९। ११।
"उभयोर्व्यतिषङ्गेण जयः सापराधोऽभवत्॥"
विनिमयः। यथा, भागवते। ५। १६। १६।

"अन्योन्यविनयातिषङ्ग-
वैराग्यबन्धो विचरन् मिथश्च॥")

व्यतिहार, पुं (वि+अति+हृ+घञ्।) विनि
मयः। यथा —
"परिदानं विनिमयो नैमेयः परिवर्त्तनम्।
व्यतिहारः पराकर्तो वैमेयो विमयोऽपि च॥"
इति हेमचन्द्रः॥
(यथा, रघुः। १२। ९२।
"विक्रमव्यतिहारेण सामान्याभूद्द्वयोरपि।
जयश्रीरन्तरावेदिर्मत्तवारणयोरिव॥")

व्यतीत, त्रि (वि+अति+इ+क्तः।) अतीतः।
गतः। यथा,—
"आहृत्ये व्यतीते तु चकाभिर्षेदवभवेत्।
पूर्व्वं व्रतादिकं कुर्य्यात् परेद्युश्चान्द्रायणो॥"
इति तिथितत्त्वे भीमपराक्रमीयम्॥

व्यतीपात, पुं (वि+अति+पत+घञ्। "उप
सर्गस्य घञ्यमनुष्ये बहुलम्।" ६। ३। १२२। इति उप
सर्गस्य दीर्घः।) महोत्पातः। अपमानम्।
इति मेदिनी। विष्कम्भादिसप्तविंशतियोगान्त
र्गतसप्तदशयोगः। तत्र कर्म्मकर्त्तव्यं यथा,—
"निरुद्धं दिवसं क्षिप्तं व्यतीपातस्य चेष्टितम्।
किञ्चित् चापि शुभं तेन पापाचरमपि वर्जयेत्।
परित्यक्तकवेदिहं शुभकर्म्म ततः परम्।
महापातयोः घट च यत् वर्जयन्तो।
वैधृतिव्यतीपातौ च यत्नतो परिवर्जयेत्॥" ०।
अस्य प्रतिप्रसवमाह भीमपराक्रमे।
"न विष्कम्भो यथा यज्ञो न व्यतीपातवज्रौ।
पञ्चताराश्च याम्ये रौद्रा अन्यत्र दुष्टा।
तत्कालवारको विष्टि यत्रैवादिव तथा।
व्यतीपातो न दुष्टेन कन्यायां रविरेव स्थितः।
यदि विद्धि व्यतीपातो दिन मध्याह्नं यदि।
तुल्यसौ व्यतीपातेन भास्करेण समो यदा॥"
इति ज्योतिस्तत्त्वम्॥ ०॥
तत्र जातफलम्।

"कठोरवाक्यो विदुरश्चमातो
मरालुरो मातृपितृमनुष्य।
परस्य कार्य्ये बहुमत्सरो
यस्य प्रसूतौ व्यतीपातयोगे॥"

इति कोष्ठीप्रदीपे॥
पादिमाविकसेवदिन। यथा, हलायुधः।
"व्यतीपातविहङ्गमं निरन्तरमयं।
इत्यन् हरिहरेण वर्द्दमानः च वक्ति॥"
तत्र प्रयोजनं यथा। कल्पद्रुमे।

"अकामितु व्यतीपाते महती चन्द्रसूर्य्ययोः ।
पुष्ये स्नात्वा तु जाह्नव्यां कुलकोटीः समुद्धरेत् ॥"
इति प्रायश्चित्ततत्त्वम् ॥

(यथा च भागवते । ४ । १२ । ४८ ।
"निमयये व्यतीपाते संक्रमेऽर्कदिनेऽपि वा ।
श्रावयेच्छ्रद्दधानानां तीर्थपादपदाश्रयः ॥")

व्यतीहार, पुं, (वि+अति+हृ+घञ् । "उपसर्गस्य घञ्यमनुष्ये बहुलम् ।" ६ । ३ । १२२ । इति दीर्घः ।) परीवर्त्तः । इति जटाधरः ॥ परस्परनैकजातीयक्रियाकरणम् । यथा, केशाकेशि । दण्डादण्डि । इत्यादि । इति व्याकरणम् ॥

व्यत्यय, पुं, (व्ययनमिति । वि+अति+इ+"एरच् ।" ३।३।५६। इत्यच् ।) व्यतिक्रमः । तत्पर्य्यायः । व्यत्यासः २ विपर्य्यासः ३ विपर्य्ययः ४ । इत्यमरः ॥ (यथा भागवते । ७ । १ । ४४ ।
'यदावरैर्व्यासनात्मा कालेन व्यत्ययो महान् ।")

व्यत्यास, पुं, (व्यसनमिति । वि+अति+अस्+घञ् ।) विपर्य्ययः । इत्यमरः ॥ (यथा, हरिवंशे । २७ । २८ ।
"नाध्यापि वचिता भद्रे ! चरुव्यत्यासहेतुना ।
भविष्यति हि पुत्रस्ते क्रूरकर्म्मातिदारुणः ॥")

व्यथ, ष ङ दु खे । चाले । भये । इति कविकल्पद्रुमः ॥ (भ्वा० आत्म० चल० सेट् ।) दुःखं दुःखानुभवः । चालं कम्पनम् । ष, व्यथा । ङ, व्यथते । दु, व्यथते लोकः दुःखमनुभवति । कम्पते बिभेति चेत्यर्थः । केचित्तु दुःखभयचलनयोरिति पठित्वा भये चलनं भयचलनमित्याहुः । दुःखभयचलन इति पठित्वा दुःखभययोश्चलनं सम्प्रसारणमिति गोविन्दभट्टः । इति दुर्गादासः ॥

व्यथक, त्रि, (व्यथयति पीडयतीति । व्यथ+णिच्+ण्वुल् ।) व्यथाकारी । यथा,—
"अप्रात्यर्थं व्यथकस्तु व्यासमेधागमेष्वपि ।"
इति हेमचन्द्रः ॥
(यथा, किराते । २ । ४ ।
"परिणामसुखे गरीयसि
व्यथकेऽस्मिन् वचसि क्षतौजसाम् ।
अतिवीर्य्यवतीव भेषजे
बहुरल्पीयसि दृश्यते गुणः ॥")

व्यथा, स्त्री, (व्यथ+अङ् । टाप् ।) दुःखम् । इत्यमरः ॥ (यथा उत्तरचरिते । १ ।
"स्नेहं दयां तथा सौख्यं यदि वा जानकीमपि ।
आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा ॥")

व्यथित, त्रि (व्यथ+क्त ।) पीडितः । (यथा, ऋतुसंहारे । ६ । १८ ।
"कान्तामुखद्युतिजुषामचिरोद्गतानां
शोभां परां कुरवकद्रुममञ्जरीणाम् ।
दृष्ट्वा प्रिये ! सहृदयस्य भवेन्न कस्य
कन्दर्पबाणनिकरैर्व्यथितं हि चेतः ॥")
दुःखितः । यथा —
"तत्र प्रव्यथितो राजा दुःखितः पुत्रदुःखतः ।
क्रन्दत कम्पकायार्त्तप्राणोऽस्यानीत बद्धदृढम् ॥"
इति श्रीभागवते वामयुद्धे १२ अध्यायः ॥

व्यध, औ य ताडे । इति कविकल्पद्रुमः ॥ (दिवा० पर० सक० अनिट् ।) य, विध्यति पशुं शूरः । औ, अव्यात्सीत् । कश्चित्तु हिंसार्थाधिकारी मूर्द्धन्यकारस्य धोऽयं कारो वस्य बन्धन तु दन्त्य इति मत्वा धनि विशाल्यत्वमित्याह । इति दुर्गादासः ॥

व्यध, पुं (व्यधनमिति । व्यध ताडे+"व्यधजपो रनुपसर्गे ।" ३ । ३ । ६१ । इत्यप् ।) वेधः । इत्यमरः ॥ (यथा सुश्रुते । १ । ३ ।
"सिराव्यधो गमनीयां सभिषग्या व्यासति-
क्तया ॥")

व्यध्य, पुं (व्यधाय हितः । व्यध+यत् ।) धनुर्गुणः । यथा,—
"व्यध्यस्तु प्रतिकाय स्याज्जीवाज्या भारवे
गुणः ॥")
इति त्रिकाण्डशेषः ॥

व्यध्व, पुं, (विरुद्धो अध्वा । प्रादिसमासः । उपसर्गादध्वन इत्यच् ।) कुत्सितपथः । तत्पर्य्यायः । दुरध्वः २ विपथः ३ कदध्वा ४ कापथः ५ । इत्यमरः ॥ कुपथः ६ अपथः ७ कुत्सितवर्त्म ८ । इति शब्दरत्नावली ॥ (यथा, महाभारते । ७ । ७ । २३ ।
"तूर्णं प्रव्रायनश्चैतान् काम व्यध्वगतानपि ॥")

व्यप क क्षये । इति कविकल्पद्रुमः ॥ (चुरा० पर० सक० सेट् ।) अन्तःस्थादिरयम् । क, व्यापयति । इति दुर्गादासः ॥

व्यपदेश, पुं, (वि+अप+दिश+घञ् ।) कपटः । इति हेमचन्द्रः ॥ (यथा, साहित्यदर्पणे । ३ । १५६ ।
"कापि कुन्तलसंव्यानसंयमव्यपदेशतः ।
बाहुमूलं स्तनौ नाभिपङ्कजं दर्शयेत् स्फुटम् ॥")
नाम । इति त्रिकाण्डशेषः ॥ वाक्यविशेषः ॥ यथा,—
"व्यपदेशाख्याभिधानोक्तिव्यपदेश इतीर्य्यते ॥"
इत्युज्ज्वलनीलमणिः ॥

व्यपाकृति, स्त्री, अपह्नवः । अस्वीकारः । वि अप आङ् पूर्व्वकृधातोः क्तिप्रत्ययेन निष्पन्नम् ॥

व्यभिचार, पुं (वि+अभि+चर+घञ् ।) कदाचारः । भ्रष्टाचारः । यथा,—
"व्यभिचारात्तु भर्त्तुः स्त्री लोके प्राप्नोति
निन्द्यताम् ।
शृगालयोनिं प्राप्नोति पापरोगैश्च पीड्यते ॥"
इति मानवे ५ अध्यायः ॥
दोषविशेषः । तस्य लक्षणम् । साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वं हि व्यभिचारः । इति व्यधिकरणधर्म्मावच्छिन्नाभावचिन्तामणिः ॥ स त्रिविधः । साधारणः १ असाधारणः २ अनुपसंहारी ३ । तत्र विपक्षवृत्तित्वं साधारणत्वम् । सर्व्वसपक्षव्यावृत्तत्वमसाधारणत्वम् । व्याप्तिग्राहकानुकूलान्वयसहचाराभावो यत्र पक्षेऽभिमतोऽनुपसंहारी । इति सव्यभिचारचिन्तामणिः ॥

व्यभिचारिणी, स्त्री, (व्यभिचरति या । वि+अभि+चर+णिनि । ङीप् ।) परपुरुषगामिनी । यथा,—
"हृताधिकारां मलिनां पिण्डमात्रोपजीविनीम् ।
परिभूतामधःशय्यां वासयेद्व्यभिचारिणीम् ॥
सोमः शौचं ददौ तासां गन्धर्व्वश्च शुभां गिरम् ।
पावकः सर्व्वमेध्यत्वं मेध्या वै योषितो ह्यतः ॥"
इति याज्ञवल्क्ये । १ । ७० । ७१ ॥
इति तु स्त्रीणामन्यविषयम् ।
"व्यभिचाराद्दृतौ शुद्धिर्गर्भे त्यागो विधीयते ।
गर्भभर्त्तृवधे तासां तथा महति पातके ॥"
इति गारुडे ९५ अध्यायः ॥ ० ॥
तस्याः परित्यागानि यथा । हारीतः । व्यभिचारे सर्व्वोपभोगां शिष्यसुतगामिनीं पापव्यवसायकां धनधान्यक्षयकरीं वर्ज्जयेत् । मनुः ।
"स्वच्छन्दगा तु या नारी तस्यास्त्यागो
विधीयते ।
न चैव स्त्रीवधः कार्य्यो न चैवाङ्गविकर्त्तनम् ॥"
इत्यपि ।
"स्त्रीनक्षत्रपितृसक्ता या बाध्या वध्यापि वा
भवेत् ॥"
विशेषयति मिताक्षरायां स्मृतिः ।
"ब्राह्मणक्षत्रियविशां भार्य्याः शूद्रेण सङ्गताः ।
अप्रजाता विशुद्ध्यन्ति प्रायश्चित्तेन नेतराः ॥"
एतत् बलात्कारविषयम् । इत्युद्वाहतत्त्वम् ॥ ० ॥
तस्याः पुण्यकर्म्माणि निष्फलानि धर्म्मार्थकारिकाश्च यथा । हरिवंशे पुण्यकव्रते पाद्मे ।
"दानोपवासपुण्यानि तीर्थाद्यव्ययकानि च ।
निष्फलान्यसतीनां हि पुण्यकानि तथा पुनः ॥"
इत्यन्तम् ।
"स्वपुत्रा प्रथमं भर्त्तुं ज्वालयन्ती सती स्थिता ।
मनोरथ दग्धानां पितॄन् कृतुसमर्थं कर्म्मत
च ॥"
'भर्त्तुं प्रथमं ज्वालयन्ती व्यभिचारिणी । इति दायतत्त्वम् ॥

व्यभिचारी [न्] पुं, (व्यभिचरतीति । वि+अभि+चर+णिनि ।) त्रयस्त्रिंशत्प्रकारसञ्चारिभावविशेषः । तद्यथा । निर्व्वेदः १ ग्लानिः २ शङ्का ३ असूया ४ मदः ५ श्रमः ६ आलस्यम् ७ दैन्यम् ८ चिन्ता ९ मोहः १० स्मृतिः ११ धृतिः १२ व्रीडा १३ चपलता १४ हर्षः १५ आवेगः १६ जडता १७ गर्व्वः १८ विषादः १९ औत्सुक्यम् २० निद्रा २१ अपस्मारः २२ सुप्तम् २३ विबोधः २४ अमर्षः २५ अवहित्था २६ उग्रता २७ मतिः २८ व्याधिः २९ उन्मादः ३० मरणम् ३१ त्रासः ३२ वितर्कः ३३ । इति हेमचन्द्रः ॥ (अस्य लक्षणादिर्यथा, साहित्यदर्पणे । ३ । १४० ।
"विशेषादाभिमुख्येन चरणाद्व्यभिचारिणः ।
स्थायिन्युन्मग्ननिर्म्मग्नास्त्रयस्त्रिंशच्च तद्भिदाः ॥"
के ते इत्याह ।

"निर्वेदावेगदैन्यश्रममदजडता औग्र्यमोहौ
विबोध
स्वप्नापस्मारगर्व्वा मरणमलसतामर्षनिद्रा
वहित्था ।
औत्सुक्योन्मादशङ्का स्मृतिमतिसहिता
व्याधिसन्त्रासलज्जा
हर्षासूयाविषादाः सधृतिचपलताग्लानिचिन्ता
वितर्काः ॥"
एतेषां लक्षणादिकं तत्तच्छब्दे विशेषतो द्रष्टव्यम् ।)
त्रि, व्यभिचारविशिष्टः । (स्वमार्गच्युतः । यथा,
कथासरित्सागरे । १५ । ५५ ।
"लब्धापि मन्त्रितास्थानादिरक्षाक वान्यथा
भवेत् ।
स्वामिसम्भावनायाश्च भवेम व्यभिचारिणः ॥"
अनित्यः । आगमापायी । यथा, भागवते ।
११ । ३ । ३८ ।
"नात्मा जजान न मरिष्यति नैधतेऽसौ
न क्षीयते सवनविद्व्यभिचारिणां हि ॥")
व्यय, क क्षये । इति कविकल्पद्रुमः । (चुरा-
पर सक सेट ।) अन्त स्थादियुक्तः । क,
व्याययति । क्षय इति क्षये । इति दुर्गादासः ।
व्यय ज गतौ । इति कविकल्पद्रुमः । (भ्वा
उभ सक सेट ।) ज, व्ययति व्ययते । इति
दुर्गादासः ।
व्यय तु क गतौ । त्यागे । इति कविकल्पद्रुमः ।
(अदन्तचुरा पर सक सेट ।) व्यययति ।
इति दुर्गादासः ।
व्ययं, क्ली (व्यय गतौ + अच् ।) समाप्तम् । सम्भ्र
त्यागम् । यथा,—
"सम धन भ्रातृबन्धुपुत्रप्रभुकलत्रका ।
मरण धर्म्मकर्म्मायव्यया द्वादशराशय ॥"
इति ज्योतिस्तत्त्वम् ॥
(व्ययति गच्छतीति । व्यय गतौ + अच् । मन्दे
त्रि । यथा, मनुः । १ । १९ ।
"सूक्ष्माभ्यो मूर्त्तिमात्राभ्यः सम्भवत्यव्ययाद्
व्ययम् ॥")
व्ययः, पुं, (वि + इ + अच् ।) अपव्ययगमः ।
वित्तस्यानुत्सर्गः । इति शब्दरत्नावली । खरच
इति पारस्यभाषा । (यथा मनुः । ८ । ११ ।
"आयव्यये तु पितृणां व्यये चैव नियोजयेत् ॥"
नाशः । यथा भागवते । ४ । १ । ४८ ।
ताविमौ वै भगवतो हरेरंशाविहागतौ ।
भारव्ययाय च भुवः कृष्णौ यदुकुरूद्वहौ ॥"
परित्यागः । दानम् । यथा रघुः । १२ । २१ ।
"आमात्य सुतय नवान् एकमेव व्ययेन सः ॥"
इत्यसतिपारशगततन्निवृत्तिः । यथा, कुमार-
सम्भवम् । ८ । ११ ।
"प्रथम व्ययसुख का शोभनं
भवपगकवरगालमाधुरम् ॥"
नामविशेषः । यथा महाभारते । १ । ३५ । ११ ।
"अपराजितः कालतक ऋषिकोऽसावथो व्ययः ॥")
व्ययित, त्रि, (व्यय + क्त ।) कृतव्ययः । व्यय

प्रत्ययादिसप्रत्ययेन व्ययधातो क्तप्रत्ययेन वा
निष्पन्नम् ॥
व्ययी, [न्] त्रि, (व्ययोऽस्यास्तीति । व्यय +
इनि ।) व्यययुक्तः । यथा —
"हविषां परिमितमधिकव्ययिन भवमाकुलो
कुरुते ।
क्षीयाश्वसमिव पीनस्तनजघनायाः कुली-
नायाः ॥
इत्युद्भटः ।
व्यर्थं, त्रि, (विगतोऽर्थो यस्मात् ।) निरर्थकम् ।
तत्पर्य्यायः । मोघम् २ विफलम् ३ । इति
जटाधरः । (यथा कुमारे । ३ । ७५ ।
"शैलात्मजापि पितुरुच्छिरसोऽभिलाष
व्यर्थं समर्थ्य ललितं वपुरात्मनश्च ॥")
व्यलीकं, क्ली (विशेषेण अलतीति । वि + अल +
"अलीकादयश्च ।" उणा ४ । २५ । इति
कीकन्प्रत्ययेन निपातनात् साधुः ।) पैशुन्यम् ।
इत्यमरः । गतिविपर्य्ययः । कामजापराधः ।
इति तट्टीकायां भरतः ॥ यथा,—
"कर्त्तुं नैव विजानाति परेणापलपं किञ्चित् ।
तत्पूर्वश्चकारैतन्मयश्च न जानाति ॥
व्यलीकेषु निरतो य मर्म्मणि हतविषय ।
विनाय धनिमान् किञ्चित् परोक्षेऽपि न च
चिपेत् ॥
ऋतुकालेऽभिगच्छेत धर्म्मपत्नीं स्वकां स्त्रियम् ।
ईदृशास्तु नरा भद्रे मम कर्म्मपरायणाः ॥"
इति वाराहे योनिगमनागमननामाध्यायः ॥
अप्रियम् । (यथा, महाभारते । १ । ६ । ८ ।
"न हि तेन मम भ्राता सुसूक्ष्ममपि किञ्चन ।
व्यलीकं कृतपूर्व्वं वै प्राणैरपि मनुष्ठितम् ॥")
अकार्य्यम् । वैलक्ष्यम् । इति मेदिनी । (यथा
किराते । ३ । १९ ।
"यविमितैश्चर्यकृतव्यलीक
पराभव प्राप्य इवाशकोऽपि ।
धुन्वन्तु कस्य रविं न कुर्य्यात्
मनो भयैकवयसं च भीम ॥")
अपराधः । इति हेमचन्द्रः । (यथा शिशु-
पालवधे । ९ । ८५ ।
"सुतनु जहिहि कोपं पश्य पादानतं मां
न खलु तव कदाचित् कोपना सा व्यलीका ।")
प्रतारणा । इति शब्दाब्धिः । (दुःखम् । इति
वैजयन्ती । यथा कुमारे । ५ । ४४ ।
"दिवं यदि प्रार्थयसे वृथा श्रमः
व्यलीकविश्वासनियोगदक्ष ॥")
तद्वति त्रि । (यथा भागवते । ८ । २४ । २ ।
"यदुत्तमश्लोक भवान् ममेशितः
वचो व्यलीकं सुरवर्य्य मन्यते ।
करोम्यृतं तन्न भवेत् प्रलम्भनं
पदं तृतीयं कुरु शीर्ष्णि मे निजम् ॥")
व्यलीकः, पुं (वि + अल पर्य्याप्तौ + कीकन् ।)
नागरः । इति मेदिनी । तत्पर्य्यायः । विद्रुमः २
नवयष्टः ३ कामकेलिः ४ विदूषकः ५ पीठ-

मर्दः ६ पीठमर्द ७ भञ्जिल ८ विदूर ९
विट १० । इति त्रिकाण्डशेषः ।
व्यवकलनं, क्ली (वि + अव + कल + ल्युट् ।)
वियोगः । हीनः । अङ्कस्यान्तरकरणम् ।
बाकिकाटा इति भाषा । यथा —
"अये बाले लीलावति ! मतिमति ! ब्रूहि
सहितान्
द्विपञ्चद्वात्रिंशत्त्रिनवतिशताष्टादश दश ।
शतोपेतानेतानयुतवियुतांश्चापि वद मे
यदि व्यक्ते युक्तिव्यवकलनमार्गेऽसि कुशला ॥"
इति लीलावती ॥
व्यवकलित, त्रि (वि + अव + कल + क्त ।)
कृतव्यवकलनः । वियोजितः । हीनितः । व्यव-
कलने, क्ली । यथा । अथ सङ्कलितव्यवकलि-
तयोः करणसूत्रं वृत्ताद्धम् ।
"कार्य्यः क्रमादुत्क्रमतोऽथवाङ्क-
योगो यथास्थानकमन्तरं वा ॥"
इति लीलावती ।
व्यवच्छिन्न त्रि, (वि + अव + छिद् + क्त ।)
भिन्नम् । यथा । भिन्नन्तु व्यवच्छिन्नं विदेशितम् ।
इति त्रिकाण्डशेषः ॥
व्यवच्छेद पुं (वि + अव + छिद् + घञ् ।) व्याव-
त्तिः । इति हेमचन्द्रः । एकदेशः । (विरामः ।
निवृत्तिः । यथा भागवते । ३ । २९ । ३९ ।
"लोकस्य च व्यवच्छेद स्ववेतनप्रतिक्रिया ॥")
व्यवधा, स्त्री (वि + अव + धा + "आतश्चोपसर्गे ।
इत्यङ् । टाप् ।) व्यवधानम् । इत्यमरः ।
व्यवधानं, क्ली (वि + अव + धा + ल्युट् ।)
आच्छादनम् । तत्पर्य्यायः । तिरोधानम् २
अन्तर्द्धिः ३ अपवारणम् ४ छदनम् ५ व्यवधा ६
अन्तर्द्धा ७ पिधानम् ८ स्थगनम् ९ । इति
हेमचन्द्रः । व्यवधिः १० अपिधानम् ११ ।
इति शब्दरत्नावली । (यथा रघुः । ११ । ४३ ।
"इति विभाव्य तपोवनदृष्टिना
पुनः स चक्षुषाचिरचित्रगते ॥"
भेदः । यथा भागवते । ३ । २९ । २७ ।
"मदाश्रयाः कथा मृष्टाः शृण्वन्ति कथयन्ति च ।
तपन्ति विविधास्तापा नैतान्मद्गतचेतसः ॥"
विच्छेदः । यथा शिशुपालवधे । ९ । ९१ ।
"मधुरमपि न विरराम दूतः
व्यवधानभीरुकतया न मधु ॥"
समाप्तिः । यथा भागवते । ३ । १५ । ४४ ।
"व्यवधानं च विष्णोर्व्यवधानेन कर्म्मणाम् ॥")
व्यवधायक, त्रि, (व्यवदधातीति । वि + अव +
धा + ण्वुल् ।) व्यवधानकर्त्ता । यथा । यत्र
जन्मो वहिन कन्यादानानन्तरं वरकन्याभ्यां सह-
हस्तावेदिको देवे कर्म्मणी कर्म्मकारक
अपरसूत्रकारः कर्म्मणामनारम्भणो न व्यव-
धायकः । इति प्रायश्चित्ततत्त्वम् ।
व्यवधि पुं (वि + अव + धा + "उपसर्गे घोः
किः ।" ३ । ३ । ९२ । इति किः ।) व्यवधानम् । इति
शब्दरत्नावली । (यथा, किरातार्ज्जुनीये । ५ । ११ ।

"व्यवसायमपि मा त्रियो यस्याः
मदनाकुलितया न वेद कः ।")

व्यवसायः, पुं, (वि+अव+सो+घञ् ।) उप जीविका । पेशा इति पारस्यभाषा । यथा,—
"करोति नाम नीतिज्ञो व्यवसायमितस्ततः ।
फलं पुनस्तदेव स्याद्यद्विधेर्मनसि स्थितम् ॥"
इति हितोपदेशे २ परिच्छेदे ॥
अपि च ।
"व्यापारो द्विगुण स्त्रीणां बुद्धिस्तासां चतुर्गुणा ।
षड्गुणो व्यवसायश्च कामश्चाष्टगुणः स्मृतः ॥"
इति चाणक्यशतकम् ॥
अनुष्ठानम् । इति व्यवसायिशब्दार्थदर्शनात् ॥ (यथा रामायणे । २ । २ । ४१ ।
"सर्व्वथा सदृशं सौते । मम स्वस्य कुलस्य च ।
व्यवसायमनुक्रान्ता कान्ते । त्वमतिशोभनम् ॥")
निश्चयः । यथा —
"व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥"
इति भगवद्गीतायाम् २ अध्यायः ॥
व्यवसायात्मिकेति । इह ईश्वराराधनलक्षणे कर्म्मयोगे व्यवसायात्मिका परमेश्वरभक्त्यैव ध्रुवं तरिष्यामीति निश्चयात्मिका एकैव एकनिष्ठैव बुद्धिर्भवति । अव्यवसायिनामीश्वराराधनबहिर्मुखानां कामिनां कामानामनन्त्यादनन्ता अपि कर्म्मफलगुणफलादि प्रकारभेदाद्बहुशाखाश्च बुद्धयो भवन्ति । इति तट्टीकायां स्वामी ॥
विष्णुः । यथा —
"व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः ॥"
इति महाभारते तस्य सहस्रनामस्तोत्रे । १३ । १४९ । ५५ ॥ (महादेवः । यथा,तत्रैव । १३ । १७ । ७५ ।
"अदृश्यश्चो विजयो व्यवसायो ह्यनन्तिमः ॥")

व्यवसायी [न्] त्रि, (व्यवसायोऽस्यास्तीति । इनिः ।) व्यवसायविशिष्टः । वाणिज्यकारकः । यथा,—
"कोऽतिभारः समर्थानां किं दूरं व्यवसायिनाम् ।
को विदेशः सविद्यानां कः परः प्रियवादिनाम् ॥"
इति चाणक्यशतकम् ॥
अनुष्ठाता । यथा,—
"अज्ञेभ्यो ग्रन्थिनः श्रेष्ठा ग्रन्थिभ्यो धारिणो वराः ।
धारिभ्यो ज्ञानिनः श्रेष्ठा ज्ञानिभ्यो व्यवसायिनः ॥"
इति मानवे १२ अध्यायः ॥
अज्ञेभ्य इति । उभयो ग्रन्थज्ञे सति अन्यतरस्यातिशयविवक्षया श्रेष्ठतेति । स्तोकविस्मृतग्रन्थापेक्षया ग्रन्थिनः अधीतग्रन्थाः श्रेष्ठाः । तेभ्योऽधीतग्रन्थधारणक्षमाः श्रेष्ठाः । तेभ्योऽपि ग्रन्थार्थबोद्धारः । ज्ञानिभ्योऽधीतग्रन्थार्थानुष्ठातारः प्रशस्ताः । इति तट्टीकायां कुल्लूकभट्टः ॥

व्यवसित, त्रि (वि+अव+सो+क्त ।) प्रतारितः । इति भूरिप्रयोगः ॥ अनुष्ठितः । निश्चितः । इति व्यवसायिव्यवसायशब्दार्थदर्शनात् ॥ (यथा, रामायणे । २ । २४ । १ ।
"तं समीक्ष्य व्यवसितं पितुर्निर्देशपालने ।
कौशल्या वाष्पसंरुद्धा वचो धर्म्मिष्ठमब्रवीत् ॥")

व्यवस्था, स्त्री (वि+अव+स्था+"आतश्चोपसर्गे ।" ३ । ३ । १०६ । इत्यङ् । टाप् ।) शास्त्रविहितविधिः । यथा,—
"दीर्घकालं ब्रह्मचर्य्यं धारणञ्च कमण्डलोः ।
देवरेण सुतोत्पत्तिर्दत्तकन्या प्रदीयते ॥"
इत्यादीन्यभिधाय ।
"एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः ।
निवर्त्तितानि कर्म्माणि व्यवस्थापूर्व्वकं बुधैः ॥"
इत्युद्वाहतत्त्वे हेमाद्रिपराशरभाष्ययोरादिपुराणम् ॥ (नियमः । यथा कथासरित्सागरे । १ । ८ । ७१ ।
"एवं शतयुगाख्या महाराजानि सद्गुरः ।
उत्साह्य भगवांस्तस्य व्यवस्थामादिदेश सः ॥")

व्यवस्थानः, पुं विष्णुः । यथा,—
"व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः ।"
इति महाभारते तस्य सहस्रनामस्तोत्रे । १३ । १४९ । ५५ ॥ (वि+अव+स्था+ल्युट् ।) व्यवस्थितौ क्ली । यथा —
"चातुर्म्मास्यव्यवस्थानं यस्मिन् देशे न विद्यते ।
स म्लेच्छदेश आर्य्यावर्त्तात् परम् ॥"
इत्यार्य्यावर्त्तशब्दटीकायां भरतः ॥

व्यवस्थित, त्रि, (वि+अव+स्था+क्त ।) विधिपूर्व्वकस्थितः । व्यवस्थापितः । यथा —
"अथ व्यवस्थितान् दृष्ट्वा धार्त्तराष्ट्रान् कपिध्वजः ।
प्रवृत्ते शस्त्रसम्पाते धनुरुद्यम्य पाण्डवः ॥"
इति श्रीभगवद्गीतायाम् १ अध्यायः ॥

व्यवहर्त्ता [र्त्तृ] पुं (वि+अव+हृ+तृच् ।) व्यवहारकर्त्ता । प्राड्विवाक इति यावत् । यथा । उत्तराभिधानानन्तरं सभ्यानामपि प्रत्यर्थिनो मन्त्रः क्रिया स्यादिति परामर्शपर्य्यन्तस्य प्रमाणनिर्णयस्य प्रागीश्वरेण व्यवहारपादस्तेना-भिधानात् व्यवहर्त्तृसमन्वयाभावाच्च व्यवहारपादत्वमिति स्थितम् । इति मिताक्षरायां व्यवहारमातृका ॥ कामन्दकीयोपाधिविवरणञ्च ॥

व्यवहारः, पुं (वि+अव+हृ+घञ् ।) विवादः । इत्यमरः ॥ वृक्षभेदः । न्यायः । पणः । स्थितिः । इति मेदिनीशब्दरत्नावल्यौ ॥ ● ॥ (कर्म्म । क्रिया । यथा,—
"न कश्चित् कस्यचिन्मित्रं न कश्चित्कस्यचिद्रिपुः ।
व्यवहारेण जायन्ते मित्राणि रिपवस्तथा ॥"
यथा च रघुः । ८ । ६२ ।
"तदपि प्रव्यवहारनिष्ठुरे
विपयसाय विधानस्य निष्ठुरः ।
तुलाय धैर्य्यातिशयेन दुष्करः
पदं हि सर्व्वत्र गुणैर्निधीयते ॥")
अथ व्यवहारदर्शनम् । तत्र याज्ञवल्क्यः ।
"व्यवहारान्नृपः पश्येद्विद्वद्भिर्ब्राह्मणैः सह ।
धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः ॥"

स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः ।
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत् ॥"
स्मृतिसदाचारबहिर्भूतेन मार्गेण परैरपहृतधनो वा पीडितशरीरो वा निवेदयति चेदाज्ञप्त्या व्यवहारपदं स्वीकृतमनयोः । यत् मिथ्याभिशंसनमित्यन्याय्यम् । प्रधानकर्ण्याः चिह्नं प्रमाणस्थानं ... व्यवहारदर्शनम् ।
यथा च बृहस्पतिः ।
"राजा कार्य्याणि सम्पश्येत् प्राड्विवाकोऽथवा द्विजः ॥" ● ॥
प्राड्विवाकशब्दार्थ्याह स एव ।
"विवादे पृच्छति प्रश्नं प्रतिप्रश्नं तथैव च ।
प्रियपूर्व्वं प्राग्वदति प्राड्विवाकस्ततः स्मृतः ॥"
कात्यायनः ।
"व्यवहाराश्रितं प्रश्नं पृच्छति प्राड्विति स्थितिः ।
विवेचयति यस्तस्मिन् प्राड्विवाकस्ततः स्मृतः ॥"
अर्थिनं प्रति आप्यते कोऽसौ प्रत्यर्थिनं प्रति च तथापि कोऽत्र सुनयः इति पृच्छतीति प्राट् श्रुत्वा च युक्तायुक्तत्वेन अथ परात्मानं वा विविनक्ति इति विवाकः प्राट् च स विवाकश्चेति प्राड्विवाकः ॥ ● ॥ कात्यायनः ।
"सप्राड्विवाकः सामात्यः सब्राह्मणपुरोहितः ।
स्वयं च राजा विमृशन् जयपराजयौ ।
यदा कार्य्यवशाद्राजा न पश्येत् कार्य्यनिर्णयम् ।
तदा नियुञ्ज्याद्विद्वांसं ब्राह्मणं वेदपारगम् ।
यदि विप्रो न विद्वान् स्यात् क्षत्रियं तत्र योजयेत् ।
वैश्यं वा धर्म्मशास्त्रज्ञं शूद्रं यत्नेन वर्ज्जयेत् ॥"
स विनीतवेशः । मनुः ।
"जातिमात्रोपजीवी वा कामं स्याद्ब्राह्मणब्रुवः ।
धर्म्मप्रवक्ता नृपतेर्न तु शूद्रः कथञ्चन ।
यस्याश्रयति धर्म्मं च ब्राह्मणब्रुवः स्मृतः ॥"
व्यासः ।
"द्विजान् विहाय यः पश्येत् कार्य्याणि वृषलैः सह ।
तस्य प्रक्षुभ्यते राष्ट्रं बलं कोषञ्च नश्यति ।
यः शूद्रो वैदिकं धर्मं ज्ञात्वा वा भाषते यदि ।
तस्य दण्डं तु सहसा राजा चैव निवेदयेत् ॥
दुःशीलोऽपि द्विजः पूज्यो न शूद्रो विजितेन्द्रियः ।
दुग्धा गौः का परित्यज्यार्चयेत् शीलवतीं खरीम् ॥"
व्यवहारमाह कात्यायनः ।
"वि नानार्थेऽव सन्देहे हरणं हार उच्यते ।
नानासन्देहहरणाद्व्यवहार इति स्थितिः ॥"
नानाविवादविषयसन्देहो ह्रियतेऽनेन इति व्यवहारः । भावोत्तरक्रियानिश्चायकत्वं व्यवहारत्वम् । तथा च बृहस्पतिः ।
"धर्म्मशास्त्रविरोधेन सन्देहपटलावृतान् ।
विरामयान् य कुरुते व्याख्यानगुणसाधकः ।
इह कीर्त्तिं राजपूजां लभते सर्वतश्च सः ।
तस्मात् संशयच्छेदार्थं कर्त्तव्यश्च विनिश्चयः ॥"
अवयव चाह ।

"अनियुक्तो नियुक्तो वा धर्म्मज्ञो वक्तुमर्हति ।
दैवीं वाचं स वदति यः शास्त्रमुपजीवति ॥"
दैवीं देवानुमताम् । * । धर्म्मशास्त्रयोस्तु विरोधे लोकव्यवहार एवादरणीय । इत्याह स एव ।
"धर्म्मशास्त्रविरोधे तु युक्तियुक्तो विधिः स्मृतः ।
व्यवहारोऽपि बलवान् धर्म्मस्तेनावहीयते ॥"
व्यवह्रियते व्यवस्थाप्यते हि गताविश्वासाद्वाती । अतएव बृहस्पतिः ।
"केवलं शास्त्रमाश्रित्य न कर्त्तव्यो विनिर्णयः ।
युक्तिहीनविचारे तु धर्म्महानिः प्रजायते ॥"
युक्तिर्न्याय । स च लोकव्यवहार इति यावत् तात्पर्य्यार्थः । अतएव कात्यायनः ।
"कुलशीलवयोवृत्तवित्तवद्भिरधिष्ठितम् ।
वणिग्भिः स्यात् कतिपयैः कुलवृद्धैरधिष्ठितम् ॥"
सदः इति शेषः । कात्यायनः ।
"सभ्येनावश्यवक्तव्यं धर्म्मार्थसहितं वचः ।
शृणोति यदि नो राजा स्यात्तु सभ्यस्तदाऽनघः ॥"
सभ्यः सभायां साधुः । * । तथाविधानाह याज्ञवल्क्यः ।
"श्रुताध्ययनसम्पन्ना कुलीनाः सत्यवादिनः ।
राज्ञा सभासदः कार्य्याः शत्रौ मित्रे च ये समाः ॥"
श्रुताध्ययनसम्पन्नाः धर्म्मशास्त्रज्ञाः । कुलीनाः अक्रूरादिदोषशून्यमातापितृवंशपरम्पराकाः । एवंभूताः सभासदः सभायां यथा सीदन्ति उपविशन्ति तथा दानमानसत्कारैः राज्ञा कर्त्तव्याः । * । तथाविधावस्थानेन भूमेः सभात्वमाह मनुः ।
"यस्मिन् देशे निषीदन्ति विप्रा वेदविदस्त्रयः ।
राज्ञः प्रतिकृतो विद्वान् ब्राह्मणस्तां सभां विदुः ॥"
विद्वांसतामपि सभाधर्म्मामपरिच्छेद्यमाह स एव ।
"त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्म्मपाठकः ।
त्रयश्चाश्रमिणः पूर्व्वे परिषत् स्याद्दशावरा ॥"
त्रैविद्यः त्रिवेदपारगः । हैतुकः । मदुक्ति मीमांसकः । अनदवामरात्मव । सभा बहुभि सभ्यैः च । अथ भा दीप्ति प्रकाशो ज्ञानमिति यावत् तया सह साक्षात् परम्परया वा वर्त्तत इति सभा । * । कात्यायनः ।
"नियमस्थाश्च भाग शुक्रा भागवन्तु मन्त्र ।
न कालो व्यवहाराणां प्राड्विवाको यत् स्मृतः ॥"
अष्टमयामाद्यष्टप्रहरम् । भागवर्ध्वं प्रहरद्वयवर्ज्जनम् । मनुः ।
"धर्म्मासनमधिष्ठाय संवीताङ्गः समाहितः ।
प्रणम्य लोकपालेभ्यः कार्य्यदर्शनमारभेत् ॥"
मनुनारदवीधायनहारीतैः ।
"पादोऽधर्म्मस्य कर्त्तारं पादः साक्षिणमृच्छति ।
पादः सभासदः सर्व्वान् पादो राजानमृच्छति ॥
राजा भवत्यनेनास्तु मुच्यन्ते च सभासदः ।
एनो गच्छति कर्त्तारं निन्दार्हो यत्र निन्द्यते ॥"
कर्त्तारं वादिनम् । राजपादः विवेचकपरम् । अनेन विधाय । अधिकमाहतुर्व्यासनारदौ ।
"यस्य चाभ्यधिका पीडा कार्य्यं वाप्यधिकं भवेत् ।
तस्याभियोगो दातव्यो न यः पूर्व्वं निवेदयेत् ॥"
अत्रैव पूर्व्ववादी भवेत्तस्य इति कात्यायनीये तृतीयपादः । न यः पूर्व्वं निवेदयेदिति तस्यो चरणम इति शेषः । स च पूर्व्वमिति पाठे यः प्रथमं निवेदयति स पूर्व्ववादीत्यर्थः । बृहस्पतिः ।
"अथ पूर्व्विकया यानादिप्रतिपत्ती यत्र ।
वर्णानुपूर्व्व्येण ग्राह्यः पीडामपेक्ष्य वा ॥"
यत्र द्वावेव युगपत् प्रभी सहार्थ्य प्राप्य इति तत्र ब्राह्मणादिक्रमेणाधिकपीडादर्शनेन वा वादी ग्राह्यः । * । अथ विवादप्राप्तौ प्रतिनिधिमाह नारदः ।
"अर्थिना संनियुक्तो वा प्रत्यर्थिप्रहितोऽपि वा ।
यो यस्यार्थे विवदते तयोर्जयपराजयौ ॥"
तयोर्वादिप्रतिवादिनोः । बृहस्पतिरपि ।
"ऋत्विक् वादे नियुक्तश्च समौ सम्परिकीर्त्तितौ ।
यज्ञे स्वाम्याप्नुयात् पुण्यं हानिं वादेऽथवा जयम् ॥"
कात्यायनः ।
"मनुष्यमारणे स्तेये परदाराभिमर्षणे ।
अभक्ष्यभक्षणे चैव कन्याहरणदूषणे ॥
पारुष्ये कूटकरणे नृपद्रोहे तथैव च ।
प्रतिवादी न दातव्यः कर्त्ता तु विवदेत् स्वयम् ॥"
कुलस्त्रीप्रभृतीनां प्रतिनिधिमाह स एव ।
"कुलस्त्रीबालकोन्मत्तजडार्त्तानाञ्च बान्धवाः ।
पूर्व्वपक्षोत्तरे ब्रूयुर्नियुक्तो भृतकस्तथा ॥"
भ्रात्रादीतरस्य प्रतिनिधेर्दण्डनीयत्वमाह नारदः ।
"यो न भ्राता पिता वापि न पुत्रो न नियोजितः ।
परार्थवादी दण्ड्यः स्याद् व्यवहारेषु विब्रुवन् ॥"
विब्रुवन् विरुद्धं ब्रुवन् । * । नारदः ।
"निर्गन्तुकामो दोषार्त्तो विश्वस्तश्चेव निर्गतः ।
अभियुक्तश्चान्येन राजकर्म्मोद्यतस्तथा ॥
गवां प्रचारे गोपालाः शस्यवर्म्मे कृषीवलाः ।
शिल्पिनश्चापि तद्भावे आयुधीयाश्च विग्रहे ॥
अप्राप्तव्यवहारश्च दूतो दानोन्मुखो व्रती ।
विषमस्थाश्च नासेध्या न चैतानासेधयेन्नृपः ॥"
निर्गन्तुकामो विवाहयज्ञ । अन्यत्र वारान्न एव । अप्राप्तव्यवहारः षोडशवर्षपर्यन्तः । तत्कार्य्ये विवादादिनिमित्तमित्यर्थः । विषमस्थाश्च जलप्लावाद्यापत्तिस्थाः । एतद्भिन्नेषु आसेधः आह्वानं राज्ञा करणीयम् इति वादिना स्वयं दिने दिने यावत् वादी प्रतिवादिनं रक्षेत् । * । कात्यायनः ।
"अभियोक्ता प्रभुश्चैव प्रत्यभियोक्ता च । "
[illegible] अभियुक्ता निस्तरेयुः प्रत्यर्थिनेनाधिकेन ... चेत् । युगपदनेकव्यवहारासम्भवात् । नारदोऽपि ।
"पूर्व्ववादं परित्यज्य योऽन्यमालम्बते पुनः ।
वादसंक्रमणाज्ज्ञेयो हीनवादी स वै नरः ॥"
हीनवादीत्यनेन दण्ड्यो न तु प्रकृतार्थाद्धीनो मता अन्यथा कृतार्थता । * । पारुष्ये प्रतिप्रसवमाह स एव ।
"कुर्य्यात् प्रत्यभियोगन्तु कलहे साहसेषु च ।
वाक्पारुष्ये प्रत्यादिव्यवहारेषु च । यथापूर्व्वमभियुक्तेनाकृष्टः प्रत्येव कृतं दण्डपारुष्ये भावाय प्रत्यभियोगं कुर्य्यात् । यथा च बृहस्पतिः ।
"आकृष्टस्तु यदाक्रोशं ताडितः प्रतिताडयन् ।
हत्वाततायिनञ्चैव नापराधी भवेन्नरः ॥"
एतेन वाक्पारुष्यदण्डपारुष्ययोः प्रकृताभियोगे सत्यभियोगेऽपि न दोषः । मनुः ।
"पूर्व्वमाचारयेद्यस्तु नियतं स्यात् स दोषभाक् ।
पश्चाद्यः सोऽप्यसत्कारी पूर्व्वे तु विनयो गुरुः ॥"
इति नारदवचनं तत्र पूर्व्वारम्भस्य परस्याधिकवाक्पारुष्योत्पादकत्वादिः सत्त्वरक्षाविधायकम् । * । युगपत्तयप्रकरणे अधिकदण्डमाह स एव ।
"पारुष्ये साहसे चैव युगपत् संप्रवृत्तयोः ।
विशेषश्चेन्न लभ्येत विनयः स्यात् समस्तयोः ॥"
विनयो दण्डः । एतेन योऽप्यधमपराधि सोऽत्र पीडितत्वादिति भावार्थो प्रत्यभियोग कार्य्य एव । प्रकरणभेदेनापि युगपदनेकव्यवहारासम्भवाभावात् । * । सभापतेः कर्त्तव्यमाह कात्यायनः ।
"अथ चेत् प्रतिभूर्नास्ति वादयोग्यस्तु वादिनः ।
स रक्षितो दिनस्यान्ते दद्याद् भृत्याय वेतनम् ॥"
प्रतिभवति तत्कार्य्ये तद्रूपभवति इति प्रतिभूर्लग्नकः । वादयोग्य विवादवस्तु वादिना प्रतिवादिनस्तत्र दण्डनीयः स मतः । वादिनो भावाद्यादिः उत्तरवादिनश्च । तथाच याज्ञवल्क्यः ।
"उभयोः प्रतिभूर्ग्राह्यः समर्थः कार्य्यनिर्णये ।
प्रतिभुवश्चाभावे च राज्ञा न ग्राह्यं तयोः ॥"
राज्ञा स्वयं [illegible] निर्णयकार्य्ये कारादाने राजदण्डार्पणात् [illegible] पूर्व्वविचार । [illegible] । * । [illegible] यावत् [illegible] च कार्य्ये [illegible] । तथा ।
"[illegible] ।
[illegible] ॥"
[illegible] । याज्ञवल्क्यः ।
"[illegible] ।
[illegible] ॥"
[illegible] । [illegible] ।

अभिशापो महापातकादिना । अत्यये दण्ड
नाशे । स्त्रियां कुलस्त्रियां चारित्र्यविवादविषय
मानायां दास्यां स्वत्वविवादे वा । यत्र सद्य एव
उत्तरं दापयेदिति मूलमार्थम् । विशेषयति
कात्यायनः ।
"यस्मात् कार्य्यसमारम्भाच्चिरकालेन विनिश्चितः ।
तस्मान्न लभते कालमभियुक्तस्तु कालभाक् ॥"
अपवादमाह स एव ।
"अभियोक्ता प्रगल्भत्वात् वक्तुं नोत्सहते यदि ।
तदा कालं प्रदातव्यं कार्य्यशक्त्यनुरूपतः ॥'
अन्यापि विशेषयति व्यासः ।
'राजन्यवासी दीर्घकालान् कार्य्यं यत्र भवेत् ।
अरण्यगमनाच्चैव न भवेत् स पराजितः ॥"
स दत्तसमयवत्योऽभियुक्तः ।
"राजन्येकतः शेषं साक्षिभिः प्रतिपादयेत् ।
लेख्येन वर्त्तमानस्तु न्यूनो दाप्यस्तु तद्धनम् ॥"
अवध्यतिक्रमदोषो राजदेविकं पिथ्य प्रतिमो
न तदतिक्रामकोऽपराध्यति लेख्याच तदति
क्रमेण दण्ड्यो भङ्गी च भवतीत्यर्थः । छल
कालिन्यादियुक्तो निषेधः । यथा च हारीतः ।
छल मायाः वाक्ययुक्ता निन्दति । कौटिल्य
कालियप्राप्त्यैरक्षत्प्रावयुक्त लेख्यमिति युक्त
योगः ॥ ● ॥
अथ व्यवहारपादनिर्णयः । तत्र बृहस्पतिः ।
"पूर्व्वपक्षः स्मृतः पादो द्विपादश्चोत्तरः स्मृतः ।
क्रियापादस्तथा चान्यश्चतुर्थो निर्णयः स्मृतः ।
मिथ्योक्तौ चतुष्पात् स्यात् प्रत्यवस्कन्दने
तथा ।
प्राङ्न्याये च स विज्ञेयो द्विपात् सम्प्रतिपत्तिषु ॥"
यद्यपि सम्प्रतिपत्तावपि निर्णयोऽस्ति तथापि
साक्ष्यादिनैव भाषायस्याङ्गीकारत्वेन क्रियापादो
न भवति इति द्विपादस्तोक्ता ॥ ● ॥

अथ भाषापादः ।

तत्र भाषास्वरूपमाह बृहस्पति कात्यायनवृहस्पती ।
'प्रतिज्ञादोषनिर्मुक्तं साध्यं सत्कारणान्वितम् ।
निश्चितं लोकसिद्धञ्च पक्षं पक्षविदो विदुः ॥
स्वल्पाक्षरः प्रभूतार्थो निःसन्दिग्धो निराकुलः ।
विरोधिकारणैर्मुक्तो विरोधिप्रतिरोधकः ॥
यदा त्वेवंविधः पक्षः कल्पितः पूर्व्ववादिना ।
दद्यात् तत्पक्षसम्बद्धं प्रतिवादी तदुत्तरम् ॥"
प्रतिज्ञा साध्याभिधायिका वाक् । तस्याः दोषैः
प्रसिद्धविरुद्धादिभिर्निर्मुक्तं साध्यं साधनं
चाभिमतं पक्षं विदुः । अन्यथा प्रतिज्ञानेपि
साध्यं न स्यात् । अतएवोक्तम् ।
"वचनस्य प्रतिज्ञात्वं तद्दोषस्य च पक्षता ।
असद्भिरेव वक्तव्यं व्यवहारेषु वादिभिः ॥"
तदेव पक्षप्रतिज्ञे पूर्व्वोक्ते । नारदेनापि ।
"वादस्तु व्यवहाराणां प्रतिज्ञा समुदाहृता ।
तद्धानौ हीयते वादी तरंस्तामुत्तरो भवेत् ॥"
उत्तरो विजयी । सदृपदं साध्यं प्रार्थं तद्
विशिष्टधर्म्मो पक्ष इति मे तथाप्युक्ते दाक्
प्रत्यायकानिपुणैर्विशेषविशिष्टस्य पक्षता

धर्म्मिणोऽधर्मज्ञादेरेव साध्यत्वात् साध्यपक्षयोर
भेदाभिधानम् । उपचारात् च एवमिति पक्ष
इति । मिताक्षरायान्तु भाषा प्रतिज्ञापक्ष इति
पर्य्यायान्तरमित्युक्तम् । भाषापदस्य भाषास्वरूप
प्रपञ्चमाह स्वल्पाक्षर इति । निराकुल
पौर्व्वापर्य्यविरुद्धार्थशून्य । मनुः ।
"द्यूते च व्यवहारे च प्रवृत्ते यज्ञकर्म्मणि ।
यानि यस्य प्रवृत्तानि कर्म्माणि तानि न
पश्यति ॥'
इति प्रत्यक्षस्वतन्त्रादन्यासीनेभ्यो द्वारा
शोधयेत् । तच्छोधनमाह बृहस्पतिः ।
"न्यूनाधिकं पूर्व्वपक्षं तावद्वादी विशोधयेत् ।
न दद्यादुत्तरं यावत् प्रत्यर्थी सभ्यसन्निधौ ॥'● ॥
तल्लिखनप्रकारमाह व्यासः ।
"पाण्डुलेखेन फलके भूमौ वा प्रथमं लिखेत् ।
न्यूनाधिकन्तु संशोध्य पश्चात् पत्रे निवेशयेत् ॥'
फलकं काष्ठादिनिर्म्मितम् । कात्यायनः ।
"पूर्व्वपक्षं स्वभावोक्तं प्राड्विवाकोऽथ लेखयेत् ।
पाण्डुलेखेन फलके ततः पत्रेऽभिलेखयेत् ॥
शोधयेत् पूर्व्वपक्षन्तु यावन्नोत्तरदर्शनम् ।
उत्तरेणावरुद्धस्य निवृत्तं शोधनं भवेत् ॥
अन्यद्दत्तं लिखेद्योऽन्यद्दत्तिप्रश्नदिनोऽन्येन ।
चौरवच्छासयेत्तन्तु धार्म्मिकः पृथिवीपतिः ॥"
स्वभावोक्तमशक्तिमम् । एतच्च करविधिवादिना
कुर्य्यात् । ● । अतएव याज्ञवल्क्यः ।
"छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः ।
भूतमप्यनुपन्यस्तं हीयते व्यवहारतः ॥'
भूतं तत्त्वार्थसम्बद्धम् । नारदः ।
"भूतं तत्त्वार्थसंयुक्तं प्रमादाभिहितं छलम् ।
किन्तु राज्ञा विमृषीयं भूतमसम्भिरक्षता ॥
मनुष्यचित्तवैचित्र्यात् परीक्षा साध्वसाधु वा ।
सत्स्वसद्विवादेषु वाक्छलं नावधीर्य्यते ॥
पशुस्त्रीभूम्यृणादाने शास्योऽप्यर्थात् हीयते ॥'
सर्व्वव्यवहारादेषु प्रमादाभिधानेऽपि नावधी
इति व्यासाहरणे पशुस्त्र्यादि । पशुविवाद
पक्षत्वात् मनुष्यविवादेषु प्रमादाभिधाने
प्रकृतार्थादप्यर्थाद्धीयत इति गम्यते । यथाह
मनेन शिरसि पादेन ताडित इत्यभिधाय
किन्तु करेण ताडित इति वदन् न केवलं
दण्ड्यः पराजीयते च । ततश्च न मनुष्य
धारयसि मम कनकमिति पक्षीकृतमाङ्ग
कनकमिति भाषायामीरं एतच्च अङ्कुलमुग्ध
भाषान्तरेण मयावाध वलयं दत्तं वा ।
सर्व्वथापि वादिनिराकृतादपरान्न स्वल्प
द्रव्याप्यभेदेऽपि तथोक्त विष्णुधर्म्मोत्तरे ।
"संस्कृते प्राकृतैर्वाक्यैः शिष्यमनुरूपतः ।
देशभाषाद्युपायैश्च बोधयेत् स गुरुः स्मृतः ॥"● ॥
यथावदर्थम् । तत्र कालमाह कात्यायनः ।
"सद्यः कृतेषु कार्य्येषु सद्य एव विवादयेत् ।
कालातीतेषु वा कालं दद्यात् प्रत्यर्थिने प्रभुः ॥"
वादिनोक्तश्च साध्यस्य प्रतीयमर्थवती इति
प्रत्यर्थी । नारदः ।

'गहनत्वाद्विवादानामसामर्थ्यात् स्मृतेरपि ।
ऋणादिषु हरेत् कालं कामं तत्त्वबुभुत्सया ॥"
बृहस्पतिः ।
"यदा त्वेवंविधः पक्षः कल्पितः पूर्व्ववादिना ।
दद्यात् तत्पक्षसम्बद्धं प्रतिवादी तदोत्तरम् ॥"
सम्बन्धमुपयुक्तम् । अन्यथा अन्यवादित्वेन भङ्ग
प्रसङ्गात् ।
"अन्यवादी क्रियाद्वेषी नोपस्थायी निरुत्तरः ।
आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः ॥
प्रपलायी स्वयंचैव मौनवान् सम्भिन्नेन ।
क्रियाद्वेषी तु मार्गेण साक्षिभिस्तु स्त्रियां
पालात् ॥"
इति नारदोक्तिः ।
क्रिया लेख्यादिका । साक्षिभिः साक्षिभि
पराजितः । धार्मिकस्य साध्यस्य प्रतीप
वदतीति प्रतिज्ञा । उत्तीर्य्यते निस्तीर्य्यते
प्रकृताभियोगोऽनेन इति उत्तरम् । याज्ञ
वल्क्यः ।
"श्रुतार्थस्योत्तरं लेख्यं पूर्व्वावेदकसन्निधौ ।
ततोऽर्थी लेखयेत् सद्यः प्रतिज्ञातार्थसाधनम् ॥"● । उत्तर
स्वरूपं तद्भेदांश्चाह नारदः ।
"पक्षस्य व्यापकं सारमसन्दिग्धमनाकुलम् ।
अव्याख्यागम्यमित्येवमुत्तरं तद्विदो विदुः ॥
मिथ्यासम्प्रतिपत्तिश्च प्रत्यवस्कन्दनं तथा ।
प्राङ्न्यायश्चोत्तराः प्रोक्ताश्चत्वारः शास्त्र
वेदिभिः ।
अभियुक्तोऽभियोगस्य यदि कुर्य्यादपह्नवम् ।
मिथ्या तत्तु विजानीयादुत्तरं व्यवहारतः ॥"
पक्षस्य भाषापदस्य व्यापकं आच्छादकं अभि
योगप्रतिकूलमिति यावत् । अतएव पूर्व्वपक्षार्थ
समर्थ्यं प्रतिपद्य निवृत्तमित्युक्तम् । न च
विप्रतिपत्त्याः न्यायायमाप्तस्य धारयतीत्यभि
युक्तस्य धारयामीति संप्रतिपत्तौ कथमुत्तरत्व
अभियोगप्रतिकूलत्वादिति वाच्यम् । भाषा
वादिनो मत्सेनैवाद्वतया वा कल्पितस्याभि
योगादेवाय दीयते इति भाषाविषयत्वेन
विप्रतिपन्नस्याप्युत्तरवादिनो भाषार्थं सम्यगवगम्य
तन्निषेधार्थं सम्यगुत्तराभिधानात् विवादभावो
न्यायकवचनमध्यनाधनकारक परोक्षिपरागत
च दृष्टान्त वादिना न दैरमित्यादि प्रतिबन्ध
प्रश्न संप्रतिपत्तिकरणं अभावश्चैव । एवं प्रतिभा
एवाभिधारात् साध्यमेवानिर्वचनं पक्षस्य
विभ्रमेणोपन्यासेन साध्यविवादस्यात्र सिद्ध
साधनेनापि वादिनः प्रकृतनाशाद्योत्तरत्व
सम्प्रतिपत्तौ सिद्धमिति । सार प्रकृतोपयोगि ।
अनाकुलं पूर्व्वापरविरोधशून्यम् । अव्याख्या
गम्यमध्याहारादिकं विनैव प्रतीतं अभियोगस्य
अभियुज्यते इत्यभियोगः सर्व्वस्व माया तथा
प्रत्युत्तरं ॥ १० ॥ उत्तराभासमाह कात्यायनः ।
"प्रकृतेन तदर्थम्च अव्यक्तमतिभूरि च ।
पक्षैकदेशव्याप्यैव तथा नैवोत्तरं भवेत् ॥
अव्याप्तपदवाद निगूढार्थं तथाकुलम् ।

याथागम्यमसारश्च गोत्तर प्रस्यते बुधे ।'
असद्यद्यपदद्यापि प्रत्यक्षिनापपद्याप्रमिति व्यवहारतिलके भवदेवभट्टः ।●। मिथ्योत्तर भेदमाह तु पुनर्यासकारः।
"मिथ्यैतन्नाभिजानामि मम तत्र न सन्निधि ।
अजातश्चास्मि तत्काले इति मिथ्या चतुर्विधम् ॥"
मिथ्यैतदिति प्रत्यन्तो नाभिजानामीत्यादिकमाथ तोऽभद्रव । तथा च कात्यायन ।
"श्रुत्वा भाषार्थमन्यस्तु यदि तं प्रतिषेधति ।
अर्थत प्रत्यन्तो वापि मिथ्या तज्ज्ञेयमुत्तरम् ॥"
स मह्यं धारयतीति प्रतिज्ञायां न गृहीतमिति प्रत्यत । कालविशेषगर्भायां तस्यां मत्तो तन्नाह यात इति अयत । देशकालविशेष गर्भायां तत्र तत्र नाहमासं इत्यध्यत । देशान्तरे तत्कृत्यायां वा न जानामीत्युच्यते एव योत्याज्ञरथैनार्थसत्यह्व प्रतिपादनात् अत्र चरमत्रय प्रत्यवस्कन्दनमुखेन यद्वा भावप्रतिपाद्य व्यपदेशमिथ्योत्तरमात्र चाद्य मिथ्योत्तरमात्रम् ।●। इत्यतन्ति ।
"श्रुत्वाभियोग प्रत्यर्थी यदि तत् प्रतिपद्यते ।
स तु संप्रतिपत्ति स्याच्छास्त्रविद्भिरुदाहृता ॥
अर्थिनाभिहितो योऽर्थ प्रत्यर्थी यदि तं तथा ।
प्रपद्य कारण ब्रूयात् प्रत्यवस्कन्दन हि तत् ॥
आचारेणावसन्नोऽपि पुनर्लेखयते यदि ।
सोऽभिधेयो जित पूर्व प्राङ्न्यायस्तु स उच्यते ॥
अभियुक्तेन इत्यभियोग । प्रतिपद्यतेऽङ्गी करोति । स भाषार्थम् । तथा प्रपद्य सत्यत्वे नाङ्गीकृत्य । कारण तत्प्रतिकूलस्य कारण ब्रूयात् तदा तदुत्तर प्रत्यवस्कन्दनम् । वाद्युक्तस्य प्रतिकूलत्वेन प्रत्यवस्कन्दनमित्यर्थ । प्रतिपत्त्या वस्कन्दनात् प्रत्यवस्कन्दनमिति कौमुदवाचस्पति । तच्च कारणोत्तर त्रिविधम् । बलवत् तुल्यबल दुर्बलश्च । तत्र बलवदुत्तर यथा । त्वत्त प्राप्त गृहीतमिति सत्य किन्तु परिशोधितमिति । अत्र उत्तरवादिन एव क्रियानिर्देश । तथा च नारद ।
"साधयेत् पूर्वपक्षस्य यस्मिन्नुपपत्तावेत् ।
विवाद साक्षिवत्तत्र पश्चात् प्रतिपादिन ॥"
साधय इत्यनन्त पूर्वपक्षस्य । ततश्च व्यापक साधनस्य धारमाणत्वस्य प्रतिकारण निपात वादिन मदुत्तर कारणोत्तरम् । अतएव मिथ्यात्तरस्य भ । तद्धि धाव्यभावत्वस्य व्यापकधर्मस्य धर्मस्वरूप न तु भाव रूपम् ।●। तुल्यबलकारणोत्तर यथा । मदीयम् भू म क्रमागतत्वादिति वाद्युक्ते मदी येयं भूमि क्रमागतत्वादिति प्रतिवादिना तदोत्तरमिति तत्र पूर्ववादिन साध्यप्रथाय । तस्यासमर्थे प्रतिवादिन । तथा च याज्ञवल्क्य ।
"साक्षिषूभयत सत्सु साक्षिण पूर्ववादिन ।
पूर्वपक्षेऽधरीभूते भवन्त्युत्तरवादिन ॥"
दुर्बलकारणोत्तरं यथा । ममेयं भू क्रमागत

त्वादिति वाद्युक्ते ममेय भूर्द्वित्रवर्षभुज्यमानत्वादिति प्रत्युत्तर तत्तु बलमात्रप्रयुक्तम् ।
"पश्यतोऽब्रुवतो हानिरधनस्य दशवार्षिकी ।"
इति याज्ञवल्क्यीय बोधम् ।
किन्तु नैतद्युक्तम् ।
'परेण भुज्यमानाया भूमेर्विंशतिवार्षिकी ।"
इति भूमिमात्रविषयक सापराद्धेनापोदित त्वान्निति भवन्देवभट्ट ।
"पश्यतोऽब्रुवतो हानिर्भूमेर्विंशतिवार्षिकी ।
परेण भुज्यमानाया धनस्य दशवार्षिकी ।"
इति शूलपाणिधृतपाठोऽपि तत्रार्थे प्रमाणम् ।
तत्रश्च क्रमागतत्वं पूर्ववादिन प्रमाणोप न्यास । तथा चोक्तम् ।
"गुरावभिहिते दैवी प्रतिवादिक्रिया भवेत ।
दुर्बले वादिन प्रोक्ता क्रिया तुल्येऽपि वादिन ॥"
स्मृत्यान्तरव्यवहारेण । अयमत्रो भङ्गी । येन यत्ने भाषामिति प्रोक्त स वादी च समर्थं मया पूर्व पराजित वाच्य प्राङ्न्यायो हि याम्य सामान्यमात्राभावरूपक ।●। एतेषां सङ्करे विशेषमाह तु चर्यासहारीतौ ।
"मिथ्योत्तर कारणञ्च स्यातामेकत्र चेद्गुमे ।
सत्यञ्चापि सहानेन तत्र ग्राह्य किमुत्तरम् ।
मिथ्याकारणयोर्वापि ग्राह्य कारणमुत्तरम् ।
यत्प्रभूतार्थविषय यत्र वा स्यात् क्रियाफलम् ।
उत्तर तत्तु विज्ञेयमसङ्कीर्णमतोऽन्यथा ॥
शताभियोगे प्रत्यर्थ मिथ्या पञ्चाशदेव गृहीतानाञ्च परिशुद्धा इति मिथ्याकारणे प्रयोगस्तु तत्पूर्व कारणोत्तर ग्राह्य वादी विचारणीय परिशोधनस्यार्थस्याप्रत्येन साध्यमाहत्वात् पञ्चाशन्मिथ्योत्तर तत्र कथन स्थिरतीतत्व कदर्थप्रतिपादनात् । एवञ्च तत्र अभियोगे मिथ्यैतत् प्रतिदुराग्रहा एव मया गृहीतानन्तराणि विंशत् परिशुद्धा प्रतिग्रहार थापि इति मिथ्याकारणयोर्वा सङ्कीर्णतरोऽपि पूर्ववत् कारणोत्तरमेव ग्राह्य मिथ्याकारणयो र्माथोदि कारणमुत्तर तथा इति मत्तापरस्य स्वयमीतत्त्वेन ... न्नि भाव । प्राङ्न्यायेन सह मम देव सङ्करानुपपत्तिरिति नवोक्त यदि शत मिथ्यापश्च विंशतिपुरायां गृहीतानां च परिशुद्धानां मिथ्यात्वस्य प्रथुरावदितत्वात् विचार उपक्रम ... । भूयोऽभ्युदयस्त्वादित्यन्यत्र पश्चात् साध्यस्य विचार इति । तुल्यार्थत्वेऽपि तु यत्र क्रियाया ... भवति तदाश्रयेत प्राङ्मु ... तथा यदि ... प्रत्यपस्थिते पञ्चमसि प्रत्यादत्ते च पञ्चाशत् परिशोधने साक्षिदर्शनात् मिथ्योत्तर ... तत्प्रत्याय ... ग्राह्य ... साक्षिभ्यो बलवत्त्वेन ... प्रत्यक्ष ... ऽपि साक्षि ... । सङ्करे ... स्मृत्यन्तर ... तत्र ... दुर्बलम् । अत्र ... मिथ्योत्तर

सङ्करे सङ्करत्वमेकावच्छेदेन । सङ्करे तु वाच दुर्बलत्वमाह कात्यायन ।
"पक्षैकदेशे यत् सत्यमेकदेशे च कारणम् ।
मिथ्या चैवैकदेशे स्यात् सङ्करात्तदनुत्तरम् ॥"
एकदेश ... सङ्कीर्णैव दर्शि न भिन्नदेशे यथा शत ... परिशोधित न गृहीत वा इति ।
अथ क्रियापाद ।
उत्तराभिधानानन्तर याज्ञवल्क्य ।
"ततोऽर्थी लेखयेत् सद्य प्रतिज्ञातार्थसाधनम् ।"
अर्थी वादी प्रतिवादी च स्वपक्षानुसारात् ।
तयोरधिकारे नियममाह व्यास ।
"प्राङ्न्याये कारणोक्तौ च प्रत्यर्थी साधयेत् क्रियाम् ।
मिथ्योत्तरे पूर्ववादी प्रतिपत्तौ न सा भवेत् ॥'
मिथ्योत्तरे न ग्रहीत ... पूर्ववादी भावावादी ... तद्दर्शितोत्तरवादी तत्र तस्य साधुत्वा क्रियाया ... भत् ... उत्तरवादिन एव नियम ।
"न कश्चिदभियोक्तारं निश्चित विविधीकृतेन ।
अभियुक्ताय दातव्य दिव्य दिव्यविशारदैः ॥"
इति कात्यायनोक्ते ।
अत्र पूर्वोक्ताभियोक्ता ... प्राप्ता ... अभियोक्ता न तिष्ठेत् ... प्रत्यर्थिन ... नियमाय इति ... कारणोत्तरमात्रप्रतिपादनेनादिप्रसिद्धे ... उत्तरे मिथ्योत्तरेऽप्यनुपपन्ने इति तत्रापि अर्थिन एव नियममिति वाच्य ... हि ... । ... तस्य ... पूर्ण ... कात्यायनाद्युक्तविषय ... विवाद ... अर्थिन एव ... अभियोक्तार- ... मिथ्योत्तरे ... वादिन एव ... इति ।●। ... माह याज्ञवल्क्य ।
"प्रमाणं लिखितं भुक्ति साक्षिणश्चेति कीर्तितम् ।
... ।"●।
... अन्यतमापि दिव्यमन्यतमं स्मृतम् ॥
... अभियोक्ता ... दिव्य ... ।
... ।
... ।"
... ।
... ।
...

योक्तुः विरोधिनिश्चोऽसंदेहाभियोग्याद्य न्यायकर्त्तृत्वं प्रमापयेत्। प्रत्यर्थ्यन्यथा वादिनो न्यायमाह बध्येति। इत्यतोऽभियुक्त। एतत्तत्त्वं दिव्यतत्त्वे विवृतम्। प्रतिज्ञातार्थसाधकमिति साधक माह्यमादिकम्। तच्चाह बृहस्पतिः।

"द्विप्रकारा क्रिया प्रोक्ता मानुषी दैविकी तथा।
साक्षिलेख्यानुमानञ्च मानुषी त्रिविधा स्मृता।
घटाद्या धर्म्मजान्ता च दैविकी नवधा स्मृता।"

तत्रानुमानन्तु युक्तयः। *। तत्र साक्ष्यमाह मनुः।

"समक्षदर्शनात् साक्ष्यं श्रवणाच्चैव सिध्यति।"

एतत् प्रमाणमात्रोपलक्षणम्।

"अनुभावी तु यः कश्चित् कुर्य्यात् साक्ष्यं विवादिनाम्।"

इति तद्वचनान्तरात्।

अतएवाहूतमपि साक्षिणमाह मनुः।

"यत्रानिबद्धोऽपीक्षेत शृणुयाद्वापि किञ्चन।
पृष्टस्तत्रापि तद्ब्रूयाद् यथादृष्टं यथाश्रुतम्।"

अनिबद्धः साक्षित्वेनानियुक्तः। परम्परयापि श्रवणमाह विष्णुः।

"उद्दिष्टसाक्षिणि मृते देशान्तरगतेऽपि वा।
तदभिहितश्रोतारः प्रमाणं साक्ष्यकर्म्मणि।"

अश्रोतरश्रवणमाह नारदः।

"साक्षिणामपि यः साक्ष्यमुपर्य्युपरि भाषताम्।
श्रवणाच्छ्रावणाद्वापि स साक्ष्युत्तरसंज्ञकः।"

उपर्य्युपरि साक्ष्यं परिभाषतां साक्षिणां स स्वयं शृणोति अर्थिना श्रावितो वा स श्रवणात् श्रावणाद्वोत्तरसाक्षीत्यर्थः। एवं योऽर्थिना सह तथा प्रत्यर्थिवचनं श्रावितः स गूढसाक्षीत्याह स एव।

"अर्थिना स्थापितो ह्यर्थे प्रत्यर्थिवचनं स्फुटम्।
यः श्रावितः स्थितो गूढो गूढसाक्षी स उच्यते।"

तेषामुत्तरसाक्ष्यभिहितापादकस्य कार्य्यस्य विज्ञापकं साक्ष्यमिति स्थितम्। तत्र नारदः।

"द्विषामपि न बालः स्यान्नैको न स्त्री न दुष्कृत्।
न बान्धवा न चारातिर्ब्रुवते साक्ष्यमन्यथा।"

कार्य्ये अन्यथा तद्विरुद्धमेव। एवञ्च यदि परमधार्म्मिकत्वेन बान्धवादीनामपि बाधाबाधित्व निर्द्धार्यते तदा तेऽपि साक्षिणो भवितुमर्हन्तीति। तेषां साक्ष्यविधायकवचनमपि एतादृशविषयम्। याज्ञवल्क्यः।

"त्र्यवराः साक्षिणो ज्ञेयाः श्रौतस्मार्त्तक्रियापराः।
यथाजाति यथावर्णं सर्व्वे सर्व्वेषु वा स्मृताः।"

त्रयोऽवरा निकृष्टा येषां ते त्र्यवराः त्रिभ्यो न्यूना भवन्तीत्यर्थः। अर्थित्वे यो मध्यतोपसन्न तस्मात्तेन साक्षी। श्रौतं क्रियाधानाध्ययनादि स्मार्त्तं। यथावर्णं ब्राह्मणानां ब्राह्मणाः क्षत्रियाणां क्षत्रियादय। अभावे तु तत्र द्वैविध्यं सर्व्वे एव। त्र्यवराः इत्यत्रापवादान् स एव।

"उभयानुमतः साक्षी भवत्येकोऽपि धर्म्मवित्।"

उभयानुमतश्च धर्म्मवित्त्व नियत तत्त्वम्। तच्चाह विष्णुः। अभिमतगुणसम्पन्नत्वभयानुमतश्चैकोऽपि इति। अतएव श्रोत्रियमप्येकं निषेधयति बृहस्पतिः।

"नव सप्त पञ्च वा स्युश्चत्वारस्त्रय एव वा।
उभौ तु श्रोत्रियौ साक्ष्यौ नैकं पृच्छेत् कदाचन।"

एको निर्दिष्टगुणसम्पन्न उभयानुमत तदभाव उभयानुमतभावेऽपि साक्ष्यत्वमाह नारदः।

"उभयानुमतो यः स्याद् द्वयोर्विवदमानयोः।
भवत्येकोऽपि साक्षित्वे प्रष्टव्यः स्यात् स संसदि।"

उभयानुमत एकोऽलुब्धत्वादिना सर्व्वजनप्रसिद्धश्रेष्ठता साक्षित्वे यदि बहुजनप्रसिद्धो प्रथम तथापि सद्वैराग्यादिमत्त्वेनोभयकीर्त्तिभयात तथाभिधानसम्भवान्निश्चयम्। विचारस्य तत्त्वनिश्चयापत्त्यात्तदाह मनुः।

"एकोऽप्यलुब्धः साक्षी स्याद् बह्व्यः शुच्योऽपि न स्त्रियः।
स्त्रीबुद्धेरस्थिरत्वात्तु दोषैश्चान्येऽपि ये वृताः।"

एकोऽलुब्धस्तु साक्षी स्यादिति कुल्लूकभट्टधृत पाठः। एको लुब्धस्त्वसाक्षी स्यादिति मेधातिथि पाठस्तु न युक्तः। लुब्धश्चेदेकोऽप्यसाक्षिको भवितुमर्हतीति एकपदव्यवधा यते। अस्तु वा तत्पाठ तथापि इच्छुरोधात् तन्निषेधस्तेनालुब्धस्यैकस्याप्यनिषेधे सर्व्वविषयमन्तरेण साक्षित्वं साध्य इत्यतो न विरोधः। अतएव विश्वरूपप्रभृतीनां उभयानुमत एक एव साक्षीति व्याख्याने समस्तनिति योजनम्। शौचैस्त्रियादिभि। तथा च नारदः।

"स्त्रीणां साक्षिणिका स्त्रियः कितवा बोधकाश्च ये।
असाक्षिणस्तु ते ज्ञेया यत्र न विद्यते।"

कितवा द्यूतकराः। *। असाक्षिकमाह उशनाः।

"दासोऽन्धो बधिरः कुष्ठी स्त्रीबालस्थविरादयः।
एतेऽप्यनभिसम्बद्धाः साहसे साक्षिणो मताः।"

स्थविरो ज्ञानविदयामः। आभिर्म्मन्दात् कितवादय। उभयानुमताभावे शुचिक्रियत्वादि गुणचेतो साक्ष्य। तथा च कात्यः।

"शुचिक्रियश्च धर्म्मज्ञो योऽन्यथाप्यनुभूतवाक्।
प्रमाणमेकोऽपि भवेत् साहसेषु विशेषतः।"

अनुभूतवाक् साक्षात्कारं लक्षयति। भवेदेव अङ्गोऽपीत्यम्। साहसमाह नारदः।

"मनुष्यमारणं स्तेयं परदाराभिमर्शनम्।
पारुष्यमनृतञ्चैव साहसं पञ्चधा स्मृतम्।"

कात्यायनः।

"अभक्तरस्तु निःशेषे साक्ष्येकोऽपि दापयेत्।
अर्थिना प्रहितः साक्षी भवत्येकोऽपि याचिते।
संस्पृष्टं येन यत् सर्व्वं तत्तदेव विभावयेत्।
एक एव प्रमाणं स विवादे परिकीर्त्तितः।"

संस्पृष्ट सहित सर्व्वं कृत्स्नादि। विष्णुः। सम्मतावपवादाद्युक्तपादस्मर्त्तव्यवसिद्ध साक्षिको न परीक्षा इति। सत्यपरम्परागमादिज्ञाता नियुक्तैरेव क्रियमाणत्वात् निर्वाहेण परं साक्षिणो भवन्तीति न परीक्षा इत्युक्तम्। तेषां साक्ष्यन्तु मिथ्याभिभाषणनिर्णयार्थैर्दोषप्रापणस्याभिधानायोग्यम्। न तु साक्ष्यमात्राणि व्यवहारमात्रका। अतएव कात्यायनः।

"स्वयान्तु परीक्षेत साक्षिणं स्थिरकर्म्मसु।
साहसादिकवैव परीक्षा कुत्रचित् स्मृता।"

इति। *। श्रोत्रियादीनामसाक्ष्यमाह नारदः।

"श्रोत्रियास्तापसा वृद्धा ये च प्रव्रजिता नराः।
असाक्षिणस्ते वचनात् नात्र हेतुरुदाहृतः।"

स्मृतिसारे श्रोत्रियमाह देवलः।

"एकां शाखां सकल्पां वा षड्भिरङ्गैरधीत्य वा।
षट्कर्म्मनिरतो विप्रः श्रोत्रियो नाम धर्म्मवित्।"

सकल्पां कल्पशास्त्रसहिताम्। षड्भिरिति सहार्थे तृतीया। वचनादिति श्रोत्रियमादिरूपाभिधानात् न च तत्राप्यो हेतुरिष्य। तथा च श्रौतवैदिककर्म्माकरणापत्तया परकीयकार्य्ये विचारश्रवणात् साक्षित्वस्वधर्म्मकार्य्यविरोधी तत्रापि व्यवहारदर्शनोऽपि तान् न पृच्छतीति तत्राप्यकरणापत्ताच्च न ते साक्षिणः सर्व्वथा निषिद्धता सर्व्व साक्षिणो भवन्त्येव। उभौ तु श्रोत्रियौ स्यातामिति स्मृतेः। बहुस्याप्यभिन्न बहुत्वादेव स्यात्त्रैविद्यमित्यय। मनुः।

"स्त्रीणां साक्ष्यं स्त्रियः कुर्य्युर्द्विजानां सदृशा द्विजाः।
शूद्राश्च सन्तः शूद्राणामन्त्यानामन्त्ययोनयः।
अन्तर्वेश्मन्यरण्ये वा शरीरस्यापि चात्यये।
स्त्रियाप्यसम्भवे कार्य्यं बालेन स्थविरेण वा।
शिष्येण बन्धुना वापि दासेन भृतकेन वा।
दैवब्राह्मणसान्निध्ये साक्ष्यं पृच्छेदृतं द्विजान्।
उदङ्मुखान् प्राङ्मुखान् वा पूर्व्वाह्णे वै शुचिः शुचीन्।
ब्रूहीति ब्राह्मणं पृच्छेत् सत्यं ब्रूहीति पार्थिवम्।
गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्व्वैस्तु पातकैः।"

गोबीजकाञ्चनापहारे यत् पापं तत्तवानृताभिधाने स्यादिति वैश्यम्। एतत्पापात्मताभिधाने भवान् सर्व्वे पातके संयुक्त इत्युक्त्वा शूद्रं पृच्छेत्।

"ब्रह्मघ्नो ये स्मृता लोका ये च स्त्रीबालघातिनः।
मित्रद्रुहः कृतघ्नस्य ते ते स्युर्ब्रुवतो मृषा।"

इति मनूक्तं दूषणम्। मनुनारदौ।

"अश्वमेधसहस्रञ्च सत्यञ्च तुलया धृतम्।
अश्वमेधसहस्राद्धि सत्यमेवातिरिच्यते।"

इति मनुनारदोक्तं वाक्यमेतत्।

याज्ञवल्क्यः।

"न ददाति हि यः साक्ष्यं जानन्नपि नराधमः।
स कूटसाक्षिणां पापैस्तुल्यो दण्डेन चैव हि।"

कात्यायन ।
"अतोऽन्यतरके यत्र साक्ष्येषु कूटसाक्षिण ।"* ।
याज्ञवल्क्य ।
"यत्र प्रतिज्ञा पक्षोक्ता साक्षिणस्तु वदन्ति भवेत् ।
अन्यथावादिनो यस्य ध्रुवस्तस्य पराजय ।
पक्षान्तं हि यतो पक्ष तत्र साक्ष्यनृतं वदेत् ।
तत्पक्षस्य विनिर्णयश्च दारयतो द्विजे ।"
गौतम । अनृतवचने दोषो जीवनञ्चेत्तत्प्रवीन न तु पापीयसो जीवनमिति ।
"द्वैधे बहूनां वचनं समेषु गुणिनां तथा ।
गुणिद्वैधे तु वचनं ग्राह्यं ये गुणवत्तराः ।"
तेषामिति शेष । यत्तु ।
"साक्षिणां लिखितानाञ्च निर्दिष्टानाञ्च वादिनाम् ।
तेषामेकोऽन्यथावादी भेदात् सर्वेऽप्यसाक्षिणः ।'
इति कात्यायनवचनम् ।
तत्पर्यालोचनया मध्ये एकस्याप्यन्यथावादे अपरस्य तत्तुल्यस्य तत्प्रतिपक्षतया द्वयोः पक्षे किञ्चिद्वाक्ये तत्र भेदात् परस्पर विरुद्धार्थाभिधाने भेदात् साक्षिभ्यो न निर्णय इति परम् । इदमपि तु साक्षिद्वैधे कर्म विवादो पक्षमात्र गुणिद्वैधे क्रियान्तरा निर्णयेन । तथा ।
"साक्षिणोऽपि असद्विदान् सतश्च दोषेषु दोषयेत् ।
यद्वद दूषयन् वादी तत्तस्य दृश्यमुच्यते ।'
इति ।
तत्रापि विवादस्थानम् । सभाषणादिविभिन्नसाक्षि दूषणमेव ग्राह्यं न तु व्यवहाराभिलाषिभिः प्रतिपाद्यम् ।* । अनवस्थापातादित्याह नारद ।
"सभासन्नं प्रविष्टं यत्नोक्तमिदमथापि वा ।
साक्षिणां दूषणं ग्राह्यमसाध्यं दोषवत्ततात् ।
अन्येन साक्षिभिः साध्ये दूषणे पूर्वसाक्षिणाम् ।
अनवस्था भवेद्दोषस्तेषामप्यन्यसम्भवात् ।"
सभाध्यं साधनाकर्षं विशुद्धादोषवत्ततात् । अन साक्षिविवादकरान् प्रविष्टदूषणमेव ग्राह्यम् ।* दूषणमाह कात्यायन ।
"वादोऽभावादसत्यात् स्यो पापात्त्यासाच्च कूटकृत् ।
विद्यात साक्षी दोषान् वैरमित्रादिकान्वितः ।
न साक्षी नैव निर्दिष्टो नाभूतो नैव भाषितः ।
ब्रूयान्मिथ्येति तथ्यं वा दण्ड्यः सोऽपि नराधमः ।"
पदुत्तरे दोष क्रिया प्रकाशे तथाह ।
"मिथ्याक्रिया पूर्ववादे कारणे प्रतिवादिनः ।
प्राङ्न्याये विधिसिद्धौ तु जयपत्रं विनिर्दिशेत् ।"
मिथ्योत्तरे सति पूर्ववादे पूर्ववादिनः क्रिया प्रत्यवस्कन्दे प्रतिवादिनः ।* । तत्रापि वशिष्ठमाह हारीत ।
"पूर्वोत्तरेऽभिलिखिते प्राक्पश्चाद्वादिनो भवेत् ।
क्रियोदतयोर्वादिनि प्रागुक्त निश्चयोऽपि च ।"
अन्यापकारकमाह स एव ।

"साक्षिसभ्यधिकस्तस्तु भवेदुभयोरपि ।
दोषायमानौ यौ साक्षिकुर्यातां तौ विच क्षणौ ।"
कात्यायन ।
"क्रिया न दैविकी प्रोक्ता विद्यमानेषु साक्षिषु ।
लेख्ये च सति वादेषु न दिव्यं न च साक्षिणः ।
समस्तं साक्षिणां यत्र न्यैवेत्तत्र तपोधयेत् ।"
एतत् सम्प्रयागच्छेदे योग्यम् । याज्ञवल्क्य ।
"निह्नुते लिखितानेकमेकदेशे विभावित ।
दाप्य सर्वान् नृपेणार्थान् ग्राह्यस्त्वनिवेदित ।"
यो लिखितानेक सुवर्णादिकमपलपति स एकदेशे साक्ष्याभिर्विभावित सन् सर्वान् दद्यात् । यदेकदेशविभावनेन वादिनोऽवशिष्टमप्राप्य दण्डपर मता लेख्येऽपि विवादमिति भूते स तस्मै भाषाकाले अनुपन्यस्तं न दद्यादेव न केवलं वाचनिकं किन्त्वेकदेशविभावना दिवान्तन प्रमाणं तदपलापे दुष्टोनत्वावधारणात् परार्थेऽपि तथात्वमेव सम्भाव्यते अविभावकस्यापि प्रकान्तविषये यथा वस्तुवादावधारणात् विभावितार्थेऽपि सम्पादित्वसम्भावनेति स्वपक्षपरम्परा सम्भावना प्रमाणानुसारी तास्मादेव योगीश्वरवचनात् सर्वं दापनीयमिति निर्णय । एवञ्च तत्कथनानुसारेण निर्णयं क्रियमाणे वस्तुनोऽन्यथात्वेऽपि व्यवहारान्तरं न भवेत् । तथा च गौतमेनापि न्यायाधिगमे तर्कोऽभ्युपाय इत्यपि यद्यपि यथास्थानं गमये दिक्षा तस्मादाचाराचार्यनिर्णयादि सूपपन्न तम् । एवञ्चाद्य न्यायस्य साक्षिद्वयसाधारणत्वा दुभयविषयत्व वचनानाम् । अतएव कात्यायन ।
"यद्येकदेशप्राप्तापि क्रिया विद्येत मानुषी ।
सा ग्राह्या न तु पूर्णापि दैविकी वदतां नृणाम् ।"
अन्तो विवन्ताभिमविशेषेण न्यायति । पूर्णापि दैविकी समयविषयिकापि न ग्राह्या दैवेन एकप्रतिपादकतया मानुष्या क्रियया समस्त साध्यसिद्धिरिति । न च यदेशो मध्ये एकमपि भवा यदि तु विभावयति तदा समस्तमेव दातव्य मिति । प्रतिज्ञाविषयकस्यैकदेशविभावितस्य वचनस्येति योग्योपमतानुसारिभिर्विवमत मुक्तमिति वाच। प्रतिज्ञाविषयेऽपि ।
"अनेकार्थाभियुक्तेन सर्वापह्नववादिना ।
विभावितैकदेशेन देयं यदभियुज्यते ।"
इत्यनेन प्रौढ़िवादेनाभियुक्त मानादधिक स्यापि प्रतिज्ञातस्य दापकत्व कथमपि न प्राप्तव्यविवक्षिन इत्यपि कर्तुं अतिवैदिकस्यापि प्रामाण्यानैकान्तिकत्वात् सर्वदेव देयत्वात् । न च विभावितैकदेशवचनं साक्ष्यभूतैकदेश विषय तद्विषयं प्रतिपादित साक्षिकैकदेशपनीति इत्याभावात् सम्भवतीति वाच्यं विभावितैक देशादुभिमतावयवस्यापि न्यायतोऽप्राप्ततया सिद्धे न प्राप्यत्वाविशेषेण एतदभिप्रायानुसरणे । इत्थं ।

"साध्यार्थांशे निगदिते साक्षिभिः सकलं भवेत् ।
स्त्रीसङ्ग्रहे साहसे चौर्ये यत्साध्यं परिकल्पितम् ।"
इति कात्यायनवचनम् ।
तद्विषयपदार्थैक्ये सत्यविशेषाद्यद्यप्यपि प्रापणमिति । यत्तु ।
"अनेकार्थाभियोगे तु यावत् संसाधयेद्धनी ।
साक्षिभिस्तावदेवासौ लभते साधितं धनम् ।'
तद्व्यतिरिक्ताभियुक्तादिविषयकम् । तथा हि नानाविधपत्रार्थाभियुक्तैकाभिधानेन नाहं धारयामीति उत्तरवादिना साक्ष्याभिधानेन प्रतिपाद्यते तावदेव पुत्रेण दापनम् अन्यथैव निमन्त्र्यतोऽसत्यवादित्वप्रसङ्गः । कात्यायन ।
"अनुमानाद्वरं साक्षी साक्षिभ्यो लिखितं गुरु ।
अविसंवादि निरूढ़ं भुक्तिलेख्यो गरीयसी ।"
अनुमानं प्रमाणतुल्यत्वं तथाह मनु ।
"बाह्यैर्विभावयेल्लिङ्गैर्भावमन्तर्गतं नृणाम् ।
स्वरवर्णेङ्गिताकारैश्चक्षुषा चेष्टितेन च ।"
स्वरो गद्गदादि वर्णोऽस्वाभाविक । इङ्गितं स्वेदरोमाञ्चादि । आकारो विवर्णता । चक्षुषा कातरत्व । चेष्टितेन ख्यातगत्यादिना । एवमादीन्यथासिद्धिदुर्विज्ञप्त्यादीनि साक्षी वक्तव्यः ।* । तत्स्वरूपं तु याज्ञवल्क्य ।
"देशाद्देशान्तरं याति सृक्कणी परिलेढ़ि च ।
ललाटं स्विद्यते चास्य मुखं वैवर्ण्यमेति च ।
परिशुष्यत्स्खलद्वाक्यो विरुद्धं बहु भाषते ।
वाक् चक्षुः पूजयति नो तथोष्ठौ निभुजत्यपि ।
स्वभावाद्विकृतिं गच्छेन्मनोवाक्कायकर्मभिः ।
अभियोगे च साक्ष्ये च स दुष्टः परिकीर्त्तित ।"
न परोक्षं वाच प्रतिवचनं पूजयति नयति चक्षुश्च परकीयचक्षुषैव विभर्त्ति कुत्सितो करोति यदा मनोवाक्कायकर्मभिः स्वभावात् पूर्वोक्तां यथायोग्यं विकृतिं गच्छेत्तदा स दुष्टः । अतएव वैशम्पायनः ।
"आकारस्वादमात्रोऽपि न दक्षोऽक्षो विदिनम् ।
तस्माद्विज्ञ इव भावमन्तर्गतं नृणाम् ।"
आकारो देहधर्मः स्वभावोऽपरस्पदृष्ट । नारद ।
"सुनीचैरपि चाह्वेव विभाव विद्यमान्तरात् ।
वाचालवादनो वैभवमात्मनः वैकेत् ।"
परोक्षेणेति वादोऽभिवर्णयतनादान् विवेकाधि वाच्यः दानप्रयोगेन ।* । किञ्चिदं अपवादेन वैमत्यं तदर्दं तद्दर्शनैकार्द्र वाच ।
"वर्णितहो वर्णो न स्यात् वैकेयु वाक्येषु च ।
वादो च वादिनावेव वर्णितादिकृतौ ।"
हस्तकर्ण ।
"हुविन वादिनं यच श्रीमन्वाह चाह्वान ।
अतश्चोऽपि भवेत् वादी यदृच्छया न संशय ।"

व्यक्ता अपि साक्षिणो भवन्तीत्याह तत्रैव कात्यायनः ।
"अथ पुनरनिर्दिष्टाः साक्षिणः समुदाहृताः ।
ग्रामश्च प्राड्विवाकश्च राजा च व्यवहारिणाम् ।
कार्य्येष्वभ्यन्तरो यः स्यादर्थिना प्रहितश्च यः ।
कुल्याः कुलविवादेषु भवेयुस्तेऽपि साक्षिणः ॥"
स्मृतिः ।
"ग्रामादेरीदृशे भूम्यादौ स्वामिनां नियमे सति ।
विक्रयादानसम्बन्धे क्रीत्वा धनमनिश्चिते ॥
तत्र समागताश्चैव विवादे समुपस्थिते ।
साक्षित्वं साधनं प्रोक्तं न दिव्यं न च लेख्यकम् ।
प्रकाशे चाहूते वापि प्रातर्वा [illegible] ।
बलात्कारेषु कार्य्येषु साक्षिणो दिव्यमेव च ॥"
बृहस्पतिः ।
"यस्य वा साक्षिणो यान्ति विवादं यस्य दूषिताः ।
तस्य कार्य्यं न सिद्ध्येत यावत्तन्न विशोधयेत् ॥"
तत्प्रमाणविरूपणम् ॥ ॥ वैरप्रबोधनमाह कात्यायनः ।
"स्वहस्तेनावधार्य्यैव कौशलं वा मतस्य च ।
तत्प्रवृत्तकरैर्यद्वै धर्मेऽत्र लेख्यनिश्चयः ॥"
तथा ।
"समवेतैश्च यद्दृष्टं वक्तव्यं तत्तथैव च ।
विभिन्नैरेव कार्य्ये तु वक्तव्यं पृथक् पृथक् ॥
नाद्यैर्वनियुक्तैस्ता सह सत्यं प्रयत्नतः ।
पृथक् साक्षिभिः प्राप्य विवादस्थानमागतैः ।
अनुक्रमेण निर्णीतं दृष्ट्वा यस्मिन्नियतं तु यत् ।
प्रश्नस्य तत् स्मृतं कार्य्यं साक्ष्यं साक्षी तु तद्वदेत् ॥"
नारदः ।
"यः परार्थेऽपहरति स्वां वाचं पुरुषाधमः ।
आत्मार्थे किं न कुर्य्यात् स पापो नरकनिर्भयः ।
यथा वै वाचि नियता वाङ्मूलाः सर्वे विनि-
सृताः ।
तां तु यः स्तेनयेद्वाचं स सर्वस्तेयकृन्नरः ॥"
बौधायनः ।
"पञ्च पश्वनृते हन्ति दश हन्ति गवानृते ।
शतमश्वानृते हन्ति सहस्रं पुरुषानृते ॥
हन्ति जातानजातांश्च हिरण्यार्थेऽनृतं वदन् ।
सर्वं भूम्यनृते हन्ति मा स्म भूम्यनृतं वदः ॥"
बृहस्पतिः ।
"यस्य दिव्यप्रतिज्ञातं साक्षिभिः प्रतिपादितम् ।
न जयो न पराजयस्तु साक्ष्यार्थे न समाप्नुयात् ॥"
याज्ञवल्क्यः ।
"उक्तेऽपि साक्षिभिः साक्ष्ये यद्यन्ये गुणवत्तराः ।
द्विगुणा वान्यथा ब्रूयुः कूटाः स्युः पूर्वसाक्षिणः ॥"
अन्यथा पूर्वविपरीतार्थप्रकाशकम् । कूटा अयथा-
र्थवक्तारः । तथा ।
"यः साक्ष्यं श्रावितोऽन्येभ्यो निह्नुते तत्तमोवृतः ।
स दाप्योऽष्टगुणं दण्डं ब्राह्मणस्य विवासयेत् ॥"
अयमर्थः साक्ष्यं श्रावयेदित्यादिना प्रयुक्तो य
साक्षिणां कालिकयात् [illegible] यद्यसमर्थोऽपि
सभायां निराकरोति साक्ष्यं निहुत्य अष्टगुणं
दण्ड्यो दण्डः ॥ ॥

अथ लिखितम् ।
तत्र बृहस्पतिः ।
"षाण्मासिकेऽपि समये भ्रान्तिः सञ्जायते यतः ।
धात्राक्षराणि सृष्टानि पत्रारूढान्यतः पुरा ॥"
नारदः ।
"लेख्यं तु द्विविधं प्रोक्तं स्वहस्तान्यकृतं तथा ।
असाक्षिकं साक्षिकञ्च सिद्धिर्देशस्थितेस्तयोः ॥
स्वहस्ते साक्षिणो यत्र भक्तिकालेषु लेखकाः ।
तदन्यथा यदनृतं साधि स्थिरायमान ॥
दृष्टिर्न प्रतिकाशश्च माति स्वाकृतश्च यत् ।
नैव सिद्ध्यति सर्वत्र मतमपि च साक्षिषु ॥
सर्वं देशान्तरस्थे च दग्धे दुर्लिखिते हृते ।
सतस्तत्कालकरणमसतो द्रष्टृदर्शनम् ॥
छिन्नभिन्नहृतोन्मृष्टनष्टदुर्लिखितेषु च ।
कर्त्तव्यमन्यल्लिखितं स्वैव लेख्यविधिः स्मृतः ॥
तस्य यथाक्रमतामाह संस्कृतसम्भावेन ।
विप्रतिपत्तौ परीक्ष्य लतप्रत्यागमनेऽपि ।
स्वहस्तमसाक्षिकमपि प्रमाणं अन्यद्वारा अन्य
साक्षिमदिति यथाक्रमेणान्वय । देशस्थित
यैर्भाव्यं यत्र वाङ्मात्रेणाभिहितं प्रकृत तत्र
तादृशाः । तयोः स्वहस्तान्यहस्तलिखितयोः ।
स्ता इति सालङ्कौ स्वत पुत्रान्तिकस्थ लेख्य
पत्र न सिध्यति । यद्यभियोगोऽस्ति तन्न तदपि
प्रमाणमित्यर्थः ॥ ॥ तस्मादाह कात्यायनः ।
"यत्र पत्रसमापन्नो लेख्यं यत्र साक्षिभिः ।
साक्षिको धनिकश्चैव नैव यत्र प्रमापयेत् ॥"
दृष्टिरपिति तथाविधमपि पूर्वलिखितानि
साक्षिणो स्वयमर्थेन वा दर्शितं मार्गेण वा
तदपि सिध्यतीत्यर्थः । असौ दृष्टान्तरव्यवहारस्य
तत्कालादर्शं प्रत्यर्पणकालप्रतीपत्तम् । अथवा
दृष्टादेः तन्नलोकोपमाश । शेषाणि यत्र
यत्र केनापि हेतुना अन्यनामभिलिखितं तत्र
विप्रतिपत्तौ यथाक्रमं तेन सहास्य विश्वास
हेतुभूतसमय्याद्यसाधारणप्रकारैर्निश्चयमिति ।
बृहस्पतिः ।
मुमूर्षुशिशुभीतार्त्तस्त्रीमत्तव्यसनातुरैः ।
विधापितस्तु बलात्कारैः कृतं तच्च न सिध्यति ।
व्यासः ।
"दत्त्वा लेख्यं नाशयेच्च कौशलं चैव पत्त्रकम् ।
प्रमाणं नैव तत्कार्यमिति शास्त्रविदो विदुः ॥"
मिताक्षरायां स्मृतिः ।
"पूर्वोक्तैस्तल्लेख्यं वा लिखितं परकीर्त्तिता ।
तत्प्रयुक्तं साधनं तत्र न दिव्यं न च साक्षिणः ॥"
पुलस्त्यः ।
"सम्भूते स्त्रिदिव्यादीनां पूर्वं स संकीर्त्तितम् ॥"
इति कात्यायनवचनोक्तः ।
आन्वीक्षिक्यात् विवादनैपुण्याभावः । तेन व्यासपाद
दर्शनः । भेदो तु भ्रान्तिपदस्य साम्मुखिक
सर्वसम्बन्धकारणमिति । तत्र बलात्कारात्
कृत । बलस्य प्रधानतया साधनं हिंस्र
साक्षिणां प्राधान्यादेव प्रदर्शनेन सप्तितत्त्व
तद्युक्तिस्तु कैश्चिन्मतो भोग एव उत्तमाख्यो

न तु अव्यवहारयोग्यम् । तथाह कात्यायनः ।
"आगमस्तु कृतो येन सोऽभियुक्तस्तमुद्धरेत् ।
न तत्सुतस्तत्सुतो वा भुक्तिस्तत्र गरीयसी ॥"
नारदः ।
"अदृष्टे मुक्तिमार्गेऽपि पञ्चदोषात् विशो-
धयेत् ।
तत्सुतो भुक्तिदोषांस्तु लेख्यदोषांस्तु तत्सुतः ॥"
इत्यादि ।
उद्धरेच्चागमं तस्य तत्सुतो भुक्तिमेव हि ।
अभियुक्तः प्रमीतश्चेत् तत्सुतोऽपि तमुद्धरेत् ॥"
अभियुक्त इति वचनम् आगमप्रापणार्थं भूमि
भुक्ति सम्बन्धदोषार्थं तदन्यत्रापि तत्सुतस्य
आगमस्य साधनत्वं तत्साधनञ्च लेख्यादि
तादृशमिति तात्पर्यम् ॥ ॥

अथ भुक्तिः ।
तत्र याज्ञवल्क्यः ।
"पश्यतोऽब्रुवतो हानिर्भूमेर्विंशतिवार्षिकी ।
परेण भुज्यमानाया धनस्य दशवार्षिकी ॥"
विवादमकृत्वा स्वाम्यं भूम्यादिर्यत्परेणाधि
क्रान्ता भुज्यमानाया भूमेर्विंशतिवर्षेण हानि
र्भवति । अत्र लोकव्यवहारतो यथा
तथा व्याख्येयम् । तथा च विष्णुधर्मोत्तरम् ।
"सभार्थ्यपास्थाय भावेन
भीतश्च यत् स्यात् व्यवहारकर्म ॥"
तत्रैव ।
"स्थावरे च तथा भाति त्रिषु वर्षेषु दीयता
स्मृता ॥"
विशेषयति व्यासः ।
"स्वानि त्रिपुरुषस्य भूमिर्न तु परेण ।
यदि स्वामी धनस्य तत्र मौनं न विद्यते ॥"
समर्थोऽस्य स्वाम्यान्नियोजयतिरस्य । धनस्य दश
वर्षाणि वा भवति । तथा च मनुनारदौ ।
"यत्किञ्चिद्दशवर्षाणि सन्निधौ प्रेक्षते धनी ।
भुज्यमानं परैस्तूष्णीं न स तल्लब्धुमर्हति ॥"
यत्किञ्चिद् धनजातं समक्षमेव प्रेक्षापूर्वकं
दशवर्षाणि परैर्भुज्यमानं स्वामी तूष्णीं
प्रेक्षते मा भुज्यतामिति न प्रतिषेधति तस्मिन्
तत्स्वं योग्यो भवति तत्र तस्य साक्ष्यं नास्ति
तथा । शास्त्रम् । अनन्यभोगसाधनं दशवर्ष
भुक्तं परैः सन्निधौ भोक्तुः इति । अतो विकल्प
निषेधे भोगस्य पूर्णोऽन्यतरान्यतरस्य स्वीयो
यस्य च । तथाह नारदः ।
"नाम्ना आचाराद्दर्शनात् भोगसाक्षादपि
प्रमाणी ॥"
अनागमस्तु यो भुङ्क्ते प्रकीर्त्तित इति कुलधर्मेण
लिखितम् । तस्मादेतदपि अनागमस्तु भोगस्य
इति हिंसकोपादानेन । सतामूर्ध्वम-
र्वाक्तान्निवन्धादिप्रतिपादनमन्त्रीणामेव
एव मतं प्रयच्छति । यथा । आगमप्रवेशेन
भोगमकुर्वन् अनर्थक तत्र कुलधर्मेण
स्वामिना चापरिक्षतोऽपि स्वाम्यसत्वात्
भोगात् स्वाम्यमपि भवति । यथा चोक्त
दत्ता प्रत्याहृतस्य हानिः । एतदेव श्रीकरेण
बलात्कारेण स्वदेहकुलधर्मादिकृतकभूमिरूपं
परमक्षिप्रवशमात्रापाद्यविधेयता आह

पालोऽपि तादृगेव। एतदिदमुपलक्षणमन्यथा आधीनामपि ॥●॥ तथोपेक्षया स्वत्वहानिं मुक्त्वा च स्वत्वमाह नारदः ।
“भुज्यमानान् परैरर्थान् यस्तान्मोहादुपेक्षते ।
समक्षं तिष्ठतोऽप्यस्य तान् भुक्तिः कुरुते वशे ॥”
व्यासमाह बृहस्पतिः ।
“स्थावरं विंशतिमाप्नोति शक्तो हानिमुपेक्षया ।”
उपेक्षया समया तत्कारणञ्च स्वामिनः शक्तिमत्त्वमज्ञत्वसत्यासद्यादि । एवञ्च विप्रतिपत्तौ न पूर्वं स्वत्वतिबाधकत्वप्रमाणमादौ त्वप्रमाणत्व एव स्वत्वम्। यत इयमवान् पूर्वं स्वत्वतिबाधकीभ्रम पालनाद्वैत्यमहदुष्णादाविव स्वत्व तत्तत्कालपर तद्यु भूमौ मवादिषनेऽपि स्वत्वमिति। पूर्वं तत्साधकभोगे तु चौर्यदोषो भवत्येव। भोगे तु स्वत्वहानिमाधादीनां वारयति ॥●॥ पालतोऽन्यत एवमभिधाय याज्ञवल्क्यः ।
“आधिसीमोपनिक्षेपजडबालधनैर्विना ।
तथोपनिधिराजस्त्रीश्रोत्रियाणां धनैरपि ॥”
आधिर्बन्धकद्रव्यम्। उपनिक्षेपस्तु वासनस्थं ममाख्याय यत्नेन यन्निधीयते इति नारदोक्तं । वासनं निक्षेपाधारभूतं सम्पुटादिकम्। यद्वा वस्त्रादिगूढम्। जडो बुद्धिविकलः। बालः षोडशवर्षाद्यधः। उपनिधिः प्रीत्या भोगाय अर्पितम्। ततश्च आध्यादिभिर्व्यवहितधनैश्च विनान्यानि धनानि अन्यभोगकाले स्वामिनो नश्यन्ति एतानि तु स्वामिनो न नश्यन्ति न वा भोक्तुर्भवन्ति। मिताक्षरायां स्मृतिः ।
“दारमासक्रियाभोगमन्तवाधादिषु क्रिया।
भक्तिदेवं गुरुर्वीं स्यान्न दिव्यं न च साक्षिणः ।”
याज्ञवल्क्यः ।
“आगमोऽभ्यधिको भोगाद्विना पूर्वक्रमागतात्।
आगमेऽपि बलं नैव भुक्तिः स्तोकापि यत्र नो ॥
आगमस्तु कृतो येन सोऽभियुक्तस्तमुद्धरेत् ।
न तत्सुतस्तत्सुतो वा भुक्तिस्तत्र गरीयसी ॥
योऽभियुक्तः परेतः स्यात्तस्य रिक्थी तमुद्धरेत्।
न तत्र कारणं भुक्तिरागमेन विना कृता ॥”
भूम्याद्यागम पूर्वपुरुषक्रमागतभोगाद् बलवान् अत क्रमागतभोग आगमाद्बलवान्। तथा च बृहस्पतिः ।
“पञ्चमानात् गुरुः साक्षी साक्षिभ्यो लिखितं गुरु ।
अव्याहता त्रिपुरुषी भुक्तिरेभ्यो गरीयसी ॥”
त्रिपुरुषभोगमाह व्यासः ।
“प्रपितामहेन यद्भुक्तं तत्पुत्रेण विना च तम्।
तौ विना यस्य पिता च तस्य भोगस्त्रिपूरुषः ॥
पिता पितामहो यस्य जीवेच्च प्रपितामहः ।
त्रयाणां जीवतां भोगो विज्ञेयस्त्वेकपूरुषः ॥”
आगमोऽपि बलवान् भवति यत्र स्तोकापि भुक्तिर्नास्ति। तथा च नारदः ।
“विद्यमानेऽपि लिखिते जीवत्स्वपि च साक्षिषु।
विशेषतः स्थावराणां यन्न भुक्तं न तत् स्थिरम् ॥”
इति दीपकलिका।

यत्र वादिनौ स्वस्वागमवलप्रदर्शनौ आगमयोश्च पूर्वापरभावो नास्ति तत्र यस्य भुक्तिस्तस्यागमो बलीयान् न सम्पत्तिश्च इति मिताक्षरा। अर्थाद्द्वयोरागमपौर्वापर्यनिश्चयस्तत्र।
“सर्वेष्वेव विवादेषु बलवत्युत्तरा क्रिया।
आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा ॥”
इति याज्ञवल्क्यवचनान्निर्णयः ।
आगमस्त्विति आ सम्यक् गम्यते प्राप्यते स्वीक्रियते येन स आगमः क्रयादिरिति व्यवहारमातृका। आगमः स्वाभिप्रायान्तिकमिति दीपकलिका। आगमो धनोपार्जनोपायः क्रयादिरिति मैथिलाः। तथा येनाभियुक्तस्तत्कृतः समुद्धरेत् तत्पुत्रपौत्रौ नागमसमुद्धरेतां किन्तु भुक्तिरेव। तत्र प्रमाणं विशेषयति बृहस्पतिः ।
“आद्यस्तु शोधयेत् भुक्तिमागमञ्चापि सर्वदा।
तत्सुतो भुक्तिमेवैका पौत्रान्यो न किञ्चन ॥”
इदं मूलपाठेषु तत्पुत्रादिदं किञ्चनेति मैथिलधृतम्। आद्यस्तु प्रमाणका अत्र पुनस्तु भुक्तिशोधनमात्रम् ॥●॥ भुक्तिशोधनमाह तु कात्यायनः।
“आगमो दीर्घकालश्च निश्छिद्रोऽन्यरवोज्झितः ।
प्रत्यर्थिसन्निधानश्च भोगः पञ्चाङ्ग इष्यते ॥”
इष्यते प्रमाणत्वेन। आगमः क्रयादिरुक्तः। एष च भूमिविषयकविप्रतिपत्तौ धनविषयकत्वे दर्शनात्मकभोगपरः। योऽभियुक्त इत्यादौ भोगे क्रियमाणे परेणाभियुक्तः सन् परेतो मृतः स्यात्तदागमस्तुष्णद्यत्वात् तदा तत्पुत्रादिरागमसमुद्धरेत्। तथा च नारदः ।
“अन्याय्यविवादस्य प्रेतस्य व्यवहारिणः ।
पुत्रेण सोऽर्थः संशोध्यो न तु भोगो निवर्त्तयेत् ॥”
विवादं सति प्रेत। भोगः केवलभोगः। तथा च स एव। आगे तु कारणं दान मधौ भुक्तिस्तु आगमा इति एव सविवादभोगपराम्नेयपरः। तथाविधभोगस्यागमं विनापि प्रामाण्यात्। तथा व्यासः ।
“वर्षाणि विंशतिर्भुक्ता स्वामिना व्याहता सती।
भुक्तिः सा पौरुषी भूमेर्द्विगुणा तु द्विपौरुषी।
त्रिपौरुषी तु त्रिगुणा न तत्रान्विष्य आगमः ॥”
एतदुपनयनमयभोगविषयकमिति वचनं विप्रतिपत्तिभोगविषयकत्वेनाविरोधः। एता इव बहुमूल्यत्वात् एव। कात्यायनः।
“स्मार्त्तकाले क्रिया भूमे सागमा भुक्तिरिष्यते।
अस्मार्त्ते आगमाभावात् क्रमात् त्रिपुरुषागता ॥”
बलिष्ठैकपुरुषभुक्तौ त्रिपुरुषभुक्तिपरं तत्र अस्माह न सर्वेषाम्। अतएव नारदः।
“अन्यायेन तु यद्भुक्तं पित्रा पूर्वतरैस्त्रिभिः।
न तत् शक्यमपाहर्त्तुं क्रमात् त्रिपुरुषागतम् ॥”
अन्यायेनागममिति मूलपाठिकवचने दृष्टश्च । त्रिभा वह विनरमाहात्म्य विभिन्नार्थः । यथा।
“अनागमन्तु यो भुङ्क्ते बहून्यब्दशतानि च।
चौरदण्डेन तं पापं दण्डयेत् पृथिवीपतिः ॥”

इति तस्य वचन दण्डविधायकं न तत्स्वत्वप्रापकं धर्मशास्त्रविरोधात्। तदाह स एव।
“यत्र विप्रतिपत्तिः स्यात् धर्मशास्त्रार्थशास्त्रयोः।
अर्थशास्त्रार्थमुत्सृज्य धर्मशास्त्रं समाचरेत् ॥”
एवमेव शूलपाणयुपाध्यायाः। वस्तुतस्तु वचनमिति दण्डविधायकवचनं लोकमनुयायन परम्।
“लोधनश्च नृपेन्द्राणां न कल्पयन चौर्यमिति।
अनागमं भुज्यमानमपि शतशतैरपि ॥”
इति स्वत्वनिषेधकवचनान्तरैकवाक्यत्वात्। तत्र विप्रतिपत्तिः स्यान्निति वचनस्यार्थिनस्तद्वाहरणम्। यथैकस्य अयोऽवधाव्यमाणे मित्रकार्यम् इतरस्य जयोऽवधार्यमाणे धर्मकार्यहानिः ।
“हिरण्यभूमिलाभेभ्यो मित्रलब्धिर्वरा यतः ।
अतो यतेत तत्प्राप्तावित्ययं शास्त्रसंमतम् ॥”
इति याज्ञवल्क्योक्ताध्याहारवाच्यस्य लोक कोऽपि विवक्षित इति धर्मशास्त्रप्रमाणकव्यवहारं प्रति। अतएव वचनार्थस्य धर्मार्थसहित एव। इति वाचस्पतिमिश्रः। भवदेवभट्टास्तु आगमं प्रतिवादिनोऽवधानेऽपि पुरुषैकत्रयभोगाभिप्रायम्। त्रैपुरुषभोगस्य तथैव प्रमाणत्वादित्याहुः ।

अथ भुक्तिप्रमाणापवादः ।

बृहस्पतिः ।
“भुक्तिस्त्रैपुरुषी सिध्येदन्येषां न संशयः ।
अनिवृत्ते सपिण्डत्वे सकुल्यानां न सिध्यति ॥
वन्धनिक्षेपयुक्ता च भुक्तिः प्रमाणमाह्निकम् ।
राजभृत्यमुखानां च तद्भोगेन हीयते ॥
विवादभोगिभिर्भुक्तं राजामात्यैश्च सर्वदा ।
भुक्तेरपि कालेन तेषां तत् न सिध्यति ॥”
आचक्रो विशेषतस्तु विवादो भासते ॥●॥

अथ दृष्टिः ।

नारदः ।
“उल्काहस्तोऽग्निदो ज्ञेयः शस्त्रपाणिश्च घातकः ।
केशाकेशिगृहीतश्च युगपत् पारदारिकः ।
कुद्दालपाणिर्विज्ञेयः सेतुभेत्ता समीपगः ।
तथा कुठारहस्तश्च वनच्छेत्ता प्रकीर्तितः ।
प्रत्यक्षचिह्नैर्विज्ञेयो दण्डपारुष्यकृत् नरः ।
असाक्षिप्रत्यया ह्येते पारुष्ये तु परीक्षणम् ॥”
प्रत्यक्षचिह्नैः रुधिरादिभिः क्षतादिभिः। वाक्पारुष्ये। वाक्। लोकस्तथा चौर इति।
नारदः।
“अभोक्ता स्थावरस्यापि प्रतिभाव्य सदृक्।
विद्यते यत्र सम्बन्धो वा तत्र लिखितं प्रमाणं वै ॥”
तत्र सन्दिग्धवचनैर्विभागशङ्कायां तु ... आत्मजातो वा पुत्रस्य वर्तमानस्थित... यद्यपि ... इष्टमर्थं ... प्रकृत्य ... इति ॥●॥

अथ शपथः ।

नारदः ।
"युक्तिष्वप्यवसन्नासु शपथैरेनमर्द्दयेत् ।
अर्थकालबलापेक्षमग्न्यम्बुसुकृतादिभिः ॥"
एनं विचार्य्यमाणमर्थं अर्द्दयेत् पीडयेन्निर्णयेदित्यर्थः । अर्थस्य विवादास्पदस्य अत्र बहुत्व-भावः कालस्य च बलं पुण्यापुण्यत्वं तदपेक्ष्य यथा स्यादित्यर्थः । भूरूर्म्मावरणस्य पुत्रादि शिरःस्पर्शस्य चापि दर्शनीयत्वात् । अथ मये-ऽनृतं उक्तं न वेति प्रतिज्ञातसत्यार्थापौ भवे वा श्रुत्वा प्रवदेत् । एतन्मिथ्यात्वे मम सुकृतं नश्येदिति वा ब्रूयात् । न त्वभिपरीक्षा अत्र परीक्षा वा कुर्य्यात् स्वभिशापनयोर्न युक्त तस्या महाभियोगविषयत्वेन शपथसमभिव्याहारा नर्हत्वात् । सुकृतादिभिरित्यादिना दुर्म्मोचया तुपयत् । तथा च विष्णुः ।
"समस्तवापेनापि सत्यं सर्वं प्रकल्पयेत् ॥"
तत्र शम्लोने शूद्र दूर्म्माकर प्रापयेत् । द्विसम्लोने निष्करं शिलम्लोने क्षत्रकर चतुः शम्लोने स्वकर मध्यशम्लोने सौतो कृतमदीक्षर सुवर्णाद्धेन कोषो देव शूद्रस्य यथासमये विहिता क्रिया तथा त्रिगुणेऽर्थे राजन्यस्य त्रिगुणेऽर्थे वैश्यस्य चतुर्गुणेऽर्थे ब्राह्मणस्येति । शम्ला कापणरतिका तन्-मत्याद्दूने शम्लोने । एवमन्यत्र । मनुः ।
"सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः ।
गोवीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः ।
पुत्त्रदारस्य वाप्येवं शिरांसि स्पर्शयेत् पृथक् ॥"
ब्राह्मणेन भवेतत् सत्यं न सत्यं वेति प्रतिज्ञा सुकार्य्ये सत्यमिति वक्तव्यम् । तथैव क्षत्रियेण वाहनायुध स्पृष्टव्यम् । तथैव वैश्येन गोवीज काञ्चनानामन्यतम स्प्रष्टव्यम् । शूद्रेण तु पूर्व्वोक्ते सर्व्वमेव स्प्रष्टव्य तैर्वा इष्टाशनपथादीनां पातक हेतुत्वात् पातकमन्येन निर्द्दिष्ट । कल्पतरौ ऽप्येवम् ॥ ● ॥ दैवक्रियाविषयमाह नारदः ।
"अरण्ये निर्जने रात्रावन्तर्व्वेश्मनि साहसे ।
न्यासापहरणे चैव दिव्या सम्भवति क्रिया ॥"
बृहस्पतिः ।
"द्रव्यस्त्राम्बपादाचि पुत्त्रदारशिरांसि च ।
एते तु शपथाः प्रोक्ता मनुना स्वल्पकारणे ।
साहसेष्वभिशापे च दिव्यानि तु विशोधनम् ॥"
अत्र शपथदिव्ययोः पृथक्प्रतीतेः । शपथे न दिव्यधर्म्माः किन्तु देवे कर्म्मणि तत्र शौचादि ब्राह्मणसमान्निमार्थं कार्य्यम् । दिव्यानि तु न्यायस्ते कथितानि नाम लिखितानि । अथवा मिथुनेन शपथ कर्णैव एकमर्थे ॥ ● ॥ उभ-येच्छयाभियोक्तायोक्ताह नारदः ।
"अभियोक्ता शिरोवर्त्ती सर्व्वेषु प्रकीर्त्तितः ।
इच्छयान्यतरः कुर्य्यादितरो वर्त्तयेच्छिरः ॥"
इतरः शपथभूमिमन्" । तथा कात्यायनः ।
"व्यासदुन्दकाग्न्यो यस्य नो राजदैविकम् ।
यत्र पायते घोरं न दैवं शपथे तथि ॥"

अथवमापत् । घोरमत्यपीडाकरम् । तथा च कात्यायनः यस्य यत्नो'दिव्यशुद्धौ 'वर्ज्या' ।
"रोगोऽग्निज्ञातिमरणं राजातङ्कमथापि वा ।
तमशुद्धं विजानीयात् तथा शुद्धं विपर्य्ययात् ॥"
कात्यायनः ।
"तस्यैकस्य न सर्व्वस्य जनस्य यदि तद्भवेत् ।
रोगोऽग्निज्ञातिमरणमन्यत्र दृश्यत् न्यस्य च ।
ज्वरातिसारविस्फोटगण्डास्थिपरिपीडनम् ।
नेत्ररुक्गलरोगश्च तथोन्मादः प्रजायते ।
शिरोरुग्भुजभङ्गश्च दैविका व्याधयो नृणाम् ॥"
तस्यैकस्येति न तु देशव्यापकमरणादि । मनुः ।
"न वृथा शपथं कुर्य्यात् स्वल्पेऽप्यर्थे नरो बुधः ।
वृथा हि शपथं कुर्व्वन् प्रेत्य चेह च नश्यति ॥
कामिनीषु विवाहेषु गवां भक्ष्ये तथेन्धने ।
ब्राह्मणाभ्युपपत्तौ च शपथे नास्ति पातकम् ॥"
कामिनीष्विति रहसि कामिनीसन्तोषार्थं वृथा शपथे एवं विवाहसिद्ध्यर्थे गोग्रासार्थं आवश्यक होमेन्धनार्थं ब्राह्मणरक्षायमङ्गीकृतधनार्थं । यमः ।
"वृथा तु शपथं कृत्वा कौटस्य वधबन्धनम् ।
अश्रुतेन च युज्येत ब्रह्महा च तथा नरः ।
तस्मान्न शपथं कुर्य्यान्नरो मिथ्यावधिष्ठितम् ॥"
कौटस्येति प्राणिमात्रोपलक्षणं तद्वधपापेन वृथाशपथकर्त्ता युज्यत इत्यर्थः ॥

अथ निर्णयः ।

तत्र नारदः ।
"यस्योचुः साक्षिणः सत्यां प्रतिज्ञां स जयी भवेत् ।
अन्यथावादिनो यस्य ध्रुवस्तस्य पराजयः ॥
स्वयमभ्युपपन्नोऽपि स्वचर्य्यावसितोऽपि सन् ।
क्रियावसन्नोऽप्यर्थेन परं सभ्यावधारणम् ।
सभ्यैरवधृत पश्चात् स शास्य शास्त्रमानतः ॥"
यस्य वादिनः प्रतिवादिनो वा साक्षिणः सत्यम् वदन्ति । साक्षिलिखितभुक्तिशपथानां मध्ये ऽन्यतमप्रमाणं यस्य प्रतिज्ञातार्थं सत्यमिति प्रतिपादयेत् स एव जयी अन्यथा पराजित इति प्रसिद्धम् । स्वयमभ्युपपन्नः आत्मनैवाङ्गीकृत अपराधः स्वचर्य्यावसितः कम्पस्वेदादिभिः दिवा पराजितत्वलक्षणः । क्रियावसन्नः साक्ष्यादिना प्राप्तपराजयः । परमनन्तरं सभ्यावधारणमर्हति सभ्यानां निश्चितानामयं पराजित इति निर्णयमर्हति । आत्मावधृत स शास्य निर्णयशास्त्रानुसारेण शास्यः ॥ ● ॥ निर्णयस्य फलमाह बृहस्पतिः ।
"प्रतिज्ञाभावनाद्वादी प्राड्विवाकादिपूजनात् ।
जयपत्रस्य चादानात् जयी लोके निगद्यते ॥"
जयपत्रस्य निर्णयप्रकारमाह स एव ।
"यद्वृत्तं व्यवहारेषु पूर्व्वपक्षोत्तरादिकम् ।
क्रियावधारणोपेतं जयपत्रेऽखिलं लिखेत् ।
पूर्व्वोत्तरक्रियायुक्तं निर्णयान्तं यदा नृपः ।
प्रदद्याज्जयिने पत्रं जयपत्रं तदुच्यते ॥"

कात्यायनः ।
"अधिकारार्थे वाक्यानि प्रतिज्ञानिश्चयात्तथा ।
निर्णयश्च यथा तस्य यथा चावधृतं स्वयम् ।
एतद्यथाक्षरं लेख्यं यथापूर्व्वं निवेशयेत् ।
सभासदश्च ये तत्र धर्म्मशास्त्रविदस्तथा ॥"
तत्र भाषोत्तरे क्रिया च पत्रमात्स्यादिके निर्णयो जयपराजयावधारणं निर्णयवाक्यात् स्थितमध्यस्थावेक्षादिकं सर्वं लेखनीयं निष्पन्नस्य सम्यक्सम्पत्त्यर्थम् । तथाहि भाषी त्वागमिष्यन् "इदं मयोक्तम्" पुनर्न्यायसव्यवस्थान् विधानार्थं अहि न यतोऽनीति निर्णयोत्तरेण पराजितस्य पुनः प्रतिपत्तिम भवेति प्रयत्न स्यात् च भवति । प्रमाणनिश्चयस्तु पुनः प्रमाणान्तरेण न्यायनिवेशार्थम् । तदाह कात्यायनः ।
"क्रिया बलवती मुक्ता दुर्ब्बला चोत्तरावती ।
स जयेऽवधृतो सभ्यैः पुनस्तां नाप्नुयात् क्रियाम् ।
निर्णीते व्यवहारे तु प्रमाणमफलं भवेत् ।
लिखितं साक्षिणो वापि पूर्व्वमावेदितं न चेत् ।
यथा पक्वेषु धान्येषु निष्फलाः प्रावृषो गुणाः ।
निर्णीतव्यवहाराणां प्रमाणमफलन्तथा ॥"
निर्णयोत्तरकृत्यमाह मनुः ।
"अर्थेऽपव्ययमानन्तु कारणेन विभावितम् ।
दापयेद्धनिकस्यार्थं दण्डलेशञ्च शक्तितः ॥"
अपव्ययमानं अपलपन्तं कारणेन साक्ष्यादि-प्रमाणेन । याज्ञवल्क्यः ।
"ज्ञातापराधे दैवे च धन सवसधापि वा ।
तत्र कर्म्म च वित्तञ्च दत्त्वा स्वर्णं दापयेत् ॥"
मनुः ।
"तीरितं चानुशिष्टञ्च यत्र क्वचन यद्भवेत् ।
कृतं तद्धर्म्मतो विद्यात् न तद्भूयो निवर्त्तयेत् ॥"
अनुशिष्ट साक्ष्यादिनिर्णीतं अतएव तीरित प्राड्विवाकादिभिः समापितम् । तद्विवादपदं पुनर्न निवर्त्तयेदित्यर्थः । अत्र तीरितानुशिष्ट पौरुष्यधर्म्मकृतत्व प्रचरतीति । तत्र पुनर्व्याप दर्शनमाह नारदः ।
"तीरितं चानुशिष्टञ्च यो मन्येत विधर्म्मतः ।
द्विगुणं दण्डमादाय तत् कार्य्यं पुनरुद्धरेत् ॥"
व्यवहारे तु विचारान्तरमाह स एव ।
"असाक्षिकन्तु यद्दृष्टं विमार्गेण च तीरितम् ।
असम्यग्दर्शितैः सभ्यैः पुनर्दर्शनमर्हति ॥"
असाक्षिकमित्यप्रमाणकोपलक्षणम् । याज्ञवल्क्यः ।
"दुष्टांस्तु पुनर्दृष्ट्वा व्यवहारान्नृपेण तु ।
सभ्याः सजयिनो दण्ड्या विवादाद्द्विगुणं दमम् ॥"
साक्षिसभ्यावसन्नानां दूषणे दर्शनं पुनः ।
स्वचर्य्यावसितानान्तु नास्ति पौनर्भवो विधिः ॥"
साक्षिदूषणेन सभ्यावधारणेन च प्राप्तपराजयानां पुनर्व्यवहारम् । स्वचर्य्यावसितानां तु पौनर्भवो विधि भावादिना प्राप्तपराजयानां नास्ति पुनर्न्याय इत्यर्थः ।

"पलायमानस्तस्त्वाद्भ्यपत्राशयेव च ।
चौरस्य यहुते वादो न स्वाक्यजितस्य च ।"
मनुः ।
"बलाद्दत्तं बलाद्भुक्तं बलाद्यच्चापि लेखितम् ।
सर्वान् बलकृतानर्थानकृतान् मनुरब्रवीत् ।"
याज्ञवल्क्यः ।
"मत्तोन्मत्तार्त्तव्यसनिबालभीतादियोजितः ।
असम्बद्धकृतश्चैव व्यवहारो न सिध्यति ।"
उपाधिकृतमिति शूलपाणिः । उपाधिभयादि रिति विज्ञानेश्वरः । मत्तादिभीतादियोजित इत्युक्तपनेन पौनरुक्त्यम् । वहिर्यामं बहिर्देश । मत्तो मद्यादिना । उन्मत्तो वाता दिना । व्यसनी द्यूतादासक्तः । असम्बन्धो वादिनियुक्तव्यतिरिक्त उन्नाथीत । व्यादिपदाद् स्वतन्त्रदासपुत्रादेग्रहणम् । तथा च नारदः ।
"स्वतन्त्रोऽपि हि यत् कार्य्यं कुर्य्यादप्रकृतिं गतः ।
तदप्यकृतमेवाहुरस्वातन्त्र्यस्य हेतुतः ।
कामक्रोधाभिभूतो वा भयव्यसनपीडितः ।
रागद्वेषपरीतश्च ज्ञेयास्त्वप्रकृतिं गताः ।
तथा दासकृतं कार्य्यमकृतं परिचक्षते ।
अन्यत्र स्वामिसन्देशान्न दासः प्रभुरात्मनः ।
पुत्रेण च कृतं कार्य्यं यत् स्यादस्वच्छन्दतः पितुः ।
तदप्यकृतमेवाहुर्दासपुत्रौ च तौ समौ ।"
एतच्च कुटुम्बभरणातिरिक्तविषयम् ।
"कुटुम्बार्थेऽध्यधीनोऽपि व्यवहारं यमाचरेत् ।
स्वदेशे वा विदेशे वा तं ज्यायान्न विचालयेत् ।"
इति मनुवचनात् कुटुम्बभरणक्षमत्वीयम् । अध्यधीन परतन्त्रः पुत्रदासादिः । व्यवहार मृणादिकं ज्यायान् स्वतन्त्रो न विचालयेत् अनु मन्येत । तथा च नारदः ।
"मातृत्ययु स्वतं ज्येष्ठे ज्येष्ठे गुणवत्सु सतम् ।
अस्वतन्त्राः प्रजाः सर्व्वाः स्वतन्त्रः पृथिवीपतिः ।
अस्वतन्त्रः स्मृतः शिष्य आचार्य्ये तु स्वतन्त्रता ।
अस्वतन्त्राः स्त्रियः सर्व्वाः पुत्रा दासाः परि-
ग्रहाः ।
स्वतन्त्रस्तु गृही यस्य तत् स्यात् क्रमा-
गतम् ।
गर्भस्थैः सदृशो ज्ञेयः अष्टमाद्वत्सराच्छिशुः ।
बाल आषोडशाद्वर्षात् पौगण्डोऽपि निगद्यते ।
परतो व्यवहारज्ञः स्वतन्त्रः पितरावृते ।
जीवतोर्न स्वतन्त्रः स्याज्जरयापि समन्वितः ।
तयोरपि पिता श्रेयान् बीजप्राधान्यदर्शनात् ।
अभावे बीजिनो माता तदभावे तु पूर्व्वजः ।"
मर्य्यादा अनुजीविग्रहणम् । तथा च वृह-
स्पतिः ।
"विद्यमानपुत्रपौत्रादिभिरपि ज्ञातिभिः ।
नगृहीत कुटुम्बार्थे तत्समो दाप्यते सुतः ।"
कात्यायनः ।
"कुटुम्बार्थं दत्तेन गृहीत व्याधितेन वा ।
उपप्लवनिमित्तञ्च विद्यादापत्कृतन्तु यत् ।
कन्यावैवाहिकञ्चैव प्रेतकार्य्ये च यत् कृतम् ।
एतत् सर्व्वं प्रदातव्यं कुटुम्बेन कृतं प्रभोः ।"
प्रभोरिति कर्त्तरि षष्ठी तेन प्रभुणा दातव्य मिति रत्नाकरः । वृहस्पतिः ।
"यः स्वामिना नियुक्तोऽपि धनाय व्ययनाय च ।
कुसीदकृषिवाणिज्ये निसृष्टार्थस्तु स स्मृतः ।
प्रमाणं तत्कृतं सर्व्वं लाभालाभव्ययोदयम् ।
स्वदेशे वा विदेशे वा स्वामी तन्न विसंवदेत् ।"
इति श्रीरघुनन्दनभट्टाचार्य्यविरचित व्यवहार तत्त्व समाप्तम् । * ।

व्यवहारज्ञ, पुं (व्यवहारं जानातीति । ज्ञा + कः ।) प्राप्तव्यवहारः । (साबालक इति भाषा ।) स तु षोडशवर्षानन्तरं भवति । यथा,—
"बाल आषोडशाद्वर्षात् पौगण्डोऽपि निगद्यते ।
परतो व्यवहारज्ञः स्वतन्त्रः पितरावृते ।"
इति व्यवहारतत्त्वधृतनारदवचनम् ।

व्यवहारज्ञातरि, त्रि ।

व्यवहारदर्शनं, क्ली, (व्यवहारस्य दर्शनम् ।) विवाद दर्शनम् । विचारकरणम् । इति मिताक्षरा ।

व्यवहारपद, क्ली, (व्यवहारस्य पदम् ।) वादिना राज्ञि निवेदनम् । (नालिश इति भाषा ।) यथा, याज्ञवल्क्यः ।
"स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः ।
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत् ।"
स्मृतिसदाचारविभूतेन मार्गेण परैरधर्षितः परीरतो वा पीडितश्चेद्राजनि निवेदयेत् तद् व्यवहारपदं गस्यादम् । चेच्छब्द यदिति मे पिता । आवेदयति चेद्राज्ञ स्वयं विवादो स्यान राजा न कर्त्तव्यमिति शूलपाणिमहा महोपाध्यायाः । राज्ञीति व्यवहारप्रदर्शक पर तथा च वृहस्पतिः ।
"राजा कार्य्याणि संपश्येत् प्राड्विवाकोऽथ वा
द्विजः ।"
कात्यायनः ।
"सप्राड्विवाकः सामात्यः सब्राह्मणपुरोहितः ।
स्वयं स राजा निपुणान् तेषां अधराश्चते ।
यदा कार्य्यवशाद्राजा न पश्येत् कार्य्यनिर्णयम् ।
तदा नियुञ्ज्यात् विद्वांसं ब्राह्मणं वेदपारगम् ।
यदि विप्रो न विद्वान् स्यात् क्षत्रियं तत्र योज
येत् ।
वैश्यं वा धर्म्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेत् ।"
स विनीतवेश । मनुः ।
"जातिमात्रोपजीवी वा कामं स्याद्ब्राह्मण
ब्रुवः ।
धर्म्मप्रवक्ता नृपतेर्न तु शूद्रः कथञ्चन ।"
व्यासः ।
"द्विजान् विहाय यः पश्येत् कार्य्याणि वृषलैः
सह ।
तस्य प्रक्षुभ्यते राष्ट्रं बलं कोशश्च नश्यति ।
दुर्ष्टोऽपि द्विजः पूज्यो न शूद्रो विजितेन्द्रियः ।
दुग्धां गां कः परित्यज्य दुहेच्छीलवतीं खरीम् ।"
इति व्यवहारतत्त्वम् ।

व्यवहारपाद, पुं, (व्यवहारस्य पादः ।) व्यव हारांशः । यथा । अथ व्यवहारपादनिर्णयः । तत्र वृहस्पतिः ।
"पूर्व्वपक्षः स्मृतः पादो द्विपादश्चोत्तरः स्मृतः ।
क्रियापादस्तथा चान्यश्चतुर्थो निर्णयः स्मृतः ।"
इति व्यवहारतत्त्वम् ।
अपि च ।
"परस्परं मनुष्याणां स्वार्थविप्रतिपत्तिषु ।
वाक्यान्न्यायाद्व्यवस्थानं व्यवहार उदा
हृतः ।
भाषोत्तरक्रियासाध्यसिद्धिभिः क्रमवृत्तिभिः ।
आक्षिप्तचतुरंशस्तु चतुष्पादभिधीयते ।"
इति मिताक्षरा ।

व्यवहारमातृका (व्यवहारस्य मातृकेव ।) व्य वहारोपयोगिक्रिया । तद्यथा । व्यवहार दर्शनम् १ व्यवहारलक्षणम् २ सभासदः ३ प्राड्विवाकादि ४ व्यवहारविषयः ५ राज्ञः कार्य्यानुत्पादनम् ६ कार्य्यार्थिनि प्रश्नः ७ आह्वानानाह्वाने ८ आसेधः ९ प्रत्यर्थ्यागमने वेलानिर्णयता १० प्रतिनिधौ दोषः ११ मौनस्य दोषः १२ प्रत्यागमः १३ अनादेयाः १४ आदेयः १५ नियुक्तस्य पराजये वाग्निश्चयपराजयौ १६ शोधितलेख्यविशोधनम् १७ उत्तराभावनिरोधनम् १८ शोधिते पत्रारूढे उत्तरकर्णनम् १९ उत्तरलक्षणम् २० मतो त्तरलक्षणम् २१ मिथ्योत्तरलक्षणम् २२ प्रत्यवस्कन्दनोत्तरम् २३ प्राङ्न्यायोत्तरम् २४ उत्तराभावः २५ बहूत्तरम् २६ प्रतिवेदे क्रियानिर्देशः २७ उत्तरे प्रत्येऽभियोगेऽपि वाक्यनिर्देशः २८ असूचिहो रिपुः २९ चतुष्पाद्व्यवहारः ३० । इति मिताक्षरायां व्यवहारमातृका ।

व्यवहारमार्गः, (व्यवहारस्य मार्गः ।) व्यवहार विषयः । व्यवहारपदम् । इति मिताक्षरा ।

व्यवहारविधि, पुं, (व्यवहारस्य विधिः ।) व्यव हारस्य विधानम् । धर्म्मशास्त्रम् । इति मिता क्षरा ।

व्यवहारविषय, पुं (व्यवहारस्य विषयः ।) व्यव हारपदम् । तत्तु अष्टादशविधम् । यथा । ऋणादानम् १ निक्षेपः २ अस्वामिविक्रयः ३ सम्भूयसमुत्थानम् ४ दत्तस्यानपकर्म्म ५ वेतना दानम् ६ संविदो व्यतिक्रमः ७ क्रयविक्रयानु शयः ८ स्वामिपालयोर्विवादः ९ सीमाविवाद धर्म्मः १० वाक्पारुष्यम् ११ दण्डपारुष्यम् १२ स्तेयम् १३ साहसम् १४ स्त्रीसंग्रहणम् १५ स्त्रीपुंधर्म्मः १६ विभागः १७ द्यूतम् १८ । इति मानवे च सप्तमे ।

व्यवहारस्थानं, क्ली, (व्यवहारस्य स्थानम् ।) व्यवहारपदम् । व्यवहारविषयः । इति मिता क्षरा ।

व्यावहारिकः, त्रि, (व्यवहारमर्हतीति । व्यवहार + ठक् ।) व्यवहारयोग्यः । यथा । इयं बुद्धिः ब्राह्मेन्द्रियैः सहिता सती विज्ञानमयकोषो भवति । अयं कर्त्तृत्वभोक्तृत्वाभिमानित्वेन इह लोकपरलोकगामी व्यावहारिको जीव उच्यते । इति वेदान्तसारः ॥

व्यावहारिका, स्त्री, (व्यवहारेण चरतीति ठक् । स्त्रियां टाप् ।) लोकयात्रा । समाज्ञ्येनी । इङ्गुदवृक्षः । इति मेदिनी ॥

व्यवहारी [न्] त्रि, (व्यवहारोऽस्यास्तीति । इनि ।) व्यवहारविशिष्टः । व्यवहारशब्दात् इत्यर्थे इन्प्रत्ययेन निष्पन्नमिदम् ॥

व्यवहार्य्यं त्रि (वि + अव + हृ + ण्यत् ।) व्यवहरणीयः । व्यवहर्त्तव्यः । वि अव पूर्व्वहृधातो ण्यत्प्रत्ययेन निष्पन्नमेतत् ॥ (यथा याज्ञवल्क्ये । ३ । २२६ ।

"प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत् ।
कामतो व्यवहार्य्यस्तु वचनादिह जायते ॥")

व्यवहितः, त्रि (वि + अव + धा + क्त ।) व्यवधानविशिष्टः । यथा —

"कर्त्तृकर्म्मव्यवहितामसाक्षाद्धारयेत् क्रियाम् ।
उपकुर्व्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं मतम् ॥"
इति मुग्धबोधटीकायां रामतर्कवागीशः ॥

व्यवायं क्ली, (वि + अव + अय + अच् ।) तमः । इति मेदिनी ॥

व्यवायः, पुं (विशिष्टेन अवायनं अधः संश्लेषणम् । वि + अव + इ + घञ् ।) मैथुनम् । इत्यमरः ॥ (यथा वैद्यके ।

"व्यायामञ्च व्यवायञ्च स्नानं चंक्रमणं तथा ।
ज्वरमुक्तो न सेवेत यावन्न बलवान् भवेत् ॥")

व्यवधानम् । इति मेदिनी ॥ (यथा, पाणिनौ । "अड्व्याय व्यवायेऽपि ।" ६ । १ । १२६ ।) शुद्धिः । इति धरणिः ॥ (परिणामे । यथा, भागवते । ८ । ६ । ११ ।

"यत्राग्नि गुप्ता भगवा मनीषिणो
गुणव्यवायेऽप्यगुणं विपश्चित ॥")

व्यवायी, [न्] पुं स्त्री, (अवेत्य ग्रीणमन्तः । णिनि ।) कामुकः । यथा,—

"बाह्वे नियुक्तो ग्रुद्धा वा भोजयित्वा नियुज्य च ।
व्यवायी रेतसो गर्त्ते मज्जयत्यात्मनः पितॄन् ॥"
इति श्राद्धतत्त्वम् ॥

(व्यवधानकर्त्ता । यथा, पाणिनौ । "व्यवायिनोऽन्तरम् ।" ६ । २ । १६६ । "व्यवायी व्यवधाता ।" इति काशिका ॥)

व्यसनं, क्ली, (वि + अस + ल्युट् ।) विपत् । (यथा महाभारते । १३ । ११० । ७ ।

"पुत्रदारे सुखैश्वर्ये विपुलस्य धनेन वा ।
सम्पन्नो व्यसने तस्मिं धृतिं धैर्यकरी ध्रुव ॥")

भ्रंशः । (यथा मनौ । ७ । ४६ ।

"वाग्दण्डयोश्च पारुष्यं वार्त्तां भ्रातिपरीक्षितम् ॥")

कामजकोपजदोषः । इत्यमरः ॥ (यथा, कथासरित्सागरे । ११ । ४९ ।

"अमुष व्यसनानि त्वं सुखेन हि परेङ्गया ।
मोहयन्त्यैव यत्नश्चो भ्रातर्ध्वेव वनद्विपा ॥"

यथा च भागवते । ४ । २६ । २६ । ४ ।

"विहाय भार्या मलम्धां व्यसनव्यसनाशय ॥"

"व्यसन मोगासक्तिः ।" इति श्रीधर ॥) विपत् विपत्तिः । अशुभाय पतनम् । न्यायाद्व्यसनौ सदपायश्चतुर्षै वर्गे प्रयाति कामजो दोषः । इच्छाप्रभवत्वात् । वाक्पारुष्य अयपातव्यपेति विवर्ं कोपजो दोषः । कोपप्रभवत्वात् । गच्छ व्यसनम् । व्यस्यति श्रेयो भाषात् व्यसनं कर्त्तरि ल्युट् । भावे तु भावे । इति भरत ॥ (अत्यासक्तिः । यथा कथा सरित्सागरे । ११ । ३९ ।

"शिथिलो जलकेशाचरित्रायव्यसनो हरः ॥")

अशुभम् । दैवानिष्टफलम् । पापम् । निष्फलो द्यमः । इति मेदिनी ॥ * ॥ दशविधानि व्यसनानि यथा

"न्यायाया स्त्रिय पान वाक्पारुष्यार्थदूषणम् ।
दण्डपारुष्यमित्येतदुक्तं व्यसनसप्तकम् ॥"
इति हेमचन्द्र ॥ * ॥

व्यसनासक्तेर्दोषो यथा,—

"एकैकविषयासक्ता सर्व्वे क्षयपथं गता ।
स एव. कथं तान् सेवेत् विषयान् विषयी नरः ।
स पतेदचिरेणैवास्मिन्निमग्न इव द्रुम ।
स्त्रिय पान निचयं तथा वाग्निमर्त्तनम् ।
द्यूताटवीमृगयाकामश्चापि तथा परे ॥
एतेषां ईर्ष्यासूया क्रोधपैशुन्यसाहसम् ।
अर्थदूषणक्रोधोऽर्थं अत्योय विनाशनम् ॥
देवा विद्याधरा यक्षा किन्नरोरगमानुषा ।
मन्त्र यन्त्रिय सर्व्वे विषये निधन गता ॥
एव विवेकमाचक्ष्व बुद्धा घोर नराधिप ।
व्यसनैर्बाध्यमानाय विषये वशिकेष्यताम् ॥"
इति देवीपुराणे ८ अध्याय ॥

व्यसनार्त्तः, त्रि (व्यसनेनार्त्तः ।) दैवोमानुषो पीडातः । तत्पर्य्याय उपप्लुतः २ । इत्यमरः भरतौ ॥

व्यसनी, [न्] त्रि (व्यसनमस्यास्तीति । व्यसन + इनि ।) व्यसन विशिष्टः । (यथा, शिशुपाल वधे । २ ।

"विरक्त मितव्यसनी इतमा इतवीरम ॥")

तत्पर्य्याय । पद्मभद्र २ विष्णुः ३ । इति श्रीमच्छ ॥

व्यस्तः (वि + अस + क्त ।) व्याकुलः । व्याप्तः । इति मेदिनी ॥ असमस्तम् । पृथक् पृथक् । यथा विश्वामित्र ।

"सम्यग्व्याप्ताव्यवाप्नोति सुखाम्बुरसकाननम् ।
प्रकाशि च दशमि च संग्रयोऽञ्जलिऽत्युडे ।
प्राचार्ये प्रागमय निगुणकृ पराजय ।
व्यनिहत्कृ पद्मकृ नीच तत्कृतिकृक ।
महावाचनम शुद्धे तत्कृत्सु पावन ।
अलोपयाचकृत्स्य सकृत्सुर्वेद्य प्रोचव ।
एते व्यस्ता समस्ता वा एकैकमेवतोऽपि वा ।
पावनादिह वर्त्तेद्द पावनेद्ध प्रपद्यत ।
कार्य्याकार्य्यान्यथैर्मुक्ता केवला वा विशुद्धये ॥"
इति प्रायश्चित्ततत्त्वम् ॥

विपरीत । यथा,—

"प्रतिपदाद्यमावास्या तिथ्योर्युग्म महाफलम् ।
एतद्व्यस्तं महाघोर हन्ति पुण्य पुराकृतम् ॥"
इति तिथ्यादितत्त्वम् ॥

व्यस्तपदं क्ली, (व्यस्त पदं यस्मिन् ।) व्यवहारा भियोग अन्यान्यरेकोत्तरम् । यथा । सुवर्णशता भियोगे अनेनाहमाहृत इति । इति मिता क्षरा ॥

व्याकार, स्त्री, कुत्सितमदप्रयोग । इति त्रिकाण्ड शेषः ॥

व्याकरणं, क्ली (व्याक्रियन्ते शब्दा येनेति । वि + आ + कृ + ल्युट् ।) वेदाङ्गविशेष । इति शब्द रत्नावली । तच्च साध्वसाधुशब्दप्रकृतिप्रत्ययादिविवेचकम् । तस्य व्युत्पत्तिर्यथा । व्याक्रियन्ते व्युत्पाद्यन्ते साधुशब्दा अस्मिन् अनेनेति वा । इति दुर्गादास ॥ * ॥

"अथ व्याकरणं वक्ष्ये कात्यायन समासतः ।
सिद्धशब्दविवेकाय बालव्युत्पत्तिसिद्धये ॥
सुप्तिङन्तं पदं ख्यातं सुप् सप्तविभक्तयः ।
स्वौजस प्रथमा प्रोक्ता सा प्रातिपदिकात्मके ॥
सम्बोधने च लिङ्गादावुक्ते कर्म्मणि कर्त्तरि ।
अर्थवत् प्रातिपदिकं धातुप्रत्ययवर्ज्जितम् ॥
अमौटशसो द्वितीया स्यात् तत्कर्म्म क्रियते च यत् ।
द्वितीया कर्म्मणि प्रोक्ता अन्तरान्तरेणयुक्तके ॥
टाभ्यां भिसस्तृतीया स्यात् करणे कर्त्तरीरिता ।
येन क्रियते करणं तत् कर्त्ता स करोति च ॥
ङेभ्यां भ्यसश्चतुर्थी स्यात् सम्प्रदाने च कारके ।
यस्मै दित्सा धारयते रोचते सम्प्रदानकम् ॥
पञ्चमी स्यात् ङसि भ्यां भ्यो ह्यपादाने च कारके ।
यतोऽपैति समादत्ते अपादाय भय यत ॥
ङसोसामश्च षष्ठी स्यात् स्वामिसम्बन्धमुख्यके ।
ङ्योस्सुपश्च सप्तमी स्यात् सा चाधिकरणे भवेत् ॥
आधारश्चाधिकरणं रक्षार्थानां प्रयोगतः ।
ईप्सितं चानीप्सितं यत्तदपादानकं स्मृतम् ॥
पञ्चमी पर्य्युपाङ्योगे इतरर्तेऽन्यदिक्श्रुति ।
एनयोगे द्वितीया स्यात् कर्म्म प्रवचनीयके ॥
लक्षणेत्थम्भूताभिभागे च परिप्रती ।
अनुरेषु सहार्थे च हीनेऽपश्च कथ्यते ॥
द्वितीया च चतुर्थी स्याच्चेष्टायां गतिकर्म्मणि ।
अप्राणि हि विभक्ती द्वे मन्यकर्म्मण्यनादरे ॥
नमःस्वस्तिस्वाहास्वधालंवषड्योग ईरिता ।
चतुर्थी चैव तादर्थ्ये तुमर्थाद्भाववाचिन ॥
तृतीया सहयोगे स्यात् कुत्सितेऽङ्गे विशेषणे ।
काले भाव सप्तमी स्यादेतैर्योगे च षष्ठ्यपि ॥
स्वामीश्वराधिपतिभि साक्षिदायादसूतकैः ।
निर्द्धारणे द्वे विभक्ती षष्ठी हेतुप्रयोगके ॥
स्मृत्यर्थकर्म्मणि तथा करोतेः प्रतियत्नके ।

हिंसार्थानां प्रयोगे च सति कर्म्मणि कर्त्तरि ।
न कर्तृकर्म्मणो षष्ठी निष्ठादौ प्रतिपादिता ।
द्विविध प्रातिपदिक प्रातिपदिकमत्रमङ्गलम् ।०।
सुपादिभ्यस्तिङोऽपि स्यात्तत्कारा इमे वै स्मृता ।
तिप्तसन्ति प्रथमो मध्य सिप्थस्थोत्तमपूरुष ।
मिप्वस्मश्च परस्मै तु पदानाञ्चात्मनेपदम् ।
तातातामन्त प्रथमो मध्यस्थासाथांध्वमुत्तम ।
आदेशा इवहिमहान्ता धनिवादपि धातुत ।
नाम्नि प्रयुज्यमानेऽपि प्रथम पुरुषो भवेत् ।
मध्यमो युष्मदि प्रोक्त उत्तम पुरुषोऽस्मदि ।
भ्वाद्या धातव प्रोक्ता सनाद्यन्तास्तु धातव ।
लडीरितो वर्त्तमाने स्मेनातीते च धातुत ।
भूतानद्यतने लङ् च लोङाशिषि च धातुत ।
विध्यादावेवानुमतौ लिङ्विधिर्म्मन्त्रणे भवेत् ।
निमन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु तथाशिषि ।
लिड्भूते परोक्षे स्यात्ह लुङ लुट लृङ भविष्यति ।

स्यादनद्यतने लुट च भविष्यति च धातुत ।
धातोर्लिङ्क्रियाभिपत्तौ लिङर्थे लोट प्रकीर्त्तित ।
लस्थितस्यापि वर्त्तन्ते भावे कर्म्मणि कर्त्तरि ।
प्रवमानमनङ्व्ययन्तमीयकृत्ताश्चादय ।"
इति गारुडे कुमारव्याकरणे २०८ अध्याय ।

कुमार उवाच ।
"सिद्धोदाहरणं वक्ष्ये सन्धिनामिप्रदर्शनम् ।
विपाय सागताग्धौ स्ततम स्यात् पितृषभ ।
होतॄकारो विश्वतेय लाङ्गलीषा मनीषया ।
गङ्गोदक तवल्कार ऋणार्ण प्रार्णमित्यपि ।
प्रौमतैच तवल्कार सैन्द्री सौकार इत्यपि ।
मध्वासनञ्च पित्रर्थे नन्वय नाव्ययोऽजयेत् ।
नायको लवन नावन्त यते तेन ईश्वरा ।
देवीयदमथोऽस्तु चयुरेहि पटू इमौ ।
अमी अश्वा पठन्तीति तदुरादुत्यानि च ।
तथैतत्कु नातीति तन्नव तच्छमशानकम् ।
सुगराण चगरण भवांश्चादयतीति दिक ।
भवांष्टकुरकश्चैव भवांस्तरति चर्च्चितम् ।
भवाञ्छलति साक्ष्ये भवाम्हरोऽश्वन्नोदयम् ।
भवाञ्चीन सन्नरसि नद्धरोषि च राथेनम् ।
कश्चरेत् कठकारेण क कुर्य्यात् क स्थि-
तिम् ।
क इते चेह क पक्ष कोऽर्थ को याति
गौरवम् ।
क इहाय स एषाहूर्देवा आहुष भो व्रज ।
प्रभुर्विष्णुर्ह्वयति च गौर्घ्यतिश्चैव घूर्पति ।
तथाग्नेव ब्रजेत् स स्यात् कथमनुयच्छति ।
कुटीच्छाया तथाच्छाया साधवोऽश्वे तर्ष-
याम ।
समाधा पट पुराणे वै सद्धिप कर्म्मणाङ्ग ।
विद्युत्किरीटौ धाताना चर सम्प्रकर सम ।
सन्नुतञ्च ससर्वञ्च हकाभोनिच महनम् ।
मात्ररश्चिकनतस्थौ बहुम्नोश्चिरपामधौ ।
मात्रोऽग्नित्वि दधीनित्य इन्द्रो देवेविमार्गणा ।
वह्निना पावक देवो मारुत्च वक्तारश्च ।
देवाविषसिपश्च शुक्रोऽन्वय सुत पिता ।
ना प्रशास्ता च रा गौर्ग्ग्लौ स्वद्रावभाच
पुंस्यपि ।०।
घणाभाधान्युक्त स्याधस्वनगुक्यानुगाविध ।
आत्मा राना युवा पन्था पूषब्रह्मणौ प्रभौ ।
विश्वपा उशनानडान् मधुलिट काष्ठतट
तथा ।०।
ननयार्थांस्त्रिगस्तुनि जगतामाहतौ तथा ।
नाम सर्पिवपुश्चैव चर्म्मकनता नपुंसके ।०।
जाया जरा नदी लक्ष्मी श्री स्त्री भूमिवधू
रपि ।
भू पुनर्भूस्तथा धेनु स्वसा माता च गौ स्त्रिय ।
वाक स्रक धी क्षुत् क्षुध मामा युवति ककुभ
तथा ।
द्यौरेति प्राहश्चैव सुमन उष्णिहौ स्त्रियाम् ।
गुणद्रव्यक्रियायोगात्त्रिलिङ्गाश्च वदामि ते ।
शुक्ल कीलालपाश्चैव शुचिश्च ग्रामणी सुधी ।
पटु कमलभू कर्त्ता सुमतो बहव सुगौ ।
सत्यो नामस्तथा स्वसो मधुमच्चमदीयपात् ।
धनार्थी च सुपुत सोमौ नागकस्तादिकस्तथा ।
सुवर्ण बहुपाश्चैव चैव स्वङ्गुण तथा ।०।
सर्व्वविश्वोभये चोभौ अन्यान्यतरावि च ।
इतरस्तरे नेम समोऽथ सिम इत्ययम् ।
पूर्व्वापरावराश्चैव दक्षिणश्चोत्तराधरौ ।
अपरश्चान्तरोऽप्यथ तद्यत्तत्किमदसो इदम् ।
युष्मच्चात् प्रथमचरमान्ते तथाहके ।
एक कतिपयो द्वौ च चय वर्म्मान्यसथा ।०।
सुर्विविन्दुविक्रन्दिष्मार्थ्येण चयति व्यदि ।
नीलुविद्वा सुदीतिश्च नश्यतिश्च इषावपि ।
दीप्यति सूयतिर्व्वापि पुष्यतिरचिनोत्यपि ।
कुटिचारयति स्वपि यधि गुरौ कतौ तथि ।
दधि करोति क्रीणाति इकोतिमुति वर्द्धति ।
कणोऽश्वपदाणेषा धानचञ्च युजा तथा ।०।
भवत् भवान् भवन्तो च द्वैर्थ कर्त्तणमेव च ।
कार्य्यं लतञ्च हला च प्रवया सुलयावरे ।
कूम्भकारी हरा सति देवविप्रवनाम्न ।
नरेण कार्य्यं हरेश्च श्रियौ देहि भोजनम् ।
द्विजाय च वद्विधाम्बा मा तिष्ठोऽस्तु समागत ।
तीर्थस्थितामनाश्चाच्च कर्क्षेय्य चतुरश्च च ।
मध्यमेयो वरवागाच मार्ग विहगमारमयो ।
ग्रामतव्यैव वैश्रिमन्ते वैका वधामति ।
कर्म्म तिष्ठन्ति कर्म्मणे कर्म्मजात् कर्म्मतो मत ।
कर्म्मणश्चैव कर्म्मणिवैर विभारवकथा ।
पूर्व्वं पूर्व्वाच पूर्व्वकाय पूर्व्वेणान् पूर्व्वे इत्यनन् ।
स्कन्द उवाच
सुसिद्धकर्म्म विद्धकर्म्म नाममात्रेण दर्शितम् ।
कात्यायन कुमारात्तु ज्ञात्वा विस्तरमर्थयेत् ।"
इति गारुडे कुमारव्याकरणे २१० अध्याय ।०।
वर्त्तमान अधुनायाँ वार्त्तिकैर्व्वीब्धव्याकरण
मस्ति । एवं सद्दीह्यकमार्थव्याकरणं नानि
सुविक्रमरादित्यव्याकरणं इत्यवर्द्धनव्याकरण
व्याकरणं समरोचरस्यचन्द्रव्याकरणं
पद्मनाभदत्तकृतसुपद्मव्याकरणं वोपदेवकृतमुग्ध
बोधव्याकरणं गोस्वामिकृतहरिनामामृतव्या
करणं भट्टोजीदीक्षितकृतसिद्धान्तकौमुदी व्याक
रणं अनुभूतस्वरूपाचार्य्यादिकृतसारस्वतादि
व्याकरणानि च सन्ति । ० । (विकार । यथा
महाभारते । १२ । २५१ । ११ ।
"व्यवसायात्मिका बुद्धिर्म्मनो व्याकरणात्मकम् ।")
व्याकुल, त्रि, (विशेषेण आकुल ।) शोकादिभि
रितिकर्त्तव्यताशून्य । तत्पर्य्याय । विह्वल २ ।
इत्यमर । (यथा, महाभारते । ३।२००।२५ ।
"शरीर वा शोकवतो नाम्यवाकुलचेतस ।"
उपद्रुत । यथा, भागवते । १ । ३ । २८ ।
"एते चांशकला पुंस कृष्णस्तु भगवान् स्वयम् ।
इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे ।")
व्याकुलात्मा [न्] त्रि (व्याकुल आत्मा यस्य ।)
शोकाभिभूतचित्त । यथा—
"भो हृषा पर्म्मतम्भ बहूकुसुमयुता वायुना
धूयमाना
रामोऽहं व्याकुलात्मा दशरथतनय प्रच्छते
शोकदग्ध ।
बिम्बोष्ठी चारुनेत्रा गजपतिगमना पीनतुङ्गा
सुमध्या
हा सीता केन नीता मम हृदयगता केन वा
कुत्र दृष्टा ।"
इति महानाटकम् ।
व्याकूति, स्त्री, (विशिष्टा आकूति ।) भक्ति ।
इति शब्दापुष ।
व्याकोश, त्रि (व्याकुशति मस्फुटतीति । वि+
आ+कुश+क ।) विकसित । इत्यमर
टीकायां रामाश्रम । (यथा माघे । ३ । ६८ ।
"होतापि तृणमिव माणुपदो विरेज
व्याकोशकोकनदतां दधते न तत्र ।"
भावे घञ । प्रस्फुटनम् । यथा, रघुवंशे ।
१ । ७८ ।
"पद्मव्याकोशं भास्करं बालचन्द्र
व्याकोशकोषं कलिका पुष्पकुम्भम् ।
तत्र किन्तु देवी दधानाभासिदिव
बद्धा चो बद्धचन्द्र वालिन धीरा ।")
व्याकोच त्रि (व्याकुचति हृदयं भासयति वि
कि करोतीति । वि+आ+कुच+क ।) प्रफुल्ल ।
इत्यमर । (यथा महाभारते । ७।३ । २१ ।
"स तद्विकसितदर्शं वदनं दर्शितमम् ।
व्याकोचदृशाभिमुखो नरो विचार शारदे ।")
व्याख्या, स्त्री, (व्याख्यायतेऽनेनेति । वि+आ+ख्या
+ "आतश्चोपसर्गे ।" इत्यड । टाप ।)
विवरणम् । इति शब्दापुष । (यथा, भाग
वते । ७ । १२ । ७ ।
"न हिताय ग्रन्थेन यस्मा वेदान्तेदृक् ।
न व्याख्यामुपयुञ्जीत नारम्भानारभेत् क्वचित् ।"
टीका । यथा भागवते न वस्तोऽन्ययोः ।
"दुर्गा अस्य देहेऽन्यमध्यवर्णा दृष्टोऽन्मते
चक्री ।

व्याघ्रायमवद्युच सुधाटकस्य विटाब च्छटा सुम्भे ।
[illegible] कमलायतो कुचनतो वामदेवो वहिनी
[illegible] निमया सौभाग्यसम्पत करोमि ।")

व्याघ्रगन्धा स्त्री (व्याघ्रस्य गन्धम् ।) उत्कटा भाषया । व्याघ्रया विवर्द्धन मन्यते श्रायते यत् । यथा —
"[illegible] तथाकुलम् ।
[illegible] मुखे ।"
इति [illegible] ॥

व्याघ्रात, त्रि, विहत कथित । वि आङ्पूर्वक [illegible] निष्पन्नमिदम् ।

व्याघात, पुं (व्याहन्यतेऽनेनेति । वि+आ+हन+घञ् ।) विष्कम्भादिसप्तविंशतियोगान्तर्गतयोगविशेषः । यथा —
"परिघस्य त्यजेदर्द्धं शुभकर्म ततः परम् ।
त्यजेदादौ पञ्च विष्कम्भे सप्त शूले च नाडिकाः ।
गण्डव्याघातयोः षट् च नव हर्षणवज्रयोः ।
वैधृतिव्यतिपातौ च समस्तौ परिवर्जयेत् ॥"
इति ज्योतिस्तत्त्वम् ॥

तत्र जातफलम् ।
"व्याघातजन्मा च नरो विलज्जो
व्याघातजन्मा मनुजः कठोरः ।
[illegible] विरोधी
[illegible] ।"
इति कोष्ठीप्रदीपः ॥

[illegible] । (यथा महाभारते ।[illegible]
"[illegible] ।")
[illegible] । इति मेदिनी । अलङ्कारविशेषः ।
[illegible] यथा —
"[illegible] ।
[illegible] स व्याघात इति स्मृतः ॥"
[illegible] उदाहरणम् ।
"[illegible] ।
[illegible] ।"
[illegible] ।

व्याघ्र, पुं (व्याजिघ्रतीति । वि+आ+घ्रा+क ।) [illegible] । बाघ इति भाषा । (यथा, छान्दोग्ये ६ । ९ । ३ ।
"त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यद्भवन्ति तदा भवन्ति ॥") तत्पर्य्यायः । शार्दूलः २ द्वीपी ३ । इत्यमरः । पुण्डरीकः ४ [illegible] ५ । इति [illegible] ७ । इति [illegible] ९ । इति [illegible] १० [illegible] ११ । [illegible] १२ । इति शब्दरत्नावली । [illegible] १३ [illegible] १४ [illegible] १५ [illegible] १६ [illegible] १७ [illegible] १८ ।

अस्य मांसगुणाः ।
"[illegible]
[illegible] ।
[illegible]
[illegible] ॥"
इति राजनिर्घण्टः ॥

स तु [illegible] । यथा,—
"दृष्ट्वा [illegible] व्याघ्रमिव [illegible] भामिनी ।
[illegible]
प्रिया ॥"
इत्यादौ [illegible] ।
[illegible] । (यथा, महाभारते । १ । १५२ । २८ ।
"[illegible] परम् ।
[illegible]
भुञ्जते ॥")
रक्तैरण्डः । करञ्जः । इति मेदिनी ॥

व्याघ्रदल, पुं एरण्डवृक्षः । इति शब्दमाला । राजनिर्घण्टे रक्तैरण्डपर्य्याये व्याघ्रदल इति पाठः ॥

व्याघ्रनख क्ली (व्याघ्रस्य नखमिव ।) [illegible] गन्धद्रव्यम् । तत्पर्य्यायः । व्याडायुधम् २ करजम् ३ चक्रकारकम् ४ । इत्यमरः । [illegible] ५ [illegible] ६ [illegible] ७ व्याघ्रनखी ८ । इति शब्दरत्नावली । (यथा बृहत्संहितायाम् ।७७।६।
"[illegible] व्याघ्रनखेन शुभ्रा
[illegible] ।
[illegible]
करोति [illegible] ॥")
तत्पर्य्यायगुणाः ।
"नखं व्याघ्रनखं व्याडायुधं तच्चक्रकारकम् ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ॥"
इति भावप्रकाशः ॥
[illegible] । इति मेदिनी ॥

व्याघ्रनखक, पुं (व्याघ्रस्य नखमिव कण्टकं यस्य ।) [illegible] । व्याघ्रनखः । इति राजनिर्घण्टः । व्याघ्रस्य नखश्च ॥

व्याघ्रनखी, स्त्री, (व्याघ्रनखमेव । स्वार्थे ङीप् ।) [illegible] । इति शब्दमाला ॥

व्याघ्रनायक, पुं, (व्याघ्रस्य नायक इव ।) [illegible] । इति राजनिर्घण्टः ॥

व्याघ्रपाद, [द्] पुं (व्याघ्रस्य पाद इव पादोऽस्य [illegible] । "[illegible] ।" [illegible] ।) विकङ्कत वृक्षः । इत्यमरः । मुनिविशेषः । इति पुराणम् ॥
व्याघ्रपुच्छवर्द्धि,त्रि । इति [illegible] ।

व्याघ्रपाद पुं (व्याघ्रस्य पाद इव [illegible] ।) [illegible] । [illegible] । इति राज-
निर्घण्टः । (मुनिविशेषः । यथा, महाभारते ।
१३ । १४ । १ ६ ।
"पुरा कृतयुगे तात ऋषिरासीन्महायशाः ।
व्याघ्रपाद इति ख्यातो वेदवेदाङ्गपारगः ॥")

व्याघ्रपुच्छ, पुं, (व्याघ्रस्य पुच्छमिव [illegible] ।) एरण्डवृक्षः । इत्यमरः । व्याघ्रस्य लाङ्गूलञ्च ॥

व्याघ्राट, पुं (व्याघ्र इव अटतीति । अट गतौ + पचाद्यच् ।) भरद्वाजपक्षी । इत्यमरः ।

व्याघ्राटी, स्त्री [illegible] । इत्यमरः ।

व्याघ्राक्ष, पुं, (व्याघ्रस्य अक्षिणी इव अक्षिणी यस्य ।) [illegible] । इति शब्दचन्द्रिका । व्याघ्राक्षि, स्त्री ।

व्याघ्री, स्त्री, (व्याघ्र+ङीष् ।) कण्टकारी । इत्यमरः । व्याघ्रपत्नी च । (यथा रघुः । १२ । ६७ ।
"[illegible] व्याघ्रीमिवाधिश्रित [illegible]
[illegible] ॥")

व्याज, पुं (व्यजति यथार्थव्यवहारात् [illegible] । वि+अज+घञ् । वस्य विभाषा [illegible] ।) कपटः । स तु यथार्थव्यवहार [illegible] । इति [illegible] । [illegible] । [illegible] । यथा [illegible] । [illegible] । [illegible] । [illegible] । [illegible] ।
[illegible] । [illegible] ॥ इत्यमरभरतौ ॥

व्याजनिन्दा, स्त्री, (व्याजेन निन्दा ।) कपटकुत्सा । अलङ्कारविशेषः । यथा,—
"निन्दाया निन्दया व्यक्तिर्व्याजनिन्देति गीयते ।"
इति चन्द्रालोकः ॥
(उदाहरणं यथा,—
"[illegible] ।")

व्याजस्तुति, स्त्री (व्याजेन स्तुतिः । व्याजरूपा स्तुतिर्वा ।) कपटप्रशंसा । अलङ्कारभेदः । यथा,
"उक्तिर्व्याजस्तुतिर्निन्दास्तुतिभ्यां स्तुति-
निन्दयोः ॥"
इति चन्द्रालोकः ॥
(उदाहरणं यथा —
"[illegible] ।")

व्याजोक्ति स्त्री (व्याजेन उक्तिः ।) छलवाक्यम् । अलङ्कारविशेषः । यथा —
"व्याजोक्तिरन्यहेतूक्त्या यदाकारस्य गोपनम् ॥"
इति चन्द्रालोकः ॥
(उदाहरणं यथा,—
"[illegible] ॥")

व्याड, पुं, सर्पः । मांसभक्षकपशुः । इत्यमरः ।
(यथा, माघे । । १२ । १० ।

"श्वा शमली हसो यमी वाङ्क कङ्कस्तथा क्रमात् ।")
इभः । इति शब्दरत्नावली । वृषभः । इति रायमुकुटः ॥

व्याघ्रायुध, क्ली, (व्याघ्रस्य व्याघ्रस्यायुध मस्य ।) व्याघ्रनखाख्यद्रव्यम् । इत्यमरः ॥

व्याडि, पुं, कोषकारमुनिविशेषः । तत्पर्य्यायः । विन्ध्यवासी २ नन्दिनीतनयः ३ । इति हेमचन्द्रः । विन्ध्यस्थः ४ नन्दिनीसुतः ५ । इति त्रिकाण्डशेषः ॥

व्यात्त, त्रि, (वि + आ + दा + क्त ।) प्रसारितम् । विस्तृतम् । यथा,—
"स्तब्धोर्ध्वकर्णं गिरिकन्दराद्भुत
व्यात्तास्यनासं हनुभेदभीषणम् ।
दिविस्पृशत्कायमदीर्घपीवर
ग्रीवोरुवक्षःस्थलमल्पमध्यमम् ॥"
इति श्रीभागवते ७ स्कन्धे ८ अध्यायः ॥
गिरिकन्दरवत् अद्भुत व्यात्त प्रसारितमास्यं नासिके च यस्मिन् । इति तट्टीकायां श्रीधरस्वामी ॥

व्यात्युक्षी, स्त्री, (व्यतिहारेण उक्षणम् । वि + आ + अति + उक्ष + "कर्म्मव्यतीहारे णच् स्त्रियाम् ।" ३।३।४३। इति णच् । ततः "णचः स्त्रियामञ् ।" ५।४।१४। इति अञ् । "टिड्ढाणञिति ।" ४।१।१५। इति ङीप् ।) रथिकानाम् अन्योन्य जलक्रीडनम् । इति सिद्धान्तकौमुद्यादि वृत्तिः । तत्पर्य्यायः जलक्रीडाशब्दे द्रष्टव्यः ॥

व्यादिश, पुं, (विधिविशादिशति स्वस्वकर्म्मणि नियोजयति जगत् । वि + आ + दिश + क ।) विष्णुः । यथा—
"अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः ।
चतुरस्रो गभीरात्मा विदिशो व्यादिशो दिशः ॥"
इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥

व्याध, पुं, (विध्यति मृगादीन् । व्यध + "श्याद्व्यधास्रु..." ३।१।१४१। इति णः ।) मृगविघ्नकारी । शिकारी इति भाषा । स तु चर्म्मकारीगर्भे व्यालिपाज्जातः । यथा,—
"चाण्डालाद्धीवरकन्यायां चर्म्मकारी तस्य योषिति ।
व्याधश्च व्याधतस्तस्मात् बलवान् मृगहिंसकः ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥
तत्पर्य्यायः । मृगवधाजीवः २ मृगयुः ३ लुब्धकः ४ । इत्यमरः ॥ मृगाविधः ५ चीवाटः ६ । इति जटाधरः ॥ आखेटकः ७ वनर्थाशुरः ८ । इति शब्दरत्नावली ॥ (यथा,—
"चित्रा स्त्री व्याधमिलितासुखैव
अत्योऽपि तनुकामदयोऽपि वैष ।
याचन् परिरम्य गतवता वा
चमत्क्रोधाविहितापराधोऽपि ॥"
उद्भटः ।)
दुष्टः । इति मेदिनी । (यथा, मनुः । ४ । २१५ ।
"व्याधस्याप्युग्रस्यान्नं क्लीबस्य च पशोः ... पति ॥")

व्याधभीत, पुं, (व्याधाद्भीतः ।) मृगः । इति शब्दचन्द्रिका । (व्याधभीते त्रि ।)

व्याधाम, पुं, वज्रम् । इति हेमचन्द्रः ॥

व्याधि, पुं, (विविधा आधयोऽस्मात् । यद्वा, वि + आ + धा + "उपसर्गे घोः किः ।" ३।३।९२। इति किः ।) कुष्ठम् । रोगः । इत्यमरः ॥ (यथा महाभारते । १२ । १६ । ८ ।
"द्विविधो जायते व्याधिः शारीरो मानसस्तथा ।
परस्परं तयोर्जन्म निर्द्वन्द्वं नोपलभ्यते ॥")
कामव्याधिस्तापसन्तापता । इति हेममञ्जरी ॥
कुष्ठस्य निदानं यथा —
"व्यालोकनमनन्तोद्यकौतुकाविषयेहिते ।
विरोधयन्त्यन्नपानानि द्रवस्निग्धगुरूणि च ।
पुंसोऽश्नात्यनध्यधोपचितामयज्वराम् ।
धर्म्माकारानभिक्रोध रोमहर्षं सम्प्लवाम् ।
कुष्ठं विमथमथ कुर्य्यात् सप्तधा महारोगम् ॥"
इति गारुडे १७१ अध्यायः ।
अन्यत् कुष्ठशब्दे द्रष्टव्यम् ॥ * ॥ अथ कुष्ठस्य चिकित्सा ।
"वातोत्तरेषु सर्पिर्वमनं श्लेष्मोत्तरेषु कुष्ठेषु ।
पित्तोत्तरेषु मोक्षो रक्तस्य विरेचनं श्रेष्ठम् ।
प्रच्छनमल्पे कुष्ठे महति च शस्तं सिराव्यधनम् ।
बहुदोषः संशोध्यः कुष्ठी बहुशोऽनुरक्षता प्राणान् ॥"
अवलगुज बाकुचीति लोके । पथ्यादिभिर्लेप ॥ * ॥
"सोमराजीभवं चूर्णं ग्राहनेरसमन्वितम् ।
उद्वर्त्तनमिदं हन्ति कुष्ठरोगं सुताम्रजम् ॥"
सोमराजी बाकुचीति लोके । सोमराज्युद्वर्त्तनम् ॥ * ॥
"रसायनं प्रवक्ष्यामि यथावत् तदुदाहृतम् ।
माकर्ण्यपर्वतेऽभयत् प्रयुक्तं महर्षिभिः ।
पुष्पकाले तु पुष्पाणि फलकाले फलानि च ।
संगृह्य पिचुमन्दस्य मूलं त्वक्पत्राणि दलानि च ।
शिरस्त्राणि समाहृत्य भागिकानि प्रकल्पयेत् ।
त्रिफला त्र्यूषणं ब्राह्मी श्वदंष्ट्रारुष्कराग्नयः ।
विडङ्गसारवाराहीलोहचूर्णं सुरभी समा ।
निम्बाह्वयारग्वधकवाक्चिका भद्रका ।
कुष्ठनिम्बवरा पाठा चक्रमर्द्दो धनुष्टकम् ।
खदिरासननिम्बानां घनं क्वाथेन भावयेत् ।
अथवा मधुनिम्बस्य माक्षिकस्तैन च ।
निम्ब पुष्करमूलानि भावयेत्पञ्च दिने ।
मधुरा तिलकविता खदिरासनवारिणा ।
बैडालपदमात्रं चापि कोलकद्वयं प्रभवेत् ।
जीर्णे तस्मिन् समश्नीयात् स्निग्धं लघु हितं च यत् ।

विचर्चिकोदुम्बरपुण्डरीक
चर्म्माख्यविस्फोटकिटिभपामादि ।
इत्याद्यशेषाण्यपि सर्वकुष्ठान्
सप्तधापि निर्हन्ति निरामयम् ।
शतायुरर्हीवरनाशनं च
बलाद्यभूत्पुष्टिरशेषरोगान् ।
धर्म्मात् प्रमेहान् प्रदरांश्च सर्व्वान्
हंसादिवत् सकलान् निहन्ति ।
सप्तोदरं किंवदमीरं त्वरान्
सुविप्रयश्मिर्मन्दुचोपयोगात् ।
सर्व्वोदरोन्नाद् अपि वै दन्ति
सर्व्वाश्रयो वाति विनाशयात् ।
जीर्णेऽम्बरं व्याधिजरादिमुक्तः
शुभी इति सम्पदमासदाति ॥"
अयमर्थः । निम्बस्य पञ्चाङ्गं पक्वपत्त्रपुष्पफलमूलानि समांशानि मधुरिमाणि त्रिगुणानि चूर्णानि
अवरोचक इति समभागान् भावयेत् ।
त्रिफलादीनि पाठान्तानि समुदितान्येक भागानि चूर्णितानि खदिरासनविभागान्
निविड्यानि भावयेत् । तत्र सर्व्वेषोऽप्य
मध्यादिवासलिप्तात् । पञ्चनिम्बादयेत् ।१०।
प्रमितैभावप्रयुक्त तापतिरेकस्य दुष्टदुष्टो
दद्यात् ।
तत्पथ्य पञ्चनितव हि भोजनमाङ्गेऽपि भवता ।
निमपाकरम्यपत्रक्षीराद्युत्पुञ्जोऽविरहान्
सुखादिपृच्छयेलोहटमभविमये
सन् ह ।
सते इवितो वर्ष्ट्रा मनुष्यनित्यौ निग्न
प्राज्ञ ।
सोऽयमेव च कुष्ठ दरम्भयमुत्तममहतीत
पित्तादि पाण्डुरोग विषमादुदरसमेत
गुल्मांश्च ।
वायुवाति कफोपहितं श्वेतः भावमुखौ च न्या ।
प्रमितैक्य सोमराजी । निम्बस्य दिना
चतुर । तत्सम्यक् अवमानदिकल्य । यानिका
हृष्टोति लोके । भावमुखी दुर्गगुडः ॥ * ॥
"त्रिफलं त्रिफला सोमराजी वाराही दया ।
सोमराजीविधि कुष्ठ पञ्चैलाष्टाङ्गपवत् ।
विडङ्गाभ्यचमोन च सुखा चामरराज च ।
यावत्केषाणि सर्व्वाणि तावन्मात्रं गुग्गुलु ।
संपुष्ट कर्षेया चाह्नि गुटिका चाण्डेशक ।
प्राणभोजकाले च माहेश्वरधृत कथा ।
सल्लकारस प्रक्षावि सभोगु इत्यवानि च ।
परमश्वोऽविकारांश्च कुष्ठानसमयसत्वान् ।
महत्सीमानिप्तमयम गुल्मचापि निकृन्तति ।
व्याधि सोऽरुपवतापि जयेत् मधुराद्यातान् ॥"
त्रिफलाद्यो गुग्गुलु ॥ * ॥
"अन्तरकाचित्वारीति गुरु मैढीयकारिष्ट ।
कुष्ठानां कालवातो बाहरेन् परमं त्वम् ॥"
इति वैद्योदयो गुग्गुलु ॥ * ॥
"सम्पादनं पक्वमूलं हिन्दा गोलकन्ती विवेत् ।
मत्वदं इष्टचाव पूर्वं मवार्थेन निवेत ।
चतुर्दोहाय दिवस वाश्चरलनादेव ।
वक्तुरी कार्य च एकमार्गेण निश्चेष्टु ।
कपालमात्र कंकवैदेमं दुमस्थाल्डवं मया ।
निजी इद्वेन्मी दवात्र कलामशींनव निन्दी ।
कर्म्मादौ इष्टमध्ये तु यदीन वर्त्तिवा इत्ये ।
कर्म्मोदवि पदैषुरे वलवस्तानारदेव ।

तत्र शैयानि चूर्णानि सूक्ष्मो विस्तमितात्मना ।
आकुची चाथ चन्द्रन पिचुमर्दौ हरीतकी ।
प्राची दार्विच मञ्जिष्ठा मरिच नागर वचा ।
यवानी सैन्धवं मुस्ता मरीचा नागकेशरम् ।
पर्पट पद्मकं बालमुशीरं चन्दनं तथा ।
गोक्षुरस्य च बीजानि कर्षं रो रक्तचन्दनम् ।
एषां समांशमात्राणां चक्रमेतमिदं पिबेत् ।
यममात्रमिदं प्रातः समशीतोष्णेन हि ।
नाशयेदष्टादश कुष्ठानि निखिलान्यपि ।
वातरक्तानि सर्वाणि सर्वाण्यर्शांसि सेवितः ।
व्यायाममातपं वह्निमम्लं माषं दधि त्यजेत् ।
तैलाभ्यङ्गं तथा प्रातः नरो भल्लातकं त्यजेत् ।"
इति अमृतभल्लातकावलेहः । ● ।
"निम्ब शोपालवा कट्वी त्रायन्ती त्रिफला घनम् ।
पर्पटाकगुडूची च तथा रक्तचन्दनम् ।
पाठा शुण्ठी शटी भार्गी वासा भूनिम्बपद्मकम् ।
यवानीन्द्रयवश्यामा विडङ्गं मधुपाचनम् ।
हरिद्रायुग्मा मेदा पञ्चोलशकोद्भवम् ।
कषायमधुमाक्षिकसहितं वटापलम् ।
मञ्जिष्ठा लाङ्गली दावी पञ्चमाल पुनर्नवा ।
दन्ती त्रिफलाचित्रक भल्लातकुटजकम् ।
अङ्कोटकस्य मञ्जिष्ठा दिपलांश पृथक् पृथक् ।
समोवानानि सर्वाणि चतुर्थोंशे दधीषणे ।
अष्टमांशावशेषन्तु कषायमवतारयेत् ।
विधाय वासका पूर्वं स्थापयेन्नागने दृढे ।
भल्लातकसहस्राणि विप्रा श्रीयमष्टमानि ।
पञ्चदशाधिकन्तु कषायमवतारयेत् ।
तत्र यच्छेन संप्रोक्षय द्वौ कषायौ विनिक्षिपेत् ।
गुडस्य च तुलां दत्त्वा लेहवत् साधु साधयेत् ।
भल्लातकसहस्राणि तत्र बीजानि निःक्षिपेत् ।
त्रिकटु त्रिफला मुस्त विडङ्ग चव्यक तथा ।
चन्द्रन सैन्धवं कुष्ठ रोहिषस्य पलं पलम् ।
सौगन्ध्यं निक्षिपेत्तत्र चातुर्जात पलं पृथक् ।
महाभल्लातको ह्येष महादेवेन भाषितः ।
प्राणिनां हितकामाय कृपया च प्रकीर्तितः ।
निवारयेत्पूर्णमष्टादशविधं कुष्ठम् ।
पुण्डरीकं चर्माख्यं विस्फोटं रक्तमण्डलम् ।
कच्छूं कपालं कुष्ठ पामानं विपादिकाम् ।
वातरक्तं बहुरोगांश्च मायुरोगं प्रणाशयेत् ।
रक्तपित्तमुदावर्तं कासश्वासं भगन्दरम् ।
जराव्याधिं पलितमामवातं सुदुस्तरम् ।
निषेवकस्तु कामिनी विकारादारमैथुने ।
कुर्वते परमां कान्तिं बलीपलितनाशनम् ।
अनुपानं प्रयोक्तव्य हितमौषधं यथोत्तरम् ।
भोजने तु मतं प्राज्ञैः तत्सर्वमेव विधीयते ।"
श्यामा श्वेत धाउ इति ख्याते । अत श्याम निषद्यः ।
"खदिरो खदिरा स्फोटा श्वेतकाष्ठा प्रताभिका ।"
महारक्ती श्वेतग्रन्थ धन श्याम । श्वेती श्यामा खदिरो खदिरनतोऽपरखदिरा इव मत । श्वेतारुणा श्वेतरक्तो कटाक्षा काष्ठ खदिरेति मन्मथान । अथवा अलीम् । धवलगुल श्वेतराजी । अनन्ता दुरालभा । चन्दन श्वेतम् । भार्ग्यां अलाभे कण्टकारी फलम् । श्यामा श्यामा धाउ । हस्तिकर्ण पलिकम् । केदा धवा इति । धमाङ्ग इति चतु । लाक्षेत्र अथवेतम । उष्ठापच धारस्त गुग्गुलुपलम् । सुरदारु वटपर्णा । रोध्यक इति धमानी । महाभल्लातक ।
"मञ्जिष्ठा त्रिफला तिक्ता वचा दारु निशा-
मृता ।
निम्बश्चैषां कृतः क्वाथः सर्वकुष्ठानि नाशयेत् ।"
इति लघुमञ्जिष्ठादिक्वाथः । ● ।
"मञ्जिष्ठा आकुची चक्रमर्दश्च पिचुमर्दकम् ।
हरीतकी हरिद्रा च धात्री वासा शतावरी ।
बला नागबला यष्टीमधुकं सुरकोपि च ।
पटोलस्य उशीरोर गुडूची रक्तचन्दनम् ।
मञ्जिष्ठादिरयं क्वाथः कुष्ठानां नाशनः परः ।
वातरक्तस्य सर्वस्य नाशनः कफवातजः ।"
इति मध्यममञ्जिष्ठादिक्वाथः । ● ।
"मञ्जिष्ठा कुटजामृता मनघना शुण्ठी हरिद्रा
द्वयं
क्षुद्रादिपटोलकुटकटुका भार्गी विडङ्गा
निम्बम् ।
मूर्वा दारु कलिङ्गकद्वयमघा त्रायन्ति पाठा
वरी
त्रायन्ती त्रिफला किरातकमहाश्यामा तथा
रग्वधम् ।
श्यामा चन्दनयुग्मचन्द्रक दन्ती वचा
कौटजं
वासा पर्पटवारिदा प्रतिविषानन्ता विशाला
चलम् ।
मञ्जिष्ठादिरयं कषायविहितः पिबन् पुमान् य
पिबेत्
त्वग्दोषा हतिरेव यान्ति विलयं कुष्ठानि
चाष्टादश ।
नाम्ना सन्ति वातरक्तमखिलं नश्यन्ति रक्ता
मया
श्लीपदं चापि सुप्तता नयनजा दोषाः प्रशा-
म्यन्ति च ।"
खदिरः निम्ब । कलिङ्ग इन्द्रयव । वरु अम्बरा । वरी शतावरी । त्रायन्ती खदिर । अनन्त विडङ्गार । श्यामा प्रियङ्गु । चन्दनद्वय रक्तं श्वेतम् । वारिदा काउ । अनन्ता दुरालभा । विशाला इन्द्रवारुणी इति । अत बैद्यराजा । बृहन्मञ्जिष्ठादिक्वाथः ।
"मरिच त्रिवृता मुस्ता हरितालं मनःशिला ।
देवदारु हरिद्रे द्वे मांसी कुष्ठं च चन्दनम् ।
विशाला करवीरश्च चोरनर्कगवादनम् ।
गोमयस्य रसं कुर्यात् प्रत्येकं कर्षसम्मितम् ।
विषस्यार्धपलं देयं तैलं प्रस्थमितं कटु ।
पचेच्चतुर्गुणे नीरे गोमूत्रे द्विगुणे तथा ।
मरिचाद्यमिदं तैलमभ्यङ्गात् कुष्ठनाशनम् ।
एतत्स्याभ्यङ्गतः श्वित्रं विवर्णं तनुजमाहरेत् ।
तैलमेतन्नयेत् कच्छूं पामां श्वित्रं विचर्चिकाम् ।
पुण्डरीकं तथा दद्रुं सुप्ततां विसर्पिकाम् ।"
इति लघुमरिचाद्यं तैलम् । ● ।
"मरिचं त्रिवृता दन्ती चीरमार्कं शकृद्रस ।
देवदारु हरिद्रे द्वे मांसी कुष्ठं सचन्दनम् ।
विशाला करवीरश्च हरितालं मनःशिला ।
चित्रकं लाङ्गली मुस्ता विडङ्गं चक्रमर्दकः ।
शिरीषः कुटजो निम्बः सप्तपर्णोऽमृता सुही ।
शम्याको नक्तमालश्च खदिरो बाकुची वचा ।
ज्योतिष्मती च पलिका विष द्विपलिकं भवेत् ।
आढकं कटुतैलस्य गोमयञ्च चतुर्गुणम् ।
तन्मात्रे गोमूत्रे च शनैर्मृद्वग्निना पचेत् ।
मरिचाद्यमिदं तैलं महद्भिर्मुनिभिरीरितम् ।
म्रक्षणेन तैलेन क्षपयेत् कौष्ठिकान् व्रणान् ।
पामाविचर्चिकादद्रुकण्डूविस्फोटकानि च ।
वलयः पलित छाया नील व्यङ्गं तथैव च ।
अभ्यङ्गेन प्रणश्यन्ति सौकुमार्यञ्च जायते ।
प्रथमे वयसि स्त्रीणां यासां नस्यं प्रदीयते
तासामपि जरां प्राप्य न स्तनौ स्तनौ पतितौ
स्तनौ ।
बलीवर्दस्तुरङ्गो वा गजो वा वायुपीडितः ।
त्रिभिरभ्यङ्गैः दर्पं भवेन्मारुतविक्रमः ।"
ज्योतिष्मती मालकाङ्गनीति लोके । इति महा
मरिचाद्यतैलम् । ● ।
"तालकञ्च तुषवारि यस्य सप्ति पृथक् पृथक् ।
अधकतोर तदुपाद्य चारितालं विभिन्नके ।
पुनर्वार्षा ऋतुषि तालक तद्विमर्दनम् ।
दिवमेकं तत्तरुणान् चवर्णं गमितं यति ।
कुर्वीत वटिकां तास्तु शोषयेत् चण्डगातपे ।
पुनर्वासनसाम्यभारे स्थाली गलावधि ।
पूरयेच्च तत भारं दद्येत् पोडशन हि ।
भारस्योपरि तां दद्यात् तालकस्य तु वटि
काम् ।
तत आच्छादयेत् धन्या सुरा तला विधिवधेत् ।
स्थाली पुत्रा निधायाग्निमसर्दं ज्वालयेद्
भिषक् ।
निरन्तरमहोरात्रं पचेत् पञ्च दिनानि च ।
स्वाङ्गशीतं समुत्तार्य गृह्णीयात् कुशलम् ।
तालकेश्वरनामायं गुञ्जामितो रसः ।
गुडूच्यादिकषायेण सहानेनान् विनाशयेत् ।
अष्टादशापि कुष्ठानि वातरक्तं तथोल्बणम् ।
फिरङ्गदेशजं रोगं पुंसां च नयोत्तरम् ।
एतद्वैकवटी तु चरकार्वे विजयम् ।
तथा कटुरसं वह्निमातपं दूरतस्त्यजेत् ।
लवणं च परित्यज्य च लवणानि भयप्रद ।
न तु सैन्धवमगीवात् मधुरौषधं हि च ।"
इति तालकेश्वरो रसः । ● ।
"तालकाद्विशत्भागं तत्तु विशुद्धतम् ।
प्रकारौ दिनको कन्याम्बुनोद्धृत्य मर्दयेत् ।
सहर्ष पुटे मीढा मूर्छे सकल निरम् ।
अटम् देवं तावं श्रीपमल चतुर्दलम् ।

गम्भीराद्विदिनं घृतं मिश्रयेच्च पिबेत् ।
अस्य माषद्वयं खादेद्व्याधिषोडशवर्षयुतम् ।
मध्वाज्यैर्नागवल्लीजे कर्षं सिद्धासन परम् ।
तालकेश्वरनामायं सर्व्वकुष्ठहरो रसः ॥"
पथ्यं मारितं तालम् । इति द्वितीयतालकेश्वरो रसः ॥ ० ॥

"रसो बलिस्तालकमर्य पुरोऽपि
शिलाजतु स्याद्विषतिन्दुकञ्च ।
वरा च तुल्यं गगनं करञ्ज-
बीजं पृथग्भागचतुष्टयञ्च ॥
समर्द्य सर्व्वं मधुना घृतेन
घृतस्य पात्रे निहितं प्रयत्नात् ।
कर्षं भजेत् प्रत्यहमस्य पथ्यं
शाल्योदनं दुग्धमधुत्रयञ्च ॥
त्रिगोदिकर्णाकुलिकाभिकोऽपि
भवेदनेन स्मरतुल्यमूर्त्तिः ।
दारापरित्याग इह प्रदिष्टो
विशोदनं तत्र निरुद्धमध्ये ॥"

तालकमत्र मारितम् । पुरो गुग्गुलुः । बलि गन्धकम् । विषतिन्दुकं कुचिला । वरा त्रिफला । इत्यादि त्रिफलान्तं सर्व्वं तुल्यम् । गगनमभ्रकम् । करञ्जबीजञ्च पृथक् चतुर्गुणं स्यात् । तत्र कुष्ठे बहुमले यदि तिक्तोदनमेव पथ्यम् । इति गलत्कुष्ठाधिकारे । इति भावप्रकाशः ॥ ० ॥ अथ सर्व्वव्याधिहरकवचम् ।

हरिवंशे ।

"सर्व्वव्याधिहरं वक्ष्ये वैष्णवं कवचं शिवम् ।
येन रक्षा कृता शम्भोः पीत रक्षयत पुरा ॥
प्रणम्य देवमीशानमजं नित्यमनामयम् ।
देवं सर्व्वेश्वरं विष्णुं सर्व्वव्यापिनमव्ययम् ॥
बध्नाम्यहं प्रतिसरं नमस्कृत्य जनार्द्दनम् ।
अमोघाप्रतिमं सर्व्वं सर्व्वदुःखनिवारणम् ॥
विष्णुर्मामग्रतः पातु कृष्णो रक्षतु पृष्ठतः ।
हरिर्मे रक्षतु शिरो हृदयञ्च जनार्द्दनः ॥
मनो मम हृषीकेशो जिह्वां रक्षतु केशवः ।
पातु नेत्रे वासुदेवः श्रोत्रे सङ्कर्षणोऽवतु ॥
प्रद्युम्नः पातु मे घ्राणमनिरुद्धस्तु चर्म्मकम् ।
वनमाली गलस्यान्तं श्रीवत्सो रक्षतादधः ॥
पार्श्वं रक्षतु मे चक्रं वामं दैत्यनिवारणम् ।
दक्षिणन्तु गदा देवी सर्व्वासुरनिवारिणी ॥
उदरं मुषलं पातु पृष्ठं मे पातु लाङ्गलम् ।
ऊर्द्ध्वं रक्षतु मे शार्ङ्गं जङ्घे रक्षतु नन्दकः ॥
पार्ष्णी रक्षतु शङ्खश्च पद्मं मे चरणावुभौ ।
सर्व्वकार्य्यार्थसिद्ध्यर्थं पातु मां गरुडः सदा ॥
वराहो रक्षतु जले विषमेषु च वामनः ।
अटव्यां नारसिंहश्च सर्व्वतः पातु केशवः ॥
हिरण्यगर्भो भगवान् हिरण्यं मे प्रयच्छतु ।
सांख्याचार्य्यस्तु कपिलो धातुसाम्यं करोतु मे ॥
श्वेतद्वीपनिवासी च श्वेतद्वीपं नयत्वजः ।
सर्व्वान् सूदयतु शत्रून् मधुकैटभमर्द्दनः ॥
विष्णुः सदा विकिरतु किल्विषं मम विग्रहात् ।
हंसो मत्स्यस्तथा कूर्म्मः पातु मां सर्व्वतो दिशम् ॥
त्रिविक्रमस्तु मे देवः सर्व्वान् पापान् निकृन्ततु ।
नरनारायणौ देवौ बुद्धिं पालयतां मम ॥
शेषो मे निर्म्मलं ज्ञानं करोत्वज्ञाननाशनम् ।
वडवामुखो नाशयतु कल्मषं यत् कृतं मया ॥
पद्भ्यां ददातु परमं सुखं मूर्द्ध्ना मम प्रभुः ।
दत्तात्रेयः कलयतु सपुत्रपशुबान्धवम् ॥
सर्व्वानरीन्नाशयतु रामः परशुना मम ।
रक्षोघ्नस्तु दाशरथिः पातु नित्यं महाभुजः ॥
शत्रून् मे समरे हन्याद्रामो यादवनन्दनः ।
प्रलम्बकेशिचाणूरपूतनाकंसनाशनः ॥
कृष्णस्य यो बालभावः स मे कामान् प्रयच्छतु ।
अन्धकारं तमो घोरं पुरुषं कृष्णपिङ्गलम् ॥
पश्यामि भयसन्त्रस्तः पाशहस्तमिवान्तकम् ।
ततोऽहं पुण्डरीकाक्षमच्युतं शरणं गतः ॥
धन्योऽहं निर्भयो नित्यं यस्य मे भगवान् हरिः ।
ध्यात्वा नारायणं देवं सर्व्वोपद्रवनाशनम् ॥
वैष्णवं कवचं बद्ध्वा विचरामि महीतले ।
अप्रधृष्योऽस्मि भूतानां सर्व्वदेवमयो ह्यहम् ॥
स्मरणाद्देवदेवस्य विष्णोरमिततेजसः ।
सिद्धिर्भवतु मे नित्यं यथामन्त्रमुदाहृतम् ॥
यो मां पश्यति चक्षुर्भ्यां यञ्च पश्यामि चक्षुषा ।
सर्व्वेषां पापदुष्टानां विष्णुर्बध्नाति चक्षुषी ॥
वासुदेवस्य यच्चक्रं तस्य चक्रस्य ये त्वराः ।
ते हि छिन्दन्तु पापं मे मम हिंसन्तु हिंसकान् ॥
राक्षसेषु पिशाचेषु कान्तारेष्वटवीषु च ।
विवादे राजमार्गेषु द्यूतेषु कलहेषु च ॥
नदीसन्तारणे घाते संप्राप्ते प्राणसंशये ।
अग्निचौरनिपाते च सर्व्वग्रहनिवारणे ॥
विद्युत्सर्पविषोद्वेगे रोगे च विघ्नसङ्कटे ।
जप्यमेतज्जपेन्नित्यं शरीरे भयमागते ॥
अयं भगवतो मन्त्रो मन्त्राणां परमो महान् ।
विख्यातं कवचं गुह्यं सर्व्वपापप्रणाशनम् ॥
स्वमायाकृतनिर्म्माणकल्पान्तगहनं महत् ।
अनाद्यन्त जगद्बीज पद्मनाभ नमोऽस्तु ते ॥
ॐ कालाय स्वाहा । ॐ कालपुरुषाय स्वाहा । ॐ कृष्णाय स्वाहा । ॐ कृष्णपुरुषाय स्वाहा । ॐ चण्डाय स्वाहा । ॐ चण्डपुरुषाय स्वाहा । ॐ प्रचण्डाय स्वाहा । ॐ प्रचण्डपुरुषाय स्वाहा । ॐ सर्व्वाय स्वाहा । ॐ सर्व्वपुरुषाय स्वाहा । ॐ नमो भुवनेशाय त्रिलोकधात्रे इलिहि मिलिहि स्वाहा । ॐ नमो नमो नामवे ये ये बलवा वा दानवा दैवा दैत्यादय यक्षराक्षसभूतपिशाचकूष्माण्डापस्मारकोन्माद ज्वरदाहैकाहिकद्वितीयकतृतीयकचातुर्थकमो हूर्त्तिकदिनज्वररात्रिज्वरसन्ध्याज्वरसर्व्वज्वरा रोगाः कृत्यादीश्वकूष्माण्डकारकाद्यस्य विकारोत्पादिनं शरीरं मम वर्त्तन्ते भग्न मुखबाहुहस्तपादोदरविदारणं कुर्व्वन्तो रक्ष । ॐ हूँ हूँ हिरण्य कवचाय ममाग्रतो जय सविक्रमो रक्ष । ॐ त्रिं त्रिं त्रिं दक्षिण ज्वलज्ज्वालाकारा महाविष्णु जगतो रक्ष । ॐ श्रीं श्रीं श्रिं श्रिं हारेण श्रीर नाम्नानि विषमोक्ष विघ्नविषमोक्ष मोक्षयतु स्वाहा । दक्षिणतो रक्ष मां चतुर्दश कर्म्म भूतभयोपद्रवेभ्यो रक्ष रक्ष जय जय विजयते न जीयते विजयमयोऽहं सततासवे । भयदस्य भयमोभयोऽभय दिशतु ममास्तां तारकमच्युत । तदुदरमखिलं विशन्तु लोका युगपरिवर्त्तनकाल यथावदनमिव प्रविशन्ति शलभाः ॥
वासुदेवं सङ्कर्षणं प्रद्युम्नञ्चानिरुद्धकम् ।
सर्व्वज्वरापहं प्रपद्ये विष्णुर्नारायणो हरिः ॥"
इत्यादिमत्स्यपुराणे मार्कण्डे सर्व्वव्याधिहरविष्णुकवचं नाम ५ अध्यायः ॥

व्याधिघातः, पुं, (व्याधिर्घातो यस्मात् ।) आरग्वधद्रुमः । इत्यमरः ॥

व्याधितः, त्रि, (व्याधिः सञ्जातोऽस्येति । तारकादित्वादितच् ।) व्याधियुक्तः । तत्पर्य्यायः । आमयावी १ विकृतः २ अपटुः ३ आतुरः ४ अभ्यमितः ५ अभ्यान्तः ६ । इत्यमरः ॥ रोगी ७ । इति जटाधरः ॥ (यथा, हितोपदेशे ।
"दरिद्रान् भर कौन्तेय मा प्रयच्छेश्वरे धनम् ।
व्याधितस्यौषधं पथ्यं नीरुजस्य किमौषधैः ॥")

व्याधिहन्ता, [ऋ] पुं, (व्याधिं हन्ति ।) वाराहीकन्दः । इति राजनिर्घण्टः ॥ व्याधिघातके, त्रि ॥

व्याधुतः, त्रि, (वि+आ+धु+क्तः ।) कम्पितः । इति शब्दरत्नावली ॥

व्याधूतः, त्रि, (वि+आ+धू+क्तः ।) कम्पितः । इति शब्दरत्नावली ॥ (यथा, गीतगोविन्दे । १ । ३८ ।
"उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुर-
क्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः ॥")

व्यानः, पुं, (व्यानिति सर्व्वशरीरं व्याप्नोतीति । वि+आ+अन+अच् ।) शरीरस्थपञ्चवायुमध्ये सर्व्वशरीरगवायुः । इत्यमरः ॥ एते प्राणादयः पञ्च वायवः शरीरे तिष्ठन्ति ते च विशद्य व्याख्याताः । यथाह ।
"हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः ।
उदानः कण्ठदेशे च व्यानः सर्व्वशरीरगः ॥"
इति ॥

एवं महाभारते यथा —
"अयनरैर्दलं प्राणादुक्तोऽसौ वर्त्तते नरम् ।
मायकानि विकेत्यानि सहायतः प्रमादतः ॥"
इति भरत ॥

वीरव्याप्तिमती धमन्यै । व्यापनम् । व्याप्तवायुरकोऽपि । यथा ।
"व्यानो व्याप्नोति सकलं व्यानो वायुरुदाहृतः ।
महाबलवताद्धवो व्यानोपान्तगतः सदा ।
न व्याधिकर्म्मणोऽन्यो वा दैवे दुर्व्वेद्यति ।
प्राणे सर्व्वे विचरन्ति निरन्तरं निरन्तरम् ।
सकलकर्म्मं सर्व्वं प्राणवेदमन्येन ॥"
इति शारदातिलकटीका ॥

व्यापकः, त्रि, (वि+आप+ण्वुल् ।) विस्तृतिकः । द्वैतिः स ।

यथा —
"साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा ।
स उपाधिर्भवेत्तस्य निष्कर्षोऽयं प्रदर्श्यते ॥"
इति भाषापरिच्छेदः ।

व्याच्छादक । यथा,—
"यच्चास्य व्यापकं धाम च्छन्नमकृष्णम् ।
अथात्मानमभिव्येश्वरं तदिदो विदुः ॥"
एतस्य भावार्थस्तु व्यापकं व्याच्छादकं अभि योगापत्तिभूतमिति यावत् । इति यमहार तत्त्वम् । (यथा, कुमारसम्भवे । ६ । ७१ ।
"तिर्यगूर्द्ध्वमधस्ताच्च व्यापको महिमा हरेः ॥")

व्यापकन्यासः, पुं शिरश्च पादान्तं यावत् शरीरोपरि मन्त्रविन्यासः । यथा ।
"षडङ्गन्यासिको न्यासः कराङ्गुलिकृतः परम् ।
अङ्गुलिव्यापकन्यासौ करादिन्यास एव च ॥
तत्त्वन्यास इति ख्यातः प्राणायामस्ततः परम् ।
ध्यानं पूजा जपश्चैव सर्वतन्त्रेष्वयं विधिः ॥"
इति तन्त्रसारः ।
प्रयत्नस्तु व्यापकशब्दे द्रष्टव्यः ।

व्यापद् स्त्री, विपूर्वादापूर्वात् पदधातोः क्विप्प्रत्ययेन निष्पन्नमेतत् । मृत्युः । आपत् । (यथा, कथासरित्सागरे । २८ । १८ ।
"यत्र अपहृता व्यापदिहापि वर्त्तिता मम ॥")

व्यापन, क्ली, (वि + आप + ल्युट् ।) व्याप्यकरणम् । व्याप्तिः । यथा । अत्र मङ्गलमस्य प्रकृष्ट दृष्टत्वं भवति यदा तत्प्रागभावतत्पूर्व-भावाभावयोरेकतरव्याप्त्यभावस्य तत्प्रागभाव एव तत्प्रागभावयोग्य न विघ्नाद्यधिकरणस्य मात्रव्यापकत्वम् । इति मङ्गलवादतत्त्वम् ।

व्यापन्न, त्रि, (वि + आ + पद् + क्त ।) मृतः । इति हेमचन्द्रः ।

व्यापादः पुं, (वि + आ + पद् + घञ् ।) द्रोहचिन्तनम् । इत्यमरः । (यथा, राजतरङ्गिण्याम् । ८ । १११ ।
"रक्षन्नेव नृपः सुप्ते लब्धो व्यापादचिन्तये ॥")

व्यापादनं क्ली, (वि + आ + पद् + णिच् + ल्युट् ।) मारणम् । इति हेमचन्द्रः । (यथा माघे । १९ । ६२ ।
"व्यतीते च निशीथे बाणाभिन्नव्यापादनोद्यताम् ।
सुरभिं प्राप माघ स्त्री ज्ञात्वा रामवासम ॥")
अत्राभिप्रेतकनम् । इत्यमरटीकायां रामाश्रमः ।

व्यापादित त्रि (वि + आ + पद् + णिच् + क्त ।) मारितः । यथा,—
"यथा देवपुत्रि कावि दैवादृष्टव्यापादिता भवेत् ।
पादं पादञ्च कृष्णमाषादौ पृथक् पृथक् ॥"
इति प्रायश्चित्ततत्त्वधृतब्रह्माण्डपुराणवचनम् ।

व्यापिका स्त्री (व्यापक + टाप् अत इत्वम् ।) व्यापिनी । यथा,—
"धर्मस्य नित्या सा धर्मपूर्णैव पूजिता ।
यथा विना अमृतलक्षणैव तिथिर्विभिन्नम् ।
षष्ठे यावदमा या च वेलायां कन्दकारिणी ।
व्याप्तिविपर्यया च दाम्पे कथिता भिदा ।
क्लौ महाप्रभता च सर्वेव व्यापिका भवेत् ।
कपटेन धर्मं भाषा धनस्येव पदे पदे ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १ अध्यायः ।

व्यापार, पुं, (वि + आ + पृ + घञ् ।) कर्म्म । यथा,—
"स्नात प्राणवियोगफलको व्यापारो हनन
स्मृतम् ।
रागाद्दर्पात् प्रमादाद्वा स्वत परत एव वा ॥"
इति प्रायश्चित्ततत्त्वधृतापिपुराणवचनम् । (व्याहारम् । इति मल्लिनाथः । यथा, कुमारे । ६ । ६९ ।
"आर्याप्यरुन्धती तत्र व्यापारं कर्त्तुमर्हति ।
प्रायेणैवंविधे कार्ये पुरन्ध्रीणां प्रगल्भता ॥"
तज्जन्यत्वे सति तज्जन्यजनक । इति न्याय शास्त्रम् । यथा, भाषापरिच्छेदे ।
"विषयेन्द्रियसंयोगो व्यापारः सोऽपि षड्-
विध ॥")

व्यापारी, [न्] त्रि, (व्यापारोऽस्त्यस्येति । व्यापार + इनि ।) व्यापारविशिष्टः । अस्य स्त्रियां ङीप् । व्यापारिणी । यथा —
"वाग्वाणौ हादिव्यापारी रथादिविक्रयी च यः ।
स याति नामवेदस्य नार्मेविदित एव च ॥"
इति ब्रह्मवैवर्त्तपुराणम् ।

व्याप्ती, [न्] पुं, (व्याप्नोति सर्वमिति । वि + आप + णिनि ।) विष्णुः । यथा,—
"लवनः क्षणमो व्याप्ती वैकालो नैकमोदकृत् ।"
इति महाभारते ।
तस्य सहस्रनामस्तोत्रे । १३ । १४९ । १६ । त्रि, व्यापक । यथा,—
"वित्तश्चव्यापिनी या तु येन पूज्या सदा तिथिः ।
न तत्र युग्मादरणमत्र हरिवासरात् ॥"
इति तिथ्यादितत्त्वधृतपरामरवचनम् ।

व्याप्त, पुं (वि + आ + प + क्त ।) कम्र धवित । यथा,—
"वियात्रो कर्मकर्चिर व्याप्तो व्याहृत स ॥"
इति हेमचन्द्रः ।
व्यामरहस्ति, त्रि । वि आङ पूर्व ए धातो लपश्चैव निष्पन्न । (यथा उत्तरचरिते । ६ ।
"व्याप्तिधिकपरिव्याप्ततैकयोक्ती
रवैदिलमत्रलाभ रामिरेव चरयोः ॥")

व्याप्तं, त्रि (वि + आप् + क्त ।) सम्पूर्णम् । तत् पर्य्याय । पूर्णम् २ आचितम् ३ छन्नम् ४ पूरितम् ५ भरितम् ६ निचितम् ७ । इति हेमचन्द्र । (यथा, गीतायाम् । ११ । २० ।
"द्यावापृथिव्योरिदमन्तरं हि
व्याप्तं त्वयैकेन दिशश्च सर्व्वाः ॥")
व्याप्तम् । समाक्रान्तम् । इति मेदिनी । ख्यातिम् । यथा । ख्यात इ अतिष्ठ कर्म इत्यत्र व्याप्तमपि पाठः । इत्यमरटीकायां रायमुकुटः ।

व्याप्ति स्त्री (वि + आप + क्तिन् ।) व्यापनम् । (यथा, माघवे । ७ । ८ । १० ।
"कुद्र स्थिता विभवभाजि
व्याप्तिरिव भूतेषु स्थितेषु व्यापक ॥")
लाभः । इति मेदिनी । रत्याद्यासावे लभ्यमिति हेमचन्द्रे पाठः । सिद्धाष्टैश्वर्य्यान्तर्गतैश्वर्य्य-विशेषः । यथा,—
"अणिमा लघिमा व्याप्तिः प्राकाम्यं महिमा
तथा ।
ईशित्वञ्च वशित्वञ्च तथा कामावसायिता ॥"
इति शब्दमाला । ० ।
व्यापकता आभ्यन्तरव्याप्तमित्यर्थः । यथा । यथा साध्यसाधनयोर्व्याप्यव्यापकभावः । एव अन्वय व्याप्तिः । यस्य स्थाने धूमः तत्र वह्निः इत्यभिचारज्ञानं सहचारज्ञानञ्च कारणम् । एवं साध्याभावव्यापकीभूताभावप्रतियोगित्वम् । एवं व्यतिरेकव्याप्तिः । यस्य स्थाने यत्र साध्याभाव एवं हेत्वभावस्य सहचारज्ञानं व्यभिचारज्ञाना-भावश्च कारणं तत्र प्रमाणम् ।
"व्याप्तिः साध्यवदन्यस्मिन्नसम्बन्ध उदाहृतः ।
अथवा हेतुमन्निष्ठविरहाप्रतियोगिना ॥
साध्येन हेतोरेकाधिकरण्यं व्याप्तिरुच्यते ।
व्यभिचारस्याग्रहोऽपि सहचारग्रहस्तथा ॥
हेतुर्व्याप्तिग्रहे तर्कः क्वचित् शङ्कानिवर्त्तकः ।
वैशिष्ट्यं भवेद्यद्विशेष्यव्यतिरेकत ।
अन्वयव्याप्तिरुक्तैव व्यतिरेकादथोच्यते ।
साध्याभावव्यापकत्वं हेत्वभावस्य यद्भवेत् ॥"
इति भाषापरिच्छेदः ।

व्याप्तिकर्म्मा [न्] पुं, (व्याप्तिर्विशिष्ट कर्म्म यस्य ।) व्यापनक्रियाविशिष्टः । स एव व्याप्तिक । तद्वैदिकपर्य्यायः । इन्वति १ नक्षति २ व्यानाश ३ व्याप्तः ४ आप ५ आपान ६ अश्नुत् ७ नशत् ८ आनशे ९ अश्नुते १० । इति दश व्याप्तिकर्म्माणः । इति वैदिकनिघण्टौ २ अध्याये । १८ ।

व्याप्य, क्ली (व्याप्यते इति । वि + आप + यत् ।) व्यापकम् । यथा । व्याप्यं विशुद्ध व्यापकम् । इति मल्लिनाथकृत विकाशटीका । कुष्ठौषधम् । इत्यमरः ।

व्याप्य, त्रि, (वि + आप् + ण्यत् ।) व्याप्तिविशिष्टः । व्यापनीय । यथा,—
"प्रकारं वै कृतिव्याप्तिकपालविषयं मलिनाप्ये
विशेषणं तदपि इमवै साधि वाशीति वाचौ ।
व्याप्यमाप्ते व्यपति यदा गन्धमत्वादिवेदी
व्याप्यभावादूनव्यवहारं व्यापकस्याविशिष्टौ ॥"
इति पदाङ्कदूतम् ।
(यथा, मानवे । ७ । ६ । २५ ।
"प्रसन्नात्मकत्वेन हस्तत्वेन च सर्व्वम् ।
व्याप्य व्यानवनिर्द्दिष्टो हरिर्द्दिष्टोऽभिव्याप्तः ॥")

व्यामः, पुं, (विशेषेण अम्यतेऽनेन । अम गतौ + घञ् ।) तिर्य्यग्भावेन प्रसारितयोर्बाह्वोरन्तरम् । वे इति भाषा । व्यामोऽयमेव व्याम इत्यपि क्वचित् दृश्यते च । एव मदमोतो । "व्यामव्यायामयोर्वाऽपि केकरे

प्रहारिणी।” इति हेमचन्द्रः। (यथा, महाभारते। १। ११। १६।
“ततो भीमो महाबाहुरारुह्य तरसा द्रुमम्।
दध्यावममयादिश निष्फलमकरोत् तदा॥”)
व्यामन, स्त्री, (वि+आ+यम+ल्युट्।) व्याम। इति त्रिकाण्डशेषः॥
व्यामिश्र, त्रि, (वि+आ+मिश्र+घञ्।) संमिश्रितम्। मिश्रविषयाद्यात्मीभावकरणम्। यथा,—
“व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे।
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम्॥”
इति श्रीभगवद्गीतायाम्। ३। २।
क्वचित् कर्मप्रशंसा क्वचित् ज्ञानप्रशंसा इत्येवं व्यामिश्रं सन्देहोत्पादकमिव यद्वाक्यं तेन मे मतिमुभयतः दोलायितां कुर्वन् मोहयसीव। इति तट्टीकायां श्रीधरस्वामी॥
व्यायत, त्रि, (विशेषेण आयतम्।) व्यापृतम्। दैर्घ्यम्। (यथा, शाकुन्तले। २।
“अपचितमपि गात्रं व्यायतत्वादलक्ष्यं।
गिरिचर इव नागः प्राणसारं बिभर्ति॥”)
दृढम्। अतिशयः। इति मेदिनी॥
व्यायाम पुं, (वि+आ+यम+घञ्।) पौरुषम्। (यथा, महाभारते। ३। १८। ७।
“व्यायामयद्दृमत्यर्थं शकटावयम महत्।
सर्वायुधमहामात्रं प्रभुवारकारकम्॥”)
श्रमः। (यथा महाभारते। १। १७१। ६।
“तपामवधित योऽथ ब्राह्मणस्तु पिपासितः।
व्यायाम कर्शितः वशिष्ठस्याश्रमं प्रति॥”)
विषमः। दुर्गसञ्चारः। इति मेदिनी॥ व्याम। इति हेमचन्द्रः॥ मल्लक्रीडा। कुस्ती इति पारस्य भाषा। (यथा, महाभारते। १२। २१। ७।
“अन्ये साम प्रशंसन्ति व्यायाममपरे तथा॥”)
अस्य गुणादि यथा,—
“व्यायामो हि सदा पथ्यो बलिनां स्निग्ध भोजिनाम्।
स च शीते वसन्ते च तेषां पथ्यतमः स्मृतः।
सर्वेष्वृतुषु घर्मेऽपि भूरेरामहितार्थिभिः।
बलस्यार्द्धेन तु कर्त्तव्यो व्यायामो हन्त्यतो बलम्।
हृदि स्थानस्थितो वायुर्यदा वक्त्रं प्रपद्यते।
बलस्यार्द्धं तं विजानीयाद्यतोऽप्युषधेन च।
वाचयं कर्मसामर्थ्यं स्थैर्यं क्लेशसहिष्णुता।
दोषक्षयोऽग्निवृद्धिश्च व्यायामादुपजायते।
व्यायामं कुर्वतो नित्यं विरुद्धमपि भोजनम्।
विदग्धमविदग्धं वा निर्दोषं परिपच्यते।
न च व्यायामवदस्मत् स्थौल्यापकर्षणम्।
न च व्यायामिनं मर्त्यं मर्द्दयन्त्यरयो बलात्।
न चैनं सहसाक्रम्य जरा समधिरोहति।
व्यायामदृढगात्रस्य महाप्रदर्शितस्य च।
वायसो योपसर्पन्ति वैनतेयमिवोरगाः।
रक्तपित्ती कृशी शोषी श्वासी कासी क्षताहतः।
भुक्तवान् स्त्रीषु च क्षीणो व्यायामं परिवर्जयेत्।
भावमिथ्यामयो श्वासो ह्यो भोजी च वर्जयेत्।
अतिव्यायामतः कासो रक्तपित्त प्रजायते।
भ्रम क्लम तृषा तृष्णा ज्वरश्छर्दिश्च जायते॥”
इति राजवल्लभः॥
व्यायोग, पुं, (वि+आ+युज+घञ्।) दश विधरूपकान्तर्गतरूपकविशेषः। यथा—
“नाटकं सप्रकरणं भाणः प्रहसनं डिमः।
व्यायोगः समवकारो वीथ्यङ्केहामृगा इति।
अभिनेयप्रकारा स्युर्भाणा मन्त्रसप्तकादिकाः॥”
इति हेमचन्द्रः॥
(तल्लक्षणं यथा, साहित्यदर्पणे। ६। ५१४।
“ख्यातेतिवृत्तो व्यायोगः स्वल्पस्त्रीजनसंयुतः।
हीनो गर्भविमर्षाभ्यां नरैर्बहुभिराश्रितः।
एकाङ्कश्च भवेदस्त्रीनिमित्तसमरोदयः।
कैशिकीवृत्तिरहितः प्रख्यातस्तत्र नायकः।
राजर्षिरथ दिव्यो वा भवेद्धीरोद्धतश्च सः।
हास्यशृङ्गारशान्तेभ्य इतरेऽत्राङ्गिनो रसाः॥”)
व्याल, पुं, (विशेषेण आसमन्तात् अलतीति। अल पर्याप्तौ+अच्।) सर्पः। श्वापदः। इत्यमरः॥ (यथा मनुः। ९। ३१।
“पशवश्च मृगाश्चैव व्यालाश्चोभयतोदतः।
रक्षांसि च पिशाचाश्च मनुष्याश्च जरायुजाः॥”)
दुष्टगजः। इति मेदिनी॥ (यथा, माघे। १२। २८।
“व्यालद्विपा यन्तृभिरुन्मदिष्णवः
कथञ्चिदारादपथेन निन्यिरे॥”)
चित्रकः। व्याघ्रः। इति राजनिर्घण्टः॥ राजा। इत्यमरटीकायां मथुरेशः॥
व्याल, त्रि, (वि+आ+अल+अच्।) शठः। क्रूरः। इति जटाधरः॥
व्यालक, पुं (व्याल एव। स्वार्थे कन्।) दुष्टगजः। तत्पर्यायः। गम्भीरवेदी २ मद्गुरः इत्युत्कटः ३ व्यालः ४। इति त्रिकाण्डशेषः॥ (श्वापदः। यथा, महाभारते। ११। ११९। ८१।
“वायसैः व्यालकश्चापि मांस तत्राप्नु माधव॥”)
व्यालखड्ग, पुं, व्यालनख। इति राजनिर्घण्टः॥
व्यालगन्धा, स्त्री, (व्यालस्येव गन्धो यस्याः।) नाकुली। इति राजनिर्घण्टः॥
व्यालग्राह, पुं (व्यालं गृह्णातीति। व्याल+ग्रह+अण्।) व्यालग्राही। इत्यमरटीकायां भरतः॥ (यथा मनुः। ८। २६०।
“व्यालग्राहानुञ्छवृत्तीनन्यांश्च वनचारिणः॥”)
व्यालग्राही, [न्] पुं (व्यालं गृह्णातीति। ग्रह+णिनि।) विषार्थं सर्पधारी। बहुरूपकः। साँपुड़िया इति साँपिया इति च भाषा। तत्पर्यायः। आहितुण्डिकः २। इत्यमरः॥ आहुंतिकः ३ जाङ्गुलिकः ४ व्यालिङ्गुलिकः ५ व्यालग्राह ६ शाकुन्तिकः ७ विषवैद्यः ८। इति शब्दरत्नावली॥
व्यालजिह्वा, स्त्री, (व्यालस्य जिह्वेव आकृतिर्यस्याः।) महासमङ्गा। इति राजनिर्घण्टः॥ (व्यालजिह्वा च॥)
व्यालदंष्ट्र पुं (व्यालस्य दंष्ट्रेव आकृतिर्यस्य।) गोक्षुरः। इति रा॰
व्यालनख, पुं, (व्यालस्य नख इव आकृतिर्यस्य।) गन्धद्रव्यविशेषः। नखनखा इति हिन्दी भाषा। तत्पर्यायः। ब्रुनखा २ चक्रकारक ३ नखी ४ चक्रनख ५ व्याघ्रनख ६ व्याघ्रायुध ७ कुलि-शङ्ख ८ खुरः ९ व्यालपाणिजः १० व्याघ्रायुध ११ व्याघ्रनख १२ व्याघ्राङ्कुश १३। अस्य गुणाः। तिक्तत्वम्। उष्णत्वम्। कण्ठ्यत्वम्। कफवातकुष्ठकण्डूव्रणादिनाशित्वम्। वर्ण्यत्वम्। सौगन्ध्यदत्वञ्च। इति राजनिर्घण्टः॥
व्यालपत्रा स्त्री (व्यालानि दीर्घाणि पत्राणि यस्याः।) कर्कटी। इति राजनिर्घण्टः॥
व्यालमृग, पुं व्यालनख। इति राजनिर्घण्टः॥
व्यालम्ब, पुं, (व्यालो विस्तीर्णो लम्बः यस्य।) चित्रकाष्ठ। चिता काठ इति भाषा। इति महाभारते राजधर्मे॥ (यथा, महाभारते। ६। ११६। ९।
“इन्द्रेभिममचैव महाप्रमन्त्र भारत।
एषक व्यालम्बगाधाश्च धमिकाशिव करिय॥”)
व्यालम्ब पुं, (विशेषेण आलम्बते इति। वि+आ+लम्ब+अच्।) रक्तैरण्डः। इति वैद्यकम्। (त्रसमार्गे, त्रि। यथा महाभारते। ७। ८८। १०।
“व्यालम्बसंश्रयात् संवहात् अपत्राणि च तान्॥”)
व्यालायुध स्त्री (व्यालस्यायुध नख इव आकृतिर्यस्य।) कर्णीयासमात्रकरणम्। इत्यमरटीकायां मथुरेशः॥
व्यालायुध, पुं (व्यालस्यायुधमिवाकृतिर्यस्य।) व्यालनखः। इति राजनिर्घण्टः॥
व्यावक्रोशी, स्त्री, (वि+अव+क्रुश+“कर्म-व्यतिहारे णच् स्त्रियाम्।” ३। ३। ४३। इति णच्। ततः “णचः स्त्रियामञ्।” ५। ४। १४। इति स्वार्थे अञ्। “न कर्मव्यतिहारे। ७। ३। ६। इति ऐच् प्रतिषेधः। स्त्रियां ङीप्।) परस्पराक्रोशनम्। इति श्रीमुग्धबोधटीकायां भरतः॥
व्यावभाषी स्त्री, (वि+अव+भाष+णच्। स्वार्थे अञ्। ङीप्।) व्यावक्रोशी। इत्यमरटीकायां रायमुकुटः॥
व्यावर्त्त, पुं, (वि+आ+वृत्+घञ्।) चक्रमर्दकः। इति शब्दरत्नावली। तस्य व्यावर्त्तनोति यत्र॥
व्यावहासी स्त्री, (वि+अव+हस+णच्। स्वार्थे अञ्। ङीप्।) परस्परहसनम्। इत्यमरटीकायां भरतः॥
व्यावहारी, स्त्री, (वि+अव+हृ+णच्। स्वार्थे अञ्। ङीप्।) परस्परहरणम्। इत्यमरटीकायां भरतः॥
व्याहृत, त्रि (वि+आ+हृ+क्त।) कथितः। यथा। उक्तं तु व्याहृतम्। इति हेमचन्द्रः॥ आहूतः। (अभिहितम्। यथा, रघुः। ११। ६७।
“व्याहृता प्रतिवचो ...

व्यावृत्तिः, स्त्री, (वि+आ+वृत्+क्तिन्।) व्यावर्त्तनम्। यथा,—
"अतीतः पन्थानं तव च महिमा वाङ्मनसयो-
रतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि।
स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः।
पदे त्वर्वाचीने पतति न मनः कस्य न वचः॥"
इति महिम्नस्तोत्रम्।
व्यावृत्तिः। यथा। कर्म्मक्षयप्रयुक्तव्यावृत्तिरेव योगो न विषयव्यावृत्तिरपि तस्यावश्यकत्वात्। इति चिन्तामणौ प्रत्यक्षखण्डम्।
व्यासः, पुं, (वि+अस्+घञ्।) विस्तारः। इत्यमरः। (यथा, महाभारते। १। १। ५१।
"विस्तीर्य्यैतन्महज्ज्ञानमृषिः संक्षिप्य चाब्रवीत्।
इष्टं हि विदुषां लोके समासव्यासधारणम्॥"
"समासः संक्षेपः व्यासो विस्तारः।" इति तट्टीका।) मुनिभेदः। इति शब्दरत्नावली। पाठकश्च। यथा मेदिनीकरधृतभविष्यपुराणम्।
"विप्रमहत्त्वं ग्राम्य सदाचारपदं तथा।
कलचारनमावृत्तं स्वभावसमन्वितम्।
बुधमान्य सदर्थे वै मन्त्रार्थं ज्ञानवान् इव।
शास्त्रमाश्रित्य सर्व्वेषु मन्त्रार्थं वाचयेन्नृप।
स एवं वाचयेद्विद्वान् स विप्रो व्यास उच्यते॥"
इति तिथ्यादितत्त्वम्।
गोलस्य मध्यरेखा। यथा —
"व्यासे भनन्दाग्निहते विभक्ते
खबाणसूर्य्यैः परिधिस्तु सूक्ष्मः।
द्वाविंशतिघ्ने विहृतेऽथ शैलैः
स्थूलोऽथवा स्याद्व्यवहारयोग्यः॥"
उदाहरणम्।
"विष्कम्भमानं किल सप्त यत्र
तत्र प्रमाणं परिधेः प्रचक्ष्व।
द्वाविंशतिर्यत्परिधिप्रमाणं
तद्व्याससंख्यां च सखे विचिन्त्य॥"
इति लीलावती॥०॥
(व्यस्यति वेदानिति। वि+आ+अस्+अण्।) मुनिविशेषः। तस्य पर्य्यायो वेदव्यास शब्दे द्रष्टव्यः। (अस्य निरुक्तिर्यथा महाभारते। १। १०५। १५।
"यो व्यस्य वेदांश्चतुरस्तपसा भगवानृषिः।
लोके व्यासत्वमापेदे कार्ष्ण्यात् कृष्णत्वमेव च॥")
स च सत्यवत्यां पराशराज्जातः। [illegible]। यथा —
"व्यासः पुराणकथने [illegible]।
[illegible] चकार व्यासस्य सर्व्वविद्यानाम्।
तदा चकार विद्यानां [illegible]।
स च [illegible] प्रमाणं [illegible]।
पुराणं [illegible] व्यासः [illegible]।
[illegible] ह्यमरो च [illegible]।
तदा [illegible] प्राप्य [illegible] ह।
तदा वैन्यविभागञ्च पुराणञ्च चकार ह॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४ अध्यायः॥०॥
तस्य जन्मान्तरं यथा,—
"अथ भूयो जगत्स्रष्टा भो शब्देनानुनादयन्।
सरस्वतीमुच्चचार तत्र सारस्वतोऽभवत्॥
अपान्तरतमा नाम सुतो वाक्सम्भवः प्रभुः।
भूतभव्यभविष्यज्ञः सत्यवादी दृढव्रतः॥
तमुवाच नतं मूर्द्ध्ना देवानामादिरव्ययः।
वेदाख्याने श्रुतिः कार्य्या त्वया मतिमतां वर॥
तस्मात् कुरु यथाज्ञप्तं मयैतद्वचनं मुने।
तेन भिन्नास्तदा वेदा मनोः स्वायम्भुवेऽन्तरे॥
ततस्तुतोष भगवान् हरिस्तेनास्य कर्म्मणा।
तपसा च सुतप्तेन यमेन नियमेन च॥
मन्वन्तरेषु पुत्त्र त्वमेवं प्रवर्त्तकः।
भविष्यस्यचलो ब्रह्मन्नप्रधृष्यश्च नित्यशः॥"
इति महाभारते मोक्षधर्म्मे॥०॥
अन्यच्च।
"सुत भगवत्पश्च्छक्तिरसमन्तो पराशरम्।
व्यासो पराशरात् जज्ञे कृष्णद्वैपायनं मुनिम्॥
द्वैपायनादरण्यां वै शुको जज्ञे गुणान्वितः॥"
इति वह्निपुराणे प्रजापतिवंशो नामाध्यायः॥०॥
युगभेदे व्यासभेदो यथा,—
"अस्मिन्मन्वन्तरे व्यासा ये ये तांस्तान्निबोध मे।
यथा च भेदः शाखानां व्यासैः क्रियते मुने॥
अष्टाविंशतिकृत्वो वै वेदो व्यस्तो महर्षिभिः।
वैवस्वतेऽन्तरे ह्यस्मिन् द्वापरेषु पुनः पुनः॥
वेदव्यासा व्यतीता ये अष्टाविंशतिसत्तम।
चतुर्द्धा यैः कृतो वेदो द्वापरेषु पुनः पुनः॥
द्वापरे प्रथमे व्यस्तः स्वयं वेदः स्वयम्भुवा।
द्वितीये द्वापरे चैव वेदव्यासः प्रजापतिः॥
तृतीये चोशना व्यासश्चतुर्थे तु बृहस्पतिः।
सविता पञ्चमे व्यासः षष्ठे मृत्युः स्मृतः प्रभुः॥
सप्तमे च तथैवेन्द्रो वसिष्ठश्चाष्टमे स्मृतः।
सारस्वतश्च नवमे त्रिधामा दशमे स्मृतः॥
एकादशे तु त्रिशिखो भरद्वाजस्ततः परम्।
त्रयोदशे चान्तरीक्षो वर्णी चापि चतुर्द्दशे॥
त्रय्यारुणः पञ्चदशे षोडशे तु धनञ्जयः।
क्रतुञ्जयः सप्तदशे तदूर्द्ध्वञ्च जयः स्मृतः॥
ततो व्यासो भरद्वाजो भरद्वाजात्तु गौतमः।
गौतमादुत्तरो व्यासो हर्य्यात्मा योऽभिधीयते॥
अथ हर्य्यात्मनोऽन्ते च स्मृतो वाजश्रवा मुनिः।
सोमशुष्मायणस्तस्मात्तृणबिन्दुरिति स्मृतः॥
ऋक्षोऽभूद्भार्गवस्तस्माद्वाल्मीकिर्योऽभिधीयते।
तस्मादस्मत्पिता शक्तिर्व्यासस्तस्मादहं मुने॥
जातुकर्णोऽभवन्मत्तः कृष्णद्वैपायनस्ततः।
अष्टाविंशतिरित्येते वेदव्यासाः पुरातनाः॥
एको वेदश्चतुर्द्धा तु तैः कृतो द्वापरादिषु।
भविष्ये द्वापरे चापि द्रौणिर्व्यासो भविष्यति।
व्यतीते मम पुत्त्रेऽस्मिन् कृष्णद्वैपायने मुनौ॥"
इति विष्णुपुराणे ३ अंशे ३ अध्यायः॥०॥
कूर्म्मपुराणे विभाग विशेषः। [illegible] द्वापरे [illegible]। त्रयोदशे धर्म्मः। चतुर्द्दशे सुरक्षः। पञ्चदशे त्र्यारुणः। अष्टादशे भरद्वाजः। एकविंशे वाचश्रवाः। द्वाविंशे शुष्मायणः। त्रयोविंशे तृणबिन्दुः। चतुर्विंशे वाल्मीकिः। पञ्चविंशे शक्तिः। अन्यत् विष्णुपुराणवत्। (एतद्विवरणञ्च देवीभागवते १ स्कन्धे ३ अध्याये च द्रष्टव्यम्।)
व्यासक्तः, त्रि, (वि+आ+सञ्ज्+क्तः।) विशेषेणासक्तः। संलग्नः। यथा,—
"व्याकोषेन्दीवराभा श्रवणपरिलसत्पीतकाषा
सुहासा
[illegible] पादकर्ण-
सरा।
[illegible]
[illegible] जयति [illegible]
वारिहारा॥"
इति छन्दोमञ्जरी।
व्यासङ्गः, पुं विशेषेण आसङ्गः। वि आङ् पूर्व्वकसञ्जधातोर्घञ्प्रत्ययेन निष्पन्नोऽयम्।
व्यासमाता [ऋ] स्त्री (व्यासस्य माता।) वेदव्यासजननी। इति त्रिकाण्डशेषः। तत्पर्य्यायः। सत्यवती १ वासवी २ गन्धकालिका ३ योजनगन्धा ४ दाशेयी ५ योजनगन्धिका ६। इति हेमचन्द्रः। महाभारते मत्स्योदरी इति च पाठः। काली ७ मत्स्योदरी ८ विचित्रवीर्य्यसूः ९ गन्धवती १० योजनगन्धिका ११। इति त्रिकाण्डशेषः। मत्स्यजा १२ शवी १३ दासनन्दिनी १४। इति शब्दरत्नावली।
व्यासिद्धः, त्रि, (वि+आ+सिध्+क्तः।) निषिद्धः। इति मिताक्षरा।
व्याहतः, त्रि, (वि+आ+हन्+क्तः।) विशेषेण आहतः। व्यर्थः। यथा। [illegible] व्याहतत्वादेव। इति [illegible]। अपि च।
"[illegible] दैवोपि [illegible]
[illegible]
तु॥"
इति देवीमाहात्म्यम्।
व्याहारः, पुं (वि+आ+हृ+घञ्।) वाक्यम्। इत्यमरः। (यथा, रघुवंशे। ९। ८१।
"[illegible]
[illegible]॥")
व्याहृतिः, स्त्री, (वि+आ+हृ+क्तिन्।) व्याहारः। मन्त्रविशेषः। यथा,—
"ओङ्कारमादितः कृत्वा व्याहृतिस्तदनन्तरम्।
ततोऽधीयीत सावित्रीमेकाग्रः श्रद्धयान्वितः॥
पुराकल्पे समुत्पन्ना भूर्भुवःस्वः सनातनाः।
महाव्याहृतयस्तिस्रः सर्व्वाशुभनिवर्हणाः॥
प्रधानं पुरुषः कालो ब्रह्मविष्णुमहेश्वराः।
सत्त्वं रजस्तमश्चैव क्रमाद्व्याहृतयः स्मृताः॥"

ओङ्कारस्तत्पर ब्रह्म सावित्री स्यात्तदक्षरम् ।
एष मन्त्रो महाभाग साराात् सार उदाहृत ॥"
इति कौर्म्मे उपविभागे १२ अध्याय ॥
(वाक्यम् । यथा, कुमारसम्भवे । ६ । ६२ ।
"न ह्यीश्वरव्याहृतय कदाचित्
पुष्णन्ति लोके विपरीतमर्थम् ॥")

व्युत, त्रि, (वि+वे+क्त ।) स्यूतम् । इति भरतद्विरूपकोष ॥

व्युति स्त्री, (वि+वे+क्तिन् ।) ऊति । तन्तु सन्तति । इति भरतद्विरूपकोष ॥

व्युत्क्रम, पुं, (वि+उत्+क्रम+घञ् ।) क्रमविपर्य्यय । अतिक्रम । तत्पर्य्याय । उत्क्रम २ अक्रम ३ । इति हेमचन्द्र ॥ (यथा, साहित्यदर्पणे । १० ।
"पश्येत् कश्चिच्चल चपल रे का त्वराह कुमारी हस्तालम्बं वितर हहहा व्युत्क्रम क्वासि यासि ॥")

व्युत्थान क्ली, (वि+उत्+स्था+ल्युट ।) स्वातन्त्र्यकरणम् । विरोधाचरणम् । इति मेदिनी ॥ (यथा, महाभारते । १४ । ४८ । १६ ।
"एव ते त्वविशङ्काभीरा पुण्ड्राश्च प्रचरे रत ।
इवलत परिगता व्युत्थानात् पवधर्म्मिण ॥")
प्रतिरोधनम् । समाधिपारणम् । इति हेमचन्द्र ॥ नृत्यभेद । इति शब्दरत्नावली ॥ विविधोत्थानञ्च ॥ (चित्तस्यावस्थाविशेष । इति पातञ्जलदर्शनम् ॥)

व्युत्पत्ति, स्त्री, (वि+उत्+पद्+क्तिन् ।) विशिष्टोत्पत्ति । संस्कार । इति व्युत्पन्नशब्दार्थदर्शनात् । यथा । शरत्कालीनधर्म्मीयत्वेन शारदा घटव्युत्पत्तिस्तु घट तानयानि आर्द्र ददातीति व्युत्पत्तिस्तु काल्पनिकी । इति तिथ्यादितत्त्वम् ॥ शक्तिज्ञानम् । यथा । व्याकरणादिबाधक विना चिरकालेऽपि व्युत्पत्ति । बाधक विना सता धात्व बाधक यदिदिवश तदभावश्चविशिष्ट प्रकारेण व्युत्पत्ते व्युत्पत्तिसम्भवात् शक्ति ग्रहसम्भवादिति यावत् । इति व्याख्यानवादस्य माथुरी टीका ॥

व्युत्पन्न, त्रि, (वि+उत्+पद्+क्त ।) संस्कृत । इति हेमचन्द्रशब्दरत्नावली ॥ व्युत्पत्तियुक्त । यथा । व्याकरणव्युत्पन्नशब्दानामाधीन शास्त्रान्तरार्थं तदधीता च वैदिकक्रिया तत्पर्व्व कर्त्तव्ये । इति मुग्धबोधटीकायां दुर्गादास ॥

व्युत्पादक त्रि, (विशिष्टोत्पादयति ज्ञानम् । वि+उत्+पद्+णिच्+ण्वुल् ।) व्युत्पत्तिजनक । यथा । शब्दव्युत्पादकशास्त्रारम्भे मन्देन मङ्गलं कर्त्तव्यम् । इति मुग्धबोधटीकायां दुर्गादास ॥

व्युदास, पुं (वि+उत्+अस+घञ् ।) निरास । परित्याग । यथा । तदेवैतदकारणत्वाशिन्त वेदे सम्भविष्णो निवृत्ते कर्म्मणि अकारान्त व्युदासाय । इत्यमरटीकायामाह ... तिथ्यादितत्त्वम् ॥ (यथा च महाभारते । १४ । १६ । १८ ।
"अथैकान्तव्युदासेन शरीरे पाञ्चभौतिके ॥")

व्युष्ट, क्ली, (वि+वस्+क्त ।) फलम् । दिवम् । प्रभातम् । (यथा माघे । १२ । ४ ।
"व्युष्टं प्रयाणञ्च वियोगवेदना
विदूनगारीकमभूत् समन्तत ॥")
पर्य्युषितम् । इति हेमचन्द्र ॥ (प्रभातार्थे क्वचित् पुंलिङ्गोऽपि । स तु दोषाया पुत्त्र । यथा भागवते । ४ । १३ । १४ ।
"प्रदोषो निशिथो व्युष्ट इति दोषासुतास्त्रय । व्युष्ट सुत पुष्करिण्यां सर्व्वतेजसमादधे ॥")

व्युष्ट, त्रि, (वि+वस+क्त ।) उषित । (यथा, महाभारते । १ । ६८ । ५८ ।
"सा व्युष्टा रजनी तत्र पितुर्वेश्म विभाविनी ॥")
दग्ध । इति मेदिनी ॥

व्युष्टि स्त्री (वि+वस्+क्तिन् ।) फलम् । (यथा महाभारते । १२ । २२८ । ४ ।
"महतस्तपसो व्युष्ट्या पश्यन्तो सचराचरौ ॥")
समृद्धि । इति मेदिनी ॥ स्तुति । इति हेमचन्द्र ॥ (प्रकाश । यथा, ऋग्वेदे ।१।१०१।१।
"व्युष्टिषु शवसा शश्वतीनाम् ॥"
"व्युष्टिषु अतीषु प्रकाशेषु सत्सु ।" इति तद्भाष्ये सायन ॥)

व्यूढ, त्रि (विशेषेण ऊह्यतेस्म । वि+वह+क्त ।) विन्यस्त । संहत । इत्यमर । ३ । १ । ९९ । (व्यूहरचनयावस्थित । यथा गीतायाम् ।१।२।
"दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्य्योधनस्तदा ।
आचार्य्यमुपसङ्गम्य राजा वचनमब्रवीत् ॥")
पृथुल । इति मेदिनी ॥ (यथा, रघु ।१।१३।
"व्यूढोरस्को वृषस्कन्ध शालप्रांशुर्महाभुज ।
आत्मकर्म्मक्षमं देहं क्षात्रो धर्म्म इवाश्रित ॥")

व्यूढकङ्कट, त्रि (व्यूढ कङ्कट समासो येन ।) सन्नद्ध । इत्यमर ॥

व्यूढि, स्त्री (वि+वह+क्तिन् ।) विन्यास । संहति । पृथुलता । इति व्यूढशब्दार्थदर्शनात् ॥

व्यूत, त्रि, स्यूतम् । तन्तुसन्ततम् । विपूर्व्ववेञ्धातो क्तप्रत्यये निष्पन्नमेतत् ॥

व्यूति, स्त्री, (वि+वे अथ वा+क्तिन् । "ऊतियूतिजूतिसाति हेतिकीर्त्तयश्च ।" ३ । ३ । ९७ । इति निपातित ॥) वस्त्रादिवयनक्रिया । तत्पर्य्याय । वानि २ । इत्यमर । व्यूति १ । इति भरत । वानी ३ । इति शब्दरत्नावली ॥

व्यूह, पुं (वि+ऊह+घञ् ।) समूह । निर्म्माणम् । तर्क । इति मेदिनी ॥ देह । (यथा, भागवते । ११ । ६ । ११ ।
"य वाम्नते समधिमूलक कर्म्मरौद्र
य कौर्त्तिक वचनं सारिजनाव ॥")
सैन्य । इति विश्वप्रकाश ॥ (पर्य्याय । विस्तृत । यथा भागवते । ४ । २८ । ५ ।
... कर्षार्दिताङ्ग ॥")
युद्धार्थसैन्यरचना । तत्पर्य्याय । बलविन्यास २ । इत्यमर । "युद्धार्थं सैन्यस्य देशविशेषे विन्यस्य दुर्भेद्यनिमित्त स्थापन व्यूह । अस्य निर्मके विपूर्व्वात् घञ् । युद्धे दण्डादयो भेदा विग्रहा व्यूहस्य भयात् अर्थादिना भोगमण्डल भेदाश्च यह । यथाह कामन्दकि ।
तिर्य्यग्वृत्तिश्च दण्ड स्याद्भोगोऽन्वावृत्तिरेव च ।
मण्डल सर्व्वतो वृत्ति पृथग्वृत्तिरसंहत ॥" इति ।
एषां चतुर्णाञ्च बहवो भेदा क्रौञ्चचक्रादयो यस्योरस्मयाप्रोक्ता । इति भरत । अपि च ।
"समस्तस्य तु सैन्यस्य विन्यास स्थानभेदत ।
स व्यूह इति विख्यातो युद्धेषु पृथिवीभुजाम् ॥
व्यूहभेदास्तु चत्वारो दण्डो भोगोऽथ मण्डल ।
असंहतश्च विज्ञेया नीतिशास्त्रविचक्षणै ।
अन्येऽपि सन्ति व्यूहा क्रौञ्चचक्रादय क्वचित् ।
तिर्य्यग्वृत्तिस्तु दण्ड स्याद्भोगोऽन्वावृत्तिरेव च ।
मण्डल सर्व्वतो वृत्ति पृथग्वृत्तिरसंहत ।
सैन्यानां नीतिशास्त्रे व्यूहभेदा समीरिता ।
क्रौञ्चचक्रादिभेदाश्च कथ्य भारतादिषु ॥"
इति शब्दरत्नावली ॥
(यथा च कामन्दकीयनीतौ ।१८।०८—१०।
"सर्व्वव्यूहविभागज्ञा व्यूहभेदेषु कर्म्मसु ।
उर पक्षौ च कक्षौ च मध्य पृष्ठ प्रतिग्रह ।
कोटी च व्यूहशास्त्रज्ञे सप्ताङ्गो व्यूह उच्यते ।
उरस्य कक्षपक्षौ च व्यूहोऽय सप्रतिग्रह ।
गुरोरेष च शुक्रस्य कक्षाभ्यां परिवर्जित ।
अभेद्या कुलजा मेधा जयतत्परा प्रहारिण ।
शिक्षाकुशलता धीमा दृढयुद्धपतिक्रिया ।
प्रवीरपुरुषैरेतैर्लक्षितैः परिवारिता ।
अभिनेय च युद्धारम्भ रथैश्च परस्परम् ।
चतुर् सैन्यस्य मति पत्काले पदसत्र तद्वै ।
हस्तस्तु च पार्श्वविन्यासकक्षनके भवेत् ।
व्यूहार्धे हस्तिनस्त्वं चक्रानीके प्रवेशयेत् ।
व्यूह हि बाधकपाद शम्भुर्ते तदमायवम् ।
व्यूहोऽपुरस्सरत्र पदाश्वरथराशिभि ।
तथाप्रतिहतो धीमो व्यूहरचने सधि ।
मध्ये देयि व्याभीक रथानीके तु कक्षयो ।
पादयोश्च मध्यानीके व्यूहाराणिभस्य सूत्र
तत्काले रथाश्वदान्वर्त्तीव व्याधवे ।
रथानामे तु मन्निमाकासोन प्रकल्पयेत् ।
विभज्य प्रविशेत्कर्णे परान्तरमपूरणात् ।
अश्वे कुर्व्वीत बाज्यिनाम् पदान्तरवाजिनाम् ।
वद पक्षौ च रक्षाय दक्षौ नवरत्नम ।
एकादशे महाव्यूहान्तदाकारान् प्रकल्पयेत् ।
इद आद्यक्षरापूर्णे तथा पाश्र दशोरैत ।
मध्यान्तर्षदन भेद दक्षमपि अर्धोदिक्ष ।
कक्षा प्रतिपक्षा वैराकैर्दा दत्तोरैश्च ।
क न न व्यूह न नमाद कार्णे स्याते तत्कर्तेत ।
निर्म्मग्रस्य दण्ड आक्षोगमन्त्वावृत्तिरेव च ।
सरते दण्डोपदक्षचन्दो रे गतिरुक्तेव ।
सीमन हा नाम तेसौ निवेकृत्सौ ।
विराङ्कन्नक करौ

सुखाप्यो ब्रह्मपथेन दक्षमेदाः सुदुर्लभः ।
अतिक्रान्तः प्रतिक्रान्तः क्रमाध्यायेवमप्यत ।
अतिक्रान्तस्य पञ्चाभ्यां भवोऽप्यस्तु विपर्ययः ।
स्थापितो यत्र पश्चा द्विस्थानो न्यक्कृतस्तथा ॥
त्रिगुणान्तकक्रियाकालवचाःखोऽन्यः विपर्ययः ।
द्विचतुष्क दक्षैव यथा समवतः क्रमात् ।
मोक्षविकाशिवपादौ प्रकटी मकरकाया ।
भोगमेदाः समाम्नातास्तस्य परिवर्तनात् ॥
दक्षपतौ युगोदय प्रकटादिपर्यय ।
मकरौ धाराक्षीणश्च रेखः कुम्भरराशिमिः ॥
सक्षणक्रूरादमन्तौ च कर्मणोऽभवद्गुर्जयौ ।
समाप्तौ द्वितीयस्तु प्रथमः सर्वतस्तथा ।
अहोचमत्र उद्धारो यथो मेराक्षणवती ।
तथा कुक्कुटपक्षौ च कावपान्ते च मोचिका ।
विचरन् पञ्चधेयानां देया आकाशभेदतः ।
इति सूर्या समाप्ताना सूर्यभेदप्रयोगतः ॥
मते चमत्क प्रोक्ता न्यक्कृताम पञ्चधा ।
तथा धारकपथेव मकरन्द्र प्रमाणतः ।
अथ वृत्तास्तु यत्रूता भोगगराज पञ्चधा ।
सूक्ष्मेष्ट्र प्रयोग्या स्फुटक्रम उपस्थिते ।
पञ्चादोषामथोकेन चर्या इव परिस्थितेन ।
नदा च समाहन कोटिम्या परिवेश्यम् ।
परकोटिस्तपक्व पञ्चाध्यायप्रविपत्र ।
कोटिम्यां वचने वस्याप्तरसा च प्रयोजयेत् ।
एवं सूक्ष्मपथेन मकराकनोपति ।
विदारयेद्गुरु कार्ते वर्जेन द्विपराम्मलम् ॥")
व्युत्क्रम, क्ली (वि+उत्+क्रम+ल्युट् ।) वैपरीत्यक्रमम् । विपूर्वोक्रमालोरमटप्रपदेन विपर्ययम् । (मेलनम् । यथा भागवते ।६।२६।३६।
"यानव व्युत्क्रम पारिवेश्चन्त्यं दयमम्पयो ।"
"व्युत्क्रम मेलन व्यवाद ।" इति तट्टीकायां स्वामी । स्त्रोमके त्रि । यथा, हरिवंशे । १६८।१६।
"एवं गुणेभ्य एभिमनवर्त्म
यत्र यस्ते व्युत्क्रमं क्रमादरम् ।"
"व्युत्क्रमं अवगुणोदयम् ।" इति तट्टीकायां नीलकण्ठः ।)
व्युत्क्रमाणि पुं, (व्युत्क्रम पार्ष्णिः ।) व्युत्क्रमयाहानः । तस्यैवाय । पञ्चाचारः २ । इत्यमरः । प्रत्याचारः ३ । इति तट्टीका । व्युत्क्रम प्रत्याद व्युत्क्रमारम् । इति केचित् । इति भरतः । व्युत्क्रमम् । इति शब्दरत्नावली ॥
व्ये ञ ई वृतौ । इति कविकल्पद्रुमः । (भ्वा० उभ० सक० अनिट् ।) ञ व्ययति व्ययते । ई व्येयात् । इति दुर्गादासः ॥
व्योकारः पुं लौहकारः । इत्यमरः ।
व्योम [न्] क्ली (व्ये ञ वृतौ+"व्यामन् व्योम निति ।" उणा० ४ । १४६ । इति निपातनात् साधुः । यद्वा "विष्णोरिदमेवाकाशमाप् व्योमादि" सर्वेभ्यो मनिन् । इति उज्ज्वल मनित्वयक्ष्ये 'व्यापकत्वाद्विशेषमनुष्यमवतोः ।' इदं उच्चैः । यदि वाशो मद्वे मनुः ।
यद्वा अवतिगतार्थे भावे मन् व्योम् । अवम गमनं विविधमस्मिन् विद्यते । यद्वा व्याप्तार्थं विद्धिमार्गति प्राणिनोऽवकाशमनेन । उत्कादौ तु नामन् व्योमन् व्योमन् इत्यादिना वेष्ण संवरणे इत्याकारानि उलू निपातने । दीयते नडगुणो व्योम । तथैव विनाशम् योनिरन्तरिक्ष महाबलस्य परिवेतो साधुना इति ।" इति सिद्धान्तटीका । १ । १ । १ ।) आकाशम् । इत्यमरः ॥ (यथा, रघुः । ३।१८ ।
"इन्द्रोभिः स्वल्पैर्मूर्तिमजेन गणवतिमिः ।
सङ्घस्थितिव व्योम कुन्मन् चामेद भूतलम् ॥")
जलम् । भास्करस्यायतनम् । इति मेदिनी ॥ अभ्रकम् । इति राजनिर्घण्टः ॥
व्योमकेश पुं, (व्योम एव केशा यस्य । विराट् मूर्तित्वादस्य तथात्वम् ।) शिवः । इत्यमरः ॥ (यथा, महाभारते । ७ । २ । १४८ ।
"धर्मायनक्रमतो लोके प्रकाशन्ते रवय या ।
ते केशाः संज्ञिताद्रुद्रौ व्योमकश इति स्मृतः ॥")
व्योमकेशी [न्] पुं महादेवः । महाधारण कारः व्योमस्यापिन केशा अस्य सन्तीति व्योम केशस्मात् इनूतमेव निपातनमेतत् ॥
व्योमचारिपुर, क्ली, (व्योमचारि आकाशगामि पुरम् ।) सौभपुरम् । इति भूरिप्रयोगः ॥
व्योमचारी, [न्] पुं (व्योम्नि चरतीति । चर+णिनि ।) देवता । पक्षी । इति मेदिनी । चिरजीवी । द्विजः । इति विश्वः । (आकाशचारिणि त्रि । यथा, कथासरित्सागरे । ४२ । ५६ ।
"अस्ति पूर्वमहं व्योमचारी विद्याधरोत्तम
नमः ॥")
व्योमधूम, पुं, (व्योम्न धूमः ।) मेघः । इति त्रिकाण्डशेषः ॥
व्योममालिका, स्त्री मालतीपत्री । इति त्रिकाण्डशेषः ॥
व्योममुद्गर स्त्री (व्योम्नः मुद्गर इव ।) पताका । इति त्रिकाण्डशेषः ॥
व्योममण्डल स्त्री, (व्योम्न मण्डलम् ।) पताका । इति शब्दरत्नावली । आकाशश्च ॥
व्योममुद्गर पुं (व्योम्नः मुद्गर इव ।) निर्वात । इति हारावली ।
व्योमयान स्त्री (व्योमगामि यानम् ।) विमानम् । इत्यमरः ।
व्योमसदी स्त्री भूमिः । इति भूरिप्रयोगः । (व्योम्नः सदी ।) मध्यम्नाम ॥
व्योमाम पुं (व्योम्नः मूर्तेव आसामोति । आ+मा+क ।) स्नेहः । इति त्रिकाण्डशेषः ।
व्योमोदक, क्ली (व्योम्नः उदकम् ।) दिव्योदकम् । इति राजनिर्घण्टः ॥
व्योषं क्ली (विशेषेण ओषतीति । उष दाहे+पचाद्यच् ।) त्रिकटु । इत्यमरः । (यथा सुश्रुते । १ । ४४ ।
"व्योषं त्रिफलाद्यं सुखा त्रिदशामलकं तथा ॥")
व्रज, गतौ । इति कविकल्पद्रुमः । (भ्वा० पर० सक० सेट् ।) व्रजति । इति दुर्गादासः ।
व्रज क सस्कृतौ । गतौ । इति कविकल्पद्रुमः । (चुरा० पर० सक० सेट् ।) क व्राजयति । त्रिरेफो गौ । यौ रुजौ विरेफौ इवरहितौ च व्याख्यातम् । इति दुर्गादासः ।
व्रज, स्त्री, गमनम् । गमनम् । व्रज गतौ इत्यस्मात् घञर्थेव निष्पन्नमिदम् । इति सिद्धान्तकौमुदी ॥
व्रज, पुं, (व्रज गतौ+"गोचरसञ्चरेति ।" ३ । ३ । ११९ । इति घप्रत्ययेन निपातनात् साधुः ।) समूहः । इत्यमरः । (यथा, महाभारते । १ । १४८ । १२ ।
"तत प्रताप सुमहान् शब्देनैव विभावसो ।
प्रादुरासीत् तदा तेन बुबुधे स जनव्रजः ॥")
गोष्ठम् । (यथा माघे । ३ । ६४ ।
"निवसवीथाचारमपारा मा इव व्रजम् ।
उपबन्धन् इमासौ पुरीमाविद्धगौरिव ॥)
पन्थाः । इति मेदिनी । अस्यन्त्य परमोब्रज आयतनादेश । अस्य विवरणं यथा सात्वते ।
"ब्रह्मनःकल्पान्तेषु पितामहस्य परम् ।
कुशनाम महापीठ चर्मीवां साम्यवस्थितम् ।
सप्तोपरिवर्तितं लोक वर्मिणाम् महापदम् ।
लवणोदादिवाचाराणि अयानिकिरादिकम् ।
चतुरष्टकोटिर परिपूर्णविराजितम् ।
अत्र परिचितोद्भवम् प्रमदात्स्ववं नरान् ।
रामार्चावावशो लोको विष्णोरमपाहुवान् ।
आयावापूर्णितयै नैव पुरवेन च विदते ।
पुण्यं वृषगुणं अथ तासोऽपि प्रमादकाः ।
तदेव विशिष्टावर्णो वाहुडपञ्चका ।"
तथान्ते सर्वोत्तमपञ्चवाधिवासमस्तका दिव्यम् यानि चतुरष्टकोणपरिमाणविशानि चतुर्भिर्मयोऽभरादिशानि क्रमश आह । यादि ।
"वनानि द्वादशान्यापूर्वपूर्वोत्तरदिशि ।
मधुवन महावीर १ इदं बाल्ववनं सुभम् २ ।
कौलिकाख्य तृतीयश्च ३ भूमौ तालवन तथा ४ ।
पश्चम कुमुदाख्यश्च ५ षष्ठ भाण्डीरवनम् ६ ।
षष्ठ तद्वनं चैव सप्तमं परिकीर्तितम् ७ ।
अष्टमं खदिरं पार्थ ८ नवमं लोहवनं वनम् ९ ।
नाम्ना महावनं चैव दशमं बहुपुण्यदम् १० ।
एकादशं समाख्यातं वृन्दावनवनोत्तमम् ११ ।
नाम्ना बिल्ववनं चैव द्वादशं कामदायकम् १२ ।
इति द्वादशवनानि वनानि शुभदानि च ।"
इति द्वादशवनानि ।
अथ द्वादशोपवनानि आह ।
"आद्यौ ब्रह्मवनं नाम १ द्वितीयं अप्सरा वनम् २ ।
तृतीयं विह्वलं नाम कदम्बाख्यं चतुर्थकम् ३ ।
नाम्ना स्वर्णवनं चैव पञ्चमं परिकीर्तितम् ५ ।
सुरभीवनमाख्यातं प्रेमाख्यारम्भकम् ६ ।
चैव मयूरवनं नाम सप्तमं शुभदं शुभात् ७ ।

मयूरवननामानमष्टमं परिकीर्त्तितम् ८ ।
मार्ष्टिकवनं मेह नवमं भावकदनम् ९ ।
शिवद्यावनं मेह दशमं पापनाशनम् १० ।
एकादशं समाख्यातं शारदाख्यं शुभोदितम् ११ ।
द्वादशं परमानन्दवनं सर्वार्थदायकम् १२ ।
इति द्वादशवनानि वनान्युपवनानि च ।"
इति द्वादशोपवनानि । ७ ।
अथ द्वादशप्रतिवनानि । भविष्ये ।
"आदौ रङ्कवनं मेह पुरवासविराजितम् १ ।
वार्त्तावनं द्वितीयञ्च २ करहाख्यं तृतीयकम् ३ ।
चतुर्थं काम्यनामानं वनं कामप्रदं शुभम् ४ ।
अञ्जनकनामाख्यं पञ्चमं कौतुकप्रदम् ५ ।
नाथा कर्णवनं मेह षष्ठं सुखप्रदम् ६ ।
कृष्णाक्षिपणकं नाम वनं पापसमीरितम् ७ ।
नन्दप्रेक्षणकृष्णाख्यं वनं नन्दसमष्टमम् ८ ।
वकलिन्दवनं नाम नवमं लक्ष्मपूजितम् ९ ।
क्षिरावनं शुभं प्रोक्तं दशमं नन्दभाषितम् १० ।
जन्नावनिकं मेहमेकादशसदाश्रितम् ११ ।
नाथा शोषवनं मेह द्वादशं शुभदं शुभम् १२ ।
इति प्रतिवनान्याहुर्मार्गे वामे च दक्षिणे ।
इति द्वादशमाख्ये देवावासफलप्रदा ।"
इति द्वादश प्रतिवनानि । ८ ।
अथ द्वादशाधिवनानि । विष्णुपुराणे ।
"मथुरा प्रथमं नाम १ राधाकुण्डं द्वितीयकम् २ ।
नन्दग्रामं तृतीयञ्च ३ गुड़स्थानं चतुर्थकम् ४ ।
पञ्चमं ललिताग्राम ५ वृषभानुपुरञ्च षट् ६ ।
अथ गोकुलं स्थानं ७ सप्तमं बलदेवकम् ८ ।
गोवर्द्धनं मेह नवमं कामनाप्रदम् ९ ।
वनं जावटं नाम दशमं परिकीर्त्तितम् १० ।
वृन्दावनाख्यं मेहमेकादशं प्रकीर्त्तितम् ११ ।
सङ्केतवनमाख्यं वनं द्वादशं कीर्त्तितम् १२ ।
इति द्वादशवनानि वनान्यधिवनानि च ।
वनानामधिपा प्रोक्ता व्रजमण्डलमध्यगाः ।
एतां मेव विजानीयात् वनयात्रां च विचक्षणः ।
एताश्च दर्शनैनैव वनयात्रा शुभप्रदा ।
यात्रां कीर्त्ता यदा पश्येत् प्रयत्नात् तत्फलं लभेत् ।
सर्वान् कामानवाप्नोति विष्णुलोकमवाप्नुयात् ।
सर्वत्र विजयी भूयाद्वनयात्राप्रभावतः ।"
इति व्रजभक्तिविलासे १ अध्यायः ।

व्रजकः पुं गमको । इति शब्दरत्नावली ।

व्रजकिशोरः पुं (व्रजस्य किशोरः ।) श्रीकृष्णः । स तु द्वादशाधिवनान्तर्गतललिताग्रामाधिपवनाधिपो देवः । "अथ ललिताग्रामाधिपस्य व्रजकिशोरमन्त्रः । यथा मेधरोपनिषदि । ॐ ह्रीं ललिताग्रामाधिपवनाधिपतये व्रजकिशोराय नमः । इत्येकविंशाक्षरो व्रजकिशोरमन्त्रः । अनेन मन्त्रेण प्राणायामः । अस्य मन्त्रस्य ऋषिर्व्रजकिशोरो देवता गायत्री छन्दः मम सकलपापक्षयद्वारा हृदभीष्टफलप्राप्त्यर्थे विनियोगः । हिरण्य विभाजकमन्त्रे नमः सुखे व्रजकिशोराय नमः हृदि गायत्री छन्दसे नमः । अथ ध्यानम् ।
'ललितायुतं सख्या सर्वैश्च सखिभिर्युतम् ।
ध्यायेन्नित्यविरूपस्य महाराजसुतोत्तमम् ।
इति ध्यात्वा यथाशक्ति जपं कृत्वा गुह्यातीत्वा दिना जपं समर्पयेत् । इति ललिताग्रामाधिप व्रजकिशोरमन्त्रः ।" इति व्रजभक्तिविलासे १ अध्यायः ।

व्रजनाथः पुं, (व्रजस्य नाथः ।) श्रीकृष्णः । इति पुराणम् ।

व्रजभूः पुं, (व्रजे भूरुत्पत्तिर्यस्य ।) कलिकदम्बः । इति शब्दचन्द्रिका । (व्रजस्य भूर्भूमिः ।) व्रजभूमौ, स्त्री । व्रजजाति त्रि ।

व्रजमण्डल, क्ली, (व्रजस्य मण्डलम् ।) व्रजभूमिः । यथा, मात्स्ये ।
"व्रजमण्डलभूर्गीता शिवनाथस्य परम् ।
कृष्णाख्य महामेह सर्वेषां मध्यस्थितम् ।"
इति व्रजविलासे १ अध्यायः ।

व्रजमोहनः, पुं, (व्रजान् व्रजवासिनो मोहयतीति । मुह + णिच् + ल्युट् ।) श्रीकृष्णः । इति पुराणम् ।

व्रजवरः, पुं (व्रजे वरः श्रेष्ठः ।) श्रीकृष्णः । स तु द्वादशाधिवनान्तर्गतजावटाधिवनाधिपो देवः । "अथ जावटाधिवनाधिपव्रजवरमन्त्रः । शौनकीये ।
वटादिह समन्तात् तत्र वनमाश्रितम् ।
तमेवाधिवनं ख्यातं वटाख्यं कामदायकम् ।
तस्मिन्मध्ये वटं मेह लक्ष्मीक्रीडाप्रदम् ।
वटादिवनं ख्यातं मध्ये चैव वटं स्मृतम् ।
वटे कृत्वा स्थितः तत्र वटस्थस्य विधीयते ।
वटस्याभ्यनुसारेण वटचिह्नानि दर्शयेत् ।
वटस्थानचिह्नम् । ॐ ठ जा वटाधिवनाधिपतये व्रजवराय नमः । इत्येकोनविंशाक्षरो जावटाधिवनाधिपव्रजवरमन्त्रः । अनेन मन्त्रेण प्राणायामः । अस्य मन्त्रस्य वशीकरणऋषिः जावटाधिपो व्रजवरो देवता पङ्क्तिश्छन्दः मम सकलसौभाग्यसम्पत्फलप्राप्त्यर्थे जपे विनियोगः । न्यासं पूर्ववत् । अथ ध्यानम् ।
'नानामञ्जरभूषाढ्यं राधायाश्च मनोहरम् ।
ध्यायेद्युगलमूर्त्तिञ्च वनवासवरप्रदम् ।
इति ध्यात्वा यथाशक्ति जपं कृत्वा गुह्यातीत्वा दिना जपं समर्पयेत् । इति जावटाधिवनाधिपव्रजवरमन्त्रः ।" इति व्रजभक्तिविलासे १ अध्यायः ।

व्रजवल्लभः, पुं (व्रजस्य व्रजवासिनां वल्लभः प्रियः ।) श्रीकृष्णः । इति पुराणम् ।

व्रजाङ्गना, स्त्री (व्रजस्य अङ्गना ।) गोपी । यथा छन्दोमञ्जर्याम् ।
"विहारवैदग्ध्यवती व्रजाङ्गना
मधुर्जं च वचनरामहरिरहम् ।
व्रजाङ्गनानामपि मावहारिणी
जहार मार्गं च हरिः पुरातु च ।"

व्रज्या, स्त्री (व्रजनमिति । व्रज गतौ + "व्रजयजो र्भावे क्यप् ।" ३ । ३ । ९८ । इति क्यप् ।) पर्यटनम् । शिरीषो प्रयाणम् । गमनम् । इत्यमरः । वर्गः । इति मेदिनी । (यात्रा यात्रामेकत्र अभिनयः । यथा, शाकुन्तले । ६ । ५६ ।
"कोपः शोकसम्भवस्तु स्थाद्रूप्यैर्व्याजयेच्च ।
व्रज्याक्रमेण रचितः स एवातिमनोहरः ।")
रङ्गः । इति धरणिः ।

व्रज शब्दे । इति कविकल्पद्रुमः । (भ्वा पर सक सेट ।) व्रजति । इति दुर्गादासः ।

व्रज न ज अङ्गपूर्वे । इति कविकल्पद्रुमः । (अदन्त चुरा पर सक सेट ।) अङ्गपूर्वो अङ्गभेदः । व्रजयति गात्रं नाथम भट । इति दुर्गादासः ।

व्रणः, पुं क्ली, (व्रणयति गात्रमिति । व्रण अङ्गपूर्वे + पचादित्वात् अच् ।) क्षतम् । तत्पर्यायः । ईर्मम् २ अरुः ३ । इत्यमरः । ईर्मः ४ । इति तट्टीका । (यथा रघु । १२ । ५५ ।
"स रावणहृतां ताभ्यां वचसाचष्ट मैथिलीम् ।
आत्मनः सुमहत् कर्म व्रणैरावेद्य संस्थितः ।")
अथ व्रणाधिकारः ।
"व्रणो द्विधा परिज्ञेयो शारीरागन्तुभेदतः ।
दोषजो दुष्टजैः स्यादन्यः शस्त्रादिसम्भवः ।"
तत्र वातिकस्य लक्षणमाह ।
"श्यावः कठिनसंस्पर्शी मन्दस्रावी महाव्रणः ।
तुद्यते स्फुटितप्रायो व्रणो मारुतसम्भवः ।"
श्याव कपिलः । ० । पैत्तिकमाह ।
"तृष्णामोहज्वरक्लेददाहदुष्ट्यवदारणैः ।
व्रणं पित्तकृतं विद्यात् गन्धैः स्रावैश्च पूतिकैः ।"
क्लेदः आर्द्रता । दुष्टिः यथाक्रमम् । अवदारणं व्रणविदारणवत् पीड़ा । ० । श्लैष्मिकमाह ।
"बहुपिच्छो गुरुः स्निग्धः स्तिमितो मन्दवेदनः ।
पाण्डुवर्णोऽल्पसंक्लेदश्चिरपाकी कफव्रणः ।"
बहुपिच्छ बहुपिच्छिलः । अल्पसंक्लेदः ईषत्स्रावः । ० । रक्तजं व्रणं शालिपाणिनमाह ।
"रक्तो रक्तस्रुती रक्तादिभिः स्यात्तत्त्वतः ।"
तत्त्वतः त्रिविधोपलिङ्गवत्त्वं । ० । द्वन्द्वजं व्रणमाह ।
"द्विशस्त्रदोषोपलिङ्गः व्रणः त्रिभिः त्रिदोषजः ।
सप्तधा त्रिदोषजाः पूर्वोक्ताः इति स्मृतः ।"
त्रिदोषजाः व्रणाः क्लेदस्रावं कपाल व्रणं च । नैव त्रिदोषजः । एकाक्षा पञ्चधाः हि ।
दुष्टव्रणमाह ।
"पूतिपूयातिदुष्टासृक्स्राव्युत्सङ्गी चिरस्थितिः ।
दुष्टव्रणोऽतिगन्धादिः शुद्धलिङ्गविपर्ययः ।"
उत्सङ्गी वीवरवत् । अतिगन्धादिः आदि शब्देन वर्णादिपरिग्रहः । व्रणकर्म । ० ।
शुद्धव्रणमाह विदेहः ।
"जिह्वातलाभः मृदुः स्निग्धः श्लक्ष्णो विगतवेदनः ।
सुव्यवस्थो निरास्रावः शुद्धो व्रणः इति स्मृतः ।"

कपोतवर्णप्रतिमा पाण्डुपूतरा । शिरा स्नायुसन्ततास्तिहिता । पिच्छावल घरोश्चापो ये मांसाङ्कुरास्तद्युता ।०। सन्दर्शितमाह ।

"ईषच्छिन्नमनपायिमशूलमदर्श मयम् ।
नश्चपर्वं समतलं सम्यक्कटुं विनिर्दिशेत् ।"
ईषच्छिन्न मङ्गलाभासम् । समतल अपि चम् ।०। दुष्टव्रणमाहमाह ।

"अदमोचन दृष्टे देश तत्त्वच्छादमदव ।
शोमनोऽभिमत कार्ये दृष्टे वाथ सुकरव ।"
दृष्टे दष्टे ममरक्षिते । अहुपदव ज्वरव्यथा भावबाधारोपकादिरहित । शोभन पथ देहिम । दृष्टे कार्ये देमन्ते शिशिरे च ।

"दुष्टेरन्तरैरभिहीन' तच्छो मय घ्नत ।
कर्मविशेषो विविधलक्षणो विषमम' ।"
दृमिक्षप्त्यौषधमादिभि । विषमक्रम' अनुपत्तीत चिरदुर्वीचत इति यावत् ।

"वणाहितोऽपि सच्चार्य मस्तुलुङ्गस्य न भवेत् ।
आतमुन्नो मर चिह्नैश विहिरोपलभ्य ।"
मस्तुलुङ्ग मस्तुकाभ्यन्तरस्नेह ।

"कुटिला विषमुटास्तो शोषिका मधुमेहिनाम् ।
व्रणा कष्टेन सिध्यन्ति येषां चापि भवेत् व्रण ।"
अहितमाह ।

"दहन्ति चान्तराये कोष्ठ'शीताश्च ये व्रणा' ।
दहन्ति बहिरन्यथैव अत्यन्तश्च शीतला ।
प्राणमांसक्षयश्वासकासारोचकपीडिता ।
प्रवृद्धपूयरुधिरं व्रणा ये चापि मर्मसु ।
क्रियाभि' सम्यगारब्धा न सिध्यन्ति च ये व्रणा ।
विवर्जयेदेव तान् वैद्य' संरक्षन्नात्मनो यश ।
मधुतुल्यं(?)तृष्णा स्रवणं व्रणं पद्मपत्रसमप्रभम् ।
नाभ्या विकम्पाच पक्वाम्बुको व्रणा' घ्नता ।"
ममसु पायुशास्त्रिद्रेष्वादिषु । सम्यगा' कारि विनाश्या' पारिभाषादिसम्यक ।०। अथास्य व्रणस्य निदानमाह ।

"नानाधारासुखे प्रकोपेनैवाश्मरिप्रमिते ।
भवन्ति नानाकृतयो व्रणास्तान्निबोध मे ।"
नानाधारादन्यानि येषां ते व्रणे यादृशच खड्गभल्लकुन्तशूलप्रहारादिभि' । नानाकृतय नानाकृतय । ता आह वीरात् ।

"छिन्नं भिन्नं तथा विद्धं क्षत पिच्चितमेव च ।
घृष्टमष्टविधा सद्य व्रणा' प्रचुरोपि यद्यथम् ।"
अथ छिन्नस्य लक्षणमाह ।

"तिर्यक् छिन्न ऋजुर्वापि यो व्रणश्चायतो भवेत् ।
गात्रस्य पातनं तद्धि छिन्नमित्यभिधीयते ।"
यो व्रण' तिर्यक्छिन्न ऋजुश्छिन्नस्तिर्यक्छिन्न इत । ऋजु'ऋजुरपि चायता ऋजुमार्गाश्रयी दर्शो व्रण । आयत' दीर्घ । आयत इति तिर्यक् छिन्नस्य चायत विशेषणम् । गात्रस्य पातनं गात्रखण्डस्य छेदेन दूरपतनं वा छिन्न मित्यभिधीयते ।०। भिन्नमाह ।

"कुन्तशक्त्यृष्टिखड्गाग्रविषाणादिभिराशयः ।
हतः किञ्चित् स्रवेत्तद्धि भिन्नमित्यभिधीयते ।"

आशय' कोष्ठ ।०। कोष्ठभेदस्य लक्षणमाह ।

"स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च ।
हृदुण्डुक फुप्फुसश्च कोष्ठ इत्यभिधीयते ।
तस्मिन् भिन्ने रक्तपूर्णे ज्वरो दाहश्च जायते ।
मूत्रमार्गगुदास्येभ्यो रक्तं घ्राणाच्च गच्छति ।
मूर्च्छाश्वासतृडाध्मानमभक्तच्छन्द एव च ।
विण्मूत्रवातसङ्गश्च स्वेदास्रावोऽक्षिरक्तता ।
लोहगन्धित्वमास्यस्य गात्रदौर्गन्ध्यमेव च ।
हृच्छूलं पार्श्वयोश्चैव विशेषश्चाभिधीयते ।"
तस्मिन् कोष्ठे । भिन्ने शस्त्रादिभि । रक्तपूर्णे कोष्ठे तथाविधशस्त्रादिघातात् स्रुतेन रक्तेन पूर्णे वा ज्वरादयो जायन्ते ।०। आमाशये पक्वाशये च रक्तपूर्णे लक्षणमिदमाह ।

"आमाशयस्थे रुधिरे रुधिरं छर्दयत्यपि ।
आध्मानमतिमात्रञ्च शूलञ्च भृशदारुणम् ।
पक्वाशयगते रक्ते रुजा गौरवमेव च ।
अधःकाये विशेषेण शीतता च भवेदिह ।"
रुजा शूलम् । गौरव पक्वाशये । अधःकाये नाभेरधोदेशे विशेषेण गौरवमित्यन्वय । शीतता च भवेदिह । इह नाभेरधोदेशे शीतता च स्यात् । सा च पाकाभावात् ।०। विद्धमाह ।

"सूक्ष्मास्यशल्याभिहतं यदङ्गमाशयं विना ।
उत्तुण्डितं निर्गतं वा तद्विद्धमिति निर्दिशेत् ।"
आशयं विना कोष्ठं विना । उत्तुण्डितं व्यथितं शल्यम् । निर्गतं वा निर्गतशल्यं वा ।०। अथास्य व्रणस्य लक्षणमाह ।

"ज्ञातं वमेत पिच्छागुणञ्च
तद्दुर्मुहु पीडितचापमञ्च ।
व्यूहत ठुरस्तुत्थमार्थं
मर्दं यद्धध्ये मरणं वदन्ति ।"
तद्दुर्मुहु पीडितचापमं यदा यदा प्रच्छ चलति तदा तदा रुधिरं वहति । तज्ज्ञं चाभिहतम् ।०। कोष्ठभिन्नस्य प्रच्छ लक्षणमाह ।

"यथोऽतीव विदारीषि भिन्नाह्व परिक्षय
वा ।
कोष्ठे प्रमिहितं मर्म्म कुर्यादुद्गाढशमनात् ।"
